तिलक-महाराष्ट्र-विद्यापीठ-पाठ्यग्रन्थ

वैदिक-संशोधन-मण्डलेन

प्रकाशिता

॥ ऋग्वेदसंहिता ॥

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

२—५ मण्डलात्मकः

द्वितीयो भागः

शके १८५८

VAIDIKA SAMSHODHANA MANDALA

PRICE RS. 25/- CLOTH BOUND

Printed by **S. R. Sardesai**, B.A., LL.B., Manager,
Navina Samartha Vidyālaya's, Samartha Bhārat Press, Poona 2

All Rights Reserved

Published by N. S. Sontakke and S. K. Bhave, Secretaries,
Vaidika Samshodhana Mandala, Tilak Memorial, Poona 2 (India)

Tilak Maharashtra University
VAIDIKA SAMSHODHANA MAṆḌALA
(*Vedic Research Institute*)

ṚGVEDA-SAMHITĀ

WITH THE

COMMENTARY OF SĀYAṆĀCHĀRYA

VOL. II

2—5 Maṇḍalas

1936

VAIDIKA SAMSHODHANA MANDALA
PRICE RS. 2[redacted]/- CLOTH BOUND
Rs.25/

EDITORIAL BOARD

1 **N. S. Sontakke**, B. A. (T. U.) (*Managing Editor*)

2 **C. G. Kashikar**, M. A. (T. U.)

3 **T. S. Varadaraj Sharma**, Vedānta Vidyā Praviṇa

4 **B. V. Umranikar**

Consulting Editors

Prin. V. K. Rajawade, M.A.

M. M. Vasudevashastri Abhyankar



ब्रह्मीभूत–श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवानन्दसरस्वतीस्वामिनः

जन्मकालः–श्रावण व॥ ५
शके १७७६

समाधिकालः–आषाढ शु॥ १
शके १८३६

सादरं समर्पणम्

माण-ग्रामनिवासिनो द्विजवरात्तातादृणेशाभिधा-
ल्लब्ध्वाजन्म सुनिर्मले द्विजकुले साध्व्यां रमायां शुभम् ।
साङ्गाम्नायमधीत्य शास्त्रनिवहं श्रुत्वाऽऽत्तमादङ्गसा
सत्कर्मैकपरायणो विजयते टेंबेकुलालंकृतिः ॥ १ ॥

जीवान्भीमभवार्णवे निपतितानुद्धर्तुकामः सदा
ग्रन्थान्नैकविधान्व्यधात्सुविमलज्ञानैकपाथोनिधीन ।
नानातीर्थनिषेवणे विहितधीर्योगाद्विधमन्थाचलो
भ्राजद्भारतभूमिभालतिलकः श्रीवासुदेवो यतिः ॥ २ ॥

तस्याऽऽस्थां श्रुतिगोचरां निरुपमां ज्ञात्वा स्वधर्मे रतिं
स्मारंस्मारमनर्घनिस्तुलगुणान्कृत्संहिताया असौ
विद्यारण्यसुधीन्द्रभाष्यकलितो भागो द्वितीयोऽर्प्यते
तत्पुण्यस्मरणे कृतज्ञपरया बुद्धया समोदादरम् ॥ ३ ॥

प्रारम्भाः खलु कर्मणां सुमहतां सिध्यन्ति ये देहिनां
क्षीराब्धेर्दुहितुः कृपाङ्कुरितया दृष्ट्यैव न ह्यन्यथा ।
भागस्यास्य यदङ्कनं समभवद्गीतान्तरायं द्रुतं
दिष्ट्या तत्र तदिन्दिरागुरुकृपा हेतुत्वमापद्यत ॥ ४ ॥

INTRODUCTION

We have great pleasure in presenting to scholars and devout admirers of Ancient Indian culture the second volume of the Ṛgveda comprising four Maṇḍalas namely 2, 3, 4 and 5, together with the commentary of Sāyaṇāchārya.

As in the case of the first volume, we have laid under contribution twenty five manuscripts of Sāyaṇa's commentary to make the present one as critically thorough as possible. The following gives a detailed account of the manuscripts—

The Bhāndārkar Oriental Research Institute, Poona.

क $\frac{18\ b}{1870\text{-}71}$ 2nd Ashtaka with पृष्ठमात्रा. Samwat 1609.

ख $\frac{\text{No. 5}}{1916\text{-}18}$ $\frac{\text{No. 4}}{1916\text{-}18}$ 2 to 8 Ashtakas. Shaka 1739.

ग $\frac{\text{No. 15}}{\text{Vis. 1}}$ 2, 3 & 4 Ashtakas.

घ $\frac{\text{No. 4}}{\text{Vis. 1}}$ 3 to 7 Ashtakas. Samwat 1785.

The Bombay Branch of the Royal Asiatic Society.

च ZZ A 21 Ashtakas 1 to 6. This MS. was used for the first volume.

ज B. D. 115 & 240. Ashtakas 2 to 5. The first volume refers only to the second Ashtaka of this MS. Samwat 1730.

The Oriental Institute, Baroda.

ट Acc. No. 12211. 4th Ashtaka with पृष्ठमात्रा. Samwat 1452.

ठ Acc. No. 12210. 3rd Ashtaka. Samwat 1880.

ड Acc. No. 12231. 2nd Ashtaka. Samwat 1871. Leaves are missing at frequent intervals. The first volume wrongly refers to this MS. by no. 12331.

The India Office Library, London.

ढ $\frac{2992 \text{ to } 2999}{\text{R. R. } 14c}$ Ashtakas 1 to 8 complete.

ण $\frac{3126 \text{ to } 3129}{\text{R.R. } 15f.}$ " "

$\frac{1861 \text{ to } 1864}{\text{R.R. } 4d.}$ Ashtakas 3 to 8.

Saraswati Mahāl Library, Tanjore.

ल Burnell's catalogue. A complete manuscript of the commentary.

The Prājna Pāthashālā, Wai, Dist. Satara.

थ Ashtakas 1, 2, 5, 6, 7 & 8. This MS. could not be used for the first volume as we acquired it only recently.

The Theosophical Society, Adyar, Madras.

झ 1, 2, 4, 5 & 8 Ashtakas. Samwat 1835. The first volume refers to the third Aśhtaka which is really lacking.

झ१ 2nd Ashtaka, from the 2nd Adhyāya to the end of the Ashtaka. Written on palm-leaves in Grantha character.

The Sanskrit College Library, Benares.

ञ 2nd Ashtaka. Samwat 1851.

The Ānandāshrama, Poona.

ण Ashtakas 1 to 4.

ण१ 2nd Ashtaka.

The State Library, Bikaner.

त A complete MS. of the commentary written in 1747 of Samwat Era. This MS. could not be fully availed of as it was discovered only after the major portion of this volume had gone through the press. We have, however, consulted it for important readings as will be seen from the discussion of readings. It will, of course, be utilized in editing the subsequent volumes.

न Ashtakas 1 to 8 complete. From the private library of Shrimant Sardar M. V. Kibe of Indore. The first volume wrongly refers to Veda-Shāstra-Sampanna Digambar Shastri Nene as the source of this MS.

म Ashtakas 2, 5 & 7. Shaka 1596. From Veda-Shāstra-Sampanna Chidambar Dikshit of Badli, Dist. Belgaum.

भ Ashtakas 3 to 8 complete and some portion from 164th hymn of the first Maṇdala. Procured from Veda-Shāstra-Sampanna Krishṇāchārya Malgi of Bagalkot, Dist. Bijapur.

ब Ashtakas 1, 2, 4, 5, 6, 7 & 8. Shaka 1779. This MS. arrived just after some portion of this volume had been printed. Veda-Shāstra-Sampanna Mahābaleshwar Dikshit of Gokarna, Dist. N. Kanara, kindly lent it to us from his private collection.

व 3rd Ashtaka only. From Veda-Shāstra-Sampanna Dattatreya Prabhakar Khadilkar of Poona.

Classification of the above MSS.

Ashtaka II—

Division I—त-थ-न-व–conforming to our text. Subdivisions –(a)–न-व–more approximate to the text. (b)–त-थ–gives explanatory and also supplimentary readings.

Division II–क-ग्र-ग्र१-म–differs much from the text, but generally supports readings different from those of Prof. Max Müller. ग्र१, being in Grantha character, sometimes differs from the rest.

Division III—ख-ग-च-ज-ञ-ण-ण१—gives a considerable number of variants. Subdivisions–(a) ख-च-ञ, (b) ग-ज-ण१. ण generally resembles ग-ज-ण१, but sometimes agrees with the text.

Ashtaka III—

Division I—त-न-भ-ल-स- closely conforming to the text.

,, II—घ-प-फ. फ sometimes differs from घ-प ; घ-प omit grammatical portions and alternative explanations.

Division III—ख-ग-च-ज-ण–differs frequently from the text. Subdivisions—(a) ख-ग-च, (b) ज-ण.

Ashtaka IV—

Division I—ग-घ-ज-श–mostly conforming to the text. श occasionally differs. घ always omits the grammatical portion and alternative explanations and abridges the introduction to hymns; while ग-ज do so from the fourth Ashtaka.

Division II—ख-च-ण-प-फ-ब–shows some differences with the text. Subdivisions—(a) ख-च-ण–introduction to hymns is a little abridged. (b) प-फ-ब.

Division III—ग्र-त-न-भ-र–also shows differences with the text, frequently resembling ख-च-ण. These MSS. omit a number of words from the commentary.

In choosing readings we have given due importance to the authenticity of manuscripts. Every reading adopted in the text is generally based on manuscript or printed material. Sometimes we have had to adopt readings on the authority of even a single manuscript. The mere number of manuscripts has had no influence in the selection of readings. Prof. Max Müller says that he has manufactured readings out of the incorrect material before him and, in a few cases, even without any manuscript authority. Such readings have been marked *मॅ. Some of the readings so manufactured by him

have been found in certain MSS. used by us. Readings other than these suggested by him have been adopted even though they have not been supported by any MS. in our possession. The Bombay edition does not mention the MS. material on which its text is based. But on comparison of that edition and our MSS., we feel convinced that MSS. were utilized by the editors. In a few cases, therefore, we have adopted the Bombay readings where our MSS. and Prof. Max Müller's edition have failed We too have manufactured a few readings when all the above sources could give us no guidance. We have frequently differed from Prof. Max Müller and most of the above MSS. generally support our text in almost all such cases. We have stated reasons for such difference where necessary and have also quoted the readings in the Bombay edition ; vide discussion of readings at the end of the Sanskrit preface.

It is obvious that the reliability of a work like this depends on a number of complete and independent manuscripts acquired from different parts of India. In editing the first volume, we were able to consult a few palm-leaf manuscripts from the South. In the case of the present volume, however, we had only one and that too, covering only a portion of the second Ashtaka. These palm-leaf manuscripts form a class by themselves. They generally contain better readings and also occasionally additional elucidation. The importance of these MSS. will be evident from the foot-notes to the first volume. We hope to secure more manuscripts of this class for the subsequent volumes.

We gratefully acknowledge the many critical reviews, suggestions and encouragements from renowned scholars, which the publication of the first volume called forth. Their kind yet discriminating appreciation has redoubled our enthusiasm and energy for a task admittedly taxing and arduous. A critic remarks that " no MSS. of the text portions appear to have been consulted". But we have followed the traditional recitation of the Samhitā and the Padapātha; we do not think that there can be differences with regard to these two. We do not attach any importance to manuscripts in such a matter. Another critic remarks that we had not utilized manuscripts from Nepal. But on enquiry we were informed by Rājaguru Pandit Hemarāj of that State that no manuscripts of Sāyaṇa's commentary were available there; he also stated that the one MS. he knew of was merely a copy

of a printed work. We need not say that we have used every material available so far. It is the duty of lovers of Vedic literature to search for more manuscripts so that the edition may be as faultless and as useful as possible.

Notwithstanding scrupulous care, misprints have unfortunately occurred, a full list of which will be found at the end. We request our readers to bring defects to our notice and we shall see in future volumes that such defects do not recur.

In conclusion, we feel it a duty to thank those institutions and individuals who have so kindly and so readily lent us or procured for us valuable manuscripts. We cannot conclude without expressing our deep sense of gratitude to the generous-hearted ruling princes in Kathiawar, Rajputana, Central India and the Southern Maratha Country and also those others that are helping us in our undertaking. Especially we must mention here with deep regard and gratitude the name of Her Highness Mahārāni Saubhagyavati Indirābāi Mā Saheba Holkar, Indore, whose encouragement has been of immense service to us. Financial reasons have delayed the publication of this volume and the delay would have been greater, but for the timely noble assistance rendered by Her Highness. In obedience to Her Highness's earnest desire we are dedicating this volume to the sacred memory of her revered Guru Shrimat Paramahamsa Parivrājakāchārya Shri Vāsudevānanda Saraswati Tembe Swāmi who departed this life some twenty five years ago. It is well known what a great Yogi he was and how he brought many an erring soul to the path of righteousness. We must also acknowledge the services of Mr. S. R. Sardesai, manager of the Samartha Bhārat Press, who has helped in making this edition as accurate as possible. We hope, this volume, too, will meet with the approval of scholars.

20th December, 1936
Vaidika Samshodhana Mandala,
Tilak Memorial, Poona 2 (India)

N. S. SONTAKKE
Managing Editor

The Executive Committee of the V. S. Mandala

President

Prin. V. K. Rajawade, M.A.

Vice-President

Mr. C. V. Vaidya, M.A., LL.B.

Members

Mr. N. C. Kelkar, B.A., LL.B.
Shrimant Sardar M. V. Kibe, M.A.
Mr. J. S. Karandikar, B.A., LL.B.
Mr. Y. R. Date, B.A., LL.B.
Āyurvedāchārya P. G. Nanal Shastri
Vidyānidhi Siddheshwarashastri Chitrav
Āchārya V. P. Limaye, B.A., (T.U.)

Secretaries

Mr. N. S. Sontakke, B.A. (T.U.)
Mr. S. K. Bhave, B.A. (T.U.)

प्रास्ताविकम्

॥ श्रीगणेशाय नमः ॥

अथायम् ऋग्वेदसंहितायाः श्रीसायणाचार्यभाष्यसमेतायाः द्वितीयादिपञ्चमान्तमण्डलचतुष्टयात्मको द्वितीयो भागः विद्वज्जनकरकमलेषु सादरं समर्प्यत इति निवेदयितुमतिमात्रं मोदामहे ।

प्रथमभागवदस्यापि संशोधने बहूनि भाष्यलिखितपुस्तकान्युपयुक्तानि । तेषां संज्ञाद्यधो निर्दिश्यते—

पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्यासंशोधनमंदिरसंबन्धीनि—

क $\frac{18\ B}{1870\text{-}71}$ द्वितीयाष्टकभाष्यम् । लेखनकालः संवत् १६०९ । पृष्ठमात्रावन्त्यक्षराणि ।

ख $\frac{5}{1916\text{-}18}$ $\frac{4}{1916\text{-}18}$ द्वितीयाद्यष्टमान्ताष्टकसप्तकभाष्यम् । लेखनकालः शकः १७३९ ।

ग $\frac{15}{\text{Vis. I.}}$ द्वितीय-तृतीय-चतुर्थाष्टकानां भाष्यम् ।

घ $\frac{4}{\text{Vis. I.}}$ तृतीयादिसप्तमान्ताष्टकपञ्चकभाष्यम् । लेखनकालः संवत् १७८५ ।

मुम्बापुरीस्थ—' रॉयल एशियाटिक सोसायटी '-संबन्धिग्रन्थसंग्रहालयादानीते—

च ZZ A 21 प्रथमादिषष्ठान्ताष्टकषट्कभाष्यम् । प्रथमभागसंशोधनार्थमिदमुपयुक्तम् ।

ज B. D. 115 and 240 द्वितीयादिपञ्चमान्ताष्टकचतुष्टयभाष्यम् । प्रथमभागे द्वितीयाष्टकसंशोधनार्थं यत् ज-संज्ञाङ्कितं पुस्तकमुपयुक्तं तदेतदेव ।

वटोदर(बडोदा)नगरस्थित-' ओरिएण्टल इन्स्टिटयूट '-सबन्धिग्रन्थसंग्रहालयादानीतानि—

र ACC. 12211 चतुर्थाष्टकभाष्यम् । पृष्ठमात्रावन्त्यक्षराणि । लेखनकालः संवत् १४५२ ।

ल ACC. 12210 तृतीयाष्टकभाष्यम् । संवत् १८८० ।

व ACC. 12231 द्वितीयाष्टकभाष्यम् । संवत् १८७७ । मध्ये क्वचित् क्वचित् पत्राणि विनष्टानि । प्रथमभागेऽस्योल्लेखः कृतः । परंतु तत्र प्रमादात् १२३३१ इति क्रमाङ्को दत्तः ।

लण्डननगरस्थित—' इन्डिया ऑफिस लायब्ररी '-नामकग्रन्थसंग्रहालयादानीतानि—

प 2992–2999 (R.R. 14 C) आदित आरभ्य अष्टमाष्टकान्तं समग्रं भाष्यम् ।

फ 3126 –3129 (R.R. 15 f) ,, ,, ,,

ब 1861-64 (R. R. 4 d) तृतीयाष्टकादारभ्य अष्टमाष्टकान्तं भाष्यम् ।

मद्रपुर(मद्रास)निकटवर्ति-अडयारग्रामस्थित-' थिऑसॉफिकल सोसायटी '—संबन्धिग्रन्थसंग्रहालयादानीते—

भ्र प्रथमद्वितीयचतुर्थपञ्चमाष्टमाष्टकानां भाष्यम् । प्रथमभागप्रस्तावनायामिदमुल्लिखितम् । परंतु तत्र तृतीयाष्टकस्यापि भाष्यमस्तीति यन्निर्दिष्टं तत्प्रामादिकम् ।

ञ१ द्वितीयाष्टकस्य द्वितीयाध्यायमारभ्य द्वितीयाष्टकसमाप्तिपर्यन्तम्। इदं ग्रन्थलिपिलिखितं तालपत्रपुस्तकम्।

पुण्यपत्तनस्थ-'आनन्दाश्रम'-संबन्धिग्रन्थसंग्रहालयादानीते—

ण प्रथमाष्टकादारभ्य चतुर्थाष्टकान्तं भाष्यम्।

ण१ द्वितीयाष्टकभाष्यम्।

ज्ञ द्वितीयाष्टकभाष्यम्। वाराणसीस्थ—'संस्कृत-महाविद्यालय'-संबन्धि। संवत् १८५१।

त तञ्जौरनगरस्थ—सरस्वतीमहालग्रन्थसंग्रहालयस्थं समग्रं भाष्यम्।

थ तृतीयचतुर्थवर्जमितरेषामष्टकानां भाष्यम्। वैराज (वाई) क्षेत्रस्थित–प्राज्ञपाठशालासंबन्धि। प्रथमभागमुद्रणानन्तरमिदमुपलब्धमतस्तत्संशोधने नास्योपयोगः कर्तुं पारितः।

न प्रथमाष्टकादारभ्य अष्टमाष्टकान्तं समग्रं भाष्यम्। इन्दूर-नगरवास्तव्य-श्रीमत् मा. वि. किबे-महोदयानामिदं पुस्तकम्। प्रथमभागप्रस्तावनायां वेदशास्त्रसंपन्न-दिगम्बरशास्त्री नेने-महाशयानामिदमित्यज्ञानत उल्लिखितमिति मन्तव्यम्।

भ अस्यवामीयसूक्ते (म. १ सू. १६४) केषांचिन्मन्त्राणां तथा तृतीयाष्टकादारभ्य अष्टमाष्टकान्तभागस्य च भाष्यम्। इदं पुस्तकं विजापूरप्रान्तीय बागलकोटग्रामवास्तव्य-कृष्णाचार्य-मळगी-महोदयैर्दत्तम्।

म द्वितीय–पञ्चम–सप्तमाष्टकानां भाष्यम्। लेखनकालः शकः १५९६। इदं पुस्तकं वेणुग्राम-(बेळगांव)प्रान्तीय–बडलीग्रामवास्तव्य–चिदम्बरदीक्षितमहोदयैर्दत्तम्।

य प्रथमाष्टकादारभ्य अष्टमाष्टकान्तं समग्रं भाष्यम्। बिकानेरराजकीयसंस्कृतपुस्तकालयस्थम्। अस्य पुस्तकस्योपलब्धेः प्रागेव एतद्भागमुद्रणमवसितप्रायमासीत्। अतः प्रधानानामेव केषांचित्पाठानां पाठभेदादिविचारे संग्रहः कृतः। तथाप्यवशिष्टभागमुद्रणे इदं पुस्तकं सुष्ठूपयोक्ष्यते।

श तृतीयाष्टकवर्जं समग्रं भाष्यं १७७५ शके लिखितम्। इदं पुस्तकं गोकर्णक्षेत्रवास्तव्य–वेदशास्त्रसंपन्न-महाबलेश्वरदीक्षितमहाशयैर्दत्तम्। अस्य भागस्य कियदंशमुद्रणानन्तरमिदमुपलब्धम्।

स तृतीयाष्टकभाष्यम्। पुण्यपत्तनवास्तव्य–वेदशास्त्रसंपन्न–दत्तात्रेयशास्त्रि–खाडिलकर-महाशयैर्दत्तम्॥

एतेषु पुस्तकेषु समानपाठानुपलम्भनिबन्धनं केषां केषां परस्परसादृश्यं समीक्षितमिति निरूप्यते।

द्वितीयाष्टकपुस्तकमध्ये तावत्—

१ त-थ-न-व-पुस्तकेषु पाठाः प्रायशः समाना एव अस्मत्स्वीकृतपाठानुसारिणश्च। तत्रापि न-व–पुस्तकपाठानामस्मदीयपाठानां च विशेषतः साम्यमुपलभ्यते। त-थ-पुस्तकयोः क्वचिदधिकानि विवरणवाक्यान्युपलभ्यन्ते।

२ क-ङ-ङ१-म–पाठाः अस्मत्स्वीकृतपाठेभ्यः प्रायशो विभिन्नाः तथापि यत्र मैक्समुल्लरपाठेभ्यो विभिन्नाः पाठा अस्माभिः स्वीकृताः तत्रैते अस्मत्स्वीकृतपाठैः संवदन्ते।

३ ख-ग-व-ज-ज्ञ-ण-ण१–पुस्तकेषु बहवः पाठभेदा उपलभ्यन्ते। तत्रापि ख-च-ञ–पुस्तक-पाठानां ग-ज-ण१–पुस्तकपाठानां च विशेषतः परस्परसाम्यं दृश्यते। ण–पुस्तके पाठभेदा न्यूनाः ये चोपलभ्यन्ते ते ग-ज-ण१-पुस्तकपाठसंवादिनः।

तृतीयाष्टकपुस्तकेषु—

१ त-न-भ-ल-स-पुस्तकानि मूल(text)पाठानुसारीणि ।

२ घ-प-फ । प्रायशः परस्परसाम्यवन्ति । तत्रापि फ-पुस्तकमितराभ्यां भिद्यते क्वचित् । घ प-पुस्तकयोः व्याकरणप्रक्रिया विकल्पितार्था इत्यादयो न सन्ति ।

३ ख-ग-च-ज-ण । बहुत्र मूलपाठविसंवादीनि । एष्वपि ख-ग-च--पुस्तकानां ज-ण-पुस्तकयोश्च विशेषतः परस्परसाम्यमुपलभ्यते ।

चतुर्थाष्टकपुस्तकेषु—

१ ग घ-ज-श । एतानि मूलपाठसंवादीनि । घ-पुस्तके, चतुर्थाष्टकादारभ्य ग-ज-पुस्तकयोश्च व्याकरणप्रक्रियादिकं न विद्यते, प्रतिसूक्तं ऋष्यादिबोधकप्रस्तावनायाश्च संक्षेपः कृतः ।

२ ख-च-ण-प-फ-ब । क्वचिन्मूलपाठविसंवादीनि । एष्वपि ख-च-ण-पुस्तकानां प-फ-ब-पुस्तकानां च विशेषतः परस्परसाम्यं दृश्यते । ख-च-ण-पुस्तकेषु प्रतिसूक्तं ऋष्यादिबोधकप्रस्तावनायाः संक्षेपः कृतोऽस्ति ।

३ अ-त-न-भ-र । एष्वपि मूलपाठविसंवादः क्वचिदुपलभ्यते । एतानि ख-च-ण-पुस्तकैः सहापि सामान्यतः साम्यमावहन्ति । एषु सप्तस्वपि पुस्तकेषु इतस्ततः पदानि वाक्यानि च गलितानि ।

इमानि सर्वाण्यपि लिखितपुस्तकान्यवलोक्य एतदुपलब्धाः विभिन्नाः पाठाः सम्ग्राह्यिष्यामाभिः । तत्र ये अर्थतः शब्दतश्चानवद्याः ते मूले स्वीकृताः । एकस्मिन्नपि पुस्तके समीचीनः पाठ उपलब्धश्चेत् प्रायशः स एव स्वीकृतः । परंतु क्वचित्क्वचित्सर्वेष्वपि पुस्तकेषु लेखकप्रमादनिबन्धनाः अशुद्धा एव पाठा उपलभ्यन्ते । एतादृशस्थलेषु प्रायशः शुद्धपाठाः स्फुटं शक्यन्त एवानुमातुम् । मॅक्स-मुलरपण्डितैरपि एतादृशस्थलेष्वभ्यूहिता एव पाठाः स्वीकृताः । परंत्वेतैरभ्यूहिताः केचित् पाठा अस्मदीयादर्शपुस्तकेष्वप्युपलभ्यन्ते । यत्र आदर्शपुस्तकेषु शुद्धपाठा नोपलब्धाः तत्र मॅक्समुलरस्वीकृता एव पाठाः प्रायश अस्माभिरपि स्वीकृताः । ये च मॅक्समुलरमहाशयैर्मूलपुस्तकेष्वनुपलब्धाः पाठाः संभावना-मात्रेण स्वीकृताः तेऽस्माभिः पाठभेदादिविचारे निर्दिष्टाः । एतेषां पृथगवगमार्थं मे इत्यक्षरात्पूर्वं तारांचिह्नमपि कृतं समस्ति । मुम्बापुरीमुद्रितपुस्तकस्य मूलपुस्तकं किमिति तत्संशोधकैर्न निर्दिष्टमस्ति । तथापि तत्पुस्तकस्यास्मदीयादर्शपुस्तकानां च तुलनयेदमवगम्यते यत्तैरपि संशोधनकृते कानिचित् पुस्तकान्युपायुज्यन्तेति । तस्माद्यत्रास्मदीयादर्शपुस्तकेषु मॅ-पुस्तके च शुद्धपाठा नोपलब्धा एतादृशेषु द्वित्रेषु प्रदेशेषु मुम्बापुरीपुस्तकपाठा अप्यस्माभिः स्वीकृताः । यत्रादर्शपुस्तकेषु पूर्वोक्तमुद्रितपुस्तकयो-श्चाशुद्धा एव पाठा उपलभ्यन्ते तत्राप्माभिरपि पाठा अभ्यूहनीया एव संवृत्ताः । परंत्वेतादृशप्रदेशाः अतीव विरलाः । अस्मिन् भागे बहुत्र मॅक्समुलरपुस्तकपाठापेक्षया समीचीना विभिन्नाः पाठा अस्माभिः प्रायशः बहुलिखितपुस्तकानुसारेण स्वीकृताः, ते सर्वेऽपि पाठभेदादिविचारे प्रपञ्चिता एव । एतादृशस्थलेषु मुम्बापुरीमुद्रितपुस्तकपाठा अपि तुलनार्थं पाठभेदादिविचारे उल्लिखिताः ।

प्रथमभागसंशोधने तावत् कानिचन दाक्षिणात्यानि तालपत्रपुस्तकान्यस्माभिरपलब्धानि । परंत्वेतद्भागसंशोधनार्थमेकमेवोपलब्धम् । तदपि द्वितीयाष्टके केषांचिदध्यायानामेव । एतेषु पुस्तकेषु

नागरीलिपिलिखितपुस्तकपाठेभ्यो भिन्नाः समीचीनतराश्च पाठा बहुश उपलभ्यन्ते । प्रथमभागस्थानामेतत्पुस्तकपाठानामवलोकनेनैवैतेषां वैशेष्यमवगन्तुं शक्यते । याक्च्छक्यमस्माभिरेतादृशपुस्तकसंपादने प्रयत्नः क्रियत एव ।

यैश्च मर्नाषिप्रवरैः प्रथमभागप्रकाशनानन्तरं तद्गुणदोषपरीक्षणेन उपयुक्तसूचनाभिश्च अस्माकमतिमहत्येतस्मिन् कार्ये प्रवृत्तिरुत्सहश्च द्विगुणीकृतौ तेभ्यो बहुशो धन्यवादान् वितरामहे । केनचित्सुधिया निरूपितमासीत् यत्संहितापदपाठयोः संशोधने न कान्यपि पुस्तकानि प्रमाणीकृतानीति प्रतिभातीति। अत्रेदं ब्रूमो यन्मात्रयापि भ्रमप्रमादादिदोषरहितोऽनादिकालप्रवृत्तो वैदिकसंप्रदाय एवास्माभिः प्रमाणीकृत इति। लिखितपुस्तकेषु लेखकप्रमादानां संभाव्यमानतामनुचिन्त्य द्वाभ्यां श्रोत्रियप्रवराभ्यां संहितापदपाठयोः संशोधनमकारि । अपरेण विपश्चिता समसूच्यत यत् नेपालदेशस्थानि भाष्यपुस्तकानि संशोधनकृते नोपयुक्तानीति । परंतु नेपालमहाराजगुरवः पण्डितवर्याः हेमराजमहोदयाः पत्रद्वारास्माभिः पृष्टा एवं निवेदयन्ति—सायणभाष्यपुस्तकं तद्देशे नास्त्येव । यत्कुत्रचिदेकं विद्यते तत्कस्यापि मुद्रितपुस्तकस्य प्रतिलिपिरेवेति । यथोपलम्भमस्माभिः संशोधनकृते पुस्तकानि समग्राहिषत । यत्र क्वचिदस्माभिरज्ञातानि पुस्तकानि विद्यन्ते चेत् वेदविद्याप्रेमिनोऽस्मानवगमयेयुरिति संप्रार्थयामहे येन तेषामुपयोगः संशोधनविधौ क्रियेत ।

अङ्गीकृतायामपि महत्यां जागरूकतायां ये केचन मुद्रणदोषाः समभवन् तेऽन्ते संगृहीताः। यदीतरे केचन दोषाः सुधियां दृष्टिपथमवतरेयुस्तेऽस्माकं निवेदनीया इत्यभ्यर्थ्यते, येनैतादृशदोषपरिहरणेऽस्माभिः इतः परं यत्न आस्थीयेत ।

अन्ते च अस्यापि भागस्य संशोधनकृते भाष्यलिखितपुस्तकदानेनास्माननुगृहीतवतामुपकारभरमविस्मरणीयं मन्यामहे । अपि च यैश्च सौराष्ट्र-राजस्थान-मध्यभारत-महाराष्ट्रादिदेशीयैर्नृपवर्यैरितरैश्चोदारहृदयैरेतद्भागप्रकाशनार्थमनल्पेन द्रविणदानेन साहाय्यकमारचितं तेषामपि बहुशो धन्यवादान् वितरामहे। अत्र च इन्दूरनगरस्थ-होळकरकुलेन्दिराया महाराज्ञ्या सौ. इन्दिरादेव्या नाम विशेषत उल्लेखार्हं मन्महे । यद्येषा महाराज्ञी सामयिकेन द्रव्यदानेन नोपाकरिष्यत् तर्ह्येतद्भागप्रकाशनमितोऽपि व्यलम्बिष्यत। एतस्या एव महाराज्ञ्या आदेशादयं भागः एतत्परमपूज्यगुरूणां ब्रह्मीभूतश्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीवासुदेवानन्दसरस्वतीस्वामिनां स्मृतये समर्प्यते । एते च योगिवर्याः स्वसूक्तिभिर्लोकानां मोहजालमपाकुर्वन्त इमां भारतभूमिमलमकार्षुः, उपपञ्चविंशवत्सरेभ्यः प्राक् ब्रह्मभूयं चागमन् । अपि च श्रीसमर्थभारतमुद्रणालयाधिकृतानां श्री. स. रा. सरदेसाई—महाशयानामपि कृतज्ञतां प्रदर्शयामहे । अन्ते चायमपि भागः प्रथमभागवत् बुधानामादरार्हः स्यादित्याशास्महे ।

१८५८ शकवत्सरे
मार्गशीर्षशुद्धसप्तम्याम्

विद्वज्जनविधेयो वै. सं. मण्डलकार्यवाहः
सोनटक्के इत्युपाह्वो नारायणशर्मा

ॐ

॥ श्रीगणेशाय नमः ॥

॥ पाठभेदादिविषयकविचारः ॥

मॅ = मॅक्समुल्लरसंशोधितपुस्तके । एतस्मात्पूर्वं यत्र * एतच्चिह्नं दत्तं तत्र मॅक्समुल्लरमहाशयानां तत्संशोधितपुस्तकेषु तादृशः पाठो नोपलब्ध इति मन्तव्यम् ।

मु = मुम्बापुरीमुद्रितपुस्तके ।

§ = सर्वेषु लिखितपुस्तकेषूपलभ्यते । परंतु यत्र य-पुस्तकपाठः पृथङ्निर्दिष्टः तत्र तद्वर्जेष्विति बोध्यम् ।

× = सर्वेषु लिखितपुस्तकेषु नास्ति । अत्रापि य-पुस्तकपाठः पृथङ्निर्दिष्टश्चेत् तद्व्यतिरिक्तेषु नोपलभ्यते इत्यर्थो ज्ञेयः ।

२. १ **सनन्तस्य**—अत्र ' ङ्मो ह्रस्वात्° ' (पा. सू. ८. ३. ३२) इति सूत्रेण यद्यपि ' सन्नन्तस्य ' इति भाव्यं तथापि ' आगमशास्त्रमनित्यम् ' इति परिभाषया समाधेयोऽयं पाठः । एतादृशस्थलेषु क्वचित् ङ्मुडागमसहितः क्वचित् तद्विरहितश्च पाठः लिखितपुस्तकेषु उपलभ्यते । यथोपलम्भं चास्माभिः स्वीकृतः । वैयाकरणैस्तु ' सन्नन्तः ' इत्यादौ ङ्मुडागमः क्रियते । ' यङन्तः, यणचि ' इत्यादौ न क्रियते च ॥ २.२ **आशु शीघ्रं शुच् दीप्तः सन् यतः संसेव्यते**—ख-च-ण१-य । आशु शीघ्रं शुचा दीप्ता सन् यतः संसेव्यते—ज्ञ-ण-थ-न-व । आशु शीघ्रं शुचा दीप्ता सन् यतः संसोव्यते—क-म्र । आशु शीघ्रं शुचा दीप्त्या सन् यतः संसेव्यते—त । आशु शीघ्रं शुच् दीप्तः सन् यतः स सेव्यते—*मॅ । आशु शीघ्रं शुच् दीप्तः सन् यतः संसेव्यसे—मु । अत्र ' आशु शीघ्रं शुचा दीप्त्या सन्यते सेव्यते' इति पाठः स्यादिति मॅक्समुल्लरमहाशयाः उत्प्रेक्षन्ते ॥ २. १५ **आग्नीध्रश्च**—क-ख-च-म्र१-ण१-भ-व-मु । अग्नीध्रश्च—थ-न-य-मॅ ॥ ३. १७ **शोभनवीर्यं धनम्**—§-मु । शोभनवीर्यम् । वीर्यं धनम्—मॅ । परंतु वीर्यशब्दस्य धनवाचित्वमितरत्र क्वापि न दृश्यते । ऋ. सं. १. ३६. १७, १. ४०. २, ३. १०. ८ इत्यादिप्रदेशेषु सुवीर्यशब्दस्य शोभनवीर्योपेतं धनमिति धनं विशेष्यत्वेनाध्याहृत्य व्याख्यानं दृश्यते । अस्मत्स्वीकृतपाठेऽपि शोभनवीर्यम् इत्यस्य बहुव्रीहिमाश्रित्य शोभनवीर्योपेतमिति धनविशेषणत्वेन अर्थो बोध्यः ॥ ४. १० **नुग्नः**—क-म-य । उप्तः—मॅ-मु ॥ ५. १८ **पितृत्वकामाय पितृत्वेन भ्रातृत्वकामाय भ्रातृत्वेन पुत्रत्वकामाय पुत्रस्थानीयो भवसि** । अत्र अग्निनिष्ठं पितृत्वादिकं कामयमानाय—अग्निं स्वपितृत्वेन भ्रातृत्वेन पुत्रत्वेन वा कामयमानाय—इत्यर्थो बोध्यः ॥ ५. २५ **मन्त्रप्रतिपाद्याकारेण** । लिखितपुस्तकेषु ' मन्त्रप्रतिपाद्यत्वाकारेण ' इति दृश्यते तदशुद्धं प्रतिभाति ॥ ६. १० **होमनिष्पादिका**—क-म-मु । होमनिष्पादका ?—मॅ । अपाणिनीय एष पाठः ॥ ६. १४ **एतन्नियामिका**—म्र१-ण-म । एतन्नियामका ?—मॅ-मु । एषोऽप्यपाणिनीयः ॥ ७. २० **वसुः**—§-मॅ-मु । अत्र ' शुचिः ' इत्यस्य स्थाने ' वसुः' इति भाष्यकारः पठितवान् ॥ ८. ३-४ **मन्त्रसहितमथनेन**—§-मु । शोभनमन्त्रसहितमथनेन—मॅ ॥ ८. १६ **एतद्द्वयं प्राधान्याभिप्रायम्**—§-मु । एतद्द्वयप्राधान्याभिप्रायाम् ?—मॅ ॥

९. ६ **प्रवर्धत**—म-वर्जपुस्तकेषु मॅ-पुस्तके च । प्रवर्धयत—म-मु । अयमेव युक्तः पाठः ॥ ९. १० **अग्निपाटवे सति शारीरं बलं भवतीति प्रसिद्धम्**—म्र१ । अग्निपाटवे सति शारीरं भवतीति प्रसिद्धम्—ख-ग-घ-ण१ । अग्निपाटवे सति शरीरबलं स्य भवतीति सिद्धम्-क । अग्निपाटवे

मति शरीरं बलं भवतीति प्रसिद्धम्—थ-न-य-व । अग्निपाटवे सति शरीरबलं भवतीति प्रसिद्धम्—मे । अग्नेः पाटवे सति शरीरं बलवत् भवतीति प्रसिद्धम्—मु ॥ ९. १७ **आकाङ्क्षन्ते**—च-अ१-व्यतिरिक्तेषु लिखितपुस्तकेषु । आकाङ्क्षते—च-मॅ । आकाङ्क्षन्ति—अ१ ॥ ९. १९ **सुरुद्रुरणाधिकरणेषु**—क-ख-ग-च-ञ-ञ१-ण-ण१-त-थ-न-य । स्वसरणाधिकरणेषु—मॅ । सरणाधिकरणेषु—मु ॥ ११. १० **द्युलोकान्तरिक्षम्**—§-मे । अत्र द्युलोकोऽन्तरिक्षमिति मु-पुस्तके पाठः । अयमेव साधुः ॥ ११. २४ **वि दिद्युतुः** । वि दिद्युतः—मे । परंतु अत्र वैदिका 'वि दिद्युतुः' इत्येव अधीयते ॥ १३. १८ **पिता दीप्यते**—मु । पिता दीप्यति–ख-ग-च-ण-त-थ-न-य-व । दीप्यति-क-म । दीप्यते-अ१ । पित्रा दीप्यते—*मॅ ॥

१७. ५ **समाङ्क्ताम्**—मे-मु । समक्तम्—क-ख-ञ-म । समङ्क्तम्—ग-च-ज-ञ-ण-ण१-त-थ-न-फ-य । सक्तम्–व ॥ १७.१०-११ **सरस्वती एतन्नामिकेयं देवी तथा इळा देवी भारती च**–क-ञ-अ१-म । सरस्वती इळैतन्नामिका देवी भारती च—मॅ-मु । सरस्वती एतन्नामिका देवी भारती च—य ॥

१९. २१ **य एवं देवैः**—§ । स एवं देवैः—म । एवं देवैः—मु ॥ २०. ६-७ **यद्वा अस्याग्नेः संबन्धिनी पुष्टिः यजमानविषया रण्वा स्वस्याग्नेः पुष्टिर्यथा रण्वा तद्वत्**—थ-म । यद्वा अस्याग्नेः संबन्धिनी पुष्टिर्यथा यजमानविषया रण्वा तद्वत—य-मे-मु । अग्नेः स्वीयपुष्टिर्यथा रमणीया तद्वद्यजमानस्य पुष्टिरपि अग्नेः रमणीया इति अस्मत्स्वीकृतपाठस्यार्थः ॥ २०. ८ **धक्षोः**—क ञ-म-य मु । दक्षोः—मॅ ॥ २१. २० **व्यथाकराः**—क-ञ-म-मु । व्यथकराः ?—य-मॅ ॥ २१. २२ **संततानि**—§ । सततानि—मॅ-मु ॥ २२. १० **छान्दसं भजन्तः** ?—ख-ग-च-ण-ण१-त-थ-य-व-मॅ । त्वां संभजन्तः—मु । अयं समीचीन इति प्रतिभाति ॥ **पारोक्ष्येण**—क-ख-ग-च-ण१-फ-मु । परोक्ष्येण ? -य-मॅ ॥ २२. १२ **उपरेऽधिकत्वेन**—? मॅ । उपरि अधिकत्वेन—मु । अत्र 'उपरोधकत्वेन' इति स्यादिति संभाव्यते ॥

२२. २८ **प्रयक्षम्** । 'प्रयक्षन्' इति पदपाठः । भाष्यकारः 'प्रयक्षम्' इत्यधीते ॥ २३. १४ **पूर्वास्मिन् मन्त्रे**—क-ञ-थ-म । पूर्वे मन्त्रे—ख-ग-च-ञ१-ण-ण१-न-य-व-मॅ-मु ॥ २३. १८ **काव्या काव्यानि**—ख-ग-च-ञ१-ण-न-म-मु । काव्यानि-य-मॅ ॥ २४. ८ **अङ्गुलयः**—ख-ग-ञ१-ण-ण१-न-य-मु । या अङ्गुलयः—थ-व-मे ॥ २५. १२ **तमेव तस्मात्त्वम्**—क-च-ण-थ-म-य-ल । त्वमेव तस्मात्त्वम्—ख-ग-ण-मु । त्वमेव तस्मात्तम्–मे ॥ २५. १३ **सर्वेदवार्थं यागम्**—क-ग-च-ण-ण१-न-म । सर्वदेवार्थयागम्—मॅ-मु ॥

२५. १६ **अपराह्लिक्याम्** । अत्र 'आपराह्लिक्याम्' इति भाव्यम् ॥ २६ ३ **संत्वरमाणा ह्युपसदमाचरन्ति**—*मॅ । संत्वरमाणा ह्युपसदाचरन्ति—य-मु ॥ २६. ५ **स्तुत्युपबृंहितेन**—*मॅ-मु । २६. २२ **युवतम**—§-मु । युवत्तम—मॅ ॥

२७. १७ **श्रावणीकर्मणि**—अ१-वर्जेषु । श्रवणाकर्मणि—*मॅ-मु । अयमेव समीचीनः पाठः ॥ २७.२० **युवतम**—§-मु । युवत्तम–मॅ ॥ २७.२१ **मथनहविःस्तोत्रादिना**—थ-वर्जितेषु । मन्थन°—मे-मु ॥ २८. ८ **अल्पस्तुतीरिव**—*मॅ । अमस्तुतीरिव–य; अल्पस्तुतीरिव–मु ॥ **त्मना** । 'त्वया' इत्यस्य स्थाने 'त्मना' इति भाष्यकारः पठति ॥

३०. ११ **सचेमहि संगच्छेमहि**—क-च-ञ-ञ१-ण१-म-ल-मु । सचेमहि—ख-ग-ण-थ-न-य-मॅ ॥

३२. २६ **यद्वा मनोता** ? —§ । यद्वा मानयिता-*मॅ-मु ॥ ३३. ८ **इत्यत्रोक्तः**—§-मॅ-मु । अत्र 'अत्र' इति पदमनावश्यकम् । 'इत्यत्रोक्तः' नास्ति–य ॥ ३३. १९ **हविष्प्रदानेन** ।

एतादृशप्रदेशेषु ' हविःप्रदानेन ' इति सविसर्गपाठः लिखितपुस्तकेषु दृश्यते । तथापि स व्याकरण-विरुद्ध इति उपेक्षितः ॥

३४. १७ **अश्वौ रथं वहतः**—§-मॅ । अश्वौ वहतः-य । मु-पुस्तके एतन्नास्ति ॥ ३४. १८ **उत अपि च अरुषा आरोचमानौ शुक्रवर्णावश्वौ वहतः**—क-झ-य-व । मॅ-पुस्तके एत-न्नास्ति । उत अपि च अरुषा आरोचमानावश्वौ रथं वहतः-ण-मु ॥ ३५. १३-१४ **सिञ्चामि दीपयामि वा । ' घृ क्षरणदीप्त्योः ' । लटि रूपम् । अस्मिन्तृचे (?) वाजसनेयकम्—जुहाम्यग्निं हविषा घृतेन**—क-झ-म-व । अयं भागः मॅक्समुल्लरमहाशयैर्नोपलब्धः । (तृचे=त्सवे—म । जुहाम्यग्निं=जिघर्म्यग्निम्—म) । सिञ्चामि—मु । इदं ब्राह्मणवाक्यं ' जिघर्म्यग्निं हविषा,' ' आ विश्वतः प्रत्यञ्चम् ' इति मन्त्रद्वयस्य व्याख्यानरूपं दृश्यते । परं त्वेतादृशानुपूर्वी कुत उद्धृतेति न ज्ञायते । शतपथब्राह्मणगतः एतन्मन्त्रव्याख्यानरूपः काण्वमाध्यंदिनशाखयोः प्रायशः समानः ब्राह्मणभागः अधो दीयते—

आ त्वा जिघर्मि मनसा घृतेनेति । आ त्वा जुहोमि मनसा च घृतेन चेत्येतत्प्रतिक्षियन्तं भुवनानि विश्वेति प्रत्यङ् ह्येष सर्वाणि भुवनानि क्षियति पृथुं तिरश्चा वयसा बृहन्तमिति पृथुर्वा एष तिर्यङ् वयसो बृहन्धूमेन व्यचिष्टमन्नै रभसं दृशानमित्यवकाशवन्तमन्नैरन्नादं दीप्यमानमित्येतत् ॥१९॥ आ विश्वतः प्रत्यञ्चं जिघर्मीति । आ सर्वतः प्रत्यञ्चं जुहोमीत्येतदरक्षसा मनसा तज्जुषेतेत्यहेड-मानेन मनसा तज्जोषयेतेत्येतन्मर्यश्रीः स्पृहयद्वर्णो अग्निरिति मर्यश्रीर्ह्येष स्पृहयद्वर्णोऽग्निर्नाभिमृशे तन्वा जर्भुराण इति न ह्येषोऽभिमृशे तन्वा दीप्यमानो भवति ॥ २० ॥

तैत्तिरीयसंहितायामप्येतन्मन्त्रद्वयव्याख्यानमुपलभ्यते । यथा—जिघर्मि ॥ ४ ॥ अग्निं मनसा घृतेन प्रतिक्ष्यन्तं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्टमन्नꣳ रभसं विदानम् । आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणः (तै. सं. ४ १. २. ४-५) ॥

जिघर्म्यग्निं मनसा घृतेनेत्याह । मनसा हि पुरुषो यज्ञमभिगच्छति । प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह । सर्वꣳ ह्येष प्रत्यङ् क्षेति । पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान् ॥ २ ॥ भवति । व्यचिष्टमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदा त्वा जिघर्मि वचसा घृतेनेत्याह । तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै । मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन् दधात्यपचितिमान्भवति य एवम् ॥ ३ ॥ वेद मनसा त्वै तामाप्तुमर्हति यामध्वर्युरनमाःवाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै (तै. सं. ५. १. ३. २-४) ॥

३५. १४ **पृथिव्या एष वयसा**—§ । पृथुं तिरश्चा वयसा—मॅ-मु ॥ ३५. १५ **इत्यनवका-शनवन्तम्**—झ-त-थ । इत्यनवकाशनवलम्—ख-ग । इत्यनवकाशनवनम्—ण-य । इत्यनवकाश-नवतम्—म । इत्यवकाशनवन्तम्—मॅ-मु ॥ ३६. ८ **ब्रूयाम**—म-मु । ब्रूयामः ?—य-मॅ ॥

३८. २२. **एकधातुः अनुवादः**—ख-ग-ण१-य-व-मु । एकधातोरनुवादः—मॅ ॥ ३८. २२ **लङि रूपम्**—§ । अत्र ' लुङि रूपम् ' इति भाव्यम् ॥ ३८. २४ **लुङि रूपम्** । लङि रूपम् ?—§ ॥ ३९. १४ **महान्तम्**—ख-झ१-फ-मु । मॅ-पुस्तके एतन्नास्ति ॥ ३९. २४ **मनुष्याणां रहितम्**—मॅ-मु । ' मनुष्याणामहितम् ' इति पाठः झ१-पुस्तके उपलब्धः स एव समीचीनः प्रतिभाति ॥ ४०. २ **वञ्चनानि**—झ१-ण-त-थ-मु । वचनानि—य-मॅ ॥ ४०. २० **प्रकृष्टं शंसनम्**—क-झ-झ१-ण-त-थ-न-म-य-व । प्रकृष्टशंसनम्-मॅ-मु ॥ ४१. ३ **दानभोगायार्हतया**—क-झ-म-व-मु । दानभागायार्हतया-मॅ ॥ **मन्दसानाः**—क-झ-व । मदन्तः-मॅ । मन्दसाना मदन्तः-मु ॥ ४२. ६ **अडागमः** । अत्र

' आडागमः ' इति भाष्यम् ॥ ४२. ७ **भवन्ति** । वेति पूरणः—क-झ-म-ब-मु । भवेति पूरणः—य । भवन्तीति पूरणः—मॅ ॥ ४२. २२ **थास आर्धधातुकत्वात्**—झ१ । इतरेषु मॅ-पुस्तके च ' वा स आर्धधातुकत्वात् ' इति पाठः । परंतु सोऽशुद्ध इति प्रतिभाति । वा आर्धधातुकत्वात्—मु ॥ ४२. २३ **ऊर्णवाभिः**—म । ऊर्णनाभिः—य-मॅ-मु ॥ **और्णः** । अत्र म-पुस्तकस्थः और्णवः इति पाठः समीचीनतरः ॥ ४३. २२ **तीर्णतमस्कस्य**—क-ख-ग-च-झ-झ१-ण१-फ-म-व । तीर्णनमस्कस्य—ण-थ-न-य-मॅ । तीर्णतमस्य—मु ॥

४४. २२ **सूक्तं शंसेत्**—च-ण१ । शंस्येत् ?—य-मॅ-मु ॥ ४५. २१ **भूवादिः** ? । ' भौवादिकः ' इति भाष्यम् ॥ ४५. २१ **अस्मिन् पक्षे भवतेर्व्यत्ययेन क्सः**—*मॅ-मु । अस्मिन्यङ्ग प्रत्यये व्यत्ययेन क्सः—य । इतरेष्वशुद्धाः पाठाः । ४६.९ **तस्तम्भ निरुद्धामकरोत्**—झ१-य-मु । स्तम्भनिरुद्धामकरोत् ? —मॅ ॥ ४६. १६ ' **रीङ् स्रवणे** ' । **क्र्यादिः**—क-झ१-म-*मॅ । रीङ् श्रवणे । क्र्यादिः—य-मु । धातुपाठे तु ' री गतिरेषणयोः ' इति क्र्यादौ पठितम् । ' रीङ् श्रवणे ' इति दिवादौ । ऋ. सं. १. ५६. ६, १. ११७. ११, ३. ६०. २ इत्यादिमन्त्रभाष्येषु ' री गतिरेषणयोः । क्रैयादिकः ' इत्येव उपलभ्यते ॥ ४७.७ **जिघृक्षितम्**—क-झ-म-मु । जिघृक्षतम्—य । जिघृक्षंस्तम्—*मॅ ॥ ४७. १६ **तथा च मन्त्रः**—क-झ-म-मु । तथा च मन्त्रे—य । तथा च मन्त्रैः ?—मॅ ॥ ४७. २१ **निर्धारणीयमहिमोपेतः**—क-झ-म । निर्धारणमहिमोपेतः—य-मॅ-मु ॥ ४८. २५ **अमिषाः शत्रवः यमाह्वयन्ति**—क-ण-म-व-मु । उभयमाह्वयन्ति—य-मॅ ॥ ४९. १६ **अनुपूर्वात् डुदाञ् दाने जौहोत्यादिकः** । अनुपूर्वादिति अनन्वितम् ॥ ५०. ६ **गृहमेधाश्चेत्येते**—§ -मु । गृहमेधाश्चेतीति ?—मॅ ॥ ५१. ८ **प्रति ब्रूते**—क-झ-झ१-ण-न-म । प्रब्रूते—य । प्रति प्रब्रूते—मॅ-मु ॥

५३. १४ **व्यरेचयः**—क-झ१-ण१-त-थ-न-म-य-व । अरेचयः—मॅ-मु ॥ ५३. १६ **अजनन् अवर्धयन्**—ण-त-मु । अजनन्-य-मॅ ॥ ५४. १७ **कर्तः**—म-य-मु । कर्ता—मॅ ॥ ५५. १८ **विष्टिरः विस्तीर्णः**—§-मु । विष्टिरः विस्तीर्णाः—मॅ ॥ ५६. २७ **अन्तर्णीतण्यर्थत्वादकर्मकत्वम्** । **यथा रोदितीति** । **सत्यम्**—अत्र अन्तर्णीतण्यर्थत्वात् इत्यस्य स्थाने 'अन्तर्णीतकर्मत्वात्' इति भाष्यमिति प्रतिभाति । रुद्धातोर्यथा धात्वर्थोपसंगृहीतकर्मत्वादकर्मकत्वम् एवं श्रवस्याः इति क्यजन्तधातोरपि । तर्हि चित्रं धनमिति कर्मान्वयः कथमिति चेत्, तस्योत्तरत्वेन सत्यमित्यादि संबन्धनीयम् ॥ **सत्यम्**—झ१ । सत्वन्यः—मॅ-मु । सत्वस्यम्—क-ग-झ-त-थ-म-व; सत्वं स—ख; सत्वत्वम्—च-ण१; सत्यत्वम्—ण-न; वसन्त्यम्—य ॥

५९. २४ **पौरूरवसस्य**—*मॅ । पौरूपरवस्य—ख-ग; पौरुषस्य—म; पौरूरवस्य—ण-त-थ-न-य-मु ॥ ६०. ५ **लेट्याडागमः**—क-ज-झ-ण-त-थ-म । लेट्यडागमः—य-मॅ-मु॥ ६०. ७ **मार्जनदोहनादिभिः**—ण-मु । माञ्जन°—य । मञ्जन°—मॅ ॥ ६१. २ **अस्य सोमस्य**—म-य-वर्जलिखितपुस्तकेषु मु-पुस्तके च । सोमस्य—य-मॅ ॥ ६१. ६ **अत्र.....सकारस्य तत्वम्**—*मॅ-मु । अत्र लोपोऽभ्यासस्यार्धधातुक इति सकारस्य तत्वम् ?-§ ॥

६२. ५ **सत्या सत्यानि**—§-मु । सत्यानि—य-मॅ ॥ ६३. २ **सिन्धून् लोकान्वानृजून्वा** । अस्फुटार्थमेतत् ॥ ६४. १६ **विभग्नजानुः** । अनन्वितमिदं प्रतिभाति ।

६६. १५ **किम् । न**—§-मॅ । मु-पुस्तके ' किंच न ' इति पाठः ॥ ६७. १ **दिग्विजयकाले** । अस्मादनन्तरं ' आशुभिः शीघ्रगामिभिरश्वैः ' इति मु-पुस्तके अधिकः पाठः ॥ ६७. १२ **विद्युत्तरस्त्वम्**-§-मु । विद्युत्तरस्तम्-मॅ ॥ ६७. १९ **पव गतौ** । अयं धातुः धातुपाठे नोपलभ्यते ॥ ६७. २४ **क्षेरदादेशः**-§-मु । क्षोऽदादेशः—मॅ ॥ ६८.९ **'नृनमन तृप्नोति'**—क-झ१-थ-म-य । ' नृसमन तृप्नोति '

इति इतरेषु। नृमन तृप्नोति—मॅ-मु ॥ ६८. १८ किंच। अस्मादनन्तरं 'नोऽस्माकम्' इति मु-पुस्तके पाठः ॥

७०. ७ तिरतेः–मॅ-मु। अत्र 'तरतेः' इति भाष्यम्। ऋ. सं. ३. ३४. १, ५ अत्र द्रष्टव्यम्॥ ७०. ८ वर्मणा—ख-ग-च-त-थ-फ-य-व-मु। कर्मणा—मॅ ॥ ७०. १४ प्रथमं मुख्यम्—मॅ-मु। प्रथममुक्थ्यम्–§॥ ७२. ८ लिटयुत्तम इति। अत्र 'लिटयुत्तम इटि' इति स्यादिति प्रतिभाति। आत्मनेपदस्योत्तमपुरुषैकवचनमिट् ॥

७३. १६ सनोतेर्द्विवचनादि—§-मॅ। 'सनोतेर्द्विर्वचनादि' इति मु-पुस्तके। अयमेव शुद्धः पाठः ॥ ७३. १९ प्राप्तव्यो भवति—§। व्याप्तव्यो भवति—मॅ-मु। ७६.१ यष्ट्र्यष्टव्यलक्षणम्—क-ख-ग-च-ज-झ-ण-ण१-न-फ-य-व-मु। यष्टव्यं यष्टव्यलक्षणम् ?–मॅ ॥

७७. १० प्राप्यन्ते इति स्वसराणि—च-ण-थ-य। प्राप्यन्त इति स्वराणि स्वसराणि–*मॅ-मु ॥ ७७. १९ 'विदिर् लाभे'। लुङि 'हरितो वा' इति च्लेरङादेशः—§–मॅ-मु। अत्र 'विवृल् लाभे। लुङि लृदित्वात् च्लेरङादेशः' इति भाष्यम्। ऋ. सं. १.६१.६, ६२. ३, ७२.४ इत्यादि-मन्त्रभाष्येषु द्रष्टव्यम् ॥ ७८. ३ सूर्यसंभजनविषयभूते—झ-ण१-त-थ-म-मु। सूर्यसंभजनविषये भूते–य-मॅ ॥ ७८. १५ सोमरूपधनम् आ भरत्—ख-ग-च-ण१-फ। सोममभरत्–य। सोमरूपम-भरत्–मॅ। सोमरूपमाभरत्–मु ॥ ७९. ११ सप्तपुरुषसंबन्धि साप्तपदीनम्—?। 'सप्तपुरुष-संबन्धि साप्तपदीनं वा' इति स्यादिति प्रतिभाति ॥ ७९. १३ तदधोऽनमयः—ख-ग-झ-ण-त-थ-म-य। तदधो नमय—मॅ-मु ॥ ७९. १३-१४ 'मितां ह्रस्वः' इति ह्रस्वः—मॅ-मु। हि स्वरः—ख-ग-च-ण१। हिंसकस्यासुरस्य स्वमिति स्वरः—क-झ-त-थ-म। हिंसकस्यासुरस्य नमनम् कृ चङ्यन्य-तरस्यामि—झ१। हिंसकस्यासुरस्य स्यामिति स्वरः–ण-न-व। हिंसकस्यासुरस्यामिति स्वरः–य ॥

८०. २४ पालनाभिः—क-झ-झ१-ण१-थ-न-म-य-व। पालनादिभिः–मॅ-मु ॥ ८१. ९ फलस्य शमयिता?§–मॅ-मु ॥ ८१. १२ पुरोडाशादिकानि हवींषि—क-झ-म। पुरोडाशादिकं हवींषि ?—य-मॅ। पुरोडाशादिहवींषि–मु ॥ ८३. १५ दधुः। 'धुः' इत्यस्य स्थाने 'दधुः' इति भाष्यकारः पठति ॥

८४. ६ भरेति समन्वयः—ख-ग-झ१-ण१-त-थ-फ-म-मु। भर समन्वयः–य। भरतेति समन्वयः—मॅ ॥ ८४. १४ किंप्रत्ययः—क-झ-ण१। कप्रत्ययः?—य-मॅ-मु ॥ ८६. ७ धेहि—क-झ-म-वर्जलिखितपुस्तकेषु। निधेहि—मॅ-मु ॥

८७. ८ कामयमानमिन्द्रम्—य-मॅ। अत्र 'कामयमानमेनमिन्द्रम्' इति पठनीयम्। ख-ग-च-झ१-ण१-त-थ-फ-म-मु–पुस्तकेषु एवमुपलभ्यते ॥ ८८. १६ असुं प्राणं रिणन्—य-मॅ। अत्र 'प्राणम्' इत्यस्यानन्तरं 'शवसा बलेन' इत्यधिकं पठनीयम्। तथैव–ख-ग-च-प-फ–लिखित-पुस्तकेषु। शवसा बलेन असुं प्राणं रिणन्–मु ॥ ८८. १९ विदात् लभतु–ख-ग-च-मु। अत्र 'लभतु' इत्यस्य स्थाने 'लभताम्' इति पठनीयम्। विदात्—मॅ ॥ ८८. २० 'विदिर् लाभे'। पृ. ७७. प. १९ द्रष्टव्यम् ॥ ८८. २० लेट्यडागमः—ख-त-थ-य-व-मु। लेट्यडागमः –मॅ ॥

९०.१४ शोभनं नीतयः—थ-मॅ। शोभननीतयः–य। शोभना नीतयः–इति मु-पुस्तके पाठः। स एव साधुः ॥ ९०.१६ लेटयाडागमः। पृ. ८८. प. २० द्रष्टव्यम् ॥ ९१.५ हिंसिकाः—मॅ-मु। हिंसकाः–§॥ ९१.१० सन्मार्गकृच्च—क-म-मु। सन्मार्गश्च–मॅ ॥ ९१.२३ देवानां वीतिः सोम-भक्षणमेतेति–§। देवानां वीतिं सोमभक्षणमर्चयतीति?–मॅ-मु। ९२.८ त्वा त्वाम्–ख-ग-च-ण१-फ-मु। स्वाम्–य-मॅ ॥ ९२.१७ गृह्णीमहि–ख-ग-ण-त-थ-मु। गृह्णीमहे–*मॅ ॥ ९३.३ 'धी धारणे'। 'धीङ् आधारे' इति दिवादौ। माधवीयधातुवृत्तौ तु 'धीङ् आदाने' इति पाठः ॥ ९३.२६ शासां शासितृणाम्–ख-ग-च-ण१। शासितृणाम्–मॅ-मु ॥ ९५. २ लेटयाडागमः। पृ. ८८. प. १६

द्रष्टव्यम् ॥ ९५.२१ दृष्टत्वादपरस्यापि—त-थ-मु । दृष्टस्यापि?—य-मॅ ॥९५. २३ **साङ्गः**—य-मॅ-मु । सर्वं साङ्गः—§ ॥ ९६.६ **भवति**—त-थ-म । भवेति?—य-मॅ-मु ॥

९८.१९ **वीळिता वीळितानि**—क-ङ-फ-म-व-मु । वीळितानि—य । वीळिता—मॅ ॥ ९८.२२ **सर्वस्यावारकम्**—त-*मॅ । सर्वस्यावरकम्—इतरलिखितपुस्तकेषु मु-पुस्तके च । ९८. २२-२३ **मन्त्र-सामर्थ्येन**—ख-ग-ण-त-थ-म-य-मु । मन्त्रस्य सामर्थ्येन—मॅ ॥ ९८. २३ **गुह संवरणे**—ग-च-ङ-ञ१-थ-म-य-व-मु । गुह संवरणे—मॅ ॥ ९९.३ **मधुर्मादयित्री**—मॅ-मु । मधु मादयित्री—§ ॥ १००.४ **अगच्छन्**— § -मु । आगच्छन्—*मॅ ॥ १००.२५ **ग्राह्या मन्त्रभूताः**—य-मॅ । ग्राह्यमन्त्रपूताः—च-ण-फ-मु । ग्राह्या मन्त्रपूताः—इतरलिखितपुस्तकेषु ॥ १०१.७ **स सुष्टुतः**—क-ज-ङ-ञ१-ण-त-थ-म-य-व-मु । सुष्टुतः— मॅ ॥ १०२. १४ **यद्येवशब्दस्य पूर्वपदेन** । अत्र ' यथेवशब्दस्य पूर्वपदेन ' इति स्यात् । इवशब्दस्य यथा पूर्वपदेन सहैकपद्यम् ' अंशेव, अक्षरेव ' इत्यादिषु अध्यापकसंप्रदाय-प्राप्तं तद्वत् चन इत्यस्यापि इत्यर्थः ॥ १०३. १ **यज्ञम्** —मॅ-मु । यशः—§ ॥ १०३. ५ **वशायाः**—ञ१ । वशायागे-ख-ग-च-ण-ण१-थ-न-व । वशायाग-य । वश योगे-क-ङ-म । वशायाः गोः— *मॅ-मु ॥ १०३. २१ **रीङ् स्रवणे** । पृ. ४६. प. १६ द्रष्टव्यम् ॥ १०३. २२ **विभिन्नम्**—§ -मु । विभिन्नः-मॅ ॥ १०४. २ **रौधादिकः**—§-मु । रौधादिकम—मॅ ॥ १०४. ४ **' वी गतिप्रजनकान्त्यशनखादनेषु '**—§-मु । वी गतिप्रजननकान्त्यसनखादनेषु—मे ॥ १०४. १५ **ब्रवाम**—क-ख-ग-च-ण-ण१-त-थ-म-य-व । ब्रूयाम-मॅ-मु ॥

१०४. २५ **लुङि च्वडि रूपम्**—क-ङ-ञ१-ण१-म-व । लुगिडिवडि-य । लुङि रूपम्-मे-मु ॥

१०७. ९ **वृत्राणामावारकाणाम्**-मॅ । वृत्राणामावरकाणाम्-§-मु ॥ १०७. २१ **आत्मीयेन बन्धुजनेन**—§-मु । (स एव जन्मना स एव पुत्रैः-मु) । जन्मना आत्मीयेन बन्धुजनेन—मॅ । ' जन्मना ' इति पदं मॅक्समुल्लरमहाशयेनापि लिखितपुस्तकेषु नोपलब्धम् । केवलं संभावनामात्रेण निवेशितम् ॥ १०८. ३ **तं यजमानम्**-मॅ-मु । स तं यजमानम्—§ ॥ १०८.४ **प्रकृष्टं फलम्**-§-मु । प्रकृष्टफलम्-मॅ ॥ १०८. ७ **आचार्यभूतः**—§-मु । आश्चर्यभूतः-मे । एष एव पाठो युक्ततरः प्रतिभाति । तथापि पुस्तकेषु नोपलब्धः ॥

१०८. २१ **यद्दचोऽधीते**-च-ञ१-त-थ-म-य-व-मु । तैत्तिरीयारण्यकेऽप्येवमेव । य ऋचोऽधीते—मॅ ॥ १०९. २५ **अत एव** । ' एत एव ' इति भाष्यम् ॥ ११०. १३ **एवंगुणविशिष्टा महानुभावाः** । एवंगुणविशिष्टा ग्रहा वा—ख-ग-च-ण१-प-फ । एवंगुणविशिष्टा ग्रहा नु वा—क-ङ-ञ१-ण-त-थ-न-म-य-व । एवंगुणविशिष्टानुग्रहा वा—*मॅ । एवंगुणविशिष्टा महानुभावा आदित्यासः आदित्याः—मु । स्वीकृतपाठः यद्यपि लिखितपुस्तकेषु नोपलब्धः तथापि मॅक्समुल्लरमहाशयोपलब्धे एकस्मिन् लिखितपुस्तके तथा मु-पुस्तके चोपलब्ध इति स्वीकृतः ॥ ११०. २१ **मित्रावरुणौ**-§-मु । मित्रावरुणा-मॅ ॥ १११. २० **भूमिशब्दः**—व-वर्जलिखितपुस्तकेषु मु-पुस्तके च । भूमीशब्दः?- मॅ ॥ ११२. ६ **ऋजीकाय स्तोत्राणाम्** । ऋजीकाय उपार्जकाय स्तोत्राणाम्—मु ॥ ११३. ६ **तिरस्वरितः**—ख-ग-च-ञ१-ण१-त-थ-न-य-व-मु । तिरस्वरितम्—मॅ ॥ ११३. १४ **ऋतस्य यज्ञस्य**—ख-ग-च-ण१-फ-मु । ऋतस्य—य-मॅ ॥ ११४. ९ **अकर्म**—§-मॅ-मु । अशुद्धमिदम् । ' अकुर्म ' इति भाष्यम् ॥ ११४. १२ **प्राप्नुवन्तु**—ख-ग-च-ञ१-ण-ण१-थ-न-य-व । व्याप्नुवन्तु—मॅ-मु ॥ ११५. ५ **अभितो द्रोहं कुर्वते**—क-ख-ग-च-ज-ञ-ञ१-ण-न-फ-म-य-व । अभिद्रोहं कुर्वते—मॅ-मु ॥ ११५. ६ **' चृती हिंसाग्रन्थनयोः '**-§-मु । चृती हिंसासंग्रन्थनयोः—मॅ । ' चृती हिंसाग्रन्थनयोः ' इति माधवीयधातुवृत्तौ ॥ ११५. १७ **मा आवेदयानि** —मॅ-मु । आवेदयामि—§ ॥

११६. ६ सन्ति—§-मु । सान्ति–मॅ ॥ ११९.१८ ऋणानि अपकृत्य—मॅ । 'ऋणानि अपाकृत्य' इति म-पुस्तके पाठः । अयमेव साधीयान् । ऋणान्यपहृत्य–मु ॥ १२०. ६ अव स्थाम् अवयुत्य स्थितः—व । अवयुत्य स्थितः–मॅ-मु ॥

१२०. १८ देवाः—§-मु । देवाश्च–मॅ ॥

१२३. ४ षष्ठ्यैन्द्रासोमी—मॅ-मु । अत्र 'षष्ठ्यैन्द्रासौमी' इति पठनीयम् । झ-म-पुस्तकयोः तथैव पाठः ॥ यो नो बृहस्पतिस्तं वोऽन्त्या मारुती—ख-ग-झ१-ण-त-थ-न-य-व । सर्वानुक्रमण्यामपि एवमेव दृश्यते । यो नो बार्हस्पत्या तं वो मारुती–मॅ-मु ॥ १२४. ३ स हि खलु—ख-ग-च-ज-ण-त-थ-य-मु । स हि स खलु—मॅ ॥ १२४. १४ वज्रेण—§-मु । बलेन–मॅ ॥ १२४. २१ प्रक्षिप—क-ख-झ-झ१-ण-ण१-त-थ-न-म-य-व । क्षिप–मॅ-मु ॥ १२४. २२ लेट्याडागमः । पृ. ८८. प. २० द्रष्टव्यम् ॥ तोकस्य पुत्रस्य—ज्ञ-व-मु । तोकस्य–य-मॅ ॥ १२४. २३ संभजनार्थम्—मॅ । संभजनार्था—मु । संभजनार्थः–§ ॥ १२५. ७ प्रकर्षेण–मॅ-मु । हि प्रकर्षेण–§॥ १२५.११ पूरणः—क-ख-ग-च-झ-झ१-ण-ण१-न-म-य-व । पादपूरणः—मॅ । पदपूरणः—मु ॥१२५.१७ तमयतु—मॅ-मु । तमयत्—§ ॥ १२५. २६ लेट्याडागमः । पृ. ८८ प. २० द्रष्टव्यम् ॥ १२६. ९ शृधु प्रसहने—ण-र्म-मु । शृधु प्रहसने—इतरलिखितपुस्तकेषु ॥ १२६. २६ वीर्या वीर्याणि—ख-ग-च-झ१-त-थ-म-मु । वीर्याणि–य । वीर्या—मॅ ॥ १२७. १२ लेट्याडागमः । पृ. ८८ प. २० द्रष्टव्यम् ॥

१२८. ६ अभि अभिमुखम्—ख-ग-ज-ण-त-थ-न-म-व-मु । अभिमुखम्—य-मॅ ॥ १२८. २० स्यः सः—क-झ-झ१-त-थ-म-य-मु । स्य सः—मॅ ॥ १२९. ४ लुङि चङि रूपम्—क-ज्ञ-झ-म । लुङि रूपम्—य-मॅ-मु ॥ तिसृणाम्—क-ख-ग-झ-ण-त-थ-य-व-मु । तिसृणाम् ?–मॅ ॥ १२९.२० स्तृञ् आच्छादने–क-झ-थ-म-य-मु । स्तृञ् आच्छादने–मॅ ॥ १३०. २ अहिनामा देवः–मॅ-मु । हीना देवः—ख-ग-ण-ण१-म-य; हीनो देवः–क-झ-झ१-भ-व ॥ १३०. ६ पौत्रीयस्थानीयः । 'पौत्रस्थानीयः' इति साधु ॥ १३०. ८-९ यद्वा धियः.....भवत्विति शेषः–§-मु । मॅ-पुस्तके एतन्नास्ति ॥ १३०. १४ एता एतानि उद्यता उद्यतानि—मॅ-मु । एतानि उद्यता उद्यतानि—क-झ । एता एतानि उद्यतानि—ख-ग-व । एता एतानि—झ१ । एतान्युद्यतानि—ण-ण१-त-थ-म-य ॥ १३०. १६ कामितानि–*मॅ-मु । कमितानि–§ ॥

१३१. २५ घसोः संप्रसारणम्–झ१ । संप्रसारणम्–य-मॅ-मु ॥ १३३. ३ आग्निमारुतेऽप्येते–§-मु । असि(ग्नि)मारुते–य । आग्निमारुतेष्वेते–मॅ ॥ १३२. २० शोभना बुद्धयः—क-ख-ग-झ-ण-ण१-त-म-य-व । शोभनबुद्धयः–मॅ-मु ॥ १३२. २८ तच्चानुवाक्या–§–मु । मॅ-पुस्तके एतन्नास्ति ॥ १३३. ६ स्वयंसारिणी—ख-झ१-ण-ण१-न-य-व । स्वयं संचारिणी–मॅ-मु ॥

१३५. २ शतसंवत्सरान्—ख-ग-झ१-ण-ण१ थ-न-म-य-व । शतं संवत्सरान्—मॅ-मु ॥ १३५.४ अञ्चतीः—ख-ण-त-थ-य-मु । अञ्चन्तीः—मॅ ॥ १३७. २ मा माम्–ख-ण१-फ-म-मु । माम्–मॅ ॥

१४०. १९ यद्वा सर्वस्य जगतो धारयितारः—क-ज्ञ-झ-म-मु । य-मॅ-पुस्तकयोरेतन्नास्ति ॥ १४०. २६ भूम्याख्यः—*मॅ-मु । भूमिनाख्या—क-झ-ण-त-थ-न-म-व । भूमिना (विशेषः)–य ॥ १४१. २६ समानमनस्काः—झ१-*मॅ-मु ॥ १४४. ५ प्रस्नुतस्तनी–क-झ-झ१-ण-थ-म-मु । प्रस्नुत्वस्तनी–ख-ग-च; प्रस्नुवस्तनी—ज्ञ; प्रस्तुत्वस्तनी–ण१; प्रस्तुतस्तनी–त-न-व; प्रस्नुनीसनी–य । प्रस्नुतस्तनी–मॅ ॥ १४६. १ वाणाख्यैः वीणाविशेषैः–ण-न-य । 'धमन्तो वाणम्' (ऋ. सं. १. ८५. १०) इत्युक्तेरयमेव पाठो युक्ततरः प्रतिभाति । वीणाख्यैः वीणाविशेषैः–मॅ-मु ॥ १४६. ४ चिन्तयन्तः—§-मॅ । सिञ्चन्तः–मु ॥ १४६. १० तत् मरुतः ? ॥१४६.१६ आवर्तयत्–

मॅ । आवर्तयेत्—§-मु ॥ १४६. १७ **पूर्वत्र संबन्धः**—मु । संबन्धः—मॅ ॥ १४६. २६ **सु सुष्ठु**—ख-ग-च-फ-य-मु । सुष्ठु—मॅ ॥ १४६. २७ **एव गच्छतु**—क-ख-ग-ज्ञ१-ण-ण१-त-थ-न-य-व । एवं गच्छतु—मॅ । आगच्छतु—मु ॥

१४८. १ **शम्या**—ज्ञ१-मॅ-मु । श्रम्या—क-ज्ञ-ण-त-थ-न-म-य-व । श्रया—ख-ग-ण१ ॥ १४८.१२ **प्रीणन्ति प्रीणयन्ति**—क-ज्ञ-म-व-मु प्रीणन्ति—य-मॅ ॥ १४९.११ **व्यत्ययेनान्त्यादेशः**—§-मु । व्यत्ययेनान्त्यादेशः—मॅ ॥ १४९. १४ **हि पूरणः**—ख-ग-च-ण१-फ । मॅ-मु-पुस्तकयोरेतन्नास्ति ॥ १५०.१९ **च पूरणः**—ख-ग-च-ण१-फ । मॅ-मु-पुस्तकयोः नास्ति ॥ १५१. ६ **प्रवहनाय**—§-मु । प्रवाहनाय—मॅ ॥ १५२.११ **गार्हपत्यादिरूपेण स्थितम्**—ख-ग-च-ण१। गार्हपत्यादिरूपेण—य-मॅ-मु ॥ १५२. १९ **अद्भिः**—? ॥ १५२. २२ **काष्ठेन्धनत्वलक्षणेन**—§-मु । काष्ठेन्धनलक्षणेन—मॅ ॥ १५३. १०-११ **अस्मदीयपुत्रादिजनार्थम्**—क-ख-ग-ज्ञ-ज्ञ१-ण-ण१-न-य-व । अस्मदीयपुत्रादिजननार्थम्—मॅ-मु ॥ १५३. १८ **ऋतुयाजेषु**—मॅ-मु । शत्रुयागेषु—क-ज्ञ-म । ऋतुयागेषु—इतरलिखितपुस्तकेषु ॥ १५३. १८ **उपरिष्टाद्देवताः**—§-मु । उपरिष्टादेव ताः—*मॅ । एष एव युक्तः पाठः ॥ १५३ १९ **उपरिष्टात्स्रुचः**—य-मॅ-मु । आश्वलायनश्रौतसूत्रे च । उपरिष्टात् स्रुचः—इतरलिखितपुस्तकेषु ॥

१५३. २७ **श्रयणद्रव्याणि**—§ । श्रपणद्रव्याणि—मॅ-मु ॥ १५३. २९ **पुनन्ति**—मॅ-मु । पुनन्तु—च । अपुनन्—इतरलिखितपुस्तकेषु ॥ १५४. १ **सः त्वम्**—क-ज्ञ-ज्ञ-म । स्वम्—य-मॅ-मु ॥

१५६. १६ **सिच्यमानाहुतिम्**—ग-च-ज्ञ१-ण-ण१-न-य-व । सिच्यमानामाहुतिम्—मॅ । आसिच्यमानाहुतिम्—मु ॥

१५८. २७ **विभक्त्यन्तनिर्दिष्टः शब्दपरः**—क-ज्ञ-ज्ञ१-त-थ-म । °निर्दिष्टशब्दः परः—य । विभक्त्यन्तनिर्दिष्टशब्दपरः—मॅ-मु ॥ १५९. ५ **महत्करः** । 'महाकरः' इति भाष्यम् ॥ १६०. ८ **अदर्दः** । 'अदर्धः' इत्यस्य स्थाने 'अदर्दः' इति सायणः पठति ॥ १६०. ८ **विदारयति**—मॅ-मु । विदारयतीति-§ ॥ १६१. ७ **मृगयसः**—मॅ-मु । यथा मृगयसः-§ ॥ १६१. १५ **संराधनीयम्**—क-ख-च-ज्ञ-ज्ञ१-ण-ण१-त-थ-न-म-य-व । राधनीयम्—मॅ-मु ॥

१६३. २१ **आगच्छथः**—ख-ग-च-ज्ञ१-ण१-त-थ-न-य-व-मु । आगच्छथ—मॅ ॥ १६४. २ **आ गन्तम्** । गन्तम्—मु ॥ १६४. १५ **एथा**—मॅ-मु-× ॥ १६४.२३ **हस्तेव** । 'हस्ताविव' इति मन्त्रपाठः ॥

१६८. ६ **पञ्चानां तृचानाम्**—क-ज्ञ-ज्ञ-व । पञ्चानाम्—मॅ-मु ॥ १६८. ८ **द्यावापृथिव्यनिविद्धानस्त्वेन**—मॅ-मु । द्यावापृथिव्यनिविद्धानसस्त्वेन—§ ॥ १६८. १७ **आवापनीयः** । आवपनीयः इति साधु ॥ १६८.३० **प्रेतां यज्ञस्य शंभुवा**—§-मॅ । प्रेतां यज्ञस्य शंभुवा युवाम्—मु । आश्वलायनश्रौतसूत्रेऽप्येवमेव । एष एव पाठो युक्तः ॥ १६९. १३ **आश्रयणसाधनम्**—ज्ञ-ज्ञ१-ण-थ-न-म-य-व-मु । आश्रपणसाधनम्—मॅ ॥ १६९. १९ **हवमाह्वानम् इहास्मिन् यज्ञे**—ख-ग-च-फ । हवम् आह्वानम्—य-मॅ । इहास्मिन् यज्ञे हवमाह्वानम्—मु ॥ १७०. ३ **देयस्य**—ज्ञ१ । देवस्य—मॅ-मु ॥ १७१. १० **विविधस्य द्रष्टा**—§ । विश्वस्य द्रष्टा—य । विविधं द्रष्टा—मॅ-मु ॥ १७१. १५ **विश्वे देवासः**—§-मु । मॅ-पुस्तके एतन्नास्ति ॥

१७४. ११ **उत अपि च** । 'उत्' इत्यस्य स्थाने 'उत' इति भाष्यकारेण पठितम् ॥ १७४. २२ **अनर्थकानां शंसकः** । 'अनर्थानां शंसकः' इति साधु ॥

१७७. ५ **प्रत्यग्निरुषस इति**—ख-ग-च-फ । प्रत्यग्निरिति—य-मॅ-मु ॥ १७७. १४ **शशमानो जरति**—§-मॅ । मु-पुस्तके निघण्टौ च 'शशमानो रंजयति' इति ॥ १७८.८ **उ इति पूरणः**—ण-य-मॅ-

मु । ऊ इति पूरणः—इतरलिखितपुस्तकेषु ॥ १७९.१७ योनौ स्थाने—§-मु । योनौ गर्भस्थाने—मॅ ॥ १८०. १९-२० जनयितुः ब्रह्मणश्च—झ१ । जनयितुः ब्राह्मणश्च—य । जनयितुश्च ब्रह्मणश्च—मॅ-मु ॥ १८३. १ नभिवयुक्तन्यायेन—झ१-मु । वटिवयुक्तन्यायेन ?—ख-ग-च-झ१-ण-ण१-न-फ-य-व-मॅ । 'नभिवयुक्तमम्बसदृशाधिकरणे तथा ह्यर्थगतिः' (परिभा. ७४) इति हि न्यायः । नभूयुक्तभिवयुक्तं च शब्दस्वरूपं स्वभिन्नस्वसदृशार्थबोधकमित्यर्थः ॥ १८३. २ इति वा योज्यम्—§-मु । इति योज्यम्—मॅ ॥ १८५. ३. बृहती महतीः—ख-ग-च-ज-झ१-ण-ण१-न-फ-य-व । बृहतीः—मॅ-मु ॥

१८५. २६ तस्मै अग्नये—ख-ग-च-ण१-फ-मु । तस्मै—य-मॅ ॥ १८६.२४ प्रशस्यम्—मॅ-मु । प्रपश्यम्—क-झ-म-व; पश्या—ख-ग-ण१; पश्यम्—च-झ१-थ; पश्य—ण-न ॥ १८८. १६ समिन्धिकाः—मॅ-मु । समेधिकः—त-थ । समेधिकाः—इतरेषु ॥ १८९. २० स्वरोहिद्भिः—*मॅ । स्वशोचिभिः—मु; स्वदेशोभिः—क-ज्ञ-झ-झ१-त-थ-म-व; स्वरितोऽग्निः—ख-ग-च-ण१-फ; स्वरितोभिः—ग-न ॥ १९०. ९ शुचिं दीप्तम्—मॅ-मु । शुचिं दीप्तिम्—§ ॥ १९०.१२ बृहत्—मॅ-मु । महत्—§ ॥ १९०. १८ अद्वयाविनम् द्वयहीनम्—मु । अद्वयाविनम्—मॅ ॥ अद्वयाविनं यद्वयहीनम्—य ॥

१९१. २५ सुखानि आचके—झ१-त-थ । आचके—य । सुखानि प्राप्य आचके—मॅ । सुखानि प्राप्तुमाचके—मु ॥ १९२. ६ विमानम्—§-मु । विमानं च—मॅ । चकारः मॅक्समुल्लरमहाशयेनाभ्यूहितः ॥ १९२. १४ चन्द्ररथम् । चन्द्रः आह्लादकः—मॅ । चन्द्ररथं हिरण्मयरथं चन्द्रः आह्लादकः—मु । चन्द्ररथं चन्द्रवदाह्लादकः—क-झ । इतरेषु—चन्द्ररथं चन्द्रमाह्लादकः ॥ १९२.१४ यस्येति—*मॅ । यस्येति वा—लिखितपुस्तकेषु मु-पुस्तके च । वाशब्दात् चन्द्ररथमिति पदस्य अपरं व्याख्यानं विवक्षितं स्यात् ॥ १९३. १८ वाघतां च ऋत्विजाम्—क-ख-ग-च-झ-झ१-ण-ण१-त-थ-न-य-व-मु । वाघताम् ऋत्विजाम्—मॅ ॥ १९३. २० सदा प्रशंसन्ति—ख-ग-च-ण१-फ । प्रशंसन्ति—य-मॅ । सदा सर्वकालं प्रशंसन्ति—मु ॥ १९४. १९ तोषकारीभ्यः । 'तोषकारिणीभ्यः' इति भाष्यम् ॥

१९४. २५ याज्या तन्न इत्येषा—*मॅ-मु । याज्ये एवमित्येषा—क-झ-म; याज्येषुवमित्येषा—ख-ग-ण१; याज्येवमित्येषा—च-ण-त-न-भ-य-व; यागे तन्नस्तुरीपमित्येषा—झ१ ॥ १९५. १४ न पातयितः—*मॅ-मु । न पातः—ख-ग-च-ण१ । पातः—इतरेषु ॥ १९७. १७ संगता इळा—ख-ग-च-ण१-फ । संगता त्यस्य इळा—य । संगत्या इळा—मॅ । संगताः सत्यः इळा—मु ॥ १९७. २४ रराणः रममाणः—मॅ । विराणः रममाणः—झ१ । वि रराणः रममाणः—इतरेषु । विरराणः विशेषेण रममाणः—मु ॥ १९८. ८ सत्यः सत्यतरः—§-मु । सत्यः—मॅ ॥ १९८. १५ अर्वाक् । 'अर्वाङ्' इति संहितापाठः ॥

१९९. १८ उ पूरणः—ख-ग-च-ण१-फ । उः पूरणः—मु । मॅ-पुस्तके नास्ति ॥ २००. १७ ज्ञातव्यानि पदार्थानि । अत्र 'ज्ञातव्यान् पदार्थान्' इति भाष्यम् ॥ २००. २० रक्षति—§-मॅ । पदं स्थानं रक्षति—मु ॥ इत् पादपूरणः—ख-ग-च-फ । इदिति पूरणः—मु । मॅ-पुस्तके नास्ति । २०२. ४ समैन्द्ध—मॅ । समीधे—य । समेधत—§-मु ॥

२०३. ६ आपूरयः—मॅ । आपूरयो—क-झ । आपूरय—ख-च-ण-त-थ-न-य-व-मु । आपूरयम्—ग-ण१ । पूरयः—झ१ ॥ २०३. ९ नु पूरणः—ख-ग-च-ण१-फ । मॅ-मु-पुस्तकयोरेतन्नास्ति ॥ २०४. ११ विस्तृतवानसि—क-झ१-त-थ-म-मु । विसृतवानसि—य-मॅ ॥ २०५. १७ त्वद्रथम्—मॅ । त्वद्रथे—§ । आत्मानं त्वद्रथे—मु ॥ २०५. २० सोममुद्दिश्य—त-थ-व-व्यतिरिक्तेषु । बलार्थमन्नार्थं वा—मॅ-मु ॥ शेषः—क-ख-ग-च-फ-मु । विशेषः—य-मॅ ॥

२०७. ६ **त्रिष्टुप्**—§। त्रिष्टुप् छन्दः—मॅ-मु॥ २०९. १२ **आरोहति**—घ-त-प-य-ल। आरोहयति—मॅ-मु॥ २०९. १७ **पातेर्डतिः इति डतिः**—य-ल-व्यतिरिक्तेषु। पातेर्डतिः इति—य-मॅ-मु॥ २०९. २० **अत्यवि..... महिभ्यः**—मॅ। अत्यविचमितमिणमिरभिलभितपिपतिपनिपणिमहिभ्यः—मु। अत्यविचमितमिरभिपनिपतिभ्यः—ख-न-भ-स। अत्यविचमिरभितमिपतिभ्यः—ग-च-ज-ण। अत्यविचमिरमितमिरभिलभिपनिपतिभ्यः—त-य-ल॥ २१०. १ **बलिनं कुर्वत्यः**—घ-प-य। बलिनं कुर्वन्त्यः?—मॅ-मु॥ २१०. ६ **तदिच्छन्तम्**—मॅ-मु। तमिच्छन्तम्—§॥ २१०. ८ **क्यजन्तधातुस्वरः**—त-न-य-ल। क्यजन्ताद्धातुस्वरः—मॅ-मु॥ २१०. २४ **क्र्यादिः**। **तस्य**—ख-ग-च-ज-ण-भ। क्र्यादित्वात्तस्य—य-मॅ-मु॥ २११.२ **ईड स्तुतौ**—ख-ग-च-ज-ण-न-भ-मु। ईळ स्तुतौ—य-मॅ॥ २११.१७ **ओत्**—ख-ग-च-ज-ण-न-भ-स-मु। ऊत्—य-मॅ॥ २१२.९ **देवा ऋत्विजः**—घ-प-य। देवाः—मॅ-मु॥ २१२.१०—**हविर्लक्षणाश्नवन्तः**—ख-ग-च-ज-ण-भ। य-मु-मॅ-पुस्तकेषु नास्ति॥ २१२. २५ **भृजी भर्जने**—मॅ। भृजी वर्जने—क-ग-च-ज-ण-ल-मु। भृजि वर्जने—त। भृजी मर्जने—न॥ २१३. १२ **वृषायन्ते**—§-मु। वृषयन्ते—मॅ॥ २१३. १८ **पादादित्वादनिघातः**—ख-ग-च-ज-ण-न-भ। पादादित्वान्न निघातः—य-मॅ-मु॥ २१३.२२ **मिः**—*मॅ। 'मिः' नास्ति—मु। कुः—य। नित्—§॥ २१३. २८ **ढत्वकत्वषत्वानि**— त-न-भ-ल-व-मु। टत्वकत्वषत्वानि—मॅ॥ २१४.१२ **इनन्प्रत्ययः**—§-मु। इनप्रत्ययः—मॅ॥ २१४. २४ **अग्नः दंसः वेषः**—§। अपः अग्नः दंसः वेपः—मॅ-मु॥ २१५.१ **हे अग्ने**—ख-ग-घ-च-ज-ण। य-मॅ-मु-पुस्तकेषु नास्ति॥ २१५. २ **अवन्ध्या**—ज-ण-न-य-ल-मु। अबन्ध्या—मॅ॥ २१५.३ **उच्छादिषु**—ण-व-मु। उच्छादिषु?—य-मॅ॥ २१५. ४ **लोटि**—मॅ-मु। लिटि—§॥

२१५. २६ **दैव्येन मधुना**—§। दैव्येन मधुना देवसंबन्धिना मधुना—मॅ-मु॥ २१६. ५ **अञ्जू व्यक्तिकान्तिगतिम्रक्षणेषु**—मॅ। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—ल-मु। धातुपाठेऽपि एवमेव। अञ्जू व्यक्तिलक्षणे—ख-ग; अञ्जू व्यक्तिलक्षणेषु—च; अञ्जू व्यक्तिम्रक्षणे—ज-ण-न; अञ्जू व्यक्तिम्लक्षणे—भ; अञ्जू व्यक्तिगतिम्रक्षणेषु—य; अञ्जू व्यक्तिगतिम्लक्षणे—व॥ २१६. १३ **आमन्त्रितस्य च**—य-मॅ-मु। आमन्त्रितस्य—इतरेषु॥ २१६. १६ **आडागमः**—ख-ग-च-ज-ण-न-भ। अडागमः—य-मॅ-मु॥ २१६. २२ **क्षियन्ति निवसन्ति**—§। क्षियन्ति निवसन्त्यस्मिन्निति—मॅ-मु॥ २१६.२३ **इत्याद्युदात्तत्वम्**—ल-मॅ-मु। इत्याद्युदात्तः—इतरलिखितपुस्तकेषु॥ २१०. २० **पूर्वपदस्य च**—मॅ-मु। पूर्वपदस्य—§॥ २१८. १ **शोभना मितिः**—ग-च-न-भ। शोभनया मित्या—मॅ-मु॥ २१८. १३ **तयापि**—ख-ग-च-ज-ण-न। तया रशनया—य-मॅ-मु॥ २१८. २७ **अन्येभ्योऽपि दृश्यते**—§। *दृश्यन्ते—मॅ-मु॥ २१८. ३० **क्यचि**—§। क्यच्—य-मॅ-मु॥ २१९. १९ **इतीत्वे**—§। इति—य। इतीत्वम्—मॅ-मु॥ २२०. ३ **धि धारणे**—ख-न-य-मु। धा धारणे—मॅ। धी धारणे—इतरपुस्तकेषु। २२०.४ **खड्गः**—*मॅ-मु। ह्रस्वः—§॥ २२०. ५ **रूपादनिघातः**—ल-मॅ-मु। सूपादनिघातः—ख-ग-च-ज-ण-भ; रूपम्। यच्छब्दानुपङ्गादनिघातः—य; रूपम्। यच्छब्दयोगादनिघातः—न। अयमेव समीचीनः पाठः॥ २२०. १९ **ददातीति क्षेत्रम्**—ख-ग-च-ज-ण-त-न-भ-य-व। ददातीति क्षेत्रं यज्ञः—*मॅ-मु॥ २२०. २० **वरणीयम्**—§। वारणीयम्—मॅ-मु॥ २२०. २५ **पूर्वपदप्रकृतिस्वरः**—मॅ-मु। पूर्वपदस्वरः—ख-ग-च-ज-ण-न-भ-य-व। प्रकृतिस्वरः—ल॥ २२१. १७ **संप्रसारणं च**—मॅ-मु। संप्रसारणम्—§॥ २२१. २४ **रशनाख्यानि वासांसि**—ख-ग-घ-च-ज-ण-फ-भ-य। वासांसि—मॅ-मु॥ २२१. २७ **आहवनीयपूर्वभागे**—ख-ग-च-ज-ण-न-भ। आहवनीयस्य पूर्वभागे—य-मॅ-मु॥ २२२. ४

बह्वल्पार्थात्—मॅ । बह्वल्पात्—§-मु ॥ २२२.१८ लङर्थे—मॅ । लङर्थे—य । लिङर्थे—मु ॥ २२३. ३ ' स्कोः संयोगाद्योः '—ख-ग-च-ज-ण-त-न-भ-य-मु । स्कोः संयोगाद्योरन्ते च—मॅ ॥

२२३. १८ त्वा त्वाम्—ख-घ-ज-ण-प-भ । दीप्यमानं त्वा—य । त्वाम्—मॅ-मु ॥ २२४ १९ मित्रत्वे—ख-ग-च-ज-ण-न-भ । मैत्र्ये—य । मैत्रे—मॅ-मु ॥२२६. ८ ' अशिप्रुषि.....क्कन् '—मॅ । अशिप्रुषिलिटिरणिखणिवाशिभ्यः क्कन्—§ । उणादिपाठस्तु-' अशूप्रुषिलटिकणिखटिविशिभ्यः क्कन् ' ॥ २२६. ११ जसादयः—*मॅ-मु । मासादयः—य । शसादयः—§ ॥ २२६.२६ °शलीत्यादिना—*मॅ । °शलिस्यादिना—मु । °शेत्यादिना—§॥ २२८.१ त्रीणि शता—मॅ-मु-×॥ त्री सहस्राणि—य-मॅ-मु । त्री—§ ॥ २२८. ६ महिमानः—य-मॅ । महिमानम्—§-मु ॥ २२८. ७ त्रयस्त्रिंशौ—य-मॅ । त्रयस्त्रिंशत्—§-मु ॥ इन्द्रश्चैव—य-मॅ-मु । इन्द्रश्च—§ ॥ २२८. ११ णुर्दशोर्नुदश्च—*मॅ-मु । नुदश्च—ख-ग-च-ज-ण; नुदश्चोर्णुदश्च—त; णुदशोर्नुदश्च—न-भ; नुदशार्णुयेश्च—य; णुदशोर्नुदश्च—ल ॥ २२८. १२ लडि—त-ल-मु । 'लडि' नास्ति—मॅ ॥ २२८. १४ लडि—ख-ग-ज-ण-त-भ-य-ल । लङ्—मॅ-मु ॥ २२८.१६ भिन्न.....भावः—ख-ग-च-ज-न-भ-य । अभिन्न...भावः-त-ल । वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः ?—*मॅ । अभिन्नवाक्यत्वान्निघाताभावः । वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः ?—मु ॥ २२८. १७ तत्संनियोगेन—मॅ-मु । तत्संयोगेन-§ ॥

२२८. ३० ' मोऽनुस्वारः ' इत्यनुस्वारे—ल-मॅ-मु । मोऽनुस्वारे—ख-ग-च-ज-ण-न-भ ॥ २३०. ४ हविःशब्दोऽन्तोदात्तः—मॅ-मु । हविःशब्द उदात्तः—§ ॥ २३०. १४ पूर्वैः कृतमिनयौ च—थ-य-मु—पा. सू. ४. ४. १३३ । पूर्वैः कृतमिनियौ च—मॅ ॥ २३०. १६ भृञ् भरणे—य-ल-मॅ-मु । डुभृञ् धारणपोषणयोः—ख-ग-च-ज-ण-न-भ । अयमेव युक्तः पाठः ॥ २३१. ७ यष्ट्यागन्यादीन्—ग-च-स-मॅ । यष्ट्यानगन्यादीन्—ख-घ-ज-ण-न-भ-य-मु ॥ मदयिता—घ-स । मादयिता—ख-ग-च-ज-ण-त-न-भ-य-ल-मॅ-मु ॥ २३१.२१ ण्वुल्—ख-ग-च-ज-ण । ण्वुच्—भ-य-ल-मॅ-मु ॥ २३१. २३ अभ्यासदीर्घत्वम्—ख-ग-च-ज-ण-न-भ-ल । अभ्यासस्य दीर्घत्वम्—य-मॅ-मु ॥ २३२. ७ सोमाज्याद्याहुतिभिः—घ-त-य-ल-मु । सोमाद्याहुतिभिः—मॅ । सोमाज्यत्वाद्याहुतिभिः—प; सोमाज्याहुतिभिः—स ॥ २३२. ९ रन्प्रत्यये इत्वम् । नित्वादाद्युदात्तत्वम्—ख-ग-च-ज-ण-न-भ । रन्प्रत्ययेत्वयोर्निपातनादाद्युदात्तत्वम्—य-मॅ । रन्प्रत्ययान्तत्वेन निपातनादाद्युदात्तत्वम्—मु ॥

२३३. ४ हव्यवाट्—ग-च-ज-ण-त-भ-मु । स हव्यवाट्—मॅ ॥ २३३. १० चनः—§ । चनःशब्दः—मॅ-मु ॥ २३३. २० °गार्तिभ्यस्थन्—ख-ग-च-ज-ण-त-न-भ । °गार्तिभ्यश्चेति थन्—य । °गर्तिभ्यस्थन्—मॅ-मु ॥ २३४.१० दम्भु दम्भने—§-मु । दम्भु दम्भे—य-मॅ ॥ २३५.१ श्रूयतेऽन्नमिति—मॅ-मु । श्रूयतेः कर्मणीति—ख-ग-च-ज-ण; श्रूयतेऽत्तमिति—त; श्रूयते कमिति—न-भ-स; श्रूयत सत इति—य; श्रूयन्ते तमिति—ल । २३५. ७ प्रीञ् तर्पणे—मॅ । प्रीङ् प्रीणने—ख-ग-च-ज-ण-न-भ-य-स-मु । प्रीङ् तर्पणे—ल ॥ २३५. २३ अन्येभ्योऽपि दृश्यन्ते—य-मॅ-मु । अन्येभ्योऽपि दृश्यते—§ ॥ २३६. १ अगमन्—मॅ । आगमन्—§-मु ॥ २३६. ४ सिब्बहुलम्—य-मॅ-मु । बहुलम्—§ ॥

२३६.१५ आगतं सुतमिन्द्रे—न-य-ल-आश्व. श्रौ. । आगतमिन्द्रे—मॅ-मु । अत्र मूलेऽस्माभिः स्वीकृत एव पाठो युक्तः । हीनपादग्रहणे तु ' सूक्तं सूक्तादौ हीने पादे ' (आश्व. श्रौ. १.१) इति परिभाषया सूक्तविनियोगबोधकत्वं स्यात् ॥ २३६. १७ इति तिस्रः—न-पुस्तके वर्तमानोऽयं पाठ आश्वलायनश्रौतसूत्रानुसारेणास्माभिः स्वीकृतः । य-मॅ-मु-पुस्तकेषु—इत्याद्यास्तिस्रः ॥ २३६. २३

देवौ—ख-ग-च-ज-ण-न-फ-भ । इन्द्राग्नी देवौ—य-मॅ-मु ॥ २३६. २४ आहूतौ—ख-ग-ज-ण-फ-भ-य-मु । आहुतौ—मॅ ॥ २३७. ७ अस्मदीयस्तुतिलक्षणया—ख-ग-च-ज-प-भ । अस्मदीयया स्तुतिलक्षणया—य-मॅ-मु ॥ २३७.१४ यज्ञस्य—घ-त-न-प-य-ल । अस्य यज्ञस्य—मॅ-मु ॥ यज्ञसाधनभूतस्य—त-न-प-य-ल । साधनभूतस्य—मॅ-मु ॥ २३८.१ समानजेतारौ—ख-ग-च-ज-ण-प-फ-भ-य । समानजेतारौ परस्यापेक्षया जयशीलौ—मॅ । समानजेतारौ परस्परापेक्षया जयशीलौ—मु ॥ २३८. २ अपराजिता अपराजितौ—ख-ज-ण-भ । अपराजितौ—ग-च । अपराजिता—न-य-ल-मॅ-मु ॥ २३८. १७ इषः—य-स । इषे—इतरेषु लिखितपुस्तकेषु मॅ-मु-पुस्तकयोश्च ॥ २३९. १९ अवियुज्य—*मॅ-मु । वियुज्य—§ ॥

२४०. ५ प्रथमम्—ख-ग-घ-च-ज-ण-प-फ-भ । आद्यम्—य-मॅ-मु ॥ २४०. ६ तथा चानुक्रान्तम्—ख-ग-च-ज-ण-भ । अत्रानुक्रमणिका—य-मॅ-मु ॥ २४१. ४ हविष्मदत्वेन—ख-ग-च-ज-ण-भ । हविषां प्रदातृत्वेन—य-मॅ-मु ॥ २४१. ८ ' षच समवाये '—ख-ग-च-ज-ण-स-मु । सच समवाये—य-मॅ ॥ २४१. १८ मंहनीयम्—ख-ग-ज-ण-त-न-भ-स-मु । महनीयम्—य-मॅ ॥ २४१. १९ तं तादृशम्—ख-ग-ज-ण-न-भ-य-ल । तादृशम्—मॅ-मु ॥ २४१. २२ अथा हि—ख-ग-ज-त-न-भ-य-ल-स । अथा—मॅ । अथ—मु ॥ २४२. १ हविष्मदातृभ्यो नोऽस्मभ्यम्—ख-ग-च-ज-ण-प-फ-भ-ल । नः हविष्मदातृभ्योऽस्मभ्यम्—य-मॅ-मु ॥ २४२. १९ लोपो व्योर्वलीति वलोपः—ल । लोपो व्योरिति लोपः—मॅ । लोपो व्योरिति वलोपः—य-मु ॥

२४४. ११ सहसस्पुत्रः बलस्य सूनुः—मॅ । सहस्य सूनुः बलस्य पुत्रः—ख-ग-च-ल । सहसः सूनुः बलस्य पुत्रः—न-भ-य-स-मु । सहसस्पुत्रः सहस्य सूनुः बलस्य पुत्रः—ज-ण ॥ २४४. १६ अनुदात्तस्वरे—ख-ग-ज-ण-न-भ-य-ल । अनुदात्तत्वे—*मॅ-मु ॥ कूयते—य-मॅ-मु । कवते—§ ॥ २४५.३ ' इण् गतौ ' भौवादिकः । ' इण् गतौ ' इति भ्वादौ नास्ति पाठः । ' इट किट कटी गतौ ' (धा. पा. ३१८-२०) इत्यत्र प्रश्लिष्टस्य इ इति धातो रूपम् ' अथामि ' इति स्यात् ॥ २४५. १० सदिरप्रतेः—ख-ग-च-ज-ण-न-भ-य-मु । सदेरप्रतेः—मॅ ॥ २४५. २३ लिट्यनुसि—ख-ग-च-ज-ण-त-न-भ । लिट्य इति-य; लिट्युसि ?—ल-स-मॅ-मु ॥ २४६. २४ तत्पुरुषे° इति—मॅ-मु । तत्पुरुषे°—ख-ग-च-ज-ण-न-य-ल-स ॥

२४९.२ उछो विवासे—ख-ग-च-ज-ण-भ-य । उच्छी विवासे—मॅ-मु ॥ २४९. ११ नृणाम्—§-मु । नृणाम्—मॅ ॥ २५०.७ दिदीहि—घ-प-य-स-मु । दीदिहि—मॅ ॥ २५०.११ अस्य—ख-ग-च-ज-ण-न-भ-य । इत्यस्य—मॅ-मु ॥ २५०. १२ ष्टुत्वेन ढः—मॅ-मु । ष्टुत्वेन—त । इतरपुस्तकेष्वेतन्नास्ति ॥ २५१. २० पीपय । इत्यस्यानन्तरं मु-पुस्तके ' प्यायतेर्यङ्लुगन्तस्य लोटि शपो लुगभावश्छान्दसः ' इत्यधिकम् । य-पुस्तके च—' पीप्यायतेर्युङ्लुप्तस्य लोटि शपो लुगभावश्छान्दसः ' इत्यधिकम् ॥ २५१. २१ इवि...प्रीणनार्थाः । धातुपाठस्तु—' हिवि दिवि धिवि जिवि प्रीणनार्थाः ' इति ॥ २५१. २२ आमन्वितस्याविद्यमानवत्त्वेन—*मॅ-मु । आमन्त्रितस्य विद्यमानत्वेन—§ ॥

२५३.७ अभि अभितः सन्ति—ख-ग-घ-च-ज-ण-प-फ-भ । अभि सन्ति अभि—य । सन्ति—मॅ-मु ॥ २५३. १३ गतिकारकयोरपि—य-ल-मॅ-मु । गतिकारकयोः—ख-ग-च-ज-ण-न-भ ॥ २५३. १५ उत्तरपदादेर्ष्टुत्वं च—§ । उत्तरपदादेश्च ष्टुत्वम्—मॅ । उत्तरपदादेश्च ष्टुत्वं च—मु ॥ उत्वढत्वे—ख-ग-च-ज-ण-न-भ-ल । ऊत्वढत्वे—त-प-मु । ऊत्वढत्वे—य । ऊत्वटत्वे—मॅ ॥ २५३. १६ °स्वरेणान्तोदात्तः—मॅ-मु । °स्वरत्वमन्तोदात्तः—न-ल । °स्वरेत्वेर्णांतोदात्तः—य । °स्वरेणोदात्तः—इतरेषु ॥ २५३. १७ यङ्वृत्तयोगादनिघातः—य-ल-मॅ-मु । इतरेषु नास्ति ॥ २५४. ३ रैविशेषणतया—ख-ग-च-ज-ण-न-भ । विशेषणतया—मॅ-मु । रायो विशेषणतया—य ॥ २५४.४ अन्नेन च—फ-भ-म-मु । अन्नेन—मॅ ॥

शिव् निशाने—य-मॅ-मु । शिञ् निशामने–§ ॥ २५५. ५ शत्रुभूताय—ख-प-फ-भ-य-स-मु । शत्रूभूताय—मॅ ॥ २५५. ६ वीरशब्देन—त-न-य-ल । अवीरशब्देन—मॅ-मु ॥

२५८.७ सवर्णदीर्घः—च-त-न-फ-य-ल-मु। वर्णदीर्घः—मॅ ॥ २५८. २४ नमसः—§ । नमस्—मॅ-मु॥ २५९. ९ धर्मविषयचेतनावन्—मॅ । °चेतनावान्—ख-घ-प-फ-भ-मु । कर्मविषयचेतनावन्—त-य; कर्मविषयचेतनावान्–ल ॥ २५९. १५-१६ °प्रकृतिस्वरत्वम्—मॅ । °प्रकृतिस्वरः-§-मु ॥

२६१. १० यावद्धनम्—त-ल । यावद्वनम्–य । यावद्वन्दनम्—मॅ-मु ॥ २६१.१५ ह्वनम्—ख-ग-च-ज-ण-न-भ-स । ह्वम्—य-मॅ-मु ॥ २६२. ३ विध्रेहि—य-मॅ-मु । इतरेषु नास्ति ॥ रोगाणामुपशमनम्—ख-ग-घ-च-ज-ण-प-फ-भ । रोगाणां शमनम्—य-मॅ-मु ॥ २६२. ११ मृजूष् शुद्धौ—मु । मृजू शुद्धौ इति मॅ-पुस्तके। किंतु मॅक्समुल्लरमहाशयैः मृजूष् इति शुद्धीकृतम्। वस्तुतस्तु भिदादिगणे मृजाशब्दपाठसामर्थ्यादस्य षित्त्वमनार्षमिति बोध्यम्। ४९९ १६ अत्र द्रष्टव्यम् ॥ २६२. २४ सर्पणशीलौ—ख-ग-च-ज-फ-भ । प्रसर्पणशीलौ—य-मॅ-मु ॥

२६३. २० नञ्स्वरः—ख-ग-च-ज-ण-त-भ । तस्य स्वरः—य । तस्य नञ्स्वरः—मॅ-मु ॥ २६४.४ धनैः—ख-ग-च-ज-प-फ-भ । धनैः सह—य । धनैः सह सन्—मॅ-मु ॥ २६५.२ पूर्वलोपः—ज-ण । वलोपः—य । अलोपः—मॅ-मु ॥ २६६. ७ सादेरप्रतेः—ख-ग-च-ज-ण-त-न-फ-भ-य-स । सदेरप्रतेः—मॅ ॥

२६६. १२ आद्यान्त्ये–ख-ग-ज-ण-भ-य-स । आद्यान्ते—मॅ-मु ॥ २६६.१४ विश्वेदेवदेवताके—त-न-स । विश्वदेवताके—य । वैश्वदेवताके—मॅ । वैश्वदेवदेवताके—मु ॥ २६६. २७ °प्रकृतिस्वरः—§-मु । °प्रकृतिस्वरत्वम्—मॅ ॥ २६८. ५ च पूरणः—घ-ज-ण-प-भ । 'च पूरणः' नास्ति—मॅ-मु ॥ २६८. ७ णम प्रह्वत्वे—ज-ण-मु-*मॅ ॥

२७२. १५ पञ्चम्यास्तसिः । 'प्रतियोगे पञ्चम्यास्तसिः' इति सूत्रात् 'पञ्चम्यास्तसिः' इत्यनुवृत्तौ 'अपादाने चाहीयरुहोः' इति सूत्रेण तसिरिति योज्यम् ॥

२७५. ४ °ह्रस्वत्वादयः—ख-च-ज-ण-न-भ-य-ल-स । °ह्रस्वादयः—मॅ-मु ॥ २७५ १५ प्रयच्छताम् । अत्र 'प्रयच्छत' इति पठनीयम्। न-पुस्तके तथा पाठ उपलभ्यते ॥ २७५. २२ °प्रकृतिस्वरत्वम्—त-ल-मु । °प्रकृतिस्वरः—य-मॅ ॥

२७६. ९ असकृदुक्तः—§ । असकृदुपदिष्टः–मॅ । असकृदुद्दिष्टः–य । सकृदुपदिष्टः–मु॥ २७६. १६ प्रकर्षेण नेता—§-मु । प्रकर्षेणानेता—मॅ ॥ २७७.१८ पूर्वपदस्वरः—ख-ग-च-ज-ण-न-भ । पूर्वपदप्रकृतिस्वरः–य-मॅ-मु ॥ २७८.१७ मनुष्यसंचरणविषये—घ-त । मनुष्यसंचारविषये—य-मॅ-मु ॥ २७८. १८ उत्तमेषु स्थानेषु—ख-ग-घ-च-ज-ण-त-न-प-फ-भ-य । स्थानेषु—मॅ ॥

२७९. १६ दुष्टरः दुस्तरः—घ-ज-ण-न-प-स । दुष्टरः—य-मॅ-मु ॥ २७९. २१ दिवादेः—ख-ग-च-ज-ण-न-भ-स । दिवादिः—य-मॅ-मु ॥ २७९. २२ कृच्छ्रार्थे—ल-*मॅ । अकृच्छ्रार्थे—मु ॥ २८०. ११ आहुत—मॅ । आहूत—प-य-मु। अयमेव साधीयान् ॥ २८०. १३ जृष्तृजागृभ्यः—मॅ-मु । जागृभ्यः—§ ॥ २८०· २१ त्वद्विषय°—य-ल । उक्तविषय°–मॅ-मु ॥ २८०. २२ महय–य-मॅ-मु । इतरेषु नास्ति ॥

२८२. ४ अनुदात्तत्वे—य-मॅ-मु । उदात्तत्वे–ल । आद्युदात्तत्वे–इतरेषु ॥ २८२. २७ समीपमागच्छतम्—ख-ग-च-ज-ण-भ । समीपे आगच्छतम्—य-मॅ-मु ॥

२८५. २ रघुष्यदम्—ख-ग-च-ज-ण-न-भ-स । रघुस्यदं लघुस्यदम्–मॅ । रघुष्यदं लघुस्यदम्–य-मु ॥ २८५.११ रघुस्यदम्–§ । रघुष्यदम्–य-मॅ-मु ॥ २८७.२४ बहुव्रीह्नौ–न-*मॅ-मु ॥ २८९. १८ जगत्–ख-ग-च-ज-ण-फ-भ । जगच्च–य-मॅ-मु ॥ २९०. ७ लुप्तोपममेतत्—त-य-मु । मॅ-पुस्तके एतन्नास्ति ॥ २९०. ७ सततप्रवाहोपेतम्—त-य-मु । शतप्रवाहोपेतम् ?–मॅ ॥

२९१. ३ तिस्रः सामिधेन्यः—य-मॅ-मु । इतरत्र नास्ति ॥ २९१. ११ तया—मॅ-मु । तथा –§ ॥ २९४. १४ ' अगुणः ' इत्यस्यानन्तरं ' यद्वा घञर्थे कविधानमिति अधिकरणे कः ' इत्यधिकं मु-पुस्तके ॥ २९४. २३ कृदुत्तरपदस्वरः—§ । कृदुत्तरपदप्रकृतिस्वरः–य-मॅ-मु ॥ २९५. ७ डुन्-प्रत्ययः–य-ल-मॅ । डुञ्प्रत्ययः–ख-ग-ज-ण-न-भ-स-मु । डुप्रत्ययः–च ॥ २९५. ७ निस्स्वरः—य-ल-मॅ । ञिस्वरः–ख-ग-च-ज-ण-न-भ-स-मु ॥ २९५. १५ तित्स्वरितः—ज-ण-त-य-ल । तित्स्वरितम्–मॅ-मु ॥ २९५. २२ आज्याहुतिप्रदानेन—ख-ग-च-ज-ण-प-भ । आहुतिप्रदानेन—य-मॅ-मु ॥ २९६. ५ घृताज्याहुतीनाम्—मॅ । घृताद्याहुतीनाम्—य-मु ॥ २९६. ८ त्वा त्वाम्—ख-ग-च-ज-ण-प-फ-भ । तमिमम्—य-मॅ । इमम्—मु ॥ २९६. ९ निघातः—त-य-ल-मु । इतरेषु लिखितपुस्तकेषु मॅ-पुस्तके च नास्ति ॥

२९७. ९ पुरोळाः—ख-त-फ-भ-य-मु । पुरोडाः–मॅ–इतरेषु च ॥ २९८. २४ हि पूरणः—ज-ण-प-भ । मॅ-मु–पुस्तकयोः इतरेषु च नास्ति ॥ २९८. २६ अणिति तत्रानुवर्तनात्—ल । अणिति तत्रानुवर्तमानात्–भ-स । अत्र ' अणः इति तत्रानुवर्तनात् ' इति भाष्यम् । ' हलः ' इति सूत्रे ' दूलोपे पूर्वस्य दीर्घोऽणः ' इति सूत्रात् ' अणः ' इत्यनुवर्त्य अणो दीर्घः स्यादिति व्याख्यानेन 'तृतीये' इत्यत्र ऋकारस्य अणत्वाभावात् ' हलः ' इति दीर्घो न भवतीत्यर्थः । अञ्निति तत्र नानुवर्तनात्—*मॅ-मु ॥

३०४. २० °स्वरः—§-मु । °प्रकृतिस्वरः—मॅ ॥ ३०५. ८ भसंज्ञाधीनः—त-य-ल-मु । संज्ञाधीनः–मॅ–इतरेषु च ॥

३११. ५ हरिद्वर्णी—च-ज-त-प-फ-ल-मु । हरिवर्णी—मॅ ॥ ३११. ६ तस्मात्—*मॅ । यस्मात्–§ । यस्मात् तस्मात्—मु ॥ ३१२. ५ करोतेरकारस्य—त-ल-मु । अकारस्य–मॅ ॥ ३१२. १६ पर्वतासः पर्वताश्च—घ-ज-ण-त-न-य-ल-मु । पर्वताश्च–मॅ ॥ अनुकूलाः—य-मॅ । इतरलिखित-पुस्तकेषु मु-पुस्तके चैतन्नास्ति ॥ ३१२. १० यावत्—*मॅ-मु । यत्-§ ॥ ३१४. १५ दानशक्तिः—घ-ज-ण-त-न-भ-य-ल-मु । धनशक्तिः–मॅ ॥ ३१४. २७ यद्वा—य-मॅ-मु । इतरेषु नास्ति ॥ ३१५. २० तदस्यास्तीति सामनः—*मॅ। तदस्यास्तीति सामना–त-भ-स-मु । अयं पाठः समीचीनः प्रतिभाति। अस्मिन् पक्षे'तदस्याः अस्तीति'इति भाष्यम्॥३१५.२६ इष गतौ—*मॅ-मु । इषि गतौ–य । इषु गतौ-§॥ इषिमदि° इत्यादिना—मॅ-मु । इषुमुदित्याना–ख-ग-भ; इषुमुदित्यादिना–च-स; इषिमदित्याना–ज-ण; इषुमदीत्यादिना–न; इषिमदिमुत्यादिना–ल ॥ ३१६.११ विशिष्टः—य-मॅ-मु । विशिष्टः–§॥३१६. १७ अलातृणः । तृहि हिंसायाम् । अलंपूर्वात् तृहेः । तृदि हिंसायाम् । अलंपूर्वात्तृदेः इति य-वर्जलिखितपुस्तकेषु । धातुपाठे ' तृह हिंसि हिंसायाम् ' ' उतृदिर् हिंसानादरयोः 'इति चोपलभ्यते । ' अलातृणः बहूदकतया अलमत्यर्थमातृद्यते, ' ' अलातृणोऽलमातर्दनः ' इति च भाष्यनिरुक्तपर्यालोचनया तृदधातोरेवायं शब्दो निष्पन्न इति युक्तम् ॥ ३१७. ७ परस्परं संगते—घ-न-भ-य-ल-स । परस्परसंगते—मॅ-मु ॥३१७.२४ सुसूधागृधिभ्यः—ख-ग-च-ज-ण-त-न-भ-स-मु । सुसूधाकृत्विभ्यः—य । सुसूधाऽगृधिभ्यः—मॅ ॥ ३१८. ८ संबन्धिनः ? । ' संबन्धिन्याः ' इति भाष्यम् ॥ ३१९. २० रिपवः...°प्रत्ययः—मॅ-मु । रपवचवसिवक्ते परेति चोपधाया इत्युप्रत्ययः—ख-ग-भ; रप हिंसा-याम् । रपेरिच्चोपधाया इत्युप्रत्ययः–च; रप व्यक्तायां वाचि । वचवसिवक्ते रपेतिच्चोपधाया इत्युप्रत्ययः–ज; रप व्यक्तायां वाचि । रपति चोपधाया इत्युप्रत्ययः–ण; रपवचवसिवक्ते रपेरिच्चोपधाया इत्युप्रत्ययः–न; पववचसिच्चोपधाया इत्युप्रत्ययः–ल; रिपवचसिवक्तोरपेतिचोपधाया इत्याप्रत्ययः—स; रिपवः । रपवसिवक्ते रपेरिच्चोपधाया इत्युप्रत्ययः—य ॥ ३२०. ७ नुमागमः—§ । नुडागमः ?–मॅ-मु ॥ ३२०. १२ रक्षःकुलम्—§-मु । रक्षः रक्षःकुलम्–मॅ ॥ ३२२. १८ गोपते—§ । गोपते गवां पते—य-मॅ-मु ॥ ३२२. २७ अस्मात्—ख-ग-च-ज-ण-त-न-भ-स । इत्यस्मात्—य-मॅ-मु ॥

३२३.५ **तस्मिन्**—§-मु । अस्मिन्—*मॅ ॥ ३२३. १३ **करणे घः**—य-ल । घः—मॅ-मु इतरेषु च ॥ ३२३. १७ **कुत्वम्**—ख-ग-च-ज-ण-त-न-फ-भ-स-मु । धत्वम्—मॅ ॥ **तुक्**—ख-ग-च-ज-ण-न-भ-स-मु । मॅ-पुस्तके नास्ति ॥

३२४. ५ **नप्त्यं नप्तृभवम्**—§-मु । नप्त्यं नप्तारं पौत्रं गात् गच्छति दुहितुः पुत्रत्वेन स्वीकारात् दौहित्रं नप्तृभवम्—य-मॅ ॥ ३२४. ७-८ **यत्र यस्या दुहितुः**—§-मु । यत्र यस्मिन् विषये पितापुत्रो जनको दुहितुरप्रत्तायाः स्वकन्यायाः सेकं रेतसः सेकं तस्यां रेतःसेकमृशन् प्रसाधयन् शग्म्येन सुखनिमित्तेन मनसा संदधन्वे आत्मानं संधत्ते अपुत्रत्वनिमित्तदुःखापगमात् यस्या दुहितुः—य-मॅ ॥ ३२४. ८ **यः**—§-मु । सम्—मॅ ॥ ३२४.१५ **रेफलोपश्छान्दसः**— § । रेफलोपश्छान्दसः । तिस्वरः—मॅ-मु ॥ ३२४. १८ **अनित्यत्वज्ञापितत्वात्**—ख-ग-च-ज-ण-भ-ल-स । अनित्यत्वस्य ज्ञापितत्वात्—य-मॅ-मु ॥ **धवि**-य-मॅ-मु । धन्व इति-§॥ ३२४. १९ **यद्योगादनिघातः**—य-मॅ-मु । इतरेषु नास्ति ॥ ३२५. २ **तुरीयकम्**-य-याज्ञ. स्मृ-मॅ-मु । तृतीयकम्-§ ॥ ३२५. ४ **वह्निश्च**-घ-ज-ण-न-प-भ । वह्निः—य-मॅ-मु ॥ ३२५. ७ **दुहितुस्तथात्वं नेति**—ख-ग-घ-च-ज-ण-प-फ-भ-ल । दुहिता तथा नेति-य-मॅ-मु ॥ ३२५. १२ **इत्यञ्**—§ । इत्यत्र ?-मॅ-मु ॥ ३२५. १५ **लित्स्वरः**—ख-ग-च-ज-ण-त-न-भ-य-मु । तिस्वरः—मॅ ॥ ३२५. १६ **द्विर्वचनस्य**—मॅ-मु । अत्र ' द्विवचनस्य ' इति पठनीयम् । न-भ-स- पुस्तकेषु तथा पाठ उपलभ्यते ॥ ३२५. १७ **जनेर्णाचि**-*मॅ-मु । जनेर्लिङि-§ ॥ ३२५. २३ **रोचमानस्य**—ल-वर्जितेषु मु-पुस्तके च । आरोचमानस्य—मॅ ॥ ३२५. २६ **यजनार्हैः**—घ-च-ज-ण-न-प-भ-य-ल-मु । यज्ञार्हैः—मॅ ॥ ३२५. २७ **सोमाज्याहुतिभिः**—घ-ज-ण-त-न-प-भ-मु । सोमाज्याहु(ति ?)भिः-ख-ग-च-फ । सोमाहुतिभिः—य-ल-मॅ ॥ ३२६. ६ **समगच्छन्**—य-मॅ-मु । संगच्छन्-ल ॥ ३२६. ६ **मरुतः**—§ । मरुतस्तस्मिन् वृत्रे हते-य-मॅ-मु ॥ ३२६ ७ **उदितं सूर्यं**-§ । तत इन्द्रं वृत्रहन्तारमुदितं सूर्यम्—मॅ-मु ॥ ३२६. १२ **अय गतौ**—§-मु । अय पय गतौ—य-मॅ ॥ ३२६. १८ **स इन्द्रः**—य-मॅ-मु । इन्द्रः—§ ॥ ३२६. २१ **निगूढाः**-ख-घ-ज-ण-प-भ-मु । निरुद्धाः-य-मॅ ॥ ३२६. २२ **अतृन्दन्**-§ । अतृन्दन् निधानमपावृण्वन्-य-मॅ-मु ॥ ३२६. २३ **उपेक्षामकुर्वन्**-मॅ-मु इतरेषु च । अपेक्षामकुर्वन्-ल ॥ ३२७. २० **लुङि लृदित्वात् च्लेरङादेशः**—*मॅ-मु । लुङि शतृदित्वात् च्लेरङादेशः—य । ऋताविति रिङादेशः—ख-ग-ज-ण-भ-स । च्लेरङादेशः—च । लृदित्वादङादेशः-न । लुटि ऋतो वेति च्लेरङादेशः-ल॥ ३२७.२१ **सरतीति सरमा**—ख-ग-च-ज-ण-त-न-भ-य-स-मु । सरतीति—मॅ ॥ ३२८. ६ **अगच्छदु**—घ-ज-ण-मु । अगच्छत्—ख-ग-च-न-भ-य-ल-मॅ ॥ ३२८. १४ **परस्याकारस्येत्वम्**—ख-ग-च-ज-ण-त-न-भ-स-मु । परस्येत्वम्—य-मॅ ॥ ३२८. २१ **वसुनः**— ल-वर्जलिखितपुस्तकेषु मु-पुस्तके च । वस्तुनः—य-मॅ ॥ ३३०. ७ **हृष्टा अभूवन्**—ख-ग-घ-च-ज-ण-त-प-फ-भ । अहृष्यन्—य-मॅ-मु ॥ ३३०. ८ **अतपिष्ट**—*मॅ-मु । अवतिष्ट—य । इतरेषु अशुद्धम् ॥ ३३०. १२ **सिच्यङि**—ख-ग-ज-ण-त-न-भ-य-ल-स । अङि—च । णिच्यङि—मॅ-मु ॥ ३३१. ४ **पृषोदरादित्वात्**—§-मु । य-मॅ-पुस्तकयोः एतन्नास्ति ॥ ३३१.१४ **उन्नतम्**—ख-ग-च-ज-ण-त-न-भ । उचितम्—य । उत्तमम्—मॅ-मु ॥ **तदुच्यते**—§-मु । चेदुच्यते—मॅ ॥ °**सुकृतकर्माणः**—घ-ज-ण-य-ल । °कर्माणः—मॅ-मु ॥ ३३१. १७ **विष्टब्धे कुर्वन्तः**—घ-ज-ण-न-प-य-मु । विष्टाब्धं कुर्वन्तः—ख-ग-भ । विष्टब्धं कुर्वन्तः—च-ल । विष्टाच कुर्वन्तः—त । विध उद्यैः—ल । विपृच्चे—स ॥ ३३२. २ **विभ्वं विभुम्**—य-मॅ-मु । विभुम्—ख-ग-भ-ल-स । विश्वं विभुवम्—घ । च-पुस्तके एतत् नास्ति । विश्वं विभ्वम्—ज । विश्वं—ण ॥ ३३३. १८ **अपः प्र असृजत्**—घ-ल । अपः असृजत्—इतरेषु । अपश्चित् अपोऽपि प्रासृजत्—य-मॅ-मु ॥ ३३३. २० **अक्तुभिः चित् रात्रिभिः च**—ख-ग-घ-च-ज-ण-प-फ-भ । अक्तुभी रात्रिभिः—य-मॅ-मु ॥ ३३३. २१ **रात्रिदिवम्**—

ख-घ-ज-ण-प-भ । रात्रिदिवम्—य-मॅ-मु ॥ ३३४. २१ सरण्यन्—§ । तथा सरण्यन्—मॅ-मु ॥ ३३४. २७ मलोपः—मॅ-मु । मलोपः ?—§ ॥ ३३६.११ गाः—य-मॅ-मु । इतरेषु नास्ति ॥

३३८.१० वज्रयुक्तः हस्तः—ख-ग-च-ज-ण-त-न-भ-य-ल । वज्रयुक्तौ हस्तौ—मॅ-मु ॥ ३३९.६ हे हर्यश्व हरितवर्णाश्वोपेत—ख-ग-घ-च-ज-ण-प-फ-भ । हे हर्यश्व—य-मॅ-मु ॥ ३४१. १५ तव—घ-च-ज-ण-भ-*मॅ । ते तव—मु ॥ ३४१.१७ द्यावः दिवः—ख-ग-च-ज-ण-य । द्यावः—मॅ-मु ॥ ३४१. २५ सद्यस्क्रीनाग्नि—य-मॅ-मु । सद्यस्कनाग्नि—ख-ज-ण-त-भ-ल-स; यद्यस्कनाग्नि—ग-च; सद्यस्कनाग्नि—त ॥ ३४३. ४ स्फिग्या । यचि भमिति भसंज्ञायाः बाधितत्वात् स्वादिष्वसर्वनामस्थाने इति पदसंज्ञायां जश्त्वम् । तृतीयायाः पूर्वसवर्णः । इदमयुक्तं प्रतिभाति । स्फिच्शब्दोत्तरतृतीयायाः 'सुपां सुलुक्०' इत्यादिना यादेशे 'यचि भम्'इति भसंज्ञां बाधित्वा छान्दसत्वात् ' स्वादिष्वसर्वनामस्थाने ' इति पदसंज्ञायां जश्त्वे कुत्वे च स्फिग्या इति रूपं निष्पन्नम् ॥ भसंज्ञाया बाधितत्वात्—ख-ग-च-ज-ण-त-न-स । भसंज्ञां बाधित्वा—य-मॅ-मु ॥ ३४३.१३ अस्मदीयोऽयं यज्ञः—§ । अस्मदीयो यज्ञः—मॅ-मु ॥ ३४३.१४ सारभूतोऽयं यज्ञः—ख-घ-ज-ण-त-प-भ-ल-स-मु । यज्ञः—य-मॅ ॥ ३४४. ६ शैषिकार्थे—य-मॅ-मु । शविकारार्थे—ख; शव्विकारार्थे—ग-ज; शैषिकार्थे—न; शैविकार्थे—भ-स; शेषिकेऽर्थे—ल ॥ ३४४.७ नवशब्दस्य 'त्नप्तनन्स्वाश्च (त्नप्तनप्स्वाश्च-मु; त्नप्ततनाश्च-य) प्रत्यया वक्तव्या नू इत्यादेशश्च ' इति तनन्प्रत्ययः—य-मु-मॅ । नवशब्दात् तनश्च प्रत्ययो (तनप्रत्ययो-ख-ज-ण) वक्तव्यो नू इत्यादेशश्चेति तनप्रत्ययः—ख-ग-च-ज-ण-त-न; नवशब्दात्तपूनश्च प्रत्ययो वक्तव्यो नू इत्यादेशश्चेति तनप्रत्ययः—भ; नवशब्दस्य नप्तनश्च प्रत्यया वक्तव्या नू इत्यादेशश्च । तेन तनप्रत्ययः—ल; नवशब्दस्य नपुनश्च प्रत्ययो वक्तव्यो नू इत्यादेशश्चेति जनप्रत्ययः—स ॥ ३४४.२७-२८ आपूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः—मॅ ।...माध्यंदिनः—ख-ग-च-ज-त-न-भ ।...माध्यंदिनः-य-ल-स-मु ॥ ३४५.८ सक्ता सेचकः—§ । सेचकः-य । सेक्तोत्सेचकः—मॅ-मु ॥ ३४५.१४ आववृत्वन्—ख-ग-च-ज-ण-न-भ-स-मु । अववृत्वन्-य-मॅ ॥ ३४६. १ इरच्प्रत्ययः—च-ज-न-ल-*मॅ । ईरट्प्रत्ययः—मु ॥

३४७ ४ अन्तर्णीतसन्नर्थो—ख-ग-ज-ण-न-भ-य-ल-स । अन्तर्णीतसनर्थो— मॅ-मु ॥ ३४७.६ कूलविपाटनाद्विपाशनाद्वा विमोचनाद्वा विपाट्—मॅ । कूले विपाटनात् विपाशनाद्वाप्युत्रोऽभूत् तमावृतेर्मुमूर्षोर्वसिष्ठस्य पाशा अस्यां व्यपास्यन्त विमोचनाद्वा विपाट्—ख-ग-च-ज-ण-न-फ-भ-ल-स । कूले विपाटनाद्विपाशनाच्छतपुत्रमरणोद्भूततमोवृतेर्वसिष्ठस्य पाशा अस्यां व्यपास्यन्त विमोचनाद्वा विपाट्-मु । कूलविपाटनात् विपाशनात् हतपुत्रोद्भूततमोवृत्तेः मुमूर्षोर्वसिष्ठस्य पाशा अस्यां व्यपास्यं विमोचनाद्वा विपाट्—य ॥ ३४७.१७ भौवादिः—§-मु । भूवादिः—य । भौवादिकः—मॅ । अयमेवसाधुः ॥ युवां—य-मॅ-मु । इतरेषु नास्ति॥ ३४८.३ विभक्त्यलोपः इत्यादि—त-न-य-ल-स-मु । विभक्त्यलोपः-मॅ ॥ ३४८.१५ यथा—मॅ-मु-× ॥ ३४९.३ एतच्छब्दस्य—ख-ग-ज-ण-त-न-भ-य-ल-स । इदंशब्दस्य—मॅ-मु ॥ ३४९.७ इति क्यच्—य-मॅ-मु । क्यच्—§ ॥ ३४९.८ ह्वेञो—ख-ग-च-ज-ण-त-न-य-स । ह्वयो—ल-मॅ-मु ॥ ३४९.३० ह्वयतेर्लुङि सिचः । ' सिचः ' इत्यस्य स्थाने 'च्लेः' इति भाव्यम् ॥ ३५१.३ व्यत्ययेनाद्युदात्तत्वम्—मॅ-मु । व्यत्ययेन प्रत्ययस्याद्युदात्तत्वम्—य । यत्प्रत्ययस्याद्युदात्तत्वम् ?—ख-ग-ज-ण-त-न-भ-ल-स ॥ ३५१.१५ नोऽभीत्या—*मॅ-मु । धी इत्या—न-ल । धीष इत्या—म ॥ ३५१. १९ प्रागल्भाः । ' प्रगल्भाः ' इति पठनीयम् । एवमेव घ-ज-ण-न-प-य-ल-स पुस्तकेषु । प्रागल्भ्यम्-मॅ-मु ॥ ३५१.२६ सिचो लोपः । अत्र ' सिपो लोपः ' इति भाव्यम् ॥ ३५२.१० ओ इति प्रगृह्यसंज्ञा । ' ओदिति प्रगृह्यसंज्ञा ' इति पठनीयम् । तथैव न-भ-स-लिखितपुस्तकेषूपलभ्यते ॥ ३५२.२४ विश्वामित्रवम्—ख-ग-च-ज-ण-भ । विश्वामित्रवाक्यम्-

य-मॅ-मु ॥ ३५३.१ नन्नीभवति—§ । नन्ना भवति—मॅ-मु ॥ ३५३.२७ लेट आडागमः—च । लेटोऽडाटावित्याडागमः—य । लेटोऽडागमः—मॅ-मु ॥ ३५४.२२ युग्यकण्ठपार्श्वादिसंलग्नाः—घ-ज-ण-न-प-भ-य-ल । युगकीला युग्यकट०—मॅ । युगकीला युग्यकण्ठ°—मु ॥

३५५.२५-२६ ब्रह्मणा जूतः स्तोत्रेणाकृष्टः—ख-ग-घ-च-ज-ण-फ-भ-ल । ब्रह्मणा स्तोत्रेणाकृष्टः—य-मॅ-मु ॥ ३५६. ३ दानगतिरक्षणाहिंसादानेषु—च-फ । °हिंसाग्रहणेषु—य-मॅ-मु ॥ ३५६. १५ नहेर्हलोपश्च—य*-मॅ । महेर्हलोपश्च—§-मु ॥ ३५७. २ अरुधत्—ग-घ-च-ज-ण-य-ल-मु । अरुन्धत्—मॅ ॥ ३५७.१२ धेट इच्च—ज-फ-स-मु । धेट ई च—य-मॅ॥ ३५७.१५ राममर्हन्तीत्यर्थे—ग-च-ज-ण । राममर्हत्यर्थे—य । राममर्हतीत्यर्थे—मॅ-मु ॥ ३५७. २४ यजमानाय—मॅ । यजमानाय तदर्थं तथा—मु । यजमानाय तथा—ख-ग-च-ज-ण-त-न-फ-भ-स । यजमानाय तथा च—घ-प-ल ॥ ३५७. २४ तथा च—न-य-ल-स-मॅ-मु । यथा च—ख-ग-घ-च-ज-ण-फ-भ ॥ ३५७. २५ बृहते महते—ख-ग-घ-च-ज-ण-त-न-प-फ-भ-मु । बृहते—य-मॅ ॥ ३५८.१ शकन्ध्वादित्वात् पररूपत्वम्—य-मॅ-मु । एमनादिश्वात्पररूपत्वम्—ख-ग-च-ज-ण-त-न-भ-ल-स । अयमेव युक्तः पाठः ॥ ३५९. ९ तद्धतः—ख-ग-च-ज-ण-न-भ-स । तद्धन्तः—य-मॅ-मु ॥ ३५९. २१ वृत्रहननबहुप्रदानादीनि—य-ल-मु । °बहुप्रदानानि—मॅ ॥ ३६०. ७ संभजमानमिन्द्रम्—घ-ज-ण-प-फ-भ-य-ल । भजमानमिन्द्रम्—मॅ-मु ॥ ३६१.८ अभिदत्—§ । अभिन्दत्?—मॅ-मु ॥ ३६१.१० अभवत् अभूत्—ख-ग-च-ज-ण-फ-भ । अभवत्—य-मॅ-मु ॥

३६१. २३-२४ मध्यंदिनः इति—य-मॅ । माध्यंदिन इति—ल-मु । माध्यंदिने सवने—इतरेषु ॥ ३६१. २५ मध्यंदिन इति—मॅ-मु । माध्यंदिन इति—§ ॥ ३६१. २६ प्र मंदिन इमा—ज-ण-य-मु । प्र मन्दिने इमा—मॅ ॥ ३६२. १-२ सम्यग्वहताम्—§ । सम्यगावहताम्—मॅ-मु ॥ ३६३. ३ विभक्तेरुदात्तत्वम्—ख-ग-च-ज-ण-भ । विभक्तेरुदात्तता—य-मॅ-मु ॥ ३६३.१२ वि मुच विमुञ्च—घ-न-प-भ-य-मु । वि मुच—मॅ ॥ ३६३. २० दृग्दृशवतुषु—§-मु । दृग्दृक्षतुषु?—मॅ ॥ ३६४. ७ समानप्रसिद्धौ—मॅ । वेगबलयोः समानप्रसिद्धौ—घ-ज-ण-य-मु ॥ ३६४. ७ क्षिप्रगमनावेतौ—ख-ग-ज-ण-न-भ-स । क्षिप्रगमनोपेतौ-य-मॅ-मु ॥ ३६४. १८ हरी अश्वौ—ख-ग-घ-च-ज-ण-प-फ-भ । हरी—य-मॅ-मु ॥ ३६५. ६ अस्येमं सोमं शश्वत्तमं बहुतमं पाहि—ख-ग-ज-ण-प-फ-भ । शश्वत्तमं भूयांसमस्येमं सोमं पाहि—य-मॅ-मु ॥ ३६५. १२ सदिरप्रतेः—ख-ग-च-ज-ण-स-मु । सदेरप्रतेः-य-मॅ ॥ ३६६.६ सम्यगकार्षुः—य-ल-स-मॅ-मु । सम्यगकार्षुः । तस्यागत्य तत्यानार्थमागत्य—ख-ग-घ-च-ज-ण-न-प-फ-भ ॥ ३६६. ७ स्वाः स्वकीयाः—य-मॅ-मु । इतरेषु नास्ति ॥ ३६६. ७-८ पथि कर्मणि—च-स-मॅ । कर्मणि—य-मु । पथि कर्मणि स्वाः—ख-ग-ज-ण-भ-ल ॥ ३६६.८ त्वमागत्य—ल-मु । त्वम्-य-मॅ ॥ ३६६. ८ तस्य पाहि—मॅ । तस्य अस्य पाहि—मु । अस्य पाहि—§ ॥ ३६७. १ तेन बलादपहृत्य—§-मु । तेन । चिह्निकल्पार्थः । बलादपहृत्य-य-मॅ ॥

३६८. १७ कालात्मकः—मॅ-मु । कामात्मकः—§ ॥ ३६८. २७ अच्छावाकशस्त्रे याज्या—ल-मॅ-मु । अच्छावाकशस्त्रयाज्या—इतरेषु लिखितपुस्तकेषु ॥ ३६९.५ तव त्वदर्थम्—ख-ग-घ-च-ज-ण-प-फ-भ-य-मु । त्वदर्थम्—ल-स-मॅ ॥ ३६९. १८ सर्वैः स्तुत्यः—ख-ग-घ-च-ज-ण-भ-स-मु । स सर्वैः स्तुत्यः-मॅ ॥ ३७०. ११ पूर्वपदस्य—ख-ग-घ-च-ज-ण-न-फ-भ-स-मु । पूर्वस्य-य-मॅ ॥ ३७०. २४ अयतेर्लङि रूपम्—मॅ-मु । एतेर्लङि रूपम्—फ । अयं समीचीनः प्रतिभाति ॥ ३७०. २६ गमेर्लिटि रूपम्—य-मॅ । गमेर्लिटि—§-मु ॥ ३७१. २५ ईं सोयमिन्द्रः—य-मॅ-मु । सोयमिन्द्रः—§ ॥ ३७१. २५-२६ सं विव्याच—य-मॅ-मु । समीं विव्याच—§ ॥ ३७२. १३ हे हर्यश्व इन्द्र—ख-ग-घ-च-ज-ण । हे हर्यश्व—य-मॅ-मु ॥ ३७३. ११ शुनं हुवेमेति व्याख्याता—न-मु । मॅ-पुस्तके एतन्नास्ति ॥

३७३. १५ **गायत्रीतृचाशीतौ**—ल-स-मॅ-मु । गायत्रे वृषाशीतौ–ख-ग-च-ज-ण; गायत्रे तुयाशीतौ–त-न; गायत्रे तृचाशीतौ—भ-य । ऐतरेयारण्यके तु औष्णिहतृचाशीताविदं पठितम् ॥ ३७३. २० **पृतनाषाह्याय**—त-ल-स-मु । पृतनासाह्याय–मॅ ॥ ३७४. ८ **आद्युदात्तश्च**—ख-ग-च-ज-ण-त-न-भ-मु । आद्युदात्तः–य-मॅ ॥ ३७४. २४-२५ **महयामः स्तोत्रं कुर्मः**—ख-ग-घ-च-ज-ण-प-फ-भ-य-मु । स्तोत्रं कुर्मः–मॅ ॥ ३७५ १४ **संग्रामेषु**—य-मॅ-मु । इतरेषु नास्ति ॥ ३७५. १९ **द्युम्नेषु**—ख-ग-च-ज-ण-न-भ-स-मु । हे इन्द्र द्युम्नेषु–य-मॅ ॥ ३७५. २१ **हे इन्द्र साक्ष्व**–ख-ग-घ-च-ज-ण-प-फ-भ । साक्ष्व–य-मॅ-मु ॥ ३७५. २३ **पृतनानामाज्यं पृतनाज्यम्**–*मॅ-मु । पृतनानामाज्यम्–§ ॥ ३७५. २६ **षह मर्षणे**—ख-ग-च-ज-ण-य-ल-मु । सह मर्षणे—मॅ ॥ ३७६. २३ **हे इन्द्र वृत्रहन्**—ख-ग-च-ज-ण-न-फ-भ-स । हे इन्द्र–य-मॅ ॥

३७८. ३ **पूर्वमनुष्ठितयज्ञाः देवभूयम्**—ख-ग-घ-ज-ण-न-य-ल । पूर्वमनुष्ठितयज्ञादेवभूयम्—च-भ-मॅ-मु ॥ ३७८. २१ **देवभूयं गतानाम्**—घ-ज-ण-त-य-मु । देवभूयगतानाम्–मॅ ॥ ३७९. ६ **गुह्यानि कर्माणि**—ख-ग-च-ज-ण-फ-भ । गूढानि कर्माणि–य-मॅ-मु ॥ ३७९. ७ **उतापि च**—य-मॅ-मु । इतरेषु नास्ति ॥ ३७९. १० **नियमितवन्तः**—य-मॅ । इतरलिखितपुस्तकेषु मु-पुस्तके चैतन्नास्ति ॥ ३७९. २४-२५ **वसानः आच्छादयन्**—य-मॅ-मु । वसानः धार्यमाणः—§ ॥ ३८०. ११-१२ **शुरुधः शुचः पिपासाया रोधयिष्यः सन्ति भवन्ति**—ख-ग-घ-च-ज-ण-प-फ-भ । शुरुधः शुचः पिपासाया रोधयिष्यः भवन्ति–न-ल-स । शुरुधः सन्ति शुचः पिपासाया रोधयिष्यो भवन्ति–मॅ-मु ॥ ३८०. १६ **ईकारस्य आकारादेशः**—ख-ग-च-ज-ण-न-फ-भ । आकारादेशः—य-मॅ-मु ॥ ३८०. २६ **वायुवच्चञ्चलरश्मीन्**—त-मु । वायुवच्चलनरश्मीन्—य-मॅ ॥ ३८१. १६ **इत्पूरणः**—ज-भ । इत्पूरणम्—मॅ-मु ॥ ३८२. २ **अमतिं दीप्तिम्**—य-मॅ । अमतिं कान्तिम्—§-मु ॥ ३८२. ५ **वृणोति तद्वत्**—मॅ । आवृणोति तद्वत्–मु । यथा वृणोति तद्वत्–§ ॥ ३८२. ५ **नुः पूरणः**—ग-च-ज-ण-फ-भ-मु । य-मॅ-पुस्तकयोः नास्ति ॥ ३८२. २० **स्वाराज्यलक्षणम्**—घ-ज-ण-त-भ-य-ल-स । स्वराज्यलक्षणम्–मॅ-मु ॥ ३८३. ५ **व्याख्यातेयम्**—त-मु । मॅ-पुस्तके नास्ति ॥

३८४. १ **पूर्वे भवा**— §-मु । पूर्वकाले भवा—य-मॅ ॥ ३८५. १ **पणिभिरपहृतेषु तन्निमित्तम्** —य-मॅ । पणिभिरपहृतेषु—§-मु ॥ ३८५ ३-४ **दृंहिता दृंहितानि**—ख-ग-च-ज-ण-प-फ-भ-मु । दृंहितानि–य-मॅ ॥ ३८५. २५ **आहौ पूरणौ**—ख-ग-च-ज-ण-प-फ-भ । मॅ-मु-पुस्तकयोरेतन्नास्ति ॥ ३८५. २६-२७ **उदात्त इत्युक्तत्वेन**—ख-ग-त-न-भ-य-स-मु । उदात्त इत्युक्तेन—मॅ ॥ ३८६. ११ **गूळ्हं गूढचारिणम्**—घ-च-प-फ-मु । गूढचारिणम्–य । गूढं गूढचारिणम्–मॅ ॥ ३८७. ३ **तादृशस्य तव कारोः**—ज-ण-य-ल-मु । तादृशस्य कारोः–मॅ ॥ ३८७. २५ **व्याख्यातेयम्**—त-मु । मॅ-पुस्तके नास्ति ॥

३८८. ४ **अथ तृतीयाष्टकस्य तृतीयाध्याय आरभ्यते**—स । अथ तृतीयाध्याय आरभ्यते–मु । मॅ-पुस्तके नास्ति ॥ ३८९. १५ **नः**–§-मु । णः–मॅ ॥ ३८९. २२ **तव क्षयम्**—घ-ज-ण । क्षयम्–य-मॅ-मु ॥ ३९०. ४ **स्वभूतान् तान्**—त-ज-य-ल । तान्—मॅ-मु ॥ ३९०. २६ **सोमस्य पीत्वी सोमं पीत्वा**—य-मॅ-मु । सोमस्य पीत्वी पीत्वा–ख-ग-च-ण-फ-भ; सोमस्य सोमं पीत्वी पीत्वा–घ-ज; सोमस्य पीत्वा–न-ल; सोमस्य पीत्वी–स ॥ ३९१. ३ **नत्रा समासे तस्य स्वरः**—य-मॅ-मु । नत्रा समासः तस्य स्वरः–§ ॥ ३९१.१२ **अनिसंनिकृष्टस्य**–ख-ग-घ-ज-ण-प-भ । संनिकृष्टस्य–य-मॅ-मु ॥

३९१. २१ **अद्रिवः वज्रिन्**—घ-ज-ण-मु । हे अद्रिवः हे वज्रिन्–य-मॅ ॥ ३९२. १३-१६ **तिस्तिरे ... प्रत्ययस्वरः**—य-मॅ-मु । इतरेषु नास्ति ॥ ३९२. २१ **ब्रह्मवाहः** । **ब्रह्माणि**

स्तोत्राणि—ख-ग-घ-च-ज-ण-प । ब्रह्माणि स्तोत्राणि-य-मॅ-मु ॥ ३९२. २२ हे स्तुत्य इन्द्र—ज-ण । हे ब्रह्मवाह इन्द्र—य-मॅ-मु ॥ ३९४. ५ हविःस्वीकरणार्थम्—§-मु । अस्मदीयहविःस्वीकरणार्थम्—*मॅ ॥ ३९५. ३ अञ्जतेः क्विनि—य-मॅ-मु । अञ्जतेः क्विपि—§ ॥ ३९५. ४-५ कृदुत्तरपद-प्रकृतिस्वरः—मॅ-मु । कृदुत्तरपदस्वरः—§ ॥

३९५. १२ ते तव रथः—ख-ग-घ-च-ज-ण-फ-भ । तव रथः—य-मॅ-मु ॥ ३९५.१४ आशिर इत्यादेशः—मु । 'शिर् इत्यादेशः' इति पठनीयम् । तथा न-य-स-लिखितपुस्तकेषूपलभ्यते । आशिरित्यादेशः—मॅ । पृ. ३९७. प. ९, ४१२. २४, ४३१. १४ एतेषु प्रदेशेषु शिरित्यादेशः इति पठनीयम् ॥ ३९५. १८ माद्यते अनेन—ख-ग-च-ज-ण-फ । मद्यते अनेन—य-मॅ-मु । 'माद्यत्यनेन' इति भाव्यम् ॥ ३९७. ८ इमं सोमं—य-मॅ-मु । इमम्—§ ॥ ३९७. १९ ररन्तु—ख-ग-च-त-न-भ-य-ल-स-मु । रारन्तु—मॅ ॥

३९८. १४ आ अभिलक्ष्य—*मॅ-मु ॥ ३९९. ४ त्वा त्वामाह्वयन्ति—ख-ग-घ-च-ज-ण-प-फ-भ । त्वामाह्वयन्ति—य-मॅ-मु ॥ ३९९. २० अञ्जिघृसिभ्यः क्तः—ज-ण-य । अञ्जिघृसिभ्यः क्तः—मॅ-मु ॥ ४००. २ त्वामावहातः—ख-ग-घ-च-ज-ण-न-भ-स-मु । त्वामावहातश्च—य-मॅ ॥ ४००. ४ स्तोत्राणि शृणवत् च—घ-ज-ण-त-य-स-मु । स्तोत्राणि शृणवत्—मॅ ॥ ४००. २६ द्विता द्विधा यथा—ख-ग-च-ज-ण-न-भ । द्विता द्विविधं यथा—मु । द्विता द्वैधं यथा—य-मॅ ॥ ४०१. १३ वर्पास्वृतुषु—ल-स-*मॅ-मु ॥ ४०१. १४ अपावृणोपि—§—मु । अपवृणोपि—मॅ ॥ ४०१. २५ शुनं हुवेमत्येषा व्याख्याता—न । व्याख्यातेयमृक्—मु । मॅ-पुस्तके नास्ति ॥

४०३. १९ प्राणापहारकम्—ख-ग-घ-ज-ण-प-भ । प्राणहारकम्—य-मॅ-मु ॥

४०४. २० शीघ्रमतिगच्छन्ति—मॅ-मु । शीघ्रमभिगच्छति—§ ॥ ४०५. २१ प्र आशत व्याप्नुवन्ति—ख-ग-घ-च-ज-ण-भ । आशत व्याप्नुवन्ति—य-मॅ-मु ॥

४११. १० मघवन् धनवन इन्द्र—त-न-स-मु । मघवन् इन्द्र—य-मॅ ॥

४१२. ९ अहरहःशस्यसंज्ञकम्—§ । °संज्ञम्—मॅ-मु ॥ ४१३. २० विक्षिप्ताङ्गः सन्—घ-ज-ण-त-य-ल-मु । विक्षिप्ताङ्गः—मॅ ॥ ४१४. १० जनुषा जन्मना—य-मॅ-मु । जनुषा—§ ॥

४१५. ९ ब्रह्मणा तष्टम्—§ । ब्रह्मणा—मॅ-मु ॥ ४१५. २३ कोऽप्यभ्यास्ति—*मॅ-मु । लिखितपुस्तकेष्वेवं पाठः नोपलभ्यते ॥ ४१५. २६ अमिनात् संग्रामेषु मिनाति हिनस्ति—ज-ण । अमिनात् हिनस्ति—मॅ-मु ॥ ४१६. ८ सहावा बलवान्—त-न-ल-स-मु । सहवा बलवान्—मॅ ॥ ४१६. २६ ऊर्ध्वगन्ता—§ । ऊर्ध्वं गन्ता—मॅ-मु ॥ ४१७. १४ शुनं हुवेमेति पूर्ववत्—ज-ण । व्याख्यातेयमृक्—मु । मॅ-पुस्तके नास्ति ॥

४२१. १ खनिकष्यज्यासिवासि—त-फ-भ । खनिकष्यज्ञसिवसि—मॅ-मु ॥ ४२१. १८ नञि हन—न-स-मॅ-मु । नञ्या हन (?) इति मॅक्समुलरमहाशयैः शुद्धीकृतम् ॥ ४२१. २७ स्वस्वकर्मणि—घ-त-य-ल-मु । स्वकर्मणि—मॅ ॥ सामर्थ्योपेतं त्वा त्वाम्—घ-ज-ण । सामर्थ्योपेतं त्वाम्—य-मॅ-मु ॥ ४२३. १९ इति णत्वम्—ज-ण-य । णत्वम्—मॅ-मु ॥ ४२३.२६ पुरुभिर्बहुभिः—ज-ण । पुरुभिः—य-मॅ-मु ॥ ४२३.२६ सोमपानेन प्रबलम्—ख-ग-घ-च-ज-ण-भ । पानेन प्रबलम्—य-मॅ-मु ॥ ४२४. २१ अभिषुतं अस्येमं सोमम्—घ-ज-ण-मु । अभिषुतं सोमम्—य-मॅ ॥ ४२५. १ ते त्वदर्थम्—घ-ज-ण । त्वदर्थम्—य-मॅ-मु ॥

४२७. ४ इत्यात्मनेपदम्—मॅ-मु । आत्मनेपदम्—§ ॥ ४२७. १५ तद्वन्तं त्वा त्वाम्—घ-ज-ण-त-मु । तद्वन्तं त्वाम्—य-मॅ ॥ ४२७. २६ चकृम भक्षणार्थं कुर्मः—ख-ग-घ-च-ज-ण-भ । भक्षणार्थं कुर्मः—य-मॅ-मु ॥ ४२८. १३ त्वा त्वां वर्धन्तु—घ-ज-ण-प । त्वां वर्धन्तु—य-मॅ-मु ॥

४२९. १५ त्वा त्वां यक्षि यजे–ज-ण-प-मु । त्वां यक्षि यजे–य-मॅ ॥ ४३०. ४ कृणवाव करवाव—घ-च-ज-ण-त-ल-मु । करवाव–य । कृणवाव–मॅ ॥ ४३२.२ मंहनीयानि धनानि—ख-ग-च-ज-ण-न-भ-स । महनीयानि धनानि–य-मॅ ॥ ४३६. ४ स्वाहाकारवाचा तनोति—ख-ग-घ-च-ज-ण-न-प-फ-भ । स्वाहाकारवाचं तनोति-य-मॅ-मु ॥ ४३६.२५ विनष्टो मा भवतु—ज-ण-न । मा भवतु–ख-ग-च; विनाशो मा भवतु–घ; मृधो मा भवतु–त; विराशो मा भवतु–भ; व्यद्धो मा भवतु–ल; व्यृद्धो मा भवतु–मॅ । व्यृद्धो विनष्टो मा भवतु–मु ॥ ४३७.९ अनळुत्सु अनडुत्सु–ख-ग-घ-च-ज-ण-न-प-फ-भ-ल-मु । अनडुत्सु–य । अनळुत्सु–मॅ ॥ ४३७. १२ नोऽस्मभ्यम् । नः इति प्रतीकं मूले नास्ति । एवं क्वचित् ऋचि अविद्यमानानामपि पदानां व्याख्यानं कृतं दृश्यते ॥ ४३७. १९ सारम् । सारेण हि–मॅ-मु । सारं–ख-ग-च-ण-भ; सारं यस्य–ज; सारेण हि–य-ल-स ॥ ४३८.९-१० लुङि मन्त्रे...न निघातः–य-मॅ-मु । लुङि चङि रूपम् । द्वितीयात्वान्निघातः–§ ॥ ४३८. २३-२४ सुपां सुलुगिति शसो लुक्—त-य-मु । सुपां सुलुगिति शपो लुक्–मॅ ॥ ४३९.५ हे इन्द्र परशुं चित् यथा कुठारम् –घ । हे इन्द्र परशुं चित् कुठारम्–ख-ग-च-ज-ण-भ । हे इन्द्र परशुं चित् । चिच्छब्द उपमार्थः । यथा परशुं कुठारम्–मु । परशुं चित् । चिच्छब्द उपमार्थः । यथा परशुं कुठारम्–य-मॅ ॥ ४३९. ६ वृन्तात् विच्छिद्यते—§ । विवृश्चति विच्छिद्यते–मॅ-मु ॥ ४३९. ७ मद्द्वेष्टा—ख-घ-ज-ण-त-न-भ-ल । स द्वेष्टा–य-मॅ-मु ॥ ४४०. ६ ब्राह्मा एव ते—ख-ग-घ-च-ज-ण-न-भ-य । ब्राह्मणा एव ते–मॅ-मु ॥ ४४०. ८ ज्यावाजं बलं धनुः । अस्पष्टार्थमिदम् । ज्यावाजं मौर्वीबलं धनुः–मु ॥

४४०. १२ ततः पराः—ख-ग-च-ज-ण-न-फ-भ । ततः परं—य-मॅ-मु ॥ ४४१. ३ उत्तरोऽर्धर्चः—ग-च-ज-ण-न-भ-स-मु । उत्तरार्धर्चः–य-मॅ ॥ ४४१.६ जसु मोक्षणे । नञ्पूर्वः—§ । जसु मोक्षणे—मॅ-मु ॥ ४४१. १५ देवाः स्तोतारो वा—य-मॅ । देवाः स्तोतारः–§ । देवा इन्द्राद्याः स्तोतारो वा–मु ॥ ४४१. २४ सु । संहितायाम्—§-मु । षु संहितायाम्—मॅ ॥ ४४१. २५ नः । संहितायाम्—§-मु । णः । संहितायाम्—मॅ ॥ ४४१. २६ तत्सुवितम्—§ । सुवितम्–मॅ-मु ॥ ४४२. १५ रे इत्यादेशः—§-मु । रेआदेशः—मॅ ॥ ४४३. ४ अस्यतिवक्तिख्यातिभ्योऽङ् —ख-ग-च-ज-ण-न-भ । अस्यतिवक्तिख्यातिभ्यः—य-मॅ-मु ॥ ४४४. २ भवन्ती भवन्त्यौ—घ-ज-त । भवन्ती–य-मॅ-मु ॥ ४४४.२ आदु अनन्तरम्–घ-ज-ण-त । आदु अनन्तरम् । उः पूरणः–मु । आदनन्तरम्—य-मॅ ॥ ४४४. ८ जागृवांसः—मॅ । जागरूकः ?–§-मु ॥ ४४४. १७ ते न व्यथेते—ख-ग-घ-च-ज-ण-त-न-भ-स । न व्यथेते—य-मॅ-मु ॥ ४४५. १६ स्तोमं स्तोममम्— घ-ज-ण-न-य-ल-मु । स्तोमम्—मॅ ॥ ४४७. २९ अतिष्ठत । 'अतिष्ठत्' इति भाव्यम् ॥ ४४८.१४ पितरा पालयितारौ—ख-ग-घ-च-ज-ण-भ-य । पितरौ पालयितारौ—मॅ-मु ॥ ४४९. ४ इत्यध संहितायाम्—ख-ग-च-ज-ण । इत्यस्य संहितायाम्—य-मॅ-मु ॥ ४४९. २० गायाहिभ्यश्च— ख-ग-च-ज-न-भ-ल । गायाहिभ्यश्च—य-मॅ-मु ॥ ४५०. १ सापराधाश्चोऽस्मान्—ख-ग-च-ज-ण-फ-भ-य-मु । सापराधानप्यस्मान्—मॅ ॥ ४५१. १३ विश्वान् सर्वान्—ख-ग-घ-च-ज-ण-न-भ-मु । विश्वान्—य-मॅ ॥ ४५१. १८-१९ टेरद्यादेशः...उदात्तस्वरितयोरिति—ल । मॅ-मु-पुस्तकयोरेतन्नास्ति ? ॥

४५२. ८ उप समीपं नेष्यति—ख-ग-घ-च-ज-ण-त-भ-य-ल । उप समीपं तिष्ठति—मॅ-मु ॥ ४५३. १२ शयासु वेदिषु—ख-ग-घ-च-ज-ण-प-फ-भ । शयासु—य-मॅ-मु ॥ ४५३. १९ पूर्वस्य न निघातः—य-मॅ । पूर्वस्य निघातः—§-मु ॥ ४५४. २४—प्रकर्षेण कुर्वन्ति—ख-ग-घ-च-ज-ण-फ-भ । प्रणयन्ति प्रकर्षेण कुर्वन्ति—मु । प्रणयन्ति कुर्वन्ति—य-मॅ ॥ ४५६. २२ क्षीररूपरसस्य— ख-ग-च-ज-ण-भ । क्षीररूपस्य रसस्य—य-मॅ-मु ॥ ४५६. २३ ते द्यावापृथिव्यौ—ख-ग-घ-च-ज-

ण-भ । द्यावापृथिव्यौ—य-मॅ-मु ॥ ४५७. २१ **पादसंचारे**—य-मॅ-मु । पादासंवरे—ख-ग-च-भ; पादयोः संवरणे—ज; पादसंवरणे—ण; पादसंवरे—न; पादुसंचारे—ल; पादाः सर्वैः—स ॥ ४५८. १३ **अन्यत् अन्या द्यौः**—ख-ग-च-ज-ण-न-भ-स । अन्यत् द्यौः—य-मॅ-मु ॥ ४५८. १४ **गूढा वर्तते**—त । गूढं वर्तते—य-मॅ-मु ॥ ४५९. २१ **नु क्षिप्रं विदुः**—ख-घ-ज-ण-भ-मु । विदुः—य-मॅ ॥ ४६०. ६ **प्रजाः पुरुधा**—य-मॅ-मु । पुरुधा—§ ॥ ४६०.६ **जनयति**—मॅ-मु । जनयति प्रजाः—§ ॥ ४६१. ४ **शर्मसदो न** । नश्चार्थे—§-मु । शर्मसदो नश्चार्थे—मॅ ॥

४६२. १५ **सहिते तानि कर्माणि**—ल । सहितानि कर्माणि ?—मॅ-मु ॥ ४६३. २२ **बहुव्रीहौ 'ऊधसोऽनङ्'**—ख-ग-ण । बहुव्रीहेः 'ऊधसोऽनङ्'—य-मॅ-मु ॥ ४६४. ९ **कर्तरि चिण्** । **चिणो लुक्**—त-मु । कर्तरि चिणो लुक्—य-मॅ ॥ ४६६. ११ **कृच्छ्रार्थे**—*मॅ । अकृच्छ्रार्थे—§-मु ॥

४६८. १२ **युजिबुधिदृशः**—*मॅ-मु । युञ्जिवन्दिदृशेः—ख-भ; युजिवन्दिदृशेः—फ । युधिबुधिदृशिभ्यः—उ. सू. २. २४७ ॥

४७०. २१ **किं कथयन्ति**—ख-ग-घ-च-ण-भ-स । किं कथयन्तीति—मॅ-मु ॥ ४७१. ६-८ **मन्येथां ... ... प्रकृतिभावः**—य-ल-मु । मॅ-पुस्तक एतन्नास्ति ॥ ४७१. १६ **आयातम् आगच्छतम्**—त-य-ल-मु । आयातम्—मॅ ॥ ४७२. २ **नरा नरौ**—ख-ग-घ-च-ण-भ । हे नरा नरौ—य-मॅ-मु ॥ ४७२. ३ **युवयोः सख्या सख्यानि**—ख-ग-घ-च-ण-फ-भ-मु । युवयोः सख्यानि—य-मॅ ॥ ४७२. ४ **एकीभूताः सन्तः**—य-मॅ । इतरलिखितपुस्तकेषु मु-पुस्तके चैतन्नास्ति ॥ ४७२. ४ **वां युवां सह**—§ । युवां सह—मॅ-मु ॥ ४७२. २१ **पुरु अञ्जन्ति**—*मॅ । लिखितपुस्तकेष्वेवं पाठः नोपलभ्यते । पुरुतममञ्जन्ति—मु ॥ ४७३. १३ **रूपं वा**—य-मॅ । इतरलिखितपुस्तकेषु मु-पुस्तके च नास्ति ॥

४७५. १९ **शोभनायां बुद्धौ**—§ । शोभनायां बुद्ध्याम्—मॅ-मु ॥

४७८. १३ **तथा च मन्त्रवर्णः**—त-य-मु । तथायं मन्त्रवर्णः—मॅ-मु ॥ ४७९. १ **तथा च मन्त्रः**—घ-ण-न । तथा च मन्त्रवर्णः—मु । तथा मन्त्रः—य-मॅ ॥ ४७९. २३ **आतो लोपाभावश्छान्दसः**—च-त-फ-य । आतो लोपश्छान्दसः ?—मॅ-मु ॥ ४७९. २५ **आद्या तृतीयसवने**—य-मु । आद्यास्तृतीयसवने—त । आद्यस्तृतीयसवने—इतरलिखितपुस्तकेषु मॅ-पुस्तके च ॥ ४८०. ६ **बप्सत्यदन्त्याभ्याम्**—*मॅ-मु । लिखितपुस्तकेष्वशुद्धाः पाठा उपलभ्यन्ते । बभसति वादत्याभ्याम्—ख-ग; विभसति खादत्याभ्याम्—ण; गभसति वादयत्याभ्याम्—च-फ; वभसत्यादत्याभ्याम्—त-भ; बभसत्यदन्त्याभ्याम्—न; बभसत्याभ्याम्—ल; बभस्यादन्त्याभ्याम्—स ॥ ४८०. ११ **भस भर्त्सनदीप्त्योः** । धातुपाठोऽप्येवमेव । ऋ. सं. १. २८. ७ मन्त्रभाष्ये 'भस भक्षणदीप्त्योः' इति दृश्यते । 'बभस्तिरस्तिकर्मा' (निरु. ५. १२) इति निरुक्तम् ॥ ४८०. ११ **भसेर्गट्च इति**—*मॅ-मु । भासराद्रेति—ख-ग-ण-त-न-भ-स; भास भासेति—च-फ; भसर्गति—ल ॥ ४८१. २ **जरितुः स्तोतुः स्तोमम्**—घ-ण-ल । जरितुः स्तोतुः—य । जरितुः स्तोमम्—मॅ-मु ॥

४८१. १६ **प्रकृष्टज्ञानवती सती त्वम्**—ख-घ-भ । प्रकृष्टज्ञानवती सती—य-मॅ-मु ॥ ४८४.६ **येयम्**—मॅ-मु । सेयम्—§ ॥ ४८४. १७ **वृष्टिद्वारा अपां प्रेरक**—त-न-य-मु । वृष्टिद्वारा प्रेरक—मॅ ॥

४८५. ८ **हे इन्द्रावरुणा इन्द्रावरुणौ**—ख-ग-घ-च-ण-फ-भ । हे इन्द्रावरुणौ—य-मॅ-मु ॥ ४८५. १२ **तत्कास्ति**—ख-ग-घ-च-ण-फ-भ । तत्कास्ते—य-मॅ-मु ॥ ४८५. १४ **न तुज्याः**—*मॅ-मु । मा त्वं तुज्याः—ख-ग-ल-स; मा त्यं तुज्याः—च-त-फ-भ; न त्वं तुज्याः—ण; तुज्याः—न-य ॥ ४८५.२४

हे इन्द्रावरुणा इन्द्रावरुणौ—ख-ग-घ-च-ण-फ-भ । हे इन्द्रावरुणौ—य-मॅ-मु ॥ ४८५. २५ **महानयं यजमानः**—§। महान् यजमानः—मॅ-मु ॥ ४८६. १ **सजोषौ संगतौ युवाम्**—§-मु । सजोषौ संगच्छन्तौ युवाम्-य-मॅ ॥ ४८६. ३ **संप्रसारणे कृते रूपम्**—§-मु । संप्रसारणे रूपम्—मॅ ॥ ४८६. १० **इंद्रावरुणा हे इन्द्रावरुणौ**-ख । हे इन्द्रावरुणौ—य-मॅ-मु ॥ ४८६. १५ **हूयतेऽत्र हविरिति**—त-य-ल-मु । हूयते तत्र हविरिति—मॅ ॥ ४८७. ८-९ **विश्वरूपानामकगोवाहनोपेतम्**—मॅ । विश्वरूपनामक°-च-ण-फ-य-ल-मु; विश्वरूपं नामक°-ख-ग-न-भ-स ॥ ४८७. १२ **विश्वरूपा अस्यास्तीति**—न । विश्वरूपा अस्य सन्तीति—मु । विश्वरूपा अस्य सतीति—य-मॅ ॥ ४८७. १७ **आघृणे दीप्तिमन्**—§-मु । आघृणे आगतदीप्तिमन्—य-मॅ ॥ ४८७. १८ **शस्यते क्रियते**—घ-ण । शस्यते—य-मॅ-मु ॥ ४८९.८-९ **वेदाꣳछन्दांसि...तदु ते..प्रचोदयन्त्सविता**—मॅ-मु । वेदाꣳछन्दासि...तनुते...प्रचोदयात्सविता—§॥४८९.२२ **कर्मणा बुद्धया वा**—य-मॅ-मु । कर्मणा बुद्धया च—§॥ ४८९. २५ **अग्नीषोमप्रणयने**—य-मॅ-मु । अग्नीषोमीयप्रणयने-§ ॥ ४९०. ९ **अस्मदीयाभ्यः द्विपाद्भ्यः प्रजाभ्यः**—य-मॅ । अस्मदीयेभ्यः द्विपाद्भ्यः—§-मु ॥ ४९०. ११ **इसुसोः सामर्थ्ये इति सत्वम् । आदेशप्रत्यययोः इति षत्वम्** । इयं प्रक्रिया न संगच्छते । ऋ. सं. १. ४९. ३ मन्त्रभाष्ये ' चतुष्पत्...इणः षः इत्यनुवृत्तौ इदुदुपधस्य चाप्रत्ययस्य इति विसर्जनीयस्य षत्वम् ' इत्युक्तम् । ऋ. सं. १. ९४. ५ मन्त्रभाष्येऽपि ' इदुदुपधस्य चाप्रत्ययस्य इति विसर्जनीयस्य षत्वम् ' इत्येव दृश्यते ॥ ४९०. २४ **दाक्षायणे यज्ञे**—मॅ । दाक्षायणयज्ञे—§-मु ॥ ४९१. ५ **मधुरेण रसेन**—ख-ग-घ-च-ण-त-न-भ-स-मु । मधुररसेन—य-मॅ ॥ ४९१. १०-११ **अत्यन्तं दीर्घस्तुतिलक्षणाभिः**—मॅ-मु । अत्यन्तदीर्घस्तुतिलक्षणाभिः-§ । अत्यन्तवद्वनीपौ वा दीर्घस्तुतिक्षणाभिः-य ॥

४९२.७ **चतस्रः**—*मॅ-मु । तिस्रः—§ ॥ ४९२.८ **आद्या**—मॅ-मु-×॥ ४९३.७ **यजनीयैर्हविर्भिः**—य-ल । वननीयैर्हविभिः—मॅ-मु ॥ ४९३.१० **देवनशीलान् स्तोतॄन्**—मॅ-मु । देवनशीलान् देवान्—ख-ग-ध-च-फ-भ-स; देवनशीलान् स्तोतॄन् देवान्—त-न-ल ॥ ४९४. २६-२७ **सार्वधातुकत्वाण्णिलोपाभावः**—मॅ-मु । सीयुटः सकारात्प्रागिडागमः निलोपश्च नेत्यर्थो बोध्यः । सार्वधातुकत्वात् सिलोपाभावः-ख-ग-च-य; सार्वधातुकत्वस्यापि लोपाभावः—ण; सार्वधातुकत्वास्मिलोपाभावः—न-भ; सार्वधातुकस्वरेत्वाणिलोपाभावः—ल; सार्वधातुकत्वाभिलोपाभावः—स॥ ४९५.८ **आवरकं पापं वा**—ख-ग-च-ण-न-भ-मु । आवारकं पापं वा-य-मॅ ॥ ४९५. १९ **सुधनस्य सुष्ठु भजनीयस्य**—य-मॅ । सुष्ठु भजनीयस्य—§-मु । ' सुधनस्य सुष्ठु भजनीयस्य वा ' इति भाष्यम् ॥ ४९६. २३ **अन्नादिमत् समृद्धं**—ण । अन्नादिवत् समृद्धम् ?—य-मॅ-मु ॥ ४९७. १६ **रत्नं धनम्**—मॅ-मु । रत्नं-य । धनम्—§ ॥ ४९७. २० **आदित्यादग्निः इत्याम्नानात्**—य-मॅ-मु । आदित्यादग्नेराम्नानात्-§॥ ४९८.१० **शव् विकरणी**—ख-ग-च-ण-न-फ । शविकरणी-य-मॅ-मु ॥४९८. १६ **योना योनौ स्थाने**—ख-ग-घ-च-फ-भ । योनौ स्थाने-य-मॅ-मु ॥ ४९९. १५ **यज्ञानकुर्वन्**—§-मु । यज्ञानकल्पयन्नकुर्वन्—य-मॅ ॥ ४९९. १६ **मृजू शुद्धौ**—§ । मृजूप् शुद्धौ—य-मॅ-मु । पृ. २६२ प. ११ द्रष्टव्यम् ॥ ५०१. ६ **पृष्ठदेशेषु व्यख्यन्**—घ-ण-य-ल । पश्चा पश्चात् पृष्ठयदेशेषु व्यख्यन्-मु । पृष्ठयदेशेषु व्यख्यन्—मॅ ॥ ५०२. ६-७ **इयं वा अग्निर्वैश्वानरः**—य-ल । तैत्तिरीयारण्यकं (३. ९. १७) द्रष्टव्यम् । अयं वा अग्निर्वैश्वानरः-मॅ-मु ॥ ५०२. ७ **मानुषाणां मनुष्याणाम्**—ख-ग-घ-च-ण-फ-भ । मानुषाणाम्-य-मॅ-मु ॥

५०३. १० **यजमानान् शुक्रान् दीप्तान्**—च-य-ल । यजमानान्-मु । यजमानान् दीप्तान्-मॅ ॥ ५०४. ६-७ **अर्यमणं....यष्ट्व्यान्**—ख-ग-घ-च-ण-फ-भ । अर्यमादीनुतापि चाश्विनौ यष्टव्यान्—य-मॅ-मु ॥ ५०४. १५ **अस्य सन्तीति**—ख-ग-च-ण-य । अस्य सन्ति-मॅ-मु ॥ ५०५. १

सिष्विदानः—ख-ग-घ-च-ण-त-भ-ल-स-मु । सिष्विदानः सिस्विदानः—य-मॅ ॥ ५०५. ३ **स्वतवान्**—*मॅ-मु-× ॥ ५०५. १५ **उरुशब्दः कण्ड्वादिः**—मॅ-मु । उरुस्शब्दः कण्ड्वादिः—त-य ॥ ५०७. ७ **तस्य यजमानस्य**—य-*मॅ-मु । यस्य यजमानस्य—§ ॥ ५०७. २० **हेयोपादेयत्वेन**—ख-च-ण-फ-भ । ज्ञेयोपादेयत्वेन—य-मॅ-मु ॥ ५०८. १५ **घर्षणशील**—न-ल-*मॅ-मु ॥ ५०८. १५-१६ **अपेक्षित-फलप्रदानेन**—त-न-मु । अपेक्षितप्रदानेन—य-मॅ ॥ ५०९. १ **अधा ह**—ख-घ-च-ण-त-फ-भ-य । अध ह—मॅ-मु ॥ ५१०. २४ **भस्त्रेण** । ' भस्त्रया ' इति भाव्यम् ॥ ५११.१ **गोसंघमग्मन्**—य-मॅ-मु । गोमन्तमग्मन्—§ ॥ ५११. १४-१५ **यूथा यूथे**—मॅ-मु । यूथा यूथेव—§ ॥

५१३.६ **तनिः शब्दार्थः...इत्नुच्प्रत्ययः**। चुरादौ ' स्तन ' इति धातुः पठितः। तस्माण्ण्यन्तादौणादिके इत्नुचि स्तनयित्नुरिति रूपं स्यात्। छान्दसेन आदिसकारलोपेन तनयित्नुरिति रूपं निष्पन्नमिति प्रतिभाति ॥ ५१३.१७ **प्रवर्तन्ते । उ पूरणः**—घ-ण-प । प्रवर्तन्ते—य-मॅ-मु ॥ ५१४.२-३ **ग्राव्णां शब्दकर्तृत्वम्**—ण । ग्राव्णां कर्तृत्वम्—य-मॅ-मु ॥ ५१५. २१ **बहुभिर्गीयमानाय**—न-य-ल-मु। बहुभिर्गायमानाय ?—मॅ ॥ ५१६.७ **त्वरितगमनाय वायवे च**—ख-घ-च-ण-भ । त्वरितगमनाय वायवे—य-मॅ-मु ॥ ५१६. ८ **एतत्सर्वं जानानस्त्वम्**-ख-घ-च-ण-भ-य-ल । तत्सर्वं जानानस्त्वम्-मॅ-मु ॥ ५१६. २० **तासाममर्येण**—ल-स । तासममर्येण—य । ताः जाः अमर्येण?—मॅ-मु ॥ ५१८. १९ **नः । नश्च**—§ । णः । नश्च—मॅ-मु ॥ ५१९. २ **वाजानन्नानि**—ख-घ-च-ण-प-फ-भ । वाजान्-य-मॅ-मु ॥

५२०. २ **राज्ञा सह वर्तते**—त-भ-ल । राजा सह वर्तते—मॅ । अमा राज्ञा सह वर्तते—मु ॥ ५२०. १० **तप्ततमैस्तृप्ततमैः**—ख-ग-ण-भ-मु । तप्ततमैः—य-मॅ । निरुक्तं (६. १२) द्रष्टव्यम् ॥ ५२२. ८ **जामिं बन्धुमजामिमबन्धुमेतादृशान्**—ख-ग-घ-च-ण-प-फ-भ । जामिं बन्धुमजामिमबन्धुम्-मु । जामिमजामिं बन्धुमबन्धुम्—य-मॅ ॥ ५२२. १० **उपेक्षां मा कृथाः**—ख-ग-च-ण-फ-य । अपेक्षां मा कृथाः—मॅ-मु ॥ ५२२.२१ **विश्वानि सर्वाणि सुदिनानि**—ख-ग-घ-च-ण-प-फ-भ। विश्वानि सुदिनानि—य-मॅ-मु ॥ ५२२. २२ **द्युतिमन्ति**—य-मॅ । द्युमन्ति—§ । द्योतमानानि—मु ॥ ५२४. ११ **त्वा त्वामनु**—ख-ग-घ-च-ण-भ । त्वामनु—य-मॅ-मु ॥ ५२४. २४ **त्वा त्वामुपयाति**—ण-मु । उपयाति—य । त्वामुपयाति—मॅ ॥ ५२५. १२-१३ **मा मां वामदेवमन्वियाय प्राप्तम्**—ख-ग-घ-च-ण-फ-भ । मा वामदेवं मामन्वियाय—य-मॅ-मु ॥ ५२५. २१ **अस्वपन्तः**—य-मॅ-मु-× ॥ ५२६. २६ **शंसितारावुभा उभौ**—ख-ग-घ-च-ण-प-फ-भ-मु । शंसितारावुभौ—य-मॅ ॥ ५२७. १० **समिधा दीप्त्या स्तुत्या** । मु-पुस्तके ' समिधा दीप्तया स्तुत्या ' इति पाठो विद्यते । अयं समीचीनः प्रतिभाति ॥ ५२७. १० **ते त्वाम्**—य-मॅ-मु-× ॥

५२८. २-३ **इत्थं...व्याकरिष्यते**—§-मु । इत्थं ... व्याकरिष्यति—य । मे-पुस्तके नास्ति ॥ ५२८. १३ **विश्वनरसंबन्धिने**—त-न-य । विश्वानरसंबन्धिने—मॅ-मु ॥ ५२८. २२ **अडभावः**—§-मु । अडागमाभावः—मॅ ॥ ५२९. १६ **मह्यं प्रेदु वोचत्**—ख-ग-घ-ण-प-फ-भ । प्रेदु वोचत्—य-मॅ-मु ॥ ५३०. १७ **ज्ञातव्यत्वेन प्रसिद्धम्**—ख-ग-च-ण-न-प-फ-भ । ज्ञातव्यत्वेन प्रसिद्धम्—य-मॅ-मु ॥ ५३१. २-३ **समानं सर्वेषामेकरूपम्**—*मॅ-मु । सर्वेषामेकरूपं समानम्-§ ॥ ५३१. ३ **धीतिर्मतिः**—य-मॅ-मु । धीतिर्गतिः—§ ॥ ५३१. ८ **सस्यादीनीति**—ण-य-ल । सस्यादीनि—मॅ-मु ॥ ५३३. २० **उषासः उषसः**—ख-ग-घ-च-ण-प-फ-भ । उषासः—य-मॅ-मु ॥ ५३३. २१ **ततनन् । तनोतेः**—न । तनोतेः—य-मॅ-मु ॥ ५३४. १ **फल्गवेन तुच्छेन**—घ-त-य-ल । फल्गवेनोक्थेन—मॅ-मु ॥

५३५. १४ घृताची । घृतम्—मॅ । घृतम्—§-मु ॥ ५३६. २४ न वारयन्ति—त-न-य-ल-स-मु । वारयन्ति—मॅ ॥ ५३७. १६ कीदृशमग्निम्—य-मॅ । इतरलिखितपुस्तकेषु मु-पुस्तके च नास्ति ॥ ५३७. १७ दन्तमदन्तम्—ल । दन्तम्—य-मॅ-मु ॥ ५३८. ४ ऋजुमुष्काः ऋजुवृषणाः—ख-ग-घ-ण-प-फ-भ । ऋजुमुष्काः साधनमुष्काः—मॅ-मु ॥

५३९. ५ यज्ञार्थं कर्म—य-मॅ-मु । यज्ञार्हं कर्म—§ ॥ ५४०. १० विवस्वन्त इति—न-ल । विवस्वत इति—य-मॅ-मु ॥ ५४०. १० मनुष्यनाम—ख-ग-च-ण-फ-भ-य-स । मनुष्यनामेदम्-मॅ-मु ॥ ५४१. ५ एवंभूतं तमग्निम्—ख-ग-घ-च-ण-फ-भ । एवंभूतमग्निम्—य-मॅ-मु ॥ ५४२. १३ अत्र एमञ्छन्देन—§ । अत्रैम एमञ्छन्देन—मॅ-मु ॥ ५४२. १६ त्वज्जननहेतुम्—*मॅ-मु । त्वज्जनक-हेतुम्—घ-ण-त-न-भ-य-ल-स । त्वहेनकहेतुम्—ख-ग; त्वद्धेतुकहेतुम्—च ॥

५४४. २ ढत्वकत्वषत्वानि । 'कत्वषत्वे' इति भाष्यम् ॥ ५४४. १८ ते तव । 'ते' इत्यस्य 'तव' इति व्याख्यानं विसंगतं प्रतिभाति । 'ते इत्युक्ते के इत्युच्यते' इति उत्तरवाक्यविरोधात् ॥ ५४५. ४ अभिलष्यमाणाः—य-मॅ-मु । अभिलक्ष्यमाणाः—§ ॥ ५४५. ६ शेआदेशः—य-मॅ-× । शेआदेशे—मु ॥ ५४५.६ इत्यादिना च—य-मॅ-मु । इत्यादिना वा—§ ॥ ५४५.६ तस्योदात्तत्वम्—य-मॅ । तस्याः उदात्तत्वम्—§-मु ॥ ५४५. ८ यज्ञार्थम्—य-मॅ । इतरलिखित-पुस्तकेषु मु-पुस्तके च नास्ति ॥ ५४५. १२ बलनाम.....तन्नामसु—य-मॅ-मु । बलनामसु—§ ॥

५४७. ९ लोण्मध्यमैकवचनं सिप्—§ । °वचने सिप्?—मॅ-मु ॥ ५४७.१४ ते त्वदीयः दूळभः—घ-च-ण-भ । त्वदीयः दूळभः—य-मॅ-मु ॥

५४८. ५ ते त्वां ऋध्याम—ख-ग-घ-च-ण-प-फ-भ । त्वामृध्याम—य-मॅ-मु ॥ ५५०. २ इनोपि हि स्म—मॅ । इनोषि स्म हि—§-मु ॥ ५५०. १० सस्मिन्नूधन्—ख-ग-घ-च-ण-न-भ । सस्मिन्नूधनि—य-मॅ-मु ॥

५५१. १६ स्विष्टकृदग्निः—य-मॅ । स्विष्टकृतोऽग्निः—§-मु ॥ ५५१.२३-२४ कर्माणि वा त्वत् त्वत्तः—ख-ग-घ-च-ण-प-फ-भ । कर्माणि वा त्वत् भवतः—य-मॅ-मु ॥ ५५१. २७ विक्रान्तरूपम्—§ । विक्रान्तं रूपम्—य-मॅ-मु ॥ ५५२. १५ मर्ताः मर्त्याः मनुष्याः—ख-ग-घ-च-ण-प-फ-भ । मर्ताः मनुष्याः—य-मॅ-मु ॥ ५५२. २० दमु उपशमे—ल-स । दमु उपशमने—य-मॅ-मु ॥ ५५३. १० विश्वां सर्वां दुर्मतिम्—ण-प । दुर्मतिम्—मॅ-मु ॥

५५३. ११ त्रैष्टुभं छन्दः—न-*मॅ । त्रैष्टुभः—मु । त्रिष्टुप् छन्दः—घ ॥ ५५४. ५ परिचरन् यो यजमानः—*मॅ । परिचरन् सः यजमानः—य । परिचरन् यजमानः—§-मु ॥ ५५५. १४ निवासयितारः—*मॅ-मु । निवासितारः—घ-त-ण-प-ल ॥

५५७. १ जगन्निर्वाहात्मकस्य रसस्यादानार्थम्—*मॅ-मु । जगन्निर्वाहकात्मकस्य दानार्थम्—ख-ग-च-ण-त-प-फ-भ; जगन्निर्वाहकात्मकस्यादानार्थम्-घ-ल; जगन्निर्वाहात्मकस्यादानार्थम्-न; जगन्निर्वाहात्मकसंरस्यादानार्थम्-य; जगन्निर्वाहकस्यादानार्थम्-स ॥ ५५७. ३ अत्यन्तं शक्तैः मॅ-मु । अत्यन्तं शक्यैः—§ ॥

५५८. ७ अन्तरिक्षं च—ख-ग-घ-च-ण-त-न-फ-भ-य-स-मु । चान्तरिक्षं च—मॅ ॥

५६१. ६ सोमकाख्याद्राज्ञः—घ-ण-त-न-य-ल । सोमकाद्राज्ञः—मॅ-मु ॥ ५६१. १२ अश्विनाश्विनौ—§-मु । अश्विनौ—य-मॅ ॥ ५६१. १८ तं साहदेव्यम्—घ-ण-प । साहदेव्यम्—य-मॅ-मु ॥

५६१. २१ वामदेवस्यार्षम्—च । वामदेव्यं—मु । मॅ-पुस्तके नास्ति ॥ ५६३.२ अमुष्मात् द्युलोकात्—य-ल । अमुष्माल्लोकात्—मॅ-मु ॥ ५६४. ६-७ पर्वतमपि.....मेघनामैतत्—

य-*मॅ-मु। पर्वतं मेघं पर्वतमिति मेघनामैतत्—ख-ग-च-फ-भ; पर्वतं मेघम्-घ-प; पर्वतमिति मेघनामैतत्-ण; पर्वतमिति मेघं वा मेघनामैतत्-त-न-ल-स ॥५६५. ९ असौ अब्रह्मा—ख-ग-घ-च-ण-भ । अब्रह्मा-य । सोऽब्रह्मा-मॅ-मु ॥ ५६५. २५ सरूपा सरूपौ—ख-ग-घ-ण-त-भ-स-मु। सरूपा—मॅ ॥ ५६९. १८ नू चित् क्षिप्रमेव—घ-ण-प। नू चित्—य-मॅ-मु ॥ ५७०. ७ हे हरिवः—ख-च-ण-प-फ-भ-य-ल । हे इन्द्र हरिवः—मॅ-मु ॥

५७०. १० वामदेवस्यार्षम्—ख-ग-च-ण-फ-भ । मॅ-मु-पुस्तकयोः नास्ति ॥ ५७०. १३ त्वं महानिति—ल-*मॅ-मु । त्वं महानिन्द्र तुभ्यमिति—य॥ ५७२. २ विच्युतिरहितम्—ख-ग-घ-च-ण-प-फ-भ । विचाररहितम्—त-न-ल-स । विनाशरहितं-य-मॅ-मु ॥ ५७२. १३ अनु लक्षीकृत्य—य-मॅ । अनुलक्ष्य—§-मु ॥ ५७४. ८ दृळहं दृढम्—ख-ग-घ-च-ण-प-फ-भ । दृढम्-य-मॅ-मु ॥ ५७५. २४ एतशमेतशनामानम्—ख-ग-घ-च-ण-भ । एतशनामानम्-य-मॅ-मु ॥

५७९. ५ इन्द्रवाक्यम्—ख-ग-घ-च-ण-प-फ-भ । मॅ-मु-पुस्तकयोः नास्ति ॥ ५८०. १६ प्रतिमानमुपमानम्—त-य-ल-मु । प्रतिमानम्-मॅ ॥ ५८१. १३ मेघं भङ्क्त्वा—घ-त-न-भ-स-मु । मेघं भक्त्वा—मॅ ॥ ५८१. २० निविदः मरुत्वतीयशस्त्रे—मॅ-मु । मरुत्वतीयशस्त्रे—§ ॥ ५८१. २२ पापं प्राप्नुवन्तम्—*मॅ-मु । प्राप्नुवन्तम्-§ ॥ ५८१. २३ इन्द्रं पापरहितम्—त-य-ल-मु । पापरहितमिन्द्रम्-मॅ ॥ ५८३. १ स्वरथाय—स-*मॅ-मु ॥ ५८३. १७ पितुः सकाशात् जनिष्यमाणात्— ? ॥ ५८३. २१ अयमर्थः.....प्रपञ्चितः—? ॥ ५८४. ९ मधुरोपेतम्। 'माधुर्योपेतम्' इति भाष्यम् ॥

५८५.३-४ व्याख्यातः वर्ण्यते—ख-ग-च-ण-त-न-फ-भ-य-स-मु । मॅ-पुस्तके नास्ति ॥ ५८७. १०-११ एजत अचलता—*मॅ । एजत अचलत—त-न-मु । एजत अचलत्—ख-ग-ण-प-फ; एजत् अचलत्-च-ल; एजत अचलत-य; एजत अचलत्-भ; एजत् अचलत-स ॥ ५८७. १७ शत्रूणां हिंसिकाः—*मॅ-मु । शत्रूणां हिंसकाः—§ ॥ ५८८. १२ अग्रू नाम काचित् ?—मॅ-मु। अग्रू नाम काश्चित्-य । अग्रुनामा काचित्—ख-ग-ज-ण-भ; अग्रूनाम कश्चित्—घ-न-ल-स ॥

५९०. २२ पृष्ठशब्देन—ग-च-य-स । पृष्ठयशब्देन ?—मॅ-मु ॥ ५९१. २ यः—*मॅ-मु-× ॥ ५९१. १९ नु नूनं सत्यम्—ख-ग-घ-च-ण-प-फ-भ । नु सत्यम्—मॅ-मु ॥

५९३. २२ तस्येत् तस्येन्द्रस्यैव—य-मॅ-मु । तस्यैतस्येन्द्रस्य—ख-ग-घ-च-ण-प-भ; तस्येन्द्रस्य—त; तस्येत् तस्यैवेन्द्रस्य—न; तस्येत् तस्येन्द्रस्य-फ-स ॥ ५९३. २५ विदथार्हः यज्ञार्हः—प-फ । विदथार्हो न यज्ञार्हः—य-मॅ-मु ॥ ५९६. २१ ऐन्द्रस्य वार्त्रघ्नस्य पशोः—च-त-ल-स-मु । इन्द्रस्य वार्त्रघ्नस्य पशौ ?— य-मॅ ॥

५९८. ६ हस्ताभ्याम्—य-मॅ । इतरलिखितपुस्तकेषु मु-पुस्तके च नास्ति ॥ ५९८. २१ उन्नतप्रदेश उच्यते—ख-ग-ण-न-फ-भ-स । उन्नतप्रदेशा उच्यन्ते—य-मॅ-मु ॥ ६००. १० अभ्यषूयतेत्यर्थः—ख-ग-घ-च-ण-भ । अभ्यसूयतेत्यर्थः—य-मॅ-मु ॥ ६०१. ३ त्वमस्माकं गोदाः—ख-ग-च-ण-प-फ-भ-य-ल । अस्माकं गोदाः—मॅ-मु ॥

६०५. २२ परमैश्वर्ययुक्तम्—*मॅ-मु । परमैश्वर्यम्-§ ॥ ६०७. १८ अविवेनम्। अत्र संहितापदपाठयोः 'अविवेनन्' इति वैदिका अधीयते। 'अविवेनम्' इति सायणः पठति ॥ ६०८.२३ चेत्कृतः—ल-*मॅ-मु ॥ ६०९.२० आरम्भणीयायाः—य-मॅ-मु । आरम्भणीयायाम्—§ ॥ ६१०. १-२ कामयमानः को यजमानः—य-मॅ । कामयमानः— §-मु ॥

६१४. १० **यद्यदा आवम्**—ख-ग-घ-च-ण-ल-मु। यदावम्—य-मॅ ॥

६१९. ७ **सर्वा सर्वाणि**। 'शर्वा' इत्यस्य स्थाने 'सर्वा' इति सायणः पठति ॥ ६२०. १ **मघवाना मघवानौ**—ख-ग-च-ण-भ। मघवाना—मु। मघवानौ—य-मॅ ॥

६२४. ४ **उषसः संबन्धि**—ख-ग-घ-च-ण-त-न-भ-स। उषःसंबन्धि—य-मॅ-मु ॥ ६२४. २१ **भृष्णुः**—य-मॅ। इतरलिखितपुस्तकेषु मु-पुस्तके च नास्ति ॥ ६२६. ६ **प्रभवतीति**—य-मॅ-मु। भवतीति—§ ॥ ६२७. ९ **तथा भगोऽपि वामं धनं ददातु**—ख-घ-ण-न-भ-ल-स। तथा भगोऽपि धनं ददातु—य। भगोऽपि धनं ददातु—मॅ-मु ॥

६३४.२१ **द्रोणकलशान् याचामहे**—ख-ग-घ-च-ण-फ-भ। मॅ-मु-पुस्तकयोः नास्ति ॥ ६३५. ५ **अस्मासु त्वदीयम्**—य-मॅ। अस्मदीयम्—§-मु ॥

६३७. १२ **देवेभ्यः**—§-मॅ। ऐतरेयारण्यके (३.३०) 'देवेषु' इति। एवमेव मु-पुस्तके ॥

६३८. १ **अत्यर्थमक्रन्**—मॅ-मु। अत्यर्थमक्रन् व्याप्ताः—§ ॥ ६४१, २ **हि पूरणः**—घ-च-प-फ-मु। मॅ-पुस्तके नास्ति ॥

६४२. १९ **रयिं धनम्**—ख-ग-च-ण-प-फ-भ-ल। रयिम्—य-मॅ-मु ॥ ६४३. १८ **यूयं नोऽस्मान्**—ख-ग-च-ण-भ। यूयं नः—य-मॅ-मु ॥ ६४४. ४ **तदुचिताश्वनिर्माणात्**—ख-ग-घ-च-ण-न-भ-य। तदुचिताश्च निर्माणात्?—मॅ-मु ॥

६४८. ३ **शच्या हरी अश्वौ**—ख-ग-घ-च-ण-प-फ-भ। शच्या हरी—य-मॅ-मु ॥ ६४९. ३ **सुधन्वनः पुत्राः**—ख-ग-घ-च-ण-प-फ-भ। मॅ-मु-पुस्तकयोः नास्ति ॥ ६४९.११ **परिषेचनवत्**—*मॅ-मु। परिषेचनवन्तम्—ख-ग-च-ण-न-भ-ल-स; परिषेचनवन्तः—त ॥

६५१. ५ **श्रवोऽन्नं यशो वा**—न-मु। अन्नं यशो वा—य-मॅ ॥ ६५१. ६ **वाजैरन्नैः सह**—ख-ग-च-ण-प-फ-भ। वाजैः सह—य-मॅ-मु ॥ ६५२. ३-४ **ज्ञानवन्तः स्थ भवत**—ख-ग-च-ण-प-फ-भ। ज्ञानवन्तः स्थ भवथ—मु। अयमेव पाठः समीचीनः। ज्ञानवन्तः स्थ—मॅ ॥ ६५२. २२ **अस्मत्समानान्**—§। अस्मत्समान्—मॅ-मु ॥

६५३. १८ **युष्मद्धृदयाय**—ख-च-ण-प-फ-भ-ल। हृदयाय—य-मॅ-मु ॥

६५६. २४ **प्रवतेव प्रवणवता**—ख-ग-च-ण-प-फ-भ। प्रवता प्रवणवता—य-मॅ-मु ॥ ६५८.८ **कृण्वानः कुर्वाणः**—ख-ग-च-ण-प-फ-भ। कृण्वानः—य-मॅ-मु ॥ ६५९. ७ **अभिभूतिं..... उभयं वा?**—ल-*मॅ। अभिभूतिं.....पराभिभूतिमित्युभयं वा—मु ॥

६६०. १३ **पुरुभिर्बहुभिः**—ख-ग-च-ण-प-फ-भ। बहुभिः—य-मॅ-मु ॥ ६६१. १ **अनागसं पापरहितम्**—घ-त-प-मु। अनागसम्—य-मॅ ॥ ६६१. १४ **उद्योगं कुर्वन्तः**—ख-ग-च-ण-न-फ-भ-मु। उद्योग्यं कुर्वन्तः?—य-मॅ ॥ ६६१. १६ **मित्रावरुणा मित्रावरुणौ**—ख-ग-घ-च-ण-प-फ-भ। मित्रावरुणा—य-मॅ-मु ॥

६६२. १६-१७ **अपामग्नेः.....देवतानामहम्**—ख-ग-ण-त-प-फ-भ-मु। अहमप्यबादि-देवतानाम्—य-मॅ ॥ ६६३. २ **इति तुरण्यसत्**—*मॅ-मु-× ॥ ६६३. १० **अस्य दधिक्राव्णः देवस्य**—ख-ग-घ-ण-प-फ-भ। अस्य देवस्य—य-मॅ-मु ॥

६६५. १३ **फलकत्वेन**। 'फलत्वेन' इति साधु ॥ ६६६. १६ **दभीतिः हिंसकः**—मॅ। दभीतिर्हिंसकः शत्रूणाम्—§-मु ॥ ६६६. १७ **युवं युवां मिमाथाम्**—त-मु। मिमाथाम्—य-मॅ ॥ ६६७. २१ **आपिरिति बन्धुनाम**—त-न-य-ल-मु। आपिरिति बन्धुः—मॅ ॥ ६६९. १० **आजेः युद्धस्य**—ख-ग-च-ण-प-फ-भ। आजेः—य-मॅ-मु ॥

६७१. १० **आजिं रणं कृणोमि**—ख-ग-च-ण-प-फ-भ। आजिं कृणोमि—य-मॅ-मु ॥

६७३. १९ **सुष्टुतिं शोभनां स्तुतिम्**—ख-ग-घ-च-ण-त-प-मु। **सुष्टुतिम्**—य-मॅ ॥ ६७४. २०. **हूयमाना आहूयमानौ**—त-मु। **हूयमानावाहूयमानौ**—य-मॅ ॥

६७६. ११ **वयं स्तोतारोऽद्य**—च-त-प-फ-य-ल-मु। **स्तोतारोऽद्य**—मॅ ॥ ६७६. २० **विभक्तिव्यत्ययः**। 'वचनव्यत्ययः' इति युक्तम् ॥ ६७६. २२ **अभिसचन्ते प्राप्नुवन्ति**—ख-ग-च-ण-प-फ-भ-मु। अभिसचन्ते—य-मॅ ॥ ६७७. ७ **हे अश्विना अश्विनौ**—ख-ग-च-ण-प-फ-भ। हे अश्विना—य-मॅ-मु ॥ ६७८. ५ **बृहन्तं महान्तम्**—मॅ। बृहन्तं महान्तं धनम्—§-मु ॥

६७९. १ **विरप्शते इति वा**—ख-ग-च-ण-न-भ-स। वा रप्शते इति वा—य-मॅ-मु ॥

६८२. २-३ **अभिषुतं नः अस्मदीयं सोमम्**—त-प-मु। अभिषुतं सोमम्-य-मॅ ॥

६८३. १५ **प्रतिनियतोऽश्वः**—न-भ-ल-स। प्रतिनियुतोऽश्वः—मॅ-मु ॥

६८६. १-२ **उत वा अपि च**—ख-ग-च-ण-प-फ-भ। उत वा अथवा—य-मॅ-मु ॥ ६८६. १३ **चारुः शोभनः**—च-°मॅ-मु ॥ ६९०.११ **प्रथमं संभक्तारं कृत्वा**—ख-ग-ण-भ-ल। प्रथमसंभक्तारं कृत्वा—य-मॅ-मु ॥

६९२. २६ **अब्रन् व्यावृण्वन्**—ख-ग-ण-न-भ-य-ल-स। अब्रन् व्यवृण्वन्—मॅ-मु ॥ ६९५.५ **उपकारत्वाच्च**। 'उपकारकत्वाच्च' इति युक्तम् ॥

६९६. ९ **वामदेवस्यार्षं गायत्रम्**—च-फ। गायत्रम्—य-मॅ-मु ॥

७०२. १८ **दैव्यस्येत्यधिकरणे षष्ठी**—°मॅ-मु। दैव्यधिकरणे षष्ठी—य। **'दैव्यस्येति व्यधिकरणे षष्ठी'** इति पठनीयम्। एवमेव न-भ-स—लिखितपुस्तकेषूपलभ्यते ॥ ७०२. २१ **उरुत्वे च सुवति प्रेरयति**—ख-ग-घ-च-ण-त-प-फ-भ-मु। उरुत्वे च सुवति—य-मॅ ॥ ७०३. १८ **द्यावापृथिवी द्यावापृथिव्यौ**—ख-ग-च-ण-भ। द्यावापृथिव्यौ—य-मॅ-मु ॥ ७०५. १८ **यच्छतम्**। **उ पूरणः**—ख-ग-घ-च-ण-प-फ-भ-स। यच्छतम्—य-मॅ-मु ॥ ७०६.४ **नोऽस्मानुरुष्येत्**—ख-ग-घ-च-ण-त-प-फ-भ-मु। न उरुष्येत्—य-मॅ ॥ ७०६. ११ **समुद्रं न समुद्रमिव**—घ-त-न-प-भ-य-मु। समुद्रमिव—मॅ ॥

७०९. १६ **यजमानं वा युवाम्**—य-मॅ-मु। यजमानं वां युवाम्—§ ॥ ७०९. १७ **कार्ष्ण्येन चन्द्रमसि स्थितेन**—त-य। कार्स्येन चन्द्रमवस्थितेन—ख-ग-ण; कार्म्येन चन्द्रमवस्थितेन—च-फ; कार्ष्मेण चन्द्रमवस्थितेन—न-भ-ल; कार्ष्येन चन्द्रमसि स्थितेन—मॅ-मु॥ ७०९. २३ **नि षेदथुः आश्रयथः**—ग-च-ण-भ-मु। निषेदथुः आश्रयतः—य-मॅ ॥

७१०. ३ **ते अनुष्टुभावाद्या च चतुर्थी च**—त-वर्जलिखितपुस्तकेषु मॅ-पुस्तके च। ते चानुष्टुभावाद्या च चतुर्थी च—य। ते चानुष्टुभावाद्याश्चतुर्थी च—मु। 'ते चानुष्टुभावाद्याचतुर्थ्यौ च' इत्यनुक्रमण्याम् ॥ ७१०. २४ **सुपूतम्**—न-स-°मॅ-मु ॥ ७११. ९ **अहिंस्यन्तः**। 'अहिंस्यमानाः' इति युक्तम् ॥ ७१२. १५ **सीताधारकाष्ठम्**—त-प-भ। सीताधारकाष्ठाम्—मॅ-मु ॥ ७१३. १ **भूमिविदारककाष्ठाः**—घ-न-°मॅ-मु ॥

७१७. ७ **अज्ञाना व्यञ्जयन्तीः**—°मॅ। अज्ञाना व्यञ्जयन्त्या—य। अज्ञाना व्यञ्जयन्त्यः—§-मु ॥

७२०. ३ **एवंभूतो महान् देवः**—ख-ग-घ-ज-ण-भ। अथ तथाभूतो महान् देवः—य-मॅ-मु ॥ ७२२. १९ **यस्मै यज्ञाय**—ख-ग-घ-च-ण-प-फ-भ। यस्मै—य-मॅ-मु ॥ ७२३. १ **क्षितयो मनुष्या यजमानास्तुभ्यम्**—ख-ग-घ-च-ण-प-फ-भ। तुभ्यं क्षितयो मनुष्याः—य-मॅ-मु ॥ ७२३. १२ **इहास्मिन् यज्ञे**—ख-ग-घ-च-ण-प-फ-भ। इह—य-मॅ-मु ॥

७२३. २१ **जननाम्नः**—न-*मॅ । जरनाम्नः—इतरेषु मु-पुस्तके च । अनु., बृहद्दे. ५. १४, देवराज (निरु. ४. १८), ताण्ड्य ब्रा. १३. ३. १२ एषु द्रष्टव्यम् ॥ ७२३. २४ **वृशो वा जानः**—स-मॅ । वृशो वा जारः—इतरेषु मु-पुस्तके च ॥ ७२४. ६ **वृशो जानः**—य-स-मॅ । वृशो जारः—इतरेषु मु-पुस्तके च ॥ ७२४. १० **निहतो द्विजः**—ख-ग-च-ण-त-फ-य-ल । निहतो द्विजाः—मॅ-मु ॥ ७२४. २५ **जानो वा**—*मॅ । जारो वा—§-मु ॥ ७२६. ११ **व्ययोजयन्**—*मॅ । वियोजयन्—मु ॥

७३०. ८ **मित्रमिव त्वाम्**—§ । मित्रमिव—मॅ-मु ॥ ७३१. २१ **मर्तान्**—ग-घ-ज-ण-प-भ-य-ल-स-मु । मर्त्यान्—मॅ ॥

७३५. ७ **उपरितनभागे आज्योपेतम्**—ख-ग-ण-न-भ-य-ल-स-मु । उपरितनभागाज्योपेतम्—मॅ ॥ ७३६. २ **उपागच्छ**—ख-ग-घ-ण-त-न-प-फ-भ-य-स । उपगच्छ—मॅ-मु ॥ ७३७. ९. **दुःखेन गाह्यानि**—*मॅ । दुःखेन ग्राह्याणि—मु ॥ ७३७. १९ **अविनाशम्**—ख-ग-घ-च-ण-न-प-भ । अनाशम्—य-मॅ-मु ॥ ७३८. ९ **गोमन्तं गोभिर्युक्तम्**—ख-ग-च-ण-प-फ-भ । गोमन्तम्—य-मॅ-मु ॥

७४५. ७ **सं संस्कुरुत**—ख-ग-च-ण-प-फ-भ । संस्कुरुत—य-मॅ-मु ॥ ७४५. २३ **मानुषाणां मनुष्याणाम्**—ख-ग-घ-च-ण-त-प-फ-भ-स-मु । मनुष्याणाम्—य । मानुषाणाम्—मॅ ॥ ७४७. ३ **चित् पूरणः**—ख-ग-च-ण-प-फ-भ । मॅ-मु-पुस्तकयोः नास्ति ॥ ७४७. १० **उरु भवन्**—न-ल-स-*मॅ-मु ॥ ७४८. १० **अग्नेः** । ' अग्ने ' इत्यस्य स्थाने ' अग्नेः ' इति सायणेन पठितम् ॥

७४९. १६ **होत्राणां होमानाम्**—ख-ग-च-ण-फ-भ । होमानाम्—य-मॅ-मु ॥ ७५०. ८ **बहुभिः स्तुत**—ख-ग-च-ण-फ-भ । बहुभिः स्तुत्य—य-मॅ-मु ॥

७५३. २० **औणादिकइस्प्रत्ययान्तः**—ख-च-झ-त-न-र-मु । औणादिकइस्प्रत्यय° (स्वरेणान्तोदात्तः)-य । औणादिकइस्प्रत्ययान्तत्वात्—मॅ ॥ ७५३. २२ **देवम्**—मॅ-मु-× ॥ **मर्तासः**—मॅ-मु-× ॥ ७५३. २४ **टेरेत्वम्**—§-मु । झेरेत्वम्—मॅ ॥ ७५४. २५ **मतुप आदुपधत्वात् वत्वम्** । प्रकृतेराकारोपधत्वात्ततः परस्य मतुपो मकारस्य ' मादुपधायाः° ' (पा. सू. ८. २. ९) इति सूत्रेण वत्वमित्यर्थः । मतुप आदुपधात्वाद्वत्वम्—य । मतुपोऽदुपधत्वाद्वत्वम् ?—मॅ-मु ॥ ७५५. १७-१८ **विभक्तेरुदात्तत्वम्**—मॅ-मु । विभक्तेरन्तोदात्तत्वम्—§ ॥ ७५६. १४ **ध्मातरि यथा** । यथा ध्मातृसमीपे—मॅ-मु । ध्मातरि यथा ध्मातृसमीपे—§ ॥ ७५६. १९ **उभे अभ्यस्तमित्यभ्यस्तसंज्ञायाम्**—§-मु । उभे अभ्यस्तसंज्ञायाम्—मॅ ॥ ७५६. २५ **हे अग्ने अहम्**—§-मु । हे अग्ने—मॅ ॥ ७५७. ३ **इत्यन्तोदात्तत्वेन**—ख-च-झ-ण-न-भ-य । इत्यन्तोदात्तत्वे-मु । इत्यन्तोदात्तः—मॅ ॥ ७५७. ५ **गतेः प्रकृतिस्वरत्वम्**—ख-च-झ-ण-न-भ-य-र । गतेरुदात्तत्वम्—मॅ-मु ॥ ७५७. १४ **हविषां नेता त्वम्**—त । हविषां नेतारः—य-मॅ-मु ॥

७५८. ९ **उब्जेर्बले बलोपश्च**—§-मु । उब्जेर्बलोपश्च—मॅ ॥ ७५८. १५ **तत्तथोक्तम्**—*मॅ-मु । तथोक्तम्—§ ॥ ७५९. २ **यज्ञघातुकराक्षस°**—ख-च-झ-ण-न-भ-य-र-श । यज्ञघातक-राक्षस°—मॅ-मु ॥ ७५९. १८-१९ **वर्धय वृद्धिं प्रापय**—ग-ज-न-र-मु । वर्धय प्रापय वृद्धिं प्रापय—य-मॅ ॥ ७६०. २ **सर्वसमृद्धि°**—झ-त-न-य-र-श-मु । समृद्धि°-मॅ ॥ ७६०. ४-५ **सर्वदिगन्तरालवर्तिनी**—ख-च-झ-ण-न-भ-य-र-मु । सर्वदिगन्तरावर्तिनी—मॅ ॥ ७६०. १७ **तव अर्चयः**—§-मु । तव अर्चिषः—य । अर्चयः—मॅ ॥ ७६१.१ **दारिद्र्यनिमित्त°**—झ-न-भ-य-र-मु । दारिद्र्यनिमित्त°—मॅ ॥ ७६१. २ **अस्माकासः आस्माकाः**—ग-न । अस्माकासः अस्माकाः ?-य-मॅ-मु ॥ ७६१. १७

पूर्वैः—§ । पूर्वैः पुरातनैः—मॅ-मु ॥ ७६१. २३ भवतेरगागमम्—ख-च-झ-ण-न-भ-य-र । भवतेरगागमे—मॅ-मु ॥

७६२. १५ इत्युत्तरपदान्तोदात्तत्वम्—मॅ । इत्युत्तरपदाद्युदात्तत्वम्-§-मु ॥ ७६३.३ प्रत्ययस्वरेण मध्योदात्तः—*मॅ । प्रत्ययस्वरेणाम्तोदात्तः—§-मु ॥ ७६३. ८ स्वजनन-निमित्तत्वात्—झ-न-भ-य-र-श-मु । स्वजननिमित्तात्—मॅ ॥ ७६३. १५ क्रमेरिन्—न-*मॅ । कमेरिन्—मु ॥

७६५. १३ सस्यपोषणार्थम्—ख-च-झ-त-न-भ-य-र । तस्य पोषणार्थम्—मॅ-मु ॥ ७६५.२४ पश्वादिलक्षणस्य धनस्य—ख-च-झ-ण-त-न-भ-य-र । पश्वादिलक्षणस्य—मॅ-मु ॥ ७६६. ९ ते त्वदीयाः कीदृशाः—ख-च-झ-ण-न-भ-र । ते त्वदीयाः के कीदृशाः—य । त्वदीयाः के कीदृशाः—मॅ-मु ॥ ७६६. १३ द्युमन्तः दीप्तिमन्तः—§ । द्युमन्तः—मॅ-मु ॥ ७६६. २१ परनिन्दादीनि कुर्वाणाः—ख-च-झ-ण-त-न-भ-य-र । परनिन्दादिकुर्वाणाः—मॅ-मु ॥ ७६७. १० त्वत्परिचर्यां गच्छतः—ख-च-झ-ण-त-न-भ-य-र । परिचर्यां गच्छतः—मॅ-मु ॥

७६७. १३ आग्नेये क्रतौ गायत्रे छन्दसि—झ-त-न-भ-य-र-श-मु । आग्नेयक्रतौ गायत्रछन्दसि-मॅ ॥ ७६८. १३ त्वां वर्धन्ति—§-मु । तं त्वां वर्धन्ति—मॅ ॥ ७६८. २० राध्नुवन्ति साधयन्ति अनेन—ख-झ-ण-त-न-य-र-श-मु । साधयन्त्यनेन—मॅ ॥

७७०. ३ अष्टादश सूक्तानि—ख-च-झ-ण-त-न-भ-य-र-मु । दश सूक्तानि?-मॅ ॥ ७७०. २० नृन् नेतॄन्—§-मु । नृन्—मॅ ॥ ७७१. २१-२२ यद्वा तमापद्भ्योऽपारयः—ख-च-झ-ण-त-न-भ-य-र-श-मु । मॅ-पुस्तके नास्ति ॥

७७१. २३ पूरोरार्षम्—मॅ-मु । पुरोरार्षम्-§ । ७७३. १६ अत्राप्येवमेव ॥ ७७२. १४ हविः आनुषक्—ख-झ-फ-य-र-मु । हविर्देवेषु आनुषक्—मॅ ॥ ७७२. २१ वृद्धानि प्रवृद्धानि शोचींषि—ख-ग-च-ज-ण-त-न-प-फ-ब-भ-य-र । वृद्धानि शोचींषि—घ-श-मॅ ॥

७७४. ६ साधनेन तं प्रसिद्धम्—ख-च-झ-ण-न-भ-य-र-श-मु । साधनेन प्रसिद्धम्-मॅ ॥ ७७४. २१ दस्मस्य दर्शनीयस्य—ख-च-झ-ण-न-भ-य-र-श-मु । अस्य दस्मस्य दर्शनीयस्य-मॅ ॥ ७७५. ५ क्षिप्रं प्रयच्छ—ख-झ-ण-त-न-भ-थ-र-श-मु । क्षिप्रं यच्छ-मॅ ॥ ७७५. ८-९ व्यत्ययेन मध्यमः—ख-च-झ-ण-त-न-भ-य-र-श-मु । व्यत्ययेन मध्यमा—मॅ ॥

७७७. १६ जनाः अनिमिषम्—ख-च-झ-ण-न-भ-य-र-मु । जनास्त्वा अनिमिषम्—मॅ ॥ ७७७. १६ जुहुरे जुहुविरे—ख-च-झ-ण-त-न-भ-य-र । जुहुरे जुह्विरे—मु । जुहुरे-मॅ ॥

७७८.२० अस्तेर्लेटि रूपम्—मॅ । अस्तेर्लिटि रूपम्—मु । अस्तेर्लोटि रूपम्—श । अस्तेर्लङि रूपम्—ख-च-झ-ण-त-न-भ-र । अस्तोर्लङि—य ॥

७७९. ६ श्रवणीयं प्रशस्यम्—ख-च-झ-ण-त-न-भ-य-र-श-मु । श्रवणीयं शस्यम्—मॅ ॥ ७७९. १३ अपनीताः—मॅ । अप अपनीताः—मु । अपनीत्वा—ख-च-झ-ण-भ; अपनीयाः—ग-घ-ज-त; अपनीचाः—न-य-र; अपनीय—श ॥ ७७९. १५ ह्वरः अति हिंसाम्—मॅ । ह्वरः हिंसाम्—§-मु । एवमेव पठनीयम् ॥

७८१. १८ योनिं कारणम्—झ-न-भ-य-श । योनिः कारणम्—मु । योनिं योनि-कारणम्—मॅ ॥

७८२. १४ प्रैतु प्रगच्छतु—ख-च-झ-ण-न-भ-य-र । प्रैतु प्रगच्छतु—मु । प्रैतु गच्छतु—मॅ ॥ ७८३. १ स्तोत्रं च चिकित्धि—ख-च-झ-ण-त-न-भ-य-र-मु । स्तोत्रं चिकित्धि—मॅ ॥

७८३. १२ **मह्यं ऋषये**—ग-घ-ज-प-फ-ब । मम ऋषये—य-मॅ-मु ॥ ७८४. ९ **अस्मदीयेषु एषु क्षयेषु**—ख-ङ-न-प-फ-ब-भ-य-र । अस्मदीयेषु क्षयेषु—मॅ-मु ॥ ७८४. १० **आदीदिहि आदीप्यस्व**—त-न-भ-य-र-मु । दीदिहि दीप्यस्व—मॅ ॥

७८४. १४-१५ **इत्युक्त्वाद्यतस्रो.....लौपायना वा**—ङ-त-न-भ-य-र-मु । इत्युक्त्वाद्य—मॅ ॥ ७८५. ९ **अतिशयेन शोचिष्मन्**—ख-च-ङ-ण-न-भ-य-र । अतिशोचिष्मन्—मॅ-मु ॥ ७८५. १४ **इत्यृचमनुब्रूयात्.....इत्यृचमन्वाह ?**—§-मॅ । इति तृचमनुब्रूयात्.....इति तृचमन्वाह—मु । आश्व. श्रौ. ५. ७ अत्र द्रष्टव्यम् ॥ ७८७. १ **याज्यानुवाक्ये**—मॅ-मु । याज्यानुवाक्ये इति—§ ॥ ७८७.१७ **जेतारं शत्रून्**—§ । जेतारं शत्रूणाम्—मॅ-मु ॥ ७८८. २ **अन्नं धनं चार्च**—ग-घ-च-ङ-ञ-न-य-र-श । अन्नं धनमर्च—मु । अन्नं धनं वार्च—मॅ ॥ ७८८. १० **उतो अपि च**—मॅ । उत अपि च—§-मु ॥ ७८८. १६ **अस्माकं बलमाचरन्तम्**—ख-च-ङ-ण-त-न-भ-य-र-श । अस्माकं बलमिवाचरन्तम्—मॅ-मु ॥

७९१. २ **सतां पालयिता**—§-मु । सतां साधूनां पालयिता—मॅ ॥ ७९१. ४ **गवां हिरण्यानां वा**—ख-च-ङ-ण-न-भ-य-र-मु । गवां हिरण्यादीनाम्—मॅ ॥ ७९१. १८ **यथा मां ब्रवीति**—ख-च-ङ-ण-न-भ-य-र-मु । तथा मां ब्रवीति—मॅ ॥

७९३. २५-२६ **अग्ने त्वं जास्पत्यं**—ख-च-ङ-न-प-भ-य-र । अग्ने त्वं जाःपत्यम्—ग-घ-ज-फ । अग्ने सं जास्पत्यम्—श-मॅ-मु ॥

७९५. १ **मण्डलादिपरिभाषया**—§-मु । मण्डलादिपरिभाषायाः—मॅ ॥ ७९६. १४ **व्ययतेर्वा**—*मॅ-मु । वेतेर्वा—§ ॥ ७९७. २ **कः अकार्षीः**—मॅ । अकः अकार्षीत्—ख-च-ङ-ण-न-भ-र-मु; अकः अकार्षीः—ग-घ-ज-प-फ-ब-य-श ॥ ७९७. २ **स्वभ्वपुत्रेण**—*मॅ । स्वभावेन—त-न-श-मु; स्वभावे—ङ-भ-य-र; स्वभाव—ख-च-ण ॥ ८००. ८ **त्वं या चो**—मॅ । या चो—§-मु ॥ ८०१.३ **उपहारवत् ग्राह्याणि**—ख-च-ङ-ण-न-भ-य-र-श । उपसंहारवत् ग्राह्याणि—मॅ-मु ॥

८०२. ९-१० **विद्वान् शृणवच्च**—*मॅ । शृणवच्च—§-मु ॥ ८०३.४ **कीदृशीः**—य-मॅ । कीदृश्यः—ग-घ-ज; कीदृशाः—इतरलिखितपुस्तकेषु मु-पुस्तके च ॥ ८०३. २४ **एतन्नामकस्य दासस्य**—ख-ग-घ-च-ज-ङ-ण-न-प-फ-ब-भ-य-मु । एतन्नामकस्य—र-श-मॅ ॥ ८०४. १५ **प्रहितवान्**—च-त-य-मु । प्रतिहितवान्—मॅ ॥ ८०५. २३ **प्रतिगृहीतवन्तः स्मः**—मॅ । प्रतिगृहीतवन्तः स्म—§-मु ॥

८०७. १६ **अन्यत् वस्तुजातम्**—§ । अन्यद्वसुजातम्—मॅ-मु ॥ ८०९. १३ **मायाः प्रज्ञाः**—*मॅ । मायाः युवतीः—मु । मायाः वञ्चनाः—§ ॥ ८०९. १४ **समीपं वा यत्**—*मॅ-मु । समीपं यन्—ङ-न-भ-य-र; समीपयन्—ख-च-ण-त-श ॥ ८०९. २२ **अयातमगच्छतम्**—मु । अगच्छतम्—य । अयातमागच्छतम्—मॅ ॥ ८१०. २३ **गच्छन्त्यस्यां भटाः**—ख-च-ङ-ण-त-न-भ-र । गच्छन्त्यस्यां भये—मॅ-मु ॥ ८११. १० **प्रेरणं चरन्ति कुर्वन्ति**—ख-च-ङ-ण-त-न-भ-य-र-श-मु । प्रेरणं चरन्ति—मॅ ॥ ८११. १६ **धनार्थिनो ये जनाः**—ख-च-ङ-ण-न-भ-य-र-श । धनार्थं ये जनाः—मॅ-मु ॥

८१२. ७ **मेघस्थोदकनिर्गमनद्वाराणि**—ङ-न-भ-य-र । मेघस्थोदकानां निर्गमनद्वाराणि—मॅ-मु ॥ **बाध्यमानान्**—*मॅ-मु ॥ ८१२.१२-२० **ऊधः जलमरंहः**—ख-च-ङ-ण-न-भ-य-र-श । ऊधः बलमरंहः—मॅ-मु ॥८१३.६ **अन्यः असुरः शुष्णः**—ग-घ-ज-प-फ-ब । अन्यः असुरः—य-मॅ-मु॥ ८१३.१५ **दानवस्य**

दनुजस्य वृत्रस्य—ख-च-झ-ण-त-न-भ-य-र । दानवस्य दनुजस्य—मॅ-मु ॥ ८१४. ६ **त्यं चित्तमेव वृत्रम्**—§ । तं चित्तमेव वृत्रम्—मु । तं चित्तमेव वृत्रासुरम्—मॅ ॥ ८१४. ८ **तं चिदिति**—§ । त्यं चिदिति—मॅ-मु ॥ ८१४. २३ **सपत्नानवक्षेसारम्**—ग-घ-ज-त-प-फ-ब । सपत्नानां क्षेसारम्—य । सपत्नानामवक्षेसारम्—मॅ-मु ॥ ८१४. २४ **स इमाँल्लोकानवृणोत् यदिमाँल्लोकानवृणोत्**—§-मु । स इमाँल्लोकानवृणोत्—मॅ ॥ ८१५. २ **अमत्रममात्रम्**—य-मॅ । अत्रममात्रम्—मु । नूनं सायणः 'अत्रम्' इत्यस्य स्थाने 'अमत्रम्' इति पठति ॥ ८१५.१९ **स्वधृतिः**—मॅ-मु-× ॥ ८१६.५ **एकं नु मुख्यमेव**—श-वर्जलिखितपुस्तकेषु मु-पुस्तके च । एकं मुख्यमेव-श-मॅ ॥ ८१६. ६ **सतां पालकम्**—§-मु । सतां साधूनां पालकम्—मॅ ॥ ८१६. १७ **किं गृह्णते**—§ । किं गृह्णन्ते ?—मॅ-मु ॥

८१७. ७ **प्रजापतिपुत्रः संवरणाख्य ऋषिः**—ख-च-झ-ण-त-न-भ-य-र । प्रजापतिपुत्रः संवरण ऋषिः—मु । प्रजापतिपुत्रस्य संवरणस्यार्षम्—मॅ ॥ ८१७.७-८ **तथा चानुक्रान्तम् । महि दश प्राजापत्यः संवरणः**—ख-च-झ-ण-न-भ-र-श-मु । महि...संवरणः इति—य । महि दश प्राजापत्यः संवरण इत्यनुक्रान्तम्—मॅ ॥ ८१९. १८ **अव पालय**—मॅ । अव पाहि अवपालय—मु । अव पाहि पालय—ग-घ-ज-प-फ-ब । अव च पालय—य ॥ ८२०. १३ **माहनीया अश्वाः**—मॅ । महनीया अश्वाः—मु । मोहनीया अश्वाः—ख-च-झ-ण-न-भ-य-र-श । साहनीयः अश्वाः—ग-घ-ज-प-फ-ब ॥ ८२०. २२ **जुष्टाः मां प्राप्ताः**—ख-च-झ-ण-न-भ-य-र-श-मु । मा जुष्टा मां प्राप्ताः—मॅ ॥ ८२०.२३ **वहनाय यतमानाः**—झ-न-भ-य । वहमानाय यतमानाः—मॅ-मु ॥

८२१. १७ **जठरं स्वकीयम्**—§-मु । जठरं स्वकीयोदरम्—मॅ ॥ ८२२. १५ **प्रयता प्रदत्तानि**—ख-च-झ-ण-त-न-भ-य-र-मु । प्रयता दत्तानि—मॅ ॥ ८२२. १७ **पित्रादिवध°**—*मॅ । पित्रादिधन°—मु ॥ ८२३. २० **वणिज इव**—न-श-*मॅ-मु ॥

८२५. १२ **चतुर्षु**—*मॅ । चतुष्पु—मु ॥ ८२५.१२ **यत् याश्च हे शूर**—ग-घ-ज-प-फ-ब । याश्च हे शूर—य-मॅ-मु ॥ ८२६. १९ **शत्रूणां हन्तरिन्द्र**—ख-च-झ-ण-न-भ-य-र-श-मु । वृत्राणां हन्तरिन्द्र—मॅ ॥

८२९. ५ **द्योततेः दीव्यतेर्वा**—मॅ-मु । द्योततेः दीव्यतेः—§ ॥

८३०. ११ **जरति स्तौति**—मॅ-मु । जरते—§ ॥

८३२. १० **उभा उभौ देवौ**—ग-घ-ज-प-फ-ब । उभौ देवौ—य-मॅ-मु ॥

८३३. १२ **हे चित्र चायनीय**—ग-घ-च-ज-ण-न । हे इन्द्र हे चित्र चायनीय—य-मॅ-मु ॥ ८३३. १४ **यदिन्द्र चित्र चायनीय**—य-मॅ । यदिन्द्र चित्र चायनीयम्-मु । अत्र निरुक्तपुस्तकेषु विभिन्नाः पाठा दृश्यन्ते—यदिन्द्र चित्रं चायनीयम्—निरु. (बॉम्बे संस्कृत सीरीज; वेंकटेश्वर प्रेस); यदिन्द्र चित्र चायनीयम्—निरु. (आनन्दाश्रम) ॥

८३६. ५ **गतसारस्य सोमस्य**—ग-घ-ज-झ-न-र-श । गतसारस्य सोमरसस्य—*मॅ-मु ॥ ८३६. ९ **आगत्य च माध्यंदिने सवने**—ख-च-झ-ण-न-भ-य-र । माध्यंदिने सवने—मॅ-मु ॥ ८३७. ३ **निरावरणं शुद्धं वा** । 'निवारणं शुद्धं वा' इति मॅ-मु-पुस्तकयोः लिखितपुस्तकेषु च । तथापि 'ब्राह्मणो ब्रह्मा' इत्यष्टममन्त्रभाष्ये 'निरावरणं तेजःसंस्थायम्' इति पाठस्य लिखित-पुस्तकानुसारेण अर्थानुसारेण च स्वीकृतत्वादत्रापि 'निरावरणम्' इत्येव पाठः स्वीकृतः ॥ ८३७.११ **तमसा**—§ । तमसान्धकारेण—मॅ-मु ॥ ८३७. १४ **स च वरुणश्च**—ख-च-झ-ण-न-भ-य-र ।

वरुणश्च—मॅ-मु ॥ ८३७.१९ **अग्निः**—ख-च-ज्ञ-ण-त-न-भ-य-र-श-मु । अग्निर्मामिहावतमित्युपशिक्षन्—मॅ ॥ ८३७. १९ **अभिषवसाधनानि**—ख-च-ज्ञ-ण-त-न-भ-य-र-श । अभिषवसाधनाय—मॅ-मु ॥ ८३७. २१-२२ **किंच नमसा...एवमुक्तैः**—ख-च-ज्ञ-ण-त-न-भ-य-र-श-मु । नमसा उक्तैः—*मॅ ॥ ८३७. २४ **स्वाध्वयमव्यामोहयन्ती**—ख-च-ज्ञ-ण-त-न-भ-य-र । ८३७ पृष्ठे ३०-३१ पङ्क्तौ 'स्वाध्वयमव्यामोहन्ती' इति यद्दत्तं तत्प्रमादजनितमिति बोध्यम् । स्वाध्वयमया मोहयन्त्या—मॅ-मु ॥ **परांस्तु तथा**—ख-च-ण । परांस्तथा—ज्ञ-त-न-भ-र-श-मॅ-मु ॥ **यत्तुरीयेण**—ख-च-ज्ञ-ण-न-भ-य-र-श । तुरीयेण—मॅ-मु ॥ ८३७. २५ **तुरीयं ब्रह्म**—ख-च-ज्ञ-ण-न-भ-य-र । यत्तुरीयं ब्रह्म—मॅ-मु ॥ ८३८. १ **निरावरणं तेजःसंस्त्यायम्**—ज्ञ-न-भ-य-र । निवारणं तेजःसंस्त्यायम्—मॅ-मु ॥ ८३८. ८ **निगदव्याख्यैषा**—श । निगदितं वाख्यैषा—य । निगतव्याख्यैषा—मॅ-मु ॥ ८३८. ९ **तमोऽवरुध्य लब्धवन्तः**—ख-च-ज्ञ-ण-न-भ-र । तमोऽवरुध्यदब्धलब्धवन्तः—य । तमो विरुध्य लब्धवन्तः—मॅ-मु ॥

८३८. १९ **तस्मात्कृपयैव**—ख-च-ज्ञ-ण-त-न-भ-य-र-श । तस्मात्कृतं मयैव—मॅ-मु ॥ ८३८. २१ **यज्ञायते यज्ञमिच्छते**—ग-घ-ज-प-फ-ब-मु । यज्ञायते—य-मॅ ॥ ८३९.१ **प्रयच्छथः**—*मॅ-मु । प्रयच्छथ—भ; प्रयच्छतम्—घ-न ॥ ८४१. ३-४ **प्रकृणुध्वं स्तुत**—*मॅ-मु । प्रकृणुध्वं स्तुतिम्—§ ॥ ८४५. १ **केन प्रकारेण**—मॅ-मु-× ॥ ८४५. २१ **प्रतिगम्याः प्रतिगम्यात्**—ख-च-ज्ञ-ण-त-न-भ-य-र-मु । प्रतिगम्याः गम्यात्—मॅ ॥ ८४६.८ **वा अथवा**—§ । अस्य स्थाने मु-पुस्तके 'अथवा अन्तरिक्षस्थाना देवता नोऽस्माकं प्राशस्त्यं गृणातु । वा अथवा उर्वशी बहूनां वशयित्री आदित्याख्या द्युस्थानदेवता नः प्राशस्त्यं गृणातु । कीदृशी सा' इति वर्तते ॥ ८४६. १० **उदकस्य वा**—*मॅ-मु । उदकस्य—§ ॥

८४६. २४ **शंतमा**—ख च-ज्ञ-ण-भ-य-र-मु । प्र शंतमा—मॅ ॥ ८५०. ६ **शशमानस्य शंसमानस्य**—ख-च-ज्ञ-ण-त-न-भ-य-र-मु । शशमानस्य—मॅ ॥ ८५०. १५ **सांसारिकस्य चारिष्ठस्य**—§ । सांसारिकस्य वारिष्टस्य—मॅ-मु ॥ ८५०. १५ **ईश्वरव्यतिरिक्तस्य**—ख-च-ण-न । ईश्वरसेवातिरिक्तस्य—मु । ईश्वरस्य व्यतिरिक्तस्य—य-मॅ ॥

८५३. ९ **सुखस्य भावयिषीः**—मॅ । सुखस्य भावयिष्यः—§-मु ॥ ८५६. १४ **अनन्यप्रेरणयैव**—ख-च-ज्ञ-ण-त-न-भ-य-र । अनन्यप्रेरणायैव ?—मॅ-मु ॥ ८५७. १७ **तथा संतम्**—*मॅ-मु । तम्—ग-घ-ज । स यथा सन्तम्—इतरेषु ॥ ८५७. १८ **हिरण्यवर्णं हितरमणीयवर्णम्**—ज्ञ-न-भ-य-मु । हिरण्यवर्णम्—मॅ ॥ ८५८. २ **कामान् प्रयच्छन् वा**—ख-ज्ञ-न-भ-य-र-श-मु । कामान् प्रयच्छन् आ—मॅ ॥ ८५८. १४ **रातहव्या दत्तहविष्काः**—ग-घ-ज-त-न । रातहव्या दत्तहव्या हविष्काः—य-मॅ-मु ॥ ८५८. २१ **स्त्रिया अप्यधिकारः**—ख-च-ण-भ । स्त्रिया अग्न्यधिकारः—य-मॅ-मु ॥

८५९.१८ **उपपत्तिमेवमाहुः**—ख-च-ज्ञ-ण-न-भ-र-मु । उत्पत्तिमेवमाहुः—य । उपपत्तिमेवाहुः—मॅ ॥ ८५९. २० **इन्द्रं प्रातः प्रातःसावस्य**—मॅ-मु । इन्द्राय प्रातःसावस्य—§ ॥ ८६०. २ **तद्वद्वयमपि**—ख-ग-घ-ज-ज्ञ-त-न-भ-य-र-श । तद्वदयमपि—मॅ-मु ॥ ८६०.२ **त्वमपि ज्येष्ठतातिम्**—श-मॅ-मु । ज्येष्ठतातिम्—इतरलिखितपुस्तकेषु ॥ ८६०. १५ **शोभनवृष्टिप्रदानादिकर्मभिन्द्र**—न । °कर्मेन्द्र—इतरलिखितपुस्तकेषु । °कर्मकेन्द्र—मॅ-मु ॥ ८६१. ३ **सः स खलु होता**—§-मु । सः स खलु—य । स खलु होता—मॅ ॥ ८६३. १४ **सवनं यज्ञगृहम्**—य-मॅ-मु । सदनं यज्ञगृहम्—§ ॥ ८६४. २२ **तस्मादेवं भवतीति**—ख-च-ज्ञ-ण-त-न-भ-य-र । तस्मादेवं भातीति—मॅ-मु ॥

८६६.६ गा निगूढा इति संबन्धः—मॅ-मु । गा इति संबन्धः निगूढाः—ख-च-ञ-ण-त-न-भ-य-र-श; गा इति संबन्धः—ग-घ-ज ॥ ८७०. ५ अग्निमिस्ताम्—ग-घ-ज-झ-*मॅ-मु ॥ ८७०. ६-७ अतरन् सवमनुतिष्ठन्तः—ख-च-ञ-ण-न-भ-य-र । अतरन् समनुतिष्ठन्तः—मॅ-मु ॥ ८७२. १५ नोऽस्माकं भुवन्—न-य-मु । अस्माकं भुवन्—मॅ ॥ ८७३. १६ वेतु—*मॅ । ध्यन्तु—मु ॥

८७५. ११ संमोदन्तेऽस्मिन् देवाः—ख-च-ण-त-भ-श ॥ संमोदन्ते तस्मिन् देवाः—य-मॅ-मु ॥ अवयवलक्षणेयम्—*मॅ । पूर्वावयवलक्षणेयम्—मु ॥

८७८. १३-१४ तपनपरिस्पन्दार्धानत्वात्—ख-ञत-न-भ-य-र । तपपरिस्पन्दा°—मु । तपनपरिस्यन्दा°—मॅ ॥ ८७८. २० स्वस्वामिनोऽभिमतम्—ग-घ-ज । स्वस्वामिनेऽभिमतम्—य । स्वस्वामिन्यभिमतम्—मॅ-मु ॥

८८०. ७ गमयन्तम्—*मॅ । ददतम्—मु ॥ ८८०. १९ भद्रा शोभनानि—ख-च-ञ-ण-त-न-भ-य-र । भद्रा शोभनीयानि—मॅ-मु ॥

८८२. ८ आपृचे आपर्चनीयाः—मॅ-मु । आपृचे आपृचनीये—ख-च-ण; आपृचे आपर्चनीये—ग-घ-ज-ञ-न-भ-य-र-श ॥

८८३.१२ सप्तमम्—*मॅ-मु । षष्ठम्—§॥ ८८५.२० आगहि—? (आगच्छ) ॥ ८८७.६ स्वस्त्यापेये—मॅ । स्वस्त्यात्रेयम्—ख-च-ञ-ण-त-र-श-मु; स्वस्त्यात्रेयो—न ॥ ८८७. ७ तथा भयादिके सति- -ख-च-ण-त; तयादिके सति—ञ-न-भ-र । तथारूपादिके सति—श-मॅ-मु ॥ ८८७. २१ पन्था अन्तरिक्षमार्गः—ग-घ-ज-*मॅ । पथ्या स्वस्ति देवि पन्था अन्तरिक्षमार्गः—मु ॥ ८८८. ८ बन्धुजनेन सं गमेमहि संगच्छेमहि—ख-च-ञ-ण-न-भ-य-र । बंधुजनेन संगमेमहि—मॅ-मु ॥ ८८८.९ प्रवासकोपेन—ख-च-ण-श; प्रयासकोपेन— ञ-त-न-भ-र । प्रयामकोपेन—*मॅ-मु॥

८९०. १५ एतान्—मॅ-मु । तान्—§ ॥ ८९१. १५-१६ ऊर्णाः दीप्तीः शुन्ध्यवः शोधिकाः—य-र-मॅ । ऊर्णा दीप्तीः (ञ-दीप्तिः; न-दीप्तयः) शुन्ध्यवः शोधिकाः—ख-ग-घ-च-ज-ञ-ण-त-न-श । ऊर्णा दीप्तीः शुन्ध्यवः शोधिका अपः—मु ॥ ८९४.१६ गोसंबन्धि वा राधः—मॅ-मु । गोसंबन्धिनं वा राधः—§॥ ८९४.१७ तत्संबन्धि वा राधः—मॅ-मु । तत्संबन्धिनं वा राधः—§॥

८९७. ५ स्यन्दमाना अपः—मॅ-मु । स्यन्दमाना आपः—§ ॥ ८९७. ७ अश्वा इव अश्वा यथा—ख-च-ञ-ण-त-न-भ-य । अश्वा इव यथा—मॅ-मु ॥ ८९९. २० स मर्त्यश्च सुदेवः—ख-च-ञ-ण-न-भ-य । सुदेवः—मॅ-मु ॥ ८९९. २१ स सुवीरः—ख-च-ञ-ण-न-भ-य । स मर्त्यः सुवीरः—मॅ । सुमर्त्यः सुवीरः—मु ॥ ८९५. २२ एवं भवति—य-मॅ । य एवं भवति—त-मु । अनन्वितमिदम् ॥

९०१. १०-११ अब्दया मुहुरुदकानाम्—§-मु । अब्दयाचिन्मुहुरुदकानाम्—मॅ ॥ ९०१. ११ जसो याजादेशः—ख-च-ञ-ण-न भ-य । शसो याजादेशः ?—मॅ-मु ॥ ९०२. १० निहतवन्तः स्थ—ञ-त-न-भ-र; निहितवन्तः स्थ—य । निहतवन्तः—मॅ-मु ॥ ९०४. ८ स्नुगतयः—*मॅ । सुगतयः—मु । स्नुतयः—ख-च-ण-न; मतयः—ग-घ-ज; स्तुतयः—ञ-त-भ-र; सुमतयः—श ॥ ९०५. २ मधुराप्रुषाः ?—मॅ-मु । मधुराः प्रुष्टाः—न-भ; मधुराः—घ ॥ ९०५. २५ रमयत हे मरुतः—*मॅ-मु । रमयन्त हे मरुतः—§ ॥ ९०६. ५ धत्थ दत्थ—*मॅ-मु । धत्थ दत्त—§ ॥

९०९. १० विश्वस्य उक्तस्य—ख-च-ञ-ण-त-न-भ-य-र । विश्वस्योत्कृष्टस्य—मॅ-मु ॥

९११. १५ गावो न—मॅ-मु । गावो न अश्व इव—§ ॥

९१५. २ **सुसदृशः**—§-मु। सुसदृशाः—मॅ ॥ ९१५. १३ **नमनहेतुकम्**—मॅ-मु। नमनहेतुम्-§ ॥ ९१५. १९ **विपरिणन्तव्यः**—*मॅ। विपरिणेतव्यः-§-मु ॥ ९१५. २० **ओजो नाम**—ख-च-झ-ण-त-न-भ-य-र-श-मु। ओजनाम-मॅ ॥ ९१५. २२ **तनूषु युष्मदीयेषु**—ख-च-झ-ण-न-भ-य-र। तनूषु तदीयेषु—मॅ-मु। तनूशब्दस्य स्त्रीलिङ्गत्वात् 'युष्मदीयासु' इति युक्तम् ॥ ९१६. १८ **हविर्भिः सेविताः**—ग-घ-ज-न-मॅ-मु। हविर्भिः सेकिताः—ख-च-झ-ण-त-भ-य-र; हविर्भिः सेचिताः-श ॥

९१७. २ **एषाम्**—ग-घ-ज-श-*मॅ-मु ॥ ९१८. १८ **वैसादृश्याभावः**—त-य-र-मु। वैसदृश्याभावः—मॅ ॥ ९१९. ३ **सामानाधिकरण्यप्रयोगः**—ख-च-झ-ण-त-न-भ-य-र-श-मु। समानाधिकरण्यप्रयोगः—मॅ ॥

९२०. ७ **लङि तिपि रूपम्**—ख-च-झ-ण-न-भ-य-र-श। लुङि तिपि रूपम्—मॅ-मु ॥ ९२१. १ °**पट्टादिकम्**—मॅ-मु। °भेद्यादिकम्—ख; °भट्टादिकम्—च-झ-ण-न-भ-य-र; °पदिकम्—श ॥ ९२१. १६ **करोतीत्यर्थः**—मॅ-मु। करोतीति—§ ॥ ९२२. १७ **भनतेः**—*मॅ। नभतेः—§-मु ॥ ९२२. १८ **प्राचुच्यवुः**—मॅ-मु। प्रचुच्यवुः—§ ॥ ९२२. १९ **आग्रयणादौ**—ख-च-झ-ण-न-भ-य-र-श-मु। आग्रायणादौ—मॅ ॥ ९२३. ४ **पुत्रा इति शेषः**—ख-च-झ-ण-न-भ-य। पुत्रा इत्यर्थः—मॅ-मु ॥

९२५. १६ **प्रक्षिपाम**—§। प्रक्षिपामः—य-मॅ-मु ॥ ९२५. २४ **निवसथेत्यर्थः**—*मॅ-मु। निवसतेत्यर्थः—§ ॥

९२६. २० **अत्राश्चर्यं**... इत्यादि। बृहद्देवता ५. ५०-८०; अनु. भा. ५. ६१ (मेकडोनेल-पृ. ११७) अत्र द्रष्टव्यम् ॥ ९२७. ६ **राज्ञा**—न-*मॅ। राज्ञा—मु॥ ९२७. १९ **तच्च दृश्यते**—ख-च-झ-ण-न-भ-य-र। तत्र दृश्यते—मॅ-मु॥ ९२८. १ **पुत्रोत्पादनकामाः**—ख-च-झ-ण-न-भ-य-र। पुत्रोत्पादनकाले— मॅ-मु ॥ ९२८. २३ **देवा अनेन त्रायन्ते स्तुत्यादिना स देवत्रः। न देवत्रः अदेवत्रः**—(न-सदेवत्रः)—न। देवा न येन त्रायन्ते स्तुत्यादिना सोऽदेवत्रः—*मॅ-मु॥ ९२९. ४ **उपक्षपणकर्मा**—ख-च-झ-ण-त-न-भ-र। वा उपक्षपणकर्मा-य। उपक्षेपणकर्मा—श-मॅ-मु ॥ ९३१. १६ **संपन्न°**.....इत्यादि। बृहद्देवता ५. ५०-८०; अनु. भा. ५. ६१ अत्र द्रष्टव्यम् ॥ ९३१. १८ **स सत्यमृषिम्**—मॅ-मु। स सत्य ऋषिम्—ख-च-झ-ण-न-भ-य-र। स सत्र ऋषिम्—श ॥ ९३१. २२ **भगवन्नृषेः**—ख-च-झ-ण-त-न-भ-य-श। भगवानृषेः—मॅ-मु ॥ ९३२. ८ **कन्यां**..... इत्यादि। बृहद्देवता ५. ५०-८०; अनु. भा. ५. ६१ अत्र द्रष्टव्यम् ॥

९३२. २० **स्थितिस्तत्**—*मॅ। स्थितं तत्—मु ॥ ९३४. २० **मित्रावरुणौ**—§-मु। मित्रवरुणौ—मॅ ॥ ९३५. १२ **यूपयष्टिरवस्थितः**—ग-घ-ज-श-मॅ-मु। यूपयष्टिरवस्थितम्—ख-च-झ-ण-त-न-भ-य-र। अनन्वितमेतत्। 'यूपयष्टिरिव स्थितः' (रथः) इति भाव्यमिति प्रतिभाति ॥

९३८. १६ **मेघेन वृष्ट्या**—मॅ-मु। मेघेन वृष्ट्या च—§ ॥ ९३८. १७ **पर्जन्य देव**—ग-घ-ज। पर्जन्य देव त्वया—य-मॅ-मु ॥ ९३८. १७ **प्रेरितेन त्वया**—§। प्रेरितेन-मॅ-मु ॥ ९३९. १९ **विदीपयथः**—ग-घ-ज-श-*मॅ-मु ॥

९४०. १४ आत्मेव ज्ञाता—ख-च-ञ-ण-न-भ-य-र-श । आत्मेव ज्ञाता—मे-मु ॥ ९४१. १६ नोऽस्माकम्—ख-च-ञ-ण-त-न-भ-र । नोऽस्मभ्यम्—य-मॅ-मु ॥ ९४१. २४ युवाभ्यां धृतमन्नं च—ग-घ-ज-र-श । युवाभ्यां धृतं धनमन्नं च—ख-च-ञ-ण-न-भ-य । धृवाभ्यां धृतं बलमन्नं च—मु । अयमेव समीचीनः पाठः ॥ ९४२. १० अर्चनानस्सं.....युवाम—ग-घ-ज । मॅ-मु-पुस्तकयोरेतन्नास्ति ॥

९४२. २० यश्च । 'यस्य' इत्यस्य स्थाने 'यश्च' इति भाष्यकारेण पठितम् ॥ ९४३. २० सुचेतुना । मूले 'सु चेतुना' इति भिन्ने पदे ॥

९४६. १५ आह्वयामः—मॅ-मु । आह्वयामि—ख-च-ञ-ण-न-भ-य-र; आह्वयाम—ग-घ-ज ॥

९४८. १ उदकस्पर्शस्य कर्तारः—न । उदकस्पर्शत्वस्य कर्तारः—मॅ । उदकस्पृशत्वस्य कर्तारः—य-मु ॥ ९४८. १२ अनाङ्क्षानान—न-मॅ-मु ॥

९४९. २३ दानमुचितायाः—न । दानमुचितायाः—ख-च-ञ-ण-न-भ-ग-र । दातृपूचितायाः—ग-घ-ज-श-मॅ-मु ॥ ९४९. २३ महानुभावौ—मॅ-मु । महानुभावौ युवाम्—§ ॥

९५२. ५ रुद्राद्भिः—ञ-मॅ-मु ॥ ९५२. १० त्रायेथां पालयेथाम—ख-च-ञ-ण-न-भ-य-मु । त्रायेथां पालयेतम्—मॅ ॥ ९५६. १५ सुखमपेक्षते—ख-च-ण-न-भ । सुखपेक्षते—ञ; सुमुक्षते-त; सुखमुपेक्षते—य-र; सुखमुक्षत—श । सुखमुक्षते ?—मे-मु ॥ ९५१. ८ द्रवणीयौ—य-मॅ-मु । द्रावणीयौ—त ॥

९५८. १४ अथवा—मे-मु-× ॥ ९५८.२३ तिष्ठतः—मे । तिष्ठथः—§-मु ॥ ९५९.८ कस्य चन—भ-य । कस्य वचन—ञ; कस्य न—ण । कस्य च—मे-मु ॥ ९५९.१७ युवाम्—मॅ । युवाम् । ईमिति पूरणः—ख-च-ञ-ण-न-भ-र-श-मु; युवाम् । हि पूरणः—ग-घ-ज ॥ ९६१. २ बहूनपि—घ । बहून्यपि ?—मे-मु ॥ ९६१. ५ उक्तलक्षणाश्विनौ रथस्य । ? (उक्तलक्षणस्याश्विनौ रथस्य) ॥ ९६१. ११ युवाभ्याम् । ? (युवयोः) ॥ ९६३. १२ मृगो मृगयिता—मॅ । मृगो मृगयितः—मु ॥

९६४. ६ अश्विना अश्विनौ—ग-घ-ज-मु । अश्विना—य । अश्विनौ—मॅ ॥ ९६५. १ अश्विना अश्विनौ—ख-च-ञ-ण-त-न-भ-र । अश्विना—मे-मु ॥

९६६. ५ हिंस्ताम—ग-घ-ज-मॅ-मु ॥ ९६६.१८ पञ्चदशभ्या समानाः—मॅ । पञ्चदशधेति समानाः—मु । लिखितपुस्तकेषु अशुद्धाः पाठाः ॥ ९६६.१९ दोहभूमिम्—ख-च-ञ-ण-न-भ-य-र-श । दोहनभूमिम्—म-मु ॥ ९६७. १२ अपां कारणात्—मॅ-मु । अपः करणात्—ख-च-ण-त-न-र; अपः कारणात्—ग-घ-ज-ञ-भ-य; अप करणात्—श ॥

९६८. ५ यज्ञं गन्तारौ—ख-ग-घ-च-ज-ण-न-श । यज्ञगन्तारौ—ञ-भ-य-र-मॅ-मु ॥ ९६९. ४ दुर्गमनान् मार्गान्—ग-घ-ज-मे । दुर्गमनान् मार्गान् वा—ख-च-ञ-ण-त-न-भ-य-र-श । पापानि दुर्गमनान् मार्गान् वा—मु ॥ ९६९. ११ पालयेत—ग-घ-ज-श-मॅ-मु ॥

९७०. ७ तौ यथा—मॅ-मु-× ॥ ९७१. ८ निर्मथिष्यन्ति—मॅ-मु । निर्मन्थिष्यन्ति—ख-च-ण; निर्मन्थिष्यन्ति—ञ-त-भ-र; निर्गमिष्यन्ति—न; निर्मिमिष्यन्ति—ग-घ-ज-श ॥ ९७२. १७ जरया सहितः पतेत्—ख-भ । जरया सहितः पतेत्—च-ण; जरयासूततः पतेत्—ञ-य-र; जरयागततः पतेत्—न; जरायुक्तः पतेत्—श । जरायुजस्ततः पतेन ?—मॅ । जरायुयुज आपत—मु ॥

९७३. २० उच्छी विवासे—मॅ-मु। व्युच्छी विवासे—ख-च-ण; उछी विवासे—अ-न-भ-य-र-श ॥ ९७४. २१ यच्चिद्धीत्यत्र—ख-च-ण-श। यद्यद्धीत्यत्र—य। यद्धीत्यत्र—मॅ-मु॥ ९७६. २ मा तनुथाः मा कृथाः—ख-च-ण-न-भ-य। मा तनुथाः—मॅ-मु ॥

९७६. १३ अत्रानुक्रमणिका—अ-न-भ-य-र-श-मु। तत्रानुक्रमणिका—मॅ ॥ ९७७. २१ प्रथममध्यमयोः स्थानयोः—ख-च-अ-ण-त-न-भ-य-र-मु। प्रथममध्यमयोः—मॅ ॥

९८१. १५ असुरादयः—°मॅ-मु। सुरादयः—§ ॥ ९८३. १ स हि सर्वात्मा—न। स हि सर्वात्मत्वात्—त-भ। तं हि सर्वात्मत्वात्?—मॅ-मु ॥ ९८३. १८ प्र सुवाति च—ख-च-अ-ण-त-न-भ-य-र-श-मु। प्र सुवाति—मॅ॥ ९८३. १९ वृणीमह इति—§-मु। वृणीमह इत्यर्थः—मॅ ॥

९८७. २० °स्तोमे चैषा—°मॅ। °स्तोमेत्येषा—अ-त-र-श-मु। °स्तोमेऽप्येषा—न। °स्तोमे ह्येषा—भ ॥ ९८८. १ प्रत्यक्षा देवतापि च—ख-च-अ-ण-न-भ-य-श-मु। प्रत्यक्षदेवतापि च—मॅ ॥

९८९. ८ चैतन्नामकाय—ख-च-अ-ण-न-भ-य-र। एतन्नामकाय—मॅ-मु ॥ ९८९. २३ ध्यायति—न-श-मु। ध्याययति—मॅ ॥ ९९२. ५-६ ते दीवि न—ख-च-ण-त-भ-य-श। न दीवि न—मॅ-मु ॥

९९३. २ अन्नेषु वा—°मॅ-मु। अन्नेषु—§ ॥ ९९३. १० द्रुमविकारेण—ख-च-अ-ण-त-न-भ-य-र-श। द्रुविकारेण—मॅ-मु ॥ ९९३. ११ आवरकमेघहननाय—मॅ-मु। आवरकमेघे हननाय—ख-अ-भ-य; आवरमेघे हननाय—च-ण ॥ ९९३. ११ प्रतीषते प्रतिगच्छतः—°मॅ-मु। भवति ईषते अभिगच्छति—ख-च-अ-ण-न-भ-य-र; प्रतिगच्छतः। आ पूरणः—ग-घ-ज; प्रतिगच्छति—श ॥ ९९३. २५ मर्तेव। 'मर्ताय' इत्यस्य स्थाने 'मर्तेव' इति भाष्यकारेण पठितम् ॥

९९५. २१ बृहतः महतः—ख-च-अ-ण-भ-य। बृहतः—मॅ-मु ॥ ९९५. २२ सुशुक्रानः। मूले 'सुशुक्रानः' इति ॥ ९९६. ७ विस्तीर्णक्रमणः—मॅ-मु। विस्तीर्णक्रमणः—§ ॥ ९९६. २० द्वितीयायाः लुक्—ख-च-ण-भ-मु। द्वितीयालुक्—मॅ ॥ ९९७. १७ ते मरुतः—§-मु। हे मरुतः—मॅ ॥

॥ ऋग्वेदसंहिता ॥

श्रीमन्मायणाचार्यविरचितभाष्यसमेता

२-५ मण्डलानि

ॐ

ऋग्वेदसंहिता

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

॥ अथ द्वितीयं मण्डलम् ॥

शतर्चिनां प्रथमं मण्डलं व्याख्यातम् । अथ गार्त्समदं द्वितीयं मण्डलं व्याख्यायते । 'त्वमग्ने द्युभिः' इत्यादिकं द्वितीयं मण्डलम् । चत्वारोऽनुवाकाः । तेषु प्रथमेऽनुवाके एकादश सूक्तानि । तत्र 'त्वमग्ने द्युभिः' इति षोडशर्चं प्रथमं सूक्तम् । मण्डलद्रष्टा गृत्समद ऋषिः । स च पूर्वम् आङ्गिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकालेऽसुरैर्गृहीत इन्द्रेण मोचितः । पश्चात् तद्वचनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामा अभूत् । तथा चानुक्रमणिका–'य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्समदो द्वितीयं मण्डलमपश्यत्' इति । तथा तस्यैव शौनकस्य वचनम् ऋष्यनुक्रमणे–'त्वमग्न इति गृत्समदः शौनको भृगुतां गतः । शौनहोत्रः प्रकृत्या तु[1] य आङ्गिरस उच्यते' इति । तस्मान्मण्डलद्रष्टा शौनको गृत्समद ऋषिः । जगती छन्दः । मण्डलादिपरिभाषया आग्नेयम् । अत्रानुक्रमणिका–'त्वमग्ने जागतं तु' इति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसि इदमादिसूक्तद्वयस्य विनियोगः । 'त्वमग्ने द्युभिरिति सूक्ते' (आश्व. श्रौ. ४. १३) इति सूत्रितत्वात् ॥ उपाकरणोत्सर्जनयोरपि[2] आद्या विनियुक्ता ॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ १ ॥

त्वम् । अग्ने । द्युऽभिः । त्वम् । आशुशुक्षणिः । त्वम् । अत्ऽभ्यः । त्वम् । अश्मनः । परि । त्वम् । वनेभ्यः । त्वम् । ओषधीभ्यः । त्वम् । नृणाम् । नृऽपते । जायसे । शुचिः ॥ १ ॥

हे [v]अग्ने अग्रणीत्वादिगुणविशिष्ट हे [v]नृणां [v]नृपते । नृणां मनुष्याणां मध्ये ये नरा यष्टारः सन्ति तेषां विशेषेण पालयितः । यद्वा उभाभ्यां पदाभ्यां बहुत्वं नित्यस्वामित्वं च प्रतिपाद्यते[3] । सर्वेषामपि नराणां नित्यपालकेत्यर्थः ॥ नृणामित्यस्य निघाताभावश्छान्दसः ॥ तादृश हे देव [v]त्वं [v]द्युभिः यागदिवसैर्निमित्तभूतैः [v]जायसे यागार्थं मथनेन[4] उत्पद्यस इत्यर्थः । यद्वा । तादृशैर्दिवसैः सहितो जायसे । तत्तद्यागदिवसेषु प्रसिद्धः[5] भवसीत्यर्थः । तथा [v]त्वम् [v]आशुशुक्षणिः जायसे आ सर्वतो

१. ण-ण१-न-व– नु । २. म–उपाकर्मोत्सर्जनयोरपि । ३. ण–प्रतिपद्येते । ४. ण१-म- मन्थनेन । ५. क-ङ-ङ१-म–प्रवृद्धः ।

दीप्यमानो भवसि ॥ आङ्युपपदे ' शुच दीप्तौ ' इत्येतस्य सनन्तस्य छान्दसमिदं रूपम् । यद्वा । आशु शीघ्रं शुच् दीप्तः सन् यतः संसेध्यते इति । आशु शुचं शोकं सनोति ददाति शत्रुभ्यो दाहादिना इत्याशुशुक्षणिः ॥ तादृशो भवसि । एवं सर्वत्र प्रतिविशेषणं जायस इति योज्यम् । हे अग्ने [v]त्वम् [v]अद्भ्यः वृष्ट्युदकेभ्यो जायसे वैद्युतरूपेण वाडवरूपेण वा समुद्रोदकेभ्यः । [v]अश्मनः मेघात्पाषाणाद्वा [v]परि जायसे । ' यो अश्मनोरन्तरग्निं जजान ' (ऋ. सं. २. १२. ३) इति हि मन्त्रान्तरम् । [v]त्वं [v]वनेभ्यः वृक्षादिसमूहेभ्यो दावरूपेण । [v]त्वम् [v]ओषधीभ्यः वैश्वानररूपेण[1] । एवं महानुभावस्त्वं मथनेनोत्पन्नः सन् सर्वात्मको भवसीत्यर्थः । [v]शुचिः एव जायसे । यद्वा । शुचिः आदित्यरूपः[2] जायस इत्यर्थः । अत्र ' त्वमग्ने द्युभिरहोभिः ' (निरु. ६. १) इत्यादि निरुक्तमनुसंधेयम् ।

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्टूं त्वमग्निदायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥ २ ॥

तव । अग्ने । होत्रम् । तव । पोत्रम् । ऋत्वियम् । तव । नेष्टूम् । त्वम् । अग्नित् । ऋतऽयतः ।
तव । प्रऽशास्त्रम् । त्वम् । अध्वरिऽयसि । ब्रह्मा । च । असि । गृहऽपतिः । च । नः । दमे ॥२॥

हे [v]अग्ने [v]होत्रं होतुः कर्म शस्त्रयाज्यादिलक्षणं यदस्ति तदपि [v]तव एव स्वदर्थमित्यर्थः । तथा [v]पोत्रं पोतुः कर्म यदस्ति तदपि [v]तव एव । तथा [v]ऋत्वियं प्रातःकालमार्त्विज्यं तवैव । [v]नेष्टूं नेष्टुः कर्म प्रस्थितयाज्यादिरूपं [v]तव । हे अग्ने [v]त्वम् [v]अग्नित् आग्नीध्रश्च त्वमेवासि । तथा [v]ऋतायतः यज्ञमिच्छतः [v]तव एव [v]प्रशास्त्रं यत्प्रशास्तुर्मैत्रावरुणस्य कर्म तत् । हे अग्ने [v]त्वम् [v]अध्वरीयसि अध्वरं यज्ञं कामयसे । अध्वर्युर्भवसीत्यर्थः । तथाध्वर्युशब्दव्युत्पत्तेः । ' अध्वर्युरध्वरयुरध्वरं कामयत इति वा ' (निरु.१.८) इति हि निरुक्तम् । तथा [v]ब्रह्मा ब्राह्मणाच्छंस्यपि[3] [v]असि । तथा [v]नो [v]दमे अस्मद्यज्ञगृहे [v]गृहपतिश्च असीति ॥

त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।
त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या ॥ ३ ॥

त्वम् । अग्ने । इन्द्रः । वृषभः । सताम् । असि । त्वम् । विष्णुः । उरुऽगायः । नमस्यः ।
त्वम् । ब्रह्मा । रयिऽवित् । ब्रह्मणः । पते । त्वम् । विधर्तरिति विऽधर्तः ।
सचसे । पुरम्ऽध्या ॥ ३ ॥

हे [v]अग्ने [v]त्वं यतः [v]सतां [v]वृषभः वर्षिता [v]असि अतः [v]इन्द्रः असि । यद्वा । सतां साधूनाम् इन्द्रोऽसि । कामानां वर्षितासि । [v]त्वं [v]विष्णुः असि । यतः [v]उरुगायः बहुभिर्गीयमानः [v]नमस्यः नमस्कार्यश्च भवसि । हे [v]ब्रह्मणस्पते परिवृढस्य कर्मणो मन्त्रस्य वा पालयितः [v]त्वं यतः [v]रयिवित्

१ क-ङ१-म-त्रीत्यादिभ्यो वैश्वानररूपेण । २. त-म-व-आदित्यरूपेण । ३. क-ण-ण१-न-व-ब्राह्मणाच्छन्दस्यपि ।

गवादिधनस्य वेत्ता अतः ᵛब्रह्मा असि। हे ᵛविधर्तः विविधकारक वैश्वानररूपाग्ने ᵛपुरंध्या बहुप्रकारया[1] बुद्धया ᵛसचसे सह वर्तसे सर्वदा बुद्धया स्तूयस इत्यर्थः ॥

त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः।
त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ॥ ४ ॥

त्वम्। अग्ने। राजा। वरुणः। धृतऽव्रतः। त्वम्। मित्रः। भवसि। दस्मः। ईड्यः।
त्वम्। अर्यमा। सत्ऽपतिः। यस्य। सम्ऽभुजम्। त्वम्। अंशोः। विदथे। देव। भाजयुः॥४॥

हे ᵛअग्ने ᵛत्वं यतः ᵛधृतव्रतः धारितकर्मासि अतः ᵛवरुणः ᵛराजा असि। यतः ᵛदस्मः शत्रूणामुपक्षपयिता ᵛईड्यः स्तुत्यश्च अतः ᵛमित्रः एतन्नामको देवोऽसि। यतः ᵛसत्पतिः सतामभिमतप्रदानेन पालयिता अतः ᵛअर्यमा ᵛभवसि। दातृत्वं च अर्यम्णो लिङ्गम्। अर्यमेति तमाहुर्यो ददातीति। ᵛयस्य अर्यम्णः दानं ᵛसंभुजं संततभुजं[2] व्यापकं[2] भवति। यद्वा। यस्य धनं संभुजं सम्यक् भोगाय साधु ग्रहीतृणाम्। तथा ᵛत्वम् ᵛअंशः सूर्यमूर्त्यन्तरभूत एतन्नामको देवोऽसि। तादृश हे ᵛदेव ᵛविदथे अस्मदीये यज्ञे ᵛभाजयुः फलानां भाजयिता प्रापयितासि ॥

त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्रावो मित्रमहः सजात्यम्।
त्वमाशुहेमा रारिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥ ५ ॥

त्वम्। अग्ने। त्वष्टा। विधते। सुऽवीर्यम्। तव। ग्रावः। मित्रऽमहः। सऽजात्यम्।
त्वम्। आशुऽहेमा। ररिषे। सुऽअश्व्यम्। त्वम्। नराम्। शर्धः। असि। पुरुऽवसुः ॥५॥

हे ᵛअग्ने ᵛत्वष्टा फलस्य साधु संपादयिता ᵛत्वं ᵛविधते परिचरते जनाय ᵛसुवीर्यं शोभनवीर्यं धनम्। तद्धेतुर्भवसि। ᵛग्रावः याः स्तुतिवाचः सन्ति ताः ᵛतव स्वभूताः। हे ᵛमित्रमहः हितकारितेजः ᵛसजात्यम् अस्माकं बान्धवं भजस इत्यर्थः। हे अग्ने ᵛआशुहेमा आशु प्रेरयिता ᵛत्वं ᵛस्वश्व्यं शोभनाश्वसमूहोपेतं फलं ᵛररिषे ददासि। हे अग्ने ᵛपुरूवसुः प्रभूतधनः ᵛत्वं ᵛनरां नराणां ᵛशर्धः बलस्थानीयः ᵛअसि ॥ ॥ १७ ॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥ ६ ॥

त्वम्। अग्ने। रुद्रः। असुरः। महः। दिवः। त्वम्। शर्धः। मारुतम्। पृक्षः। ईशिषे।
त्वम्। वातैः। अरुणैः। यासि। शम्ऽगयः। त्वम्। पूषा। विधतः। पासि। नु। त्मना ॥६॥

१. व–बहुप्रजाकारया। २. थ–संभुजव्यापकम्; क-म-व–सततभुजव्यापकम्; ण-न–सततं भुजव्यापकम्।

हे [v]अग्ने [v]त्वं [v]महो [v]दिवः महतो द्युलोकात्। उपलक्षणमेतत्। लोकत्रयात्। [v]असुरः शत्रूणां निरसिता [v]रुद्रः असि। रुद्रुःखं दुःखहेतुर्वा पापादिः। तस्य द्रावयिता एतन्नामको देवोऽसि। 'रुद्रो वा एष यदग्निः' (तै. सं. ५. ४. ३.१) इत्यादिष्वग्नेः रुद्रशब्देन व्यवहारात्। यद्वा। त्वं रुद्रः। रौति मामनिष्टा नरा दुःखे पतिष्यन्तीति रुद्रः। तादृशोऽसि। 'रुद्रो रौतीति सतः' (निरु. १०. ५) इति हि निरुक्तम्। तथा महो महतो द्युलोकस्य संबन्धी असुरोऽसि। असुर्बलम्। तस्य दाता आदित्यरूपश्च त्वमसि। अग्नेर्द्युलोकसंबन्ध्यसुरत्वम् 'उत वा दिवो असुराय मन्म' (ऋ. सं. ५.४१.३) इत्यादिषु। तथा [v]त्वं [v]मारुतं [v]शर्धः मरुत्समूहरूपं बलमसि। वायुरूपश्च त्वमसीत्यर्थः। एवम् अग्न्यादित्यवायुरूपस्त्वम्। [v]पूक्षः अन्नस्य हविर्लक्षणस्य त्वम् [v]ईशिषे ईश्वरो भवसि। यस्मादेवं तस्मात् [v]त्वं [v]वातैः वायुसदृशैः [v]अरुणैः अरुणवर्णैरश्वैः [v]शंगयः सुखस्य गृहरूप आवासभूतः सन् [v]यासि प्राप्नोषि यागगृहम्। यद्वा। अरुणैर्गमनशीलैर्वातैर्वायुभिः नुन्नः[1] सन् यासि वने। तथा [v]त्वं [v]पूषा सर्वस्य पोषकः[2] सन् [v]नु क्षिप्रं [v]त्मना आत्मना अनुग्रहरूपया स्वबुद्ध्यैव[3] [v]विधतः परिचरतो यजमानान् [v]पासि[4] ॥

त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥ ७ ॥

त्वम्। अग्ने। द्रविणःऽदाः। अरम्ऽकृते। त्वम्। देवः। सविता। रत्नऽधाः। असि।
त्वम्। भगः। नृऽपते। वस्वः। ईशिषे। त्वम्। पायुः। दमे। यः। ते। अविधत् ॥ ७ ॥

हे [v]अग्ने [v]त्वम् [v]अरंकृते त्वामलंकुर्वते यजमानाय [v]द्रविणोदाः हिरण्यस्य[5] दाता असि। [v]देवः द्योतमानः [v]सविता[6] सर्वस्य सत्कर्मसु प्रेरकः [v]त्वं [v]रत्नधाः रमणीयानां धनानां मणिमुक्तादीनां धारयिता [v]असि। तथा हे [v]नृपते नृणां पालकाग्ने [v]त्वं [v]भगः भजनीयः सन् [v]वस्वः वसुनः धनस्य [v]ईशिषे समर्थो भवसि दातुम्। [v]यः यजमानः [v]दमे यज्ञगृहे [v]ते त्वाम् [v]अविधत् परिचरति तस्य [v]पायुः पालकः [v]त्वम् असि ॥

त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥ ८ ॥

त्वाम्। अग्ने। दमे। आ। विश्पतिम्। विशः। त्वाम्। राजानम्। सुऽविदत्रम्। ऋञ्जते।
त्वम्। विश्वानि। सुऽअनीक। पत्यसे। त्वम्। सहस्राणि। शता। दश। प्रति ॥ ८ ॥

हे [v]अग्ने [v]विश्पतिं यजमानानां पालकं [v]त्वां [v]विशः यजमानाः [v]दमे स्वर्काये यज्ञगृहे [v]आ आसादयन्ति ॥ उपसर्गवशाद्योग्यक्रियाध्याहारः ॥ तथा कृत्वा [v]राजानं दीप्यमानं [v]सुविदत्रं शोभनज्ञानम् अस्मदनुकूलचेतस्कं सुधनं वा [v]त्वाम् [v]ऋञ्जते प्रसाधयन्ति ॥ 'ऋञ्जतिः प्रसाधनकर्मा' इति

---

१. च-ण१-व-उत्पन्नः। २. ण-त-न-म-त्र१-पोषणः। ३. क-म-सुबुद्ध्यैव। ४. क-ङ्ग१-पासि रक्षसि। ५. थ-ब-हिरण्यदाता। ६. म-सविता सर्वस्य प्रसविता।

यास्कः ॥ यत एवं ततो हे ᵛस्वनीक शोभनज्वालारूपसेन ᵛत्वं ᵛविश्वानि सर्वाणि । हवींषीति शेषः ॥ षष्ठ्यर्थे द्वितीया ॥ विश्वेषां हविषाम् आज्यसोमपुरोडाशादीनां ᵛपत्यसे ईश्वरो भवसि ॥ ईश्वरनामैतत् । ' इरज्यति पत्यते ' (नि. २. २१. २.) इति तन्नामसु पाठात् ॥ यद्वा पतिभावमाचरसि । ᵛत्वं तु ᵛसहस्राणि ᵛशता शतानि ᵛदश एतत्संख्याकानि ᵛप्रति । एतत्संख्याकानामभिमतसाधनानां प्रतिनिधिरित्यर्थः ॥ ' प्रतिः प्रतिनिधिप्रतिदानयोः' (पा. सू. १. ४. ९२) इति कर्मप्रवचनीयत्वम् । तैर्यत्फलं भवति तत्त्वया लभ्यत इत्यर्थः ॥

त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥ ९ ॥

त्वाम् । अग्ने । पितरम् । इष्टिऽभिः । नरः । त्वाम् । भ्रात्राय । शम्या । तनूऽरुचम् ॥
त्वम् । पुत्रः । भवसि । यः । ते । अविधत् । त्वम् । सखा । सुऽशेवः ।
पासि । आऽधृषः ॥ ९ ॥

हे ᵛअग्ने ᵛपितरं पालकं ᵛत्वां ᵛनरः नेतारो यजमानाः ᵛइष्टिभिः एषणसाधनैर्यागैर्यजन्त इति शेषः । पितृवत्पालनाय यजन्त इत्यर्थः । तथा ᵛतनूरुचं शरीराणां दीपकं शरीरेषु दीप्यमानं वैश्वानरात्मना ᵛत्वां ᵛभ्रात्राय भ्रातृत्वाय सौभ्रात्राय ᵛशम्या ॥ कर्मनामैतत् ॥ कर्मणा यजन्त इति शेषः । यद्वा । उभयत्र वक्ष्यमाणेन ' अविधत् ' इत्यनेन संबन्धः । हे अग्ने ᵛयः नरः ᵛते त्वाम् ᵛअविधत् परिचरति तस्य ᵛत्वं ᵛपुत्रो ᵛभवसि पुत्रवत्पालयिता भवसि । तथा ᵛत्वं ᵛसखा समानख्यानः सखिवद्धितकारी ᵛसुशेवः ॥ शेवमिति[1] सुखनाम ॥ सुष्ठु सुखकारी सन् ᵛआधृषः आधर्षकात्मा ᵛपासि रक्षसि । पितृत्वकामाय पितृत्वेन भ्रातृत्वकामाय भ्रातृत्वेन पुत्रत्वकामाय[2] पुत्रस्थानीयो भवसि । त्रिप्रकारेण रक्षसीत्यर्थः ॥

त्वमग्न ऋभुराके नमस्यस्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥ १० ॥

त्वम् । अग्ने । ऋभुः । आके । नमस्यः । त्वम् । वाजस्य । क्षुऽमतः । रायः । ईशिषे ।
त्वम् । वि । भासि । अनु । धक्षि । दावने । त्वम् । विऽशिक्षुः । असि । यज्ञम् । आऽततनिः ॥ १० ॥

हे ᵛअग्ने ᵛत्वम् ᵛऋभुः । उरुभासमानो मेधावी वा । त्वम् ᵛआके अन्तिके संनिधावेव ᵛनमस्यः नमस्कार्यः । स्तुत्य इत्यर्थः । इतरदेवतावत् मन्त्रप्रतिपाद्याकारेण[3] स्तुत्यो न भवसि किंतु प्रत्यक्ष इत्यर्थः । तथा ᵛत्वं ᵛक्षुमतः शब्दवतः सर्वत्र श्रूयमाणस्य ᵛवाजस्य अन्नस्य ᵛरायः धनस्य च ᵛईशिषे स्वामी भवसि । अतस्तद्देहीत्यर्थः । हे अग्ने ᵛत्वं ᵛवि ᵛभासि विशेषेण दीप्यसे । तदर्थम्

१. त-वा–शेव इति । २. ण-त-न–पुत्रकामाय । ३. क-ख-च-झ१-ण१–मन्त्रप्रतिपाद्यत्वाकारेण ।

अनुक्रमेणैव ᵛधक्षि दहसि काष्ठादीन्[1] ॥ दहेर्लेटि सिपि रूपम् । संहितायां भष्भावाभाव॰छान्दसः ॥ किमर्थमेवम् । ᵛदावने छेदनायान्धकारस्य । यद्वा । हविषो दानवते यजमानाय वा । किंच ᵛत्वं ᵛयज्ञं ᵛविशिक्षुः विशेषेण शिक्षयिता[2] साधयिता[2] ᵛअसि॥ ' न लोकाव्यय॰' (पा. सू. २. ३. ६९) इति षष्ठ्या निषेधः ॥ तथा ᵛआतनिः फलस्य सर्वतो विस्तारयिता ॥ ॥ १८ ॥

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥ ११ ॥

त्वम् । अग्ने । अदितिः । देव । दाशुषे । त्वम् । होत्रा । भारती । वर्धसे । गिरा ।
त्वम् । इळा । शतऽहिमा । असि । दक्षसे । त्वम् । वृत्रऽहा । वसुऽपते । सरस्वती ॥ ११ ॥

हे ᵛअग्ने ᵛदेव ᵛत्वं ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛअदितिः अखण्डयिता परिपालयितासि। यद्वा । अदीना भूमिरसि । किंच ᵛत्वं ᵛहोत्रा होमनिष्पादिका ᵛभारती भरतस्य आदित्यस्य[3] आदित्यसंबन्धिनी[3] रश्मिरूपा सती ᵛगिरा स्तुत्या ᵛवर्धसे प्रवृद्धो भवसि । किंच ᵛत्वं ᵛशतहिमा । हिमशब्दः कालोपलक्षकः । अपरिमितकाला नित्या ᵛइळा भूमिः ᵛअसि । तादृशी सती ᵛदक्षसे दानाय समर्था[4] भवसि॥ निङ उत्तरत्वादनिघातः ॥ तथा हे ᵛवसुपते धनपालक ᵛवृत्रहा पापादेर्हन्ता ᵛत्वं ᵛसरस्वती सरणवान् वायुः । तत्संबन्धिनी एतन्नियामिका माध्यमिकासि । आदित्याग्निवायूनां संबन्धिन्यो भारतीळासरस्वत्याख्या यास्तिस्रो देव्यः सन्ति ता अपि त्वमेवेत्यर्थः ॥

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥

त्वम् । अग्ने । सुऽभृतः । उत्ऽतमम् । वयः । तव । स्पार्हे । वर्णे । आ । सम्ऽदृशि । श्रियः ।
त्वम् । वाजः । प्रऽतरणः । बृहन् । असि । त्वम् । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥

हे ᵛअग्ने ᵛत्वं ᵛसुभृतः सुष्ठु पोषितः सन् ᵛउत्तमं निरतिशयं ᵛवयः अन्नमायुष्यं वा त्वमसि तत्संपादकोऽसीत्यर्थः । तथा ᵛतव ᵛस्पार्हे स्पृहणीये ᵛवर्णे लोहितशुक्लादिलक्षणे ᵛसंदृशि सम्यग्दर्शनीये ᵛश्रियः ऐश्वर्याणि कान्तयो वा ᵛआ आश्रित्य वर्तन्ते ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ किंच ᵛत्वं ᵛवाजः अन्नम् । तत्साधकत्वात्तच्छब्द्यम् । अन्नसाधक इत्यर्थः । ᵛप्रतरणः प्रतारयिता पापात्[5] । अत एव ᵛबृहन् महान् ᵛअसि । तथा ᵛत्वं ᵛरयिः धनरूपोऽसि । ᵛबहुलः सर्वविषयबाहुल्योपेतः ᵛविश्वतः[6] ᵛपृथुः विस्तीर्णः प्रख्यात इत्यर्थः ॥

१ त–काषादीन्; थ–कामादीन् २. म–शिक्षयिता शोधयिता; ण-न–क्षिपयिता साधयिता; व–क्षेपयिता साधयिता । ३. क-ज्ञ१–आदित्यस्य संबन्धिनी । ४. ख-म-समर्थः । ५. त-थ-न-व–पातात् । ६. ज्ञ१–विश्वतः सर्वतः ।

त्वामग्न आदित्यास आस्यं१त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु साश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥ १३ ॥

त्वाम् । अग्ने । आदित्यासः । आस्यम् । त्वाम् । जिह्वाम् । शुचयः । चक्रिरे । कवे ।
त्वाम् । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इति । देवाः । हविः । अदन्ति । आऽहुतम् ॥ १३ ॥

हे [v]अग्ने [v]त्वाम् [v]आदित्यासः अदितेः पुत्रा इन्द्रादयः [v]आस्यं स्वकीयं मुखं भक्षणपानादिसाधनं चक्रिरे इति वक्ष्यमाणेन संबन्धः । तथा हे [v]कवे क्रान्तप्रज्ञ [v]त्वाम् एव [v]शुचयः शुद्धा दीप्ता वा देवाः [v]जिह्वां स्वकीयजिह्वास्थानीयम् आस्वादनसाधनं [v]चक्रिरे । त्वन्मुखेनैव भक्षयन्ति त्वज्जिह्वयैव आस्वादयन्तीत्यर्थः । तथा [v]त्वाम् एव [v]रातिषाचः । रातिर्दानं दत्तं हविरादि धनं वा । तेन समवेता देवाः [v]अध्वरेषु यज्ञेषु [v]सश्चिरे सेवन्ते त्वामेव प्रतीक्षन्ते विना त्वया स्वेषां[1] हविर्भक्षणायोगात् । एवं कृत्वा [v]त्वे त्वयि [v]देवाः सर्वे [v]आहुतं सर्वतो दत्तं [v]हविरदन्ति भक्षयन्ति । एवं सर्वदेवोपकारिणं महानुभावं स्तौमीत्यर्थः ॥

त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥ १४ ॥

त्वे इति । अग्ने । विश्वे । अमृतासः । अद्रुहः । आसा । देवाः । हविः । अदन्ति । आऽहुतम् ।
त्वया । मर्तासः । स्वदन्ते । आऽसुतिम् । त्वम् । गर्भः । वीरुधाम् । जज्ञिषे । शुचिः ॥ १४ ॥

हे [v]अग्ने [v]त्वे त्वयि [v]विश्वे सर्वे [v]अमृतासः अमरणधर्माणः [v]अद्रुहः अद्रोग्धारः [v]देवाः [v]आसा त्वदीयेन आस्येन [v]आहुतं [v]हविरदन्ति भक्षयन्ति । आस्यशब्दस्य तृतीयैकवचने 'पद्दन्नोमास्°' इत्यादिना आसन्नादेशः । 'ऊडिदंपदादि°' इति विभक्तेरुदात्तत्वम् । तथा [v]मर्तासः मनुष्या अपि [v]त्वया साधनभूतेन [v]आसुतिं रसरूपमन्नादिकं [v]स्वदन्ते आस्वादयन्ति । [v]त्वम् एव [v]वीरुधां लतादीनां [v]गर्भः गर्भस्थानीयः तेषां मध्येऽवस्थानात् । वसुः सर्वेषां निवासभूतः सन् [v]जज्ञिषे । उत्पादयसि सस्याद्यन्नम् ॥

त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ १५ ॥

त्वम् । तान् । सम् । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे ।
पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु ।
द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

---

१. क-ञ१-म-तेषाम् ।

हे अग्ने [v]त्वं [v]मज्मना बलेन [v]तान् प्रसिद्धान् देवान् [v]सं [v]च [v]असि संगच्छसि । तैः सहितोऽपि भवसि । तथा सामर्थ्येन [v]प्रति [v]चासि । प्रत्येकं तैर्विभिन्नः प्रतिनिधिर्वा भवसि । प्रतिस्वीकारसमये तैः सहितो भवसि वियुक्तश्च भवसीत्यर्थः । हे [v]सुजात शोभनजनन । मन्त्रसहितमथनेन उत्पन्नत्वात् अग्नेः सुजन्मत्वम् । तादृश [v]अग्ने हे [v]देव [v]प्र [v]रिच्यसे [v]च । तैर्बलेन चाधिको भवसि । आधिक्ये कारणमाह । [v]यत् यस्मात् [v]अत्र अस्मिन् यज्ञे [v]पृक्षः सर्वमप्यन्नम् । व्यत्ययेन बहुवचनम् । [v]ते तवैव [v]वि [v]भुवत् समर्थं भवति [v]महिना माहात्म्येन । यतो महत्त्वमस्ति अत इत्यर्थः । कुत्रेति तदुच्यते । [v]रोदसी सर्वनिरोदनस्वभावे [v]उभे द्यावापृथिव्यौ [v]अनु । ते प्रति । तयोर्मध्ये व्याप्तमित्यर्थः । त्वयि हुतमन्नं त्वन्महत्त्वेन लोकत्रये व्याप्तमित्यर्थः ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माꣳश्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १६ ॥

ये । स्तोतृऽभ्यः । गोऽअग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ ।
बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥

अनया होता स्तुतिनिगमव्याजेन[1] अभिमतमाशास्ते । हे [v]अग्ने [v]सूरयः मेधाविनः प्रेरयितारो वा यजमानाः [v]स्तोतृभ्यः स्तुतिकर्तृभ्यः [v]गोअग्रां गावोऽग्रगामिन्यो यस्याः तादृशीं गोप्रमुखाम् [v]अश्वपेशसम् ॥ पेश इति रूपनाम ॥ अश्वेन निरूपणीयाम् । एतद्द्वयं प्राधान्याभिप्रायम् । गौश्च अश्वश्च अजाश्चेति दक्षिणापरिगणनेषु गवाश्वयोः प्राथम्यात् । तादृशीं [v]रातिम् [v]उपसृजन्ति ददते । [v]तान् यजमानान् [v]अस्मांश्च ऋत्विजः [v]वस्यः वसीयः श्रेष्ठं स्वर्गादिस्थानम् [v]आ सर्वतः [v]प्र[2] [v]हि [v]नेषि[2] प्रकर्षेण नयसि खलु । नयेत्यर्थः । हि प्रसिद्धौ । वयं च [v]सुवीराः शोभनपुत्रादिसहिताः [v]विदथे यज्ञे [v]बृहत् महन्मन्त्रजातं [v]वदेम उच्चारयामः स्तुम इत्यर्थः ॥ १९ ॥

'यज्ञेन वर्धत' इति त्रयोदशर्चं द्वितीयं सूक्तं मण्डलद्रष्टुर्गृत्समदस्यार्षम् । 'मण्डलादिष्वाग्नेयम्' इति परिभाषयाग्नेयम् । नुशब्दानुकर्षादिदमपि जागतम् । 'यज्ञेन सप्तोना' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसि अस्य विनियोगः । सूत्रं तु पूर्वसूक्ते एवोक्तम् । तथा चातुर्विंशिके तृतीयसवने जातवेदस्यनिविद्धानीयम्[3] इदम् । 'यज्ञेन वर्धतेत्याग्निमारुतम्' (आश्व. श्रौ. ७. ४) इति सूत्रितत्वात् । पृष्ठाभिप्लवपडहयोर्द्वितीयेऽहन्यपि जातवेदस्यनिविद्धानम्[4] इदम् । 'चातुर्विंशिकं तृतीयसवनम्' इति चतुर्विंशादतिदिष्टत्वात् ।

१. म–स्तुतिं निगमव्य । २. म–प्र णेषि हि; ख-ग१-न-व–प्र हि णेषि; न–प्र णहि षि; क–प्रणेषि । ३. ण-न-म– °निविद्धानम् । ४. ख-ग–°निविद्धानीयम् ।

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ॥ १ ॥

यज्ञेन । वर्धत । जातऽवेदसम् । अग्निम् । यजध्वम् । हविषा । तना । गिरा ।
सम्ऽइधानम् । सुऽप्रयसम् । स्वःऽनरम् । द्युक्षम् । होतारम् । वृजनेषु । धूःऽसदम् ॥ १ ॥

हे यजमाना ऋत्विजो वा यूयं [v]जातवेदसं जातानां वेदितारं जातधनं जातप्रज्ञं वा [v]अग्निं [v]यज्ञेन यागेन [v]वर्धत प्रवर्धत[1]। सामान्येनोक्त्वा विशेषेणाह । [v]हविषा चरुपुरोडाशादिना [v]तना विस्तृतया [v]गिरा स्तुत्या च [v]यजध्वं पूजयध्वम् । कीदृशं तम् । [v]समिधानं समिध्यमानम् । [v]सुप्रयसं शोभनान्नम् । [v]स्वर्णरं स्वर्गे नेतव्या यजमाना यस्य तादृशम् । यद्वा स्वरिति सर्वपर्यायः । स्तुतीनां नेतारः स्तोतारः । बहुस्तोतारमित्यर्थः । [v]द्युक्षं दीप्तं द्युनिवासिनं वा । [v]होतारं होमसंपादकम् । [v]वृजनेषु बलेषु [v]धूर्षदं[2] बलस्य कर्तारमित्यर्थः । अग्निपाटवे सति शरीरं बलं[3] भवतीति प्रसिद्धम्[3] ॥

अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिवइवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥ २ ॥

अभि । त्वा । नक्तीः । उषसः । ववाशिरे । अग्ने । वत्सम् । न । स्वसरेषु । धेनवः ।
दिवःऽइव । इत् । अरतिः । मानुषा । युगा । आ । क्षपः । भासि । पुरुऽवार । सम्ऽयतः ॥२॥

हे [v]अग्ने [v]त्वा त्वां [v]अभि प्रति [v]नक्तीः रात्रीः [v]उषसः अहानि। सर्वासु रात्रिषु सर्वेष्वपि[4] अहःसु । यद्वा नक्तशब्दः सायंकालं लक्षयति सायंप्रातरग्निहोत्रस्य सद्भावात् । सर्वेषु कालेषु सायंप्रातःकालेषु वा [v]ववाशिरे आकांक्षन्ते यजमाना यष्टुम् । यद्वा अहानि रात्रयश्च त्वामेव कामयन्ते होतुम् । काले कर्मणश्चोदनात् कालानां कामनमुपचर्यते । तत्र दृष्टान्तः । [v]स्वसरेषु स्वयंसरणशीलेष्वहःसु सुखसरणाधिकरणेषु[5] गोष्ठेषु वा [v]धेनवः [v]वत्सं [v]न । वत्समिव । किंच हे [v]पुरुवार बहुभिर्वरणीयाग्ने [v]संयतः नियतस्त्वं [v]दिवइव द्युलोकस्येव [v]अरतिः । व्याप्तो विस्तृतः । तत्रत्यानां देवानां हविःप्रदानायैव सर्वत्र व्याप्त इत्यर्थः । [v]मानुषा मनुष्याणां[6] यजमानानां संबन्धीनि [v]युगा युगानि । युगशब्दः कालोपलक्षकः । प्रातरादिसवनानि । सर्वेषु सवनेषु ॥ अत्यन्तसंयोगे द्वितीया ॥ [v]क्षपः रात्रीः । सर्वासु रात्रिष्वपि [v]आ [v]भासि समन्ताद्दीप्यसे ॥

१. म–प्रवर्धयत । २. थ-म–धूर्षदं तम् । ३. म–शरीरस्य बलं भवति हि सिद्धम् । ४. क-ज-ण-१ म-ख–सर्वेषु । ५. व–सुखशरणाधिकरणेषु । ६. क-ण-न-म– मानुषाणाम् ।

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे ।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥

तम् । देवाः । बुध्ने । रजसः । सुऽदंससम् । दिवः पृथिव्योः । अरतिम् । नि । एरिरे ।
रथम्ऽइव । वेद्यम् । शुक्रऽशोचिषम् । अग्निम् । मित्रम् । न । क्षितिषु । प्रऽशंस्यम् ॥३॥

[v]तं प्रसिद्धम् उक्तगुणविशिष्टमग्निं [v]देवाः प्रसिद्धा व्यवहर्तार ऋत्विजो वा [v]रजसः रञ्जनात्मकस्य लोकस्य [v]बुध्ने मूले । पृथिव्यां वेद्यामित्यर्थः । तत्र [v]न्येरिरे नितरामीरयन्ति । व्यापारयन्ति स्वस्व-हविर्लाभाय । ऋत्विक्पक्षे स्तोत्रादिना नितरां गच्छन्ति भजन्ते । कीदृशमित्याह । [v]सुदंससं शोभनदर्शनं [v]दिवस्पृथिव्योः द्यावापृथिव्योः [v]अरतिम् । ईश्वरं गन्तारं व्याप्तं वा । [v]वेद्यम् । वेदो धनम् । तस्मै हितम् । [v]रथमिव । रथं यथा स्वाभिमतलाभाय आश्रयन्ते तद्वत् । यद्वा रथमिव प्राप्तिसाधनत्वेन वर्तमानं वेद्यं वेदितव्यम् । [v]शुक्रशोचिषं दीप्तवर्णम् [v]अग्निं [v]मित्रं[1] [v]न[1] सखिवत्कार्यसाधकम् । यद्वा आदित्यमिव । [v]क्षितिषु यागभूमिषु मनुष्येषु वा [v]प्रशंस्यं प्रकर्षेण स्तुत्यम् । एवं महानुभावमग्निं न्येरिर इति ॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥ ४ ॥

तम् । उक्षमाणम् । रजसि । स्वे । आ । दमे । चन्द्रम्ऽइव । सुऽरुचम् । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरम् । चितयन्तम् । अक्षऽभिः । पाथः । न । पायुम् ।
जनसी इति । उभे इति । अनु ॥ ४ ॥

[v]तं स्तुत्यतरं [v]रजसि अन्तरिक्षे [v]आ [v]उक्षमाणं सर्वतः सिञ्चन्तं वृष्टिजलं रजसि पृथिव्यां वेद्यां घृतादिना आसिच्यमानं[2] वा । [v]स्वे स्वकीये [v]ह्वारे विजने[3] [v]दमे यागगृहे [v]आ [v]दधुः आदधते । कीदृशं तम् । [v]चन्द्रमिव [v]सुरुचम् । चन्द्रमिति हिरण्यनाम । हिरण्यमिव शोभनदीप्तिम् । पश्चात् प्रवृद्धावस्थायां [v]पृश्न्याः [v]पतरं द्युलोकस्यान्तरिक्षस्य गन्तारम् । [v]अक्षभिः स्वकीयैर्ज्वालारूपैरवयवैः [v]चितयन्तं चेतयमानम् । [v]पाथो [v]न [v]पायुम् । उदकमिव रक्षकम् । [v]उभे [v]जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यौ [v]अनु व्याप्तम् । भूम्यां होमाधारत्वेन स्थित्वा हविष्प्रापणाय द्युलोकगामिनमिति भावः । एवंरूपमग्निमादधते ॥

१. क-ग्न१-म-मित्रमिव; व-मित्रं न मित्रमिव । २. म-अभिसिच्यमानम् । ३. म-वृजने ।

स होता विश्वं परिं भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥ ५ ॥

सः । होता । विश्वम् । परि । भूतु । अध्वरम् । तम् । ऊँ इति । हव्यैः । मनुषः । ऋञ्जते । गिरा ।
हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः । चितयत् । रोदसी इति । अनु ॥५॥

[v]सः अग्निः [v]होता होमनिष्पादकः सन् [v]विश्वं सर्वम् [v]अध्वरं यागं [v]परि [v]भूतु परितो भवतु[1] । [v]तमु तमेवाग्निं [v]हव्यैः हविर्भिः [v]गिरा स्तुत्या च [v]मनुषः मनुष्याः [v]ऋञ्जते प्रसाधयन्ति। ऋञ्जतिः प्रसाधनकर्मा । [v]हिरिशिप्रः हरणशीलहनुर्दीप्तोष्णीषो वा । 'शिप्राः शीर्षसु विदता हिरण्ययीः' (ऋ. सं. ५. ५४. ११) इत्यादि मन्त्रान्तरात् । [v]वृधसानासु प्रवर्धमानास्वोषधीषु ज्वालासु वा [v]जर्भुरत् । पूर्यमाणो यज्ञं गन्ता । शत्रन्तं पदम् । यद्वा द्वितीयार्थे सप्तमी । वर्धमाना ओषधीर्जर्भुरत् । पुनःपुनर्दहन्नित्यर्थः । [v]द्यौः द्युलोकान्तरिक्षं [v]स्तृभिः [v]न नक्षत्रैरिव [v]रोदसी [v]अनु द्यावापृथिव्यावनु [v]चितयत् चेतयति । ज्वालाभिर्विस्फुलिङ्गैश्च भुवमन्तरिक्षं च व्याप्नोतीत्यर्थः ॥ ॥ २० ॥

स नो रेवत्समिधानः स्वस्तये संददस्वान्त्रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥ ६ ॥

सः । नः । रेवत् । सम्ऽइधानः । स्वस्तये । सम्ऽददस्वान् । रयिम् । अस्मासु । दीदिहि ।
आ । नः । कृणुष्व । सुविताय । रोदसी इति । अग्ने । हव्या । मनुषः । देव । वीतये ॥६॥

हे अग्ने [v]सः तादृशस्त्वं [v]नः अस्माकं [v]स्वस्तये । स्वस्तीत्यविनाशनाम । क्षेमाय । [v]रेवत् रयिमत् [v]रयिं धनं उपर्युपरिवृद्धिमद्धानयोग्यं वा धनम् [v]अस्मासु [v]संददस्वान् सम्यक् प्रयच्छन् [v]समिधानः अस्माभिः सम्यगिध्यमानः सन् [v]दीदिहि दीप्यस्व । यद्वा रेवदिति क्रियाविशेषणम्। रा धनं समृद्धिमद्यथा तथा दीप्यस्वेति । तथाभूतः सन् [v]नः अस्मभ्यं [v]सुविताय सुहिताय शोभनफलाय [v]रोदसी द्यावापृथिव्यौ [v]आ [v]कृणुष्व सर्वतः कुरुष्व । उभौ लोकौ भोगप्रदौ कुर्वित्यर्थः । किमर्थमिति तदुच्यते । हे [v]देव [v]अग्ने [v]मनुषः मनुष्यस्य यजमानस्य मम संबन्धीनि [v]हव्या हवींषि [v]वीतये देवेभ्यो भक्षणाय । पुनःपुनर्यागाद्यनुष्ठानायेत्यर्थः ।

दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतुः ॥ ७ ॥

दाः । नः । अग्ने । बृहतः । दाः । सहस्रिणः । दुरः । न । वाजम् । श्रुत्यै । अप । वृधि ।
प्राची इति । द्यावापृथिवी इति । ब्रह्मणा । कृधि । स्वः । न । शुक्रम् । उषसः । वि । दिद्युतुः ॥७॥

१. क-ज्ञ१-म-भवतु व्याप्नोतु ।

हे [V]अग्ने [V]नः अस्मभ्यं [V]बृहतः महतः प्रभूतान् गवाश्वादिधनविशेषान् [V]दाः देहि । तथा [V]सहस्रिणः सहस्रसंख्योपेतान् पुत्रभृत्यादीन् [V]दाः देहि ॥ ददातेश्छान्दसे लुङि रूपम्। वाक्यभेदादनिघातः॥ [V]श्रुत्यै कीर्त्यै [V]वाजम् अन्नं [V]दुरो [V]न तस्य द्वाराण्यपि । नशब्दश्चार्थे[1] । [V]अपा [V]वृधि अपवृणु । प्रेरयेत्यर्थः । यद्वा द्वाराणीव । तत्प्राप्त्युपायान् विशदयति । तदर्थं [V]द्यावापृथिवी [V]ब्रह्मणा परिवृढेन कर्मणा [V]प्राची प्रकृष्टाञ्चने अस्मदनुकूले [V]कृधि कुरु । [V]स्वर्ण आदित्य इव । स यथा जगत्प्रकाशयति तद्वत् । [V]शुक्रं दीप्तं त्वाम् [V]उषसः उषःकालाः [V]वि [V]दिद्युतुः विद्योतयन्ति । उषःकाले ह्यग्नयः प्रज्वाल्यन्ते ॥

स इधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥ ८ ॥

सः । इधानः । उषसः । राम्याः । अनु । स्वः । न । दीदेत् । अरुषेण । भानुना ।
होत्राभिः । अग्निः । मनुषः । सुऽअध्वरः । राजा । विशाम् । अतिथिः । चारुः । आयवे ॥८॥

[V]सः अग्निः [V]राम्याः रमणहेतुभूताः [V]उषसः [V]अनु अनुलक्ष्य [V]इधानः इध्यमानोः दीपितः सन् [V]अरुषेण रोचमानेन [V]भानुना तेजसा [V]स्वर्ण आदित्य इव [V]दीदेत् दीप्यते । सः [V]अग्निः [V]मनुषः मनुष्यस्य होतुः [V]होत्राभिः । होत्रेति वाङ्नाम । होमसाधनभूताभिः स्तुतिभिः स्तूयमानः [V]स्वध्वरः शोभनयागः [V]विशां प्रजानां [V]राजा राजमानः स्वामी [V]आयवे मनुष्याय यजमानाय तदर्थं [V]चारुः चरणशीलः [V]अतिथिः अतिथिवत्पूज्यो भवति ॥

एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥ ९ ॥

एव । नः । अग्ने । अमृतेषु । पूर्व्य । धीः । पीपाय । बृहत्ऽदिवेषु । मानुषा ।
दुहाना । धेनुः । वृजनेषु । कारवे । त्मना । शतिनम् । पुरुऽरूपम् । इषणि ॥ ९ ॥

[V]बृहद्दिवेषु प्रभूतद्युतिषु [V]अमृतेषु देवेषु मध्ये हे [V]पूर्व्य पूर्वभाविन् [V]अग्ने त्वां [V]मानुषा मनुष्याणां मध्ये [V]नः अस्मदीया [V]धीः बुद्धिः स्तुतिः कर्म वा [V]एव एवं [V]पीपाय प्याययति । यद्वा मानुषा मनुष्यान्[2] धीस्त्वदीया बुद्धिः कर्म वा प्याययतु । तथा त्वदीया धीः [V]वृजनेषु यज्ञेषु [V]कारवे स्तोत्रे [V]दुहाना [V]धेनुः । दोग्ध्री धेनुरिव । लुप्तोपममेतत् । [V]त्मना आत्मनैव [V]इषणि एषणायां सत्यां [V]शतिनम् अपरिमितसंख्याकं [V]पुरुरूपं गवाश्वादिरूपेण नानारूपं धनसमूहं दुहाना भवति ॥

१. ख-ज-व–नशब्दश्चार्थे । प्रादयोऽर्थेष्वसायेन व्यवहरन्ति । २. झ-ञ१-म–मनुष्यान् अस्मान् ।

वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्व१र्ण शुशुचीत दुष्टरम् ॥ १० ॥

वयम् । अग्ने । अर्वता । वा । सुऽवीर्यम् । ब्रह्मणा । वा । चितयेम । जनान् । अति ।
अस्माकम् । द्युम्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरम् ॥१०॥

हे अग्ने वयं यजमानाः सुवीर्यं शोभनसामर्थ्योपेतं यथा तथा अर्वता वा अरणकुशलेनाश्वेन । वाशब्दश्चार्थे । ब्रह्मणा वा अन्नेन च त्वदृत्तेन जनान् अस्मत्समानान् अति चितयेम अतिक्रम्य ज्ञायेमहि । कर्मणि कर्तृप्रत्ययः । यद्वा त्वदृत्तेनाश्वेनान्नेन च सुवीर्यं चितयेम प्रकाशयेम । तदर्थम् अस्माकं पञ्च पञ्चसु कृष्टिषु जनेषु निषादपञ्चमेषु चतुर्षु वर्णेषु उच्चा उच्चैरतिप्रभूतं दुस्तरम् अन्येनाप्रापं द्युम्नं धनं स्वर्ण सूर्य इवाधिकं शुशुचीत दीप्यताम् । अधीत्ययमनर्थको वा ।

स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ ११ ॥

सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् । सुऽजाताः । इषयन्त । सूरयः ।
यम् । अग्ने । यज्ञम् । उपऽयन्ति । वाजिनः । नित्ये । तोके । दीदिऽवांसम् । स्वे । दमे ॥११॥

हे अग्ने सहस्य शत्रूणामभिभवितर्बलप्रभव वा प्रशंस्यः स्तुत्यः सः त्वं नः अस्मदीयं स्तोत्रादिकं बोधि बुध्यस्व । स इत्युक्तं क इत्याह । यस्मिन् अग्नौ सुजाताः शोभनजननाः सूरयः स्तोतार ऋत्विजः इषयन्त गमयन्ति स्तोत्राणि । किंच हे अग्ने यज्ञं यजनीयं यं वाजिनः हविर्लक्षणान्नवन्तो यजमानाः नित्ये तोके औरसे पुत्रे निमित्तभूते सति । यद्वा । तस्मिन् यथा दीप्यते । पुत्रगृहे यथा पिता दीप्यते तद्वत् स्वे दमे स्वकीये यागगृहे सवनीयादिस्थाने दीदिवांसं दीप्यमानम् उपयन्ति हविःस्तोत्रादिना । स बोधि इत्यन्वयः ॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ १२ ॥

उभयासः । जातऽवेदः । स्याम । ते । स्तोतारः । अग्ने । सूरयः । च । शर्मणि ।
वस्वः । रायः । पुरुऽचन्द्रस्य । भूयसः । प्रजाऽवतः । सुऽअपत्यस्य । शग्धि । नः ॥१२॥

हे जातवेदः जातानां वेदितः अग्ने स्तोतारः त्वां स्तुवन्त ऋत्विजः सूरयः मेधाविनो यजमानाः च इति उभयासः उभये वयं शर्मणि सुखे निमित्तभूते सति ते त्वत्संबन्धिनः स्याम भवेम । यद्वा । ते शर्मणि स्याम । त्वं च नः अस्माकं वस्वः निवासहेतोर्वसिष्ठस्य रायः

गवादिधनस्य [V]पुरुश्चन्द्रस्य अतिशयेनाह्लादकस्य बहुहिरण्योपेतस्य वा [V]भूयसः प्रभूतस्य [V]प्रजावतः भृत्यादुपेतस्य पुत्रादिभोगपर्याप्तस्य वा [V]स्वपत्यस्य शोभनपुत्रस्य । ईदृग्रूपं धनं [V]नः अस्मभ्यं [V]शग्धि देहि। दातुं शक्तो भवसि ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १३ ॥

ये । स्तोतृऽभ्यः । गोऽअग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः । अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥

' ये स्तोतृभ्यः ' इति त्रयोदशी व्याख्याता ॥ ॥ २१ ॥

' समिद्धो अग्निः ' इत्येकादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभम् । सप्तमी जगती । समिद्धोऽग्निरग्निना नराशंसतनूनपादादय एकादश प्रयाजदेवताः । ' समिद्ध एकादशाग्रं सप्तमी जगती ' इत्यनुक्रमणिका । पशौ शुनकानामिदमाग्रीसूक्तम् । गृत्समदस्यापि शुनकत्वात् । ' समिद्धो अग्निरिति शुनकानाम् ' (आश्व. श्रौ. ३. २) इति हि सूत्रितम् ।

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥ १ ॥

सम्ऽइद्धः । अग्निः । निऽहितः । पृथिव्याम् । प्रत्यङ् । विश्वानि । भुवनानि । अस्थात् । होता । पावकः । प्रऽदिवः । सुऽमेधाः । देवः । देवान् । यजतु । अग्निः । अर्हन् ॥ १ ॥

[V]पृथिव्यां वेदिलक्षणायां [V]समिद्धः सम्यक् दीप्त एतन्नामकः [V]अग्निः [V]निहितः स्थापितः सन् [V]विश्वानि सर्वाणि [V]भुवनानि भूतजातानि [V]प्रत्यङ् अभिमुखः सन् [V]अस्थात् तिष्ठति । यथा सर्वे जनाः पश्यन्ति तथा प्रवृद्धः[1] अभवदित्यर्थः । किंच सोऽग्निः [V]होता होमनिष्पादको देवानामाह्वाता वा [V]पावकः शोधकः [V]प्रदिवः पुराणः [V]सुमेधाः शोभनप्रज्ञः [V]देवः द्योतमानः । एवं महानुभावः [V]अग्निः [V]अर्हन यागयोग्यः सन् [V]देवान्यजतु । अत्र यष्टव्यानिन्द्रादीन् पूजयतु[2] ।

नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान् ॥ २ ॥

नराशंसः । प्रति । धामानि । अञ्जन् । तिस्रः । दिवः । प्रति । मह्ना । सुऽअर्चिः । घृतऽप्रुषा । मनसा । हव्यम् । उन्दन् । मूर्धन् । यज्ञस्य । सम् । अनक्तु । देवान् ॥ २ ॥

१. क-म-वृद्धः । २. ब-तथा पूजयतु ।

[v]नराशंसः नरैर्नेतृभिः ऋत्विग्भिः[1] शंसनीयः एतन्नामकोऽग्निः [v]स्वर्चिः शोभनज्वालः सन् [v]धामानि स्थानान्याहुत्यधिकरणानि तेजांसि [v]प्रति प्रत्येकं [v]महा स्वमहिम्ना [v]अज्ञन् व्यक्तीकुर्वन् [v]तिस्रो [v]दिवः द्योतमानांस्त्रीन् भूम्यादिलोकांश्च [v]प्रति प्रत्येकमज्ञन् । स्थित्या[2] भूमिं प्रकाशेनान्तरिक्षं हविष्प्रापणेन दिवमित्यभिप्रायः । यद्वा लोकानां प्रत्येकं त्रित्वोपेतत्वात् तिस्रो दिव इत्यविरुद्धम् । ' तिस्रो दिवः पृथिवीस्तिस्रः ' (ऋ. सं. ४. ५४. ५) इत्यादिमन्त्रवर्णात् ' त्रयो वा इमे त्रिवृतो लोकाः ' (ऐ. ब्रा. २. १७) इति ब्राह्मणाच्च । तथा [v]घृतप्रुषा घृतं सिञ्चता [v]मनसा [v]हव्यम् [v]उन्दन् क्लेदयन् स्निग्धीकुर्वन् [v]यज्ञस्य [v]मूर्धन् मूर्धनि मुखे होमसमये [v]देवान् यष्टव्यान् [v]समनक्तु सम्यक् व्यक्तीकरोतु । तर्पयत्वित्यर्थः ॥

ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥ ३ ॥

ईळितः । अग्ने । मनसा । नः । अर्हन् । देवान् । यक्षि । मानुषात् । पूर्वः । अद्य ।
सः । आ । वह । मरुताम् । शर्धः । अच्युतम् । इन्द्रम् । नरः । बर्हिऽसदम् । यजध्वम् ॥ ३ ॥

हे [v]अग्ने [v]ईळितः अस्माभिः स्तुतः सन् [v]मनसा अस्मदनुरक्तेन देवानां यागबुद्ध्या वा [v]अर्हन् यागयोग्यः सन् [v]मानुषात् होतुः [v]पूर्वः पूर्वभावी [v]नः अस्मदर्थम् [v]अद्य अस्मिन् दिने [v]देवान् यष्टव्यान् [v]यक्षि त्वमेव यजसि । [v]सः तादृशो यष्टा त्वम् [v]आ [v]वह आकारय । कान् । [v]मरुतां [v]शर्धः गणम् । [v]अच्युतम् अक्षीणम् [v]इन्द्रं तदविनाभूतमिन्द्रमपि । यद्वा मरुद्लोपेतमिन्द्रम् । अनन्तरं हे [v]नरः नेतार ऋत्विजः [v]बर्हिषदं बर्हिषि सीदन्तं तमिन्द्रं [v]यजध्वं पूजयध्वम् ॥

देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥ ४ ॥

देवं । बर्हिः । वर्धमानम् । सुऽवीरम् । स्तीर्णम् । राये । सुऽभरम् । वेदी इति । अस्याम् ।
घृतेन । अक्तम् । वसवः । सीदत । इदम् । विश्वे । देवाः । आदित्याः । यज्ञियासः ॥ ४ ॥

हे [v]बर्हिः [v]देव एतदभिमानिन्नग्ने [v]वर्धमानं [v]सुवीरं शोभनवीरसंपादकं [v]सुभरं सुपूर्णं [v]स्तीर्णम् अस्मदीयैर्ऋत्विग्भिरास्तृतं भव । किमर्थम् । [v]राये धनाय । [v]अस्यां [v]वेदौ वेद्याम् ॥ सप्तम्यर्थे प्रगृह्यसंज्ञा । संहितायां यणादेशश्छान्दसः ॥ [v]घृतेन आज्येन [v]अक्तम् [v]इदं स्निग्धं बर्हिः [v]सीदत । के । हे [v]वसवः एतन्नामकाः । हे [v]विश्वे सर्वे [v]देवाः । हे [v]आदित्याः । [v]यज्ञियासः यज्ञार्हास्ते यूयमिदं बर्हिर्निषीदत अस्मिन् बर्हिषि निषीदतेत्यर्थः ॥

---

१. न-म-नृभिः । २. ख-ञ१-ण-न-वा-स्थित्वा.

वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥

वि । श्रयन्ताम् । उर्विया । हूयमानाः । द्वारः । देवीः । सुप्रऽअयनाः । नमःऽभिः ।
व्यचस्वतीः । वि । प्रथन्ताम् । अजुर्याः । वर्णम् । पुनानाः । यशसम् । सुऽवीरम् ॥ ५ ॥

[v]द्वारो [v]देवीः अग्नेर्द्वाराभिमानिन्यो देव्यः [v]वि [v]श्रयन्तां विविच्य श्रयन्तां विवृतापिधाना भवन्तु । कीदृश्यस्ताः । [v]उर्विया । उर्व्यो महत्यः । [v]नमोभिः नमस्कारोपेतैः स्तोत्रैः [v]हूयमानाः । [v]सुप्रायणाः सुष्ठु प्रकर्षेण गन्तव्याः । ईदृश्यो देव्यो विश्रयन्ताम् । किंच [v]व्यचस्वतीः व्याप्तिमत्यः [v]अजुर्याः अहिंस्या अजनना वा [v]सुवीरं शोभनपुत्राद्युपेतं [v]यशसं यशोयुक्तं [v]वर्णं वर्णनीयं रूपविशेषं [v]पुनानाः यजमानाय शोधयित्र्यः संपादयित्र्यो देव्यः [v]वि [v]प्रथन्तां विशेषेण प्रख्याता भवन्तु ॥ ॥२२॥

साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ ६ ॥

साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता । वय्याऽइव । रण्विते इति ।
तन्तुम् । ततम् । संवयन्ती इति सम्ऽवयन्ती । समीची इति सम्ऽईची ।
यज्ञस्य । पेशः । सुदुघे इति सुऽदुघे । पयस्वती इति ॥ ६ ॥

[v]साधु साधूनि [v]नः अस्मदीयानि [v]अपांसि कर्माण्युद्दिश्य [v]सनता सनातनेनाविच्छिन्नप्रवृत्तिकेन स्तोत्रादिना [v]उक्षिते पूजिते । यद्वा । पुराणवाची विभक्त्यन्तः सनच्छब्दोऽस्ति । तस्य प्रथमाद्विवचनस्याकारः । सनातने नित्ये इत्यर्थः । अस्मिन् पक्षे उक्षिते फलस्य सेचयित्र्यौ ॥ कर्तरि निष्ठा ॥ [v]उषासानक्ता अहोरात्रदेवते [v]वय्याइव वानकुशले इव [v]रण्विते शब्दिते स्तुते परस्परं गच्छन्त्यौ वा [v]ततं विस्तृतं [v]तन्तुं तन्तुस्थानीयं यज्ञावयवं [v]संवयन्ती सम्यक् चित्रं सह वा वयन्त्यावुत्पादयित्र्यौ [v]समीची सम्यक्प्रवृत्तिके परस्परानुकूले । किमर्थं संवयन्ती । [v]यज्ञस्य अनुष्ठीयमानस्य [v]पेशः रूपं निर्मातुमिति शेषः । यज्ञं निर्वर्तयितुं तदवयवानुक्रमेण[1] अनुष्ठापयित्र्यावित्यर्थः । अहोरात्राभ्यां हि यज्ञास्तन्यन्ते । [v]सुदुघे सुष्ठु फलस्य दोग्ध्र्यौ [v]पयस्वती उदकवत्यौ । अहोरात्राभ्यां खलु वृष्टिर्जायते । एवं महानुभावे अहोरात्रदेवते अस्मद्यज्ञं निर्वहतामित्यर्थः ॥

दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजन्तावृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥ ७ ॥

दैव्या । होतारा । प्रथमा । विदुःऽतरा । ऋजु । यक्षतः । सम् । ऋचा । वपुःऽतरा ।
देवान् । यजन्तौ । ऋतुऽथा । सम् । अञ्जतः । नाभा । पृथिव्याः । अधि । सानुषु । त्रिषु ॥७॥

१. क-ङ्ग-त-न-म१–तदवयवान् क्रमेण ।

vदैव्या । दिवि भवो दिव्योऽग्निः । तस्माद्दिव्यादग्नेर्जातौ vहोतारा आह्वातारौ देवानां होम-निष्पादकौ वा अग्नी पार्थिवान्तरिक्ष्यौ vप्रथमा प्रथमं[1] यष्टव्यौ[1] vविदुष्टरा विद्वत्तमौ vवपुष्टरा प्रकृष्ट-वपुषौ देवौ vऋचा मन्त्रेण vऋजु अविकलं यथा तथा सम्यक् vयक्षतः पूजयतः । vऋतुथा तत्तद्तौ तत्र तत्र काले vदेवान् यष्टव्यान् vयजन्तौ[2] देवौ vपृथिव्याः vनाभा नाभावुत्तरवेद्याम् vअधि उपरि vत्रिषु vसानुषु समुच्छ्रितेषु प्रदेशेषु गार्हपत्यादिषु vसमञ्जतः समाङ्क्ताम् ॥ अञ्जेर्लेट्यडागमः ॥

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥ ८ ॥

सरस्वती । साधयन्ती । धियम् । नः । इळा । देवी । भारती । विश्वऽतूर्तिः ।
तिस्रः । देवीः । स्वधया । बर्हिः । आ । इदम् । अच्छिद्रम् । पान्तु । शरणम् । निऽसद्य ॥ ८ ॥

vनः अस्मदीयां vधियं बुद्धिं यागं वा vसाधयन्तो निर्वर्तयन्ती vसरस्वती[3] एतन्नामिकेयं देवी तथा vइळा vदेवी vभारती च[3] vविश्वतूर्तिः विश्वानि तूर्णानि यस्याः सा तादृशी सर्वविषयगता वाक् । एतदुभयविशेषणम् । vतिस्रो vदेवीः एतास्तिस्रो देव्यः vस्वधया अस्मद्दत्तहविषा निमित्तेन vइदं vबर्हिः यज्ञम् vअच्छिद्रं यथा तथा vपान्तु पालयन्तु । किं कृत्वा । vशरणं यागगृहम् vआ vनिषद्य आश्रित्य । यद्वा । स्वधया इदं बर्हिः इमं यज्ञमागत्यास्मदीयं शरणं गृहं निषद्याच्छिद्रं यथा तथा पान्तु ॥

अथ 'पिशङ्गरूपः' इति नवमी त्वाष्ट्रे पशौ पुरोडाशस्य याज्या । 'पिशङ्गरूपः सुभरो वयोधाः प्रथमभाजं यशसं वयोधाम्' (आश्व. श्रौ. ३. ८) इति सूत्रितत्वात् । पाठस्तु[4]–

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ ९ ॥

पिशङ्गऽरूपः । सुऽभरः । वयःऽधाः । श्रुष्टी । वीरः । जायते । देवऽकामः ।
प्रऽजाम् । त्वष्टा । वि । स्यतु । नाभिम् । अस्मे इति । अथ । देवानाम् । अपि । एतु । पाथः ॥ ९ ॥

vपिशङ्गरूपः सुवर्णवर्णो नानारूपो वा vसुभरः शोभनयज्ञः शोभनभरणो वा vवयोधाः वयसोऽन्नस्य धारयिता दाता वा vश्रुष्टी क्षिप्रगुणः vवीरः विविधमीरयिता vदेवकामः देवाः काम्यन्ते येन तादृशः[5] पुत्रः vजायते जायतामुत्पद्यतां त्वष्टुरनुग्रहात् । स च vत्वष्टा एतन्नामको देवः vअस्मे अस्मभ्यं vनाभिं कुलस्य बन्धिकां vप्रजां पुत्रादिरूपां vवि vष्यतु विमुञ्चतु वितरत्वित्यर्थः । vअथ अपि च vदेवानां संबन्धि vपाथः अन्नम् vअपि अस्मान् vएतु गच्छतु । अपिः क्रियया वा संबध्यते । गच्छत्वित्यर्थः ॥

१. म-व–प्रथमयष्टव्यौ । २. क-ङ-ञ१-म–यजन्तौ पूजयन्तौ । ३. ख-ग-च-ण-थ-न-व–सरस्वती एतन्नामिका देवी भारती च । ४. त–नवमीपाठस्तु । ५. ञ१-ण-त-थ-न-व–तादृशः । ईदृशः ।

वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥ १० ॥

वनस्पतिः । अवऽसृजन् । उप । स्थात् । अग्निः । हविः । सूदयाति । प्र । धीभिः ।
त्रिधा । सम्ऽअक्तम् । नयतु । प्रऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यम् ॥ १० ॥

[v]वनस्पतिः यूपाभिमान्येतन्नामकोऽग्निः [v]अवसृजन् अस्मदीयं कर्मानुजानन् [v]उप अस्मत्समीपे [v]स्थात् तिष्ठतु । [v]अग्निः पाकाधारोऽग्निश्च [v]हविः पशुरूपं [v]धीभिः कर्मभिः विशेषैः पाकसाधनैः प्रकर्षेण [v]सूदयाति क्षारयति । अपाकाधिकपाकादिराहित्येन[1] हविः पचतीत्यर्थः । किंच [v]दैव्यः देवसंबन्ध्याहुत्यधिकरणभूतोऽग्निः [v]शमिता हविषः संस्कर्ता । यद्वा । दैव्यः शमितैतन्नामकोऽग्निः । 'अग्निर्वै देवानां शमिता' इति श्रूयते । [v]त्रिधा त्रिप्रकारम् उपस्तरणावदानाभिघारणैः [v]समक्तं सम्यक् सिक्तं [v]हव्यं हविः [v]प्रजानन् विद्वान् नयनप्रकाराभिज्ञः सन् [v]देवेभ्यः [v]उप [v]नयतु समीपं प्रापयतु ॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमु वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ११ ॥

घृतम् । मिमिक्षे । घृतम् । अस्य । योनिः । घृते । श्रितः । घृतम् । ऊँ इति । अस्य । धाम ।
अनुऽस्वधम् । आ । वह । मादयस्व । स्वाहाऽकृतम् । वृषभ । वक्षि । हव्यम् ॥ ११ ॥

अस्य अग्नेः [v]घृतम् आज्यं [v]मिमिक्षे सिञ्चामि । यतः [v]अस्य [v]घृतं [v]योनिः कारणम् । उत्पन्नोऽपि [v]घृते [v]श्रितः आश्रितः । [v]अस्य अग्नेः [v]घृतम् एव [v]धाम तेजः । घृतेन हि अयं दीप्यते । इदानीं संबोध्योच्यते । हे अग्ने [v]वृषभ फलस्य वर्षितस्त्वम् [v]अनुष्वधं प्रतिहविः सर्वेष्वपि हविःषु दीयमानेषु [v]आ [v]वह देवान् । आहूय तान् [v]मादयस्व प्रीणय । ततस्त्वं [v]स्वाहाकृतं स्वाहाकारेण दत्तं [v]हव्यं[2] [v]वक्षि वह ॥ ॥ २३ ॥

'हुवे वः' इति नवर्चं चतुर्थं सूक्तम् । भार्गवः सोमाहुतिनामक ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । 'हुवे नव सोमाहुतिर्भार्गवो ह' इत्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसीदम् । सूत्रितं च–'हुवे वः सुद्योत्मानं नि होता होतृषदन इति सूक्ते' (आश्व. श्रौ. ४. १३) इति ॥

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्रइव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥ १ ॥

हुवे । वः । सुऽद्योत्मानम् । सुऽवृक्तिम् । विशाम् । अग्निम् । अतिथिम् । सुऽप्रयसम् ।
मित्रःऽइव । यः । दिधिषाय्यः । भूत् । देवः । आऽदेवे । जने । जातऽवेदाः ॥ १ ॥

---

१. ख-थ-म–अपाकादिराहित्येन । २. क-ख-च-ञ-ञ१-ण-ण१-त-थ-न-म-व–'हव्यं' नास्ति ।

हे यजमानाः [v]वः युष्मदर्थम् [v]अग्निं [v]हुवे आह्वयामि । कीदृशं तम् । [v]सुद्योत्मानं सुष्ठु द्योतमानं [v]सुवृक्तिं सुवर्जितं पापैः शोभनस्तुतिं वा । [v]विशां यजमानानाम् [v]अतिथिम् अतिथिवत्सदा पूज्यं [v]सुप्रयसं शोभनहविर्लक्षणान्नम् । किंच [v]जातवेदाः जातानां वेदिता [v]यः [v]देवः अग्निः [v]मित्रइव सखेव आदित्य इव वा [v]दिधिषाय्यः धारयिता [v]भूत् भवति । कुत्रेति उच्यते । [v]आदेवे देवपर्यन्ते [v]जने मनुष्यप्रभृतिदेवपर्यन्तेषु । तेषां धारकोऽभवदित्यर्थः ॥

इमं विधन्तो अपां सधस्थे द्विता अदधुर्भृगवो विक्ष्वायोः ।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥ २ ॥

इमम् । विधन्तः । अपाम् । सधऽस्थे । द्विता । अदधुः । भृगवः । विक्षु । आयोः ।
एषः । विश्वानि । अभि । अस्तु । भूमा । देवानाम् । अग्निः । अरतिः । जीरऽअश्वः ॥ २ ॥

[v]इमम् अग्निं [v]विधन्तः परिचरन्तः [v]भृगवः अस्मत्पूर्वे महर्षयः [v]अपां [v]सधस्थे सहस्थाने अन्तरिक्षे [v]आयोः मनुष्यस्य यजमानस्य स्वभूतासु [v]विक्षु प्रजास्वृत्विक्षु तेषां मध्ये च [v]द्विता द्वयोः[1] स्थानात् [v]अदधुः अधारयन्[1] ॥ दधातेर्लङि रूपम् ॥ [v]एषः [v]अग्निः [v]भूम भूम्ना अत्यर्थं [v]विश्वानि भूतजातानि अस्मद्विरोधीनि [v]अभ्यस्तु अभिभवतु । स कीदृशः । [v]देवानाम् [v]अरतिः ईश्वरः । तेषां मध्ये शीघ्रम् अरणशीलो वा अस्मद्यागं प्रति । तथा [v]जीराश्वः क्षिप्राश्वः ॥

अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥ ३ ॥

अग्निम् । देवासः । मानुषीषु । विक्षु । प्रियम् । धुः । क्षेष्यन्तः । न । मित्रम् ।
सः । दीदयत् । उशतीः । ऊर्म्याः । आ । दक्षाय्यः । यः । दास्वते । दमे । आ ॥ ३ ॥

[v]देवासः देवाः [v]क्षेष्यन्तः स्वर्गं प्रति गच्छन्तः सन्तः पूर्वं [v]मानुषीषु मनुष्यसंबन्धिनीषु [v]विक्षु प्रजासु [v]प्रियं देवानां प्रीणयितारम् अग्निं [v]धुः अधुः स्थापितवन्तः । तत्र दृष्टान्तः । [v]क्षेष्यन्तः [v]मित्रं [v]न । रायं प्रति गच्छन्तो नराः मित्रं प्रियं सखायं स्वगृहरक्षार्थं स्थापयन्ति तद्वत् । [v]यः एवं देवैः स्थापितो योऽग्निः [v]दास्वते हविर्दत्तवते यजमानाय तदर्थं [v]दमे तदीये यागगृहे [v]आ आहितः स्थापितः [v]दक्षाय्यः समर्धयिता दाता वा [v]सः अग्निः [v]उशतीः कामयमानाः [v]ऊर्म्याः रात्रीः सर्वासु रात्रिषु [v]आ [v]दीदयत् दीप्यते सर्वतः । सर्वरात्रीरादीपयति वा ॥

१. क-म-द्वयोः स्थानयोस्तायः तायमानम् । छान्दसं रूपम् । यद्वा द्विता द्वित्वेन वैद्युतात्मनान्तरिक्षं यागार्थमृत्विक्षु वा अधारयन् ; ङ१-क्षित्यन्तरिक्षयोः स्थानयोस्तु अस्तायमानम् । छान्दसं रूपम् । यद्वा द्विता द्वित्वेन वैद्युतात्मनान्तरिक्षे यागार्थमृत्विक्षु वादधुः अधारयन् ।

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥ ४ ॥

अस्य । रण्वा । स्वस्यऽइव । पुष्टिः । सम्ऽदृष्टिः । अस्य । हियानस्य । दक्षोः ।
वि । यः । भरिभ्रत् । ओषधीषु । जिह्वाम् । अत्यः । न । रथ्यः । दोधवीति । वारान् ॥४॥

vअस्य अग्नेः पुष्टिः शरीरवृद्धिः vरण्वा रमणीया शब्दयुक्ता वा । तत्र दृष्टान्तः । vस्वस्य vपुष्टिः vइव । यथा लोके स्वकीया पुष्टिः स्वस्मै रमणीया भवति तद्वत् । यद्वा[1] अस्याग्नेः संबन्धिनी पुष्टिः यजमानविषया रण्वा स्वस्याग्नेः पुष्टिर्यथा रण्वा तद्वत्[1] । किंच vहियानस्य समृद्धिं गच्छतो व्याप्नुवतः vदक्षोः[2] काष्ठान् दिधक्षोर्दग्धुमिच्छोः अस्य अग्नेः vसंदृष्टिः संदर्शनाविर्भावोऽपि रण्वा । vयः अग्निः vओषधीषु काष्ठेषु vजिह्वां ज्वालाम् । जात्येकवचनम् । ज्वालाः vवि vभरिभ्रत् अत्यर्थं विहरति । कम्पयतीत्यर्थः ॥ हरतेर्यङ्लुगन्तस्वेन दाधर्त्यादिषु (पा. सू. ७.४.६५) निपातितात्[3] लेट्यडागमः । यद्योगादनिघातः॥ तत्र दृष्टान्तः । vरथ्यः रथार्हः vअत्यो vन वाजी यथा vवारान् दंशवारणसाधनान् वालान् vदोधवीति कम्पयति तद्वत् । योऽग्निर्ज्वालाः कम्पयति अस्याग्नेः पुष्टी रण्वेति ॥

आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ॥ ५ ॥

आ । यत् । मे । अभ्वम् । वनदः । पनन्त । उशिक्ऽभ्यः । न । अमिमीत । वर्णम् ।
सः । चित्रेण । चिकिते । रम्ऽसु । भासा । जुजुर्वान् । यः । मुहुः । आ । युवा । भूत् ॥ ५ ॥

vयत्[4] यस्य vअभ्वं महत्त्वं vमे मम संबन्धिनः vवनदः वनन्तः संभक्तारः । यद्वा वनदोऽवनदो भृशं शब्दयन्तः[5] स्तोतारः ॥ अवशब्दो भृशार्थवाची। तत्पूर्वान्नदेः क्विप् । ' अवाप्योः ' इत्यकारलोपः ॥ vआ vपनन्त समन्तात् स्तुवन्ति । vसः अग्निः vउशिग्भ्यः अस्मदीयं रूपं कामयमानेभ्य ऋत्विग्भ्यः vवर्णं स्वसदृशं[6] रूपं vनामिमीत । नशब्दश्चार्थे । निर्मिमीते च । स च vरंसु रमणीयेष्वाज्यादिहविःषु निमित्तेषु vचित्रेण vभासा हिरण्यकनकादिनानावर्णया दीप्त्या vचिकिते विज्ञायते । किंच vयः अग्निः vजुजुर्वान् जीर्णः सन् ज्वालोपशमे स एव vमुहुः पुनः पुनः vआ vयुवा सर्वतो मिश्रयिता तरुणो वा आ vभूत् आभवति पुनराज्यादिसंयोगात् ॥ ॥ २४ ॥

१. त–यद्वास्याग्नेः संबन्धिनी तद्वत् । यद्वा अस्याग्नेः संबन्धिनी पुष्टिर्यजमानविषया रण्वा तस्याग्नेः पुष्टिर्यथा रण्वा तद्वत् ; ख-ग–यद्वा अस्याग्नेः संबन्धिनी पुष्टिर्यथा यजमानविषया रण्वा तद्वत्। २. ख-च-ञ१-थ–दक्षोः । ३. ब–निपातितः । ४. क-ख-च-ञ-ण-ण१-त-ध-न-म-व–यतः । ५. ख-ग-च-ण१–शब्दवन्तः । ६. त–सदृशम् ।

आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥ ६ ॥

आ । यः । वना । ततृषाणः । न । भाति । वाः । न । पथा । रथ्याऽइव । स्वानीत् ।
कृष्णऽअध्वा । तपुः । रण्वः । चिकेत । द्यौःऽइव । स्मयमानः । नभःऽभिः ॥ ६ ॥

[v]यः अग्निः [v]वना वनानि वृक्षसमूहान् [v]ततृषाणो [v]न तृषित[1] इव[1]। स्वरमाण इत्यर्थः । [v]आ [v]भाति आभासयति । दहतीत्यर्थः । यद्वा वना वने आभाति । किंच [v]वार्ण उदकमिव [v]पथा प्रवणेन मार्गेण गच्छति तद्वत् इतस्ततो गच्छति । [v]रथ्येव[2] रथस्य वोढाश्व इव [v]स्वानीत् शब्दयति । यद्वा रथशब्दात् सोर्ऱ्यादेशः । यथा रथो युद्धमार्गेण गच्छन् स्वनति तद्वत् । किंच [v]कृष्णाध्वा कृष्णवर्त्मा [v]तपुः तापकः [v]रण्वः रमणीयः एवंभूतः सन् [v]चिकेत ज्ञायते । प्रकाशत इत्यर्थः । क इव। [v]नभोभिः नक्षत्रैः [v]स्मयमानः प्रकाशमानः [v]द्यौरिव द्युलोक इव। यद्वा नभोभिरन्तरिक्ष-प्रदेशविशेषैः स्मयमानः शोभमानो द्यौरादित्य इव । नीलवर्णान्तरिक्षचार्यादित्यो यथा ज्ञायते तद्वत् स्वसंचारेण कृष्णीभूते मार्गे ज्ञायते । प्रकाशत इत्यर्थः ॥

स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः
अग्निः शोचिष्माँ अतसान्यृष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥ ७ ॥

सः । यः । वि । अस्थात् । अभि । धक्षत् । उर्वीम् । पशुः । न । एति । स्वऽयुः । अगोपाः।
अग्निः । शोचिष्मान् । अतसानि । उष्णन् । कृष्णऽव्यथिः । अस्वदयत् । न । भूम ॥ ७ ॥

[v]यः अग्निः [v]व्यस्थात् विविधं तिष्ठति । व्याप्नोति विश्वम् । तथा योऽग्निः [v]उर्वीं विस्तृतां पृथिवीं सर्वाम् । यश्च [v]अभि [v]दक्षत् आभिमुख्येन प्रवर्धमानो भवति ॥ उभे अपि यच्छब्दयोगान्न निहन्येते ॥ [v]सः [v]अग्निः [v]पशुर्न पशुरिव । यथा जातः[4] पशुः स्वच्छन्देन चरति तथा [v]स्वयुः स्वयमेव गच्छन् [v]अगोपाः गोपरहितः[5]। नियामकवर्जित इत्यर्थः । [v]एति गच्छति । किं कुर्वन्। [v]शोचिष्मान् प्रकृष्टदीप्तिः [v]कृष्णव्यथिः कृष्णवर्णं प्राप्ता दग्धा व्यथाकराः कण्टकादयो येन तादृशः सन् [v]भूम अत्यधिकम् [v]अस्वदयन्न आस्वादयतीव वृक्षगतान् रसान् । [v]अतसानि संततानि नीरसानि वा तरुगुल्मादीनि [v]उष्णन् दहन्नेति ॥

नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥ ८ ॥

नु । ते । पूर्वस्य । अवसः । अधिऽइतौ । तृतीये । विदथे । मन्म । शंसि ।
अस्मे इति । अग्ने । संयत्ऽवीरम् । बृहन्तम् । क्षुऽमन्तम् । वाजम् । सुऽअपत्यम् । रयिम् । दाः॥८॥

---

१. क-ज्ञ१-तृषित इव बुभुक्षित इव । २. ज्ञ१-तथा रथ्येव । ३. ख-ग-च-ण१-फ-शोभमानः । ४. ज्ञ१-जातमात्रः । ५. ज्ञ१-गोपविरहितः ।

हे अग्ने vते तव संबन्धिनः vपूर्वस्य पूर्वं यागसमये कृतस्य vअवसः अभिमततर्पणस्य vअधीतौ स्मरणे सति तत्स्मृत्या vनु अद्यापि vतृतीये vविदथे यागे तृतीयसवने। यद्वा प्रातरनुवाकसंबन्धिनाम् आग्नेयोपस्याश्विनानां मध्येऽन्यतमे तृतीये क्रतौ vमन्म मननीयं स्तोत्रं vशंसि अशंसि। शस्यतेऽस्माभिः। हे vअग्ने त्वं च vअस्मे अस्मभ्यं vसंयद्वीरं संयतो वीरा यस्मिन् तादृशं vबृहन्तं महान्तं vक्षुमन्तं शब्दवन्तं कीर्तिमन्तं vवाजम् उक्तलक्षणमन्नं vस्वपत्यं vरयिं च vदाः देहि ॥

त्वया॑ यथा॑ गृत्सम॒दासो॑ अग्ने॒ गुहा॑ व॒न्वन्त॒ उप॑रा॒ँ अ॒भि ष्युः ।
सु॒वीरा॑सो अभिमाति॒षाहः॑ स्मत्सू॒रिभ्यो॑ गृ॒णते॒ तद्व॒यो॑ धाः ॥ ९ ॥

त्वया॑ । यथा॑ । गृ॒त्स॒ऽम॒दासः॑ । अग्ने॑ । गुहा॑ । व॒न्वन्तः॑ । उप॑रान् । अ॒भि । स्युरिति॒ स्युः । सु॒ऽवीरा॑सः । अ॒भि॒मा॒ति॒ऽसहः॑ । स्मत् । सू॒रिऽभ्यः॑ । गृ॒णते॑ । तत् । व॒यः॑ । धाः॒ ॥ ९ ॥

हे vअग्ने vत्वया रक्षकेण vवन्वन्तः छान्दसं[1] भजन्तो[1] गृत्समदा ऋषयः। आत्मनि पारोक्ष्येण[2] वचनम्। vयथा vगुहा गुहायां वर्तमानान् vउपरान् उपरमणसाधनान् उपरि उत्कृष्टे वर्तमानान्वा धनविशेषान् vअभि vस्युः अभिभवेयुः। स्वाधीनान् कुर्युः। यद्वा गूढानुपरान् उपरेऽधिकत्वेन वर्तमानान् पापान् अभिस्युः अभिभवेयुः। तथा कुर्वित्यर्थः। कीदृशाः। vसुवीरासः शोभनपुत्राद्युपेताः vअभिमातिसहः वैरिणां पापादीनां सोढारः। किंच vसूरिभ्यः मेधाविभ्यो यजमानेभ्यो vगृणते॥ व्यत्ययेनैकवचनम्॥ शब्दयद्भ्यः स्तोतृभ्यः। यद्वा सूरिभ्यो यजमानेभ्यो गृणते स्तोत्रे च vस्मत् सुमत् अतिप्रभूतं vतत् तादृशं प्रसिद्धं vवयः अन्नं vधाः धेहि॥ ॥ २५ ॥

'होताजनिष्ट' इत्यष्टर्चं पञ्चमं सूक्तं सोमाहुतेरार्षमाग्नेयमानुष्टुभम्। 'होताष्टावानुष्टुभम्' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ अस्य विनियोगः। सूत्रितं च–'अग्नायो होताजनिष्ट' (आश्व. श्रौ. ४. १३) इति। चतुर्विंशेऽहन्यपीदमेवाज्यम्। 'चतुर्विंशे होताजनिष्टेत्याज्यम्' (आश्व. श्रौ. ७. २) इति। आभिप्लविके द्वितीयेऽहनीदमेवाज्यम्। 'द्वितीयस्य चतुर्विंशेनाज्यम्' (आश्व. श्रौ. ७. ६) इत्यतिदिष्टत्वात्॥

होता॑जनिष्ट॒ चेत॑नः पि॒ता पि॒तृभ्य॑ ऊ॒तये॑ ।
प्र॒यक्ष॒ञ्जेन्यं॑ व॒सु॒ श॒केम॑ वा॒जिनो॒ यम॑म् ॥ १ ॥

होता॑ । अ॒ज॒नि॒ष्ट॒ । चेत॑नः । पि॒ता । पि॒तृऽभ्यः॑ । ऊ॒तये॑ ।
प्र॒ऽयक्ष॑न् । जेन्य॑म् । व॒सु॒ । श॒केम॑ । वा॒जिनः॑ । यम॑म् ॥ १ ॥

vहोता होमनिष्पादकः vचेतनः चेतयितास्मदनुष्ठितस्य vपिता पालकोऽस्मद्यज्ञस्य ईदृशोऽग्निः vअजनिष्ट उत्पन्नः। किमर्थम्। vपितृभ्यः पालकेभ्यो यजमानेभ्यः॥ षष्ठ्यर्थे चतुर्थी॥ तेषाम् vऊतये रक्षणाय च। वयं च vवाजिनः हविर्लक्षणान्नवन्तः सन्तः vप्रयक्षं प्रकर्षेण पूज्यं vजेन्यं जेतव्यं vयमं यमयितव्यं[3] vवसु धनं vशकेम। शक्ता भूयास्म लब्धुमिति शेषः। यद्वा वाजिनोऽन्नस्य यमं यमनं कर्तुं शकेम। प्रयक्षं जेन्यं वसु धनमित्युपमानम्। उक्तलक्षणं धनमिव। तद्यथावरोद्धुं शक्नुमस्तद्वत्॥

---

१. क्ष१-म–'छान्दसं भजन्तः' नास्ति। २. क्ष-क्ष१-ण-म-व–परोक्षेण। ३. न-त–यमितव्यम्; क-ख-च-ण१-त-थ-ध–यमेतव्यम्।

आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि ।
मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥ २ ॥

आ । यस्मिन् । सप्त । रश्मयः । ततताः । यज्ञस्य । नेतरि ।
मनुष्वत् । दैव्यम् । अष्टमम् । पोता । विश्वम् । तत् । इन्वति ॥ २ ॥

vयज्ञस्य vनेतरि यागस्य निर्वाहके vयस्मिन् अग्नौ vसप्त vरश्मयः सप्तसंख्याका रश्मिवद्व्याप्ता होत्रकाः vआ vतताः स्वस्वकर्मभिः सर्वतो व्याप्ता भवन्ति । सः vपोता पावको देवानां पोत्राख्य ऋत्विग्रूपो वा अग्निः vमनुष्वत् मनुष्यपोतृवत् vदैव्यम् । देवो यज्ञः । तत्संबन्धि vअष्टमम् अष्टर्त्विक्संबन्धि vतत् vविश्वं कर्तव्यजातं सप्तहोत्रकैः[1] सह स्वयमष्टमः सन् vइन्वति व्याप्नोति । यद्वा तदित्यस्य लिङ्गव्यत्ययः । स पोतेति संबन्धः । सप्तहोत्रकैः सहाष्टमो भूत्वा तद्यज्ञं निर्वहतीत्यर्थः ॥

दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ ३ ॥

दधन्वे । वा । यत् । ईम् । अनु । वोचत् । ब्रह्माणि । वेः । ऊँ इति । तत् ।
परि । विश्वानि । काव्या । नेमिः । चक्रम्ऽइव । अभवत् ॥ ३ ॥

पूर्वस्मिन् मन्त्रे होत्रादिवत् स्वयमपि[2] यज्ञं निर्वहतीत्युक्तम् । अत्र तु सर्वं तत्तदात्मना स्थित्वा स्वयमेव निर्वहतीत्याह । vवा अथवा vईम् एनं यज्ञम् vअनु लक्षीकृत्य vयत् हविरादिकं vदधन्वे धारयति अध्वर्यवादिरूपः। यानि vब्रह्माणि शस्त्रादीनि अनु vवोचत् अनुवक्ति होत्रादिरूपः । अत्र वानु इत्येतद्योज्यम् । vतत् सर्वं vवेरु वेरेव। कामयते जानाति वा स्वयमनुष्ठातुम् । अयमग्निः vविश्वानि सर्वाणि vकाव्या[3] काव्यानि । कवयो मेधाविन ऋत्विजः । तत्संबन्धीनि कर्माणि vपरि vअभवत् परिभवति । स्वायत्तानि करोति । व्याप्नोतीत्यर्थः । व्याप्तौ दृष्टान्तः । vनेमिः बहिर्वेष्टनवलयः vचक्रं रथाङ्गं यथा कात्स्न्र्येन व्याप्नोति तद्वत् ॥

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वयाइवानु रोहते ॥ ४ ॥

साकम् । हि । शुचिना । शुचिः । प्रऽशास्ता । क्रतुना । अजनि ।
विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते ॥ ४ ॥

vशुचिः स्वयं शोधकः vप्रशास्ता देवानाम् एतन्नामक ऋत्विक् प्रशासिता वा यज्ञविद्यानां vशुचिना vक्रतुना शोधकेन अग्निहोत्रादिकर्मणा vसाकं vहि सहैव vअजनि उत्पन्नः । जातमात्र एव

---

१. क-ख-च-ज्ञ-ञ्ञ-ण-ण१-न-म-व–सप्तहोत्रैः । २. म–अयमपि । ३. क-ञ्ञ-ण१-ध-व–काव्यानि ।

शुद्धः सर्वस्य प्रशास्ता च सन् अग्निहोत्रादिनिर्वोढाभवदित्यर्थः। vअस्य अग्नेः vध्रुवा ध्रुवाणि फलपर्यवसायीनि व्रतानि कर्माणि vविद्वान् जानन् यजमानः vवयाइव विस्तृताः शाखा इव vअनु vरोहते क्रमेणानुतिष्ठति ॥

ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।
कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥ ५ ॥

ताः । अस्य । वर्णम् । आयुवः । नेष्टुः । सचन्त । धेनवः ।
कुवित् । तिसृऽभ्यः । आ । वरम् । स्वसारः । याः । इदम् । ययुः ॥ ५ ॥

vयाः वक्ष्यमाणलक्षणा अङ्गुलयः[1] vइदम् अनुष्ठीयमानं कर्म vययुः प्राप्नुवन्ति । अनुतिष्ठन्ति । vताः vआयुवः गन्त्र्यो व्यासाः vधेनवः प्रीणयित्र्यः vस्वसारः स्वयं सारिण्योऽङ्गुलयः vनेष्टुः हविर्याचितुर्भक्षयितुः शोधयितुः[2] पोषयितुः[2] नेतुर्वा vअस्य अग्नेः। यद्वा एतन्नामकऋत्विग्रूपस्य[3]। vतिसृभ्य vआ गार्हपत्यादिमूर्तीनामपि vवरं vवर्णं vकुवित् बहुकृत्वः vसचन्त सेवन्ते। परिचरन्ति ॥

यदीं मातुरुप स्वसा घृतं भरन्त्यस्थित ।
तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥ ६ ॥

यदि । मातुः । उप । स्वसा । घृतम् । भरन्ती । अस्थित ।
तासाम् । अध्वर्युः । आऽगतौ । यवः । वृष्टीऽइव । मोदते ॥ ६ ॥

vयदि यदा vमातुः सर्वस्य निर्मातुर्भूम्या वेदिलक्षणायाः vस्वसा स्वसृस्थानीया जुहूः vघृतं vभरन्ती सती vउप vअस्थित उपतिष्ठेदग्निम्[4]। एकवचनमविवक्षितम्। जुहूपभृद्ध्रुवा घृतं भरन्त्यस्तिष्ठन्तीत्यर्थः । तदा vतासां जुह्वादीनाम् vआगतौ यागाय प्राप्तौ सत्याम् vअध्वर्युः एतन्नामक ऋत्विग्रूपोऽध्वरं कामयमानो वा अयमग्निः vमोदते हृष्यति । vयवो vवृष्टीव वृष्ट्या यथा मोदते तद्वत् ॥

स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम् ।
स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् ॥ ७ ॥

स्वः । स्वाय । धायसे । कृणुताम् । ऋत्विक् । ऋत्विजम् ।
स्तोमम् । यज्ञम् । च । आत् । अरम् । वनेम । ररिम । वयम् ॥ ७ ॥

१. थ-व–या अङ्गुलयः । २. थ–शोधयितुः; म–पोषयितुः । ३. क-ङ्ग-ङ्ग१-म–' °ऋत्विग्रूपस्य ' इत्यस्यानन्तरं ' तिसृभ्यो लोकत्रयवर्तिद्युतिभ्यो वे(व)रमधिकं वर्णं वर्णनीयं रूपम् । यद्वा । तिसृभ्योऽपि श्रुतिभ्योऽधिकाम् । यद्वा । षष्ठ्यर्थे चतुर्थी ' इत्यधिकम् । ४. ङ्ग१–उपतिष्ठतेऽग्निम् ।

अयमग्निः ᵛस्वः स्वयमेव ᵛस्वाय स्वकीयाय ᵛधायसे कर्मणे हविषां धारणाय वा ᵛऋत्विक् 'होताजनिष्ट' इत्यादिनोक्तलक्षणो होतृपोतृप्रशास्तृब्रह्मरूपः सन् ᵛऋत्विजम् आर्त्विज्यम् ॥ भाव-प्रधानोऽयं निर्देशः॥ देवर्त्विग्रूपः सन् ऋत्विजं मानुषमार्त्विज्यं ᵛकृणुताम् करोतु । ᵛवयं च तदनुग्रहात् ᵛआत् अनन्तरमेव ᵛस्तोमं स्तोत्रं ᵛयज्ञं ᵛच तदाश्रयं यागमपि ᵛअरम् अलमत्यर्थं ᵛवनेम संभजेमहि। ᵛररिम ददेमहि च हविः । यद्वा स्तोमं वनेम यज्ञं यज्ञयोग्यं हविः ररिम ॥

यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।
अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥ ८ ॥

यथा । विद्वान् । अरम् । करत् । विश्वेभ्यः । यजतेभ्यः ।
अयम् । अग्ने । त्वे इति । अपि । यम् । यज्ञम् । चकृम । वयम् ॥ ८ ॥

हे ᵛअग्ने ᵛविद्वान् त्वन्माहात्म्याभिज्ञः प्रयोगज्ञो वा यजमानः ᵛयथा ᵛविश्वेभ्यो ᵛयजतेभ्यः सर्वेभ्यो यजनीयेभ्यो देवेभ्यः ᵛअरं पर्याप्तं ᵛकरत् कुर्यात् तथा त्वमनुगृहाणेत्यर्थः । ᵛवयम् अपि ᵛयं ᵛयज्ञं यागविशेषं ᵛचकृम कुर्महे स यागः ᵛत्वे ᵛअपि। अपिरेवार्थे । तवैव त्वत्प्रीत्यर्थः । तमेव तस्मात्त्वं सर्वदेवार्थं[1] यागं[1] तत्तदृत्विग्रूपः सन् निर्वहेत्यर्थः ॥ ॥ २६ ॥

'इमां मे' इत्यष्टर्चं षष्ठं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रम् । 'इमां मे गायत्रं हि' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दस्यस्य विनियोगः । सूत्रितं च– 'इमां मे अग्ने समिधमिमामिति त्रयाणामुत्तमामुद्धरेत्' (आश्व. श्रौ. ४.१३) इति । अपराह्णिक्यामुपसदि 'इमां मे अग्ने समिधम्' इति तिस्र ऋचस्तिरश्यस्ता नव सामिधेन्यः कृत्वा विनियोक्तव्याः । 'अथोपसत्' इति खण्डे सूत्रितम्– 'इमां मे अग्ने समिधमिमामिति तु सामिधेन्यः' (आश्व. श्रौ. ४. ८) इति ॥

इमां मे अग्ने समिधमिमामुपसदं वनेः । इमा उ षु श्रुधी गिरः ॥ १ ॥

इमाम् । मे । अग्ने । सम्ऽइधम् । इमाम् । उपऽसदम् । वनेरिति वनेः ।
इमाः । ऊँ इति । सु । श्रुधि । गिरः ॥ १ ॥

हे ᵛअग्ने ᵛमे मदीयाम् ᵛइमाम् आधीयमानां ᵛसमिधम् ᵛइमामुपसदम् उपसदनसाधनामाहुतिम् उपसद्यागे क्रियमाणां वा ᵛवनेः संभजेथाः । तथा ᵛइमा ᵛउ इमा अपि ᵛगिरः स्तुतीः ᵛसु सुष्ठु ᵛश्रुधि शृणु ॥

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ॥ २ ॥

अया । ते । अग्ने । विधेम । ऊर्जः । नपात् । अश्वम्ऽइष्टे । एना । सुऽउक्तेन । सुऽजात ॥ २ ॥

१. ख-ज्ञ१-थ–°देवार्थयागम् ।

हे ᵛअग्ने ᵛते त्वाम् ᵛअया अनयाहुत्या ᵛविधेम परिचरेम । हे ᵛऊर्जो ᵛनपात् बलस्य नप्तः तस्य नपातयितर्वा हे ᵛअश्वमिष्टे व्यापकयज्ञ । यद्वा आशु क्रियमाणं कर्माश्वम् । तदिच्छतीत्यश्वमिष्टिः । संस्वरमाणा[1] ह्युपसदमाचरन्ति[1] । ‘ते कर्मभिः समत्वरन्त ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता अयजन् ’(ऐ. ब्रा. ३. ४५) इति ब्राह्मणम् । तादृशाग्ने ते त्वामयानयाहुत्या विधेम परिचरेम । तथा हे ᵛसुजात शोभनजनन ᵛएना एतेन ᵛसूक्तेन स्तोत्रेण प्रीणयेमेति शेषः । यद्वा स्तुत्युपबृंहितेन[2] विधेम ॥

तं त्वा॑ गी॒र्भिर्गि॑र्वणसं द्रविण॒स्युं द्र॑विणोदः । स॒प॒र्येम॑ सपर्यवः ॥ ३ ॥

तम् । त्वा । गीःऽभिः । गिर्वणसम् । द्रविणस्युम् । द्रविणःऽदः । सपर्येम । सपर्यवः ॥ ३ ॥

हे ᵛद्रविणोदः धनस्य दातः अग्ने ᵛतं तादृशं ᵛगिर्वणसं गीर्भिः स्तुतिभिः वननीयं ᵛद्रविणस्युं हविर्लक्षणधनेच्छुं ᵛत्वा त्वां ᵛसपर्यवः परिचरणकर्तारो वयं ᵛगीर्भिः स्तुतिभिः ᵛसपर्येम परिचरेम ॥

स बो॑धि सू॒रिर्म॑घवा॒ वसु॑पते॒ वसु॑दावन् । यु॒यो॒ध्य१॒॑स्मद्वेषां॑सि ॥ ४ ॥

सः । बोधि । सूरिः । मघऽवा । वसुऽपते । वसुऽदावन् । युयोधि । अस्मत् । द्वेषांसि ॥ ४ ॥

ᵛमघवा अन्नवान् ᵛसूरिः विद्वान् प्रेरको वा ᵛसः उक्तलक्षणकः[3] त्वं ᵛबोधि बुध्यस्व अस्मदीयं स्तोत्रम् । किंच हे अग्ने ᵛद्वेषांसि द्वेष्टॄन् ᵛअस्मत् अस्मत्तः ᵛयुयोधि पृथक्कुरु ॥

स नो॑ वृ॒ष्टिं दि॒वस्परि॒ स नो॒ वाज॑मन॒र्वाण॑म् । स नः॑ सहस्रिणी॒रिषः॑ ॥५॥

सः । नः । वृष्टिम् । दिवः । परि । सः । नः । वाजम् । अनर्वाणम् ।

सः । नः । सहस्रिणीः । इषः ॥ ५ ॥

ᵛसः स एवाग्निः ᵛनः अस्मदर्थं ᵛदिवस्परि द्युलोकादन्तरिक्षात् ॥ परीति पञ्चम्यर्थानुवादी ॥ ᵛवृष्टिं करोतीति च शेषः । ᵛसः एव ᵛनः अस्मदर्थम् ᵛअनर्वाणम् अविचलमनल्पं ᵛवाजं बलं ददातु । तथा ᵛसहस्रिणीः अपरिमितप्रकाराणि ᵛइषः अन्नानि ᵛसः एवाग्निर्ददातु ॥

ई॒ळा॒नाया॑वस्यवे॒ यवि॑ष्ठ दूत नो॒ गिरा । यजि॑ष्ठ होतरा ग॑हि ॥ ६ ॥

ईळानाय । अवस्यवे । यविष्ठ । दूत । नः । गिरा । यजिष्ठ । होतः । आ । गहि ॥ ६ ॥

हे ᵛयविष्ठ युवतम ᵛदूत देवानां यज्ञादिसूचक ᵛयजिष्ठ अतिशयेन यष्टव्य ᵛहोतः देवानामाह्वातः अग्ने ᵛनः ᵛगिरा अस्मदीयया स्तुत्या ᵛईळानाय पूजयित्रे ᵛअवस्यवे स्वरक्षणमिच्छते मदर्थम् ᵛआ ᵛगहि आगच्छ ॥

---

१. क-ख-ग-च-ञ-ञ१-ण-त-थ-न-म-व–सत्वरमाणा ह्युपसदाचरन्ति । २. क-च-ञ-ण-थ-न-म-व–स्तुत्या उपबृंहि तेन (?); ञ१–स्तुत्युपबृंहितेन मंत्रहितेम (?) । ३. ख-ग-च-ण१-व–उक्तलक्षणः; ञ१–उक्तगुणकः

अन्तर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे । दूतो जन्येव मित्र्यः ॥ ७ ॥

अन्तः । हि । अग्ने । ईयसे । विद्वान् । जन्म । उभया । कवे । दूतः । जन्याऽइव । मित्र्यः ॥७॥

हे [v]कवे मेधाविन् [v]अग्ने [v]अन्तः जनानां हृदये[1] [v]ईयसे [v]हि गच्छसि जानासि वा । हिः 'स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते' (ऋ.सं. ४. ८. ४) इत्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थः । कीदृशस्त्वम् । [v]उभया उभयविधानि [v]जन्म जन्मानि यष्टॄणां यजमानानां यष्टव्यानां देवानां च संबन्धीनि [v]विद्वान् जानन् सन् ईयसे इति संबन्धः । तत्र दृष्टान्तः । [v]जन्यः जनेभ्यो हितः [v]मित्र्यः विशेषेण मित्रेभ्यो हितः [v]दूतः [v]इव । स यथा प्रजानां चित्तवृत्तिज्ञानाय[2] राज्ञा प्रेरितः तासां मनो जानाति तद्वत् त्वमप्यस्माकमन्तरीयसे इत्यर्थः ॥

स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् ।
आ चास्मिन्त्सत्सि बर्हिषि ॥ ८ ॥

सः । विद्वान् । आ । च । पिप्रयः । यक्षि । चिकित्वः । आनुषक् ।
आ । च । अस्मिन् । सत्सि । बर्हिषि ॥ ८ ॥

हे अग्ने [v]सः त्वं [v]विद्वान् विशेषाभिज्ञः सन् [v]आ [v]च [v]पिप्रयः सर्वतोऽस्मान् पूरय च कामैः । हे [v]चिकित्वः चेतनावन् [v]आनुषक् अनुक्रमेण [v]यक्षि यज देवान् । [v]आ [v]सत्सि आसीद [v]चास्मिन् स्तीर्णे [v]बर्हिषि ॥ ॥ २७ ॥

'श्रेष्ठं यविष्ठ' इति षड्चं सप्तमं सूक्तं सोमाहुत्यार्षम् आग्नेयं गायत्रम्। प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसि अस्य विनियोगः पूर्वसूक्ते उक्तः । श्रावणीकर्मण्याद्या[3] विनियुक्ता ॥

श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर । वसो पुरुस्पृहं रयिम् ॥ १ ॥

श्रेष्ठम् । यविष्ठ । भारत । अग्ने । द्युऽमन्तम् । आ । भर । वसो इति । पुरुऽस्पृहम् । रयिम् ॥१॥

हे [v]अग्ने [v]यविष्ठ युवतम हे [v]भारत । भरता ऋत्विजः । तेषां संबन्धी भारतः । ते[4] अध्वर्यवादिभिः मथनहविःस्तोत्रादिना व्याप्रियमाणत्वात् । तादृश हे [v]वसो वासक व्याप्त वा एवंरूपाग्ने [v]श्रेष्ठम् अतिप्रशस्यं [v]द्युमन्तं दीप्तिमन्तं [v]पुरुस्पृहं बहुभिरर्थिभिः स्पृहणीयं [v]रयिम् [v]आ [v]भर आहर ॥

मा नो अरातिरीशत देवस्य मर्त्यस्य च । परि तस्या उत द्विषः ॥ २ ॥

मा । नः । अरातिः । ईशत । देवस्य । मर्त्यस्य । च । परि । तस्याः । उत । द्विषः ॥ २ ॥

१. ण-त-थ-व– हृदये हृदये । २. थ-व–चित्तज्ञानाय । ३. ज्ञ१–श्रावण° ४. ज्ञ१-प-व–तैः ।

हे अग्ने त्वदनुग्रहात् ᵛनः अस्मान् ᵛअरातिः अदानं शत्रुत्वम् । यद्वा छन्दसि अरातिशब्दः शत्रुवाची स्त्रीलिङ्गो भवति । अदाता शत्रुः ᵛमा ᵛईशत पराभवितुं शक्तो मा भूत् । मा विषयीकुर्यात् । अरातिर्विशेष्यते । ᵛदेवस्य च ᵛमर्त्यस्य ᵛच संबन्धिनी तैः कारिता । ᵛउत अपि च ᵛतस्याः उभयविधायाः ᵛद्विषः[1] अस्मदरातेः ᵛपर्षि पूरय ॥

विश्वा उत त्वया वयं धारा उदन्याइव । अति गाहेमहि द्विषः ॥ ३ ॥

विश्वाः । उत । त्वया । वयम् । धाराः । उदन्याःऽइव । अति । गाहेमहि । द्विषः ॥ ३ ॥

ᵛउत अपि च हे अग्ने ᵛवयं त्वदनुग्रहात् ᵛविश्वाः ᵛद्विषः सर्वानपि द्वेष्टॄन् ᵛउदन्याः ᵛधाराः ᵛइव उदकसंबन्धिनीर्धारा अल्पस्तुतीरिव[2] त्मना आत्मनैव अन्यनिरपेक्षेण ᵛअति ᵛगाहेमहि अतिक्रम्य[3] गच्छेम ॥

शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे । त्वं घृतेभिराहुतः ॥ ४ ॥

शुचिः । पावक । वन्द्यः । अग्ने । बृहत् । वि । रोचसे । त्वम् । घृतेभिः । आऽहुतः ॥ ४ ॥

हे ᵛपावक शोधक ᵛअग्ने ᵛशुचिः शुद्धः ᵛवन्द्यः नमस्कार्यः सन् ᵛबृहत् महत् अत्यधिकं ᵛवि ᵛरोचसे विविधं दीप्यसे । यतः ᵛत्वं ᵛघृतेभिः घृतैः ᵛआहुतः समन्तात् सिक्तः । अतो विरोचसे ॥

त्वं नो असि भारताग्ने वशाभिरुक्षभिः । अष्टापदीभिराहुतः ॥ ५ ॥

त्वम् । नः । असि । भारत । अग्ने । वशाभिः । उक्षऽभिः । अष्टाऽपदीभिः । आऽहुतः ॥५॥

हे ᵛभारत ऋत्विजां पुत्रस्थानीय ᵛअग्ने ᵛनः अस्मदीयः ᵛत्वं ᵛवशाभिः वन्ध्याभिर्गोभिः ᵛउक्षभिः सेक्तृभिर्बलीवर्दैः ᵛअष्टापदीभिः गर्भिणीभिश्च ᵛआहुतः आराधितः ᵛअसि ॥

द्रुन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ६ ॥

द्रुऽअन्नः । सर्पिःऽआसुतिः । प्रत्नः । होता । वरेण्यः । सहसः । पुत्रः । अद्भुतः ॥ ६ ॥

ᵛद्रुन्नः समिद्रूपान्नः ᵛसर्पिरासुतिः सर्पिः आसूयते आसिच्यते यस्मिन् तादृशः ᵛप्रत्नः पुरातनः ᵛहोता होमनिष्पादकः ᵛवरेण्यः वरणीयः ᵛसहसस्पुत्रः सहसो बलस्य पुत्रस्थानीयः । बलेनोत्पन्नत्वात् । ᵛअद्भुतः आश्चर्यभूतः । रमणीय इत्यर्थः । एवंमहानुभावोऽग्निः मामनुजानात्वित्यर्थः[4] ॥ ॥ २८ ॥

---

१. क-ख-ग-च-ज्ञ-ण-ण१-थ-न-प-म-व-विद्विषः । २. ख-ग-ण१-त-प-फ-ज्ञ-असस्तुतिरिव; क-ज-ज्ञ-थ-म-व-असस्तुतीरिव; न-असुतीरिव; च- असस्तुतिरिव; ज्ञ१-अल्पसूतिरिव; ण-आसस्तुतीरिव । ३. ख-ग-च-ण-ण१-त-थ-न-व-अभिक्रम्य । ४, ज्ञ१-मामनुजानातीत्यर्थः ।

'वाजयन्निव' इति षड्चमष्टमं सूक्तम्। सोमाहुतेर्हशब्दानुवृत्तस्याभावात् मण्डलद्रष्टा गृत्समद ऋषिः। अग्निर्देवता। हिशब्दाद्गायत्री छन्दः। अन्त्यानुष्टुप्। 'वाजयन्निवान्त्यानुष्टुप्' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोस्तृतीयसूक्तत्वेन अस्योत्तमावर्जितस्य विनियोग उक्तः॥

वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि। यशस्तमस्य मीळ्हुषः॥ १॥

वाजयन्ऽइव। नु। रथान्। योगान्। अग्नेः। उप। स्तुहि। यशःऽतमस्य। मीळ्हुषः॥१॥

हे अन्तरात्मन् [v]नु क्षिप्रम् [v]अग्नेः [v]योगान् अश्वान् [v]उप [v]स्तुहि। कीदृशस्याग्नेः। [v]यशस्तमस्य प्रवृद्धयशसः॥ मत्वर्थो लुप्यते॥ [v]मीळ्हुषः सेक्तुः फलस्य। ईदृशस्य योगान् स्तुहि। होतरिति वा संबोध्यम्। स्तुतौ दृष्टान्तः। [v]वाजयन्निव अन्नमिच्छन् पुरुष इव। स यथा अश्वान् गमनाय स्तौति तद्वत्। यथोक्तलक्षणस्याग्नेः[1] गमनसाधनान् [v]रथान् स्तुहि॥

यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिम्। चारुप्रतीक आहुतः॥ २॥

यः। सुऽनीथः। ददाशुषे। अजुर्यः। जरयन्। अरिम्। चारुऽप्रतीकः। आऽहुतः॥ २॥

[v]सुनीथः शोभननयनः [v]अजुर्यः अजरणीयोऽनभिभाव्यः [v]चारुप्रतीकः शोभनोपक्रमः [v]यः अस्ति सोऽग्निः [v]ददाशुषे हविर्दत्तवते यजमानाय तदर्थम् [v]अरिं तस्य शत्रुं [v]जरयन् नाशयन् [v]आहुतः समन्तादाराधितो भवति॥

य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते। यस्य व्रतं न मीयते॥ ३॥

यः। ऊँ इति। श्रिया। दमेषु। आ। दोषा। उषसि। प्रऽशस्यते।
यस्य। व्रतम्। न। मीयते॥ ३॥

[v]यः अग्निः [v]उ [v]श्रिया ज्वालया युक्तः सन् [v]दमेषु [v]आ आगत्य [v]दोषा रात्रिषु [v]उषसि अहःसु च [v]प्रशस्यते स्तूयते। [v]यस्य अग्नेः [v]व्रतं कर्म [v]न [v]मीयते न हिंस्यते न क्षीयते वा॥

आ यः स्वर्ण भानुना चित्रो विभात्यर्चिषा। अञ्जानो अजरैरभि॥ ४॥

आ। यः। स्वः। न। भानुना। चित्रः। विऽभाति। अर्चिषा। अञ्जानः। अजरैः। अभि॥४॥

[v]यः अग्निः [v]चित्रः चायनीयो नानावर्णो वा [v]अर्चिषा ज्वालया रश्मिसमूहेन [v]आ [v]विभाति सर्वतो भासते। तत्र दृष्टान्तः। [v]स्वः [v]भानुना किरणेन सूर्य इव। स यथा विभाति तद्वत्। किं कुर्वन्। [v]अजरैः नित्यैः ज्वालासमूहैः [v]अभि सर्वतः [v]अञ्जानः व्यञ्जयन् प्रकाशयन्॥

---

१. क-ख-ग-च-ङ-ण१-म-यद्योक्तलक्षणस्याग्नेः।

अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे ॥ ५ ॥

अत्रिम् । अनु । स्वऽराज्यम् । अग्निम् । उक्थानि । ववृधुः । विश्वाः । अधि । श्रियः । दधे ॥५॥

vअत्रि शत्रूणामन्नानां वा भक्षकं vस्वराज्यं स्वयमेव राजमानं स्वाराज्यम्[1] vअनु अभिलक्ष्य वा vअग्निम् vउक्थानि शस्त्राणि vववृधुः[2] वर्धयन्ति । स चाग्निः vविश्वाः सर्वाः vश्रियः vअधि vदधे धारयति ॥

अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् ।
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥

अग्नेः । इन्द्रस्य । सोमस्य । देवानाम् । ऊतिऽभिः । वयम् ।
अरिष्यन्तः । सचेमहि । अभि । स्याम । पृतन्यतः ॥ ६ ॥

vअरिष्यन्तः केनाप्यहिंस्यमानाः vवयम् vअग्नेः vइन्द्रस्य vसोमस्य vदेवानाम् अन्येषामपि vऊतिभिः रक्षणाभिः vसचेमहि संगच्छेमहि । युक्ता भवेम । तथा रक्षायुक्ता वयं vपृतन्यतः पृतनामात्मन इच्छतः शत्रून् vअभि vष्याम अभिभवेम ॥ पृतनाशब्दात् क्यचि ' कव्यध्वरपृतनस्यर्चि लोपः ' इत्यवर्णलोपः ॥　　॥ २९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
सुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[3] विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टके
पञ्चमोऽध्यायः
समाप्तः ॥

---

१. ग-झ१-म-स्वराज्यम् । २. न-व-वावृधुः । ३. क-ज-झ-झ१-ण-त-म-सायणमात्येन ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

'नि होता' इति पङ्क्तं नवमं सूक्तं गृत्समदस्यार्षं 'नि होता' इत्यनुक्रान्तत्वात् । अनुक्तत्वात् त्रिष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे[1] छन्दसि[1] अस्य विनियोगः । 'अथैतस्याः' इति खण्डे सूत्रितं–'नि होता होतृषदन इति सूक्ते' (आश्व. श्रौ. ४. १३) इति ॥ अग्निप्रणयन आद्ये ऋचौ विनियुक्ते । 'पञ्चम्यां पौर्णमास्याम्' इति खण्डे सूत्रितं–'नि होता होतृषदन इति द्वे' (आश्व. श्रौ. २. १७) ॥

नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥ १ ॥

नि । होता । होतृऽसदने । विदानः । त्वेषः । दीदिऽवान् । असदत् । सुऽदक्षः ।
अदब्धव्रतऽप्रमतिः । वसिष्ठः । सहस्रम्ऽभरः । शुचिऽजिह्वः । अग्निः ॥ १ ॥

गृत्समदः स्तौति । [v]होता देवानामाह्वाता [v]विदानः विद्वान् [v]त्वेषः प्रवृद्धः [v]दीदिवान् दीप्यमानः [v]सुदक्षः शोभनबलः [v]अदब्धव्रतप्रमतिः । अदब्धान्यहिंसितानि व्रतानि कर्माणि यस्याः सा अदब्धव्रता प्रमतिः प्रकृष्टा बुद्धिर्यस्य स तथोक्तः । [v]वसिष्ठः सर्वस्य वासयितृतमः ॥ वासयतेस्तृजन्तस्य इष्ठनि रूपम् ॥ [v]सहस्रंभरः सहस्रस्यानेकविधस्य भर्ता । विहरणेन नानाविधरूपस्य धारक इत्यर्थः । यद्वा सहस्रस्य सर्वस्य भर्ता । तथा च वाजसनेयं–'सर्वं वै सहस्रं सर्वंभर इत्येव तदाह' इति । [v]शुचिजिह्वः शुचिर्दीप्ता जिह्वा ज्वाला यस्य स तथोक्तः । एवंभूतः [v]अग्निः [v]होतृषदने । होतात्र सीदतीति होतृषदनम् उत्तरा[2] वेदी[2] ॥ अधिकरणे ल्युट् ॥ तत्र [v]नि [v]असदत् नितरां सीदतु ॥ उक्तार्थे ब्राह्मणं–'नि होता होतृषदने विदान इत्यग्निर्वै देवानां होता तस्यैतद्धोतृषदनं यदुत्तरवेदीनाभिस्त्वेषो दीदिवाँ असदत्सुदक्ष इत्यासन्नो हि स तर्हि भवत्यदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरित्येषा ह वा अस्य सहस्रंभरता यदेनमेकं सन्तं बहुधा विहरन्ति' (ऐ. ब्रा. १. २८) इति ॥

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ २ ॥

त्वम् । दूतः । त्वम् । ऊँ इति । नः । परःऽपाः । त्वम् । वस्यः । आ । वृषभ । प्रऽनेता ।
अग्ने । तोकस्य । नः । तने । तनूनाम् । अप्रऽयुच्छन् । दीद्यत् । बोधि । गोपाः ॥ २ ॥

---

१. म–त्रिष्टुप्छन्दसि । २. ण-म–उत्तरवेदी ।

हे [v]वृषभ अभिमतफलवर्षक[1] हे [v]अग्ने [v]त्वं [v]दूतः अस्मदीये यज्ञे देवाह्वानार्थं[2] दूतो भव। [v]त्वमु त्वमेव [v]नः अस्माकं [v]परस्पाः आपद्भ्यः पारयिता पाता च भव। किंच [v]त्वं [v]वस्यः वसुनो धनस्य [v]आ [v]प्रणेता अस्मदाभिमुख्येन प्रापयिता भव। [v]अप्रयुच्छन् अप्रमाद्यन्। [v]दीद्यत्। दीदयतिर्दीप्तिकर्मा। शोभमानः। त्वं [v]नः अस्माकं [v]तोकस्य पुत्रस्य [v]तने। तनोति विस्तारयति कुलमिति तनः पौत्रः। तस्मिन् अस्मदीयानां [v]तनूनां [v]गोपाः गोपायिता[3]। तथा च ब्राह्मणम्–'अग्निर्वै देवानां गोपा अग्निमेव तत्सर्वतो गोप्तारं परिदत्त आत्मने च यजमानाय च' (ऐ. ब्रा. १. २८) इति। तादृशस्त्वं च गोपायिता भवसीति [v]बोधि बुध्यस्व॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे।
यस्मा द्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे॥ ३॥

विधेम। ते। परमे। जन्मन्। अग्ने। विधेम। स्तोमैः। अवरे। सधऽस्थे।
यस्मात्। योनेः। उत्ऽआरिथ। यजे। तम्। प्र। त्वे इति। हवींषि। जुहुरे। सम्ऽइद्धे॥३॥

हे [v]अग्ने [v]परमे उत्कृष्टे [v]जन्मन्। जायते प्रादुर्भवत्यस्मिन्निति जन्मस्थानं द्यौः। तस्मिन् द्युलोकेऽवस्थिताय [v]ते तुभ्यं [v]विधेम स्तुतिभिः परिचरेम। [v]अवरे द्युलोकादधस्ते [v]सधस्थे अन्तरिक्षे स्थिताय तुभ्यं [v]स्तोमैः स्तोत्रैः [v]विधेम परिचरेम। [v]यस्माद्योनेः पृथिवीरूपात् स्थानात् त्वम् [v]उदारिथ उद्गतोऽसि प्रादुर्भूतोऽसि [v]तं पृथिवीप्रदेशं [v]यजे पूजयामि। तत्र हि [v]समिद्धे समिद्भिः समिध्यमाने [v]त्वे त्वयि [v]हवींषि पुरोडाशादीनि [v]प्र [v]जुहुरे अध्वर्वादयः प्रजुह्वति॥ जुहोतेर्लिटि रूपम्॥

अग्ने यजस्व हविषा यजीयाञ्छुष्टी देष्णमभि गृणीहि राधः।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता॥ ४॥

अग्ने। यजस्व। हविषा। यजीयान्। श्रुष्टी। देष्णम्। अभि। गृणीहि। राधः।
त्वम्। हि। असि। रयिऽपतिः। रयीणाम्। त्वम्। शुक्रस्य। वचसः। मनोता॥ ४॥

हे [v]अग्ने [v]यजीयान् यष्टृतमस्त्वं [v]हविषा अस्मदृत्तेन [v]यजस्व देवान् संयोजय। [v]देष्णं देयं [v]राधः अन्नं [v]श्रुष्टी। श्रुष्टीति क्षिप्रनाम। क्षिप्रम् [v]अभि [v]गृणीहि। देवानां पुरत इदं स्वादुतरमिदं स्वादुतरमिति ब्रूहि। यद्वा श्रुष्टी क्षिप्रकारी त्वं देष्णं देयं राधो धनमभिगृणीहि अस्मदाभिमुख्येन ब्रूहि प्रयच्छेत्यर्थः। दानसामर्थ्यं दर्शयति। [v]त्वं [v]रयीणां धनानां मध्ये [v]रयिपतिः उत्तमस्य धनस्य पतिः [v]असि [v]हि। यद्वा रयीणां रयिपतिरित्यत्रैको रयिशब्दोऽनुवादः। [v]त्वं [v]शुक्रस्य दीप्तस्य [v]वचसः अस्मदीयस्य स्तोत्रस्य [v]मनोता प्रज्ञाता भवसि। यद्वा मनोता (?)॥

१. म–अभिमतफलप्रवर्षक। २. ख-ग-च-ण१–देवतार्थम्; व–देवताह्वानार्थम्। ३. झ१-गोपायिता भव।

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥

उभयम् । ते । न । क्षीयते । वसव्यम् । दिवेऽदिवे । जायमानस्य । दस्म ।
कृधि । क्षुऽमन्तम् । जरितारम् । अग्ने । कृधि । पतिम् । सुऽअपत्यस्य । रायः ॥ ५ ॥

vदस्म दर्शनीय हे vअग्ने vदिवेदिवे प्रतिदिनमग्निहोत्रकाले vजायमानस्य vते तव vउभयं vवसव्यं दिव्यं भौमं च वसु ॥ वस्वादित्वात्स्वार्थिको यत्प्रत्ययः (पा. सू. ५. ४. ३०. ४) ॥ तादृशमुभयं वसु vन vक्षीयते न हीयते । अस्योभयविधधनसद्भावे मन्त्रवर्णः–' त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य' (ऋ. सं. १.१४४. ६) इत्यत्रोक्तः । अतस्त्वं vजरितारं तव स्तोत्रं कुर्वाणमिमं यजमानं vक्षुमन्तम् अन्नवन्तं[1] कीर्तिमन्तं वा vकृधि कुरु । किंच vस्वपत्यस्य शोभनापत्ययुक्तस्य vरायः धनस्य vपतिं स्वामिनं कुरु ॥

साकमेधे पर्वणि पूर्वेद्युरनुसवनं तिस्र इष्टयः कर्तव्याः । प्रथमायामग्नेरनीकवतः ' सैनानीकेन ' इति याज्या । तथा ' ततः साकमेधाः ' इति खण्डे सूत्रितं–' सैनानीकेन सुविदत्रो अस्मे ' (आश्व. श्रौ. २. १८) इति ॥

सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवदिदीहि ॥ ६ ॥

सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽयजिष्ठः । स्वस्ति ।
अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥

हे vअग्ने vसः तादृशस्त्वम् vएना एतेन vअनीकेन युक्तस्त्वं vसुविदत्रः सुप्रतिज्ञः सुधनो वा vअस्मे अस्माकं भव । vदेवान् vयष्टा देवानां हविष्प्रदानेन पूजकः vआयजिष्ठः यष्टृतमः vअदब्धः केनाप्यतिरस्कृतः vगोपाः देवानां गोपायिता । vउत अपि च vनः अस्माकं vपरस्पाः दुरितेभ्यः पारयिता पाता च त्वं vद्युमत् कान्तियुक्तम् vउत अपि च vरेवत् धनयुक्तं यथा भवति तथा vस्वस्ति vदिदीहि क्षेमेण सर्वतो दिदीहि क्षेमेण सर्वतो दीप्यस्व ॥ ॥ १ ॥

' जोहूत्रः ' इति षड्ऋचं दशमं सूक्तं गार्त्समदं त्रैष्टुभमाग्नेयं ' जोहूत्रः ' इत्यनुक्रान्तत्वात् । सूक्तविनियोगः पूर्वेण सहोक्तः ॥

१. व–यज्ञवन्तम् ।

जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ॥ १ ॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । सम्ऽइद्धः ।
श्रियम् । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥

vजोहूत्रः सर्वैर्यज्ञार्थं ह्वातव्यो होतव्यो वा ॥ ह्वयतेर्जुहोतेर्वा रूपम् ॥ तादृशः vप्रथमः । ' अग्निर्वै देवानामवमः ' (ऐ. ब्रा. १.१) इत्याम्नानात् । मुख्यो यः vअग्निः । vयत् यदा vइळः इळायाः vपदे उत्तरवेद्यात्मके स्थाने vमनुषा मनुष्येण यजमानेन vसमिद्धः सोऽग्निः vपितेव देवानां हविष्प्रापणेन पालको भवति । vश्रियं दीप्तिं vवसानः आच्छादयन् vअमृतः मरणधर्मरहितः vविचेताः विविधप्रज्ञः vश्रवस्यः । श्रव इत्यन्ननाम । तस्मै हितः । vवाजी बलवान् । vसः अग्निः vमर्मृजेन्यः सर्वैः परिचरणीयो भवति ॥ यङ्लुगन्तात् केन्यप्रत्ययः ॥

श्रुया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाहं चक्रे विभृत्रः ॥ २ ॥

श्रुयाः । अग्निः । चित्रऽभानुः । हवम् । मे । विश्वाभिः । गीःऽभिः । अमृतः । विऽचेताः ।
श्यावा । रथम् । वहतः । रोहिता । वा । उत । अरुषा । अहं । चक्रे । विऽभृत्रः ॥ २ ॥

vअमृतः मरणधर्मरहितः vविचेताः विशिष्टप्रज्ञः vचित्रभानुः विचित्रदीप्तिश्चायनीयदीप्तिर्वा सः vअग्निः vविश्वाभिर्गीर्भिः स्तुतिसाधनभूतैः सर्वैर्वार्क्यैः क्रियमाणं vमे मम vहवं स्तोत्रं vश्रुयाः श्रृणोतु । तस्याग्नेः vरथं vश्यावा श्यामवर्णावश्वौ vवहतः । vवा अपि वा vरोहिता रोहिद्वर्णौ अश्वौ[1] रथं वहतः[1] । vउत अपि च vअरुषा आरोचमानौ शुक्लवर्णावश्वौ[2] वहतः[3] । रोहिद्वर्णयोरश्वयोः श्यावादिवर्णपरिग्रहः स्वेच्छया भवति । vविभृत्रः नानास्थानेषु विहृतः vचक्रे ऋत्विग्भिरकारि खलु ॥ करोतेः कर्मणि लिट् ॥

उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उत्तानायाम् । अजनयन् । सुऽसूतम् । भुवत् । अग्निः । पुरुऽपेशासु । गर्भः ।
शिरिणायाम् । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः ॥ ३ ॥

१. ण–' अश्वौ रथं वहतः ' नास्ति । २. ण–अश्वौ । ३. ण–रथं वहतः ।

[v]उत्तानायाम् उत्तानशयायामरण्यां [v]सुपूतम् अग्निहोत्रार्थं सुष्ठु प्रेरितमग्निम् [v]अजनयन् अध्वर्वादय उदपादयन् । सः [v]अग्निः [v]पुरुपेशासु । पेश इति रूपनाम । बहुरूपास्वोषधीषु [v]गर्भः [v]भुवत् अन्तर्वर्तमानतया गर्भ इव भवेत् ॥ भवतेर्लिङि रूपम् ॥ [v]शिरिणायाम् । शीर्यन्तेऽस्यां भूतानीति शिरिणा रात्रिः । तस्यामपि [v]अक्तुना । अञ्जनादक्तुस्तमः । तेन तमसा [v]अपरीवृतः[1] असंस्पृष्टः अत एव [v]महोभिः तेजोभिर्युक्तः [v]प्रचेताः प्रकृष्टप्रज्ञः सन् [v]वसति दीप्यमानो वर्तते ॥

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ ४ ॥

जिघर्मि । अग्निम् । हविषा । घृतेन । प्रतिऽक्षियन्तम् । भुवनानि । विश्वा ।
पृथुम् । तिरश्चा । वयसा । बृहन्तम् । व्यचिष्ठम् । अन्नैः । रभसम् । दृशानम् ॥ ४ ॥

[v]विश्वा सर्वाणि [v]भुवनानि [v]प्रतिक्षियन्तं वैश्वानरात्मनाधितिष्ठन्तं [v]पृथुं महान्तं [v]तिरश्चा सर्वतः प्रवर्तमानेन [v]वयसा पेशसा[2] [v]बृहन्तं प्रवृद्धम् [v]अन्नैः हविर्लक्षणैः [v]व्यचिष्ठं व्याप्तं [v]रभसं बलवन्तं [v]दृशानम् एवंगुणवत्तया दृश्यमानम् [v]अग्निं पुरोडाशादिलक्षणेन [v]हविषा [v]घृतेन च [v]जिघर्मि सिञ्चामि दीपयामि वा ॥ 'घृ क्षरणदीप्त्योः' । लटि रूपम् ॥ अस्मिन्नृचे (?) वाजसनेयकम्-'जुहाम्यग्निं हविषा घृतेन प्रति ह्येष सर्वाणि भूतानि क्षेति पृथिव्या एष वयसा धूमेन बृहन्तं व्यचिष्ठमन्नै रभसं दृशानमित्यनवकाशनवन्तमन्नैरन्नादं दीप्यमानमित्येतदा विश्वत इत्या सर्वतः प्रत्यञ्चं जुहोमीत्येतदरक्षसेत्यहेळमानेन ममसेदं जुषेतेत्येतन्मर्यश्रीरिति मर्यश्रीरित्येष स्पृहयद्वर्णो अग्निर्नाभिमृश इति न ह्येष मृशेत दीप्यमानो भवति' इति ॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ ५ ॥

आ । विश्वतः । प्रत्यञ्चम् । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत ।
मर्यऽश्रीः । स्पृहयत्ऽवर्णः । अग्निः । न । अभिऽमृशे । तन्वा । जर्भुराणः ॥ ५ ॥

[v]विश्वतः सर्वत्र व्याप्य वर्तमानं [v]प्रत्यञ्चं यज्ञं प्रत्यागच्छन्तमग्निं येन घृतेन [v]आ [v]जिघर्मि आसिञ्चामि । [v]अरक्षसा बाधकरहितेन[3] [v]मनसा स्तोत्रेण सह [v]तत् आज्यं [v]जुषेत भवान् सेवेत । [v]मर्यश्रीः । मर्यैर्मर्त्यैः श्रयणीयो भजनीयः । [v]स्पृहयद्वर्णः । यादृशं वर्णं यजमानः स्पृहयति तादृशवर्णोपेतः । [v]तन्वा तेजसा [v]जर्भुराणः पूर्यमाणः [v]अग्निः [v]नाभिमृशे । अतितेजस्वितयाभिमर्शनीयो न भवति ॥ अभिपूर्वात् मृशेः कृत्यार्थे केन्प्रत्ययः ॥

१. ण-थ-अपरिवृतः । २. क्ष१-म-तेजसा; थ-पयसा; ण-'पेशसा' नास्ति । ३. म-बाधरहितेन ।

ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥

ज्ञेयाः । भागम् । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम ।
अनूनम् । अग्निम् । जुह्वा । वचस्या । मधुऽपृचम् । धनऽसाः । जोहवीमि ॥ ६ ॥

[v]वरेण । वारयत्यनेन शत्रूनिति वरं तेजः । तेन [v]सहसानः शत्रूनभिभवन् त्वं [v]भागं भजनीयं स्तोत्रं [v]ज्ञेयाः जानीहि ॥ आशीर्लिङि ' वान्यस्य संयोगादेः ' (पा. सू. ६. ४. ६८) इति णत्वम् ॥ [v]त्वादूतासः । त्वं दूतो येषामसि[1] ते त्वादूतासः । यद्वा त्वया प्रेरिता वयं [v]मनुवत् मनुरिव [v]वदेम स्तोत्रं ब्रूयाम । [v]जुह्वा । हूयतेऽस्यामिति जुहूर्ज्वाला पात्रविशेषो वा । तया [v]अनूनं संपूर्णं [v]मधुपृचं मधुना कर्मफलेन यजमानं संयोजयन्तम् [v]अग्निं [v]धनसाः धनस्य संभक्तारं [v]वचस्या स्तुतिकामनया [v]जोहवीमि आह्वयामि ॥ ॥ २ ॥

' श्रुधी हवम् ' इत्येकविंशत्यृचमेकादशं सूक्तं गार्त्समदम् । अत्रानुक्रमणिका–' श्रुधि सैकेन्द्रं विराट्स्थानमृतेऽन्त्याम् ' इति । विराट्स्थाना त्रिष्टुप् । तल्लक्षणमनुक्रमण्यामुक्तं–' नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना ' इति । अन्त्या त्रिष्टुप् विशेषस्यानुक्तत्वात् । इन्द्रो देवता । पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीयशस्त्रे द्वे सूक्ते निविद्धाने । तत्रेदं तृतीयं सूक्तम् । ' चतुर्थेऽहनि ' इति खण्डे सूत्रितं–' श्रुधी हवमिन्द्र मरुत्वाँ इन्द्रेति मरुत्वतीयम् ' (आश्व. श्रौ. ७. ११) इति ॥

श्रुधी हवमिन्द्र मा रिषण्यः स्यामं ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसुयवः सिन्धवो न क्षरन्तः ॥ १ ॥

श्रुधि । हवम् । इन्द्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनाम् ।
इमाः । हि । त्वाम् । ऊर्जः । वर्धयन्ति । वसुऽयवः । सिन्धवः । न । क्षरन्तः ॥ १ ॥

गृत्समदः स्तौति । हे [v]इन्द्र मे [v]हवं मदीयमिदं स्तोत्रं [v]श्रुधि शृणु । [v]मा [v]रिषण्यः मा हिंसीः । इदमल्पं न साधीय इति मा निराकार्षीः ॥ ' दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ' इति निपातितः ॥ वयं [v]ते तव [v]वसूनां [v]दावने दानाय [v]स्याम पात्रभूता भवेम । [v]इमाः अस्माभिर्दत्तानि [v]वसूयवः दातुर्यजमानस्य धनमिच्छन्ति ॥ छन्दसि परेच्छायां क्यच् ॥ तादृशानि [v]क्षरन्तः स्रवन्तः [v]सिन्धवः इव घृतक्षरणोपेतानि [v]ऊर्जः हविर्लक्षणान्यन्नानि [v]त्वां [v]वर्धयन्ति [v]हि ॥

सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥

सृजः । महीः । इन्द्र । याः । अपिन्वः । परिऽस्थिताः । अहिना । शूर । पूर्वीः ।
अमर्त्यम् । चित् । दासम् । मन्यमानम् । अव । अभिनत् । उक्थैः । ववृधानः ॥ २ ॥

---

१. म–येषामिति ।

[v]शूर शत्रूणां हिंसक हे [v]इन्द्र [v]याः अपः [v]अपिन्वः अवर्धयः । [v]पूर्वीः प्रभूतास्ताः [v]अहिना मेघेन वृत्रेण वा [v]परिष्ठिताः अधिष्ठिताः[1] आक्रान्ताः । ततस्त्वं तस्मादहेः सकाशात् [v]महीः महतीरपः [v]सृजः व्यसृजः । [v]उक्थैः शस्त्रैः [v]वावृधानः वर्धमानस्त्वं [v]दासं सर्वस्योपक्षपयितारम् [v]अमर्त्यं [v]चित् मरणधर्मरहितमेवात्मानं [v]मन्यमानं तमसुरम् [v]अवाभिनत् अवाङ्मुखं यथा भवति तथा ॥ 'भिदिर् विदारणे' । लङि सिपि रूपम् ॥

उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥

उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इन्द्र । रुद्रियेषु । च ।
तुभ्यै । इत् । एताः । यासु । मन्दसानः । प्र । वायवे । सिस्रते । न । शुभ्राः ॥ ३ ॥

हे [v]शूर [v]इन्द्र [v]येषु [v]उक्थेषु होत्रादिभिः क्रियमाणेषु शस्त्रेषु [v]रुद्रियेषु । रुद्रियं सुखम् । तत्साधनभूतेषु । यद्वा रुद्राः स्तोतारः । तत्कृतेषु उद्गातॄणां [v]स्तोमेषु । [v]च [v]नु क्षिप्रं [v]चाकन् स्तुतीः कामयसे ॥ कमतेः कनतेर्वा यङ्लुकि रूपम् ॥ [v]यासु स्तोत्रशस्त्ररूपासु स्तुतिषु [v]मन्दसानः हृष्यन् भवसि ताः [v]एताः [v]शुभ्राः दीप्यमानाः स्तुतयः [v]वायवे अस्मदीयं यज्ञं प्रत्यागच्छते [v]तुभ्येत् तुभ्यमेव [v]प्र [v]सिस्रते त्वदर्थमेव प्रसरन्ति । [v]न संप्रत्यर्थे । ता अधुना सेवस्व ॥

शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥ ४ ॥

शुभ्रम् । नु । ते । शुष्मम् । वर्धयन्तः । शुभ्रम् । वज्रम् । बाह्वोः । दधानाः ।
शुभ्रः । त्वम् । इन्द्र । ववृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः ॥ ४ ॥

हे [v]इन्द्र [v]ते तव [v]शुभ्रं शोभनं [v]शुष्मं बलं स्तोत्रैः [v]वर्धयन्तः [v]शुभ्रं दीप्तं [v]वज्रम् आयुधं [v]नु क्षिप्रं तव [v]बाह्वोर्दधानाः निदधानाः । स्तूयमानो हि इन्द्रः असुरवधाय वज्रमादत्त इतीत्थंरूपेण[2] आयुधं निदधाना भवामः । [v]वावृधानः स्तोत्रैः वर्धमानः [v]शुभ्रः तेजसा युक्तः [v]त्वं [v]अस्मे अस्माकं [v]दासीः उपक्षपयित्रीः [v]विशः आसुरीः प्रजाः [v]सूर्येण सुष्ठु प्रेरकेण । आयुधं हि प्रेरयति त्वं युध्यस्वेति । एवंरूपेण बाह्वोर्निहितेन वज्रेण [v]सह्याः अभिभव ॥ सहतेर्व्यत्ययेन लिङि परस्मैपदम् ॥

गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तम्भांसमहन्नहिं शूर वीर्येण ॥ ५ ॥

गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । अपिऽवृतम् । मायिनम् । क्षियन्तम् ।
उतो इति । अपः । द्याम् । तस्तम्भांसम् । अहन् । अहिम् । शूर । वीर्येण ॥ ५ ॥

१. त-थ-'अधिष्ठिताः' नास्ति । २. ख-ग-ण-त-थ-न-व-इतीत्थंरूपेण ।

हे [v]शूर इन्द्र [v]गुहा गुहायां [v]हितं निहितं अत एव [v]गुह्यम् अप्रकाश्यं [v]गूळ्हं गूढम् [v]अपीवृतं तिरोहितम् । अत्रैकस्मिन्तिरोधानरूपेऽर्थे पुनरुक्तयस्तिरोधानभूयस्त्वप्रतिपादनपराः । अभ्यासे हि भूयानर्थो भवति । यथाहो दर्शनीयाहो दर्शनीयेति । तादृशं [v]मायिनं मायाविनमसुरं [v]क्षियन्तं निवसन्तं [v]उतो अपि च [v]अपो [v]द्यां दिवं च [v]तस्तम्भांसं स्वसामर्थ्येन स्तम्भयन्तम् हत्यर्थभूतम् [v]अहिम् असुरं मेघं वा [v]वीर्येण सामर्थ्यभूतेन वज्रेण [v]अहन् हतवानसि ॥ ' हन हिंसागत्योः ' इत्यस्य लङि रूपम् ॥ ॥ ३ ॥

स्तवा नु तं इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥ ६ ॥

स्तव । नु । ते । इन्द्र । पूर्व्या । महानि । उत । स्तवाम । नूतना । कृतानि ।
स्तव । वज्रम् । बाह्वोः । उशन्तम् । स्तव । हरी इति । सूर्यस्य । केतू इति ॥ ६ ॥

हे [v]इन्द्र [v]पूर्व्या पुरातनानि [v]महानि महान्ति [v]ते तव कर्माणि [v]नु क्षिप्रं [v]स्तव स्तवाम । [v]उत अपि च [v]नूतना अधुनातनानि [v]कृतानि कर्माणि [v]स्तवाम । [v]बाह्वोरुशन्तं दीप्यमानं [v]वज्रं [v]स्तव स्तवाम । किंच [v]सूर्यस्य सुष्ठु प्रेरकस्य सुवीर्यस्य वा सूर्यात्मनो वेन्द्रस्य [v]केतू प्रज्ञापकौ [v]हरी एतन्नामकावश्वौ [v]स्तव स्तवाम ॥ ' ष्टुञ् स्तुतौ ' । ' तिङां तिङो भवन्ति ' इत्युत्तमबहुवचनस्य मध्यमैकवचनादेशः । ' बहुलं छन्दसि ' इति शपो लुगभावः ॥

हरी नु तं इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारंस्त पर्वताश्चित्सरिष्यन् ॥ ७ ॥

हरी इति । नु । ते । इन्द्र । वाजयन्ता । घृतऽश्चुतम् । स्वारम् । अस्वार्ष्टाम् ।
वि । समना । भूमिः । अप्रथिष्ट । अरंस्त । पर्वतः । चित् । सरिष्यन् ॥ ७ ॥

हे इन्द्र [v]वाजयन्ता वेगं कुर्वन्तौ ॥ ' तत्करोति° ' इति णिच् ॥ [v]ते तव [v]हरी एतन्नामकावश्वौ [v]घृतश्चुतं घृतस्योदकस्य च्यावयितारं [v]स्वारं मेघध्वनिं [v]नु क्षिप्रम् [v]अस्वार्ष्टाम् ॥ स्वरतिः शब्दकर्मा । पाकं पचतीतिवत् एकधातुः[1] अनुवादः । लङि रूपम् ॥ [v]समना समस्थला यद्वा समना सर्वतः [v]वि [v]अप्रथिष्ट । गर्जनं श्रुत्वा ममोपरि वृष्टिर्भवतीति प्रथिताभूत् । तथा [v]पर्वतश्चित् मेघोऽपि [v]सरिष्यन् वर्षणार्थमितस्ततो गमिष्यन् [v]अरंस्त अरमत ॥ रमतेर्लुङि रूपम् ॥

१. क–एको धातुः; च–एकधातोः; झ–एकवादको धातुः; झ१–एवको धातुः; ण-त-थ-न–एका धातुः;

नि पर्वतः सादयप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥ ८ ॥

नि । पर्वतः । सादि । अप्रंडयुच्छन् । सम् । मातृडभिः । वावशानः । अक्रान् ।
दूरे । पारे । वाणीम् । वर्धयन्तः । इन्द्रंडइषिताम् । धमनिम् । पप्रथन् । नि ॥ ८ ॥

vअप्रयुच्छन् अप्रमाद्यन् वर्षणे सावधानः vपर्वतः मेघः vनि vपादि नभसि निषण्ण आसीत् । vमातृभिः अद्भिर्माध्यमिकाभिर्वाग्भिर्वा vसं vवावशानः सह शब्दं कुर्वाणः vअक्रान् अक्रमीत्। इतस्ततः संचारमकरोत् ॥ क्रमतेर्लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥ vदूरे vपारे अतिदूरेऽन्तरिक्षे स्थितां vवाणीं माध्यमिकां वाचं vवर्धयन्तः स्तोत्रैः समृद्धां कुर्वन्तः स्तोतारो मरुतो वा vइन्द्रेषितां इन्द्रेण प्रेरितां vधमनिं शब्दं कुर्वाणां तां वाचं नितरां vपप्रथन् अप्रथयन् ॥

इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ ९ ॥

इन्द्रंः । महाम् । सिन्धुम् । आडशयानम् । मायाडविनम् । वृत्रम् । अस्फुरत् । निः ।
अरेजेताम् । रोदसी इति । भियाने इति । कनिक्रदतः । वृष्णः । अस्य । वज्रात् ॥ ९ ॥

बलवान् vइन्द्रो vमहां महान्तं vसिन्धुम्। स्यन्दते इतस्ततः संचरतीति सिन्धुर्मेघः । तम् vआशयानं तमधिष्ठाय शयानं vमायाविनं vवृत्रम् असुरम् । यद्वा सिन्धुरुदकम् । तदधिष्ठाय शयानं वृत्रम् । वृणोत्याकाशमिति वृत्रो मेघः । तं vनिः vअस्फुरत् निरहन् । vवृष्णः वर्षकस्य vअस्य इन्द्रस्य vकनिक्रदतः शब्दं कुर्वाणात् vवज्रात् vभियाने भयं प्राप्ते vरोदसी द्यावापृथिव्यौ vअरेजेताम् अकम्पेताम् ॥ ' दाधर्तिदर्धर्ति० ' इत्यादिना कनिक्रदत्शब्दो निपातितः ॥

अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥ १० ॥

अरोरवीत् । वृष्णः । अस्य । वज्रः । अमानुषम् । यत् । मानुषः । निडजूर्वात् ।
नि । मायिनः । दानवस्य । मायाः । अपादयत् । पपिडवान् । सुतस्य ॥ १० ॥

vवृष्णः कामानां वर्षकस्य vअस्य इन्द्रस्य vवज्रः vअरोरवीत् भृशं शब्दमकरोत् । कदेत्यपेक्षायामाह । vयत् यदा vअमानुषं मनुष्याणां रहितम् । यद्वा मानुषोऽहं न भवामीत्येवं मन्यमानं तममुरं vमानुषः मनुष्याणां हितकारी यद्वा मतिमानिन्द्रः vनिजूर्वात् नितरां हिंस्यात् जिघांसतीत्यर्थः॥ जूर्वतेर्हिंसाकर्मणो लेटि रूपम् ॥ vसुतस्य अभिषुतं सोमं vपपिवान् पीतवान् vमायिनः मायाविनः

vदानवस्य । दानुर्नाम वृत्रमाता, 'दानुः शये' इत्यादिषु दृष्टत्वात् । तस्याः पुत्रस्य वृत्रस्य vमायाः वज्रनानि[1] vनि vअपादयत् न्यपातयत् बबाधेति यावत् ॥ ॥ ४ ॥

पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥ ११ ॥

पिबेऽपिव । इत् । इन्द्र । शूर । सोमम् । मन्दन्तु । त्वा । मन्दिनः । सुतासः ।
पृणन्तः । ते । कुक्षी इति । वर्धयन्तु । इत्था । सुतः । पौरः । इन्द्रम् । आव ॥ ११ ॥

vशूर बलवन् हे vइन्द्र vपिबपिबेत्[2] अभिषुतमिमं vसोमं पिबैव । आदरार्थेयं वीप्सा । vमन्दिनः मदकराः सुतास्तेऽभिषुताः सोमाः vत्वा vमन्दन्तु त्वां मादयन्तु ॥ मदि स्तुत्यादिषु । व्यत्ययेन परस्मैपदम् ॥ ते सोमाः vते तव vकुक्षी उदरस्योभौ पार्श्वौ vपृणन्तः पूरयन्तः सन्तस्त्वां vवर्धयन्तु । vइत्था अनेन प्रकारेण vपौरः उदरपूरकः vसुतः अभिषुतः सोमः vइन्द्रं त्वाम् vआव तर्पयतु ॥ अवतेस्तर्पणार्थस्य लिटि[3] रूपम् ॥

त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥ १२ ॥

त्वे इति । इन्द्र । अपि । अभूम । विप्राः । धियम् । वनेम । ऋतऽया । सपन्तः ।
अवस्यवः । धीमहि । प्रऽशस्तिम् । सद्यः । ते । रायः । दावने । स्याम ॥ १२ ॥

हे vइन्द्र vविप्राः मेधाविनो वयं vत्वे त्वयि त्वद्धृदये vअभूम । अपि सानुनयप्रश्ने वर्तते । ते तव हृदये किं वर्तामहे इति । vऋतया । ऋतं कर्मफलम् । तत्कामनया vसपन्तः त्वां परिचरणाख्येन कर्मणा स्पृशन्तो वयं vधियं त्वदुद्देशेन क्रियमाणं कर्म vवनेम संभजेमहि ॥ 'वन षण संभक्तौ' । आशीर्लिङि 'लिङ्याशिष्यङ्' इत्यङ्प्रत्ययः ॥ किंच vअवस्यवः त्वत्तो रक्षणमिच्छन्तः vप्रशस्तिम् । शस्तिः शंसनम् । प्रकृष्टं[4] शंसनं स्तोत्रं vधीमहि त्वयि निदधीमहि । ततः vते त्वदीयस्य vरायः धनस्य vदावने दानाय पात्रभूताः[5] vसद्यः vस्याम इदानीं भवेम ॥

स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ १३ ॥

स्याम । ते । ते । इन्द्र । ये । ते । ऊती । अवस्यवः । ऊर्जम् । वर्धयन्तः ।
शुष्मिन्ऽतमम् । यम् । चाकनाम । देव । अस्मे इति । रयिम् । रासि । वीरऽवन्तम् ॥ १३ ॥

१. क-ख-ग-च-ञ-ण१-न-म-व– वचनानि । २. ञ१–पिबपिब । ३. ख-ग-ण-त-थ-म–लिङि । ४. ख-ग-ण१–प्रकृष्टशंसनम्; च–प्रकृष्टशसनम् । ५. क-ञ-म–पात्रीभूताः ।

हे [v]इन्द्र [v]ते तव [v]ऊती ऊत्या प्रणयनेन ॥ अवतेः प्राप्त्यर्थस्य क्तिनि रूपम् ॥ [v]ये[1] [v]ते तव[1] [v]अवस्यवः रक्षाकामाः [v]ऊर्जं हविर्लक्षणमन्नं [v]वर्धयन्तः भवन्ति ते[2] तव वयं [v]ते[2] [v]स्याम त्वदधीना भवेम । [v]देव द्योतमान हे इन्द्र [v]शुष्मिन्तमं दानभोगायार्हतया[3] बलवत्तमं यद्वा शत्रूणां शोषयितृतमं [v]यं रयिं [v]चाकनाम कामयामहे ॥ कनतेः कान्त्यर्थस्य यङ्लुगन्तस्य लोटि रूपम् ॥ [v]वीरवन्तं पुत्रपौत्रैः सहितं तादृशं [v]रयिं [v]अस्मे अस्मभ्यं [v]रासि देहि ॥

रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥ १४ ॥

रासि । क्षयम् । रासि । मित्रम् । अस्मे इति । रासि । शर्धः । इन्द्र । मारुतम् । नः ।
सऽजोषसः । ये । च । मन्दसानाः । प्र । वायवः । पान्ति । अग्रऽनीतिम् ॥ १४ ॥

हे [v]इन्द्र [v]क्षयम् । क्षियन्ति निवसन्त्यत्रेति क्षयो गृहम् । तदस्मभ्यं [v]रासि देहि । तथा [v]मित्रं सख्यायम् [v]अस्मे अस्मभ्यं [v]रासि ॥ वाक्यभेदादनिघातः ॥ [v]मारुतं मरुतां देवविशां संबन्धि [v]शर्धः बलं [v]नः अस्मभ्यं [v]रासि । एतेन मरुतामप्यागमनं प्रार्थ्यते । [v]ये मरुतः [v]सजोषसः सह प्रीयमाणाः [v]मन्दसानाः[4] मोदमानाः [v]वायवः यज्ञं प्रति गन्तारः सन्तः [v]अग्रणीतिम् अग्रे नीयमानं सोमं [v]प्र [v]पान्ति प्रकर्षेण पिबन्ति तेषां शर्ध इति समन्वयः । यद्वा ये च वायवः अग्रे नीयमानं सोमं पिबन्ति तेषां वायूनां बलं रासि ॥ वायवः इति पूजायां बहुवचनम् । वायुर्हि सोमस्याग्रपातेति ॥

व्यन्त्वित्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्सा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥

व्यन्तु । इत् । नु । येषु । मन्दसानः । तृपत् । सोमम् । पाहि । द्रह्यत् । इन्द्र ।
अस्मान् । सु । पृत्ऽसु । आ । तरुत्र । अवर्धयः । द्याम् । बृहत्ऽभिः । अर्कैः ॥ १५ ॥

हे [v]इन्द्र [v]येषु तव सहायभूतेषु मरुत्सु [v]मन्दसानः माद्यन् भवसि ते मरुतः [v]नु क्षिप्रं [v]व्यन्तु सोमं भक्षयन्तु । [v]इत् एवार्थे[5] । द्रह्यत् ॥ दंहतेरिदं रूपम् ॥ आत्मानं दृढीकुर्वन् त्वं तृपत् तर्पयन्तमिमं [v]सोमं [v]पाहि पिब । [v]तरुत्र शत्रूणां हिंसक हे इन्द्र [v]बृहद्भिः बलवद्भिः अर्कैः अर्चनीयैर्मरुद्भिः सहितस्त्वम् । [v]आ इति चार्थे । तेन अस्मान् [v]द्यां च [v]सु सुष्ठु [v]पृत्सु पशुपुत्रादिभिः[6] अस्मान् अस्मत्पालनेन[7] च दिवम् [v]अवर्धयः । यद्वा येषु सोमेषु मन्दसानो मोदमानो भवसि ते सोमा व्यन्तु त्वां गच्छन्तु । शेषं पूर्ववत् ॥ ॥ ५ ॥

---

१. ख-ग-तेन; ज्ञ१-ण-त-थ-न-व-ते तव । २. म-तव ते । ३. ख-ग-च-ण-ण१-दानभागायार्हतया; ज्ञ१-दानाय भोगाय वार्हतया; थ-न-दानाभागायार्हतया । ४. ख-ग-च-ण-ण१-थ-न-मदन्तः; ज्ञ१- मन्दसानाः मदन्तः । ५. ख-ग-ण-त-इवार्थे; ज्ञ१-चार्थे; थ-वार्थे । ६. क-ज्ञ-पशुपुरोडाशादिभिः; म-पुरोडाशादिभिः । ७. क-च-ज्ञ-ण१-त-थ-न-व-पालनेन; ख-ग-ण-अस्मान् पालनेन; ज्ञ१-सोमपानेन; म-पालयते न ।

बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥ १६ ॥

बृहन्तः । इत् । नु । ये । ते । तरुत्र । उक्थेभिः । वा । सुम्नम् । आऽविवासान् ।
स्तृणानासः । बर्हिः । पस्त्यऽवत् । त्वाऽऊताः । इत् । इन्द्र । वाजम् । अग्मन् ॥ १६ ॥

[v]तरुत्र आपद्भ्यस्तारक[1] हे [v]इन्द्र [v]ये पुमांसः [v]सुम्नं सुखकरं त्वामुक्थैः शास्त्रैः [v]आविवासान् परिचरेयुः ॥ विवासतेर्लेटि अडागमः ॥ [v]ते तव पुमांसः [v]नु क्षिप्रमविलम्बेन [v]बृहन्तः महान्तो भवन्ति । वेति[2] पूरणः । किंच [v]बर्हिः [v]स्तृणानासः वेद्यां बर्हिराच्छादयन्तो ये त्वां परिचरन्ति ते [v]त्वोता [v]इत् त्वया रक्षिताः सन्त एव [v]पस्त्यावत् गृहसहितं [v]वाजम् अन्नम् [v]अग्मन् गच्छन्ति ॥

उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥ १७ ॥

उग्रेषु । इत् । नु । शूर । मन्दसानः । त्रिऽकद्रुकेषु । पाहि । सोमम् । इन्द्र ।
प्रऽदोधुवत् । श्मश्रुषु । प्रीणानः । याहि । हरिऽभ्याम् । सुतस्य । पीतिम् ॥ १७ ॥

हे [v]शूर बलवन् [v]इन्द्र [v]उग्रेषु उद्गूर्णेषु बहुस्तोत्रशस्त्रवत्सु [v]त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेष्वाभिक्ष्विकेष्वहःसु [v]मन्दसानः हृष्यन् [v]सोमं [v]पाहि पिब । ततः [v]प्रीणानः सोमपानेन प्रीतो भवन् [v]श्मश्रुषु लिप्तं सोमं [v]प्रदोधुवत् ॥ 'धूञ् कम्पने' । यङ्लुगन्तस्य शतरि रूपम् ॥ पुनःपुनर्धुन्वन् [v]सुतस्य अभिषुतस्य [v]पीतिं पानमुद्दिश्य [v]हरिभ्यां अश्वाभ्याम् युक्तः सन् [v]याहि गच्छ ॥

धिष्वा शवः शूर येन वृत्रमवाभिनदानुमौर्णवाभम् ।
अपावृणोज्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥ १८ ॥

धिष्व । शवः । शूर । येन । वृत्रम् । अवऽअभिनत् । दानुम् । और्णऽवाभम् ।
अप । अवृणोः । ज्योतिः । आर्याय । नि । सव्यतः । सादि । दस्युः । इन्द्र ॥ १८ ॥

[v]शूर हे [v]इन्द्र [v]शवः तादृशं बलं [v]धिष्व धारय ॥ दधातेर्लेटि 'बहुलं छन्दसि' इति शपो लुक् । 'छन्दस्युभयथा' इति थास आर्धधातुकत्वात् इडागमः ॥ [v]येन बलेन [v]दानुं दानोः[3] पुत्रं [v]वृत्रम् [v]और्णवाभम् । ऊर्णवाभिः[4] कीटविशेषः और्णवाभः इत्युच्यते । तमिव [v]अवाभिनत् बिभेदिथ । यद्वा और्णः[5] ऊर्णनाभिः । तदाभं तत्सदृशमित्यर्थः । ततस्तमोरूपस्य हननात् [v]आर्याय कर्मणाम्

१. ख-ण-त-थ–आपद्भिस्तारक; ग–तारक । २. ज्ञ१–इदिति; ३. क-ख-ग-च-ज्ञ१-ण१–दनोः । ४. ख–ऊर्णनाभः; ग–कूर्णनाभिः; ण-त-थ–कुम्भनाभिः । ५. म–और्णवः ।

अनुष्ठात्रे जनाय कुत्साय राजर्षये वा [v]ज्योतिः प्रकाशकमादित्यम् [v]अपावृणोः उद्घाटितवानसि । [v]दस्युः कर्मणामुपक्षपयिता स वृत्रः [v]सव्यतः तव सव्यपार्श्वे [v]नि [v]षादि त्वया नितरां सन्नो बाधितो वर्तते ॥

सनेम॒ ये ते॑ ऊ॒तिभि॒स्तर॑न्तो॒ विश्वाः॑ स्पृधः॒ आर्ये॑ण॒ दस्यू॑न् ।
अ॒स्मभ्यं॒ तत्त्वा॒ष्ट्रं वि॒श्वरू॑पमर॑न्धयः सा॒ख्यस्य॑ त्रि॒तार्य॑ ॥ १९ ॥

सनेम । ये । ते॒ । ऊ॒तिऽभिः॑ । तर॑न्तः । विश्वाः॑ । स्पृधः॑ । आर्ये॑ण । दस्यू॑न् ।
अ॒स्मभ्य॑म् । तत् । त्वा॒ष्ट्रम् । वि॒श्वऽरू॑पम् । अर॑न्धयः । सा॒ख्यस्य॑ । त्रि॒ताय॑ ॥ १९ ॥

[v]सनेम तान् पुरुषान् संभजेम [v]ये [v]ते तव [v]ऊतिभिः पालनैः [v]विश्वाः [v]स्पृधः स्पर्धमानाः सर्वा विशः [v]तरन्तः हिंसन्तः तथा [v]आर्येण आर्यभावेन [v]दस्यून् उपक्षपयितॄन् हिंसन्तो भवन्ति । [v]तत् [v]अस्मभ्यं वशमानय । किं तत् । तदाह । [v]त्वाष्ट्रं त्वष्टुः सुतं [v]विश्वरूपम् एतन्नामकमसुरम् [v]अरन्धयः ॥ ' रध्यतिर्वशगमने ' ॥ वशमानयः । यद्वा तमसुरमवधीः ॥ ' रध हिंसासंराद्धयोः ' । ' रधिजभोरचि ' इति नुम् ॥ इन्द्रस्त्वाष्ट्रमवधीदित्ययमर्थस्तैत्तिरीयके ' विश्वरूपो वै त्वाष्ट्रः ' (तै. सं. २. ५. १. १) इत्यत्र महता प्रबन्धेन प्रपञ्चितः । किंच [v]साख्यस्य सख्यिभावस्यानुपालनाय [v]त्रिताय महर्षये वशमानयः । यद्वा सनेम ते वयं प्रवृद्धा भवेम ये वयं तव रक्षाभिः स्पर्धमानाः प्रजा दस्यूंश्च तरन्तोऽतिक्रामन्तो भवेम ॥ सनेम इति वृद्ध्यर्थः आद्युदात्तः । ' यथा सनेम मित्रावरुणा सनन्तः ' (ऋ. सं. ७. ५२. १) इति । सकर्मकश्चेत् मध्योदात्तः । ' सनेम वाजं तव ' (ऋ. सं. ८.६१. ४) इति ॥ तरन्तः । ' तॄ प्लवनतरणयोः ' । शतरि रूपम् । संज्ञावचनश्चेदन्तोदात्तः । यथा ' तरन्त इव मंहना ' (ऋ. सं. ५. ६१. १०) इति ॥

अ॒स्य सु॑वा॒नस्य॑ म॒न्दिन॑स्त्रि॒तस्य॒ न्यर्बु॑दं वावृधा॒नो अ॑स्तः ।
अ॒व॒र्त॒य॒त्सूर्यो॒ न च॒क्रं भि॒नद्बल॑मिन्द्रो अङ्गिरस्वान् ॥ २० ॥

अ॒स्य । सु॒वा॒नस्य॑ । म॒न्दिनः॑ । त्रि॒तस्य॑ । नि । अर्बु॑दम् । व॒वृ॒धा॒नः । अ॒स्त॒रित्यस्तः ।
अ॒व॒र्त॒य॒त् । सूर्यः॑ । न । च॒क्रम् । भि॒नत् । बल॑म् । इन्द्रः॑ । अङ्गिरस्वान् ॥ २० ॥

[v]मन्दिनः [v]अस्य मदकरमिमं [v]सुवानस्य सुतवतः [v]त्रितस्य तीर्णतमस्कस्य महर्षेरर्थं [v]वावृधानः सोमेन वर्धमान इन्द्रः [v]अर्बुदम् । अम्बूनि ददातीत्यर्बुदो मेघः । अनुस्वारस्य रेफश्छान्दसः । यद्वा नामैतत् । अर्बुदाख्यमसुरं [v]नि [v]अस्तः ॥ ' स्तृ हिंसायाम् ' इत्यस्य लङि तिपि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । गुणे कृते हल्ङ्यादिना तिलोपः ॥ नितरामवधीत् । ' महान्तं चिदर्बुदं नि क्रमीः पदा ' (ऋ. सं. १. ५१. ६) इत्यादिषु अर्बुदवधः[1] स्पष्टमुक्तः[1]। किंच [v]अङ्गिरस्वान् अङ्गिरोभिः सहितः [v]इन्द्रः [v]अवर्तयत् असुरहननार्थं वज्रमभ्रामयत् । [v]सूर्यो [v]न । यथा सूर्यः [v]चक्रं भ्रामयति

तद्वत् । यद्वा यस्मादसुराद्भिया सूर्यः स्वकीयं रथचक्रं नावर्तयत्[1] । निषेधार्थीयोऽत्र नकारः । वर्तयितुं नाशकत् तं Vवलं पणीनां प्रभुमसुरं Vभिनत् वज्रेणाभिनत्[2] । यद्वा द्विचक्रो हि पूर्वं सूर्यस्य रथः । तस्य एकं चक्रमिन्द्रेणापहृतम् ॥ सूर्य इति ' सुपां सुलुक्० ' इति षष्ठ्येकवचनस्य सुः ॥ सूर्यस्य संबन्ध्यपहृतं तदेकं चक्रमवर्तयत् । रक्षोहननार्थमभ्रामयत् । तेन चक्रेण वलमभिनच्च । नञर्थे ॥

अहर्गणेषु माध्यंदिनसवनेषु तायमानरूपेषु अच्छावाकस्य अहरहः शस्यसंज्ञकम् ' अभितष्टेव ' इति सूक्तम् । ' नूनं सा ते ' इत्येषा तस्यान्ते शंसनीया । सूत्रितं च–' नूनं सा त इत्यन्तमुत्तमम् ' (आश्व. श्रौ. ७. ४) इति ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ २१ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥२१॥

हे Vइन्द्र या Vदक्षिणा । दक्षमुत्साहनं करोतीति दक्षिणा । स्तोतृभ्यो देया Vते त्वत्संबन्धिनी Vमघोनी धनवती[3] Vजरित्रे[3] स्तोत्रे Vवरं श्रेष्ठमभिमतमर्थं Vनूनं Vप्रति Vदुहीयत् इदानीं प्रतिदोग्धि संपादयतीत्यर्थः । तादृशीं दक्षिणां Vस्तोतृभ्यः अस्मभ्यं Vशिक्ष प्रयच्छ । किंच Vभगः भजनीयस्त्वं Vमाति Vधक् ॥ दहेर्दानार्थस्य लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्॥ Vनः अस्मान् अतिक्रम्यान्येभ्यो दक्षिणां मा दाः । प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो दीयतामित्यर्थः । यद्वा नोऽस्माकं कामान् मा धक् मा धाक्षीः अपेक्षितफलदानेन पूरयेत्यर्थः । Vसुवीराः शोभनपुत्रपौत्राः सन्तो वयं Vविदथे अस्मिन्यज्ञे Vबृहत् प्रभूतं स्तोत्रं Vवदेम त्वामुद्दिश्य ब्रवाम । अत्र ' सा ते प्रतिदुग्धाम् ' इति प्रकृत्य ' वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा ' (निरु. १. ७) इत्यन्तं निरुक्तमनुसंधेयम् ॥ ६ ॥ ॥ १ ॥

द्वितीयेऽनुवाके एकादश सूक्तानि । तत्र ' यो जातः ' इति पञ्चदशर्चं प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम्॥ संसवे निष्केवल्ये निविद्धानीयस्य पुरस्तात् ' यो जात एव ' इति सूक्तं[4] शंसेत् ' । ' यदि पर्यायान् ' इति खण्डे सूत्रितं–' यो जात एवेति निष्केवल्ये ' (आश्व. श्रौ. ६. ६) इति । आभिप्लविके तृतीयेऽहनि निष्केवल्ये ' यो जात एव ' इति निविद्धानीयम् । सूत्रितं च– ' तृतीयस्य व्यर्यमा यो जात एवेति मध्यंदिनः[5] ' (आश्व. श्रौ. ७.७) इति । विश्वजिति माध्यंदिनसवने मैत्रावरुणः स्वशस्त्रे प्राकृतात् सूक्तात्पूर्वं ' यो जातः ' इति सामसूक्तं शंसेत् । ' विश्वजितोऽग्निं नरः ' इति खण्डे सूत्रितं– ' सत्रा मदासो यो जात एवाभूरेक इति सामसूक्तानि ' (आश्व. श्रौ. ८. ७) इति । अग्निष्टुन्निष्केवल्ये[6] निविद्धानमिदम् । ' इयेनाजिराभ्याम् ' इति खण्डे सूत्रितं—' तिष्ठा हरी इति यो

१. ण-थ-म–आवर्तयत् । २. ण-थ–' वज्रेणाभिनत् ' नास्ति; ख-ग-म–तेन वज्रेणाभिनत् । ३. क–धनवती धनवते; झ-ञ-व–धनवती सा दक्षिणा धनवती धनवते । ४. क-ख-ग-झ-ञ-व–सूक्तं शंस्येत्; झ१–शंसत्; ण-थ न–शंस्येत् । ५. च-झ१-ण१-थ-माध्यंदिनः; न-व–माध्यंदिने । ६. क-झ–अनिनि०; ख-ग-च-ण१–अतिषु नि०; झ१–आतिपु नि०; ण-थ-न–अनिषु नि०; त-व–अग्निषु नि०; म–अतिनि० ।

जात एवेति मध्यंदिनः[1] ' (आश्व. श्रौ. ९. ७) इति । महाव्रते निष्केवल्ये ' यो जात एव ' इति सूक्तम् । ' ऊरू ' इति खण्डे सूत्रितं—' वने न वा यो न्यधायि चाकन् यो जात एव प्रथमो मनस्वान् ' (ऐ. आ. ५. ३. १) इति । अत्रेतिहासो बृहद्देवतायामुक्तः—' संयुज्य तपसात्मानमैन्द्रं बिभ्रन्महद्वपुः । अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥ तमिन्द्र इति मत्वा तु दैत्यौ भीमपराक्रमौ । धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः । यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् '(बृहद्दे. ४.६६-६८) ॥ अन्ये त्वन्यथा वर्णयन्ति । पुरा किल इन्द्रादयो वैन्ययज्ञं समाजग्मुः । गृत्समदोऽपि तत्रागत्य सदस्यासीत् । दैत्याश्चेन्द्रजिघांसया तत्र समागमन् । तान् दृष्ट्वा निर्जगामेन्द्रो यज्ञाद्गृत्समदाकृतिः । स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्निरगच्छत् । निर्गच्छन्तं तमृषिं दृष्ट्वा अयमेवेन्द्र इति मन्यमानास्तमसुराः परिवव्रुः । नाहमिन्द्रस्तुच्छः किंत्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान् प्रत्युवाच ॥ अपरे त्वेवं कथयन्ति । गृत्समदस्य यज्ञे प्रविष्टमेकाकिनमिन्द्रं ज्ञात्वासुराः परिवव्रुः । स इन्द्रो गृत्समदरूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम । ततोऽसुरा इन्द्रो विलम्बित इत्यन्तः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अयं त्विन्द्रोऽस्मद्भयात् गृत्समदरूपेणास्ते इति तं जगृहुः । स तान् नाहमिन्द्रोऽयमित्यनेन सूक्तेन प्रत्युवाच । अयमेवार्थो महाभारते प्रपञ्चितः ॥

यो जा॒त ए॒व प्र॑थ॒मो मन॑स्वान्दे॒वो दे॒वान्क्रतु॑ना प॒र्यभू॑षत् ।
यस्य॑ शु॒ष्मा॒द्रोद॑सी अभ्य॑सेतां नृ॒म्णस्य॑ म॒ह्ना स ज॑ना॒स॒ इन्द्रः॑ ॥ १ ॥

यः । जा॒तः । ए॒व । प्र॒थ॒मः । मन॑स्वान् । दे॒वः । दे॒वान् । क्रतु॑ना । प॒रि॒ऽअभू॑षत् ।
यस्य॑ । शु॒ष्मा॑त् । रोद॑सी॒ इति॑ । अभ्य॑सेताम् । नृ॒म्णस्य॑ । म॒ह्ना । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ १ ॥

गृत्समदो ब्रूते । ᵛजनासः जना हे असुराः ᵛयो ᵛजात ᵛएव जायमान एव[2] सन् ᵛप्रथमः देवानां प्रधानभूतः ᵛमनस्वान् मनस्विनामग्रगण्यः ᵛदेवः द्योतमानः सन् ᵛक्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा ᵛदेवान् सर्वान् यागदेवान् ᵛपर्यभूषत् रक्षकत्वेन[3] पर्यग्रहीत् ॥ ' भूष अलंकारे '। भूवादिः लङि रूपम् ॥ यद्वा सर्वानन्यान्देवान्पर्यभूषत् पर्यभवत् अत्यक्रामत् ॥ अस्मिन्[4] पक्षे भवतेर्व्यत्ययेन क्सः[5] । ' श्युकः किति ' इति इट्प्रतिषेधः ॥ ᵛयस्य इन्द्रस्य ᵛशुष्मात् शरीरात् बलात् ᵛरोदसी द्यावापृथिव्यौ ᵛअभ्यसेताम् अबिभीताम् ॥ ' भ्यस भये ' । अनुदात्तेत् । ' भ्यस भयवेपनयोः ' (निरु. ३. २१) इति नैरुक्ताः ॥ अभ्यसेतामवेपेतां वा । तथा च मन्त्रान्तरम्—' इमे चित्तव मन्यवे वेपेते भियसा मही ' (ऋ. सं. १. ८०. ११) इति । ᵛनृम्णस्य सेनालक्षणस्य बलस्य ᵛमह्ना महत्त्वेन युक्तः ᵛसः ᵛइन्द्रः नाहमिति ॥ अत्र निरुक्तं—'यो जायमान[5] एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदिति वा यस्य बलात् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य महो बलस्य महत्त्वेन स जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता ' (निरु. १०. १०) इति ॥

१. च-झ१-ण१—माध्यंदिनः; थ-न-म-व—माध्यंदिने । २. झ१-ण-त-थ-न-व—' एव ' नास्ति । ३. क-झ-ण-त-थ-न-म-व—रक्षत्वेन; झ१—रक्ष्यत्वेन । ४. ख-ग—अस्मिन्यज्ञे प्रवृत्तव्यत्ययेन क्यः; ण-त-थ—अस्मिन्यज्ञे प्रत्ययेन व्यत्ययेन क्सः; म—अस्मिन्यज्ञे पर्यतर्व्यत्ययेन च सः । ५. ख-ग-च-ण-ण१-त-थ-न-व—जात ।

यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनासु इन्द्रः ॥ २ ॥

यः । पृथिवीम् । व्यथमानाम् । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरम्णात् ।
यः । अन्तरिक्षम् । विऽममे । वरीयः । यः । द्याम् । अस्तभ्नात् । सः । जनासः । इन्द्रः ॥२॥

हे जनाः [य]यः इन्द्रः [व्य]व्यथमानां चलन्तीं [पृ]पृथिवीम् [अ]अदृंहत् शर्करादिभिर्दृढामकरोत् ॥ ' दृह दृहि वृद्धौ ' ॥ [य]यः च [प्र]प्रकुपितान् इतस्ततश्चलितान् पक्षयुक्तान् [प]पर्वतान् [अ]अरम्णात् नियमितवान् स्वे स्वे स्थाने स्थापितवान् ॥ अरम्णात् । ' रमु क्रीडायाम् ' । अन्तर्भावितण्यर्थस्य व्यत्ययेन श्नाप्रत्ययः ॥ [य]यः च [व]वरीयः उरुतमम् [अ]अन्तरिक्षं [वि]विममे निर्ममे विस्तीर्णं चकारेत्यर्थः । [य]यः च [द्या]द्यां दिवम् [अ]अस्तभ्नात् तस्तम्भ[1] निरुद्धामकरोत्[2] ॥ ' स्तम्भु रोधने[3] ' इति सौत्रो धातुः ॥ [स]सः एव [इ]इन्द्रः नाहमिति ॥

यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनासु इन्द्रः ॥ ३ ॥

यः । हत्वा । अहिम् । अरिणात् । सप्त । सिन्धून् । यः । गाः । उत्ऽआजत् । अपऽधा । वलस्य ।
यः । अश्मनोः । अन्तः । अग्निम् । जजान । सम्ऽवृक् । समत्ऽसु । सः । जनासः । इन्द्रः ॥३॥

[य]यः [अ]अहिं मेघं [ह]हत्वा मेघहननं कृत्वा [स]सप्त सर्पणशीलाः [सि]सिन्धून् स्यन्दनशीला अपः [अ]अरिणात् प्रेरयत् । यद्वा सप्त गङ्गायमुनाद्या मुख्या नदीररिणात् ॥ ' रीङ् स्रवणे[3] ' । क्र्यादिः ॥ [य]यः च [व]वलस्य वलनामकस्यासुरस्य [अ]अपधा तत्कर्तृकान्निरोधान्निरुद्धाः [गा]गाः [उ]उदाजत् निरगमयत्॥ अपधा । अपपूर्वाद्धातेः ' आतश्चोपसर्गे ' (पा. सू. ३. ३. १०६) इति भावे अङ्प्रत्ययः । ' सुपां सुलुक्° ' इति पञ्चम्या आकारः ॥ [य]यः च [अ]अश्मनोः । अश्नुते व्याप्नोत्यन्तरिक्षमित्यश्मा मेघः । अत्यन्तमृदुरूपयोर्मेघयोः [अ]अन्तः मध्ये वैद्युतम् [अ]अग्निं [ज]जजान उत्पादयामास । यश्च [स]समत्सु । संभक्षयन्ति योद्धॄणामायूंषीति समदः संग्रामाः । तेषु [सं]संवृक्[4] भवति ॥ वृणक्तेर्हिंसार्थस्य क्विपि रूपम् ॥ [स]सः [इ]इन्द्रः नाहमिति ॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँल्लक्षमाददर्यः पुष्टानि स जनासु इन्द्रः ॥ ४ ॥

येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासम् । वर्णम् । अधरम् । गुहा । अकृत्यकः ।
श्वघ्नीऽइव । यः । जिगीवान् । लक्षम् । आदत् । अर्यः । पुष्टानि । सः । जनासः । इन्द्रः ॥ ४ ॥

१. ख-ग-च-ङ्ग-ण-ण१-त-थ-न-म-व-स्तम्भनिरुद्धामकरोत् । २. ङ्ग१-ण-थ-न-व-निरुद्धे । ३. च-प्रस्रवणे; ण ण१-त-थ-न-व-श्रवणे । ४. ख-ग-म-संवृक् । वृणक्ति हिनस्ति शत्रूनिति संवृणक् ।

Vयेन इन्द्रेण Vइमा इमानि Vविश्वा[1] Vच्यवना नश्वराणि भुवनानि Vकृतानि स्थिरीकृतानि । Vयः च Vदासं Vवर्णं शूद्रादिकम् । यद्वा दासमुपक्षपयितारम् । Vअधरं निकृष्टमसुरं Vगुहा गुहायां गूढस्थाने नरके वा Vअकः अकार्षीत् ॥ करोतेर्लुङि ' मन्त्रे घस° ' इत्यादिना च्लेर्लुकि रूपम् ॥ Vलक्षं लक्ष्यं Vजिगीवान् ॥ ' जि जये ' । क्वसौ ' सन्लिटोर्जेः ' इति अभ्यासादुत्तरस्य कुत्वम् । दीर्घश्छान्दसः ॥ जितवान् । Vयः Vअर्यः अरेः ॥ षष्ठ्येकवचने छान्दसो यणादेशः ॥ शत्रोः संबन्धीनि Vपुष्टानि समृद्धानि Vआदत् आदत्ते । तत्र दृष्टान्तः । Vश्वघ्नीव । श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः । यथा व्याधो जिघृक्षितं[2] मृगं परिगृह्णाति तद्वत् ॥

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विजइवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥ ५ ॥

यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् ।
उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ।
सः । अर्यः । पुष्टीः । विजः३इव । आ । मिनाति ।
श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥ ५ ॥

अपश्यन्तो जनाः Vघोरं शत्रूणां घातकं Vयं Vपृच्छन्ति Vस्म Vकुह Vसेति । स इन्द्रः कुत्र वर्तते इति ॥ सेति । ' सोऽचि लोपे चेत्पादपूरणम् ' इति सोर्लोपे गुणः ॥ न क्वचिदसौ तिष्ठतीति मन्यमाना जनाः Vएनम् इन्द्रम् Vआहुः Vएषः इन्द्रः Vन Vअस्तीति । तथा च मन्त्रः[3]—' नेन्द्रो अस्तीति नेम उ त्व आह ' (ऋ. सं. ८. १००. ३) इति । Vईम् इति पूरणः । Vसः इन्द्रः Vविजइव । इवशब्द एवार्थे । उद्वेजक एव सन् Vअर्यः अरेः संबन्धीनि Vपुष्टीः पोषकाणि गवाश्वादीनि धनानि Vआ Vमिनाति सर्वतो हिनस्ति ॥ ' मीङ् हिंसायाम् ' । ' मीनातेर्निगमे ' इति ह्रस्वः ॥ तस्मात् Vश्रदस्मै इन्द्राय Vधत्त । स इन्द्रोऽस्तीति विश्वासमत्र कुरुत । यद्यप्यसौ विशेषतोऽस्माभिर्न दृश्यते तथापि अस्तीति विश्वासं कुरुत । एवं निर्धारणीयमहिमोपेतः[4] Vसः V इन्द्रः नाहमिति ॥ ॥ ७ ॥

यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥ ६ ॥

यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः । नाधमानस्य । कीरेः ।
युक्तऽग्राव्णः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्य । सः । जनासः । इन्द्रः ॥ ६ ॥

१. ख-ग-ण१-फ–विश्वा विश्वानि; च–विश्वानि । २. ख-ग-च-ज्ञ१-ण१-फ–जिघृक्षन्तम् ; ण-त-थ-न-व–जिघृक्षतम् । ३. ख-ग-च-ज्ञ–मन्त्रैः; ज्ञ१-त-थ-व–मन्त्रे । ४. ख-ग-च-ज्ञ१ण-ण-१-थ-न-व–निर्धारण-महिमोपेतः ।

[V]यो [V]रधस्य ॥ ' रध हिंसासंराद्धयोः ' ॥ समृद्धस्य [V]चोदिता धनानां प्रेरयिता भवति । [V]यः[1] च [V]कृशस्य च[1] दरिद्रस्य च [V]यः च [V]नाधमानस्य ॥ ' नाधृ णाधृ याच्ञोपतापैश्वर्याशीःषु '॥ याचमानस्य [V]कीरेः ॥ करोतेः कीर्तयतेर्वा ॥ स्तोतुः [V]ब्रह्मणः ब्राह्मणस्य च धनानां प्रेरयिता । [V]यः च [V]सुशिप्रः शोभनहनुः सुशीर्षको वा सन् [V]युक्तग्राव्णः अभिषवार्थमुद्यतग्राव्णः [V]सुतसोमस्य अभिषुतसोमस्य यजमानस्य [V]अविता रक्षिता भवति [V]सः एव [V]इन्द्रः नाहमिति । ब्रह्मशब्दस्य स्वरूपपरत्वे द्व्यादुदात्तता स्यात् यथा ' ब्रह्म वन्वानो अजरं सुवीरम् ' (ऋ. सं. ३. ८. २) इति । अयं स्वन्तोदात्तः पठ्यत इति नाम्नपरः ॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥ ७ ॥

यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः । यस्य । ग्रामाः । यस्य । विश्वे । रथासः ।
यः । सूर्यम् । यः । उषसम् । जजान । यः । अपाम् । नेता । सः । जनासः । इन्द्रः ॥ ७ ॥

[V]यस्य सर्वान्तर्यामितया वर्तमानस्य [V]प्रदिशि प्रदेशनेऽनुशासने [V]अश्वासः अश्वा वर्तन्ते । [V]यस्य अनुशासने [V]गावः । [V]यस्य अनुशासने [V]ग्रामाः । ग्रसन्तेऽत्रेति ग्रामा जनपदाः । [V]यस्य आज्ञायां [V]विश्वे सर्वे [V]रथासः रथा वर्तन्ते । [V]यः च वृत्रं हत्वा [V]सूर्यं [V]जजान जनयामास । [V]यः च [V]उषसम् । तथा मन्त्रः–' जजान सूर्यमुषसं सुदंसाः ' (ऋ. सं. ३. ३२. ८) इति । [V]यः च मेघभेदनद्वारा [V]अपां [V]नेता प्रेरकः [V]सः [V]इन्द्रः इत्यादि प्रसिद्धम् ॥

यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ॥ ८ ॥

यम् । क्रन्दसी इति । संयती इति सम्ऽयती । विह्वयेते इति विऽह्वयेते ।
परे । अवरे । उभयाः । अमित्राः ।
समानम् । चित् । रथम् । आतस्थिऽवांसा ।
नाना । हवेते इति । सः । जनासः । इन्द्रः ॥ ८ ॥

[V]यं [V]क्रन्दसी रोदसी शब्दं कुर्वाणे मानुषी दैवी च द्वे सेने वा [V]संयती परस्परं संगच्छन्त्यौ यमिन्द्रं [V]विह्वयेते स्वरक्षार्थं विविधमाह्वयतः । [V]परे उत्कृष्टाः [V]अवरे अधमाश्च [V]उभयाः उभयविधाः [V]अमित्राः[2] शत्रवः यमाह्वयन्ति[2]। [V]समानम् इन्द्ररथसदृशं [V]रथम् [V]आतस्थिवांसा आस्थितौ द्वौ रथिनौ तमेवेन्द्रं [V]नाना पृथक् पृथक् [V]हवेते आह्वयेते । यद्वा समानमेकरथमारूढाविन्द्राग्नी हवेते यज्ञार्थं यजमानैः पृथगाहूयेते तयोरन्यतरः [V]सः [V]इन्द्रः नाहमिति ॥

१. म–यः कृशस्य । २. ख-ग-च-ण-ण१-थ-न–उभयमाह्वयन्ति ; झ१–उभयविधमाह्वयन्ति ।

यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः ॥ ९ ॥

यस्मात् । न । ऋते । विऽजयन्ते । जनासः । यम् । युध्यमानाः । अवसे । हवन्ते ।
यः । विश्वस्य । प्रतिऽमानम् । बभूव । यः । अच्युतऽच्युत् । सः । जनासः । इन्द्रः ॥ ९ ॥

[v]यस्मात् [v]ऋते [v]जनासः जनाः [v]न [v]विजयन्ते विजयं न प्राप्नुवन्ति । अतः [v]युध्यमानाः युद्धं कुर्वाणा जनाः [v]अवसे स्वरक्षणाय [v]यम् इन्द्रं [v]हवन्ते आह्वयन्ति । [v]यः च [v]विश्वस्य सर्वस्य जगतः [v]प्रतिमानं प्रतिनिधिः [v]बभूव । [v]यः च [v]अच्युतच्युत् अच्युतानां क्षयरहितानां पर्वतादीनां च्यावयिता [v]सः [v]इन्द्रः इत्यादि प्रसिद्धम् ॥

यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥ १० ॥

यः । शश्वतः । महि । एनः । दधानान् । अमन्यमानान् । शर्वा । जघान ।
यः । शर्धते । न । अनुऽददाति । शृध्याम् । यः । दस्योः । हन्ता । सः । जनासः । इन्द्रः ॥ १० ॥

[v]यः [v]महि महत् [v]एनः पापं [v]दधानान् [v]शश्वतः बहून् [v]अमन्यमानान् आत्मानमजानत इन्द्रमपूजयतो वा जनान् [v]शर्वा । शृणाति शत्रूननेनेति शर्वोऽस्त्रः । तेनायुधेन [v]जघान ॥ हन्तेर्लिटि रूपम् ॥ [v]यः च [v]शर्धते उत्साहं कुर्वते अनात्मज्ञाय जनाय [v]शृध्याम् उत्साहनीयं कर्म [v]नानुददाति न प्रयच्छति ॥ अनुपूर्वात् ' डुदाञ् दाने ' जौहोत्यादिकः । ' अभ्यस्तानामादिः ' इति ' तिङि चोदात्तवति ' इति गतेर्निघातः । [v]यः च [v]दस्योः उपक्षपयितुः शत्रोः [v]हन्ता घातकः [v]सः [v]इन्द्रः इत्यादि पूर्ववत् ॥ ॥ ८ ॥

यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥ ११ ॥

यः । शम्बरम् । पर्वतेषु । क्षियन्तम् । चत्वारिंश्याम् । शरदि । अनुऽअविन्दत् ।
ओजायमानम् । यः । अहिम् । जघान । दानुम् । शयानम् । सः । जनासः । इन्द्रः ॥ ११ ॥

[v]यः [v]पर्वतेषु [v]क्षियन्तम् इन्द्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं [v]शम्बरम् एतन्नामकं मायाविनमसुरं [v]चत्वारिंश्यां [v]शरदि चत्वारिंशे संवत्सरे [v]अन्वविन्दत् अन्विष्यालभत । लब्ध्वा च [v]यः [v]ओजायमानम् ॥ ' कर्तुः क्यङ् सलोपश्च ', ' ओजसोऽप्सरसो नित्यम् ' (पा. सू. ३. १. ११. २) इति सकारलोपः ॥ बलमाचरन्तम् [v]अहिम् आहन्तारं [v]दानुं दानवं [v]शयानं शम्बरमसुरं [v]जघान हतवान् [v]सः [v]इन्द्रः नाहमिति ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥ १२ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् ।
यः । रौहिणम् । अस्फुरत् । वज्रऽबाहुः । द्याम् । आऽरोहन्तम् । सः । जनासः । इन्द्रः ॥ १२ ॥

[v]यः [v]सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य । ते च रश्मयः[1] ' वराहवः स्वतपसो विद्युन्महसो धूपयः श्वाभयो गृहमेधाश्चेत्येते ये चेमेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षन्ति वृष्टिभिः ' (तै. आ. १. ९. ४-५) इति तैत्तिरीयारण्यके ह्याम्नाताः । [v]वृषभः वर्षकः [v]तुविष्मान् वृद्धिमान् बलवान् वा [v]सप्त सर्पणस्वभावान् [v]सिन्धून् अपः[2] [v]सर्तवे सरणाय [v]अवासृजत् अवसृष्टवान् । यद्वा गङ्गाद्याः सप्त मुख्या नदीरसृजत् । [v]यः च [v]वज्रबाहुः सन् [v]द्यां दिवम् [v]आरोहन्तं [v]रौहिणम् असुरम् [v]अस्फुरत् जघान ॥ ' स्फुर स्फुरणे ' । तुदादिः ॥

द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥ १३ ॥

द्यावा । चित् । अस्मै । पृथिवी इति । नमेते इति । शुष्मात् । चित् । अस्य । पर्वताः । भयन्ते ।
यः । सोमऽपाः । निऽचितः । वज्रऽबाहुः । यः । वज्रऽहस्तः । सः । जनासः । इन्द्रः ॥ १३ ॥

[v]अस्मै इन्द्राय [v]द्यावा [v]पृथिवी ॥ इतरेतरापेक्षया द्विवचनं ' प्र मित्रयोर्वरुणयोः ' (ऋ. सं. ७. ६६. १) इतिवत् ॥ [v]नमेते स्वयमेव प्रह्वीभवतः ॥ ' णमु प्रह्वत्वे ' । कर्मकर्तरि ' न दुहस्नुनमां यकृचिणौ ' इति यकः प्रतिषेधः ॥ [v]चित् अपि च [v]अस्य इन्द्रस्य [v]शुष्मात् बलात् [v]पर्वताः [v]भयन्ते बिभ्यति । [v]यः [v]सोमपाः सोमस्य पाता [v]निचितः सर्वैः । यद्वा अन्येभ्योऽपि दृश्येभ्यो दृढाङ्गः । [v]वज्रबाहुः वज्रसदृशबाहुः । [v]यः च [v]वज्रहस्तः वज्रयुक्तः [v]सः [v]इन्द्रः इत्यादि प्रसिद्धम् ॥

यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥ १४ ॥

यः । सुन्वन्तम् । अवति । यः । पचन्तम् । यः । शंसन्तम् । यः । शशमानम् । ऊती ।
यस्य । ब्रह्म । वर्धनम् । यस्य । सोमः । यस्य । इदम् । राधः । सः । जनासः । इन्द्रः ॥ १४ ॥

[v]यः [v]सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानम् [v]अवति रक्षति । [v]यः च पुरोडाशादीनि हवींषि [v]पचन्तं [v]यः च [v]ऊती ऊतये ॥ ' सुपां सुलुक् ' इति चतुर्थ्याः पूर्वसवर्णदीर्घः । स्वरक्षायै शस्त्राणि

१. ङ्ग-म-सप्तरश्मयः । २. थ-यः ।

[v]शंसन्तं [v]यः च [v]शशमानम् अवति स्तोत्रं कुर्वाणं रक्षति । [v]ब्रह्म परिवृढं स्तोत्रं [v]यस्य [v]वर्धनं वृद्धिकरं भवति । तथा [v]यस्य [v]सोमः वृद्धिहेतुर्भवति । [v]यस्य च [v]इदम् अस्मदीयं [v]राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति । [v]सः [v]इन्द्रः इत्यादि प्रसिद्धम् ॥

यः सुन्वते पचते दुध्र आ चिद्वाजं ददर्षि स किलासि सत्यः ।
वयं ते इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १५ ॥

यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजम् । ददर्षि । सः । किल । असि । सत्यः ।
वयम् । ते । इन्द्र । विश्वह । प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥ १५ ॥

इदानीमृषिः साक्षात्कृतमिन्द्रं प्रति ब्रूते[1] । हे [v]इन्द्र [v]यः [v]दुध्रः दुर्धरः सन् [v]सुन्वते सोमाभिषवं कुर्वते पुरोडाशादिहवींषि [v]पचते यजमानाय [v]वाजम् अन्नं बलं वा [v]आ [v]ददर्षि भृशं प्रापयसि [v]सः तादृशस्त्वं [v]सत्यः यथार्थभूतः [v]असि न पुनर्नास्तीति बुद्धियोग्योऽसि । [v]किल इति प्रसिद्धौ । [v]ते तव [v]प्रियासः [v]सुवीरासः कल्याणपुत्रपौत्राः सन्तः [v]वयं [v]विश्वह सर्वेष्वहःसु [v]विदथं स्तोत्रम् [v]आ [v]वदेम ब्रूयाम ॥ ॥ ९ ॥

' ऋतुर्जनित्री ' इति त्रयोदशर्चं द्वितीयं सूक्तं गार्त्समदम् । ' ऋतुः सपीनान्त्या त्रिष्टुप् ' इत्यनुक्रमणिका । ' अस्मभ्यं तद्वसो ' इति त्रयोदशी त्रिष्टुप् । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । इन्द्रो देवता । उक्थ्ये तृतीयसवने अच्छावाकशस्त्रेऽस्य सूक्तस्य विनियोगः । सूत्रितं च–' ऋतुर्जनित्री नू मर्तो भवा मित्रः ' (आश्व. श्रौ. ६. १) इति । दशरात्रे षष्ठेऽहन्यपि तृतीयसवने अच्छावाकशस्त्रे एतत्सूक्तम् । ' ऋतुर्जनित्रीति नित्यान्यैकाहिकानि ' (आश्व. श्रौ. ८. ४) इति सूत्रितम् ॥

ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥ १ ॥

ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते ।
तत् । आहनाः । अभवत् । पिप्युषी । पयः । अंशोः । पीयुषम् । प्रथमम् । तत् । उक्थ्यम् ॥ १ ॥

[v]ऋतुः वर्षाख्यः कालः [v]जनित्री सोमस्य जनयित्री जननी भवति । [v]तस्याः [v]परि तस्या जनन्याः सकाशात् [v]जातः सोमः [v]अपः उदकानि [v]मक्षु शीघ्रम् [v]आविशत् । [v]यासु अप्सु सोमः [v]वर्धते ता अविशदित्यन्वयः । तस्मादप्सु प्रविष्टत्वात् सोमः [v]आहनाः आहन्तव्योऽभिषोतव्यो भवति । आहनाः इति सकारान्तमिदं पदम् । तथा च मन्त्रवर्णः–' ये ते मदा आहनसो विहायसः ' (ऋ. सं. ९. ७५. ५) इति । या च अंशुरूपा सोमलता [v]पयः सारभूतं [v]पिप्युषी वर्धयन्ती [v]अभवत् ॥ प्यायतेर्लिटि क्वसौ ' लिड्यङोश्च ' इति पीभावः । वसोः संप्रसारणम् । ' उगितश्च ' इति ङीप् ॥ [v]अंशोः तस्याः सोमलतायाः [v]पीयूषं रसभूतं पयः [v]उक्थ्यं प्रशस्यं हविरिन्द्रस्य भवति ॥

१. ख-ग-च-ण१-थ-व–प्रति प्रब्रूते ।

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ २ ॥

सध्री । ईम् । आ । यन्ति । परि । बिभ्रतीः । पयः । विश्वऽप्न्याय । प्र । भरन्त । भोजनम् ।
समानः । अध्वा । प्रऽवताम् । अनुऽस्यदे । यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥२॥

vसध्री । अञ्चतेर्लुक् छान्दसः । ' सहस्य सध्रिः ' इति सभ्यादेशोऽन्तोदात्तत्वेन निपातितः । सध्रीचीनाः vपयः उदकं vपरि परितः vबिभ्रतीः बिभ्राणाः vईम् एता नद्यः vआ vयन्ति सर्वतो गच्छन्ति । ता नद्यः vविश्वप्न्याय विश्वासामपाम् आश्रयभूताय[1] समुद्राय vभोजनम् । भुज्यते इति भोजनं पयः । vप्र vभरन्त प्रकर्षेण संपादयन्ति । कुत एतत् तदाह । vप्रवतां प्रवणवतां निम्नगानां पयसाम् vअनुष्यदे ॥ ' कृत्यार्थे तवैकेन्केन्यत्वनः ' इति केन्प्रत्ययः ॥ अनुष्यन्दनीयः vअध्वा मार्गः vसमानः एको हि । vयस्ता तानि सोमोत्पादननदीप्रवर्तनादीनि कर्माणि vप्रथमं पूर्वम् vअकृणोः अकरोः । vसः तादृङ्महिमोपेतस्त्वम् vउक्थ्यः vअसि सर्वैः प्रशस्यो भवसि ॥

अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ३ ॥

अनु । एकः । वदति । यत् । ददाति । तत् । रूपा । मिनन् । तत्ऽअपाः । एकः । ईयते ।
विश्वाः । एकस्य । विऽनुदः । तितिक्षते । यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥३॥

यजमानः vयत् हविः देवेभ्यः vददाति vतत् vएकः होता vअनु vवदति । याज्यापुरोनुवाक्याभ्यां देवताः स्मारयति । vएकः अध्वर्युः vरूपा पश्वादीनां रूपाणि vमिनन् हिंसन् vतदपाः तत् विशसनाख्यम् अपः कर्म यस्य तादृशः सन् vईयते देवयजने सर्वत्र गच्छति । vएकस्य अध्वर्योः vविश्वाः vविनुदः सर्वाणि तत्कर्तृकाणि विक्षेपणरूपाणि कर्मवैगुण्यानि vतितिक्षते । तद्योग्यप्रायश्चित्तकरणेन ब्रह्मा सहते ॥ गुप्तिज्किद्भ्यः सन् क्षमायामिष्यते ॥ तानि हविष्प्रदानादीनि कर्माणि vयः त्वम् vअकृणोः अकारयः vसः त्वम् vउक्थ्यः vअसि ॥

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ४ ॥

प्रऽजाभ्यः । पुष्टिम् । विऽभजन्तः । आसते । रयिम्ऽइव । पृष्ठम् । प्रऽभवन्तम् । आऽयते ।
असिन्वन् । दंष्ट्रैः । पितुः । अत्ति । भोजनम् ।
यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥ ४ ॥

१. म-आलयभूताय ।

हे इन्द्र [v]पुष्टिं त्वया दत्तं पोषकं धनं स्वकीयाभ्यः [v]प्रजाभ्यः [v]विभजन्तः अस्यैतावदस्यै-तावदिति[1] विभागं कुर्वन्तो गृहमेधिनः [v]आसते स्वस्वगृहेषु निवसन्ति । तत्र दृष्टान्तः । [v]आयते गृहं प्रत्यागच्छतेऽतिथये [v]पृष्ठं धारकं [v]प्रभवन्तं बहुभरणसमर्थं [v]रयिं धनं यथा विभज्य प्रयच्छन्ति तद्वत् । [v]असिन्वन् सेतुबन्धादिकं कर्म कुर्वन् लोकः [v]पितुः पालयित्र्या दिवः सकाशादागतं [v]भोजनम् उदकं तत्कार्या ओषधीः [v]दंष्ट्रैः दन्तैः [v]अत्ति भक्षयति । यद्वा असिन्वन् अव्याप्रियमाणोऽग्निः पितुः पालकस्य यजमानस्य संबन्धि भोजनं हविर्लक्षणमन्नं दंष्ट्रैर्दन्तरूपैर्ज्वालैरत्ति । [v]यस्ताकृणोः इत्यादि सिद्धम्[2] ॥

अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥ ५ ॥

अध । अकृणोः । पृथिवीम् । सम्ऽदृशे । दिवे । यः । धौतीनाम् । अहिऽहन् । अरिणक् । पथः ।
तम् । त्वा । स्तोमेभिः । उदऽभिः । न । वाजिनम् ।
देवम् । देवाः । अजनन् । सः । असि । उक्थ्यः ॥ ५ ॥

हे इन्द्र [v]अध अपि च त्वं [v]दिवे द्योतमानाय सूर्याय [v]पृथिवीं चलितां सतीं दृढीकृत्य [v]संदृशे संदर्शनीयाम् [v]अकृणोः अकरोः ॥ ' दृशे विख्ये च ' इति केन्प्रत्ययान्तत्वेन निपातितः ॥ [v]यः च त्वं [v]धौतीनां चलन्तीनां नदीनां [v]पथः मार्गान् [v]अरिणक् व्यरेचयः[3] । गन्तुं योग्यानकरोरित्यर्थः ॥ ' रिचिर् विरेचने ' । लङि सिप् । तस्य हल्ङ्यादिना लोपः ॥ [v]अहिहन् अहेर्वृत्रस्य मेघस्य वा हन्तर्हे इन्द्र [v]देवाः स्तोतारः [v]तं तादृशं [v]देवं त्वां [v]स्तोमेभिः स्तोत्रैः [v]अजनन् अवर्धयन् । तत्र दृष्टान्तः । [v]उदभिर्न [v]वाजिनम् । यथा वाजिनमश्वमुदभिरुदकैर्वर्धयन्ति तद्वत् ॥ ' पद्दोमास्° ' इत्यादिना उदकस्य उदन्भावः ॥ शेषं सिद्धम् ॥ ॥ १० ॥

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
सः शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥ ६ ॥

यः । भोजनम् । च । दयसे । च । वर्धनम् । आर्द्रात् । आ । शुष्कम् । मधुऽमत् । दुदोहिथ ।
सः । शेवऽधिम् । नि । दधिषे । विवस्वति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ॥६॥

हे इन्द्र [v]यः त्वं [v]भोजनम् । भुज्यते इति भोजनमन्नादि । [v]च [v]दयसे यजमानेभ्यः प्रयच्छसि ॥ ' दय दानगतिरक्षणहिंसाग्रहणेषु ' । आत्मनेपदी ॥ किंच [v]वर्धनं वृद्धिकरं धनं बलं वा दयसे । तथा [v]आर्द्रात् काण्डात्[4] [v]शुष्कम् अनार्द्रं व्रीह्यादिकं [v]मधुमत् मधुररसोपेतं[5] [v]दुदोहिथ दुग्धवानसि ॥ दुहेर्लिटि क्रादिनियमादिडागमः ॥ [v]सः तादृशस्त्वं [v]विवस्वति ते परिचरणं कुर्वाणे यजमाने [v]शेवधिं धनसदनं [v]नि [v]दधिषे निदधासि । किं बहुना । [v]विश्वस्य सर्वस्य जगतः [v]एकः अद्वितीय एव सन् [v]ईशिषे स्वामी भवसि ॥ ' ईश ऐश्वर्ये ' । ' ईशः से ' इतीडागमः ॥ [v]सः इत्यादि सिद्धम् ॥

१. ख-ग-ङ१-ण-त-न-व–अस्यैतावदिति । २. क-ङ-म–प्रसिद्धम् । ३. ख-ग-च–अरेचयः ४. ख–काष्टात् । ५. क-ङ-ण-ण१-म–मधुरसोपेतम् ।

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥ ७ ॥

यः । पुष्पिणीः । च । प्रऽस्वः । च । धर्मणा । अधि । दाने । वि । अवनीः । अधारयः ।
यः । च । असमाः । अजनः । दिद्युतः । दिवः ।
उरुः । ऊर्वान् । अभितः । सः । असि । उक्थ्यः ॥ ७ ॥

हे इन्द्र Vयः त्वं Vपुष्पिणीः पुष्पवतीः Vच Vप्रस्वः प्रसूताः प्रसूयमाना वा Vअवनीः अवित्रीरोषधीः Vदाने Vअधि ॥ उपलूयन्ते यस्यान्यत्रेति दानं क्षेत्रम् । अधिकरणे ल्युट् ॥ तस्मिन् क्षेत्रे Vधर्मणा सकललक्षणेन कर्मणा Vवि Vअधारयः न्यदधाः । Vयः Vच त्वं Vदिवः द्योतमानस्य सूर्यस्य Vअसमाः विषमा नानाप्रकाराः Vदिद्युतः दीप्तीः Vअजनः अजनयः । यद्वा दिवो नक्षत्राणि ॥ जनेर्लङि व्यत्ययेन शप् ॥ यः च Vउरुः महांस्त्वम् Vअभितः सर्वतः Vऊर्वान् महतः प्राणिनिकायान् पर्वतान् वा अजनयः ॥ शिष्टं स्पष्टम् ॥

यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥ ८ ॥

यः । नार्मरम् । सहऽवसुम् । निऽहन्तवे । पृक्षाय । च । दासऽवेशाय । च । अवहः ।
ऊर्जयन्त्याः । अपरिऽविष्टम् । आस्यम् ।
उत । एव । अद्य । पुरुऽकृत् । सः । असि । उक्थ्यः ॥ ८ ॥

Vपुरुकृत् पुरूणां कर्मणां कर्तः हे इन्द्र Vयः त्वं Vनार्मरम् । नॄन् मनुष्यान्मारयतीति नृमरः कश्चिदसुरः । तस्यापत्यं नार्मरः । तं Vसहवसुम् । वसुना सह वर्तत इति सहवसुः । असुरनामैतत् । एतन्नामकमसुरं Vनिहन्तवे ॥ हन्तेस्तुमर्थे तवेन्प्रत्ययः । ' नादौ च निति ' इति गतेः प्रकृतिस्वरत्वम् ॥ निहन्तुम् Vऊर्जयन्त्याः बलवत्या वज्रधारायाः Vअपरिविष्टं मलादिभिरव्याप्तम् Vआस्यम् Vअद्य Vएव Vअवहः तमसुरं प्रापयः । यद्वा ऊर्जयन्त्याः पिशाचिकाया आस्यं प्रापयः । किमर्थम् । Vपृक्षाय तव हविर्लक्षणान्नलाभाय । Vदासवेशाय दासानां दस्यूनां वेशाय विनाशाय Vच । यद्वा अस्माकमन्नलाभाय दस्युविनाशाय च ॥

शतं वा यस्य दर्शं साकमाघ एकस्य श्रुष्टौ यद्ध चोदमाविंथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥ ९ ॥

शतम् । वा । यस्य । दर्शं । साकम् । आ । अघः । एकस्य । श्रुष्टौ । यत् । ह । चोदम् । आविंथ ।
अरज्जौ । दस्यून् । सम् । उनप् । दभीतये । सुप्रऽअव्यः । अभवः । सः । असि । उक्थ्यः ॥९॥

हे इन्द्र [v]एकस्य एकाकिनः श्रेष्ठस्य वा [v]यस्य ते [v]श्रुष्टौ सुखनिमित्ते तदर्थं [v]शतं [v]दश दश शतानि हरयो वाहनार्थं भवन्ति । तथा च मन्त्रवर्णः—' इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ' (ऋ. सं. ६. ४७. १८) इति । अपि च यश्च [v]आ [v]अद्यः सर्वेषां सर्वत उपजीव्यः । ' न तस्येशे यं नाद्याद्यदैनं नाद्युः ' इति हि श्रुतिः । [v]यद्ध यश्च त्वं [v]चोदं स्तोत्राणां[1] प्रेरकं यजमानम् [v]आविथ रक्षितवानसि । किंच यस्त्वम् [v]अरज्जौ रज्जुवर्जिते बन्धनागारे [v]दस्यून् उपक्षपयितॄन् [v]दभीतये । दभीतिर्नाम कश्चिदृषिः । तदर्थं [v]समुनए हिंसितवानसि ॥ उभनेः[2] हिंसाकर्मणो लङि व्यत्ययेन श्नम् । हल्ङ्यादिना सिपो लोपः । अडभावश्छान्दसः ॥ किंच [v]सुप्राव्यः सुखेन सर्वैरुपसर्पणीयः [v]अभवः । शिष्टं सिद्धम् ॥

विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ॥ १० ॥

विश्वा । इत् । अनु । रोधनाः । अस्य । पौंस्यम् । ददुः । अस्मै । दधिरे । कृत्नवे । धनम् ।
षट् । अस्तभ्नाः । विऽस्तिरः । पञ्च । सम्ऽदृशः ।
परि । परः । अभवः । सः । असि । उक्थ्यः ॥ १० ॥

[v]विश्वेत् ॥ 'सुपां सुलुक्' इति जस आकारः ॥ सर्वा एव [v]रोधनाः रोधस्वत्यो नद्यः [v]अस्य इन्द्रस्य [v]पौंस्यम् । पुंसो भावः पौंस्यम् । वीर्यमिति यावत् । [v]अनु तद्वीर्यमनु वर्तन्ते । [v]अस्मै इन्द्राय [v]ददुः हविर्लक्षणमन्नं यजमानाः प्रयच्छन्ति । किंच [v]कृत्नवे कर्मणां कर्त्रे इन्द्राय [v]धनं [v]दधिरे सर्वे जना धारयन्ति । तथा च मन्त्रः—' इन्द्राय द्यावः ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ' (ऋ. सं. ३. ५१. ५) इति । [v]विष्टिरः विस्तीर्णाः [v]षट् षट्संख्याका उर्वीः । ताश्च द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधय इत्येवंरूपाः । ताः [v]अस्तभ्नाः नियमितवानसि । [v]संदृशः । सम्यक् पश्यन्तीति संदृशो जनाः । [v]पञ्च संदृशः पञ्च जनान् [v]परि सर्वतः [v]परः पारयिता पालयिता वा [v]अभवः भवसि । गतमन्यत् ॥ ॥ ११ ॥

सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥ ११ ॥

सुऽप्रवाचनम् । तव । वीर । वीर्यम् । यत् । एकेन । क्रतुना । विन्दसे । वसु ।
जातूऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्र । विश्वा । असि । उक्थ्यः ॥ ११ ॥

[v]वीर बलवन् हे इन्द्र [v]तव [v]वीर्यं सामर्थ्यं [v]सुप्रवाचनं सुष्ठु प्रवचनीयम् । सर्वैः श्लाघनीयमित्यर्थः । किं तत् । [v]एकेन [v]क्रतुना कर्मणा [v]वसु [v]विन्दसे शत्रूणां धनं लभसे ॥ ' विदॢ लाभे '।

१. त-थ-स्तोतॄ (तृ) णाम् । २. त-ज्ञ१-उज्ञातेः; थ-उज्ञातोः ; ण-न-उज्ञातेः;

तुदादिः स्वरितेत् ॥ यद्वा तदीयं धनं स्तोतॄन् प्रापयसीति यत् तत्प्रशस्यमित्यर्थः । [v]सहस्वतः बलवतः [v]जातूष्ठिरस्य । एतन्नामकः कश्चित् । तस्य [v]वयः अन्नं [v]प्र अदः । यद्वा जातूष्ठिरस्य । जातु कदाचित् सर्वदा स्थिरस्य सहस्वतः बलवतो यज्ञादेः कर्मणः संबन्धि वयः हविर्लक्षणमन्नं प्र विन्दसे इति समन्वयः । [v]या यानीमान्यन्यानि [v]विश्वा सर्वाणि कर्माणि [v]चकर्थ कृतवानसि । [v]सः तादृशस्त्वम् [v]उक्थ्यः सर्वैः प्रशंसनीयो भवसि ॥

अरमयः सरपसस्तरायं कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥ १२ ॥

अरमयः । सरऽअपसः । तराय । कम् । तुर्वीतये । च । वय्याय । च । स्रुतिम् ।
नीचा । सन्तम् । उत् । अनयः । पराऽवृजम् ।
प्र । अन्धम् । श्रोणम् । श्रवयन् । सः । असि । उक्थ्यः ॥ १२ ॥

हे इन्द्र [v]सरपसः । सरणमपः कर्म यासां ताः सरपसः ॥ शकन्ध्वादित्वात् पररूपत्वम् ॥ ता अपः [v]कं सुखेन [v]तराय तरणाय [v]अरमयः अक्रीडयः । किंच । [v]तुर्वीतिये । तुर्वीतिर्नाम कश्चिद्राजर्षिः । तस्मै [v]वय्याय [v]च । वय्यो नाम कश्चित् तस्मै । ताभ्यां [v]स्रुतिं सरणं प्रत्यरमयः । तौ हि जलपूर्णां महानदीं दृष्ट्वा तरितुमसमर्थावास्ताम् । तौ च त्वया तारितौ । [v]परावृजम् । परितः पापानि वृणक्ति दहतीति परावृक् कश्चिदृषिः । तमप्सु मग्नं तथा [v]नीचा नीचं [v]सन्तम् [v]उदनयः आपद्भ्यः[1] ऊर्ध्वं नीतवानसि । किंच [v]अन्धं सन्तं [v]श्रोणं पङ्गुं सन्तं चक्षुर्दानादपङ्गुकरणाच्चोदनयः । किं कुर्वन् । प्रकर्षेण[2] [v]श्रवयन् । आत्मानं कीर्तिमन्तं कुर्वन् । उदनयः इति समन्वयः । [v]सः इत्यादि सिद्धम् ॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १३ ॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥

[v]वसो सर्वस्य वासक वसुमन्वा हे [v]इन्द्र स्तोतृभ्यः [v]अस्मभ्यं [v]तत् [v]राधः धनं [v]दानाय । उपलक्षणमेतत् । भोगाय च [v]समर्थयस्व देहि । अस्मान् संगमयेत्यर्थः ॥ 'अर्थ याचने' चुरादिरदन्त आत्मनेपदी ॥ [v]ते तव तत् [v]बहु प्रभूतं [v]वसव्यम् ॥ वस्वेव वसव्यम् । वस्वादित्वात् स्वार्थिको यत् ॥ तादृशं प्रभूतं धनमस्ति खलु । [v]चित्रं चायनीयं [v]यत् धनम् [v]अनु [v]द्यून् अन्वहम् ॥ 'कालाध्वनोः[3]' इति द्वितीया ॥ [v]श्रवस्याः भोग्यमिच्छेः ॥ अन्तर्णीतण्यर्थत्वात्[4] अकर्मकत्वम् । यथा रोदितीति । सत्यम् । द्वे ह्यत्र कर्मणी उद्देश्यकर्म च विधेयकर्म च । विधेयकर्मान्तर्भूतम् । उद्देश्यकर्मणा सकर्मको

१. ख-अद्भ्यः; न-आद्भ्यः; झ-अपेद्भ्यः; ण-आभ्यः । २. क-प्र प्रकर्षेण; म-प्र प्रव(क)र्षेण ।
३. ख-अन्तर्भावितण्यर्थत्वात; फ-अन्तर्भावितण्यर्थात्, म-अन्तरण्यर्थत्वात् ।

भविष्यति। यथा माणवकं पुत्रीयति (पा. सू. ३.१.८.२) इति भाष्ये उदाहृतम्। श्रवःशब्दाच्छन्दसि परेच्छायां क्यच्। तदन्तस्य लेट्याडागमे रूपम्। [v]सुवीराः कल्याणपुत्रपौत्राः सन्तो वयं [v]त्रिदिवे अस्मिन्यज्ञे [v]बृहत् प्रभूतं शस्त्रादिकं वाक्यं [v]वदेम ॥ ॥ १२ ॥

'अध्वर्यवो भरत' इति द्वादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम्। 'अध्वर्यवो द्वादश' इत्यनुक्रान्तम्। सूक्तविनियोगो लैङ्गिकः। अतिरात्रे प्रथमे पर्याये होतुः शस्त्रयाज्या 'अध्वर्यवः' इत्येषा। 'अध्वर्यवो भरतेन्द्राय सोममिति याज्या' (आश्व. श्रौ. ६. ४) इति सूत्रितम् ॥

अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥ १ ॥

अध्वर्यवः । भरत । इन्द्राय । सोमम् । आ । अमत्रेभिः । सिञ्चत । मद्यम् । अन्धः ।
कामी । हि । वीरः । सदम् । अस्य । पीतिम् । जुहोत । वृष्णे । तत् । इत् । एषः । वष्टि ॥ १ ॥

गृत्समदो वृते। [v]अध्वर्यवः अध्वरस्य नेतारः। अध्वरं यजमानायेच्छन्तः॥ 'कव्यध्वरपृतनस्यर्चि लोपः' इत्यकारलोपः॥ अत्र यास्कः–'अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं[1] कामयते[1]' (निरु. १. ८) इति। हे अध्वर्यवः [v]इन्द्राय देवाय [v]सोमं हविर्धानादुत्तरवेदिं प्रति [v]भरत हरत॥ आमन्त्रितस्याविद्यमानत्वादनिघातः॥ हृत्वा [v]अमत्रेभिः। अमा सहादन्त्यत्र होत्रादय इत्यमत्राणि चमसाः। तैः [v]मद्यं मदकरम्[2] [v]अन्धः सोमलक्षणमन्नम् [v]आ [v]सिञ्चत अग्नौ प्रक्षिपत। अत्र यास्कः–'आ सिञ्चतामत्रैर्मदनीयमन्धोऽमत्रं पात्रममा अस्मिन्नदन्ति' (निरु. ५. १) इति। [v]वीरः स इन्द्रः [v]अस्य सोमस्य [v]पीतिं पानं प्रति [v]सदं सदैव [v]कामी [v]हि कामयमानो हि। तस्मात् [v]वृष्णे वर्षित्र इन्द्राय सोमं [v]जुहोत जुहुत॥ 'हु दानादनयोः'। लोटि 'तप्तनप्तनथनाश्च' इति तबादेशः॥ [v]एषः इन्द्रः [v]तदित् तदेव सोमद्रव्यं [v]वष्टि कामयते॥

अध्वर्यवो य अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशाय एष इन्द्रो अर्हति पीतिमस्य ॥ २ ॥

अध्वर्यवः । यः । अपः । वव्रिऽवांसम् । वृत्रम् । जघान । अशन्याऽइव । वृक्षम् ।
तस्मै । एतम् । भरत । तत्ऽवशाय । एषः । इन्द्रः । अर्हति । पीतिम् । अस्य ॥ २ ॥

* हे [v]अध्वर्यवः [v]यः इन्द्रः [v]अपः उदकानि [v]वव्रिवांसम् आवृत्य स्थितं [v]वृत्रम्। वृणोत्याकाशमिति वृत्रो मेघः। तं मेघं वज्रेण [v]जघान हतवान्। [v]अशन्येव। यथाशन्या वैद्युताग्निना

---

१. झ१-ण-त-थ-न-व–'अध्वरं कामयते' इति नास्ति। २. स्व-ग-ण१-न-व–शब्दकरम्; झ१–शब्दमदकरम्। * म–पुस्तके अस्य मन्त्रस्य भाष्यमेवं दृश्यते—
'हे अध्वर्यवः य इन्द्रः अपः मेघसंबन्धीन्युदकानि वव्रिवांसं निरोधकं वृत्रमसुरं जघानाहतवान्। यथा अशन्या वृक्षमिव। तस्मै एतस्मादेतमिन्द्रं वशां हु (हू) यमानायां भजत एष इन्द्रः अस्य सोमस्य पीतिं पानमर्हति।'

वृक्षं दहति तद्वत् । वतस्मै वतद्वशाय सोमकामाय तस्मा इन्द्राय वएतं सोमं वभरत उत्तरवेदिं प्रति हरत । वएषः वइन्द्रः वअस्य सोमस्य वपीतिं पानम् वअर्हति ॥

अध्वर्यवो यो दभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अध्वर्यवः । यः । दभीकम् । जघान । यः । गाः । उत्ऽआजत् । अप । हि । वलम् । वरिति वः ।
तस्मै । एतम् । अन्तरिक्षे । न । वातम् । इन्द्रम् । सोमैः । आ । ऊर्णुत । जूः । न । वस्त्रैः ॥३॥

हे वअध्वर्यवः वयः इन्द्रः वदभीकम् । सर्वान् विदारयति भियं करोतीति दभीको नामासुरः । तमसुरं वजघान । वयः च वलासुरेण निरुद्धाः वगाः वउदाजत् निरगमयत् । ततश्च[1] तमेव ववलम् असुरम् वअप वः अपावृणोत् । हिंसितवानित्यर्थः॥ वृणोतेर्लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् । हल्ङ्यादिना तिपो लोपः ॥ वतस्मै इन्द्राय वएतं सोमम् वअन्तरिक्षे वातं वन वातमिव धारणाभिः व्याप्तं कुरुत । तदेवाह । वसोमैः वइन्द्रम् वआ वऊर्णुत सर्वत आच्छादयत ॥ 'ऊर्णुञ् आच्छादने' । आदादिकः । लोटि रूपम् ॥ तत्र दृष्टान्तः । वजूर्न । जीर्णो यथा ववस्त्रैः अङ्गमाच्छादयति तद्वत् ॥

अध्वर्यवो य उरणं जघान नव चरुत्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥ ४ ॥

अध्वर्यवः । यः । उरणम् । जघान । नव । चरुत्वांसम् । नवतिम् । च । बाहून् ।
यः । अर्बुदम् । अव । नीचा । बबाधे । तम् । इन्द्रम् । सोमस्य । भृथे । हिनोत ॥४॥

हे वअध्वर्यवः वयः इन्द्रः वनव वनवतिं वच एकोनशतं वबाहून् वचरुत्वांसम् ॥ चष्टेरिदं रूपम् । यद्वा खनतेः क्वसौ रूपम् । जने (? अनो) लोपः । छान्दसं रूपम् ॥ सर्वस्य दर्शयन्तम् । यद्वा आत्मनो देहे निखातवन्तम् वउरणम् एतन्नामकमसुरं वजघान । वयः च वअर्बुदम् एतन्नामकमसुरं च वनीचा अधोमुखं कृत्वा वअव वबबाधे । वतम् एनम् वइन्द्रं वसोमस्य वभृथे सोमं बिभ्रति पात्रे वहिनोत वर्धयत । यद्वा सोमस्य भृथे भरणे संपादने सति हिनोत स्तोत्रैः प्रीणयत ॥ 'हि गतिवृद्ध्योः' । स्वादिः ॥

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ ५ ॥

अध्वर्यवः । यः । सु । अश्नम् । जघान । यः । शुष्णम् । अशुषम् । यः । विऽअंसम् ॥
यः । पिप्रुम् । नमुचिम् । यः । रुधिऽक्राम् । तस्मै । इन्द्राय । अन्धसः । जुहोत ॥ ५ ॥

१. ण-म-यश्च ।

हे [v]अध्वर्यवः [v]यः इन्द्रः [v]अभ्रम्। अभ्राति भक्षयति प्राणिजातमिति। यद्वा अभ्नुते स्वतेजसा सर्वं व्याप्नोतीत्यभ्रः कश्चिदसुरः। तमसुरं [v]सु सुष्ठु [v]जघान। [v]अशुषं केनाप्यशोषणीयं [v]शुष्णम् असुरं [v]यः[1] च तमसुरं[1] [v]व्यंसम् अंसहीनं कृत्वा जघान। [v]यः च [v]पिप्रुं तेजसा जगद्व्याप्य वर्तमानमेतन्नामकमसुरं [v]नमुचिम् असुरं जघान [v]यः च। तैत्तिरीयके 'नमुचिमसुरं नालभत' इति प्रकृत्य 'फेनेन शिर उदवर्तयत्' (तै. ब्रा. १. ७. १. ५-६) इत्यन्तेन वाक्यसंदर्भेण नमुचिवधः प्रपञ्चितः। तथा मन्त्रश्च– 'अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः' (ऋ. सं. ८. १४. १३) इति। [v]रुधिक्राम् एतन्नामकमसुरं [v]यः च जघान। [v]तस्मै [v]इन्द्राय [v]अन्धसः हविर्लक्षणान्यन्नानि [v]जुहोत जुहुत ॥

अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥ ६ ॥

अध्वर्यवः। यः। शतम्। शम्बरस्य। पुरः। बिभेद। अश्मनाऽइव। पूर्वीः।
यः। वर्चिनः। शतम्। इन्द्रः। सहस्रम्। अपऽअवपत्। भरत। सोमम्। अस्मै ॥६॥

हे [v]अध्वर्यवः [v]यः इन्द्रः [v]शम्बरस्य मायाविनोऽसुरस्य [v]पूर्वीः पुरातनीः [v]शतं [v]पुरः पुरीः [v]अश्मनेव अश्मसदृशेन वज्रेण [v]बिभेद। [v]यः च [v]इन्द्रः [v]वर्चिनः ॥ 'वर्च दीप्तौ'। 'गमेरिनिः' (उ. सू. ४. ४४६) इति विधीयमान इनिर्बहुलवचनादस्माद्भवति ॥ यद्वा नामैतत्। तस्यासुरस्य [v]शतं [v]सहस्रम् एतत्संख्याकानपरिमितान्वीरान् पुत्रान् [v]अपावपत् युगपदेव भूम्यामपातयत्। तथा च मन्त्रवर्णः–'शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्' (ऋ. सं. ७. ९९. ५) इति। [v]अस्मै इन्द्राय [v]सोमं [v]भरत ॥ ॥ १३ ॥

अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान्।
कुत्सस्यायोरतिथिग्वस्य वीरान्नि यर्वृणग्भरता सोममस्मै ॥ ७ ॥

अध्वर्यवः। यः। शतम्। आ। सहस्रम्। भूम्याः। उपऽस्थे। अवपत्। जघन्वान्।
कुत्सस्य। आयोः। अतिथिऽग्वस्य। वीरान्। नि। अवृणक्। भरत। सोमम्। अस्मै ॥७॥

हे [v]अध्वर्यवः [v]जघन्वान् पूर्वं शत्रून् हतवान् [v]यः इन्द्रः [v]शतं [v]सहस्रम् असुरान् [v]भूम्याः [v]उपस्थे उत्सङ्गे [v]अवपत् एकैकेन प्रकारेणापातयत्। किंच यः [v]कुत्सस्य एतन्नामकस्य राजर्षेः। [v]आयोः पौरुरवसस्य राजर्षेः। [v]अतिथिग्वस्य दिवोदासस्य। एतेषां त्रयाणां [v]वीरान् अभिगन्तॄन् प्रतिद्वन्द्विनः शुष्णादीनसुरान् [v]न्यवृणक्। वृणक्तिर्हिंसाकर्मा। अवधीत्। तथा च मन्त्रवर्णः–'त्वं कुत्सं शुष्णहत्येष्वाविथारन्धयोऽतिथिग्वाय शम्बरम्' (ऋ. सं. १. ५१. ६) इति। तादृशायेन्द्राय [v]सोमं [v]भरत ॥

१. त-थ–'यश्च तमसुरं' नास्ति।

अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ ८ ॥

अध्वर्यवः । यत् । नरः । कामयाध्वे । श्रुष्टी । वहन्तः । नशथ । तत् । इन्द्रे ।
गभस्तिऽपूतम् । भरत । श्रुताय । इन्द्राय । सोमम् । यज्यवः । जुहोत ॥ ८ ॥

Vनरः कर्मणां नेतारो हे Vअध्वर्यवः Vयत् अभिलषितमर्थं Vकामयाध्वे[1] ॥ कामयतेर्लेड्याडागमः ॥ Vश्रुष्टी क्षिप्रम् Vइन्द्रे सोमं Vवहन्तः प्रापयन्तो यूयं Vतत् अभिलषितं फलं Vनशथ प्राप्नुत । Vश्रुताय लोके प्रसिद्धाय Vइन्द्राय Vगभस्तिपूतं हस्ताभ्यां मार्जनदोहनादिभिः[2] शोधितं Vसोमं Vभरत उत्तरवेदिं प्रति हरत । ततः Vयज्यवः यागं कुर्वाणा हे अध्वर्यवः आहृतं सोमम् इन्द्राय Vजुहोत जुहुत । अग्नौ प्रक्षिपत ॥

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् । *
जुषाणो हस्त्यमभि वावशे वः इन्द्राय सोमं मदिरं जुहोत ॥ ९ ॥

अध्वर्यवः । कर्तन । श्रुष्टिम् । अस्मै । वने । निऽपूतम् । वने । उत् । नयध्वम् ।
जुषाणः । हस्त्यम् । अभि । वावशे । वः । इन्द्राय । सोमम् । मदिरम् । जुहोत ॥ ९ ॥

हे Vअध्वर्यवः Vअस्मै इन्द्राय सोमं Vश्रुष्टिं सुष्ठुकरं Vकर्तन कुरुत ॥ करोतेर्लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'तसनसनथनाश्च' इति तनबादेशः। आमन्त्रितस्याविद्यमानत्वान्न निघातः ॥ किंच Vवने संभजनीये Vवने उदके Vनिपूतम् आप्यायनेन शोधितं सोमम् Vउन्नयध्वम् ऊर्ध्वं नयत । यद्वा वने तद्विकारे चमसे निपूतं दशापवित्रेण शोधितं सोमं वने चमस उन्नयध्वम् । Vजुषाणः प्रीयमाणः स इन्द्रः Vवः युष्माकं Vहस्त्यं हस्ताभ्यामभिपुतं सोमम् Vअभि Vवावशे कामयते ॥ 'वश कान्तौ' । यङ्लुगन्तस्य लटि व्यत्ययेनात्मनेपदम् । 'लोपस्त आत्मनेपदेषु' इति तलोपः ॥ Vमदिरं मदकरमिमं Vसोमम् Vइन्द्राय Vजुहोत । इन्द्रोद्देशेनाग्नौ प्रक्षिपत ॥

अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतदिन्मन्तं भूयो यजतश्चिकेत ॥ १० ॥

अध्वर्यवः । पयसा । ऊधः । यथा । गोः । सोमेभिः । ईम् । पृणत । भोजम् । इन्द्रम् ।
वेद । अहम् । अस्य । निऽभृतम् । मे । एतत् । दित्सन्तम् । भूयः । यजतः । चिकेत ॥ १० ॥

---

१. क-न-म–कामयाध्वे कामयध्वे । २. ख-ग-ङ-ञ१-व–माज्जन°; क-च-ज-ण-ण१-थ-न-फ-म–आज्जन°; त–माज्जनदोहनाभिः ।

हे [V]अध्वर्यवः [V]यथा [V]गोः [V]ऊधः [V]पयसा पूर्णं तद्वत् [V]ईम् एनं [V]भोजं फलस्य दातारं रक्षितारं च [V]इन्द्रं [V]सोमेभिः सोमैः [V]पृणत पूरयत । [V]मे मदीयस्य [V]अस्य सोमस्य [V]निभृतं गूढं सुख-साधनस्वभावम् [V]अहम् एव [V]वेद जानामि । इति पूर्वं न परस्मै कथितं तथापि युष्मभ्यं ब्रवीमीत्येवम् । [V]दित्सन्तं सोमं दातुमिच्छन्तं यजमानं [V]यजतः यष्टव्य इन्द्रः [V]भूयः अतिशयेन [V]चिकेत ॥ दित्सन्तम् । 'दुदाञ् दाने' । इच्छायां सन् । 'सनि मीमाघु' इत्याकारस्य इसादेशः[1] । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । 'सः स्यार्धधातुके' इति सकारस्य तत्वम् ॥

अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥ ११ ॥

अध्वर्यवः । यः । दिव्यस्य । वस्वः । यः । पार्थिवस्य । क्षम्यस्य । राजा ।
तम् । ऊर्दरम् । न । पृणत । यवेन । इन्द्रम् । सोमेभिः । तत् । अपः । वः । अस्तु ॥११॥

हे [V]अध्वर्यवः [V]यः इन्द्रः [V]दिव्यस्य द्युलोकार्हस्य [V]वस्वः वसुनः [V]राजा भवति । [V]यः च [V]पार्थिवस्य । पृथिवीशब्देन विस्तीर्णमन्तरिक्षमुच्यते । तत्रत्यं धनं पार्थिवम् । तस्य राजा । यश्च [V]क्षम्यस्य । क्षमा भूमिः । तत्रत्यं धनं क्षम्यम् । तस्य च राजा भवति । [V]तम् एवंविधम् [V]इन्द्रं [V]सोमेभिः सोमैः [V]पृणत पूरयत । तत्र दृष्टान्तः । [V]ऊर्दरं [V]न । ऊर्ध्वं[2] दीर्णमूर्दरं कुसूलम्[2] । यथा [V]यवेन तत्[3] पूर्णं तद्वदिन्द्रं पूरयतेति । तादृशं सोमादिनेन्द्रोदरपूरणलक्षणम् [V]अपः कर्म [V]वः युष्माकम् [V]अस्तु ॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १२ ॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥१२॥

एषा ऋग्व्याख्याता ॥ ॥ १४ ॥

'प्र घा न्वस्य' इति दशर्चं चतुर्थं सूक्तं गात्समदं त्रैष्टुभमैन्द्रम् । अत्रानुक्रमणिका–'प्र घ दश' इति । दशरात्रे षष्ठेऽहनि निष्केवल्ये त्रीणि सूक्तानि । तत्रेदं द्वितीयम् । 'षष्ठस्य' इति खण्डे सूत्रितम्–'एन्द्र याह्युप नः प्र घा न्वस्याभूरेक इति निष्केवल्यम्' (आश्व. श्रौ. ८. १) इति । त्र्येकमामके निष्केवल्ये 'प्र घा न्वस्य' इत्येषा सूक्तमुखीया । उशनःस्तोमे सूत्रितं—'त्र्यर्यमा मनुषो देवताता प्र घा न्वस्य महतो महानि' (आश्व. श्रौ. ९. ५) इति ॥

---

१. झ-त–इकारादेशः । २. थ–ऊर्ध्वं दीर्णमूर्जेन दीर्णमूर्दरं कुसूलम्; म–ऊर्ददीर्णमूर्जेदीर्णम् उदरम् । ३. ण–'तत्' नास्ति ।

प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥ १ ॥

प्र । घ । नु । अस्य । महतः । महानि । सत्या । सत्यस्य । करणानि । वोचम् ।
त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य । मदे । अहिम् । इन्द्रः । जघान ॥ १ ॥

गृत्समदो ब्रूते । [v]महतः बलवतः [v]सत्यस्य सत्यसंकल्पस्य [v]अस्य इन्द्रस्य [v]सत्या सत्यानि यथार्थानि [v]महानि महान्ति [v]करणानि अस्मिन्सूक्ते वक्ष्यमाणानि कर्माणि [v]नु अद्य [v]प्र [v]वोचं प्रकर्षेण ब्रवीमि ॥ 'वच परिभाषणे' । 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लुङि 'अस्यतिवक्तिख्यातिभ्योऽङ्' । 'वच उम्' । [v]घ इति प्रसिद्धौ । कानि तानि उच्यन्ते । [v]त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येवंरूपेष्वाभिमुख्यविकेष्वहःसु [v]सुतस्य अभिषुतं सोमम् इन्द्रः [v]अपिबत् । ततः पीतस्य [v]अस्य सोमस्य [v]मदे हर्षे संजाते सति [v]इन्द्रः [v]अहिं वृत्रमसुरं [v]जघान हतवान् ॥

अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥ २ ॥

अवंशे । द्याम् । अस्तभायत् । बृहन्तम् । आ । रोदसी इति । अपृणत् । अन्तरिक्षम् ।
सः । धारयत् । पृथिवीम् । पप्रथत् । च । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ २ ॥

[v]अवंशे आकाशे [v]द्यां द्योतमानं सूर्यं द्युलोकं वा [v]अस्तभायत् इन्द्रोऽस्तभ्नात् । अनवलम्बनस्य तस्यावस्थापनमकरोदित्यर्थः ॥ स्तम्भु इति सौत्रो धातुः त्र्यादिः । लङि 'व्यत्ययो बहुलम्' इत्यहावपि शायजादेशः ॥ [v]बृहन्तं महत [v]अन्तरिक्षं [v]रोदसी द्यावापृथिव्यौ च [v]अपृणत् स्वतेजसा पूरितवान् । किंच [v]सः इन्द्रः [v]पृथिवीं विस्तीर्णां भूमिं [v]धारयत् अधारयत् । तथा [v]पप्रथच्च पुनां[1] भूमिमप्रथयत् ॥ 'प्रथ प्रख्याने' । ण्यन्तस्य लुङि चङि रूपम् । 'चङ्यन्यतरस्याम्' इति मध्योदात्तत्वम् । [v]सोमस्य [v]मदे हर्षे संजाते सति तानीमानि कर्माणि [v]इन्द्रश्चकार ॥

सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥ ३ ॥

सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनाम् ।
वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ३ ॥

---

१. ख-ग-च-ण-थ-व-एताम् ।

Vसञ्चेव यथा यज्ञगृहान् Vमानैः षट्त्रिंशत्प्रक्रमप्राचीत्येवंरूपैः परिमाणैः प्राक्प्रवणान् कुर्वन्ति तद्वत् सिन्धून् लोकान्वानृजून्वा मानैः परिमाणैः Vप्राचः प्राञ्चुखान् Vवि Vमिमाय । इन्द्रो विशेषेण निर्मितवान् । तथा Vनदीनां Vस्वानि निर्गमनद्वाराणि Vवज्रेण च Vअतृणत् अखनत् ॥ ' तृदि हिंसानादरयोः ' । रुधादि । लङ् ॥ तथा च मन्त्रः—' इन्द्रो अस्मॉं अरदद्वज्रबाहुः ' (ऋ. सं. ३. ३३. ६) इति । तथा Vदीर्घयाथैः बहुकालं[1] गन्तव्यैः[1] Vपथिभिः मार्गैः Vवृथा Vअसृजत् अनायासेन ताः नदीः सृष्टवान् । Vसोमस्य इति सिद्धार्थ इति ॥

स प्रवोळ्हृन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥ ४ ॥

सः । प्रऽवोळ्हृन् । परिऽगत्य । दभीतेः । विश्वम् । अधाक् । आयुधम् । इद्धे । अग्नौ ।
सम् । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥४॥

प्राक्किल चुमुरिधुनिप्रभृतयोऽसुरा दभीतेः पुरं संरुध्य परिगृह्य तस्मात्पुरान्निरगुरिति कथा । Vसः इन्द्रः Vदभीतेः । दभीतिर्नाम कश्चिद्राजर्षिः । तस्य Vप्रवोळ्हृन् प्रवोढॄन् ॥ ' सहिवहोरोदवर्णस्य ' इत्योत्वम् ॥ प्रकर्षेण तं दभीतिं वहतस्तानसुरान् मध्येमार्गं Vपरिगत्य तेषां Vविश्वं सर्वम् Vआयुधम् Vइद्धे Vअग्नौ दीप्यमाने वह्नौ Vअधाक् अधाक्षीत् ॥ दहेर्लुङि ' मन्त्रे घस ' इत्यादिना च्लेर्लुक् ॥ पश्चात्तं दभीतिं Vगोभिः Vअश्वैः Vरथेभिः रथैश्च Vसम् Vअसृजत् संयोजितवान् । सोमस्यादि सिद्धमिति ॥

अतिमूर्तिनाम्न्येकाहे मरुत्वतीये सूक्तमुखीया । ' अतिमूर्तिना ' इति खण्डे सूत्रितं—' स ईं महीं धुनिमेतोररम्णात् ' (आश्व. श्रौ. ९. ८) इति ॥

स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥ ५ ॥

सः । ईम् । महीम् । धुनिम् । एतोः । अरम्णात् । सः । अस्नातॄन् । अपारयत् । स्वस्ति ।
ते । उत्ऽस्नाय । रयिम् । अभि । प्र । तस्थुः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥५॥

Vसः इन्द्रः Vईम् एनां Vमहीं महतीं Vधुनिम् । धुनोति स्तोतॄणां पापानीति धुनिः परुष्णी नदी । ताम् Vएतोः ॥ ईश्वरपदासंनिधानेऽपि तोसुन्प्रत्ययः (पा. सू. ३. ४. १३) ॥ ऋषीणां गमनार्थम् Vअरम्णात् उपाशमयत् । महाजलां नदीमल्पोदकामकरोदित्यर्थः । ततः Vसः इन्द्रः Vअस्नातॄन् स्नातुमशक्तान् तरणासमर्थानृषीन् Vस्वस्ति क्षेमेण Vअपारयत् । Vते महर्षयः Vउत्स्नाय तां नदीमुत्तीर्य यं रयिमपेक्ष्य गच्छन्ति तं Vरयिम् अभिलक्ष्य Vप्र Vतस्थुः प्रतस्थिरे । शिष्टं सिद्धम् ॥ ॥१५॥

१. ख-ग-च-ण-ण१-व—बहुकालगन्तव्यैः ।

सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्वन्त्सोमस्य ता मद इन्द्रश्चकार ॥ ६ ॥

सः । उदञ्चम् । सिन्धुम् । अरिणात् । महिऽत्वा । वज्रेण । अनः । उषसः । सम् । पिपेष ।
अजवसः । जविनीभिः । विऽवृश्वन् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ६ ॥

ᵛसः इन्द्रः ᵛसिन्धुं प्राञ्चं सन्तं ᵛमहित्वा स्वकीयेन महिम्ना ᵛउदञ्चम् ᵛअरिणात् । उदङ्मुखमकरोत् ॥ सिन्धुशब्दश्छन्दसि पुंलिंगः ॥ ᵛउषसः उपोदेव्याः ᵛअनः शकटं ᵛवज्रेण ᵛसं ᵛपिपेष । चूर्णीचकार । एतच्च ' दिवश्चिद्धा दुहितरम् ' (ऋ. सं. ४. ३०. ९) इत्यत्र स्पष्टं वक्ष्यते । किं कुर्वन् । ᵛअजवसः जवहीना दुर्बलाः सेनाः ᵛजविनीभिः जवयुक्ताभिः सेनाभिः ᵛविवृश्वन् विशेषेण भिन्दन् । पिपेषेति समन्वयः ॥ ' ओव्रश्चू छेदने ' । शतरि ग्रहिज्यादिना संप्रसारणम् । शिष्टं स्पष्टम् ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्यनक्ति चष्ट सोमस्य ता मद इन्द्रश्चकार ॥ ७ ॥

सः । विद्वान् । अपऽगोहम् । कनीनाम् । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् ।
प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इन्द्रः । चकार ॥७॥

पुरा किल कन्यकाश्चक्षुर्हीनं पादहीनं परावृजं जिघृक्षुमृषिं दृष्ट्वाभिदुद्रुवुः । ततः स ऋषिरिन्द्रं स्तुत्वा चक्षुः पादं च लेभे । तदेतदाह । ᵛकनीनां कन्यकानाम् ᵛअपगोहम् अपगोहनं तिरोभावं ᵛविद्वान् ᵛपराबृक् ऋषिः ᵛआविर्भवन् सर्वेषां प्रत्यक्षो भवन् ᵛउदतिष्ठत् । ᵛश्रोणः पूर्वं पङ्गुरिदानीमिन्द्रस्य प्रसादात् विभग्नजानुः[1] ताः कन्याः ᵛप्रति ᵛस्थात् । पूर्वमन्धोऽधुना चक्षुर्लाभात् ᵛवि ᵛअचष्ट । ताः कन्यका विशेषेण पश्यति स्म । तानीमानि कर्माणि सः ᵛइन्द्रश्चकार ॥

भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥ ८ ॥

भिनत् । वलम् । अङ्गिरःऽभिः । गृणानः । वि । पर्वतस्य । दंहितानि । ऐरत् ।
रिणक् । रोधांसि । कृत्रिमाणि । एषाम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥८॥

ᵛअङ्गिरोभिः ᵛगृणानः स्तूयमानः स इन्द्रः ᵛवलं वलनामकमसुरं ᵛभिनत् अभिनत् । तथा गवां निरोधकस्य ᵛपर्वतस्य ᵛदंहितानि शिलाभिर्दृढीकृतानि द्वाराणि ᵛवि ᵛऐरत् उद्घाटितवान् । तदेवाह । ᵛएषां पर्वतानां ᵛकृत्रिमाणि क्रियया निर्वृत्तानि ᵛरोधांसि निरुद्धानि द्वाराणि ᵛरिणक् उदघाटयत् । गतमन्यत् ॥

१. क-ङ्ग-विसंभजानुः ।

अतिमूर्तिनाम्न्येकाहे निष्केवल्ये सूक्तमुखीया 'स्वग्नेन' इत्येषा । सूत्रितं – 'स्वग्नेनाभ्युप्या चुमुरिं धुनिं चेति सूक्तमुखीया' (आश्व. श्रौ. ९. ८) इति ॥

स्वग्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥ ९ ॥

स्वग्नेन । अभिऽउप्य । चुमुरिम् । धुनिम् । च । जघन्थ । दस्युम् । प्र । दभीतिम् । आवः ।
रम्भी । चित् । अत्र । विविदे । हिरण्यम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ९ ॥

स त्वं दस्युं सर्वस्योपक्षपयितारं चुमुरिं धुनिं च एतन्नामानावसुरौ स्वग्नेन दीर्घनिद्रया अभ्युप्य संयोज्य जघन्थ हतवानसि । ततः ताभ्यां युध्यमानं दभीतिं राजर्षिं प्र आवः रक्षितवानसि । तथा च मन्त्रवर्णः–'त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु' (ऋ. सं. ७. १९. ४) इति ॥ आवः । अवते रक्षणार्थस्य लङि सिपि रूपम् ॥ रम्भी चित् वेत्रधारी चास्य दौवारिकः अत्र अस्मिन्युद्धे तयोरसुरयोः हिरण्यं धनं विविदे लेभे । 'विदृ लाभे' स्वरितेत् । तानीमानि कर्माणि सोमस्य मदे सति चकार इति ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १० ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १० ॥

एषा ऋग्व्याख्याता ॥ ॥ १६ ॥

'प्र वः सताम्' इति नवर्चं पञ्चमं सूक्तं गार्ग्यमदमैन्द्रम् । अत्रानुक्रमणिका–'प्र वो नवान्त्या त्रिष्टुप्' इति । नवमी त्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः ॥ तृतीये पर्यायेऽच्छावाकशस्त्रे 'प्र वः सताम्' इति सूक्तम् । 'अतिरात्रे' इति खण्डे सूत्रितं–'प्र वः सतां प्रो द्वौणे हरयः कर्माग्मन्निति याज्या' (आश्व. श्रौ. ६. ४) इति ॥

प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥ १ ॥

प्र । वः । सताम् । ज्येष्ठऽतमाय । सुऽस्तुतिम् । अग्नौऽइव । सम्ऽइधाने । हविः । भरे ।
इन्द्रम् । अजुर्यम् । जरयन्तम् । उक्षितम् । सनात् । युवानम् । अवसे । हवामहे ॥ १ ॥

गृत्समदो ब्रूते । हे यजमानाः [v]वः युष्मदर्थं [v]सतां महतां देवानां [v]ज्येष्ठतमाय अतिशयेन श्रेष्ठायेन्द्राय तदर्थम् । [v]अग्नाविव [v]समिधाने । इवशब्द एवार्थः । दीप्यमान एवाग्नौ [v]हविः [v]प्र [v]भरे संपादयामि । ततः परं [v]सुष्टुतिं शोभनां स्तुतिं करोमि ॥ भर इति 'भृञ् भरणे' त्रित्त्वादुभयपदी । लटि रूपम् ॥ [v]अजुर्यम् अजरणीयं [v]जरयन्तं सर्वमन्यज्जरयन्तम् [v]उक्षितं सोमेन सिक्तं [v]सनात् सनातनं [v]युवानं नित्यतरुणं तादृशम् [v]इन्द्रम् [v]अवसे अस्माकं रक्षणाय तस्य तर्पणाय वा [v]हवामहे आह्वयामः ॥

यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृतार्धि वीर्या ।
जठरे सोमं तन्वि३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥ २ ॥

यस्मात् । इन्द्रात् । बृहतः । किम् । चन । ईम् । ऋते ।
विश्वानि । अस्मिन् । सम्ऽभृता । अधि । वीर्या ।
जठरे । सोमम् । तन्वि । सहः । महः । हस्ते । वज्रम् । भरति । शीर्षणि । क्रतुम् ॥२॥

[v]बृहतः महतः [v]यस्मात [v]इन्द्रात् [v]ऋते [v]किम् अपि [v]ईम् इदं जगत् [v]चन नास्तीत्यर्थः ॥ चेति नेति निपातद्वयसमुदायश्चनेति । चेति चिदित्यर्थे नेति निषेधार्थे[1] । एकपदं तु सांप्रदायिकम् ॥ उक्तार्थे मन्त्रः—'नेन्द्राददते पवते धाम किं चन' (ऋ. सं. ९. ६९.६) इति । यद्वा इन्द्राद्ददते ईमिदं जगत् किम् । न क्षुद्रमल्पमित्यर्थः । कुत एतत् तदेवोच्यते । [v]अस्मिन् इन्द्रे [v]विश्वानि सर्वाणि वीर्याणि सामर्थ्यानि [v]अधि [v]संभृता अधिकं संभृतान्यासते । यश्चेन्द्रः [v]जठरे स्वोदरे [v]सोमम् अभिषुतं सोमरसं [v]भरति बिभर्ति । किंच [v]तन्वि तन्वां स्वकीये सर्वस्मिन् शरीरे [v]सहः बलं [v]महः तेजश्च बिभर्ति । [v]हस्ते [v]वज्रम् आयुधं बिभर्ति । [v]शीर्षणि शिरसि [v]क्रतुं विज्ञानं भरति बिभर्ति ॥ यद्वृत्तयोगाद्निघातः । वाक्यभेदाद्वा निघाताभावः । शीर्षणि । 'शीर्षंश्छन्दसि' इति ॥

न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥ ३ ॥

न । क्षोणीभ्याम् । परिऽभ्वे । ते । इन्द्रियम् । न । समुद्रैः । पर्वतैः । इन्द्र । ते । रथः ।
न । ते । वज्रम् । अनु । अश्नोति । कः । चन ।
यत् । आशुऽभिः । पतसि । योजना । पुरु ॥ ३ ॥

हे [v]इन्द्र [v]ते तव [v]इन्द्रियं बलं [v]क्षोणीभ्यां द्यावापृथिवीभ्यां [v]न [v]परिभ्वे न परिभवनीयम् ॥ 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्प्रत्ययः । 'उदात्तस्वरितयोः०' इति स्वरितत्वम् ॥ किंच [v]ते [v]रथः [v]समुद्रैः [v]पर्वतैः च [v]न परिभवनीयः । [v]ते [v]वज्रम् [v]आयुधं [v]कश्चन पुमान् [v]न[v]अन्वश्नोति

१. ख-ग-ङ१-ण-ण१-न-व–निषिद्धार्थे; च-ङ-थ–निषिद्धार्थे ।

न व्याप्नोति परिभवितुम् ॥ 'अशू व्याप्तौ'। व्यत्ययेन परस्मैपदम् ॥ [v]यत् यदा असुरवधार्थं दिग्विजयकाले [v]पुरु पुरूणि बहूनि [v]योजना योजनानि [v]पतसि गच्छसि । तदा तव बलादि न परिभवनीयमिति समन्वयः ॥

विश्वे॒ ह्य॑स्मै यज॒ताय॑ धृ॒ष्णवे॒ क्रतुं॑ भर॑न्ति वृष॒भाय॒ सश्च॑ते ।
वृषा॑ यजस्व ह॒विषा॑ विदु॒ष्टर॒ः पिबे॑न्द्र॒ सोमं॑ वृष॒भेण॑ भा॒नुना॑ ॥ ४ ॥

विश्वे॑ । हि । अ॒स्मै॒ । य॒ज॒ताय॑ । धृ॒ष्णवे॑ । क्रतु॑म् । भर॑न्ति । वृ॒ष॒भाय॑ । सश्च॑ते ।
वृषा॑ । य॒ज॒स्व॒ । ह॒विषा॑ । वि॒दुः॒ऽतर॑ः । पिब॑ । इ॒न्द्र॒ । सोम॑म् । वृ॒ष॒भेण॑ । भा॒नुना॑ ॥ ४ ॥

हे यजमान [v]विश्वे सर्वे जनाः [v]यजताय सर्वैर्यजनीयाय [v]धृष्णवे शत्रूणां धर्षणशीलाय [v]वृषभाय कामानां वर्षित्रे [v]सश्चते सजमानाय स्तुत्यादिकर्मवत्सु स्तोतृषु एतादृशायेन्द्राय [v]क्रतुं यज्ञादिलक्षणं कर्म [v]भरन्ति [v]हि हरन्ति खलु । प्रणयन्तीत्यर्थः ॥ भरन्ति । हियोगादनिघातः ॥ यस्मादेवं तस्मात् [v]वृषा सोमरससेचनसमर्थः [v]विदुष्टरः ॥ विद्वच्छब्दात्तरपि छान्दसं संप्रसारणम् । 'शासिवसिघसीनां च' इति संहितायां षत्वम् ॥ विद्वत्तरस्त्वं [v]हविषा तमिन्द्रं [v]यजस्व । इदानीमिन्द्रं संबोध्याह । हे [v]इन्द्र [v]वृषभेण कामानां वर्षकेण [v]भानुना दीप्यमानेनाग्निना सह [v]सोमं [v]पिब ॥

वृष्ण॒ः कोश॑ः पवते॒ मध्व॑ ऊ॒र्मिर्वृ॑ष॒भान्ना॑य वृष॒भाय॒ पात॑वे ।
वृष॑णाध्व॒र्यू वृ॑ष॒भासो॒ अद्र॑यो॒ वृष॑णं॒ सोमं॑ वृष॒भाय॑ सुष्वति ॥ ५ ॥

वृष्ण॑ः । कोश॑ः । पव॑ते । मध्व॑ः । ऊ॒र्मिः । वृ॒ष॒भऽअ॑न्नाय । वृ॒ष॒भाय॑ । पात॑वे ।
वृष॑णा । अ॒ध्व॒र्यू इति॑ । वृ॒ष॒भासः॑ । अद्र॑यः । वृष॑णम् । सोम॑म् । वृ॒ष॒भाय॑ । सु॒स्व॒ति॒ ॥ ५ ॥

हे इन्द्र [v]वृष्णः फलस्य वर्षितुः [v]मध्वः मदकरस्य सोमस्य [v]कोशः रसः[1] [v]ऊर्मिः अनुष्ठातॄणां पातॄणां च प्रेरकः सन् [v]पवते गच्छति ॥ 'पव गतौ'। अनुदात्तेत् ॥ किमर्थम् । [v]वृषभान्नाय । बलवर्षकाणि[2] अन्नानि यस्य स तथोक्तः । तादृशाय [v]वृषभाय कामानां वर्षित्र इन्द्राय [v]पातवे पानार्थं पवत इति समन्वयः । किंच [v]वृषणा सोमरससेचनसमर्थौ [v]अध्वर्यू अध्वर्युप्रतिप्रस्थातारौ [v]वृषभासः वर्षकाः [v]अद्रयः अभिषवग्रावाणश्च [v]वृषणं स्वर्गादिफलस्य सेक्तारं [v]सोमं [v]वृषभाय देवानां श्रेष्ठाय तुभ्यं [v]सुष्वति सुन्वन्ति ॥ सुनोतेर्लटि 'बहुलं छन्दसि' इति विकरणस्य श्लुः । 'अदभ्यस्तात्' इति झेरादेशः ॥ ॥ १७ ॥

१. झ-म-'रसः' नास्ति । २. क-झ-म-वृषभवर्षकाणि ।

वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥

वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा ।
वृष्णः । मदस्य । वृषभ । त्वम् । ईशिषे । इन्द्र । सोमस्य । वृषभस्य । तृप्णुहि ॥ ६ ॥

वृषभ कामानां वर्षक हे इन्द्र ते तव वज्रः वृषा कामवर्षकः । तथा ते रथः अपि वृषा । ते हरी एतन्नामकावश्वौ वृषणा वर्षकौ । तव आयुधा वज्रव्यतिरिक्तान्यायुधान्यपि वृषभाणि । वृष्णः वर्षकस्य मदस्य मदकरस्य सोमस्य त्वम् एव ईशिषे स्वामी भवसि । हे इन्द्र वृषभस्य वर्षकेण सोमस्य सोमेन तृप्णुहि तृप्तो भव ॥ ' तृप प्रीणने ' । स्वादिः । क्षुभ्नादिषु (पा. सू. ८. ४. ३९) ' नृनमन तृम्पोति ' इति पठितम् । तथापि सर्वविधीनां छन्दसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुवित्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥ ७ ॥

प्र । ते । नावम् । न । समने । वचस्युवम् । ब्रह्मणा । यामि । सवनेषु । दधृषिः ।
कुवित् । नः । अस्य । वचसः । निऽबोधिषत् ।
इन्द्रम् । उत्सम् । न । वसुनः । सिचामहे ॥ ७ ॥

दाधृषिः स्वप्रमादाच्छत्रूणां धर्षकोऽहं समने संग्रामे वचस्युवम् ॥ अमि तन्वादित्वादुवङादेशः ॥ स्तोत्रमिच्छन्तं नावं न नावमिवापद्गमत्रारकं ते त्वां सवनेषु त्रिषु ब्रह्मणा स्तोत्रेण प्र यामि प्राप्नोमि[1] । किंच अस्य वचसः स्तुतिलक्षणमेतद्वाक्यं कुवित् बहु निबोधिषत् इन्द्रो नितरां बुध्यताम् ॥ ' बुध अवगमने ' । लेटि ' सिब्बहुलम् ' इति सिप् । कुवित्योगादनिघातः । ' तिङि चोदात्तवति ' इति गतेर्निघातः ॥ वयं च उत्सं न जलस्य निधानभूतं कूपमिव वसुनः निधानभूतम् इन्द्रं सिचामहे सोमेन सिञ्चामः ॥ ' सिचिर् क्षरणे ' । स्वरितेत् । आगमानुशासनस्यानित्यत्वात् नुमभावः ॥

पुरा सैबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥ ८ ॥

पुरा । सम्ऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सम् । यवसस्य । पिप्युषी ।
सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो ।
सम् । पत्नीभिः । न । वृषणः । नसीमहि ॥ ८ ॥

---

१. क-ज्ञ-म-दधृषिः । २. क-ज्ञ-प्राप्नोमि द्यौमि ? ।

हे इन्द्र [v]संबाधात् शत्रुजन्यात् संबाधात्[1] [v]पुरा [v]नः अस्मान् [v]अभ्या [v]वृत्स्व आवर्तय[2]। यथा संबाधोऽस्मान् न स्पृशति तथा कुर्वित्यर्थः। तत्र दृष्टान्तः। [v]धेनुर्न [v]वत्सम्। यथा [v]यवसस्य घासेन [v]पिप्युषी आप्यायिता धेनुर्वत्सं क्षुद्बाधात्परावर्तयति तद्वत्। हे [v]शतक्रतो वयं [v]सुमतिभिः स्वद्विषयैः शोभनैः स्तोत्रैः [v]सकृत् सकृदपि [v]सु [v]नसीमहि सुष्ठु व्याप्नुयेमहि। तत्र दृष्टान्तः। [v]वृषणः [v]न। मेक्कारो युवानो यथा [v]पत्नीभिः व्याप्यन्ते तद्वत॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो मातिं घग्भगो नो बृहद्वदेम विदथे सुवीराः॥ ९॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी।
शिक्ष। स्तोतृऽभ्यः। मा। अतिं। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥९॥

नूनं सा त इति व्याख्याता॥ ॥ १८॥

'तदस्मै' इति नवर्चं षष्ठं सूक्तं गार्त्समदमैन्द्रम्। अत्रानुक्रमणिका - 'तदस्मै द्विचिष्टुबन्तम्' इति। अन्त्ये द्वे त्रिष्टुभौ शिष्टाः सप्त जगत्यः। अतिरात्रे द्वितीये पर्यायेऽच्छावाकशस्त्रे 'तदस्मै' इति सूक्तम्। 'अतिरात्रे पर्यायाणाम्' इति खण्डे सूत्रितं- 'तदस्मै नव्यमस्य पिब यस्य जज्ञान इन्द्रेति याज्या' (आश्व. श्रौ. ६. ४) इति॥

तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दंहितान्यैरयत्॥ १॥

तत्। अस्मै। नव्यम्। अङ्गिरस्वत्। अर्चत। शुष्माः। यत्। अस्य। प्रत्नऽथा। उत्ऽईरते।
विश्वा। यत्। गोत्रा। सहसा। परिऽवृता। मदे। सोमस्य। दंहितानि। ऐरयत्॥ १॥

गृत्समदो वृते। हे स्तोतारः [v]नव्यं नवतरमन्यैरदृष्टपूर्वं [v]तत् तादृशं स्तोत्रम् [v]अङ्गिरस्वत् अङ्गिरस इव [v]अस्मै इन्द्राय [v]अर्चत वृत। [v]यत् यस्माज्जातमात्रस्य [v]अस्य इन्द्रस्य [v]शुष्माः शत्रूणां शोषकाणि तेजांसि [v]प्रत्नथा॥ 'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' इति इवार्थे थाल्प्रत्ययः॥ प्रत्नानि पुरातनानीव [v]उदीरते उद्गच्छन्ति॥ 'ईर गतौ'। अनुदात्तेत्। 'तिङि चोदात्तवति' इति गतेर्निघातः॥ [v]यत् यस्माच्च [v]विश्वा सर्वान् [v]गोत्रा मेघान्। गा उदकानि त्रायन्ते रक्षन्तीति गोत्रा मेघाः। [v]परीवृता वृत्रेणाक्रान्तान्॥ सर्वत्र सुपो डादेशः॥ तान् [v]दंहितानि तेन दृढीकृतान् मेघान् [v]सोमस्य [v]मदे हर्षे संजाते सति [v]सहसा बलेन [v]ऐरयत् उदघाटयत्। मेघभेदनेनापः प्रेरयामासेत्यर्थः। यद्वा विश्वा सर्वाणि परीवृता वलासुरेण[3] आक्रान्तानि दंहितानि पर्वतबिले निरुद्धानि गोत्रा॥ 'इनित्रकट्यचश्च' इति समूहार्थे त्रप्रत्ययः॥ गवां वृन्दानि सहसैरयत्॥ तस्माद्बिलान्निरगमयत्। तस्मादर्चतेति समन्वयः॥ ऐरयत्। 'ईर गतौ'। ण्यन्तस्य लङि रूपम्। यद्वृत्तयोगादनिघातः॥

१. ज्ञ-त-थ-'शत्रुजन्यात् संबाधात्' नास्ति। २. ण-न-शत्रुभिरुत्पादितादावर्तय। ३. ग-थ-म-वृत्राखुरेण।

स भूतु यो ह प्रथमाय धायसे ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षाणि द्यां महिना प्रत्यमुञ्चत ॥ २ ॥

सः । भूतु । यः । ह । प्रथमाय । धायसे । ओजः । मिमानः । महिमानम् । आ । अतिरत् ।
शूरः । यः । युत्ऽसु । तन्वम् । परिऽव्यत । शीर्षाणि । द्याम् । महिना । प्रति । अमुञ्चत ॥२॥

[v]सः इन्द्रः [v]भूतु भवतु । वर्धतामित्यर्थः । [v]यः इन्द्रः [v]ओजः तेजो बलं [v]मिमानः कुर्वाणः सन् [v]प्रथमाय प्राथमिकाय [v]धायसे ॥ 'धेट् पाने' ॥ सोमपानाय [v]महिमानम् [v]आतिरत् अवर्धयत् ॥ तिरतेर्व्यत्ययेन शः । यद्योगादनिघातः ॥ [v]शूरः शत्रूणां शातयिता [v]यः इन्द्रः [v]युत्सु युद्धेषु [v]तन्वं स्वकीयं शरीरं [v]परिव्यत वर्मणा[1] परिवीतमकरोत् । स इन्द्रः [v]महिना स्वकीयेन महिम्ना [v]शीर्षाणि स्वशिरसि [v]द्यां [v]प्रत्यमुञ्चत अधारयत् ॥

अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ॥ ३ ॥

अध । अकृणोः । प्रथमम् । वीर्यम् । महत् । यत् । अस्य । अग्रे । ब्रह्मणा । शुष्मम् । ऐरयः ।
रथेऽस्थेन । हरिऽअश्वेन । विऽच्युताः । प्र । जीरयः । सिस्रते । सध्र्यक् । पृथक् ॥ ३ ॥

[v]अध अपि च हे इन्द्र त्वं [v]प्रथमं मुख्यं तत् [v]वीर्यं सामर्थ्यम् [v]अकृणोः अकरोः । किं तत् । [v]ब्रह्मणा स्तोत्रेण स्तुतिसाधनभूतेन वेदवाक्येन [v]अस्य वीर्यस्य स्तोतुर्जनस्य [v]अग्रे पुरतः [v]यत् [v]शुष्मं शत्रूणां शोषकं बलम् [v]ऐरयः उदगमयः । [v]जीरयः जरयितारः बाधका असुराः [v]रथेष्ठेन रथस्थितेन [v]हर्यश्वेन त्वया[2] [v]विच्युताः स्वस्थानाच्च्याविताः सन्तः [v]सध्र्यक् सध्रीचीनाः परस्परं संगताः [v]पृथक् भीत्या वियुक्ताः[3] सन्तः [v]प्र [v]सिस्रते प्रकर्षेण धावन्ति ॥ 'स्रु गतौ' । जुहोत्यादिः । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् ॥ सध्र्यगिति 'सहस्य सधिः' इति सध्र्यादेशः । अद्रिसध्र्यो-रन्तोदात्तत्वेन निपातनात् 'उदात्तस्वरितयोः' इति यणः स्वरितत्वम् ॥

अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥

अध । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत ।
आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् ।
सीव्यन् । तमांसि । दुधिता । सम् । अव्ययत् ॥ ४ ॥

---

१. ज-ण-न–चर्मणा; झ १–वर्मेण । २. झ १-ण-त-थ-न-व–'त्वया' नास्ति । ३. क-ख-ग-च-ज-झ-ण-ण १-न-फ-ब–अभियुक्ताः; झ १–युक्ताः ।

vअध अपि च vप्रवयाः प्रवृद्धाज्ञः पुरातनो वा vयः इन्द्रः vविश्वा vभुवना सर्वान् लोकान् vमज्मना बलेनाभिभूय vईशानकृत् आत्मानं सर्वस्याधिपतिं कुर्वन्। यद्वा अग्न्यादीन् देवान् तत्तल्लोकाधिपतीन् कुर्वन् vअभ्यवर्धत सर्वतः प्रवृद्धोऽभवत्। vआत् अनन्तरं vवह्निः जगतां वोढा स इन्द्रः vज्योतिषा स्वीयेन[1] तेजसा vरोदसी द्यावापृथिव्यौ vआततनोत् व्याप्नोत्। किंच vतमांसि तमोरूपाणि रक्षांसि vदुधिता दुःस्थितानि[2] दुर्गतानि vसीव्यन् विस्तारयन् vसमव्ययत् आवृणोत्। जगद्व्याप्य वर्तत इत्यर्थः॥

स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥ ५॥

सः। प्राचीनान्। पर्वतान्। दृंहत्। ओजसा। अधराचीनम्। अकृणोत्। अपाम्। अपः।
अधारयत्। पृथिवीम्। विश्वऽधायसम्। अस्तभ्नात्। मायया। द्याम्। अवऽस्रसः॥ ५॥

vसः इन्द्रः vप्राचीनान् इतस्ततः प्रकर्षेणाञ्चतो गच्छतः सपक्षान् vपर्वतान् vओजसा बलेन vदृंहत्। पक्षच्छेदं कृत्वा भूमौ दृढीचकार। अचलानकरोदित्यर्थः। vअपां मेघस्थितानामुदकानाम् vअपः स्यन्दनलक्षणं कर्म vअधराचीनम्। अधःप्रदेशमञ्चति गच्छतीत्यधराचीनम्। तादृशम् vअकृणोत्। मेघभेदनं कृत्वापो भूमावपातयदित्यर्थः। किंच vविश्वधायसं विश्वस्य धात्रीं vपृथिवीं बलेन vअधारयत्। vमायया प्रज्ञयोपायेन vद्यां द्युलोकम् vअवस्रसः॥ 'स्रंसु गतौ'। संपदादिलक्षणो भावे क्विप्॥ अवपतनात् vअस्तभ्नात्॥ ॥ १९॥

सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि।
येना पृथिव्यां नि किरिं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः॥ ६॥

सः। अस्मै। अरम्। बाहुऽभ्याम्। यम्। पिता। अकृणोत्।
विश्वस्मात्। आ। जनुषः। वेदसः। परि।
येन। पृथिव्याम्। नि। किरिम्। शयध्यै। वज्रेण। हत्वी। अवृणक्। तुविऽस्वनिः॥ ६॥

vसः तादृश इन्द्रः vअस्मै जगते vअरम् अलं पर्याप्तो बभूव। रक्षकत्वेन स्वामी बभूवेत्यर्थः। vपिता सर्वस्य पालकः प्रजापतिः vविश्वस्मात् सर्वस्मात् vजनुषः जनात vपरि ततोऽप्युत्कृष्टात vवेदसः ज्ञानात् तद्विशिष्टं vबाहुभ्यां स्वकीयाभ्यां बाहुभ्यां vयम् vआ vअकृणोत्। तुविष्वणिः बहुकीर्तिः महास्वनो वा स इन्द्रः vयेन ज्ञानेन vकिरिम् एतन्नामानमसुरं vवज्रेण vहत्वी॥ 'रनाभ्यादयश्च' इति स्त्री॥ हत्वा ताडयित्वा vपृथिव्यां भूमौ vशयध्यै शयनाय दीर्घनिद्रायै vनि vअवृणक्॥ वृणक्तिर्हिंसाकर्मा॥ न्यवधीत्॥

१, म–स्वकीयेन। २. म–दुःस्थितानि।

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥ ७ ॥

अमाजूःऽइव । पित्रोः । सचा । सती । समानात् । आ । सदसः । त्वाम् । इये । भगम् ।
कृधि । प्रऽकेतम् । उप । मासि । आ । भर । दद्धि । भागम् । तन्वः । येन । ममहः ॥७॥

हे इन्द्र [v]अमाजूः यावज्जीवं गृह एव जीर्यन्ती[1] [v]पित्रोः [v]सचा[1] मातापितृभ्यां सह भवन्ती तयोः शुश्रूषणपरा पतिमलभमाना [v]सती[2] दुहिता [v]समानात् आत्मनः पित्रोश्च साधारणात् [v]सदसः गृहात् ॥ 'अधिकरणे चोपसंख्यानम्' इति पञ्चमी ॥ गृह उपस्थायैव यथा भागं याचति तथा स्तोताहं [v]भगं भजनीयं धनं [v]त्वाम् [v]इये ॥ ईं गत्यादिषु । लिड्युत्तम इति व्यत्ययेनात्मनेपदम् । इयङादेशः ॥ त्वां याचे । तत्र देयं धनं [v]प्रकेतं प्रकर्षेण ज्ञातव्यं विश्वजनीयं[3] [v]कृधि कुरु । तत्र [v]उप [v]मासि एतावदिदं धनमिति कुरु[4] । [v]आ [v]भर तत्र धनं संपादय । [v]भागं भजनीयं धनं [v]तन्वः शरीराय मह्यमिति यावत् [v]दद्धि देहि । [v]येन धनेन [v]ममहः स्तोतृनिमान् पूजयसि[5] ॥

भोजं त्वामिन्द्र वयं हुवेम ददिष्टमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥ ८ ॥

भोजम् । त्वाम् । इन्द्र । वयम् । हुवेम । ददिः । त्वम् । इन्द्र । अपांसि । वाजान् ।
अविड्ढि । इन्द्र । चित्रया । नः । ऊती । कृधि । वृषन् । इन्द्र । वस्यसः । नः ॥ ८ ॥

हे [v]इन्द्र [v]भोजं पालयितारं भोजयितारं वा [v]त्वां [v]वयं [v]हुवेम ॥ ह्वयतेर्लिङि 'बहुलं छन्दसि' इति संप्रसारणम् ॥ हे [v]इन्द्र [v]त्वम् [v]अपांसि कर्माणि [v]वाजान् अन्नानि [v]ददिः ॥ 'दाण् दाने' 'आदृगमहनजनः' इति किप्रत्ययः । लिङ्योगादभ्यासादिकार्यम् । 'न लोकाव्ययनिष्ठा' इति षष्ठीप्रतिषेधः ॥ दाता त्वम् । हे [v]इन्द्र [v]चित्रया नानाप्रकारया [v]ऊती ऊत्या पालनेन [v]नः अस्मान् [v]अविड्ढि रक्ष । [v]वृषन् कामानां वर्षक हे [v]इन्द्र [v]नः अस्मान् [v]वस्यसः अतिशयेन वसुमतः [v]कृधि कुरु ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

---

१. क-ञ-म-जीवन्ती (ञ-जीर्यतीति) पित्रोः सचा सा अमा । २. ण-त-थ-म-' सती ' नास्ति । ३. ञ१-ण-त-थ-न-व-विश्वसनीयम् (?) । ४. क-ञ-त-थ-न-म-व-तं कुरु; ञ१-मितं कुरु । ५. च-ज-ण-ण१-न-फ-व-आपूजयसि; त-थ-आपूजयति; म-येन पूजयसि ।

नूनं सा त इति व्याख्याता ॥ ॥ २० ॥

'प्राता रथः' इति नवर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम्। 'प्रातः' इत्यनुक्रान्तम्। लैङ्गिको विनियोगः ॥

प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥

प्रातरिति । रथः । नवः । योजि । सस्निः । चतुःऽयुगः । त्रिऽकशः । सप्तऽरश्मिः । दशऽअरित्रः । मनुष्यः । स्वःऽसाः । सः । इष्टिऽभिः । मतिऽभिः । रंह्यः । भूत् ॥ १ ॥

[v]रथः रंहणाद्रथो यज्ञः । स च [v]नवः । नूयते स्तूयतेऽत्रेति नवः स्तुतिमान् । [v]सस्निः ॥ 'स्ना[1] शौचे'। 'आदृगमहन-' इति किन्प्रत्ययः ॥ शुद्धः । एवंविधो यज्ञः [v]प्रातः प्रातःकाले [v]योजि अयोज्यस्माभिः । [v]चतुर्युगः । युज्यन्त इति युगानि ग्रावाणः । चत्वारि युगानि यस्य स तथोक्तः । अध्वर्व्वाद्यृत्विगभिप्रायं वा । [v]त्रिकशः । तिस्रः कशा वाचो मन्द्रमध्यमोत्कृष्टरूपा यस्य स तथोक्तः । सवनत्रयाभिप्रायं वा । [v]सप्तरश्मिः । अश्नुवते व्याप्नुवन्ति कर्माणीति रश्मयश्छन्दांसि । सप्तसंख्याकानि गायत्र्यादीनि छन्दांसि यस्य स तथोक्तः । [v]दशारित्रः । अरिभ्यः पापेभ्यस्त्रायन्त इत्यरित्रा ग्रहाः । दशसंख्याका ग्रहा यस्य स तादृशः । चमसाध्वर्य्वभिप्रायं वा । [v]मनुष्यः मनुष्याणां हितः । [v]स्वर्षाः स्वर्गस्य दाता । [v]सः एवंविधो यज्ञः [v]इष्टिभिः प्रायणीयादिभिः [v]मतिभिः मननीयैः स्तोत्रैः [v]रंह्यः शब्दनीयः [v]भूत अभूत् । यद्वा नवोऽभिनवः। सस्निः ॥ सनोतेर्द्विवचनादि ॥ कामानां दाता । रथः । रमन्तेऽस्मिन्निति रथः स्यन्दनः प्रातःसवने च सोमपानार्थं योजि अश्वैर्योजि । कीदृशः । चतुर्युगः । त्रिकशः । तिस्रः कशा यस्य स तथोक्तः । सप्तरश्मिः सप्तरज्जुः । दशारित्रो दशचक्रः[2] । मनुष्यो मनुष्यहितः स्वर्षाः स्वर्गस्य संगमयिता इन्द्ररथः[3] इष्टिभिर्यागैर्मतिभिः स्तोत्रैश्च प्राप्तव्यो भवति ॥

सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥ २ ॥

सः । अस्मै । अरम् । प्रथमम् । सः । द्वितीयम् । उतो इति । तृतीयम् । मनुषः । सः । होता । अन्यस्याः । गर्भम् । अन्ये । ऊँ इति । जनन्त । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥२॥

[v]सः यज्ञः सोमो वा [v]अस्मै इन्द्राय [v]प्रथमं प्रातःसवने [v]अरं पर्याप्तोऽभूत् । [v]सः च [v]द्वितीयं माध्यंदिने सवने पर्याप्तोऽभूत् । [v]उतो अपि च सः [v]तृतीयं तृतीये सवने पर्याप्तोऽभूत् । सर्वत्र 'कालाध्वनोः-' इति द्वितीया ॥ [v]सः यज्ञः सोमो वा [v]मनुषः मनुष्यस्य [v]होता शुभानां वोढा भवति । किंच [v]अन्ये ऋत्विजः [v]अन्यस्याः पृथिव्या वेदात्मिकायाः[4] वाचो वा [v]गर्भं सन्तं सोमं

१. ज्ञ१-म-ष्णा । २. क-च-ण१-त-थ-न-फ-व-दशवक्त्रः; ख-ग-ण-दशवक्राः; झ-दशवक्रः । ३. म-ईड्रथः । ४. ख-ग-च-ज-ज्ञ१-ण-ण१-त-थ-न-फ-व-त्रेयात्मिकायाः ।

यज्ञं वा ᵛजनन्त अजनयन्त । ᵛउ प्रसिद्धयर्थः । ᵛवृषा अभिमतफलवर्षकः ᵛजेन्यः जयसमर्थः ᵛसः यज्ञः सोमो वा ᵛअन्येभिः अन्यैः इन्द्रादिभिर्देवैः ᵛसचते संगच्छते ॥ ' सच समवाये ' । अनुदात्तेत ॥

हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥ ३ ॥

हरी इति । नु । कम् । रथे । इन्द्रस्य । योजम् । आऽयै । सुऽउक्तेन । वचसा । नवेन ।
मो इति । सु । त्वाम् । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥३॥

ᵛइन्द्रस्य संबन्धिनि ᵛरथे ᵛहरी पुनन्नामकावश्वौ ᵛनु क्षिप्रं ᵛकं सुखेन ᵛआयै गमनाय ᵛनवेन अन्यैरकृतपूर्वेण ᵛवचसा वेदात्मकेन ᵛसूक्तेन साधनेन ᵛयोजं युनज्मि ॥ ' युजिर् योगे ' । लुङि ' इरितो वा ' इति च्लेरङादेशः ॥ ᵛअत्र अस्मिन् यज्ञे ᵛबहवः ᵛविप्राः मेधाविनः स्तोतारो भवन्ति ᵛहि । तथापि ᵛअन्ये मद्व्यतिरिक्ताः ᵛयजमानासः यजमानाः ᵛत्वां ᵛसु सुष्ठु ᵛमो ᵛनि ᵛरीरमन् नितरां मा रमयन्तु । अतोऽस्मदीयं यज्ञमागत्य सोमं पिबेति भावः ॥ रीरमन् । रमतेर्ण्यन्तस्य लुङि चङि सन्वद्भावादभ्यासस्येत्वदीर्घौ । वाक्यभेदादत्र हियोगाभावेन निघातः ॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥

आ । द्वाभ्याम् । हरिऽभ्याम् । इन्द्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः ।
आ । अष्टाभिः । दशऽभिः । सोमऽपेयम् । अयम् । सुतः । सुऽमख । मा । मृधः । कृरिति कः ॥४॥

हे ᵛइन्द्र होतृभिः ᵛआ ᵛहूयमानः त्वं ᵛद्वाभ्यां ᵛहरिभ्याम् अश्वाभ्यामिमं यज्ञं प्रति सोमपानार्थम् ᵛआ ᵛयाहि । ᵛचतुर्भिः हरिभिः ᵛआ याहि । तथा ᵛषड्भिः आगच्छ ᵛसोमपेयम् ॥ ' पा पाने ' । कर्मणि ' अचो यत् ' । ' ईद्यति ' इतीत्वम् । पातव्यं सोमं प्रति ᵛअष्टाभिः अश्वैः ᵛआ याहि ॥ ' अष्टनो दीर्घात् ' (पा. सू. ६. १. १७२) इति विभक्तेरुदात्तत्वम् ॥ ᵛदशभिः हरिभिरागच्छ । ᵛसुमख सुयज्ञ सुधन वा हे इन्द्र ᵛअयं सोमस्त्वदर्थमभिषुतः । अतो यज्ञस्य ᵛमृधः हिंसाः ᵛमा ᵛकः मा कार्षीः ॥ करोतेर्लुङि ' मन्त्रे घस ' इत्यादिना च्लेर्लुक् । गुणे कृते हल्ङ्यादिना सिपो लोपः ॥ यद्यपीन्द्रस्य द्वावेव हरी तथापि तयोर्विभूतिभेदान्नानात्वम् । अतोऽश्वबहुत्वमविरुद्धम् ॥

आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥ ५ ॥

आ । विंशत्या । त्रिंशता । याहि । अर्वाङ् । आ । चत्वारिंशता । हरिऽभिः । युजानः ।
आ । पञ्चाशता । सुऽरथेभिः । इन्द्र । आ । षष्ट्या । सप्तत्या । सोमऽपेयम् ॥ ५ ॥

हे [v]इन्द्र [v]सोमपेयं पातव्यं सोमं प्रति [v]अर्वाङ् अस्मदभिमुखः सन् [v]विंशत्या विंशति-संख्याकैरश्वैः [v]आ [v]याहि । [v]त्रिंशता त्रिंशत्संख्याकैर्हरिभिरागच्छ । [v]चत्वारिंशता चत्वारिंशत्संख्याकैः [v]हरिभिः [v]युजानः युज्यमानस्त्वं सोमपानं प्रति [v]आ याहि । [v]सुरथेभिः सुरंहणैः सुगमनैः [v]पञ्चाशता हरिभिः [v]आ याहि । तथा [v]षष्टया षष्टिसंख्याकैर्हरिभिः [v]सप्तत्या एतत्संख्याकैर्हरिभिः सोमपानं प्रत्यागच्छ ॥ ॥ २१ ॥

आ शीत्या नवत्या याह्यर्वाङ् शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥ ६ ॥

आ । अशीत्या । नवत्या । याहि । अर्वाङ् । आ । शतेन । हरिऽभिः । उह्यमानः ।
अयम् । हि । ते । शुनऽहोत्रेषु । सोमः । इन्द्र । त्वाऽया । परिऽसिक्तः । मदाय ॥ ६ ॥

[v]अशीत्या अशीतिसंख्याकैरश्वैः सोमपानार्थम् [v]अर्वाङ् अस्मदभिमुखः सन् [v]आ [v]याहि । [v]नवत्या एतत्संख्याकैरश्वैरागच्छ । [v]शतेन शतसंख्याकैः [v]हरिभिरुह्यमानः धार्यमाणस्त्वम् [v]आ याहि । हे [v]इन्द्र [v]हि यस्मात् [v]ते [v]मदाय हर्षाय [v]शुनहोत्रेषु । सुखेन हूयते सोमो यैरिति शुनहोत्राः पात्र-विशेषाः । तेषु [v]अयं [v]सोमः [v]त्वाया त्वत्कामनया [v]परिषिक्तः ॥

मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥ ७ ॥

मम । ब्रह्म । इन्द्र । याहि । अच्छ । विश्वा । हरी इति । धुरि । धिष्व । रथस्य ।
पुरुऽत्रा । हि । विऽहव्यः । बभूथ । अस्मिन् । शूर । सवने । मादयस्व ॥ ७ ॥

हे [v]इन्द्र [v]मम [v]ब्रह्म अस्मदीयामेव स्तुतिम् [v]अच्छ अभिलक्ष्य [v]याहि । [v]विश्वा व्याप्तौ [v]हरी [v]रथस्य [v]धुरि युगप्रान्ते [v]धिष्व संयोजय[1] । [v]पुरुत्रा पुरुभिर्बहुभिर्यजमानैस्त्वं [v]विहव्यः विविधं ह्वातव्यः [v]बभूथ बभूविथ ॥ ' बभूथाततन्थ जगृभ्म ववर्थ ' इति निपातनादिडभावः ॥ हे [v]शूर [v]अस्मिन् [v]सवने यज्ञे [v]मादयस्व सोमपानेन हृष्टो भव ॥

न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥ ८ ॥

न । मे । इन्द्रेण । सख्यम् । वि । योषत् । अस्मभ्यम् । अस्य । दक्षिणा । दुहीत ।
उप । ज्येष्ठे । वरूथे । गभस्तौ । प्रायेऽप्राये । जिगीवांसः । स्याम ॥ ८ ॥

१. म–योजय ।

[v]इन्द्रेण सह [v]मे मम [v]सख्यं यष्टृयष्टव्यलक्षणं सख्यं [v]न [v]वि [v]योषत् कदाचिदपि न वियुज्यताम् ॥ यौतेर्लेटि ' सिब्बहुलम् ' इति सिप् । अडागमः ॥ [v]अस्य इन्द्रस्य [v]दक्षिणा इन्द्रकर्तृकं दानम् [v]अस्मभ्यं [v]दुहीत अभिमतफलं दुग्धाम् ॥ दुहेर्लिङि रूपम् । [v]ज्येष्ठे अतिशयेन प्रशस्ये [v]वरूथे आपदां वारके वरणीये वा [v]गभस्तौ बाहौ [v]उप समीपे वर्तिनः [v]स्याम । इन्द्रस्य हस्तस्पर्शयोग्या भवेमेत्यर्थः । किंच [v]प्रायेप्राये सोमपानार्थमिन्द्रस्य यज्ञशालायां प्रवेशेप्रवेशे [v]जिगीवांसः शत्रूणां जेतारो भवेम । यद्वा प्रायेप्राये । प्रकर्षेणेयते गम्यते योद्धृभिरिति प्रायं युद्धम् । तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

नूनं सा त इति व्याख्याता ॥ ॥ २२ ॥

' अपाय्यस्य ' इति नवर्चमष्टमं सूक्तं गार्ग्यमदं त्रैष्टुभमैन्द्रम् । ' अपायि ' इत्यनुक्रान्तम् । लैङ्गिकः सूक्तविनियोगः । द्वितीये पर्याये होतृशस्त्रयाज्या अपायीत्येषा (आश्व. श्रौ. ६. ४) ॥

अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओकां दधे ब्रह्मण्यन्तश्च नरः ॥ १ ॥

अपायि । अस्य । अन्धसः । मदाय । मनीषिणः । सुवानस्य । प्रयसः ।
यस्मिन् । इन्द्रः । प्रऽदिवि । ववृधानः । ओकः । दधे । ब्रह्मण्यन्तः । च । नरः ॥ १ ॥

[v]सुवानस्य सोमाभिषवं कुर्वाणस्य [v]मनीषिणः प्राज्ञस्य यजमानस्य संबन्धिनः [v]प्रयसः ॥ ' प्रीङ् तर्पणे ' । असुन् ॥ प्रीतिकरस्य[1] [v]अस्य सोमलक्षणस्य [v]अन्धसः [v]मदाय [v]अपायि । एतदन्नमिन्द्रेण पीतमित्यर्थः ॥ यद्वा अपायीति पातेः ' व्यत्ययो बहुलम् ' इति चिण् कर्तरि भवति । ' छन्दसि लुङ्लङ्लिटः ' इति लोडर्थे लुङ् ॥ प्रीतिकरस्य[2] अन्धसो मदायापायि ॥ शेषविवक्षया कर्मणि षष्ठी ॥ इन्द्रः सोमं पिबतु । [v]प्रदिवि पुराणे [v]यस्मिन् सोमलक्षणेऽन्धसि[3] [v]वावृधानः वर्धमानः [v]इन्द्रः [v]ओकः [v]दधे सेव्यतया निवासं चकार । किंच [v]ब्रह्मण्यन्तः इन्द्राय स्तोत्रमिच्छन्तः [v]नरः कर्मणां नेतार ऋत्विजो यस्मिन्निवासं दधिरे[4] । तदेतदपायीति पूर्वेणान्वयः ॥

---

१. त–प्रीतिकरणस्य । २. ज्ञ१-ण-व–प्रीतिकरणस्य । ३. त- सोमलक्षणान्धसि । ४. ज्ञ१-म-व–विदधिरे ।

अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥ २ ॥

अस्य । मन्दानः । मध्वः । वज्रऽहस्तः । अहिम् । इन्द्रः । अर्णःऽवृतम् । वि । वृश्चत् ।
प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनाम् । चक्रमन्त ॥ २ ॥

[v]अस्य [v]मध्वः ॥ तृतीयार्थे षष्ठी ॥ अनेन मदकरेण सोमेन [v]मन्दानः हृष्यन् [v]वज्रहस्तः वज्रयुक्तो हस्तो यस्य सः [v]इन्द्रः [v]अर्णोवृतम् उदकस्यावरकमुदकेनावृतं वा [v]अहिं वृत्रं मेघं वा [v]वि [v]वृश्चत् विशेषेणाच्छिनत् ॥ 'ओव्रश्चू छेदने'। तौदादिकः । लङि ग्रहिज्यादिना संप्रसारणम् ॥ [v]यत्[1] यदाहिभेदने जाते [v]नदीनां [v]प्रयांसि प्रीणयितृणि जलानि [v]अच्छ समुद्रमभिलक्ष्य [v]प्र [v]चक्रमन्त गन्तुमुपाक्रमन् । तत्र दृष्टान्तः । [v]वयो [v]न । यथा पक्षिणः [v]स्वसराणि । सुष्ठु अर्यन्ते प्राप्यन्त इति स्वसराणि[2] कुलायाः । तानभिलक्ष्य गच्छन्ति तद्वत् ॥

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥ ३ ॥

सः । माहिनः । इन्द्रः । अर्णः । अपाम् । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रम् ।
अजनयत् । सूर्यम् । विदत् । गाः । अक्तुना । अह्नाम् । वयुनानि । साधत् ॥ ३ ॥

[v]माहिनः महनीयः[3] पूजनीयो यद्वा महिमोपेतः । [v]अहिहा अहिं मेघं हतवानिन्द्रः ॥ 'ब्रह्मभ्रूणवृत्रेषु क्विप्', 'बहुलं छन्दसि' इति भूतकाले क्विप् ॥ [v]सः [v]इन्द्रः [v]अपाम् [v]अर्णः ॥ 'ऋ गतौ' ॥ स्रोतोलक्षणं प्रवाहं [v]समुद्रम् [v]अच्छ अभिलक्ष्य [v]प्रैरयत् । किंच स इन्द्रोऽङ्गिरसां बिलान्तर्वर्तिनामावृतानां गवां लाभाय [v]सूर्यम् [v]अजनयत् । ततः [v]गाः पणिभिरपहृता गाः [v]विदत् अलभत ॥ 'विदिर् लाभे'। लुङि 'इरितो वा' इति च्लेरङादेशः । वाक्यभेदादनिघातः ॥ तथा [v]अक्तुना तेजसा [v]अह्नां दिवसानां [v]वयुनानि प्रज्ञानानि प्रकाशान् [v]साधत् असाधयत् ॥

सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥ ४ ॥

सः । अप्रतीनि । मनवे । पुरूणि । इन्द्रः । दाशत् । दाशुषे । हन्ति । वृत्रम् ।
सद्यः । यः । नृऽभ्यः । अतसाय्यः । भूत् । पस्पृधानेभ्यः । सूर्यस्य । सातौ ॥ ४ ॥

१. ण–किंच यत् । २. क-ख-ग-ङ-ण१-त-न-म-व–स्व इति स्वसराणि । ३. क-च-ञ१-त-थ-म–महनीयः ।

[v]सः [v]इन्द्रः [v]दाशुषे हविर्दत्तवते [v]मनवे मनुष्याय यजमानाय [v]पुरूणि बहूनि [v]अप्रतीनि उत्कृष्टानि धनानि [v]दाशत् ददाति । किंच [v]वृत्रम् असुरं [v]हन्ति । कीदृशः । [v]यः इन्द्रः [v]सूर्यस्य [v]सातौ । सातिः संभजनम् । सूर्यसंभजनविषयभूते[1] [v]पस्पृधानेभ्यः अहमेव[2] प्रथमं सूर्यं प्राप्नुयामहमेव प्रथमं सूर्यं प्राप्नुयाम्[2] इति स्पर्धमानेभ्यः स्तोतृभ्यः नृभ्यः[3] [v]सद्यः तदानीमेव [v]अतसाय्यः तत्प्राप्ति-हेतुभूतः सन् समाश्रयणीयः [v]भृत अभूत् । यद्वा सूर्यस्य सातौ ॥ ' षोऽन्तकर्मणि ' । अधिकरणे क्तिन् ॥ सूर्यस्य संबन्धिनि युद्धे पस्पृधानेभ्यः सूर्येण सह स्पर्धमानेभ्योऽतसाय्योऽभूत् ॥

स सुन्वत इन्द्रः सूर्यमा देवो रिणञ्च्यर्त्याय स्तवान् ।
आ यद्रयिं गृहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥ ५ ॥

सः । सुन्वते । इन्द्रः । सूर्यम् । आ । देवः । रिणक् । मर्त्याय । स्तवान् ।
आ । यत् । रयिम् । गृहत्ऽअवद्यम् । अस्मै । भरत् । अंशम् । न । एतशः । दशस्यन् ॥५॥

[v]स्तवान् एतशेन स्तूयमानः [v]देवः द्योतमानः [v]सः [v]इन्द्रः [v]सुन्वते सोमाभिषवं कुर्वते [v]मर्त्याय मनुष्यायैतशाय [v]सूर्यम् [v]आ [v]रिणक् । एतशेन स्पर्धमानं सूर्यं बलेनारेचयत् । तथा च निगमः– ' प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ' (ऋ. सं. १. ६१. १५) इति । [v]यत् यस्मात् [v]एतशः सौवश्व्यो राजा [v]दशस्यन् यजमानः [v]अस्मै इन्द्राय [v]गृहदवद्यं प्रच्छन्नावद्यं [v]रयिं सोमरूपधनम्[4] [v]आ [v]भरत्[4] संपादयामास । तत्र दृष्टान्तः । [v]अंशं [v]न । यथा पिता अंशं भागं पुत्राय भरति तद्वत् ॥ ॥ २३ ॥

स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥ ६ ॥

सः । रन्धयत् । सऽदिवः । सारथये । शुष्णम् । अशुषम् । कुयवम् । कुत्साय ।
दिवःऽदासाय । नवतिम् । च । नव । इन्द्रः । पुरः । वि । ऐरत् । शम्बरस्य ॥ ६ ॥

[v]सदिवः दीप्तियुक्तः [v]सः इन्द्रः [v]सारथये आत्मनः सारथ्यं कुर्वते [v]कुत्साय[5] राजर्षये [v]शुष्णम् । शोषयति सर्वमिति शुष्णः कश्चिदसुरः । तम् [v]अशुषं[6] न केनापि शोषणीयम् । [v]कुयवम् एतन्नामानमसुरं [v]रन्धयत् । रध्यतिर्वशगमने । वशमनयत् ॥ यद्वा ' रध हिंसासंराद्धयोः ' इत्यस्य ण्यन्तस्य ' रधिजभोरचि ' इति नुम् ॥ अवधीत् । किंच सः [v]इन्द्रः [v]दिवोदासाय एतन्नामकाय राज्ञे [v]शम्बरस्य असुरस्य [v]नव [v]नवतिं [v]पुरः [v]व्यैरत् विदारितवान् ॥

१. क-ख-ग-च-ज्ञ-ण-न-व–सूर्यसंभजनविषये भूते । २. ख-ग-च-ज्ञ१-ण-ण१-त-थ-न-म-व–अहमेव प्रथमं सूर्यं प्राप्नुयाम् । ३. क-ज्ञ-भ-म-व–' नृभ्यः ' नास्ति । ४. क-ज्ञ–ज्ञ१-त-व–सोममभरत्; ण-न–सोममरम्भत्; थ–सोममारभत; म–सोममारभत् । ५. क-ज्ञ-थ-म-व–कुत्साय अरये (स्मै ?); ज्ञ१– कुत्साय अस्मै । ६. म–असुरम् ।

एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम ततसाप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥ ७ ॥

एव । ते । इन्द्र । उचथम् । अहेम । श्रवस्या । न । त्मना । वाजयन्तः ।
अश्याम । तत् । साप्तम् । आशुषाणाः । ननमः । वधः । अदेवस्य । पीयोः ॥ ७ ॥

हे [v]इन्द्र [v]श्रवस्या ॥ 'सुपां सुलुक्' इति तृतीयायाः पूर्वसवर्णदीर्घः ॥ अन्नेच्छया [v]वाजयन्तः त्वां बलिनं कुर्वन्तः । यद्वा श्रवस्या यशःकामनया वाजयन्तोऽन्नमिच्छन्तः ॥ इच्छायामपि णिच् दृश्यते । अश्वायन्तो गव्यन्तो वाजयन्त इति । क्यजन्तत्वे चित्प्रातिपदिकस्य[1] अन्तोदात्तत्वं स्यात् 'वाजयन्तः शतक्रतुम्' इति यथा ॥ तादृशा वयं [v]ते तुभ्यम् [v]एव [v]उचथं स्तोत्रं [v]त्मना आत्मना स्वयमेव [v]न [v]अहेम इदानीं प्रापयेम ॥ 'अहि गतौ'। न संप्रत्यर्थे ॥ [v]आशुषाणाः ॥ अश्नोतेः कानचि 'व्यत्ययो बहुलम्' इति लिङ्यपि विकरणद्वय उप्रत्ययः स च ॥ त्वामश्नुवाना वयं[2] यद्वभिलषितं [v]तत् [v]साप्तं सप्तपुरुषसंबन्धि साप्तपदीनं सख्यम् [v]अश्याम व्याप्नुयाम । [v]अदेवस्य देवान् इन्द्रादीनजानतः [v]पीयोः ॥ पीयतिर्हिंसाकर्मा ॥ हिंसकस्यासुरस्य [v]वधः ॥ वध्यन्ते शत्रवोऽनेनेति वधरायुधम् ॥ [v]ननमः तदधोऽनमयः ॥ ननमः । 'णमु प्रह्वत्वे'। ण्यन्तस्य लुङि चङि रूपम् । 'मितां ह्रस्वः' इति ह्रस्वः ॥

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥

एव । ते । गृत्सऽमदाः । शूर । मन्म । अवस्यवः । न । वयुनानि । तक्षुः ।
ब्रह्मण्यन्तः । इन्द्र । ते । नवीयः । इषम् । ऊर्जम् । सुऽक्षितिम् । सुम्नम् । अश्युः ॥ ८ ॥

[v]शूर बलवन् हे [v]इन्द्र ते तुभ्यं [v]गृत्समदाः । अत्र यास्कः–'गृत्समदो गृत्समदनो गृत्स इति मेधाविनाम गृणातेः स्तुतिकर्मणः' (निरु. ९. ५.) इति। तथाविधाः [v]मन्म मननीयं स्तोत्रं [v]ते तुभ्यम् [v]एव [v]तक्षुः ततक्षुः चक्रुः । तत्र दृष्टान्तः । [v]अवस्यवो [v]न ॥ अवः । गत्यर्थादवतेरसुनि रूपम् अव इति ॥ अवो गमनमिच्छन्तः पुमांसः [v]वयुनानि मार्गान् यथा कुर्वन्ति तद्वत् । किंच [v]नवीयः ॥ 'सुपां सुलुक्' इति षष्ठ्या लुक् ॥ नवीयसो नवतरस्य [v]ते तव [v]ब्रह्मण्यन्तः स्तोत्रं कर्तुमिच्छन्तो गृत्समदाः [v]सुक्षितिम् [v]इषम् शोभननिवासोपेतमन्नम् [v]ऊर्जं बलं [v]सुम्नं सुखं च [v]अश्युः प्राप्नुयुः । एकस्मिन् गृत्समदे बहुवचनं परोक्षनिर्देशश्च ॥

१. क-ङ्ग-न-म-व–तिप्रातिपदिकस्य; ङ१–सति प्रातिपदिकस्य; ण–अपि प्रातिपदिकस्य । २. व–वयं च ।

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

नूनं सा त इति सिद्धार्था ॥ २४ ॥

'वयं ते वयः' इति नवर्चं नवमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम् । 'वयं ते' इत्यनुक्रान्तम् । सूक्त-विनियोगो लिङादवधार्यताम् ।

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥ १ ॥

वयम् । ते । वयः । इन्द्र । विद्धि । सु । नः । प्र । भरामहे । वाजऽयुः । न । रथम् ।
विपन्यवः । दीध्यतः । मनीषा । सुम्नम् । इयक्षन्तः । त्वाऽवतः । नॄन् ॥ १ ॥

हे [v]इन्द्र [v]ते तुभ्यं [v]वयं [v]वयः सोमलक्षणमन्नं [v]प्र [v]भरामहे प्रकर्षेण संपादयामः । तत्र दृष्टान्तः । [v]वाजयुर्न । यथान्नमात्मन इच्छन् पुमान् [v]रथं शकटं संपादयति तद्वत् । एवं हविः-संपादकान् [v]नः अस्मान् [v]सु सुष्ठु [v]विद्धि जानीहि ॥ विदेर्ज्ञानार्थस्य लोटि रूपम् । वाक्यादित्वाद-निघातः ॥ किं कुर्वन्तो वयम् । [v]विपन्यवः तव स्तोत्रं कुर्वाणाः । [v]मनीषा मनस ईषया स्तुत्या [v]दीध्यतः दीप्यमानाः ॥ 'दीधीङ् दीप्तिदेवनयोः' । व्यत्ययेन शतृ ॥ [v]त्वावतः ॥ 'युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्' इति वतुप् ॥ त्वत्सदृशान् [v]नॄन् नेतॄनग्न्यादीन् [v]सुम्नं सुखम् [v]इयक्षन्तः याचमानाः । यद्वा सुम्नं सुखेन नॄन् नेतॄन् अग्न्यादीन् देवानियक्षन्तः ॥ इयक्षतिर्गतिकर्मा ॥ हविषा तान् प्रापयन्तो वयं भरामहे इति समन्वयः ॥

त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥

त्वम् । नः । इन्द्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् ।
त्वम् । इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥

हे [v]इन्द्र [v]त्वं [v]त्वाभिः त्वदीयाभिः [v]ऊती ऊतिभिः पालनाभिः[1] [v]नः अस्मान् पाहि । किंच [v]त्वायतः ॥ 'सुप आत्मनः क्यच्' । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् ॥ त्वत्कामान् [v]जनान् [v]अभिष्टिपा ॥ 'सुपां सुलुक्०' इति सोराकारः ॥ अभिष्टयोऽभिगन्तारः शत्रवः । तेभ्यः पाता रक्षकः

१. ख-ग-पालनाभि(दि)ना; च-पालनादिना ।

vअसि भवसि । vदाशुषः हविर्दत्तवतः यजमानस्य vत्वम् vहूनः ईश्वरः खलु vवरूता ॥ 'प्रसितस्कभितस्तभित०[1]' इति निपातनादीकारस्य ऊकारः ॥ बाधकानां निवारकोऽसि। किंच त्वं तस्य स्तोतुः vइत्थाधीः एवंविधोपद्रवोपशमरूपकर्मासि[2] । vयः vत्वा त्वाम् vअभि vनक्षति हविषा परिचरति ॥

स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥ ३ ॥

सः । नः । युवा । इन्द्रः । जोहूत्रः । सखा । शिवः । नराम् । अस्तु । पाता ।
यः । शंसन्तम् । यः । शशमानम् । ऊती । पचन्तम् । च । स्तुवन्तम् । च । प्रऽनेषत् ॥३॥

vयुवा तरुणो यष्टॄणां फलस्य शमयिता वा vजोहूत्रः स्तोतृभिराह्वातव्यो होतव्यो वा vसखा सखिभूतः vशिवः सुखकरः vसः vइन्द्रः vनराम् ॥ नृशब्दस्यामि छान्दसो गुणः नरशब्दस्य वा आमि आगमानुशासनस्यानित्यत्वान्नुडभावः ॥ कर्मनेतृणामस्माकं vपाता पालको भवति । vयः शस्त्राणि vशंसन्तं vयः च vशशमानम् ॥ 'शश प्लुतगतौ' ॥ क्रियाः कुर्वाणं पुरोडाशादिकानि[3] हवींषि vपचन्तं vस्तुवन्तं सामभिः स्तोत्रं कुर्वाणम् । स्तुतशस्त्रयोः प्रगीताप्रगीतमन्त्रसाध्यत्वेन[4] भेदस्य प्रतिपादितत्वात् अत्र पृथङ्निर्देशः[4] । एवमयं[5] यजमानम् vऊती ऊत्या रक्षणेन vप्रनेषत् । नयतेर्लेटि 'सिब्बहुलम्' इति सिप् । अडागमः । 'तिङि चोदात्तवति' इति गतेर्निघातः ॥ कर्मणां पारं प्रापयेत्[6] ॥

तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥ ४ ॥

तम् । ऊँ इति । स्तुषे । इन्द्रम् । तम् । गृणीषे । यस्मिन् । पुरा । ववृधुः । शाशदुः । च ।
सः । वस्वः । कामम् । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य । आयोः ॥ ४ ॥

vतमु तमेव vइन्द्रं vस्तुषे स्तौमि । तथा vतम् इन्द्रं vगृणीषे शंसामि ॥ उभयत्र पुरुषव्यत्ययः ॥ vयस्मिन् इन्द्रे vपुरा पूर्वं स्तोतारः vवावृधुः प्रवृद्धा अभवन् । vशाशदुश्च शत्रून् हिंसितवन्तश्च ॥ 'शदॢ शातने' । लिटि 'तुजादीनाम्०' इत्यभ्यासस्य दीर्घः ॥ vइयानः स्तोतृभिर्याच्यमानः vसः इन्द्रः vब्रह्मण्यतः स्तोत्रमिच्छतः vनूतनस्य vआयोः मनुष्यस्य यजमानस्य vवस्वः वसुनः vकामम् अभिलाषं vपीपरत् अभिलषितफलदानेन पूरयतु ॥

१. ख-ग-च-ज्ञ१-ण-ण१-त-थ-न-व–प्रसितस्कभित । २. त-थ–°शमनं (न)रूपकर्मासि । ३. ख-ग-ण-त-थ–पुरोडाशादिकम् । ४. ज्ञ१–प्रगीताप्रगीतभेदेन भेदः । ५. क-ख-ग'ज्ञ-ण-ण१-त-थ-न-म-व–एवं वयम् । ६. ज्ञ१-त-थ-व–प्रापयत् ।

सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्वस्य चिच्छिश्नथत्पूर्व्याणि ॥ ५ ॥

सः । अङ्गिरसाम् । उचथा । जुजुष्वान् । ब्रह्मा । तूतोत् । इन्द्रः । गातुम् । इष्णन् ।
मुष्णन् । उषसः । सूर्येण । स्तवान् । अश्वस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ५ ॥

[v]अङ्गिरसां संबन्धीनि [१]उचथा उक्थानि [v]जुजुष्वान् ॥ ' जुषी प्रीतिसेवनयोः ' इत्यस्य लिटि क्वसौ रूपम् ॥ सेवमानः [v]सः [v]इन्द्रः [v]गातुं पणिभिरपहृतानामङ्गिरसां मार्गम् [v]इष्णन् प्रेरयन् [v]ब्रह्मा तेषां स्तोत्रं कामप्रदानेन [v]तूतोत् ॥ ' तु वृद्धौ ' इत्यस्य लङि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः ॥ अवर्धयत् । किंच [v]स्तवान् स्तोतृभिः स्तूयमानः [v]सूर्येण स्वात्मभूतेन [v]उषसः [v]मुष्णन् अपहरन् । उदिते हि सूर्ये उषसो व्यावर्तन्ते । तादृशः स इन्द्रः [v]अश्वस्य । अश्नुते स्वतेजसा सर्वं जगदित्यश्वः कश्चिदसुरः । तस्य [v]पूर्व्याणि पुरातनानि पुराणि बलानि वा [v]शिश्नथत् अश्नथयत् शिथिलीचकार ॥ ॥२५॥

स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरदासस्य स्वधावान् ॥ ६ ॥

सः । ह । श्रुतः । इन्द्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः ।
अव । प्रियम् । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥

[v]देवः द्योतमानः [v]श्रुतः कीर्तिमान् अत एव [v]दस्मतमः सर्वैरतिशयेन दर्शनीयः [v]सः [v]इन्द्रः [v]मनुषे मनोरर्थम् [v]ऊर्ध्वः [v]भुवत् कामप्रदाने प्रवृत्ते उन्मुखः[1] भवतु ॥ [v]नाम प्रसिद्धौ । [v]ह इति पूरणः ॥ तदुच्यते । [v]साह्वान् शत्रूनभिभवन् [v]स्वधावान् बलवानिन्द्रः [v]अर्शसानस्य लोकं बाधमानस्य [v]दासस्य एतन्नामकस्यासुरस्य [v]प्रियं [v]शिरः [v]अव [v]भरत् अधः पातयतु ॥ हरतेर्लेट्यडागमः । हृग्रहोर्भः ॥

स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥ ७ ॥

सः । वृत्रऽहा । इन्द्रः । कृष्णऽयोनीः । पुरम्ऽदरः । दासीः । ऐरयत् । वि ।
अजनयत् । मनवे । क्षाम् । अपः । च । सत्रा । शंसम् । यजमानस्य । तूतोत् ॥ ७ ॥

[v]वृत्रहा वृत्रस्य हन्ता [v]पुरंदरः शम्बरपुरां दारयिता [v]सः [v]इन्द्रः [v]कृष्णयोनीः निकृष्टजातीः [v]दासीः उपक्षपयित्रीरासुरीः सेनाः [v]वि [v]ऐरयत् व्यनुदत् । किंच [v]मनवे मनोरर्थं [v]क्षां पृथिवीम् [v]अपः

१. ज-ण-त-थ-न-व-उदङ्मुखः ।

उदकानि [च] [अजनयत्] । [यजमानस्य] [सत्रा] महान्तं [शंसम्] अभिलाष [तृतीत्] कामप्रदानेन पूरयतु ॥ ' तु वृद्धौ ' इति सौत्रो धातुः । शपः श्लुः । तुजादित्वाद्दीर्घः ॥ यद्वा सत्रा महत् शंसं शंसनीयं शस्त्रं कामप्रदानेन वर्धयतु । यद्वा कृष्णयोनीः कृष्णास्त्येनासुरेण निषिक्तरेतस्का दासीर्भार्या व्यैरयत् व्यनुदत् । तथा मन्त्रः–' यः कृष्णगर्भा निरहन्नृजिश्वना ' (ऋ. सं. १. १०१. १) इति ॥

तस्मै तवस्यमनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥ ८ ॥

तस्मै । तवस्यम् । अनु । दायि । सत्रा । इन्द्राय । देवेभिः । अर्णऽसातौ ।
प्रति । यत् । अस्य । वज्रम् । बाह्वोः । धुः ।
हत्वी । दस्यून् । पुरः । आयसीः । नि । तारीत् ॥ ८ ॥

[देवेभिः] देवनशीलैः स्तोतृभिः [अर्णसातौ] उदकलाभे निमित्ते [तस्मै] [इन्द्राय] [तवस्यं] तवसे बलाय हितं बलवर्धनं हविः [सत्रा] संततं सर्वेष्वहःसु [अनु] अनुक्रमेण सवनत्रये [दायि] अदायि । यद्वा तवस्यम् । यद्बलं प्रवृद्धाय दीयते तत्तवस्यम् । देवेभिर्देवैरुदकभजनेऽनुक्रमेण तद्बलं तस्मा इन्द्रायादायि । तथा मन्त्रः–' अनु ते दायि मह इन्द्रियाय ' (ऋ. सं. ६. २५. ८) इति । [यत् यदा] [अस्य इन्द्रस्य] [बाह्वोः] [वज्रं] [प्रति] [धुः] स्तोतारोऽसुरवधसूचकेन स्तोत्रेण प्रतिनिदधुः । स्तूयमानो हीन्द्रो दस्युवधार्थं वज्रमादत्ते॥ दधुः । दधातेर्लुङि ' गातिस्था ' इति सिचो लुक् । ' आतः ' इति झेर्जुस् ॥ ततस्तेन वज्रेण [दस्यून्] असुरान् [हत्वी] हत्वा तदीयाः [आयसीः] अयोमयीः [पुरः] [नि] [तारीत्] नितरामनाशयत् ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

नूनं सा त इति व्याख्याता ॥ ॥ २६ ॥

' विश्वजिते ' इति पञ्चर्चं दशमं सूक्तं गार्त्समदमैन्द्रम् । अन्त्या त्रिष्टुप् । शिष्टाः पञ्च जगत्यः ॥ तृतीये पर्याये होतुः शस्त्रे एतत्सूक्तम् । सूत्रितं च–' विश्वजिते तिष्ठा हरी रथ आयुज्यमानेति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥ १ ॥

विश्वऽजिते । धनऽजिते । स्वःऽजिते । सत्राऽजिते । नृऽजिते । उर्वराऽजिते ।
अश्वऽजिते । गोऽजिते । अप्ऽजिते । भर । इन्द्राय । सोमम् । यजताय । हर्यतम् ॥१॥

हे अध्वर्यो Vइन्द्राय Vसोमं Vभर संपादय । कीदृशाय । Vविश्वजिते सर्वस्य जेत्रे । तदेव प्रपञ्चयति । Vधनजिते शत्रुविजयेन तदीयधनानां जेत्रे । Vस्वर्जिते स्वर्गस्य जेत्रेऽधिपतये । Vसत्राजिते सत्रा संततं जयशीलाय महतो जेत्रे वा । Vनृजिते नृणां नायकानां जेत्रे । Vउर्वराजिते । उर्वरा सर्वसस्याढ्या भूः । तस्या जेत्रे । Vअश्वजिते Vगोजिते बलेनापहृतानां गवां जेत्रे । Vअज्जिते वृत्रेणाक्रान्तानामपां जेत्रे । Vयजताय यजनीयाय तस्मा इन्द्राय Vहर्यतम् ॥ ' हर्य गतिकान्त्योः ' । ' भृमृदृशि° ' इत्यादिना कर्मण्यतच् ॥ कमनीयं स्पृहणीयं वा सोमं भरेति समन्वयः ॥

अभिभुवेऽभिभङ्गायं वन्वतेऽपाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ॥

अभिऽभुवे । अभिऽभङ्गाय । वन्वते । अपाळ्हाय । सहमानाय । वेधसे ।
तुविऽग्रये । वह्नये । दुस्तरीतवे । सत्राऽसहे । नमः । इन्द्राय । वोचत ॥ २ ॥

Vअभिभुवे सर्वस्याभिभवित्रे Vअभिभङ्गाय असुराणां भञ्जकाय Vवन्वते ॥ ' वन षण संभक्तौ ' । व्यत्ययेन उप्रत्ययः ॥ शत्रूणां धनानां[1] संभजकाय[1] । Vअपाळ्हाय ॥ सहेः कर्मणि निष्ठा । उत्वाभावश्छान्दसः ॥ शत्रुभिरनभिभूताय । Vसहमानाय सर्वसहाय Vवेधसे सर्वस्य विधात्रे । Vतुविग्रये पूर्णग्रीवाय ॥ यद्वा ' गृ शब्दे ' । औणादिकः कर्मणि किप्रत्ययः ॥ तुविभिर्बहुभिः स्तोतृभ्याय । Vवह्नये सर्वस्य वोढ्रे Vदुष्टरीतवे अन्यैर्दुस्तराय दुर्हिंसाय । Vसत्रासहे[2] सर्वदाभिभवित्रे महतोऽभिभवित्रे वा एवंविधाय Vइन्द्राय Vनमः नमःशब्दपूर्वकं स्तोत्रं Vवोचत हे स्तोतारो यूयं ब्रूत ॥ ब्रूञो लुङि ' ब्रुवो वचिः ' । ' अस्यतिवक्तिख्यातिभ्योऽङ् ' इत्यङादेशः । ' वच उम् ' इत्युम् । गुणः ॥

सत्रासाहो जनभक्षो जनंसहश्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥ ३ ॥

सत्राऽसहः । जनऽभक्षः । जनम्ऽसहः । च्यवनः । युध्मः । अनु । जोषम् । उक्षितः ।
वृतम्ऽचयः । सहुरिः । विक्षु । आरितः । इन्द्रस्य । वोचम् । प्र । कृतानि । वीर्या ॥३॥

Vसत्रासहः[3] बहूनामभिभविता Vजनभक्षः जनानां यजमानानां कामप्रदानेन संभक्ता तैः संभजनीय इति वा । Vजनंसहः बलिनां जनानामभिभविता Vच्यवनः शत्रूणां च्यावयिता स्वस्थानात् । Vयुध्मः योद्धा Vजोषम् Vअनु प्रीतिमनु Vउक्षितः सिक्तः सोमेन । Vवृतंचयः वृतस्याभीष्टस्याचेता संचेता दातेत्यर्थः । यद्वा वर्तते पुनःपुनरभिमुखमागच्छतीति वृत् शत्रुः । तं चयते हिनस्तीति वृतंचयः । चयतिर्हिंसाकर्मा । तथा च ब्राह्मणं–' यो वै भागिनं भागाद्वुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते त्वेवैनम् ' (ऐ. ब्रा. २. ७) इति । Vसहुरिः ॥ ' जसिसहोरुरिन् '

१. क-म-वर्धं संभजनाय; ख-ग-ण१-धनानां संभजनस्य; ङ-वर्धं संभजनय; ङ१-वधभञ्जनाय; ण-त-थ-न-वर्धं भञ्जनाय; व-वर्धं भञ्जमानाय । २. ख-ग-ण-थ-सत्रासाहे । ३. थ-म-सत्रासाहः ।

इत्युरिन्प्रत्ययः ॥ अभिभविता शत्रूणां [v]विक्षु प्रजासु [v]आरितः पालकत्वेन प्रापितो भवति । तादृशस्य [v]इन्द्रस्य [v]कृतानि वृत्रहननादिरूपाणि [v]वीर्या सामर्थ्यानि [v]प्र [v]वोचं प्रकर्षेण वदामि ॥

अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्रथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥ ४ ॥

अननुदः । वृषभः । दोधतः । वधः । गम्भीरः । ऋष्वः । असमष्टकाव्यः ।
रध्रऽचोदः । श्रथनः । वीळितः । पृथुः । इन्द्रः । सुऽयज्ञः । उषसः । स्वः । जनत् ॥४॥

[v]अनानुदः[1] । अनु पश्चाद्ददातीत्यनुदः । ' आतश्चोपसर्गे ' इति कर्तरि कः । स नास्ति यस्य स तथोक्तः । प्रभूतधनदानेन समानः[2] नास्तीत्यर्थः । अत एव [v]वृषभः कामानां वर्षिता । [v]दोधतः ॥ दुधिर्हिंसाकर्मा ॥ हिंसकस्यासुरस्य [v]वधः हन्ता [v]गम्भीरः महत्त्वेन गाम्भीर्योपेतः । [v]ऋष्वः महान् यद्वा दर्शनीयः सर्वैः । [v]असमष्टकाव्यः ॥ ' अशू व्याप्तौ ' ॥ कर्मणि निष्ठा । ऊदित्त्वात् इड्विकल्पः । नञ्समासः ॥ अन्यैरव्याप्तकर्मा । [v]रध्रचोदः ॥ ' रध हिंसासंराद्धयोः ' ॥ रध्राणां समृद्धानां प्रेरकः । यद्वा हिंसकानां[3] शत्रूणां[3] चोदकः । [v]श्रथनः शत्रूणां बलापहारेण शातयिता । [v]वीळितः दृढाङ्गः [v]पृथुः स्वतेजसा जगद्व्याप्य वर्तमानः [v]सुयज्ञः सुकर्मा । एतादृशः [v]इन्द्रः [v]उषसः [v]स्वः सूर्यं ज्योतिः । ' स्वः सूर्यः ' इति हि ब्राह्मणम् । सूर्यं च [v]जनत् प्रादुश्चकार ॥

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥ ५ ॥

यज्ञेन । गातुम् । अपऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः ।
अभिऽस्वराः । निऽसदाः । गाः । अवस्यवः । इन्द्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥

[v]धियो [v]हिन्वानाः स्तुतीरिन्द्रे प्रेरयन्तः [v]उशिजः इन्द्रं कामयमानाः [v]मनीषिणः मेधाविनोऽङ्गिरसः [v]असुरः अपां प्रेरकादिन्द्रात् [v]गातुं गवां मार्गं [v]यज्ञेन तपसा [v]विविद्रिरे लेभिरे । ततः [v]अवस्यवः रक्षणमिच्छन्तः [v]इन्द्रे [v]गाः स्तुतीः [v]हिन्वानाः ॥ ' हि गतिवृद्धयोः ' । स्वादिः ॥ प्रेरयन्तस्तेऽङ्गिरसः [v]अभिस्वरा अभितः स्वरः स्वरणं शब्दनं यस्य तेन स्तोत्रेण [v]निषदा उपसदेन च [v]द्रविणानि गोधनानि [v]आशत प्राप्नुवन् ॥ अश्नोतेर्लुङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

---

१. त–अननुदः । २. क-ञ-ण-त-थ-न-म-व–समानोऽनु । ३. ख-ग-च-ज-ट-ण-ण१-त-थ-न-य–शत्रूणां हिंसकानाम् ।

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाध्यानं वाचः सुदिनत्वमह्नाम् ॥ ६ ॥

इन्द्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिम् । दक्षस्य । सुभगऽत्वम् । अस्मे इति ।
पोषम् । रयीणाम् । अरिष्टिम् । तनूनाम् । स्वाध्यानम् । वाचः । सुदिनऽत्वम् । अह्नाम् ॥६॥

हे [v]इन्द्र [v]श्रेष्ठानि उत्तमानि [v]द्रविणानि धनान्यस्मभ्यं [v]धेहि निधेहि । [v]दक्षस्य ॥ दक्षेर्भावे घञ् ॥ कर्मकरणयोरामर्थ्यस्य [v]चित्तिं ख्यातिं धेहि । [v]अस्मे अस्मभ्यं [v]सुभगत्वं शोभनधनवत्त्वं सौभाग्यं वा धेहि[1] । [v]रयीणां त्वया दत्तानां धनानां [v]पोषं समृद्धिं धेहि । [v]तनूनाम् अङ्गानाम् । यद्वा तायत एभिः कुलमिति तन्वः पुत्राः । तनोतेः करणे उप्रत्ययः । तेषाम् [v]अरिष्टिम् अहिंसां धेहि । तथा अस्मदीयायाः [v]वाचः [v]स्वाध्यानं स्वाद्वुताम् । [v]अह्नां [v]सुदिनत्वं शोभनदिनत्वं[2] च धेहि । येषु ह्यिन्द्रादयो देवा इज्यन्ते तानि सुदिनानि । तेषां भावः सुदिनत्वम् ॥ ॥ २७ ॥

' त्रिकद्रुकेषु ' इति चतुर्ऋचमेकादशं सूक्तं गार्त्समदमैन्द्रम् । अत्रेयमनुक्रमणिका–' त्रिकद्रुकेषु चतुष्कमष्टम्याद्यतिशाक्वरमन्त्याष्टिर्वा ' इति । आद्यायामष्टिश्छन्दश्चतुःषष्टयक्षरा । अवशिष्टाः षष्टयक्षरा अतिशाक्वर्यः । अन्त्याष्टिर्वा । षोडशिशास्त्रे ' त्रिकद्रुकेषु ' इति तृचः । सूत्रितं–' त्रिकद्रुकेषु महिषो यवाशिरं प्रो ष्वस्मै पुरोरथमिति तृचावानिच्छन्दसौ ' (आश्व. श्रौ. ६. २) इति ॥ अविवाक्येऽहनि मरुत्वतीये प्रतिपत्तृचस्य ' त्रिकद्रुकेषु ' इति प्रथमा । ' दशमेऽहनि ' इति खण्डे सूत्रितम्–' आ त्वा रथं यथोतय इत्येतस्याः स्थाने त्रिकद्रुकेषु महिषो यवाशिरमिति ' (आश्व. श्रौ. ८.१२) इति । आश्वमेधिके मध्यमेऽहनि मरुत्वतीय आद्या । ' तस्य विशेषान्वक्ष्यामः ' इति खण्डे सूत्रितं–' त्रिकद्रुकेषु महिषो यवाशिरमिति मरुत्वतीयस्य प्रतिपत ' (आश्व. श्रौ. १०. १०) इति ॥ महाव्रतेऽपि माध्यंदिने सवने ब्राह्मणाच्छंसिनः स्तोत्रियस्तृचः । ' त्रिकद्रुकेषु महिषो यवाशिरमिति स्तोत्रियः ' (ऐ. आ. ५.१) इति सूत्रितम् ॥

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ १ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरम् । तुविऽशुष्मः ।
तृपत् । सोमम् । अपिबत् । विष्णुना । सुतम् । यथा । अवशत् ।
सः । ईम् । ममाद । महि । कर्म । कर्तवे । महाम् । उरुम् ।
सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ १ ॥

१. क-ग-म-निधेहि । २. त-थ–शोभनत्वम ।

गृत्समदो ब्रूते । ᵛमहिपः महान् पूज्यः ᵛतुविशुष्मः बहुबलः[1] ᵛतृपत् ॥ ' तृप प्रीणने ' । तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः ॥ तृप्यन् इन्द्रः ᵛत्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेष्वभिप्लविकेष्वहःसु ᵛसुतम् अभिषुतं ᵛयवाशिरं यवमयैः सक्तुभिर्मिश्रितम् ॥ आङ्पूर्वस्य श्रीणातेः क्विपि ' अपस्पृधेथाम्° ' इत्यादिना शिर इत्यादेशः ॥ तं ᵛसोमं ᵛविष्णुना सह ᵛअपिबत् । ᵛयथावशत् पूर्वं यथा तं सोममकामयत तथापिबत् ॥ ' वश कान्तौ ' । ' बहुलं छन्दसि ' इति शपो लुगभावः ॥ पीतः ᵛसः सोमः ᵛमहां महान्तम् ᵛउरुं तेजसा विस्तीर्णम् ᵛईम् एनमिन्द्रं ᵛममाद अमादयत् । किमर्थम् । ᵛमहि महत् वृत्रहननादिलक्षणं[2] ᵛकर्म ᵛकर्तवे कर्तुम् । ᵛसत्यः ᵛइन्दुः स्रवन् ᵛदेवः दीप्यमानः ᵛसः सोमः ᵛसत्यं यथार्थभूतं ᵛदेवं सोमं कामयमानम् ᵛइन्द्रं ᵛसश्चत् । सश्चतिर्व्याप्तिकर्मा । व्याप्नोतु ॥

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ २ ॥

अध । त्विषिऽमान् । अभि । ओजसा । क्रिविम् । युधा । अभवत् । आ ।
रोदसी इति । अपृणत् । अस्य । मज्मना । प्र । ववृधे ।
अधत्त । अन्यम् । जठरे । प्र । ईम् । अरिच्यत ।
सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ २ ॥

ᵛअध अथ सोमपानानन्तरं ᵛत्विषीमान् दीप्तिमानिन्द्रः ᵛओजसा बलेन ᵛक्रिविं नामासुरं ᵛयुधा युद्धेन ᵛअभि ᵛअभवत् अभिभूतवान् । किंच स इन्द्रः ᵛरोदसी द्यावापृथिव्यौ ᵛआ ᵛअपृणत् स्वतेजसा समन्तात् पूरयामास । तथा ᵛअस्य पीतस्य सोमस्य ᵛमज्मना बलेन ᵛप्र ᵛववृधे प्रकर्षेण वर्धते । यद्वा अस्य क्रिवेरसुरस्य मज्मना सारेण रोदसी अपूरयत् । ᵛसः इन्द्रः सोमं द्वेधा विभज्य ᵛअन्यं भागं स्वकीये ᵛजठरे ᵛअधत्त । ᵛईम् एनम् अपरं भागं देवेभ्यः ᵛप्र ᵛअरिच्यत प्रारेचयत् । एतेनार्धमिन्द्राय अर्धमन्येभ्यः[3] देवेभ्य इत्युक्तं भवति । तथा तैत्तिरीयकं-' यस्मैवैषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः ' (तै. सं. ५. ४. ८. ३) इति ॥

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः ।
सासहिर्मृधो विचर्षणिः । दाता राधः स्तुवते काम्यं वसु
सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ ३ ॥

साकम् । जातः । क्रतुना । साकम् । ओजसा । ववक्षिथ ।
साकम् । वृद्धः । वीर्यैः । ससहिः । मृधः । विऽचर्षणिः ।
दाता । राधः । स्तुवते । काम्यम् । वसु ।
सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ ३ ॥

१. त-थ-बहुलबलः । २. म-महनीयत्वादिलक्षणम् । ३. म-अर्धमन्येभ्योऽपि ।

ᵛक्रतुना कर्मणा प्रज्ञया वा ᵛसाकं सह ᵛजातः ᵛसाकमोजसा बलेन सह ᵛववक्षिथ विश्वं वोढुमिच्छसि ॥ वहेः सनन्तस्य लिटि मन्त्रत्वादाम् न भवति ॥ किंच त्वं ᵛवीर्यैः शत्रुहननादिलक्षणैः पराक्रमैः ᵛसाकं सह[1] ᵛवृद्धः[1] प्रवृद्धः ᵛमृधः हिंसकान् संग्रामान्वा ᵛसासहिः । ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधः ॥ तेषामभिभविता ᵛविचर्षणिः पुण्यकृतः अपुण्यकृतश्च[2] विशेषेण द्रष्टा ᵛस्तुवते स्तोत्रं कुर्वाणाय यजमानाय ᵛराधः साधकं ᵛकाम्यं प्रार्थनीयं ᵛवसु धनं ᵛदाना सन् ववक्षिथेति समन्वयः । सैनमिति परोक्षनिर्देशः सिद्धार्थश्च ॥

तव॒ त्यन्नर्यं नृतोऽप॑ इन्द्र प्रथमं पू॒र्व्यं दि॒वि प्र॒वाच्यं॑ कृ॒तम् ।
यद्दे॒वस्य॒ शव॑सा प्रारि॒णा असुं॑ रि॒णन्नपः ।
भुव॒द्विश्व॑म॒भ्यदे॑व॒मोज॑सा वि॒दादू॒र्जं श॒तक्र॑तुर्वि॒दादिष॑म् ॥ ४ ॥

तव॑ । त्यत् । नर्यं॑म् । नृतो॒ इति॑ । अपः॑ । इ॒न्द्र॒ । प्र॒थम॑म् । पू॒र्व्यम् । दि॒वि । प्र॒ऽवाच्य॑म् । कृ॒तम् ।
यत् । दे॒वस्य॑ । शव॑सा । प्र । अरि॑णाः । असु॑म् । रि॒णन् । अपः॑ ।
भुव॑त् । विश्व॑म् । अ॒भि । अदे॑वम् । ओज॑सा । वि॒दात् । ऊर्ज॑म् ।
श॒तऽक्र॑तुः । वि॒दात् । इष॑म् ॥ ४ ॥

ᵛनृतो सर्वेषां नर्तयितः हे ᵛइन्द्र ᵛनर्यं नराणां हितकरं ᵛप्रथमं प्रततम्[3] ॥ ' प्रथमं प्रततम् ' इति यास्कः । ᵛपूर्व्यं पूर्वकालभवं त्वया ᵛकृतं ᵛतव ᵛत्यत् तत् ᵛअपः कर्म ᵛदिवि स्वर्गलोके ᵛप्रवाच्यं प्रकर्षेण वक्तव्यम् । श्लाघनीयमित्यर्थः । किं तत् । ᵛदेवस्य विजिगीषोरसुरस्य ᵛअसुं प्राणं ᵛरिणन् हिंसन् त्वं ᵛअपः तेन निरुद्धान्युदकानि ᵛप्रारिणाः प्रेरयः इति यदेतत्कर्म तत्प्रवाच्यमिति समन्वयः । परोक्षनिर्देशोऽवशिष्टः[4] । स इन्द्रः ᵛविश्वं व्याप्तम् ᵛअदेवं तमोरूपमसुरम् ᵛओजसा बलेन ᵛअभि ᵛभुवत् अभिभवतु । किंच ᵛशतक्रतुः इन्द्रः ᵛऊर्जं बलं ᵛविदात् लभतु । ᵛइषं हविर्लक्षणमन्नं च[5] ᵛविदात् ॥ ' विदिर् लाभे ' । शविकरणी । लेट्याडागमः[6] ॥ ॥ २८ ॥ ॥ २ ॥

तृतीयेऽनुवाके दश सूक्तानि । तत्रेदमेकोनविंशत्यृचं गार्त्समदं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका— ' गणानामेकोना ब्राह्मणस्पत्यं ह बार्हस्पत्यास्तु दृष्टलिङ्गाः पञ्चदश्यन्त्ये त्रिष्टुभौ ' इति । पञ्चदश्येकोनविंशी च त्रिष्टुभौ । शिष्टा जगत्यः । यासु बृहस्पतिशब्दः श्रूयते ता बार्हस्पत्याः । शिष्टा ब्राह्मणस्पत्याः ॥ प्रवर्ग्ये अभिष्टवे[7] एतत्सूक्तम् । ' स्तृत्रोदकम् ' इति खण्डे सूत्रितं— ' गणानां त्वा प्रथमश्च यस्य ' (आश्व. श्रौ. ४. ६) इति ॥

---

१. ण-त-थ-म-' सह वृद्धः ' नास्ति । २. म-पापकृतश्च । ३. थ-प्रतमम् । ४. क-ख-ग-ण-ण१-न-व-परोक्षनिर्देशो वासिष्ठः; झ-ञ१-परोक्षनिर्देशो वाशिष्टः ; च-त-थ-परोक्षनिर्देशोऽविशिष्टः । ५. ख-ग-ण-त-थ-' च ' नास्ति । ६. ग-ण-ण१-न-लेट्याडागमः । ७. म-अभिष्टवे एव ।

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥

गणानाम् । त्वा । गणऽपतिम् । हवामहे । कविम् । कवीनाम् । उपमश्रवःऽतमम् ।
ज्येष्ठऽराजम् । ब्रह्मणाम् । ब्रह्मणः । पते ।
आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनम् ॥ १ ॥

हे [v]ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः [v]गणानां देवादिगणानां संबन्धिनं [v]गणपतिं स्वीयानां पतिम् । [v]कवीनां क्रान्तदर्शिनां [v]कविम् । [v]उपमश्रवस्तमम् । उपमीयतेऽनयेत्युपमा । सर्वेषामज्ञानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः । अतिशयेनोपमश्रवा उपमश्रवस्तमः ॥ उपमा 'माङ् माने'। 'आतश्चोपसर्गे' करणेऽङ्प्रत्ययः । 'ङ्यापोः संज्ञाछन्दसोः॰' इति ह्रस्वत्वम् ॥ [v]ज्येष्ठराजम् । ज्येष्ठाः प्रशस्यतमाः । तेषां मध्ये राजन्तं [v]ब्रह्मणां मन्त्राणां स्वामिनं [v]त्वा त्वां [v]हवामहे अस्मिन् कर्मण्याह्वयामः । किंच [v]नः अस्माकं स्तुतीः [v]शृण्वन् त्वं [v]ऊतिभिः पालनैर्हेतुभूतैः [v]सादनम् । सीदन्त्यस्मिन्निति सदनम् । यज्ञगृहं [v]आ [v]सीद उपविश ॥

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्राइव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् । भागम् । आनशुः ।
उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि ॥२॥

[v]असुर्य असुराणां हन्तः हे [v]बृहस्पते [v]प्रचेतसः प्रकृष्टज्ञानाः [v]ते त्वदीयाः [v]देवाश्चित् देवा अपि [v]यज्ञियं यज्ञार्हं [v]भागम् [v]आनशुः प्राप्नुवन् । यद्वा प्रचेतस इति बृहस्पतेर्विशेषणम् । प्रकृष्टज्ञानवतस्ते तव संबन्धिनो देवा इति योजनीयम् । यद्वा प्रचेतसः । विभक्तिपरिणामः । प्रचेतसि त्वयि सति देवा यज्ञियं भागमानशिरे । कर्मविघ्नकारिणामसुराणां रक्षोघ्नमन्त्रैरपाकरणात् । 'न वै ब्रह्मण्वद्विष्यति' (गो. ब्रा. १. १३) इति श्रवणात् । [v]ज्योतिषा तेजसा [v]महः महनीयः[1] [v]सूर्यः [v]उस्राइव । उस्राः[2] किरणाः ॥ 'स्फायितञ्चि॰' इत्यादिना रक्प्रत्ययः ॥ यथा किरणान् जनयति तथा [v]विश्वेषां सर्वेषां [v]ब्रह्मणां[3] मन्त्राणां[3] [v]जनिता जनयितैव [v]असि ॥ 'जनिता मन्त्रे' इति निपातनात् णिलोपः ॥

१. क-ख-ग-ङ-न म–महर्नायः । २. म–मत्वेषु (? वसत्येषु) परं तेज इति उस्राः । ३. म–ब्राह्मणानाम् ।

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममभित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥

आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मन्तम् । रथम् । ऋतस्य । तिष्ठसि ।
बृहस्पते । भीमम् । अमित्रऽदम्भनम् । रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ॥ ३ ॥

हे [V]बृहस्पते [V]परिरपः । परितो रपः पापरूपं रक्षः ॥ यद्वा 'रप लप व्यक्तायां वाचि'। क्विप् ॥ परिवदतो निन्दकान् [V]तमांसि [V]च [V]विबाध्य तेजसा निराकृत्य [V]ज्योतिष्मन्तं ज्योतिषा तद्वन्तम् [V]ऋतस्य यज्ञस्य प्रापकं [V]भीमं शत्रूणां भयंकरं [V]अमित्रदम्भनं शत्रूणां हिंसकम् । तदेवाह। [V]रक्षोहणं रक्षसां हन्तारं [V]गोत्रभिदं मेघानां भेत्तारं [V]स्वर्विदं स्वर्गस्य[1] लम्भकं[1] [V]रथम् [V]आ [V]तिष्ठसि अधितिष्ठसि ॥

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

सुनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दाशात् । न । तम् । अंहः । अश्नवत् ।
ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनम् ॥ ४ ॥

हे [V]बृहस्पते [V]सुनीतिभिः । शोभनं[2] नीतयः[2] येषु ते सुनीतयः सन्मार्गाः । तैः [V]जनं [V]नयसि । अपेक्षितफलं प्रापयसि । [V]त्रायसे जनमापद्भ्यो रक्षसि च । [V]यः यजमानः [V]तुभ्यं हविर्लक्षणमन्नं [V]दाशात् प्रयच्छेत् ॥ 'दाश्र दाने'। लेट्याडागमः[3]॥ [V]तम् [V]अंहः पापं पापरूपं दारिद्र्यं वा [V]न [V]अश्नवत् न प्राप्नुयात् ॥ अश्नोतेर्लेटि व्यत्ययेन परस्मैपदम् । अडागमः ॥ [V]ब्रह्मद्विषः ब्राह्मणानां मन्त्राणां वा द्वेष्टुः [V]तपनः तापकः [V]असि । किंच [V]मन्युमीः मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि ॥ 'मीङ् हिंसायां'। क्विप् ॥ [V]ते तव [V]तत् तादृशं [V]महि महत् प्रभूतं [V]महित्वनं माहात्म्यमस्ति ॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥

न । तम् । अंहः । न । दुःऽइतम् । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः ।
विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे ।
यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥ ५ ॥

१. क-ङ्ग–सर्वलम्भकम् ; ख-ग-च-ङ्ग१-ण-ण१-थ-न-व–सर्वस्य लम्भकम्; म–सर्गलम्भकम् । २. ख-ग-ङ्ग-ण-म–शोभनर्नीतयः । ३. ख-ग-च-ङ्ग१-न–लेट्यडागमः ।

हे [v]ब्रह्मणस्पते [v]सुगोपाः सुष्ठु पालयिता त्वं [v]यं जनं [v]रक्षसि पालयसि [v]तं जनं [v]अंहः आहन्तव्यं दुःखं [v]न बाधते । [v]दुरितं तत्कारणं पापं च [v]न बाधते । [v]अरातयः हिंसकास्तं जनं [v]कुतश्चन सर्वासु दिक्षु [v]न [v]तितिरुः ॥ तिरतिर्हिंसाकर्मा । लिट् ॥ न हिंसन्ति । तथा [v]द्वयाविनः । मनस्यन्यत्क्रियायां चान्यदित्येतद्द्वयं येषामस्ति ते द्वयाविनो वञ्चकाः । तेऽपि तं जनं [v]न बाधन्ते । किंच [v]ध्वरसः हिंसिकाः [v]विश्वाः सर्वाः सेनास्तदर्थं [v]वि [v]बाधसे विशेषेण बाधस एव ॥ ॥ २९ ॥

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥

त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे ।
बृहस्पते । यः । नः । अभि । ह्वरः । दधे । स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥

हे [v]बृहस्पते [v]त्वं [v]नः अस्माकं [v]गोपाः पालयिता [v]पथिकृत् सन्मार्गकृच्च[1] भवसि । [v]विचक्षणः विशेषेण द्रष्टा सर्वज्ञस्त्वम् । [v]तव [v]व्रताय त्वत्संबन्धिने यज्ञाय [v]मतिभिः स्तोत्रैः [v]जरामहे स्तुमः ॥ जरतिः स्तुतिकर्मा ॥ [v]यः पुमान् [v]नः अस्मान् [v]अभि अभिलक्ष्य [v]ह्वरः ॥ ' ह्वृ कौटिल्ये ' । भावेऽसुन् ॥ कौटिल्यं [v]दधे विदधाति [v]तं [v]स्वा स्वीया [v]दुच्छुना दुर्बुद्धिः [v]हरस्वती वेगवती सती [v]मर्मर्तु मोचयतु ॥ ' मृङ् प्राणत्यागे ' । अन्तर्भावितण्यर्थस्य यङ्लुकि लोटि रूपम् ॥

उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥ ७ ॥

उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः । सानुकः । वृकः ।
बृहस्पते । अप । तम् । वर्तय । पथः । सुऽगम् । नः । अस्यै । देवऽवीतये । कृधि ॥७॥

[v]उत [v]वा अपि च हे [v]बृहस्पते [v]अरातीवा अभिमुखमागमनवान् [v]सानुकः समुच्छ्रितः । 'सानु समुच्छ्रितम्' (निरु. २. २४) इति यास्कः । [v]वृकः ॥ ' वृक आदाने ' ॥ धनादीनामादाता [v]यः [v]मर्तः मनुष्यः [v]अनागसः अपराधहीनान् [v]नः अस्मान् [v]मर्चयात् ॥ मर्चयतिर्हिंसाकर्मा ॥ हिंस्यात् । [v]तं मर्तं [v]पथः वैदिकान्मार्गात् [v]अप [v]वर्तय निवर्तय । [v]नः अस्माकं [v]अस्यै [v]देववीतये देवानां वीतिः सोमभक्षणम् अत्रेति[2] देववीतिर्यज्ञः । अस्यै देववीतयेऽस्मै यज्ञाय नोऽस्माकं [v]सुगं सुष्ठु गन्तव्यं मार्गं [v]कृधि कुरु । यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः ॥

---

१. ख-ग-ण-थ-सन्मार्गश्च । २. क-ङ-अर्चते; ख-ग-च-ण-अर्चन्ति; थ-अर्चयति; व-अर्चति ।

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ ८ ॥

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवःऽपर्तः । अधिऽवक्तारम् । अस्मऽयुम् ।
बृहस्पते । देवऽनिदः । नि । बर्हय ।
मा । दुःऽएवाः । उत्ऽतरम् । सुम्नम् । उत् । नशन् ॥ ८ ॥

[v]अवस्पर्तः उपद्रवेभ्यः पारयितः । यद्वा अवसा रक्षणेनापद्भ्यः पारयितः हे [v]बृहस्पते [v]तनूनाम् अङ्गानां पुत्रादीनां वा [v]त्रातारं पालयितारम् [v]अधिवक्तारम् अस्मासु पक्षपातेन अधिकं[1] वक्तारम्[1] [v]अस्मयुं हविष्प्रदानस्मान् कामयमानं [v]त्वा[2] त्वां [v]हवामहे अस्मिन् कर्मण्याह्वयामः । किंच [v]देवनिदः देवनिन्दकानसुरान् [v]नि [v]बर्हय विनाशय । [v]दुरेवाः दुष्टगमना दुर्बुद्धयः शत्रवः [v]उत्तरम् उत्कृष्टतरं [v]सुम्नं सुखं [v]मा [v]उन्नशन् मा व्याप्नुवन्तु ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥ ९ ॥

त्वया । वयम् । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु । मनुष्या । आ । ददीमहि ।
याः । नः । दूरे । तळितः । याः । अरातयः । अभि । सन्ति । जम्भय । ताः । अनप्नसः ॥९॥

हे [v]ब्रह्मणस्पते [v]सुवृधा सुष्ठु वर्धयित्रा [v]त्वया हेतुना [v]वयं [v]स्पार्हा स्पृहणीयानि [v]वसु धनानि [v]मनुष्या ॥ 'सुपां सुलुक्०' इति चतुर्थीबहुवचनस्याकारः ॥ मनुष्येभ्यो दातृभ्यः [v]आ [v]ददीमहि गृह्णीमहि ॥ 'आङो दोऽनास्यविहरणे' इत्यात्मनेपदम् ॥ [v]दूरे दूरदेशे [v]याः [v]अरातयः [v]याः च [v]तळितः अन्तिकेऽरातयः [v]नः अस्मान् [v]अभि [v]सन्ति अभि भवन्ति [v]अनप्नसः कर्महीनान् [v]ताः अरातीस्तान् शत्रून् [v]जम्भय नाशय । 'जभि नाशने' । चुरादिः ॥ अत्र निरुक्तं–'त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चान्तिकेऽरातयोऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप्र इति रूपनाम' (निरु. ३. १५) इति ॥

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥ १० ॥

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा ।
मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत ।
प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥ १० ॥

१. क-ञ-ण-न-म-ब–अधिवक्तारम्; ख-ग-च-ण१–अधि अधिकं वक्तारम् । २. क-ञ-ञ१-ण-थ-न-म-व–'त्वा' नास्ति ।

हे [V]बृहस्पते [V]पप्रिणा ॥ ' पॄ पालनपूरणयोः ' । ' आदृगमहन ' इति किन्प्रत्ययः । छान्दसो यणादेशः ॥ कामानां पूरकेण [V]सस्निना शुद्धेन [V]युजा सहायेन [V]स्वया हेतुना [V]उत्तमं [V]वयः हविर्लक्षणमन्नं [V]वयं [V]धीमहे धारयामः ॥ ' धी धारणे ' । दैवादिकः ॥ [V]दुःशंसः दुःशंसनीयः [V]अभिदिप्सुः अभिदम्भितुमभिभवितुमिच्छुः पुरुषः [V]नः अस्माकं [V]मा [V]ईशत मा ईशिष्ट । ईश्वरो मा भवतु ॥ ' ईश ऐश्वर्ये ' । लेट्यडागमः ॥ वयं [V]मतिभिः स्तोत्रैः [V]सुशंसाः शोभनशंसनोपेताः सन्तः [V]प्र [V]तारिषीमहि प्रकर्षेण वर्धेमहि ॥ ॥ ३० ॥

अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिदमिता वीळुहर्षिणः ॥ ११ ॥

अननुऽदः । वृषभः । जग्मिः । आऽहवम् । निःऽतप्ता । शत्रुम् । पृतनासु । ससहिः ।
असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य । चित् । दमिता । वीळुऽहर्षिणः ॥११॥

हे [V]ब्रह्मणस्पते [V]अनानुदः । अनु पश्चाद्दातीत्यनुदः । म यस्य नास्तीत्यननुदः । दात्रन्तरशून्य इत्यर्थः । अत एव [V]वृषभः कामानां वर्षिता [V]आहवम् ॥ आह्वयतेऽत्रेत्याहवो युद्धम् । ' आङि युद्धे ' (पा. सू. ३. ३. ७३) इत्यप्प्रत्ययः संप्रसारणं च ॥ तद्युद्धं [V]जग्मिः गन्ता ॥ ' आदृगमहन ' इति किन्प्रत्ययः । लिङ्निमित्तावादाहवमित्यत्र षष्ठीप्रतिषेधः । [V]शत्रुं शातयितारं [V]निष्टप्ता नितरां तस्य तापकः ॥ तृनन्तत्वात् षष्ठीप्रतिषेधः । ' निसस्तपतावनासेवने ' (पा. सू. ८. ३. १०२) इति षत्वम् । ' तादौ च निति° ' इति गतेः स्वरः ॥ [V]पृतनासु संग्रामेषु [V]सासहिः शत्रूणामभिभविता । एनादृशस्त्वं [V]सत्यः सत्यपराक्रमः सत्यप्रज्ञो वा [V]असि । [V]ऋणयाः ऋणस्य यावयितासि । ' यु मिश्रणामिश्रणयोः ' । ण्यन्तस्य क्विपि णिलोपे ' लोपो व्योर्वलि ' इति वलोपः ॥ किंच [V]उग्रस्य [V]चित् ओजस्विनोऽपि [V]दमिता उपशमयिता [V]वीळुहर्षिणः दृढहर्षस्य कामुकस्य नास्तिकस्य चिद्दमितासि[1] ॥

अदेवेन मनसा यो रिषण्यति शासमुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥

अदेवेन । मनसा । यः । रिषण्यति । शासम् । उग्रः । मन्यमानः । जिघांसति ।
बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युम् । दुःऽएवस्य । शर्धतः ॥१२॥

[V]यः पुमान् [V]अदेवेन देवानमन्यमानेन यद्वा आसुरवृत्तिविशिष्टेन[2] [V]मनसा अस्मान् [V]रिषण्यति हिनस्ति ॥ ' दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति ' इति निपातितः ॥ यश्च [V]उग्रः पापचित्तः [V]मन्यमानः आत्मानं बहु मन्यमानः पुमान्[2] [V]शासम् उक्थस्य शंसितारम् । यद्वा अस्माकमाशंसाम् । शासां[3] शासितॄणामुग्र इति वा योजनीयम् । अस्मान् [V]जिघांसति हन्तुमिच्छति ॥ हन्तेः सनि ' अज्झनगमां सनि ' इति दीर्घः ॥ हे [V]बृहस्पते [V]तस्य [V]वधः । वध्यतेऽनेनेति वधः आयुधम् । [V]नः अस्मान्

१. क-ज्ञ-त-थ-म–दमितासि । १. ख-ग-ज्ञ-ण१-म–असुरवृत्तिविशिष्टेन । २. ख-ग-च-फ–यः पुमान् । ३. क-ज्ञ-म–' शासां ' नास्ति ; ज्ञ१-ण-थ-न-म–शापाम

vमा vप्रगाक् ॥ ' पृची संपर्के ' । श्नम्विकरणी । व्यत्ययेनामागमः । ' चादिलोपे° ' इति न निघातः । व्यत्ययेनाद्युदात्तः ॥ किंच vदुरेवस्य दुष्टगमनस्य vशर्धतः बलवतः । यद्वा दुष्टाभिसंधेर्वेगं कुर्वतः तस्य vमन्युं क्रोधं ज्ञानं वा vनि vकर्म त्वत्प्रसादान्निराकुर्मश्च ॥

भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वोऽ३ मृधो बृहस्पतिर्वि ववर्ह रथाँइव ॥ १३ ॥

भरेषु । हव्यः । नमसा । उपऽसद्यः । गन्ता । वाजेषु । सनिता । धनम्ऽधनम् ।
विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥

सः vबृहस्पतिः vभरेषु संग्रामेषु vहव्यः योद्भिः स्वरक्षणार्थम्[1] आह्वातव्यः vनमसोपसद्यः सर्वैर्नमसोपसदनीयः । किंच vवाजेषु vगन्ता संग्रामेषु रक्षार्थं गमनशीलः । तथा vधनंधनं vसनिता संभक्ता दाता ॥ तृनन्तत्वात् षष्ठीप्रतिषेधः ॥ तथा vअर्यः स्वामी बृहस्पतिः vअभिदिप्स्वः अभिभवनेच्छावतीः vविश्वाः vइत् सर्वा एव vमृधः हिंसिकाः सेनाः vरथानिव युद्धे वेगेन परकीयान् रथानिव vवि vववर्ह विशेषेण शिथिलीचकार । यद्वा इवशब्दश्चार्थे । रथांश्च वि ववर्ह ॥ लडर्थे लिट् ॥

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ॥ १४ ॥

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टऽवीर्यम् ।
आविः । तत् । कृष्व । यत् । असत् । ते । उक्थ्यम् । बृहस्पते । वि । परिऽरापः । अर्दय ॥ १४ ॥

हे vबृहस्पते vतेजिष्ठया अतिशयेन तिग्मया vतपनी तापकारिण्या हेत्या vरक्षसः राक्षसान् vतप तापय । vये राक्षसाः vदृष्टवीर्यं युद्धेषु दृष्टपराक्रमं त्वां vनिदे निन्दायां विषयं vदधिरे कृतवन्तः तान् तापयेति समन्वयः। vते तव vउक्थ्यं सर्वैः प्रशंसनीयं vयत् वीर्यं vअसत् पूर्वमासीत् vतत् अधुना vआविः vकृष्व प्रकटीकुरु । तेन[2] च[2] वीर्येण vपरिरापः परिवदतः निन्दकानसुरान् vवि vअर्दय विशेषेण बाधस्व ॥

बार्हस्पत्ये पशावेषा हविषोऽनुवाक्या । ' प्रदानानाम् ' इति खण्डे सूत्रितं–' बृहस्पते अति यदर्यो अर्हात्तमृत्विया उप वाचः सचन्ते ' (आश्व. श्रौ. ३. ७) इति । एषैवाश्विनशस्त्रे परिधानीया । सूत्रितं[3]–' बृहस्पते अति यदर्यो अर्हादिति परिधानीया ' (आश्व. श्रौ. ६. ५) इति ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ १५ ॥

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ।
यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् । धेहि । चित्रम् ॥ १५ ॥

---

१. क-ज्ञ-म–स्वस्वरक्षणार्थम् । २. ख-ग-च-ज्ञ-ण-न-म-व–ते तव; ज्ञ१–तेन । ३. त-थ–सूत्रितं च ।

[v]ऋतप्रजात सत्येनोत्पन्न हे [v]बृहस्पते [v]अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य [v]यत् ब्रह्मवर्चसं तेजः [v]अर्हात् पूजयेत् ॥ ' अर्ह पूजायाम् ' । लेट्याडागमः ॥ [v]जनेषु ब्राह्मणेषु [v]द्युमत् दीप्तियुक्तं [v]क्रतुमत् ज्ञानोपेतं यद्ब्रह्मवर्चसं [v]विभाति विशेषेण दीप्यते । [v]यत् च [v]शवसा बलेन स्वाश्रयं जनं [v]दीदयत् । दीदयतिर्दीप्तिकर्मा । दीपयति । [v]चित्रं चायनीयं [v]तत् ब्रह्मवर्चसरूपं[1] [v]द्रविणम् [v]अस्मासु [v]धेहि निधेहि । यद्वा अर्य उदारोऽपि त्वया दत्तं धनम् अतीवार्हात् श्रद्दधीत । यच्च त्वदत्तं धनं जनेषु तव स्तोत्रं कुर्वाणेषु दीप्तियुक्तं कर्मसाधनं च विभाति यच्च धनं शवसा अन्नादिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि । तथा च ब्राह्मणं—' बृहस्पते अति यदर्यो अर्हादिदयेतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीव वान्यान्ब्रह्मवर्चसमर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति चित्रमिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवति ' (ऐ. ब्रा. ४. ११) इति ॥ ॥ ३१ ॥

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥ १६ ॥

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः । अन्नेषु । जगृधुः ।
आ । देवानाम् । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥१६॥

हे [v]बृहस्पते [v]नः अस्मान् [v]स्तेनेभ्यः । स्त्यानमस्मि येष्विति स्तेनाश्चौराः । तेभ्यो [v]मा दाः । तान् दर्शयति । [v]ये चौराः [v]द्रुहः प्राणद्रोहस्य [v]पदे स्थाने [v]निरामिणः नितरां रमणशीलाः [v]रिपवः हिंसकाः सन्तः [v]अन्नेषु परकीयेषु [v]अभि [v]जागृधुः अभिकाङ्क्षन्ति ॥ ' गृधु अभिकाङ्क्षायाम् ' । लिटि रूपम् ॥ ये च [v]देवानां [v]वि [v]व्रयः विशेषेण वर्जनम् । व्री व्री इति धातू वर्जने वर्तेते । ' य एवं विद्वान् दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्रीनाति ' (तै. ब्रा. २ २. ५. १) इत्येकस्य वर्जनार्थे दृष्टत्वादपरस्यापि[2] वर्जनार्थत्वम् ॥ तत् [v]हृदि स्वकीये हृदये [v]आ [v]ओहते आवहन्ति । देवानां यागान् स्तुतीश्च न करवामेति मन्यन्त इति यावत् । तेभ्योऽस्मान् मा दा इति समन्वयः । ये पुमांसः [v]साम्नः साममयास्त्वत्तः [v]परः परस्तादन्यदुत्कृष्टं साम यदक्षोह्नम् । साम वै रक्षोहेति । [v]न [v]विदुः न जानन्ति । किंतु सर्वसाधकं[3] साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता महऋतस्य धर्तरि ॥ १७ ॥

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः ।
सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हन्ता । महः । ऋतस्य । धर्तरि ॥१७॥

---

१. क-ख-ग-च-ज्ञ-ण-ण१-थ-न-म-व–ब्रह्मवर्चसं रूपम् । २. क-ख-ग-च-ज्ञ-ज्ञ१-ण-ण१-न-व–दृष्टस्यापि; म–दृष्टस्यापि इतरस्य. ३. क-ख-ग-च-ज्ञ-ण-ण१-न-म-व–सर्वं साधकम् ।

हे ब्रह्मणस्पते[1] [v]त्वष्टा प्रजापतिः [v]विश्वेभ्यः [v]भुवनेभ्यः [v]परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं त्वां [v]अजनत् [v]हि अजीजनत् खलु । ततस्त्वं [v]साम्नःसाम्नः सर्वस्यापि साम्नः [v]कविः ॥ ' कु शब्दे' । ' अच इः ' इति इप्रत्ययः ॥ उच्चारयिता कर्तासि । यद्वा कविः क्रान्तदर्शी त्वष्टा साम्नःसाम्नः सर्वस्यापि साम्नः सारेण[2] त्वाम्[3] अजीजनत् । किंच [v]सः [v]ब्रह्मणस्पतिः [v]महः महतः [v]ऋतस्य यज्ञस्य [v]धर्तरि धारके यजमाने [v]ऋणचित् स्तोतृकाममृणमिव चिनोतीति ऋणचित् । किंच [v]ऋणयाः पापरूपस्य ऋणस्य यावयिता पृथक्कर्ता च[3] [v]द्रुहः कर्मणो द्रोग्धुरसुरस्य [v]हन्ता भवति ॥

तव श्रिय व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ १८ ॥

तव । श्रिये । वि । अजिहीत । पर्वतः । गवाम् । गोत्रम् । उत्ऽअसृजः । यत् । अङ्गिरः ।
इन्द्रेण । युजा । तमसा । परिऽवृतम् । बृहस्पते । निः । अपाम् । औब्जः । अर्णवम् ॥१८॥

[v]अङ्गिरः आङ्गिरस हे [v]बृहस्पते [v]गवाम् आवारको वलेनाधिष्ठितः [v]पर्वतः [v]तव [v]श्रिये आश्रयणार्थं [v]व्यजिहीत विवृतद्वारतामगच्छत् । ततस्त्वं [v]यत् यदा [v]गोत्रम् ॥ ' इनित्रकटचश्च ' इति समूहार्थे त्रप्रत्ययः ॥ गवां समूहं [v]उदसृजः निरगमयः तदा[4] [v]इन्द्रेण [v]युजा सहायेन युक्तस्त्वं [v]तमसा वृत्रासुरेण [v]परीवृतं परित आक्रान्तम् [v]अपाम् [v]अर्णवं स्थानभूतं मेघं [v]निः [v]औब्जः नितराम् अधोमुखमकार्षीः ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १९ ॥

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सुऽउक्तस्य । बोधि । तनयम् । च । जिन्व ।
विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १९ ॥

हे [v]ब्रह्मणस्पते ब्रह्मणां स्तोत्राणामधिपते [v]अस्य जगतः [v]यन्ता नियामकः [v]त्वं [v]सूक्तस्य अस्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं [v]बोधि बुध्यस्व । त्वं [v]तनयं पुत्रपौत्रादिलक्षणं[5] संतानं[5] [v]जिन्व ॥ जिविः प्रीणनार्थः । लोटि रूपम् ॥ प्रीणय । भवादृशाः [v]देवाः [v]यदवन्ति रक्षन्ति [v]तत् तादृशं [v]विश्वं सर्वं [v]भद्रं कल्याणं भवति । अतो वयं [v]विदथे अस्मिन् यज्ञे [v]सुवीराः शोभनपुत्रपौत्राः सन्तः [v]बृहत् प्रभूतमिदं स्तोत्रं [v]वदेम ब्रूयाम ॥ ॥ ३२ ॥ ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण[6] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
द्वितीयाष्टके षष्ठोऽध्यायः समाप्तः ॥

१. क-ख-ग-च-ण-ञ-ञ१-ण-ण१-त-थ-न-म-व–ब्रह्मणस्पतिं महो महतो ऋतस्य यज्ञस्य धर्तरि धारके यजमाने । २ त-थ–साधारणं त्वाम्; म–साधारणत्वम् । ३. क-ञ-ण-त-थ-न-म-व–त्वम् । ४. क-ख-ग-च-ञ-ञ१-ण-थ-न-म-व–तदा तदा । ५. ख-ण१–पुत्रपौत्रादिलक्ष°; ग-ञ१-ण-थ-न-व–पुत्रपौत्रादिलक्षण° । ६. क-ञ–सायणामात्येन ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ ऋषिच्छन्दोदेवताविनियोगपुरःसरं सप्तमः[1] व्याख्यायते । गार्त्समदस्य द्वितीयमण्डलस्य तृतीयेऽनुवाके दश सूक्तानि । तत्रैकं सूक्तं व्याकृतम् । 'सेमाम्' इति षोडशर्चं द्वितीयं सूक्तम् । अत्रानुक्रम्यते—'सेमां षोळशान्त्या त्रिष्टुब्बृहत्यादशी च सैन्द्री च' इति । मण्डलद्रष्टा गृत्समद ऋषिः । द्वादशीषोडश्यौ त्रिष्टुभौ । शिष्टाश्चतुर्दश जगत्यः । 'ब्राह्मणस्पत्यं ह' इत्युक्तत्वात् तुल्यादिपरिभाषया इदमादीनि त्रीणि सूक्तानि ब्राह्मणस्पत्यानि । अस्य सूक्तस्य द्वादशी ऐन्द्री इन्द्रदेवत्या । चशब्दात् ब्राह्मणस्पत्या च । सामान्यविनियोगः पूर्वमेवोक्तः । विशेषतस्तु लिङ्गादवगन्तव्यः ।

सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥ १ ॥

सः । इमाम् । अविड्ढि । प्रऽभृतिम् । यः । ईशिषे । अया । विधेम । नवया । महा । गिरा ।
यथा । नः । मीढ्वान् । स्तवते । सखा । तव ।
बृहस्पते । सीषधः । सः । उत । नः । मतिम् ॥ १ ॥

हे ब्रह्मणस्पते [v]यः त्वम् [v]ईशिषे सर्वस्य जगत ईश्वरो भवसि [v]सः त्वम् [v]इमाम् अस्मदीयां [v]प्रभृतिं प्रकर्षेण भृतां स्तुतिम् [v]अविड्ढि प्रामुहि ॥ अवतेः प्राप्त्यर्थस्य लोटि एतद्रूपम् ॥ वयं च त्वाम् [v]अया अनया ॥ छान्दसो वर्णलोपः ॥ [v]नवया नूतनया प्रत्यग्रया [v]महा महत्या [v]गिरा वेदरूपया स्तुतिलक्षणया वाचा [v]विधेम परिचरेम ॥ विधतिः परिचरणकर्मा ॥ [v]उत अपि च [v]नः अस्माकं मध्ये [v]मीढ्वान् सेक्ता स्तुतेर्वर्षिता कर्तेति यावत् । [v]तव [v]सखा मित्रभूतः सन् [v]यथा येन प्रकारेण यत्कामनया [v]स्तवते त्वां स्तौति । हे [v]बृहस्पते बृहतो ब्रह्मणो मन्त्रस्य स्वामिन् [v]सः त्वं [v]नः अस्माकं [v]मतिं तदभिमतं फलं [v]सीषधः साधय ॥ छान्दसे लुङि चङि एतद्रूपम् ॥

यो नन्त्वान्यनमत्क्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥ २ ॥

यः । नन्त्वानि । अनमत् । नि । ओजसा । उत । अदर्दः । मन्युना । शम्बराणि । वि ।
प्र । अच्यवयत् । अच्युता । ब्रह्मणः । पतिः ।
आ । च । अविशत् । वसुऽमन्तम् । वि । पर्वतम् ॥ २ ॥

१. च-म—सप्तमोऽध्यायः ।

[v]यः [v]ब्रह्मणस्पतिः [v]नन्त्वानि नमनीयानि राक्षसादीनि [v]ओजसा बलेन [v]नि [v]अनमत् नितरामनमयत् प्रह्वीभूतान्यकरोत् । [v]उत अपि च स ब्रह्मणस्पतिः [v]मन्युना मनुना क्रोधेन वा ॥ 'मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा' (निरु. १०. २९) इति यास्कः ॥ [v]शम्बराणि । मेघनामैतत् । मेघान् [v]वि [v]अदर्दः वर्षणार्थं विदारितवान् ॥ 'दृ विदारणे' इत्यस्मात् यङ्लुगन्तात् लङि णृतद्रृपम् ॥ तदनन्तरम् [v]अच्युना अच्युतानि नैश्चल्येन मेघेऽवस्थितान्युदकानि [v]प्राच्यावयत् प्रकर्षेणागमयत् । मेघान्निरगमयदित्यर्थः । तथा [v]वसुमन्तं गोरूपधनवन्तं [v]पर्वतं वलनाम्ना असुरेण बिलद्वारे पिधानार्थं निहितं शिलोच्चयम् [v]आ [v]च आभिमुख्येन चेत् ॥ चशब्दश्चेदर्थः । समुच्चयार्थत्वे तु 'चवायोगे प्रथमा' इति पूर्वस्य अव्यावयदित्यस्य आद्युदात्तत्वं स्यात् । अस्य च सर्वानुदात्तत्वम् । चेदर्थे तु 'निपातैर्यद्यदिहन्त०' इति निघातप्रतिषेधः सिध्यति ॥ [v]वि [v]अविशत् विशेषेण प्रविशति । तदानीं तत् गोरूपं धनं प्राप्नोदित्यर्थः ॥

तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥ ३ ॥

तत् । देवानाम् । देवऽतमाय । कर्त्वम् । अश्रथ्नन् । दृळ्हा । अव्रदन्त । वीळिता ।
उत् । गाः । आजत् । अभिनत् । ब्रह्मणा । वलम् ।
अगूहत् । तमः । वि । अचक्षयत् । स्वरिति स्वः ॥ ३ ॥

[v]देवानाम् इन्द्रादीनां मध्ये [v]देवतमाय अतिशयेन दानादिगुणयुक्ताय ॥ षष्ठ्यर्थे चतुर्थी ॥ ईदृशस्य ब्रह्मणस्पतेः [v]तत् [v]कर्त्वं कर्तव्यं कर्म । किं पुनस्तदिति चेत् उच्यते । [v]दृळ्हा दृढानि[1] पर्वतादीनि [v]अश्रथ्नन् ॥ 'श्रन्थ विमोचनप्रतिहर्षणयोः' ॥ अस्य बलेन श्रथितानि विश्लिष्टान्यभवन् । तथा [v]वीळिता वीळितानि संस्तम्भितानि दृढीकृतानि वृक्षादीनि । 'वीळयतिश्च व्रीळयतिश्च संस्तम्भकर्माणौ' (निरु. ५. १६) इति यास्कः । [v]अव्रदन्त मृदून्यभवन् । व्रदतिर्मृदूभावकर्मा । अपि च स ब्रह्मणस्पतिः वलेनापहृताः [v]गाः [v]उत् [v]आजत् ॥ 'अज गतिक्षेपणयोः' ॥ देवान् प्रति उदगमयत् । तथा [v]ब्रह्मणा आत्मीयेन मन्त्रेण [v]वलं सर्वस्यावारकम् असुरम् [v]अभिनत् मन्त्रसामर्थ्येनाभैत्सीत् । तदनन्तरं वलेनोत्पादितं [v]तमः ध्वान्तम् [v]अगूहत् ॥ 'गुहू संवरणे' ॥ गूढमदृश्यमकरोत् । तदनन्तरं [v]स्वः आदित्यं [v]व्यचक्षयत् तमसो निराकरणेन तत्स्थमदर्शयत् ॥ चक्षिः पश्यतिकर्मा ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥ ४ ॥

अश्मऽआस्यम् । अवतम् । ब्रह्मणः । पतिः । मधुऽधारम् । अभि । यम् । ओजसा । अतृणत् ।
तम् । एव । विश्वे । पपिरे । स्वःऽदृशः । बहु । साकम् । सिसिचुः । उत्सम् । उद्रिणम् ॥ ४ ॥

---

१. ख-ग-च-ज-ण-ण१-न-फ-व–दृळ्हानि ।

[v]ब्रह्मणस्पतिः ब्रह्मणो मन्त्रस्य पतिः पालयिता देवः [v]अश्मास्यम् अश्मवत् दृढतरास्यम्। यास्कस्त्वाह—'अशनवन्तमास्यन्दनवन्तम्' (निरु. १०. १३) इति । व्यापनवन्तमासेचनवन्तमिति तस्यार्थः । [v]मधुधारं मधुर्मादयित्री उदकधारा यस्य तादृशम् [v]अवतम् अवस्तात् ततं विस्तृतं [v]यं मेघम् [v]ओजसा बलेन [v]अभि [v]अतृणत् ॥ 'उतृदिर् हिंसानादरयोः' ॥ अहिंसीत् वर्षणार्थमवधीदित्यर्थः । [v]तमेव मेघं [v]विश्वे सर्वे [v]स्वर्दृशः । स्वः आदित्यः । तस्य संबन्धिनो द्रष्टारो रश्मयः [v]पपिरे घर्मकाले पिबन्ति । मेघेन वृष्टस्योदकस्य पानात् तमेव पिबन्तीत्युच्यते । ते च रश्मयो वर्षासु [v]उत्सम् उत्सेचनवन्तम् [v]उद्रिणम् उदकवन्तं मेघं [v]साकं सह युगपदेव [v]बहु [v]सिसिचुः । घर्मकाले यत्पीतं ततोऽपि बहुतरं सहस्रगुणितं सिञ्चन्तीत्यर्थः ॥

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥ ५ ॥

सना । ता । का । चित् । भुवना । भवीत्वा । मात्ऽभिः । शरत्ऽभिः । दुरः । वरन्त । वः ।
अयतन्ता । चरतः । अन्यत्ऽअन्यत् । इत् । या । चकार । वयुना । ब्रह्मणः । पतिः ॥ ५ ॥

हे ऋत्विग्यजमानाः [v]वः युष्मदर्थं [v]सना सनातनानि [v]ता तानि [v]का [v]चित् कानि चित् ब्रह्मणस्पतेः प्रज्ञानानि [v]भुवना भुवनानाम् ॥ 'सुपां सुलुक्०' इति षष्ठ्या लुक् ॥ भुवनानामुदकानां [v]भवीत्वा भाव्यानां [v]दुरः द्वाराणि [v]माद्भिः मासैः ॥ 'पहन्' इत्यादिना मासशब्दस्य मास्भावः । 'स्वतवस्मासोपसां च त इष्यते' (पा. सू. ७. ४. ४८. २) इति तत्वम् ॥ [v]शरद्भिः संवत्सरैश्च [v]वरन्त विवृण्वन्ति । तत्काले वर्षणार्थं मेघद्वाराणि उद्घाटयन्तीत्यर्थः । कानि पुनस्तानि । [v]ब्रह्मणस्पतिः [v]या यानि [v]वयुना ॥ ज्ञाननामैतत् ॥ ज्ञानानि मन्त्रविषयाणि [v]चकार कृतवान् । तदनन्तरम् [v]अयतन्ता अयतमानौ अप्रयत्नौ उभौ लोकौ द्यौश्च पृथिवी च [v]अन्यदन्यदित् अन्यदन्यदेव पृथिवी वृष्टिजलं दिव्यमुदकं द्यौः उदककार्यं हविर्लक्षणं पार्थिवमन्नम् एवं परस्परव्यतिहारेण [v]चरतः भुञ्जाते ॥ 'चर गतिभक्षणयोः' ॥ ॥ १ ॥

अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥ ६ ॥

अभिऽनक्षन्तः । अभि । ये । तम् । आनशुः । निऽधिम् । पणीनाम् । परमम् । गुहा । हितम् ।
ते । विद्वांसः । प्रतिऽचक्ष्य । अनृता । पुनः ।
यतः । ऊँ इति । आयन् । तत् । उत् । ईयुः । आऽविशम् ॥ ६ ॥

गोसमूहे पणिभिरसुरैरपहृते सति पणीनां स्थानं सरमाख्यया देवशुन्या ज्ञात्वा ब्रह्मणस्पतिना सृष्टा अङ्गिरसस्तत्स्थानं प्राप्य गोसमूहं पणिभिर्निर्मिता मायाश्च दृष्ट्वा असुरनिवासस्थानं स्वहस्तोद्भूतेनाग्निना दग्ध्वा प्रत्यागच्छन् । तदेतत् द्वृचेनोच्यते । [v]अभिनक्षन्तः अभितो गच्छन्तः [v]ये अङ्गिरसः

[v]तं [v]निधिं गोसमूहरूपं निधानं धनं [v]परमम् उत्कृष्टं [v]पणीनाम् ॥ तृतीयार्थे षष्ठी ॥ पणिभिर्गुहायां निहितं स्थापितम् [v]अभि [v]आनशुः अभिलक्ष्य आनशिरे प्राप्तवन्तः । [v]विद्वांसः अभिज्ञाः [v]ते अङ्गिरसः [v]अनृता अनृतानि असुरैः कृता मायाः [v]प्रतिचक्ष्य दृष्ट्वा [v]आविशम् आवेष्टुं प्रवेष्टुं [v]यत [v]उ यत एव स्थानात् [v]आयन् अगच्छन् [v]तत् स्थानं [v]पुनः [v]उदीयुः उदगच्छन् । उत्कर्षेण प्राप्ताः ॥

ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥ ७ ॥

ऋतऽवानः । प्रतिऽचक्ष्य । अनृता । पुनः । आ । अतः । आ । तस्थुः । कवयः । महः । पथः ।
ते । बाहुऽभ्याम् । धमितम् । अग्निम् । अश्मनि ।
नकिः । सः । अस्ति । अरणः । जहुः । हि । तम् ॥ ७ ॥

[v]ऋतावानः । ऋतमिति सत्यनामधेयम् । तद्वन्तः [v]कवयः क्रान्तदर्शिनः सर्वज्ञा अङ्गिरसः [v]अनृता अनृतानि [v]प्रतिचक्ष्य पूर्वोक्तप्रकारेण दृष्ट्वा [v]अतः अस्मात् स्थानात् [v]पुनः आजिगमिषवः [v]महस्पथः महतो मार्गान् प्रति [v]आ [v]तस्थुः अवतस्थिरे । अवतिष्ठमानाश्च [v]ते [v]बाहुभ्यां हस्ताभ्यां [v]धमितं मथनोत्पादितं प्रज्वालितम् [v]अग्निम् [v]अश्मनि पणीनां निवासभूते शिलोच्चये [v]जहुर्हि दग्धुं त्यक्तवन्तः खलु । [v]अरणः अरमयिता दाहेन दुःखकारी [v]सः अग्निः पूर्वं तत्र [v]नकिः [v]अस्ति न विद्यते । अविद्यमानमग्निं स्वसामर्थ्यात् उत्पाद्य तत्र प्रचिक्षिपुरित्यर्थः ॥

ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥ ८ ॥

ऋतऽज्येन । क्षिप्रेण । ब्रह्मणः । पतिः । यत्र । वष्टि । प्र । तत् । अश्नोति । धन्वना ।
तस्य । साध्वीः । इषवः । याभिः । अस्यति । नृऽचक्षसः । दृशये । कर्णऽयोनयः ॥ ८ ॥

ऋतं सत्यमेव ज्या यस्य तेन [v]क्षिप्रेण इषूणां क्षेपकेण [v]धन्वना धरणभूतेन धनुषा[1] [v]ब्रह्मणस्पतिः[1] ब्रह्मणो मन्त्रस्य पालयिता देवः [v]यत्र यस्मिन् विषये [v]वष्टि कामयते [v]तत् [v]प्र [v]अश्नोति प्रकर्षेण व्याप्नोति ॥ अश्नोतेर्व्यत्ययेन परस्मैपदम् ॥ [v]तस्य धनुषः [v]साध्वीः साधिकास्ताः [v]इषवः भवन्ति [v]याभिः इषुभिः ब्रह्मणस्पतिः [v]अस्यति राक्षसादीन् क्षिपति । कीदृश्यस्ताः । [v]नृचक्षसः नॄन् पश्यतः । उपलक्षणमेतत् । सर्वज्ञस्य ब्रह्मणस्पतेः [v]दृशये दर्शनाय ज्ञानाय जाताः [v]कर्णयोनयः श्रोत्रेन्द्रियेण ग्राह्या मन्त्रभूताः आकर्णकृष्टा वा बाणाः । ब्रह्मणस्पतिर्मन्त्रैरेव सर्वं साधयतीति भावः ॥

१. क-ङ-ञ१-ण-त-थ-म-व-हे ब्रह्मणस्पते त्वया सृष्टाः ब्रह्मणस्पतिः; ख-ग-फ-यः ब्रह्मणस्पतिः; न-हे ब्रह्मणस्पते त्वया सृष्टाः ।

स सं॒नयः स वि॑न॒यः पु॒रोहि॑तः स सुष्टु॒तः स युधि ब्रह्म॑ण॒स्पतिः॑ ।
चा॒क्ष्मो यद्वाजं॑ भर॑ते म॒ती धना॑दित्सू॒र्यस्तपति तप्यतुर्वृ॒था ॥ ९ ॥

सः । सम्ऽन॒यः । सः । विऽन॒यः । पु॒रःऽहि॑तः । सः । सुऽस्तु॒तः । सः । युधि । ब्रह्म॑णः । पतिः॑ ।
चा॒क्ष्मः । यत् । वाज॑म् । भर॑ते । म॒ती । धना॑ ।
आत् । इत् । सूर्यः॑ । तप॑ति । तप्यतुः । वृ॒था ॥ ९ ॥

[v]पुरोहितः देवैः पुरतोऽत्र स्थापितः [v]सः [v]ब्रह्मणस्पतिः [v]संनयः विश्लिष्टानां मन्त्रैः संगमयिता भवति । [v]विनयः संगतानां विविधं नेता पृथक्कर्तापि [v]सः एव । तथा [v]स [v]सुष्टुतः शोभनं स्तोतृभिः स्तुतश्च भवति । तथा [v]युधि संग्रामे [v]सः स्तोतॄणामनुग्रहाय प्रादुर्भवतीति शेषः । [v]यत् यदा [v]चाक्ष्मः ॥ चष्टेः क्षमतेर्वा ॥ सर्वस्य द्रष्टा सर्वसहो वा ब्रह्मणस्पतिः [v]वाजम् अन्नं [v]मती मननीयं प्रशस्तं [v]धना धनं च स्तोतॄणामर्थाय [v]भरते बिभर्ति वृष्टिद्वारा पोषयति । [v]आदित् अनन्तरमेव [v]तप्यतुः तापकः [v]सूर्यः [v]वृथा । अनायासवचनमेतत् । अनायासेन [v]तपति दीप्यते । ब्रह्मणस्पतिना दत्तैरन्नैर्धनैश्च यज्ञस्य सिद्धत्वात् स्वयं केवलं हवींषि भुञ्जान एव वर्तते इत्यर्थः ॥

वि॒भु प्र॒भु प्र॑थ॒मं मे॒हना॑वतो बृ॒हस्प॑तेः सु॒विद॑त्रा॒णि रा॒ध्या॑ ।
इ॒मा सा॒तानि॑ वे॒न्यस्य॑ वा॒जिनो॒ येन॒ जना॑ उ॒भये॑ भुञ्ज॒ते विशः॑ ॥ १० ॥

वि॒ऽभु । प्र॒ऽभु । प्र॒थ॒मम् । मे॒हना॑ऽवतः । बृ॒हस्प॑तेः । सु॒ऽवि॒दत्रा॑णि । रा॒ध्या॑ ।
इ॒मा । सा॒तानि॑ । वे॒न्यस्य॑ । वा॒जिनः॑ । येन॑ । जना॑ः । उ॒भये॑ । भु॒ञ्ज॒ते । विशः॑ ॥ १० ॥

[v]विभु विभूनि व्याप्तानि [v]प्रभु प्रभूणि प्रौढानि [v]प्रथमं प्रथमानि मुख्यानि एवंभूतानि [v]मेहनावतः वर्षणवतो वृष्टिप्रदस्य [v]बृहस्पतेः बृहतो मन्त्रस्य पालयितुः संबन्धीनि [v]सुविदत्राणि ॥ 'विद् लाभे' । 'सुविदेः कत्रन्' (उ. सू. ३.३८८) ॥ सुष्ठु लब्धव्यानि । 'सुविदत्रं धनं भवति' (निरु. ७. ९) इति यास्कः । [v]राध्या राध्यानि सम्यक् साधनीयानि । प्राप्तव्यानीति यावत् । [v]इमा [v]सातानि इमानि धनानि [v]वेन्यस्य कमनीयस्य [v]वाजिनः अन्नवतो ब्रह्मणस्पतेः ॥ तृतीयार्थे षष्ठी ॥ ब्रह्मणस्पतिना दत्तानि । [v]येन धनेन [v]उभये उभयविधाः [v]जनाः स्तोतारो यजमानाश्च देवा मनुष्याश्च वा [v]विशः निविष्टाः सन्तः [v]भुञ्जते भोगान् लभन्ते । तत्सर्वं ब्रह्मणस्पतिना दत्तमित्यर्थः ॥ ॥ २ ॥

योऽव॑रे वृ॒जने॑ वि॒श्वथा॑ वि॒भुर्महा॑म् ऊँ रण्वः॑ शव॑सा व॒वक्षि॑थ ।
स दे॒वो दे॒वान्प्रति॑ पप्रथे पृ॒थु वि॒श्वेदु॒ ता प॑रि॒भूर्ब्रह्म॑ण॒स्पतिः॑ ॥ ११ ॥

यः । अव॑रे । वृ॒जने॑ । वि॒श्वऽथा॑ । वि॒ऽभुः॑ । म॒हाम् । ऊँ॒ इति॑ । रण्वः॑ । शव॑सा । व॒वक्षि॑थ ।
सः । दे॒वः । दे॒वान् । प्रति॑ । प॒प्र॒थे॒ । पृ॒थु ।
वि॒श्वा । इत् । ऊँ॒ इति॑ । ता । प॒रि॒ऽभूः । ब्रह्म॑णः । पतिः॑ ॥ ११ ॥

vविश्वथा सर्वप्रकारेण vविभुः व्यासः vरण्वः रमयिता स्तोतव्यो वा vयः vब्रह्मणस्पतिः vअवरे निकृष्टे vवृजने वर्जनहेतुभूते बले वर्तमानम् । दुर्बलमिति यावत् । vमहामु महान्तं च ॥ छान्दसो वर्णलोपः ॥ उभयविधं स्तोतारं vशवसा आत्मीयेन बलेन vववक्षिथ वोढुमिच्छति । सर्वदा वहतीति यावत् ॥ वहतेः सनन्तस्य लिटि एतद्रूपम् । पुरुषव्यत्ययः ॥ vसः vदेवः दानादिगुणयुक्तः vदेवान् vप्रति सर्वेषां देवानां प्रतिनिधिः सन् vपृथु vपप्रथे अत्यन्तं प्रथते । यशसा विस्तीर्णो भवतीति यावत् । यस्मादेवं तस्मात् vविश्वेदु सर्वाण्येव vता तानि सर्वाणि भूतजातानि vपरिभूः परिभवन् अभिभवन् वर्तते इति शेषः ॥

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥ १२ ॥

विश्वम् । सत्यम् । मघऽवाना । युवोः । इत् । आपः । चन । प्र । मिनन्ति । व्रतम् । वाम् ।
अच्छ । इन्द्राब्रह्मणस्पती इति । हविः । नः । अन्नम् । युजाऽइव । वाजिना । जिगातम् ॥१२॥

हे vमघवाना । मघमिति धननाम । तद्वन्तौ इन्द्राब्रह्मणस्पती vयुवोरिन् युवयोरेव vविश्वं सर्वं स्तोत्रं vसत्यं यथार्थम् । स्तुत्या यद्यत् गुणजातं[1] प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव नत्वारोपितमित्यर्थः। तथा चन इत्येतत्पदद्वयसमुदायः। ऐकपद्यं[2] त्वध्यापकसांप्रदायिकं यद्येव शब्दस्य पूर्वपदेन (?)। vआपश्च आपोऽपि । उपलक्षणमेतत् । एतदुपलक्षितानि सर्वाण्यपि भूतानि vवां युवयोः vव्रतं कर्म vन vप्र vमिनन्ति न हिंसन्ति ॥ 'मीङ् हिंसायां' । क्र्यादिकः । 'मीनातेर्निगमे' इति ह्रस्वत्वम् ॥ हे vइन्द्राब्रह्मणस्पती vनः अस्माकं vहविः vअच्छ आभिमुख्येन vजिगातं गच्छतम् । आगच्छतमिति यावत् ॥ जिगातिर्गतिकर्मा । जौहोत्यादिकः ॥ तत्र दृष्टान्तः । vयुजेव vवाजिना । युजा रथे नियुक्तौ वाजिनौ वेजनवन्तौ अश्वौ vअन्नं घासं प्रति यथा स्वयमेव शीघ्रं गच्छतः तद्वत् शीघ्रमागच्छतमित्यर्थः ॥ युजेवेत्यत्र 'सुपां सुलुक्०' इति प्रथमाद्विवचनस्य आकारः । तृतीयायां हि 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् ॥

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वशं ऋणमादिदिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥ १३ ॥

उत । आशिष्ठाः । अनु । शृण्वन्ति । वह्नयः । सभेयः । विप्रः । भरते । मती । धना ।
वीळुऽद्वेषाः । अनु । वशा । ऋणम् । आऽददिः । सः । ह ।
वाजी । सम्ऽइथे । ब्रह्मणः । पतिः ॥ १३ ॥

vउत अपि च vआशिष्ठाः आशुतराः शीघ्रगामिनः vवयः । अश्वनामैतत् । वोढारो ब्रह्मणस्पतेरश्वाः vअनु vशृण्वन्ति । अस्माभिः कृतं स्तोत्रमनुक्रमेण शृण्वन्ति । यद्वा ब्रह्मणस्पतिना

१. ख-ग-ण१-रूपजातम् । २. ख-ग-च-ज१-ण-ण१-त-थ-न-म-व-एकपद्यम् ।

कृतमनुशासनं शृण्वन्ति । अतस्ते तमस्मदीयं यज्ञं प्रापयन्त्विति शेषः । [v]सभेयः सभायां साधुः ॥ ' ढश्छन्दसि ' इति ढः ॥ [v]विप्रः मेधावी अध्वर्युर्होता वा [v]मती मत्या मननीयेन स्तोत्रेण ॥ ' सुपां सुलुक्° ' इति पूर्वसवर्णदीर्घः ॥ [v]धना हविर्लक्षणानि धनानि तस्मै ब्रह्मणस्पतये [v]भरते बिभर्ति । संपादयतीति यावत् । यद्वा स्तोत्रेण धनानि भरते बिभर्ति पोषयति । अतः [v]वीळुद्वेषाः । वीळून् दृढान् प्रबलान् राक्षसादीन् द्वेष्टीति तादृशो ब्रह्मणस्पतिः [v]वशा वशायाः ॥ ' सुपां सुलुक्° ' इति षष्ठ्या लुक् । ' ऋत्यकः ' इति प्रकृतिभावः ॥ [v]ऋणम् अस्माभिर्यज्वभिः प्रदेयमवदानात्मकम् अनुक्रमेण[1] [v]आददिः आदाता भवत्विति शेषः । अवदानस्य ऋणत्वं च तैत्तिरीये ' त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यः ' (तै. सं. ६. ३. १०. ५) इत्यादिना स्पष्टमाम्नातम् । यद्वा अनुः आनुगुण्ये । वशा वशस्य कामस्याभिलाषस्य अनुगुणमादाता भवत्विति योज्यम् । हशब्दः प्रसिद्धौ । [v]सः खलु [v]ब्रह्मणस्पतिः [v]समिथे । संयन्ति संगच्छन्तेऽस्मिन्नाहुतिभिर्देवा इति समिथो यज्ञः । तस्मिन् [v]वाजी अन्नवान् । तस्माद्धविष आदाता भवत्वित्यर्थः ॥

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्म करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥ १४ ॥

ब्रह्मणः । पतेः । अभवत् । यथाऽवशम् । सत्यः । मन्युः । महि । कर्म । करिष्यतः ।
यः । गाः । उत्ऽआजत् । सः । दिवे । वि । च । अभजत् । महीऽइव ।
रीतिः । शवसा । असरत् । पृथक् ॥ १४ ॥

[v]महि महत् [v]कर्म [v]करिष्यतः [v]ब्रह्मणस्पतेः [v]मन्युः मननसाधनो मन्त्रः क्रोधो वा [v]यथावशं यथाकामं [v]सत्यः अवितथः [v]अभवत् । स यथा कामयते तथा करोतीत्यर्थः । [v]यः ब्रह्मणस्पतिः पणिभिरपहृताः [v]गाः [v]उदाजत् उदगमयत् । गुहाया निरगमयदित्यर्थः । [v]सः ब्रह्मणस्पतिः [v]दिवे द्युलोकाय तत्रत्येभ्यो देवेभ्य इत्यर्थः । [v]वि [v]अभजत् [v]च ता गा विभक्ताश्चाकरोत् । स च गोसमूहः [v]महीव [v]रीतिः । महती स्तुतिरिव[2] ॥ ' रीङ् स्रवणे[3] ' ॥ यथा गङ्गादीनां स्रोतो विभक्तं सत् निम्नदेशाभिमुखं प्रसरति तथा [v]शवसा आत्मीयेन बलेन तत्तद्देवगृहं [v]पृथक् विभिन्नम् [v]असरत् अगच्छत ॥

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥ १५ ॥

ब्रह्मणः । पते । सुऽयमस्य । विश्वहा । रायः । स्याम । रथ्यः । वयस्वतः ।
वीरेषु । वीरान् । उप । पृङ्धि । नः । त्वम् । यत् । ईशानः । ब्रह्मणा । वेषि । मे । हवम् ॥ १५ ॥

हे [v]ब्रह्मणस्पते मन्त्राधिपते [v]सुयमस्य सुष्ठु नियन्तव्यस्य [v]वयस्वतः अन्नयुक्तस्य [v]रायः धनस्य [v]विश्वहा विश्वेषु सर्वेष्वहःसु [v]रथ्यः अधिपतयः [v]स्याम भूयास्म । रथा एषां सन्तीति रथ्यः ॥

---

१. ख-ग-अनु अनुक्रमणेन; ण-अनु अनुक्रमेण। २. क-च-ज्ञ-ण१-थ-म-व-स्तुतिरिव । ३. क-च-ज्ञ-त-थ-म-व-श्रवणे ।

' छन्दसीवनिपौ० ' इति मत्वर्थीय ईकारः ॥ अपि च ᵛनः अस्माकं ᵛवीरेषु वीर्याजातेष्वस्मदीयेषु पुत्रेषु ᵛवीरान् पुत्रान् ᵛत्वम् ᵛउप ᵛपृङ्धि संपृक्तान् कुरु उत्पादय ॥ ' पृची संपर्के ' । रौधादिकः ॥ वयं पौत्रानपि लभेमहीति यावत् । ᵛईशानः सर्वस्येश्वरस्त्वं ᵛब्रह्मणा । अन्ननामैतत् । हविर्लक्षणेनान्नेन सह ᵛमे ᵛहवं मदीयं स्तुतिलक्षणमाह्वानं ᵛवेपि कामयसे ॥ ' वी गतिप्रजनकान्त्यशनखादनेषु ' ॥ अतो मयोक्तं कुर्वित्यर्थः ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १६ ॥

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सुऽउक्तस्य । बोधि । तनयम् । च । जिन्व ।
विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥

हे ᵛब्रह्मणस्पते ᵛयन्ता सर्वस्य जगतो नियन्ता ᵛत्वमस्य ᵛसूक्तस्य इदं सूक्तम् ॥ ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥ ᵛबोधि बुध्यस्व । बुद्ध्वा ᵛतनयं पुत्रं ᵛच अस्मभ्यं ᵛजिन्व प्रेरय ॥ जिविः प्रीणनार्थोऽत्र प्रेरणे वर्तते धातूनामनेकार्थत्वात् ॥ ᵛयत् ᵛभद्रं कल्याणं ᵛदेवाः सर्वे ᵛअवन्ति रक्षन्ति ᵛविश्वं सर्वं ᵛतत् भद्रं च जिन्वेति शेषः । वयं च ᵛसुवीराः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः सन्तः ᵛबृहत् प्रौढं स्तोत्रं ᵛविदथे । विदन्ति यष्टव्यतया अस्मिन् देवान् जानन्तीति विदथो यज्ञः । तस्मिन् ᵛवदेम ब्रवाम ॥ ॥ ३ ॥

' इन्धानः ' इति पञ्चर्चं तृतीयं सूक्तं गार्त्समदं जागतं ब्राह्मणस्पत्यम् । तथा चानुक्रान्तम्— ' इन्धानः पञ्च जागतं तु ' इति । लैङ्गिको विनियोगः ॥

इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यं युजं कृणुते ब्रह्मणस्पतिः ॥ १ ॥

इन्धानः । अग्निम् । वनवत् । वनुष्यतः । कृतऽब्रह्मा । शूशुवत् । रातऽहव्यः । इत् ।
जातेन । जातम् । अति । सः । प्र । सर्सृते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ १ ॥

ᵛअग्निम् ᵛइन्धानः ब्रह्मणस्पतेर्यागार्थमग्निं प्रज्वलयन्[1] यजमानः ᵛवनुष्यतः हिंसिष्यतो हिंसां कुर्वतो वा शत्रून् ᵛवनवत् वनुयात् हिंस्यात् । ' वनुष्यतिर्हन्तिकर्मा[2] ' इति यास्कः । ᵛइत् इति चार्थे । ᵛकृतब्रह्मा । ब्रह्म स्तोत्रं कृतं येन स तथोक्तः । ᵛरातहव्यः । रातं दत्तं हव्यं हविर्येन । एवंभूतः सन् ᵛशूशुवत् वर्धते । 'टुओश्वि गतिवृद्ध्योः' । अस्माण्ण्यन्तात् लुङि चङि[3] रूपम् ॥ तथा यजमानः ᵛजातेन पुत्रेण ᵛजातं जनितमुत्पादितं[4] स्वस्य पौत्रम् ᵛअति ᵛप्र ᵛसर्सृते अतीत्य भृशं प्रसरति । पौत्रमपि पश्यन् चिरकालं जीवेदित्यर्थः ॥ सर्तेर्यङ्लुगन्तात् व्यत्ययेनात्मनेपदम् ॥ ᵛयंयं यजमानं ᵛब्रह्मणस्पतिः स्तोत्रहविषोः स्वीकरणेन ᵛयुजं सख्यायं ᵛकृणुते कुरुते ᵛसः समान एव भवतीत्यर्थः ॥

१. ख-म–प्रज्वालयन् । २. क-झ-ञ१-त-म–' वनुष्यतिर्हिंसाकर्मा । ३. च-थ–' चङि ' नास्ति । ४. त-थ–उत्पादितम् ।

वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ २ ॥

वीरेभिः । वीरान् । वनवत् । वनुष्यतः । गोभिः । रयिम् । पप्रथत् । बोधति । त्मना ।
तोकम् । च । तस्य । तनयम् । च । वर्धते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥२॥

स यजमानः [v]वीरेभिः वीरैः आत्मीयैः पुत्रैः [v]वनुष्यतः हिंसतः [v]वीरान् शत्रुपुत्रान् [v]वनवत् वनुयात् हिंस्यात् । अपि च [v]गोभिः सहितं धनं[1] [v]पप्रथत् प्रथयति विस्तारयति ॥ प्रथयतेर्लुङि चङि एतद्रूपम् ॥ तथा [v]त्मना आत्मनैव [v]बोधति सर्वं जानाति । अनन्याधीनज्ञानो भवतीत्यर्थः । किंच [v]तस्य यजमानस्य [v]तोकं पुत्रः [v]तनयम् ॥ विभक्तिव्यत्ययः ॥ तनयस्तत्पुत्रः [v]च [v]वर्धते प्रवृद्धो भवति । यद्वा[2] तोकं तनयं पुत्रं पौत्रं च ब्रह्मणस्पतिर्वर्धयति ॥ वृधिरन्तर्भावितण्यर्थो द्रष्टव्यः । अन्यद्भूतम् ॥

सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ३ ॥

सिन्धुः । न । क्षोदः । शिमीऽवान् । ऋघायतः । वृषाऽइव । वध्रीन् । अभि । वष्टि । ओजसा ।
अग्नेःऽइव । प्रऽसितिः । न । अह । वर्तवे । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ३ ॥

[v]सिन्धुः स्यन्दनशीला नदी [v]क्षोदः [v]न क्षुद्यमानं कूलं यथा भिनत्ति तथा [v]शिमीवान् । शिमीति कर्मनाम । ब्रह्मणस्पतेः परिचरणात्मना कर्मणा युक्तो यजमानः [v]ऋघायतः हिंसतः शत्रून् [v]ओजसा बलेन [v]अभि [v]वष्टि हन्तुमभितः कामयते । 'वश कान्तौ' । इदमपरं निदर्शनम् । [v]वृषेव [v]वध्रीन् । वध्रयो निष्पिष्टमुष्का निर्वीर्या बलीवर्दाः । तान् यथा वृषा सेचनसमर्थः सवीर्यो वृषभोऽभिभवति तद्वच्छत्रूनभिभवतीत्यर्थः । अपि चासौ [v]अग्नेरिव [v]प्रसितिः । प्रसीयते बध्यतेऽनयेति प्रसितिर्ज्वाला ॥ 'षिञ् बन्धने' । करणे क्तिन् ॥ यथा अग्नेर्ज्वाला प्रतिहतप्रसरा एवमपि [v]न [v]वर्तवे वारयितुं निवर्तयितुं वा नैव शक्यते ॥ अहशब्दोऽवधारणे । वृणोतेरन्तर्भावितण्यर्थात् वर्ततेर्वा तुमर्थे तवेन्प्रत्ययः ॥ अन्यद्भूतम् ॥

तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ४ ॥

तस्मै । अर्षन्ति । दिव्याः । असश्चतः । सः । सत्वऽभिः । प्रथमः । गोषु । गच्छति ।
अनिभृष्टऽतविषिः । हन्ति । ओजसा । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ४ ॥

१. म–रयिं धनम् । २. क्ष१-ण-त-थ-न–तथा ।

vतस्मै यजमानाय vदिव्याः दिवि भवा वृष्टिलक्षणा आपः vअसश्चतः असज्यमाना अनिरुद्धाः सत्यः vअर्षन्ति गच्छन्ति प्राप्नुवन्ति ॥ अर्तेर्लेटि रूपम् ॥ तथा vसः यजमानः vसत्वभिः । सत्वानः साधकाः[1] परिचारकास्तैः सहितः vप्रथमः अन्येभ्यो यजमानेभ्यः पूर्वभावी सन् vगोषु vगच्छति । गवादिधनं प्राप्नोतीत्यर्थः । किंच vअनिभृष्टतविषिः । तविषीति बलनाम । अनिभृष्टा परैरबाधिता तविषी बलं यस्य तादृशः[2] सन् vओजसा बलेन vहन्ति शत्रून् ॥

तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ५ ॥

तस्मै । इत् । विश्वे । धुनयन्त । सिन्धवः । अच्छिद्रा । शर्म । दधिरे । पुरूणि ।
देवानाम् । सुम्ने । सुऽभगः । सः । एधते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ५ ॥

vतस्मा vइत् तस्मै एव यजमानाय vविश्वे vसिन्धवः सर्वाः स्यन्दनशीला नद्यः vधुनयन्त चलयन्ति । एतदभीष्टफलसिद्ध्यर्थं प्रवहन्तीत्यर्थः । तथा vअच्छिद्रा अच्छिद्राणि छिद्ररहितानि संततानि vपुरूणि बहूनि vशर्म शर्माणि सुखानि vदधिरे तस्मा एव धार्यन्ते । यद्वा शर्मेति गृहनाम । छिद्ररहितानि बहूनि सदनानि धार्यन्ते । vसुभगः शोभनधनः vदेवानां vसुम्ने देवैः प्रत्ते सुखे वर्तमानः सन् vएधते वर्धते । शिष्टं स्पष्टम् ॥ ॥ ४ ॥

'ऋजुः' इति चतुर्ऋचं चतुर्थं सूक्तं गृत्समदस्यापं जागतं ब्राह्मणस्पत्यम् । तथा चानुक्रान्तम्— 'ऋजुश्चतुष्कम्' इति । गतो विनियोगः ॥

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥ १ ॥

ऋजुः । इत् । शंसः । वनवत् । वनुष्यतः । देवऽयन् । इत् । अदेवऽयन्तम् । अभि । असत् ।
सुप्रऽअवीः । इत् । वनवत् । पृत्ऽसु । दुस्तरम् ।
यज्वा । इत् । अयज्योः । वि । भजाति । भोजनम् ॥ १ ॥

vऋजुरित् आर्जवयुक्त एव । यद्वा ऋञ्जतिः प्रसाधनकर्मा । स्तोत्राणां प्रसाधक एव vशंसः ब्रह्मणस्पतेः स्तोता vवनुष्यतः हिंसतः शत्रून् vवनवत् वनुयात् हिंस्यात् ॥ वनोतेर्हन्तिकर्मण एतद्रूपम् ॥ तथा vदेवयन्नित् देवं दानादिगुणयुक्तं ब्रह्मणस्पतिमात्मन इच्छन्नेव vअदेवयन्तं तद्विपरीतं पुरुषम् vअभ्यसत् अभिभवेत् ॥ अस्तेर्लेटि एतद्रूपम् ॥ तथा vसुप्रावीरित् ॥ अवतेस्तृस्त्यर्थादौणादिक ईकार-प्रत्ययः ॥ सुष्ठु प्रकर्षेण ब्रह्मणस्पतेस्तर्पयितैव vपृत्सु पृतनासु संग्रामेषु vदुस्तरं तरीतुमशक्यं vवनवत्

१. ण–सोदकाः; ख-ग-थ–सादकाः; म–सादरः । २. ज्ञ१–स तादृशः; त-थ–एतादृशः ।

हिंस्यात्। तथा Vयज्वेत् ब्रह्मणस्पतिं हविषा इष्टवानेव Vअयज्योः अयज्वनः Vभोजनं भोगसाधनं Vवि Vभजाति विशेषेण भजेत[1] इत्यर्थः ॥

यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे ॥ २ ॥

यजस्व । वीर । प्र । विहि । मनायतः । भद्रम् । मनः । कृणुष्व । वृत्रऽतूर्ये ।
हविः । कृणुष्व । सुऽभगः । यथा । अससि । ब्रह्मणः । पतेः । अवः । आ । वृणीमहे ॥ २ ॥

ऋषिः आत्मीयं पुरुषं शास्ति । हे Vवीर विशेषेण स्तुतीनां प्रेरक सखे Vयजस्व ब्रह्मणस्पतिं स्तुत्या पूजय । Vमनायतः मन इव शीघ्रं प्रवर्तमानान् हिंसकान् । यद्वा अभिमन्यमानान् शत्रून् प्रति Vप्र Vविहि प्रकर्षेण युद्धार्थं गच्छ ॥ वी गत्यादिषु । छान्दसो ह्रस्वः ॥ Vवृत्रतूर्ये वृत्राणामावारकाणां शत्रूणां हिंसाहेतुभूते संग्रामे Vभद्रं कल्याणं धाष्टर्योपेतं Vमनः Vकृणुष्व कुरुष्व । ब्रह्मणस्पतेरनुग्रहात्त्वैव जयो भविष्यति । तथा ब्रह्मणस्पतये Vहविः चरुपुरोडाशादिकं Vकृणुष्व कुरुष्व । Vयथा त्वं Vसुभगः शोभनधनः Vअससि भवेः ॥ अस्तेर्लेटि अडागमः ॥ ब्रह्मणस्पतेर्योगेन त्वं शोभनधनो भविष्यसीति यावत्। अपि च वयं Vब्रह्मणस्पतेः Vअवः रक्षणम् Vआआभिमुख्येन Vवृणीमहे प्रार्थयामहे ॥

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ ३ ॥

सः । इत् । जनेन । सः । विशा । सः । जन्मना । सः । पुत्रैः । वाजम् । भरते । धना । नृऽभिः ।
देवानाम् । यः । पितरम् । आऽविवासति । श्रद्धाऽमनाः । हविषा । ब्रह्मणः । पतिम् ॥ ३ ॥

Vयः यजमानः Vश्रद्धामनाः श्रद्धा मनसि यस्य तादृशः सन् Vदेवानां Vपितरं पालयितारं Vब्रह्मणस्पतिं Vहविषा चरुपुरोडाशादिना Vआविवासति परिचरति । विवासतिः परिचरणकर्मा । Vस Vइत् स एव यजमानः Vजनेन जातेन सर्वेण लोकेन Vवाजम् अन्नं Vभरते बिभर्ति संभरति वा । Vसः एव Vविशा प्रजया आत्मीयेन बन्धुजनेन वाजं भरते । Vस एव Vपुत्रैः आत्मीयैरपत्यैः वाजं भरते । तथा Vनृभिः नेतृभिरन्यैः परिचारकैः Vधना धनानि भरते बिभर्ति संपादयति वा । ब्रह्मणस्पतिमिष्टवतो यजमानस्य सर्वतो जना अन्नधनयोः साधका भवन्तीति यावत् ॥

यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोऽहोश्चिदस्मा उरुचक्रिरद्भुतः ॥ ४ ॥

यः । अस्मै । हव्यैः । घृतवत्ऽभिः । अविधत् । प्र । तम् । प्राचा । नयति । ब्रह्मणः । पतिः ।
उरुष्यति । ईम् । अंहसः । रक्षति । रिषः । अंहोः । चित् । अस्मै । उरुऽचक्रिः । अद्भुतः ॥४॥

---

१. ख-ग-च-ण-ण१-त-थ-न-व-भजते; झ-म-भजति ।

Vयः यजमानः Vअस्मै ब्रह्मणस्पतये ॥ 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वात् चतुर्थी ॥ इमं ब्रह्मणस्पतिं Vघृतवद्भिः उपस्तरणाभिघारणात्मकेनाज्येनोपेतैः Vहव्यैः हविर्भिः Vअविधत् परिचरति ॥ 'विध विधाने'। नौदादिकः। अयं परिचरणकर्मसु पठितः ॥ Vतं यजमानं Vब्रह्मणस्पतिः Vप्राचा प्राचीनेन ऋजुना मार्गेण Vप्र Vनयति प्रकृष्टं फलं प्रापयति। अपि च Vईम् एनम् Vअंहसः पापात् Vउरुष्यति रक्षति। 'उरुष्यती रक्षाकर्मा' इति यास्कः। तथा Vरिषः हिंसकादेनं Vरक्षति। Vअंहोश्चिन् अवृतेर्दारित्यात्। यद्वा आगत्य हन्तुरपि रक्षति। अपि च Vअस्मै यजमानाय Vअद्भुतः। महन्नामैतत्। आचार्यभूतो महान् ब्रह्मणस्पतिः Vउरुचक्रिः उरोः विस्तीर्णस्य उपकारस्य कर्ता भवति ॥ ॥ ५ ॥

'इमा गिरः' इति सप्तदशर्चं पञ्चमं सूक्तं गृत्समदपुत्रस्य कृमेस्य आर्षं गृत्समदस्यैव वा त्रैष्टुभमादित्यदेवताकम्। तथा चानुक्रान्तम्-'इमा गिरस्त्र्यूना कृमो गार्त्समदो हि वादित्यम्' इति। सूक्तविनियोगो लैङ्गिकः। आदित्यदेवताके पशौ पुराडाशस्य 'इमा गिरः' इत्येषा[1] अनुवाक्या। 'अग्नीषोमौ' इति खण्डे सूत्रितम्-'इमा गिर आदित्येभ्यो घृतस्नूस्त आदित्यास उरवो गभीराः' (आश्व. श्रौ. ३. ८) इति ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥ १ ॥

इमाः। गिरः। आदित्येभ्यः। घृतऽस्नूः। सनात्। राजऽभ्यः। जुह्वा। जुहोमि।
शृणोतु। मित्रः। अर्यमा। भगः। नः। तुविऽजातः। वरुणः। दक्षः। अंशः ॥ १ ॥

Vआदित्येभ्यः अदितेः पुत्रेभ्यः Vराजभ्यः राजमानेभ्य ईश्वरेभ्यो वा मित्रादिभ्यः Vघृतस्नूः घृतप्रस्राविणीर्घृतं क्षरन्तीः Vइमा Vगिरः स्तुतिलक्षणा वाचः Vसनात् सर्वदा Vजुह्वा। वाङ्नामैतत्। वागिन्द्रियेण Vजुहोमि प्रयच्छामि[2] करोमीति यावत्। यद्वा जुहूस्थानीयेन[3] घृतं क्षरन्ति वाग्रूपाणि हवींषि जुहोमि आदित्यानुद्दिश्य त्यजामि। मन्त्राणां पयोघृतादिक्षरणहेतुत्वं च 'यदृचोऽधीते पयसः कृल्पा अस्य' (तै. आ. २. १०) इत्यादिना तैत्तिरीये स्पष्टमाम्नातम्। Vनः अस्मदीयास्तां गिरो मित्रादयः प्रत्येकं Vशृणोतु। ते च तैत्तिरीये 'अष्टौ पुत्रासो अदितेः' इत्युपक्रम्य स्पष्टमनुक्रान्ताः-'मित्रश्च वरुणश्च धाता चार्यमा च अंशुश्च भगश्च इन्द्रश्च विवस्वांश्चेत्येते' (तै. आ. १. १३. ३) इति। Vमित्रः प्रमीतेस्त्रायकः। यद्वा सर्वेषां स्निग्धः। अरीन् यच्छति नियच्छतीति Vअर्यमा। Vभगः भजनीयो देवः। तुवीति बहुनाम। बहुषु देशेषु अनुग्रहार्थं प्रादुर्भूतः। वरुणविशेषणमेतत्। पापस्य निवारणात् Vवरुणः। Vदक्षः[4] समर्थः[4]। एतच्च अंशस्य[5] विशेषणम्। एते प्रत्येकं शृण्वन्तु ॥

पूर्वोक्त एव पशौ 'इमं स्तोमम्' इत्येषा वपाया[6] याज्या[6]। सूत्रितं च-'इमं स्तोमं सक्रतवो मे अद्य तिस्रो भूमीर्धारयन् त्रीरुत द्यून्' (आश्व. श्रौ. ३. ८) इति ॥

---

१. ण-त-इत्येका। २. ख-ग-च-ज्ञ१-ण-ण१-थ-न-व-'प्रयच्छामि' नास्ति। ३. ख-ग-च-ण१-न-जुह्वास्थानीयेन। ४. ण१-त-थ-म-'दक्षः समर्थः' नास्ति। ५. क-ज्ञ-म-अंशोः। ६. ज्ञ१-त-थ-न-म-व-त्रपाया यागस्य याज्या; ण- वपायागस्य याज्या।

इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥ २ ॥

इमम् । स्तोमम् । सऽक्रतवः । मे । अद्य । मित्रः । अर्यमा । वरुणः । जुषन्त ॥
आदित्यासः । शुचयः । धारऽपूताः । अवृजिनाः । अनवद्याः । अरिष्टाः ॥ २ ॥

vइमं vमे[1] अस्मदीयं vस्तोमं स्तोत्रं vसक्रतवः समानकर्माणः समानप्रज्ञा वा मित्रादयः vअद्य इदानीं vजुषन्त जुषन्तां सेवन्ताम् । कीदृशास्ते । vआदित्यासः अदितेः पुत्राः vशुचयः दीप्यमानाः vधारपूताः उदकधाराभिरिव पूताः । निर्मला इत्यर्थः । vअवृजिनाः । 'वृजी वर्जने' । अवर्जितारः सर्वानुग्राहका इत्यर्थः । vअनवद्याः अवद्येन गर्ह्येण पापेन रहिताः vअरिष्टाः केनाप्यहिंसिताः ॥

तस्मिन्नेव पशौ 'त आदित्यासः' इति हविषोऽनुवाक्या । सूत्रं तु पूर्वमेवोदाहृतम् ॥

त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥ ३ ॥

ते । आदित्यासः । उरवः । गभीराः । अदब्धासः । दिप्सन्तः । भूरिऽअक्षाः ।
अन्तरिति । पश्यन्ति । वृजिना । उत । साधु । सर्वम् । राजऽभ्यः । परमा । चित् । अन्ति ॥३॥

vते vआदित्यासः अदितेः पुत्राः vउरवः महान्तः vगभीराः गाम्भीर्योपेताः vअदब्धासः शत्रुभिरहिंसिताः सन्तः vदिप्सन्तः शत्रून् दम्भितुं[2] हिंसितुमिच्छन्तः ॥ 'दम्भु दम्भे' । अस्मात् इच्छासनि 'सनीवन्तर्ध०' इति इडभावपक्षे 'दम्भ इच्च' इति इकारः । 'दम्भेर्हलन्तग्रहणस्य जातिवाचकत्वात् सिद्धम्' (पा. सू. १. २. १०. १) इति सनः कित्त्वे अनुनासिकलोपः ॥ तथा vभूर्यक्षाः भूरीणि बहूनि अक्षीणि चक्षूंषि येषां ते तथोक्ताः बहुतेजसो वा ॥ 'बहुव्रीहौ सक्थ्यक्ष्णोः०' इति पच् समासान्तः ॥ एवंभूता आदित्याः vअन्तः मध्ये प्राणिनां हृदि प्रेरकतया वर्तमानाः सन्तः vवृजिना वृजिनानि पापानि vउत अपि च vसाधु साधूनि पुण्यानि च प्राणिभिः कृतानि vपश्यन्ति जानन्ति । vपरमा vचित् परमाणि दूरदेशावस्थितान्यपि vसर्वं सर्वाणि दृश्यमानानि vराजभ्यः राज्ञामीश्वराणामादित्यानाम् vअन्ति अन्तिके समीपे वर्तते इति शेषः ॥ 'कादिलोपो बहुलम्' इत्यन्तिकशब्दस्य कादिलोपः ॥

साग्निचित्येऽपि क्रतौ दीक्षणीयायामादित्ययागस्य 'धारयन्तः' इत्यादिके द्वे याज्यानुवाक्ये । अत एव भुवद्वह्नुवनपतिविशेषणविशिष्टादित्ययागेऽपि । तथा च 'दीक्षणीयायाम्' इति खण्डे सूत्रितं—'धारयन्त आदित्यासो जगत्स्था इति द्वे[3] एते एव भुवद्वह्नयो भुवनपतिभ्यो वा' (आश्व. श्रौ. ४. २) इति ।

१. ण-त-थ-म-'मे' नास्ति । २. ग-ण१-दभितुम् । ३. झ१-ण त-थ-न-म-द्वे इति ।

धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ४ ॥

धारयन्तः । आदित्यासः । जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपाः ।
दीर्घऽधियः । रक्षमाणाः । असुर्यम् । ऋतऽवानः । चयमानाः । ऋणानि ॥ ४ ॥

vजगत् जङ्गमं vस्थाः स्थावरं च ॥ तिष्ठतेः कर्तरि असुन् ॥ एतदुभयविधं भूतजातं vधारयन्तः अवस्थापयन्तः vदेवाः दानादिगुणयुक्ताः vविश्वस्य vभुवनस्य सर्वस्य लोकस्य vगोपाः गोपयितारो रक्षकाः vदीर्घाधियः दीर्घाणि धियः कर्माणि ज्ञानानि वा येषां तादृशाः ॥ 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घः ॥ vअसुर्यम् । असवः प्राणाः । तेन च तद्धेतुभूता आपो लक्ष्यन्ते । अपां तद्धेतुत्वं च छान्दोग्ये स्पष्टमाम्नातम्—'आपोमयः प्राणः' (छा. उ. ६. ५. ४) इति । असुमुदकं ददातीत्यसुरो मेघः । तत्र भवं मेघान्तर्वर्तमानमुदकं vरक्षमाणाः । तत्तत्काले वृष्टगुत्पादनाय रक्षन्तः ॥ असुरशब्दात् 'भवे छन्दसि' इति यत् ॥ vऋतावानः सत्यवन्तो यज्ञवन्तो वा ॥ 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप् । पूर्ववद्दीर्घः ॥ vऋणानि स्तोतृभिः अन्येभ्यः प्रदेयानि vचयमानाः अपगमयन्तः ॥ 'चय गतौ' । भौवादिकोऽनुदात्तेत् ॥ एवंगुणविशिष्टा महानुभावा अस्मदधीना भवन्त्विति शेषः ॥

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥ ५ ॥

विद्याम् । आदित्याः । अवसः । वः । अस्य । यत् । अर्यमन् । भये । आ । चित् । मयःऽभु ।
युष्माकम् । मित्रावरुणा । प्रऽनीतौ । परि । श्वभ्राऽइव । दुःऽइतानि । वृज्याम् ॥ ५ ॥

हे vआदित्याः अदितेः पुत्राः vवः युष्माकम् vअस्य vअवसः ॥ कर्मणि षष्ठी ॥ इदं रक्षणं vविद्यां लभेय । vभये राक्षसादिभ्य आगते सति vयत् युष्मदीयं रक्षणम्[1] । चिच्छब्दश्चार्थे । vमयोभु मयसः सुखस्य भावयितृ च तदिदं लभेयेत्यन्वयः । हे vअर्यमन् हे मित्रावरुणौ vयुष्माकं vप्रणीतौ अस्मद्विषये प्रकृष्टे नयने सति vश्वभ्रेव श्वभ्राणीव स्थातुमयोग्यानि गर्तवन्ति स्थलानीव vदुरितानि पापानि vपरि vवृज्यां परित्यजेयम् ॥ 'वृजी वर्जने' । 'बहुलं छन्दसि' इति विकरणस्य लुक् ॥ ॥६॥

सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥ ६ ॥

सुऽगः । हि । वः । अर्यमन् । मित्र । पन्थाः । अनृक्षरः । वरुण । साधुः । अस्ति ।
तेन । आदित्याः । अधि । वोचत । नः । यच्छत । नः । दुःऽपरिहन्तु । शर्म ॥ ६ ॥

१. म–रक्षणं विद्याम् ।

हे [v]अर्यमन् [v]मित्र [v]वरुण [v]वः युष्माकं [v]सुगः सुखेन गन्तव्यः [v]अनृक्षरः । ' ऋक्षरः कण्टक ऋच्छतेः ' इति । तद्रहितः [v]साधुः साधकः शोभनो वा । एवंगुणविशिष्टः [v]पन्थाः मार्गः [v]अस्ति विद्यते खलु । अतः [v]तेन पथा अस्मान् शोभनं नयतेति शेषः । हे [v]आदित्याः [v]नः अस्माकम् [v]अधि [v]वोचत अधिवचनं पक्षपातेन वचनं कुरुत । अपि च [v]नः अस्मभ्यं [v]दुष्परिहन्तु परिहन्तुं विनाशयितुमशक्यं [v]शर्म सुखं [v]यच्छत दत्त ॥ ' दाण् दाने ' । शपि ' पाघ्रा° ' इत्यादिना यच्छादेशः ॥

पिपर्तु नो अदितीं राजपुत्रातिं द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥ ७ ॥

पिपर्तु । नः । अदितिः । राजऽपुत्रा । अतिं । द्वेषांसि । अर्यमा । सुऽगेभिः ।
बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः ॥ ७ ॥

[v]राजपुत्रा राजानो राजमाना मित्रादयः पुत्रा यस्यास्तादृशी [v]अदितिः अदीना[1] अखण्डनीया वा देवी [v]नः अस्मान् [v]द्वेषांसि द्वेष्टॄणि रक्षांसि [v]अति [v]पिपर्तु अतिपारयतु । अतिक्रम्य तद्रहितं देशं प्रापयत्वित्यर्थः । [v]अर्यमा च [v]सुगेभिः सुष्ठु गन्तव्यैर्मार्गैरस्मान् पारयतु । अपि च वयं [v]पुरुवीराः बहुभिर्वीरैः पुत्रादिभिरुपेताः [v]अरिष्टाः केनाप्यहिंसिताश्च सन्तः [v]मित्रस्य [v]वरुणस्य च [v]बृहत् परिवृढं [v]शर्म सुखम् [v]उप [v]स्याम उपगता भवेम ॥

पूर्वोक्ते पशौ ' तिस्रो भूमीः ' इति पुरोडाशस्य याज्या । सूत्रं पूर्वमेवोदाहृतम् ॥

तिस्रो भूमीर्धारयन् त्रीरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ ८ ॥

तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अन्तः । एषाम् ।
ऋतेन । आदित्याः । महि । वः । महिऽत्वम् । तत् । अर्यमन् । वरुण । मित्र । चारु ॥८॥

[v]तिस्रो [v]भूमीः । अत्र भूमिशब्दो लोकत्रये वर्तते । ' यो द्वितीयस्यां तृतीयस्यां पृथिव्याम् ' इत्यत्र यथा पृथिवीशब्दः । भूम्यन्तरिक्षस्वर्गांस्त्रीन् लोकान् आदित्याः [v]धारयन् वृष्टिप्रदानादिना धारयन्ति । [v]उत अपि च [v]द्यून् दीप्तान् तत उपरितनान् महरादिकानपि [v]त्रीन् लोकान् धारयन्ति । यद्वा दीप्तान् अग्निं वायुं सूर्यं च धारयन्ति । अपि च [v]एषाम् आदित्यानां [v]विदथे यज्ञे [v]अन्तः मध्ये त्रीणि [v]व्रता सवनत्रयनिष्पाद्यानि [v]त्रीणि कर्माणि सन्ति । यद्वा एषां लोकानामन्तर्मध्ये विदथे यज्ञे निमित्तभूते सति एषामादित्यानां त्रीणि कर्माणि रसादानधारणविसर्जनलक्षणानि[2] सन्ति । उत्तरोऽर्धश्चैः प्रत्यक्षकृतः । हे [v]आदित्याः [v]ऋतेन सत्येन यज्ञेन वा [v]महि महत् प्रभूतं [v]वः युष्माकं [v]महित्वं महत्त्वं यन्महाभाग्यं हे [v]अर्यमन् [v]वरुण [v]मित्र [v]तत् महाभाग्यं [v]चारु शोभनम् । सर्वोत्कृष्टमित्यर्थः ॥

---

१. ख–अदीना देवमाता । २. म–रसानां धारण° ।

त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ ९ ॥

त्री । रोचना । दिव्या । धारयन्त । हिरण्ययाः । शुचयः । धारऽपूताः ।
अस्वप्नऽजः । अनिऽमिषाः । अदब्धाः । उरुऽशंसाः । ऋजवे । मर्त्याय ॥ ९ ॥

[v]त्री [v]रोचना त्रीणि रोचनानि रोचमानाग्न्यादीनि तेजांसि [v]दिव्या दिव्यानि दिवि भवानि [v]धारयन्त आदित्या अवास्थापयन् । किमर्थम् । [v]ऋजवे ऋजीकाय स्तोत्राणां [v]मर्त्याय मनुष्याय भोगसिद्ध्यर्थमिति यावत् । कीदृशा आदित्याः । [v]हिरण्ययाः हिरण्मयाः[1] हिरण्यालंकृतसर्वाङ्गाः । यद्वा हितरमणीयवेषाः । [v]शुचयः दीप्यमानाः [v]धारपूताः उदकधारया क्षालिता इव निर्मलाः । [v]अस्वप्नजः असंजातस्वप्नाः ॥ 'सुपां सुलुक्०' इति जसः सुः ॥ अपर आह । अस्वप्नजः अस्वपन्तो विगतनिद्राः ॥ 'स्वपितृषोर्नजिङ्' इति नञिङ्प्रत्यय इति । तदेतत् पदकारस्यानभिमतम् ॥ [v]अनिमिषाः निमेषरहिताः । [v]अदब्धाः असुरादिभिरहिंसिताः [v]उरुशंसाः उरुभिर्बहुभिः शंसनीयाः स्तोतव्याः । एवंगुणविशिष्टा अधारयन्तेत्यन्वयः ॥

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥ १० ॥

त्वम् । विश्वेषाम् । वरुण । असि । राजा । ये । च । देवाः । असुर । ये । च । मर्ताः ।
शतम् । नः । रास्व । शरदः । विऽचक्षे । अश्याम । आयूंषि । सुऽधितानि । पूर्वा ॥ १० ॥

हे [v]असुर शत्रूणां क्षेपक [v]वरुण [v]त्वं [v]विश्वेषां सर्वेषां [v]राजा [v]असि । केषाम् । [v]ये [v]च [v]देवाः देवजनाः [v]ये [v]च [v]मर्ताः मरणधर्माणो मनुष्याः तेषामित्यर्थः । अतस्त्वं [v]नः अस्मभ्यं [v]शतं [v]शरदः शतसंख्याकान् संवत्सरान् [v]विचक्षे विशेषेण दर्शनाय [v]रास्व प्रयच्छ ॥ 'रा दाने' । व्यत्ययेनात्मनेपदम् ॥ वयं च [v]पूर्वा पूर्वैर्देवैः [v]सुधितानि सुष्ठु हितानि शतसंवत्सरलक्षणानि [v]आयूंषि [v]अश्याम व्याप्नुयाम ॥ 'सुधितवसुधितनेमधितधिष्वधिषीय च' इति निपात्यते । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । पूर्वा । 'सुपां सुलुक्०' इति तृतीयाया डादेशः ॥ ॥ ७ ॥

आदित्यदेवताके पशौ 'न दक्षिणा' इत्येषा हविषो याज्या । 'तिस्रो भूमीर्धारयन्त्रीरुँत द्यून् न दक्षिणा वि चिकिते न सव्या' (आश्व. श्रौ. ३. ८) इति ॥

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥ ११ ॥

न । दक्षिणा । वि । चिकिते । न । सव्या । न । प्राचीनम् । आदित्याः । न । उत । पश्चा ।
पाक्या । चित् । वसवः । धीर्या । चित् । युष्माऽनीतः । अभयम् । ज्योतिः । अश्याम ॥ ११ ॥

---

१. क-ङ-ञ१-व-हिरण्यमयाः; म-'हिरण्मयाः' नास्ति ।

हे [v]आदित्याः [v]दक्षिणा दक्षिणो भागः [v]न [v]वि [v]चिकिते मया न विज्ञायते । [v]सव्या सव्यो वामभागोऽपि [v]न ज्ञायते ॥ उभयत्र 'सुपां सुलुक्' इति सोः आजादेशः ॥ तथा [v]प्राचीनं पुरस्तादपि [v]न ज्ञायते[1] ॥ 'विभाषाञ्चेरदिक्स्त्रियाम्' इति स्वार्थे ख्यः ॥ [v]उत अपि च [v]पश्चा पश्चात् पृष्टभागोऽपि [v]न ज्ञायते । नैशेन तमसा आवृतत्वात् आन्तरादज्ञानाद्वा ॥ 'पश्च पश्चा च छन्दसि' (पा. सू. ५. ३. ३३) इति निपात्यते ॥ किं बहुना । [v]पाक्या [v]चित् पाक्यः पक्तव्यः अपरिपक्वज्ञानोऽपि ॥ 'डुपचष् पाके' । 'ऋहलोर्ण्यत्' । तित्स्वरितः ॥ [v]धीर्या [v]चित् धीरे नेतव्यत्वेन भवो धीर्यः कातरः ॥ 'भवे छन्दसि' इति यत् ॥ कातरोऽपि ॥ उभयत्र 'सुपां सुलुक्' इत्याकारः ॥ हे [v]वस्वः वास्थियनार आदित्याः [v]युष्मानीतः युष्माभिर्नीतः शोभनेन मार्गेण प्रापितः सन् [v]अभयं भयरहितं [v]ज्योतिः सौरं तेजः आन्तरं वा ज्ञानात्मकम् [v]अश्यां प्राप्नुयाम् ॥

यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ १२ ॥

यः । राजऽभ्यः । ऋतनिऽभ्यः । ददाश । यम् । वर्धयन्ति । पुष्टयः । च । नित्याः ।
सः । रेवान् । याति । प्रथमः । रथेन । वसुऽदावा । विदथेषु । प्रऽशस्तः ॥ १२ ॥

[v]यः यजमानः [v]राजभ्यः राजमानेभ्यः [v]ऋतनिभ्यः ऋतस्य यज्ञस्य[2] सत्यस्य वा नेतृभ्य आदित्येभ्यः [v]ददाश चरुपुरोडाशादिकं ददाति । [v]यं यजमानं [v]पुष्टयः पोषकाः [v]नित्याः शाश्वता आदित्याः च [v]वर्धयन्ति । [v]सः यजमानः [v]रेवान् धनवान् [v]प्रथमः प्रथितः प्रख्यातः [v]वसुदावा वसूनां धनानां दाता सन् [v]प्रशस्तः सर्वैः प्रशस्यमानः [v]विदथेषु वेद्येषु लब्धव्येषु गृहेषु [v]रथेन वाहनेन [v]याति गच्छति ॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ १३ ॥

शुचिः । अपः । सुऽयवसाः । अदब्धः । उप । क्षेति । वृद्धऽवयाः । सुऽवीरः ।
नकिः । तम् । घ्नन्ति । अन्तितः । न । दूरात् । यः । आदित्यानाम् । भवति । प्रऽनीतौ ॥ १३ ॥

स यजमानः [v]शुचिः दीप्यमानः शुद्धो वा [v]अदब्धः सपत्नैरबाधितः [v]वृद्धवयाः प्रभूतान्नः [v]सुवीरः शोभनपुत्रश्च सन् [v]सूयवसाः शोभनसस्यानि [v]अपः वृष्टिलक्षणान्युदकानि [v]उप [v]क्षेति उपनिवसति । सर्वदा सुसस्यानामपां समीपे निवसतीत्यर्थः । तथा [v]नकिः न च [v]तं[3] [v]घ्नन्ति हिंसन्ति [v]अन्तितो [v]न अन्तिकात् समीपदेशाच्च [v]दूरात् विप्रकृष्टाच्च देशादागता बाधकाः ॥ अन्तिकस्य तसि[4] 'कादिलोपः' इति लोपः ॥ [v]यः यजमानः [v]आदित्यानाम् अदितेः पुत्राणां मित्रादीनां [v]प्रणीतौ प्रकृष्टे नयने प्रापणे [v]भवति वर्तते स इति पूर्वत्र संबन्धः ॥

---

१. झ-म-विज्ञायते । २. क-झ-ञ१-ण-थ-न-म-व-'यज्ञस्य' नास्ति । ३. ण-त-थ-म-यम् । ४. ख-ग-त-थ-म-तसिलादिलोपः ।

अदितेऽ मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उरवेऽश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥ १४ ॥

अदिते । मित्र । वरुण । उत । मृळ । यत् । वः । वयम् । चकृम । कत् । चित् । आगः ।
उरु । अश्याम् । अभयम् । ज्योतिः । इन्द्र ।
मा । नः । दीर्घाः । अभि । नशन् । तमिस्राः ॥ १४ ॥

[v]उत अपि च हे [v]अदिते [v]मित्र [v]वरुण ॥ 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वपूर्वस्य आमन्त्रितस्य अविद्यमानवद्भावात् सर्वेषां षाष्टिकम् 'आमन्त्रितस्य' इत्याद्युदात्तत्वम् ॥ यूयं प्रत्येकं [v]मृळ अस्माकमुपरि दयां कुरु । रक्षेत्यर्थः । [v]यत् यद्यपि [v]वयं [v]वः युष्माकं [v]कच्चित् किंचित् [v]आगः अपराधं [1]चकृम अकर्म । तथापि मृळेत्यर्थः । हे [v]इन्द्र परमैश्वर्योपेत आदित्य [v]उरु विस्तीर्णम् [v]अभयं भयरहितं [v]ज्योतिः स्वदीयं प्रकाशं ज्ञानात्मकं वा [v]अश्याम् अहं प्राप्नुयाम् । [v]दीर्घाः विस्तृताः [v]तमिस्राः तमसा युक्ता निशाः ॥ 'ज्योरस्नातमिस्राश्रङ्गिणा॰' (पा. सू. ५. २. ११४) इति निपात्यते ॥ ताः [v]नः अस्मान् [v]मा [v]अभि [v]नशन् मा आभिमुख्येन प्राप्नुवन्तु ॥

उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥ १५ ॥

उभे इति । अस्मै । पीपयतः । समीची इति सम्ऽईची ।
दिवः । वृष्टिम् । सुऽभगः । नाम । पुष्यन् ।
उभा । क्षयौ । आऽजयन् । याति । पृत्ऽसु ।
उभौ । अर्धौ । भवतः । साधू इति । अस्मै ॥ १५ ॥

'य आदित्यानां भवति प्रणीतौ' इति व्यवहितोऽप्यत्र इदंशब्देन परामृश्यते । [v]अस्मै यजमानाय [v]समीची संगच्छमाने [v]उभे द्यावापृथिव्यौ [v]पीपयतः प्याययतः कामान् वर्धयतः ॥ 'प्यायी वृद्धौ' । अस्माण्ण्यन्तात् छान्दसो लुङ् । व्यत्ययेन तसस्तामादेशाभावो धातोः पीभावश्च ॥ स च [v]सुभगः शोभनधनः [v]दिवः द्युलोकादागतां [v]वृष्टिं [v]पुष्यन् वर्धयन् भवति । [v]नाम इति प्रसिद्धिद्योत्यते । किंच [v]पृत्सु पृतनासु संग्रामेषु [v]आजयन् शत्रूनाभिमुख्येनाभिभवन् [v]उभा [v]क्षयौ उभौ निवासौ ॥ क्षियन्ति निवसन्त्यस्मिन्निति क्षयो निवासस्थानम् । 'पुंसि संज्ञायां घः प्रायेण' इति अधिकरणे घः । 'क्षयो निवासे' इत्याद्युदात्तत्वम् ॥ तौ परैरनाक्रान्तं स्वकीयं निवासस्थानम् आत्मनाप्रहतं परकीयं निवासस्थानं च [v]याति गच्छति । तथा [v]अस्मै यजमानाय [v]उभावर्धौ जगतो भागौ चराचरात्मकौ मर्त्यामर्त्यात्मकौ वा [v]साधू साधकौ [v]भवतः ॥

१. क-ङ्ग-म-व्याप्नुवन्तु ।

या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥ १६ ॥

याः । वः । मायाः । अभिऽद्रुहे । यजत्राः । पाशाः । आदित्याः । रिपवे । विऽचृत्ताः ।
अश्वीऽईव । तान् । अति । येषम् । रथेन । अरिष्टाः । उरौ । आ । शर्मन् । स्याम ॥ १६ ॥

हे [v]यजत्राः यष्टव्याः [v]आदित्याः [v]वः युष्माकं [v]याः [v]मायाः [v]अभिद्रुहे अभितो[1] द्रोहं[2] कुर्वते राक्षसादये निर्मिताः ये च [v]पाशाः [v]रिपवे शत्रवे [v]विचृत्ताः ॥ ' चृती हिंसाग्रन्थनयोः ' ॥ प्रसारिता इत्यर्थः । [v]तान् पाशान् मायाश्च [v]रथेन [v]अति [v]येषम् अतीत्य प्रयतेयम् । अतितरेयमित्यर्थः । तत्र दृष्टान्तः । [v]अश्वीव । यथा शोभनाश्वः कश्चित् पुरुषः[3] दुस्तरान्मार्गान् शीघ्रमतिक्रामति तद्वत् ॥ ' येषृ प्रयत्ने ' । भौवादिकोऽनुदात्तेत् । छान्दसो लङ् । व्यत्ययेन परस्मैपदम् ॥ तथा वयम् [v]अरिष्टाः शत्रुभिः अहिंसिताः सन्तः [v]उरौ विस्तीर्णे [v]शर्मन् । शर्मेति गृहनाम । त्वया दत्ते सुखे गृहे वा [v]आ समन्तात् [v]स्याम वर्तमाना भवेम ॥

माहं मघोनो वरुण प्रियस्य भूरिदाम्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ १७ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाम्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १७ ॥

हे [v]वरुण [v]मघोनः धनवतः [v]प्रियस्य अनुकूलस्य [v]भूरिदाम्नः भूरेर्बहुलस्य दातुराढ्यस्य [v]अहं [v]मा [v]आ [v]विदं मा आवेदयानि । आवेदनं विज्ञापनं मा करवाणि । किं तदनावेद्यम् । [v]आपेः ज्ञातेः [v]शूनं शून्यं दारिद्र्यम् ॥ वर्णलोपश्छान्दसः ॥ यद्वा शूनं गतं प्राप्तं दारिद्र्यम् ॥ ' टुओश्वि गतिवृद्ध्योः ' । ' श्वीदितो निष्ठायाम् ' इति इट्प्रतिषेधः । यजादित्वात् संप्रसारणम् । ' ओदितश्च ' इति नकारः । वृषादित्वादाद्युदात्तत्वम् ॥ एतदुक्तं भवति । अस्मदीयाः पुत्रादयः क्षुधिता इति प्रभुप्रभुसमीपे[3] अभिधाय याचमानो मा भूवमिति । हे [v]राजन् [v]सुयमात् । सुष्ठु नियम्यतेऽनेन पुरुषो गृहे इति सुयमः ॥ ' ईषदुःसुषु° ' इति खल् ॥ तादृशात् [v]रायः धनात् [v]मा [v]अव [v]स्थाम् अवयुत्य स्थितो मा भूवम् । वयं [v]सुवीराः शोभनपुत्राः [v]विदथे यज्ञे गृहे वर्तमानाः सन्तः [v]बृहत् प्रौढं स्तोत्रं [v]वदेम उच्चारयाम ॥ ॥ ८ ॥

' इदम् ' इत्येकादशर्चं षष्ठं सूक्तम् । अत्रानुक्रम्यते—' इदमेकादश वारुणम् ' इति । पूर्वसूक्ते ' कूर्मो गार्त्समदो हि वा ' इत्युक्तत्वादस्योत्तरस्य च कूर्मो गृत्समदो वा ऋषिः । त्रिष्टुप् छन्दः । वरुणो देवता । विनियोगो लैङ्किकः । अत्र केचिदाहुः—' इदमेकादशर्चं तु वारुणं भयपापनुत् । ऋणदारिद्र्यदुःस्वप्ननाशनं चेति शुश्रुम ' इति ॥

१. थ—अभिद्रोहम् । २. क-ङ-ञ१-ण-त-थ-न-म-व-' पुरुषः ' नास्ति । ३. ख-ग-फ—प्रभुसमीपे ।

इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु महा ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥ १ ॥

इदम् । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । सन्ति । अभि । अस्तु । महा ।
अति । यः । मन्द्रः । यजथाय । देवः । सुऽकीर्तिम् । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥

ᵛकवेः क्रान्तदर्शिनः ᵛआदित्यस्य अदितेः पुत्रस्य ᵛस्वराजः स्वयमेव राजमानस्य ईश्वरस्य वा ᵛवरुणस्य ᵛइदं हविः स्तोत्रं वा यजमानः करोतीति शेषः । स च ᵛविश्वानि सर्वाणि ᵛसन्ति द्वितीयभावविकारभाञ्जि भूतजातानि ᵛमहा महिम्ना वरुणप्रसादात् लब्धेन ᵛअभ्यस्तु अभिभवतु । ᵛयः ᵛदेवः द्योतमानो वरुणः ᵛयजथाय यष्ट्रे पुरुषाय ᵛअति अतिशयेन ᵛमन्द्रः स्तुत्यो हर्षयिता वा भवति तस्य ᵛभूरेः भर्तुर्वरुणस्य ᵛसुकीर्तिं शोभनां स्तुतिं ᵛभिक्षे प्रार्थये । यद्वा वरुणस्येति तृतीयार्थे षष्ठी । तेन वरुणेन दातव्यां शोभनां कीर्तिमहं याचे ॥

तवं व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उपसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥ २ ॥

तवं । व्रते । सुऽभगासः । स्याम । सुऽआध्यः । वरुण । तुस्तुऽवांसः ।
उपऽअयने । उषसाम् । गोऽमतीनाम् । अग्नयः । न । जरमाणाः । अनु । द्यून् ॥ २ ॥

हे ᵛवरुण ᵛस्वाध्यः शोभनाध्यानाः ᵛतुष्टुवांसः स्तुतवन्तः[1] वयं ᵛतव ᵛव्रते त्वदीये परिचरणाख्ये कर्मणि वर्तमानाः ᵛसुभगासः ᵛस्याम शोभनधना भवेम । अपि च ᵛगोमतीनां रश्मिभिर्युक्तानाम् ᵛउषसाम् ᵛउपायने उपागमने सति ᵛअग्नयो ᵛन यथाग्नयोऽग्निहोत्रादिकर्मार्थं समिध्यन्ते एवम् ᵛअनु ᵛद्यून् अनुदिनं ᵛजरमाणाः त्वां स्तुवन्तो वयं दीप्यमाना भवेम ॥

तवं स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ॥ ३ ॥

तवं । स्याम । पुरुऽवीरस्य । शर्मन् । उरुऽशंसस्य । वरुण । प्रऽनेतरिति प्रऽनेतः ।
यूयम् । नः । पुत्राः । अदितेः । अदब्धाः । अभि । क्षमध्वम् । युज्याय । देवाः ॥ ३ ॥

हे ᵛप्रणेतः सर्वस्य जगतः प्रकर्षेण नेतः ᵛवरुण ᵛपुरुवीरस्य पुरुभिर्बहुभिर्वीरैरुपेतस्य । यद्वा पुरुणां बहूनां शत्रूणां विशेषेण प्रेरकस्य ᵛउरुशंसस्य उरुभिर्बहुभिः स्तूयमानस्य ᵛतव ᵛशर्मन् शर्मणि सुखे गृहे वा ᵛस्याम । ᵛअदितेः ᵛपुत्राः मित्रादयः ॥ 'परमपि छन्दसि' इति परस्य षष्ठ्यन्तस्य

---

१. क-ञ-म-स्तुताः ; ब-स्तुवन्तः ।

पूर्वामन्त्रिताङ्गवद्भावेन[1] अनुप्रवेशात् पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥ ᵛअदब्धाः शत्रुभिरहिंसिताः । एवंभूता हे ᵛदेवाः ᵛयूयं ᵛनः अस्मान् कृतापराधान् ᵛयुज्याय सख्याय ᵛअभि ᵛक्षमध्वम् अस्माभिः कृतमपराधं सहध्वम् ॥

प्र सीमादित्यो असृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥ ४ ॥

प्र । सीम् । आदित्यः । असृजत् । विऽधर्ता । ऋतम् । सिन्धवः । वरुणस्य । यन्ति ।
न । श्राम्यन्ति । न । वि । मुचन्ति । एते । वयः । न । पप्तुः । रघुऽया । परिऽज्मन् ॥४॥

ᵛविधर्ता सेतुरिव जलस्य विधारयिता ᵛआदित्यः अदितेः पुत्रो वरुणः ᵛऋतं विधारणहेतुभूतं सत्यं यद्वा नदीनामुपादानभूतमुदकं ᵛसीं सर्वतः ᵛप्र ᵛअसृजत् प्रकर्षेण सृष्टवान् ॥ 'अणोऽप्रगृह्यस्यानुनासिकः' इत्याकारः सानुनासिकः ॥ तेन ᵛवरुणस्य ऋतेन ᵛसिन्धवः स्यन्दनशीला नद्यः ᵛयन्ति गच्छन्ति । प्रवहन्ति । ᵛएते सिन्धवः ᵛन ᵛश्राम्यन्ति श्रान्ति न प्राप्नुवन्ति । ᵛन ᵛवि ᵛमुचन्ति उपरता न भवन्ति । अनलसाः सर्वदा ऐकरूप्येण प्रवहन्तीत्यर्थः । एतदेवोच्यते । ᵛवयो ᵛन । वयः पक्षिण इव ᵛरघुया रघवः[2] शीघ्रगामिनः ᵛपरिज्मन् परिज्मनि भूम्यां ᵛपप्तुः पतन्ति । गच्छन्ति ॥ 'पत्लृ गतौ' । लिट्युसि 'तनिपत्योश्छन्दसि' इति उपधालोपः । स्थानिवद्भावात् द्विर्वचनादि। रघुया इत्यत्र 'सुपां सुलुक्०' इति जसो याजादेशः ॥

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥ ५ ॥

वि । मत् । श्रथय । रशनाम्ऽइव । आगः । ऋध्याम । ते । वरुण । खाम् । ऋतस्य ।
मा । तन्तुः । छेदि । वयतः । धियम् । मे । मा । मात्रा । शारि । अपसः । पुरा । ऋतोः ॥५॥

हे ᵛवरुण ᵛमत् मत्सकाशात् ᵛरशनामिव रज्जुमिव ᵛआगः विहिताननुष्ठानजनितं[3] पापं[3] ᵛवि ᵛश्रथय शिथिलीकुरु । विमोचयेत्यर्थः । ᵛते त्वत्संबन्धिनः ᵛऋतस्य उदकस्य पूर्णां ᵛखां नदीम् । खा इति नदीनाम । ताम् ᵛऋध्याम लभेमहि। अपि च ᵛधियं कर्म ᵛवयतः संतन्वतः ᵛमे मम ᵛतन्तुः कर्मसंततिः ᵛमा ᵛछेदि छिन्नो मा भूत्। नैरन्तर्येणेत्यर्थः । तथा ᵛऋतोः समाप्तिकालात् ᵛपुरा पूर्वम् ᵛअपसः कर्मणः ᵛमात्रा शरीरं प्राच्योदीच्याङ्गलक्षणं ᵛमा ᵛशारि शीर्णं विकलं[4] मा भूत् ॥ 'शॄ हिंसायाम्' । कर्मणि लुङ् । पुर ऋतोः इत्यत्र 'ऋत्यकः' इति प्रकृतिभावः ॥ ॥ ९ ॥

---

१. ख-ग-ण-पूर्वमनाङ्°; त-पूर्वमताङ्°; थ-पूर्वाङ्° । २. व-लघवः । ३. ख-ग-ण-त-थ-म-°जनितपापम् । ४. म-शिथिलम् ।

अपो॒ सु म्य॑क्ष वरुण भि॒यसं॒ मत्सम्रा॑ळृता॒वोऽनु॑ मा गृभाय ।
दामे॑व व॒त्साद्वि मु॑मुग्ध्यंहो॒ नहि॒ त्वदा॒रे नि॒मिष॑श्च॒नेशे॑ ॥ ६ ॥

अपो॒ इति॑ । सु । म्य॒क्ष॒ । व॒रु॒ण॒ । भि॒यस॑म् । मत् । सम्ऽरा॑ट् । ऋ॒त॒ऽव॒रः । अनु॑ । मा॒ । गृ॒भा॒य॒ ।
दाम॑ऽइव । व॒त्सात् । वि । मु॒मु॒ग्धि॒ । अंहः॑ । नहि॑ । त्वत् । आ॒रे । नि॒ऽमिषः॑ । च॒न । ईशे॑ ॥६॥

हे [V]वरुण [V]भियसं भयं [V]मत् मत्तः [V]सु सुष्ठु [V]अपो [V]म्यक्ष अपगमय। हे [V]सम्राट् सम्यग्राजमान हे [V]ऋतावः सत्यवन् यज्ञवन् वा वरुण [V]मा माम् [V]अनु [V]गृभाय अनुगृहाण ॥ ' छन्दसि शायजपि ' इति श्नः शायजादेशः। ' हग्रहोर्भः० ' इति भत्वम् ॥ अपि च [V]दामेव [V]वत्सात् यथा दोग्धा वत्सकाशात् बन्धनीं रज्जुं विमुञ्चति तथा [V]अंहः पापं मत्सकाशात् [V]वि [V]मुमुग्धि विमुञ्च ॥ छान्दसः शपः श्लुः ॥ पृथक्कुरु । [V]त्वदारे त्वत्तो दूरदेशे वर्तमानस्त्वदन्य इत्यर्थः । त्वत्तोऽन्यः कश्चित् [V]निमिषश्चन निमेषस्यापि अक्षिपक्ष्मचलनस्यापि [V]नहि [V]ईशे नेष्टे। त्वमेवेश्वर इत्यर्थः ॥ ' लोपस्त आत्मनेपदेषु ' इति तलोपः ॥

मा नो॑ व॒धैर्व॑रुण ये त॑ इ॒ष्टावे॑नः कृ॒ण्वन्त॑मसुर भ्रीणन्ति ।
मा ज्योति॑षः प्रव॒सथा॑नि॑ गन्म॒ वि षू मृ॑धः शिश्रथो जी॒वसे॑ नः ॥ ७ ॥

मा । नः॒ । व॒धैः । व॒रु॒ण॒ । ये । ते॒ । इ॒ष्टौ । एनः॑ । कृ॒ण्वन्त॑म् । असु॑र । भ्रीण॑न्ति ।
मा । ज्योति॑षः । प्र॒ऽव॒सथा॑नि॑ । ग॒न्म॒ । वि । सु॒ । मृ॒धः॒ । शि॒श्र॒थः॒ । जी॒वसे॑ । नः॒ ॥ ७ ॥

हे [V]वरुण [V]नः अस्मान् [V]वधैः हननसाधनैरायुधैः [V]मा हिंसीरिति शेषः । हे [V]असुर पापकृतां निरसितः [V]ते त्वदीये [V]इष्टौ यज्ञे [V]एनः विहितानुष्ठानेन[1] जनितं पापं [V]कृण्वन्तं कुर्वन्तं पुरुषं [V]ये वधाः [V]भ्रीणन्ति हिंसन्ति तैः इति पूर्वत्र संबन्धः ॥ ' भ्रीष् हिंसायाम् '। क्र्यादिकः ॥ अपि च [V]ज्योतिषः गृहे वर्तमानादग्नेः सौरप्रकाशात् वा [V]प्रवसथानि प्रवासान् [V]मा [V]गन्म मा गच्छाम। सर्वदा गृहे वर्तमानः सूर्यं पश्यन् चिरकालं जीवेयमित्यर्थः ॥ गमेर्डुडि ' मन्त्रे घस० ' इति च्लेर्लुक् ॥ तथा [V]नः अस्माकं [V]जीवसे जीवनाय [V]मृधः हिंसकान् सुष्ठु [V]वि [V]शिश्रथः विश्लेषय । बाधस्वेत्यर्थः ॥

नम॑ः पु॒रा ते॑ वरुणो॒त नू॒नमु॒तापर॑ं तुविजात ब्रवाम ।
त्वे हि कं॒ पर्व॑ते॒ न श्रि॒तान्यप्र॑च्युतानि दूळभ व्र॒तानि॑ ॥ ८ ॥

नम॑ः । पु॒रा । ते॒ । व॒रु॒ण॒ । उ॒त । नू॒नम् । उ॒त । अ॒पर॑म् । तु॒वि॒ऽजा॒त॒ । ब्र॒वा॒म॒ ।
त्वे इति॑ । हि । क॒म् । पर्व॑ते । न । श्रि॒तानि॑ । अप्र॑ऽच्युतानि । दुः॒ऽद॒भ॒ । व्र॒तानि॑ ॥ ८ ॥

१. म-अविहितानुष्ठानेन ।

हे [V]वरुण [V]पुरा पूर्वस्मिन् काले [V]ते तुभ्यं [V]नमः नमस्कारप्रतिपादकं नम इति शब्दमवादिष्म। [V]उत अपि च [V]नूनम् अद्यापि [V]ब्रवाम। [V]उत अपि च हे [V]तुविजात बहुषु[1] प्रदेशेषु[1] प्रादुर्भूत वरुण [V]अपरम्[2] आगामिन्यपि काले नमःशब्दं ब्रवाम उच्चारयाम। कस्मादिति चेदुच्यते। [V]दृळभ दुर्दभ दम्भितुं[3] हिंसितुमशक्य ॥ 'दुरो दाशनाशध्यादभेषु०' (पा. सू. ६. ३. १०९. ५) इति रेफस्योत्वम् उत्तरपदादेः ष्टुत्वं च। [V]कम् इत्येतत् पादपूरणम्[4]॥ [V]हि यस्मात् [V]त्वे त्वयि [V]पर्वते [V]न शिलोच्चये इव [V]अप्रच्युतानि अन्यैः प्रच्यावयितुमशक्यानि [V]व्रतानि कर्माणि विधरणानि [V]श्रितानि आश्रितानि। तस्मादित्यर्थः ॥

परा ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम्।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥ ९ ॥

परा। ऋणा। सावीः। अध। मत्ऽकृतानि। मा। अहम्। राजन्। अन्यऽकृतेन। भोजम्।
अविऽउष्टाः। इत्। नु। भूयसीः। उषसः। आ। नः। जीवान्। वरुण। तासु। शाधि ॥९॥

हे [V]वरुण [V]ऋणा ऋणानि पित्रादिभिः कृतान्यस्माभिर्देयानि [V]परा [V]सावीः परा सुव। पराचीनं प्रेरय ॥ 'षू प्रेरणे'। छान्दसो लुङ् ॥ [V]अध अधुना [V]मत्कृतानि मया निष्पादितानि ऋणानि परा सुव। अपि च हे [V]राजन् स्वामिन् वरुण [V]अहम् [V]अन्यकृतेन अन्यैरर्जितेन धनेन [V]मा [V]भोजं भोगं मा लभेयम्। किं कारणमिति चेदुच्यते। [V]भूयसीः भूयस्यो बहुतराः [V]उषसः [V]अव्युष्टाः [V]इन्नु। सत्यमव्युष्टा एव। अपररात्रेरूर्ध्वं ऋणानि चिन्तयतो जाग्रतो मम व्युष्टा अप्यव्युष्टकल्पा आसन्। हे वरुण [V]तासु उषःसु [V]नः अस्मान् [V]जीवान् जीवनवतः [V]आ [V]शाधि आ समन्तात् अनुशिष्टान् कुरु। ऋणान्यपकृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥ १० ॥

यः। मे। राजन्। युज्यः। वा। सखा। वा। स्वप्ने। भयम्। भीरवे। मह्यम्। आह।
स्तेनः। वा। यः। दिप्सति। नः। वृकः। वा।
त्वम्। तस्मात्। वरुण। पाहि। अस्मान् ॥ १० ॥

हे [V]राजन् वरुण [V]मे मदीयः [V]युज्यः योजनसमर्थः पित्रादिः [V]वा [V]सखा समानख्यानोऽन्यो बान्धवः [V]वा [V]स्वप्ने दृष्टं स्वद्विषयं [V]भयं [V]भीरवे भयशीलाय [V]मह्यं [V]यः [V]आह ब्रूते। तथा [V]स्तेनः चोरः [V]वा [V]वृकः अरण्यश्वा [V]वा [V]यः [V]नः अस्मान् [V]दिप्सति जिघांसति॥ 'सनीवन्तर्ध०' इति विकल्पनादिडभावः। 'दम्भ इच्च' इति इत्वम् ॥ हे [V]वरुण [V]त्वं [V]तस्मात् सर्वस्मात् [V]अस्मान् [V]पाहि रक्ष॥

---

१. ण-त-थ–बहुप्रदेशेषु; म–प्रदेशेषु। २. ण-थ-म–अपरं कालम्। ३. ख-ग-ण-त-थ–दंभितुम्। ४. क-ङ्ग-ङ्ग१-ण-त-थ-न-म-व–पदपूरणम्।

माहं मघोनो वरुण प्रियस्य भूरिदाम्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ ११ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाम्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥११॥

हे [v]वरुण [v]प्रियस्य [v]भूरिदाम्नः भूरेर्धनस्य दातुर्धनवत आढ्यस्य पुरतः पुत्रादेर्दारिद्र्यम् [v]अहं [v]मा [v]आ [v]विदम् आवेदयानि ज्ञापयानि । हे [v]राजन् सुष्ठु नियामकाद्धनात् [v]अव[1] [v]स्थाम् अवयुत्य स्थितः[1] [v]मा भूवम् । शोभनपुत्राः[2] यज्ञे गृहे वा वर्तमानाः प्रौढं स्तोत्रमुच्चारयाम ॥ ॥ १० ॥

'धृतव्रताः' इति सप्तर्चं सप्तमं सूक्तं गार्त्समदस्य[3] कूर्मस्य गृत्समदस्य वा[3] आर्षं त्रैष्टुभं वैश्वदेवम् । तथा चानुक्रान्तं–'धृतव्रताः सप्त वैश्वदेवम्' इति । गतो विनियोगः ॥

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥ १ ॥

धृतऽव्रताः । आदित्याः । इषिराः । आरे । मत् । कर्त । रहसूःऽइव । आगः ।
शृण्वतः । वः । वरुण । मित्र । देवाः । भद्रस्य । विद्वान् । अवसे । हुवे । वः ॥१॥

हे [v]धृतव्रताः धृतकर्माणः [v]आदित्याः अदितेः पुत्राः [v]इषिराः गमनशीलाः सर्वैरभ्येषणीयाः प्रार्थनीया वा हे विश्वे देवाः [v]मत् [v]आरे मत्तो दूरदेशे [v]आगः विहिताननुष्ठानादिजनितं पापं [v]कर्त कुरुत ॥ करोतेश्छान्दसो विकरणस्य लुक् । 'तप्तनप्तनथनाश्च' इति तबादेशः ॥ तत्र दृष्टान्तः । [v]रहसूरिव । रहस्यन्यैरज्ञाते प्रदेशे सूयत इति रहसूर्व्यभिचारिणी । सा यथा गर्भं पातयित्वा दूरदेशे परित्यजति तद्वत् । हे [v]वरुण [v]मित्र [v]देवाः [v]वः युष्मदीयस्य [v]भद्रस्य युष्माभिः करणीयं श्रेयः [v]विद्वान् जानन्नहं [v]शृण्वतः मत्कृतानि स्तोत्राणि श्रोत्रेण जानतः [v]वः युष्मान् [v]अवसे रक्षणार्थं [v]हुवे आह्वयामि ॥

यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषाँसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥ २ ॥

यूयम् । देवाः । प्रऽमतिः । यूयम् । ओजः । यूयम् । द्वेषाँसि । सनुतः । युयोत ।
अभिऽक्षत्तारः । अभि । च । क्षमध्वम् । अद्य । च । नः । मृळयत । अपरम् । च ॥२॥

१. क-ख-ग-च-ज-ञ-झ १-ण-ण १-त-थ-म–'अव स्थाम् अवयुत्य स्थितः' नास्ति । २. व–सुवीराः शोभनपुत्राः । ३. म–गृत्समदस्य ।

हे [v]देवाः [v]प्रमतिः प्रकृष्टा मतिर्यस्य पित्रादेस्तादृशा अपि [v]यूयम् एव । तथा [v]ओजः बलमपि [v]यूयम् एव । अपि च [v]यूयं [v]द्वेषांसि द्वेष्टॄणि रक्षःपिशाचादीनि । [v]सनुतः इत्यव्ययम् । अन्तर्हितनामैतत् । अन्तर्हिते प्रदेशे [v]युयोत पृथक्कुरुत ॥ 'यु मिश्रणामिश्रणयोः' । छान्दसः शपः श्लुः । पूर्ववत् तस्य तबादेशः ॥ [v]अभिक्षत्तारः अभितः शत्रूणां हिंसितारः यूयम् [v]अभि [v]च [v]क्षमध्वम् अभिभवत च शत्रून् । [v]अद्य अस्मिन् दिने [v]नः अस्मान् [v]मृळयत सुखयत । [v]अपरं [v]च अपरमपि कालम् आगामिन्यपि काले अस्मान् मृळयत ॥

किमु नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥ ३ ॥

किम् । ऊँ इति । नु । वः । कृणवाम । अपरेण । किम् । सनेन । वसवः । आप्येन ।
यूयम् । नः । मित्रावरुणा । अदिते । च । स्वस्तिम् । इन्द्रामरुतः । दधात ॥ ३ ॥

हे देवाः [v]वः युष्माकं [v]नु अद्येदानीं [v]किमु [v]कृणवाम किं खलु कर्तुं शक्नवाम । न किमपीत्यर्थः । तथा [v]अपरेण अपरकालभाविना कर्मणा [v]किं कर्तुं शक्ताः । तथा हे [v]वसवः वासयितारो देवाः [v]सनेन सनातनेन [v]आप्येन आप्तव्येन कर्मणा युष्माकं किं कर्तुं शक्ताः । सर्वदापि युष्मदनुगुणं परिचरणं कर्तुं न शक्ता इत्यर्थः । हे मित्रावरुणौ हे [v]अदिते हे [v]इन्द्रामरुतः ॥ 'देवताद्वन्द्वे च' इति पूर्वपदस्यानङ् ॥ ते च सर्वे [v]यूयं [v]स्वस्तिम् अविनाशं [v]नः अस्मभ्यं [v]दधात धत्त प्रयच्छत ॥ लोटि तस्य तबादेशे ङित्त्वाभावेन अतोलोपाभावः ॥

हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥ ४ ॥

हये । देवाः । यूयम् । इत् । आपयः । स्थ । ते । मृळत । नाधमानाय । मह्यम् ।
मा । वः । रथः । मध्यमऽवाट् । ऋते । भुत् । मा । युष्मावत्ऽसु । आपिषु । श्रमिष्म ॥४॥

[v]हये [v]देवाः ॥ छान्दसो वर्णोपजनः ॥ हे देवाः [v]यूयमित् यूयमेव [v]आपयः धनस्य प्रापयितारो बन्धवः [v]स्थ भवथ । [v]ते यूयं [v]नाधमानाय अभिमतं फलं याचमानाय [v]मह्यं स्तोत्रे [v]मृळत सुखयत । तथा [v]वः युष्माकं [v]रथः [v]ऋते अस्मदीये यज्ञे निमित्तभूते [v]मध्यमवाट् [v]मा [v]भूत् मध्यमेन मन्दगमनेन वाहको मा भूत् । शीघ्रं युष्मान् वहत्वित्यर्थः । वयं [v]युष्मावत्सु युष्मत्सदृशेषु [v]आपिषु बन्धुषु सत्सु [v]मा [v]श्रमिष्म श्रान्ता मा भूम ॥ 'वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्' इति वतुप् । 'आ सर्वनाम्नः' इत्याखम् ॥

प्र व एकों मिमय भूर्यागो यन्मा पितेवं कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥ ५ ॥

प्र । वः । एकः । मिमय । भूरि । आगः । यत् । मा । पिताऽइव । कितवम् । शशास ।
आरे । पाशाः । आरे । अघानि । देवाः । मा । मा । अधि । पुत्रे । विम्ऽइव । ग्रभीष्ट ॥५॥

हे देवाः ᵛवः युष्माकं मध्ये अहम् ᵛएकः सन् ᵛभूरि बहुलम् ᵛआगः पापं ᵛप्र ᵛमिमय अहं प्रकर्षेण अहिंसिषम् । कथमस्माकं मध्ये त्वमेवेति चेदुच्यते । ᵛयत् यस्मात् मां ᵛपितेव ᵛकितवं यथा अपथप्रवृत्तं पुत्रं पिता अनुशास्ति तथा ᵛशशास अनुशिष्टं चकृद्वे ॥ ' शासु अनुशिष्टौ ' इत्यस्माल्लिटि मध्यमस्य रूपम् ॥ अपि च हे ᵛदेवाः युष्मदीयाः ᵛपाशाः ᵛआरे अस्मत्तो दूरदेशे सन्तु । ᵛअघानि पापानि च ᵛआरे सन्तु । ᵛमा ᵛमाधि ᵛपुत्रे ॥ अधिः सप्तम्यर्थानुवादी ॥ पुत्रे पश्यति सति पितरं सन्तं ᵛविमिव पक्षिणमिव व्याधः मा ग्रभीष्ट मा गृह्णीध्वम् ॥ माङि लुङि ' ह्यग्रहोर्भः ' इति भत्वम् ॥

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ६ ॥

अर्वाञ्चः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयम् ।
त्राध्वम् । नः । देवाः । निऽजुरः । वृकस्य । त्राध्वम् । कर्तात् । अवऽपदः । यजत्राः ॥६॥

हे ᵛयजत्राः यष्टव्या देवाः ᵛअद्य इदानीम् ᵛअर्वाञ्चः अस्मदभिमुखाः ᵛभवत । ᵛवः युष्माकं ᵛहार्दि हृत्यवस्थितं रक्षणं ᵛभयमानः बिभ्यदहम् ᵛआ ᵛव्ययेयम् आभिमुख्येन प्राप्नुयाम् ॥ ' व्यय गतौ ' । भौवादिकः ॥ हे ᵛदेवाः ᵛवृकस्य तस्करस्य अरण्यशुनो वा संबन्धिनः ᵛनिजुरः निहननात् ॥ जूरी हिंसार्थः । अस्मात्संपदादिलक्षणो भावे क्विप् । छान्दसो ह्रस्वः ॥ ᵛनः अस्मान् ᵛत्राध्वं त्रायध्वम् । तथा[1] हे ᵛयजत्राः ᵛअवपदः आपदः ᵛकर्तात् कर्तुः सकाशात् ᵛत्राध्वं त्रायध्वम्[1] ॥

माहं मघोनो वरुण प्रियस्य भूरिदात्र आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादवं स्थां बृहद्वदेम विदथे सुवीराः ॥ ७ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदात्रः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥७॥

व्याख्यातेयम् ॥ ॥ ११ ॥

१. क-ण-त-थ-न-म-व–' तथा... त्रायध्वम् ' नास्ति ।

'ऋतं देवाय' इत्येकादशर्चमष्टमं सूक्तं गार्त्समदम्। अन्त्या जगती शिष्टास्त्रिष्टुभः। 'प्र हि क्रतुम्' इत्येषा इन्द्रासोमदेवताका। 'सरस्वति त्वमस्मान्' इत्यर्धर्चः सारस्वतः। 'यो नः सनुत्यः' इत्येषा बार्हस्पत्या। अन्त्या मारुती। शिष्टा ऐन्द्र्यः। तथा चानुक्रान्तम्—'ऋतमेकादश जगत्यन्तं षष्ठ्यैन्द्रासोमी सरस्वति त्वमिति सारस्वतोऽर्धर्चो यो नो बृहस्पतिस्तं[1] वोऽन्त्या[1] मारुती' इति। गतो विनियोगः॥

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम्॥ १॥

ऋतम्। देवाय। कृण्वते। सवित्रे। इन्द्राय। अहिऽघ्ने। न। रमन्ते। आपः।
अहःऽअहः। याति। अक्तुः। अपाम्। कियति। आ। प्रथमः। सर्गः। आसाम्॥१॥

ऋतम् उदकं वृष्टिलक्षणं कृण्वते कुर्वते देवाय द्योतमानाय सवित्रे सर्वस्य प्रेरकाय अहिघ्ने अहिं वृत्रं हतवते इन्द्राय यागार्थम् आपः न रमन्ते। तस्माद्वेतोर्भीत्या नोपरता भवन्ति॥ तस्मात् व्यत्ययेन चतुर्थी॥ अपि तु तासाम् अपाम् अक्तुः सेचकं स्रोतः अहरहः प्रत्यहं याति गच्छति। आसां प्रथमः सर्गः प्राथमिकं जन्म कियात्या कियति काले निष्पन्नम्। आकारः प्रश्ने। किंशब्दः आक्षेपे। यावति काले ता अजायन्त स कालः कियान्। किं परिमाणं तस्य कालस्य। न किमपि। नित्या एव हि ता इत्यर्थः॥

यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुषे उवाच।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम्॥ २॥

यः। वृत्राय। सिनम्। अत्र। अभरिष्यत्। प्र। तम्। जनित्री। विदुषे। उवाच।
पथः। रदन्तीः। अनु। जोषम्। अस्मै। दिवेऽदिवे। धुनयः। यन्ति। अर्थम्॥२॥

यः पुरुषः वृत्राय असुराय सिनम् अन्नम् अत्र पाकस्थाने आहर्तुम् अभरिष्यत् संपादितवान् तं पुरुषं जनित्री जनयित्री इन्द्रस्य माता अदितिः विदुषे अभिज्ञायेन्द्राय प्र उवाच प्रोक्तवती। प्रवचनस्य हननार्थत्वात् तं वृत्रं हतवानिति शेषः। अपि च अस्मै अस्येन्द्रस्य अनु जोषम् अनुकामम्। इच्छामनुसृत्य पथः मार्गान् रदन्तीः विलिखन्त्यः धुनयः नद्यः दिवेदिवे प्रतिदिवसम् अर्थम् अर्तव्यं गन्तव्यं समुद्रं प्रति यन्ति गच्छन्ति॥

ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः॥ ३॥

ऊर्ध्वः। हि। अस्थात्। अधि। अन्तरिक्षे। अध। वृत्राय। प्र। वधम्। जभार।
मिहम्। वसानः। उप। हि। ईम्। अदुद्रोत्। तिग्मऽआयुधः। अजयत्। शत्रुम्। इन्द्रः॥३॥

१. च–बार्हस्पत्या तं वो।

vहि हेतौ । यस्मादयं वृत्रः vअन्तरिक्षे vऊर्ध्वः सन् सर्वमावृत्य vअधि vअस्थात् अधिष्ठितोऽभूत् । vअध अतः कारणात् vवृत्राय वृत्रं प्रति vवधं हननसाधनं वज्रमिन्द्रः vप्र vजभार प्रचिक्षेप ॥ ' हृग्रहोर्भः० ' ॥ सः vहि खलु[1] वृत्रः vमिहं वृष्टेः सेक्तारं मेघं vवसानः आच्छादयन् vईम् एनमिन्द्रम् vउप vअदुद्रोत् उपागमत् ॥ ' दु द्रु गतौ ' । लङि छान्दसः शपः श्लुः ॥ vतिग्मायुधः तीक्ष्णायुधः vइन्द्रः vशत्रुं शातयितारं तं वृत्रम् vअजयत् जितवान् ॥

बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥ ४ ॥

बृहस्पते । तपुषा । अश्नाऽइव । विध्य । वृकऽद्वरसः । असुरस्य । वीरान् ।
यथा । जघन्थ । धृषता । पुरा । चित् । एव । जहि । शत्रुम् । अस्माकम् । इन्द्र ॥४॥

हे vबृहस्पते बृहतां परिवृढानां पालयितरिन्द्र vतपुषा तापकेन दीप्तेन वज्रेण vअश्नेव अशन्येव vवृकद्वरसः संवृतद्वारस्य vअसुरस्य vवीरान् पुत्रान् । यद्वा संवृतद्वारानसुरस्य वीरान् vविध्य ताडय ॥ वृणोतेः ' सृवृभूशुषिमुषिभ्यः किन् ' इति कर्मणि कन्प्रत्ययः । ' द्रु गतौ ' । अस्मादौणादिकः असन्प्रत्ययः । वृकाणि संवृतानि द्वरांसि द्वाराणि येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ हे vइन्द्र vपुरा vचित् पुरापि vधृषता धर्षकेण वज्रेण vयथा vजघन्थ त्वं हतवान् vएव एवमेव vअस्माकं vशत्रुं vजहि नाशय ॥ ' हन्तेर्जः ' इति हौ जादेशः ॥

अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वीः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम् ॥ ५ ॥

अव । क्षिप । दिवः । अश्मानम् । उच्चा । येन । शत्रुम् । मन्दसानः । निऽजूर्वीः ।
तोकस्य । सातौ । तनयस्य । भूरेः । अस्मान् । अर्धम् । कृणुतात् । इन्द्र । गोनाम् ॥५॥

हे इन्द्र vदिवः नभसः सकाशात् vअश्मानम् अश्मवत्कठिनं वज्रम् vउच्चा उच्चैर्वर्तमानस्त्वम् vअव vक्षिप अस्मदीयान् शत्रूनुद्दिश्य अवस्तात् प्रक्षिप[2] । vयेन वज्रेण vमन्दसानः स्तोतृभिः स्तूयमानः सन् vशत्रुं vनिजूर्वीः न्यर्हिंसीः ॥ जुर्वी हिंसार्थः । लेट्याडागमः[3] ॥ तथा vतोकस्य पुत्रस्य[4] vभूरेः भर्तव्यस्य vतनयस्य पौत्रस्य vसातौ संभजने ॥ निमित्ते सप्तम्येषा ॥ संभजनार्थम् । तथा हे vइन्द्र vगोनां गवां संभजनार्थं च vअस्मान् अस्माकम् ॥ विभक्तिव्यत्ययः ॥ vअर्धं समृद्धिं vकृणुतात् कुरु ॥ ' गोः पादान्ते ' इति गोशब्दस्यामो नुडागमः ॥ ॥ १२ ॥

---

१. क-ङ्ग-ज्ञ१-ण१-न-म-व-स खलु । २. ग-च-क्षिप । ३. च-ज्ञ१-ण१-लेट्यडागमः । ४. ख-ग-च-ज्ञ१-ण-ण१-थ-न-' पुत्रस्य ' नास्ति ।

प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकम् ॥ ६ ॥

प्र । हि । क्रतुम् । वृहथः । यम् । वनुथः । रध्रस्य । स्थः । यजमानस्य । चोदौ ।
इन्द्रासोमा । युवम् । अस्मान् । अविष्टम् ।
अस्मिन् । भयऽस्थे । कृणुतम् । ऊँ इति । लोकम् ॥ ६ ॥

हे इन्द्रासोमौ ᵛयं वैरिणं ᵛवनुथः हिंसथः । ' वनुष्यतिर्हन्तिकर्मा[1] ' इति यास्कः । तं ᵛक्रतुं द्वेषस्य कर्तारं ᵛप्र ᵛहि ᵛवृहथः प्रकर्षेणोद्यच्छथः ग्वलु । उन्मूलयथ इत्यर्थः ॥ ' वृहू उद्यमने ' । तौदादिकः ॥ तथा ᵛरध्रस्य राधकस्य ᵛयजमानस्य ᵛचोदौ शत्रूणां प्रेरकौ ᵛस्थः भवथः । तथा हे इन्द्रासोमौ ᵛयुवं युवाम् ᵛअस्मान् ᵛअविष्टम् अवतम् । ᵛअस्मिन् ᵛभयस्थे भयस्थाने युद्धे ॥ ' घञर्थे कविधानम् ' इति अधिकरणे कप्रत्ययः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥ तस्मिन् युद्धे ᵛलोकं भयरहितं स्थानं ᵛकृणुतं कुरुतम् । ᵛउ इति पूरणः[2] ॥

न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥ ७ ॥

न । मा । तमत् । न । श्रमत् । न । उत । तन्द्रत् । न । वोचाम । मा । सुनोत । इति । सोमम् ।
यः । मे । पृणात् । यः । ददत् । यः । निऽबोधात् ।
यः । मा । सुन्वन्तम् । उप । गोभिः । आ । अयत् ॥ ७ ॥

स इन्द्रो मां ᵛन ᵛतमत् न तमयतु न ग्लपयतु । तथा ᵛन ᵛश्रमत् श्रान्तं मा करोतु ॥ ' तमु ग्लानौ[3] ', ' श्रमु तपसि खेदे च ' । अनयोर्हेतुमण्ण्यन्तयोर्लेट्यडागमः । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः ॥ ᵛउत अपि च मां ᵛन ᵛतन्द्रत् न तन्द्रयेत् । तन्द्रया आलस्येन युक्तं मा करोतु ॥ तन्द्रीशब्दात् ' तत्करोति ' इति णिच् । ' णाविष्ठवत्प्रातिपदिकस्य ' इति टिलोपः । अन्यत् पूर्ववत् ॥ इन्द्रयागाय ᵛसोमं ᵛमा ᵛसुनोत माभिषुणुत ᵛइति अन्यान् यजमानान् प्रति ᵛन ᵛवोचाम न ब्रवाम ॥ वक्तेश्छान्दसो लुङ् । सुनोतेत्यत्र ' तप्तनप्तनथनाश्च ' इति तस्य तबादेशः । तस्य पित्त्वेन ङित्त्वाभावाद्गुणः ॥ ᵛयः इन्द्रः ᵛमे मम ᵛपृणात् कामान् पूरयेत् ᵛयः च ᵛददत् अभीष्टं फलं दद्यात् ᵛयः च ᵛनिबोधात् अस्मदीयं स्तोत्रं यागं वा अवगच्छेत् ᵛयः इन्द्रः ᵛसुन्वन्तं सोममभिषुण्वन्तं मामस्मभ्यं दातव्यैः ᵛगोभिः सह ᵛउप ᵛआयत् उपागच्छेत् । स इन्द्रः इति पूर्वत्रान्वयः ॥ पृणादित्यादिषु लेट्यडागमः[5] ॥

१. क-ञ-ञ१-म–वनुष्यतिर्हिंसाकर्मा । २. त-थ–पदपूरणः । ३. क-ञ-ञ१-थ-म–ग्लाने; ण-त-न-व–ग्लामे । ४. ख-ग-ञ-ण-थ-म–उपघात् । ५. ग-च-ञ१-ण१-न–लेट्यडागमः ।

सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥ ८ ॥

सरस्वति । त्वम् । अस्मान् । अविड्ढि । मरुत्वती । धृषती । जेषि । शत्रून् ।
त्यम् । चित् । शर्धन्तम् । तविषीऽयमाणम् । इन्द्रः । हन्ति । वृषभम् । शण्डिकानाम् ॥८॥

हे [v]सरस्वति सरणवति देवि [v]त्वमस्मान् स्तोतॄन् [v]अविड्ढि रक्ष ॥ रक्षार्थस्यावतेर्लेटि एतद्रूपम् ॥ तथा [v]मरुत्वती मरुद्भिर्युक्ता । मध्यमस्थाना हि वाक् सरस्वती मरुतश्च मध्यमस्थानस्थाः । अतस्तद्वती सती [v]धृषती धर्षयन्ती [v]शत्रून् शातयितॄन् वैरिणः [v]जेषि जय ॥ जयतेश्छान्दसः शपः श्लुः ॥ किंच अयम् [v]इन्द्रः [v]त्यं [v]चित् तमप्यसुरं [v]हन्ति हतवान् ॥ व्यत्ययेन भूतार्थे लट् ॥ कीदृशम् । [v]शर्धन्तं प्रसहनशीलम् ॥ ' शृधु प्रसहने ' ॥ [v]तविषीयमाणम् । तविषी बलमिवाचरन्तं सर्वस्य भञ्जने शक्तम् । [v]शण्डिकानाम् । ' शण्डामर्कावसुरपुरोहितौ ' (तै. सं. ६. ४. १०. १) । शण्डवंश्यानां मध्ये [v]वृषभं प्रधानम् ॥

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥ ९ ॥

यः । नः । सनुत्यः । उत । वा । जिघत्नुः । अभिऽख्याय । तम् । तिगितेन । विध्य ।
बृहस्पते । आयुधैः । जेषि । शत्रून् । द्रुहे । रिषन्तम् । परि । धेहि । राजन् ॥ ९ ॥

हे बृहस्पते [v]यो [v]नः अस्माकं [v]सनुत्यः । सनुतरित्यन्तर्हितनाम । अन्तर्हिते देशे भवश्चोरः ॥ ' सगर्भसयूथसनुताद्यत् ' ॥ [v]उत [v]वा अपि वा यः [v]जिघत्नुः जिघांसुर्भवति । [v]तम् [v]अभिख्याय संवीक्ष्य [v]तिगितेन तीक्ष्णेनायुधेन [v]विध्य ताडय । तथा अस्मदीयान् [v]शत्रून् [v]आयुधैः आयोधनसाधनैः इष्वादिभिः [v]जेषि जय । तथा हे [v]राजन् राजमान [v]बृहस्पते [v]द्रुहे द्रोग्धे शत्रवे [v]रिषन्तं हिंसन्तं वज्रं [v]परि [v]धेहि परितो धारय प्रक्षिपेत्यर्थः ॥

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भर नो वसूनि ॥ १० ॥

अस्माकेभिः । सत्वऽभिः । शूर । शूरैः । वीर्या । कृधि । यानि । ते । कर्त्वानि ।
ज्योक् । अभूवन् । अनुऽधूपितासः । हत्वी । तेषाम् । आ । भर । नः । वसूनि ॥१०॥

हे [v]शूर शौर्यवन्निन्द्र [v]अस्माकेभिः आस्माकीनैः [v]सत्वभिः परेषां सादकैः [v]शूरैः शौर्योपेतैर्भटैः तानि [v]वीर्या वीर्याणि[1] वीरकर्माणि [v]कृधि कुरु [v]यानि [v]ते त्वया [v]कर्त्वानि करणीयानि ॥ ' कृत्यार्थे

१. ण१–' वीर्याणि ' नास्ति ।

तवैकेन्०' इति करोतेस्त्वन्प्रत्ययः ॥ ᵛज्योक् चिरकालम् ᵛअनुधूपितासः धूपायमानहृदया मदीयाः शत्रवः ᵛअभूवन् आसन् । ᵛहत्वी तान् हत्वा ॥ ' स्नात्व्यादयश्च ' इतीकारः ॥ ᵛतेषां शत्रूणां ᵛवसूनि धनानि ᵛनः अस्मभ्यम् ᵛआ ᵛभर आहर ॥

तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥ ११ ॥

तम् । वः । शर्धम् । मारुतम् । सुम्नऽयुः । गिरा । उप । ब्रुवे । नमसा । दैव्यम् । जनम् । यथा । रयिम् । सर्वऽवीरम् । नशामहै । अपत्यऽसाचम् । श्रुत्यम् । दिवेऽदिवे ॥ ११ ॥

हे मरुतः ᵛवः युष्माकं ᵛशर्धं बलं ᵛमारुतं मरुत्समूहरूपं ᵛदैव्यं देवेनेन्द्रेण संबद्धं ᵛजनं प्रादुर्भूतम् एवंगुणविशिष्टं बलं ᵛनमसा नमस्कारेण हविषा वा ᵛगिरा स्तोत्रेण ᵛउप ᵛब्रुवे स्तौमि । ᵛयथा येन प्रकारेण वयं ᵛसर्ववीरं सर्ववीरैः विशेषेण शत्रूणां प्रेरकैर्भटैरुपेतम् ᵛअपत्यसाचम् अपत्यैः अपननहेतुभूतैः पुत्रादिभिरुपेतं ᵛश्रुत्यं श्रवणीयं प्रशस्यभूतं ᵛरयिं ᵛदिवेदिवे प्रतिदिवसं ᵛनशामहै व्याप्नवाम ॥ नशतिर्व्याप्तिकर्मा । लेड्याडागमः[1] । ' वैतोऽन्यत्र ' इत्यैकारः ॥ ॥ १३ ॥

' अस्माकम् ' इति सप्तर्चं नवमं सूक्तं गृत्समदस्यार्षं वैश्वदेवम् । अन्त्या त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रान्तम्—' अस्माकं सप्त वैश्वदेवं त्रिष्टुबन्तम् ' इति । विनियोगो लैङ्गिकः ॥

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥ १ ॥

अस्माकम् । मित्रावरुणा । अवतम् । रथम् । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा । प्र । यत् । वयः । न । पप्तन् । वस्मनः । परि । श्रवस्यवः । हृषीवन्तः । वनऽसदः ॥ १ ॥

ᵛमित्रावरुणा हे मित्रावरुणौ ᵛआदित्यैः धात्र्यर्यमादिभिर्द्वादशभिः ᵛरुद्रैः एकादशसंख्याकैः ᵛवसुभिः धरो[2] ध्रुवः[2] इत्यादिभिरष्टसंख्याकैः एवं त्रिभिर्दैवगणैः ᵛसचाभुवा सह भवन्तौ सह वर्तमानौ युवाम् ᵛअस्माकं ᵛरथम् अन्नलाभाय प्रवृत्तम् ᵛअवतम् । ᵛयत् यदा अस्मदीया रथाः ᵛवस्मनस्परि । वसन्त्यस्मिन्निति वस्म निवासस्थानम् । औणादिको मनिन् ॥ तस्मात् स्थानात् परि उपरि देशान्तरे ॥ ' पञ्चम्याः परावध्यर्थे ' इति सत्वम् । अध्यर्थ उपर्यर्थ इति वृत्तिः । ᵛवयो ᵛन पक्षिण इव ᵛप्र ᵛपप्तन् प्रपतन्ति प्रकर्षेण गच्छन्ति ॥ पतेश्छान्दसे लुङि लृदित्त्वात् च्लेरङादेशः । ' पतः पुम् ' इति पुमागमः ॥ कीदृशा वयः । ᵛश्रवस्यवः अन्नकामाः । ᵛहृषीवन्तः प्राप्तहर्षाः । ᵛवनर्षदः वने वृक्षादौ निषण्णाः ॥ सांहितिकश्छान्दसो रेफोपजनः ॥

१. ख-ग-च-ण१–लेड्यडागमः । २. त-थ–वरो ध्रुवः ।

अधं स्मा नु उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥ २ ॥

अधं । स्म । नः । उत् । अवत । सऽजोषसः । रथम् । देवासः । अभि । विक्षु । वाजऽयुम् ।
यत् । आशवः । पद्याभिः । तित्रतः । रजः । पृथिव्याः । सानौ । जङ्घनन्त । पाणिऽभिः ॥२॥

हे [v]सजोषसः समानं प्रीयमाणाः [v]देवासः देवाः [v]अध अधुना [v]नः अस्माकं [v]वाजयुं वाजमन्नं कामयमानं गतिविशेषयुक्तं वा [v]रथं [v]विक्षु प्रजासु जनपदेषु[1] [v]अभि[2] अभिमुखम् [v]उदवत उदगमयत । अवतिरत्र गत्यर्थः । [v]यत् यदा अस्मिन् रथे युक्ताः [v]आशवः व्यापनशीला अश्वाः [v]पद्याभिः पादसाध्याभिर्गतिभिः [v]रजः रञ्जकं मार्गं [v]तित्रतः तरन्तः ॥ तरतेः शतरि 'बहुलं छन्दसि' इति शपः श्लुः । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ [v]पृथिव्याः प्रथिताया भूमेः [v]सानौ समुच्छ्रिते प्रदेशे [v]पाणिभिः पाण्युपलक्षितैः पादैः [v]जङ्घनन्त अत्यर्थं गच्छन्ति ॥ हन्तेर्यङ्लुगन्तात् छान्दसो लङ् । व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इति शपो लुगभावः ॥

उत स्य नु इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥ ३ ॥

उत । स्यः । नः । इन्द्रः । विश्वऽचर्षणिः । दिवः । शर्धेन । मारुतेन । सुऽक्रतुः ।
अनु । नु । स्थाति । अवृकाभिः । ऊतिऽभिः । रथम् । महे । सनये । वाजऽसातये ॥ ३ ॥

[v]उत अपि च [v]विश्वचर्षणिः विश्वस्य सर्वस्य द्रष्टा यद्वा विश्वे चर्षणयः मनुष्याः यस्य परिचारकाः । अथवा विश्वे सर्वे लोकाश्चर्षणयो द्रष्टव्या येन ॥ 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् ॥ [v]मारुतेन मरुत्समूहरूपेण [v]शर्धेन बलेन सह [v]सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा [v]स्यः सः [v]इन्द्रः [v]अवृकाभिः हिंसकरहिताभिः [v]ऊतिभिः रक्षाभिः सहितः सन् [v]दिवः द्युलोकात् आगत्य [v]नु अद्य [v]नः अस्माकं [v]रथम् [v]अनु [v]स्थाति आनुगुण्येनाधितिष्ठतु ॥ छान्दसः शपो लुक् ॥ किमर्थम् । [v]महे [v]सनये महते धनाय । तथा [v]वाजसातये वाजस्यान्नस्य सातये संभजनार्थम् ॥

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥ ४ ॥

उत । स्यः । देवः । भुवनस्य । सक्षणिः । त्वष्टा । ग्नाभिः । सऽजोषाः । जूजुवत् । रथम् ।
इळा । भगः । बृहत्ऽदिवा । उत । रोदसी इति ।
पूषा । पुरम्ऽधिः । अश्विनौ । अध । पती इति ॥ ४ ॥

१. म–जनेषु । २. ण१–' अभि ' नास्ति ।

[V]उत अपि च [V]स्यः सः [V]देवः दानादिगुणयुक्तः [V]भुवनस्य भूतजातस्य [V]सक्षणिः सचनीयः सेव्यः [V]म्नाभिः देवपत्नीभिः । 'छन्दांसि वै म्नाः' इति तैत्तिरीयकम् । गायत्र्यादीनि छन्दांसि च देवपत्न्यः इत्युक्तम् । [V]सजोषाः समानप्रीतिः । एवंगुणविशिष्टः [V]त्वष्टा अस्मदीयं [V]रथं [V]जुजुवत् प्रेरयतु ॥ जु इति सौत्रो धातुर्गत्यर्थः । अस्माण्ण्यन्तात् लुङि चङि[1] रूपम् ॥ तथा [V]इळा तिसृणां देवीनाम् आद्या[2] इडाख्या देवी च रथं प्रेरयतु । [V]बृहद्दिवा । बृहन्महद्दीव्यति द्योतते इति बृहद्दिवः ॥ इगुपधलक्षणः कः । 'सुपां सुलुक्०' इति विभक्तेराकारः ॥ तादृशः [V]भगः च प्रेरयतु । [V]उत अपि च [V]रोदसी द्यावापृथिव्यौ [V]पुरंधिः बहुधीः [V]पूषा पोषको देवश्च ॥ अधशब्दश्चार्थे ॥ [V]पती सूर्यायाः भर्तारौ [V]अश्विनौ च एते सर्वेऽस्मदीयं रथं प्रेरयन्त्वित्यर्थः ॥

उत त्ये देवी सुभगे मिथूदृशोपासानक्ता जगतामपीजुवा ।
स्तुपे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥ ५ ॥

उत । त्ये इति । देवी इति । सुभगे इति सुऽभगे । मिथुऽदृशा । उपसानक्ता । जगताम् । अपिऽजुवा । स्तुपे । यत् । वाम् । पृथिवि । नव्यसा । वचः । स्थातुः । च । वयः । त्रिऽवयाः । उपऽस्तिरे ॥५॥

[V]उत अपि च [V]त्ये ते प्रसिद्धे [V]देवी देव्यौ देवनशीले [V]सुभगे शोभनधने [V]मिथूदृशा मिथः परस्परं पश्यन्त्यौ एवंभूते [V]उपासानक्ता उषाश्च रात्रिश्च [V]जगतां जङ्गमानाम् [V]अपीजुवा[3] प्रेरयित्र्यौ भवतः । तस्मादस्मदीयमपि रथं प्रेरयताम् । उत्तरोऽर्धो द्यावापृथिव्योः प्रत्यक्षकृतः । हे [V]पृथिवि [V]वां युवां त्वां दिवं च [V]नव्यसा नवीयसा नवतरेण प्रशस्येन [V]वचः वचसा ॥ 'सुपां सुलुक्०' इति तृतीयाया लुक् ॥ [V]यत् यदा [V]स्तुपे स्तुवे ॥ उत्तमस्य व्यत्ययेन मध्यमः ॥ तदानीं [V]स्थातुः स्थावरस्य[4] व्रीह्यादेः संबन्धि [V]वयः अन्नं चरुपुरोडाशादिलक्षणं [V]त्रिवयाः । वय इत्यन्ननाम । ओषधिपशुसोमात्मकानि[5] हविर्लक्षणान्यन्नानि यस्य तादृशोऽहम् [V]उपस्तिरे उपस्तृणे । आज्येनोपस्तरणाभिघारणपूर्वकं प्रयच्छामीत्यर्थः ॥ 'स्तृञ्[6] आच्छादने' । लटस्तुत्तमे छान्दसो विकरणस्य लुक् । अत्रापश्यश्चशब्दः चणिति निपातान्तरं पादपूरणम्[7] । 'ऋत इद्धातोः' इतीत्वम् । 'निपातैर्यद्यदिहन्त०' इति निघातप्रतिषेधः ॥

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥ ६ ॥

उत । वः । शंसम् । उशिजाम्ऽइव । श्मसि । अहिः । बुध्न्यः । अजः । एकऽपात् । उत ।
त्रितः । ऋभुक्षाः । सविता । चनः । दधे । अपाम् । नपात् । आशुऽहेमा । धिया । शमि ॥६॥

[V]उत अपि च हे देवाः [V]उशिजामिव । इवेति संप्रत्यर्थीयः । अरमत्तः स्तुतिं कामयमानानां [V]वः युष्माकं [V]शंसं स्तुतिं संप्रति [V]श्मसि उश्मसि कामयामहे ॥ 'वश कान्तौ' । इदन्तो मसिः[8] ।

१. ण-थ-व-'चङि' नास्ति । २. ण-थ-साद्या; म-सद्यो । ३. ख-ग-ङ१-ण१-व-अपिजुवा । ४. म-स्थावरस्य चरस्य । ५. ख-ग-ण-ओषधयश्च । ६. ख-ग-ङ१-ण-ण१-व-स्तृङ् । ७. ख-ग-ण१-पूरणम्; थ-व-पदपूरणम् । ८. ख-ग-ङ१-ण१- मसि ।

ग्रहिज्यादिना संप्रसारणम् । छान्दसो वर्णलोपः ॥ [v]उत अपि च [v]अहिर्बुध्न्यः । बुध्नमन्तरिक्षम् । तत्र भवः अहिनामा देवः । [v]अजः [v]एकपात् । न जायते इत्यजः । एक एव पद्यते गच्छतीत्येकपात् । अज एकपात्संज्ञकः सूर्यः । [v]त्रितः तीर्णतमः[1] [v]ऋभुक्षाः उरुक्षयः उरुनिवासः ऋभूणां निवासयिता वा इन्द्रश्च [v]सविता सर्वस्य प्रसविता [v]चनः अन्नं [v]दधे विदधातु । अस्मभ्यं करोतु । तथा [v]आशुहेमा शीघ्रगामी ॥ ' हि गतौ ' इत्यस्मात् ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् ॥ तादृशः [v]अपां [v]नपात् अपां पौत्रीयस्थानीयोऽग्निः । अद्भ्य ओषधिवनस्पतयो जायन्ते ओषधिवनस्पतिभ्यश्चायमग्निर्जायते इत्यग्नेरपां पौत्रत्वम् । स च [v]धिया स्तुत्या [v]शमि । शमीति कर्मनाम । यज्ञकर्मणि प्रीतो भवत्विति शेषः । यद्वा धिया कर्मणा अस्मदीयेन परिचरणलक्षणेन शमि शं सुखं तन्निमित्तं भवत्विति शेषः ॥

एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः ससिर्न रथ्यो अहं धीतिमश्याः ॥ ७ ॥

एता । वः । वश्मि । उत्ऽयता । यजत्राः । अतक्षन् । आयवः । नव्यसे । सम् ।
श्रवस्यवः । वाजम् । चकानाः । ससिः । न । रथ्यः । अहं । धीतिम् । अश्याः ॥ ७ ॥

हे [v]यजत्राः यजनीया विश्वे देवाः [v]वः युष्मदीयानि [v]एता एतानि [v]उद्यता उद्यतानि वचांसि [v]वश्मि कामये । [v]नव्यसे नवतराय स्तुत्यतमाय युष्मद्भृणाय [v]आयवः मत्प्रभृतयो मनुष्याः कामितानि[2] स्तोत्राणि [v]सम् [v]अतक्षन् समस्कुर्वन् । किमिच्छन्तः । [v]श्रवस्यवः श्रवणीयं यशोऽन्नं वा आत्मन इच्छन्तः । [v]वाजं बलं [v]चकानाः कामयमानाः ॥ ' कन दीप्तिकान्तिगतिषु ' । लिटः कानच् ॥ [v]रथ्यः रथसंबन्धी [v]ससिर्न सर्पणशीलोऽश्व इव युष्मद्भृणः [v]धीतिम् अस्मदीयं कर्म [v]अश्याः प्राप्नोतु ॥ ' अशू व्याप्तौ ' । व्यत्ययेन परस्मैपदमध्यमौ । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥ ॥ १४ ॥

' अस्य मे ' इत्यष्टर्चं दशमं सूक्तं गृत्समदस्यार्षं षष्ठ्याद्यास्तिस्रोऽनुष्टुभः । शिष्टाः पञ्च जगत्यः । प्रथमा द्यावापृथिवीया ततो द्वे ऐन्द्र्यौ त्वाष्ट्र्यौ वा । ततो द्वे राकादेवत्ये द्वे सिनीवालीदेवत्ये अन्त्या गुङ्ग्वादिपड्देवताका । तथा चानुक्रान्तम्–' अस्य मेऽष्टौ जागतं त्र्यनुष्टुबन्तम् । द्यावापृथिव्येका द्वे ऐन्द्र्यौ त्वाष्ट्र्यौ वा द्वे द्वे राकासिनीवाल्योरन्त्या लिङ्गोक्तदेवता ' इति । आभिप्लविके चतुर्थेऽहनि वैश्वदेवशस्त्रे आद्यस्तृचो द्यावापृथिवीयनिविद्धानः । तथा च सूत्रितम्–' अस्य मे द्यावापृथिवी इति तिस्रस्ततं मे अप इति वैश्वदेवम् ' (आश्व. श्रौ. ७. ७) इति ॥

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो ददे ॥ १ ॥

अस्य । मे । द्यावापृथिवी इति । ऋतऽयतः । भूतम् । अवित्री इति । वचसः । सिसासतः ।
ययोः । आयुः । प्रऽतरम् । ते इति । इदम् । पुरः ।
उपस्तुते इत्युपऽस्तुते । वसुऽयुः । वाम् । महः । ददे ॥ १ ॥

---

१. क-ञ-ण१-म–त्रिस्तीर्णतमः । २. ख-ग-ण-त-थ–कमितानि ।

[v]द्यावापृथिवी हे द्यावापृथिव्यौ [v]ऋतायतः ऋतं यज्ञमात्मन इच्छतः [v]सिषासतः युवां संभक्तुमिच्छतः [v]अस्य[1] [v]वचसः ॥ वक्तीति वचाः स्तोता । असुन् ॥ स्तोतुः अस्य [v]मे मम [v]अवित्री अवित्र्यौ पालयित्र्यौ [v]भूतं भवतम् । [v]ययोः द्यावापृथिव्योः [v]आयुः अन्नं [v]प्रतरं प्रकृष्टतरम् उत्पद्यते इति शेषः । [v]इदम् इदानीं [v]ते द्यावापृथिव्यौ [v]उपस्तुते तत्र तत्र स्थितैः स्तोतृभिः स्तुते [v]वां युवां [v]वसूयुः धनकामोऽहं [v]महः महतः ॥ विभक्तिव्यत्ययः ॥ महता स्तोत्रेण [v]पुरः [v]दधे पुरस्करोमि ॥

मा नो गुह्या रिपं आयोरहन्दभन्मा नं आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥ २ ॥

मा । नः । गुह्याः । रिपः । आयोः । अहन् । दभन् । मा । नः । आभ्यः । रीरधः । दुच्छुनाभ्यः । मा । नः । वि । यौः । सख्या । विद्धि । तस्य । नः । सुम्नऽयता । मनसा । तत् । त्वा । ईमहे ॥२॥

हे इन्द्र त्वष्टर्वा [v]आयोः मनुष्यस्य शत्रुभूतस्य [v]गुह्याः गोप्याः ज्ञातुमशक्याः [v]रिपः हिंसारूपा मायाः [v]नः अस्मान् [v]अहन् । उपलक्षणमेतत् । अहनि रात्रौ च [v]मा [v]दभन् मा हिंसिषुः । तथा [v]नः अस्मान् [v]आभ्यः [v]दुच्छुनाभ्यः । शुनमिति सुखनाम । दुःशुनाः दुच्छुनाः । दुःखकारिणीभ्यः शत्रुसेनाभ्यः[2] [v]मा [v]रीरधः वशं मा नैषीः ॥ ' रध्यतिर्वशगमने ' इति यास्कः । ' रध हिंसासंराद्धयोः'। अस्माण्ण्यन्तात् लुङि चङि रूपम् ॥ अपि च [v]नः अस्माकं [v]सख्या सख्यानि सखित्वानि [v]मा [v]वि [v]यौः त्वया वियुक्तानि मा कार्षीः । अपि तु [v]मः अस्माकं [v]तस्य तत्सखित्वं [v]सुम्नायता सुखमस्माकमिच्छता [v]मनसा [v]विद्धि जानीहि ॥ ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥ [v]तत् [v]त्वा तादृशं त्वाम् [v]ईमहे अभिमतफलं याचामहे ॥ ' सुपां सुलुक्० ' इति तच्छब्दात् उत्तरस्या विभक्तेर्लुक् ॥

अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥ ३ ॥

अहेळता । मनसा । श्रुष्टिम् । आ । वह । दुहानाम् । धेनुम् । पिप्युषीम् । असश्चतम् । पद्याभिः । आशुम् । वचसा । च । वाजिनम् । त्वाम् । हिनोमि । पुरुऽहूत । विश्वहा ॥३॥

हे इन्द्र त्वष्टर्वा [v]अहेळता अक्रुध्यता [v]मनसा [v]श्रुष्टिं सुखकरीं [v]दुहानां दोग्ध्रीं [v]पिप्युषीं प्रवृद्धां पीनाम् ॥ ' प्यायी वृद्धौ ' । लिटः क्वसुः । ' लिड्यङोश्च ' इति पीभावः । ' उगितश्च ' इति ङीप् । ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् ॥ [v]असश्चतम् असक्तावयवाम् एवंभूतां [v]धेनुं गाम् [v]आ [v]वह आभिमुख्येन प्रापय । अपि च हे [v]पुरुहूत बहुभिराहूतेन्द्र त्वष्टर्वा [v]पद्याभिः पादगतिभिः [v]आशुं व्यापनशीलं [v]वचसा वाचा [v]च [v]वाजिनं वेगवन्तं [v]त्वां [v]विश्वहा सर्वेष्वहःसु [v]हिनोमि स्तुतिभिः प्रेरयामि ॥ ' हि गतौ वृद्धौ च ' ॥

१. क-ञ-ञ१-ण-त-थ-न-म-व-' अस्य ' नास्ति । २. क-ज-ञ-त-थ-म-व-शत्रुसेनाभ्यः नोऽस्मान्; ख-ग-' शत्रुसेनाभ्यः ' नास्ति; ञ-१-न- अस्मान्; ण-नोऽस्मान् ।

पत्नीसंयाजेषु गृहपतेः प्राक् राकासिनीवाल्यौ यष्टव्ये । तत्र राकायागस्य ' राकामहम् ' इत्यादिके याज्यानुवाक्ये । सूत्रितं च—' राकामहं सिनीवालि कुहूमहमिति द्वे द्वे याज्यानुवाक्ये ' (आश्व. श्रौ. १. १०) इति । तथा आग्निमारुतेऽप्येते धाय्ये । सूत्रितं च—' राकामहमिति द्वे ' (आश्व. श्रौ. ५. २०) इति ॥

राकामहं सुहवा सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ ४ ॥

राकाम् । अहम् । सुऽहवाम् । सुऽस्तुती । हुवे । शृणोतु । नः । सुऽभगा । बोधतु । त्मना । सीव्यतु । अपः । सूच्या । अच्छिद्यमानया । ददातु । वीरम् । शतऽदायम् । उक्थ्यम् ॥४॥

संपूर्णचन्द्रा पौर्णमासी राका । तां देवीं ᵛसुहवां स्वाह्वानाम् आह्वानप्रयोजनकारिणीं ᵛसुष्टुती शोभनया स्तुत्या ᵛअहं ᵛहुवे आह्वयामि ॥ सुष्टुतिशब्दात् तृतीयैकवचनस्य ' सुपां सुलुक् ' इति पूर्वसवर्ण ईकारः ॥ सा च ᵛसुभगा शोभनधना ᵛनः अस्माकमाह्वानं ᵛशृणोतु । श्रुत्वा च ᵛत्मना आत्मना स्वयमेव ᵛबोधतु अस्मदभिप्रायं बुध्यताम् । बुद्ध्वा च ᵛअपः कर्म पुत्रोत्पादनलक्षणं ᵛसूच्या सूचीस्थानीयया ᵛअच्छिद्यमानया अविच्छिन्नया अनुग्रहबुद्ध्या ᵛसीव्यतु संतनोतु । यथा वस्त्रादिकं सूच्या स्यूतं चिरं तिष्ठति एवमिदं करोतु । कृत्वा च ᵛवीरं विक्रान्तं ᵛशतदायं बहुधनं बहुप्रदं वा ᵛउक्थ्यं प्रशस्यं पुत्रं ᵛददातु ॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ५ ॥

याः । ते । राके । सुऽमतयः । सुऽपेशसः । याभिः । ददासि । दाशुषे । वसूनि ।
ताभिः । नः । अद्य । सुऽमनाः । उपऽआगहि । सहस्रऽपोषम् । सुऽभगे । रराणा ॥ ५ ॥

हे ᵛराके देवि ᵛसुपेशसः शोभनरूपाः ᵛते तव ᵛयाः ᵛसुमतयः शोभना[1] बुद्धयः[1] ᵛयाभिः मतिभिः ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛवसूनि धनानि ᵛददासि प्रयच्छसि । ᵛअद्य इदानीं ᵛताभिः मतिभिः सहिता त्वं ᵛसुमनाः शोभनमना भूत्वा ᵛउपागहि उपागच्छ ॥ गमेश्छान्दसः शपो लुक् । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' असिद्धवदत्राभात् ' इत्यस्यासिद्धत्वात् हेर्लुगभावः ॥ किं कुर्वती । हे ᵛसुभगे शोभनधने ᵛसहस्रपोषं सहस्रसंख्याकस्य धनस्य पुष्टिं ᵛररााणा ददती ॥ ' रा दाने ' । व्यत्ययेन शानच् । छान्दसः शपः श्लुः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥

सिनीवाल्या यागे ' सिनीवालि ' इत्यादिके द्वे याज्यानुवाक्ये । सूत्रं पूर्वमुदाहृतम् । तत्रानुवाक्या ॥

१. ऋ१-थ–शोभनबुद्धयः ।

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ६ ॥

सिनीवालि । पृथुऽस्तुके । या । देवानाम् । असि । स्वसा ।
जुषस्व । हव्यम् । आऽहुतम् । प्रऽजाम् । देवि । दिदिड्ढि । नः ॥ ६ ॥

दृष्टचन्द्रा अमावास्या सिनीवाली । हे [v]सिनीवालि [v]पृथुष्टुके पृथुजघने पृथुसंहते वा [v]या त्वं [v]देवानां [v]स्वसा [v]असि स्वयंसारिणी[1] भगिनी वा भवसि सा त्वम् [v]आहुतम् आभिमुख्येनाग्नौ प्रक्षिप्तं [v]हव्यम् अस्मदीयं हविः [v]जुषस्व सेवस्व । किं च हे [v]देवि सिनीवालि [v]नः अस्माकं [v]प्रजां पुत्रादिकां [v]दिदिड्ढि उपचिनु अतिसर्जय वा । देहीत्यर्थः ॥ ' दिह उपचये ' । लोटि छान्दसः शपः श्लुः । ' दिश अतिसर्जने ' इत्यस्मात् वा ॥

या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ ७ ॥

या । सुऽबाहुः । सुऽअङ्गुरिः । सुऽसूमा । बहुऽसूवरी ।
तस्यै । विश्पत्न्यै । हविः । सिनीवाल्यै । जुहोतन ॥ ७ ॥

[v]या सिनीवाली [v]सुबाहुः शोभनबाहुः [v]स्वङ्गुरिः शोभनाङ्गुलिः [v]सुषूमा सुष्ठु प्रसवित्री ॥ ' षूङ् प्राणिप्रसवे ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति सनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ [v]बहुसूवरी बह्वीनां प्रजानां सवित्री ॥ तेनैव सूत्रेण क्वनिप् । ' वनोर च ' इति ङीब्रेफौ । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ [v]तस्यै [v]सिनीवाल्यै [v]विश्पत्न्यै विशां पालयित्र्यै ॥ ' विभाषा सपूर्वस्य ' इति पत्युर्नकारान्तादेशः । अयस्मयादित्वेन भत्वात् विशो जश्त्वाभावः । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । हे ऋत्विग्यजमानाः [v]हविः [v]जुहोतन जुहुत ॥ ' तप्तनप्तनथनाश्च ' इति तनबादेशः ॥

या गुङ्गूर्या सिनीवाली या राका या सरस्वती ।
इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ ८ ॥

या । गुङ्गूः । या । सिनीवाली । या । राका । या । सरस्वती ।
इन्द्राणीम् । अह्वे । ऊतये । वरुणानीम् । स्वस्तये ॥ ८ ॥

अत्र[2] गुङ्गूशब्देन राकासिनीवाल्योः साहचर्यात् कुहूरुच्यते[2] । [v]या [v]गुङ्गूः कुहूः[3] नाम [v]अह्वे आह्वयामि[4] । एवमुत्तरत्रापि[5] योज्यम् । [v]इन्द्राणीम् इन्द्रस्य पत्नीम् [v]ऊतये रक्षणार्थमह्वे आह्वयामि ।

१. क-ञ-थ-म-स्वयंसंचारिणी । २. ख-ण१-थ-' अत्र... कुहूरुच्यते ' इत्येतन्नास्ति । ३. क-ञ-ञ१-ण-त-न-म-व-' कुहूः ' नास्ति । ४. ख-आह्वयामि । या सिनीवाली या राका या सरस्वती साः (ताः) एताः अह्वे; थ-आह्वयामि । सिनीवाली या राका या सरस्वती ताः एताः अह्वे । ५. ख-थ-' एवमुत्तरत्रापि योज्यम् ' नास्ति ।

तथा [v]वरुणानीं वरुणस्य पत्नीं [v]स्वस्तये अविमाशाय आह्वयामि ॥ ' इन्द्रवरुण° ' इत्यादिना ङीष् आमुगागमश्च ॥ ॥ १५ ॥ ॥ ३ ॥

चतुर्थेऽनुवाके एकादश सूक्तानि । तत्र ' आ ते पितः ' इति पञ्चदशर्चं प्रथमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं रौद्रम् । अनुक्रान्तं च—' आ ते पञ्चोना रौद्रम् ' इति । शूलगवादिरुद्रयज्ञेषु अनेन सूक्तेन प्रतीची दिगुपस्थेया । सूत्रितं च—' कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम् ' (आश्व. गृ. ४. ८. २३) इति । रुद्रदेवत्ये पशौ ' आ ते पितः ' इति हविषोऽनुवाक्या । सूत्रितं च—' आ ते पितर्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीच इति तिस्रः ' (आश्व. श्रौ. ३. ८) इति । अत्र शौनकः—' चतुर्दशीमुपोष्यैकां[1] कृष्णस्य जुहुयाच्चरुम्[1] । आतेसूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः ॥ पूर्वमाज्याहुतीर्हुत्वाथोपस्थाय[2] च[2] शंकरम् । हविःशेषेण वर्तेत एकान्तरमतन्द्रितः[3] । पूर्णमासे[4] जयेन्मृत्युं रोगैश्च परिमुच्यते ' (ऋग्वि. १. १६८-१७०) इति ॥

आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ १ ॥

आ । ते । पितः । मरुताम् । सुम्नम् । एतु । मा । नः । सूर्यस्य । सम्ऽदृशः । युयोथाः ।
अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥ १ ॥

हे [v]मरुतां [v]पितः मरुत्संज्ञानां देवानामुत्पादक रुद्र ॥ ' परमपि छन्दसि ' इति षष्ठ्यन्तस्य पूर्वमन्त्रिताङ्गवद्भावात् सर्वानुदात्तत्वम् ॥ [v]ते त्वदीयमस्मभ्यं दातव्यं [v]सुम्नं सुखम् [v]आ [v]एतु आगच्छतु । रुद्रस्य च मरुतां पितृत्वम् ' इदं पित्रे मरुताम् ' (ऋ. सं. १. ११४. ६) इत्यत्राख्यायिकामुखेनावादिम । तथा त्वं [v]नः अस्मान् [v]सूर्यस्य [v]संदृशः संदर्शनात् [v]मा [v]युयोथाः मा पृथक्कार्षीः ॥ ' यु मिश्रणामिश्रणयोः ' । लङि छान्दसः शपः श्लुः । ' छन्दस्युभयथा ' इत्यार्धधातुकत्वेन ङित्त्वाभावात् गुणः ॥ [v]अर्वति शत्रौ । ' आतृण्ट्यो वा अर्वा ' (तै. सं. ६. ३. ८. ४) इति श्रुतेः । [v]नः अस्माकं [v]वीरः वीर्यवान् पुत्रादिः [v]अभि [v]क्षमेत अभिभवतु । यद्वा वीरस्त्वं नोऽस्मानभिक्षमेथाः अस्मान् कृतापराधानभिक्षमस्व । हे [v]रुद्र [v]प्रजाभिः पुत्रपौत्रादिभिः [v]प्र [v]जायेमहि प्रभूताः स्याम ॥

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥ २ ॥

त्वाऽदत्तेभिः । रुद्र । शम्ऽतमेभिः । शतम् । हिमाः । अशीय । भेषजेभिः ।
वि । अस्मत् । द्वेषः । वितरम् । वि । अंहः । वि । अमीवाः । चातयस्व । विषूचीः ॥२॥

---

१. क-ञ-ञ१-ण-न—चतुर्दश्यामुपोष्यैकं कृष्णस्य जुहुयाच्छतम्; त—चतुर्दश्यामुपोष्यैकं कृष्ण जुहुयाच्च तम्; थ—चतुर्दश्यामुपोष्यैकं कृष्ण जुहुयाच्चरुम्; म—कृष्णचतुर्दश्यामुपोष्येकां कृष्णस्य जुहुयाद्घृतम्; व—चतुर्दश्यामुपोष्यैकं कृष्णस्य जुहुयात्सतम् । २. म-°र्हुत्वा अथोपस्थाय । ३. क-त-थ-म—नैकान्तर°; ञ—नैकान्तर° ;ञ१—नेकान्तर° । ४. ञ—पूर्णमासः; ञ१—पौर्णमासे; ण-न—पूर्णमास । ५. ण-त-थ—पुत्रो हि ।

हे [V]रुद्र [V]स्वादुक्तेभिः स्वया दत्तैः [V]शंतमेभिः अतिशयेन सुखकरैः [V]भेषजेभिः भेषजैरौषधैः [V]शतं [V]हिमाः शतं हेमन्तान् शतसंवत्सरान्[1] [V]अशीय व्याप्नुयाम्॥ अश्नोतेर्लिङि छान्दसो विकरणस्य लुक्॥ अपि च [V]अस्मत् अस्मत्तः [V]द्वेषः द्वेष्टॄन् [V]वि[2] [V]चातयस्व विनाशय। तथा [V]अंहः पापं [V]वितरम् अत्यन्तं विचातयस्व। [V]अमीवाः रोगान् [V]विषूचीः विषु* नाना अञ्चतीः कृत्स्नशरीरव्यापकान् रोगान् विचातयस्व अस्मत्तः पृथक्कृत्य विनाशय[2]॥

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि॥ ३॥

श्रेष्ठः। जातस्य। रुद्र। श्रिया। असि। तवःऽतमः। तवसाम्। वज्रबाहो इति वज्रऽबाहो।
पर्षि। नः। पारम्। अंहसः। स्वस्ति। विश्वाः। अभिऽईतीः। रपसः। युयोधि॥ ३॥

हे [V]रुद्र [V]जातस्य उत्पन्नस्य सर्वस्य जगतो मध्ये [V]श्रिया ऐश्वर्येण [V]श्रेष्ठः प्रशस्यतमः [V]असि भवसि। तथा हे [V]वज्रबाहो आयुधहस्त रुद्र [V]तवसां प्रवृद्धानां मध्ये [V]तवस्तमः अतिशयेन प्रवृद्धोऽसि। स त्वं [V]नः अस्मान् [V]अंहसः पापस्य [V]पारं तीरं [V]स्वस्ति क्षेमेण [V]पर्षि पारय। तथा [V]रपसः पापस्य [V]विश्वाः सर्वाः [V]अभीतीः अभिगमनानि [V]युयोधि पृथक्कुरु॥ यौतेश्छान्दसः शपः श्लुः। 'वा छन्दसि' इति श्नुप्तित्वस्य विकल्पनात् ङित्त्वाभावे 'अङितश्च' इति हेर्धिः॥

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि॥ ४॥

मा। त्वा। रुद्र। चुक्रुधाम। नमःऽभिः। मा। दुःऽस्तुती। वृषभ। मा। सऽहूती।
उत्। नः। वीरान्। अर्पय। भेषजेभिः। भिषक्ऽतमम्। त्वा। भिषजाम्। शृणोमि॥४॥

हे [V]रुद्र [V]त्वा त्वां [V]नमोभिः अयथाक्रियमाणैर्नमस्कारैर्हविर्भिर्वा [V]मा [V]चुक्रुधाम मा क्रोधयाम क्रुद्धं मा कार्ष्म॥ 'क्रुध कोपे'। अस्माण्ण्यन्तात् लुङि चङि[3] रूपम्॥ हे [V]वृषभ कामानां वर्षितः [V]दुष्टुती दुःस्तुत्या अशोभनया स्तुत्या [V]मा चुक्रुधामेत्येव। तथा [V]सहूती सहूत्या विसदृशैरन्यैर्देवैः सहाह्वानेन [V]मा क्रोधयाम। श्रेष्ठो हि स्वस्मान्यूनेन सहाह्वाने क्रुद्धो भवति। स त्वं [V]नः अस्माकं [V]वीरान् पुत्रान् [V]भेषजेभिः त्वदीयैर्भेषजैरौषधैः [V]उत् [V]अर्पय उत्कृष्टं संयोजय। हे रुद्र [V]त्वा त्वां [V]भिषजां चिकित्साभिज्ञानां मध्ये [V]भिषक्तमम् अतिशयेन भैषज्यस्य कर्तारं [V]शृणोमि। 'प्रथमो दैव्यो भिषक्' (तै. सं. ४. ५. १. २; वा. सं. १६. ५) इति च मन्त्रान्तरेऽप्युक्तम्॥

---

१. क-झ–शतं संवत्सरान्। २. झ१–'विचातयस्व पृथक्कुरु। अंहः पापं च वितर दूरतरं कुरु। अमीवाः राक्षसान् विषूचीः नानादिग्गतान्। * ख-ण१-विष्वक्। ३. ण-त–'चङि' नास्ति।

हवींमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ ५ ॥

हवींमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रम् । दिषीय ।
ऋदूदरः । सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥ ५ ॥

यः रुद्रः हविर्भिः चरुपुरोडाशादिभिः सहितैः हवींमभिः आह्वानैः स्तुतिलक्षणैः हवते आहूयते स्तूयते ॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः । 'बहुलं छन्दसि' इति ह्वयतेः संप्रसारणम् ॥ तं रुद्रं स्तोमेभिः स्तोत्रैः अव दिषीय अवखण्डयामि पृथक्करोमि । अपगतक्रोधं करोमीति यावत् ॥ 'दो अवखण्डने' । व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इतीत्वम् ॥ ऋदूदरः । 'ऋदूदरो मृदूदरः' (निरु. ६. ४) इति यास्कः । सुहवः शोभनाह्वानः बभ्रुः भर्ता सर्वस्य बभ्रुवर्णो वा । सुशिप्रः । शिप्रे हनू नासिके वा । शोभनशिप्रः । एवंगुणविशिष्टः स रुद्रः अस्यै मनायै । हन्मीति मन्यमाना बुद्धिर्मना । तस्यै नः अस्मान् मा रीरधत् मा वशं नैषीत ॥ 'रध हिंसासंराद्धयोः' । अस्माण्ण्यन्तात् लुङि चङि रूपम् । 'रध्यतिर्वैशब्दगमने' इति यास्कः ॥ १६ ॥

उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ ६ ॥

उत् । मा । ममन्द । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम् ।
घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥ ६ ॥

वृषभः कामानां वर्षिता मरुत्वान् मरद्भिः पुत्रैर्युक्तो रुद्रः नाधमानं याचमानं मा मां त्वक्षीयसा दीप्तेन वयसा अन्नेन उत् ममन्द उत्कर्षेण तर्पयतु । अपि चाहं घृणीव छायां यथा सूर्यकिरणसंतप्तः छायां प्रविशति एवं रुद्रस्य सुम्नं सुखम् अरपाः अपापः सन् अशीय व्याप्नुयाम् । तदर्थं तं रुद्रम् आ विवासेयं परिचरेयम् । विवासेतिः परिचरणकर्मा ॥

क्व१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ ७ ॥

क्व । स्यः । ते । रुद्र । मृळयाकुः । हस्तः । यः । अस्ति । भेषजः । जलाषः ।
अपऽभर्ता । रपसः । दैव्यस्य । अभि । नु । मा । वृषभ । चक्षमीथाः ॥ ७ ॥

हे रुद्र ते तव मृळयाकुः सुखयिता स्यः सः हस्तः क्व कुत्र वर्तते । यः हस्तः भेषजः भैषज्यकृत् जलाषः सर्वेषां सुखकरः अस्ति भवति । स हस्तो विद्यते एव । तेन हस्तेन मां रक्षेति

भावः । अपि च हे [v]वृषभ कामानां वर्षितः [v]वैव्यस्य देवकृतस्य [v]रपसः पापस्य [v]अपभर्ता अपहर्ता विनाशयिता भूत्वा कृतापराधं [v]मा[1] मां [v]नु क्षिप्रम् [v]अभि [v]चक्षमीथाः अभिक्षमस्व ॥ ' क्षमूष् सहने ' । लङि छान्दसः शपः श्लुः । ' बहुलं छन्दसि ' इतीडागमः ॥

रुद्रदेवत्ये पशौ वपापुरोडाशहविषां क्रमेण ' प्र बभ्रवे ' इत्याद्यास्तिस्रो याज्याः । ' प्र बभ्रवे वृषभाय श्वितीच इति तिस्र आ पश्चाताज्ञासत्या पुरस्तात् ' (आश्व. श्रौ. ३. ८) इति ॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ ८ ॥

प्र । बभ्रवे । वृषभाय । श्वितीचे । महः । महीम् । सुऽस्तुतिम् । ईरयामि ।
नमस्य । कल्मलीकिनम् । नमःऽभिः । गृणीमसि । त्वेषम् । रुद्रस्य । नाम ॥ ८ ॥

[v]बभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा [v]वृषभाय कामानां वर्षित्रे तद्वत्प्रसक्तकारिणे वा [v]श्वितीचे श्वेत्यमञ्चते ॥ ' श्विता वर्णे[2] ' । औणादिक इन्प्रत्ययः । श्वितिमञ्चतीत्यञ्चतेः ' ऋत्विक्० ' इत्यादिना क्विन् । चतुर्थ्येकवचने ' अचः ' इत्यकारलोपे ' चौ ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ॥ एवंगुणविशिष्टाय रुद्राय [v]महो [v]महीं महतोऽपि महतीं [v]सुष्टुतिं शोभनस्तुतिं [v]प्र [v]ईरयामि प्रकर्षेणोच्चारयामि । हे स्तोतः [v]कल्मलीकिनम् । ज्वलतो नामधेयमेतत् (नि. १. १७) । ज्वलन्तम् । कलयति अपगमयति मलमिति कल्मलीकं तेजः । तद्वन्तं रुद्रं [v]नमोभिः नमस्कारैः हविर्भिर्वा [v]नमस्य पूजय । वयं च [v]रुद्रस्य महादेवस्य [v]त्वेषं दीप्तं [v]नाम [v]गृणीमसि गृणीमः संकीर्तयामः ॥ ' गृ शब्दे ' । क्र्यादिकः । इदन्तो मसिः । ' घ्वादीनां ह्रस्वः ' ॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ ९ ॥

स्थिरेभिः । अङ्गैः । पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः ।
ईशानात् । अस्य । भुवनस्य । भूरेः । न । वै । ऊँ इति । योषत् । रुद्रात् । असुर्यम् ॥९॥

[v]स्थिरेभिः स्थिरैः दृढैः [v]अङ्गैः अवयवैर्युक्तः [v]पुरुरूपः अष्टमूर्त्यात्मकैर्बहुभी रूपैरुपेतः [v]उग्रः उद्गूर्णस्तेजस्वी [v]बभ्रुः भर्ता बभ्रुवर्णो वा रुद्रः [v]शुक्रेभिः दीप्तैः [v]हिरण्यैः हिरण्मयैर्हितरमणीयैर्वालंकारैः [v]पिपिशे दीप्यते ॥ ' पिश अवयवे ' । कर्मणि लिट् ॥ [v]ईशानात् ईश्वरात् [v]अस्य [v]भुवनस्य भूतजातस्य [v]भूरेः भर्तुः [v]रुद्रात् [v]असुर्यम् ॥ ' असु क्षेपणे ' । असेरुरन् । असुरः क्षेप्ता । ' तत्र साधुः ' ॥ असुर्यं बलं [v]न [v]वा [v]उ [v]योषत् नैव पृथक् भवति ॥ यौतेर्लेट्यडागमः । ' सिब्बहुलं लेटि ' इति सिप् ॥

१. क-ज्ञ-ण-थ-व–' मा ' नास्ति । २. क-ज्ञ-ण-त-थ-न-म–वर्णे च; व–वर्णे वर्णे च ।

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ १० ॥

अर्हन् । बिभर्षि । सायकानि । धन्व । अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् ।
अर्हन् । इदम् । दयसे । विश्वम् । अभ्वम् । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥१०॥

हे रुद्र त्वम् vअर्हन् अर्हो योग्य एव सन् vसायकानि शरान् vधन्व धनुश्च vबिभर्षि धारयसि । तथा vअर्हन् एव vयजतं यजनीयं पूजनीयं[1] vविश्वरूपं बहुविधरूपयुक्तं vनिष्कं हारं बिभर्षि । तथा vअर्हन् एव vइदं vविश्वं सर्वम् vअभ्वम् । महन्नामैतत् । अतिविस्तृतं जगत् vदयसे रक्षसि । 'देङ् रक्षणे' । हे vरुद्र vत्वत् त्वत्तोऽन्यत् किंचित् vओजीयः ओजस्वितरं बलवत्तरं vन vवै vअस्ति न खलु विद्यते । अतस्त्वमेव उक्तव्यापारेषु योज्य इत्यर्थः ॥ ओजःशब्दात् मत्वर्थीयो विनिः । ततः आतिशायनिकः इष्ठन् । 'विन्मतोर्लुक्' । 'टेः' इति टिलोपः ॥ ॥ १७ ॥

प्रयाणे मृगस्य अमनोज्ञवचः श्रुत्वा 'स्तुहि श्रुतम्' इत्येतां जपेत् । सूत्रितं च—'स्तुहि श्रुतं गर्तसदं युवानमिति मृगस्य' (आश्व. गृ. ३. १०. १०) इति ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ ११ ॥

स्तुहि । श्रुतम् । गर्तऽसदम् । युवानम् । मृगम् । न । भीमम् । उपऽहत्नुम् । उग्रम् ।
मृळ । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नि । वपन्तु । सेनाः ॥ ११ ॥

हे स्तोतः vश्रुतं विश्रुतं प्रख्यातं रुद्रं vस्तुहि । कीदृशम् vगर्तसदं गर्तो रथः । तत्र सीदन्तं vयुवानं नित्यतरुणं vमृगं vन vभीमं मृगं सिंहमिव भयंकरम् । vउपहत्नुम् उपहन्तारं शत्रूणाम् vउग्रम् उद्गूर्णं हे vरुद्र त्वं vस्तवानः अस्माभिः स्तूयमानः सन् vजरित्रे स्तोत्रे मह्यं vमृळ सुखय । vते त्वदीयाः vसेनाः vअस्मत् vअन्यम् अस्मद्व्यतिरिक्तं पुरुषं vनि vवपन्तु निघ्नन्तु ॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥ १२ ॥

कुमारः । चित् । पितरम् । वन्दमानम् । प्रति । ननाम । रुद्र । उपऽयन्तम् ।
भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥१२॥

१. क-ख-ङ्ग-ण-ण१-म-व—'पृजनीयं' नास्ति ।

[v]वन्दमानम् आयुष्मान्भव सौम्य इति स्तुवन्तं [v]पितरं [v]कुमारश्चित् यथा कुमारः ॥ चिदित्ये-तदुपमार्थे ॥ हे [v]रुद्र [v]उपयन्तम् अस्मत्समीपे गच्छन्तं त्वां [v]प्रति [v]ननाम प्रतिनतोऽस्मि । अपि च [v]भूरेः बहुनो धनस्य [v]दातारं [v]सत्पतिं सतां पालयितारम् ॥ ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृति-स्वरत्वम् ॥ हे रुद्र एवंभूतं त्वां [v]गृणीषे स्तौमि ॥ मिपः ' तिङां तिङो भवन्ति ' इति सेआदेशः ॥ [v]स्तुतः च [v]त्वम् [v]अस्मे अस्मभ्यं [v]भेषजा भेषजानि [v]रासि देहि ॥

या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥ १३ ॥

या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽभु ।
यानि । मनुः । अवृणीत । पिता । नः । ता । शम् । च । योः । च । रुद्रस्य । वश्मि ॥१३॥

हे [v]मरुतः रुद्रपुत्राः [v]वः युष्माकं [v]या यानि [v]भेषजा भेषजान्यस्मदारोग्यहेतुभूतान्यौषधानि [v]शुचीनि शुद्धानि निर्मलानि सन्ति । हे [v]वृषणः कामानां वर्षितारो मरुतः [v]या यानि च युष्मदीयानि भेषजानि [v]शंतमा अतिशयेन सुखकराणि । [v]या यानि च भेषजानि [v]मयोभु मयोभूनि मयसः सुखस्य भावयितृणि [v]नः अस्मत्पिता[1] [v]मनुः [v]यानि भेषजानि युष्मदीयानि [v]अवृणीत वृतवान् [v]ता तानि भेषजानि [v]रुद्रस्य महादेवस्य संबन्धि [v]शं [v]च [v]योश्च यच्छमनीयानां रोगाणामुपशमनं यावनीयानां भयानां यद्यावनमस्मत्तः पृथक्करणं तदुभयं च [v]वश्मि कामये ॥ ' वश कान्तौ ' । आदादिकः ॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्महीं गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ १४ ॥

परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । महीं । गात् ।
अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ॥ १४ ॥

[v]रुद्रस्य महादेवस्य [v]हेतिः आयुधं [v]नः अस्मान् [v]परि [v]वृज्याः परिवर्जयतु । तथा [v]त्वेषस्य दीप्तस्य रुद्रस्य मही महती [v]दुर्मतिः दुःखकारिणी बुद्धिश्च [v]परि [v]गात् अस्मान् वर्जयित्वा अन्यत्र गच्छतु ॥ ' अपपरी वर्जने ' (पा. सू. १. ४. ८८) ॥ हे [v]मीढ्वः सेचनसमर्थ रुद्र [v]स्थिरा स्थिराणि त्वदीयानि धनूंषि [v]मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः [v]अव [v]तनुष्व अवततज्यानि कुरु । तथा [v]तोकाय अस्मत्पुत्राय [v]तनयाय तत्पुत्राय च [v]मृळ सुखं कुरु ॥

१. क-ज्ञ-ज्ञ१-ण-त-थ-न-म-व–अस्मान् पिता ।

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ १५ ॥

एव । बभ्रो इति । वृषभ । चेकितान । यथा । देव । न । हृणीषे । न । हंसि ।
हवनऽश्रुत् । नः । रुद्र । इह । बोधि । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १५ ॥

हे [v]बभ्रो जगतो भर्तर्भ्रुवर्ण वा [v]वृषभ कामानां वर्षितः [v]चेकितान सर्वं जानन् हे [v]देव द्योतमान रुद्र [v]यथा येन प्रकारेण [v]न [v]हृणीषे न क्रुध्यसि [v]न च [v]हंसि ॥ 'हृणीङ् लज्जायाम्' । अयं क्रुध्यतिकर्मा च ॥ एवं [v]हवनश्रुत् अस्मदीयमाह्वानं शृण्वन् [v]नः अस्मान् हे [v]रुद्र [v]इह अस्मिन् देशे [v]बोधि बुध्यस्व । [v]विदथे यज्ञे गृहे वा [v]सुवीराः शोभनपुत्राः सन्तः [v]बृहत् प्रौढं त्वदीयं स्तोत्रं [v]वदेम उच्चारयाम ॥ ॥ १८ ॥

'धारावराः' इति पञ्चदशर्चं द्वितीयं सूक्तं गार्ष्ममदं[1] मारुतम्[1] । अन्त्या त्रिष्टुप् शिष्टा जगत्यः[2] । तथा चानुक्रान्तं—'धारावरा मारुतं त्रिष्टुवन्तम्' इति । पृष्ठ्याभिप्लवषडहयोस्तृतीयेऽहन्याग्निमारुत-शस्त्रस्य इदं मारुतनिविद्धानम् । सूत्रितं च—'वैश्वानराय धिषणां धारावरा मरुतस्त्वमग्ने प्रथमो अङ्गिरा इत्याग्निमारुतम्' (आश्व. श्रौ. ७. ७) इति ॥

धारावरा मरुतो धृष्णवोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीपिणो भृमिं धमन्तो अप गा अवृण्वत ॥ १ ॥

धारावराः । मरुतः । धृष्णुऽओजसः । मृगाः । न । भीमाः । तविषीभिः । अर्चिनः ।
अग्नयः । न । शुशुचानाः । ऋजीपिणः । भृमिम् । धमन्तः । अप । गाः । अवृण्वत ॥१॥

[v]धारावराः उदकधारया अन्तरिक्षमावृण्वन्तः । यद्वा धाराणां धृतानां स्थिराणां वृक्षादीनां निवारयितारः चालयितारः । यद्वा सर्वस्य जगतो धारयितारः । [v]धृष्णवोजसः परेषां धर्षकेण बलेन युक्ताः । अत एव [v]मृगा [v]न [v]भीमाः सिंहा इव भयंकराः । [v]तविषीभिः आत्मीयैर्बलैर्वृष्टिप्रदानादिना [v]अर्चिनः सर्वं जगत् पूजयन्तः । [v]अग्नयो [v]न [v]शुशुचानाः दीप्ता वह्नय इव दीप्यमानाः ॥ 'शुच दीप्तौ' । लिटः कानच् । [v]ऋजीपिणः । ऋजीपमुदकं तद्वन्तः । यद्वा ऋजीषोऽपगतसारः सोमः । तेन युक्ताः । तृतीय-सवने ह्याग्निमारुते मरुतः स्तूयन्ते । तत्र च सवनद्वयेऽभिषुतं गतसारं सोममभिषुण्वन्ति । अतस्तेषां तद्युक्तत्वम् । एवंभूताः [v]मरुतः [v]भृमिं भ्राम्यन्तं मेघं [v]धमन्तः वर्षणार्थमितस्ततः प्रेरयन्तः [v]गाः[3] तदन्तर्गताः[3] वर्ष्या अपः [v]अप [v]अवृण्वत अपावृताः कुर्वन्ति । यथा सर्वेऽदृश्यन्ते तथा प्रवर्षन्तीत्यर्थः । यद्वा भृम्याख्यः[4] वीणाविशेषः । तं धमन्तो वादयन्तो गा वलनाम्नासुरेणापिहिता अपावृण्वत अपगतावरणा अकुर्वन् ॥

---

१. ख-च-ण१—गृत्समदस्यार्षम् । २. ख-च-ण१—जगत्यः । मरुतो देवता । ३. म—गच्छन्तीति गाः । ४. क-झ१-ण-त-थ-न-म-व—भृमिणाख्या ।

द्यावो॒ न स्तृभि॑श्चितयन्त खा॒दिनो॒ व्य॑भ्रिया॒ न द्यु॑तयन्त वृ॒ष्टयः॑ ।
रु॒द्रो यद्वो॑ मरुतो रुक्मवक्षसो॒ वृषाज॑नि पृश्न्याः॑ शु॒क्र ऊ॒धनि ॥ २ ॥

द्यावः॑ । न । स्तृ॒ऽभिः॑ । चि॒त॒य॒न्त॒ । खा॒दिनः॑ । वि । अ॒भ्रि॒याः॑ । न । द्यु॒त॒य॒न्त॒ । वृ॒ष्टयः॑ ।
रु॒द्रः । यत् । वः॒ । म॒रु॒तः॒ । रु॒क्म॒ऽव॒क्ष॒सः॒ । वृषा॑ । अज॑नि । पृ॒श्न्याः॑ । शु॒क्रे । ऊ॒धनि ॥२॥

[v]स्तृभिः । नक्षत्रनामैतत् । यदाह यास्कः—'ऋक्षाः स्तृभिरिति नक्षत्राणाम्' (निरु. ३.२०) इति । नक्षत्रैः [v]द्यावो [v]न यथा द्युलोकाः [v]चितयन्त चेतयन्ति स्वात्मानं ज्ञापयन्ति ॥ 'चिती संज्ञाने' ॥ प्रकाशन्त इत्यर्थः । तथा [v]खादिनः शत्रूणां खादका मरुतः स्वकीयैराभरणैर्ज्ञायन्ते । यद्वा खादः कटकम् । तद्युक्ताः सन्तः प्रकाशन्ते । तथा [v]वृष्टयः वर्षका मरुतः [v]अभ्रिया [v]न । अभ्रेषु भवा विद्युत इव [v]वि [v]द्युतयन्त सर्वं जगद्विद्योतयन्ति प्रकाशयन्ति ॥ अभ्रशब्दाद्भवार्थे 'समुद्राभ्राद्घः' इति घप्रत्ययः ॥ शेषः प्रत्यक्षकृतः । [v]रुक्मवक्षसः । रुक्मं रोचमानाभरणं वक्षसि उरसि येषां तादृशा हे [v]मरुतः [v]यत् यदा [v]वः युष्मान् [v]वृषा सेचनसमर्थः [v]रुद्रः महादेवः [v]पृश्न्याः । पृश्निः माध्यमिका[1] वाक् । तस्याः संबन्धिनि [v]शुक्रे निर्मले [v]ऊधनि उद्धते[2] प्रदेशे [v]अजनि अजनयत् । तदानीमिति पूर्वत्र[3] संबन्धः । यद्वा पृश्निर्नानावर्णेयं भूमिः पुरा गोरूपधरासीत् । तस्यां महेशो वृषो भूत्वा मरुत उत्पादयामासेत्याचक्षते । तदत्रोच्यते । हे मरुतो यद्यस्माद्वो युष्मान् वृषा वृषरूपो रुद्रः पृश्न्या गोः शुक्रे निर्मले ऊधनि ऊधसि पयस उत्पत्तिस्थाने अजनि अजीजनत् तस्माद्यूयमेवं महानुभावा जाता इत्यर्थः । तथा च तैत्तिरीयकं—'पृश्निर्यै वै पयसो मरुतो जाताः' (तै. सं. २. २. ११. ४) इति ॥

उ॒क्ष॒न्ते अश्वाँ॑ अत्याँ॒इवा॒जिषु॒ नद॑स्य॒ कर्णै॑स्तुरयन्त आ॒शुभिः॑ ।
हिर॑ण्यशिप्रा मरुतो दविध्वतः पृ॒क्षं या॑थ पृषतीभिः समन्यवः ॥ ३ ॥

उ॒क्ष॒न्ते॒ । अश्वा॑न् । अत्या॑न्ऽइव । आ॒जिषु॑ । न॒दस्य॑ । कर्णैः॑ । तु॒र॒य॒न्ते॒ । आ॒शुऽभिः॑ ।
हिर॑ण्यऽशिप्राः । म॒रु॒तः॒ । द॒वि॒ध्व॒तः॒ । पृ॒क्षम् । या॒थ॒ । पृ॒ष॒तीभिः॑ । स॒ऽम॒न्य॒वः॒ ॥ ३ ॥

मरुतः [v]अश्वान् व्याप्तान् लोकान् [v]उक्षन्ते सिञ्चन्ति ॥ 'अशू व्याप्तौ' । औणादिकः क्वन्प्रत्ययः ॥ [v]आजिषु संग्रामेषु [v]अत्यानिव सततगामिनस्तुरगान् यथा स्वेदापनोदाय[4] उदकैः सिञ्चन्ति तद्वत् । अपि च ते मरुतः [v]आशुभिः शीघ्रगमनैरश्वैः [v]नदस्य शब्दवतो मेघस्य [v]कर्णैः कृत्तैर्मध्यप्रदेशैः[5] [v]तुरयन्ते वर्षणार्थं वृष्ट्युत्पादनाय त्वरितं गच्छन्ति ॥ 'तुर त्वरणे' ॥ शेषः प्रत्यक्षकृतः । हे [v]हिरण्यशिप्राः । शिप्रं शिरस्त्राणम् । सुवर्णमयशिरस्त्राणाः [v]समन्यवः समानमनस्काः[6] समानक्रोधा वा हे [v]मरुतः [v]दविध्वतः महीरुहादिकं कम्पयन्तो यूयम् ॥ 'धूञ् कम्पने' इत्यस्मात्

---

१. म—माध्यमिकी । २. क-ज्ञ-ण-न-उद्धते । ३. क-ज्ञ-म—सर्वत्र । ४. च-ज-ज्ञ-ज्ञ१-ण-थ-न-म—खेदापनोदाय । ५. ख-ग—कृतैर्मेध्य°; च—कृतेर्मेध्य°; ज्ञ१-ण-न—कृतैर्मध्यं°; थ—कृतेर्मध्यें; त-ध—कृतेर्मध्यं । ६. क-ख-ग-च-ज-ज्ञ-ण-त-फ—समानवयस्काः ।

दाधर्त्यादौ एतद्रूपं निपात्यते ॥ ᵛपृषतीभिः युष्मद्रथे योजिताभिः श्वेतबिन्दुङ्किताभिः मृगीभिर्वडवाभिर्वा ᵛपृक्षम् । अन्ननामैतत् । हविर्लक्षणान्नवन्तं यजमानम् ॥ अर्शआदित्वादच् ॥ ᵛयाथ गच्छथ ॥

पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ ४ ॥

पृक्षे । ता । विश्वा । भुवना । ववक्षिरे । मित्राय । वा । सदम् । आ । जीरऽदानवः ।
पृषत्ऽअश्वासः । अनवभ्रऽराधसः । ऋजिप्यासः । न । वयुनेषु । धूःऽसदः ॥ ४ ॥

ᵛपृक्षे पृक्षवते[1] हविर्लक्षणान्नयुक्ताय यजमानाय ᵛता तानि ᵛविश्वा सर्वाणि भुवनानि[2] उदकानि ᵛमित्राय । वाशब्द उपमार्थः । मित्रायेव ᵛसदं सदा ᵛआ ᵛववक्षिरे मरुत आवहन्ति । यद्वा वाशब्दोऽवधारणे । मित्रभूताय यजमानायैव पृक्षेऽन्ने निमित्तभूते सति वृष्ट्युदकान्यावहन्ति । कीदृशा मरुतः । ᵛजीरदानवः क्षिप्रदानाः । ᵛपृषदश्वासः पृषद्भिः श्वेतबिन्दुभिर्युक्ता अश्वा येषां ते तथोक्ताः । ᵛअनवभ्रराधसः ॥ ' भृशु भ्रंशु अधःपतने ' । अवभ्रंशनमवभ्रः । ' डोऽन्यत्रापि दृश्यते ' (पा. म. ३. २. ४८. ४) इति डप्रत्ययः । नास्त्यवभ्रो यस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अनवभ्रं भ्रंशनरहितं राधो धनं येषां ते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ᵛऋजिप्यासो ᵛन । ऋजु अकुटिलं प्राप्नुवन्तः[3] गच्छन्तोऽश्वा इव ᵛवयुनेषु गन्तृषु मध्ये ᵛधूर्षदः धुरि मेघस्य वहने सीदन्तो निषण्णा इत्यर्थः ॥

इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥ ५ ॥

इन्धन्वऽभिः । धेनुऽभिः । रप्शदूधऽभिः । अध्वस्मऽभिः । पथिऽभिः । भ्राजत्ऽऋष्टयः ।
आ । हंसासः । न । स्वसराणि । गन्तन । मधोः । मदाय । मरुतः । सऽमन्यवः ॥ ५ ॥

ᵛसमन्यवः समानमनस्काः[4] समानक्रोधाः समानतेजसो वा हे ᵛमरुतः ᵛभ्राजदृष्टयः दीप्यमानायुधा यूयम् ᵛइन्धन्वभिः समिन्धनवद्भिः ॥ इन्धनशब्दात् ' छन्दसीवनिपौ० ' इति मत्वर्थीयो वनिप् । छान्दसो वर्णलोपः ॥ ᵛधेनुभिः प्रीणयितृभिश्च ᵛरप्शदूधभिः । विरप्शीति महन्नाम । महोधस्कैः । ऊधांसि जलस्रोतोमार्गाः । यद्वा ' रप लप व्यक्तायां वाचि ' । शब्दायमानोच्छ्रितप्रदेशैः ᵛअध्वस्मभिः ध्वंसनरहितैः ᵛपथिभिः । पतन्ति गच्छन्तीति पन्थानो मेघाः । एवंभूतैर्मेघैः सह मार्गैरेव वा ᵛआ ᵛगन्तन आगच्छत । किमर्थम् । ᵛमधोर्मदाय सोमस्य मदार्थम् । तत्र दृष्टान्तः । ᵛहंसासो ᵛन यथा हंसाः ᵛस्वसराणि स्वकीयानि निवासस्थानानि प्राप्नुवन्ति तद्वत् ॥ ॥ १९ ॥

---

१. क-ङ्ग-ण-त-थ-न-म-पृक्षवति; ङ्ग१-व-पृक्षवती । २. च-फ-भुवना भुवनानि । ३. म-पृच्छावन्तः । ४. म-समानवयस्काः ।

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥ ६ ॥

आ । नः । ब्रह्माणि । मरुतः । सऽमन्यवः । नराम् । न । शंसः । सवनानि । गन्तन ।
अश्वाम्ऽइव । पिप्यत । धेनुम् । ऊधनि । कर्ता । धियम् । जरित्रे । वाजऽपेशसम् ॥ ६ ॥

Vसमन्यवः समानमनसः समानक्रोधा वा हे Vमरुतः Vनः अस्माकं Vब्रह्माणि । अन्ननामैतत् । अन्नानि Vसवनानि अभिषुतसोमलक्षणानि हवींषि Vआ Vगन्तन आगच्छत ॥ गमेर्लोटि छान्दसः शपो लुक् । ' तप्तनप्तनथनाश्च ' इति तस्य तनबादेशः । अत एव ङित्त्वाभावादनुनासिकलोपाभावः ॥ तत्र दृष्टान्तः । Vनरां Vन Vशंसः । नरामस्माकं शंसः शंसनीयं स्तोत्रं यथा आगच्छथ तद्वत् ॥ नरशब्दात् षष्ठीबहुवचनस्य ' अनित्यमागमशासनम् ' इति नुडभावः । शंसः कर्मणि घञन्त आद्युदात्तः । ' सुपां सुलुक्° ' इति अमः सुआदेशः ॥ आगत्य च Vधेनुम् उदकदानेन प्रीणयितारम् Vअश्वामिव Vऊधनि[1] Vपिप्यत । यथाश्वाः पीनावयवा भवन्ति तद्वन्मेघं वर्षणसमर्थमाप्यायितं कुरुतेत्यर्थः । अपि च Vजरित्रे स्तोत्रे Vवाजपेशसं वाजैरन्नैराश्लिष्टम् ॥ ' पिश अवयवे ' ॥ Vधियं कर्म Vकर्ता कुरुत ॥ करोतेश्छान्दसः शपो लुक् । पूर्ववत् तशब्दस्य तबादेशः ॥

तं नो दात मरुतो वाजिनं रथं आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ७ ॥

तम् । नः । दात । मरुतः । वाजिनम् । रथे । आपानम् । ब्रह्म । चितयत् । दिवेऽदिवे ।
इषम् । स्तोतृऽभ्यः । वृजनेषु । कारवे । सनिम् । मेधाम् । अरिष्टम् । दुस्तरम् । सहः ॥ ७ ॥

हे Vमरुतः Vतं पुत्रं Vनः अस्मभ्यं Vदात दत्त प्रयच्छत ॥ छान्दसः शपो लुक् ॥ कीदृशम् । Vवाजिनम् अन्नवन्तं बलवन्तं वा । Vरथे रंहणे युष्मदीये आगमने निमित्तभूते सति Vदिवेदिवे प्रतिदिवसं Vचितयत् प्रज्ञापयत् युष्मद्गुणप्रख्यापकं Vब्रह्म स्तोत्रम् Vआपानम् आप्नुवन्तम् । अपि च Vइषम् अन्नं Vस्तोतृभ्यः अस्मभ्यं दात प्रयच्छत । तथा Vवृजनेषु संग्रामेषु Vकारवे स्तोत्रे ॥ वचनव्यत्ययः ॥ Vमेधां[2] युद्धप्रज्ञानं* Vसनिं धनदातृत्वं च Vअरिष्टं[2] शत्रुभिरहिंसितं Vदुस्तरं शत्रुभिस्तरीतुमशक्यं Vसहः बलं च प्रयच्छत ॥

यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥ ८ ॥

यत् । युञ्जते । मरुतः । रुक्मऽवक्षसः । अश्वान् । रथेषु । भगे । आ । सुऽदानवः ।
धेनुः । न । शिश्वे । स्वसरेषु । पिन्वते । जनाय । रातऽहविषे । महीम् । इषम् ॥ ८ ॥

---

१. ण-त-थ-म-' ऊधनि ' नास्ति । २. ण-त-थ-म-'मेधां...अरिष्टं' नास्ति । * ख-ग-च-फ-युद्धप्रज्ञाम् ।

[v]रुक्मवक्षसः रोचमानाभरणोरस्काः [v]सुदानवः शोभनदानाः [v]मरुतः [v]यत् यदा [v]रथेषु [v]भगे भजनीये स्थाने । धुरीत्यर्थः । [v]अश्वान् [v]आ [v]युञ्जते आभिमुख्येन युक्तान् कुर्वन्ति । तदानीमेव [v]रातहविषे दत्तहविष्काय यजमानाय [v]महीं महतीम् [v]इषम् अन्नं तत्कारणभूतमुदकं वा [v]स्वसरेषु स्वकीयेषु गृहेषु [v]पिन्वते सिञ्चन्ति किरन्ति ॥ ' पिवि सेचने ' ॥ तत्र दृष्टान्तः । [v]धेनुर्न [v]शिश्ये । यथा धेनुः प्रस्नुतस्तनी सती स्वकीयाय वत्साय क्षीरं प्रयच्छति तद्वत् ॥

यो नो मरुतो वृकतांति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥ ९ ॥

यः । नः । मरुतः । वृकऽतांति । मर्त्यः । रिपुः । दधे । वसवः । रक्षत । रिषः ।
वर्तयत । तपुषा । चक्रिया । अभि । तम् । अव । रुद्राः । अशसः । हन्तन । वधरिति ॥९॥

हे [v]मरुतः [v]यः [v]मर्त्यः मनुष्यः [v]वृकताति आदाता वृकः ॥ ' वृक आदाने ' । ' वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ' (पा. सू. ५. ४. ४१) इति स्वार्थिकस्तातिल्प्रत्ययः ॥ तादृशः सन् [v]नः अस्माकं [v]रिपुर्दधे रिपुतयात्मानं धारयति । हे [v]वसवः वासयितारो मरुतः [v]रिषः हिंसकादस्मान् [v]रक्षत पालयत । अस्माकं[1] शत्रुभूतं मर्त्यं [v]तपुषा तापयित्र्या [v]चक्रिया ऋष्टशक्त्या [v]अभि [v]वर्तयत अभितो[2] निवर्तयत[2] । हे [v]रुद्राः रुद्रपुत्राः । यद्वा रोरूयमाणा द्रवन्तः । [v]अशसः भक्षकस्य ॥ ' अश भोजने ' इत्यस्मादौणादिकोऽसिप्रत्ययः ॥ तादृशस्य राक्षसादेः [v]वधः हननसाधनमायुधम् [v]अव [v]हन्तन अवयुत्य अस्मत्तः पृथक्कृत्य नाशयत ॥ हन्तेर्लोटि ' तस्नसनथनाश्च ' इति तनप् ॥

चित्रं तद्वो मरुतो यामं चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्रितं जराय जुरतामदाभ्याः ॥ १० ॥

चित्रम् । तत् । वः । मरुतः । यामं । चेकिते । पृश्न्याः । यत् । ऊधः । अपि । आपयः । दुहुः ।
यत् । वा । निदे । नवमानस्य । रुद्रियाः । त्रितम् । जराय । जुरताम् । अदाभ्याः ॥१०॥

हे [v]मरुतः [v]वः युष्माकं [v]चित्रं चायनीयं [v]यामं प्रापणं [v]चेकिते सर्वैर्ज्ञायते । इदानीं परोक्षवदाह । अपिशब्दः प्रसिद्धौ । [v]यत् यदा खलु [v]पृश्न्याः माध्यमिकाया वाचः संबन्धिनम् [v]ऊधः उद्धतं[3] मेघम् [v]आपयः प्रापयितारो मरुतः [v]दुहुः दुहन्ति ॥ दुहेश्छान्दसो लिट् । ' छन्दसि चेति वक्तव्यम् ' इति द्विर्वचनाभावः ॥ [v]यद्वा यदा च [v]नवमानस्य स्तुवतः त्रितस्य [v]निदे निन्दकाय शत्रवे हिंसां कृतवन्त इति शेषः ॥ ' निदि कुत्सायाम् ' । ' क्विप् च ' इति क्विप् ॥ तदानीं हे [v]अदाभ्याः अहिंस्याः [v]रुद्रियाः रुद्रस्य पुत्राः मरुतः [v]त्रितम् ऋषिं [v]जुरतां हिंसतां शत्रूणां [v]जराय जरणाय विनाशाय अभूत इति शेषः ॥ ॥ २० ॥

१. क-ङ-म-अस्मभ्यम् । २. ण-त-थ-' अभितो निवर्तयत ' नास्ति । ३. क-ङ-उद्धन्तम्; ख-ण १ ऊधनम्; ग-च-उद्धनम्; ज-ण-त-न-व-उद्धतम् ।

तान्वो महो मरुत एवयाम्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥ ११ ॥

तान्। वः। महः। मरुतः। एवऽयाम्नः। विष्णोः। एषस्य। प्रऽभृथे। हवामहे।
हिरण्यऽवर्णान्। ककुहान्। यतऽस्रुचः। ब्रह्मण्यन्तः। शंस्यम्। राधः। ईमहे ॥ ११ ॥

हे मरुतः एवयाम्नः एवं गन्तव्यं स्तोत्रं यज्ञं वा गन्तॄन् महः महतो महानुभावान् तान् वः युष्मान् विष्णोः व्यापकस्य ग्रहचमसादिषु सर्वत्र व्याप्य वर्तमानस्य एषस्य एषणीयस्य प्रार्थनीयस्य सोमस्य प्रभृथे प्रभरणे अभिषवादिभिः प्रकर्षेण संपादने सति हवामहे आह्वयामहे। आहूय च हिरण्यवर्णान् हितरमणीयवर्णान् वा ककुहान् श्रेष्ठान् स्तुत्यान् वा एवंभूतांस्तान् यतस्रुचः यागाय उद्यतस्रुचः ब्रह्मण्यन्तः। ब्रह्म स्तोत्रम्। तदिच्छन्तो वयं शंस्यं प्रशंसनीयं राधः धनम् ईमहे याचामहे॥

ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्त्वुषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥ १२ ॥

ते। दशऽग्वाः। प्रथमाः। यज्ञम्। ऊहिरे। ते। नः। हिन्वन्तु। उषसः। विऽउष्टिषु।
उषाः। न। रामीः। अरुणैः। अप। ऊर्णुते। महः। ज्योतिषा। शुचता। गोऽअर्णसा ॥१२॥

ते मरुतः दशग्वाः। ये दशभिर्मासैः सिद्धिं गता अङ्गिरसस्तद्रूपा भूत्वा प्रथमाः आदित्येभ्यः प्रथमभाविनः सन्तः यज्ञमूहिरे अवहन्। आदित्यानामङ्गिरसां च स्वर्गगमनं प्रति स्पर्धमानानां मध्ये पूर्वमेवाङ्गिरसो यागाननुष्ठाय स्वर्गं प्राप्ताः। तथा च श्रूयते—' आदित्याश्चैवेहासन्नङ्गिरसश्च तेऽग्रेऽग्निनाग्निमयजन्त ' (ऐ. ब्रा. १. १६) इति। तादृशाः ते उषसो व्युष्टिषु विवासेषु प्रभातेषु सत्सु नः अस्मान् हिन्वन्तु प्रेरयन्तु । ' हि गतौ वृद्धौ च '। रामीः कृष्णवर्णा रात्रीः उषा न यथोषाः अरुणैः आरोचमानैः स्वतेजोभिः अपोर्णुते अपवृणोत्यपसारयति। तथा महः महता शुचता दीप्यमानेन गोअर्णसा गच्छदुदकेन ज्योतिषा सूर्याख्येन तमो निवारयन्ति। सूर्यमण्डलमावृण्वतो वृत्रादीन् हत्वा सर्वं जगत् प्रकाशयन्तीत्यर्थः ॥

ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥ १३ ॥

ते। क्षोणीभिः। अरुणेभिः। न। अञ्जिऽभिः। रुद्राः। ऋतस्य। सदनेषु। ववृधुः।
निऽमेघमानाः। अत्येन। पाजसा सुऽचन्द्रम्। वर्णम्। दधिरे। सुऽपेशसम् ॥ १३ ॥

ᵛरुद्राः रुद्रपुत्राः ᵛते मरुतः ᵛक्षोणीभिः शब्दकारिभिः[1] वाणाख्यैः[2] वीणाविशेषैः ᵛअरुणेभिर्नासिभिः। नशब्दः समुच्चये। आरोचमानैः अरुणवर्णैः[3] वा रूपाभिव्यञ्जकैरलंकारैश्च समन्विताः सन्तः ᵛऋतस्य उदकस्य ᵛसदनेषु निवासभूतेषु मेघेषु ᵛवावृधुः वर्धन्ते। अपि च ᵛअत्येन सततगामिना शीघ्रं व्याप्नुवता ᵛपाजसा आत्मीयेन बलेन ᵛनिमेघमानाः नितरां मेघादुदकं चिन्तयन्तः[4] ते ᵛसुश्चन्द्रं शोभनाह्लादनं ᵛसुपेशसम्। पेश इति रूपनाम। शोभनरूपं ᵛवर्णं ᵛदधिरे कान्तिं धारयन्ति ॥

ताँ इ॑यानो महि॒ वरू॑थमू॒तय॒ उप॒ घेदे॒ना नम॑सा गृणीमसि ।
त्रि॒तो न यान्पञ्च॒ होतॄ॒नभि॒ष्टय॑ आव॒वर्त॑दव॒राञ्चक्रि॒यावसे ॥ १४ ॥

तान्। इ॒यानः। महि॑। वरू॑थम्। ऊ॒तये॑। उप॑। घ॒। इत्। ए॒ना। नम॑सा। गृ॒णी॒म॒सि॒ ।
त्रि॒तः। न। यान्। पञ्च॑। होतॄ॑न्। अ॒भि॒ष्टये॑। आ॒ऽव॒वर्त॑त्। अ॒व॒रान्। चक्रि॑या। अव॑से ॥१४॥

ᵛतान् मरुतः ᵛमहि महत् ᵛवरूथं वरणीयं प्रशस्तं धनं तत् मरुतः ᵛऊतये रक्षणार्थम् ᵛइयानः इयाना याचमाना वयम् ॥ ' सुपां सुलुक्° ' इति जसः सुः ॥ ᵛएना अनेन ᵛनमसा नमस्कारेण स्तोत्रेण सा ᵛउप ᵛइत् उपेत्य ᵛगृणीमसि स्तुमः ॥ ᵛघ इति पादपूरणः[5]। एना इत्यत्र ' सुपां सुलुक्° ' इति तृतीयाया आजादेशः। नशब्दः समुच्चये ॥ ᵛत्रितः ऋषिश्च ᵛयान् एतान् मरुतः ᵛपञ्च ᵛहोतॄन् अध्वरात्मप्राणापानादिपञ्चवृत्त्यात्मना वर्तमानान् अत एव होमनिष्पादकान् ᵛअवरान्[6] मुख्यान्[6] ᵛअभिष्टये अभिलषितसिद्ध्यर्थं ᵛचक्रिया नाभिचक्रेण ᵛअवसे अवितुं संगन्तुम् ᵛआववर्तत् स्वस्मान्निर्जिगमिषून् प्राणान् स्वात्माभिमुखमावर्तयत्। यद्वा चक्रिया ऋष्ट्याख्येनायुधेन युक्तान् अवसे स्तुत्यादिभिः तर्पयितुम्[7] आवर्तयत्। तान् स्तुम इति पूर्वत्र संबन्धः ॥ ववर्तदिति वृतेर्ण्यन्तात् लुङि चङि रूपम् ॥

यया॑ रध्रं॑ पारयथात्यंहो॒ यया॑ नि॒दो मु॒ञ्चथं॑ वन्दि॒तार॑म् ।
अ॒र्वाची॑ सा म॑रुतो॒ या व॑ ऊ॒तिरो षु वा॒श्रेव॑ सु॒म॒तिर्जि॑गातु ॥ १५ ॥

यया॑। र॒ध्रम्। पा॒र॒यथ॑। अति॑। अं॒हः॑। यया॑। नि॒दः॑। मु॒ञ्चथ॑। व॒न्दि॒तार॑म्।
अ॒र्वाची॑। सा। म॒रु॒तः॑। या। वः॒। ऊ॒तिः॑। ओ इति॑। सु। वा॒श्राऽइ॑व। सु॒ऽम॒तिः॑। जि॒गा॒तु॒ ॥१५॥

हे मरुतः ᵛयया ऊत्या ᵛरध्रम् आराधकं यजमानम् ᵛअंहः पापम् ᵛअति ᵛपारयथ अतिक्रमयथ। ᵛयया ऊत्या ᵛवन्दितारं स्तोतारं ᵛनिदः निन्दितुः शत्रोः सकाशात् ᵛमुञ्चथ मोचयथ। हे ᵛमरुतः ᵛवः युष्मदीया ᵛया ᵛऊतिः ᵛसा ᵛअर्वाची अस्मदभिमुखा भवतु। तथा ᵛसुमतिः युष्मदीया शोभना मतिः अनुग्रहात्मिका बुद्धिश्च ᵛवाश्रेव हम्भारवं कुर्वती धेनुरिव वत्सं ᵛसु सुष्ठु ᵛओ ᵛजिगातु एव[8] गच्छतु। अस्मान् प्रति सर्वथा आगच्छत्वित्यर्थः ॥ ॥ २१ ॥

---

१. म- शब्दकारिणीभिः। २. क-च-ञ-ञ१-थ-म-व- वीणाख्यैः; ण१- वारणाख्यैः। ३. क-ख-ग-ञ-ण-ण१-थ-न-म-व- आरुणवर्णैः। ४. ञ-ण१- चिंतयन्तः। ५. क-ञ-ण-थ-न-म-व- पदपूरणः; ञ१- पूरणः। ६. क-ञ-ञ१-ण-थ-न-म-व-' अवरान् मुख्यान् ' नास्ति; ख-ग-ण१- अवरानमुख्यान्। ७. ख-ग-च-त-थ-फ- पर्ययितुम्। ८. च-ञ-म- एवम्।

'उपेम्' इति पञ्चदशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभम् अपांनपाद्देवताकम् । तथा चानुक्रान्तम्– 'उपेमपोनप्त्रीयम्' इति । सूक्तविनियोगो लैङ्गिकः ॥

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥ १ ॥

उप । ईम् । असृक्षि । वाजऽयुः । वचस्याम् । चनः । दधीत । नाद्यः । गिरः । मे ।
अपाम् । नपात् । आशुऽहेमा । कुवित् । सः । सुऽपेशसः । करति । जोषिषत् । हि ॥१॥

[v]वाजयुः वाजमन्नमात्मन इच्छन्नहम् [v]ईम् एनां [v]वचस्यां वचसः स्तोत्रस्येच्छाम् [v]उप [v]असृक्षि उपासृजामि उत्पादयामि । अपां नपातं स्तोतुं प्रवृत्तोऽस्मीत्यर्थः ॥ सृजेश्छान्दसो लुङ् । 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वाद्गुणाभावः ॥ [v]सः च [v]नाद्यः नदीनां शब्दकारिणीनां मेघस्थानामपां संबन्धी [v]आशुहेमा आशु शीघ्रं गन्ता ॥ 'हि गतौ' इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् ॥ एवंभूतः [v]अपां [v]नपात् अपां पौत्रस्थानीयः । अङ्गय ओषधिवनस्पतयो जायन्ते ओषधिवनस्पतिभ्य एषोऽग्निर्जायत इति तत्पौत्रत्वम् । एतत्संज्ञको देवः [v]गिरः । गृणातीति गीः स्तोता । तस्य [v]मे मम [v]कुवित् । बहुनामैतत् । बहुलं [v]चनः अन्नं [v]दधीत दधातु विदधातु । प्रयच्छत्वित्यर्थः । अपि चास्मान् [v]सुपेशसः शोभनरूपान् शोभनालंकारान् वा [v]करति करोतु ॥ करोतेर्व्यत्ययेन शप् । 'कःकरत्करतिकृधिकृतेष्वनदितेः' (पा. सू. ८. ३. ५०) इति विसर्जनीयस्य सत्वम् ॥ [v]हि यस्मात् अयं देवः [v]जोषिषत् स्तोत्राणि सेवते तस्मादस्मानेवमनुगृह्णात्वित्यर्थः ॥ 'जुषी प्रीतिसेवनयोः' । लेट्यडागमः । विकरणः सिप् । इडागमश्च । 'हि च' इति निघातप्रतिषेधः ॥

इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥ २ ॥

इमम् । सु । अस्मै । हृदः । आ । सुऽतष्टम् । मन्त्रम् । वोचेम । कुवित् । अस्य । वेदत् ।
अपाम् । नपात् । असुर्यस्य । मह्ना । विश्वानि । अर्यः । भुवना । जजान ॥ २ ॥

[v]अस्मै अपांनपात्संज्ञकाय देवाय [v]हृदः हृदयात् [v]सुतष्टं सुष्टु निर्मितम् [v]इमं [v]मन्त्रं सुष्टु [v]आ आभिमुख्येन [v]वोचेम ब्रवाम । [v]अस्य अस्माभिरुक्तमिमं मन्त्रं [v]कुवित् [v]वेदत् बहुलं जानातु ॥ वेत्तेर्लेट्यडागमः । 'निपातैर्यद्यदिहन्त°' इति निघातप्रतिषेधः ॥ किं स्तोत्रमिति चेदुच्यते । [v]अर्यः स्वामी अपांनपात्संज्ञको वैद्युतोऽग्निः [v]असुर्यस्य । असुरः शत्रून् क्षेप्ता । तस्य स्वभूतस्य बलस्य [v]मह्ना महिम्ना महत्त्वेन [v]विश्वानि[1] सर्वाणि [v]भुवना भुवनानि वृष्टयुदकानि वृष्ट्युत्पादनेन भूतजातानि वा [v]जजान जनयामास ॥

१. ख-ग-ण-त-ध-म–विश्वा ।

अपोनप्त्रीये वसतीवरीसमीपे एकधनासु[1] प्राप्तासु ' समन्या यन्ति ' इत्येषानुवक्तव्या । सूत्रितं च —' समन्या यन्त्युप यन्त्यन्या इति तीर्थदेशे ' (आश्व. श्रौ. ५. १) इति । सारस्वते च शस्त्रे यद्यप्सु शम्या निपतेत्तदानीम् अपोनप्त्रीयश्वरुः कार्यः । तद्वैषैव याज्या । सूत्रितं च —' समन्या यन्त्युपयन्त्यन्या इत्यातः समानं सर्वेषाम् ' (आश्व. श्रौ. १२. ६) इति ॥

समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥ ३ ॥

सम् । अन्याः । यन्ति । उप । यन्ति । अन्याः । समानम् । ऊर्वम् । नद्यः । पृणन्ति ।
तम् । ऊँ इति । शुचिम् । शुचयः । दीदिवांसम् ।
अपाम् । नपातम् । परि । तस्थुः । आपः ॥ ३ ॥

[v]अन्याः[2] वर्ष्याः[2] आपः [v]सं [v]यन्ति भूम्या संगच्छन्ते । [v]अन्याः च पूर्वं तत्रावस्थिताः [v]उप [v]यन्ति उपगच्छन्ति । ताः सर्वा आपः [v]समानं सह [v]नद्यः नदीभूताः [v]ऊर्वं समुद्रमध्ये वर्तमानं वडवानलं [v]पृणन्ति प्रीणयन्ति[3] ॥ ' पृण प्रीणने '। तौदादिकः ॥ [v]तमु तमेव [v]अपां [v]नपातं [v]शुचिं निर्मलं [v]दीदिवांसं दीप्यमानम् ॥ दीदेतिश्छान्दसो दीप्तिकर्मा । लिटः क्वसुः । ' वस्वेकाजाद्घसाम् ' इति नियमादिडभावः । ' छन्दसि वेति वक्तव्यम् ' इति वचनात् द्विर्वचनाभावः ॥ एवंभूतं [v]शुचयः शुद्धाः [v]आपः [v]परि [v]तस्थुः परिवृत्य तिष्ठन्ति । एष हि वैद्युताग्निरूपेण मेघे वर्तमानः अस्मानजीजनदिति बुद्ध्या वडवानलरूपेण वर्तमानं तं पर्युपासते इत्यर्थः । यद्वा अन्या एकधनाख्या आपः संयन्ति चात्वालोत्करयोर्मध्ये वसतीवरीभिः संगच्छन्ते । अन्या वसतीवर्याख्या आपश्चोपयन्ति उपगच्छन्ति । ऐकमत्यं प्राप्ता भवन्ति । एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्यवृष्टिद्वारा[4] नद्यो भूत्वा ऊर्वं पृणन्ति इत्यादि समानम् । एवं हि ' आपो वा अस्पर्धन्त वयं पूर्वं यज्ञं वक्ष्यामः ' (ऐ. ब्रा. २. २०) इत्यादिकं ब्राह्मणविनियोगश्चानुगृह्यते ॥

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥ ४ ॥

तम् । अस्मेराः । युवतयः । युवानम् । मर्मृज्यमानाः । परि । यन्ति । आपः ।
सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्णिक् । अप्ऽसु ॥ ४ ॥

[v]तम् अपां नपातमग्निम् [v]अस्मेराः अस्मयमाना दर्परहिताः [v]युवतयो [v]युवानं युवराजमिव [v]मर्मृज्यमानाः अत्यर्थमलंकुर्वाणाः [v]आपः ॥ ' मृजू शौचालंकारयोः ' ॥ [v]परि [v]यन्ति परितो

१. ण-थ-म-वा धनासु । २. क-ज्ञ-म-अन्यवरिष्या; ख-ग-वर्षा; ण-थ-न-व- वरिष्या । ३. ख-ग-च-ज्ञ१-ण-ण१-थ-न-' प्रीणयन्ति ' नास्ति । ४. ख-ग-त्वत्साध्य;° च-ज्ञ१-ण१-त-थ-स्वसाध्य°;ण-स्वत्साध्य°।

गच्छन्ति प्राप्नुवन्ति । [v]घृतनिर्निक्[1] क्षरणशीलोदकनिर्नेजनः । यद्वा निर्निगिति रूपनाम । दीप्तरूपः[2] [v]सः अपां नपादग्निः [v]अप्सु मेघान्तर्गतासु समुद्रगतासु वा मध्ये [v]अनिध्मः इन्धनरहित एव सन् [v]अस्मे अस्माकं [v]रेवत् धनयुक्तमन्नं यथा भवति तथा [v]शुक्रेभिः शुभैः[3] निर्मलैः [v]शिक्वभिः तेजोभिः [v]दीदाय दीप्यते ॥

अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।
कृताइवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥ ५ ॥

अस्मै । तिस्रः । अव्यथ्याय । नारीः । देवाय । देवीः । दिधिषन्ति । अन्नम् ।
कृताःऽइव । उप । हि । प्रऽसर्स्रे । अप्ऽसु । सः । पीयूषम् । धयति । पूर्वऽसूनाम् ॥ ५ ॥

[v]नारीः नेत्र्यः [v]तिस्रः [v]देवीः देव्यः इळासरस्वतीभारत्याख्याः [v]अव्यथ्याय अव्यथनाय [v]अस्मै [v]देवाय अपां नपाते [v]अन्नं सोमाख्यं [v]दिधिषन्ति धारयन्ति ॥ 'धिष शब्दे'। जौहोत्यादिकः। व्यत्ययेनान्तादेशः । धातूनामनेकार्थत्वादत्र धारणार्थः ॥ [v]अप्सु उदकेषु [v]कृताइव [v]उप [v]प्रसर्स्रे प्रसरन्ति ॥ 'सृ गतौ'। लिटि 'इरयो रे' इति रेआदेशः । छान्दसो हलादिशेषाभावः ॥ यस्मादेवं तस्मात् [v]पूर्वसूनां पूर्वं ब्रह्मणः सकाशादुत्पन्नानामपां [v]पीयूषं सारभूतं सोमाख्यममृतं [v]सः अपां नपादग्निः [v]धयति पिबति । [v]हि[4] पूरणः[4] ॥ ॥ २२ ॥

अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः संपृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥ ६ ॥

अश्वस्य । अत्र । जनिम । अस्य । च । स्वः । द्रुहः । रिषः । सम्ऽपृचः । पाहि । सूरीन् ।
आमासु । पूर्षु । परः । अप्रऽमृष्यम् । न । अरातयः । वि । नशन् । न । अनृतानि ॥६॥

[v]अत्र अस्मिन्नपांनपात्संज्ञके देवे [v]अश्वस्य [v]जनिम जन्म भवति । अपांनप्त्रधिष्ठितात् समुद्रात् उद्वैःश्रवसो जातत्वात् । किं बहुना । [v]अस्य [v]च [v]स्वः सुष्ठुरणीयस्य सर्वस्य जगतो जन्म अस्मिन्नेव भवति । अयं हि मेघमध्ये वर्तमानो वृष्टिद्वारेण सर्वं जगज्जनयति । तादृशोऽपांनपात्त्वं [v]द्रुहः द्रोग्धुः अपहर्तुः । [v]रिषः हिंसकस्य च [v]संपृचः संपर्कात् [v]सूरीन् स्तोतॄनस्मान् [v]पाहि रक्ष । [v]आमासु अपरिपक्वासु [v]पूर्षु पूरयितव्यास्वप्सु [v]परः परस्तात् वर्तमानम् [v]अप्रमृष्यम् अप्रधृष्यमाणं देवम् [v]अरातयः अदातारः पुरुषाः [v]न [v]वि [v]नशन् न प्राप्नुवन्ति ॥ नशतिर्व्याप्तिकर्मा । लेट्यडागमः ॥ [v]अनृतानि मायाविनो रक्षांसि च [v]न प्राप्नुवन्ति ॥

१. क-च-ञ-ञ१-ण-म–घृतनिर्णिक्; ख-ग-ण१–घृतनिर्मिक । २. क-ख-ग-च-ञ-ण-ण१-थ-न-म-व-दीप्तिरूपः । ३. थ–शुक्रैः । ४. क-ञ-ञ१-ण-थ-न-म-व–'हि पूरणः' नास्ति ।

स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्वन्तर्वसुदेयाय विधते वि भाति ॥ ७ ॥

स्वे । आ । दमे । सुऽदुघा । यस्य । धेनुः । स्वधाम् । पीपाय । सुऽभु । अन्नम् । अत्ति ।
सः । अपाम् । नपात् । ऊर्जयन् । अप्ऽसु । अन्तः । वसुऽदेयाय । विधते । वि । भाति ॥७॥

यः vअपां नपात् vस्वे vदमे स्वकीये गृहेऽन्तरिक्षलक्षणे vआ सीदति । vयस्य च vधेनुः माध्यमिका वाक् vसुदुघा सुखेन दोग्धव्या भवति । स देवः vस्वधां वृष्ट्युदकं vपीपाय वर्धयति ॥ ' ष्यायी वृद्धौ ' । ' लिड्यङोश्च ' इति पीभावः ॥ vसुभु सुष्ठु भूतं वृष्टेः सकाशादुत्पन्नं हविर्लक्षणम् vअन्नं च vअत्ति भक्षयति । vसः अपांनपात्संज्ञको देवः vऊर्जयन् बलं कुर्वन् vअप्स्वन्तः मेघस्थास्वप्सु मध्ये vविधते परिचरते यजमानाय vवसुदेयाय धनदानार्थं vवि vभाति विशेषेण दीप्यते ॥

यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥ ८ ॥

यः । अप्ऽसु । आ । शुचिना । दैव्येन । ऋतऽवा । अजस्रः । उर्विया । विऽभाति ।
वयाः । इत् । अन्या । भुवनानि । अस्य । प्र । जायन्ते । वीरुधः । च । प्रऽजाभिः ॥८॥

vयः अपां नपात् vऋतावा । ऋतमित्युदकनाम । तद्वान् सत्यवान् वा vअजस्रः नित्यः एकरूपेण सदा वर्तमानः vउर्विया उरुर्विस्तीर्णः vअप्सु मेघस्थासु मध्ये vशुचिना शोचकेन vदैव्येन देवसंबन्धिना तेजसा vआ समन्तात् vविभाति विशेषेण प्रकाशते । vअस्य अपांनपातः vअन्या अन्यानि vभुवनानि सर्वाणि भूतजातानि vवया vइत् शाखा एव । vवीरुधः ओषधयः vप्रजाभिः स्वकीयाभिः[1] पुष्पफलादिभिः सह अस्मादेव vप्र vजायन्ते । vच पूरणः[2] ॥

पूर्वोक्ते[3] सारस्वतसत्रस्यापोनप्त्रीये चरौ ' अपां नपादा हि ' इत्येषानुवाक्या । सूत्रितं च- ' अपां नप्त्रे चरुमपां नपादा ह्यस्थादुपस्थम् ' (आश्व. श्रौ. १२. ६) इति ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥ ९ ॥

अपाम् । नपात् । आ । हि । अस्थात् । उपऽस्थम् । जिह्मानाम् । ऊर्ध्वः । विऽद्युतम् । वसानः ।
तस्य । ज्येष्ठम् । महिमानम् । वहन्तीः । हिरण्यऽवर्णाः । परि । यन्ति । यह्वीः ॥ ९ ॥

---

१. ण-थ-' स्वकीयाभिः ' नास्ति; म-स्वकीयादिभिः । २. क-च-ञ-ञ१-ण-थ-न-म-व-' च पूरणः ' नास्ति । ३. ख-ग-ण-त-थ-पूर्वोक्त° ।

अपांनपात्संज्ञकोऽग्निः [v]उपस्थम् अपामुपस्थानमन्तरिक्षम् [v]आ [v]ह्यस्थात् आस्थितवान् आरूढवान् खलु । किं कुर्वन् । [v]जिह्मानां कुटिलगतीनामपां मध्ये [v]ऊर्ध्वः स्वयमूर्ध्वं ज्वलन् [v]विद्युतं विद्योतमानं मेघं [v]वसानः आच्छादयन् । अन्तरिक्षमास्थाय वर्षणं कृतवान् । [v]तस्य वर्षितुरपांनपातः [v]ज्येष्ठं प्रशस्यतमं [v]महिमानं माहात्म्यं [v]वहन्तीः वहन्त्यः सर्वत्र प्रापयन्त्यः [v]यह्वीः यह्व्यः महत्यः [v]हिरण्यवर्णाः । नदीनामैतत् । हिरण्यवन्निर्मलरूपा नद्यः [v]परि [v]यन्ति परितो गच्छन्ति । अपांनप्त्रा महती वृष्टिरस्माकं प्रवहनायोत्पादिता इति कृतज्ञतया तदीयं माहात्म्यं सर्वत्र प्रकटयन्त्य इव नद्यः प्रवहन्तीत्यर्थः ॥

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ १० ॥

हिरण्यऽरूपः । सः । हिरण्यऽसंदृक् । अपाम् । नपात् । सः । इत् । ऊँ इति । हिरण्यऽवर्णः । हिरण्ययात् । परि । योनेः । निऽसद्य । हिरण्यऽदाः । ददति । अन्नम् । अस्मै ॥ १० ॥

[v]सः [v]अपां [v]नपात् [v]हिरण्यरूपः । रूप्यते इति रूपं शरीरम् । सुवर्णमयशरीरो हितरमणीयशरीरो वा । तथा [v]हिरण्यसंदृक् । सम्यक् पश्यन्तीति संदृश इन्द्रियाणि । सुवर्णनयेन्द्रियो हितरमणीयेन्द्रियो वा । [v]सेदु स एवापांनपात् [v]हिरण्यवर्णः हिरण्यसदृशकान्तियुक्तः । एवंभूतः सन् [v]हिरण्ययात् सुवर्णमयात् [v]योनेः स्थानात् [v]परि उपरि [v]निषद्य उपविश्य राजते इति शेषः । [v]अस्मै ईदृग्विधाय अपां नपाते [v]हिरण्यदाः दक्षिणारूपस्य सुवर्णस्य दातारो यजमानाः [v]अन्नं हविर्लक्षणं [v]ददति प्रयच्छन्ति ॥ ॥ २३ ॥

तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥ ११ ॥

तत् । अस्य । अनीकम् । उत । चारु । नाम । अपीच्यम् । वर्धते । नप्तुः । अपाम् । यम् । इन्धते । युवतयः । सम् । इत्था । हिरण्यऽवर्णम् । घृतम् । अन्नम् । अस्य ॥ ११ ॥

[v]अस्य [v]अपां [v]नप्तुः देवस्य [v]अनीकं रश्मिसमूहरूपं शरीरं [v]चारु शोभनम् । [v]उत अपि च अस्य [v]नाम संज्ञा च चारु शोभनम् । न पातयति न विनाशयतीति नपादिति तद्व्युत्पत्तेः । तदुभयम् [v]अपीच्यम् । अन्तर्हितनामैतत् । मेघान्तर्हितं सत् [v]वर्धते । [v]युवतयः संगमनस्वभावा आपः [v]हिरण्यवर्णं हिरण्यसमानतेजसं [v]यम् अपांनपातम् [v]इत्था अमुत्रान्तरिक्षे [v]सम् [v]इन्धते सम्यक् दीपयन्ति । [v]अस्य च देवस्य [v]घृतं क्षरणशीलमुदकम् [v]अन्नं भक्ष्यम् । अबिन्धनो ह्यसौ वैद्युतोऽग्निः ॥

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्मिः ॥ १२ ॥

अस्मै । बहूनाम् । अवमाय । सख्ये । यज्ञैः । विधेम । नमसा । हविःऽभिः ।
सम् । सानु । मार्ज्मि । दिधिषामि । बिल्मैः । दधामि । अन्नैः । परि । वन्दे । ऋक्ऽभिः ॥१२॥

vअस्मै पुरोवर्तिने vबहूनां देवानाम् vअवमाय आद्याय vसख्ये अस्माभिः समानख्यानाय[1] अपां नपाते vयज्ञैः यागसाधनैः vहविर्भिः चरुपुरोडाशादिभिः vनमसा नमस्कारेण च vविधेम परिचरेम । अस्यापांनपातः vसानु समुच्छ्रितप्रदेशं vसं vमार्ज्मि सम्यक् शोधयामि अलंकरोमि वा ॥ ' मृजू शौचालंकारयोः ' । ' चादिलोपे विभाषा ' इत्यस्य निघातप्रतिषेधः ॥ vदिधिषामि धारयामि च vबिल्मैः भासनैः काष्ठैरेनम् ॥ ' धिष शब्दे ' । अयं धारणार्थोऽपि । जुहोत्यादित्वात् शपः श्लुः । मिपो व्यत्ययेनाडागमः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ vदधामि धारयामि चैनं गार्हपत्यादिरूपेण स्थितम्[2] vअन्नैः हविर्लक्षणैः । तथा vऋग्भिः मन्त्रैः vपरि vवन्दे परितः[3] स्तौमि[3] ॥

स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥ १३ ॥

सः । ईम् । वृषा । अजनयत् । तासु । गर्भम् । सः । ईम् । शिशुः । धयति । तम् । रिहन्ति ।
सः । अपाम् । नपात् । अनभिम्लातऽवर्णः । अन्यस्यऽइव । इह । तन्वा । विवेष ॥ १३ ॥

vस vईं सोऽयमपांनपात्संज्ञको देवः vवृषा सेक्ता भूत्वा vतासु मेघस्थास्वप्सु vगर्भम् vअजनयत् स्वात्मानमेव गर्भरूपेण वर्षणार्थं कृतवानित्यर्थः । गर्भो भूत्वा च vस vईं सोऽयं माध्यमिकः[4] वैद्युतोऽग्निस्तासां vशिशुः पुत्रः सन् vधयति मेघस्थास्ताः पिबति । अविन्धनो ह्यसौ । vतं पुत्रस्थानीयमद्भिः आपश्च vरिहन्ति लिहन्ति ॥ ' लिह आस्वादने ' । कपिलकादित्वाल्लत्वविकल्पः ॥ vसः अयम् vअपां vनपात् वृष्ट्या सह भूमौ निपतितः vअनभिम्लातवर्णः अभितो म्लातो म्लानः क्षीणो वर्णो यस्य तद्विपरीतोऽत्यर्थं दीप्यमानः सन् vइह अस्मिन् लोके vअन्यस्येव । इवशब्दोऽवधारणे । अन्यस्य पार्थिवस्यैवाग्नेः vतन्वा शरीरेण काष्ठेन्धनत्वलक्षणेन vविवेष व्याप्तो बभूव ॥ ' विष्लृ व्याप्तौ '॥

अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥ १४ ॥

अस्मिन् । पदे । परमे । तस्थिऽवांसम् । अध्वस्मऽभिः । विश्वहा । दीदिऽवांसम् ।
आपः । नप्त्रे । घृतम् । अन्नम् । वहन्तीः । स्वयम् । अत्कैः । परि । दीयन्ति । यह्वीः ॥१४॥

१. ख-ग-च-ण-ण१-त-थ-न-व–समानाख्यानाय । २. क-ङ्ग-ङ्ग१-ण-थ-न-म-व–' स्थितं ' नास्ति ।
३. ख-ग-च-ङ्ग१-ण-ण१-त-थ-न-व–परिस्तौमि । ४. क-ग-च-ङ्ग-न-म-व–माध्यमकः ।

[v]परमे उत्कृष्टे [v]अस्मिन् [v]पदे अन्तरिक्षलक्षणे स्थाने [v]तस्थिवांसं स्थितवन्तम् [v]अध्वस्मभिः ध्वंसनरहितैस्तेजोभिः [v]विश्वहा सर्वाण्यहानि [v]दीदिवांसं दीप्यमानमपां नपातं [v]यह्वीः यहवो महत्यः [v]आपः [v]स्वयम् आत्मनैव [v]अर्कैः अतनशीलैः सततगन्तृभिः स्वकीयै रूपैः [v]परि [v]दीयन्ति परिगच्छन्ति ॥ दीयतिर्गतिकर्मा । 'दीङ् क्षये' । व्यत्ययेन परस्मैपदम् ॥ किं कुर्वत्यः । [v]नप्त्रे अपां नपाते [v]घृतं क्षरणशीलोदकात्मकम् [v]अन्नं [v]वहन्तीः वहन्त्यः ॥

अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १५ ॥

अयांसम् । अग्ने । सुऽक्षितिम् । जनाय । अयांसम् । उ इति । मघवत्ऽभ्यः । सुऽवृक्तिम् ।
विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥१५॥

हे [v]अग्ने [v]सुक्षितिं शोभननिवासं त्वाम् [v]अयांसम् उपागच्छम् । किमर्थम् । [v]जनाय अस्मदीयपुत्रादिजनार्थम्[1] । तथा [v]मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यश्च [v]सुवृक्तिं शोभनावर्जकं वह्निपयं स्तोत्रम् [v]अयांसम् उपागच्छम् । 'यम उपरमे' । अतः कारणात् [v]यत् [v]भद्रं सर्वे [v]देवाः [v]अवन्ति रक्षन्ति [v]विश्वं सर्वं [v]तत् भद्रम् अस्माकं भवतु । [v]सुवीराः सुपुत्रा वयं [v]विदथे यज्ञे गृहे वा [v]बृहत् प्रौढं स्तोत्रं [v]वदेम उच्चारयाम[2] ॥ ॥ २४ ॥

'तुभ्यम्' इति षड्चं चतुर्थं सूक्तं गार्त्समदं जागतम् । प्रथमाया इन्द्रो मधुश्च देवता । द्वितीयाया मरुतो माधवश्च । तृतीयायास्त्वष्टा शुक्रश्च । चतुर्थ्या अग्निः शुचिश्च । पञ्चम्या इन्द्रो नभश्च । षष्ठ्या मित्रावरुणौ नभस्यश्च । तथा चानुक्रान्तं—'तुभ्यं षड्तव्यं तु जागतं तु' इति । दशरात्रे षष्ठेऽहनि ऋतुयाजेषु ऋकूशिरस्कैः प्रैषैः प्रेषितव्यं यष्टव्यं च । तत्राद्यानां पण्णां प्रैषाणामुपरिष्टाद्देवताः षड्चोऽहोरात्रादिभिः क्रमेणावपनीयाः । तथा च सूत्रितम्—'उपरिष्टात्त्वृच ऋतुयाजानाम्' इत्युपक्रम्य 'तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादश' (आश्व. श्रौ. ८.१) इत्यन्तेन ॥

तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः ।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥ १ ॥

तुभ्यम् । हिन्वानः । वसिष्ट । गाः । अपः । अधुक्षन् । सीम् । अविऽभिः । अद्रिऽभिः । नरः ।
पिब । इन्द्र । स्वाहा । प्रऽहुतम् । वषट्ऽकृतम् ।
होत्रात् । आ । सोमम् । प्रथमः । यः । ईशिषे ॥ १ ॥

हे इन्द्र [v]तुभ्यं त्वदर्थं [v]हिन्वानः प्रेर्यमाणः सोमः [v]गाः गोविकाराणि दधिपयःप्रभृतीनि श्रयणद्रव्याणि वसतीवर्याख्याः [v]अपः च [v]वसिष्ट वस्ते आच्छादयति । तैः संयुज्यत इत्यर्थः । [v]नरः यज्ञस्य नेतारोऽध्वर्यवश्च [v]सीम् एनं सोमम् [v]अविभिः अवेर्वालमयैर्दशापवित्रैः [v]अद्रिभिः ग्रावभिश्च [v]अधुक्षन् अक्षारयन् । ग्रावभिरभिषुत्य दशापवित्रेण पुनन्तीत्यर्थः । हे [v]इन्द्र [v]यः त्वम् [v]ईशिषे सर्वस्य

१. च-थ-°जननार्थम् । २. ख-च-फ-उच्चारयाम । उ पूरणः; ग-ण१-उच्चारयाम । पूरणः ।

जगत ईश्वरो भवसि सः[1] त्वं [V]प्रथमः अन्येभ्यो देवेभ्यः पूर्वभावी सन् [V]स्वाहा स्वाहाकारेण [V]प्रहुतं प्रकर्षेणाग्नौ क्षिप्तं [V]वषट्कृतं वषट्कारेण च त्यक्तं तं [V]सोमं [V]होत्रात् होतुर्यागात् [V]आ समन्तात् [V]पिब ॥

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥ २ ॥

यज्ञैः । सम्ऽमिश्लाः । पृषतीभिः । ऋष्टिऽभिः । यामन् । शुभ्रासः । अञ्जिषु । प्रियाः । उत ।
आऽसद्य । बर्हिः । भरतस्य । सूनवः । पोत्रात् । आ । सोमम् । पिबत । दिवः । नरः ॥२॥

हे मरुतः [V]यज्ञैः यागैः [V]संमिश्लाः संयुक्ताः [V]पृषतीभिः स्ववाहनभूताभिः पृषद्वतीभिर्वडवाभिर्युक्ते [V]यामन् यामनि गमनसाधने रथेऽवस्थिताः [V]ऋष्टिभिः स्वकीयैरायुधैः [V]शुभ्रासः शुभ्राः शोभमानाः । उतशब्दश्चार्थे । [V]अञ्जिषु आभरणेषु [V]प्रियाः च हे [V]भरतस्य [V]सूनवः सर्वस्य जगतो भर्तुः रुद्रस्य पुत्राः [V]दिवो [V]नरः दिवोऽन्तरिक्षस्य नेतारः एवंभूता हे मरुतस्ते यूयं [V]बर्हिः आस्तीर्णे बर्हिषि [V]आसद्य उपविश्य [V]पोत्रात् पोतुर्यागात् [V]सोमम् [V]आ [V]पिबत ॥

तृतीयसवने ' अमेव नः ' इत्येषा नेष्टुः प्रस्थितयाज्या च । तथा च सूत्रितम्—' अमेव नः सुहवा आ हि गन्तनेन्द्राविष्णू पिबतं मध्वो अस्य ' (आश्व. श्रौ. ५. ५) इति ॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥ ३ ॥

अमाऽइव । नः । सुऽहवाः । आ । हि । गन्तन । नि । बर्हिषि । सदतन । रणिष्टन ।
अथ । मन्दस्व । जुजुषाणः । अन्धसः । त्वष्टः । देवेभिः । जनिऽभिः । सुमत्ऽगणः ॥३॥

इवशब्दोऽवधारणे । हे [V]सुहवाः शोभनाह्वानास्त्वष्टृप्रभृतयः [V]नः अस्मान् [V]अमेव सहैव [V]आ [V]गन्तन आगच्छत ॥ गमेश्छान्दसः शपो लुक् । ' तप्तनप्तनथनाश्च ' इति तनबादेशः । हिशब्दः पूरणः॥ आगत्य च [V]बर्हिषि वेद्यामास्तीर्णे [V]नि [V]सदतन निषण्णा भवत ॥ सदेश्छान्दसः सीदादेशाभावः ॥ उपविश्य च [V]रणिष्टन रमध्वम् ॥ रण शब्दार्थः । अत्र क्रीडायां वर्तते धातूनामनेकार्थत्वात् । अस्माच्छान्दसो लुङ् । पूर्ववत्तनबादेशः ॥ [V]अथ अनन्तरं हे [V]त्वष्टः [V]देवेभिः अन्यैर्देवैः [V]जनिभिः देवपत्नीभिश्च [V]सुमद्गणः शोभनगणस्त्वम् [V]अन्धसः सोमलक्षणस्यान्नस्य । द्वितीयार्थे षष्ठी । सोमलक्षणमन्नं [V]जुजुषाणः सेवमानः [V]मन्दस्व तृप्तो भव ॥

आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्त्वं भागस्य तृप्णुहि ॥ ४ ॥

आ । वक्षि । देवान् । इह । विप्र । यक्षि । च । उशन् । होतः । नि । सद । योनिषु । त्रिषु ।
प्रति । वीहि । प्रऽस्थितम् । सोम्यम् । मधु । पिब । आग्नीध्रात् । त्वम् । भागस्य । तृप्णुहि ॥४॥

---

१. ख-ग-च-ज्ञ१-ण-ण१-थ-न-व-' सः ' नास्ति ।

हे [v]विप्र मेधाविन्नग्ने [v]देवान् यष्टव्यानिन्द्रादीन् [v]आ [v]वक्षि आवह। [v]यक्षि [v]च तान् यज च। हे [v]होतः देवानामाह्वातस्त्वं च [v]उशन् अस्मदीयं कामयमानः सन् [v]त्रिषु [v]योनिषु स्थानेषु गार्हपत्यादिलक्षणेषु [v]नि[1] [v]पद[1] उपविश। उपविश्य च [v]प्रस्थितं होमार्थमुत्तरवेदिं प्रत्यानीतं [v]सोम्यं सोममयं [v]मधु [v]प्रति [v]वीहि प्रतिकामयस्व। कामयित्वा च [v]आग्नीध्रात् अग्नीध्रयागात्[2] सोमं [v]पिब। पीत्वा च [v]तव [v]भागस्य त्वदीयेन भागेन [v]तृप्णुहि तृप्तो भव ॥

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥ ५ ॥

एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः । प्रऽदिवि । बाह्वोः । हितः ।
तुभ्यम् । सुतः । मघऽवन् । तुभ्यम् । आऽभृतः । त्वम् । अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥५॥

हे इन्द्र [v]स्यः सः [v]एषः सोमः [v]ते तव [v]तन्वः शरीरस्य [v]नृम्णवर्धनः बलस्य वर्धकः । तुभ्यं सुत इत्युत्तरत्र संबन्धः। येन सोमेन [v]प्रदिवि पुराणे त्वयि [v]बाह्वोः हस्तयोः [v]सहः परेषामभिभवनलक्षणं सामर्थ्यम् [v]ओजः तत्कारणभूतं बलं च [v]हितः निहितं भवति ॥ लिङ्व्यत्ययः ॥ हे [v]मघवन् धनवन्निन्द्र [v]तुभ्यं त्वदर्थं तादृशः सोमः [v]सुतः अध्वर्युभिरभिषुतः । [v]तुभ्यं होतुम् [v]आभृतः उत्तरवेद्यां प्रत्याहृतश्च । [v]अस्य इमं सोमं [v]ब्राह्मणात् ब्राह्मणाच्छंसिनो यागात् [v]तृपत् तृप्यन् [v]त्वम् [v]आ [v]पिब आभिमुख्येन पिब ॥ ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् अस्य इति चतुर्थ्यर्थे षष्ठी ॥

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निषदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥ ६ ॥

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । सत्तः । होता । निऽषदः । पूर्व्याः । अनु ।
अच्छ । राजाना । नमः । एति । आऽवृतम् । प्रऽशास्त्रात् । आ । पिबतम् । सोम्यम् । मधु ॥६॥

हे मित्रावरुणौ मदीयमिमं [v]यज्ञं [v]जुषेथां सेवेथाम् । [v]मे मम [v]हवस्य हवमाह्वानम् ॥ पूर्ववत् कर्मणि षष्ठी ॥ [v]बोधतम् अवगच्छतम् । तथा [v]सत्तः निषण्णः अस्मदीयः [v]होता [v]पूर्व्याः चिरंतनीः [v]निषदः । वाङ्मात्रमेतत् । शस्त्रलक्षणा वाचः [v]अनु शंसतीति शेषः । उद्गातृभिः कृतस्य स्तोत्रस्यानुगुण्येनाज्यादीनि शस्त्राणि शंसतीत्यर्थः । अपि च [v]नमः सोमलक्षणमन्नम् [v]आवृतम् ऋत्विग्भिर्वेष्टितं [v]राजाना राजमानौ युवाम् [v]अच्छ आभिमुख्येन [v]एति गच्छति प्राप्नोति । तादृशं [v]सोम्यं सोममयं [v]मधु मादकं हविः [v]प्रशास्त्रात् प्रशास्तुर्यागात् [v]आ [v]पिबतम् आभिमुख्येन पिबतम् ॥ ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[3] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके सप्तमोऽध्यायः समाप्तः ॥

---

१. ख-ग-ण-त-थ-म–निषीद । २. क-झ-म–भाग्नीध्रयागात्; ख-ग-ण१-न-व–अग्नीधो यागात् ।
३. क-म–सायणामात्येन; त–सायणार्येण ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ द्वितीयाष्टकस्याष्टमोऽध्याय आरभ्यते । द्वितीयमण्डलस्य चतुर्थानुवाके 'मन्दस्व' इति षड्ऋचं पञ्चमं सूक्तं गार्त्समदम् । 'मन्दस्व' इत्यनुक्रान्तम् । पूर्वत्र 'ऋतव्यं तु जागतं तु' इति तुशब्द-प्रयोगादिदमपि जागतमृतव्यम् । तत्राद्याश्चतस्र ऋचो द्रविणोदोदेवताकाः पञ्चम्याश्विनी षष्ठ्याग्नेयी । दशरात्रे षष्ठेऽहनि ऋतुयाजेषु प्रैषानृक्शिरस्कान् कृत्वा तैः प्रैषैः प्रेषितव्यं यष्टव्यं च । तत्र सप्तमादीनां प्रैषाणामुपरिष्टात् 'मन्दस्व' इत्याद्याः षड्ऋचः क्रमेण प्रक्षेपणीयाः । सूत्रं तु पूर्वमेवोदाहृतम् ॥

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ १ ॥

मन्दस्व । होत्रात् । अनु । जोषम् । अन्धसः । अध्वर्यवः । सः । पूर्णाम् । वष्टि । आऽसिचम् ।
तस्मै । एतम् । भरत । तत्ऽवशः । ददिः ।
होत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ १ ॥

हे द्रविणोदः द्रविणसो धनस्य दातः एतन्नामक देव vअन्धसः देवानामन्नरूपस्य सोमस्य सोमेन vहोत्रात् होतृकर्तृकाद्यागात् vअनु vजोषं प्रीतिमनु vमन्दस्व । हे vअध्वर्यवः vसः द्रविणोदाः vपूर्णां संपूर्णाम् vआसिचं सिच्यमानाहुतिं vवष्टि कामयते । अतः vतस्मै द्रविणोदसेऽग्नये vएतं सोमं vभरत प्रापयत । vतद्वशः तत्कामो द्रविणोदाः vददिः दाता युष्माकमभीष्टफलस्य दाता भवतीति शेषः । किंच हे vद्रविणोदः vहोत्रात् होतुर्यागात् vऋतुभिः इषमासाभिमानिभिर्ऋतुदेवैः सह vसोमं vपिब ॥

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ २ ॥

यम् । ऊँ इति । पूर्वम् । अहुवे । तम् । इदम् । हुवे ।
सः । इत् । ऊँ इति । हव्यः । ददिः । यः । नाम । पत्यते ।
अध्वर्युऽभिः । प्रऽस्थितम् । सोम्यम् । मधु ।
पोत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ २ ॥

हे द्रविणोदः vयमु यं त्वामेव vपूर्वं होतृकर्तृके सोमयागे vअहुवे आहूतवानस्मि vइदं संप्रति vतं तमेव पोतृकर्तृके सोमयागे vहुवे आह्वयामि । vसेत् स एव द्रविणोदाः vहव्यः ह्वातव्यः ॥

vउ इति पूरणे । vद्रदिः अभीष्टफलस्य दाता vयो vनाम यः खलु vएषते देवतास्वेनेष्टे तस्मै द्रविणोदसे vसोम्यं सोमात्मकं vमधु vअध्वर्युभिः vप्रस्थितं प्रणीतमासीत् । हे vद्रविणोदः vपोत्रात् पोतुर्यागात् vऋतुभिः ऊर्जसंज्ञकैः सह vसोमं vपिब ॥

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूयं धृष्णो अभिगूर्या त्वं नेष्टात्सोमं द्रविणोदः पिब ऋतुभिः ॥ ३ ॥

मेद्यन्तु । ते । वह्नयः । येभिः । ईयसे । अरिषण्यन् । वीळयस्व । वनस्पते ।
आऽऊयूय । धृष्णो इति । अभिऽगूर्य । त्वम् । नेष्टात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ ३ ॥

हे vद्रविणोदः vयेभिः यैर्वाहैः vईयसे प्राप्नोषि । vते तव ' वह्नयो वोढारः ' (निरु. ८. ३) इति यास्केनोक्तत्वात् । ते vमेद्यन्तु तृप्यन्तु । हे vवनस्पते वनानां पते vअरिषण्यन् अहिंसन् vवीळयस्व दृढीभव । हे vधृष्णो धर्षक vत्वम् vआयूय आगत्य vअभिगूर्य उद्यम्य vनेष्टात् नेष्टुर्यागात् vऋतुभिः सहःसंज्ञकैः सह vसोमं vपिब ॥

अपाद्धोत्रादुत पोत्रादमत्तोत नेष्टादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तुममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥ ४ ॥

अपात् । होत्रात् । उत । पोत्रात् । अमत्त । उत । नेष्टात् । अजुषत । प्रयः । हितम् ।
तुरीयम् । पात्रम् । अमृक्तम् । अमर्त्यम् । द्रविणःऽदाः । पिबतु । द्राविणःऽदसः ॥ ४ ॥

अच्छावाकस्येयम् । यो द्रविणोदाः vहोत्रात् होतुर्यागात् सोमम् vअपात् पीतवान् । vउत किंच vपोत्रात् पोतुर्यागात् vअमत्त सोमं पीत्वा अमाद्यत् । vउत अपि च vनेष्टात् नेष्टुर्यागात् vहितं दत्तं vप्रयः देवानामन्नरूपं सोमम् vअजुषत असेवित । सः vद्राविणोदसः हवीरूपद्रविणस्य प्रदातृभ्य ऋत्विग्भ्यो हितः ॥ ' ऋत्विजोऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति[1] ' (निरु. ८. २) इति यास्केनोक्तत्वात् ॥ तादृशः vद्रविणोदाः vअमृक्तं दशापवित्रेण अमृष्टम् vअमर्त्यम् अमरणसाधनं vतुरीयं vपात्रं चतुर्थपात्रस्थं सोमं vपिबतु ॥

अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥ ५ ॥

अर्वाञ्चम् । अद्य । यय्यम् । नृऽवाहनम् । रथम् । युञ्जाथाम् । इह । वाम् । विऽमोचनम् ।
पृङ्क्तम् । हवींषि । मधुना । आ । हि । कम् । गतम् ।
अथ । सोमम् । पिबतम् । वाजिनीवसू इति वाजिनीऽवसू ॥ ५ ॥

---

१. ख-ण-ध-म-जनयन्ति च ।

हे अश्विनौ ᵛअद्य अस्मिन्नहनि ᵛयज्यं यज्यिं गन्तारं ᵛनृवाहणं नेत्रोर्युवयोर्वोढारम् ᵛइह यज्ञे ᵛवां युवयोः ᵛविमोचनं विमोचयितारं ᵛरथम् ᵛअर्वाञ्चं यथा अर्वाक् भवति तथा ᵛयुञ्जाथाम्। किंच ᵛमधुना स्वादुरसेन ᵛहवींषि ᵛपृङ्क्तं संयोजयतम्। अथ च ᵛआ ᵛगतम् आगच्छतम् ॥ ᵛहि ᵛकम् इति पूरणे ॥ ᵛअथ अनन्तरं हे ᵛवाजिनीवसू। वाज एव वाजिनी। अन्नेन वासयितारौ बलवर्धनौ वा ᵛसोमं ᵛपिबतम् ॥

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥ ६ ॥

जोषि । अग्ने । सम्ऽइधम् । जोषि । आऽहुतिम् । जोषि । ब्रह्म । जन्यम् । जोषि । सुऽस्तुतिम् ।
विश्वेभिः । विश्वान् । ऋतुना । वसो इति । महः ।
उशन् । देवान् । उशतः । पायय । हविः ॥ ६ ॥

हे ᵛअग्ने ᵛसमिधं ᵛजोषि जुषस्व । ᵛआहुतिं[1] ᵛजोषि जुषस्व । ᵛब्रह्म शस्त्रं ᵛजन्यं जनेभ्यो हितं ᵛजोषि जुषस्व । ᵛसुष्टुतिं शोभनस्तोत्रं ᵛजोषि जुषस्व । किंच ᵛवसो सर्वेषामावासभूत हे अग्ने ᵛउशतः कामयमानान् ᵛमहः महतः ᵛविश्वान् सर्वान् ᵛदेवान् ᵛउशन् कामयमानस्त्वम् ᵛऋतुना तपस्यसंज्ञकेन सह तथा ᵛविश्वेभिः सर्वैर्देवैः सह ᵛहविः हवीरूपं सोमं ᵛपायय ॥ ॥ १ ॥

' उदु ष्यः ' इत्येकादशर्चं षष्ठं सूक्तं गार्त्समदं त्रैष्टुभं सवितृदेवताकम् । अत्रानुक्रमणिका— ' उदु ष्य एकादश सावित्रम् ' इति । व्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे एतत्सूक्तं सावित्रनिविद्धानीयम् । ' व्यूळ्हश्चेत् ' इति खण्डे सूत्रितं—' षष्ठस्योदु ष्य देव इति गार्त्समदम् ' (आश्व. श्रौ. ८. ८) इति ।

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । सवाय । शश्वत्ऽतमम् । तत्ऽअपाः । वह्निः । अस्थात् ।
नूनम् । देवेभ्यः । वि । हि । धाति । रत्नम् । अथ । आ । अभजत् । वीतिऽहोत्रम् । स्वस्तौ ॥ १ ॥

ᵛस्यः सः ᵛदेवः द्योतमानः ᵛसविता ᵛसवाय लोकानां प्रसवाय अनुज्ञायै[2] ᵛशश्वत्तमं प्रतिदिनम् ᵛउत् ᵛअस्थात् उत्तिष्ठति । कीदृशः सविता । ᵛतदपाः तत्प्रसवकर्मा ॥ ' अपः अग्रः ' (नि.२.१.१) इति कर्मनामसु पाठात् ॥ ᵛवह्निः वोढा जगताम्। किंच ᵛनूनं संप्रति ᵛदेवेभ्यः स्तोतृभ्यः ᵛरत्नं धनं ᵛवि ᵛहि ᵛधाति प्रयच्छति । ᵛहि इति पूरणे । ᵛअथ अपि च ᵛवीतिहोत्रं कान्तयज्ञं यजमानं ᵛस्वस्तौ अविनाशे क्षेमे ᵛअभजत् भागिनं करोतु । यद्यपि स्वस्तिशब्दः विभक्त्यन्तनिर्दिष्टः[3] शब्दपरः[3] तथापि अपर्यवसानादर्थपरो भवति ॥

१. म–आहुतिं पुरोडाशसोमादिकान्। २. ख-ग-च-ण१–अनुज्ञानाय । ३. ख-ग-च-ण-ण१-न-ब–°निर्दिष्टशब्दः परः ।

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः ससर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥ २ ॥

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽपाणिः । ससर्ति ।
आपः । चित् । अस्य । व्रते । आ । निऽमृग्राः । अयम् । चित् । वातः । रमते । परिऽज्मन् ॥२॥

[v]देवः द्योतमानः सविता [v]पृथुपाणिः महत्करः[1] [v]विश्वस्य [v]श्रुष्टये जगतः सुखाय [v]ऊर्ध्वः उद्गतः सन् [v]बाहवा बाहू [v]प्र [v]ससर्ति प्रसारयति । [v]आपश्चित् आपोऽपि [v]अस्य [v]व्रते प्रसवाख्ये कर्मणि सति । ' व्रतं कर्वरम् ' (नि. २. १. ७) इति तन्नामसु पाठात् । [v]आ स्यन्दन्त इति शेषः । ताश्च [v]निमृग्राः नितरां शोधयित्र्यो गङ्गादिरूपेण जगत्पावयन्तीत्यर्थः । [v]अयं [v]चिद्वातः अयमपि वायुः [v]परिज्मन् परितो गते व्याप्तेऽन्तरिक्षे [v]रमते[2] ॥

आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदर्तमानं चिदेतोः ।
अह्यर्षूणां चिन्नयाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥

आशुऽभिः । चित् । यान् । वि । मुचाति । नूनम् । अरीरमत् । अर्तमानम् । चित् । एतोः ।
अह्यर्षूणाम् । चित् । नि । अयान् । अविष्याम् ।
अनु । व्रतम् । सवितुः । मोकी । आ । अगात् ॥ ३ ॥

[v]यान् गच्छन् सविता [v]आशुभिश्चित् शीघ्रगामिभिरपि रश्मिभिः [v]वि [v]मुचाति विमुच्यते । [v]नूनम् इति पूरणः । [v]अर्तमानं [v]चित् सततं गच्छन्तमपि जनम् [v]एतोः गमनात् [v]अरीरमत् उपरमयति । किंच [v]अह्यर्षूणाम् । अहिमाहन्तारं शत्रुमर्षन्त्यभिगच्छन्तीत्यह्यर्षवः । तेषामपि [v]अविष्यां गमनेच्छां [v]न्ययान् नियच्छति । [v]सवितुः प्रेरकस्य सूर्यस्य [v]व्रतं कर्म [v]अनु पश्चात् [v]मोकी रात्रिः । ' मोकी शोकी ' (नि. १. ७. १८) इति रात्रिनामसु पाठात् । [v]आगात् आगच्छति । सवितुश्चेष्टोपरतौ रात्रिरागच्छतीति यावत् ॥

पुनः समव्यद्वितंतं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थाद्यूतूँरदर्धररमतिः सविता देव आगात् ॥ ४ ॥

पुनरिति । सम् । अव्यत् । विऽततम् । वयन्ती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः ।
उत् । सम्ऽहाय । अस्थात् । वि । ऋतून् । अदर्धः ।
अरमतिः । सविता । देवः । आ । अगात् ॥ ४ ॥

१. झ१-बृहत्करः । २. क-झ-झ१-म-रमयते ।

[v]वयन्ती वस्त्रं वयन्ती नारीव रात्रिः [v]विततम् आलोकं [v]पुनः [v]समञ्यत् संवेष्टयते[1]। पुनःशब्दः पूर्वेद्युरप्येवमकार्षीदिति द्योतयति। [v]धीरः प्रज्ञोऽपि सर्वो लोकः [v]कर्तोः क्रियमाणं कर्म ॥ 'कर्तोः कर्तवै' (नि. २. १. १८) इति तन्नामसु पाठात् ॥ [v]शक्म कर्तुं शक्यमपि [v]मध्या मध्ये उपक्रान्तं कर्मापरिसमाप्येत्यर्थः। [v]न्यधात् निहितवान्। सवितर्युपरते इति शेषः। सर्वो लोकः [v]संहाय शय्यां विहाय [v]उत् [v]अस्थात्। अवशिष्टं कर्म कर्तुं पुनरुत्तिष्ठति ॥ संपूर्वो जहातिः शय्यापरित्यागे वर्तते। तथा च श्रूयते–'कलिः शयानो भवति संजिहानस्तु द्वापरः' (ऐ. ब्रा. ७. १५) इति। [v]सविता सर्वस्य प्रसविता सूर्यः [v]अरमतिः अनुपरतिः [v]देवः द्योतमानः [v]आगात् आगच्छति। उदेतीति यावत्। [v]ऋतून् कालविशेषांश्च [v]वि [v]अदर्दः विदारयति ॥

नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥ ५ ॥

नाना। ओकांसि। दुर्यः। विश्वम्। आयुः। वि। तिष्ठते। प्रऽभवः। शोकः। अग्नेः। ज्येष्ठम्। माता। सूनवे। भागम्। आ। अधात्। अनु। अस्य। केतम्। इषितम्। सवित्रा ॥५॥

[v]प्रभवः प्रभूतः [v]अग्नेः [v]शोकः तेजः [v]दुर्यः गृह्यो गृहे भवः [v]नानौकांसि यजमानानां पृथग्भूतान् गृहान् [v]वि [v]तिष्ठते अधितिष्ठति। [v]विश्वमायुः सर्वमन्नं चाधितिष्ठति ॥ 'आयुः सूनृता' (नि. २. ७. २३) इत्यन्ननामसु पाठात् ॥ [v]माता उषाः [v]सवित्रा [v]अनु [v]इषितं प्रेषितम् [v]अस्य [v]केतं प्रज्ञापकमग्नेः [v]ज्येष्ठं प्रथममग्निहोत्राख्यं [v]भागं [v]सूनवे अग्नये [v]आधात् आदधाति ॥ ॥ २ ॥

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरतामभूत्।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥

सम्ऽआववर्ति। विऽस्थितः। जिगीषुः। विश्वेषाम्। कामः। चरताम्। अभा। अभूत्। शश्वान्। अपः। विऽकृतम्। हित्वी। आ। अगात्। अनु। व्रतम्। सवितुः। दैव्यस्य ॥६॥

[v]जिगीषुः विजयेच्छुः[2] योद्धा [v]विष्ठितः युद्धार्थं प्रस्थितः [v]समाववर्ति समावर्तयति। [v]विश्वेषां सर्वेषां [v]चरतां जङ्गमानाम् [v]अभा। 'अभा दमे' (नि. ३. ४. ११) इति गृहनामसु पाठात्। गृहं प्रति [v]कामः [v]अभूत् भवति। [v]शश्वान् नित्यं कर्मरतः [v]अपः कर्म [v]विकृतम् अर्धकृतं [v]हित्वी हित्वा [v]आगात् गृहमागच्छति। एतत्सर्वं [v]दैव्यस्य दिवि भवस्य [v]सवितुः प्रेरकस्य सूर्यस्य [v]व्रतम् अस्तमयाख्यं कर्म [v]अनु जायते इत्यर्थः ॥

१. ज्ञ-म-संचेष्टयते। २. म-विजयमिच्छुः।

त्वया॑ हि॒तमप्य॑मप्सु भा॒गं ध॒न्वान्वा मृ॒गय॑सो॒ वि त॑स्थुः ।
वना॑नि॒ विभ्यो॒ नकि॑रस्य॒ तानि॑ व्र॒ता दे॒वस्य॑ सवि॒तुर्मि॑नन्ति ॥ ७ ॥

त्वया॑ । हि॒तम् । अप्य॑म् । अ॒प्ऽसु॒ । भा॒गम् । ध॒न्व॑ । अनु॑ । आ । मृ॒गय॑सः । वि । त॒स्थुः ।
वना॑नि । विऽभ्यः॑ । नकिः॑ । अ॒स्य॒ । तानि॑ । व्र॒ता । दे॒वस्य॑ । स॒वि॒तुः॒ । मि॒न॒न्ति॒ ॥ ७ ॥

हे सवितः ᵛत्वया ᵛअप्सु अन्तरिक्षे । ' आपः पृथिवी ' (नि. १. ३. ८) इत्यन्तरिक्षनामसु पाठात् । जलाधारे[1] वा ᵛहितं निहितम् ᵛअप्यम् अपां संबन्धिनं ᵛभागं ᵛधन्वानु निर्जलप्रदेशेष्वरण्येषु ᵛमृगयसः मृगयमाणा मृगाः ᵛआ समन्तात् ᵛवि ᵛतस्थुः अधितिष्ठन्ति । किंच ᵛवनानि वृक्षाः[2] ᵛविभ्यः पक्षिभ्य आत्मसादिरूपेण त्वया भागो दत्तः । ᵛअस्य ᵛदेवस्य[3] ᵛसवितुः[3] ᵛतानि तादृशानि ᵛव्रता व्रतानि कर्माणि ᵛनकिः ᵛमिनन्ति केऽपि न हिंसन्ति ॥

या॒द्रा॒ध्यं॑[4] वरु॑णो॒ योनि॒मप्य॒मनि॑शितं नि॒मिषि॒ जर्भु॑राणः ।
विश्वो॑ मार्ता॒ण्डो व्र॒जमा प॒शुर्गा॑त्स्थ॒शो ज॒न्मा॑नि सवि॒ता व्या॑कः ॥ ८ ॥

या॒त्ऽरा॒ध्य॑म् । वरु॑णः । योनि॑म् । अप्य॑म् । अनि॑ऽशितम् । नि॒ऽमिषि॑ । जर्भु॑राणः ।
विश्वः॑ । मा॒र्ता॒ण्डः । व्र॒जम् । आ । प॒शुः । गा॒त् ।
स्थ॒ऽश॒नः । ज॒न्मा॑नि । स॒वि॒ता । वि । आ । अ॒क॒रि॒त्य॑कः ॥ ८ ॥

ᵛवरुणः ᵛयाद्राध्यं यातां गच्छतां राध्यं संराधनीयम्[4] ᵛअप्यम् आसु योग्यम् ᵛअनिशितम् अतीक्ष्णम् । सुखकरमिति यावत् । ᵛयोनिं स्थानं ᵛनिमिषि निमेषे सवितुरस्तमये सति विश्रमार्थं प्राणिभ्यः प्रयच्छति । वरुणस्य रात्रेर्निर्वाहकत्वात् । ᵛजर्भुराणः भृशं गच्छन् ᵛविश्वः सर्वः ᵛमार्ताण्डः मृताद्भिन्नात् अण्डादुत्पद्यमानः पक्षी ᵛआ ᵛगात् आगच्छति । विश्वः ᵛपशुः अपि ᵛव्रजं गोष्ठमागात् ᵛसविता प्रेरकः ᵛस्थशः स्थाने स्थाने ᵛजन्मानि जातानि भूतानि ᵛव्याकः पृथगकार्षीत् ॥

न यस्ये॑न्द्रो॒ वरु॑णो॒ न मि॒त्रो व्र॒तम॑र्य॒मा न मि॒न॑न्ति रु॒द्रः ।
नारा॑तय॒स्तमि॒दं स्व॒स्ति हु॒वे दे॒वं स॑वि॒तार॑ं नमो॒भिः ॥ ९ ॥

न । यस्य॑ । इन्द्रः॑ । वरु॑णः । न । मि॒त्रः । व्र॒तम् । अ॒र्य॒मा । न । मि॒न॑न्ति । रु॒द्रः ।
न । अरा॑तयः । तम् । इ॒दम् । स्व॒स्ति । हु॒वे । दे॒वम् । स॒वि॒तार॑म् । नमः॑ऽभिः ॥ ९ ॥

ᵛयस्य सवितुर्देवस्य ᵛव्रतं प्रसवार्थं कर्म ᵛइन्द्रः ᵛन मिनाति न हिनस्ति । ᵛवरुणः च ᵛन मिनाति । ᵛमित्रः च ᵛअर्यमा च न मिनाति । ᵛरुद्रः च ᵛन मिनाति । ᵛअरातयः असुराश्च ᵛन

१. क-म-व-जलाधारेषु । २. ज्ञ१–वृक्षादीन् । ३. क-ज्ञ१-ण-न-थ-न-म-व–ईशः ४. ग–राधनीयम् ।

[1]मिनन्ति ॥ मिनातीति श्रुतमाख्यातं यथायोगं विपरिणामेन प्रत्येकमभिसंबध्यते ॥ [v]तं [v]सवितारं सर्वस्य प्रेरकं [v]देवं द्योतमानम् [v]इदम् इदानीं [v]नमोभिः अन्नरूपैर्हविर्भिः सह । ' नमः आयुः ' (नि. २. ७. २२) इत्यन्ननाममु पाठात् । [v]स्वस्ति क्षेमाय [v]हुवे स्तौमि ॥

भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥ १० ॥

भगम् । धियम् । वाजयन्तः । पुरम्ऽधिम् । नराशंसः । ग्नाःपतिः । नः । अव्याः ।
आऽआये । वामस्य । सम्ऽगथे । रयीणाम् । प्रियाः । देवस्य । सवितुः । स्याम ॥ १० ॥

[v]भगं भजनीयं [v]धियं ध्यातव्यं [v]पुरंधिं पुरस्य धारयितारं बहुप्रज्ञं वा सवितारम् ॥ ' पुरंधिर्बहुधीः ' (निरु. ६.१३) इति यास्कः ॥ [v]वाजयन्तः वाजिनं बलिनं कुर्वतः ॥ विभक्तिव्यत्ययः ॥ [v]नः स्तुवतोऽस्मान् [v]नराशंसः नरैः शंसनीयः [v]ग्नास्पतिः देवपत्नीनां पतिः छन्दसां पतिर्वा । तथा च श्रूयते–' छन्दांसि वै ग्नाः' इति, ' उत ग्ना व्यन्तु देवपत्नीः ' (ऋ.सं.५.४६.८) इति च । सविता [v]अव्याः अव्यात् । किंच [v]वामस्य धनस्य [v]रयीणां पशूनां च । तथा च श्रूयते– ' पशवो वै रयिः' इति । [v]आये आगमने [v]संगथे संगमने च निमित्ते [v]देवस्य द्योतमानस्य [v]सवितुः प्रेरकस्य वयं [v]प्रियाः [v]स्याम भवेम ॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥ ११ ॥

अस्मभ्यम् । तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया । दत्तम् । काम्यम् । राधः । आ । गात् ।
शम् । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥ ११ ॥

हे सवितः [v]अस्मभ्यं [v]त्वया [v]दत्तं [v]तत् प्रसिद्धं [v]काम्यं कमनीयं [v]राधः धनं [v]दिवः द्युलोकात् [v]अद्भ्यः अन्तरिक्षलोकात् [v]पृथिव्याः भूमेश्च [v]आ [v]गात् आगच्छतु । किंच [v]स्तोतृभ्यः स्तोतॄणाम् [v]आपये बन्धवे तद्वंशजाय [v]यत् धनं [v]शं सुखकरं [v]भवाति भवेत् [v]उरुशंसाय बहुस्तुतये [v]जरित्रे स्तोत्रे मह्यम् । ' जरिता कारुः ' (नि. ३. १६. २) इति स्तोतृनाममु पाठात् । हे [v]सवितः तत्प्रयच्छ ॥ ॥ ३ ॥

' ग्रावाणेव ' इत्यष्टर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमाश्विनं ' ग्रावाणेवाष्टावाश्विनम् ' इत्यनुक्रान्तत्वात् । प्रवर्ग्येऽभिष्टवे पूर्वे पटलेऽस्य विनियोगः । सूत्रितं च–' ग्रावाणेवेळे द्यावापृथिवी ' (आश्व. श्रौ. ४. ६) इति । प्रातरनुवाकाश्विनशस्त्रयोरपीदं सूक्तम् । सूत्रितं च–' ग्रावाणेव नासत्याभ्यामिति त्रीणि ' (आश्व. श्रौ. ४. १५) इति ॥

ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ ।
ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥ १ ॥

ग्रावाणाऽइव । तत् । इत् । अर्थम् । जरेथे इति । गृध्राऽइव । वृक्षम् । निधिऽमन्तम् । अच्छ ।
ब्रह्माणाऽइव । विदथे । उक्थऽशसा । दूताऽइव । हव्या । जन्या । पुरुऽत्रा ॥ १ ॥

हे अश्विनौ vग्रावाणेव अरातिं प्रति प्रेषितौ पाषाणाविव vतत् vअर्थम् । अर्तेर्धातोरर्थशब्दः । 'अर्थोऽर्तेः' (निरु. १. १८) इति यास्कः । तमरातिमित्यर्थः । vइत् इति पूरणः । vजरेथे जरयेथे अरातिं बाधेथाम् । यद्वा यथा गुरू ग्रावाणौ क्षिप्तौ तदानीमेव शीघ्रं गच्छतस्तथा तत् तमर्थं गन्तारं जरेथे । शीघ्रं गत्वा स्तुतमित्यर्थः । जरतिः स्तुतिकर्मा । किंच vगृध्रेव गृध्राविव पक्षिणाविव vवृक्षं फलितं वृक्षं vनिधिमन्तं धनवन्तं यजमानम् vअच्छ । आगच्छतमिति शेषः । vविदथे यज्ञे । 'विदथः सवनम्' (नि. ३. १७. ५) इति यज्ञनामसु पाठात् । vउक्थशासा[1] उक्थशंसितारौ vब्रह्माणेव ब्राह्मणाविव vजन्या जनपदेषु vदूतेव राज्ञा प्रेषितौ दूताविव vपुरुत्रा बहुभिः पुरुषैः vहव्या ह्वातव्यौ युवाम् । अत्र उपमेयद्वित्वानुसारेण उपमानद्वित्वम् ॥

प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे ।
मेनेइव तन्वा शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥ २ ॥

प्रातःऽयावाना । रथ्याऽइव । वीरा । अजाऽइव । यमा । वरम् । आ । सचेथे इति ।
मेने इवेति मेनेऽइव । तन्वा । शुम्भमाने इति ।
दम्पतीइवेति दम्पतीऽइव । क्रतुऽविदा । जनेषु ॥ २ ॥

हे अश्विनौ vप्रातर्यावाणा प्रातरेव यज्ञार्थं गन्तारौ vरथ्येव रथिनाविव वीरौ स्वकर्मणि शूरौ । vअजेव अजाविव छागाविव vयमा यमलौ । vमेनेइव नार्याविव vतन्वा शरीरेण vशुम्भमाने शोभमानौ । vदम्पतीव जायापती इव संगतौ vजनेषु विषयेषु vक्रतुविदा कर्मविदौ युवां vवरं संभक्तारम् vआ vसचेथे आगच्छथः ॥

शृङ्गेव नः प्रथमा गन्तमर्वाक्छफाविव जर्भुराणा तरोभिः ।
चक्रवाकेव प्रति वस्तोरुस्रावर्वाञ्चा यातं रथ्येव शक्रा ॥ ३ ॥

शृङ्गाऽइव । नः । प्रथमा । गन्तम् । अर्वाक् । शफौऽइव । जर्भुराणा । तरःऽभिः ।
चक्रवाकाऽइव । प्रति । वस्तोः । उस्रा । अर्वाञ्चा । यातम् । रथ्याऽइव । शक्रा ॥ ३ ॥

१. ण-थ-न-व-उक्थशसा ।

हे अश्विनौ [v]शृङ्गेव पशोः शृङ्गे इव [v]प्रथमा देवानां प्रथमौ [v]शफाविव अश्वादेः खुराविव [v]तरोभिः वेगैः [v]जर्भुराणा भृशं गच्छन्तौ युवां [v]नः अस्मान्प्रति [v]अर्वाक् अभिमुखम् आ [v]गन्तम् आगच्छतम्। किंच हे अश्विनौ [v]वस्तोः [v]प्रति अहः प्रति [v]चक्रवाकेव चक्रवाकाविव हे [v]उस्रा शत्रूणामुत्सारकौ गमनशीलौ वा [v]रथ्येव रथिनाविव हे [v]शफा स्वकर्मणि शक्तौ [v]अर्वाञ्चा अस्मदभिमुखौ [v]यातं गच्छतम् ॥

नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥ ४ ॥

नावाऽइव । नः । पारयतम् । युगाऽइव । नभ्याऽइव ।
नः । उपधी इवेत्युपधीऽइव । प्रधी इवेति प्रधीऽइव ।
श्वानाऽइव । नः । अरिषण्या । तनूनाम् । खृगलाऽइव । विऽस्रसः । पातम् । अस्मान् ॥४॥

हे अश्विनौ [v]नावेव नावाविव सिन्धून् [v]नः अस्मान् दुर्गाणि [v]पारयतम्। [v]युगेव यथा रथस्य युगे [v]नभ्येव यथा च रथचक्रनाभिफलके। [v]उपधीइव यथा तत्पार्श्वस्थे फलके [v]प्रधीइव यथा वा चक्रबाह्यवलयौ रथं पारयतः तथा [v]नः अस्मान् दुर्गाणि पारयतम्। किं च [v]श्वानेव श्वानाविव यथा श्वानौ बाधकेभ्यो रक्षन्तौ तनोर्हिंसामपनयतः तथा [v]नः अस्माकं [v]तनूनाम् अङ्गानाम् अरिषण्यौ अहिंसकौ भवतम्। [v]खृगलेव यथा तनुत्राणे तनुहिंसाया रक्षतः तथा [v]विस्रसः जरायाः [v]अस्मान् युवां [v]पातम् ॥

वातेवाजुर्या नद्येव रीतिरक्षीइव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वेऽ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ ॥ ५ ॥

वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षी इव । चक्षुषा । आ । यातम् । अर्वाक् ।
हस्तौऽइव । तन्वे । शम्ऽभविष्ठा । पादाऽइव । नः । नयतम् । वस्यः । अच्छ ॥ ५ ॥

हे अश्विनौ [v]वातेव वाताविव [v]अजुर्या जरितुमशक्यौ [v]नद्येव नद्याविव [v]रीतिः ॥ व्यत्ययेनैकवचनम् ॥ शीघ्रं गन्तारौ युवाम्। [v]अक्षीइव अक्षिणी इव [v]चक्षुषा दर्शनेन [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]यातम् आगच्छतम्। किं च हस्तेव हस्ताविव [v]पादेव पादाविव [v]तन्वे शरीराय [v]शंभविष्ठा सुखस्य भावयितृतमौ युवां [v]नः अस्मान् [v]वस्यः वसीयः श्रेष्ठं धनम् [v]अच्छ प्रति [v]नयतं प्रापयतम् ॥ ॥ ४ ॥

ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥ ६ ॥

ओष्ठौऽइव । मधु । आस्ने । वदन्ता । स्तनौऽइव । पिप्यतम् । जीवसे । नः ।
नासाऽइव । नः । तन्वः । रक्षितारा । कर्णौऽइव । सुऽश्रुता । भूतम् । अस्मे इति ॥ ६ ॥

हे अश्विनौ Vओष्ठाविव Vआस्ने आस्याय मधुररसवद्वचनं[1] वदन्तौ Vस्तनाविव Vनः अस्मान् Vजीवसे जीवनाय Vपिप्यतं प्याययतम्। किं च Vनासेव नासिके इव Vनः अस्माकं Vतन्वः तनोः Vरक्षितारा रक्षितारौ भूतं भवतम्। अपि च Vकर्णाविव Vअस्मे अस्माकं Vसुश्रुता सुश्रवणे युवां Vभूतं भवतम् ॥

हस्तेव शक्तिमभि संददी नः क्षामेव नः सम्जतं रजांसि ।
इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम् ॥ ७ ॥

हस्ताऽइव । शक्तिम् । अभि । संददी इति सम्ऽददी । नः ।
क्षामऽइव । नः । सम् । अजतम् । रजांसि ।
इमाः । गिरः । अश्विना । युष्मऽयन्तीः । क्ष्णोत्रेणऽइव । स्वऽधितिम् । सम् । शिशीतम् ॥७॥

हे अश्विनौ Vहस्तेव हस्ताविव Vशक्तिं सामर्थ्यं Vनः अस्माकम् Vअभि Vसंददी आभिमुख्येन सम्यक् प्रयच्छन्तौ भवतम्। किं च Vक्षामेव रोदसी इव Vरजांसि स्थानान्युदकानि वा। 'उदकं रज उच्यते' (निरु. ४. १९) इति यास्कः। Vनः अस्माकं Vसमजतं प्रेरयतम्। अपि च Vअश्विना हे अश्विनौ Vइमा Vगिरः अस्माभिः कृताः स्तुतीः Vयुष्मयन्तीः युवामिच्छन्तीः Vस्वधितिम् असिं Vक्ष्णोत्रेणेव तेजनशाणवत् Vसं Vशिशीतं सम्यक् तीक्ष्णीकुरुतम् ॥

एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥ ८ ॥

एतानि । वाम् । अश्विना । वर्धनानि । ब्रह्म । स्तोमम् । गृत्सऽमदासः । अक्रन् ।
तानि । नरा । जुजुषाणा । उप । यातम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ८ ॥

Vअश्विना हे अश्विनौ Vवां युवयोः Vएतानि Vवर्धनानि वृद्धिसाधनानि Vब्रह्म ब्रह्माणि मन्त्रान् Vस्तोमं स्तोत्रं च Vगृत्समदासः गृत्समदाः Vअक्रन् अकुर्वन्। Vतानि ब्रह्माणि Vनरा नेतारौ Vजुजुषाणा भृशं प्रीयमाणौ युवाम् Vउप Vयातम् उपगच्छतम्। किं च Vसुवीराः शोभनपुत्रा वयं Vविदथे यज्ञे युवां Vबृहद्वदेम प्रभूतं स्तुमः ॥ ॥ ५ ॥

'सोमापूषणा' इति षड्ऋचमष्टमं सूक्तं गार्त्समदं त्रैष्टुभं सोमापूषदेवताकम्। तथा चानुक्रान्तं—'सोमापूषणा षट् सोमापौष्णमन्त्योऽर्धर्चोऽप्यदितेः' इति। 'अवतु देव्यदितिः' इत्यस्य[2] अन्त्यार्धर्चस्य अदितिर्देवता। सोमापौष्णे पशौ वपापुरोडाशहविषामाद्यास्तिस्रः क्रमेणानुवाक्या उत्तरास्तिस्रो याज्याः। 'अग्नीषोमौ' इति खण्डे सूत्रितं—'सोमापूषणा जनना रयीणाम्' (आश्व. श्रौ. ३. ८) इति ॥

१. क-ज्ञ-ज्ञ१-ण-ण१-थ-न-म-व-मधुरस० । २. म-इत्येतस्य ।

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥ १ ॥

सोमापूषणा । जनना । रयीणाम् । जनना । दिवः । जनना । पृथिव्याः ।
जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन् । अमृतस्य । नाभिम् ॥ १ ॥

vसोमापूषणा हे सोमापूषणौ युवां vरयीणां धनानां vजनना जनयितारौ vदिवः द्युलोकस्यापि vजनना जनयितारौ vपृथिव्याः प्रथितायाश्च जनयितारौ भवथः । किंच vजातौ जातमात्रावेव युवां vविश्वस्य vभुवनस्य कृत्स्नस्य जगतः vगोपौ गोप्तारौ vदेवाः vअमृतस्य अमरणस्य vनाभिं हेतुम् vअकृण्वन् अकार्षुः ॥

इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥ २ ॥

इमौ । देवौ । जायमानौ । जुषन्त । इमौ । तमांसि । गूहताम् । अजुष्टा ।
आभ्याम् । इन्द्रः । पक्वम् । आमासु । अन्तरिति । सोमापूषऽभ्याम् । जनत् । उस्रियासु ॥२॥

vइमौ सोमापूषणौ vदेवौ द्योतमानौ vजायमानौ उत्पन्नमात्रावेव vजुषन्त सर्वे देवा अजुषन्त । सेवितवन्त इति यावत् । किंच vइमौ सोमापूषणौ vअजुष्टा असेव्यानि vतमांसि सर्वस्य vगूहतां नाशयतः । किंच vआभ्याम् एताभ्यां vसोमापूषभ्यां सह vइन्द्रः vआमासु तरुणीषु vउस्रियासु गोषु vअन्तः मध्ये ऊधःप्रदेशे vपक्वं परिपक्वं पयः vजनत् जनयति ॥

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥ ३ ॥

सोमापूषणा । रजसः । विऽमानम् । सप्तऽचक्रम् । रथम् । अविश्वऽमिन्वम् ।
विषुऽवृतम् । मनसा । युज्यमानम् । तम् । जिन्वथः । वृषणा । पञ्चऽरश्मिम् ॥ ३ ॥

vवृषणा वृषणौ कामानां वर्षितारौ vसोमापूषणा हे सोमापूषणौ vरजसः लोकस्य । 'लोका रजांस्युच्यन्ते' (निरु.४.१९) इति यास्कः । vविमानं परिच्छेदकम् । सर्वमानम्[1] इत्यर्थः । vसप्तचक्रं सप्तर्तुचक्रम् । त्रयोदशो मासः सप्तम ऋतुः । 'अस्ति त्रयोदशो मासः' (तै.सं.६.५.३.४) इति श्रुतेः । vअविश्वमिन्वं विश्वस्यापरिच्छेद्यं vविषुवृतं विष्वक् सर्वत्र परिवर्तमानं vपञ्चरश्मिं पञ्चर्तुरश्मिम् । हेमन्तशिशिरयोः

---

१. क-ज्ञ–सर्ववम्; ज्ञ१–सर्वभूतम्; ण-त-थ-न-व–सर्वमतम्; म–सर्वतम् ।

समासेन ऋतवः पञ्च । तथा च श्रूयते–' द्वादश[1] मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन ' (ऐ. ब्रा. १. १) इति । [v]मनसा [v]युज्यमानं मनोमात्रेण युज्यमानम् । [v]तं प्रसिद्धं [v]रथं [v]जिन्वथः अस्मान्प्रति प्रेरयथः ॥

दिव्यन्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥ ४ ॥

दिवि । अन्यः । सदनम् । चक्रे । उच्चा । पृथिव्याम् । अन्यः । अधि । अन्तरिक्षे ।
तौ । अस्मभ्यम् । पुरुऽवारम् । पुरुऽक्षुम् ।
रायः । पोषम् । वि । स्यताम् । नाभिम् । अस्मे इति ॥ ४ ॥

[v]अन्यः तयोरेकः पूषा [v]उच्चा उच्चैरुच्छ्रिते [v]दिवि द्युलोके [v]सदनं स्थानं [v]चक्रे चकार । [v]अन्यः अपरः सोमः [v]पृथिव्याम् ओषधिरूपेण [v]अध्यन्तरिक्षे अन्तरिक्षे[2] च चन्द्ररूपेण सदनं चक्रे । [v]तौ[3] सोमापूषणौ युवां [v]पुरुवारं बहुभिर्वरणीयं [v]पुरुक्षुं बहुकीर्तिं [v]रायस्पोषं धनस्य पुष्टिम् । पश्वात्मकं धनमित्यर्थः । तथा च ब्राह्मणं–' पशवो वै रायस्पोषः ' (तै. सं. ५. ४. ६. २) इति । [v]अस्मे अस्माकं [v]नाभिं विश्वस्य भोगस्य[4] हेतुभूतम्[4] [v]अस्मभ्यं [v]वि [v]ष्यताम् विमुञ्चताम् । प्रयच्छतामित्यर्थः ॥

विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥ ५ ॥

विश्वानि । अन्यः । भुवना । जजान । विश्वम् । अन्यः । अभिऽचक्षाणः । एति ।
सोमापूषणौ । अवतम् । धियम् । मे । युवाभ्याम् । विश्वाः । पृतनाः । जयेम ॥ ५ ॥

हे सोमापूषणौ [v]अन्यः युवयोरेकः सोमः [v]विश्वानि [v]भुवना भुवनानि भूतानि [v]जजान अजनयत् । तथा च मन्त्रः–' सोमः पवते जनिता मतीनाम् ' (ऋ. सं. ९. ९६. ५) इति । [v]अन्यः अपरः पूषा आदित्यः [v]विश्वम् [v]अभिचक्षाणः अभिपश्यन् [v]एति गच्छति । तौ युवां [v]सोमापूषणौ [v]मे [v]धियं कर्म । ' धीः शची ' (नि. २. १. २१) इति कर्मनामसु पाठात् ॥ [v]अवतं रक्षतम् । किंच वयं [v]युवाभ्यां हेतुभ्यां [v]विश्वाः [v]पृतनाः सर्वाः शत्रुसेनाः [v]जयेम अभिभवेम ॥

धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।
अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥ ६ ॥

धियम् । पूषा । जिन्वतु । विश्वमिन्वः । रयिम् । सोमः । रयिऽपतिः । दधातु ।
अवतु । देवी । अदितिः । अनर्वा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ६ ॥

---

१. क-च-ज्ञ-ञ१-ण१-त-थ-न-व–द्वादश वै । २. थ-म–' अन्तरिक्षे ' नास्ति । ३. ण-त-थ–' तौ ' नास्ति । ४. म–भोगहेतुम् ।

ᵛपूषा आदित्यः ᵛविश्वमिन्वः विश्वस्य प्रीणयिता ᵛधियम् अस्माकं कर्म ᵛजिन्वतु तर्पयतु । ᵛरयिपतिः धनपतिः ᵛसोमः ᵛरयिं धनं ᵛदधातु अस्मभ्यं ददातु । किंच ᵛदेवी द्योतमाना ᵛअनर्वा अप्रत्यृता केनापि प्रातिकूल्यमप्रापिता ᵛअदितिः ᵛअवतु अस्मान् रक्षतु । अन्यत् सिद्धम् ॥ ॥ ६ ॥

' वायो ये ते ' इत्येकविंशत्यृचं नवमं सूक्तं गार्त्समदं गायत्रम् । ' अभित्वमे ' इति षष्टस्य तृचस्य आदितो द्वे अनुष्टुभौ तृतीया बृहती । ' वायो ये ते ' इत्यादिके द्वे ऋचौ वायव्यौ । ' शुक्रस्याद्य ' इत्येषा ऐन्द्रवायवी । ' अयं वां मित्रावरुणा ' इति पञ्चानां तृचानां[1] मित्रावरुणौ अश्विनौ इन्द्रः विश्वे देवाः सरस्वती इति क्रमेण देवताः । ' प्रेतां यज्ञस्य ' इत्यस्यस्तृचो ब्राह्मणसूत्रयोर्हविर्धानप्रवर्तने द्यावापृथिव्यनिविद्धानत्वेन च विनियुक्तत्वात् द्यावापृथिव्यो हविर्धानदेवत्यो वा । ' अग्निं च हव्यवाहनम् ' इति पादोऽग्निदेवत्यो वा । तथा चानुक्रान्तं–' वायो सैका गायत्रमुक्ता देवताः प्रउगेणाद्ये तु तृचेऽन्त्यैन्द्रवायवी द्यावापृथिव्योऽन्त्यस्तृचो हाविर्धानो वा तृतीयः पादो वाग्नेयोऽभित्वमेऽनुष्टुभौ बृहती च ' इति । पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि प्रउगेऽन्त्यतृचवर्जमेतत्सूक्तम् । वायव्यतृचस्य ' वायो ये ते सहस्रिणः ' इत्याद्ये द्वे ऋचौ ऐन्द्रवायवतृचस्य ' शुक्रस्याद्य ' इत्येषा तृतीया । तथा च सूत्रितं– ' वायो ये ते सहस्रिण इति द्वे तीव्राः सोमास आ गहीत्येकोभा देवा दिविस्पृशेति द्वे शुक्रस्याद्य गवाशिर इत्येकायं वां मित्रावरुणेति पञ्च तृचाः ' (आश्व. श्रौ. ७. ६) इति । चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणशस्त्रे ' अयं वां मित्रावरुणा ' इति पळहस्तोत्रियसंज्ञकः । ' चतुर्विंशे होताजनिष्ट ' इति खण्डे सूत्रितम्–' अयं वां मित्रावरुणा पुरूरुणा चिद्ध्यस्ति ' (आश्व. श्रौ. ७. २) इति । आभिप्लविकेष्वहःसु प्रातःसवने मैत्रावरुणशस्त्रेऽयमेव तृचः पञ्चदशादिस्तोमनिमित्तमावापनीयः । ' अयं वां मित्रावरुणा नो मित्रावरुणेति तृचाः ' (आश्व. श्रौ. ७. ५) इति सूत्रितत्वात् । आद्या मैत्रावरुणग्रहस्यानुवाक्या । सूत्रितं च–' मैत्रावरुणस्य अयं वां मित्रावरुणा ' (आश्व. श्रौ. ५. ५) इति । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसि ' गोमदू षु ' इति तृचो विनियुक्तः । ' गोमदू षु नासत्येति तृचाः ' (आश्व. श्रौ. ४. १५) इति सूत्रितत्वात् । अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे ' इन्द्रो अङ्ग महद्भयम् ' इति तृचः । ' अतिरात्रे पर्यायाणाम् ' इति खण्डे सूत्रितम्–' इन्द्रो अङ्ग महद्भयमभि न्यू षु वाचम् ' (आश्व. श्रौ. ६.४) इति । आग्नयणे वैश्वदेवस्य हविषः ' विश्वे देवासः ' इत्यनुवाक्या । ' आग्नयणम् ' इति खण्डे सूत्रितं–' विश्वे देवास आ गत ये के च ज्मा महिनो अहिमायाः ' (आश्व. श्रौ. २. ९) इति । दशरात्रे प्रथमेऽहनि प्रउगशस्त्रे ' अभित्वमे नदीतमे ' इति सारस्वतः सप्तमस्तृचः । ' चतुर्थेऽहनि ' इति खण्डे सूत्रितम्—' अभित्वमे नदीतम इत्यानुष्टुभं प्रउगम् ' (आश्व. श्रौ. ७. ११) इति । व्यूढे दशरात्रे प्रथमे छन्दोमे वैश्वदेवशस्त्रे ' प्रेतां यज्ञस्य शंभुवा ' इति द्यावापृथिव्यनिविद्धानीयस्तृचः । ' अथ छन्दोमाः ' इति खण्डे सूत्रितं–' प्रेतां यज्ञस्य शंभुवायं देवाय जन्मन इति तृचाः ' (आश्व. श्रौ. ८. ९) इति । हविर्धानप्रवर्तनेऽप्ययं तृचो विनियुक्तः । सूत्रितं च—' प्रेतां यज्ञस्य शंभुवा यमे इव यतमाने यदैतम् ' (आश्व. श्रौ. ४. ९; ऐ. ब्रा. १. २९) इति ॥

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥ १ ॥

वायो इति । ये । ते । सहस्रिणः । रथासः । तेभिः । आ । गहि । नियुत्वान् । सोमऽपीतये ॥१॥

१. ख-ग-च-ज्ञ१-ण-ण१-थ-न–' तृचानां ' नास्ति; म–ऋचाम् ।

हे [v]वायो [v]ते स्वदीयाः [v]ये [v]सहस्रिणः सहस्रसंख्याकाः [v]रथासः रथाः [v]तेभिः तैः [v]नियुत्वान् नियुद्भिर्युक्तस्त्वं [v]सोमपीतये सोमपानार्थम् [v]आ [v]गहि आगच्छ। नानारूपत्वाद्वायोः सर्वाभिर्विभूतिभिः सहागमनं प्रार्थ्यत इति भावः ॥

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥ २ ॥

नियुत्वान्। वायो इति। आ। गहि। अयम्। शुक्रः। अयामि। ते।
गन्ता। असि। सुन्वतः। गृहम् ॥ २ ॥

हे [v]वायो [v]नियुत्वान्। नियुतो वाहनानि वायोः। तैर्युक्तस्त्वम् [v]आ [v]गहि आगच्छ। [v]अयं [v]शुक्रः दीप्यमानः सोमः [v]ते तुभ्यम् [v]अयामि नियतो गृहीत आसीत्॥ यमेः कर्मणि लुङ्॥ [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य [v]गृहं [v]गन्तासि याता भवसि ॥

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः । आ यातं पिबतं नरा ॥ ३ ॥

शुक्रस्य। अद्य। गोऽआशिरः। इन्द्रवायू इति। नियुत्वतः। आ। यातम्। पिबतम्। नरा ॥३॥

हे [v]नरा नेतारौ हे [v]इन्द्रवायू [v]अद्य अस्मिन्नहनि [v]नियुत्वतः ॥ विभक्तिव्यत्ययः ॥ नियुत्वन्तौ युवां [v]गवाशिरः गव्यं पय आशीराश्रयणसाधनं यस्य तस्य [v]शुक्रस्य दीप्तस्य सोमस्य पानार्थम् [v]आ [v]यातम् आगच्छतम्। आगत्य सोमं [v]पिबतम् ॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् ॥ ४ ॥

अयम्। वाम्। मित्रावरुणा। सुतः। सोमः। ऋतऽवृधा।
मम। इत्। इह। श्रुतम्। हवम् ॥ ४ ॥

[v]मित्रावरुणा हे मित्रावरुणौ [v]वां युवाभ्याम् [v]अयं [v]सोमः [v]सुतः अभिषुतः। [v]ऋतावृधा हे सत्यस्य यज्ञस्य वा वर्धकौ [v]ममेत् ममैव [v]हवम् आह्वानम् [v]इह अस्मिन् यज्ञे [v]श्रुतं शृणुतम् ॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्रस्थूण आसाते ॥ ५ ॥

राजानौ। अनभिऽद्रुहा। ध्रुवे। सदसि। उत्ऽतमे। सहस्रऽस्थूणे। आसाते इति ॥ ५ ॥

[v]राजानौ ईश्वरौ दीप्यमानौ वा [v]अनभिद्रुहा अनभिद्रोग्धारौ यौ मित्रावरुणौ [v]ध्रुवे स्थिरे [v]उत्तमे उत्कृष्टे [v]सहस्रस्थूणे [v]सदसि स्थाने [v]आसाते उपविशतः तावागच्छतमिति शेषः ॥ ॥ ७ ॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ॥ ६ ॥

ता। सम्ऽराजा। घृतासुती इति घृतऽआसुती। आदित्या। दानुनः। पती इति।
सचेते इति। अनवऽह्वरम् ॥ ६ ॥

सम्राजौ आज्ञयैव सर्वेषां शास्तारौ ᵛघृतासुती घृतान्नौ । 'तद्वां महित्वं घृतान्नावस्तु' (ऋ. सं. ६. ६७. ८) इति मन्त्रान्तरात् । ᵛआदित्या अदितेः पुत्रौ ᵛदानुनस्पती दानुनो दानस्य देयस्य[1] वा धनस्य पती स्वामिनौ । ᵛता तौ मित्रावरुणौ ᵛअनवह्वरम् अकुटिलं यजमानं ᵛसचेते सेवेते ॥

गोमद्वु षु नासत्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यम् ॥ ७ ॥

गोऽमत् । ऊँ इति । सु । नासत्या । अश्वऽवत् । यातम् । अश्विना ।

वर्तिः । रुद्रा । नृऽपाय्यम् ॥ ७ ॥

ᵛअश्विना हे अश्विनौ हे ᵛनासत्या अनृतभाषणरहितौ हे ᵛरुद्रा रोरूयमाणौ द्रवन्तौ युवां ᵛवर्तिः मार्गः । तेन मार्गेण रथेन वा ᵛनृपाय्यं नृभिर्नेतृभिर्देवैः पातव्यं सोमं ᵛगोमत् गोमद्यथा भवति तथा ᵛअश्ववत् अश्ववच्च यथा भवति तथा ᵛयातं गच्छतम् । ᵛऊ ᵛषु इति पूरणौ ॥

न यत्परो नान्तर आदधर्षद्वृषण्वसू । दुःशंसो मर्त्यो रिपुः ॥ ८ ॥

न । यत् । परः । न । अन्तरः । आऽदधर्षत् । वृषण्वसू इति वृषण्ऽवसू ।

दुःऽशंसः । मर्त्यः । रिपुः ॥ ८ ॥

ᵛवृषण्वसू हे धनस्य वर्षितारौ ᵛयत् धनं ᵛपरः दूरस्थः ᵛदुःशंसः शंसनायोग्यः ᵛमर्त्यो ᵛरिपुः यत् ᵛन ᵛआदधर्षत् तथा[2] उक्तलक्षणेतरः ᵛअन्तरः समीपवर्ती मर्त्यो रिपुरपि यत् ᵛन आदधर्षत् तद्धनम् आवोळ्हमिति शेषः ॥

ता नु आ वोळ्हमाश्विना रयिं पिशङ्गसंदृशम् । धिष्ण्या वरिवोविदम् ॥ ९ ॥

ता । नः । आ । वोळ्हम् । अश्विना । रयिम् । पिशङ्गऽसंदृशम् । धिष्ण्या । वरिवः ऽविदम् ॥ ९ ॥

हे ᵛधिष्ण्या धिषणार्हौ ᵛअश्विना हे अश्विनौ ᵛता तौ युवां ᵛपिशङ्गसंदृशं नानारूपं ᵛवरिवोविदं धनस्य लम्भकं ᵛरयिं पशुं ᵛनः अस्मभ्यम् ᵛआ ᵛवोळ्हम् आवहतम् ॥

इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥ १० ॥

इन्द्रः । अङ्ग । महत् । भयम् । अभि । सत् । अप । चुच्यवत् ।

सः । हि । स्थिरः । विऽचर्षणिः ॥ १० ॥

१. ख-ग-च-ण-ण१-न-'देयस्य' नास्ति; झ-थ-म-व-देवस्य । २. झ१-ण-त-थ-न-व-यथा ।

vइन्द्रः vमहत् अधिकम् vअभी vषत् अभिभवत् vभयं[1] भयकारणम् vअप vच्युयवत् अपच्यावयेत् । vहि यस्मात्कारणात् vसः vस्थिरः केनापि चालयितुमशक्यः vविचर्षणिः विश्वस्य द्रष्टा॥ ॥८॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः ॥ ११ ॥

इन्द्रः । च । मृळयाति । नः । न । नः । पश्चात् । अघम् । नशत् ।

भद्रम् । भवाति । नः । पुरः ॥ ११ ॥

vइन्द्रश्च परमैश्वर्यवानिन्द्रश्चेत् vनः अस्मान् vमृळयाति सुखयेत् । vपश्चात् पृष्ठतः vनः अस्मान् vअघं दुरितं vन vनशत् न प्राप्नोति। vनः अस्माकं vपुरः पुरस्तात् vभद्रं कल्याणं च vभवाति भवति ॥

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून्विचर्षणिः ॥ १२ ॥

इन्द्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयम् । करत् । जेता । शत्रून् । विऽचर्षणिः ॥१२॥

vविचर्षणिः विविधस्य द्रष्टा vजेता । vशत्रून् असुरान् जेता ॥ तृनन्तत्वात् षष्ठ्यभावः ॥ vइन्द्रः परमैश्वर्यवान् vसर्वाभ्यः vआशाभ्यः दिग्भ्यः अस्माकम् vअभयं vकरत् करोतु ॥ vपरि इति पञ्चमीद्योतकः॥

विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥ १३ ॥

विश्वे । देवासः । आ । गत । शृणुत । मे । इमम् । हवम् ।

आ । इदम् । बर्हिः । नि । सीदत ॥ १३ ॥

vविश्वे vदेवासः हे विश्वे देवाः vआ vगत इहागच्छत । vमे मदीयम् vइमं vहवम् आह्वानं vशृणुत । vइदं vबर्हिः अस्मिन्बर्हिषि vआ vनि vषीदत उपविशत ॥

तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः । एतं पिबत काम्यम् ॥ १४ ॥

तीव्रः । वः । मधुऽमान् । अयम् । शुनऽहोत्रेषु । मत्सरः । एतम् । पिबत । काम्यम् ॥१४॥

हे विश्वे देवाः vतीव्रः तीव्रमदः vमधुमान् रसवान् vमत्सरः मदकरः सोमः vअयं vवः[2] युष्मदर्थं vशुनहोत्रेषु गृत्समदेष्वस्मासु स्थितः । vकाम्यं कमनीयम् vएतं सोमं vपिबत ॥

इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥ १५ ॥

इन्द्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवम् ॥ १५ ॥

---

१. ख–भयं भयंकरम् । २. ख-ग-ण-त-थ-म–‘ वः ’ नास्ति ।

हे [v]इन्द्रज्येष्ठाः इन्द्रपुरोगमाः [v]मरुद्गणाः मरुत्समूहरूपाः [v]पूपरातयः पूषाख्यो देवो रातिर्दाता येषां ते पूपरातयः [v]देवासः हे द्योतमाना देवाः [v]विश्वे सर्वे यूयं [v]मम मदीयं [v]हवम् आह्वानं [v]शृत शृणुत। इन्द्रज्येष्ठादयः संबोधनान्ताः (ऋ. सं. १. २३. ८) ॥ ॥ ९ ॥

अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ताइव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ १६ ॥

अम्बिऽतमे । नदीऽतमे । देविऽतमे । सरस्वति ।

अप्रशस्ताःऽइव । स्मसि । प्रऽशस्तिम् । अम्ब । नः । कृधि ॥ १६ ॥

[v]अम्बितमे मातृणां श्रेष्ठे [v]नदीतमे नदीनां श्रेष्ठे [v]देवितमे देवीनां श्रेष्ठे हे [v]सरस्वति [v]अप्रशस्ता-इव धनाभावादसमृद्धा इव वयं [v]स्मसि भवामः। [v]अम्ब[1] हे मातः सरस्वति [v]नः अस्मभ्यं [v]प्रशस्तिं धनसमृद्धिं [v]कृधि कुरु। प्रयच्छेत्यर्थः ॥

त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ १७ ॥

त्वे इति । विश्वा । सरस्वति । श्रिता । आयूंषि । देव्याम् ।

शुनऽहोत्रेषु । मत्स्व । प्रऽजाम् । देवि । दिदिड्ढि । नः ॥ १७ ॥

हे [v]सरस्वति [v]देव्यां द्योतमानायां [v]त्वे त्वयि [v]विश्वा विश्वानि सर्वाणि [v]आयूंषि अन्नानि। ' आयुः सूनृता ' (नि. २. ७. २३) इत्यन्ननामसु पाठात्। [v]श्रिता आश्रितानि। सा त्वं [v]शुन-होत्रेषु गृत्समदेष्वस्मासु विषयेषु [v]मत्स्व सोमपानेन तृप्य। किंच हे [v]देवि सरस्वति [v]नः अस्मभ्यं [v]प्रजां [v]दिदिड्ढि पुत्रान् देहि ॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ १८ ॥

इमा । ब्रह्म । सरस्वति । जुषस्व । वाजिनीऽवति ।
या । ते । मन्म । गृत्सऽमदाः । ऋतऽवरि । प्रिया । देवेषु । जुह्वति ॥ १८ ॥

[v]वाजिनीवति अन्नवति [v]ऋतावरि उदकवति हे [v]सरस्वति [v]इमा इमानि [v]ब्रह्म ब्रह्माणि हवींषि [v]जुषस्व स्वीकुरु। [v]या[2] यानि [v]मन्म मननीयानि [v]देवेषु [v]प्रिया देवानां मध्ये तुभ्यं प्रियाणि देवेषु प्रियाणि वा [v]ते त्वदर्थं [v]गृत्समदाः [v]जुह्वति ॥

१. म–हे अम्ब । २. ण-त-थ-म–' या ' नास्ति ।

प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनम्॥ १९॥

प्र। इताम्। यज्ञस्य। शम्ऽभुवा। युवाम्। इत्। आ। वृणीमहे।

अग्निम्। च। हव्यऽवाहनम्॥ १९॥

[v]यज्ञस्य यागस्य [v]शंभुवा सुखसंपादके हविर्धाने अनसी तद्रूपे द्यावापृथिव्यौ वा[1] [v]प्रेताम् उत्तरवेदेः पश्चिमभागं प्रति प्रगच्छताम्[2]। अथ प्रत्यक्षकृतः। [v]युवामित् युवामेव [v]आ [v]वृणीमहे प्रार्थयामहे। [v]हव्यवाहनम् [v]अग्निं [v]च आवृणीमहे। अग्निरत्र निपातभागिति॥

द्यावा नः पृथिवी इमं सिधमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम्॥ २०॥

द्यावा। नः। पृथिवी इति। इमम्। सिधम्। अद्य। दिविऽस्पृशम्।

यज्ञम्। देवेषु। यच्छताम्॥ २०॥

[v]द्यावा द्यौः [v]पृथिवी च उभे[3] [v]सिधं स्वर्गादेः साधकं [v]दिविस्पृशं देवान् गच्छन्तं [v]नः अस्माकम् [v]इमं [v]यज्ञं [v]देवेषु [v]यच्छतां नियच्छताम्॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः। इहाद्य सोमपीतये॥ २१॥

आ। वाम्। उपऽस्थम्। अद्रुहा। देवाः। सीदन्तु। यज्ञियाः। इह। अद्य। सोमऽपीतये॥२१॥

[v]अद्रुहा द्रोहवर्जिते हे हविर्धाने तद्रूपे द्यावापृथिव्यौ वा [v]वां युवयोः [v]उपस्थं समीपं [v]यज्ञियाः यज्ञार्हाः [v]देवाः [v]इह यज्ञे [v]अद्य अस्मिन्नहनि [v]सोमपीतये सोमपानाय [v]आ [v]सीदन्तु॥ ॥ १० ॥

' कनिक्रदत् ' इति तृचं दशमं सूक्तम्। अत्रैवमनुक्रमणिका–' कनिक्रदत्तृचम् ' इति। मण्डलद्रष्टा गृत्समदोऽस्य ऋषिः। त्रिष्टुप् छन्दः। कपिञ्जलरूपीन्द्रो देवता। वयसाममनोज्ञां वाचं श्रुत्वैतत्सूक्तं जपेत्। सूत्रितं च– ' वयसाममनोज्ञां वाचः श्रुत्वा कनिक्रदज्जनुषं प्रब्रुवाण इति सूक्ते जपेत् ' (आश्व. गृ. ३. १०. ९) इति॥

कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्।

सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विक्थ्या विदत्॥ १॥

कनिक्रदत्। जनुषम्। प्रऽब्रुवाणः। इयर्ति। वाचम्। अरिताऽइव। नावम्।

सुऽमङ्गलः। च। शकुने। भवासि। मा। त्वा। का। चित्। अभिऽभा। विक्थ्या। विदत्॥ १॥

१. ख-ग-च-ण-ण१-त-थ-न–' वा ' नास्ति। २. ख-ग-च-ञ१-ण-ण-१-न-म-व–गच्छताम्। ३. ख-ग-च-ण१–उभे हविर्धाने वा यच्छताम्; फ-उभे हविर्धाने वा यच्छतां नियुच्छताम्।

[v]कनिक्रदत् पुनःपुनः शब्दायमानः [v]जनुषं जनिष्यमाणमर्थं [v]प्रब्रुवाणः सूचयन् कपिञ्जलः [v]अरितेव कर्णधार इव [v]नावं [v]वाचम् [v]इयर्ति प्रेरयति । अथ प्रत्यक्षकृतः । हे [v]शकुने कपिञ्जल त्वं [v]सुमङ्गलः प्रकृष्टकल्याणः [v]च [v]भवासि भव । किंच [v]का [v]चिदभिभा कोऽप्यभिभवः [v]त्वा त्वां [v]विश्व्या विश्वतः सर्वासु दिक्षु [v]मा [v]विदत् मा प्रापत् । ' शकुनिः शक्नोत्युन्नेतुमात्मानम् '; ' न्यक्रन्दीज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयति वाचमीरयितेव नावम् । सुमङ्गलश्च शकुने भव कल्याणमङ्गलो मङ्गलं गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वा ' (निरु. ९. ३; ४) इति यास्कः ॥

मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥ २ ॥

मा । त्वा । श्येनः । उत् । वधीत् । मा । सुऽपर्णः । मा । त्वा । विदत् । इषुऽमान् । वीरः । अस्ता ।
पित्र्याम् । अनु । प्रऽदिशम् । कनिक्रदत् । सुऽमङ्गलः । भद्रऽवादी । वद । इह ॥ २ ॥

हे शकुने [v]त्वा त्वां [v]श्येनः प्रबलः[1] पक्षिविशेषः [v]मा [v]वधीत् मा हिंसीत् । उत[2] अपि च [v]सुपर्णः गरुडः पक्षी [v]मा वधीत्[2] । तथा [v]इषुमान् बाणवान् [v]वीरो [v]अस्ता शराणां क्षेप्ता धन्वी [v]त्वा त्वां [v]मा [v]विदत् मा प्रापत्[3] । किंच [v]पित्र्यां [v]प्रदिशं दक्षिणां दिशम् [v]अनु । दक्षिणस्यां दिशीत्यर्थः । [v]कनिक्रदत् पुनःपुनः शब्दं कुर्वन् [v]सुमङ्गलः कल्याणमङ्गलः [v]भद्रवादी शोभनवादी सन् [v]इह अस्मद्विषये [v]वद मङ्गलं सूचय ॥

अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥ ३ ॥

अव । क्रन्द । दक्षिणतः । गृहाणाम् । सुऽमङ्गलः । भद्रऽवादी । शकुन्ते ।
मा । नः । स्तेनः । ईशत । मा । अघऽशंसः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥

[v]शकुन्ते हे कपिञ्जल त्वं [v]सुमङ्गलो [v]भद्रवादी च सन् [v]गृहाणां [v]दक्षिणतः दक्षिणस्यां दिशि [v]अव [v]क्रन्द शब्दं कुरु । दक्षिणतः शब्दायमानः शकुन्तो मङ्गलसूचको हि । [v]नः अस्माकं [v]स्तेनः तस्करः [v]मा [v]ईशत मेशिष्ट । [v]अघशंसः अनर्थकानां[4] शंसकोऽपि [v]मा ईशिष्ट । उत्तमः पादो व्याख्यातचरः ॥ ॥ ११ ॥

' प्रदक्षिणित् ' इति तृचमेकादशं सूक्तं गार्त्समदं जागतम् । तथा चानुक्रान्तं—' प्रदक्षिणिज्जागतं मध्येऽतिशक्वर्यष्टिर्वा ' इति । द्वितीयातिशक्वरी अष्टिर्वा । इतरे जगत्यौ । कपिञ्जलरूपीन्द्रो देवता । वयसाममनोज्ञां वाचं श्रुत्वा ' प्रदक्षिणित् ' इति सूक्तं जपेत् । सूत्रं प्रागेवोदाहृतम् ॥

---

१. त-थ-प्रबलः मा सुपर्णः । २. क-ङ्ग-ङ्ग१-ण-त-थ-न-म-व-' उत.....वधीत् ' नास्ति; ख-ग-' उत.....वधीत् । ३. ख-ग-च-ण-ण१-थ-न-व-प्रापयत् । ४. म-अनर्थानाम् ।

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगाइव गायत्रं च त्रैष्टुभं चानु राजति ॥ १ ॥

प्रऽदक्षिणित् । अभि । गृणन्ति । कारवः । वयः । वदन्तः । ऋतुऽथा । शकुन्तयः ।
उभे इति । वाचौ । वदति । सामगाऽइव । गायत्रम् । च । त्रैस्तुभम् । च । अनु । राजति ॥१॥

[v]शकुन्तयः कपिञ्जलाः [v]ऋतुथा कालेकाले [v]वयः अन्नं [v]वदन्तः सूचयन्तः [v]कारवः स्तोतार इव [v]प्रदक्षिणित् प्रदक्षिणम् [v]अभि [v]गृणन्ति अभिवदन्तु । बहुवचनं पूजार्थम् । किंच [v]उभे [v]वाचौ गानं च श्रौतं च [v]सामगाः [v]गायत्रं [v]त्रैष्टुभं [v]च सामनी [v]इव शकुन्तिः[1] [v]वदति । [v]अनु [v]राजति [v]च । शृण्वतोऽनुरक्तान् करोतीत्यर्थः ॥

उद्गातेव शकुने साम गायसि ब्रह्मपुत्रइव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद
विश्वतो नः शकुने पुण्यमा वद ॥ २ ॥

उद्गाताऽइव । शकुने । साम । गायसि । ब्रह्मपुत्रःऽइव । सवनेषु । शंससि ।
वृषाऽइव । वाजी । शिशुऽमतीः । अपिऽइत्या । सर्वतः । नः । शकुने ।
भद्रम् । आ । वद । विश्वतः । नः । शकुने । पुण्यम् । आ । वद ॥ २ ॥

[v]शकुने हे कपिञ्जल [v]उद्गातेव [v]साम यथोद्गाता साम गायति तथा [v]गायसि गानस्वनं[2] करोषि । [v]ब्रह्मपुत्रइव यथा ब्राह्मणाच्छंसी [v]सवनेषु शस्त्राणि शंसति तथा[3] त्वं[3] कालेषु [v]शंससि श्रौतस्वरं करोषि । [v]वृषेव [v]वाजी सेचनसमर्थोऽश्वः [v]शिशुमतीः वडवाः [v]अपीत्य अभिगत्य यथा[4] शब्दं करोति तथा त्वमपि [v]वद । शिष्टं स्पष्टम् ॥

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ ३ ॥

आऽवदन् । त्वम् । शकुने । भद्रम् । आ । वद । तूष्णीम् । आसीनः । सुऽमतिम् । चिकिद्धि । नः ।
यत् । उत्ऽपतन् । वदसि । कर्करिः । यथा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥

१. थ-म-शकुनिः । २. ण-थ-म-मानस्वनम् । ३. ण-त-थ-म-' तथा त्वं ' नास्ति । ४. ण-त-थ-म-' यथा ' नास्ति ।

vशकुने हे कपिञ्जल vआवदन् शब्दं कुर्वन् vत्वं vभद्रमा vवद मङ्गलं वद। vतूष्णीमासीनः तूष्णीं तिष्ठन्नपि vनः अस्माकं vसुमतिं vचिकिद्धि बुध्यस्व। vयत् यदा vउत्पतन् vवदसि तदा vकर्करिर्यथा कर्करिरिव वदसि। कर्करिर्वाद्यविशेषः। अन्यद्व्याख्यातचरम्॥ ॥ १२ ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

द्वितीयाष्टके द्वितीये मण्डले चतुर्थोऽनुवाकः।

समाप्तं च द्वितीयं मण्डलम्॥

॥ अथ तृतीयं मण्डलम् ॥

वैश्वामित्रे तृतीये[1] पञ्चानुवाकाः । तत्र प्रथमेऽनुवाके द्वादश सूक्तानि । तत्र 'सोमस्य मा' इति त्रयोविंशत्यृचं प्रथमं सूक्तम् । तथा चानुक्रान्तं–'सोमस्य त्र्यधिका' इति । अस्य मण्डलद्रष्टा[2] विश्वामित्र ऋषिः । अनुक्तत्वात् त्रिष्टुप् छन्दः । 'मण्डलादिष्वाग्नेयम्' इति परिभाषयाग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि विनियोगः । तथा च सूत्रितं[3]–'सोमस्य मा तवसं प्रत्यग्निरुषस इति त्रीणि' (आश्व. श्रौ. ४. १३) इति ॥

सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥ १ ॥

सोमस्य । मा । तवसम् । वक्षि । अग्ने । वह्निम् । चकर्थ । विदथे । यजध्यै ।
देवान् । अच्छ । दीद्यत् । युञ्जे । अद्रिम् । शम्ऽआये । अग्ने । तन्वम् । जुषस्व ॥ १ ॥

हे [v]अग्ने त्वं [v]विदथे यज्ञे [v]यजध्यै यष्टुं [v]सोमस्य [v]वह्निं वोढारं यं मां [v]चकर्थ कृतवानसि तं मां [v]तवसं तवस्विनं बलिनं [v]वक्षि कामयस्व । किंच हे अग्ने [v]देवान् [v]अच्छ अभि [v]दीद्यत् दीप्यमानोऽहम् [v]अद्रिं ग्रावाणं [v]युञ्जे अभिषवणाय युनज्मि [v]शमाये शाम्यामि[4] च । तथा च मन्त्रान्तरम्–'ऋतेन देवः सविता शमायते' (ऋ. सं. ८. ८६. ५) इति । यद्वा शमाये स्तौमि । 'शशमानो जरति' इति स्तुतिकर्मसु पाठात् । तथा च मन्त्रान्तरं–'सो अग्न ईजे शशमे च मर्तः' (ऋ. सं. ६. १. ९) इति । किंच हे [v]अग्ने [v]तन्वं शरीरं [v]जुषस्व रक्षायै सेवस्व । यद्वा कर्माणि तन्वन्तं मां सेवस्वेत्यर्थः ॥

प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥ २ ॥

प्राञ्चम् । यज्ञम् । चकृम । वर्धताम् । गीः । समित्ऽभिः । अग्निम् । नमसा । दुवस्यन् ।
दिवः । शशासुः । विदथा । कवीनाम् । गृत्साय । चित् । तवसे । गातुम् । ईषुः ॥ २ ॥

हे अग्ने वयं [v]यज्ञं [v]प्राञ्चं प्रकर्षेण गच्छन्तं [v]चकृम अकार्ष्म । [v]गीः मदीया स्तुतिः [v]वर्धताम् एधताम् । [v]अग्निं [v]समिद्भिः [v]नमसा हविषा च [v]दुवस्यन् अस्मदीयाः परिचरेयुः । किंच [v]दिवः द्युलोकादागत्य देवाः [v]कवीनां स्तोतॄणां [v]विदथा ज्ञानानि स्तोत्राणि वा [v]शशासुः अन्वशिषन् । अपि च [v]गृत्साय । गृणातेरिदं रूपम् । स्तोतव्यायाग्नये [v]तवसे वृद्धाय [v]गातुं स्तोतुम् [v]ईषुः [v]चित् स्तोतार इच्छन्ति च । चिदिति चार्थे ॥

१. ञ-म–तृतीये मण्डले । २. च-म–मण्डलस्य द्रष्टा । ३. क-ख-ञ१-ण-थ-न-म-व–सूत्रम् । ४. क-च-ञ-ञ१-ण-थ-व–शम्यामि ; ख-ण१–शस्यामि ।

मर्यो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमप्स्वन्तर्देवासो अग्निमपसि स्वसॄणाम् ॥ ३ ॥

मर्यः । दधे । मेधिरः । पूतऽदक्षः । दिवः । सुऽबन्धुः । जनुषा । पृथिव्याः ।
अविन्दन् । ऊँ इति । दर्शतम् । अप्ऽसु । अन्तः । देवासः । अग्निम् । अपसि । स्वसॄणाम् ॥३॥

[v]मेधिरः मेधावान् प्राज्ञः [v]पूतदक्षः शुद्धबलः [v]जनुषा जन्ममात्रेण [v]सुबन्धुः शोभनबन्धुः । स्वत एव बन्धुरिति यावत् । योऽग्निः [v]दिवः द्युलोकस्य [v]पृथिव्याः भूमेश्च [v]मयः सुखं [v]दधे विदधाति । देवानां मनुष्याणां च सुखं करोतीति यावत् । तं [v]दर्शतं दर्शनीयम् [v]अग्निं [v]देवासः देवाः [v]स्वसॄणां सरणशीलानां नदीनाम् [v]अप्स्वन्तः गूढं स्थितम् [v]अपसि यज्ञवहनरूपे[1] कर्मणि निमित्ते । [v]उ इति पूरणः । [v]अविन्दन् लब्धवन्तः ॥

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥ ४ ॥

अवर्धयन् । सुऽभगम् । सप्त । यह्वीः । श्वेतम् । जज्ञानम् । अरुषम् । महिऽत्वा ।
शिशुम् । न । जातम् । अभि । आरुः । अश्वाः । देवासः । अग्निम् । जनिमन् । वपुष्यन् ॥४॥

[v]सप्त सर्पणशीलाः [v]यह्वीः यह्वयः महत्यो नद्यः [v]सुभगं शोभनधनं [v]श्वेतं शुभ्रं [v]जज्ञानं जातं [v]महित्वा महत्त्वेन [v]अरुषम् आरोचमानमप्सु स्थितमग्निम् [v]अवर्धयन् । स्वकार्यभूताभिरोषधीभिर्वृद्धिं प्रापितवत्यः । यद्वा दिव्यमग्निमापो वर्धयन्त्यवबिन्धनत्वात्तस्य । किंच [v]शिशुं न [v]जातं यथा जातं शिशुम् [v]अश्वाः वडवाः [v]अभ्यारुः अभिगच्छन्ति तथा नद्य उत्पन्नमग्निमभ्यारुः अभिजग्मुः । अपि च [v]देवासः देवाः [v]अग्निं [v]जनिमन् जन्मन्युदके वा [v]वपुष्यन् वपुर्दीप्तिमकुर्वन् ॥

शुक्रेभिरङ्गैः रजसा आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥ ५ ॥

शुक्रेभिः । अङ्गैः । रजसः । आऽततन्वान् । क्रतुम् । पुनानः । कविऽभिः । पवित्रैः ।
शोचिः । वसानः । परि । आयुः । अपाम् । श्रियः । मिमीते । बृहतीः । अनूनाः ॥ ५ ॥

अग्निः [v]शुक्रेभिः शुक्रैः [v]अङ्गैः तेजोभिः [v]रजः अन्तरिक्षम् [v]आततन्वान् आतन्वन् व्याप्नुवन् [v]क्रतुं कर्मणां कर्तारं यजमानं [v]कविभिः क्रान्तप्रज्ञैः स्तोतव्यैर्वा [v]पवित्रैः शोधकैस्तेजोभिः [v]पुनानः

१. क-ङ्ग-ण-ण१-न-म–यज्ञवाहनरूपे ।

शोधयन् vशोचिः दीप्तिं वस्त्रस्थानीयं vपरि परितः vवसानः आच्छादयन् vअपाम् अपस्यतां कर्मवताम् vआयुः अन्नं vबृहतीः प्रभूताः vअनूनाः संपूर्णाः vश्रियः संपदश्च vमिमीते करोति ॥ ॥ १३ ॥

वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥

वव्राज । सीम् । अनदतीः । अदब्धाः । दिवः । यह्वीः । अवसानाः । अनग्नाः ।
सनाः । अत्र । युवतयः । सऽयोनीः । एकम् । गर्भम् । दधिरे । सप्त । वाणीः ॥ ६ ॥

vअनदतीः अभक्षयन्तीः vअदब्धाः अहिंसिता मातृभूता अपोऽग्निः vसीं सर्वतः vवव्राज व्रजति । अग्निरपां शोषकः तं चापः शमयन्ति तदुभयमिह नास्तीत्युक्तं भवति । कीदृश्यस्ताः । vदिवो vयह्वीः अन्तरिक्षस्यापत्यभूताः vअवसानाः वस्त्रमनाच्छादयन्त्यः । वस्त्रस्थानीयस्य जलस्य विद्यमानत्वात् । अत एव vअनग्नाः । किंच ता अपि vसनाः सनातन्यः vयुवतयः नित्यतरुण्यः । नित्यवृद्धा इत्यर्थः । vसयोनीः समानमन्तरिक्षं स्थानं यासां ताः vसप्त vवाणीः नद्यः vएकम् अग्निं vगर्भं गर्भस्थं vदधिरे दधते ॥

स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥ ७ ॥

स्तीर्णाः । अस्य । सम्ऽहतः । विश्वऽरूपाः । घृतस्य । योनौ । स्रवथे । मधूनाम् ।
अस्थुः । अत्र । धेनवः । पिन्वमानाः । मही इति । दस्मस्य । मातरा । समीची इति सम्ऽईची ॥७॥

vघृतस्य उदकस्य vयोनौ स्थानेऽन्तरिक्षे vसंहतः पुञ्जीभूताः । हन्तेः क्विप् । vविश्वरूपाः नानारूपाः[1] vस्तीर्णाः सर्वत्र प्रसृताः vअस्य अग्नेः रश्मयः vमधूनाम् उदकानां vस्रवथे स्रवणे सति vअस्थुः तिष्ठन्ति । vपिन्वमानाः पूर्यमाणाः vअत्र अग्नौ आपः vधेनवः सर्वेषां प्रीणयित्र्योऽभवन् । vसमीची समञ्चन्त्यौ[2] शोभमाने vमही महत्यौ द्यावापृथिव्यौ vदस्मस्य दर्शनीयस्य अग्नेः[3] vमातरा मातरौ भवतः ॥

बभ्राणः सूनो सहसो व्यद्यौद्धानः शुक्रा रभसा वपूंषि
श्रोतन्ति धारा मधुनो घृतस्य वृषा यत्र ववृधे काव्येन ॥ ८ ॥

बभ्राणः । सूनो इति । सहसः । वि । अद्यौत् । दधानः । शुक्रा । रभसा । वपूंषि ।
श्रोतन्ति । धाराः । मधुनः । घृतस्य । वृषा । यत्र । ववृधे । काव्येन ॥ ८ ॥

१. म-व-नानाविधरूपाः । २. ख-ग-ण-त-थ-समञ्चत्यौ । ३. ङ्ग-त-थ-न-म-व-यस्याग्नेः ।

हे [v]सहसः [v]सूनो सहसस्पुत्र [v]बभ्राणः सर्वैर्धार्यमाणस्त्वं [v]शुक्रा शुक्राणि भास्वराणि [v]रभसा वेगवन्ति [v]वपूंषि अर्चींषि [v]दधानः धारयंस्त्वं [v]व्यद्यौत् विद्योतसे। [v]वृषा अग्निः [v]यत्र यस्मिन्यजमाने [v]काव्येन स्तोत्रेण [v]ववृधे वृद्धिं प्राप्नोति तदानीं [v]मधुनः अत्यन्तं मधुरस्य [v]घृतस्य उदकस्य [v]धाराः [v]श्रोतन्ति स्रवन्ते। यदा यजमानस्तोत्रेणाग्निस्तुष्टो भवति तदानीं वृष्टिर्भवतीत्यर्थः ॥

पितुश्चिदूर्धा जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।
गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥ ९ ॥

पितुः । चित् । ऊर्धः । जनुषा । विवेद । वि । अस्य । धाराः । असृजत् । वि । धेनाः ।
गुहा । चरन्तम् । सखिऽभिः । शिवेभिः । दिवः । यह्वीभिः । न । गुहा । बभूव ॥ ९ ॥

[v]पितुः अन्तरिक्षस्य [v]ऊधः ऊधःस्थानीयं जलप्रदेशमयमग्निः [v]जनुषा स्वयमेव [v]विवेद जानाति। किंच अयमग्निः [v]अस्य ऊधसः संबन्धिन्यः [v]धाराः पयोधाराः [v]वि [v]असृजत्। [v]धेनाः माध्यमिका वाचश्च विसृजति। [v]शिवेभिः शिवंकरैः [v]सखिभिः आत्मनः सख्विभूतैर्वायुभिः [v]दिवः [v]यह्वीभिः अन्तरिक्षस्यापत्यभूताभिरद्भिश्च सह [v]गुहा गुहायां [v]चरन्तं वर्तमानमेनमग्निं [v]गुहा [v]चित् गुहायां स्थितः कोऽपि [v]न [v]बभूव प्रभुं समर्थो नाभवत् ॥

पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः ।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्येड नि पाहि ॥ १० ॥

पितुः । च । गर्भम् । जनितुः । च । बभ्रे । पूर्वीः । एकः । अधयत् । पीप्यानाः ।
वृष्णे । सपत्नी इति सऽपत्नी । शुचये । सबन्धू इति सऽबन्धू ।
उभे इति । अस्मै । मनुष्येड इति । नि । पाहि ॥ १० ॥

अयमग्निः [v]पितुः [v]च[1] अन्तरिक्षस्य [v]गर्भं वृष्टिद्वारा गर्भभूतं [v]जनितुः सर्वस्य लोकस्य जनयितुः ब्रह्मणः[2] [v]च[2] लोकमोषध्यादिकं [v]बभ्रे बिभर्ति। [v]एकः एवाग्निः[3] [v]पूर्वीः बह्वीः [v]पीप्यानाः प्यायमाना वृद्धिं प्राप्ता ओषधीः [v]अधयत् धयति भक्षयति। [v]सपत्नी समान एकः सूर्यः पतिर्ययोस्ते [v]मनुष्ये मनुष्येभ्यो हिते [v]उभे द्यावापृथिव्यौ [v]वृष्णे वर्षित्रे [v]अस्मै [v]शुचये अग्नये [v]सबन्धू भवतः। अनयोरग्निरेव बन्धुरित्यर्थः। हे अग्ने त्वं ते द्यावापृथिवी [v]नि [v]पाहि नितरां रक्ष ॥ ॥ १४ ॥

१. झ-झ१-ण-त-थ-न-म-व-'च' नास्ति। २. क-झ-ण-त-थ-न-म-ब्राह्मणश्च; ख-ग-च-ण१-च ब्राह्मणस्य; व-ब्राह्मणस्य। ३. ग-ण-एक एवाग्निः।

उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम् ॥ ११ ॥

उरौ । महान् । अनिऽबाधे । ववर्ध । आपः । अग्निम् । यशसः । सम् । हि । पूर्वीः ।
ऋतस्य । योनौ । अशयत् । दमूनाः । जामीनाम् । अग्निः । अपसि । स्वसॄणाम् ॥ ११ ॥

vमहान् अयमग्निः vअनिबाधे असंबाधे vउरौ विस्तीर्णेऽन्तरिक्षे vववर्ध वर्धते । अस्य वर्धने कारणमाह । vहि यस्मात्कारणात् vपूर्वीः बह्व्य vयशसः । यशोऽन्नम् । तद्वत्यः vआपः vअग्निं vसं वर्धयन्ति । एवमद्भिर्वृद्धिं प्राप्तः vअग्निः vऋतस्य उदकस्य vयोनौ स्थानेऽन्तरिक्षे स्थितः vस्वसॄणां स्वतः सरन्तीनां vजामीनां भगिनीस्थानीयानां हेतुभूते vअपसि पयसि vदमूनाः दान्तमनाः सन् vअशयत् शेते ॥

अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।
उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥ १२ ॥

अक्रः । न । बभ्रिः । सम्ऽइथे । महीनाम् । दिदृक्षेयः । सूनवे । भाःऽऋजीकः ।
उत् । उस्रियाः । जनिता । यः । जजान । अपाम् । गर्भः । नृऽतमः । यह्वः । अग्निः ॥ १२ ॥

vजनिता सर्वस्य लोकस्य जनयिता vअपाम् उदकानां vगर्भः गर्भरूपः vनृतमः नेतृतमः अतिशयेन मनुष्याणां रक्षिता vयह्वः महान् vयः vअग्निः vअक्रः परैरनाक्रमितो परैरनाक्रमणीयो वा । vन इति पादपूरणः[1]। vसमिथे संग्रामे vमहीनां महतीनां स्वसेनानां vबभ्रिः भर्ता vदिदृक्षेयः सर्वैर्दर्शनीयः vभाऋजीकः स्वदीप्त्या प्रकाशमानः सोऽग्निः vसूनवे हविषां प्रदात्रे यजमानाय तदर्थम् vउस्रियाः अपः vउत् vजजान उदजनयत् ॥ सूनवे । ' षू प्रेरणे ' इत्यस्माद्धातोरौणादिको नुप्रत्ययः ॥

अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम् ।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ॥ १३ ॥

अपाम् । गर्भम् । दर्शतम् । ओषधीनाम् । वना । जजान । सुऽभगा । विऽरूपम् ।
देवासः । चित् । मनसा । सम् । हि । जग्मुः । पनिष्ठम् । जातम् । तवसम् । दुवस्यन् ॥ १३ ॥

vसुभगा सुभाग्या vवना सर्वैर्वननीयारणिः vदर्शतं दर्शनीयं vविरूपं नानाविधरूपम् vअपाम् vओषधीनां च vगर्भम्[2] अग्निं vजजान अजनयत् । vदेवासश्चित् सर्वे देवा अपि vपनिष्ठं स्तुत्यं vतवसं वृद्धं vजातं जातमात्रं तमग्निं vमनसा स्तुत्या vसं vजग्मुः उपागच्छन् । vहि इति पूरणः । त एव vदुवस्यन् पर्यचरन् ॥

१. झ१-त-थ–पदपूरणः । २. क-ख-ग-च-ज-झ-ण-ण१-त-थ न-फ-म-ब–रूपं च गर्भम् ।

बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥ १४ ॥

बृहन्तः । इत् । भानवः । भाःऽऋजीकम् । अग्निम् । सचन्त । विऽद्युतः । न । शुक्राः ।
गुहाऽइव । वृद्धम् । सदसि । स्वे । अन्तः । अपारे । ऊर्वे । अमृतम् । दुहानाः ॥ १४ ॥

vअपारे अगाधे vऊर्वे समुद्रे vअन्तः मध्ये vअमृतम् उदकं vदुहानाः क्षरन्तः vबृहन्त vइद्भानवः महान्तः[1] सूर्या एव[1] vशुक्राः दीप्यमानाः vविद्युतो vन विद्युत इव vस्वे स्वकीये vसदसि सदने अन्तरिक्षे vगुहेव गुहायामिव vवृद्धं प्रवृद्धं vभाऋजीकं प्रभया दीप्यमानम् vअग्निं vसचन्त आश्रयन्ति॥

ईळे च त्वा यजमानो हविर्भिरीळे सख्यत्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥ १५ ॥

ईळे । च । त्वा । यजमानः । हविःऽभिः । ईळे । सख्यिऽत्वम् । सुऽमतिम् । निऽकामः ।
देवैः । अवः । मिमीहि । सम् । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥ १५ ॥

vयजमानः अहं vहविर्भिः साधनैः vत्वा त्वाम् vईळे vच पश्वादिलक्षणं धनं च याचे । vसुमतिं शोभनां मतिं धर्मविषयां बुद्धिं vनिकामः नितरां कामयमानस्त्वया सह vसख्यित्वम् vईळे याचे । त्वं vदेवैः सह vजरित्रे स्तोत्रे[2] स्तोत्रं कुर्वते मह्यमस्मदर्थम् vअवः पश्वादिविषयां रक्षां vमिमीहि कुरु । vदम्येभिः दमनीयैर्नियन्तव्यैः । प्रयत्ननियन्तव्यतयोच्छृङ्खलतोक्ता । vअनीकैः तेजोभिः vनः अस्मान् vरक्ष vच ॥ ॥ १५ ॥

उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुज्यमाना अभि ष्याम पृतनायूँरदेवान् ॥ १६ ॥

उपऽक्षेतारः । तव । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः ।
सुऽरेतसा । श्रवसा । तुज्यमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान् ॥ १६ ॥

हे vसुप्रणीते शोभनप्रणयन हे vअग्ने vतव vउपक्षेतारः उपगन्तारः । अत्र क्षितिर्गत्यर्थे वर्तते । vविश्वानि सर्वाणि vधन्या धन्यानि[3] पश्वादिधनप्राप्तिहेतुभूतानि कर्माणि vदधानाः विदधानाः[4] कुर्वन्तः vतुज्यमानाः हवींषि प्रयच्छन्तो वयं vसुरेतसा शोभनवीर्येण vश्रवसा स्वरकृतेनान्नेन

१. क-ञ-ञ१-ण-त-थ-न-म-व-' महान्तः सूर्या एव ' नास्ति । २. ख-ग-' स्तोत्रे ' नास्ति; म-स्तोत्रैः । ३. ख-ग-च-ण-ण१-त-थ-न-व-धनानि । ४. ख-ग-च-ञ-ञ१-ण-ण१-त-थ-न-व-' विदधानाः ' नास्ति ।

vअदेवान् देवेभ्योऽन्यान्। नन्विवयुक्तन्यायेन राक्षसा एव गृह्यन्ते। यज्ञविघ्नकारिणस्तान् vघृतनायून् च शरीराद्युपद्रवकारिणः शत्रूंश्च vअभि vष्याम अभिभवेम। यद्वा देवानपूजयतः शत्रूनिति वा योज्यम्॥

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान्।
प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन्॥ १७॥

आ। देवानाम्। अभवः। केतुः। अग्ने। मन्द्रः। विश्वानि। काव्यानि। विद्वान्।
प्रति। मर्तान्। अवासयः। दमूनाः। अनु। देवान्। रथिरः। यासि। साधन्॥ १७॥

हे vअग्ने vमन्द्रः स्तुत्यः vकेतुः यज्ञेषु vदेवानां प्रज्ञापकस्त्वम् vआ vअभवः आ समन्ताद्भवसि। सर्वव्यापको भवसीत्यर्थः। किंच vविश्वानि सर्वाणि vकाव्यानि यजमानादिभिः कृतानि स्तोत्राणि vविद्वान् जानंस्त्वं vमर्तान् मर्त्यान् स्तोतॄन् स्वाभिलषितवस्तुसंपादनेन प्रीतान् विधाय गृहेषु vप्रति vअवासयः प्रतिवासयसि। vरथिरः रथी[1] vसाधन् देवानां हितानि कर्माणि साधयन् vदेवान् vअनु vयासि च अनुगच्छसि च॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन्।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान्॥ १८॥

नि। दुरोणे। अमृतः। मर्त्यानाम्। राजा। ससाद। विदथानि। साधन्।
घृतऽप्रतीकः। उर्विया। वि। अद्यौत्। अग्निः। विश्वानि। काव्यानि। विद्वान्॥ १८॥

vअमृतः नित्यः vराजा राजमानो योऽग्निः vविदथानि यज्ञान् vसाधन् साधयन् vमर्त्यानाम् अग्निहोत्रिणां[2] vदुरोणे गृहे vनि vससाद निषीदति। vविश्वानि vकाव्यानि vविद्वान् जानन् vघृतप्रतीकः घृतेन संपुक्षितावयवः vउर्विया विस्तीर्णः सः vअग्निः vव्यद्यौत् विद्योतते॥

आ नो गहि सख्योभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन्।
अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः॥ १९॥

आ। नः। गहि। सख्येभिः। शिवेभिः। महान्। महीभिः। ऊतिऽभिः। सरण्यन्।
अस्मे इति। रयिम्। बहुलम्। सम्ऽतरुत्रम्। सुऽवाचम्। भागम्। यशसम्। कृधि। नः॥ १९॥

vसरण्यन् सर्वत्र सरणं गमनमिच्छन् vमहान् त्वं vशिवेभिः शिवंकरैः vसख्येभिः सख्यैः सख्यिकर्मभिः vमहीभिः महतीभिः vऊतिभिः रक्षाभिश्च vनः अस्मान्प्रति vआ vगहि आगच्छ। vअस्मे

१. क-ख-ग-च-ज्ञ-ण१-थ-न-म-व-रथीः। २. क-ज्ञ-ज्ञ१-ण-त-थ-न-म-व-अग्निहोतॄणाम्।

अस्मभ्यं [V]बहुलं विस्तीर्णं [V]संतरुत्रं सर्वेषामुपद्रवाणां संतारकं [V]सुवाचं शोभनवाचं [V]भागं सर्वैर्भजनीयं [V]यशसं यशसा कीर्त्या संयुक्तं [V]रयिं धनं [V]नः अस्मभ्यं [V]कृधि देहि । अस्मभ्यमिति पुनर्वचनमादरातिशयार्थम् ॥

एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन् निहितो जातवेदाः ॥ २० ॥

एता । ते । अग्ने । जनिम । सनानि । प्र । पूर्व्याय । नूतनानि । वोचम् ।
महान्ति । वृष्णे । सवना । कृता । इमा । जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः ॥२०॥

हे [V]अग्ने [V]पूर्व्याय पुरातनाय [V]ते तुभ्यं [V]सनानि सनातनानि महद्भिः संभजनीयानि वा [V]नूतनानि अन्येष्वविद्यमानानि[1] अद्यतनानि वा [V]एता एतानि [V]जनिम जन्मानि कर्माणि स्तोत्राणि वा [V]प्र [V]वोचम् । [V]जातवेदाः जातप्रज्ञो जातधनो वा [V]जन्मन्जन्मन् । जायन्त इति जन्मानः । तेषु सर्वेषु मनुष्येषु [V]निहितः यागार्थम् । तस्मै [V]वृष्णे संपदां वर्षित्रेऽग्नये [V]इमा इमानि [V]सवना सवनानि [V]कृता कृतानि ॥

जन्मञ्जन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ २१ ॥

जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः । विश्वामित्रेभिः । इध्यते । अजस्रः ।
तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ २१ ॥

[V]जन्मन्जन्मन् सर्वेषु मनुष्येषु [V]निहितः [V]जातवेदाः [V]विश्वामित्रेभिः विश्वामित्रैः । पूजायां बहुवचनम्। महर्षिणा विश्वामित्रेण यो जातवेदाः [V]अजस्रः अजस्रमनवरतम् [V]इध्यते दीप्यते। [V]सुमतौ वर्तमानाः [V]वयं [V]तस्य [V]यज्ञियस्य यज्ञार्हस्य अग्नेः [V]भद्रे भजनीये [V]सौमनसे सुमनोभावे अनुग्रहबुद्धौ [V]अपि [V]स्याम अपि भवेम । प्रार्थनायां लिङ् ॥

इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः ।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यजस्व ॥ २२ ॥

इमम् । यज्ञम् । सहसाऽवन् । त्वम् । नः । देवऽत्रा । धेहि । सुक्रतो इति सुऽक्रतो । रराणः ।
प्र । यंसि । होतः । बृहतीः । इषः । नः । अग्ने । महि । द्रविणम् । आ । यजस्व ॥ २२ ॥

---

१. क-ङ-म-अन्येष्वपि विद्यमानानि ।

हे [v]सहसावन् सहस्वन् बलवन् [v]सुक्रतो शोभनकर्मन् हे अग्ने [v]रराणः सर्वदा रममाणः शब्दं कुर्वाणो वा [v]त्वं [v]नः अस्मदीयम् [v]इमं [v]यज्ञं [v]देवत्रा देवेषु [v]धेहि निधेहि । हे [v]होतः देवानामाह्वातः[v]बृहतीः महतीः[1] [v]इषः अन्नानि [v]नः अस्मभ्यं [v]प्र [v]यंसि प्रयच्छ । हे [v]अग्ने [v]महि महत् [v]द्रविणं पश्वादिलक्षणं धनं [v]आ [v]यजस्व प्रयच्छ । अत्र यजिर्दानकर्मा ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ २३ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥२३॥

इयं सर्वेषां पशूनां पशुपुरोडाशस्य स्विष्टकृतः पुरोनुवाक्या । सूत्र्यते हि–' इळामग्ने पुरुदंसं सनिं गोर्होता यक्षदग्निं पुरोळाशस्य स्वदस्व हव्या समिषो दिदीहीति पुरोळाशस्विष्टकृतः ' (आश्व. श्रौ. ३. ५) इति ॥

हे [v]अग्ने [v]पुरुदंसं बहुकर्माणं [v]गोः गवां [v]सनिं प्रदात्रीम् [v]इळां भूमिं [v]हवमानाय स्तुवते मह्यं [v]शश्वत्तमं चिरकालं यथा भवति तथा [v]साध साधय । [v]नः अस्माकं [v]सूनुः पुत्रः [v]तनयः संतानस्य विस्तारयिता [v]विजावा पुत्रपौत्रादिरूपेण स्वयं विजायत इति विजावा स्यात् । हे [v]अग्ने [v]या प्रसिद्धा [v]ते [v]सुमतिः त्वदीयानुग्रहबुद्धिः [v]अस्मे अस्मासु [v]भूतु भवतु ॥ ॥ १६ ॥

' वैश्वानराय ' इति पञ्चदशर्चं द्वितीयं सूक्तम् । तथा चानुक्रान्तं—' वैश्वानराय पञ्चोना वैश्वानरीयं तु जागतं तु ' इति । विश्वामित्र ऋषिः । जगती छन्दः । वैश्वानरोऽग्निर्देवता ॥ पृष्ठ्याभिप्लविकयोस्तृतीयेऽहन्यग्निमारुते ' वैश्वानराय धिषणाम् ' इति वैश्वानरनिविद्धानीयं सूक्तम् । ' तृतीयस्य ' इति खण्डे सूत्रितं–' वैश्वानराय धिषणां धारावरा मरुतः ' (आश्व. श्रौ. ७. ७) इति ॥

वैश्वानरायं धिषणामृतावृधे घृतं न पूतमग्नये जनामसि ।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥ १ ॥

वैश्वानरायं । धिषणाम् । ऋतऽवृधे । घृतम् । न । पूतम् । अग्नये । जनामसि ।
द्विता । होतारम् । मनुषः । च । वाघतः । धिया । रथम् । न । कुलिशः । सम् । ऋण्वति ॥१॥

[v]ऋतावृधे[2] ऋतस्योदकस्य यज्ञस्य वा वर्धयित्रे [v]वैश्वानराय । वैश्वानरशब्दो यास्केन व्याख्यातः–' वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वा । अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति ' (निरु. ७. २१) इति । तस्मै [v]अग्नये[3] [v]घृतं [v]न घृतमिव [v]धिषणां [v]स्तुतिं [v]जनामसि जनयामः । यथा घृतं प्रीतिं जनयति तथा प्रीतिं करोमि

१. क-ज्ञ-त-थ-म–' महतीः ' नास्ति । २. ण-त-थ-न-व–ऋतवृधे । ३. क-ज्ञ-ज्ञ१-ण-त-थ-न-म-व–अग्नये ' नास्ति ।

इत्यर्थः । [v]द्विता द्विधा गार्हपत्याहवनीयरूपाभ्यां युक्तं [v]होतारं देवानामाह्वातारमग्निं [v]मनुषः मनुष्याः [v]वावतः [v]च ऋत्विजश्च [v]धिया कर्मणा [v]कुलिशः वास्यादिः [v]रथं [v]न रथमिव [v]समृण्वति संस्कुर्वन्ति ॥

स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥ २ ॥

सः । रोचयत् । जनुषा । रोदसी इति । उभे इति । सः । मात्रोः । अभवत् । पुत्रः । ईड्यः । हव्यऽवाट् । अग्निः । अजरः । चनःऽहितः । दुःऽदभः । विशाम् । अतिथिः । विभाऽवसुः ॥२॥

[v]सः अग्निः [v]जनुषा जन्मना [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]रोचयत् अरोचयत् प्रकाशयति । [v]स [v]मात्रोः द्यावापृथिव्योः [v]ईड्यः स्तुत्यः [v]पुत्रः [v]अभवत् । [v]हव्यवाट् हव्यानां वोढा [v]अग्निः अङ्गनादिगुणयुक्तः [v]अजरः जरारहितः[1] । चनोऽन्नं हितं यजमाने निहितं येनासौ [v]चनोहितः [v]दूळभः हिंसितुमशक्यः । सोऽयं [v]विभावसुः प्रभाधनः [v]विशां मनुष्याणाम् [v]अतिथिः इव पूज्यो भवति ॥

कृत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥ ३ ॥

कृत्वा । दक्षस्य । तरुषः । विऽधर्मणि । देवासः । अग्निम् । जनयन्त । चित्तिऽभिः । रुरुचानम् । भानुना । ज्योतिषा । महाम् । अत्यम् । न । वाजम् । सनिष्यन् । उप । ब्रुवे ॥३॥

[v]चित्तिभिः ज्ञानैरुपलक्षिताः [v]देवासः देवाः [v]तरुषः व्यसनेभ्यस्तारकस्य [v]दक्षस्य बलस्य [v]कृत्वा कर्मणा [v]विधर्मणि विधारके यज्ञे [v]अग्निं [v]जनयन्त अजनयन् । [v]भानुना भासमानेन [v]ज्योतिषा [v]रुरुचानं रोचमानं [v]महां महान्तमग्निम् [v]अत्यं [v]न भारसहमश्वमिव [v]वाजम् अन्नं [v]सनिष्यन् लिप्समानोऽहम् [v]उप [v]ब्रुवे स्तौमि ॥

आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्वयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥ ४ ॥

आ । मन्द्रस्य । सनिष्यन्तः । वरेण्यम् । वृणीमहे । अह्वयम् । वाजम् । ऋग्मियम् । रातिम् । भृगूणाम् । उशिजम् । कविऽक्रतुम् । अग्निम् । राजन्तम् । दिव्येन । शोचिषा ॥४॥

[v]मन्द्रस्य स्तुत्यस्य वैश्वानरस्य संबन्धिनं [v]वरेण्यं वरणीयम् [v]अह्वयम् अलज्जावहम् [v]ऋग्मियं प्रशस्यं [v]वाजम् अन्नं [v]सनिष्यन्तः लिप्समाना वयं [v]भृगूणाम् ऋषीणां [v]रातिम् अभिलषितार्थप्रदातारम्

१. ख-ग-च-ञ१-ण-ण१-न-व—जरादिरहितः ।

vउशिजम् अभिलष्यन्तं vकविक्रतुं क्रान्तप्रज्ञं vदिव्येन दिविभवेन vशोचिषा रोचिषा vराजन्तं भ्राजमानम् vअग्निम् vआ vवृणीमहे संभजामहे ॥

अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥ ५ ॥

अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः । वाजश्रवसम् । इह । वृक्तबर्हिषः ।
यतस्रुचः । सुरुचम् । विश्वदेव्यम् । रुद्रम् । यज्ञानाम् । साधत्इष्टिम् । अपसाम् ॥५॥

vवृक्तबर्हिषः स्तीर्णबर्हिषः vयतस्रुचः प्राप्तस्रुच ऋत्विजः vसुम्नाय सुखार्थं vवाजश्रवसं मनुष्येभ्यः प्रेरितारं vसुरुचं प्रशस्तदीप्तिमन्तं vविश्वदेव्यं विश्वेभ्यो देवेभ्यो हितं vरुद्रं दुःखानां द्रावकम् vअपसां कर्मवतां vयज्ञानाम् । यजन्तीति यज्ञा यजमानाः । तेषां vसाधदिष्टिं साधितयज्ञम् vअग्निम्[1] vइह यज्ञे[1] vपुरः vदधिरे स्तुवन्ति ॥ ॥ १७ ॥

पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुवं इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥ ६ ॥

पावकऽशोचे । तव । हि । क्षयम् । परि । होतः । यज्ञेषु । वृक्तऽबर्हिषः । नरः ।
अग्ने । दुवः । इच्छमानासः । आप्यम् । उप । आसते । द्रविणम् । धेहि । तेभ्यः ॥ ६ ॥

हे vपावकशोचे शोधकदीप्ते हे vहोतः देवानामाह्वातः vयज्ञेषु vपरि परितः vवृक्तबर्हिषः स्तीर्णबर्हिषः vदुवः परिचरणम् vइच्छमानासः इच्छन्तः vनरः नेतारः यजमानाः vआप्यम् आप्तुं योग्यं vतव त्वत्संबन्धिनं vक्षयं निवासं यागगृहम् vउपासते सेवन्ते । vतेभ्यः vद्रविणं धनं vधेहि विधेहि ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७ ॥

आ । रोदसी इति । अपृणत् । आ । स्वः । महत् । जातम् । यत् । एनम् । अपसः । अधारयन् ।
सः । अध्वराय । परि । नीयते । कविः । अत्यः । न । वाजसातये । चनःऽहितः ॥७॥

vरोदसी द्यावापृथिव्यौ vआ vअपृणत् आपूरयत् । तथा vमहत् प्रभूतं vस्वः अन्तरिक्षम् vआ अपृणच्च। vअपसः कर्मवन्तो यजमानाः vजातं vयत् यम्[2] vएनम् अग्निम् vअधारयन्। vअत्यो vन

१. ण-त-थ-म-' अग्निम् इह यज्ञे ' नास्ति । २. त-थ-' यं ' नास्ति।

अश्व इव [V]कविः क्रान्तः सर्वत्र व्याप्तः [V]चनोहितः निहितान्नः [V]सः अयमग्निः [V]वाजसातये वाजस्य अन्नस्य कीर्तेर्वा सातये लाभाय [V]परि [V]णीयते यज्ञार्थं नीयते ॥

नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीक्रतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ ८ ॥

नमस्यत । हव्यऽदातिम् । सुऽअध्वरम् । दुवस्यत । दम्यम् । जातऽवेदसम् ।
रथीः । क्रतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानाम् । अभवत् । पुरःऽहितः ॥८॥

[V]रथीः नेता [V]बृहतः महतः [V]क्रतस्य यज्ञस्य [V]विचर्षणिः द्रष्टा यः [V]अग्निः [V]देवानां [V]पुरोहितः पुरस्तात् द्रष्टव्यतया स्थापितः [V]अभवत् [V]हव्यदातिं देवेभ्यो हविषां दातारं [V]स्वध्वरं शोभनयज्ञं [V]दम्यं दमेभ्यो गृहेभ्यो हितं [V]जातवेदसं जातप्रज्ञं तमग्निं [V]नमस्यत पूजयत [V]दुवस्यत परिचरत ॥

तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥ ९ ॥

तिस्रः । यह्वस्य । सम्ऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः ।
तासाम् । एकाम् । अदधुः । मर्त्ये । भुजम् ।
ऊँ इति । लोकम् । ऊँ इति । द्वे इति । उप । जामिम् । ईयतुः ॥ ९ ॥

[V]उशिजः कामयमानाः [V]अमृत्यवः मृत्युरहिता देवाः [V]यह्वस्य महतः [V]परिज्मनः परितो गन्तुः [V]समिधः समिन्धिकाः प्रकाशिकाः [V]तिस्रः पार्थिववैद्युतसूर्यरूपास्तिस्रस्तनूः [V]अपुनन् अशोधयन् । ते देवाः [V]भुजं सर्वेषां पालयित्रीं [V]तासां तनूनां मध्ये [V]एकां पार्थिवीं तनुं [V]मर्त्ये मर्त्यलोके [V]अदधुः न्यदधुः । [V]उ इति पादपूरणः[1] । इतरे [V]द्वे तनू [V]जामिं [V]लोकम् आसन्नमन्तरिक्षम् [V]उप [V]ईयतुः गच्छतः । अथवा तिस्रः समिध आधारसमिधौ द्वे अनूयाजसमिधौ चेति । तासां समिधामेकामनूयाजसमिधं मर्त्ये इह लोके भोगहेतुमनूयाजपर्यन्तमदधुः धारयन्ति । 'प्रजा वा अनूयाजाः[2]' इति प्रजात्वेनानूयाजानां संस्तवात् तदाश्रयत्वाच्चानूयाजसमिधः । इतरे द्वे समिधावन्तरिक्षे दिव्यभोगहेतू उपेयतुः उपगच्छतः । 'त्रीन्परिधींस्तिस्रः समिधः' इति हि निगमः ॥

विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥ १० ॥

विशाम् । कविम् । विश्पतिम् । मानुषीः । इषः ।
सम् । सीम् । अकृण्वन् । स्वऽधितिम् । न । तेजसे ।
सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भम् । एषु । भुवनेषु । दीधरत् ॥१०॥

१. ऋ१-त-थ-न-व–पदपूरणः । २. ऋ१-ण-त-थ-न-व–अनूयाजः ।

[v]इषः पश्वादिलक्षणं धनमिच्छन्त्यः [v]मानुषीः मनुष्यप्रजाः [v]विशां प्रजानां [v]विश्पतिं प्रभुं [v]कविं मेधाविनं [v]सीम् एनं [v]स्वधितिं [v]न असिमिव [v]तेजसे तैक्ष्ण्यार्थं [v]सम् [v]अकृण्वन् समस्कुर्वन्। [v]सः अग्निः [v]उद्वतः उच्छ्रायवतः[1] [v]निवतः नीचैर्भाववतश्च प्रदेशान् [v]वेविषत् व्याप्नुवन् [v]याति गच्छति। [v]सः [v]एषु [v]भुवनेषु [v]गर्भम्[2] अरण्याः[2] [v]दीधरत् अधारयत्॥ ॥ १८ ॥

स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ११ ॥

सः। जिन्वते। जठरेषु। प्रजज्ञिऽवान्। वृषा। चित्रेषु। नानदत्। न। सिंहः।
वैश्वानरः। पृथुऽपाजाः। अमर्त्यः। वसु। रत्ना। दयमानः। वि। दाशुषे ॥ ११ ॥

[v]प्रजज्ञिवान् जातः [v]वृषा वर्षकः [v]सः [v]वैश्वानरः [v]चित्रेषु नानाप्रकारेषु [v]जठरेषु। प्राणिनां भेदाज्जठराणां भेदः। तेषु [v]जिन्वते वर्धते। चित्रेषु नानाविधेष्वरण्येषु [v]नानदत् अत्यर्थं शब्दं कुर्वन् [v]सिंहः [v]न सिंह इव। किंविधो वैश्वानरः। [v]पृथुपाजाः पृथुतेजाः। अथवा पृथुवेगः। [v]अमर्त्यः मरणधर्मरहितः [v]दाशुषे हविषां प्रदात्रे यजमानाय [v]रत्ना रमणीयानि [v]वसु वसूनि धनानि [v]वि विशेषेण [v]दयमानः प्रयच्छन्॥

वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ १२ ॥

वैश्वानरः। प्रत्नऽथा। नाकम्। आ। अरुहत्। दिवः। पृष्ठम्। भन्दमानः। सुमन्मऽभिः।
सः। पूर्वऽवत्। जनयन्। जन्तवे। धनम्। समानम्। अज्मम्। परि। एति। जागृविः ॥ १२ ॥

[v]सुमन्मभिः स्तोतृभिः [v]भन्दमानः स्तूयमानः [v]वैश्वानरः जातमात्र एव [v]प्रत्नथा प्रत्न इव चिरन्तन इव [v]नाकम्। कं सुखम् अकं दुःखम्। न विद्यतेऽकं यस्मिन् तन्नाकम्। [v]दिवः अन्तरिक्षस्य [v]पृष्ठम् उपरितनप्रदेशं स्वरोहिभिः [v]आरुहत् आरोहति। [v]सः वैश्वानरः [v]पूर्ववत् पूर्वेभ्यः ऋषिभ्य इव [v]जन्तवे स्तोत्रे यजमानाय [v]धनं पश्वादिलक्षणं [v]जनयन् संपादयन् [v]जागृविः सदा प्रबुद्धः [v]समानं सर्वेषां देवानां साधारणम् [v]अज्मम् आकाशमार्गं [v]पर्येति सूर्यरूपेण गच्छति॥

ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयम्।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥ १३ ॥

ऋतऽवानम्। यज्ञियम्। विप्रम्। उक्थ्यम्। आ। यम्। दधे। मातरिश्वा। दिवि। क्षयम्।
तम्। चित्रऽयामम्। हरिऽकेशम्। ईमहे। सुऽदीतिम्। अग्निम्। सुविताय। नव्यसे ॥ १३ ॥

---

१. ख-ण-ण१-न-व-उच्छ्रयवतः; ग-उत्स्रयवतः। २. क-ङ्ग-ङ्ग१-ण-त-थ-न-म-व-' गर्भम् अरण्याः' नास्ति।

vऋतावानं बलवन्तं vयज्ञियं यज्ञार्हं vविप्रं मेधाविनम् vउक्थ्यं स्तुत्यं vदिवि द्युलोके vक्षयं निवसन्तं vयम् अग्निं vमातरिश्वा वायुर्द्युलोकादाहृत्य पृथिव्याम् vआ vदधे आहितवान्। vचित्रयामं नानाविधगमनं vहरिकेशं पिङ्गलार्चिषं vसुदीतिं शोभनदीप्तिं vतम् vअग्निं vनव्यसे नवतराय vसुविताय सुष्ठु प्राप्तव्याय धनाय तदर्थम् vईमहे याचामहे ॥

शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुपर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥ १४ ॥

शुचिम्। न। यामन्। इषिरम्। स्वःऽदृशम्। केतुम्। दिवः। रोचनऽस्थाम्। उषःऽबुधम्। अग्निम्। मूर्धानम्। दिवः। अप्रतिऽस्कुतम्। तम्। ईमहे। नमसा। वाजिनम्। बृहत्॥१४॥

vन इति संप्रत्यर्थे। vशुचिं दीप्तं vयामन् यामनि यज्ञे vइषिरम् एषणीयं vस्वर्दृशं सर्वदृशं सर्वपदार्थविज्ञानयुक्तं vदिवः द्युलोकस्य vकेतुं प्रज्ञापकं vरोचनस्थां रोचनस्थम्। रोचनः सूर्यः तस्मिन् तिष्ठन्तम्। vउषर्बुधम् अग्निहोत्रिकरूपेण[1] उषसि प्रबुध्यमानं vदिवः स्वर्गस्य vमूर्धानं प्रधानम् vअप्रतिष्कुतम् अप्रतिहतशब्दं vवाजिनम् अन्नवन्तं vबृहत् महान्तं vतम् vअग्निं vनमसा स्तोत्रेण vईमहे याचामहे ॥

मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥ १५ ॥

मन्द्रम्। होतारम्। शुचिम्। अद्वयाविनम्। दमूनसम्। उक्थ्यम्। विश्वऽचर्षणिम्। रथम्। न। चित्रम्। वपुषाय। दर्शतम्। मनुःऽहितम्। सदम्। इत्। रायः। ईमहे ॥१५॥

vमन्द्रं स्तुत्यं vहोतारं देवानामाह्वातारं vशुचिं सर्वदा शुद्धम् vअद्वयाविनं द्वयहीनम्[2] अकुटिलं vदमूनसं दानमनसम् vउक्थ्यं श्रेष्ठं vविश्वचर्षणिं विश्वस्य द्रष्टारं vचित्रं नानाविधवर्णं vरथं vन रथमिव vवपुषाय रूपार्थं vदर्शतं दर्शनीयं vसदमित् सदैव vमनुर्हितं सर्वेभ्यो मनुष्येभ्यो हितं तमग्निं vरायः धनानि vईमहे याचामहे। अत्र याच्ञार्थत्वादस्य द्विकर्मकत्वम् ॥ ॥ १९ ॥

'वैश्वानराय' इत्येकादशर्चं तृतीयं सूक्तं वैश्वामित्रम्। अत्रेयमनुक्रमणिका–'वैश्वानरायैकादश' इति। पूर्वसूक्ते 'वैश्वानरीयं तु जागतं तु' इत्युक्तत्वादस्यापि सूक्तस्य जगती छन्दो वैश्वानरोऽग्निर्देवता। अस्य सूक्तस्याग्निष्टोमे आग्निमारुते शस्त्रे विनियोगः। सूत्र्यते[3] हि–'वैश्वानराय पृथुपाजसे शं नः करत्यर्वते' (आश्व. श्रौ. ५. २०) इति ॥

१. क-झ–अग्निहोत्रकर्मरूपेण; ञ१–अग्निहोत्रीकरूपेण; म–अग्निहोत्रिकर्मरूपेण। २. ञ१–यद्वयाहिनम्; ण-त-थ–यद्वयहीनम्; न–यद्वहीनम्। ३. ख-ग-च-ण१– सूत्रितम्; ञ१– सूचितम्; ण-न-ध– सूत्रिते।

वैश्वानरायं पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥ १ ॥

वैश्वानराय । पृथुऽपाजसे । विपः । रत्ना । विधन्त । धरुणेषु । गातवे ।
अग्निः । हि । देवान् । अमृतः । दुवस्यति । अथ । धर्माणि । सनता । न । दूदुषत् ॥ १ ॥

[v]विपः मेधाविनः स्तोतारः [v]पृथुपाजसे बहुबलाय बह्वन्नाय वा । पाजःशब्दस्य बलान्ननाम्नोः पाठात् । [v]वैश्वानराय अग्नये [v]धरुणेषु धर्मेषु यज्ञेषु [v]रत्ना रमणीयानि स्तोत्राणि [v]गातवे सन्मार्गलाभाय [v]विधन्त परिचरन्ति कुर्वन्ति । [v]अमृतः मरणरहितः [v]अग्निः [v]देवान् [v]दुवस्यति हविषां प्रदानेन परिचरति । हिः प्रसिद्धौ । [v]अथ अतः कारणात् कोऽपि [v]सनता सनातनानि [v]धर्माणि यज्ञान् [v]न [v]दूदुषत् न दूषयति ॥

अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ २ ॥

अन्तः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः ।
क्षयम् । बृहन्तम् । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥२॥

[v]दस्मः दर्शनीयः [v]होता अग्निः [v]दूतः देवानां दूतः सन् [v]रोदसी रोदस्योर्द्यावापृथिव्योः [v]अन्तः मध्ये [v]ईयते गच्छति । [v]मनुषः मनोर्जातस्य मनुष्यस्य [v]पुरोहितः आहवनीयादिरूपेण पुरतः स्थापितः [v]निषत्तः निषण्णः सन् [v]अग्निः [v]द्युभिः दीप्तिभिः [v]बृहन्तं महान्तं [v]क्षयं यज्ञगृहं [v]परि [v]भूषति अलंकुरुते । [v]देवेभिः देवैः [v]इषितः प्रेषितः [v]धियावसुः[1] प्रज्ञया[1] व्याप्तः । एते द्वे अग्निविशेषणे ॥

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥ ३ ॥

केतुम् । यज्ञानाम् । विदथस्य । साधनम् । विप्रासः । अग्निम् । महयन्त । चित्तिऽभिः ।
अपांसि । यस्मिन् । अधि । सम्ऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥३॥

[v]यज्ञानां [v]केतुं प्रज्ञापकं [v]विदथस्य यज्ञस्य गृहस्य वा [v]साधनं प्राप्तिसाधनमसाधारणकारणं सन्तम् [v]अग्निं [v]विप्रासः विप्राः [v]चित्तिभिः स्वकर्मभिः [v]महयन्त पूजयन्ति । किंच [v]गिरः स्तोतारः [v]यस्मिन् अग्नौ [v]अपांसि स्वानुष्ठेयानि कर्माणि [v]अधि [v]संदधुः संदधते [v]यजमानः [v]तस्मिन् अग्नौ [v]सुम्नानि सुखानि[2] [v]आ [v]चके कामयते[3] ॥

१. क-ञ-ञ१-ण-त-थ-न-व-विभावसुः प्रभया; म-धियावसुः प्रभया । २. क-ख-ग-ञ-म-व-सुखानि प्राप्य; ण-ण१-न-'सुखानि' नास्ति । ३. क-ञ-म-प्रकाशते । अथ तस्मिन्नग्नौ सुम्नानि सुखानि आचके कामयते ।

पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ४ ॥

पिता । यज्ञानाम् । असुरः । विपःऽचिताम् । विऽमानम् । अग्निः । वयुनम् । च । वा घताम् ।
आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भन्दते । धामऽभिः । कविः ॥४॥

[v]यज्ञानां [v]पिता पालयिता [v]विपश्चितां विदुषां स्तोतॄणाम् [v]असुरः बलप्रदः [v]वाघताम् ऋत्विजां [v]वयुनं ज्ञानसाधनं[1] [v]विमानं[2] । विमीयते फलमिति विमानं यज्ञादिकर्मसाधनम् । सः [v]अग्निः [v]भूरिवर्पसा पार्थिववैद्युतादिबहुविधरूपेण [v]रोदसी द्यावापृथिव्यौ [v]आ [v]विवेश प्रविशति । [v]पुरुप्रियः मनुष्येष्वधिकं प्रियः । अथवा पुरूणां श्रेष्ठानां प्रियः पुरुप्रियः । [v]धामभिः तेजोभिर्युक्तः [v]कविः अग्निः [v]भन्दते यजमानेन स्तूयते ॥

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवासं इह सुश्रियं दधुः ॥ ५ ॥

चन्द्रम् । अग्निम् । चन्द्रऽरथम् । हरिऽव्रतम् । वैश्वानरम् । अप्सुऽसदम् । स्वःऽविदम् ।
विऽगाहम् । तूर्णिम् । तविषीभिः । आऽवृतम् । भूर्णिम् । देवासः । इह । सुऽश्रियम् । दधुः ॥५॥

[v]देवासः देवाः [v]चन्द्रम् आह्लादकरं [v]चन्द्ररथम् । चन्द्रः[3] आह्लादको रथो यस्येति तं [v]हरिव्रतं पिङ्गलवर्णं हरित्वचं वा । हरित्वचमिति शाखान्तरम् । [v]अप्सुषदम् अप्सु सीदन्तं [v]स्वर्विदं सर्वज्ञं [v]विगाहं विगाहमानं सर्वत्र व्याप्तं [v]तूर्णिं क्षिप्रगामिनं शत्रूणां हिंसितारं वा [v]तविषीभिः बलैः [v]आवृतं [v]भूर्णिं भर्तारं [v]सुश्रियं शोभनदीप्तिं [v]वैश्वानरम् [v]इह इह लोके [v]दधुः आदधुः ॥ ॥ २० ॥

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥ ६ ॥

अग्निः । देवेभिः । मनुषः । च । जन्तुऽभिः । तन्वानः । यज्ञम् । पुरुऽपेशसम् । धिया ।
रथीः । अन्तः । ईयते । साधदिष्टिऽभिः । जीरः । दमूनाः । अभिशस्तिऽचातनः ॥ ६ ॥

देवैः[4] [v]साधदिष्टिभिः साधितयज्ञैः [v]जन्तुभिः ऋत्विग्भिः [v]च [v]धिया कर्मणा [v]मनुषः यजमानस्य[5] [v]पुरुपेशसं बहुरूपम् । पेश इति रूपनाम । पुरोडाशपशुसोमहविर्भेदैरेकाहाहीनसत्रात्मकभेदैः च[6] नानाविधरूपं [v]यज्ञं [v]तन्वानः कुर्वन् [v]रथीः सर्वस्य लोकस्य नेता [v]जीरः क्षिप्रकारी [v]दमूनाः

---

१. क-ज्ञ-म–प्रज्ञासाधनम् । २. ज्ञ१–‘ विमानं ’ नास्ति । ३. क-ज्ञ–चन्द्रवत्; ख-ग-च-ज्ञ१-ण-ण१-थ-न-म-व–चन्द्रम् । ४. क-ज्ञ-ज्ञ१-ण-त-थ-न-म-व–‘ देवैः...यजमानस्य ’ इत्येतन्नास्ति । ५. ज्ञ-म–अवान्तरभेदैश्च ।

दान्तमना दानमना वा [V]अभिशस्तिचातनः अभिशस्तीनामरातीनां यज्ञविघ्नकारिणां रक्षसां चातयिता नाशयिता [V]अग्निः [V]अन्तः द्यावापृथिव्योर्मध्ये [V]ईयते गच्छति ॥

अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥ ७ ॥

अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सम् । इषः । दिदीहि । नः ।
वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानाम् । असि । सुऽक्रतुः । विपाम् ॥७॥

हे [V]अग्ने [V]स्वपत्ये सुपुत्रे [V]आयुनि आयुषि ॥ निमित्तसप्तम्येषा ॥ आयुषि निमित्ते [V]जरस्व देवान् स्तुहि । होतारमधिष्टाय [V]ऊर्जा रसेनान्नेन वा [V]पिन्वस्व देवान् प्रीणय । [V]नः अस्माकम् [V]इषः सस्यार्थं वृष्टीः [V]सं [V]दिदीहि संदीपय । [V]वयांसि अन्नानि [V]च । 'वयः क्षत्र' (नि. २. ७. ७) इत्यन्ननामसु पाठात् । [V]जिन्व देहि । हे [V]जागृवे सर्वदा जागरणशील [V]बृहतः महतो यजमानस्य जिन्वेति संबन्धः । [V]सुक्रतुः शोभनकर्मा शोभनयज्ञो वा त्वं [V]विपां मेधाविनां [V]देवानाम् [V]उशिक् कान्तः [V]असि ॥

विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥ ८ ॥

विश्पतिम् । यह्वम् । अतिथिम् । नरः । सदा । यन्तारम् । धीनाम् । उशिजम् । च । वाघताम् ।
अध्वराणाम् । चेतनम् । जातऽवेदसम् । प्र । शंसन्ति । नमसा । जूतिऽभिः । वृधे ॥ ८ ॥

[V]नरः नेतारः स्तोतारो वा [V]विश्पतिं विशां मनुष्याणां पतिं विश्वस्य पतिमिति वा [V]यह्वं महान्तम् [V]अतिथिं सर्वस्यातिथिभूतं [V]धीनां बुद्धीनां कर्मणां वा [V]यन्तारं नियन्तारं [V]वाघतां [V]च[1] ऋत्विजां च [V]उशिजं कान्तं मनोज्ञम् [V]अध्वराणां यागानां [V]चेतनं प्रज्ञापकं[2] [V]जूतिभिः वेगैर्युक्तं [V]जातवेदसम् अग्निं [V]वृधे वृद्धये समृद्धये [V]नमसा नमस्कारेण स्तुतिभिश्च सदा[3] [V]प्र [V]शंसन्ति प्रशंसां कुर्वन्ति ॥

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥ ९ ॥

विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः ।
तस्य । व्रतानि । भूरिऽपोषिणः । वयम् । उप । भूषेम । दमे । आ । सुवृक्तिऽभिः ॥ ९ ॥

---

१. म–'च' नास्ति । २. क-ज्ञ-ज्ञ१-ण-त-थ-न-व–प्रज्ञापनम्; ग-ण१–प्रज्ञायकम्; म–प्रज्ञातनम् ।
३. क-ज्ञ-ज्ञ१-ण-थ-न-म-व–'सदा' नास्ति ।

[v]विभावा दीप्तिमान् [v]देवः स्तूयमानः [v]सुरणः । अत्र वर्णलोपश्छान्दसः । शोभनं रमयतीति सुरमणः । [v]सुमद्रथः शोभनरथः [v]अग्निः [v]शवसा बलेन [v]क्षितीः सर्वाः प्रजाः [v]परि [v]बभूव परितो गृह्णाति । अत्र भवतेरुपसर्गवशात् परिग्रहार्थत्वम् । [v]भूरिपोषिणः बहूनां पोषयितुः[1] पालयितुः [v]दमे यज्ञगृहे । दम इति गृहनामसु पाठात् । निवसतः [v]तस्य अग्नेः [v]व्रतानि कर्माणि [v]वयं [v]सुवृक्तिभिः स्तोत्रैः [v]उप [v]भूषेम उपभूषयामः प्रकाशयामः ॥

वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥ १० ॥

वैश्वानर । तव । धामानि । आ । चके । येभिः । स्वःऽवित् । अभवः । विऽचक्षण ।
जातः । आ । अपृणः । भुवनानि । रोदसी इति ।
अग्ने । ता । विश्वा । परिऽभूः । असि । त्मना ॥ १० ॥

हे [v]वैश्वानर [v]तव [v]धामानि त्वत्संबन्धीनि तेजांसि [v]आ [v]चके अभिष्टौमि । हे [v]विचक्षण प्राज्ञ त्वं [v]येभिः यैस्तेजोभिः [v]स्वर्वित् सर्ववित्[2] सर्वज्ञः [v]अभवः भवसि । जातमात्रस्त्वं [v]भुवनानि भूतजातानि [v]रोदसी द्यावापृथिव्यौ [v]आपृणः आपूरयः । हे [v]अग्ने [v]विश्वा विश्वानि सर्वाणि [v]ता तानि भूतजातानि [v]त्मना आत्मना [v]परिभूरसि परिगृहीतासि ॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥ ११ ॥

वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया । कविः ।
उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति । भूरिऽरेतसा ॥ ११ ॥

[v]वैश्वानरस्य अग्नेः [v]दंसनाभ्यः तोषकारीभ्यः क्रियाभ्यः [v]बृहत् महद्धनं भवतीति यत् तदवितथम् । यतः कारणात् [v]एकः मुख्यः [v]कविः अग्निः [v]स्वपस्यया शोभनयज्ञादिकर्मेच्छया यजमानादिभ्यो[3] धनम् [v]अरिणात् ददाति । सोऽयम् [v]अग्निः [v]भूरिरेतसा बहुरेतस्कौ [v]उभा उभौ [v]पितरा पितरौ मातापितरौ द्यावापृथिव्यौ [v]महयन् पूजयन् [v]अजायत ॥ ॥ २१ ॥

' समित्समित् ' इत्येकादशर्चं चतुर्थं सूक्तं वैश्वामित्रं त्रैष्टुभम् । अत्रानुक्रमणिका—' समित्समिदाग्नियः ' इति । इध्मादिस्वाहाकृत्यन्ताः पूर्वोक्ताः प्रत्यृचं देवताः । पशौ वैश्वामित्राणामाग्नीसूक्तम्[3] । दर्शपूर्णमासयोः पत्नीसंयाजेषु त्वष्टुर्याज्या ' तन्नः ' इत्येषा । सूत्रितं च—'इह त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु ' (आश्व. श्रौ. १. १०) इति । त्वाष्टे पशौ पुरोडाशस्यानुवाक्या । सूत्रितं च—' तन्नस्तुरीपमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूपः ' (आश्व. श्रौ. ३. ८) इति ॥

१. ख-ग-च-ज्ञ१-ण१-त-थ-न—' पालयितुः ' नास्ति । २. त-थ-म—' सर्ववित् ' नास्ति । ३. क-ख-च-ज्ञ-म-व—विश्वामित्राणा- ।

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥ १ ॥

समित्ऽसमित् । सुऽमनाः । बोधि । अस्मे इति । शुचाऽशुचा । सुऽमतिम् । रासि । वस्वः ।
आ । देव । देवान् । यजथाय । वक्षि । सखा । सखीन् । सुऽमनाः । यक्षि । अग्ने ॥ १ ॥

[v]समित्समित् अत्यर्थं समिद्धस्त्वं [v]सुमनाः [v]बोधि बुध्यस्व । [v]शुचाशुचा अत्यर्थं प्रसर्पकेण ज्योतिषा युक्तस्त्वं [v]वस्वः वसुनो धनस्य तद्विषयां [v]सुमतिं शोभनां बुद्धिम् [v]अस्मे अस्मभ्यं [v]रासि देहि । हे [v]देव द्योतमान [v]देवान् यजनीयान् [v]यजथाय यज्ञाय तदर्थम् [v]आ [v]वक्षि आवहसि । हे [v]अग्ने [v]सखा देवानां सखा त्वं [v]सुमनाः सन् [v]सखीन् देवान् [v]यक्षि यजस्व ॥

यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥ २ ॥

यम् । देवासः । त्रिः । अहन् । आऽयजन्ते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः ।
सः । इमम् । यज्ञम् । मधुऽमन्तम् । कृधि । नः । तनूऽनपात् । घृतऽयोनिम् । विधन्तम् ॥२॥

[v]वरुणः [v]मित्रः [v]अग्निः एते त्रयो देवाः[1] [v]यम् अग्निं [v]दिवेदिवे प्रतिदिवसम् [v]अहन् अहनि [v]त्रिः प्रातर्मध्याह्नसायंतनेषु सवनेषु त्रिवारम् [v]आयजन्ते हे [v]तनूनपात् तनूनां शरीराणां न पातयितः [v]सः त्वं [v]घृतयोनिं घृतस्योदकस्य कारणं [v]विधन्तं विधीयमानं क्रियमाणं [v]नः अस्मदीयम् [v]इमं [v]यज्ञं [v]मधुमन्तम् । मधिवित्युदकनाम । वृष्ट्यादिफलयुक्तं [v]कृधि कुरु ॥

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥ ३ ॥

प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारम् । इळः । प्रथमम् । यजध्यै ।
अच्छ । नमःऽभिः । वृषभम् । वन्दध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥ ३ ॥

[v]विश्ववारा विश्वैर्जनैर्वरणीया [v]दीधितिः स्तुतिर्दीप्तिर्वा [v]होतारं देवानामाह्वातारमग्निं [v]प्र [v]जिगाति जिगातु प्रकर्षेण गच्छतु । [v]प्रथमं मुख्यम् [v]अच्छ आभिमुख्येन [v]वृषभं संपदां वर्षितारं [v]वन्दध्यै वन्दितुं योग्यमिति शेषः । अग्निं [v]नमोभिः नमस्कारैः सह [v]इळः इषो हवीरूपाण्यन्नानि [v]यजध्यै यष्टुं प्रीणयितुं प्रजिगातु[2] । [v]इषितः अस्माभिः प्रेरितः [v]यजीयान् यष्टृतमः [v]सः अग्निः [v]देवान् [v]यक्षत् यजतु ॥

१. ख-ण१-देवासः देवाः । २. ख-ग-च-ण१-फ-प्रजिगातु इति ।

ऊ॒र्ध्वो वां॑ गातु॒रध्व॑रे अकार्यू॒र्ध्वा शो॒चींषि॒ प्रस्थि॑ता॒ रजां॑सि ।
दि॒वो वा॒ नाभा॒ न्यसा॑दि॒ होता॑ स्तृणी॒महि॑ दे॒वव्य॑चा॒ वि ब॒र्हिः ॥ ४ ॥

ऊ॒र्ध्वः । वा॒म् । गा॒तुः । अध्व॑रे । अ॒का॒रि॒ । ऊ॒र्ध्वा । शो॒चींषि॑ । प्रऽस्थि॑ता । रजां॑सि ।
दि॒वः । वा॒ । नाभा॑ । नि । अ॒सा॒दि॒ । होता॑ । स्तृ॒णी॒महि॑ । दे॒वऽव्य॑चाः । वि । ब॒र्हिः ॥४॥

[v]वां युवयोः । अग्निश्च बर्हिश्चोभौ वामित्युच्येते[1] । समिदादिभिः सहितस्यैवाग्नेर्देवतात्वात् । [v]ऊर्ध्वः उन्नतः [v]गातुः यज्ञमार्गः [v]अध्वरे यज्ञे [v]अकारि आश्रयः क्रियते । [v]शोचींषि अर्चिष्मन्ति [v]रजांसि हवींषि [v]ऊर्ध्वा ऊर्ध्वं [v]प्रस्थिता[2] । [v]होता अग्निः [v]दिवः दीप्यमानस्य यागगृहस्य [v]नाभा नाभौ मध्यप्रदेशे[3] [v]न्यसादि निषीदति । [v]देवव्यचाः देवैर्व्याप्तं [v]बर्हिः च । चार्थे वाशब्दः । [v]वि [v]स्तृणीमहि विशेषेण स्तृणीमः ॥

सप्त॒ होत्रा॑णि॒ मन॑सा वृ॒णाना इ॑न्व॒न्तो विश्वं॒ प्रति॑ यन्नृ॒तेन॑ ।
नृ॒पेश॑सो॒ विद॑थेषु॒ प्र जा॒ता अ॒भी॒३॑मं य॒ज्ञं वि च॑रन्त॒ पूर्वीः ॥ ५ ॥

सप्त॑ । होत्रा॑णि । मन॑सा । वृ॒णा॒नाः । इ॒न्व॒न्तः । विश्व॑म् । प्रति॑ । य॒न् । ऋ॒तेन॑ ।
नृ॒ऽपेश॑सः । विद॑थेषु । प्र । जा॒ताः । अ॒भि । इ॒मम् । य॒ज्ञम् । वि । च॒र॒न्त॒ । पूर्वीः ॥ ५ ॥

[v]मनसा [v]वृणानाः प्रार्थ्यमानाः [v]ऋतेन उदकेन [v]विश्वम् [v]इन्वन्तः प्रीणयन्तो देवाः [v]सप्त [v]होत्राणि होतॄणां वषट्कर्तॄणां कर्माणि [v]प्रति [v]यन् प्रतिगच्छन्ति । अतः परं द्वारां स्तुतिः । [v]नृपेशसः नररूपाः [v]विदथेषु यागेषु [v]जाताः उत्पन्नाः [v]पूर्वीः बह्व्यो विग्रहवत्यो यज्ञद्वाराभिमानिदेवताः[4] [v]इमम् अस्मदीयं [v]यज्ञं [v]प्र[5] [v]वि [v]चरन्त प्रविचरन्तु ॥ ॥ २२ ॥

आ भ॑न्दमाने उ॒षसा॒ उपा॑के उ॒त स्म॑येते त॒न्वा॒३॑ विरू॑पे ।
यथा॑ नो मि॒त्रो वरु॑णो जुजो॒षदिन्द्रो॑ म॒रुत्वाँ॑ उ॒त वा॒ महो॑भिः ॥ ६ ॥

आ । भ॒न्द॒मा॒ने॒ इति॑ । उ॒षसौ॑ । उपा॑के॒ इति॑ । उ॒त । स्म॒ये॒ते॒ इति॑ । त॒न्वा॑ । विरू॑पे॒ इति॒ विऽरू॑पे ।
यथा॑ । नः॒ । मि॒त्रः । वरु॑णः । जु॒जो॒षत् । इन्द्रः॑ । म॒रुत्वा॑न् । उ॒त । वा॒ । महः॑ऽभिः ॥६॥

[v]आ[6] [v]भन्दमाने स्तूयमाने [v]उपाके परस्परं संगते [v]उषसा । नक्तापेक्षया द्विवचनम् । नक्तोषसौ[7] रात्र्यहनी आगच्छताम् । [v]उत अपि च [v]विरूपे पृथग्रूपे [v]तन्वा प्रकाशरूपेण शरीरेण [v]स्मयेते

---

१. ख-ग-च-ङ-ञ १-ण-ण १-थ-न-म-व-वामित्युच्यते । २. ञ १-प्रस्थितानि । ३. म-मध्ये मध्यप्रदेशे । ४. क-ख-ग-च-ङ-ञ-ण-ध-म-व-°अभिमानिनी (: ?) देवताः; न-°अभिमानिनीर्देवताः । ५. ख-ग-च-ण १-फ-अभि; त-थ-'प्र' नास्ति । ६. क-ङ-म-'आ' नास्ति । ७. ख-ग-ण-थ-नक्तोषासौ ।

प्रकाशेते । vमित्रः vवरुणः vउत vवा अपि च vइन्द्रः vमरुत्वान् च vनः अस्मान् vयथा vजुजोषन् यथा सेवेत तथा vमहोभिः तेजोभिर्युक्ते इमे द्यावापृथिव्यौ कुरुताम् ॥

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ७ ॥

दैव्या । होतारा । प्रथमा । नि । ऋञ्जे । सप्त । पृक्षासः । स्वधया । मदन्ति ।
ऋतम् । शंसन्तः । ऋतम् । इत् । ते । आहुः । अनु । व्रतम् । व्रतऽपाः । दीध्यानाः ॥७॥

vदैव्या दिव्यौ[1] vप्रथमा प्रथमौ मुख्यौ vहोतारा आह्वातारावग्नी vन्यृञ्जे प्रसाधयामि । vऋतम् उदकं vशंसन्तः आशंसमानाः vसप्त vपृक्षासः । पृक्षमन्नम् । तद्वन्त ऋत्विजस्तमग्निं vस्वधया सोमेन हविषा vमदन्ति मादयन्ति । vव्रतपाः व्रतानां कर्मणां रक्षितारः vदीध्यानाः दीप्यमानाः अथवा स्वकर्मभिरग्निं दीपयन्त ऋत्विजः vअनु vव्रतं व्रतेषु vऋतमित् अग्निमेव vआहुः । अग्निमेव ऋतभूतमाहुरित्यर्थः । एवकारार्थे इच्छब्दः ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्तु ॥ ८ ॥

vभारतीभिः भरतस्य सूर्यस्य संबन्धिनीभिः vसजोषाः संगता vभारती वाक् vआ गच्छतु । vदेवैः vमनुष्येभिः मनुष्यैश्च संगता vइळा च भूमिश्चागच्छतु vअग्निः च । vसारस्वतेभिः सरस्वती-संबन्धिभिर्मध्यमस्थानैः सह vसरस्वती माध्यमिका वागागच्छतु । vतिस्रः देव्यः वागिळाभारत्य आगच्छन्तु । vअर्वाक् आभिमुख्यम् एतत्[2] vबर्हिः vआ vसदन्तु आसीदन्तु ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

हे vदेव vत्वष्टः सृष्टिकर्तः vरराणः रममाणस्त्वम् vअध अनन्तरं vनः अस्मान् vतुरीपं तारकं vपोषयित्नु पोषकं vतत् प्रसिद्धं रेतः vवि vस्यस्व मोचय । vयतः विमोचनात् vवीरः सत्त्ववान्

१. क-ञ-देव्यौ; म-दैव्यौ । २. फ-इदमेतत् ।

vकर्मण्यः कर्मसु कुशलः vसुदक्षः सुबलः vयुक्तग्रावा अभिषवार्थग्रावयुक्तः । सोममुद्दिश्येत्यर्थः । vदेवकामः देवान् कामयमानः पुत्रः vजायते जायेत ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊँ इति । होता । सत्यऽतरः । यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

हे vवनस्पते vदेवान् vउप vअव vसृज समीपे कुरु । vशमिता पशोः संस्कर्ता vअग्निः वनस्पतिश्च vहविः vसूदयाति देवान् प्रति प्रेरयतु । vसत्यतरः । अत्यर्थं सत्यः सत्यतरः । सत्यस्वरूपः vसः vइत् स एव vहोता vयजाति यजतु । vयथा यतः कारणात स एवाग्निः vदेवानां vजनिमानि जन्मानि vवेद वेत्ति अतः स एव यजतित्यर्थः ॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः ।
बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥

हे vअग्ने vअर्वाक् अस्मदभिमुखं vसमिधानः समिध्यमानो ज्वालारूपेण दीप्यमानस्त्वम् vआ vयाहि देवतारूपेणागच्छ । कथमिति उच्यते । नोऽस्माकं यज्ञम् vइन्द्रेण vदेवैः च vतुरेभिः स्वरमाणैर्देवैः vसरथं समानरथं यथा तथा आयाहि । किंच vसुपुत्रा vअदितिः अपि vनः vबर्हिः vआस्ताम् अध्यास्ताम् । स्वाहाकारेण युक्ताः vअमृताः नित्याः vदेवाः vमादयन्ताम्[1] तृप्यन्तु ॥ ॥२३॥

'प्रत्यग्निरुषसः' इत्येकादशर्चं पञ्चमं सूक्तं वैश्वामित्रं त्रैष्टुभमाग्नेयम् । अत्रानुक्रमणिका–'प्रत्यग्निः' इति । प्रातरनुवाकाश्विनशस्त्रयोरिदमादिसूक्तत्रयस्य[2] विनियोगः । सूत्रितं च–'प्रत्यग्निरुषस इति त्रीणि' (आश्व. श्रौ. ४. १३) इति । 'इळामग्ने' इत्यस्योक्तो विनियोगः ॥

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥ १ ॥

प्रति । अग्निः । उषसः । चेकितानः । अबोधि । विप्रः । पदऽवीः । कवीनाम् ।
पृथुऽपाजाः । देवयत्ऽभिः । सम्ऽइद्धः । अप । द्वारा । तमसः । वह्निः । आवरित्यावः ॥ १ ॥

१. ण–ससादयन्ताम्; थ–समादयता; म–सह मादयन्ताम् । २. क-ग-च-ज्ञ-ण-ण१-त-थ-न-म-व–°सूक्ते यस्य; ख–°सूक्तस्य ।

vउषसः vचेकितानः जानन् vविप्रः मेधावी vकवीनां क्रान्तदृशां vपदवीः मार्गान् गच्छन् यः vअग्निः vप्रति vअबोधि प्रतिबुध्यते vपृथुपाजाः पृथुतेजाः vदेवयद्भिः देवकामैः vसमिद्धः सम्यग्दीप्तः सः vवह्निः vतमसः अज्ञानस्य vद्वारा आगमनद्वाराणि[1] vअप vआवः अपावृणोति ॥

प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः ।
पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥ २ ॥

प्र । इत् । ऊँ इति । अग्निः । ववृधे । स्तोमेभिः । गीःऽभिः । स्तोतॄणाम् । नमस्यः । उक्थैः ।
पूर्वीः । ऋतस्य । सम्ऽदृशः । चकानः । सम् । दूतः । अद्यौत् । उषसः । विऽरोके ॥२॥

vनमस्यः पूज्यः यः vअग्निः vस्तोतॄणां स्तोत्रैः vगीर्भिः वाग्भिः vउक्थैः शस्त्रैश्च vप्र vववृधे वृद्धिं प्राप्नोति vदूतः देवानां दूतः सः vपूर्वीः बह्वीः vऋतस्य आदित्यस्य vसंदृशः दीप्तीः vचकानः कामयमानः सन् vउषसो vविरोके विरोचने प्रातःकाले vसम् vअद्यौत् द्योतते । vइत्[2] vउ पूरणौ[3] ॥

अधायि विक्ष्वग्निर्मानुषीषु विक्ष्वप्सु गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥ ३ ॥

अधायि । अग्निः । मानुषीषु । विक्षु । अपाम् । गर्भः । मित्रः । ऋतेन । साधन् ।
आ । हर्यतः । यजतः । सानु । अस्थात् । अभूत् । ऊँ इति । विप्रः । हव्यः । मतीनाम् ॥३॥

vमित्रः यजमानानां मित्रभूतः vऋतेन सत्येन vसाधन् कामान् साधयन् vअपां vगर्भः vअग्निः vमानुषीषु मनोः संबन्धिनीषु vविक्षु प्रजासु vअधायि देवैः आहितः । किंच vहर्यतः स्पृहणीयः vयजतः यष्टव्यः सः vसानु उच्छ्रितं धिष्ण्यमुत्तरवेद्याख्यम् vआ vअस्थात् अध्यतिष्ठत । vविप्रः प्राज्ञोऽग्निः vमतीनां मातॄणां[3] स्तोतॄणां vहव्यः स्तुत्यः vअभूत । vउ[4] पूरणः[4] ॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥ ४ ॥

मित्रः । अग्निः । भवति । यत् । सम्ऽइद्धः । मित्रः । होता । वरुणः । जातऽवेदाः ।
मित्रः । अध्वर्युः । इषिरः । दमूनाः । मित्रः । सिन्धूनाम् । उत । पर्वतानाम् ॥ ४ ॥

१. म–आगमस्य द्वाराणि । २. क-ङ-ञ१-ण-त-थ-न-म-व–' इत् उ पूरणौ ' नास्ति । ३. म–मन्त्राणाम् । ४. क-ङ-ञ१-ण-थ-न-म-व–' उ पूरणः ' नास्ति ।

इयमृक् अग्निं सर्वात्मकत्वेन स्तौति । यत् यदा समिद्धः अग्निः तदा मित्रः भवति सूर्यो भवति । मित्रः एव सन् होता भवति । वरुणः भवति जातवेदाः जातप्रज्ञः । सः मित्रः अध्वर्युः भवति दमूनाः दानमना[1] दान्तमना[1] वा । स एव इषिरः प्रेरकः वायुर्भवति । उत अपि च सिन्धूनां नदीनां पर्वतानां च मित्रः सहायो भवति ॥

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥ ५ ॥

पाति । प्रियम् । रिपः । अग्रम् । पदम् । वेः । पाति । यह्वः । चरणम् । सूर्यस्य ।
पाति । नाभा । सप्तऽशीर्षाणम् । अग्निः । पाति । देवानाम् । उपऽमादम् । ऋष्वः ॥ ५ ॥

ऋष्वः दर्शनीयः अग्निः वेः गन्त्र्याः सर्वव्याप्तायाः रिपः भूम्याः प्रियम् अग्रं प्रथमं पदं स्थानं पाति रक्षति । यह्वः महान् सूर्यस्य चरणम् । चरत्यनेनेति चरणमन्तरिक्षम् । पाति । नाभा नाभावन्तरिक्षस्य मध्ये सप्तशीर्षाणं[2] सप्तगणं पाति । देवानाम् उपमादम् उपमादकं यज्ञं पाति रक्षति ॥ ॥ २४ ॥

ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिद्ग्नी रक्षत्यप्रयुच्छन् ॥ ६ ॥

ऋभुः । चक्रे । ईड्यम् । चारु । नाम । विश्वानि । देवः । वयुनानि । विद्वान् ।
ससस्य । चर्म । घृतऽवत् । पदम् । वेः । तत् । इत् । अग्निः । रक्षति । अप्रऽयुच्छन् ॥ ६ ॥

ऋभुः महान् विश्वानि सर्वाणि वयुनानि ज्ञातव्यानि पदार्थानि विद्वान् जानन् देवः अग्निः ईड्यं स्तुत्यं चारु सर्वेषां जलं चक्रे करोति । नाम[3] इत्युदकनामसु पठितम् । वेः व्याप्तस्य ससस्य स्वपतः शान्तज्वालस्याप्यग्नेः चर्म रूपं घृतवत् दीप्तिमद्भवति । सः अग्निः तत् जलम् अप्रयुच्छन् अप्रमाद्यन् रक्षति पालयति । इत् पादपूरणः[4] ॥

आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥ ७ ॥

आ । योनिम् । अग्निः । घृतऽवन्तम् । अस्थात् । पृथुऽप्रगानम् । उशन्तम् । उशानः ।
दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति । करिति कः ॥ ७ ॥

---

१. म–दममना दानमनाः । २. म–सप्तशीर्षाणं सप्तगणम् । ३. ख-ग-ण १–जलं नाम; च–जलनाम; क्ष १-व–नामा नाम; ण-न–नामी नाम । ४. क-ञ-ञ १-ण-थ-न-म-व–' इत् पादपूरणः ' नास्ति ।

vउशानः कामयमानः vअग्निः vघृतवन्तं दीप्तिमन्तं vपृथुप्रगाणं पृथुर्गतिम् vउशन्तं कामयमानं vयोनिं स्थानमायतनम् vआ vअस्थात् आतिष्ठति । vदीद्यानः द्योतमानः vशुचिः दर्शनीयः शुद्धो वा vऋत्वः महान् vपावकः अन्येषां शोधयिताग्निः vमातरा मातरौ द्यावापृथिव्यौ vपुनःपुनः vनव्यसी नवतरे vकः करोति ॥

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आपइव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥

सद्यः । जातः । ओषधीभिः । ववक्षे । यदि । वर्धन्ति । प्रऽस्वः । घृतेन ।
आपःऽइव । प्रऽवता । शुम्भमानाः । उरुष्यत् । अग्निः । पित्रोः । उपऽस्थे ॥ ८ ॥

vसद्यो vजातः अग्निः vयदि यदा vओषधीभिः vववक्षे उह्यते तदा vप्रवता प्रवणेन मार्गेण गच्छन्त्यः vआपइव vशुम्भमानाः शोभमानास्ता ओषध्यः vप्रस्वः फलानि प्रसुवानाः vघृतेन उदकेन vवर्धन्ति वर्धयन्ति । vपित्रोः द्यावापृथिव्योः vउपस्थे मध्यप्रदेशे वर्धमानः vअग्निः vउरुष्यत् भस्मात्रक्षतु ॥

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ९ ॥

उत् । ऊँ इति । स्तुतः । समऽइधा । यह्वः । अद्यौत् । वर्ष्मन् । दिवः । अधि । नाभा । पृथिव्याः ।
मित्रः । अग्निः । ईड्यः । मातरिश्वा । आ । दूतः । वक्षत् । यजथाय । देवान् ॥ ९ ॥

vउ इति पादपूरणः[1] । vस्तुतः अस्माभिः स्तुतः vसमिधा समिन्धनेन vयह्वः महान् vअग्निः vपृथिव्याः उत्तरवेद्याः vनाभा नाभौ मध्यप्रदेशे स्थितः सन् vदिवः अन्तरिक्षस्य vवर्ष्मन् वर्ष्मणि रूपे vउत् vअद्यौत् द्योतते । vमित्रः सर्वेषां मित्रभूतः vईड्यः स्तुत्यः vमातरिश्वा । मातर्यन्तरिक्षे श्वसिति प्राणिति सूत्रयरूपेण चेष्टत इति मातरिश्वा । अथवा मातर्यरण्यां श्वसिति निवसतीति मातरिश्वा । तथाह यास्कः–‘ मातर्यन्तरिक्षे श्वसिति मातर्याश्रयतीति वा ’ (निरु. ७. २६) । vदूतः देवानां दूतः सन् vयजथाय यजाय vदेवान् vआ vवक्षत् आवहतु ॥

उदस्तम्भीत्समिधा नाकमृष्वोऽग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥ १० ॥

उत् । अस्तम्भीत् । समऽइधा । नाकम् । ऋष्वः । अग्निः । भवन् । उत्ऽतमः । रोचनानाम् ।
यदि । भृगुऽभ्यः । परि । मातरिश्वा । गुहा । सन्तम् । हव्यऽवाहम् । समऽईधे ॥ १० ॥

---

१. त-थ-न-व–पदपूरणः ।

ऋ. २-२६

Vऋष्वः महान् Vअग्निः Vसमिधा तेजसा Vनाकं स्वर्गम् Vउदस्तम्भीत् उदस्तभ्नात् । Vरोचनानां शोभनानां[1] तेजसां मध्ये Vउत्तमः Vभवन् उत्कृष्टतमो भवन् Vमातरिश्वा वायुः Vभृगुभ्यः आदित्यस्य रश्मिभ्यः Vगुहा[2] गुहायां[3] Vसन्तं Vहव्यवाहं हव्यानां वोढारमग्निं Vयदि यदा Vसमीधे समैन्द्ध तदा नाकमस्तभ्नादिति संबन्धः ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ २५ ॥

' प्र कारवः ' इत्येकादशर्चं षष्ठं सूक्तं वैश्वामित्रमाग्नेयं ' प्र कारवः ' इत्यनुक्रान्तत्वात् । प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः पूर्वसूक्त एव ' प्रत्यग्निरुषसस्त्रीणि ' इत्यनेनोक्तः । आद्याग्नेये पशौ हविषो याज्या । सूत्रितं च—' प्र कारवो मनना वच्यमाना एका चेतत्सरस्वती नदीनाम् ' (आश्व. श्रौ. ३. ७) इति । ' एभिरग्ने ' इति पात्नीवतग्रहस्य याज्या । सूत्रितं च—' आग्नीध्रः पात्नीवतस्य यजत्रैभिरग्ने सरथं याह्यर्वाङिति ' (आश्व. श्रौ. ५. १९) इति ॥

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताचीं ॥ १ ॥

प्र । कारवः । मनना । वच्यमानाः । देवद्रीचीम् । नयत । देवऽयन्तः ।
दक्षिणाऽवाट् । वाजिनी । प्राची । एति । हविः । भरन्ती । अग्नये । घृताचीं ॥ १ ॥

हे Vकारवः कर्तारः Vदेवयन्तः देवकामा यूयं Vमनना मननेन मन्त्रेण Vवच्यमानाः प्रेर्यमाणाः सन्तः Vदेवद्रीचीं देवानञ्चन्तीं स्रुचं Vप्र Vनयत प्रकर्षेण नयत प्रापयत । Vदक्षिणावाट् आहवनीयस्य दक्षिणत उह्यमाना Vवाजिनी अन्नवती Vप्राची प्रागग्रा Vअग्नये अग्न्यर्थं Vहविर्भरन्ती हविर्धारयन्ती Vघृताची घृतेनाक्ता स्रुक् Vएति गच्छति[3] ॥

---

१. म–शोभमानानाम् । २. क-ज्ञ-ज्ञ१-न-म–आदित्यगुहायाम्; ज्ञ-त-थ-ण-ब–आदित्यगुहा गुहायाम् । ३. क–अ (आ) गच्छति; ज्ञ-म–आगच्छति ।

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वव्यन्तां ते वह्नयः सप्तजिह्वाः ॥ २ ॥

आ । रोदसी इति । अपृणाः । जायमानः ।
उत । प्र । रिक्थाः । अध । नु । प्रयज्यो इति प्रऽयज्यो ।
दिवः । चित् । अग्ने । महिना । पृथिव्याः । वव्यन्ताम् । ते । वह्नयः । सप्तऽजिह्वाः ॥२॥

हे [v]अग्ने [v]जायमानः त्वं [v]रोदसी द्यावापृथिव्यौ [v]आ [v]अपृणाः आपूरयः । किंच[1] हे [v]प्रयज्यो यष्टव्य[2] [v]दिवश्चित् दिवश्चान्तरिक्षात् [v]पृथिव्याः च [v]महिना महिम्ना [v]प्र [v]रिक्थाः अतिरिक्तश्चासि । अनेन वह्नेरतिशय उक्तः । एवंविधस्य[3] [v]ते तव [v]वह्नयः अग्नयोंऽशभूता वह्नय आहवनीयादयः [v]वव्यन्ताम् । किंविधास्ते । [v]सप्तजिह्वाः सप्तजिह्वात्मकाः । [v]नु[4] पूरणः[4] ॥

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥ ३ ॥

द्यौः । च । त्वा । पृथिवी । यज्ञियासः । नि । होतारम् । सादयन्ते । दमाय ।
यदि । विशः । मानुषीः । देवऽयन्तीः । प्रयस्वतीः । ईळते । शुक्रम् । अर्चिः ॥ ३ ॥

[v]द्यौश्च अन्तरिक्षं [v]पृथिवी च [v]यज्ञियासः यज्ञार्हा देवाश्च [v]होतारं [v]त्वा त्वां [v]दमाय । दमो यज्ञः । तस्मा अर्थं [v]नि [v]सादयन्ते उपशमयन्ति । [v]यदि यदा [v]मानुषीः मनोः संबन्धिन्यः [v]देवयन्तीः देवकामाः [v]प्रयस्वतीः हविष्मत्यः [v]विशः प्रजा होतारः [v]शुक्रं दीप्तम् [v]अर्चिः [v]ईळते स्तुवन्ति ॥

महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥ ४ ॥

महान् । सधऽस्थे । ध्रुवः । आ । निऽसत्तः । अन्तः । द्यावा । माहिने इति । हर्यमाणः ।
आस्क्रे इति । सपत्नी इति सऽपत्नी । अजरे इति । अमृक्ते इति ।
सबर्दुघे इति सवःऽदुघे । उरुऽगायस्य । धेनू इति ॥ ४ ॥

१. ख-ग-च-ण१-फ– अथ किंच । २. त–प्रयष्टव्य अथ अनन्तरम् । ३. ख-ग च–उत एवंविधस्य; ण१–अत एवं० । ४. क झ-ञ१-ण-त-थ-न-म-व–' नु पूरणः ' नास्ति ।

vमहान् अधिकः vहर्यमाणः यजमानादिभिः काम्यमानः यद्वा यजमानाय धनं कामयमानोऽग्निः vद्यावा vअन्तः द्युभूम्योर्मध्ये vमाहिने महिम्ना युक्ते vसधस्थे स्वकीये स्थाने vध्रुवः अचलः सन् vआ vनिषत्तः निषण्णो भवति । vआस्के आक्रमणशीले vसपत्नी समान एकः सूर्यः पतिर्ययोस्ते सपत्न्यौ vअजरे जरारहिते vअमृक्ते अन्येनाहिंसिते vसबर्दुघे । सबरिरयमृतमुदकम् । तस्य दोग्ध्र्यौ द्यावापृथिव्यौ vउरुगायस्य पृथुगमनस्याधिकस्तुतेर्वाग्नेः vधेनू प्रीणयित्र्यौ भवतः ॥

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥ ५ ॥

व्रता । ते । अग्ने । महतः । महानि । तव । क्रत्वा । रोदसी इति । आ । ततन्थ ।
त्वम् । दूतः । अभवः । जायमानः । त्वम् । नेता । वृषभ । चर्षणीनाम् ॥ ५ ॥

हे vअग्ने vमहतः सर्वोत्कृष्टस्य vते तव vव्रता व्रतानि त्वत्संबन्धीनि कर्माणि vमहानि महान्ति भवन्ति । vतव vक्रत्वा क्रतुना प्रकाशेन vरोदसी द्यावापृथिव्यौ vआ vततन्थ विस्तृतवानसि[1] । vत्वं vदूतः vअभवः भव । हे vवृषभ वर्षणशील vत्वं vजायमानः सन् vचर्षणीनां यजमानानां vनेता असि फलप्रापकोऽसि ॥ ॥ २६ ॥

ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥

ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व ।
अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥

हे vदेव vकेशिना प्रशस्तकेशवन्तौ vयोग्याभिः योजनसाधनभूताभी रज्जुभिर्युक्तौ[2] vघृतस्नुवा घृतं क्षरन्तौ vरोहिता रोहितावश्वौ vऋतस्य यज्ञस्य ॥ वाशब्दश्चार्थे ॥ vधुरि च vधिष्व धेहि । योजयेत्यर्थः । vअथ अनन्तरं vविश्वान् सर्वान् vदेवान् रथे समारोप्य vआ vवह । हे vजातवेदः तान् vस्वध्वरा स्वध्वरान् शोभनाध्वरान् vकृणुहि कुरु ॥

दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥ ७ ॥

दिवः । चित् । आ । ते । रुचयन्त । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः ।
अपः । यत । अग्ने । उशधक् । वनेषु । होतुः । मन्द्रस्य । पनयन्त । देवाः ॥ ७ ॥

---

१. ख-ग–विसृतवानसि; च-ज्ञ-ण-ण१-न-व–विसृतत्रानसि । २. म– रश्मिभिर्युक्तौ ।

हे vअग्ने vयत् यदा vवनेषु अरण्येषु vअपः vउशधक् कामयमानो दहंश्च वर्तसे तदा vते vरोकाः च त्वदीया दीप्तयः vदिवश्चित् सूर्यादपि vआ vरुचयन्त आरोचन्ते । vविभातीः विशेषेण भान्तीः प्रकाशमानाः vपूर्वीः पुराणीः vउषः उषसः vअनु vभासि । vमन्द्रस्य स्तुत्यस्य vहोतुः तव रोकान् vदेवाः स्तोतारः vपनयन्त स्तुवन्ति ॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ८ ॥

उरौ । वा । ये । अन्तरिक्षे । मदन्ति । दिवः । वा । ये । रोचने । सन्ति । देवाः ।
ऊमाः । वा । ये । सुऽहवासः । यजत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥

vउरौ विस्तीर्णे vअन्तरिक्षे vये vदेवाः vमदन्ति हृष्यन्ति । vदिवः सूर्यस्य vरोचने प्रकाशने आलोके vये देवाः vसन्ति । vऊमाः ऊमसंज्ञकाः पितरः सन्ति । vयजत्राः यष्टव्याः vये देवाः vसुहवासः शोभनाह्वानाः vआयेमिरे आयच्छन्ति । vरथ्यः रथिनस्तव ये vअश्वाः सन्ति हे vअग्ने तैः सर्वैः साधमायाहीति उत्तरयर्चा[1] संबन्धः[2] ॥

एभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥ ९ ॥

आ । एभिः । अग्ने । सऽरथम् । याहि । अर्वाङ् । नानाऽरथम् । वा । विऽभवः । हि । अश्वाः ।
पत्नीऽवतः । त्रिंशतम् । त्रीन् । च । देवान् । अनुऽस्वधम् । आ । वह । मादयस्व ॥ ९ ॥

हे vअग्ने vएभिः पूर्वोक्तैर्देवगणैः साधं vसरथं समानरथं vनानारथं vवा त्वद्रथं समारोप्य vआ vयाह्यर्वाङ् अस्मदभिमुखमायाहि । यतः कारणात् ते vअश्वाः vविभवः प्रभवः समर्थाः । हिः प्रसिद्धौ । vपत्नीवतः पत्नीभिः सहितान् vत्रिंशतं vत्रींश्च त्रयस्त्रिंशतं vदेवान् च vअनुष्वधं सोममुद्दिश्य[3] vआ vवह । vमादयस्व सोमेनेति शेषः[4] ॥

स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राचीं अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ १० ॥

सः । होता । यस्य । रोदसी इति । चित् । उर्वी इति । यज्ञम्ऽयज्ञम् । अभि । वृधे । गृणीतः ।
प्राची इति । अध्वराऽइव । तस्थतुः । सुमेके इति सुऽमेके ।
ऋतवरी इत्यृतऽवरी । ऋतऽजातस्य । सत्ये इति ॥ १० ॥

---

१. म- उत्तरत्र वा । २. ख-ग-च-ण१-फ- संबन्धः । वा पूरणः । ३. त-थ-व-बलार्थमन्नार्थं वा । ४. ण-त-थ-व-विशेषः ।

ᵛसः एव ᵛहोता भवति ᵛउर्वी विस्तीर्णे ᵛरोदसी ᵛचित् द्यावापृथिव्यौ अपि[1] ᵛयस्य[1] अग्नेः ᵛयज्ञंयज्ञं सर्वं[2] यज्ञं[2] ᵛवृधे समृद्धये ᵛअभि ᵛगृणीतः प्रशंसतः । ᵛऋतजातस्य[3] जातसत्यस्य[3] होतुः ᵛसुमेके सुरूपे ᵛऋतावरी उदकवत्यौ ᵛसत्ये सत्यस्वरूपे ᵛप्राची अनुकूले ᵛतस्थतुः तिष्ठतः । कथमिव । ᵛअध्वरेव अध्वराविव यज्ञाविव ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥

इळामग्न इतीयं पूर्वं व्याख्याता ॥ ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण
विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टकेऽ-
ष्टमोऽध्यायः समाप्तः ॥

१. त-थ-अस्य । २. ख-ग-च-ण१-थ-व-सर्वयज्ञम् ; ण-न-सर्वस्य यज्ञम् । ३. ख-ग-च-ण१-ऋतजातस्य सत्यस्य यज्ञस्य; अ-म-ऋतजातस्य यस्य; अ१-न-ऋतजातस्य सत्यस्य यस्य; ण-ऋतजातस्य जातस्य सत्यस्य; त-व-ऋतजातसत्यस्य ।

ॐ

वार्गीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥*

'सोमस्य' इत्यनुवाके द्वादश सूक्तानि । तत्र 'प्र य आरुः' इत्येकादशर्चं सप्तमं सूक्तम् । मण्डलदृष्टा विश्वामित्र ऋषिः । अनुक्तत्वात् त्रिष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोः सूक्तत्रयस्य 'प्रत्यग्निरुषसस्त्रीणि' इति विनियोग उक्तः । तत्रेदं तृतीयं सूक्तम् ॥

प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सस्राते दीर्घमायुः प्रयक्षे ॥ १ ॥

प्र । ये । आरुः । शितिऽपृष्ठस्य । धासेः । आ । मातरा । विविशुः । सप्त । वाणीः ।
परिऽक्षिता । पितरा । सम् । चरेते इति । प्र । सस्राते इति । दीर्घम् । आयुः । प्रऽयक्षे ॥ १ ॥

[v]शितिपृष्ठस्य नीलपृष्ठस्य [v]धासेः सर्वस्य धारयितुरग्नेः [v]ये रश्मयः [v]प्र [v]आरुः प्रकर्षेणोद्गच्छन्ति ते रश्मयः [v]मातरा मातरौ द्यावापृथिव्यौ [v]आ [v]विविशुः सर्वतः प्रविष्टाः । [v]सप्त सर्पणस्वभावाः[4] [v]वाणीः वननीया नद्यश्चाविविशुः । [v]परिक्षिता परितो वर्तमाने [v]पितरा पितरौ द्यावापृथिव्यौ तेनाग्निना [v]सं [v]चरेते सम्यक् व्यवहरतः । तथा [v]प्रयक्षे प्रकर्षेण[5] यष्टुं [v]दीर्घमायुः अग्नेश्चिरं जीवनं प्रभूतमन्नं वा [v]प्र [v]सस्राते प्रसारयतः । संपादयत इत्यर्थः । यद्वा द्यावापृथिव्यौ प्रयक्षे प्रकर्षेण सततं यष्टुं यजमानस्य दीर्घमायुः संपादयतः ॥ प्र । निपातत्वेनाद्युदात्तः । तस्य छन्दसि 'व्यवहिताश्च' इति आरुरित्यनेन संबन्धः । आरुः । 'ऋ गतौ' । लिट्युसि रूपम् । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । शितिपृष्ठस्य । पृष्ठशब्दस्थकृप्रत्ययान्तोऽन्तोदात्तः । 'शितेर्नित्याबह्वज्बहुव्रीहावभसत्' (पा. सू. ६. २. १३८) इत्युत्तरपदप्रकृतिस्वरत्वम् । धासेः । 'डुधाञ् धारणपोषणयोः' । 'धेट् पाने' वा । तस्मात् कर्तर्यौणादिकः सिः[6] । प्रत्ययस्वरः । मातरा । 'नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृमातृपितृजामातृदुहितृ' (उ. सू. २. १५३) इति तृजन्तत्वेन निपातनादन्तोदात्तः । 'ऋतो ङि०' (पा. सू. ७. ३. ११०) इति गुणः । 'सुपां सुलुक्' इति सुपो डादेशः । विविशुः । 'विश प्रवेशने' । लिटि 'असंयोगाल्लिट् कित्' इति किद्भावादगुणाभावः । निघातः । सप्त । 'सृप्लृ गतौ' । 'सप्यशूभ्यां[5] तुट् च' (उ. सू. १. १५५) इति सपेर्विधीयमानः कनिन् तुडागमश्च बाहुलकादंतस्यापि भवति ।

---

* च-छ-आद्यं श्लोकद्वयं नास्ति; स-प्रथमः श्लोको नास्ति । १. स-अथ तृतीयाष्टके प्रथमाध्याय आरभ्यते । सोमस्य । २. म-स-प्रत्यग्निरुषस इति त्रीणि । ३. ज-ण-सप्तधास्वभावाः । ४. ल-प्रकर्षेण यक्षे । ५. ल-सिप्रत्ययः । ६. ख-ग-च-ज-ण-भ-स-सृप्यसृभ्याम्; न-सप्तसृभ्याम्; ल- सृप सौभ्याम् ।

ऋकारस्याकारश्च । निरवेऽपि[1] व्यत्ययेनान्तोदात्तत्वम्[1] । परिक्षिता । ' क्षि निवासगत्योः ' । ' क्विप् च ' इति क्विप् । पित्त्वात् तुगागमः । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक् ' इति सुपो डादेशः । चरेते । ' चर गतिभक्षणयोः ' । संपूर्वाच्चरतेः ' समस्तृतीयायुक्तात् ' (पा. सू. १. ३. ७४) इत्यात्मनेपदम् । निघातः[2] । सस्वाते । ' स्वृ गतौ ' । अयमन्तर्भावितण्यर्थः । रेफश्छान्दसः । ' ईदूदेत् ' इति प्रगृह्यसंज्ञा । निघातः । आयुः । ' इण् गतौ ' । ' उसिन् ' इत्यनुवृत्तौ ' एतेर्णिच्च ' (उ. सू. २. २७५) इत्युसिन् । णित्त्वाद्वृद्धिः । नित्त्वादाद्युदात्तः । प्रयक्षे । ' यज देवपूजासंगतिकरणदानेषु ' इत्यस्मात् तुमर्थे सेन्प्रत्ययः । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ' कृन्मेजन्तः ' इत्यव्ययसंज्ञायाम् ' अव्ययादाप्सुपः ' इति सुपो लुक् ॥

दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तं परेका चरति वर्तनिं गौः ॥ २ ॥

दिवक्षसः । धेनवः । वृष्णः । अश्वाः । देवीः । आ । तस्थौ । मधुऽमत् । वहन्तीः ।
ऋतस्य । त्वा । सदसि । क्षेमऽयन्तम् । परि । एका । चरति । वर्तनिम् । गौः ॥ २ ॥

[1]वृष्णः कामानां वर्षितुरग्नेः [1]अश्वाः वाहनरूपा रोहिताः [2]दिवक्षसः दिवं व्याप्य वर्तमानाः [2]धेनवः अग्नेः प्राणयित्र्यो भवन्ति । सोऽयमग्निः [3]मधुमत् माधुर्योपेतमुदकं [3]वहन्तीः [3]देवीः द्योतनशीला नदीः [3]आ [4]तस्थौ आतिष्ठति । प्राप्नोतीत्यर्थः । गोशब्दः[3] माध्यमिकवाग्वाची ' माध्यमिकां वाचमिति निरुक्ताः ' (निरु. ११ · २७) इत्यभिधानात् । [5]एका [5]गौः काचिदुक्तविधा वाक्[3] [5]ऋतस्य उदकस्य [4]सदसि स्थानेऽन्तरिक्षे [4]क्षेमयन्तं क्षेममावासमिच्छन्तं [4]वर्तनिं ज्वालाः प्रवर्तयन्तं [4]त्वा हे अग्ने त्वां [5]परि [5]चरति सेवते ॥ दिवक्षसः । ' अक्षू व्याप्तौ ' । दिवं व्याप्नुवन्तीति दिवक्षसः । ×' वक्ष रोषे ' । रोषार्थोऽप्ययं× धातुरत्र व्याप्तौ वर्तते । दिवं वक्षन्ति व्याप्नुवन्तीति । ' असुन् ' इत्यसुन्प्रत्ययः । ' लोपो व्योर्वलि ' इति वलोपः । कृदुत्तरपदप्रकृतिस्वरत्वम् । धेनवः । ' नुः ' इत्यनुवृत्तौ ' धेट इच्च ' (उ. सू. ३. ३१४) इति नुप्रत्ययः । इकारस्य गुणः । प्रत्ययस्वरः । वृष्णः । ' वृष सेचने ' । ' कनिन्युवृषितक्षिराजि ' इत्यादिना कनिन् । णित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तः । अश्वाः । ' अशू व्याप्तौ ' । ' अशिप्रुषिलटिकणि ' इत्यादिना क्वन् । णित्त्वादाद्युदात्तः । तस्थौ । ' ष्ठा गतिनिवृत्तौ ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । ' आत औ णलः ' इत्यौकारः । निघातः । मधुमत् । ' नित् ' इत्यनुवृत्तौ ' फल्गुपाटिनमिमनिजनाम् ' इत्यादिना मनेरुप्रत्ययः । तत्संनियोगेन नकारस्य धकारः । नित्त्वादाद्युदात्तः । त्वा । युष्मच्छब्दस्य द्वितीयैकवचनान्तस्य ' त्वामौ ' इति त्वादेशः[6] अनुदात्तश्च । क्षेमयन्तम् । ' क्षि निवासगत्योः ' । ' अर्तिस्तुसुहुसृधृक्षि ' इत्यादिना मन् । क्षेमम् आवासम्[7] आत्मन इच्छन्तम् । ' सुप आत्मनः क्यच् ' इति क्यच् । ' क्यचि च ' इति ईत्वम् ' अकृत्सार्वधातुकयोर्दीर्घः ' इति दीर्घत्वं च ' न छन्दस्यपुत्रस्य ' इति प्रतिषिध्यते । क्यचश्चित्त्वादन्तोदात्तः । तदन्ताच्छतृप्रत्ययः । शप्[7] । शपः पित्त्वादनुदात्तत्वं शतुश्च सार्वधातुकस्वरेण ।

१. ल–प्रत्ययान्तत्वेऽपि प्रत्ययेनान्तोदात्तत्वम् ; ल–प्रत्ययत्वेऽपि प्रत्ययेनान्तोदात्तत्वम् ; स–नित्त्वात्वापि व्यत्ययेनान्तोदात्तत्वम् । २. ख-ग-च-ज-ण-न-भ-स–' निघातः ' नास्ति । ३. घ–गौः माध्यमिका वाक् एका काचित् । ४. ख-ग-च-ज-ण-भ–दिवं.....व्याप्तौ ' नास्ति । × त-न-ल-स–वक्ष रोषे । रोषार्थोऽप्ययम् । ५. ख-ग-च-ज-ण-भ-स-त्वामादेशः । ६. ख-ग-च-ज-ण-न-भ–' आवासम् ' नास्ति । ७. ख-ग-च-ज-ण-न-भ–' शप् ' नास्ति ।

तयोः क्यचा सहैकादेशे कृते 'एकादेश उदात्तेनोदात्तः' इत्येकादेश उदात्तः। अम्। सुस्वादनुदात्तः। 'उदात्तादनुदात्तस्य०' इति अमः स्वरितत्वम्। एका। 'इण् गतौ'। 'इण्भीकापा०' इत्यादिना कन्। तदन्तादाप्। नित्स्वरः। वर्तनिम्। 'वृतु वर्तने'। अन्तर्भावितण्यर्थः। 'वृतेश्च' (उ. सू. २. २६३) इत्यनिः। गुणः। व्यत्ययेनान्तोदात्तत्वम्। गौः। 'गम्लृ गतौ'। 'गमेर्डोः' (उ. सू. २.२२५) इति डोप्रत्ययः। डित्त्वाट्टिलोपः। 'गोतो णित्' इति सुपो णित्त्वात् वृद्धिः। प्रत्ययस्वरः॥

आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयिविद्रयीणाम्।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः॥ ३॥

आ। सीम्। अरोहत्। सुऽयमाः। भवन्तीः। पतिः। चिकित्वान्। रयिऽवित्। रयीणाम्।
प्र। नीलऽपृष्ठः। अतसस्य। धासेः। ताः। अवासयत्। पुरुधऽप्रतीकः॥ ३॥

[v]रयीणां [v]रयिवित् धनानां मध्ये विशिष्टधनस्य लम्भयिता [v]चिकित्वान् ज्ञानवान् [v]पतिः अश्वानां पतिरग्निः [v]सीं सर्वतः [v]सुयमाः सुखेन नियन्तुं शक्याः [v]भवन्तीः या वडवाः [v]आ [v]अरोहत् आरोहति[1] स्म [v]नीलपृष्ठः [v]पुरुधप्रतीकः बहुधा विश्विसाङ्गः सोऽग्निः[2] [v]अतसस्य सततगमनस्य [v]धासेः पोषणार्थं [v]ताः अश्वाः [v]प्र [v]अवासयत् प्रकर्षेण वासयति स्म। निवासेन श्रमेऽपनीते सततगमनं पोषयितुं शक्यमित्यर्थः॥ सीम्। 'चादयोऽनुदात्ताः' (फि. सू. ८४) इत्यनुदात्तः। अरोहत्। 'रुह प्रादुर्भावे'। लङि रूपम्। निघातः। सुयमाः। 'यम उपरमे'। अस्माच्छक्यार्थे 'ईषदुःसुषु०' इति खल्। कृदुत्तरपदप्रकृतिस्वरत्वम्। पतिः। 'पा रक्षणे'। 'पातेर्डतिः' इति डतिः[3]। डित्त्वाट्टिलोपः। प्रत्ययस्वरः। चिकित्वान्। 'कित[4] ज्ञाने[4]'। क्वसौ रूपम्। रयिवित्। 'विदृ लाभे'। क्विप्। रयीणाम्। 'नामन्यतरस्याम्' इति विभक्तेरुदात्तत्वम्। नीलपृष्ठः। नीलशब्दो वृषादित्वादाद्युदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अतसस्य। 'अत सातत्यगमने' इत्यस्मात् 'अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्यः' (उ. सू.३. ३९७) इत्यसच्। चित्स्वरः। अवासयत्। 'वस निवासे'। 'हेतुमति०' इति णिच्। 'लुङ्लङ्लृङ्क्ष्वट्०' इत्यडागमः। 'तिङ्तिङः' इति निघातः। पुरुधप्रतीकः। पुरुशब्द इह संख्यावाची। 'संख्याया विधार्थे धा' इति धाप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। ह्रस्वश्छान्दसः॥

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश॥ ४॥

महि। त्वाष्ट्रम्। ऊर्जयन्तीः। अजुर्यम्। स्तभूयमानम्। वहतः। वहन्ति।
वि। अङ्गेभिः। दिद्युतानः। सधऽस्थे। एकाम्ऽइव। रोदसी इति। आ। विवेश॥ ४॥

---

१. ख-ग-च-ज-ण-न-भ-स-आरोहयति। २. त-सोऽग्निरेव। ३. ल-'डतिः' नास्ति. ४. ख-ल-किति ज्ञाने; त-चित ज्ञाने।

ऊर्जयन्तीः अवलं[1] बलिनं कुर्वत्यः । वहतः वहनपरा नद्यः महि महान्तं त्वाष्ट्रं त्वष्टुः सुतम् अजुर्यं जरयितुमनर्हं स्तभ्नातेर्भूयमानं लोकानां स्तम्भनं धारणमिच्छन्तमग्निं वहन्ति धारयन्ति । सधस्थे अपां समीपे[2] अङ्गेभिः अवयवैः दिद्युतानः दीप्यमानः सन् अग्निः रोदसी द्यावापृथिव्यौ वि आ विवेश विविधं[3] प्रविष्टवान् । रोदस्योर्दृष्टान्तः[4] । एकामिव । यथा पुमानेकां स्त्रियं प्रविशति तद्वत् ॥ त्वाष्ट्रम् । त्वष्टुरपत्यमित्यर्थे 'तस्यापत्यम्' इत्यण् । प्रत्ययस्वरः । स्तभूयमानम् । स्तभ्नातेर्भूयमानं[5] तदिच्छन्तम् । 'सुप आत्मनः क्यच्' । 'अकृत्सार्वधातुकयोः०' इति दीर्घः । तदन्तात् व्यत्ययेन शानच् । अकारान्तत्वात् 'आने मुक्' । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे कृते क्यजन्तधातुस्वरः[6] शिष्यते । अङ्गेभिः । 'बहुलं छन्दसि' इति भिस ऐसादेशाभावः । 'बहुवचने झल्येत्' इत्येत्वम् । दिद्युतानः । 'द्युत दीप्तौ' । छन्दसि लिट् । तस्य कानजादेशः । द्विर्वचनम् । हलादिशेषे कृते द्यु इत्यस्य[7] अभ्यासस्य 'द्युतिस्वाप्योः संप्रसारणम्' (पा. सू. ७. ४. ६७) इति संप्रसारणम् । 'संप्रसारणाच्च' इति पूर्वरूपत्वम् । चित्त्वादन्तोदात्तत्वम्[8] । एकामिव । 'इवेन विभक्त्यलोपः[9] पूर्वपदप्रकृतिस्वरत्वं च' इति वचनात् पूर्वपदप्रकृतिस्वरः । विवेश । 'विश प्रवेशने' इत्यस्मात् लिटि[10] रूपम् । निघातः ॥

जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ ५ ॥

जानन्ति । वृष्णः । अरुषस्य । शेवम् । उत । ब्रध्नस्य । शासने । रणन्ति ।
दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषाम् । गण्या । माहिना । गीः ॥ ५ ॥

वृष्णः कामानां वर्षितुः अरुषस्य । रुषा हिंसकाः तद्रहितस्य । शत्रुराहित्येन रोचमानस्येत्यर्थः[11] । तथाविधस्याग्नेः शेवम्[12] आश्रयविषयं सुखं जनाः जानन्ति । उत अपि च जानन्तस्ते ब्रध्नस्य महतोऽग्नेः शासने आज्ञायां सर्वे जनाः रणन्ति रमन्ते । तथा[13] च मन्त्रः–'अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः' (ऋ. सं. १. ६०. २) इति । अपि च येषां मनुष्याणामग्निविषया माहिना महती इळा गीः स्तुतिरूपा वाक् गण्या गणनार्हा पूज्या ते दिवोरुचः द्युलोकस्य रोचकाः सुरुचः शोभनदीप्तयः रोचमानाः देदीप्यमाना भवन्ति ॥ जानन्ति । 'ज्ञा अवबोधने' । क्र्यादिः । तस्य 'ज्ञाजनोर्जा' इति जादेशः । प्रत्ययस्वरः । अरुषस्य । रुष रिष हिंसार्थौ । रोषन्तीति रुषा हिंसकाः । 'इगुपधज्ञा०' इति कः । न सन्ति रुषा यस्यासावरुषः । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । शेवम् । 'शीङ् स्वप्ने' । 'इण्शीङ्भ्यां वन्' इति वन् । नित्स्वरः । शासने । 'शासु अनुशिष्टौ' । अस्माद्भावे ल्युट् । 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । रणन्ति । निघातः । दिवोरुचः । 'रुच दीप्तौ' । अस्मात् क्विप् । 'तत्पुरुषे कृति बहुलम्' इति

---

१. घ-त-प-ल-अग्निम् । २. ख-ग-च-ज-ण-समीपम् । ३. ख-ग-घ-च-ज-ण-न-भ-स-'विविधं' नास्ति । ४. घ-दृष्टान्तः । ५. ल-स्तम्भने । ६. ग-ज-ण-भ-क्यजन्ताधातुस्वरः; च-स-क्यजन्ताद्धातुस्वरः । ७. ल-इत्येतस्य । ८. ख-ग-च-ज-ण-न-भ-स-°दात्तः । ९. ज-ण-समासो विभक्त्यलोपः । १०. ख-ग-च-ज-ण-न-भ-लिट् । ११. त-आरोच° १२. ल-सर्वं शेवम् । १३. ख-ग-च-ज-ण-न-भ-यथा ।

षष्ठ्या अलुक्। कृदुत्तरपदप्रकृतिस्वरत्वम्। सुरुचः। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। इळा। 'ईड स्तुतौ'। ह्रस्वश्छान्दसः। यथा वाक्शब्दष्टाबन्तस्तद्वत्। पित्त्वादनुदात्तत्वे धातुस्वरः। गण्या। 'गण संख्याने'। स्वार्थे[1] ण्यन्तात् 'अचो यत्'। 'यतो नावः' इत्याद्युदात्तत्वम्[2]। माहिना। 'महेरिनण् च' इति इनण्। णित्त्वादुपधावृद्धिः। व्यत्ययेनाद्युदात्तः। गीः। 'गृ शब्दे'। अस्मात् क्विप्। 'ऋत इद्धातोः' इतीत्वम्। 'वोरुपधायाः' इति दीर्घः। प्रातिपदिकस्वरः॥ ॥ १ ॥

उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम्।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥ ६ ॥

उतो इति। पितृऽभ्याम्। प्रऽविदा। अनु। घोषम्। महः। महत्ऽभ्याम्। अनयन्त। शूषम्। उक्षा। ह। यत्र। परि। धानम्। अक्तोः। अनु। स्वम्। धाम। जरितुः। ववक्ष ॥ ६ ॥

vउतो अपि च vमहो vमहद्भ्यां महतो महद्भ्यां vपितृभ्यां द्यावापृथिवीभ्यां[3] vप्रविदा प्रवेदनेन vअनु vघोषम् अनुघुष्यमाणं[4] vशूषं सुखम्। 'शूषं शुनम्' (नि. ३. ६. १०) इति सुखनामसु पाठात्। तत्सुखं[5] यजमाना अग्निम् vअनयन्त अग्निं प्रापितवन्तः। सोऽग्निः vयत्र यजमानेषु vउक्षा वृष्ट्युत्पादनेनोदकस्य सेक्ता[6] vअक्तोः। अक्तुशब्दो रात्रिमाचष्टे। 'शर्वरी अक्तुः' (नि. १. ७. ४) इति तन्नामसु पाठात्; अज्यते सिच्यते नीहारेण जगदस्यामिति व्युत्पत्तेश्च। तस्या रात्रेः vपरि vधानं परितो धारकं[7] vस्वम् आत्मीयं vधाम तेजः vजरितुः स्तोतुः स्तुतिश्रवणार्थम् vअनु vववक्ष vह समीपे वहति खलु। संनिहितं करोतीत्यर्थः॥ उतो। 'ओत्' (पा. सू. १.१.१५) इति प्रगृह्यसंज्ञा। एवमादित्वादन्तोदात्तः[8]। घोषम्। 'घुषिर्[9] शब्दे'। अस्मात्कर्मणि घञ्। लघूपधगुणः। जित्स्वरः। महः। अकारतकारयोर्लोपश्छान्दसः। 'बृहन्महतोरुपसंख्यानम्' इति विभक्तेरुदात्तत्वम्। अनयन्त। 'णीञ् प्रापणे' इत्यस्य लङि रूपम्। निघातः। उक्षा। 'उक्ष सेचने'। 'श्वयुक्षन्[10]' इत्यादिना कनिन्प्रत्ययान्तत्वेन उक्षन्शब्दो निपातितः। व्यत्ययेनान्तोदात्तः। ह। चादित्वादनुदात्तः। यत्र। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। अक्तोः। 'अञ्जू व्यक्तिगतिम्रक्षणेषु[10]' इत्यस्मात् 'व्याज्यर्तिभ्यः[11] क्तुः' इति क्तुः। कित्त्वात् 'अनिदिताम्' इति नलोपः। प्रत्ययस्वरः। ववक्ष। 'वह प्रापणे'। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लिट्। सकारश्छान्दसः। तिपो णलादेशः। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्॥

---

१. ख-ग-च-ज-ण-न-भ-ल-स्वार्थम्। २. ख-ग-च-ज-ण-न-भ-स-इत्युदात्तत्वम्। ३. घ-द्यावापृथिवीभ्यामुपलक्ष्यमाणमग्निम्। ४. घ-अनुघुष्यमाणं स्तोत्रमनुलक्ष्य। ५. ख-ग-च-ज-ण-भ-ल-सुखम्। ६. ग-च-ज-ण-स-आसेक्ता। ७. घ-धारणीयम्। ८. त-°दन्तोदात्तत्वम्। ९. ख-ग-च-ज-ण-न-भ-घुषि; स-घुष। १०. ख-ग-च-व्यक्तिगतिभक्षजेषु; ज-ण-व्यक्तिम्रक्षणेषु; ल-व्यक्तिक्षेपणेषु। ११ ख-ग-च-ज-भ-व्याज्ञर्तिभ्यः; ल-व्यज्यर्तिभ्यः; न-व्यज्ञर्तिभ्यः।

अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥ ७ ॥

अध्वर्युऽभिः । पञ्चऽभिः । सप्त । विप्राः । प्रियम् । रक्षन्ते । निऽहितम् । पदम् । वेरिति वेः । प्राञ्चः । मदन्ति । उक्षणः । अजुर्याः । देवाः । देवानाम् । अनु । हि । व्रता । गुरिति गुः ॥७॥

उद्गातृवर्गव्यतिरिक्ताः[1] द्वादशर्त्विजो भवन्ति । तत्र सप्त वषट्कर्तारः । पञ्चान्येऽध्वरं नयन्ति । तैः पञ्चभिः अध्वर्युभिः सह सप्त विप्राः मेधाविनो होत्रकाः वेः गमनस्वभावस्याग्नेः प्रियं निहितम् आहवनीयाख्यं पदं रक्षन्ते पालयन्ति[2] । प्राञ्चः सोमपानार्थं प्राङ्मुखा गच्छन्तः अजुर्याः जरयितुमशक्याः उक्षणः सोमरसस्य सेक्तारः[3] देवाः स्तोतारः मदन्ति हृष्यन्ति । किंच ते देवाः ऋत्विजः देवानां संबन्धीनि[4] व्रता व्रतानि यज्ञान् अनु गुः अन्वगच्छन् । हि प्रसिद्धौ । अग्नेः प्रसादात् हविर्लक्षणान्नवन्तो देवा यज्ञान् लब्धवन्त इत्यर्थः ॥ रक्षन्ते । ' रक्ष पालने ' । व्यत्ययेनात्मनेपदम् । निघातः । निहितम् । ' डुधाञ् धारणपोषणयोः ' इत्यस्य कर्मणि निष्ठायां ' दधातेर्हिः ' इति हिरादेशः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्[5] । वेः । ' वी कामिरत्यादिषु । अस्माद्विच् । ' सार्वधातुकार्धधातुकयोः ' (पा. सू. ७. ३. ८४) इति गुणः । ' इसिडसोश्च ' इति पूर्वरूपत्वम् । प्राञ्चः । ' अनिगन्तोऽञ्चतौ ' इति पूर्वपदप्रकृतिस्वरत्वम् । मदन्ति । ' मदी हर्षे ' । निघातः । गुः । ' इण् गतौ ' इत्यस्मात्लुङि रूपम् । ' इणो गा लुङि ' इति गादेशः । ' आतः ' इति ङेर्जुसादेशः । ' बहुलं छन्दसि ' इत्यडभावः । हिशब्दयोगान्न निहन्यते ॥

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ८ ॥

दैव्या । होतारा । प्रथमा । नि । ऋञ्जे । सप्त । पृक्षासः । स्वधया । मदन्ति ।
ऋतम् । शंसन्तः । ऋतम् । इत् । ते । आहुः । अनु । व्रतम् । व्रतऽपाः । दीध्यानाः ॥८॥

दैव्या दैव्यौ[6] देवतारूपौ होतारा होतारौ होमनिष्पादकौ प्रथमा प्रथमौ मुख्याविमं चामुं चाग्नी न्यृञ्जे । ' ऋञ्जतिः प्रसाधनकर्मा ' इति यास्कः । मन्त्रद्रष्टा[7] विश्वामित्रोऽहम्[8] प्रसाधयामि । सप्त पृक्षासः[9] सप्त होत्रकाः स्वधया सोमेन मदन्ति हृष्यन्ति । ऋतं स्तोत्रं शंसन्तः व्रतपाः व्रतस्य यज्ञकर्मणो रक्षितारः दीध्यानाः दीप्यमानाः ते होत्रकाः अनु व्रतं यज्ञे कर्मणि ऋतमित् सत्यमेवाग्निम् आहुः वदन्ति ॥ ऋञ्जे । ' ऋजि भृजी भर्जने ' । निपूर्वोऽयं धातुः प्रसाधने वर्तते । निघातः । स्वधया । स्वं लोकं यजमानस्य दधाति विदधातीति[10]

१. ल–उद्गातृव्यतिरिक्ताः । २. त–पालयन्ते । ३. घ-ण–आसेक्तारः । ४. ख-ग-च-ज-ण-न-भ–' संबन्धीनि ' नास्ति । ५. त–पूर्वपदप्रकृतिः । ६. त-ल–' दैव्यौ ' नास्ति । ७. ख-ग-च-ज-ण-न-भ–मन्त्रद्रष्टाह । विश्वामित्रोऽहम्; घ–' मन्त्र...अहं ' नास्ति । ८. घ–पृक्षासः हविर्लक्षणान्नवन्तः । ९. ख-ग-च-ज-ण-न-भ–विदधाति ।

स्वधा सोमः । ' आतोऽनुपसर्गे कः ' इति कः[1] । कृदुत्तरपदप्रकृतिस्वरत्वम् । आहुः । ' ब्रूञ् व्यक्तायां वाचि ' इत्यस्य लटि ' ब्रुवः पञ्चानामादित आहो ब्रुवः ' इति झेरुसादेशो ब्रुवश्च आहादेशः । निघातः । दीध्यानाः । ' दीधीङ् दीप्तिदेवनयोः ' इत्यस्मात् शानच् । तस्य चित्त्वादन्तोदात्तत्वे प्राप्ते ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥

वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर्मन्द्रतरश्चिकित्वान्महो देवान्रोदसी एह वक्षि ॥ ९ ॥

वृषऽयन्ते । महे । अत्याय । पूर्वीः । वृष्णे । चित्राय । रश्मयः । सुऽयामाः ।
देव । होतः । मन्द्रऽतरः । चिकित्वान् । महः । देवान् । रोदसी इति । आ । इह । वक्षि ॥९॥

vदेव देदीप्यमान vहोतः देवानामाह्वातः हे अग्ने vमहे महते vअत्याय सर्वानप्यतिक्रम्य वर्तमानाय vचित्राय नानाविधवर्णाय । यद्वा चित्राय देवैश्चायनीयाय पूज्याय । vवृष्णे कामानां वर्षित्रे तुभ्यं त्वदर्थं vपूर्वीः प्रभूताः vसुयामाः अतिशयेन विस्तृताः vरश्मयः सर्वतो व्याप्ता ज्वालाः vवृषायन्ते वृषेवाचरन्ति । सेचकाः[2] इव भवन्ति । होतारो ज्वालाभिः समिद्धमग्निं दृष्ट्वा सोमाज्यपयःप्रभृतीनि हवींषि तत्र प्रक्षिपन्तीति ज्वालानां वृषत्वम् । यद्वा षष्ठ्यर्थे चतुर्थी । तथा च महतोऽत्यस्य चित्रस्य वृष्णोऽग्नेर्बहवो रश्मयो वृषेवाचरन्ति । वृष्टयुत्पादनद्वारा पर्जन्यवदाचरन्तीत्यर्थः । अपि च vमन्द्रतरः यजमानस्य मादयितृतमः vचिकित्वान् ज्ञानोपेतः स त्वं vमहः महतः पूज्यान् यष्टव्यान् vदेवान् vरोदसी द्यावापृथिव्यौ च vइह वैदिकेऽस्मिन् कर्मणि vआ vवक्षि आवह ॥ वृषायन्ते । ' उपमानात् ' इत्यनुवृत्तौ ' कर्तुः क्यङ् सलोपश्च ' इति क्यङ् । ' अकृत्सार्वधातुकयोः[3] ' इति दीर्घः । पादादित्वादनिघातः । धातुस्वरः । महे । अकारतकारयोर्लोपश्छान्दसः । ' बृहन्महतोः[4] ' इति विभक्तेरुदात्तत्वम् । पूर्वीः । ' पॄ पालनपूरणयोः ' इत्यस्मात् ' कुः ' इत्यनुवृत्तौ ' पॄभिदि-व्यधिगृधि[4] ' इत्यादिना कुप्रत्ययः । कित्त्वादुणप्रतिषेधे ' उदोष्ठ्यपूर्वस्य ' इत्युत्वम् । ' उरण् रपरः ' । तस्मात् ' वोतो गुणवचनात् ' इति ङीप् । यणादेशे कृते ' हलि च ' इति दीर्घः । ' वा[3] छन्दसि ' इति सवर्णदीर्घः[3] । रश्मयः । ' अशू व्याप्तौ ' । अश्नुवते सर्वं जगदिति ' मिः ' इत्यनुवृत्तौ ' अश्नोते रश्च[4] ' (उ. सू. ४ · ४८६) इति मिप्रत्ययो रशादेशश्च । प्रत्ययस्वरः । सुयामाः । यमनं यामः । भावे घञ् । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । देव । ' अपादादौ ' इति पर्युदासात् पाष्टिकमाद्युदात्तत्वम् । होतः । ह्वयतेस्ताच्छीलिकस्तृन् । ' बहुलं छन्दसि ' इति संप्रसारणम् । अपादाद्यामन्त्रितत्वान्निघातः । मन्द्रतरः । मदि स्तुत्यादिषु । ' स्फायितञ्चिवञ्चि[4] ' इत्यादिना रक् । इदित्त्वान्नुम् । तरपः पित्त्वादनुदात्तत्वे रक्प्रत्ययस्वरः । वक्षि । ' वह प्रापणे ' इत्यस्य ' बहुलं छन्दसि ' इति शपो लुक् । ढ्रत्वकत्वषत्वानि । निघातः ॥

---

१. त-कः प्रत्ययः; ल-कप्रत्ययः । २. ख-त-भ-ल-सेवकाः । ३. ख-ग-च-ज-ण-' वा..... दीर्घः ' नास्ति । ४. ख-ग-च-ज-ण-न-भ-' अशेरश च ' ।

पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥ १० ॥

पृक्षऽप्रयजः । द्रविणः । सुऽवाचः । सुऽकेतवः । उषसः । रेवत् । ऊषुः ।
उतो इति । चित् । अग्ने । महिना । पृथिव्याः । कृतम् । चित् । एनः । सम् । महे । दशस्य ॥ १० ॥

[v]द्रविणः । द्रवति सततं गच्छतीति द्रविणःशब्देन[1] अग्निरभिधीयते । द्रविणः सततगमनस्वभाव हे अग्ने [v]पृक्षप्रयजः । पृक्षाणि हविर्लक्षणान्यन्नानि प्रकर्षेण यष्टुं प्रक्रम्यते[2] यासूषःसु ताः पृक्षप्रयजः । [v]सुवाचः प्रातरनुवाकादिशोभना वाचो यासां[3] ताः। [v]सुकेतवः वयसां मनुष्याणां च शब्दैः सुप्रज्ञानाः। एवंविधाः [v]उषसः [v]रेवत् अस्माकं धनयुक्तं यथा भवति तथा [v]ऊषुः व्युच्छन्ति । [v]उतो [v]चित् अपि च हे [v]अग्ने [v]पृथिव्याः विस्तीर्णाया[4] ज्वालायाः[5] [v]महिना महत्त्वेन [1]कृतं संपादितं [1]चित् यत्किंचित् [v]एनः प्राण्युपघातादिलक्षणं पापं [v]महे महते यजमानाय मह्यं मदर्थं [v]सं [v]दशस्य संक्षपय ॥ पृक्षप्रयजः । ' अन्येभ्योऽपि दृश्यन्ते ' इति कर्मणि विच् दृशिग्रहणादधिकृतो भवतीत्युक्तम् । बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् । द्रविणः । ' द्रु गतौ ' इत्यस्मात् ' द्रुदक्षिभ्यामिनन् ' इतीनन्प्रत्ययः । गुणावादेशौ । संबुद्धौ सोर्लोपाभावश्छान्दसः । आमन्त्रितत्वान्निघातः । सुवाचः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । रेवत्[6] । रयिर्धनमस्मिन् विद्यत इति मतुप् । ' हस्वनुड्भ्याम्[7] ' इति मतुबुदात्तः । ' छन्दसीरः ' इति वत्वम्[8] । ' रयेर्मतौ बहुलं छन्दसि ' इति संप्रसारणम् । परपूर्वत्वे गुणः । ऊषुः । ' उष दाहे ' । दाहार्थोऽप्ययं धातुरत्र प्रकाशने वर्तते । ' छन्दसि लुङ्[9] ' इति वर्तमाने लिट् । उसि रूपम् । निघातः । पृथिव्याः । ' प्रथ प्रख्याने ' इत्यस्मात् ' प्रथेः पिवन् संप्रसारणं च ' इति पिवन्प्रत्ययः । तत्संनियोगेन धातोः संप्रसारणम् । ' पृथ्वीरादिभ्यश्च ' इति ङीप् । प्रत्ययस्वरेणान्तोदात्तः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । दशस्य । निघातः ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥

हे [v]अग्ने [v]पुरुदंसम् । ' अग्निर्दंसः वेषः ' (नि. २. १. ३) इति कर्मनामसु पठितत्वात् दंसःशब्दः कर्मवाची । पुरूणि बहूनि दंसांसि[6] कर्माणि यस्याः सा । तां बहुकर्माणं[7] [v]गोः [v]सनिं गवादिपशून्[8] संपादयित्रीम्[9] [v]इळाम् एतन्नामिकां गोरूपां देवतां [v]शश्वत्तमं निरन्तरं [v]हवमानाय यजमानाय

१. ज-ण-ल–द्रविणशब्देन । २. ख-घ–प्रक्रम्यन्ते । ३. ज-ण–यासु । ४. च-ज-ण-भ–विस्तीर्ण-ज्वालायाः; ख-ग-विस्तीर्णाज्वालायाः । ५. ख-ग-च-ज-ण– ' रेवत्... .....वत्वम् ' नास्ति । ६. ख-ग-घ-च-ज-ण-न-भ–' दंसांसि ' नास्ति । ७. घ-प–' बहुकर्माणं ' नास्ति । ८. घ-त-प-ल–°पशूनाम् । ९. त–प्रदात्रीम् ; ल–प्रदायित्रीम् ।

मह्यं [v]साध साधय । किंच [v]नः अस्माकं [v]सूनुः पुत्रः [v]तनयः पौत्रः [v]स्यात् भवतु इति हे [v]अग्ने [v]ते तव या [v]सुमतिः शोभना बुद्धिः [v]सा [v]विजावा अवन्ध्या सती [v]अस्मे अस्माकं [v]भूतु भवतु ॥ शश्वत्तमम् । उच्छादिषु पाठादन्तोदात्तत्वम् । साध । ' राध साध संसिद्धौ ' । अन्तर्भावितण्यर्थोऽयम् । लोटि व्यत्ययेन शप् । ' सेर्ह्यपिच्च ' इति हिरादेशः । तस्य ' अतो हेः ' इति लुक् । निघातः । विजावा । ' जनी प्रादुर्भावे ' । अस्मात् ' अन्येभ्योऽपि दृश्यन्ते[1] ' इति वनिप् । ' विड्वनोरनुनासिकस्यात् ' इत्यात्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । लिङ्गव्यत्ययः । भूतु । ' भू सत्तायाम् ' । ' बहुलं छन्दसि ' इति शपो लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः ॥ ॥ २ ॥

' अञ्जन्ति ' इत्यष्टमं वैश्वामित्रमेकादशर्चं सूक्तम् । अत्रानुक्रमणिका–'अञ्जन्ति यूपस्तुतिः षष्ठ्याद्याभिर्बृहतोऽस्याबृश्निन्यष्टमी वैश्वदेवी वा तृतीयासप्तम्यावनुष्टुभौ ' इति । ' उच्छ्रयस्व वनस्पते ' ' ये वृक्णासः ' इत्येते तृतीयासप्तम्यावनुष्टुभौ शिष्टास्त्रिष्टुभः । कृत्स्नस्य सूक्तस्य यूपो देवता । ' वनस्पते शतवल्शः ' इत्यस्याश्छिन्नयूपस्य मूलभूतः स्थाणुर्देवता । ' आदित्या रुद्रा वसवः ' इत्यष्टमी वैश्वदेवी यौपी[2] वा । अत्र षष्ठ्यादीनां बहवो यूपा देवता बहूनां स्तूयमानत्वात् । शिष्टा एकयूपदेवत्याः । यूपाञ्जने ' अञ्जन्ति त्वाम् ' इत्येषा । ' प्रेषितो यूपायाज्यमानायाञ्जन्ति त्वामध्वरे देवयन्तः ' (आश्व. श्रौ. ३. १) इति । यूपोच्छ्रयणे ' समिद्धस्य ' इति द्वे ऋचौ । ' उच्छ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्तात् ' (आश्व. श्रौ. ३. १) इति सूत्रितत्वात् । यूपपरिव्ययणे[3] ' युवा सुवासाः परिवीत आगादिति परिदध्यात् ' (आश्व. श्रौ. ३ .१) इति सूत्रितत्वात् । यूपोच्छ्रयणे ' जातो जायते सुदिनत्वे अह्नामिति यर्धर्चं आरभेत् ' (आश्व. श्रौ. ३. १) इति सूत्रितम् । यूपैकादशिन्यामन्यत्रापि[4] बहुयूपयुक्ते कर्मणि ' यान्तो नरः इत्यादिभिः षड्भिः पञ्चभिर्वा संस्तुयात्[5] । 'संस्तुयादनभिहिंकृत्य यान्तो नरो देवयन्तो नि मिम्युरिति षड्भिः पञ्चभिर्वा ' (आश्व. श्रौ. ३. १) इति ॥

अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्तादद्वा क्षयो मातुरस्या उपस्थे ॥ १ ॥

अञ्जन्ति । त्वाम् । अध्वरे । देवऽयन्तः । वनस्पते । मधुना । दैव्येन ।
यत् । ऊर्ध्वः । तिष्ठाः । द्रविणा । इह । धत्तात् । यत् । वा । क्षयः । मातुः । अस्याः । उपऽस्थे ॥ १ ॥

[v]वनस्पते खदिरपलाशादिलक्षण हे यूप [v]अध्वरे यज्ञे [v]देवयन्तः देवान् कामयमाना अध्वर्वादयः [v]दैव्येन [v]मधुना घृतेन । ' एतद्वै मधु[6] दैव्यं[7] यदाज्यम् ' (गो. ब्रा. २. २) इत्याम्नानात् । तेन घृतेन [v]त्वाम् [v]अञ्जन्ति त्वयि घृतं सिञ्चन्तीत्यर्थः । [v]यत् यदि त्वम् [v]ऊर्ध्वस्तिष्ठाः उन्नतस्तिष्ठसि । [v]यद्वा यदि वा [v]मातुरस्याः मातृभूतायाः पृथिव्याः [v]उपस्थे उत्सङ्गे ते [v]क्षयः निवासः । यद्यूर्ध्वस्तिष्ठसि[8] यदि वा भूमौ शयानो वर्तसे उभयथापि त्वम् [v]इह अस्मासु [v]द्रविणा धनानि[9] [v]धत्तात् धेहि । ब्राह्मणेनेयमृग्व्याख्याता—' अञ्जन्ति त्वामध्वरे देवयन्त इत्यन्वाहाध्वरे

१. ख-ग-च-ज-ण-भ–दृश्यते । २. ख-ग-च-ज-ण-भ–यूपी । ३. ख-ग-च-ज-ण-भ–°व्ययमाणे । ४. ग-च-ज-ण–यश्चैका°; ख-न-भ–पश्चैका° ५. न–संस्तुयात् । तथा च सूत्रम् । ६. ख-घ-च-ज-ण-त-न-भ-ल–दैव्यं मधु । ७. ख–यदूर्ध्वस्तिष्ठसि; ग-घ-त-न-भ-ल–यद्यूर्ध्वं तिष्ठसि । ८. घ–द्रविणानि ।

ह्येनं देवयन्तोऽञ्जन्ति वनस्पते मधुना दैव्येनेत्येतद्वै मधु दैव्यं यदाज्यं यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थ इति यदि च तिष्ठासि यदि च शयासै द्रविणमेवास्मासु धत्तादित्येव तदाह' (ऐ. ब्रा. २. २) इति। तथा च निरुक्तमपि—'अञ्जन्ति त्वामध्वरे देवान् कामयमाना वनस्पते मधुना दैव्येन च घृतेन च यदूर्ध्वः स्यास्यसि द्रविणानि च नो दास्यसि यद्वा ते कृतः क्षयो मातुरस्या उपस्थ उपस्थाने' (निरु. ८. १८) इति॥ अञ्जन्ति। 'अञ्जू व्यक्तिकान्तिगतिम्रक्षणेषु'। रुधादित्वात् श्नम्। तस्य लटि झेर्जित्त्वात् 'अनिदितां०' इत्युपधालोपः। 'श्नसोरल्लोपः' इत्यल्लोपः। प्रत्ययस्वरेण मध्योदात्तः। त्वाम्। अमि युष्मदस्मदोरन्य 'त्वमावेकवचने' इति त्वादेशः। 'द्वितीयायां च' इत्याकारः। 'एकादेश उदात्तेनोदात्तः' इत्येकादेशस्योदात्तत्वम्। अध्वरे। न विद्यते ध्वरो हिंसा यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। देवयन्तः[1] देवानात्मन इच्छन्तः। 'सुप आत्मनः०' इति क्यच्। 'क्यचि च' इतीत्वम्[1] 'अकृत्सार्वधातुकयोः०' इति दीर्घत्वं च 'न छन्दस्यपुत्रस्य' इत्यनेन प्रतिषिध्यते। तदन्ताच्छतृप्रत्ययः। शपः पित्त्वालसार्वधातुकस्वरेण चानुदात्तत्वे कृते तयोः 'एकादेश उदात्तेनोदात्तः' इति क्यच एव स्वरः। वनस्पते। 'आमन्त्रितस्य च[2]' इत्याद्युदात्तत्वम्। मधुना। 'फलिपाटिनमिमनि०' इत्यादिना उप्रत्ययः। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्। दैव्येन। 'देवाद्यञञौ' इति यञ्। जित्त्वात्[3] वृद्धिः[3]। 'यस्य' इति लोपः। जित्त्वादाद्युदात्तः। तिष्ठाः। 'ष्ठा गतिनिवृत्तौ'। लेटि सिप। 'इतश्च लोपः' इतीकारलोपः। शपः शित्त्वात् 'पाघ्रा०' इत्यादिना तिष्ठादेशः। 'लेटोऽडाटौ' इत्याडागमः। यच्छब्दयोगान्निघाताभावः। तिष्ठादेशस्याद्युदात्तत्वेन निपातितत्वादाद्युदात्तः। द्रविणा। 'द्रुदक्षिभ्यामिनन्' इतीनन्प्रत्ययः। 'सुपां सुलुक्०' इति सुपो डादेशः। नित्त्वादाद्युदात्तः। इह। इदंशब्दात् सप्तम्यर्थे 'इदमो हः' इति हः। 'इदम इश्' इतीशादेशः। शित्त्वात् सर्वादेशः। प्रत्ययस्वरः। धत्तात्। 'दुधाञ् धारणपोषणयोः' इत्यस्य प्रार्थने लोट्। सिप। तस्य 'सेर्ह्यपिच्च' इति हिरादेशः। 'तुह्योः' (पा. सू. ७. १. ३५) इति तातङादेशः। 'श्नाभ्यस्तयोरातः' इत्याकारलोपः। 'दधस्तथोश्च' (पा. सू. ८. २. ३८) इति भष्भावः। जश्त्वचर्त्वे। निघातः। वा। चादित्वादनुदात्तः। क्षयः। क्षियन्ति निवसन्ति। अधिकरणे घः। 'क्षयो निवासे' इत्याद्युदात्तत्वम्। मातुः। 'नप्तृनेष्टृ०' इत्यादिना तृजन्तत्वेन निपातनादन्तोदात्तः। 'ऋत उत्' इति ङसः पूर्वपरयोरुकारः। अस्याः। 'ऊङिदम्' इत्यादिना विभक्तेरुदात्तत्वम्। उपस्थे। 'ष्ठा गतिनिवृत्तौ'। 'आतश्चोपसर्गे' इति कः। 'तत्पुरुषे तुल्यार्थ०' इति मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम्॥

समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरम्।
आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय॥ २॥

समऽइद्धस्य। श्रयमाणः। पुरस्तात्। ब्रह्म। वन्वानः। अजरम्। सुऽवीरम्।
आरे। अस्मत्। अमतिम्। बाधमानः। उत्। श्रयस्व। महते। सौभगाय॥ २॥

हे यूप [V]समिद्धस्य दीप्यमानस्याहवनीयाग्नेः [V]पुरस्तात् प्राच्यां दिशि [V]श्रयमाणः तत्र वर्तमानः [V]ब्रह्म अन्नम्। 'ब्रह्म वर्चः' (नि. २. ७. २५) इत्यन्ननामसु पाठात्। [V]अजरं जरारहितं

१. ख-ग-च-ज-ण-भ-'देवयन्तः.....इतीत्वम्' नास्ति। २. ख-ग-च-ज-ण-न-भ-'च' नास्ति। ३. त-ल-जित्त्वादादिवृद्धिः।

समृद्धं [V]सुवीरं शोभनापत्ययुक्तं ब्रह्म अन्नं [V]वन्वानः प्रयच्छन् [V]अस्मदमतिम् अस्माकं शत्रुभूतामशनायाम्। 'अशनाया वै पाप्मामतिः' (ऐ. ब्रा. २. २) इति श्रवणात्। तादृशं शत्रुम् [V]आरे[1] दूरे [V]बाधमानः अपनुदंस्त्वं[2] [V]महते [V]सौभगाय धनादिसंपत्त्यर्थम् [V]उच्छ्रयस्व उच्छ्रितो भव। उक्तार्थे[2] ब्राह्मणं —'समिद्धस्य श्रयमाणः पुरस्तादिति समिद्धस्य ह्येष एतत्पुरस्ताच्छ्रयते ब्रह्म वन्वानो अजरं सुवीरमित्याशिषमेवाशास्त आरे अस्मदमतिं बाधमान इत्यशनाया वै पाप्मामतिस्तामेव तदाराधुदते यज्ञाच्च यजमानाच्चोच्छ्रयस्व महते सौभगायेत्याशिषमेवाशास्ते' (ऐ. ब्रा. २. २) इति। समिद्धस्य। 'जिइन्धी दीप्तौ'। कर्मणि निष्ठायां 'श्वीदितो निष्ठायाम्' इति इट्प्रतिषेधः। सम्यगिद्ध इति। 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम्। श्रयमाणः। 'श्रिञ् सेवायाम्' इत्यस्य लटः शानच्। तस्य लस्यार्धधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः शिष्यते। पुरस्तात्। पूर्वशब्दस्य 'दिक्शब्देभ्यः सप्तमीपञ्चमी[3]' (पा. सू. ५. ३. २७) इत्यादिना अस्तातिप्रत्ययः। 'अस्तात्ति च' (पा. सू. ५. ३. ४०) इति पूर्वस्य पुरादेशः। प्रत्ययस्वरः। ब्रह्म। 'नञ्विषयस्यानिसन्तस्य' इत्याद्युदात्तः। वन्वानः। 'वनु याचने'। अत्रायं धातुर्दानार्थे वर्तते। लटः शानच्प्रत्ययः। चित्त्वादन्तोदात्तः। अजरम्। 'नञो जरमरमित्रमृता[3]' इत्युत्तरपदाद्युदात्तत्वम्। सुवीरम्। 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम्। आरे। एत्वमादिस्वादन्तोदात्तः। अस्मत्। 'युष्यसिभ्यामदिक्' इति मदिक्प्रत्ययः। 'सुपां सुलुक्[3]' इति सुपो लुक्। मदिक्प्रत्ययस्वरः। अमतिम्। 'तत्पुरुषे[3]' इति पूर्वपदप्रकृतिस्वरत्वम्। उत्। निपातत्वेनाद्युदात्तः। श्रयस्व। 'श्रिञ् सेवायाम्' इत्यस्य लोण्मध्यमैकवचने थास्। थासः से इत्यादेशः। 'सवाभ्यां वामौ' इत्येकारस्य वकारः। निघातः। महते। वर्तमाने 'पृषद्बृहन्महत्[3]' इति निपातनादन्तोदात्तः। 'बृहन्महतोरुपसंख्यानम्' इति विभक्तेरुदात्तत्वम्। सौभगाय। 'प्राणभृज्जातिवयोवचन[3]' इत्यत्। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति वृद्धिः। सर्वविधीनां छन्दसि विकल्पितत्वात् इत्युत्तरपदस्य वृद्धिर्न भवति। जित्स्वरः॥

उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि।
सुमितौ मीयमानो वर्चो धा यज्ञवाहसे॥ ३॥

उत्। श्रयस्व। वनस्पते। वर्ष्मन्। पृथिव्याः। अधि।
सुऽमितौ। मीयमानः। वर्चः। धाः। यज्ञऽवाहसे॥ ३॥

हे [V]वनस्पते यूप [V]पृथिव्या [V]अधि पृथिव्यां [V]वर्ष्मन् उत्कृष्टे देवयजनाख्ये देशे [V]उच्छ्रयस्व उच्छ्रितो भव। [V]सुमितौ शोभमानया बुद्ध्या अथवा शोभनेन परिमाणेन [V]मीयमानः इयत्तया परिच्छिद्यमानस्त्वं [V]यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय [V]वर्चो [V]धाः अन्नं धेहि। अयमेवार्थो ब्राह्मणेन दर्शितः—'उच्छ्रयस्व वनस्पत इत्युच्छ्रीयमाणायाभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्। वर्ष्मन्पृथिव्या अधीत्येतद्वै वर्ष्म पृथिव्यै यत्र यूपमुन्मिन्वन्ति सुमितौ मीयमानो वर्चो धा यज्ञवाहस इत्याशिषमाशास्ते' (ऐ. ब्रा. २. २)॥ वनस्पते। अपादादित्वादाद्युदात्तमेकमनुदात्तत्वम्। पृथिव्याः। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम्। सुमितौ। 'माङ् माने' इत्यस्य क्तिनि 'व्यति-

१. त—आरे बाधमानः दूरे अपनुदंस्त्वम्। २. ख-ग-च-ज-ण-भ—उक्तार्थेयम्; न—उक्तार्थेऽपि। ३. त-ल—°वचनोद्वात्रादिभ्यः।

स्थतिमास्था° ' इतीकारादेशः । शोभना मितिः । ' तादौ च निति कृत्यतौ ' इति गतेः[1] प्रकृतिस्वरत्वम्[1] । ' सुपां सुलुक्° ' इति सवर्णदीर्घः । मीयमानः । ' माङ् माने ' इत्यस्य कर्मणि यक् । ' घुमास्था°[2] इतीत्वम्[2] । प्रत्ययस्वरः । धाः । धाञो लोडर्थे ' छन्दसि लुङ्लङ्° ' इति लुङ् । ' इतश्च ' इति सिप इकारलोपः । ' गातिस्था° ' इति सिचो लोपः । ' बहुलं छन्दसि ' इत्यडभावः[3] । निघातः । यज्ञवाहसे । यज्ञं वहति प्राप्नोति । ' वह प्रापणे ' इत्यस्य ' वहिहाधाञ्भ्यश्छन्दसि ' इत्यसुन् । ' णित् ' इत्यनुवृत्तेरुपधावृद्धिः । ' गतिकारकयोः ' इति पूर्वपदप्रकृतिस्वरत्वं च इति पूर्वपदप्रकृतिस्वरः[4] (उ. सू. ४ · ६६६) ॥

युवा॑ सु॒वासाः॑ परि॒वीत॒ आगा॑त्स उ॒ श्रेया॑न्भवति॒ जाय॑मानः ।
तं धी॒रासः॑ क॒वय॒ उन्न॑यन्ति स्वा॒ध्यो३॒ मन॑सा देव॒यन्तः॑ ॥ ४ ॥

युवा॑ । सु॒ऽवासाः॑ । परि॑ऽवीतः । आ । अगा॑त् । सः । ऊँ॒ इति॑ । श्रेया॑न् । भव॑ति । जाय॑मानः ।
तम् । धी॒रासः॑ । क॒वयः॑ । उत् । नय॑न्ति । सु॒ऽआ॒ध्यः॑ । मन॑सा । दे॒व॒ऽयन्तः॑ ॥ ४ ॥

[5]युवा दृढाङ्गः अष्टाश्र्यादिलक्षणलक्षितः[5] इत्यर्थः । [5]सुवासाः शोभनेन वाससा रशनया युक्तः । [5]परिवीतः तयापि वेष्टितः । एवंविधो यूपः [5]आगात् आगच्छति । [5]स [5]उ स एव यूपः [5]श्रेयान् [5]जायमानः सर्वेभ्यो वनस्पतिभ्य उत्कृष्टतया संपद्यमानः [5]भवति । [5]तम् एवंविधं यूपं [5]धीरासः प्राज्ञाः [5]मनसा [5]देवयन्तः देवान् कामयमानाः [5]स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः [5]कवयः क्रान्तदर्शिनोऽध्वर्यवादयः [5]उन्नयन्ति उन्नतं कुर्वन्ति । एतस्मिन्नर्थे ब्राह्मणं–' युवा सुवासाः परिवीत आगादित्युत्तमया परिदधाति प्राणो वै युवा सुवासाः सोऽयं शरीरैः परिवृतः स उ श्रेयान्भवति जायमान इति श्रेयाञ्छ्रेयान्ह्येष एतद्भवति जायमानस्तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति ये वा अनूचानास्ते कवयस्त एवैनं तदुन्नयन्ति ' (ऐ. ब्रा. २. २) इति ॥ युवा । यौतेः ' कनिन्युवृषितक्षि° ' इत्यादिना कनिन्प्रत्ययः । कित्त्वाद्गुणाभावः । उवङादेशः । नित्त्वादाद्युदात्तत्वम् । सुवासाः । ' वस आच्छादने ' । ' असुन् ' इत्यनुवृत्तौ ' वसेर्णित् ' इत्यसुन्प्रत्ययः । णित्त्वादुपधावृद्धिः । ' सोर्मनसी° ' इत्युत्तरपदाद्युदात्तत्वम् । परिवीतः । ' व्येञ् संवरणे ' । कर्मणि क्तः । यजादित्वान् संप्रसारणम् । ' गतिरनन्तरः ' इति पूर्वपदप्रकृतिस्वरत्वम् । अगात् । ' इण् गतौ ' इत्यस्य लुङि ' इणो गा लुङि ' इति गादेशः । ' गातिस्था° ' इति सिचो लोपः । अडागमः । श्रेयान् । ' प्रशस्यस्य द्विवचनविभज्योपपदे ' इतीयसुन्प्रत्ययः । तस्मिन् ' प्रशस्यस्य श्रः ' इति श्रादेशः । गुणः । नित्त्वादाद्युदात्तत्वम् । एकादेश आद्युदात्तः । स्वाध्यः । ' ध्यै चिन्तायाम् ' । स्वाङोरुपसर्गयोः प्राक्प्रयोगः । ' अन्येभ्योऽपि दृश्यते ' इति क्विप् । दृशिग्रहणात् संप्रसारणम् । ' संप्रसारणाच्च ' इति पूर्वरूपत्वम् । ' हलः ' इति दीर्घः । जसि ' एरनेकाचः° ' इति यणादेशः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ' उदात्तस्वरितयोर्यणः ' इति जसः स्वरितत्वम् । देवयन्तः । ' सुप आत्मनः क्यच् ' इति क्यचि नित्त्वादन्तोदात्तः ॥

---

१. ख-ग-ज-ण-न-भ–गतिप्रकृति° । २. ख-ग-च-ज-ण-न-भ–' घुमास्था° इतीत्वम् ' नास्ति । ३. ख-ग-च-ज-ण-न-भ–अडभावः । ४. त-ल–पूर्वपदस्वरः । ५. ल–अष्टास्यादिलक्षितः ।

जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥ ५ ॥

जातः । जायते । सुदिनऽत्वे । अह्नाम् । सऽमर्ये । आ । विदथे । वर्धमानः ।
पुनन्ति । धीराः । अपसः । मनीषा । देवऽयाः । विप्रः । उत् । इयर्ति । वाचम् ॥ ५ ॥

[v]जातः पृथिव्यां प्रथममुत्पन्नो यूपः [v]समर्ये । मर्यः[1] इति मनुष्यनाम । तैः सहिते [v]विदथे [v]वर्धमानः । विदथ इति यज्ञनाम ' विदथः सवनम् ' (नि. ३. १७. ५) इति यज्ञनामसु पाठात् । तस्मिन् यज्ञे [v]आ वर्धमानो घृताज्ञनरशनापरिव्ययणादिना सर्वतः शोभमानः सन् [v]अह्नां [v]सुदिनत्वे [v]जायते । पशुनियोजनादिद्वारेण यज्ञनिर्वाहकतया अहानि सुदिनानि करोतीत्यर्थः । [v]अपसः कर्मवन्तः [v]धीराः सुप्रज्ञाः[2] अध्वर्यवादयः [v]मनीषा बुद्ध्या तं यूपं [v]पुनन्ति प्रक्षालनादिभिः शोधयन्ति । [v]देवयाः देवानां यष्टा देवानां हवींषि प्रापयिता वा [v]विप्रः मेधावी होता च [v]वाचं यूपविषयां स्तुतिलक्षणां वाचम् [v]उदियर्ति प्रेरयति । उच्चारयतीत्यर्थः । उक्तार्थे ब्राह्मणं —' जातो जायते सुदिनत्वे अह्नामिति जातो ह्येष एतज्जायते समर्य आ विदथे वर्धमान इति वर्धयन्त्येवैनं तत्पुनन्ति धीरा अपसो मनीषेति पुनन्त्येवैनं तद्देवया विप्र उदियर्ति वाचमिति देवेभ्य एवैनं तन्निवेदयति ' (ऐ. ब्रा. २. २) ॥ सुदिनत्वे । सुदिनानां भाव इति ' तस्य भावस्त्वतलौ ' इति त्वः । प्रत्ययस्वरः । समर्ये । ' मृङ् प्राणत्यागे ' इत्यस्मात् ' छन्दसि निष्टर्क्य ' इति क्यप्रत्ययान्तत्वेन निपातनाद्गुणः । ' समासस्य ' इत्यन्तोदात्तत्वम् । पुनन्ति । ' पूङ् पवने ' । क्र्यादित्वात् श्ना । प्वादित्वात् ह्रस्वः । प्रत्ययस्वरः । देवयाः । ' या प्रापणे ' । ' आतो मनिन् ' इति क्विप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । इयर्ति । ' ऋ गतौ ' । जुहोत्यादिः । अभ्यासस्य ' अतिपिपर्त्योश्च ' इतीत्वे ' अभ्यासस्यासवर्णे ' इतीयङादेशः । निघातः[3] ॥ ॥ ३ ॥

यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥ ६ ॥

यान् । वः । नरः । देवऽयन्तः । निऽमिम्युः । वनस्पते । स्वऽधितिः । वा । ततक्ष ।
ते । देवासः । स्वरवः । तस्थिऽवांसः । प्रजाऽवत् । अस्मे इति । दिधिषन्तु । रत्नम् ॥ ६ ॥

हे यूपाः [v]देवयन्तः देवान् कामयमानाः [v]नरः कर्मणां नेतारोऽध्वर्यवादयः [v]यान्वः यान् युष्मान [v]निमिम्युः अवटेषु[4] प्रचिक्षिपुः । [v]वा अपि च हे [v]वनस्पते [v]स्वधितिः परशुस्त्वदीयान् यूपान [v]ततक्ष चिच्छेद । [v]देवासः दीप्यमानाः [v]स्वरवः । स्वरुशब्दः स्वशकलवाची[5]। तद्वन्तः। लुप्तमत्वर्थीयः । [v]तस्थिवांसः तिष्ठन्तः [v]ते तादृशा यूपाः [v]अस्मे अस्मै यजमानाय [v]प्रजावत् अपत्यसहितं [v]रत्नम

---

१. त–मर्याः । २. त–प्रज्ञानवन्तः । ३. ख-ग-च-ज-ण–निपातितः । ४. ख–अनदेषु; ग–अनन्देषु; च–आनन्देषु. ५. त-ल– सवनवाची; न–शकलवाची ।

उत्तमं धनं Vदिधिपन्तु धारयन्तु। प्रयच्छन्तित्यर्थः॥ निमिम्युः। 'डुमिञ् प्रक्षेपणे' इत्यस्य लिटयुसि 'अभ्यासाल्लिट् किन्' इति किद्भावाद्गुणाभावः। यदवृत्तयोगादनिघातः। 'सति शिष्टः स्वरो बलीयान्' इति वचनात् प्रत्ययस्वरः। स्वधितिः। स्वशब्दोपपदात् 'धि धारणे' इत्यस्मात् क्तिन्। स्वा स्वकीया निशितधारा धीयते प्रक्षिप्यतेऽनेनेति स्वधितिः खड्गः। ततक्ष। 'तक्षू त्वक्षू तनूकरणे' इत्यस्मालिटि णलि रूपादनिघातः। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। स्वरवः। 'स्वृ शब्दोपतापयोः' इत्यस्मात् 'नित्' इत्यनुवृत्तौ 'शॄस्वृस्निहित्रपि' इत्यादिना उप्रत्ययः। नित्त्वादाद्युदात्तः। तस्थिवांसः। 'ष्ठा गतिनिवृत्तौ' इत्यस्मात् छन्दसि लिट्। तस्य क्वसुः। 'वस्वेकाजाद्घसाम्' इतीडागमः। प्रत्ययस्वरः। प्रजावत्। 'जनी प्रादुर्भावे' इत्यस्मात् 'उपसर्गे च संज्ञायाम्' इति डः। ततष्टाप्। 'तदस्यास्ति' इति मतुप्। तस्य पित्त्वादनुदात्तत्वम्। एकादेशस्वरः[1]। अस्मे। अस्मच्छब्दस्य 'सुपां सुलुक्' इति शेआदेशः[2]। दिधिपन्तु। 'धिष[3] धारणे'। जुहोत्यादिः। निघातः॥

ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः॥ ७॥

ये। वृक्णासः। अधि। क्षमि। निऽमितासः। यतऽस्रुचः।
ते। नः। व्यन्तु। वार्यम्। देवऽत्रा। क्षेत्रऽसाधसः॥ ७॥

Vअधि Vक्षमि क्षमायां भूमौ Vवृक्णासः परशुना छिन्नाः Vये यूपाः। Vयतस्रुचः इति ऋत्विग्वाची 'यतस्रुवः मरुतः' (नि. ३. १८. ५) इति ऋत्विङ्नामसु पठितत्वात्। यताः स्रुचो यैस्ते यतस्रुचः। तैर्ऋत्विग्भिः Vनिमितासः अवटेषु नितरां प्रक्षिप्ताः Vक्षेत्रसाधसः क्षेत्रस्य यज्ञस्य साधकाः। यथा क्षेत्रं सस्यादिद्वारा फलं प्रयच्छति तथा यज्ञोऽप्यपूर्वद्वारा स्वर्गादिफलं ददातीति क्षेत्रम्। एवंविधाः Vते यूयाः Vनः अस्मदीयं Vवार्यं वरणीयं संभजनीयं हविः Vदेवत्रा देवेषु Vव्यन्तु गमयन्तु[4]। अस्मदीयं हविर्देवाधीनं कुर्वन्तित्यर्थः॥ वृक्णासः। 'ओव्रश्चू छेदने' इत्यस्य निष्ठायां 'यस्य विभाषा' इतीट्प्रतिषेधः। किरवात् 'ग्रहिज्यावयि' इत्यादिना संप्रसारणम्। 'ओदितश्च' इति निष्ठानत्वम्। क्षमि। 'आतो धातोः' इत्यत्र 'आतः' इति योगविभागात् आकारलोपः। निमितासः। 'डुमिञ् प्रक्षेपणे'। कर्मणि क्तः। 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम्। यतस्रुचः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः[5]। व्यन्तु। 'इण् गतौ' इत्यस्य लोटि रूपम्। इकारलोपश्छान्दसः। अयमन्तर्भावितण्यर्थः। वार्यम्। 'वृङ् संभक्तौ' इत्यस्मात् 'ऋहलोर्ण्यत्' इति कर्मणि ण्यत्। 'ईडवन्दवृशंसदुहः' इत्यादिना आद्युदात्तत्वम्[6]। देवत्रा। 'त्रा' इत्यनुवृत्तौ 'देवमनुष्यपुरुषपुरुमर्त्येभ्यः' इत्यादिना अधिकरणे त्राप्रत्ययः। क्षेत्रसाधसः। 'राध साध संसिद्धौ' इत्यस्मात् औणादिकोऽसुन्। कृदुत्तरपदप्रकृतिस्वरः॥

१. ख-ग-च-ज-ण-न-भ-एकादेशः स्वरः। २. त-शे इत्यादेशः। ३. ख-भ-धिषु। ४. ल-'गमयन्तु' नास्ति। ५. ख-ग-च-ज-ण-न-भ-पूर्वपदस्वरः; ल-प्रकृतिस्वरः। ६. ख-ग-च-ज-ण-न-भ-उदात्तत्वम्।

आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥ ८ ॥

आदित्याः । रुद्राः । वसवः । सुऽनीथाः । द्यावाक्षामा । पृथिवी । अन्तरिक्षम् ।
सऽजोषसः । यज्ञम् । अवन्तु । देवाः । ऊर्ध्वम् । कृण्वन्तु । अध्वरस्य । केतुम् ॥ ८ ॥

[v]सुनीथाः यज्ञस्य सुष्ठु नेतारः [v]आदित्याः द्वादशादित्याः [v]रुद्राः एकादश रुद्राः [v]वसवः अष्टौ वसवः । यद्वा सुष्ठुनीथाः सुष्ठुतयः । 'स्तुतशस्त्राणि नीथानि चोक्थामदानि च' (ऐ. ब्रा.२. ३८) इति हि श्रूयते । [v]द्यावाक्षामा द्यावापृथिव्यौ । [v]पृथिवी । सुव्यत्ययः । पृथु विस्तीर्णम् [v]अन्तरिक्षं च । [v]सजोषसः एते सर्वे [v]देवाः ऐकमत्येन परस्परं संगताः[1] भूत्वेमममदीयं [v]यज्ञमवन्तु रक्षन्तु । किंच [v]अध्वरस्य यज्ञस्य [v]केतुं ध्वजभूतं प्रज्ञापकं वा इमं यूपम् [v]ऊर्ध्वं [v]कृण्वन्तु उच्छ्रितं कुर्वन्तु ॥ आदित्याः । अदितेरपत्यानि । 'दित्यदित्यादित्यपत्युत्तरपदात्[o]' इति ण्यः । णित्त्वादादिवृद्धिः । प्रत्ययस्वरः । रुद्राः । रोदयन्ति सर्वानन्तकाले । 'रोदेर्णिलुक् च' इति रप्रत्ययः । तत्संनियोगे[2] णिलोपः । प्रत्ययस्वरः । जसः सुष्त्वादनुदात्तत्वे 'एकादेश उदात्तेनोदात्तः' इत्येकादेशस्याप्युदात्तत्वम् । वसवः । 'वस निवासे' । 'नित्' इत्यनुवृत्तौ 'शृस्वृस्निहित्रप्यसिवसि[o]' इत्यादिना उप्रत्ययः । नित्त्वादाद्युदात्तः । सुनीथाः । 'णीञ् प्रापणे' । 'हनिकुषिनीरमिकाशिभ्यः[o]' इति क्थन् । कित्त्वादगुणः । 'थाथघञ्क्त[o]' इत्युत्तरपदान्तोदात्तत्वम् । द्यावाक्षामा । द्यौश्च क्षामा[3] च । 'दिवो द्यावा' इति द्यावादेशः । 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम् । पृथिवी । 'प्रथ प्रख्याने' । 'प्रथेः षिवन् संप्रसारणं च' इति षिवन् संप्रसारणं च । 'षिद्गौरादिभ्यश्च' इति ङीप् । प्रत्ययस्वरेणान्तोदात्तः । अवन्तु । 'अव रक्षणे' । निघातः । कृण्वन्तु । 'कृवि हिंसाकरणयोः' इत्यस्माल्लोटि 'धिन्विकृण्व्योर च' इत्युप्रत्ययः । अकारश्चान्तादेशः । निघातः ॥

हंसाइव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥ ९ ॥

हंसाःऽइव । श्रेणिऽशः । यतानाः । शुक्राः । वसानाः । स्वरवः । नः । आ । अगुः ।
उत्ऽनीयमानाः । कविऽभिः । पुरस्तात् । देवाः । देवानाम् । अपि । यन्ति । पाथः ॥ ९ ॥

[v]शुक्रा शुक्राणि दीप्तानि रशनाख्यानि[4] वासांसि [v]वसानाः आच्छादयन्तः [v]स्वरवः स्वरुमन्तः [v]श्रेणिशः पङ्क्तिशः [v]यतानाः प्रवर्तमानाः । अत्र दृष्टान्तः । [v]हंसाइव इति । यथा नभसि पङ्क्तिशः पतन्तो हंसाः शोभन्ते तद्वत् शोभमानास्ते यूपाः [v]नः अस्मान् [v]आगुः प्रापुः । अपि च [v]कविभिः मेधाविभिरध्वर्यवादिभिः [v]पुरस्तात् आहवनीयपूर्वभागे[5] [v]उन्नीयमानाः उच्छ्रीयमाणाः [v]देवाः दीप्यमानास्ते यूपाः [v]देवानां [v]पाथः देवानां स्थानमन्तरिक्षम् । 'पाथोऽन्तरिक्षं पथा व्याख्यातम्'

१. ख-ग-घ-च-ज-ञ-ट-भ-संमताः । २. च-तत्संनियोगेन । ३. ग-च-भ-ल-क्षमा । ४. ञ-ल-'रशनाख्यानि' नास्ति । ५. ल-आहवनीयस्य पूर्वभागे ।

(निरु. ६. ७) इति यास्कः । ' पाथोनदीभ्यां ड्यण् ' (पा. सू. ४. ४. १११) इति सूत्रे ' पाथोऽन्तरिक्षम् ' इति वृत्तिकारोऽप्यवादीत् । तादृशमन्तरिक्षम् ᵛअपि ᵛयन्ति प्राप्नुवन्ति । अध्वर्य्वादिभिः उच्छ्रीयमाणा यूपा अतिदैर्घ्यादन्तरिक्षं व्याप्य वर्तन्त इत्यर्थः ॥ हंसाइव । ' इवेन विभक्त्यलोपः ' इति वचनात् पूर्वपदस्वरः । श्रेणिशः । ' बहुलार्थात्० ' इति शस् । प्रत्ययस्वरः । शुक्राः । ' शुच दीप्तौ ' इत्यस्मात् ' ऋत्रेन्द्राग्र० ' इत्यादिना रन्प्रत्ययान्तत्वेन निपातनादन्तोदात्तः । अगुः । ' इण् गतौ ' । अस्मात्लुङि रूपम् । निघातः ॥

शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥ १० ॥

शृङ्गाणिऽइव । इत् । शृङ्गिणाम् । सम् । ददृश्रे । चषालऽवन्तः । स्वरवः । पृथिव्याम् ।
वाघत्ऽभिः । वा । विऽहवे । श्रोषमाणाः । अस्मान् । अवन्तु । पृतनाज्येषु ॥ १० ॥

ᵛस्वरवः स्वरुमन्तः ᵛचषालवन्तः प्रतिमुक्तकटकाः[1] । एवंविधा यूपाः ᵛपृथिव्यां ᵛशृङ्गिणां महिषादीनां ᵛशृङ्गाणीवेत् विषाणानीव ᵛसं ᵛददृश्रे सम्यक् दृश्यन्ते एव । ᵛवा अपि च ᵛविहवे । विविधं हूयन्ते हवींष्यत्रेति विहवो यज्ञः । तस्मिन् यज्ञे ᵛवाघद्भिः ऋत्विग्भिः । ' वाघतः वृक्तबर्हिषः ' (नि. ३. १८. ३) इति ऋत्विङ्नामसु पाठात् । ᵛश्रोषमाणाः तैः क्रियमाणं स्तुतिलक्षणं शब्दं शृण्वन्तः । तादृशा यूपाः ᵛपृतनाज्येषु । पृतनाज्यशब्दः संग्रामवाची । ' आजौ पृतनाज्यम् ' (नि. २. १७. ९) इति संग्रामनामसु पठितत्वात् । पृतनाज्येषु संग्रामेषु । वधस्थलेष्विति यावत् । ᵛअस्मान् यजमानान् ᵛअवन्तु रक्षन्तु ॥ शृङ्गाणि । ' शृ हिंसायाम् ' इत्यस्मात् ' शृणातेर्ह्रस्वश्च ' (उ. सू. १. १२३) इति गन् नुडागमो धातोर्ह्रस्वश्च । निस्वरः । ददृश्रे । ' छन्दसि लुङ्लङ्लिटः ' इति लङर्थे[2] लिट् । ' इरयो रे ' इतीरेचो रे इत्यादेशः । निघातः[3] ॥

वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥ ११ ॥

वनस्पते । शतऽवल्शः । वि । रोह । सहस्रऽवल्शाः । वि । वयम् । रुहेम ।
यम् । त्वाम् । अयम् । स्वऽधितिः । तेजमानः । प्रऽनिनाय । महते । सौभगाय ॥ ११ ॥

हे ᵛवनस्पते छिन्नमूल[4] स्थाणो ᵛशतवल्शः शतशाखः सन् ᵛवि ᵛरोह विशेषेण प्रादुर्भूतो भव । ᵛवयम् अपि ᵛसहस्रवल्शाः पुत्रपौत्रादिसंतानपरंपरया[5] सहस्रशाखाः सन्तः ᵛवि ᵛरुहेम विशेषेण प्रादुर्भूता भवेम । ᵛतेजमानः निशितधारः ᵛअयं ᵛस्वधितिः परशुः हे स्थाणो ᵛयं ᵛत्वां ᵛमहते

१. ख-ग-च-ज-फ-ᵒकटाः; ण-ᵒकण्टकाः; न-प्रमुक्तकण्टकाः । २. ख-ग-ज-ण-न-भ-लङर्थे; च-लुङर्थे; ल-लिङर्थे । ३. ख-ग-च-ज-ण-न-भ-' निघातः' नास्ति । ४. घ-प-छिन्नयूपमूल । ५. ख-ग-घ-च-ज-ण-फ-भ-' पुत्र...परंपरया ' नास्ति ।

[v]सौभगाय महासौभाग्यं बहुशाग्स्वलक्षणं [v]प्रणिनाय प्रकर्षेण प्रापयामास ॥ सहस्रवल्शाः । सहस्र-शब्दः कर्दमादित्वान्मध्योदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः[1]। रुहेम । ' रुह प्रादुर्भावे ' इत्यस्मात् आशीर्लिङि ' किदाशिषि ' इति यासुडागमः । ' स्कोः संयोगाद्योः[2] ' इति[2] सलोपः । ' लिङ्या-शिष्यङ् ' इत्यङ्प्रत्ययः । ' अतो येयः ' इति इयादेशः । ' लोपो व्योर्वलि ' इति यलोपः । गुणः[3]। प्रणिनाय । ' णीञ् प्रापणे ' इत्यस्माल्लिटि णलि रूपम् । पादादित्वादनिघातः । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् ॥ ॥ ४ ॥

' सखायस्त्वा ' इति नवर्चं नवमं सूक्तं वैश्वामित्रम्[4]। अत्रेयमनुक्रमणिका—' सखायो नव बार्हतं त्रिष्टुबन्तम् ' इति । अन्त्या त्रिष्टुप् । शिष्टा अष्टौ बृहत्यः । प्रातरनुवाकाश्विनशस्त्रयोर्बार्हते छन्दस्यस्य सूक्तस्य विनियोगः । ' अथैतस्याः ' इति खण्डे सूत्रितं—' सखायस्त्वायमग्निग्म आ याहि ' (आश्व. श्रौ. ४. १३) इति ॥

सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥ १ ॥

सखायः । त्वा । ववृमहे । देवम् । मर्तासः । ऊतये ।
अपाम् । नपातम् । सुऽभगम् । सुऽदीदितिम् । सुऽप्रतूर्तिम् । अनेहसम् ॥ १ ॥

विश्वामित्रः[5] स्तौति[6]। हे अग्ने [v]सखायः सोमाज्यादिहविष्प्रदानेनोपकारकत्वान्मित्राणि [v]मर्तासः मनुष्या ऋत्विजो वयम् [v]अपां [v]नपातम् अपां नप्तारं [v]सुभगं शोभनधनयुक्तं [v]सुदीदितिं शोभन-दीप्तिं [v]सुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिः सुखेन गन्तव्यम् [v]अनेहसम् उपद्रवरहितम् एतादृशं [v]देवं [v]त्वा[6] त्वाम् [v]ऊतये रक्षणाय [v]ववृमहे वृणीमहे ॥ सखायः । ' ख्या प्रकथने '। ' समाने ख्यश्रोदात्तः ' इति समान उपपदे ' डित् ' इत्यनुवृत्तौ ख्यातेरिण् । तस्य डित्त्वाट्टिलोपः। तत्संनियोगेन यलोपः । ' समानस्य छन्दस्यमूर्ध० ' इति सभावः । उपपदस्योदात्तत्वम् । ' णित् ' इत्यनुवृत्तौ ' सत्यु्रसंबुद्धौ ' (पा. सू. ७. १. ९२) इति णिद्भावः । वृद्धयायादेशौ । आद्युदात्तः । ववृमहे । ' वृङ् संभक्तौ '। ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । ऋदित्वादिडभावः । निघातः । ऊतये । ' अव रक्षणे ' इत्यस्य ' उदात्त० ' इत्यनुवृत्तौ ' ऊतियूति० ' इत्यादिना क्तिन्नन्तत्वेन निपातनादन्तोदात्तः । अपाम् । ' ऊडिदम्० ' इति विभक्तेरुदात्तत्वम् । सुभगम् । ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । सुप्रतूर्तिम् । ' ऋत्वादयश्च ' इत्युत्तरपदाद्युदात्तत्वम् ॥

कार्यमानो वना त्वं यन्मातुरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥ २ ॥

कार्यमानः । वना । त्वम् । यत् । मातुः । अजगन् । अपः ।
न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनम् । यत् । दूरे । सन् । इह । अभवः ॥ २ ॥

---

१. त–°स्वरत्वम् । २. ल–' संयोगेति° '। ३. त–' गुणः ' नास्ति । ४. स–वैश्वामित्रस्यार्षम् । ५. घ-प–' विश्वामित्रः स्तौति ' नास्ति । ६. ग-च-न-ल-स–' त्वा ' नास्ति ।

हे [v]अग्ने [v]वना काननानि[1] [v]कायमानः कामयमानः [v]त्वं [v]यत् यस्मात्कारणात् तानि विहाय [v]मातृः [v]अपः मातृभूता अपः [v]अजगन् अगमः गतवानसि । अप्सु प्रविष्टत्वाच्छान्तो वर्तसे । [v]तत् तस्मात् [v]ते तव [v]निवर्तनं नितरां तत्रैव वर्तनम् । तेन च विनाशो लक्ष्यते । स विनाशः [v]न [v]प्रमृषे न प्रमृष्यते न सह्यते । कुत इत्यत आह । [v]यत् यस्मात्कारणात् [v]दूरे [v]सन् अदृश्यतया वर्तमानस्त्वम् [v]इह अस्मत्संबन्धिषु अरणिरूपेषु काष्ठेषु [v]अभवः । मन्थनात् क्षणमात्रेणास्माकं समीपे भवसि। तस्मात्तव दूरतो वर्तनम्[2] अस्मभ्यं[3] न रोचते । अस्मिन्नर्थे यास्कः–'कायमानश्चायमानः कामयमान इति वा । वनानि त्वं यन्मातृरपोऽगम उपशाम्यन्। न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः' (निरु. ४. १४) इति ॥ कायमानः । ' कमु कान्तौ ' । कर्मणिङ् । लटः शानच् । मकारलोपश्छान्दसः । अजगन् । ' गमॢ गतौ ' इत्यस्य लङि ' बहुलं छन्दसि ' इति शपः श्लुः । हल्ङ्यादिना सिलोपः । ' मो नो धातोः ' इति नकारः । यच्छब्दयोगादनिघातः । अडागमस्वरः । प्रमृषे । ' मृष तितिक्षायाम् ' । व्यत्ययेन कर्मणि तप्रत्ययः । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । धातुस्वरः । अभवः । ' छन्दसि लुङ्लङ्लिटः ' इति लडर्थे लङ् । यद्योगादनिघातः ॥

अतिं तृष्टिं ववक्षिथाथैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः ॥ ३ ॥

अतिं । तृष्टिम् । ववक्षिथ । अथ । एव । सुऽमनाः । असि ।
प्रऽप्र । अन्ये । यन्ति । परि । अन्ये । आसते । येषाम् । सख्ये । असि । श्रितः ॥ ३ ॥

हे अग्ने [v]तृष्टिं स्तोतुस्तृष्णाभिलाषं तदुचितफलप्रदानेन[4] सफलं कर्तुम् [v]अति [v]ववक्षिथ अतिशयेन वोढुमिच्छसि । [v]अथैव अथापि त्वं [v]सुमना [v]असि संतुष्टमनस्को वर्तसे । किंच त्वं [v]येषां षोडशानामृत्विजां [v]सख्ये मित्रत्वे[5] [v]श्रितः [v]असि वर्तसे तेषां मध्ये [v]अन्ये अध्वर्युप्रभृतयो द्वादशर्त्विजः [v]प्र[6] [v]यन्ति प्रकर्षेण होतुं गच्छन्ति । [v]अन्ये उद्गातृप्रभृतयश्चत्वारः [v]परि [v]आसते परित आसीना वर्तन्ते ॥ ववक्षिथ । ' वह प्रापणे ' इत्यस्य सनि रूपम् । अभ्यासस्य ' सन्यतः ' इतीत्वाभावश्छान्दसः । तदन्ताद्वर्तमाने लिट् । थलः ' आर्धधातुकस्येड्वलादेः ' इतीट् । ' कास्प्रत्ययादाम्° ' इत्याम् न भवति मन्त्रत्वात् । निघातः । प्रप्र । ' प्रसमुपोद° ' इति द्विर्वचनम् । यन्ति । ' इण् गतौ ' इत्यस्य लटि रूपम् । ' एकान्याभ्यां समर्थाभ्याम् ' इत्यन्यशब्दयोगात् पूर्वस्य निघाताभावः । आसते । ' आस उपवेशने ' । उत्तरत्वान्निघातः । असि । ' अस भुवि ' । ' तासस्त्योर्लोपः ' इति सकारलोपः । यद्वृत्तयोगान्न निहन्यते ॥

ईयिवांसमति स्रिधः शश्वतीरति सश्चतः ।
अन्वींमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम् ॥ ४ ॥

ईयिऽवांसम् । अति । स्रिधः । शश्वतीः । अति । सश्चतः ।
अनु । ईम् । अविन्दन् । निऽचिरासः । अद्रुहः । अप्ऽसु । सिंहम्ऽइव । श्रितम् ॥ ४ ॥

---

१. घ-ज-ण-त-प-ल-काननानि रक्षितुम्; न–काननानि रक्षन्तुम् । २. ण-त-स–वर्तमानम् । ३. ल–मह्यम् । ४. त–उचित° । ५. घ–मैत्र्ये; स–मैत्रे । ६. घ-प–प्रप्र ।

हे अग्ने [v]अद्रुहः अद्रोग्धारः [v]निचिरासः नितरां[1] चिरासः चिरंतनाः विश्वे देवाः [v]स्निधः शोषकान्छत्रून् बलेनातिक्रम्य[2] [v]ईयिवांसं गच्छन्तं [v]शश्वतीः बह्वीः [v]सश्चतः संगतिकारिणीः सेनाश्च [v]अति अतिक्रम्य गच्छन्तम् [v]अप्सु [v]श्रितं तिरोहितम् अत एव [v]सिंहमिव गुहाप्रविष्टं सिंहमिव भीमम् [v]ईम् एनं त्वाम् [v]अनु [v]अविन्दन् अनुगम्यालभन्त ॥ ईयिवांसम् । 'इण् गतौ' इत्यस्य क्वसौ 'उपेयिवाननाश्वाननूचानश्च' (पा. सू. ३. २. १०९) इति निपातितः। प्रत्ययस्वरः । स्निधः । स्निधेः क्षयार्थस्य शोषणार्थस्य वा 'क्विप् च' इति क्विप् । धातुस्वरः । सश्चतः । 'षस्ज गतौ' । जकारस्य व्यत्ययेन चकारः । लटः शत्रादेशः । प्रत्ययस्वरः । अविन्दन् । 'विदृ लाभे' इत्यस्य लङि रूपम् । निचिरासः । नितरां चिराः । 'आजसेरसुक्' इत्यसुक् । समासस्वरः । अद्रुहः । 'द्रुह जिघांसायाम्' । संपदादिष्वाद्भावे क्विप् । बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । श्रितम् । 'श्रिञ् सेवायाम्' इत्यस्य 'श्रयुकः किति' इतीट्प्रतिषेधः । प्रत्ययस्वरः[3] ॥

ससृवांसमिव त्मनाग्निमित्था तिरोहितम् ।
ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥ ५ ॥

ससृवांसम्ऽइव । त्मना । अग्निम् । इत्था । तिरःऽहितम् ।
आ । एनम् । नयत् । मातरिश्वा । पराऽवतः । देवेभ्यः । मथितम् । परि ॥ ५ ॥

[v]मातरिश्वा वायुः [v]इत्था इत्थं [v]त्मना स्वेच्छयाप्सु प्रवेशेन [v]तिरोहितं निलीनं [v]परि परितः [v]मथितं मन्थनेन[4] निष्पादितम् [v]एनम् [v]अग्निं [v]देवेभ्यः । तादर्थ्ये चतुर्थी । देवार्थं [v]परावतः दूरदेशात् [v]आ[v] नयत् आनीतवान् । तत्र दृष्टान्तः । [v]ससृवांसमिव । यथा स्वाच्छन्द्येन[5] ससृवांसं सरन्तं गच्छन्तं पुत्रं पिता बलादानयति तद्वत् ॥ ससृवांसमिव । 'सृ गतौ' इत्यस्माल्लिट् । तस्य क्वसुः । 'इवेन विभक्त्यलोपः' इत्युक्तत्वात्प्रत्ययस्वरः । त्मना । आत्मनूशब्दस्य 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः । इत्था । 'था हेतौ च छन्दसि' इति व्यत्ययेन थाप्रत्ययः । प्रत्ययस्वरः । एनम् । अन्वादेशे 'द्वितीयाटौःस्वेनः' इत्येनादेशः । अनुदात्तश्च । नयत् । 'णीञ् प्रापणे' इत्यस्य लङि रूपम् । अडभावश्छान्दसः । मातरिश्वा । मातर्यन्तरिक्षे श्वसिति इति[6] 'श्वसृक्षन्०' इत्यादिना निपातितः ॥ ॥५॥

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ६ ॥

तम् । त्वा । मर्ताः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन ।
विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव । क्रत्वा । यविष्ठ्य ॥ ६ ॥

१. प-निरन्तरम् । २. ल-अति बलेनाभिक्रम्य । ३. ख-ग-च-ज-ण-'प्रत्ययस्वरः' नास्ति । ४. घ-मथनेन । ५. घ-स्वच्छन्देन । ६ त-'इति' नास्ति ।

हे[1] vहव्यवाहन हव्यानां वोढर्हे अग्ने vमर्ताः मनुष्या अध्वर्युप्रभृतयः vतं तादृशमप्सु तिरोहितं vत्वा त्वां vदेवेभ्यः यष्टव्यदेवतार्थम् vअगृभ्णत अगृह्णत । vमानुष मनुष्याणां हितकारिन् vयविष्ठ युवतम[2] हे अग्ने vतव vक्रत्वा तव कर्मणा माहात्म्येन vविश्वान् सर्वानस्माभिः क्रियमाणान् vयज्ञान् vयत् यस्मात्कारणात् vअभिपासि सर्वतः पालयसि तस्मात्त्वामगृभ्णत इति पूर्वत्रान्वयः[3] ॥ अगृभ्णत । ' ग्रह उपादाने ' । क्र्यादित्वात् श्ना । ' ग्रहिज्यावयि° ' इति संप्रसारणम् । ' हृग्रहोर्भ-श्छन्दसि ' इति हकारस्य भकारः । ' तिङ्तिङः ' इति निघातः । हव्यवाहन । ' वह प्रापणे ' इति धातोः ' ण्युट् ' इत्यनुवृत्तौ ' हव्येऽनन्तःपादम् ' इति ण्युट् । उपधावृद्धिः । योरनादेशः । अपादादित्वादाद्युदात्तत्वम् । विश्वान् । ' विश प्रवेशने ' इत्यस्मात् ' अशिप्रुषिलटिरणि-कणिखटिविशिभ्यः क्वन् ' इति क्वन् । कित्त्वादुणाभावः । निरवादाद्युदात्तत्वम् । अभिपासि । ' पा रक्षणे ' अस्य धातोः रक्षणार्थत्वान्न पिबादेशः । यच्छब्दयोगान्न निघातः । धातुस्वरः । क्रत्वा । टा[4] । ' जसादयश्छन्दसि विकल्प्यन्ते ' इति अत्र नादेशाभावः । यणादेशः । प्रत्ययस्वरः । यविष्ठ । युवशब्दात् ' अतिशायने तमबिष्ठनौ ' इतीष्ठन् । ' स्थूलदूरयुव° ' इति यणादि परं लुप्यते पूर्वस्य च गुणः । वस्वादित्वात्[5] स्वार्थिको यप्रत्ययः ॥

तद्भद्रं तवं दंसना पाकांय चिच्छदयति ।
त्वां यदंग्ने पशवंः समासंते समिद्धमपिशर्वरे ॥ ७ ॥

तत् । भद्रम् । तवं । दंसना । पाकांय । चित् । छदयति ।
त्वाम् । यत् । अग्ने । पशवंः । सम्ऽआसंते । सम्ऽईद्धम् । अपिऽशर्वरे ॥ ७ ॥

हे vअग्ने vतव संबन्धि vतत् इदं vभद्रं शोभनं vदंसना अग्निहोत्रादिकं कर्म vपाकाय vचित् । चिच्छब्दोऽप्यर्थे । पाकायेति कर्मणि चतुर्थी । पाकोऽर्भकः । तद्वदज्ञमपि यजमानं vछदयति[6] स्वफलप्रदानेन पूजयति । पशुपुत्रादिभिः परिवृतं करोतीत्यर्थः । छदयतिशब्दः अर्चतिकर्मा[7] ' छन्दयति छदयति ' इति तन्नामसु पाठात् । यद्वा । पाकशब्दः प्रशस्य[8] वक्ति[8] ' पाकः वामः ' (नि. ३. ८. ८) इति प्रशस्यनामसु पठितत्वात् । तद्भद्रं[9] प्रशस्यं यजमानमभिमत-फलप्रदानेन[10] पूजयतीत्यर्थः[11] । vयत्[12] यस्मात्कारणात् vअपिशर्वरे शर्वरीमुखेऽग्निविहरणकाल एव vसमिद्धं[13] दीप्यमानं vत्वां vपशवः द्विपदाश्चतुष्पदाश्चोभये पशवः vसमासते सम्यगासते[14] पर्युपासते इत्यर्थः। तदिदं पश्वादिलक्षणं फलं यजमानाय प्रयच्छतीत्यर्थः॥ भद्रम् । ' भदि कल्याणे ' इत्यस्माद्धातोः उपरि[15] रक्प्रत्ययेन[15] निपातनादन्तोदात्तत्वम् । पाकाय । ' पा रक्षणे ' इत्यस्मात् ' इण्भीकापाशलि° ' इत्यादिना कन् । पायते रक्ष्यते राजादिना[16] इति पाकः । निरवादाद्युदात्तः । छदयति । ' छद अप-वारणे ' । स्वार्थे णिच् । अदन्तत्वात् वृद्ध्यभावः । निघातः । समासते । ' आस उपवेशने ' ।

---

१. त–' हे ' नास्ति । २. च–युवत्तम ; ल–युवन् । ३. ल–पूर्वेणान्वयः । ४. त–' टा ' नास्ति । ५. ख-ग-च-ज-ण-न-भ–शाखादित्वात् । ६. ख-ग-च-ज-ण-त–छन्दयति । ७. ख-ग-च-ज-ण–अर्चयतिकर्मा । ८. ल–प्रशस्यवाच (?) क्रियावाचकः । ९. ल–तद्भद्रं कर्म । १०. ल–°फलदानेन । ११. ख-ग-च-ज-ण-फ-भ–पूजयति पशुपुत्रादिभिः परिवृतं करोतीत्यर्थः । १२. ख-ग-च-ज-ण-त-न-भ–' यत् ' नास्ति । १३. ख-ग-च-ज-ण-भ–यत् यं समिद्धम् । १४. ख-ग-च-ज-ण-भ–' सम्यगासते ' नास्ति । १५. ख-ग-च-ज-ण-न-भ–रक्प्रत्यये । १६. ख-ग-च-ज-ण–राजादिभिः ।

अदादित्वाच्छपो लुक् । अनकारान्तत्वात् झस्यादादेशः । यद्योगादनिघातः । ' तिङि चोदात्तवति ' इति गतेर्निघातः । धातुस्वरः ॥

आ जुहोता स्वध्वरं शीरं पावकशोचिषम् ।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥ ८ ॥

आ । जुहोत । सुऽअध्वरम् । शीरम् । पावकऽशोचिषम् ।
आशुम् । दूतम् । अजिरम् । प्रत्नम् । ईड्यम् । श्रुष्टी । देवम् । सपर्यत ॥ ८ ॥

ऋत्विजो यजमानः प्रेरयति । हे ऋत्विजः [V]पावकशोचिषं शोधकदीप्तिं [V]शीरं काष्ठेष्वोषधीषु चानुशायिनं [V]स्वध्वरं शोभनयज्ञोपेतमिममग्निम् [V]आ [V]जुहोत आहुतिभिः आ समन्तात्तर्पयत । अपि च [V]आशुं कर्मणि व्याप्तं [V]दूतम् आह्वानकारित्वेन देवानां दूतम् [V]अजिरं क्षिप्रं गन्तारं [V]प्रत्नं पुरातनम् [V]ईड्यं स्तोतव्यं [V]देवं द्योतमानमिममग्निं [V]श्रुष्टी [V]सपर्यत । ' श्रुष्टीति क्षिप्रनाम ' इति यास्कः । क्षिप्रं पूजयत ॥ जुहोत । ' हु दानादनयोः ' । अस्माद्धातोर्लोट् । ' जुहोत्यादिभ्यः श्लुः ' इति शपः श्लुः । ' श्लौ ' इति द्विर्वचनम् । ' लोटो लङ्वत् ' इति लङ्वद्भावे ' तस्थस्थमिपाम् ' इति थस्य तादेशः । ' छन्दसि ' इत्यनुवृत्तौ तस्य ' तप्तनप्तनथनाश्च ' इति तबादेशः । पित्त्वादनुदात्तः । निघातः । स्वध्वरम् । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । शीरम् । ' शीङ् स्वप्ने ' । अस्माद्धातोः ' स्फायितञ्चिवञ्चि ' इत्यादिना रक्प्रत्ययः । किच्चादनुदात्तत्वम् । प्रत्ययस्वरः । पावकशोचिषमित्यत्र पवनं पावः शुद्धिः । तं करोतीति पावकः । ' आतोऽनुपसर्गे कः ' । प्रत्ययस्वरः । ' बहुव्रीहौ प्रकृत्या पूर्वपदम् ' इति पूर्वपदप्रकृतिस्वरत्वम् । आशुम् । ' अशू व्याप्तौ ' अस्माद्धातोः ' कृवापाजिमि ' इत्यादिना उण् । उपधावृद्धिः । प्रत्ययस्वरः । अजिरम् । ' अज गतिक्षेपणयोः ' इत्यस्माद्धातोः ' अजिरशिशिरशिथिल ' इति किरच्प्रत्ययान्तत्वेन निपातनादन्तोदात्तत्वम् । प्रत्नम् । ' पुराणस्य छन्दसि गलोपश्च ' (का. ४. ३. २३. २) इति गलोपः । चकारात् त्नप्रत्ययः[1] । प्रत्ययस्वरः । ईड्यम् । ' ईड स्तुतौ ' । अस्माण्यत्[2] । ' ईडवन्द ' इत्यादिनाद्युदात्तत्वम् । सपर्यत । सपरशब्दात् 'कण्ड्वादिभ्यो यक्' पूजायां वर्तते । लोण्मध्यमपुरुषबहुवचनम् । शप् । ' अतो गुणे ' इति पूर्वरूपत्वम् । निघातः ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ९ ॥

त्रीणि । शता । त्री । सहस्राणि । अग्निम् । त्रिंशत् । च । देवाः । नव । च । असपर्यन् ।
औक्षन् । घृतैः । अस्तृणन् । बर्हिः । अस्मै । आत् । इत् । होतारम् । नि । असादयन्त ॥ ९ ॥

---

१. ख-ग-च-ज-ण-न-भ-अजप्रत्ययः । २. ख-ग-च-ज-ण-न-भ-' अस्माण्यत् ' नास्ति ।

[v]त्रीणि [v]शता त्रीणि शतानि [v]त्री [v]सहस्राणि त्रीणि सहस्राणि [v]त्रिंशच्च [v]नव [v]च एकोनचत्वारिंशदधिकशतत्रयोपेतत्रिसहस्रसंख्याकाः [v]देवाः इमम् [v]अग्निम् [v]असपर्यन् अपूजयन् । किंच ते देवाः [v]घृतैः इममग्निम् [v]औक्षन् असिञ्चन् । तथा [v]अस्मै अग्नये तदर्थं [v]बर्हिः [v]अस्तृणन् । बर्हिषास्तरणं वेद्याच्छादनमकुर्वन् । [v]आदित् अनन्तरमेव ते देवास्तस्मिन्बर्हिषि एनमग्निं [v]होतारं कृत्वा [v]न्यसादयन्त उपावेशयन् । देवैः पूज्यमिममग्निं सपर्यतेति पूर्वेणान्वयः । देवसंख्या च बृहदारण्यकेऽभिहिता– ' महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति । कतमे ते त्रयस्त्रिंशदष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशौ ' (बृ. आ. ३.९) इति ॥ शता । दशानां दशतां शभावस्तश्च प्रत्ययः । दश दशतः परिमाणमेषां शतानि । ' सुपां सुलुक्° ' इत्यादिना सुपो डादेशः । प्रत्ययस्वरः । त्री । ' सुपां सुलुक्° ' इति पूर्वसवर्णदीर्घः । फिट्स्वरः । सहस्राणि । कर्दमादित्वान्मध्योदात्तः । त्रिंशत् । त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः । त्रयो दशतः परिमाणमस्य त्रिंशत्[1] । प्रत्ययस्वरः । नव । ' कनिन् ' इत्यनुवृत्तौ ' णु स्तुतौ ' इत्यस्माद्धातोः ' णुदंशोर्नुदश्च ' इति कनिन् । गुणश्च । नित्त्वादाद्युदात्तः । असपर्यन् । लङि रूपम् । निघातः । औक्षन् । ' उक्ष सेचने ' । लङि[2] ' आडजादीनाम् ' इत्याडागमः । वृद्धिः । पादादित्वान्न निहन्यते । आगमस्वरः । अस्तृणन् । ' स्तृञ् आच्छादने ' । लङि[3] बहुवचने झेरन्तादेशः । ' नित्यं ङितः ' इतीकारलोपः । संयोगान्तलोपः । ' झोऽन्तः ' इत्याकारलोपः । ' लुङ्लङ्लृङ्क्ष्वद्° ' इत्यडागमः । स चोदात्तः । आगमस्वरः । भिन्नवाक्यत्वान्निघाताभावः । बर्हिः । ' इसिः ' इत्यनुवृत्तौ ' बृंहेर्नलोपश्च ' इतीसिः । तत्संनियोगेन नलोपः । प्रत्ययस्वरः । असादयन्त । ' षदॢ विशरणगत्यवसादनेषु ' । अस्मात् ' हेतुमति च ' इति णिच् । उपधावृद्धिः । ' णिचश्च ' इत्यात्मनेपदम् । लङि बहुवचने रूपम् । निघातः ॥ ॥ ६ ॥

' त्वामग्ने ' इति नवर्चं दशमं सूक्तं वैश्वामित्रमौष्णिहमाग्नेयम् । ' त्वामग्न औष्णिहम् ' इत्यनुक्रान्तत्वात् । प्रातरनुवाकाश्विनशस्त्रयोरौष्णिहे छन्दस्यस्य सूक्तस्य विनियोगः । ' अथैतस्याः ' इति खण्डे सूत्रितं–' पुरु त्वा त्वामग्ने ' (आश्व. श्रौ. ४. १३) इति ॥

त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम् । देवं मर्तास इन्धते समध्वरे ॥ १ ॥

त्वाम् । अग्ने । मनीषिणः । सम्ऽराजम् । चर्षणीनाम् ।

देवम् । मर्तासः । इन्धते । सम् । अध्वरे ॥ १ ॥

हे [v]अग्ने [v]मनीषिणः धीमन्तोऽध्वर्युप्रभृतयः [v]मर्तासः मनुष्याः [v]चर्षणीनां प्रजानां [v]सम्राजम् अधिपतिं [v]देवं द्योतमानं [v]त्वाम् [v]अध्वरे यज्ञे [v]सम् [v]इन्धते सोमाज्यपयःप्रभृतिभिराहुतिभिः सम्यक् दीपयन्ति ॥ मनीषिणः । मनीषैषामस्तीति ' व्रीह्यादिभ्यश्च ' इति इनिः । ' यस्येति च ' इत्यवर्णलोपः । प्रत्ययस्वरः । सम्राजम् । ' राजृ दीप्तौ ' । संपूर्वादस्माद्धातोः ' सरूपसूपि° ' इति क्विप् । क्विलोपः । समो मकारस्य ' मोऽनुस्वारः ' इत्यनुस्वारे प्राप्ते ' मो राजि समः क्वौ ' इति समो मकारः । कृदुत्तरपदप्रकृतिस्वरत्वम् । चर्षणीनाम् । ' नामन्यतरस्याम् ' इति विभक्तेरुदात्तत्वम् । इन्धते । ' त्रिइन्धी दीप्तौ ' । अस्माद्धातोः ' हेतुमति च ' इति णिच् । लटि झस्य ' आत्मने-

१. त–तात्त्रिंशत् । २. च–' लङि ' नास्ति; न–लङि रूपम् ।

पदेष्वनतः ' इत्यदादेशः । ' छन्दस्युभयथा ' इति श्नस्यार्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । निघातः ॥

त्वां यज्ञेष्वृत्विजमग्ने होतारमीळते । गोपा ऋतस्य दीदिहि स्वे दमे ॥ २ ॥

त्वाम् । यज्ञेषु । ऋत्विजम् । अग्ने । होतारम् । ईळते ।

गोपाः । ऋतस्य । दीदिहि । स्वे । दमे ॥ २ ॥

हे Vअग्ने अध्वर्यवादयः Vयज्ञेषु अग्निष्टोमादिषु Vत्वां Vहोतारम् Vऋत्विजं होतृनामकमृत्विजम् Vईळते स्तुवन्ति । तादृशस्त्वम् Vऋतस्य सत्यस्य यज्ञस्य Vगोपाः गोपायिता सन् Vस्वे Vदमे स्वकीये गृहे यज्ञशालायां Vदीदिहि दीप्यस्व ॥ दीदिहि । दिवु क्रीडादौ । यङ्लुक् । लोट् । तुजादित्वादभ्यासदीर्घत्वम् । ' संज्ञापूर्वको विधिरनित्यः ' (परिभा. ९३) इत्यभ्यासस्य गुणाभावे[1] ' लोपो व्योर्वलि ' इति वलोपः ॥

स घा यस्ते ददाशति समिधा जातवेदसे । सो अग्ने धत्ते सुवीर्यं स पुष्यति॥३॥

सः । घ । यः । ते । ददाशति । सम्ऽइधा । जातवेदसे ।

सः । अग्ने । धत्ते । सुऽवीर्यम् । सः । पुष्यति ॥ ३ ॥

हे Vअग्ने Vयः यजमानः Vजातवेदसे जातप्रज्ञाय Vते तुभ्यं Vसमिधा समिन्धनकारीण्याज्यपुरोडाशादिहवींषि Vददाशति ददाति Vस Vघ स खलु Vसुवीर्यं शोभनसामर्थ्योपेतं पुत्रं Vधत्ते धारयति । अपि च Vसः स एव Vपुष्यति पशुपुत्रादिभिः समृद्धो भवति ॥ घ । ' चादयोऽनुदात्ताः ' इत्यनुदात्तः । ददाशति । ' दाश्र दाने ' इत्यस्माद्धातोः कर्तरि शप् । तिप्[2] । द्विर्वचनं छान्दसम् । यदवृत्तयोगादनिघातः । ' अभ्यस्तानामादिः ' इत्युदात्तः । समिधा । ' जिइन्धी दीप्तौ ' । अस्मात् ' क्विप् च ' इति क्विप् । उपधालोपः । ' सुपां सुलुक् ' इति शसो डादेशः । कृदुत्तरपदप्रकृतिस्वरत्वम् । जातवेदसे । ' बहुव्रीहौ प्रकृत्या पूर्वपदम् ' इति प्रकृतिस्वरत्वम् । सुवीर्यम् । 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् । पुष्यति । ' पुष पुष्टौ ' । अस्मात् श्यन् । ङित्त्वाद्गुणाभावः । निघातः ॥

स केतुरध्वराणामग्निर्देवेभिरा गमत् । अञ्जानः सप्त होतृभिर्हविष्मते ॥ ४ ॥

सः । केतुः । अध्वराणाम् । अग्निः । देवेभिः । आ । गमत् ।

अञ्जानः । सप्त । होतृऽभिः । हविष्मते ॥ ४ ॥

Vअध्वराणां यज्ञानां Vकेतुः प्रज्ञापकः Vसः Vअग्निः Vसप्त सप्तभिः Vहोतृभिः वषट्कर्तृभिः Vअञ्जानः सोमाज्याहुतिभिरज्यमानः सन् Vहविष्मते यजमानार्थं[3] Vदेवेभिः यष्टव्यदेवैः सह Vआ

१. ज ल–गुणाभावः । २. ख-ग-च-ज-ण-न-भ-स–' तिप् ' नास्ति । ३. ख-ग-च-ज-ण–यजमानार्थे ।

vगमत् आगच्छतु ॥ गमत्। लोडर्थे 'छन्दसि लुङ्लङ्लिटः' इति लुङ्। लृदित्त्वादङ्। 'बहुलं छन्दस्यमाङ्योगे०' इत्यडभावः। निघातः। अज्ञानः। 'अञ्चू व्यक्तिम्रक्षणगतिषु[1]'। व्यत्ययेन कर्मणि शानच्। चित्त्वादन्तोदात्तत्वम्। हविष्मते। जुहोतेः 'अर्चिशुचि०' इत्यादिना इसिप्रत्ययान्तो हविःशब्दोऽन्तोदात्तः। 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषानाश्रयणान्मतुप उदात्तत्वाभावः। इसिप्रत्ययस्वरः ॥

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींषि बिभ्रते न वेधसे ॥५॥

प्र। होत्रे। पूर्व्यम्। वचः। अग्नये। भरत। बृहत्।

विपाम्। ज्योतींषि। बिभ्रते। न। वेधसे ॥ ५ ॥

यजमानो होत्रादीन्प्रति ब्रूते। हे होत्रादयः vविपां विप्राणां मेधाविनामध्वर्वादीनां vज्योतींषि सत्कर्मानुष्ठानसाध्यानि तेजांसि vबिभ्रते निमित्ततया कुर्वाणाय vवेधसे जगतो विधात्रे vहोत्रे देवानामाह्वात्रे vअग्नये vबृहत् महत् vपूर्व्य पूर्वैः कृतं पुरातनं vवचः स्तोत्रशस्त्रादिकं वाक्यं vप्र vभरत संपादयत। vन[2] इत्ययं पादपूरणः[2] अन्वयाभावात्। यद्वा वेधसे न। यथा वेधा जगद्विधाता परमेश्वरः आदित्यादीनि ज्योतींषि करोति तद्वदिति॥ प्रशब्दस्य छन्दसि 'व्यवहिताश्च' इति भरतेत्यनेन संबन्धः। पूर्व्यं पूर्वैः कृतमित्यर्थः[3]। 'पूर्वैः कृतमिनयौ च' इति यप्रत्ययः। भसंज्ञकत्वादवर्णलोपः। प्रत्ययस्वरः। भरत। 'भृञ् भरणे' भौवादिकः। निघातः। बृहत्। 'वर्तमाने पृषद्बृहत्०' इति निपातनादन्तोदात्तः। बिभ्रते। 'भृञ् भरणे'। 'जुहोत्यादिभ्यः[4] श्लुः'। 'भृञामित्' इतीत्वम्[5]। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ ॥ ७ ॥

अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः। महे वाजाय द्रविणाय दर्शतः ॥ ६ ॥

अग्निम्। वर्धन्तु। नः। गिरः। यतः। जायते। उक्थ्यः।

महे। वाजाय। द्रविणाय। दर्शतः ॥ ६ ॥

योऽयमग्निः vयतः याभिः स्तुतिरूपाभिर्गीर्भिः vउक्थ्यः vजायते। उक्थ्यशब्दः प्रशस्यवाची[5]। 'अनभिशस्त्यः उक्थ्यः' (नि. ३. ८. ६) इति तन्नाममु पाठात्। अतिशयेन स्तुत्यो भवतीत्यर्थः। यश्चायमग्निः vमहे महते vवाजाय अन्नाय vद्रविणाय धनाय च vदर्शतः दर्शनीयो भवति तमिमम् vअग्निं vनो vगिरः अस्माकं स्तुतिरूपाः ताः[6] वाचः vवर्धन्तु वर्धयन्तु। पूजयन्त्वित्यर्थः॥ वर्धन्तु। 'वृधु वर्धने'। अस्माण्णिच्। लघूपधगुणः। 'छन्दस्युभयथा' इत्यार्धधातुकत्वाण्णिलोपः। झेरन्तादेशः। 'एरुः' (पा. सू. ३. ४. ८६) इत्युकारः। निघातः। उक्थ्यः। 'वच परिभाषणे'। अस्मात् 'पातृतुदिवचिरिचि०' इत्यादिना थक्। कित्त्वात् 'वचिस्वपि०' इत्यादिना संप्रसारणम्। उक्थं शस्त्रम्। तेन स्तुत्यत्वेन तत्र भव उक्थ्यः। 'भवे छन्दसि' इति यत्। 'यस्य०'

१. त–व्यक्तिगतिम्रक्षणेषु। २. घ-प–न पूरणः। ३. त–कृतमित्यर्थे। ४. त–जुहोत्यादिः। भृञामित्यभ्यासस्येत्वे। ५. ल–प्रशस्यवाची अनभिशस्त्यवाची। ६. ख-ग-च-ज-ण-ल–'ताः' नास्ति।

इति लोपः । 'तित्स्वरितम्' इति स्वरितः । दर्शतः । 'भृमृदृशियजि' इति अतच्प्रत्ययः । चित्त्वादन्तोदात्तः ॥

अग्ने यजिष्ठो अध्वरे देवान्देवयते यज । होता मन्द्रो वि राजस्यति स्रिधः॥७॥

अग्ने । यजिष्ठः । अध्वरे । देवान् । देवऽयते । यज ।

होता । मन्द्रः । वि । राजसि । अति । स्रिधः ॥ ७ ॥

हे vअग्ने vयजिष्ठः यष्टृतमस्त्वम् vअध्वरे यज्ञे vदेवयते देवानात्मन इच्छते यजमानाय vदेवान् vयज तदर्थं यष्टव्याङ्याादीन् पूजय[1] '। किंच vहोता देवानामाह्वाता vमन्द्रः यजमानस्य मदयिता स त्वं vस्रिधः क्षपयितॄच्छत्रून् vअति अतिक्रम्य vवि vराजसि विशेषेण शोभसे ॥ यजिष्ठः । 'तुश्छन्दसि' इतीष्ठन्। 'तुरिष्ठेमेयःसु' इति तृचो लोपः । नित्त्वादाद्युदात्तः । देवयते । क्यचश्चित्त्वादन्तोदात्तत्वम् । शपः पित्त्वादनुदात्तत्वं शतुश्च लसार्वधातुकस्वरेण । तयोः क्यचा सहैकादेशे 'एकादेश उदात्तेनोदात्तः' इत्यन्तोदात्तो देवयच्छब्दः। ततः 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । यज । 'यज देवपूजासंगतिकरणदानेषु '। अस्माल्लोट् । सिप् । सिपो हिरादेशः । 'अतो हेः' इति हेर्लुक् । निघातः । राजसि । 'राजृ दीप्तौ' । निघातः ॥

स नः पावक दीदिहि द्युमद्अस्मे सुवीर्यम् । भवा स्तोतृभ्यो अन्तमः स्वस्तये॥८॥

सः । नः । पावक । दीदिहि । द्युऽमत् । अस्मे इति । सुऽवीर्यम् ।

भव । स्तोतृऽभ्यः । अन्तमः । स्वस्तये ॥ ८ ॥

vनः vपावक अस्मत्संबन्धिनः पापस्य शोधक हे अग्ने vसः पूर्वमन्त्रे प्रतिपादितस्त्वं vद्युमत् कान्तियुक्तं vसुवीर्यं शोभनसामर्थ्योपेतं दानभोगार्हं धनम् vअस्मे अस्मभ्यं vदीदिहि । यद्वा द्युमत्तंजोयुक्तं सुवीर्यं शोभनवीर्योपेतं च यथा भवति तथास्मे अस्मदर्थं त्वं दीदिहि दीप्यस्व। किंच vस्तोतृभ्यः। षष्ठ्यर्थे चतुर्थी। त्वद्विषयस्तुतिकारिणां होत्रादीनां vस्वस्तये अविनाशनाय क्षेमाय vअन्तमः अन्तिकतमः तेषामतिशयेन समीपवर्ती[2] vभव[3] ॥ पावक । 'पूञ् पवने'। अस्माद्धातोर्ण्वुल् । णिस्वाद्वृद्धिः । वोरकादेशः[3] । आमन्त्रितत्वादाष्टमिकमनुदात्तत्वम् । दीदिहि । दिवु क्रीडादौ । अस्माद्यङ् । 'तुजादीनाम्०' इत्यभ्यासदीर्घत्वम् । 'संज्ञापूर्वको विधिरनित्यः' इत्यभ्यासस्य गुणाभावः । 'बहुलं छन्दसि' इति यङो लुक् । लोटि सिप् । 'चर्करीतं[4] परस्मैपदमदादिवच्च' इति वचनाच्छपो लुक्। सिपो हिरादेशः। 'लोपो व्योर्वलि' इति वलोपः । हेरपित्त्वात् अगुणः[5] । निघातः । द्युमत् । 'दिव उत्' इत्युकारः । 'ह्रस्वनुड्भ्याम्०' इति मतुप उदात्तत्वम् । सुवीर्यम् । 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् । अन्तमः । अन्तोऽस्यास्तीत्यन्तिकः । 'अत इनिठनौ' इति ठन् । अतिशयेनान्तिक इति 'अतिशायने तमप्०' इति तमप् । 'तमे तादेश्च' इति तादिलोपः । नित्त्वादाद्युदात्तः । स्वस्तये । प्रातिपदिकस्वरः ॥

---

१. ल– देवान् पूजय । २. ख-ग-च-ज-ण-न-भ-स–समीपे वर्तसि (न-वर्तसे; ज-ण–वर्तस्व) । ३. त–वोरकादेशः । आवादेशः । ४. ख-ग-च-ज-ण–चर्करीतं च । ५. तु-ल–गुणाभावः ।

तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते । हव्यवाहममर्त्यं सहोवृधम् ॥ ९ ॥

तम् । त्वा । विप्राः । विपन्यवः । जागृऽवांसः । सम् । इन्धते ।

हव्यऽवाहम् । अमर्त्यम् । सहःऽवृधम् ॥ ९ ॥

हे अग्ने ᵛविप्राः स्तुतीनां प्रेरकाः ᵛजागृवांसः अग्निहोत्रादिकर्मण्यप्रमत्ततया प्रबुद्धाः ᵛविपन्यवः । विपन्युशब्दो मेधाविनमाचष्टे । ' विपश्चित् विपन्युः ' (नि. ३. १५. १७) इति तन्नामसु पाठात् । विपन्यवो मेधाविनः स्तोतारः ᵛहव्यवाहं हव्यानां वोढारम् ᵛअमर्त्यं मरणधर्मरहितं ᵛसहोवृधं सहसा मथनरूपेण बलेन वर्धमानं तादृशं ᵛत्वा त्वां ᵛसमिन्धते सोमाज्याद्याहुतिभिः सम्यग्दीपयन्ति ॥ विप्राः । ' टुवप् बीजसंताने[1] ' । अस्माद्धातोः ' ऋज्रेन्द्राग्रवज्रविप्र° ' इति रन्प्रत्यये इत्वम् । निरवादाद्युदात्तत्वम् । विपन्यवः । विविधं पनं पननं स्तुतिं यातीति विपन्युः । ' मृगय्वादयश्च ' इति कुः । अकारलोपश्छान्दसः । प्रत्ययस्वरः । जागृवांसः । ' जागृ निद्राक्षये ' । अस्माल्लिट् । तस्य क्वसुः । ' उगिदचाम्° ' इति नुम् । द्विर्वचनाभावश्छान्दसः । ' वस्वेकाजाद्घसाम् ' इति नियमात्[2] इडभावः । ' जाग्रोऽविचिण्णल्ङित्सु ' (पा. सू. ७. ३. ८५) इति गुणो न भवति तत्र विरित्यत्र क्वसोरपि गृहीतत्वात् । प्रत्ययस्वरः । इन्धते । ' ञिइन्धी दीप्तौ ' । अन्तर्भावितण्यर्थोऽयम् । निघातः । हव्यवाहम् । ' वह प्रापणे ' । ' वहश्च ' इति ण्विः । उपधावृद्धिः । कृदुत्तरपदप्रकृतिस्वरत्वम् । सहोवृधम् । ' वृधु वर्धने ' । ' क्विप् च ' इति क्विप् ॥ ॥ ८ ॥

' अग्निर्होता ' इति नवर्चमेकादशं सूक्तं वैश्वामित्रं गायत्रमाग्नेयम् । ' अग्निर्होता गायत्रम् ' इत्यनुक्रान्तत्वात् । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसीदं सूक्तम् । सूत्रितं हि–' अग्निर्होताग्न इळेति चतस्रः ' (आश्व. श्रौ. ४. १३) इति । आधाने प्रथमायां पवमानेष्टौ[3] स्विष्टकृतो याज्या ' अग्निर्होता ' इत्येषा ' स हव्यवाळमर्त्यः ' इति पुरोनुवाक्या । द्वितीयपवमानेष्टौ स्विष्टकृतोऽनुवाक्या ' साह्वान् ' इति । सूत्रितं च–' साह्वान्विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये ' (आश्व. श्रौ. २. १) इति । आभिप्लविकेषूक्थ्येषु तृतीयसवने मैत्रावरुणशस्त्रे ' अभि प्रयांसि ' इति वैकल्पिकोऽनुरूपस्तृचः । अत्र सूत्रं–' प्र वो वाजा अभिद्यवोऽभि प्रयांसि वाहसा ' (आश्व. श्रौ. ७. ८) इति ॥

अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ॥ १ ॥

अग्निः । होता । पुरःऽहितः । अध्वरस्य । विऽचर्षणिः । सः । वेद । यज्ञम् । आनुषक् ॥ १ ॥

विश्वामित्रः स्तौति । ᵛहोता देवानामाह्वाता ᵛपुरोहितः पुरत एवाभिमतफलसंपादकत्वेन हितकारी । यद्वा पुरः पूर्वभागे आहवनीयरूपेण हितो निहित इति पुरोहितः । ᵛअध्वरस्य यज्ञस्य ᵛविचर्षणिः विशेषेण द्रष्टा ' विचर्षणिः विश्वचर्षणिः ' इति तन्नामसु पाठात् । ᵛसः तथाविधः ᵛअग्निः ᵛआनुषक् आनुपूर्व्येण सक्तं ᵛयज्ञम् अग्निष्टोमादिकं ᵛवेद जानाति ॥ वेद । ' विद ज्ञाने ' । ' विदो लटो वा ' इति तिपो णलादेशः । लघूपधगुणः । निघातः । आनुषक् । आसमन्तात् अनुषजतीत्यानुषक् । ' षञ्ज संगे ' । धातुपकारस्य सकारः । ' क्विप् च ' इति क्विप् । ' अनिदिताम्° ' इति उपधालोपः । ' उपसर्गात्सुनोति° ' इति षत्वम् ॥

१. स–बीजतन्तुसंतानेषु । २. ल–' नियमात् ' नास्ति । ३. स–पावमानेष्टौ ।

स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥ २ ॥

सः । हव्यऽवाट् । अमर्त्यः । उशिक् । दूतः । चनःऽहितः ।

अग्निः । धिया । सम । ऋण्वति ॥ २ ॥

[v]हव्यवाट् हविषः[1] वोढा [v]अमर्त्यः मरणधर्मरहितः [v]उशिक् हविः कामयमानः [v]दूतः देवानां दूतः चनसे[2] हविर्लक्षणायान्नाय हितो निहितः । यद्वा चनोहितः । चनोऽन्नं हविर्लक्षणं हितमस्येति चनोहितः । [v]सः तथाविधः [v]अग्निः [v]धिया प्रज्ञया [v]समृण्वति संगच्छते । कर्मविषयप्रज्ञान्वितोऽग्निरस्मानपि तादृक्प्रज्ञान्वितान्करोत्वित्याशास्ते ॥ हव्यवाट् । 'वह प्रापणे' । 'वहश्च' इति ण्विः । ह्रस्वजश्चवर्त्वानि । कृदुत्तरपदप्रकृतिस्वरत्वम् । उशिक् । 'वश कान्तौ' । 'इजिः' इत्यनुवृत्तौ 'वशेः[3] किच्च' इति इजिप्रत्ययः । तस्य कित्त्वात् 'ग्रहिज्या०' इति संप्रसारणम् । प्रत्ययस्वरः । चनोहितः । चनः 'चायतेरन्ने ह्रस्वश्च' इत्यसुनन्तः । चकाराद्युडागमः । तस्मिन्यलोपः । निरवादाद्युदात्तः । 'पुनश्चनसोश्छन्दसि गतिसंज्ञा वक्तव्या' (पा. सू. १. ४. ६०. २) इति गतिसंज्ञायां 'गतिरनन्तरः' इति प्रकृतिस्वरत्वम्[4] । बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरत्वम् । धिया । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । ऋण्वति । 'ऋणु गतौ' । लेटि तनादित्वादुप्रत्ययः । 'लेटोऽडाटौ' इत्यडागमः ॥

अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः । अर्थं ह्यस्य तरणि ॥ ३ ॥

अग्निः । धिया । सः । चेतति । केतुः । यज्ञस्य । पूर्व्यः । अर्थम् । हि । अस्य । तरणि ॥ ३ ॥

[v]यज्ञस्य अग्निष्टोमादेः [v]केतुः प्रज्ञापकः [v]पूर्व्यः पूर्वे भवश्चिरंतनः [v]सः तथाविधः [v]अग्निः [v]धिया प्रज्ञया [v]चेतति सर्वं जानीते[5] । अस्य एतादृशस्याग्नेः [v]अर्थं गमनस्वभावं तेजः [v]अस्य आकाशे दृश्यमानस्य तमसः [v]तरणि [v]हि[6] तारकं[7] खलु । निवर्तकमिति यावत् ॥ चेतति । 'चिती संज्ञाने' । निघातः । अर्थम् । 'ऋ गतौ' । 'उषिकुषिगार्तिभ्यस्थन्' इति थन् । गुणः । निरवादाद्युदात्तः । तरणि । 'तॄ प्लवनतरणयोः' । 'अर्तिसृभृधृधमि०' इत्यादिना अनिप्रत्ययः । गुणः । प्रत्ययस्वरः ॥

अग्निं सूनुं सनश्रुतं सहसो जातवेदसम् । वह्निं देवा अकृण्वत ॥ ४ ॥

अग्निम् । सूनुम् । सनऽश्रुतम् । सहसः । जातऽवेदसम् । वह्निम् । देवाः । अकृण्वत ॥ ४ ॥

[v]सहसः [v]सूनुं बलस्य पुत्रं मथनरूपेण बलेन निष्पाद्यमानत्वात्[8] [v]सनश्रुतं सनातनत्वेन प्रसिद्धं [v]जातवेदसं जातप्रज्ञं तमिमम् [v]अग्निं [v]देवाः हविर्भुजो देवाः [v]वह्निं हविषां वोढारम् [v]अकृण्वत

१. घ-त-प-स-हविषाम् । २. ज-ण-चनोहितः चनसे । ३. ख-ज-ण-न-भ-वशः । ४. ल-गतेः प्रकृतिस्वरत्वम् । ५. ख-ग-च-ज-ण-जानाति । ६. त-ल-'हि' इत्यस्यानन्तरम्-माकारो तरणस्वभावं सर्वत्र प्रसरणस्वभावमित्यर्थः । यद्वा गमनस्वभावं तेजः अस्याकाशदृश्यमानस्य तमसस्तरणि तावहश्चलु (त-हि रेकं खलु) । ७. घ-प-निवर्तकम् । ८. त-निष्पद्यमानत्वात् । ९. त-सनातनत्वे ।

अकुर्वत ॥ सनश्रुतम् । ' श्रु श्रवणे ' । कर्मणि क्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । बर्हिम् । ' वह प्रापणे ' । ' निः ' इत्यनुवृत्तौ ' वहिश्रि० ' इत्यादिना निप्रत्ययः[1] । अकृण्वत । ' कृवि हिंसाकरणयोः ' । इदित्वान्नुम् । ' धिन्विकृण्व्योरच्च ' इत्युप्रत्ययः । अकारश्चान्तादेशः । लङि व्यत्ययेनात्मनेपदम् । निघातः ॥

अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् । तूर्णी रथः सदा नवः ॥ ५ ॥

अदाभ्यः । पुरःऽएता । विशाम् । अग्निः । मानुषीणाम् । तूर्णिः । रथः । सदा । नवः ॥ ५ ॥

[v]मानुषीणां मनोर्जातानां [v]विशां[2] प्रजानां[2] [v]पुरएता सन्मार्गप्रदर्शनेनाग्रतो गन्ता[3] अतएव [v]तूर्णिः[4] नाः प्रजा वैदिककर्मप्रवर्तकत्वेनानुग्रहीतुं त्वरायुक्तः[5] आलस्यरहितः [v]रथः हविषां वहनाद्रथसदृशः [v]सदा सर्वदा तत्कर्मणि[6] [v]नवः नूतनः पुनर्मथनादभिनवः एवंविधः [v]अग्निः [v]अदाभ्यः अहिंस्यः । न केनापि तिरस्कार्य इत्यर्थः ॥ अदाभ्यः । ' दम्भु दम्भने ' । ' दभेश्चेति[7] वक्तव्यम् ' इति कर्मणि ण्यत् । उपधावृद्धिः । न दाभ्योऽदाभ्यः । नञ्समासे[8] ' तत्पुरुषे तुल्यार्थ० ' इति पूर्वपदप्रकृतिस्वरत्वम् । पुरएता । ' इण् गतौ ' । ' ण्वुल्तृचौ ' इति तृच् । गुणः । चित्त्वादन्तोदात्तः । मानुषीणाम् । ' मनोर्जातावञ्यतौ षुक् च ' इत्यञ् । ' टिड्ढाणञ्० ' इति ङीप् । ञित्त्वादाद्युदात्तः । तूर्णिः । ' ञित्वरा संभ्रमे ' इति धातोः ' निः ' इत्यनुवृत्तौ ' वहिश्रिश्रुयुद्रुस्रुहाह्वरिभ्यो नित् ' इति निप्रत्ययः । ' ज्वरत्वर० ' इत्यादिना ऊठ् । तस्य नित्त्वादाद्युदात्तः । संहितायां ' ढ्रलोपे पूर्वस्य० ' इति दीर्घः । रथः । ' हनिकुषिनीरमिकाशिभ्यः० ' इति क्थन्प्रत्ययः । कित्त्वात् ' अनुदात्तोपदेश० ' इत्यादिना अनुनासिकलोपः । नित्त्वादाद्युदात्तः । सदा । स्वरादिषु आद्युदात्तत्वेन पठितत्वादाद्युदात्तः ॥ ॥ ९ ॥

साह्वान्विश्वा अभियुजः क्रतुर्देवानामर्मृक्तः । अग्निस्तुविश्रवस्तमः ॥ ६ ॥

साह्वान् । विश्वाः । अभिऽयुजः । क्रतुः । देवानाम् । अमृक्तः । अग्निः । तुविश्रवःऽतमः ॥ ६ ॥

[v]अभियुजः अभियोक्त्रीः [v]विश्वाः सर्वाः सेनाः [v]साह्वान् सहमानः स्वबलेन तिरस्कुर्वाणः अत[9] एव[9] [v]अमृक्तः शत्रुभिरहिंसितः [v]देवानां [v]क्रतुः कर्ता हविष्प्रदानेन पोषकः एवंभूतः [v]अग्निः [v]तुविश्रवस्तमः । तुविशब्दो बहुवाची । ' तुवि पुरु ' (नि. ३. १. २) इति तन्नामसु पाठात् । श्रवःशब्दोऽन्नवाची । ' श्रव इत्यन्ननाम श्रूयते ' (निरु. १०. ३) इति निरुक्तेऽभिधानात् । अतिशयेन बहुविधान्नोपेतो वर्तते । यस्मादेवं तस्मादस्मानपि बहुविधान्नोपेतान्करोत्विति भावः ॥ साह्वान् । ' षह मर्षणे ' इत्यस्य क्वौ ' दाश्वान्साह्वान्मीढ्वांश्च ' इति निपातनात् द्विर्वचनमिडागमश्च न भवति परस्मैपदं च भवति । क्वसुस्वरः । क्रतुः । कृञः कतुः । कित्त्वादृणाभावः । प्रत्ययस्वरः । तुविश्रवस्तमः । ' तु वृत्तिहिंसापूर्तिषु ' । अस्मादौणादिकः किप्रत्ययः । कित्त्वादृणाभावः ।

१. ल–निप्रत्ययः । नित्त्वादाद्युदात्तः । २. त–' विशां प्रजानाम् ' नास्ति । ३. ख-ग-च-न-भ-स–यन्ता । ४. घ-ज-ण-प–तूर्णिस्त्वरावान् । ५. घ-प–' त्वरायुक्तः ' नास्ति । ६. ल–तत्तत्कर्मणि । ७. ख-ग-ज-ण-न-भ-स–दंभेश्चेति; न-स–दंभश्चेति । ८. त–नञा समासे । ९. त–' अत एव ' नास्ति ।

उवङादेशः । अन्तोदात्तः । श्रवः । 'श्रु श्रवणे' । श्रूयतेऽन्नमिति कर्मण्यसुन्प्रत्ययः । अतिशयेन तुविश्रवा इति 'अतिशायने तमप्' इति तमप् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्' ॥

अभि प्रयाँसि वाहसा दाश्वाँ अश्नोति मर्त्यः । क्षयं पावकशोचिषः ॥ ७ ॥

अभि । प्रयांसि । वाहसा । दाश्वान् । अश्नोति । मर्त्यः । क्षयम् । पावकऽशोचिषः ॥ ७ ॥

[v]दाश्वान् हविषां दाता [v]मर्त्यः मनुष्यो यजमानः [v]वाहसा हविषां वाहकेन अग्निना[1] [v]प्रयांसि अन्नानि [v]अभि [v]अश्नोति अभितः सर्वतः प्राप्नोति । किंच [v]पावकशोचिषः शोधकदीप्तेरग्नेः सकाशात् [v]क्षयं गृहं चाभ्यश्नोति ॥ प्रयांसि । 'प्रीञ् तर्पणे' । अस्माद्धातोरन्तर्भावितण्यर्थादसुन्प्रत्ययः । प्रीणयन्ति भोक्तॄनिति प्रयांस्यन्नानि । नित्त्वादाद्युदात्तः । वाहसा । 'णित्' इत्यनुवृत्तौ 'वहिहाधाभ्यश्छन्दसि' इत्यसुन् । णित्त्वादुपधावृद्धिः । नित्स्वरः । दाश्वान् । 'दाश्च दाने' इत्यस्य क्वसौ 'दाश्वान्साह्वान्' इति निपातनादिडागमो द्विर्वचनं च न भवति । क्वसुन्प्रत्ययस्वरः । अश्नोति । 'अशू व्याप्तौ' । व्यत्ययेन परस्मैपदम् । निघातः ॥

परि विश्वानि सुधिताग्नेरश्याम मन्मभिः । विप्रासो जातवेदसः ॥ ८ ॥

परि । विश्वानि । सुऽधिता । अग्नेः । अश्याम । मन्मऽभिः । विप्रासः । जातऽवेदसः ॥ ८ ॥

[v]जातवेदसः जातप्रज्ञाः [v]विप्रासः[3] मेधाविनो होत्रादयो वयम् [v]अग्नेः तव संबन्धिभिः [v]मन्मभिः मननीयैः स्तोमैः[4] [v]विश्वानि सर्वाणि [v]सुधिता सुहितानि सुष्ठु हितान्यभिलषितानि वसूनि [v]परि [v]अश्याम सर्वतः प्राप्नुयाम । जातवेदस इत्यग्नेर्वा विशेषणम् । जातानि सर्वाणि वेत्तीति जातवेदाः सर्वज्ञ इत्यर्थः । एतादृशं जातवेदस्त्वमग्नेरेवोचितमिति तद्विशेषणत्वं युक्तम् ॥ सुधिता । 'डुधाञ् धारणपोषणयोः' इत्यस्माद्धातोर्निष्ठायां 'छन्दसि' इत्यनुवृत्तौ 'सुधितवसुधित०' इत्यादिना निपातितः । 'शेश्छन्दसि बहुलम्' इति शेर्लुक् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । अश्याम । 'अशू व्याप्तौ' । 'बहुलं छन्दसि' इति श्नुप्रत्ययस्य लुक् । व्यत्ययेन परस्मैपदम् । 'यासुट् परस्मैपदेषूदात्तः०' इति यासुट् । 'लिङः सलोपः०' इति सलोपः । अदन्तत्वाभावादियादेशो न भवति । मसः सकारस्य 'नित्यं ङितः' इति लोपः । निघातः । मन्मभिः । 'मनु अवबोधने' । 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । नित्स्वरः ॥

अग्ने विश्वानि वार्या वाजेषु सनिषामहे । त्वे देवास एरिरे ॥ ९ ॥

अग्ने । विश्वानि । वार्या । वाजेषु । सनिषामहे । त्वे इति । देवासः । आ । ईरिरे ॥ ९ ॥

हे [v]अग्ने [v]वार्या वरणीयानि संभजनीयानि [v]विश्वानि सर्वाणि धनानि [v]वाजेषु युद्धेषु[5] [v]सनिषामहे वयं संभजामहे । यतः कारणात् [v]देवासः पूर्वमस्माभिरिष्टा देवा अस्मदभिमतफलप्रदानाय

---

१. ख-ग-च-ज-ण-भ-पूर्वपदस्वरत्वम् । २. ख-ग-च-ज-ण-'अग्निना' नास्ति । ३. त-विप्राः । ४. ल-स्तोत्रैः । ५. त-ल-यज्ञेषु ।

[v]त्वे त्वयि [v]एरिरे आ समन्तादगमन्। त्वयि प्रविष्टा इत्यर्थः। सर्वथापि त्वत्सकाशात्[1] फलं लभेमहि इति भावः॥ वार्या। 'वृङ् संभक्तौ'। 'ऋहलोर्ण्यत्' इति ण्यत्। 'शेश्छन्दसि बहुलम्' इति शेर्लुक्। 'ईडवन्द°' इत्यादिनाद्युदात्तः। वाजेषु। वृषादित्वादाद्युदात्तः। सनिषामहे। 'षण संभक्तौ'। 'धात्वादेः षः सः'। लेटि 'सिब्बहुलम्°' इति सिप्। सिप आर्धधातुकत्वाद्विडागमः। 'लेटोऽडाटौ' इत्यडागमः। व्यत्ययेनात्मनेपदम्। निघातः। त्वे। युष्मच्छब्दस्य सप्तम्यां त्वादेशः। 'सुपां सुलुक्°' इति शेआदेशः[2]। 'शे' (पा. सू. १. १. १३) इति प्रगृह्यसंज्ञा। ईरिरे[3]। 'ईर गतौ' इत्यस्मात्परस्य लिटो झस्य इरेजादेशः। 'इजादेश्च गुरुमतः°' इत्याम् न भवति मन्त्रत्वात्। निघातः॥ ॥ १० ॥

'इन्द्राग्नी' इति नवर्चं द्वादशं सूक्तं वैश्वामित्रमैन्द्राग्नम्। तथा चानुक्रम्यते–'इन्द्राग्नी ऐन्द्राग्नम्' इति। 'गायत्रं तु' इति तु शब्दादिदमपि सूक्तं गायत्रम्। इन्द्राग्नी देवता। आभिप्लविकेष्वहःसु प्रातःसवनेऽच्छावाकशस्त्रे आवापार्थमिदं सूक्तम्। 'अभिप्लवपृष्ठ्याहानि' इति खण्डे सूत्रितम्–'इन्द्राग्नी आ गतं ता हुवे ययोरिदम्' (आश्व. श्रौ. ७. ५) इति। अग्निष्टोमेऽच्छावाकशस्त्रे 'इन्द्राग्नी आ गतम्' इति स्तोत्रियस्तृचः। तस्यैवाच्छावाकस्याद्या शस्त्रयाज्या। 'इन्द्राग्नी आ गतं सुतमिति याज्या' (आश्व. श्रौ. ५. १०) इति सूत्रितत्वात्। चतुर्विंशेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे 'इन्द्राग्नी आ गतं सुतम्' इति षळहस्तोत्रियः। 'इन्द्राग्नी आ गतं सुतमिन्द्रे अग्ना नमो बृहत्' (आश्व. श्रौ. ७. २) इति सूत्रितम्। अग्निष्टोमाच्छावाकशस्त्रे 'तोशा वृत्रहणा हुवे' इत्याद्यास्तिस्रः। सूत्रितं च—'तोशा वृत्रहणा हुव इति तिस्रः' (आश्व. श्रौ. ५. १०) इति। अग्निष्टोमेऽच्छावाकशस्त्रे 'इन्द्राग्नी अपसस्परि' इत्यनुरूपः। सूत्रितं च—'इन्द्राग्नी आ गतं सुतमिन्द्राग्नी अपसस्परि' (आश्व. श्रौ. ५. १०) इति॥

इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता॥ १॥

इन्द्राग्नी इति। आ। गतम्। सुतम्। गीःऽभिः। नभः। वरेण्यम्। अस्य। पातम्। धिया। इषिता॥ १॥

इन्द्रश्चाग्निश्च [v]इन्द्राग्नी हे देवौ [v]सुतम् अभिषवादिसंस्कारैः संस्कृतमत एव [v]वरेण्यं वरणीयं संभजनीयम्[4] इमं सोमं प्रति [v]गीर्भिः अस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिराहूतौ सन्तौ [v]नभः नभसः स्वर्गस्थानात् [v]आ [v]गतम् आगच्छतम्। आगत्य च [v]धिया अस्माभिः क्रियमाणे[5] कर्मणि[6] [v]इषिता प्रेरितौ युवाम् [v]अस्य [v]पातम् इमं सोमं पिबतम्। यद्वा[7] धिया अस्मदीयया बुद्ध्या इषितौ प्राप्तौ अस्मद्बुद्ध्या प्रेरितौ युवामिमं सोमं पिबतम्[8]॥ इन्द्राग्नी। इन्द्रश्चाग्निश्च 'द्वन्द्वे घि' (पा. सू. २. २. ३२) इत्यग्निशब्दस्य पूर्वनिपाते प्राप्ते 'अजाद्यदन्तम्' (पा. सू. २. २. ३३) इतीन्द्रशब्दस्य पूर्वनिपातः। पादादित्वान्निघातप्रतिषेधः। पाष्टिकस्वरः। गतम्। 'गम्लृ सृप्लृ[9] गतौ'। 'बहुलं छन्दसि' इति शपो लुकि सति 'अनुदात्तोपदेश°' इत्यादिना मकारलोपः। निघातः। वरेण्यम्। 'वृङ् संभक्तौ'। 'वृङ उण्यः'। वृषादित्वादाद्युदात्तः। पातम्। 'पा पाने'। 'सर्वे

---

१. त–त्वतः सकाशात्। २. त–शे इत्यादेशः। ३. ज-ण-स–एरिरे। ४. त–भजनीयम्। ५. ल–क्रियमाणेन कर्मणा। ६. ख-ग-च-ज-ण-प-फ-भ–'यद्वा.....पिबतम्' नास्ति। ७. त–'सृप्लृ' नास्ति।

विधयश्छन्दसि विकल्प्यन्ते ' इति न पिबादेशः । इषिता । ' इष गतौ ' इत्यस्माद्धातोर्निष्ठायां ' तीषसह° ' इतीडागमः । ' आगमा अनुदात्ताः ' इतीटोऽनुदात्तत्वात् क्त्वरः शिष्यते ॥

इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः । अया पातमिमं सुतम् ॥ २ ॥

इन्द्राग्नी इति । जरितुः । सचा । यज्ञः । जिगाति । चेतनः । अया । पातम् । इमम् । सुतम् ॥२॥

हे [v]इन्द्राग्नी [v]जरितुः स्तोतुः [v]सचा स्वर्गादिलक्षणफलप्राप्तौ सहायभूतः [v]यज्ञः ज्योतिष्टोमादियज्ञसाधनभूतः [v]चेतनः इन्द्रियाणां चेतयित्रीप्यायनकारी सन् असौ सोमः [v]जिगाति युवाम् अभिगच्छति[1] । [v]अया अस्मदीयस्तुतिलक्षणयानया वाचाहूतौ सन्तौ [v]सुतम् अभिषवादिसंस्कारोपेतम् [v]इमं सोमं [v]पातं पिबतम् ॥ जिगाति । ' गा स्तुतौ ' इत्ययं धातुरत्र गमने वर्तते । छन्दसि जुहोत्यादिः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् । निघातः । चेतनः । ' चिती संज्ञाने ' । कर्तरि बहुलवचनाल्ल्युट् । ' लिति ' इत्यातुदात्तत्वम् । अया । इदंशब्दस्य तृतीयायाः ' सुपां सुलुक् ° ' इति याजादेशः । अनादेशप्राप्तौ हलि लोपः । पातम् । ' पा पाने ' । निघातः ॥

इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे । ता सोमस्येह तृम्पताम् ॥ ३ ॥

इन्द्रम् । अग्निम् । कविऽछदा । यज्ञस्य । जूत्या । वृणे । ता । सोमस्य । इह । तृम्पताम् ॥३॥

[v]यज्ञस्य[2] यज्ञसाधनभूतस्य[3] सोमस्य [v]जूत्या । जूतिः प्रेरणम् सोमस्तावत्[4] यजमानं प्रेरयति । साधनमुपलभ्य तत्साध्यकर्तृ[5] यजमानः प्रवर्तत इति हि तस्य प्रेरकत्वम् । तया प्रेरणरूपया[6] जूत्या प्रेरितोऽहं [v]कविच्छदा कवीनां स्तोतृणामुचितफलप्रदानेनोपच्छन्दकौ[7] [v]इन्द्रमग्निं च युवां [v]वृणे सोमपानार्थमिह कर्मण्यागच्छतमिति संभजे । [v]ता आगतौ च ताविन्द्राग्नी [v]इह कर्मणि [v]सोमस्य सोमपानेन [v]तृम्पतां तृप्यताम् ॥ इन्द्रम् । ' इदि परमैश्वर्ये ' इत्यस्माद्धातोः ' ऋज्रेन्द्राग्र° ' इति रन्प्रत्ययान्तत्वेन निपातनादाद्युदात्तत्वम् । कविच्छदा । ' छदि अपवारणे ' । अस्मात् क्विप् । ' सुपां सुलुक्° ' इति[8] सुपो डादेशः । कृदुत्तरपदप्रकृतिस्वरत्वम् । जूत्या । ' जू ' इति सौत्रो धातुः । अस्मात् ' °उदात्तः ' इत्यनुवृत्तौ ' ऊतियूतिजूति° ' इत्यादिना निपातनादन्तोदात्तत्वम् । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । वृणे । ' वृङ् संभक्तौ ' । भाप्रत्ययः । ' टित आत्मनेपदानाम् ° ' इति ' टेरेत्वम्[9] ' । निघातः । ता । ' सुपां सुलुक्° ' इति डादेशः । सोमस्य । ' षुञ् अभिषवे ' । अस्मात् ' अर्तिस्तुसुहुसृधृक्षि° ' इत्यादिना मन्प्रत्ययः । नित्स्वरः । तृम्पताम् । ' तृप प्रीणने ' । लोटि मुचादित्वाच्छ्नुमागमः । निघातः ॥

तोशा वृत्रहणा हुवे सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ॥ ४ ॥

तोशा । वृत्रऽहना । हुवे । सऽजित्वाना । अपराऽजिता । इन्द्राग्नी इति । वाजऽसातमा ॥४॥

---

१. ग-च-फ-अधिगच्छति । २. ख-ग-च-ज-ण-फ-भ-तस्य यज्ञस्य; स-अस्य यज्ञस्य । ३. ख-ग-च-फ-भ-स-धनभूतस्य; ज-ण-साधनभूतस्य । ४. ख-ग-च-ज-ण-न-फ-भ-सोमस्तवे । ५. त-तत्साध्ये कर्तृ । ६. ख-ग-च-ज-ण-भ-प्रेरणया । ७. ख-फ-°प्रदानेन पापच्छेदकौ; ग-च-ज-ण-प-भ-म-°प्रदाने पापच्छेदकौ । ८. ख-ग-च-ज-ण-' सुलुक् ° इति ' नास्ति । ९. त-ट एवं पररूपत्वम् ।

[v]तोशा शत्रूणां बाधकौ [v]वृत्रहणा वृत्रस्य पापस्य हन्तारौ [v]सजित्वाना समानजेतारौ[1] [v]अपराजिता अपराजितौ केनाप्यतिरस्कृतौ [v]वाजसातमा अन्नस्यातिशयेन दातारौ [v]इन्द्राग्नी युवां[2] [v]हुवे इह कर्मणि सोमपानार्थमहमाह्वयामि ॥ वृत्रहणा । ' हन हिंसागत्योः ' । ' ब्रह्मभ्रूणवृत्रेषु क्विप् ' इति क्विप् । ' एकाजुत्तरपदे णः ' (पा. सू. ८. ४. १२) इति णत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । हुवे । ह्वयतेः ' बहुलं छन्दसि ' इति लुकि सति ' ह्वः संप्रसारणम् ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति संप्रसारणम् । उवङादेशः । व्यत्ययेनात्मनेपदम् । निघातः । सजित्वाना । ' जि जये ' । ' शीङ्कुशिरुहिजिक्षिसृधृभ्यः ॰ ' (उ. सू. ४. ५५३) इति क्वनिप् । किस्वाद्वुणाभावः । पित्त्वात्तुगागमः । ' समानस्य छन्दस्यमूर्ध ॰ ' इति समानस्य सभावः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अपराजिता । नञ्समासे[3] ' तत्पुरुषे तुल्यार्थ ॰ ' इति पूर्वपदप्रकृतिस्वरत्वम् । इन्द्राग्नी । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरत्वे प्राप्ते ' नोत्तरपदेऽनुदात्तादौ ॰ ' इति प्रतिषेधात्समासस्वरः । वाजसातमा । ' षणु दाने ' । अस्मात् ' जनसनखनक्रमगमः ॰ ' इति विट् । ' विड्वनोरनुनासिकस्यात् ' इत्याकारः । ' अतिशायने तमप् ॰ ' इति तमप् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ॥ ५ ॥

प्र । वाम् । अर्चन्ति । उक्थिनः । नीथऽविदः । जरितारः । इन्द्राग्नी इति । इषः । आ । वृणे ॥५॥

हे [v]इन्द्राग्नी [v]उक्थिनः । उक्थं[4] शस्त्रम् । तद्वन्तः शस्त्रिणो होत्रादयः[5] [v]वां युवां [v]प्र [v]अर्चन्ति इह कर्मणि स्तुतिरूपाभिर्वाग्भिः पूजयन्ति । तथा [v]नीथाविदः स्तोत्राभिज्ञाः सामगानकुशलाः [v]जरितारः स्तोतार उद्गात्रादयोऽभिलषितफलावाप्तये युवामर्चन्ति । अहमपि [v]इषः अन्नस्य लाभार्थमिन्द्राग्नी युवाम् [v]आ [v]वृणे सर्वतः संभजे । पूजयामीत्यर्थः । वाम् । युष्मच्छब्दस्य द्वितीयायां पदात्परत्वात् ' युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया ॰ ' इत्यादिना वामित्यादेशोऽनुदात्तश्च । अर्चन्ति । ' अर्च पूजायाम् ' । निघातः । उक्थिनः । ' वच परिभाषणे ' । ' पातृतुदिवचिरिचि ॰ ' इति कर्मणि थक् । ' वचिस्वपि ॰ ' इत्यादिना संप्रसारणम् । उक्थं शस्त्रम् । उक्थं येषां ते । ' अत इनिठनौ ' इतीनिः । ' यस्य ॰ ' इति लोपः । प्रत्ययस्वरः । नीथाविदः । ' णीञ् प्रापणे ' । ' हनिकुषिनीरमि ॰ ' इत्यादिना क्थन् । किस्वाद्वुणाभावः । ' विद[6] ज्ञाने ' । ' क्विप् च ' इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्राग्नी । आमन्त्रितत्वादाद्युदात्तत्वम्[7] । वृणे । ' वृङ् संभक्तौ ' । निघातः ॥ ॥ ११ ॥

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥ ६ ॥

इन्द्राग्नी इति । नवतिम् । पुरः । दासऽपत्नीः । अधूनुतम् । साकम् । एकेन । कर्मणा ॥६॥

हे [v]इन्द्राग्नी [v]दासपत्नीः । दासयन्ति उपक्षपयन्ति[8] इति दासा उपक्षपयितारः शत्रवः । ते पतयः पालका यासां ता दासपत्नीः । [v]नवतिं नवतिसंख्याकाः [v]पुरः एवंविधाः शत्रूणां पुरीः [v]एकेन [v]कर्मणा

---

१. न–समानजेतारौ परस्य वाजनशीलौ; ल–परस्परापेक्षया जयशीलौ । २. ख-ग-च-प-भ–वां युवाम् । ३. ख-ग-च-ज-ण-फ-भ–नञा सह । ४. घ-प–शस्त्रवन्तः । ५. ख-ग-च-फ-भ–' विद्ज्ञाने... ह्युदात्तत्वम् ' नास्ति । ६. ख-ग-च-ज-ण-न-भ-स–' उपक्षपयन्ति ' नास्ति ।

एकेनैवोद्योगेन युवां vसाकं सह युगपत् vअधूनुतम् अकम्पयतम्। ताविन्द्राग्नी आह्वयामीति शेषः ॥ नवतिम्। नवानां दशतां नवभावः तिश्च प्रत्ययः। प्रत्ययस्वरेणान्तोदात्तः। दासपत्नीः। 'दसु उपक्षये'। दासयतीति दासः। पचाद्यजन्तः। चित्त्वादन्तोदात्तः। ते पतयो यासां तिस्यं सपत्न्यादिषु दासाच्च (पा. सू. ४. १. ३५. ग.) इत्युक्तत्वात् 'विभाषा सपूर्वस्य' इति ङीप्। इकारस्य नकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अधूनुतम्। 'धूञ् कम्पने'। लङि स्वादिभ्यः श्नुः। निघातः। एकेन। 'इण् गतौ'। 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' इति कन्। निरवादाद्युदात्तः ॥

इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या३ अनु ॥ ७ ॥

इन्द्राग्नी इति। अपसः। परि। उप। प्र। यन्ति। धीतयः। ऋतस्य। पथ्याः। अनु ॥७॥

हे vइन्द्राग्नी vधीतयः सोमस्य धातारः पातारो होत्रादयः vऋतस्य कर्मफलस्य vपथ्याः पथो मार्गान् vअनु लक्षीकृत्य vअपसः अस्माभिः क्रियमाणस्य कर्मणः vपरि सर्वतः vउप vप्र vयन्ति समीपे प्रकर्षेण वर्तन्ते। अतः सोमपानार्थं युवामागच्छतमिति भावः। यद्वा। धीतयः स्तुतयः ऋतस्य यज्ञस्य मार्गान्[1] लक्षीकृत्य कर्मणः परितः प्रवर्तन्ते। अतः स्तोतव्यतया युवामागतमिति ॥ यन्ति। 'इण् गतौ'। यणादेशः। निघातः। धीतयः। 'धेट् पाने' इत्यस्मात् कर्तरि 'क्तिच्क्तौ[2] च संज्ञायाम्' इति क्तिच्। 'घुमास्था०' इतीत्वम्। चित्त्वादन्तोदात्तः ॥

इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम् ॥ ८ ॥

इन्द्राग्नी इति। तविषाणि। वाम्। सधऽस्थानि। प्रयांसि। च। युवोः। अप्ऽतूर्यम्। हितम् ॥८॥

हे vइन्द्राग्नी vवां युवयोः vतविषाणि बलानि vप्रयांसि अन्नानि vच vसधस्थानि परस्परमवियुज्य वर्तन्ते। तथा vअसूर्यं वृष्टिद्वारा[3] प्रेरकत्वं vयुवोः युवयोरेव vहितं निहितं वर्तते। तस्मात्सोमपानप्रभृतिषु सर्वेकर्मसु इन्द्राग्न्योः सहैव वर्तमानत्वमिति भावः ॥ वाम्। षष्ठीद्विवचने वामित्यादेशः। सधस्थानि। 'ष्ठा गतिनिवृत्तौ'। 'आतोऽनुपसर्गे कः'। 'सध मादस्थयोश्छन्दसि' इति सहस्य सधादेशः ॥

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यम् ॥ ९ ॥

इन्द्राग्नी इति। रोचना। दिवः। परि। वाजेषु। भूषथः। तत्। वाम्। चेति। प्र। वीर्यम् ॥९॥

हे vइन्द्राग्नी vदिवः vरोचना स्वर्गस्य रोचकौ प्रकाशकौ युवां vवाजेषु संग्रामेषु vपरि vभूषथः परितः सर्वतोऽलंकृतौ भवथः। शत्रून्पराजित्य सर्वतो विजयमानौ वर्तेथे। vवां युवयोः vवीर्यं सामर्थ्यमेव vतत् तादृशं संग्रामविजयं vप्र vचेति प्रकर्षेण ज्ञापयति। यद्वा युवां वाजेषु

---

१. ज-ण-मार्गम्। २. ख-ग-च-ज-ण-म-भ-'क्तिच्क्तौ च संज्ञायाम्' नास्ति। ३. घ-प-वृष्टिद्वारा अया (अपाम्)।

संग्रामेषु परिभूषथः शत्रून्परिभवथः। शेषं पूर्ववत् ॥ रोचना। 'रुच दीप्तौ' इत्यस्य 'अनुदात्तेतश्च हलादेः' इति युच्। चित्स्वादन्तोदात्तः। भूषथः। 'भूष भूषणे'। निघातः। चेति। 'चिती संज्ञाने'। अयमन्तर्भावितण्यर्थः। 'बहुलं छन्दसि' इति शपो लुक्। तकारलोपः[1] छान्दसः॥ ॥ १२ ॥ ॥ १ ॥

द्वितीयेऽनुवाके सप्तदश सूक्तानि। तत्र 'प्र वो देवाय' इति सप्तर्चं प्रथमं[2] सूक्तं वैश्वामित्र-ऋषभस्यार्षमग्निदेवताकमानुष्टुभम्। तथा[3] चानुक्रान्तं[3]—'प्र वः सप्त ऋषभस्यानुष्टुभम्' इति। विश्वामित्रपुत्र[4] ऋषभ ऋषिः। मण्डलादिपरिभाषयाग्निर्देवता। अग्निष्टोमे इदं सूक्तमाज्यशस्त्रम्। 'पराङ्ध्वर्यावावृत्ते' इति खण्डे सूत्रितम्—'प्र वो देवायेत्याज्यमुपसंतनुयात्' (आश्व. श्रौ. ५. ९) इति। इदमेव सूक्तं प्रातरनुवाक आश्विनशस्त्रे च विनियुक्तम्। सूत्रं च—'प्र वो देवायाग्ने कदा त इति पञ्च' (आश्व. श्रौ. ४. १३) इति। अभ्युदयेष्टौ 'स यन्ता' इत्यग्नेः प्रदातुः* याज्या। सूत्रितं च—'स यन्ता विप्र एषां दीर्घस्ते अस्त्वङ्कुशः' (आश्व. श्रौ. ३. १३) इति[4] ॥

प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥ १ ॥

प्र। वः। देवाय। अग्नये। बर्हिष्ठम्। अर्च। अस्मै।

गमत्। देवेभिः। आ। सः। नः। यजिष्ठः। बर्हिः। आ। सदत् ॥ १ ॥

यजमानो होत्रादीन्प्रति ब्रूते। हे होत्रादयः [v]वः युष्मत्संबन्धिने [v]देवाय द्योतमानाय [v]अस्मै अस्मिन्कर्मणि स्तुत्याय [v]अग्नये [v]बर्हिष्ठं वृद्धतमं प्रभूतमिदं[5] स्तुतिरूपं[6] स्तोत्रशस्त्रादि वोक्थ्यजातं[6] [v]प्र [v]अर्च उच्चारयत। एवं स्तुतः [v]सः अग्निः [v]देवेभिः यष्टव्यदेवैः सहितः सन् [v]नः अस्मान्प्रति [v]आ [v]गमत् आगच्छतु। आगत्य च [v]यजिष्ठः यष्टृतमः सोऽग्निः [v]बर्हिः अस्माभिर्वेद्यां स्तीर्णे बर्हिषि [v]आ [v]सदत् आसीदतु उपविशतु ॥ बर्हिष्ठम्। बर्हितृशब्दात् 'तुश्छन्दसि' इत्यतिशायने इष्ठन्। अर्च। 'अर्च पूजायाम्'। भौवादिकः। बहुवचनस्यैकवचनम्। निघातः। गमत्। 'गम्ल गतौ'। अस्य[7] 'छन्दसि लुङ्लङ्लिटः' इति लोडर्थे लुङ्। लृदित्वात् च्लेरङ्। 'नित्यं ङितः' इतीकारलोपः। पादादित्वान्न निघातः। यजिष्ठः। यष्टृशब्दात् 'तुश्छन्दसि' इतीष्ठन्। 'तुरिष्ठेमेयःसु' इति तृचो लोपः। नित्स्वरः। सदत्। पूर्ववल्लोडर्थे लुङ्। 'षदॢ विशरणगत्यवसादनेषु' इत्यस्य लृदित्वाद्वङ्। निघातः॥

ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः।
हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥ २ ॥

ऋतऽवा। यस्य। रोदसी इति। दक्षम्। सचन्ते। ऊतयः।

हविष्मंतः। तम्। ईळते। तम्। सनिष्यन्तः। अवसे ॥ २ ॥

१. ख-ग-च-ज-ण-भ-तलोपः। २. न-ल-स-आद्यम्। ३. न-ल-स-अत्रानुक्रमणिका। ४. ख-ग-च-ज-ण-प-फ-भ-'विश्वामित्रपुत्र ..... इति' नास्ति। * त-दातुः। ५. ख-ग-च-ज-ण-भ-इदं प्रभूतम्। ६. ख-ग-च-ज-ण-भ-'स्तुतिरूपं ... वोक्थ्यजातम्' नास्ति। ७. ल-इत्यस्य।

[v]यस्य पूर्वमन्त्रे प्रतिपादितस्याग्नेः [v]रोदसी इमे द्यावापृथिव्यौ वशे भवतः । अग्नेः प्रकाशकावेम तदधीनप्रकाशके भवत इत्यर्थः । किंच [v]ऊतयः यजमानस्य फलप्रदानेन रक्षितारो देवाः [v]दक्षं यस्याग्नेर्बलं [v]सचन्ते सेवन्ते । ' सचन्ते सेवन्ते ' (निरु. ७. २३) इति यास्कः । अग्नेर्यजमानदत्त-हविष्प्रदत्वेन[1] तदधीना इत्यर्थः । एवंभूतः सोऽग्निः [v]ऋतावा सत्यकर्मा । सत्यसंकल्प इत्यर्थः । किंच [v]हविष्मन्तः संभृतहविष्का यजमाना हविर्वहनार्थं [v]तम् एवाग्निम् [v]ईळते स्तुतिरूपाभिर्वाग्भिः पूजयन्ति । किंच [v]सनिष्यन्तः धनादिलाभमिच्छन्तः [v]तम् [v]अवसे रक्षणाय तमेवाग्निमाश्रयन्ते ॥ ऋतावा । ऋतशब्दात् ' तदस्यास्ति ' इति ' छन्दसीवनिपौ वक्तव्यौ ' इति वनिप् । ' अन्येषामपि दृश्यते ' इति दीर्घः । वनिपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः । सचन्ते । ' षच समवाये ' । व्यत्ययेन आत्मनेपदम् । यद्वृत्तयोगादनिघातः । सनिष्यन्तः । सनिर्लाभः । तमिच्छन्तः । ' सुप आत्मनः क्यच् ' । ' सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः ' इति क्यचि परतः सुगागमः । क्यचः[2] स्वरः[3] ॥

स यन्ता विप्र एषां स यज्ञानामथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥ ३ ॥

सः । यन्ता । विप्रः । एषाम् । सः । यज्ञानाम् । अथ । हि । सः ।
अग्निम् । तम् । वः । दुवस्यत । दाता । यः । वनिता । मघम् ॥ ३ ॥

[v]विप्रः मेधावी कर्माभिज्ञः [v]सः अग्निः [v]एषां कालापराधेन[4] हविर्निर्वापं कृतवतां यजमानानां यथोक्तकर्मप्रदर्शनेन[5] तत्र प्रवर्तकः । [v]अथ किंच [v]यज्ञानां ज्योतिष्टोमादीनां [v]सः अग्निः नियन्ता फलप्रदानेन नियामकः । [v]हि प्रसिद्धौ । अत एव[6] सर्वस्य नियन्ता खलु । किंच [v]सः अग्निः [v]दाता ज्योतिष्टोमादिकर्मफलदाता [v]मघं मंहनीयं[7] धनम् । ' मघं रेक्णः ' (नि. २. १०. १) इति तन्नामसु पाठात् । तद्धनं [v]वनिता प्रयच्छंश्च भवति । [v]वः युष्मत्संबन्धिनं [v]तं तादृशम् [v]अग्निं हे ऋत्विजः यूयं [v]दुवस्यत आहुतिप्रदानेन परिचरत । दुवस्यतिः परिचरणकर्मा ' नमस्यति दुवस्यति ' (नि. ३. ५. ५) इति तन्नामसु पाठात् ॥ यन्ता । ' यम उपरमे ' इत्यस्य तृचि रूपम् । ' ऋदुशनस्[8] ' इत्यादिना अनङादेशः । चित्स्वरः । अथा हि[9] । ' निपातस्य[8] ' इति दीर्घः । दुवस्यत । दुवः परिचरणम् । तदिच्छन्तः । सुपः क्यच् । तदन्तस्य धातोर्लोटि रूपम् । दाता । ' डुदाञ् दाने ' । ताच्छीलिकस्तृन् । निस्वादाद्युदात्तः ॥

स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा ।
यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥ ४ ॥

सः । नः । शर्माणि । वीतये । अग्निः । यच्छतु । शम्ऽतमा ।
यतः । नः । प्रुष्णवत् । वसु । दिवि । क्षितिऽभ्यः । अप्सु । आ ॥ ४ ॥

१. न–°हविष्प्रदातृत्वेन; ल–°हविषां प्रदातृत्वेन । २. च-स–क्यष् स्वरः । ३. ख-ग-च-ज ण–कालो-परोधेन । ४. घ–°कर्मदर्शनेन । ५. प–एव स अग्निः । ६. च-ल-महनीयम् । ७. च–' हि ' नास्ति ।

Vसः Vअग्निः हविष्मदातृभ्य Vनः[1] अस्मभ्यं Vशंतमा पशुपुत्रादिसमृद्ध्या अतिशयेन सुखकराणि । शर्मशब्दो गृहवाची ' छाया शर्म वर्म ' (नि. ३. ४. २१) इति तन्नामसु पाठात् । तथाविधानि गृहाणि Vवीतये संभजनाय अग्निहोत्रादिकर्मप्राप्त्यर्थं Vयच्छतु ददातु । Vयतः यस्मादग्नेः सकाशात् Vप्रुष्णवत् समृद्धिमत्[2] दानभोगादिना व्यये सत्यपि अतिशयेन वर्धमानं Vदिवि द्युलोके Vक्षितिभ्यः भूलोकात् Vअप्सु अन्तरिक्षे च समुत्पन्नं Vवसु तत्तल्लोके असाधारण्येन वर्तमानं धनम् Vआ समन्तात् उपनमति । यतोऽग्नेः प्रसादात् त्रिषु लोकेषु विद्यमानं धनमस्मानागच्छति[3] सोऽग्निरिति पूर्वेणान्वयः ॥ वीतये । वी गतिकान्त्यादिषु[4] । ' मन्त्रे वृषेषपच° ' इत्यादिना क्तिन् । उदात्तत्वेन निपातनादुदात्तः । यच्छतु । ' यम उपरमे ' । ' इषुगमियमां छः ' इति मकारस्य छः[5] । प्रुष्णवत् । ' प्रुष स्नेहनसेचनपूरणेषु ' । अस्मादौणादिको नक्प्रत्ययः । ' तदस्यास्ति ' इति मतुप् । तस्योदात्तताभाव श्छान्दसः ॥

दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।
ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥ ५ ॥

दीदिऽवांसम् । अपूर्व्यम् । वस्वीभिः । अस्य । धीतिऽभिः ।
ऋक्वाणः । अग्निम् । इन्धते । होतारम् । विश्पतिम् । विशाम् ॥ ५ ॥

Vऋक्वाणः स्तुतिं कुर्वाणाः शस्त्रिणो होत्रादयः Vदीदिवांसं दीप्यमानम् Vअपूर्व्यं तेजस्वितया प्रतिक्षणमभिनवं[6] Vहोतारं देवानामाह्वातारं Vविशां Vविश्पतिं प्रजानामतिशयेन पालयितारं तम् Vअग्निं Vवस्वीभिः प्रशस्ताभिः Vअस्य Vधीतिभिः अग्निविषयस्तुतिलक्षणाभिर्वाग्भिः । यद्वा वस्वीभिर्वसुमद्भिरस्य धीतिभिरेतदुद्देशेन क्रियमाणैः कर्मभिः । Vइन्धते दीपयन्ति । स्तोत्रकरणहविष्प्रदानादिव्यापारेण समृद्धिं कुर्वन्ति ॥ दीदिवांसम् । दिवु क्रीडादावित्यस्य क्वसौ रूपम् । ' तुजादीनाम्° ' इत्यभ्यासस्य दीर्घः । ' लोपो व्योर्वलि° ' इति वलोपः । वस्वीभिः । वसुशब्दात् व्यत्ययेन ङीन् । निरस्वरः । धीतिभिः । ' धेट् पाने ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । किरवात् ' घुमास्था° ' इतीत्वम् । चित्स्वरः । ऋक्वाणः । ऋच्शब्दान्मतुबर्थे वनिप् । अयस्मयादित्वाद्भसंज्ञात्वात् कुत्वम् । पदसंज्ञाभावाज्जश्त्वाभावः । इन्धते । ' ञिइन्धी दीप्तौ ' । विश्पतिम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । विशाम् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।
शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥ ६ ॥

उत । नः । ब्रह्मन् । अविषः । उक्थेषु । देवऽहूतमः ।
शम् । नः । शोच । मरुत्ऽवृधः । अग्ने । सहस्रऽसातमः ॥ ६ ॥

१. त–नः प्रदातृभ्यः; न–नो हविष्प्रदातृभ्यः २. त–वृद्धिमत् । ३. ख-ग-च-ज-ण-भ–नोऽस्मानागच्छति; त-न-स–धनमस्माकमागच्छति । ४. त–गत्यादिषु । ५. त–छकारः । ६. त–प्रतिक्षणाभिनवम् । ७. त–व्योः° ।

[v]उत अपि च हे [v]अग्ने [v]नः यज्ञकारिणोऽस्मान् [v]ब्रह्मन् ब्रह्मणि अस्माभिः क्रियमाणे स्तोत्रे [v]अविषः स्तोत्रविषयन्यूनातिरेकदोषो यथा न भवति तथा पालय । किंच [v]देवहूतमः देवानामाह्वातृतमस्त्वम् [v]उक्थेषु अस्माभिः क्रियमाणेष्वाज्यप्रउगादिशस्त्रेषु अविषः गोपाय । किंच [1]मरुद्वृधः

[1]सब्बहुलम्[2] इति सप्। अस्य[3] आधेधातुकत्वाद्दृ। [4] इतश्च लोपः[5] [4] इति सप इकारलोपः। [6] लेटोऽडाटौ [6] इत्यडागमः। निघातः। उक्थेषु। [7] वच परिभाषणे [7] । अस्मात्[8] कर्मणि [9] पातृतुदिवचिरिचि[9] इत्यादिना थक्। किरत्वात्संप्रसारणम्। प्रत्ययस्वरः। देवहूतमः। ह्वयतेः क्विप्। [10] बहुलं छन्दसि [10] इति संप्रसारणपररूपत्वे। [11] हलः [11] इति दीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वम्। शोच। [12] शुच दीप्तौ [12] । अयमन्तर्भावितण्यर्थः। निघातः। मरुद्वृधः। [13] वृधु वर्धने [13] । इगुपधलक्षणः कः। मरुद्वृधावित्वात् पूर्वपदान्तोदात्तत्वम्। सहस्रसातमः। [14] षणु दाने [14] । अस्य[15] [16] जनसनखनक्रमगमो विट्[16] इति विट्। [17] विड्वनोरनुनासिकस्य[17] इत्याकारः। कृदुत्तरपदप्रकृतिस्वरः॥

नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु। द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥७॥

नु। नः। रास्व। सहस्रऽवत्। तोकऽवत्। पुष्टिऽमत्। वसु।

द्युऽमत्। अग्ने। सुऽवीर्यम्। वर्षिष्ठम्। अनुपऽक्षितम्॥ ७॥

अस्मिन्[1] सूक्ते[1] स्तूयमान[1] हे [v]अग्ने [v]सहस्रवत् सहस्रसंख्योपेतं [v]तोकवत् पुत्रपौत्रादिसहितं [v]पुष्टिमत् पोषकृत्[2]। अनेन शरीरस्य[3] क्षीरादिद्वारा बलारोग्यप्रदं गवादिकम्[4] उपलक्ष्यते। [v]द्युमत् दीप्तिमत्। अनेन रत्नकनकादिकं परिगृह्यते। [v]सुवीर्यं शोभनसामर्थ्योपेतं तत्तत्कार्येषु व्यवहारयोग्यं [v]वर्षिष्ठम् अतिशयेन बृद्धं प्रभूतमत एव [v]अनुपक्षितं व्यये क्रियमाणेऽप्यनुपक्षीणम्। एवंभूतं [v]वसु रत्नकनकपश्वादिलक्षणं धनं [v]नः अस्मभ्यं [v]नु क्षिप्रमविलम्बेन [v]रास्व दास्व॥ नू नः। [5] ऋचि तुनुघमक्षु[5] इति दीर्घः। रास्व। [6] रा दाने [6] अस्य[7] लोटि रूपम्। व्यत्ययेनात्मनेपदम्। अदादित्वाच्छपो लुक्। निघातः। सहस्रवत्। [8] मादुपधायाः[8] इति मतुपो वत्वम्। कर्दमादित्वान्मध्योदात्तः सहस्रशब्दः। पुष्टिमत्। [9] पुष पुष्टौ [9] । अस्मात् क्तिच्। प्रत्ययस्वरेणान्तोदात्तः। [10] ह्रस्वनुड्भ्याम्[10] इति मतुप उदात्तत्वम्। वर्षिष्ठम्। [11] प्रियस्थिर[11] इत्यादिना बृद्धस्य[12] वर्षि इत्यादेशः। निस्वरः। अनुपक्षितम्। [13] क्षि क्षये [13] इत्यस्य दीर्घाभावान्निष्ठानत्वं न भवति। तत्पुरुषत्वादव्ययपूर्वपदप्रकृतिस्वरः॥ ॥ १३ ॥

[14] आ होता [14] इति सप्तर्चं द्वितीयं सूक्तम्। [15] आ होता [15] इत्यनुक्रमणिका। [16] ऋषभस्तु [16] इति तुशब्दप्रयोगादस्यापि सूक्तस्य ऋषभ ऋषिः। अनुक्तत्वात् त्रिष्टुप्। अग्निर्देवता। एतदादीनि दश[17] सूक्तानि तृतीयाष्टमवर्जितानि प्रातरनुवाके आश्विनशस्त्रे त्रैष्टुभे छन्दसि विनियुक्तानि।

१. फ–[14] ऐहिकमामुष्मिकं च [14] नास्ति। २. ख–[2] सिब्बहुलं लेटि [2] । ३. त–तस्य। ४. ल–इत्यस्मात्। ५. त-ल–इत्यस्य। ६. ख-ग-च-ज-ण–[1] अस्मिन् सूक्ते स्तूयमान [1] नास्ति। ७. त-ल–पोषणकृत्। ८. ख-ग-च-ज-ण–शरीरस्य क्षीरादिधारावलीरोपादव्यंगत्वादिकम्; त–शरीरे क्षीरादिद्वारा बलारोग्यप्रदं गवादिकम्। ९. त-ल-इत्यस्य। १०. ख-ग-च-ज-ण-न-भ-स–[12] बृद्धस्य [12] नास्ति। ११. ख-ग-च-ज-ण-फ-भ-स–[17] दश [17] नास्ति।

'अथैतस्याः' इति खण्डे सूत्रितम्—'आ होतेति दशानां तृतीयाष्टमे उद्धरेदिति त्रैष्टुभम्' (आश्व. श्रौ. ४. १३) इति ॥

आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ॥
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥ १ ॥

आ । होता । मन्द्रः । विदथानि । अस्थात् । सत्यः । यज्वा । कविऽतमः । सः । वेधाः ।
विद्युत्ऽरथः । सहसः । पुत्रः । अग्निः । शोचिःऽकेशः । पृथिव्याम् । पाजः । अश्रेत् ॥ १ ॥

ऋषभोऽग्निं स्तौति। [v]होता देवानामाह्वाता [v]मन्द्रः स्तोतुः मादयिता[1] [v]सत्यः सत्यकर्मा [v]कवितमः अतिशयेन मेधावी [v]यज्वा देवानां यष्टा [v]वेधाः सर्वस्य जगतो विधाता । एवंविधमहिमोपेतः [v]सः अग्निः [v]विदथानि अस्माभिः क्रियमाणान् यज्ञान् [v]आ [v]अस्थात् आतिष्ठति प्राप्नोति । किंच [v]विद्युद्रथः विद्योतमानयानोपेतः[2] [v]शोचिष्केशः । शोचींषि ज्वालाः केशा यस्य सः । ज्वालामयकेशोपेतः [v]सहसस्पुत्रः बलस्य सूनुः एवंभूतः सः [v]अग्निः [v]पृथिव्यां विस्तीर्णेऽन्तरिक्षे [v]पाजः तेजः स्वकीयां प्रभाम् [v]अश्रेत् श्रयते प्रापयति । यद्वा पृथिव्यां भूमौ वर्तमानः पाजो बलं सेवते ॥ मन्द्रः । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। अस्मात् 'स्फायितञ्चि°' इत्यादिना रक्। इदित्त्वात् नुम्। अस्थात्। 'ष्ठा गतिनिवृत्तौ'। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लुङ्। 'गातिस्था°' इति सिचो लोपः। निघातः। यज्वा। 'यज देवपूजासंगतिकरणदानेषु'। 'सुयजोर्ङ्वनिप्' इति ङ्वनिप्। तस्य पित्त्वादनुदात्तस्वरे[3] धातुस्वरः[3]। कवितमः। 'कु शब्दे'। कौति कूयते वा। 'अच इः[4]' इति कर्तरि भावे वा इप्रत्ययः। तमपः पित्त्वादनुदात्तत्वे प्रत्ययस्वरः। शोचिष्केशः। 'शुच दीप्तौ'। 'अर्चिशुचिहुसृपिच्छादिभ्य इसिः' इति इसिः। प्रत्ययस्वरेणान्तोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। अश्रेत्। 'श्रिञ् सेवायाम्' इत्यस्य छन्दसि वर्तमाने लङ्। 'बहुलं छन्दसि' इति शपो लुक्। सार्वधातुकगुणः। निघातः ॥

अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥ २ ॥

अयामि । ते । नमःऽउक्तिम् । जुषस्व । ऋतऽवः । तुभ्यम् । चेतते । सहस्वः ।
विद्वान् । आ । वक्षि । विदुषः । नि । सत्सि । मध्ये । आ । बर्हिः । ऊतये । यजत्र ॥ २ ॥

[v]ऋतावः । ऋतं सत्यभूतो यज्ञः । तद्वन् हे अग्ने [v]ते त्वद्विषयां [v]नमउक्तिं नमस्कारवाक्यम् अहम्[5] [v]अयामि प्रेरयामि उच्चारयामि । हे [v]सहस्वः । सहो बलम् । तद्वन्नग्ने [v]चेतते चेतयित्रे कर्मणः प्रज्ञापकाय [v]तुभ्यं नमउक्तिः क्रियते । तां [v]जुषस्व । अस्माभिः क्रियमाणां नमस्कारोक्तिं सेवस्व ।

---

१. घ-मदयिता । २. ख-ग-च-ज-ण-न-स-द्योतमान° । ३. च-स-पित्त्वादनुदात्तत्वे प्रत्ययस्वरः । ४. ख-ग-न-ज-ण-न-भ-ल-'इः' नास्ति । ५. ख-ग-च-ज-ण-भ-ल-'अहं' नास्ति ।

किंच [v]विद्वान् आनुपूर्व्येण देवाह्वानाभिज्ञः [v]विदुषः कर्माभिज्ञान् [v]आ [v]वक्षि आवह । किंच [v]यजत्र[1] यष्टव्य हे अग्ने [v]ऊतये अस्माकं रक्षणाय [v]मध्ये [v]बर्हिः स्तीर्णस्य बर्हिषो मध्ये [v]आ [v]नि [v]षत्सि आ समन्ताच्निषीद ॥ अयामि । ' इण्[2] गतौ ' भौवादिकः । पादादित्वादनिघातः । जुषस्व । ' जुषी प्रीतिसेवनयोः ' । तुदादिः । लोटि रूपम् । निघातः । चेतते । ' चिती संज्ञाने ' । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे ततः[3] अन्तोदात्तताभावात् ' शतुरनुमः° ' इति विभक्तेरुदात्ततेति भावः । धातुस्वरः । सहस्वः । सहोऽस्यस्येति मतुप् । सकारस्य ' तसौ मत्वर्थे ' इति भसंज्ञकत्वात् रुत्वं भवति । ' मादुपधायाः° ' इति मतुपो वत्वम् । ' उगिदचाम्° ' इति नुम् । हल्ङ्यादिलोपे नकारस्य ' मतुवसो रुः° ' इति रुत्वम् । आमन्त्रितनिघातः । विदुषः । ' विद ज्ञाने ' इत्येतस्मात्[4] उत्तरस्य शतुः ' विदेः शतुर्वसुः ' इति वत्वादेशः । भसंज्ञायां वसोः संप्रसारणम् । प्रत्ययस्वरः । सत्सि । षदॢ विशरणादिषु । लटि ' बहुलं छन्दसि ' इति शपो लुक् । शित्प्रत्ययपरत्वाभावात् सीदादेशाभावः । ' सदिरप्रतेः[5] ' इति षत्वम् । यजत्र । यज देवपूजादिषु । ' अमिनक्षियजि° ' इत्यादिना अत्रन्प्रत्ययः । आमन्त्रितनिघातः ॥

द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत्सीमञ्जन्ति पूर्व्यं हविर्भिरा वन्धुरेव तस्थतुर्दुरोणे ॥ ३ ॥

द्रवताम् । ते । उषसा । वाजयन्ती इति । अग्ने । वातस्य । पथ्याभिः । अच्छ ।
यत् । सीम् । अञ्जन्ति । पूर्व्यम् । हविःऽभिः । आ । वन्धुराऽइव । तस्थतुः । दुरोणे ॥३॥

हे [v]अग्ने [v]वाजयन्ती वाजमन्नं कुर्वाणे [v]उषसा[6] उषासानक्ते[7] अहोरात्रौ[8] [v]ते त्वां [v]द्रवताम् अभिगच्छताम् । त्वमपि [v]वातस्य वायोः [v]पथ्याभिः मार्गैः [v]अच्छ तावहोरात्रौ शीघ्रमभिगच्छ । [v]यत यस्मात्कारणात् अहोरात्राभ्यां[9] परस्पराभिगमनेनान्योन्यसंबन्धस्तस्मादहोरात्रयोः सायंप्रातःकालयोः [v]पूर्व्यं पुरातनं त्वामृत्विजः [v]हविर्भिः आज्यादिभिः [v]सीं सर्वतः [v]अञ्जन्ति सिञ्चन्ति । किंच [v]वन्धुरेव । यथा कूबरस्थानं परस्परसंसक्तेपाद्र्योपेतं तद्वत्संमतौ तावहोरात्रौ [v]दुरोणे अस्माकं गृहे अग्निहोत्रादिकर्मसिद्ध्यर्थम् [v]आ आवृत्य पुनः पुनरावर्तमानौ सन्तौ [v]तस्थतुः तिष्ठताम् ॥ द्रवताम् । ' द्रु गतौ ' इत्यस्य लोटि रूपम् । पथ्याभिः । पथिषु साधव इत्यर्थे ' तत्र साधुः ' (पा. सू. ४. ४. ९८) इति यत् । ' नस्तद्धिते ' इति टिलोपः । ' तिस्वरितः ' इति स्वरितः । तस्थतुः । तिष्ठतेर्लिट्यतुसि रूपम् । निघातः ॥

मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहसस्पुत्र तिष्ठाः अभि क्षितीः प्रथयन्सूर्यो नॄन् ॥ ४ ॥

मित्रः । च । तुभ्यम् । वरुणः । सहस्वः । अग्ने । विश्वे । मरुतः । सुम्नम् । अर्चन् ।
यत् । शोचिषा । सहसः । पुत्र । तिष्ठाः । अभि । क्षितीः । प्रथयन् । सूर्यः । नॄन् ॥ ४ ॥

---

१. ख-ग-च-ज-ण–हे यजत्र । २. त–अय । ३. त-कृतो; ल–कृते । ४. च-ल–इत्यस्मात् । ५. ल-स–सदेरप्रतेः । ६. त–' उषसा ' नास्ति । ७. च-त–उषसानक्ते । ८. त–अहोरात्रे । ९. त–अहोरात्रयोः ।

[v]सहस्वः बलवन् हे [v]अग्ने [v]मित्रश्च[1] [v]वरुणः च मित्रावरुणौ [v]विश्वे [v]मरुतः सर्वे देवाश्च [v]तुभ्यं त्वदर्थं [v]सुम्नं स्तोत्रम् [v]अर्चन् वहन्ति । यद्वा सर्वे देवास्तुभ्यं त्वां सुम्नं सुखेनार्चन् पूजयन्ति । [v]यत् यस्मात् कारणात् [v]सहसस्पुत्र हे अग्ने [v]सूर्यः । सुष्ठु अर्यः स्वामी । यद्वा सर्वान्तर्यामितया सुष्ठु प्रेरकः । यद्वा सूर्यः शोभनवीर्यः । [v]अभि [v]क्षितीः । क्षितिशब्दो मनुष्यवाची ' विशः क्षितयः ' (नि. २.३.६) इति तन्नामसु पाठात् । मनुष्यानभिलक्ष्य [v]नॄन् मार्गप्रदर्शकत्वेन नेतॄन् आत्मनो रश्मीन् [v]प्रथयन् सर्वतो विस्तारयंस्त्वं [v]शोचिषा दीप्त्या समानः सन् [v]तिष्ठाः तिष्ठसि । तस्मादेते[2] देवाः पूजयन्तीति ॥ अर्चन् । ' अर्च पूजायाम् ' इत्यस्य लङि रूपम् । अडभावश्छान्दसः । तिष्ठाः । ' ष्ठा गतिनिवृत्तौ ' इत्यस्य लेटि रूपम् । यद्योगात्[3] अनिघातः । ' पाघ्रा° ' इत्यादिना तिष्ठादेशस्याद्युदात्तत्वेन निपातनादाद्युदात्तः । सूर्यः । ' राजसूयसूर्य° ' इति क्यबन्तत्वेन निपातनात् सर्वार्थाः[4] सिद्धा भवन्ति ॥

वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥ ५ ॥

वयम् । ते । अद्य । ररिम । हि । कामम् । उत्तानऽहस्ताः । नमसा । उपऽसद्य ।
यजिष्ठेन । मनसा । यक्षि । देवान् । अस्रेधता । मन्मना । विप्रः । अग्ने ॥ ५ ॥

हे [v]अग्ने [v]उत्तानहस्ताः हविःस्वीकरणादुत्तानपाणयः [v]वयं [v]कामं कमनीयं पुरोडाशादिहविः [v]ते तुभ्यम् [v]अद्य इदानीमस्मिन् कर्मणि [v]ररिम दद्मः । [v]नमसा नमस्कारेण [v]उपसद्य प्रसन्नो भूत्वा [v]यजिष्ठेन यष्टृतमेन यागेच्छावता [v]मनसा अन्तःकरणेन [4]देवान् [v]यक्षि यजनीयान्[5] देवान्[6] यज[6] पूजय। किंच [v]विप्रः मेधावी कर्माभिज्ञः त्वम् [v]अस्रेधता अक्षीणेन प्रभूतेन [v]मन्मना मन्तव्येन स्तोत्रेण देवान् पूजय[7] ॥ अद्य । ' सद्यः परुत्परार्यैषमः° ' इत्यादिना निपातितः । अन्तोदात्तश्च । ररिम । ' रा दाने ' इत्यस्य वर्तमाने लिटि ' परस्मैपदानां णलतुः ' (पा. सू. ३. ४. ८२) इत्यादिना मसो मादेशः । क्रादिनियमादिडागमः । ' आतो लोप इटि च ' इत्याकारलोपः । हियोगादनिघातः । ' आगमा अनुदात्ताः ' इतीटोऽनुदात्तत्वात् प्रत्ययस्वरः । उपसद्य । ' षदॢ विशरणगत्यवसादनेषु ' । अस्य[8] क्त्वा । ' समासेऽनञ्पूर्वे क्त्वो ल्यप् ' इति ल्यप् । लित्स्वरः । यक्षि । ' यज देवपूजासंगतिकरणदानेषु '। लोटि ' बहुलं छन्दसि ' इति शपो लुक् । षत्वकत्वे । सिपो ह्यादेशाभावश्छान्दसः । अस्रेधता । स्रिधिः क्षयार्थः । ' तत्पुरुषे° ' इति नञ्स्वरः ॥

त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥ ६ ॥

त्वत् । हि । पुत्र । सहसः । वि । पूर्वीः । देवस्य । यन्ति । ऊतयः । वि । वाजाः ।
त्वम् । देहि । सहस्रिणम् । रयिम् । नः । अद्रोघेण । वचसा । सत्यम् । अग्ने ॥ ६ ॥

---

१. त–मित्रः । २. त-ल-स–तस्मात्ते । ३. ल–यद्वृत्तयोगात् । ४. त-ल-स–सर्वेऽर्थाः । ५. च–यजनीयान्; त-न–' यजनीयान् देवान् ' नास्ति । ६. ख-ग-च-ज-ण–' यज ' नास्ति । ७. ख-ग-च-ज-ण-भ–पूजय हि । ८. त–इत्यस्य । ९. त–ल्यपि ।

[v]सहसः [v]पुत्र बलस्य पुत्र हे [v]अग्ने [v]देवस्य देवनशीलस्य कर्मकरणप्रवृत्तस्य[1] यजमानस्य [v]त्वत् त्वत्तः सकाशात् [v]पूर्वीः प्रभूताः [v]ऊतयः विघ्नपरिहारेण कर्मपरिपालनादिरूपाः[2] रक्षाः [v]वि [v]यन्ति [v]हि[3] विविधं गच्छन्ति खलु। तमिमं यजमानं प्राप्नुवन्ति। तथा [v]वाजाः अन्नानि [v]वि यन्ति। एनं यजमानं प्राप्नुवन्ति। किंच हे अग्ने [v]त्वं [v]सहस्रिणं सहस्रसंख्याकं [v]रयिं धनं [v]नः अस्मभ्यं [v]देहि। तथा [v]अद्रोघेण द्रोहरहितेन पापशून्येन [v]वचसा वाक्येन युक्तं [v]सत्यं सत्यशीलं सन्मार्गे प्रवर्तमानं पुत्रं च देहि प्रयच्छ[4] ॥ त्वत्। युष्मच्छब्दस्य[5] पञ्चम्येकवचने[6] त्वादेशः। ङसेः 'एकवचनस्य च' (पा. सू. ७. १. ३२) इत्यदादेशः। एकादेशस्वरः। पुत्र सहसः। 'परमपि छन्दसि' इति पराङ्वद्भावात् द्वयोः सर्वानुदात्तत्वम्। देहि। 'डुदाञ् दाने' इत्यस्य लोटि 'ध्वसोरेद्धौ॰' इति धातोरेत्वम् अभ्यासलोपश्च। निघातः। अद्रोघेण। 'द्रुह जिघांसायाम्'। घञ्। द्रोघः। घकारश्छान्दसः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् ॥

तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥ ७ ॥

तुभ्यम्। दक्ष। कविक्रतो इति कविऽक्रतो। यानि। इमा। देव। मर्तासः। अध्वरे। अकर्म। त्वम्। विश्वस्य। सुऽरथस्य। बोधि। सर्वम्। तत्। अग्ने। अमृत। स्वद। इह ॥ ७ ॥

[v]दक्ष समृद्धतया[7] सामर्थ्योपेत [v]कविक्रतो अतीन्द्रियविषयप्रज्ञोपेत सर्वज्ञ [v]देव[8] दीप्यमान[9] हे अग्ने [v]मर्तासः यजमाना वयं [v]तुभ्यं त्वदर्थं [v]यानीमा यानि इमा[10] इमानि हवींषि [v]अध्वरे यज्ञे [v]अकर्म हविस्त्यागमकार्ष्म। [v]त्वं च [v]सुरथस्य शोभनयानोपेतस्य [v]विश्वस्य सर्वस्य यजमानस्य [v]बोधि गोपायिता भवामीति बुध्यस्व। हे [v]अमृत[11] मरणधर्मरहित [v]अग्ने [v]इह अस्मिन्कर्मणि अस्माभिः दत्तं [v]तत्[12] [v]सर्वं हविः [v]स्वद आस्वादय ॥ अकर्म[13]। 'डुकृञ् करणे' इत्यस्य लङि 'छन्दस्युभयथा' इति मस आर्धधातुकत्वेन ङित्त्वाभावाद्गुणः। यदवृत्तयोगादनिघातः। बोधि। 'बुध अवगमने'। 'छन्दसि लुङ्॰' इति लोडर्थे लुङ्। 'तिङां तिङो भवन्ति' इति सिपस्तादेशः। 'दीपजनबुध॰' इत्यादिना कर्तरि चिण्। 'चिणो लुक्' इति तप्रत्ययस्य लोपः। अडभावश्छान्दसः। स्वद। 'स्वद आस्वादने'। अन्तर्भावितण्यर्थः। लोटि रूपम्। निघातः[14] ॥ ॥ १४ ॥

'वि पाजसा पृथुना' इति सप्तर्चं तृतीयं सूक्तं कतगोत्रोत्पन्नोत्कीलस्यार्ष[15] त्रैष्टुभमाग्नेयम्। अत्र[16] इयमनुक्रमणिका—'वि पाजसा काश्य उत्कीलस्तु' इति। कतगोत्रोत्पन्न उत्कीलो नाम ऋषिः। प्रातरनुवाकाश्विनशस्त्रयोः 'आहोता' इत्यादिसूक्तदशकं विनियुक्तं तत्रेदं च द्वितीयं सूक्तम्[17] ॥

१. त-ल—कर्मकरणे प्रवृत्तस्य। २. ख-ग-च—कर्मपरिपालनरूपाः। ३. ख-ग-च-ज-ण-न-प-फ-भ-स—'हि' नास्ति। ४. ख-ग-च-ज-ण-प-भ—प्रयच्छ हि। ५. ख-ग-च-ज-ण-भ-स—एकवचने। ६. त-न-ल—अतिसमृद्धतया। ७. प—'देव दीप्यमान' नास्ति। ८. त—'इमा' नास्ति। ९. ख-ग-च-ज-ण-फ—देव द्योतमान अमृत। १०. त—'तत्' नास्ति। ११. ख-ग-च-ज-ण-न-फ—'अकर्म.....निघातः' नास्ति। १२. त—'कतगोत्रोत्पन्नोत्कीलस्यार्षम्' नास्ति। १३. ख-ग-चज-ण-फ—'अत्र.....सूक्तम्' नास्ति।

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥ १ ॥

वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः ।
सुऽशर्मणः । बृहतः । शर्मणि । स्याम् । अग्नेः । अहम् । सुऽहवस्य । प्रऽनीतौ ॥ १ ॥

उत्कीलः स्तौति। हे अग्ने [v]पृथुना विस्तीर्णेन [v]पाजसा तेजसा [v]शोशुचानः अत्यर्थं दीप्यमानस्त्वं [v]द्विषः कर्मानुष्ठानविघ्नकारिणः शत्रून्[1] [v]वि [v]बाधस्व विशेषेण नाशय। तथा [v]अमीवाः रोगराहित्येन सामर्थ्योपेतानि [v]रक्षसः । उभयत्र सुब्व्यत्ययः । तानि रक्षांसि बाधस्व । कर्मविघ्नकारीणि तान्यपनुदस्व । यद्वा अमीवाः आभिमुख्येनागमनपरागमनपराः पिशाचिकाश्च बाधस्व। [v]सुशर्मणः स्वर्गादिलक्षणशोभनसुखहेतोः [v]बृहतः महतः शत्रुविजयेन प्राप्तमहिम्नः [v]सुहवस्य सुष्ठ्वाह्वानोपेतस्य [v]अग्नेः [v]शर्मणि अस्माकं सुखहेतौ [v]प्रणीतौ उत्तरवेद्यादिस्थानेषु प्रणयने । प्रकर्षेण नयनं तत्र तत्रानीय प्रक्षेपः । एवंभूते तव प्रणयने[2] [v]अहं [v]स्याम् अग्निप्रणयनपूर्वके ऋत्वनुष्ठाने भवेयम् ॥ पाजसा । ' पा रक्षणे ' । ' असुन् ' इत्यनुवृत्तौ ' पातेर्बले जुट् च ' इत्यसुन् । जुडागमः । नित्त्वादाद्युदात्तः । पृथुना । ' प्रथ प्रख्याने ' । ' उत् ' इत्यनुवृत्तौ ' प्रथिभ्रदिभ्रस्जां संप्रसारणम् ' इत्युप्रत्ययः । तासंनियोगेन संप्रसारणम् । प्रत्ययस्वरः । शोशुचानः । ' शुच दीप्तौ ' इत्यस्य यङ्लुकि ' गुणो यङ्लुकोः ' इत्यभ्यासस्य गुणः । व्यत्ययेन शानच् । चर्करीतस्य अदादिवद्भावात् शपो लुक् । चित्त्वादन्तोदात्तत्वे प्राप्ते ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । बाधस्व । ' बाधृ लोडने[3] ' इत्यस्य लोटि रूपम् । पादादित्वान् निघाताभावः । सुशर्मणः । ' शृ हिंसायाम् ' । दुःखं शृणातीत्यौणादिको मनिन् । ' सोर्मनसी० ' इति उत्तरपदाद्युदात्तत्वम् । स्याम् । ' अस भुवि ' इत्यस्य लिङि ' यासुट् परस्मैपदेषु० ' इत्यादिना यासुट् । ' लिङः सलोपः० ' इति सलोपः । यासुटो ङित्त्वात् ऋसोरल्लोपः । निघातः ॥

त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥ २ ॥

त्वम् । नः । अस्याः । उषसः । विऽउष्टौ । त्वम् । सूरे । उत्ऽइते । बोधि । गोपाः ।
जन्मऽइव । नित्यम् । तनयम् । जुषस्व । स्तोमम् । मे । अग्ने । तन्वा । सुऽजात ॥२॥

हे [v]अग्ने [v]त्वम् [v]अस्याः अद्य वर्तमानायाः [v]उषसो [v]व्युष्टौ व्युच्छने प्रकाशने [v]सूरे सूर्ये [v]उदिते च सति [v]नः अग्निहोत्रादिकर्मणि प्रवृत्तानामस्माकं [v]गोपाः गोपायिता भवानीति [v]बोधि बुध्यस्व । केचित्सूर्योदयात्प्रागग्निहोत्रं जुह्वति केचित् उदिते तस्मिञ्जुह्वति । तेषामुभयेषां पालयिता भवेत्यर्थः । [v]तन्वा [v]सुजात ज्वालापरिवृतेन शरीरेण सुष्ठु जात देदीप्यमान । अथवा तन्वा सुजातः आत्मनैव सुजातः स्वयंभूरित्यर्थः । तादृशस्त्वं [v]मे मदीयं [v]स्तोमं त्रिवृत्पञ्चदशादिलक्षणं स्तोत्रं

१. ख-ग-ज-ण—तान् शत्रून् । २. ज-ण—प्रणयनम् । ३. त—विलोडने ।

[v]नित्यं [v]जुषस्व । तत्र दृष्टान्तः । [v]जन्मेव इति । यथा जन्म जनकः पिता औरसं [v]तनयं पुत्रं परिष्वङ्गादिभिः सेवते तद्वदस्माभिः क्रियमाणमिमं सेवस्व ॥ व्युष्टौ । ' उछी विवासे ' । तमो विवास्यते अनया इति करणे क्त्निन् । व्रश्चादिना षत्वम् । ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम् । गोपाः । ' गुपू रक्षणे ' । ' गुपूधूपविच्छिपणिपनिभ्यः ' इत्यायप्रत्ययः । तदन्ताद्धातोः क्विप् । ' अतो लोपः ' इत्यकारलोपः । ' लोपो व्योः ' इति यलोपः । धातुस्वरः । जुषस्व । ' जुषी प्रीतिसेवनयोः ' इत्यस्य लोटि रूपम् । निघातः ॥

त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥ ३ ॥

त्वम् । नृऽचक्षाः । वृषभ । अनु । पूर्वीः । कृष्णासु । अग्ने । अरुषः । वि । भाहि ।
वसो इति । नेषि । च । पर्षि । च । अति । अंहः । कृधि । नः । राये । उशिजः । यविष्ठ ॥३॥

[v]वृषभ कामानां वर्षितर्हे [v]अग्ने [v]नृचक्षाः नृणां मनुष्याणां शुभाशुभकर्मणोर्द्रष्टा [v]कृष्णासु रात्रिषु [v]अरुषः आरोचमानः [v]त्वम् [v]अनु अनुक्रमेण [v]पूर्वीः बह्वीर्ज्वालाः [v]वि [v]भाहि विशेषेण प्रकाशय । [v]वसो सर्वस्य प्रकाशप्रदानेन स्वस्वस्थानेषु वासयितरग्ने त्वं नः अस्मान् [v]नेषि कर्मानुरूपफलानि[1] [v]च प्रापय । [v]अंहः अस्माकं दारिद्र्यलक्षणं पापम् [v]अति [v]पर्षि [v]च अतिपारय । निवारय इति यावत् । किंच [v]यविष्ठ युवतम हे अग्ने [v]नः अस्मान् [v]राये धनाय [v]उशिजः कामयमानान् [v]कृधि कुरु । अभिलषितफलप्रदानेन[2] प्राप्तकामान्कुर्वित्यर्थः ॥ नृचक्षाः । ' चक्षिङ् व्यक्तायां वाचि ' । अयमत्र दर्शने वर्तते । ' असुन् ' इत्यनुवृत्तौ ' चक्षेर्बहुलं शिच्च ' इत्यसुन् । शिद्भावात् ख्याजादेशाभावः । कृदुत्तरपदप्रकृतिस्वरः । वृषभ । ' वृषु सेचने ' । ' अभच् ' इत्यनुवृत्तौ ' ऋषिवृषिभ्यां कित् ' इत्यभच् । कित्त्वाद्गुणाभावः । अपादादित्वान्निघातः । पूर्वीः । पुरुशब्दस्य ' वोतो गुणवचनात् ' इति ङीप् । आद्यस्योकारस्य दीर्घश्छान्दसः । प्रत्ययस्वरेणान्तोदात्तः । भाहि । ' भा[3] दीप्तौ[3] ' । अन्तर्भावितण्यर्थः । लोटि रूपम् । वसो । ' वस निवासे ' । ' उः ' इत्यनुवृत्तौ ' शृस्वृस्निहित्रप्यसिवसि ' इत्यादिना उप्रत्ययः । पादादित्वान्न निघातः । षाष्टिकमाद्युदात्तत्वम् । नेषि । ' णीञ् प्रापणे ' । छन्दसि लोडर्थे लट् । ' बहुलं छन्दसि ' इति शपो लुक् । ' आमन्त्रितं पूर्वमविद्यमानवत् ' इत्यामन्त्रितस्याविद्यमानवत्त्वेन पादादित्वान्न निघातः । पर्षि । ' पॄ पालनपूरणयोः ' । ' चादिषु च ' इति न निघातः । कृधि । ' डुकृञ् करणे ' इत्यस्य लोटि ' सेर्ह्यपिच्च ' इति हिरादेशः । तस्य ' श्रुशृणुपॄकृवृभ्यश्छन्दसि ' इति धिरादेशः । ' बहुलं छन्दसि ' इति उप्रत्ययस्य लुक् । पादादित्वान्न निघातः । राये । ' रा[4] दाने ' । ' रातेर्डेः ' इति डैप्रत्ययः । ' ऊडिदम् ' इत्यादिना विभक्तेरुदात्तत्वम् । उशिजः । ' वश कान्तौ ' । ' वशेः किच्च ' इतीजिप्रत्ययः । कित्त्वात्संप्रसारणम् । प्रत्ययस्वरः । यविष्ठ । युवशब्दादतिशायने इष्ठन्प्रत्ययः । ' स्थूलदूरयुव ' इत्यादिना यणादेः[5] परस्य[5] लोपः पूर्वस्य च गुणः । आमन्त्रितत्वान्निघातः ॥

१. ज-ण-प–कर्मफलानि । २. घ–अभिमतफलप्रदानेन । ३. ख-ग-च-ज-ण-न-भ–' भा दीप्तौ ' नास्ति । ४. ख-ग-च-ज-ण-न-भ–' रा दाने ' नास्ति । ५. त–यणादिपरस्य ।

अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥ ४ ॥

अषाळ्हः । अग्ने । वृषभः । दिदीहि । पुरः । विश्वाः । सौभगा । सम्ऽजिगीवान् ।
यज्ञस्य । नेता । प्रथमस्य । पायोः । जातऽवेदः । बृहतः । सुऽप्रनीते ॥ ४ ॥

हे Vअग्ने Vअषाळ्हः शत्रुभिरसोढोऽपराजितः । स्वयं शत्रूञ्जयतीत्यर्थः । Vवृषभः कामानां वर्षयिता एवंभूतस्त्वं Vविश्वाः सर्वाः Vपुरः शत्रूणां पुरीः Vसौभगा तत्रस्थानि शोभनान्युत्तमानि धनानि च Vसंजिगीवान् सम्यक् जयन् Vदिदीहि सर्वतो ज्वालाभिर्दीप्यस्व । Vसुप्रणीते शोभनप्रणयने Vजातवेदः जातप्रज्ञ हे अग्ने Vबृहतः उपदिष्टातिदिष्टविधेतिकर्तव्यताकलापेन[1] महतः Vपायोः तत्फलप्रदानेन रक्षकस्य Vप्रथमस्य मुख्यतया प्रथमं क्रियमाणस्य । 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति श्रुतेः । तादृशस्य ज्योतिष्टोमाख्यस्य[2] Vयज्ञस्य[2] Vनेता हविर्वहनदेवताह्वानादिक्रियाया निर्वाहको भव ॥ अषाळ्हः । 'षह मर्षणे' अस्य निष्ठायां 'हो ढः' इति ढकारः । 'झषस्तथोर्धोऽधः' इति क्तस्य धकारः[3] । ष्टुत्वेन ढः । ढलोपे कृते 'ढ्रलोपे पूर्वस्य दीर्घः' इति दीर्घः । ओत्वाभावश्छान्दसः । 'सहेः साडः सः' इति सकारस्य मूर्धन्यादेशः । अव्ययपूर्वपदप्रकृतिस्वरे नञ्स्वरः । वृषभः । 'वृष सेचने' । 'ऋषिवृषिभ्यां कित्' इत्यभच् । चित्स्वरः । दिदीहि । दिवु क्रीडादौ इत्यस्य यङ्लुकि लोटो[4] मध्यमैकवचने[4] 'संज्ञापूर्वको विधिरनित्यः' इत्यभ्यासस्य गुणाभावः । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति 'पूर्वत्रासिद्धम्' इत्यस्याप्रवृत्तौ परत्वात् 'हलि च' इति दीर्घत्वम् । पश्चात् वलोपः । सौभगा । 'सुभगाद्यन्मन्त्रे[5]' इत्युद्गात्रादिषु पाठाद्भावार्थेऽञ् । 'हृद्भगसिन्ध्वन्ते[6]' इति पूर्वपदस्य वृद्धिः । उत्तरपदस्य[6] वृद्धिर्न भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । 'सुपां सुलुक्' इति सुपो डादेशः । तेन च सौभाग्येन धनान्युपलक्ष्यन्ते । जित्त्वादाद्युदात्तः । संजिगीवान् । 'जि जये' । छन्दसि लिट् । तस्य क्वसुः । 'सन्लिटोर्जेः' इति कवर्गादेशः । प्रत्ययस्वरः । दीर्घश्छान्दसः । पायोः । 'पा रक्षणे' । 'कृवापाजिमि' इत्यादिना उण्प्रत्ययः । 'आतो युक् चिण्कृतोः' इति युगागमः । प्रत्ययस्वरः ॥

अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीयानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥ ५ ॥

अच्छिद्रा । शर्म । जरितरिति । पुरूणि । देवान् । अच्छ । दीयानः । सुऽमेधाः ।
रथः । न । सस्निः । अभि । वक्षि । वाजम् ।
अग्ने । त्वम् । रोदसी इति । नः । सुमेके इति सुऽमेके ॥ ५ ॥

१. ख-ग-च-ज-ण-°कर्तव्यकलापेन । २. ख-ग-च-ज-ण-न-भ-ज्योतिष्टोमस्य । ३. त-धः । ४. त-लोण्मध्यमैकवचने । ५. त-न-भ-सुभगमन्त्रे । ६. ख-ग-च-ज-ण-फ-उत्तरपदस्य च ।

[v]जरितः सर्वस्य जगतोऽन्तकाले जरयितर्हे अग्ने [v]सुमेधाः शोभनप्रज्ञोपेतः [v]दीद्यानः स्वतेजसा प्रकाशमानस्त्वं [v]देवान् यष्टव्यान् देवान् [v]अच्छ अभिलक्ष्य तदुद्देशेन क्रियमाणानि [v]पुरूणि [v]शर्म स्वर्गादिसुखसाधनभूतानि अग्निहोत्रादीनि कर्माणि [v]अच्छिद्रा अच्छिद्राणि कुरु। कर्तृकर्मसाधनवैकल्यराहित्येन संपूर्णानि कुरु। किंच हे अग्ने [v]त्वं [v]सन्निः[1] संनिरुद्धः स्वकीयं सततगमनं संनिरुध्य हविष्प्रक्षेपपर्यन्तमत्र वर्तमानस्त्वं [v]वाजं [v]नः अस्माभिर्दीयमानं हविर्लक्षणमन्नम् [v]अभि देवानभिलक्ष्य [v]वक्षि वह प्रापय। तत्र दृष्टान्तः। [v]रथो [v]न रथ इव। यथा रथो धान्यादिकमूढ्वा[2] तत्स्वामिनं प्रापयति तद्वत्। किंच त्वम् [v]अग्ने[3] [v]रोदसी द्यावापृथिव्यौ [v]सुमेके शोभनरूपोपेते स्वकीयप्रभाभिः प्रकाशयुक्ते कुरु॥ दीद्यानः। दीदेतिर्दीप्तिकर्मा। तस्मात् शानच्। 'अभ्यमनामादिः' इत्याद्युदात्तत्वम्। सुमेधाः। 'नित्यमसिच् प्रजामेधयोः' इत्यसिच्प्रत्ययः। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। सन्निः[4]। 'षस[5] स्वप्ने[6]'। अस्मादौणादिको निन्। निस्वादाद्युदात्तत्वम्[7]। वक्षि। 'वह प्रापणे' अस्य लोटः सिपि 'बहुलं छन्दसि' इति शपो लुक्। ढत्वकत्वे। हिरादेशश्छान्दसत्वान्न भवति। निघातः[8]॥

प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात्॥ ६॥

प्र। पीपय। वृषभ। जिन्व। वाजान्। अग्ने। त्वम्। रोदसी इति। नः। सुदोघे इति सुऽदोघे। देवेभिः। देव। सुऽरुचा। रुचानः। मा। नः। मर्तस्य। दुःऽमतिः। परि। स्थात्॥६॥

[v]वृषभ कामानां वर्षितर्हे [v]अग्ने [v]त्वं [v]नः अस्माकं [v]प्र [v]पीपय अभिलषितफलानि वर्धय[9]। [v]वाजान् अन्नानि च [v]जिन्व प्रयच्छ। किंच [v]देव दीप्यमान हे अग्ने [v]सुरुचा शोभनदीप्त्या [v]रुचानः शोभमानस्त्वं [v]देवेभिः यजनीयदेवैः सहितोऽस्माकं [v]रोदसी इमे द्यावापृथिव्यौ [v]सुदोघे वृष्टिद्वाराभिमतफलप्रदानेन सुष्ठु दोग्ध्र्यौ कुरु। तथा [v]मर्तस्य शत्रोः[9] [v]दुर्मतिः दुष्टबुद्धिप्रयुक्तोऽभिभवः [v]नः अस्मान् [v]मा [v]परि [v]ष्ठात् परितो मा गच्छतु॥ पीपय। 'पा पाने' इत्येतस्य ण्यन्तस्य लुङि चङि द्विर्वचनाभ्यासदीर्घौ। सिपो लोपश्छान्दसः। जिन्व। 'इवि जिवि धिवि प्रीणनार्थाः'। एतस्य लोटि इदित्त्वान्नुम्। शप्। 'अतो हेः' इति हेर्लुक्। आमन्त्रितस्यावद्यमानवत्त्वेन अतिङ उत्तरत्वाभावात्[10] न निघातः। सुदोघे। दोहनं दोघः। भावे घञ्। कुत्वं छान्दसम्। 'आद्युदात्तं द्यच् छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। दुर्मतिः। 'मनु अवबोधने'। मन्यते इति मतिर्बुद्धिः। कर्तरि क्तिच्। दुष्टा बुद्धिः। अव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वम्॥

१. त–सन्निः संभक्ता संतर्जनीयो वा। यद्वा सन्निः संस्रातस्त्वम्। २. त–गन्त्र्यादिकः धनादिकमूढ्वा। ३. त–इमे। ४. त–सन्निः। सनतेः स्नातेर्वा किन्। लिङ्बद्भावाद्द्विवचनम्। ५. स–षच समवाये। ६. त–निस्वादाद्युदात्तः। ७. ख-ग-च-ज-ण-न-भ-स–'निघातः' नास्ति। ८. त–प्रवर्धय। ९. त–मनुष्यस्यास्य। १०. ख-ग-च-ज-ण–उत्तरत्वाभावेन।

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥७॥

' उतो पितृभ्याम् ' इत्यस्मिन् वर्गे व्याख्यातेयम् ऋक् ॥ ॥ १५ ॥

' अयमग्निः ' इति चतुर्थं पङ्क्तं सूक्तमाग्नेयम् । अत्रानुक्रमणिका[1]—' अयमग्निः षट् प्रागाथम् ' इति । ' उत्कीलस्तु ' इति तुशब्दप्रयोगात् अस्यापि सूक्तस्य स एव ऋषिः । अत्र विषमसंख्यानामृचां बृहती छन्दस्तृतीयपादस्य द्वादशाक्षरत्वात् । समसंख्यानां तु सतोबृहती प्रथमतृतीयपादयोर्द्वादशाक्षरत्वात् । उक्तं च—' अयुजौ जागतौ सतोबृहती ' (अनु. ८. ४) इति ॥

अयमग्निः सुवीर्यस्येशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ १ ॥

अयम् । अग्निः । सुऽवीर्यस्य । ईशे । महः । सौभगस्य ।
रायः । ईशे । सुऽअपत्यस्य । गोऽमतः । ईशे । वृत्रऽहथानाम् ॥ १ ॥

उत्कीलः स्तौति । [v]अयं यजनीयत्वेन[2] अङ्गुल्या निर्दिश्यमानः [v]अग्निः [v]सुवीर्यस्य शोभनसामर्थ्योपेतस्य [v]महः महतः [v]सौभगस्य सौभाग्यस्य [v]ईशे ईष्टे । ईश्वरो भवति । सर्वस्य बलारोग्यहेतुतया सौभाग्यकारित्वात् । तथा [v]गोमतः गवादिपशुयुक्तस्य [v]स्वपत्यस्य शोभनापत्यस्य [v]रायः धनस्य [v]ईशे ईष्टे । पुत्रपश्वाद्युद्देशेन क्रियमाणकर्मफलसंपादकत्वेन तत्स्वामित्वात्[3] । तथैवंभूतोऽग्निः [v]वृत्रहथानाम् । हननं हथः । शत्रुभूतपापविनाशनानामपि[4] [v]ईशे ईष्टे । त्वयि समर्पितकर्मणामस्माकं त्वत्प्रसादात् पापक्षयो भवतीति तस्यापि[5] स्वामी[6] ॥ ईशे । ' ईश ऐश्वर्ये ' । अदादित्वाच्छपो लुक् । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । पादादित्वादनिघातः । सौभगस्य । सुभगस्य भावः सौभगम् । उद्भात्रादित्वादञ् । सर्वविधीनां छन्दसि विकल्पितत्वात् अत्र ' हृङ्गः ' इत्यादिना प्राप्ताया उत्तरपदवृद्धेरभावः । रायः । ' ऊडिदम् ' इत्यादिना विभक्तेरुदात्तत्वम् । ईशे । निघातः । स्वपत्यस्य । ' नष्टमुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । वृत्रहथानाम् । ' वृतु वर्तने ' । अस्मात् ' स्फायितञ्चिवञ्चि[7] ' इत्यादिना रक्प्रत्ययः । कित्त्वादगुणः । ' हन हिंसागत्योः ' इत्यस्मात् ' हनिकुषिनीरमिकाशिभ्यः[8] ' इति क्थन् । कित्त्वादनुनासिकलोपः । कृदुत्तरपदप्रकृतिस्वरः[9] ॥

१. ल–तत्रानुक्रमणिका । २. च–यजमानेन । ३. ख-ग-च-ज-ण-न-भ–' तत्स्वामित्वात् ' नास्ति । ४. घ-त-न-प-भ-ल-स–[8]विनाशानामपि । ५. ख-ग-च-ज-ण–तत्स्वामी । ६. ख-ग-च-ज-ण-स–' स्फायितञ्चि[8] ' । ७. त–कृदुत्तरपदप्रकृतिस्वरः । सुवीर्येत्यादिना अधीगर्तें(र्थे)त्यादिना कर्मणि षष्ठी ।

इमं नरो मरुतः सश्चता वृधं यस्मिन्नायः शेवृधासः ।
अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥ २ ॥

इमम् । नरः । मरुतः । सश्चत । वृधम् । यस्मिन् । रायः । शेऽवृधासः ।
अभि । ये । सन्ति । पृतनासु । दुःऽध्यः । विश्वाहा । शत्रुम् । आऽदभुः ॥ २ ॥

[v]नरः कर्मणां नेतारो हे [v]मरुतः देवा यूयं [v]वृधं पशुपुत्रादिवर्धकम् [v]इमम् अस्माभिः स्तूयमानम् इमम्[1] अग्निं [v]सश्चत हविरानयनार्थं सेवध्वम्। कीदृशोऽग्निः[2] इत्याकाङ्क्षायामाह । [v]यस्मिन् देवे [v]रायः धनानि [v]शेवृधासः दानभोगाद्युपयोगेन सुखस्य वर्धकानि [v]अभि[3] अभितः[3] [v]सन्ति । [v]ये[4] च देवाः [v]पृतनासु सेनासु तदुपलक्षितेषु संग्रामेषु [v]दूढ्यः दुष्टध्यानोपेतानात्मनो हिंसकाञ्छत्रून् अभि सन्ति अभिभवन्ति । ये च [v]विश्वाहा विश्वान्यहानि यस्मिन्नखण्डे काले तस्मिन् सर्वदा [v]शत्रुम् आत्मनो द्वेष्टारम्[5] [v]आदभुः आदभ्नुवन्ति हिंसन्ति । एवंभूतास्ते सर्वे मरुतो यूयं तमिममग्निं सेवध्वमिति पूर्वेणान्वयः॥ सश्चत । 'षस्ज संगे' इत्यस्मात् लोटि रूपम् । जकारस्य व्यत्ययेन चकारः । निघातः । शेवृधासः । वर्णव्यत्ययः । शं सुखं वर्धयतीति[5]। 'असुन्' इत्यसुन् । गुणाभावश्छान्दसः। 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च' इत्यौणादिकसूत्रात् पूर्वपदप्रकृतिस्वरः । सन्ति । 'अस भुवि,' । दूढ्यः । 'ध्यै चिन्तायाम्' । 'अन्येभ्योऽपि दृश्यते' इति क्विप् । दृशिग्रहणात्संप्रसारणम् । 'दुरो दाशनाशदभ्येषूत्वं वक्तव्यमुत्तरपदादेः ष्टुत्वं च' इति उत्वढत्वे । 'छन्दस्युभयथा' इति शसीयडादेशं बाधित्वा यणादेशः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । शसः सुत्वात् अनुदात्तत्वे कृते 'उदात्तस्वरितयोर्यणः०' इति शसः स्वरितत्वम् । आदभुः । 'दम्भु दम्भे' । अस्माल्लिटयुसि रूपम् । 'ग्रन्थिग्रन्थिदम्भिस्वञ्जीनामुपसंख्यानम्' इति किद्वद्भावादनुनासिकलोपः । 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' (का. ६. १. ८) इति द्विर्वचनाभावः । यद्वृत्तयोगादनिघातः । 'सतिशिष्टस्वरो बलीयान्' इति प्रत्ययस्वरः ॥

स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः ॥ ३ ॥

सः । त्वम् । नः । रायः । शिशीहि । मीढ्वः । अग्ने । सुऽवीर्यस्य ।
तुविऽद्युम्न । वर्षिष्ठस्य । प्रजाऽवतः । अनमीवस्य । शुष्मिणः ॥ ३ ॥

हे [v]अग्ने [v]सः तथाविधः [v]त्वं [v]नः अस्मान् [v]रायः । तृतीयार्थे षष्ठी । धनेन [v]शिशीहि तीक्ष्णान् कुरु । अस्मान् धनसमृद्धान् कुरु । किंच [v]तुविद्युम्न बहुधनोपेत अत एव [v]मीढ्वः मीढ्वन् कामानां

१. त-प-ल-'इमम्' नास्ति । २. त-कीदृशोऽग्निः कीदृशास्ते मरुतः । ३. न-ल-'अभि अभितः' नास्ति । ४. ख-ग-घ-च-ज-ण-प-भ-किंच विश्वाः सर्वेष्वहःसु शत्रुं नाशयतीति शेषः। कीदृशास्ते मरुतः सन्ति (ज-ण-'सन्ति' नास्ति) ये च देवाः (घ-प-'च देवाः' नास्ति) पृतनासु सेनासु तद्रक्षितेषु (घ-तदुपक्षितेषु; प-तदुक्षितेषु) संग्रामेषु दूढ्यः दुष्टध्यानोपेतान् आत्मनो द्वेष्टॄन् (घ-प-हिंसकान्)। ५. त-वर्धयन्तीति ।

सेक्तः हे अग्ने त्वं [v]वर्धिष्ठस्य वृद्धतमस्य प्रभूतस्य [v]प्रजावतः अपत्ययुक्तस्य [v]अनमीवस्य आरोग्यहेतोः[1] अत एव [v]शुष्मिणः बलहेतोः [v]सुवीर्यस्य शोभनसामर्थ्ययुक्तस्य अन्नस्य[2] संबन्धिनोऽस्मान् कुरु । यद्वा । एतत्सर्वं रैविशेषणतया[3] योजनीयम् । एताः षष्ठ्यस्तृतीयार्थे । एतदुक्तं भवति । धनेन अपत्यारोग्यशरीरबलोपेतेन अन्नेन[4] च[5] अस्मान् समृद्धान् कुर्विति ॥ शिशीहि । ' शिष्ऌ निशाने ' इत्यस्य लोटि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः। ' वा छन्दसि ' इति विकल्पेन ङित्त्वात् ' अङितश्च ' इति हेर्धिरादेशो न भवति । दीर्घश्छान्दसः । निघातः । मीढ्वः । ' मिह सेचने ' इत्यस्य क्वसौ ' दाश्वान्साह्वान्मीढ्वांश्च ' इति निपातनात् ढत्वम्[6] उपधादीर्घश्च । संबुद्धौ नुमि कृते हल्ङ्यादिलोपे संयोगान्तलोपे च कृते ' मतुवसो रुः संबुद्धौ छन्दसि ' इति रुः । पादादित्वादाद्युदात्तः ॥

चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ॥ ४ ॥

चक्रिः । यः । विश्वा । भुवना । अभि । ससहिः । चक्रिः । देवेषु । आ । दुवः ।
आ । देवेषु । यतते । आ । सुऽवीर्ये । आ । शंसे । उत । नृणाम् ॥ ४ ॥

[v]यः अयमग्निः [v]चक्रिः सर्वस्य जगतः कर्ता स च [v]विश्वा [v]भुवना विश्वानि भुवनानि [v]अभि अभिविशति । ' तत्सृष्ट्वा तदेवानुप्राविशत् ' (तै. उ. २. ६) इति श्रुतेः । [v]चक्रिः कर्ता सोऽग्निः [v]सासहिः पुरोडाशादिहविर्भारसहनशीलः[7] सन् [v]दुवः अस्माभिर्दत्तं हविः [v]देवेषु यजनीयदेवेषु [v]आ आनयति । स चाग्निः [v]देवेषु देवनशीलेषु स्तोतृषु [v]आ [v]यतते आभिमुख्येन गच्छति । यद्वा[8] विश्वानि भुवनानि चक्रिः अभिसासहिरभिभवनशीलः । आकारश्चार्थे । देवेषु च दुवः परिचरणं चक्रिः कर्ता । यः एवंभूतः स आयतते इत्यादि पूर्ववत्[9] । [v]उत[10] अपि च [v]नृणां यज्ञस्य नेतॄणां शस्त्रिणां[11] [v]शंसे । शंसनं शंसः शस्त्रम् । तस्मिन् सोऽग्निः [v]आ आगच्छति । तथा नृणां मनुष्याणां [v]सुवीर्ये शोभनवीर्योपेतयुद्धे[12] तद्रक्षणार्थम् [v]आ आगच्छति । अनेनाग्नेः सर्वव्यापकता प्रतिपादिता भवति ॥ चक्रिः । ' डुकृञ् करणे ' । ' आदृगमहनजनः किकिनौ लिट् च ' इति किन्प्रत्ययः । लिड्भावात् द्विर्वचनम् । किरुवात् गुणाभावः । नित्स्वरः । सासहिः । ' षह मर्षणे ' इत्यस्मात् यङन्तात् ' सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ ' (पा. म. ३.२.१७१.४) इति किः । प्रत्ययस्वरः । यतते । ' यती प्रयत्ने ' । यदवृत्तयोगादनिघातः । शंसे । भावे घञ् । नित्स्वरः । नृणाम् । ' नृ च ' इति विकल्पेन दीर्घाभावः । ' नामन्यतरस्याम् ' इति विभक्तेरुदात्तत्वम् । विश्वेस्यादिषु[13] ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधः[14] ॥

१. ख-ग-च-ज-ण-अरोगस्य हेतोः; ल-आरोग्यस्य हेतोः । २. घ-त-अन्नयुक्तस्य । ३. ल-विशेषणतया; म-रायः विशेषणतया । ४. त-' अन्नेन ' नास्ति । ५. च-वा; ल-' च ' नास्ति । ६. ख-ग-ज-ण-न-भ-भ्रद्वित्वम् । ७. त-°र्हविर्भागस्य सहनशीलः । ८. ख-ग-च-ज-ण-न-प-फ-भ-स-' यद्वा ..... पूर्ववत् ' नास्ति । ९. त-स चाग्निर्देवेषु देवनशीलेषु स्तोतृष्वायतते । उत । १०. त-'शस्त्रिणाम् ' नास्ति । ११. त-शोभनवीर्योपेते युद्धे । १२. ख-ग-च-ज-ण-न-फ-भ-ल-स-' विश्वेस्यादिषु...षष्ठीप्रतिषेधः ' नास्ति ।

मा नो अग्नेऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ॥ ५ ॥

मा । नः । अग्ने । अमतये । मा । अवीरतायै । रीरधः ।
मा । अगोतायै । सहसः । पुत्र । मा । निदे । अप । द्वेषांसि । आ । कृधि ॥ ५ ॥

vसहसस्पुत्र बलस्य पुत्र हे vअग्ने त्वं vनः अस्मान् vअमतये शत्रुभूताय[1] दारिद्र्याय vमा vरीरधः संसिद्धान् विषयभूतान् मा कुरु । तथा vअवीरतायै अपुत्रतायै । *वीरशब्देन[2] तद्वान् लक्ष्यते । वीरस्य भावो वीरता । न वीरता अवीरता । तस्यै । +अस्मान् अपुत्रताया विषयभूतान्[3] vमा कुरु । तथा त्वमस्मान्+ vअगोतायै गवादिपशुसंपत्स्यभावस्य विषयभूतान् vमा कुरु । किंच अस्मान् vनिदे निन्दाया विषयभूतान् vमा[3] कुरु[3] मा विधेहि । तथा त्वं vद्वेषांसि कर्मापराधनिमित्तान्[4] द्वेषांश्च[5] vअप vआ vकृधि अपाकुरु निवारय ॥ अवीरतायै । वीरा अस्य सन्तीति वीरः । अर्शआदित्वादच् । तस्य भावो वीरता । ' तस्य[6] भावस्त्वतलौ ' इति तल्[6] । न वीरता अवीरता । नञः स्वरे प्राप्ते ' परादिश्छन्दसि बहुलम् ' इति नञुत्तरस्य[7] आदेरुदात्तता । रीरधः । ' राध साध संसिद्धौ ' । अस्माण्ण्यन्ताच्छान्दसे लुङि ' णिश्रिद्रुस्रुभ्यः[8] ' इति च्लेश्चङादेशः । ' णेरनिटि ' इति णिलोपः । ' णौ चङ्युपधायाः[8] ' इत्युपधाह्रस्वः । ' चङि ' इति द्विर्वचनम् । ' सन्वल्लघुनि चङ्परे ' इति सन्वद्भावः । ' सन्यतः ' इत्यभ्यासस्येत्त्वम् । तस्य ' दीर्घो लघोः ' इति दीर्घः । ' न माङ्योगे ' इत्यडभावः । निघातः । अगोतायै । गोशब्देन गोमान् लक्ष्यते । न गौरगौः । अगोर्भावोऽगोता । ' तस्य भावः[8] ' इति तल् । लित्स्वरः । सहसस्पुत्र । ' सुधामन्त्रिते पराङ्गवत्स्वरे[9] ' इति पराङ्गवद्भावात् सहसस्पुत्र इत्येतयोः सर्वानुदात्तत्वम् । निदे । ' णिदि कुत्सायाम् ' । अस्मात्संपदादित्वाद्भावे क्विप् । ' अनिरयमागमशासनम् ' इति नुमभावः । ' सावेकाचः[8] ' इति विभक्तेरुदात्तता ॥

शुग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥ ६ ॥

शुग्धि । वाजस्य । सुऽभग । प्रजाऽवतः । अग्ने । बृहतः । अध्वरे ।
सम् । राया । भूयसा । सृज । मयःऽभुना । तुविऽद्युम्न । यशस्वता ॥ ६ ॥

vसुभग शोभनधनोपेत हे vअग्ने त्वम् vअध्वरे अस्माभिः क्रियमाणेऽस्मिन् अग्निष्टोमादिकर्मणि vबृहतः महतः प्रभूतस्य vप्रजावतः अपत्योपेतस्य vवाजस्य अन्नस्य vशुग्धि ईक्षिषे । तादृशमन्नमस्मिन्

१. ग-च-ज-ण-न-ल-शत्रूभूताय । *ख-ग-च-ज-ण-भ-स-अवीरशब्देन । २. ख-ग-च-ज-ण-प-फ-भ-' वीरशब्देन...विषयभूतान् ' नास्ति । +त-ल-' अस्मान्.....अस्मान् ' नास्ति । ३. त-' मा कुरु ' नास्ति । ४. ख-ग-च-ज-ण-भ-स-कर्मापरोधानिमित्तान् । ५. ख-ग-घ-च-ज-ण-भ-द्वेष्यान् च; त-न-द्वेषान् । ६. ख-ग-च-ज-ण-भ-तस्य भावे तल् । ७. ख-ग-त-न-भ-नञ उत्तरस्य । ८. ख-ग-च-ज-ण-न-भ-स-' पराङ्गवत्स्वरे ' नास्ति ।

अध्वरेऽस्मभ्यं वेहि । किंच ᵛतुविद्युम्न बहुधनयुक्त हे अग्ने ᵛमयोभुना । मय इति सुखनाम 'शेवृधं मयः' (नि. ३. ६. ७) इति तन्नामसु पाठात् । तदानाद्युपयोगहेतुतया[1] सुखस्य भावकेन अत एव ᵛयशस्वता कीर्तिमता ᵛभूयसा अतिप्रभूतेन ᵛराया एवंविधेन धनेनास्मान् ᵛसं ᵛसृज संयोजय ॥ शग्धि । 'शकॢ शक्तौ' इत्यस्य लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'हुझल्भ्यो हेर्धिः' इति धिरादेशः । हेरपित्त्वादुदात्तता । राया । 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । भूयसा । बहुशब्दात् 'द्विवचनविभज्योपपदे' इतीयसुन् । 'बहोर्लोपो भू च बहोः' इतीयसुनः सर्वस्य लोपे प्राप्ते 'आदेः परस्य' (पा. सू. १.१.५४) इति प्रत्ययस्यादेर्लोपो बहोः भूरादेशश्च[2]। निस्स्वरः । सृज । 'सृज विसर्गे' । तुदादिः । लोटि रूपम् । निघातः । मयोभुना । 'भू[3] सत्तायाम्' इत्यस्मात्[4] औणादिको डुप्रत्ययः । तुविद्युम्न । पादादित्वादनिघातः ॥ ॥ १६ ॥

'समिध्यमानः' इति पञ्चर्चं पञ्चमं सूक्तमाग्नेयं त्रैष्टुभं वैश्वामित्रस्य कतस्यार्षम् । तदुक्तं—'समिध्यमानः पञ्च कतो वैश्वामित्रस्तु' इति । 'आ होता' इत्यादिसूक्तदशकस्य विनियोग उक्तः प्रातरनुवाकाश्विनशस्त्रयोः इति । तत्रेदं चतुर्थम् । वाजपेये बार्हस्पत्ये चरौ 'अग्निं सुदीतिम्' इति स्विष्टकृतो याज्या । 'वाजपेयेन' इत्यादिखण्डे सूत्रितम्—'अग्निं सुदीतिं सुदृशं गृणन्त इति संयाज्ये' (आश्व. श्रौ. ९. ९) इति ॥

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥ १ ॥

समऽइध्यमानः । प्रथमा । अनु । धर्मा । सम् । अक्तुऽभिः । अज्यते । विश्वऽवारः ।
शोचिःऽकेशः । घृतऽनिर्णिक् । पावकः । सुऽयज्ञः । अग्निः । यजथाय । देवान् ॥ १ ॥

कतः स्तौति । ᵛधर्म । धारणात् धर्म । अग्नेः[5] यज्ञनिर्वाहकतया तद्धारकत्वाद्धर्माग्निः । तथा च मन्त्रः—'धर्माणमग्निं विदथस्य साधनम्' (ऋ. सं. १०. ९२. २) इति । तादृशोऽग्निः ᵛप्रथमा प्रथमं[6] यज्ञोपक्रमे ᵛअनु अभ्यायतनेष्वनुक्रमेण ᵛसमिध्यमानः सम्यक् प्रज्वाल्यमानः । यद्वा । अनु धर्म धर्मसाधनभूतेषु यज्ञेषु प्रथमं समिध्यमानः । ᵛविश्ववारः विश्वैः सर्वैर्यजमानैर्यष्टव्यतया वरणीयः ᵛशोचिष्केशः शोचींषि ज्वालाः केशा यस्य स तथोक्तः । ᵛघृतनिर्णिक् घृतस्य तापनद्वारा विलापनेन[7] शोधकः । ᵛपावकः अस्मदीयपापशोधकः । ᵛसुयज्ञः शोभनयज्ञोपेतः । एवंभूतः ᵛअग्निः ᵛदेवान् अस्माभिर्यजनीयान् देवान् ᵛयजथाय यष्टुम् ᵛअक्तुभिः अञ्जनसाधनैर्घृतादिभिः ᵛसम् ᵛअज्यते सम्यक् सिच्यते ॥ प्रथमा । 'सुपां सुलुक्' इति सुपो डादेशः । धर्म । 'धृञ् धारणे' इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । ह्रस्वत्वं छान्दसम् । निस्स्वरः । अक्तुभिः । 'अञ्जू व्यक्तिगतिम्रक्षणेषु' । अज्यत एभिरिति बाहुलकत्वात्[8] क्तुः करणे । किरवादुपधालोपः । प्रत्ययस्वरः । अज्यते । स एव धातुः । कर्मणि यक् । 'अनिदिताम्' इत्युपधालोपः । विश्ववारः । विश्वैर्यजमानैर्होतृद्वारा वारो वरणं यस्येत्यत्र 'वृञ् वरणे' इत्यस्य ण्यन्तस्य रूपं वारः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । घृतनिर्णिक् । 'णिजिर् शौचपोषणयोः' । क्विप् । घृतं नेनेक्तीति द्वितीयातत्पुरुषत्वात्

१. त–दानाद्युपयोग° २. त–भू इत्यादेशश्च । ३. त–भवतेः । ४. त–अग्निः । ५. ख-ग-च-ज-ण–प्रथमा । ६. स–विलयनेन । ७. त–बाहुलकात् ।

पूर्वपदस्वरः । यजधाय । ' यज देवपूजासंगतिकरणदानेषु ' । अरमादीणादिकः अथप्रत्ययः । तादर्थ्ये चतुर्थी । प्रत्ययस्वरः ॥

यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।
एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्र तिरेममद्य ॥ २ ॥

यथा । अयजः । होत्रम् । अग्ने । पृथिव्याः । यथा । दिवः । जातऽवेदः । चिकित्वान् ।
एव । अनेन । हविषा । यक्षि । देवान् । मनुष्वत् । यज्ञम् । प्र । तिर । इमम् । अद्य ॥२॥

हे [v]अग्ने त्वं[1] [v]यथा[2] [v]पृथिव्याः यजमानभूतायाः पृथिवीदेवतायाः पूर्वं होता सन् [v]होत्रं होमसाधनं हविः [v]अयजः अयाजीः [v]जातवेदः जातप्रज्ञ हे अग्ने [v]चिकित्वान् कर्मविषयज्ञानवान् त्वं[3] [v]यथा च[3] [v]दिवः[4] यजमानभूताया द्युदेवताया होता भूत्वा हविरयजः । [v]एव एवं त्वमस्मिन् कर्मणि होता सन् [v]अनेन अस्माभिर्दीयमानेन [v]हविषा [v]देवान्[4] [v]यक्षि यज । किंच त्वम् [v]अद्य इदानीम् अस्माभिः क्रियमाणम् [v]इमं [v]यज्ञं [v]प्र [v]तिर अनुष्ठानसंपूर्त्या पारं गमय । तत्र दृष्टान्तः [v]मनुष्वत् इति । यथा मनोः यज्ञमनुष्ठानसंपूर्त्या[5] पारमनैषीस्तद्वदिमं यज्ञं पारं नयेत्यर्थः ॥ यथा । ' प्रकारवचने थाल् ' इति थाल् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । अयजः । यजेर्लङि रूपम् । यज्झषादयोगादनिघातः । होत्रम् । ' हु दानादनयोः ' । ' हुयामाश्रुभसिभ्यस्त्रन् ' इति त्रन्प्रत्ययेनान्तोदात्तः । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । चिकित्वान् । ' कित ज्ञाने ' इत्यस्य क्वसौ रूपम् । प्रत्ययस्वरः । अनेन । इदंशब्दस्य तृतीयैकवचने ' अनाप्यकः ' (पा. सू. ७. २. ११२) इत्यनादेशः । यक्षि । यजेर्लेटि रूपम् । मनुष्वत् । ' तत्र तस्येव ' इति वतिः । ' नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ' इति भसंज्ञात्वात् रुत्वाभावः । प्रत्ययस्वरः । तिर । तरतेर्लोटि व्यत्ययेन शः । ' ऋत इद्धातोः ' इति इत्वम् । निघातः ॥

त्रीण्यायूँषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥ ३ ॥

त्रीणि । आयूँषि । तव । जातऽवेदः । तिस्रः । आऽजानीः । उषसः । ते । अग्ने ।
ताभिः । देवानाम् । अवः । यक्षि । विद्वान् । अथ । भव । यजमानाय । शम् । योः ॥३॥

हे [v]जातवेदः जातप्रज्ञ[6] [v]तव [v]त्रीण्यायूँषि त्रिविधानि आज्यौषधिसोमात्मकान्यन्नान्याहारतया कल्पितानि हे [v]अग्ने [v]तिस्रः [v]उषसः एकाहाहीनसत्रगता उषसः[7] उषोऽभिमानिन्यस्तिस्रो देवताः [v]ते तव [v]आजानीः जनयित्र्यो मातरः । यद्वा[8] उषोऽभिमानिन्यो देवतास्तवाजानीस्त्वामनुजातास्तिस्रः

१. त–' त्वं ' नास्ति । २. ख-ग-च-ज-ण-फ–' यथा ' नास्ति । ३. ग-च-त-न–' त्वं यथा च ' नास्ति । ४. ग-च-न–'दिवः...देवान् ' नास्ति । ५. ख-स–यज्ञानुष्ठानं संपूर्त्या । ६. ख-ग-घ-च-ज-ण-प-फ–जातप्रज्ञ अग्ने । ७. त–' उषसः ' नास्ति । ८. ख-ग-च-ज-ण–' यद्वा...तिस्रः ' नास्ति ।

स्वसारः[1]। तथा च स्वसृः प्रकृत्य मन्त्रः—'प्रजामेका रक्षत्यूर्जमेका राष्ट्रमेका रक्षति' इति[1]। vताभिः उषोऽभिमानिनीभिर्देवताभिः सहितस्त्वम् vअवः अस्माभिर्दीयमानं हविर्लक्षणमन्नं vदेवानां vयक्षि यष्टव्यदेवानां प्रयच्छ। vअथ अनन्तरं vविद्वान् जानंस्त्वं[2] vयजमानाय vशं vभव सुखहेतुर्भव। vयोः च सुखस्य मिश्रयिता च[3] भव॥ तव। 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तः[4]। तिस्रः। त्रिशब्दस्य स्त्र्यर्थे 'त्रिचतुरोः स्त्रियाम्०' इति तिसृ इत्यादेशः। 'अचि र ऋतः' इति रेफादेशः। 'तिसृभ्यो जसः' इति विभक्तेरुदात्तत्वम्। आजानीः। 'जन जनने'। 'जनिघसिभ्यामिण्' इति कर्तरि इण्। णिर्वादुपधावृद्धिः। 'वा छन्दसि' इति सवर्णदीर्घः[5]। कृदुत्तरपदप्रकृतिस्वरः[6]। अवः। 'अव रक्षणे'। 'असुन्' इत्यसुन्। निःस्वरः। यक्षि। यजेर्दानार्थस्य लेटि रूपम्। यजमानाय। 'पूङ्यजोः शानन्' (पा. सू. ३. २. १२८) इति यजेः शानन्। नित्स्वरः। योः। 'यु मिश्रणे' इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति विच्। आर्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः॥

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेडयं जातवेदः।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम्॥ ४॥

अग्निम्। सुऽदीतिम्। सुऽदृशम्। गृणन्तः। नमस्यामः। त्वा। ईड्यम्। जातऽवेदः। त्वाम्। दूतम्। अरतिम्। हव्यऽवाहम्। देवाः। अकृण्वन्। अमृतस्य। नाभिम्॥४॥

vजातवेदः जातस्य सर्वस्य वेदितर्हे अग्ने vगृणन्तः त्वद्विषयां स्तुतिं कुर्वाणा वयम् vअग्निम् अङ्गनादिगुणोपेतं vसुदीतिं शोभनदीप्तिम् अत एव vसुदृशं सर्वैः सुदर्शनम् vईड्यं स्तुत्यम् एवंविधं vत्वा त्वां vनमस्यामः हविर्भिः पूजयामः। किंच vदेवाः अस्माभिर्यजनीया इन्द्रादयो देवाः vअरतिम्। न विद्यते विषयेषु[7] रतिः[7] प्रीतिर्यस्यासावरतिः। विषयेष्वसक्तम् अत एव vअमृतस्य देवान्नभूतायाः सुधायाः vनाभिं नाभिस्थानं vत्वां तादृशं vहव्यवाहं vदूतम् vअकृण्वन्। हविषां वोढारं दूतमकुर्वन्। दूतो हि द्विविधो वार्ताहारी[8] कार्यकारी चेति। तत्र त्वां कार्यकारिणं दूतमकार्षुरिति भावः॥ सुदीतिम्। 'दीङ् क्षये'। दीयते विनाश्यते आभिस्तम इति करणे क्तिन्। दीतयो दीप्तयः। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। सुदृशम्। 'दृशिर् प्रेक्षणे'। तस्माच्छक्यार्थे खल्। 'संज्ञापूर्वको विधिरनित्यः' इति गुणाभावः। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। गृणन्तः। गृणातिरर्चतिकर्मा। नमस्यामः। नमसः पूजायां 'नमो वरिवश्चित्रङः क्यच्' इति क्यच्। तदन्तात्लटि रूपम्। पादादित्वान्न निघातः। दूतम्। 'टुदु उपतापे'। 'दुतनिभ्यां दीर्घश्च' (उ. सू. ३. ३७०) इति क्तः। तत्संनियोगेन धातोर्दीर्घः। दूतः इतस्ततः संचारीत्यर्थः। प्रत्ययस्वरः। अरतिम्। 'रमु क्रीडायाम्'। भावे क्तिन्। अकृण्वन्। 'कृवि हिंसाकरणयोः' इत्यस्य लङि 'धिन्विकृण्व्योरच्' इत्युप्रत्ययोऽकारश्चान्तादेशः। निघातः॥

१. ख-ग-च-ज-ण-'स्वसारः .....इति' नास्ति। २. ख-त-प-जानानस्त्वम्। ३. ख-ग-च-ज-ण-'च' नास्ति। ४. ल-इत्याद्युदात्तत्वम्। ५. ख-ग-ज-ण-भ-वर्णदीर्घः। ६. त-°प्रकृतिस्वरत्वम्। ७. त-रतिः विषयेषु। ८. ख-ग-ज-ण-फ-भ-वाक्यकारी; च-अन्नकारी; स-वशकारी।

यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शंभुः ।
तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥ ५ ॥

यः । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । द्विता । च । सत्ता । स्वधया । च । शम्ऽभुः ।
तस्य । अनु । धर्म । प्र । यज । चिकित्वः । अथ । नः । धाः । अध्वरम् । देवऽवीतौ ॥ ५ ॥

हे ᵛअग्ने ᵛत्वत् त्वत्तोऽपि ᵛपूर्वः प्रथमभावी ᵛयजीयान् अतिशयेन यष्टा ᵛयः यः कश्चित् ᵛहोता होमनिष्पादकः[1] ᵛद्विता द्वैधं मध्यमे चोत्तमे च स्थाने ᵛस्वधया सोमाख्येनान्नेन सह ᵛसत्ता निषण्णः सन् ᵛशंभुः यष्टृणां सुखभूः अभूत् । द्वितीयपादमेवं यास्को व्याचख्यौ—' द्विता च सत्ता स्वधया च शंभुः । द्वैधं सत्ता मध्यमे च स्थान उत्तमे च । शंभुः सुखभूः ' (निरु. ५. ३) इति । ᵛचिकित्वः धर्मविषयचेतनावन् हे अग्ने ᵛतस्य यस्त्वत्तोऽपि पूर्वभावी होता निरूपितस्तस्य होतुः ᵛअनु ᵛधर्मं धर्माननु तेनानुष्ठितधर्मानुपलक्ष्य[2] ᵛप्र ᵛयज प्रकर्षेण देवान् पूजय । ᵛअथ अनन्तरं हे अग्ने त्वं ᵛनः अस्माकं संबन्धिनम् ᵛअध्वरम् इमं यज्ञं ᵛदेववीतौ देवानां प्रीत्यर्थं ᵛधाः विधेहि ॥ यजीयान् । यष्टृशब्दस्य ' तुश्छन्दसि ' इतीयसुन् । तस्मिन् ' तुरिष्टेमेयःसु ' इति तृचो लोपः । निस्वादाद्युदात्तः । द्विता । द्विशब्दात् ' संख्याया विधार्थे धा ' इति धाप्रत्ययः । धकारस्य तकारश्छान्दसः । प्रत्ययस्वरः । सत्ता । ' पदॢ विशरणगत्यवसादनेषु '। अस्य[3] ताच्छीलिकस्तृन् । निस्वरः । स्वधया । स्वर्ग[4] लोकं[4] दधाति यजमानस्येति स्वधा । ' आतोऽनुपसर्गे कः ' इति कप्रत्ययः[5] । कृदुत्तरपदप्रकृतिस्वरत्वम् । शंभुः । शं सुखमस्माद्भवतीति । ' भू सत्तायाम् ' । ' विप्रसंभ्यो ड्वसंज्ञायाम् ' इत्यत्र मितद्वादेरुपसंख्यानात् डुप्रत्ययः । डित्वाट्टिलोपः । यज । यजेर्लोटि रूपम् । चिकित्वः । ' कित ज्ञाने ' इत्यस्य क्वसौ रूपम् । ' मतुवसो रुः संबुद्धौ छन्दसि ' इति नकारस्य रुः । अथा नः । ' निपातस्य० ' इति दीर्घः । धाः । ' डुधाञ् धारणपोषणयोः ' इत्यस्य छान्दसे लुङि रूपम् । अडभावश्छान्दसः । देववीतौ । देवानां वीतिः अशनं यत्र प्रीतौ सा प्रीतिः देववीतिः । वी कान्त्यादिषु इत्यस्मात् भावे क्तिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः[6] ॥ ॥ १७ ॥

' भवा नो अग्ने ' इति पञ्चर्चं षष्ठं सूक्तम् । ' भवा नः ' इत्यनुक्रमणिका । 'कतो वैश्वामित्रस्तु' इति तुशब्दप्रयोगात् अस्यापि वैश्वामित्रः कत ऋषिः । अग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः[7] । प्रवर्ग्येऽभिष्टवे ' भवा नो अग्ने ' इति द्वृचो विनियुक्तः । सूत्रितं च—' भवा नो अग्ने सुमना उपेताविति द्वृचाः ' (आश्व. श्रौ. ४. ६) इति ॥

भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥ १ ॥

भव । नः । अग्ने । सुऽमनाः । उपऽइतौ । सखाऽइव । सख्ये । पितराऽइव । साधुः ।
पुरुऽद्रुहः । हि । क्षितयः । जनानाम् । प्रति । प्रतीचीः । दहतात् । अरातीः ॥ १ ॥

---

१. त–होमनिष्पादकः अग्निः । २. त–°कर्मानुलक्ष्य । ३. त–ल–इत्यस्य । ४. ख-ग-च-ज-ण-फ-भ–स्वर्गं लोकं; त-ल–स्वर्लोकम् । ५. ल–कः । ६. त–पूर्वपदस्वरः । ७. त–विनियोगः ।

हे vअग्ने त्वम् vउपेतौ अस्माभिः क्रियमाणस्य[1] प्रवर्ग्याख्यकर्मणः[1] आभिमुख्येनागमने vसुमनाः तत्कर्मसिद्ध्यर्थमनुकूलमनस्को भूत्वा vनः vसाधुः vभव अस्मत्संबन्धिकर्मसाधको भव। तत्र दृष्टान्तद्वयम्। vसखेव vसख्ये vपितरेव इति। यथा सखा सुहृत् सख्ये मित्राय हितोपदेशेन साधुर्भवति यथा च vपितरा मातापितरौ पुत्राय सन्मार्गोपदेशेन[2] साधकौ भवतः तद्वत्। किंच vजनानां मनुष्याणां vक्षितयः मनुष्याः vपुरुहूहो vहि नानाविधद्रोहयुक्ताः। हिशब्दः कारणपरः। यस्माल्लोके परस्परमात्सर्यादिनान्योन्यमसहमाना जना वर्तन्ते तस्मात्त्वं vप्रतीचीः प्रतीचः प्रतिकूलतयारमदाभिमुख्येन आगच्छतः vअरातीः अरातीन् शत्रून् vप्रति vदहतात् त्वं प्रतिकूलः सन् भस्मसात्कुरु॥ भवा नः। 'ब्यचोऽतस्तिङः' इति संहितायां दीर्घः। उपेतौ। 'इण् गतौ'। अयनमिति[3] भावे क्तिन्। प्रादिसमासः। 'तादौ च निति कृत्यतौ' इति गतेः प्रकृतिस्वरत्वम्। सख्ये। 'समाने ख्यश्रोदात्तः' इति इण्। डित्त्वाट्टिलोपः। तत्संनियोगेन यलोपः। 'समानस्य छन्दसि०' इत्यादिना सभावः। 'उदात्तः' इत्युक्तत्वात् उपपदस्योदात्तता। साधुः। 'राध साध संसिद्धौ'। 'कृवापाजि०' इत्यादिना उण्प्रत्ययः। प्रत्ययस्वरः। प्रतीचीः। 'अञ्चु गतिपूजनयोः'। 'ऋत्विग्दधृक्०' इत्यादिना क्विन्। स्त्रियाम् 'उगितश्च' इति ङीपि प्राप्ते पुनः 'धातोरगितः प्रतिषेधः[4]' (पा. सू. ४. १. ६. १) इति[4] प्रतिषिद्धे 'अञ्चतेश्चोपसंख्यानम्' इति प्रतिप्रसवात् ङीप्। तस्मिन् भसंज्ञायाम् 'अचः' इत्यकारलोपः। 'चौ' इति दीर्घः। दहतात्। 'दह भस्मीकरणे' इत्यस्य लोण्मध्यमैकवचने हेः 'तुह्योस्तातङाशिषि०' इति तातङादेशः। निघातः। अरातीः प्रतीचीः। उभयत्र लिङ्व्यत्ययः॥

तपो ष्वग्ने अन्तराँ अमित्रान् तपा शंसमररुषः परस्य।
तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः॥ २॥

तपो इति। सु। अग्ने। अन्तरान्। अमित्रान्। तप। शंसम्। अररुषः। परस्य।
तपो इति। वसो इति। चिकितानः। अचित्तान्। वि। ते। तिष्ठन्ताम्। अजराः। अयासः॥२॥

हे vअग्ने vअन्तरान् अभिभावकान्[5] vअमित्रान् शत्रून् vसु[6] सुष्ठु यथा भवति तथा vतपो तपैव बाधस्व। किंच। vअररुषः तुभ्यं हविरप्रयच्छतः अत एव vपरस्य शत्रुभूतस्य त्वं vशंसम् अभिलाषं vतप क्षपय। vवसो सर्वस्य वासयितर्हे अग्ने vचिकितानः कर्माभिज्ञस्त्वम् vअचित्तान् सत्कर्मण्यनासक्तमनस्कान् पुरुषान् vतपो संतप। यस्मादेवं[7] तस्मात्[7] vते तव रश्मयः vअजराः जरारहिताः प्रतिबन्धरहिता अत एव vअयासः सर्वत्रगमनस्वभावाः सन्तः vवि vतिष्ठन्तां दिक्षु तिष्ठन्तु॥ तपो। तप उ। गुणः। उञमवलम्ब्य 'उञः' इति प्रगृह्यसंज्ञा। पादादित्वादनिघातः। तपा। 'तप संतापे' इत्यस्य लोटि रूपम्। 'ब्यचोऽतस्तिङः' इति संहितायां दीर्घः। अररुषः। 'रा दाने' इत्यस्य क्वसौ 'वस्वेकाच्०' इति प्राप्तस्य इटः 'संप्रसारणं संप्रसारणाश्रयं च बलीयः' इति संप्रसारणबलीयस्त्वान्निवृत्तिः। 'वसोः संप्रसारणम्' इति संप्रसारणम्। समासे नञ्स्वरः। चिकितानः। 'कित ज्ञाने' इत्यस्य छन्दसि लिट्। तस्य 'लिटः कानज्वा' इति कानजादेशः।

१. ख-ग-च-ज-ण-न-भ-क्रियमाणप्रवर्गाख्यस्य कर्मणः। २. त-सन्मार्गोपदेशादिना। ३. न-उपेतमिति। ४. ख-ग-च-ज-ण-न-भ-'प्रतिषेध इति' नास्ति। ५. त-अभि समीपवर्तिनः भावकान्। ६. त-'सु' नास्ति। ७. ख-यस्मात्।

द्विर्वचनम् । किरवादुणाभावः । चित्त्वादन्तोदात्तः । तिष्ठन्ताम् । ' ष्ठा गतिनिवृत्तौ ' । विपूर्वात्तिष्ठतेः ' समवप्रविभ्यः स्थः ' इत्यात्मनेपदम् । निघातः । अयासः । ' अय गतौ ' । पचाद्यच् । चित्स्वरः ॥

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥ ३ ॥

इध्मेन । अग्ने । इच्छमानः । घृतेन । जुहोमि । हव्यम् । तरसे । बलाय ।
यावत् । ईशे । ब्रह्मणा । वन्दमानः । इमाम् । धियम् । शतऽसेयाय । देवीम् ॥ ३ ॥

हे अग्ने इच्छमानः धनं कामयमानोऽहं यजमानः इध्मेन समिन्धनकारिसमिस्समूहेन घृतेन आज्येन सह हव्यं हवनयोग्यं हविः पुरोडाशादिकं जुहोमि । किमर्थम् । तरसे वेगाय तव सततगमनसिद्ध्यर्थं बलाय सामर्थ्याय । पुरोडाशादिहविर्भारवहनसिद्ध्यर्थं त्वयि हविः प्रक्षिपामि । किंच ब्रह्मणा स्तोत्रेण वन्दमानः त्वां[1] स्तुवन्[2] अहं यावदीशे यावद्धनं[3] वोढुं शक्नोमि तावद्देहि । त्वं च इमाम् अस्माभिः क्रियमाणां धियं त्वद्विषयां स्तुतिं शतसेयाय अपरिमितधनपर्यवसानाय देवीं दीप्ताम् अतिप्रभूतां कुरु ॥ इध्मेन । ' त्रिहन्धी दीप्तौ ' । इध्यतेऽनेनाग्निरितीध्मः काष्ठविशेषः । ' इषियुधीन्धिदसिश्याधूसूभ्यो मक् ' इति करणे मक् । कित्त्वादनुनासिकलोपः । प्रत्ययस्वरः । इच्छमानः । ' इषु इच्छायाम् ' । व्यत्ययेन शानच् । ' इषुगमियमां छः ' इति छकारः । जुहोमि । ' हु दानादनयोः ' इत्यस्य[4] लटि रूपम् । पादादित्वादनिघातः । हव्यम् । हवनम्[5] अर्हतीति ' छन्दसि च ' इति यप्रत्ययः । भसंज्ञायां ' यस्य ' इति लोपः । प्रत्ययस्वरः । यावत् । यच्छब्दात् ' यत्तदेतेभ्यः परिमाणे वतुप् ' इति वतुप् । ' आ सर्वनाम्नः ' इत्याकारः । आद्युदात्तः । ईशे । ' ईश ऐश्वर्ये ' इत्यस्य लडुत्तमैकवचने इटऐरेत्वम् । अदादित्वाच्छपो लुक् । शतसेयाय । ' षो अन्तकर्मणि ' । ' आदेच उपदेशेऽशिति[6] ' इत्यात्वम् । ' अचो यत् ' इति भावे यत् । ' ईद्यति ' इतीत्वम् । आर्धधातुकलक्षणो गुणः । कृदुत्तरपदप्रकृतिस्वरः ॥

उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि ।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं भूरि कृत्वः ॥ ४ ॥

उत् । शोचिषा । सहसः । पुत्र । स्तुतः । बृहत् । वयः । शशमानेषु । धेहि ।
रेवत् । अग्ने । विश्वामित्रेषु । शम् । योः । मर्मृज्म । ते । तन्वम् । भूरि । कृत्वः ॥ ४ ॥

सहसस्पुत्र हे अग्ने शोचिषा स्वकीयया दीप्त्या उत् उद्दीप्यस्व । स्तुतः स्तोत्रशस्त्रसाधनभूतैर्मन्त्रैः स्तुतस्त्वं शशमानेषु । ' शशमानः शंसमानः ' (निरु. ६. ८) इति यास्कः । त्वद्विषयशंसनं कुर्वाणेषु विश्वामित्रेषु विश्वामित्रगोत्रोत्पन्नेषु[7] । विश्वं मित्रमस्येति विश्वामित्र एकः[8] ।

१. फ–' त्वाम् ' नास्ति । २. ख-ग-ज-ण-भ–वन्दमानः; फ–' स्तुवन् ' नास्ति । ३. ख-ग-च-ज-ण-न-भ-स–यावद्वन्दनम् । ४. त–अस्य । ५. ल–हवम् । ६. त–उपदेशे । ७. ख-ग-च-ज-ण-न-भ ल–' विश्वामित्रगोत्रोत्पन्नेषु ' नास्ति; घ-प–सर्वमित्रेषु । ८. त–' एकः ' नास्ति ।

एकस्मिन्बहुवचनं पूजार्थम् । तथाविधेष्वस्मासु [v]रेवत् धनयुक्तं [v]बृहत् प्रभूतं [v]वयः । वयःशब्दः अन्ननाची । ' अर्कः वयः क्षत्र ' इत्यन्ननामसु पठितत्वात्[1] । तादृशं प्रभूतमन्नं [v]धेहि विधेहि[2] । किंच [v]शं रोगाणां उपशमनं[3] चास्मासु[4] धेहि । [v]योः भयानां यावनम्[5] अमिश्रणं च धेहि[6] । ' शमनं च रोगाणां यावनं च भयानाम् (निरु. ४. २१) इति यास्कः । [v]कृत्वः अस्माभिः क्रियमाणस्य कर्मणः प्रयोजकत्वेन कर्तर्हे अग्ने [v]ते तव [v]तन्वं तनुं [v]भूरि बहुवारं [v]मर्मृज्म पुनः पुनः सोमाज्यपयःप्रभृतिभिः[7] वयं सिञ्चामः ॥ शशमानेषु । ' शश प्लुतगतौ ' इत्ययं धातुरत्र स्तुत्यर्थः । ' ताच्छील्यवयोवचनशक्तिषु[8] ' इति चानश् । ' चितः[9] ' इत्यन्तोदात्तत्वम्[9] । धेहि । ' डुधाञ् धारणपोषणयोः ' इत्यस्य लोटि रूपम् । रेवत् । रयिरस्यास्तीति मतुप् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । ' छन्दसीरः ' इति तस्य वत्वम् । ' रयेर्मतौ बहुलं छन्दसि ' इति संप्रसारणम् । परपूर्वत्वम् । गुणः । विश्वामित्रेषु । ' मित्रे चर्षौ ' (पा. सू. ६.३.१३०) इति पूर्वपदस्य दीर्घत्वम् । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । मर्मृज्म । ' मृजूष्[10] शुद्धौ ' इत्यस्य वर्तमाने लिटि[10] उत्तमबहुवचने मसो मादेशः । ' अनित्यमागमशासनम् ' इतीडभावः । रेफश्छान्दसः । पादादित्वादनिघातः । प्रत्ययस्वरः । भूरि । ' भू सत्तायाम् ' । ' अदिशदिभूशुभिभ्यः क्विन् ' इति क्विन् । क्वित्वाद्गुणाभावः । नित्स्वरः । कृत्वः । ' डुकृञ् करणे ' । संपदादित्वाद्भावे क्विप् । ' तदस्यास्ति° ' इति मतुप् । ' झयः ' इति तस्य वत्वम् । ' तसौ मत्वर्थे ' इति भसंज्ञायां तकारस्य जश्त्वाभावः । मतुवसो रुः° ' इति तकारस्य रुत्वम् ॥

कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः ।
दुरोणे सुभगस्य रेवत्सुप्रा करस्ना दधिषे वपूंषि ॥ ५ ॥

कृधि । रत्नम् । सुऽसनितः । धनानाम् । सः । घ । इत् । अग्ने । भवसि । यत् । सम्ऽइद्धः ।
स्तोतुः । दुरोणे । सुऽभगस्य । रेवत् । सुप्रा । करस्ना । दधिषे । वपूंषि ॥ ५ ॥

[v]सुसनितः अभिलषितधनानां सुष्ठु दातर्हे [v]अग्ने [v]धनानां कनकपश्वादीनां[11] मध्ये [v]रत्नम् उत्तमं धनं[12] [v]कृधि विधेहि । मह्यं दत्स्व । [v]यत् यदा त्वं [v]समिद्धः सोमाज्यादिभिः सम्यगिद्धो दीप्तो वर्तसे तदा [v]स [v]धेत् स तादृशः[13] एव त्वं धनस्य दाता खलु [v]भवसि[14]। किंच [v]सुभगस्य त्वद्विषयस्तुत्या शोभनधनयुक्तस्य [v]स्तोतुः यजमानस्य [v]दुरोणे गृहे [v]सुप्रा सर्पणशीलौ[15] कर्मकरणार्थं प्रसृतौ [v]करस्ना कर्मणां प्रस्तारौ बाहू । ' करस्नौ[16] बाहू कर्मणां प्रस्तारौ ' (निरु. ६. १७) इति यास्कः[16] । [v]वपूंषि रूपाणि । ' वर्पः वपुः' (नि. ३. ७. ४) इति रूपनामसु पठितत्वात् । तादृशौ बाहू भास्वराणि ज्योतींषि च [v]रेवत् धनयुक्तं यथा भवति तथा [v]दधिषे धारयसि ॥ सुसनितः । ' षणु दाने '

---

१. त–पाठात् । २. ख-ग-घ-च-ज-ण-त-न-फ-भ-ल–' विधेहि ' नास्ति । ३. न-ल–शमनम् । ४. त–अस्मासु । ५. ख-ग-च-ज-ण-न-प-फ-भ–' यावनं ' नास्ति । ६. त-ल–धेहि विधेहि । ७. त-ल–°प्रभृतिभिः आहुतिभिः । ८. त–चित्त्वादन्तोदात्तः; ल–चित्त्वादन्तोदात्तत्वम् । ९. ल–मृजू । १०. ख-ग-ज-ण-भ–लेटि । ११. त–कनकाश्वादिनाम् । १२. ख-ग-च-न-फ-भ–'धनं ' नास्ति । १३. त–एतादृशः । १४. ख-ग-च-ज-ण-न-फ-भ-ल–' भवसि ' नास्ति । १५. न-ल–प्रसर्पणशीलौ । १६. ख-ग-च-ज-ण-भ–' करस्नौ.....यास्कः ' नास्ति ।

इत्यस्य तृचि रूपम्। आमन्त्रितनिघातः। सप्रा। 'सृप्लृ गतौ'। अस्मात् 'स्फायितञ्चिवञ्चि०' इत्यादिना रक्। क्ित्त्वादगुणः। प्रत्ययस्वरः। करत्रा। करोति फलमिति करः[1] कर्म। पचाद्यजन्तः[2]। कर्मणि त्रा शोधनं ययोस्तौ। यद्वा कर्मणां शोधनं याभ्यामिति। बहुव्रीहौ पूर्वपदस्वरः। दधिषे। 'डुधाञ् धारणपोषणयोः' इत्यस्य लटि 'छन्दस्युभयथा' इति थास आर्धधातुकत्वादिट्। आतो लोपः। निघातः॥ ॥ १८ ॥

'अग्निं होतारम्' इति पञ्चर्चं सप्तमं सूक्तं त्रैष्टुभमाग्नेयं गाथिन आर्षम्। तथा चानुक्रान्तम्–'अग्निं होतारं गाथी ह' इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम्।
स नो यक्षद्देवताता यजीयान्त्राये वाजाय वनते मघानि ॥ १ ॥

अग्निम्। होतारम्। प्र। वृणे। मियेधे। गृत्सम्। कविम्। विश्वऽविदम्। अमूरम्।
सः। नः। यक्षत्। देवऽताता। यजीयान्। राये। वाजाय। वनते। मघानि ॥ १ ॥

गाथी स्तौति। हे अग्ने [v]गृत्सं[3] गृणन्तं देवानां स्तुतिं कुर्वन्तं [v]कविं मेधाविनं [v]विश्वविदं सर्वविषयज्ञानोपेतम् [v]अमूरम्[4] अमूढम् [v]अग्निम् अङ्गनादिगुणोपेतं त्वां [v]मियेधे अस्माभिः क्रियमाणेऽस्मिन् यज्ञे [v]होतारं होमनिष्पादकं देवानामाह्वातारं वा अहं [v]प्र [v]वृणे प्रकर्षेण संभजे। [v]सः तथाविधोऽग्निः [v]यजीयान् यष्टृतमः सन् [v]नः अस्माकं [v]देवताता यष्टव्यतया संबन्धिनो देवान् [v]यक्षत् यजतु। किंच सोऽग्निः [v]राये धनाय [v]वाजाय अन्नाय च [v]मघानि मंहनीयान्यस्माभिर्दीयमानानि हवींषि [v]वनते संभजताम्॥ वृणे। 'वृङ् संभक्तौ'। निघातः। मियेधे। मकारैकारयोर्मध्ये इयागमः छान्दसः। गृत्सम्। 'गृधु अभिकाङ्क्षायाम्'। 'गृधिपण्योर्दर्कौ च' (उ. सू. २. ३४९) इति सप्रत्ययः। अन्त्यस्य दकारः। व्यत्ययेनाद्युदात्तत्वम्। अमूरम्। 'मुह वैचित्ये' इत्यस्य निष्ठायां रूपम्। रेफश्छान्दसः। नञा[5] समासे नञ्स्वरः[5]। यक्षत्। यजेर्लेटि 'सिब्बहुलं लेटि' इति सिप्। 'लेटोऽडाटौ' इत्यडागमः। 'इतश्च लोपः०' इतीकारलोपः। देवताता। देवशब्दात्स्वार्थे 'सर्वदेवात्तातिल्' इति तातिल्। 'सुपां सुलुक्०' इति सुपो डादेशः। लित्स्वरः। वनते। 'वन षण संभक्तौ' इत्यस्य लटि व्यत्ययेनात्मनेपदम्। निघातः॥

प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीम्।
प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत् ॥ २ ॥

प्र। ते। अग्ने। हविष्मतीम्। इयर्मि। अच्छ। सुऽद्युम्नाम्। रातिनीम्। घृताचीम्।
प्रऽदक्षिणित्। देवऽतातिम्। उराणः। सम्। रातिऽभिः। वसुऽभिः। यज्ञम्। अश्रेत् ॥२॥

---

१. ख-ग-च-ज-ण-भ–करम्। २. ज-ण–पचाद्यच्। ३. त–गृत्सं गर्द्धेः काम्यमानं वा। ४. त-ल–अत एव अमूरम्। ५. त-ल-स–नञ्समासे तस्य स्वरः।

हे ᵛअग्ने ᵛसुद्युम्नां सुतेजसं ᵛहविष्मतीं पुरोडाशादिहविर्युक्तां ᵛरातिनीं हविर्दात्रीं ᵛघृताचीं घृतान्वितां जुहूम् उपभृतं[1] वा[1] ᵛते तव ᵛअच्छ स्वदाभिमुख्येन ᵛप्र ᵛइयर्मि प्रेरयामि । ᵛदेवतातिं देवान् ᵛउराणः उरु बहु कुर्वाणः । ' उराण उरु कुर्वाणः ' (निरु.६.१७) इति यास्कः । तादृशो भवान् ᵛरातिभिः ᵛवसुभिः[2] अस्मभ्यं देयतया प्राप्तैः[3] धनैः[4] ᵛप्रदक्षिणित् प्रादक्षिण्येन ᵛसम् ᵛअश्रेत् तमिमं यज्ञं सम्यक् सेवताम् ॥ हविष्मतीम् । हविरस्यास्तीति मतुप् । ' तसौ मत्वर्थे ' इति भसंज्ञायां सकारस्य रुत्वं भवति । ' उगितश्च ' इति ङीप् । ' स्वरविधौ व्यञ्जनमविद्यमानवत् ' इति परिभाषानाश्रयणान्मतुप उदात्तताभावः । इयर्मि । ' ऋ गतौ ' । जुहोत्यादिः । ' अर्तिपिपर्त्योश्च ' इत्यभ्यासस्येत्वम् । ' अभ्यासस्यासवर्णे ' इतीयङादेशः । मिपः पित्त्वाद्गुणः । निघातः । अच्छ । ' निपातस्य ' इति संहितायां दीर्घः । रातिनीम् । ' रा दाने ' इत्यस्य नपुंसके भावे क्तः । रातमस्यास्तीति ' अत इनिठनौ ' इतीनिः । प्रत्ययस्वरः । घृताचीम् । घृतपूर्वादञ्चतेः ' ऋत्विग्दधृक् ' इत्यादिना क्विन् । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । भसंज्ञायाम् ' अचः ' इत्यकारलोपः । ' चौ ' इति दीर्घः । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे प्राप्ते ' चौ ' इति पूर्वपदान्तोदात्तः । प्रदक्षिणित् । प्रदक्षिणं करोतीति ' तत्करोति ' इति णिजुत्पद्यमानो दक्षिणशब्दात् भवति । संग्रामयतेरेव सोपसर्गात् णिजुत्पत्तिर्नान्यस्मात् इति तदन्तात् क्विप् । ' ह्रस्वस्य पिति ' (पा. सू. ६.१.७१) इति तुक् । णिचो लोपाभावश्छान्दसः । णिच्स्वरः । देवतातिम् । देवशब्दात् ' सर्वदेवात्तातिल् ' इति तातिल् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । उराणः । उरु करोतीति ' तत्करोति ' इति णिच् । तदन्ताच्छन्दसि लिट् । मन्त्रस्वादाम् न भवति । तस्य कानच् । ' णेरनिटि ' इति णिलोपः । वराद्देशाभावश्छान्दसः । चित्स्वादन्तोदात्तः । अश्रेत् । ' श्रिञ् सेवायाम् ' इत्यस्य छान्दसे लङि ' बहुलं छन्दसि ' इति शपो लुक् । निघातः ॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥ ३ ॥

सः । तेजीयसा । मनसा । त्वाऽऊतः । उत । शिक्ष । सुऽअपत्यस्य । शिक्षोः ।
अग्ने । रायः । नृऽतमस्य । प्रऽभूतौ । भूयाम । ते । सुऽस्तुतयः । च । वस्वः ॥ ३ ॥

हे अग्ने ᵛत्वोतः यः[5] त्वया रक्ष्यमाणः ᵛस ᵛतेजीयसा अतिशयेन तीक्ष्णेन सत्कर्मविषयतीक्ष्णबुद्धियुक्तेन[6] ᵛमनसा अन्तःकरणेन युक्तो भवति । ᵛउत अपि च तस्मै ᵛस्वपत्यस्य । द्वितीयार्थे षष्ठी । शोभनापत्योपेतं धनं[7] ᵛशिक्ष प्रयच्छ । शिक्षतिर्दानकर्मा दात्यादिषु दानकर्मसु पठितत्वात् । हे ᵛअग्ने ᵛशिक्षोः अभिमतफलप्रदाने[8] शक्तिमिच्छोः ᵛरायो ᵛनृतमस्य धनस्यातिशयेन नेतुर्दातुः ᵛते तव ᵛप्रभूतौ प्रभावे महिम्नि[9] वयं स्याम । किंच ᵛसुष्टुतयः स्वद्विषयशोभनस्तुतिमन्तो वयं ᵛवस्वः वसुनो भाजनं ᵛभूयाम भूयास्म[10] ॥ तेजीयसा । तेजितृशब्दादतिशायने ईयसुन् । ' तुरिष्टेमेयःसु ' इति

---

१. प–' उपभृतं वा ' नास्ति । २. ख-ग-च-ज-ण-फ-भ-स–' वसुभिः ' नास्ति । ३. ज-ण-प–प्राप्तैः वसुभिः । ४. न–धनैः सः वसन् ; ल-स–धनैः सन् । ५. ख-ग-च-फ–' यः ' नास्ति; भ-स–सः । ६. त–°बुद्धिप्रयुक्तेन । ७. त–शिक्ष्यते दीयते इति शिक्षुः । धनम् । ८. ख-ग-च-ज-ण–अभिमतत्वात् फलप्रदान (ने) । ९. त–महिम्नि ऐश्वर्ये । १०. घ-प–भूयास्म । च पूरणः ।

तृचो लोपः । निस्वरः । स्वोतः । अव रक्षणादिषु । निष्ठायां ' ज्वरत्वरस्रिव्यविमवामुपधायाः° ' इत्यूठ्[1] । पूर्वलोपः[1] । स्वया ऊतः । ' तृतीया ' इति योगविभागात्समासः । टेर्लोपश्छान्दसः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः । शिक्ष । ' शिक्ष विद्योपादाने ' इत्ययमत्र दानार्थः । अस्मालोटि व्यत्ययेन परस्मैपदम् । शिक्षोः । ' शक्लृ शक्तौ ' इत्यस्य सनि ' एकाच उपदेशे° ' इति इट्प्रतिषेधः । ' सनि मीमाघुरभलभशकपतपदामच इस् ' इति धातोरव इसादेशः । ' अत्र लोपोऽभ्यासस्य ' इत्यभ्यासलोपः । ' सनाशंसभिक्ष उः ' इत्युप्रत्ययः । प्रत्ययस्वरः । प्रभूतौ । ' भू सत्तायाम् ' इत्यस्य भावे क्तिन् । ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम् । भूयाम । 'भू सत्तायाम्' इत्यस्याशीर्लिङि ' किदाशिषि ' इति यासुट् । ' छन्दस्युभयथा ' इति तस्य सार्वधातुकत्वात्सलोपः । आगमस्वरः । यद्वा तस्मात्प्रार्थनायां लिङि यासुट् । ' बहुलं छन्दसि ' इति शपो लुक् । अनदन्तत्वादियादेशो न भवति । सुष्टुतयः । ' नभ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । वस्वः । आगमानुशासनस्यानित्यत्वात् नुमभावः । संज्ञापूर्वकस्य विधेरनित्यत्वान्नुणाभावः । यणादेशः ॥

भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः ।
स आ वह देवतातिं यविष्ठ शर्धो यद्य दिव्यं यजासि ॥ ४ ॥

भूरीणि । हि । त्वे इति । दधिरे । अनीका । अग्ने । देवस्य । यज्यवः । जनासः ।
सः । आ । वह । देवऽतातिम् । यविष्ठ । शर्धः । यत् । अद्य । दिव्यम् । यजासि ॥ ४ ॥

हे [v]अग्ने [v]देवस्य द्योतमानस्य तव संबन्धिनः [v]यज्यवः यष्टारोऽध्वर्युप्रभृतयः [v]जनासः जनाः [v]भूरीणि बहूनि [v]अनीका अनीकानि सेनारूपतया सर्वत्र प्रसृतानि ज्वालारूपाणि तेजांस्याहुतिप्रक्षेपेण [v]त्वे त्वयि [v]दधिरे [v]हि विदधिरे खलु । चक्रुरिति यावत् । [v]सः तादृशस्त्वं [v]देवतातिं यष्टव्यदेवान्[2] इह कर्मणि [v]आ [v]वह आह्वय । हे [v]यविष्ठ युवतम [v]यत् यस्मात्कारणात् [v]अद्य अस्मिन्कर्मणि [v]दिव्यं दिवि[3] भवं[3] देवसंबन्धि [v]शर्धः तेजः त्वं [v]यजासि यजसि तस्मादेवानाह्वयेति शेषः ॥ दधिरे । दधातेर्लिटि रूपम् । हियोगादनिघातः । चित्वादन्तोदात्तः । यज्यवः । यज देवपूजादिषु । ' यजिमनिशुन्धिदसिजनिभ्यो युच् ' इति युच् । व्यत्ययेनाद्युदात्तत्वम् । देवतातिम् । देवशब्दात् स्वार्थे ' सर्वदेवात्तातिल् ' इति तातिल् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । यजासि । यजेर्लेट्यडागमः । यद्योगादनिघातः ॥

यत्त्वा होतारमनजन्मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु ॥ ५ ॥

यत् । त्वा । होतारम् । अनजन् । मियेधे । निऽसादयन्तः । यजथाय । देवाः ।
सः । त्वम् । नः । अग्ने । अविता । इह । बोधि । अधि । श्रवांसि । धेहि । नः । तनूषु ॥५॥

१. ख-ग-भ-इत्पूर्वलोपः; न-इत्यूट् । लोपः; ल-इत्युपधालोपः; स-इत्यूढलोपः । २. ख-घ-त-प-फ-यष्टव्यदेवम् । ३. ख-प-' दिवि भवं ' नास्ति ।

हे [v]अग्ने [v]यजथाय यजनार्थं [v]निषादयन्तः निवसन्तः [v]देवाः दीप्यमाना ऋत्विजः [v]मियेधे मेधे यज्ञे [v]होतारं देवानामाह्वातारं [v]त्वा त्वां [v]यत् यस्मात् [v]अनजन् घृताहुतिभिरौक्षन्। यद्वा निषादयन्तो होतारं होमनिष्पादकं त्वां बर्हिष्युपवेशयन्त ऋत्विजो घृतैरसिञ्चन् तस्मात् [v]सः तथाविधः [v]त्वम् [v]इह अस्मिन् कर्मणि [v]नः अस्माकम् [v]अविता पालयिता भवामीति [v]बोधि बुध्यस्व। किंच [v]नस्तनूषु अस्माकं तनुजेष्वपत्येषु [v]श्रवांसि अन्नानि [v]अधि [v]धेहि अधिकं निधेहि ॥ अनजन्। 'अञ्जू व्यक्तिगतिम्रक्षणेषु'। अस्माल्लङि रुधादित्वात् श्नम्। छान्दसत्वादलोपाभावः। अनिदिताम्° ' इत्युपधालोपः। निषादयन्तः ॥ 'षदॢ विशरणगत्यवसादनेषु' । चुरादिः। 'सदिरप्रतेः[1] ' इति षत्वम्। यद्वा। हेतुमति णिच्। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते णिच्स्वरः। बोधि। 'बुध अवगमने'। लोटि 'बहुलं छन्दसि' इति शपो लुक्। 'सेर्ह्यपिच्च' इति सिपो हिरादेशः। 'वा छन्दसि' इति विकल्पेन पित्त्वात्कुणः। 'हुझल्भ्यो हेर्धिः' इति हेर्धिरादेशः। धकारलोपश्छान्दसः। निघातः। धेहि। दधातेर्लोटि रूपम् ॥ ॥ १९ ॥

'अग्निमुषसम्' इति पञ्चर्चमष्टमं सूक्तं त्रैष्टुभम्। अत्रेयमनुक्रमणिका—'अग्निमुषसमाद्यान्त्ये[2] वैश्वदेव्यौ' इति। 'गाथी ह' इति हशब्दप्रयोगादस्यापि सूक्तस्य गाथी ऋषिः। प्रथमापञ्चम्यौ विश्वेदेवदेवताके[3] शिष्टास्तिस्त्र आग्नेय्यः। अस्य सूक्तस्योक्तो विनियोगः। मरुत्वतीयशस्त्रे 'अग्निर्नेतः' इत्येषा धार्या। सूत्रितं च—'अग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धार्याः। (आश्व. श्रौ. ५.१४) इति ॥

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥ १ ॥

अग्निम्। उषसम्। अश्विना। दधिऽक्राम्। विऽउष्टिषु। हवते। वह्निः। उक्थैः।
सुऽज्योतिषः। नः। शृण्वन्तु। देवाः। सऽजोषसः। अध्वरम्। वावशानाः ॥ १ ॥

गाथी ब्रूते। [v]वह्निः[4] हविषां प्रापयिताग्निः [v]व्युष्टिषु उषसां व्युच्छनेषु[5] [v]अग्निं यजनीयं देवम् [v]उषसम् उषोऽभिमानिनीं देवताम् [v]अश्विना अश्विनौ देवौ [v]दधिक्राम्। दधिक्रावा नाम कश्चिद्देवः तं दधिक्रावाणम्। एतान् देवान्[6] [v]उक्थैः शस्त्रैः शंसनसाधनैरप्रगीतमन्त्रात्मकैः सूक्तैः [v]हवते आह्वयति। [v]सुज्योतिषः सुष्ठु द्योतमानाः [v]नः [v]अध्वरम् अस्मत्संबन्धिनमिमं यज्ञं [v]वावशानाः कामयमानाः [v]सजोषसः परस्परं[7] संगताः[7] भूत्वा सर्वे [v]देवाः तदाह्वानं [v]शृण्वन्तु ॥ दधिक्राम्। 'क्रमु पादविक्षेपे'। दधीत्युपपदे 'जनसनखनक्रमगमः° ' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्याकारः। कृदुत्तरपदप्रकृतिस्वरः। व्युष्टिषु। 'उछी विवासे[8] '। भावे क्तिन्। व्रश्चादिना षत्वम्। 'तादौ च निति कृत्यतौ' इति गतेः प्रकृतिस्वरत्वम्। हवते। ह्वयतेः 'बहुलं छन्दसि' इति संप्रसारणम्। सुज्योतिषः। सुष्ठु द्योतमाना इति विग्रहे 'द्युत दीप्तौ' इत्यस्य 'द्युतेरिसिन्नादेश्च जः' (उ. सू. २. २६७) इतीसिन्प्रत्ययो दकारस्य जकारः। कृदुत्तरपदप्रकृतिस्वरत्वम्[9]। बहुव्रीहिपक्षे तु 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तता स्यात्। यथा 'सुज्योतिषो अक्तवस्ताँ अभि द्युः'

---

१. ल–सदेरप्रतेः। २. च-न-ल–°माद्यान्ते। ३. ख-ग-ज-ण-भ–वैश्वदेवदेवताके; च-ल–वैश्वदेवताके। ४. त–वह्निः स्तुतीनां वोढा; ल–वह्निः स्तुतीनां वोढा होता। ५. त–व्युच्छितेषु। ६. त–'देवान्' नास्ति। ७. त–सहप्रीयमाणा परस्परसंमिलिताः। ८. ख-ग-च-न-भ-स–विवासने। ९. ख-त-फ-°प्रकृतिस्वरः।

(ऋ. सं. १०. ८९. १५) इत्यत्रान्तोदात्तता । तस्मादत्र नायं समासः किंतु तत्पुरुष एव । शृण्वन्तु । ' श्रु श्रवणे ' इत्यस्मात् ' श्रुवः शृ च ' इति श्रुः तत्संनियोगेन धातोः शृ इत्यादेशः । निघातः । वावशानाः । ' वश कान्तौ ' इत्यस्य यङ्लुकि रूपम् । अभ्यासस्य ' दीर्घोऽकितः ' इति दीर्घः । व्यत्ययेन शानच् । चित्स्वरः ॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ २ ॥

अग्ने । त्री । ते । वाजिना । त्री । सधऽस्था । तिस्रः । ते । जिह्वाः । ऋतऽजात । पूर्वीः ।
तिस्रः । ऊँ इति । ते । तन्वः । देवऽवाताः । ताभिः । नः । पाहि । गिरः । अप्रऽयुच्छन् ॥२॥

हे ᵛअग्ने ᵛते तव ᵛत्री ᵛवाजिना आज्यौषधिसोमात्मकानि त्रीण्यन्नानि ᵛत्री ᵛषधस्था त्रीणि आग्नीध्रीयादीनि धिष्ण्यानि स्थानानि । यद्वा एकाहाहीनसत्राख्यानि त्रीणि स्थानानि । यद्वा त्रयो लोकाः । ᵛऋतजात ऋतेषु सत्यभूतेषु यज्ञेषु समुत्पन्न हे अग्ने ᵛते तव ᵛपूर्वीः[1] देवानामुदरपूरयित्र्यः ᵛतिस्रः गार्हपत्याद्याः ᵛजिह्वाः[2] । हे अग्ने ᵛते तव ᵛदेववाताः देवैरभिलषिताः ᵛतिस्रः ᵛतन्वः पवमानपावकशुच्यात्मकानि त्रीणि शरीराणि । एवंभूतस्त्वम् ᵛअप्रयुच्छन् अप्रमाद्यन् सावधानो भूत्वा ᵛताभिः तनूभिः ᵛनः अस्माकं स्तोतॄणां ᵛगिरः स्तोत्रशस्त्रादीनि वाक्यानि ᵛपाहि पालय[3] ।। तिस्रः । ' तिसृभ्यो जसः ' इति जस उदात्तत्वम् । जिह्वाः । ' लिह आस्वादने ' । लिहन्त्याभी रसानिति ' शेवायह्वाजिह्वाग्रीवाप्वामीवाः ' इति निपातनात् वन् । लकारस्य जकारः । गुणाभावः । व्यत्ययेन अन्तोदात्तत्वम् । देववाताः । ' वा गतिगन्धनयोः ' । अस्मात्कर्मणि क्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । पाहि । ' पा रक्षणे ' इत्यस्य लोटि रूपम् । निघातः । अप्रयुच्छन् । ' युच्छ प्रमादे ' । नञ्स्वरः ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः सं दधुः पृष्टबन्धो ॥ ३ ॥

अग्ने । भूरीणि । तव । जातऽवेदः । देव । स्वधाऽवः । अमृतस्य । नाम ।
याः । च । मायाः । मायिनाम् । विश्वम् । इन्व ।
त्वे इति । पूर्वीः । सम् । दधुः । पृष्टबन्धो इति पृष्टऽबन्धो ॥ ३ ॥

---

१. त–पूर्वीः देवानां जिह्वाः सात्त्विकादिभेदेन त्रिप्रकाराः । यद्वा त्रयो वा अग्नेयोहनो (अग्नयो हव्यवाहनो) वै देवानां कव्यवाहनः पितॄणां सह रक्षा असुराणामिति श्रुतेरग्नित्रैविध्यात् जिह्वात्रैविध्ये (ध्यम्) । यद्वा । २. ख-ग-च-फ-भ–जिह्वाः स्वाहिकादिभेदेन त्रिप्रकाराः जिह्वाः; घ-प–जिह्वास्तिस्रो जिह्वाः सत्त्वादिभेदेन (घ–सत्त्विकादि°) त्रिप्रकाराः जिह्वाः; ज-ण-न–जिह्वाः सात्त्विकादिभेदेन त्रिप्रकाराः जिह्वाः । ३. घ-प–पालय । उ पूरणः ।

vदेव[1] द्योतमान vजातवेदः जातप्रज्ञ[2] vस्वधावः अन्नवन् हे vअग्ने vअमृतस्य मरणधर्मरहितस्य vतव संबन्धिनो देवाः vभूरीणि बहूनि vनाम नामानि तेजांसि vत्वे त्वयि vसंदधुः संदधिरे । किंच । vविश्वमिन्व विश्वस्य संतर्पक vपृष्टबन्धो अपेक्षितफलप्रश्नविषयाणां स्तोतॄणां बन्धो हे अग्ने vमायिनाम् असुराणां vपूर्वीः भूयसीः vयाः vमायाः देवास्त्वयि संदधुः संप्रयुयुजिरे तास्त्वयि सन्ति। तस्माद्यज्ञविघ्नकारिणां मायिनां मायाः परिहृत्य अस्मदीयं यज्ञं पालयेति भावः । vच पूरणः॥ स्वधावः । स्वधास्यास्तीति मतुप् । ' मतुवसो रुः०' इति नकारस्य रुः । अमृतस्य । ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् । नाम । ' णम[3] प्रह्वत्वे ' । ' नामन्सीमन्व्योमन्० ' इत्यादिना मनिन्प्रत्ययान्तत्वेन निपातनात् मकारलोपो दीर्घश्च । नमयन्ति सर्वानपि स्वाश्रयभूतान्पुरुषानिति नामानि तेजांसि । ' सुपां सुलुक्० ' इति सुपो लुक् । नित्त्वादाद्युदात्तः । मायिनाम् । माया एषां सन्तीति व्रीह्यादित्वादिनिः । ' यस्य० ' इति लोपः । प्रत्ययस्वरः । विश्वमिन्व । ' इवि व्याप्तिप्रीणनयोः ' इत्यस्मात् निश्चशब्दे उपपदे ' कर्मण्यण् ' इत्यण्प्रत्ययः । धातूपदेशावस्थायाम् ' इदितो नुम्० ' इति नुमि प्राप्ते लघूपधगुणो न भवति । विश्वमिन्वति प्रीणयतीति विश्वमिन्वः । ' तत्पुरुषे कृति बहुलम् ' इति द्वितीयाया अलुक् । आमन्त्रितत्वान्निघातः । संदधुः । ' डुधाञ् धारणपोषणयोः ' इत्यस्य लिटयुसि रूपम् । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । पृष्टबन्धो । ' प्रच्छ ज्ञीप्सायाम् ' इत्यस्य कर्मणि निष्ठायां ' ग्रहिज्यावयि०' इत्यादिना संप्रसारणम् । व्रश्चादिना षत्वम् । ' बन्ध बन्धने ' इत्यस्मात् ' शृस्वृस्निहि०' इत्यादिना उप्रत्ययः । षष्ठीसमासः । आमन्त्रितत्वान्निघातः ॥

अग्निर्नेता भगइव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ॥ ४ ॥

अग्निः । नेता । भगःऽइव । क्षितीनाम् । दैवीनाम् । देवः । ऋतुऽपाः । ऋतऽवा ।
सः । वृत्रऽहा । सनयः । विश्वऽवेदाः । पर्षत् । विश्वा । अति । दुःऽइता । गृणन्तम् ॥ ४ ॥

योऽयम् vअग्निः vक्षितीनां मनुष्याणां vदैवीनां देवसंबन्धिनीनां विशां vनेता अन्तर्यामितया नियामकः । तत्र दृष्टान्तः । vऋतुपाः vभगइव । यथा वसन्तादृतूनां पालकः सूर्यः सर्वस्य स्वप्रकाशप्रदानेन प्रवर्तकः तद्वत् । यश्चाग्निः vऋतावा सत्यकर्मा vवृत्रहा वृत्रस्य[4] हन्ता vसनयः[5] सनातनः पुराणः vविश्ववेदाः सर्वविषयज्ञानवान् सर्वज्ञः vदेवः द्योतमानः vसः तथाविधोऽग्निः vगृणन्तं तद्विषयां स्तुतिं कुर्वन्तं स्तोतारं vविश्वा vदुरिता सर्वाणि दुरितानि vअति अतिक्रम्य vपर्षत् पारं[6] नयतु ॥ नेता । ' णीञ् प्रापणे ' इत्यस्य तृचि रूपम् । चित्स्वरः । क्षितीनाम् । ' क्षि निवासगत्योः ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' नामन्यतरस्याम् ' इत्यन्तोदात्तत्वम् । दैवीनाम् । देवशब्दात् संबन्धार्थे ' देवाद्यञञौ ' इत्यञ् । अञि[7] ' टिड्ढाणञ्० ' इति ङीप् । ञित्वादाद्युदात्तः । ऋतुपाः । ' पा रक्षणे ' इत्यस्मात् ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । ऋतून् पातीति ' उपपदमतिङ् ' (पा. सू. २. २. १९) इति समासः । कृदुत्तरपदप्रकृतिस्वरः । वृत्रहा ।

---

१. त–हे देव । २. च–जातप्रज्ञान । ३. ख-ग-च-त-भ-स–णमु । ४. त–वृत्रस्य पापस्य । ५. ख-ग-च-न-फ-भ-स–सन् यः; त–' सनयः ' नास्ति; । ६. घ–परिनयतु; त–पारं नयेत् । ७. ख-ग-च-ज-ण-न-भ-ल-स–ञित्वात् ।

'हन हिंसागत्योः'। 'ब्रह्मभ्रूणवृत्रेषु क्विप्'[1] इति क्विप्। विश्ववेदाः। 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम्। पर्षत्। 'पॄ पालनपूरणयोः' इत्यस्य लेटि 'सिब्बहुलम्' इति सिप्। अडागमः। 'इतश्च लोपः' इतीकारलोपः। पादादित्वादनिघातः। गृणन्तम्। 'गॄ शब्दे'। लटः शतृ। क्र्यादित्वात् श्ना। शत्रन्तत्वात्[2] 'श्नाभ्यस्तयोरातः' इत्याकारलोपः। शतृप्रत्ययस्वरः॥

दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम्।
अश्विना मित्रावरुणा भगं च वसूंन्रुद्राँ आदित्याँ इह हुवे॥ ५॥

दधिऽक्राम्। अग्निम्। उषसम्। च। देवीम्। बृहस्पतिम्। सवितारम्। च। देवम्।
अश्विना। मित्रावरुणा। भगम्। च। वसून्। रुद्रान्। आदित्यान्। इह। हुवे॥ ५॥

हे दधिक्रावादयः सर्वे देवा होताहं [v]दधिक्रां दधिक्रावाणम् [v]अग्निमुषसं [v]च[3] [v]देवीम्[3] उषोऽभिमानिनीं देवतां च[4] [v]बृहस्पतिं [v]देवं द्योतमानं [v]सवितारं सर्वस्य जगतः प्रेरकं देवं [v]च [v]अश्विना अश्विनौ देवौ मित्रावरुणौ [v]भगं सूर्यं [v]च [v]वसून् अष्टौ वसून् [v]रुद्रान् एकादश रुद्रान् [v]आदित्यान् द्वादशादित्यान् एतान्सर्वान् हविर्भुजो युष्मान् [v]इह अस्मदीये कर्मणि [v]हुवे हविःस्वीकरणार्थमाह्वयामि॥ दधिक्राम्। दधातीति दधिः। 'आदृगमहन०' इत्यादिना किप्रत्ययः। दधीत्युपपदे क्रमेः 'जनसन०' इत्यादिना विट्। 'विड्वनोः०' इत्यात्वम्। देवीम्। देवस्य पत्नी देवी। 'पुंयोगादाख्यायाम्' इति ङीप्। 'यस्येति' इति लोपः। प्रत्ययस्वरेणान्तोदात्तः। बृहस्पतिम्। 'नदृबृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इति पतिशब्दे परतो बृहच्छब्दस्य तलोपः[5] सुडागमश्च। 'उभे वनस्पत्यादिषु युगपत्' इत्युभयपदाद्युदात्तत्वम्। सवितारम्। 'षू प्रेरणे' इत्यस्य तृचि 'आर्धधातुकस्येड्वलादेः' इतीडागमः। ञित्वादन्तोदात्तत्वम्। रुद्राँ आदित्याँ इत्यत्र संहितायां शसो नकारस्य 'दीर्घादटि समानपादे' इति रुत्वम्। ततः पूर्वस्यावर्णस्य[6] 'आतोऽटि नित्यम्' इत्यनुनासिकत्वम्। 'भो भगो अघो अपूर्वस्य योऽशि' इति रोः यादेशः[7]। 'लोपः शाकल्यस्य' इति तस्य लोपः। यलोपस्यासिद्धत्वात् स्वरसन्धिर्न भवति। अतः[8] रुद्राँ आदित्याँ इति भवति। एवमेकस्मिन्पादे आकारादटि परतो नकारस्य रुत्वयत्वपूर्वसवर्णानुनासिकादेशाः[9] उन्नेयाः। हुवे। ह्वयतेर्लेटि 'बहुलं छन्दसि' इति संप्रसारणम्[10]। इटः 'टित आत्मनेपदानाम्' इत्येत्वम्[10]। उवङादेशः। निघातः॥ ॥ २०॥

'इमं नः' इति पञ्चर्चं नवमं सूक्तम्। अत्रेयमनुक्रमणिका—'इमं न उपास्ये अनुष्टुभौ विराड्रूपा सतोबृहती चान्त्या' इति। द्वितीयातृतीये अनुष्टुभौ पञ्चमी विराड्रूपा सतोबृहती च। अनुक्तत्वात्प्रथमाचतुर्थ्यौ त्रिष्टुभौ। अस्यापि गाथी ऋषिः। पशौ स्तोकानुवचने इदं सूक्तम्। सूत्रितं च—'जुषस्व सप्रथस्तममिमं नो यज्ञम्' (आश्व. श्रौ. ३. ४) इति॥

---

१. ख-ग-च-ज-ण-न-भ-ल-स-'क्विप् इति' नास्ति। २. त-त्या(प्वा)दित्वात् ह्रस्वः। नुमि श्नाभ्यस्तयोरातः इत्याकारलोपः। शतृप्रत्ययः। ३. ख-ग-ज-ण-भ-देवीं च; न-ल-स-देवीम्। ४. ख-ग-च-ज-ण-न-भ-'च' नास्ति। ५. त-तकारलोपः। ६. ख-ग-च-ज-ण-न-भ-पूर्वसवर्णस्य; ल-पूर्वस्य सवर्णस्य। ७. त-ल-यकारादेशः। ८. त-ततः। ९. ख-ग-च-ज-ण-न-भ-स-नुनासिकाः। १०. त-संप्रसारणे इटः टित आत्मनेपदानामिति एत्वे।

इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥ १ ॥

इमम् । नः । यज्ञम् । अमृतेषु । धेहि । इमा । हव्या । जातऽवेदः । जुषस्व ।
स्तोकानाम् । अग्ने । मेदसः । घृतस्य । होतरिति । प्र । अशान । प्रथमः । निऽसद्य ॥ १ ॥

गाथी प्रार्थयते । हे vजातवेदः जातप्रज्ञ अग्ने vनः अस्माकं संबन्धिनम् vइमं vयज्ञं पशुयागम् vअमृतेषु मरणधर्मरहितेषु यष्टव्यदेवेषु vधेहि तदधीनतया समर्पय । त्वं च vइमा इमान्यस्माभिर्दीयमानानि vहव्या हव्यानि हवींषि vजुषस्व सेवस्व । किंच vहोतः देवानामाह्वातः । ' अग्निर्वै देवानां होता ' (ऐ. ब्रा. ३. १४) इत्याम्नानात् । तादृश हे vअग्ने vनिषद्य वेद्यामुपविश्य vप्रथमः सर्वेषामृत्विजामादिमः सन् vमेदसः वपाख्यस्य हविषः vघृतस्य आज्यस्य च vस्तोकानाम् । द्वितीयार्थे षष्ठी । मेदोघृतयोर्ये स्तोका बिन्दवो विद्यन्ते तान्प्रकर्षेण vअशान भक्षय । पिबेत्यर्थः ॥ धेहि । दधातेर्लोटि रूपम् । जुषस्व । ' जुषी प्रीतिसेवनयोः ' इत्यस्य लोटि आत्मनेपदिनो रूपम् । अशान । ' अश भोजने ' इत्यस्य लोटि ' हलः श्नः शानजझौ ' (पा. सू. ३. १. ८३) इति शानजादेशः । पश्चात् ' अतो हेः ' इति हेर्लुक् । निघातः । प्रथमः । ' प्रथ प्रख्याने ' । प्रथमः प्रथन्तेऽरमात् द्वितीयादयः इति । ' प्रथेरमच् ' (उ. सू. ५. ७४६) इत्यमच् । चित्त्वादन्तोदात्तः । निषद्य । ' षदॢ विशरणगत्यवसादनेषु ' इत्यस्य ल्यपि रूपम् । ' सदिरप्रतेः ' ' इति षत्वम् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् ॥

घृतवन्तः पावक ते स्तोकाः श्रोतन्ति मेदसः ।
स्वधर्मन्देववीतये श्रेष्ठं नो धेहि वार्यम् ॥ २ ॥

घृतऽवन्तः । पावक । ते । स्तोकाः । श्रोतन्ति । मेदसः ।
स्वऽधर्मन् । देवऽवीतये । श्रेष्ठम् । नः । धेहि । वार्यम् ॥ २ ॥

vपावक पापशोधक हे अग्ने vस्वधर्मन् स्वायत्तधर्मके[२] साङ्गेऽस्मिन् यज्ञे vते तव भक्षणार्थं vदेववीतये यजनीयदेवानां भक्षणार्थं च vघृतवन्तः घृतोपेताः vमेदसः[३] मेदोरूपस्य[४] हविषः vस्तोकाः बिन्दवः vश्रोतन्ति क्षरन्ति । अथवा देववीतये देवस्य तव वीतये इति योजनीयम् । तस्मात् vवार्यं वरणीयं संभजनीयं[५] vश्रेष्ठम् उत्तमं धनं vनः अस्मभ्यं vधेहि प्रयच्छ ॥ श्रोतन्ति । ' श्रुतिर् क्षरणे ' इत्यस्य लटि रूपम् । स्वधर्मन् । स्वेऽङ्गभूताः[६] धर्माणो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । ' सुपां सुलुक् ' इति सप्तम्या लुक् । देववीतये । देवानां वीतिः प्रीतिर्यस्यां भक्षणक्रियायां सा देववीतिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । श्रेष्ठम् । प्रशस्यशब्दादतिशायने इष्ठन् । ' प्रशस्यस्य श्रः ' इति श्रादेशः ।

---

१. न-भ-ल-सदेरप्रतेः । २. त-' स्वायत्तधर्मके ' नास्ति । ३. ख-फ-भ-मेदसः मेदोपेताः । ४. त-वपारूपस्य । ५. ख-ग-ज-ण-न-फ-भ-स-भजनीयम् । ६. त-स्वे स्वीया अङ्गभूताः ।

गुणः । एकादेशस्वरः । धेहि । दधातेर्लोट् । वार्यम् । ' वृङ् संभक्तौ ' । ' ऋहलोर्ण्यत् ' इति ण्यत् । ' ईडवन्द° ' इत्यादिनाद्युदात्तत्वम् । ' एतिस्तुशास्° ' इत्यादिना क्यप् वृणोतेरेव न वृङः ॥

तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य ।
ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ॥ ३ ॥

तुभ्यम् । स्तोकाः । घृतऽश्चुतः । अग्ने । विप्राय । सन्त्य ।
ऋषिः । श्रेष्ठः । सम् । इध्यसे । यज्ञस्य । प्रऽअविता । भव ॥ ३ ॥

[v]सन्त्य यष्टृभिः[1] संभजनीय यद्वा यष्टृभ्यः फलप्रद हे [v]अग्ने [v]विप्राय मेधाविने [v]तुभ्यं त्वदर्थं [v]घृतश्चुतः घृतक्षरणयुक्ताः [v]स्तोकाः सन्ति । [v]ऋषिः अतीन्द्रियार्थदर्शी अत एव [v]श्रेष्ठः सर्वातिशायी[2] त्वं [v]समिध्यसे घृतयुक्तमेदोबिन्दुभिः सम्यक् प्रज्वाल्यसे । स त्वं [v]यज्ञस्य अस्माभिः क्रियमाणस्य पशुयागस्य [v]प्राविता प्रकर्षेण पालकः [v]भव ॥ तुभ्यम् । युष्मच्छब्दस्य ङयि ' तुभ्यमह्यौ ङयि ' (पा. सू. ७. २. ९५) इति तुभ्यादेशः । ' ङेप्रथमयोरम् ' इति ङेरमादेशः । ' ङयि च ' इति आद्युदात्तत्वम्। सन्त्य । ' षण संभक्तौ '; ' षणु दाने ' वा । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' न क्तिचि दीर्घश्च ' इति दीर्घनलोपाभावः । सन्तौ भवः ' भवे छन्दसि ' इति ' तत्र साधुः ' इति वा यत्प्रत्ययः । यस्येति लोपः । आमन्त्रितत्वान्निघातः । इध्यसे । ' णिहन्धी दीप्तौ ' । कर्मणि यक् । कित्त्वादनुनासिकलोपः । निघातः। प्राविता । अव रक्षणादिषु । तृचि रूपम् । समासस्वरः । भव । निघातः॥

तुभ्यं श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥ ४ ॥

तुभ्यम् । श्चोतन्ति । अध्रिगो इत्यध्रिऽगो । शचीऽवः । स्तोकासः । अग्ने । मेदसः । घृतस्य ।
कविऽशस्तः । बृहता । भानुना । आ । अगाः । हव्या । जुषस्व । मेधिर ॥ ४ ॥

[v]अध्रिगो अधृतगमन सततगमनस्वभाव । अत एव [v]शचीवः शक्तिमन् हे [v]अग्ने [v]तुभ्यं त्वदर्थं [v]मेदसः मेदोरूपस्य हविषः [v]घृतस्य [v]स्तोकासः बिन्दवः [v]श्चोतन्ति स्रवन्ति । तस्मात्[3] [v]कविशस्तः कविभिः कर्माभिज्ञैर्होत्रादिभिः स्तुतस्त्वं [v]बृहता प्रभूतेन [v]भानुना तेजसा सहितः सन् [v]आगाः अस्मदीयं पशुयागमभ्यागच्छ । आगत्य च [v]मेधिर प्रज्ञावन्नग्ने [v]हव्या अस्माभिर्दीयमानानि वपादीनि हवींषि [v]जुषस्व सेवस्व ॥ अध्रिगो । गमनं गौरिति ' गम्लृ सृप्लृ[4] गतौ ' इत्यस्य भावे ' गमेर्डोः ' इति डोः । अधृता गौर्येन इत्यत्र ' गोस्त्रियोरुपसर्जनस्य ' इति गोशब्दस्य ह्रस्वत्वम् । धृतशब्दस्य[5] पृषोदरादित्वात् ध्रिभावः[6]। संबोधने ' संबुद्धौ च ' (पा. सू. ७. ३. १०६) इति गुणः।

१. ख-घ-च-ज-ण-न-फ-भ-ल-यष्टृभ्यः । २. ख-ग-घ-च-ज-ण-प-फ-भ-' सर्वातिशायी ' नास्ति । ३. ख-ग-च-ज-ण-फ-भ-सं-अस्मात्, ल-अस्माकम् । ४. त-' सृप्लृ ' नास्ति । ५. त-अधृतशब्दस्य । ६. त-अध्रिभावः ।

अपादादित्वान्निघातः । शर्चीवः । मनुषः ' मनुवसो रः ' इति रत्वम् । कविक्रतः । ' इंसु स्तुतौ ' इत्यस्य निष्ठायामनुनासिकलोपः । ' यस्य विभाषा ' इतीट्प्रतिषेधः । ' थाथघञ्क्ताजबित्रकाणाम् ' इत्यन्तोदात्तत्वम् । भानुना । ' भा दीप्तौ ' । ' दाभाभ्यां नुः ' इति कर्तरि[1] नुः । प्रत्ययस्वरः । अगाः । ' इण् गतौ ' इत्यस्य छान्दसे लुङि ' इणो गा ' इति गादेशः । ' गातिस्था ' इति सिचो लोपः । निघातः । मेधिर । ' मेधास्थाभ्यामिरनिरचौ वक्तव्यौ ' इतीरन् । आमन्त्रितत्वान्निघातः ॥

ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।
श्रोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥ ५ ॥

ओजिष्ठम् । ते । मध्यतः । मेदः । उत्ऽभृतम् । प्र । ते । वयम् । ददामहे ।
श्रोतन्ति । ते । वसोऽइति । स्तोकाः । अधि । त्वचि । प्रति । तान् । देवऽशः । विहि ॥ ५ ॥

हे अग्ने[2] ᵛओजिष्ठम् अतिशयेन सारयुक्तं ᵛमेदः वपाख्यं हविः ᵛमध्यतः पशोर्मध्यभागात् ᵛते त्वदर्थम् ᵛउद्भृतम् उद्धृतम् अध्वर्यवादयः ᵛवयम् अस्मिन् पशौ ᵛते तुभ्यं ᵛप्र ᵛददामहे उद्धृतं तद्वपाख्यं हविः प्रयच्छामः । ᵛवसो सर्वस्य जगतो वासयितर्हे अग्ने ᵛत्वचि ᵛअधि वपायामुपरि ये ᵛस्तोकाः घृतमिश्रा बिन्दवस्ते ᵛते त्वदर्थं ᵛश्रोतन्ति स्रवन्ति । यद्वा[3] ते तव त्वच्यधि ज्वालारूप-शरीरस्योपरि श्रोतन्ति[3] । ᵛतान् स्तोकान् ᵛदेवशः देवेषु ᵛप्रति ᵛविहि प्रत्येकं विभजस्व ॥ मध्यतः । मध्यशब्दात् ' पञ्चम्यास्तसिः ' (पा. सू. ५.४.४४) इति तसिः । प्रत्ययस्वरः । उद्भृतम् । ' हृञ् हरणे ' । कर्मणि क्तः । ' हृग्रहोर्भश्छन्दसि ' इति हकारस्य भकारः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ददामहे । ' दद दाने ' इत्यस्य लटि ङित्त्वादात्मनेपदम् । ' अतो दीर्घो यञि ' इति दीर्घः । निघातः । श्रोतन्ति । ' श्रुतिर् क्षरणे ' । पादादित्वादनिघातः । अन्तेर्लसार्वधातुकस्वरेण अनुदात्तत्वे कृते धातुस्वरः । त्वचि । ' तनु विस्तारे ' । ' तनोतेरनश्च वः ' (उ. सू. २. २२१) इति कर्तरि कर्मणि वा चिक् । अकारनकारयोर्वकारादेशः । तनोति तायते[4] वा त्वक् । ' सावेकाचः[5] ' इति विभक्तेरुदात्तत्वम् । विहि । वी कान्तिगत्यादिष्वित्यस्य लोटि अदादित्वाच्छपो लुक् । ह्रस्वश्छान्दसः । निघातः[6] । खिलम्[6] ॥ ॥ २१ ॥

' अयं सः ' इति पञ्चर्चं दशमं सूक्तम् । अत्रेयमनुक्रमणिका—' अयं स उपान्त्यानुष्टुप् पुरीष्येभ्योऽग्निभ्यः ' इति । ऋषिः कौशिको गाथी[7] । पञ्चचितिरूपा अग्नयो देवता[8] । चतुर्थ्यनुष्टुप् शिष्टाः त्रिष्टुभः । प्रातरनुवाकाधिनशस्त्रयोरुक्तः सूक्तविनियोगः । अग्निचयने इष्टकाप्रणयने ' पुरीष्यासः ' इत्येषानुवचनीया । ' प्रेषितः पुरीष्यचितयेऽन्वाह ' इत्युपक्रम्य ' पुरीष्यासो अग्नय इति त्रिरपांशु सप्रणवम् ' (आश्व. श्रौ. ४. ८) इति सूत्रितम् ॥

---

१. त—' कर्तरि ' नास्ति । २. ख-ग-च-ज-ण-प-भ—अग्ने त्वम् । ३. ख-ग-च-ज-ण-फ-भ-ल—' यद्वा... ...श्रोतन्ति ' नास्ति । ४. ख-ग-च-ज-ण—तन्यते । ५. ख-च-ज-ण-फ-भ—' निघातः ' नास्ति । ६. न-ल—खिलम् । ब्राह्मणानुसहितमिदं सूक्तम् । तत्र ब्राह्मणं पदव्याख्यानात्मकं न भवतीति नात्र लिखितम् । ७. त—गाथी पुरीष्यास इत्यस्याः । ८. त—देवताः शिष्टाः केवलाग्नेय्यः ।

अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ॥ १ ॥

अयम् । सः । अग्निः । यस्मिन् । सोमम् । इन्द्रः । सुतम् । दधे । जठरे । वावशानः । सहस्रिणम् । वाजम् । अत्यम् । न । सप्तिम् । ससऽवान् । सन् । स्तूयसे । जातऽवेदः ॥ १ ॥

गाथी ब्रूते । vअयम् उत्तरवेद्यामाहुत्यधिकरणभूताहवनीयरूपतया दृश्यमानः vअग्निः vसः तथाविधः खलु vवावशानः सोमं कामयमानः vइन्द्रः vयस्मिन् अग्नौ vसुतम् अभिषवादिसंस्कारोपेतं vसोमं vजठरे स्वोदरे vदधे दधार[1] । तस्मात् तादृशमहिमोपेतः सोऽग्निरिति पूर्वेणान्वयः[2] । किंच हे vजातवेदः vसहस्रिणम् । सहस्रं नानारूपतां युद्धे यो भजति स सहस्री । तम्[3] vअत्यं वेगवशात् अतनशीलं vसप्तिं vन अश्वमिव[4] vवाजम् आज्यौषधिसोमाद्यनेकप्रकारं[5] हविर्लक्षणमन्नं vससवान् भेजिवान् vसन् त्वं vस्तूयसे स्तोतृभिरस्माभिः स्तूयमानो वर्तसे ॥ दधे । दधातेर्लिटि ' लिटस्तझयोरेशिरेच् ' इति तप्रत्ययस्य एश् इत्यादेशः । यदृवृत्तयोगादनिघातः । प्रत्ययस्वरः । वावशानः । ' वश कान्तौ ' इत्यस्य यङ्लुकि ' दीर्घोऽकितः ' इत्यभ्यासस्य दीर्घः । व्यत्ययेन शानच् । चित्स्वरः । ससवान् । ' षण संभक्तौ ' । क्वसाविडभावः । नलोपः । प्रत्ययस्वरः । स्तूयसे । ' ष्टुञ् स्तुतौ ' । कर्मणि यक् । ' अकृत्सार्वधातुकयोः ' इति दीर्घः । निघातः ॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ २ ॥

अग्ने । यत् । ते । दिवि । वर्चः । पृथिव्याम् । यत् । ओषधीषु । अप्ऽसु । आ । यजत्र । येन । अन्तरिक्षम् । उरु । आऽततन्थ । त्वेषः । सः । भानुः । अर्णवः । नृऽचक्षाः ॥ २ ॥

vयजत्र यजनीय हे vअग्ने vदिवि द्युलोके vयत् vवर्चः आदित्याख्यं यज्ज्योतिस्तत् vते तवैव ज्योतिः । vपृथिव्याम् आहवनीयादिरूपतया वर्तमानं[6] यत्तेजस्तत्त्वदीयमेव । प्रसिद्धं तेजोऽभिधाय गूढं ज्योतिरभिधत्ते । यदोषधीष्वप्सु[7] इति । vओषधीषु अरणिप्रभृतिषु काष्ठेषु vयत् तेजः । यद्वा ओषधीषु वनस्पत्यादिषु सोमाख्यं यत्तेजः vअप्सु जलेषु यदौर्वाख्यं तेजस्तत्सर्वम् vआ सर्वत्र वर्तमानं तेजः तावकमेव[8] । किंच[9] vयेन वायुरूपेण तेजसा vअन्तरिक्षम् आकाशम् vउरु vआततन्थ आतेनिथ[10] विस्तीर्णं कृतवानसि[11] । vत्वेषः दीप्तिमान् अत एव vभानुः भासमानः vनृचक्षाः नृणां साक्षितया द्रष्टा vअर्णवः vसमुद्रवन्महान् । vसः तादृशस्त्वमन्तरिक्षमातेनिथेति पूर्वेणान्वयः । उक्तार्थं वाजसनेयकम्—

---

१. घ-ल-दधाति; त-धारयति । २. त-पूर्वेणान्वयः । अथ प्रत्यक्षकृतः । ३. ज-ण-तं सहस्रिणम् । ४. त-अश्वमिव । यद्वा सह(?)सहस्रिणमिति वाजविशेषणं सहस्रसंख्याकम् । ५. च-आज्यौषधिसोमाद्यनेकरूपम्; त-आज्यौषधसोमाद्यनेकप्रकारम् । ६. त-दाहपाकादिकर्तृतया वर्तमानम् । ७. ज-ण-न-प-यदोषधीषु । ८. त-तावकमेव तत् । ९. त-किंच त्वम् । १०. प-उरु । ११. ख-च-ज-ण-फ-भ-ल-' कृतवानसि ' नास्ति; प-आततम् ।

'अग्ने यत्ते दिवि वर्चः इत्यादित्यो वा अस्य[1] दिवि वर्चः पृथिव्यामित्ययमग्निः पृथिव्यां[2] यदोषधीष्वप्स्वा[2] यजत्रेति य एवौषधिषु चाप्सु चाग्निस्तमेतदाह[3] येनान्तरिक्षमुर्वाततन्थेति वायुः स खेषः स भानुरर्णवो नृचक्षा इति महान्त्स भानुरर्णवो नृचक्षा इत्येतत्' (श. ब्रा. ७. १. २३) इति ॥ पृथिव्याम्। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेः उदात्तत्वम्[4]। ओषधीषु। 'ओषधेश्च विभक्तावप्रथमायाम्' इति दीर्घत्वम्। अप्सु। 'सावेकाचः' इति विभक्तेरुदात्तत्वम्। आततन्थ। 'तनु विस्तारे' इत्यस्य लिटि थलि 'बभूथाततन्थ जगृभ्म ववर्थ' इति निपातनात् इडेत्वाभ्यासलोपाः न भवन्ति। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। यद्वृत्तयोगादनिघातः। अर्णवः। अर्णांस्यस्मिन् सन्तीति मतुबर्थे 'वप्रकरणे अन्येभ्योऽपि दृश्यते' (का. ५. २. १०९. १) इति वप्रत्ययः। 'अर्णसः सलोपश्च' इति सलोपः। प्रत्ययस्वरः। नृचक्षाः। 'चक्षिङ् व्यक्तायां वाचि'। अभिव्यक्तवाग्वाच्ययं धातुरत्र अभिव्यक्तिमात्रे वर्तते। 'चक्षेर्बहुलं शिच्च' इत्यसुन्। कृदुत्तरपदप्रकृतिस्वरः ॥

अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ ३ ॥

अग्ने। दिवः। अर्णम्। अच्छ। जिगासि। अच्छ। देवान्। ऊचिषे। धिष्ण्याः। ये।
याः। रोचने। परस्तात्। सूर्यस्य। याः। च। अवस्तात्। उपऽतिष्ठन्ते। आपः ॥ ३ ॥

हे [v]अग्ने त्वं [v]दिवो [v]अर्णं द्युलोके वर्तमानमर्णोऽम्भः [v]अच्छ अभिलक्ष्य [v]जिगासि धूमद्वारा प्राप्नोषि। किंच [v]धिष्ण्याः। धियं बुद्ध्युपहितं देहमुष्णन्त्युष्णीकुर्वन्ति इति धिष्ण्याः[5] प्राणाभिमानिनो[6] देवाः[6]। तान्प्राणात्मकान् [v]देवान् [v]अच्छ अनुक्रमेण [v]ऊचिषे समवेतान्करोषि। समवेता भवतेत्युक्तवान् असीत्यर्थः। [v]सूर्यस्य[7] सूर्यलोकस्य [v]परस्तात् उपरि [v]रोचने। रोचनो नामायं लोको यत्राग्नेयं ज्योतिः तपति। तस्मिन्भासमाने रोचनाख्ये लोके [v]याः आपो विद्यन्ते [v]अवस्तात् सूर्यलोकात्[8] अधस्तात् अन्तरिक्षलोके [v]याश्च [v]आपः [v]उपतिष्ठन्ते वर्तन्ते ता उभयीरपस्त्वं प्रेरयसि। उक्तार्थो वाजसनेयिभिः स्पष्टमभिहितः—'आपो वा अस्य दिवोऽर्णस्ता एष धूमेनाच्छैत्यच्छा देवाँ ऊचिषे धिष्ण्या य इति प्राणा वै देवा धिष्ण्यास्ते हि सर्वा धिय इष्णन्ति[9] या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आप इति[10] रोचनो ह नामैष लोको यत्रैष एतत्तपति तद्याश्चैतं परेणापो याश्चावरेण ता एतदाह' (श. ब्रा. ७. १. २४) इति। ता उभयीरपस्त्वं प्रेरयसीति ॥ अर्णम्। 'ऋ गतौ' इत्यस्मात् 'उदके नुट् च' इत्यसुनुडागमश्च। अर्यते[11] प्रार्थ्यते तत्पिपासुभिरित्यर्णः। सकारलोपश्छान्दसः। निघादाद्युदात्तः। जिगासि। 'गा स्तुतौ च छन्दसि' इत्ययं धातुश्चकाराद्गमने वर्तमानः[11] जुहोत्यादिः। 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्। निघातः। ऊचिषे। 'ब्रूञ् व्यक्तायां वाचि' इत्येतस्य लिट आर्धधातुकत्वात् 'ब्रुवो वचिः' (पा. सू. २. ४. ५३) इति वच्यादेशः। 'असंयोगाल्लिट् कित्'

१. त–अस्याम्। २. त–'पृथिव्यां.....ष्वप्स्वा' नास्ति। ३. ख-च-ज-ण-फ-भ–चाग्निस्तमेव तदाह; त-ल–चाग्निस्तमेतमाह। ४. ख-च-ज-ण-न-फ-भ-स–आद्युदात्तत्वम्। ५. न–धिष्ण्याः प्राणाः। यद्वा धिषणा स्तुतिस्तद्वाहाः। प्राणा ये(वै)धिष्ण्याः; ल–प्राणा यै(वै) धिष्ण्याः। ६. त–प्राणाः। ७. त-ल–किंच सूर्यस्य। ८. च–सूर्यलोकस्य। ९. त–उदमन्ति तानेष सचते या रोचन इति। १०. त–अर्थ्यते। ११. त-ल–वर्तते।

इति किद्भावात् ' वचिस्वपि ' इत्यादिना संप्रसारणम् । अभ्यासस्य ' लिटयभ्यासस्योभयेषाम् ' इति संप्रसारणम् । आर्धधातुक इट् । निघातः । धिष्याः । ' उप प्लुष दाहे ' । धिय उष्णन्तीति ' सानसिधर्णसिपर्णसितण्डुलाडुकुशचषालेलवलपलवलधिष्ण्यशस्याः ' इति निपातनात् यलुडागम-धात्वादिलोपोपपदह्रस्वत्वादयः सर्वे सिद्धा भवन्ति[1] । नित्त्वादाद्युदात्तः । अवस्तात् । अवरशब्दात् ' दिक्छब्देभ्यः सप्तमीपञ्चमी ' इत्यादिना अस्तातिः । तस्मिन् ' विभाषावरस्य ' (पा.सू.५.३.४१) इत्यवादेशः । प्रत्ययस्वरः । उपतिष्ठन्ते[2] । ' ष्ठा गतिनिवृत्तौ ' । उपपूर्वात्तिष्ठतेः ' अकर्मकाच्च ' (पा. सू. १. ३. २६) इत्यात्मनेपदम् । यद्वृत्तयोगादनिघातः[3] ॥

पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥ ४ ॥

पुरीष्यासः । अग्नयः । प्रवणेभिः । सऽजोषसः ।
जुषन्ताम् । यज्ञम् । अद्रुहः । अनमीवाः । इषः । महीः ॥ ४ ॥

पुरीष्यासः[3] सिकतासंमिश्राः अग्नयः चित्याः[4] अग्नयः[4] प्रवणेभिः मृत्खननसाधनभूतैरभ्रयादिभिः सहिताः सजोषसः परस्परसंगताः सन्तः यज्ञम् अस्माभिः क्रियमाणमग्निचयनपूर्वकमिमं सोमयागं जुषन्तां सेवन्ताम् । किंच अद्रुहः अद्रोग्धारो यूयम् अनमीवाः रोगादिवर्जिताः महीः महत्यः इषः ऊर्जाः रोगादिरहितान्यन्नान्यस्मभ्यं प्रयच्छताम् ॥ पुरीष्यासः । ' पॄ पालनपूरणयोः ' । ' ईषन् ' इत्यनुवृत्तौ ' शॄपॄभ्यां कित् ' (उ. सू. ४. ४६७) इति ईषन्प्रत्ययः कित्च[5] । कित्त्वाद्गुणे प्रति-षिद्धे ' उदोष्ठ्यपूर्वस्य ' इत्युत्वम् । रपरः । पृणाति पूर्यते वेति[6] पुरीषम्[7] । ' पुरीषं पृणातेः पूरयतेर्वा ' (निरु. २.२२) इति यास्कः[8] । तदर्हन्तीति पुरीष्याः । ' छन्दसि च ' इति यप्रत्ययः । ' यचि भम् ' इति भसंज्ञायां यस्येति लोपः । प्रत्ययस्वरः । प्रावणेभिः[9] । ' वन षण संभक्तौ ' इत्यस्मात ' पुंसि संज्ञायां घः प्रायेण ' इति करणे घप्रत्ययः[10] । प्रकर्षेण वन्यते संभज्यते संश्लिष्यते मृदेभिरिति प्रावणानि[11] खनित्राणि । ' प्रनिरन्तः ' (पा. सू. ८. ४. ५) इत्यादिना णत्वम् । ' वनं समासे ' (पा. सू. ६. २. १७८) इत्यन्तोदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम्[12] । यद्वा । ' प्रुङ् गतौ ' । प्रवन्ते गच्छन्ति मृत्खननं प्रति इति ' चलनशब्दार्थादकर्मकाद्युच् ' (पा. सू. ३. २. १४८) इति युच् । चित्स्वरः । पूर्वस्मिन्पक्षेऽवग्रहाभावश्छान्दसः इति वक्तव्यम् । जुषन्ताम् । ' जुषी प्रीतिसेवनयोः ' इत्यस्य लोटि रूपम् । पादादित्वादनिघातः । महीः । महच्छब्दात् ' उगितश्च ' इति ङीप् । तकारलोपः छान्दसः । प्रत्ययस्वरेणान्तोदात्तः ॥

१. ख-च-ज-ण-फ-न भवन्ति । २. ख-च-ज-ण-भ-' उपतिष्ठन्ते..... निघातः ' नास्ति । ३. त-पुरीष्यासः । पुरीषमर्हन्तीति पुरीषे भवा वा पुरीष्याः ; ल-पुरीष्यासः । पुरीषमर्हति पुरीष्यासः । ४. त-चित्याग्नयः । ५. ल-कित्वं च । ६. ख-फ-र्वाभिरिति; भ-त्वेभिरिति । ७. त-' पुरीषं ' नास्ति । ८. त-यास्कः । तस्माद्धवे छन्दसि इति यत् । तित्स्वरितः । ९. च-त-फ-ल-प्रवणेभिः । १०. ख-ज-ण-घप्रत्ययस्वरः; च-घः प्रत्ययः स्वरः । ११. त-प्रवणानि । १२. ख-च-ज-ण-न-भ-°पदस्वरः ।

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ५ ॥

एषा ऋक् पूर्वमेव व्याख्याता[1] ॥ ॥ २२ ॥

'निर्मथितः सुधितः' इति पञ्चर्चमेकादशं सूक्तम् । अत्र[2] अनुक्रमणिका—'निर्मथितो देवश्रवा देववातश्च भारतौ तृतीया सतोबृहती' इति । भरतस्य पुत्रौ देवश्रवा देववातश्चेत्युभावस्य ऋषी । तृतीया सतोबृहती । शिष्टास्त्रिष्टुभः । अग्निर्देवता । 'आ होता' इत्यादिसूक्तदशकस्योक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः । 'इळामग्ने' इत्यस्या विनियोगोऽसकृदुक्तः ॥

निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥ १ ॥

निःऽमथितः । सुऽधितः । आ । सधऽस्थे । युवा । कविः । अध्वरस्य । प्रऽनेता ।
जूर्यत्ऽसु । अग्निः । अजरः । वनेषु । अत्र । दधे । अमृतम् । जातऽवेदाः ॥ १ ॥

भारतावृषी स्तोत्रं कुर्वाते । योऽग्निः [v]निर्मथितः अग्निष्टोमादिकर्मस्वरण्योर्नितरां मथितः सन् [v]सधस्थे यजमानगृहे [v]सुधितः गार्हपत्यादिषु त्रिषु कुण्डेषु सुष्ठु निहितः निधाय च काष्ठप्रक्षेपेण प्रज्वाल्यमानः [v]युवा[3] प्रबुद्धः अत एव [v]अध्वरस्य ज्योतिष्टोमादेः [v]प्रणेता प्रकर्षेण नेता निर्वाहकः नेतृत्वादेव [v]कविः क्रान्तदर्शी । तथाविधः [v]जातवेदाः सर्वविषयाभिज्ञानवान् सः [v]अग्निः [v]वनेषु महारण्येषु [v]जूर्यत्सु दावाग्निसंबन्धात् जूर्यमाणेषु जरां नाशं प्राप्नुवत्स्वपि स्वयम् [v]अजरः जरारहितः प्रत्युत दीप्यमानः सन् [v]अत्र[4] एवं[4] स्तुतिं कुर्वाणेषु यजमानेषु [v]अमृतं क्षयरहितं प्रभूतमन्नम् [v]आ [v]दधे निदधाति ॥ सुधितः । दधातेः कर्मणि निष्ठायां 'सुधितवसुधितनेमधित०' इत्यादिना निपातनात् धि इत्यादेशः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । जूर्यत्सु । 'जूरी घूरी हिंसावयोहान्योः' । व्यत्ययेन शतृप्रत्ययः । दिवादित्वात् श्यन् । नित्त्वादाद्युदात्तः । अजरः । 'जॄ[5] वयोहानौ' इत्यस्मात् भावे[6] 'ऋदोरप्' इत्यप्प्रत्ययः । गुणः । 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । दधे । दधातेः वर्तमाने लिटि रूपम् । जातवेदाः । 'जनी प्रादुर्भावे' इत्यस्य ले 'जनसनखनां सन्झलोः' इत्याकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्[7] ॥

---

१. त–व्याख्यायि । २. त–अथ । ३. त–युवा नित्यतरुणः । ४. फ–अत एव । ५. त–जृष् । ६. त–भावे षिद्भिदादिभ्योऽङ् । ७. त–°स्वरः ।

अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥ २ ॥

अमन्थिष्टाम् । भारता । रेवत् । अग्निम् । देवऽश्रवाः । देवऽवातः । सुऽदक्षम् ।
अग्ने । वि । पश्य । बृहता । अभि । राया । इषाम् । नः । नेता । भवतात् । अनु । द्यून् ॥२॥

हे [v]अग्ने [v]भारता भारतौ भरतस्य पुत्रौ [v]देवश्रवाः [v]देववातः चेत्युभौ [v]सुदक्षं शोभनसामर्थ्योपेतं [v]रेवत् रयिमन्तम् [v]अग्निम् अङ्गनादिगुणोपेतं त्वाम्[1] [v]अमन्थिष्टाम् अग्निष्टोमादिकर्मप्राप्त्यर्थमलुलुडताम्। मथनेन त्वामुत्पादितवन्तावित्यर्थः । तादृशस्त्वं [v]बृहता[2] प्रभूतेन [v]राया धनेन सहितः सन् [v]अभि अभिमुखो भूत्वा [v]वि [v]पश्य अस्मान्विशेषेणानुग्रहदृष्ट्या वीक्षस्व । किंच [v]अनु [v]द्यून् । द्युशब्दः अहर्वाची ' वस्तोः द्युः ' (नि. १.९.२) इति तन्नामसु पाठात् । द्यूननु सर्वेषु दिवसेषु [v]नः अस्माकम् [v]इषाम् अन्नानां [v]नेता आनेता [v]भवतात् भव ॥ अमन्थिष्टाम् । ' मन्थ विलोडने ' इत्यस्माल्लुङि सिच् । ' वदव्रजहलन्तस्याचः ' (पा. सू. ७. २. ३) इति वृद्धौ प्राप्तायां ' नेटि ' इति प्रतिषेधः । ' तस्थस्थमिपाम्° ' इत्यादिना तसस्तामादेशः । पादादित्वादनिघातः । अदूस्वरः । भारता। भरतस्यापत्यमित्यर्थे उस्मादित्वादञ् । ' तद्धितेष्वचामादेः ' इत्यादिवृद्धिः[3]। अन्तस्वरः । रेवत् । रयिशब्दान्मतुप् । वत्वोदात्तत्वसंप्रसारणपरपूर्वत्वगुणसुब्लोपाः । देवश्रवाः । ' श्रु श्रवणे ' । ' असुन् ' इति कर्मण्यसुन् । देवैः श्रूयते प्रत्याप्यतेऽसाविति देवश्रवा ऋषिः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इत्यौणादिकसूत्रात्पूर्वपदस्वरः । देववातः । ' वा गतिगन्धनयोः ' । अस्मात्कर्मणि क्तः । देवैरित्यमाणतया प्राप्तो देववातः ऋषिः । ' तृतीया कर्मणि ' इति पूर्वपदस्वरः । द्यून् । ' द्यु अभिगमने ' ' द्युत दीप्तौ ' वा । ' ङिच्च ' इत्यनुवृत्तौ ' द्युभ्यां च ' इति भोजसूत्रेण डुप्रत्ययो ङिच्च । द्युतेः ' अश्व्यादयश्च ' (उ. सू. ५.७०७) इति डुन्प्रत्ययः । अभिगच्छन्त्यस्मिन् स्वं स्वमभिमतं[4] देशं प्राणिनः इति ; द्योतते किरणसंबन्धादिति वा द्युर्दिवसः । ' प्रथमयोः° ' इति सवर्णदीर्घः । ' तस्माच्छसो नः पुंसि ' (पा. सू. ६. १. १०३) इति सकारस्य नकारः । एकादेशस्वरः[5] ॥

दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥ ३ ॥

दश । क्षिपः । पूर्व्यम् । सीम् । अजीजनन् । सुऽजातम् । मातृषु । प्रियम् ।
अग्निम् । स्तुहि । दैवऽवातम् । देवऽश्रवः । यः । जनानाम् । असत् । वशी ॥ ३ ॥

हे अग्ने देववातस्य [v]क्षिपः । क्षिप्यन्ते कर्मकरणार्थमिति क्षिपोऽङ्गुलयः ताश्च [v]दश । बाहुद्वयस्य मथनसाधनत्वेन[6] तत्रत्या अङ्गुलयो दशसंख्याकाः । तादृश्योऽङ्गुलयः [v]पूर्व्यं पुरातनं [v]सीम्

१. ख-ग-च-ज-ण-ञ-फ-भ-' त्वां ' नास्ति । २. त-बृहता महता । ३. ख-ग-च-ज-ण-भ-इत्यादिना वृद्धिः । ४. ख-ग-च-ज-ण-न-फ-भ-स्वम् एतम् ; स-स्वम् । ५. ख-ग-च-ज-ण-न-फ-भ-' एकादेशस्वरः ' नास्ति । ६. त-मन्थन° ।

एनं त्वाम् vअजीजनन् उदपीपदन्[1]। हे vदेवश्रवः vमातृषु मातृभूतारण्योः vसुजातं सुष्ठूत्पन्नम् अत एव vप्रियं[2] कमनीयं vदैववातं[3] देववातेन[3] मथितमेनम् vअग्निं vस्तुहि। vयः अग्निः vजनानां स्तोतॄणां यजमानानां vवशी वशवर्ती[4] कर्मणां स्वातन्त्र्येण प्रवर्तकः vअसत् भवति तं स्तुहीति पूर्वेणान्वयः॥ दश। 'दंश दशने'। 'कनिन्' इत्यनुवृत्तौ 'नुदशोर्गुणश्च' इति कनिन्। निस्स्वरः। क्षिपः। 'क्षिप प्रेरणे[5]'। औणादिकः कर्मणि क्विप्। क्षिप्यन्ते प्रेर्यन्ते कर्मस्विति क्षिपोऽङ्गुलयः। धातुस्वरः। अजीजनन्। 'जनी प्रादुर्भावे'। हेतुमण्ण्यन्तस्य लुङि चङ्द्विर्वचनसन्वद्भावाभ्यासेत्वदीर्घाः। निघातः। स्तुहि। 'ष्टुञ् स्तुतौ' इत्यस्य लोटि रूपम्। अदादित्वात् शपो लुक्। निघातः। दैववातम्। देववातेन निर्वृत्तमित्यर्थे 'तेन निर्वृत्तम्' (पा. सू. ४. २. ६८) इत्यण्। प्रत्ययस्वरः। असत्। 'अस भुवि'। अस्य लेट्यडागमः। यद्वृत्तयोगादनिघातः॥

नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम्।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि॥ ४॥

नि। त्वा। दधे। वरे। आ। पृथिव्याः। इळायाः। पदे। सुदिनऽत्वे। अह्नाम्। दृषत्ऽवत्यां। मानुषे। आपयायाम्। सरस्वत्याम्। रेवत्। अग्ने। दिदीहि॥ ४॥

हे vअग्ने vइळायाः गोरूपधारिण्याः vपृथिव्याः भूमेः vवरे वरिष्ठे[6] vपदे[7] उत्तरवेद्याम् vअह्नां vसुदिनत्वे यजनीयदिवसानां शोभनदिनत्वार्थम्। येषु दिनेषु इन्द्रादयो वरीयांसो देवा इज्यन्ते तानि सुदिनानि। तदर्थं vत्वा त्वाम् vआ vनि vदधे आ[8] समन्ताद्निदधामि। उत्तमानि स्थानानि दर्शयति। vदृषद्वत्याम्। दृषद्वती नाम काचिन्नदी तस्याम्। vमानुषे मनुष्यसंचरणविषये[9] तीरे। vआपयायाम्। आपया नाम काचिन्नदी तस्याम्। vसरस्वत्यां नद्याम्। एतेषु उत्तमेषु[10] स्थानेषु[10] त्वं vरेवत् धनयुक्तं यथा भवति तथा vदिदीहि[11] दीप्यस्व। महर्षयः सरस्वतीतीरे खलु यज्ञादिकर्माण्यकार्षुः। तथा च ब्राह्मणम्–'ऋषयो वै सरस्वत्यां सत्रमासत' (गो. ब्रा. २. १९) इति॥ दधे। दधातेः लिट्युत्तमैकवचने रूपम्। वरे। 'वृञ् वरणे'। 'ग्रहवृदृनिश्चिगमश्च' इत्यप्। पित्त्वादनुदात्तत्वे धातुस्वरः। दृषद्वत्याम्। 'दृ विदारणे'। 'दृणातेः पुग्ग्रस्वश्च' (उ. सू. १. १२८) इत्यादिना पुगागमो धातोर्ह्रस्वश्च। दृषदः उपलाः यस्यां सन्तीति मतुप्। 'झयः' इति तस्य वत्वम्। 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्यस्याः परिभाषाया अत्राश्रयणाभावात्[12] मतुप उदात्तताभावः। अदिप्रत्ययस्वरः। सरस्वत्याम्। सरःशब्दोऽसुनन्तत्वादाद्युदात्तः। तदस्यास्तीति मतुप्। अदुपधत्वान्मस्य वत्वम्। उगित्त्वात् ङीप्। दिदीहि[13]। दिवु क्रीडादौ इत्यस्य यङ्लुकि रूपम्॥

---

१. ख-ग-घ-च-ज-ण-प-फ-भ-ल–उदपादयन्। २. ल–प्रियं तम्। ३. त–दैवत्रातेन मम भ्रात्रा। ४ ख-च-ज-ण-न-प-फ–वशकर्ता; ग-भ–वशवर्ता। ५. त–क्षेपणे। ६. त–वरिष्ठे श्रेष्ठे। ७. त–पदे नाभिस्थाने। ८. त–'आ' नास्ति। ९ ख-ञ-फ-भ-स–मनुष्यसंचरणे°; ग-च-मनुष्यसंचारणे°; ज-ण–मनुष्यसंचारण°; ल–मनुष्यसंचार°। १०. ल–उत्तमस्थानेषु। ११. ख-ग-घ-च-ज-ण-न-प-फ-भ-ल–दीदिहि। १२. त–अनाश्रयणात्। १३. ख-ग-च-न-भ-ल–दीदिहि।

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥५॥

व्याख्यातेयमित्युपेक्षिता ॥ ॥ २३ ॥

'अग्ने सहस्व' इति पञ्चर्चं द्वादशं सूक्तम् । अत्रानुक्रमणिका—'अग्ने सहस्व गायत्रमाद्यानुष्टुप्' इति । ऋषिर्गाथिनो विश्वामित्रः । अग्निर्देवता । आद्यानुष्टुप् शिष्टा गायत्र्यः । सूक्तविनियोगो लैङ्गिकः । प्रातरनुवाके आश्विनशस्त्रे च प्रथमावर्जितस्य सूक्तस्य विनियोगः । 'अथैतस्याः' इति खण्डे सूत्रितम्[1]–'अग्न इळेति चतस्रः' (आश्व. श्रौ. ४. १३) इति । अभ्युदयेष्टावग्नेर्दानुरनुवाक्या 'अग्ने दा दाशुषे' इत्येषा । 'अथाग्नेय्यः' इति खण्डे सूत्रितम्–'अग्ने दा दाशुषे रयिं स यन्ता विप्र एषाम्' (आश्व. श्रौ. ३. १३) इति ॥

अग्ने सहस्व पृतना अभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥ १ ॥

अग्ने । सहस्व । पृतनाः । अभिऽमातीः । अप । अस्य ।
दुस्तरः । तरन् । अरातीः । वर्चः । धाः । यज्ञऽवाहसे ॥ १ ॥

विश्वामित्रः स्तौति । हे [v]अग्ने [v]पृतनाः अभियोक्त्रीः सेनाः [v]सहस्व अभिभव[2] । [v]अभिमातीः अभिमानिनः कर्मविघ्नकारिणः शत्रून् [v]अपास्य[3] अपनुद । किंच [v]दुष्टरः दुस्तरः[4] न केनापि तरितुं[5] शक्यः अत एव [v]अरातीः अरातीन् शत्रून् [v]तरन् स्वतेजसा निरस्कुर्वंस्त्वं [v]यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय [v]वर्चो [v]धाः अन्नं धेहि । कुरु ॥ सहस्व । 'षह मर्षणे' इत्यस्य लोटि रूपम् । आमन्त्रितस्य अविद्यमानत्वेन पादादित्वादनिघातः । अभिमातीः । 'माङ् माने' । मानं मातिः । भावे क्तिन् । अस्य[6] लुग्विकरणत्वात्[7] ईश्वेत्वे[8] न भवतः । अभितो मानं येषां ते इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अस्य । 'असु क्षेपणे' । दिवादेः[9] लोटि रूपम् । दुष्टरः । 'तॄ प्लवनतरणयोः' । अस्मात् कृच्छ्रार्थे[10] खल् । सुषामादित्वात्[10] विसर्जनीयस्य सकारस्य षत्वम् । लित्स्वरः । तरन् । तरतेः शतरि रूपम् । अदुपदेशाल्लसार्वधातुकस्वरेण शतुरनुदात्तत्वे कृते धातुस्वरः । धाः । दधातेश्छन्दसि लुङि रूपम् । निघातः ॥

अग्ने इळा समिध्यसे वीतिहोत्रो अमर्त्यः । जुषस्व सू नो अध्वरम् ॥ २ ॥

अग्ने । इळा । सम् । इध्यसे । वीतिऽहोत्रः । अमर्त्यः । जुषस्व । सु । नः । अध्वरम् ॥ २ ॥

१. ख-ग-ज-ण-फ-भ–सूत्रितः । २. ल–अभिभवसि । ३. त–'अपास्य' नास्ति । ४. च-ल–'दुस्तरः' नास्ति । ५. त–तरीतुम् । ६. ख-ग-ज-ण-फ–अस्यालुग्विकरणत्वात् । ७. ख-ग-ज-ण-भ-ल-स–त्वे । ८. ल–दिवादिः । ९. ख-ग-च-ज-ण-त-न-भ-स–अकृच्छ्रार्थे । १०. स-ग-च-ज-ण-भ-स–चात् ।

हे [v]अग्ने [v]वीतिहोत्रः । वीतिः प्रीतिविषयं होत्रम् अग्निहोत्रादिकं यस्यासौ वीतिहोत्रः । यज्ञेषु प्रीतिमानित्यर्थः । [v]अमर्त्यः मरणधर्मरहितस्त्वम् [v]इळा इळायामीड्यायाम्[1] उत्तरवेद्यां [v]समिध्यसे आज्याहुतिप्रक्षेपेण[2] सम्यक् प्रज्वाल्यसे । तादृशस्त्वं [v]नः अस्माकम् [v]अध्वरम् इमं यज्ञं [v]सु सुष्ठु [v]जुषस्व आहुतिस्वीकरणेन सेवस्व ॥ वीतिहोत्रः । वी कान्त्यादिषु । अस्मात्कर्मणि 'मन्त्रे वृषेषपच०' इत्यादिना क्तिन्नुदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः[3] । जुषस्व । जुषतेर्लोटि रूपम् । शश्वरः । सु । 'निपातस्य च' इति संहितायां दीर्घः ॥

अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत । एदं बर्हिः सदो मम ॥ ३ ॥

अग्ने । द्युम्नेन । जागृवे । सहसः । सूनो इति । आऽहुत ।
आ । इदम् । बर्हिः । सदः । मम ॥ ३ ॥

[v]द्युम्नेन स्वतेजसा सह [v]जागृवे । जागर्तीति जागृविः । तस्य संबुद्धिः । लोकरक्षार्थं स्वतेजसा सह सर्वदा जागरणोपेत [v]आहुत देवताह्वानार्थम्[4] अस्माभिः आहुत[5] [v]सहसः [v]सूनो बलस्य पुत्र हे [v]अग्ने[6] [v]मम मत्संबन्धिन्यस्मिन्[7] यज्ञे यद्बर्हिरास्तीर्णम् [v]इदं [v]बर्हिः तत्र [v]आ [v]सदः आसीद ॥ जागृवे। 'जागृ निद्राक्षये' । 'जृशृस्तृजागृभ्यः क्विन्' इति क्विन् । कित्त्वादगुणः । जागर्तीति जागृविः । 'जागृविर्जागरणात्' (निरु. ९. ८) इति यास्कः । 'संबुद्धौ च' इति गुणः । 'एङ्ह्रस्वात्[8]' (पा. सू. ६. १. ६९) इति सोर्लोपः । निघातः । सहसः सूनो । सुप आमन्त्रिते पराङ्गवद्भावादनुदात्तत्वे पादादित्वादनिघातः । सदः । 'षदॢ विशरणगत्यवसादनेषु' इत्यस्य छान्दसे लुङि लृदित्त्वाद्दङ् । निघातः । मम । अस्मच्छब्दस्य षष्ठ्येकवचने[9] ममादेशः । 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम् ॥

अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः । यज्ञेषु य उ चायवः ॥ ४ ॥

अग्ने । विश्वेभिः । अग्निऽभिः । देवेभिः । महय । गिरः । यज्ञेषु । ये । ऊँ इति । चायवः ॥ ४ ॥

हे [v]अग्ने [v]देवेभिः द्योतमानैः [v]विश्वेभिः सर्वैः [v]अग्निभिः यष्टव्यतया स्थितैरग्निभिः सहितस्त्वं [v]चायवः त्वद्विषयस्तुतिरूपाभिः[10] वाग्भिरनन्यमनस्कतया पूजकाः [v]ये विद्यन्ते तेषां [v]यज्ञेषु ज्योतिष्टोमादिषु [v]गिरः स्तोत्रशस्त्रादिलक्षणानि वाक्यानि [v]महय पूजय ॥ महय । 'मह पूजायाम्' । चुरादिः । अदन्तत्वादुपधावृद्ध्यभावः । निघातः । चायवः । 'चायृ पूजानिशामनयोः' । 'मृगय्वादयश्च' इति कुप्रत्ययः । प्रत्ययस्वरः ॥

अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नः सूनुमतः ॥ ५ ॥

अग्ने । दाः । दाशुषे । रयिम् । वीरऽवन्तम् । परीणसम् । शिशीहि । नः । सूनुऽमतः ॥ ५ ॥

१. ख-ग-च-ज-ण-भ-ईडायाम् ; न-ल-स-ईड्यायाम् । २. त-आज्याद्याहुति° । ३. ख-ग-च-ज-ण-°प्रकृतिस्वरत्वम् । ४. ख-ग-च-देवताधानार्थम् । ५. त-प-आहूत । ६. त-ल-अग्ने त्वम् । ७. ख-ग-च-ज-ण-न-भ-मत्संबन्ध्यस्मिन् । ८. ख-ग-च-ज-ण-न-भ-ह्रस्वात्° । ९. त-षष्ठ्येकवचनस्य । १०. ख-ग-घ-ज-ण-न-प-फ-भ-स-उक्तविषय°, त-उ त्वद्विषय° ।

हे [v]अग्ने [v]दाशुषे तुभ्यं[1] हविर्दत्तवते यजमानाय [v]वीरवन्तं[2] पुत्रयुक्तं [v]परीणसं प्रभूतं [v]रयिं धनं [v]दाः देहि । [v]सूनुमतः पुत्रपौत्रादिसहितान् [v]नः अस्मान् [v]शिशीहि धनप्रदानेन तीक्ष्णीकुरु ॥ दाः । ' डुदाञ् दाने ' इत्यस्य छान्दसे लुङि रूपम् । आमन्त्रितस्याविद्यमानत्वेन पादादित्वात् अनिघातः । दाशुषे । ' दाश्च दाने ' इत्यस्य ङसौ ' दाश्वान्साह्वान्मीढ्वांश्च ' इति निपातनात् द्विर्वचनाभावः इडभावश्च । भसंज्ञायां संप्रसारणम् । प्रत्ययस्वरः । परीणसम् । परिपूर्वात् नसतेर्व्यस्यर्थात् क्विप् । ' अन्येषामपि दृश्यते ' इति दीर्घः । शिशीहि । ' शिञ् निशाने ' । व्यत्ययेन श्लुः । दीर्घः छान्दसः । हेरपित्त्वादन्तोदात्तत्वम् ॥ ॥ २४ ॥

' अग्ने दिवः ' इति पञ्चर्चं त्रयोदशं सूक्तं वैश्वामित्रम् । अत्रेयमनुक्रमणिका—' अग्ने दिवो वैराजमुपान्त्याग्नेन्द्री ' इति । विराट् छन्दः । ' अग्न इन्द्रश्च ' इत्येषा इन्द्राग्नीदेवताका । शिष्टाः आग्नेयाः । अग्निष्टोमे आज्यशस्त्रे ' अग्न इन्द्रश्च ' इति याज्या । ' अग्न इन्द्रश्च दाशुषो दुरोण इति याज्या ' (आश्व. श्रौ. ५. ९) इति सूत्रितत्वात् ॥

अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः ।
ऋधग्देवाँ इह यजा चिकित्वः ॥ १ ॥

अग्ने । दिवः । सूनुः । असि । प्रऽचेताः । तना । पृथिव्याः । उत । विश्वऽवेदाः ।
ऋधक् । देवान् । इह । यज । चिकित्वः ॥ १ ॥

विश्वामित्रः स्तौति । हे [v]अग्ने [v]विश्ववेदाः सर्वविषयज्ञानवान् [v]प्रचेताः कर्मविषयज्ञानवांस्त्वं [v]दिवः द्युलोकाभिमानिदेवतायाः [v]सूनुरसि पुत्रो भवसि । [v]उत अपि च [v]पृथिव्याः पृथिव्यभिमानिदेवतायाः [v]तना[3] तनयोऽसि । किंच [v]चिकित्वः चेतनावन् हे अग्ने [v]इह अस्माभिः क्रियमाणेऽस्मिन् कर्मणि[4] [v]देवान् यजनीयानिन्द्रादिदेवान् [v]ऋधक् पृथक् क्रमेण [v]यज हविष्प्रदानेन पूजय ॥ असि । ' अस भुवि ' इत्यस्य लटि ' तासस्त्योर्लोपः ' इति सलोपः । निघातः । विश्ववेदाः । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति विश्वस्यान्तोदात्तत्वम् ॥

अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन् ।
स नो देवाँ एह वहा पुरुक्षो ॥ २ ॥

अग्निः । सनोति । वीर्याणि । विद्वान् । सनोति । वाजम् । अमृताय । भूषन् ।
सः । नः । देवान् । आ । इह । वह । पुरुक्षो इति पुरुऽक्षो ॥ २ ॥

[v]विद्वान् कर्माभिज्ञो यः [v]अग्निः [v]वीर्याणि पशुपुत्रादिसंपद्रूपाणि सामर्थ्यानि[5] [v]सनोति यजमानाय ददाति । यश्चाग्निः [v]भूषन् स्वतेजसा सर्वं जगत् भूषयन् अलंकुर्वन् [v]अमृताय मरणधर्म-

१. त–' तुभ्यं ' नास्ति । २. त–वीरवन्तं पुत्रवन्तम् । ३. त–' तना ' नास्ति । ४. ख-ग-च-ज-ण-न-भ-ल–' कर्मणि ' नास्ति । ५. ख-ग-च-ज-ण-भ-ल–समर्थानि ।

रहितायेन्द्रादिदेवाय ᵛवाजं हविर्लक्षणमन्नं ᵛमनोति प्रयच्छति ᵛपुरुक्षो पुरोडाशादिबहुविधान्नोपेत हे अग्ने ᵛसः तादृशस्त्वं ᵛनः अस्माकं संबन्धिनि ᵛइह अस्मिन्यज्ञे ᵛदेवान् यजनीयान्देवान् ᵛआ ᵛवह आह्वय ॥ मनोति । ' पणु दाने ' । तनादित्वादुप्रत्ययः । प्रत्ययस्वरः । पादादित्वादनिघातः । भूषन् । ' भूष अलंकारे ' । अन्तर्भावितण्यर्थः । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः शिष्यते । वह । वहेर्लोटि रूपम् । पुरुक्षो । पुरवः क्षुधोऽन्नानि यस्येति पुरुक्षुः । अन्त्यलोपश्छान्दसः । ' संबुद्धौ च ' इति गुणः ॥

अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।
क्षयन्वाजैः पुरुश्चन्द्रो नमोभिः ॥ ३ ॥

अग्निः । द्यावापृथिवी इति । विश्वजन्ये इति विश्वऽजन्ये । आ । भाति । देवी इति । अमृते इति । अमूरः ॥ क्षयन् । वाजैः । पुरुऽचन्द्रः । नमःऽभिः ॥ ३ ॥

ᵛअमूरः अमूढः सर्वज्ञः ᵛक्षयन् ईशानः सर्वस्य जगतः अत एव ᵛपुरुश्चन्द्रः पुरुचन्द्रो बहुहिरण्योपेतः । यद्वा बहुदीप्तिस्वरूपः । ᵛवाजैः बलैः ᵛनमोभिः अन्नैश्च सहितः सः ᵛअग्निः ᵛविश्वजन्ये विश्वस्य जनयित्र्यौ । यद्वा विश्वं जन्यमुत्पाद्यं याभ्यां ते । ᵛदेवी द्योतमाने ᵛअमृते मरणधर्मरहिते ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛआ ᵛभाति आ समन्तात् प्रकाशयति ॥ द्यावापृथिवी । दिवःशब्दस्य ' दिवो द्यावा ' इति द्यावादेश आद्युदात्तः । पृथिवीशब्दो ङीपन्तत्वेनान्तोदात्तः । ' देवताद्वन्द्वे च ' इत्युभयोः प्रकृतिस्वरत्वम् । विश्वजन्ये । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तः । तत्पुरुषे[1] तु[1] स्वरश्चिन्तनीयः । आ भाति । ' भा दीप्तौ ' । अन्तर्भावितण्यर्थः । क्षयन् । ' क्षि ऐश्वर्ये ' । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः । पुरुश्चन्द्रः । ' हस्वाच्चन्द्रोत्तरपदे मन्त्रे ' इति सुडागमः । श्चुत्वेन शकारः । उत्तरपदान्तोदात्तप्रकरणे[2] ' त्रिचक्रादीनां छन्दस्युपसंख्यानम् ' इति उत्तरपदान्तोदात्तत्वम् । यद्वा ' समासस्य ' इत्यन्तोदात्तत्वम्[3] ॥

अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम् ।
अमर्धन्ता सोमपेयाय देवा ॥ ४ ॥

अग्ने । इन्द्रः । च । दाशुषः । दुरोणे । सुतऽवतः । यज्ञम् । इह । उप । यातम् ।
अमर्धन्ता । सोमऽपेयाय । देवा ॥ ४ ॥

हे ᵛअग्ने त्वम् ᵛइन्द्रश्च उभौ ᵛदेवा देवौ युवाम् ᵛअमर्धन्ता अनागमनेन यज्ञहिंसामकुर्वन्तौ सन्तौ ᵛसुतवतः सोमाभिषवं कुर्वतः ᵛदाशुषः हविर्दत्तवतो यजमानस्य ᵛइह ᵛदुरोणे गृहे क्रियमाणमिमं ᵛयज्ञम् अभिलक्ष्य ᵛसोमपेयाय सोमपानार्थम् ᵛउप ᵛयातम् उप समीपम्[3] आगच्छतम् ॥ यातम्[4] ।

१. ख-त-न-म-स–तत्पुरुषे; ग–तत्पुरुषेषु; ज-ण-ल–तत्पुरुष° । २. ख-ग-च-ज-ण-न-फ-भ–उत्तरपदान्तोदात्तत्वम् । ३. न-ल–समीपे । ४. ख-ग-च-ज-ण-फ-म–' यातं ' नास्ति ।

' या प्रापणे ' इत्यस्य लोटि रूपम् । निघातः । अमर्धन्ता । ' मृधु हिंसायाम् ' इत्यस्य शतरि रूपम् । नञा समासः । सुपो डादेशः । तत्पुरुषे नञ्स्वरः । सोमपेयाय । ' पा पाने ' । ' अचो यत् ' इति यत् । ' ईद्यति ' इतीकारादेशः । आर्धधातुकलक्षणो गुणः । कृदुत्तरपदप्रकृतिस्वरः ॥

अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।
सधस्थानि महयमान ऊती ॥ ५ ॥

अग्ने । अपाम् । सम् । इध्यसे । दुरोणे । नित्यः । सूनो इति । सहसः । जातऽवेदः ।
सधऽस्थानि । महयमानः । ऊती ॥ ५ ॥

[v]सहसः [v]सूनो बलस्य पुत्र [v]जातवेदः जातप्रज्ञ हे [v]अग्ने [v]नित्यः अविनाशी [v]ऊती ऊत्या रक्षणेन [v]सधस्थानि प्राणिनां निवासभूतान् लोकान् [v]महयमानः परिचरंस्त्वम् [v]अपां [v]दुरोणे अपां स्थानेऽन्तरिक्षे [v]समिध्यसे सम्यक् दीप्यसे ॥ दुरोणे । ' अव रक्षणे ' इत्यस्मादौणादिको नक्प्रत्ययः । ' उवरस्वर° ' इत्यादिना ऊठ् । गुणः । ' दुरोण इति गृहनाम, दुरवा भवन्ति ' (निरु. ४. ५) इति यास्कः । प्रत्ययस्वरः । महयमानः । ' मह पूजायाम् ' । व्यत्ययेन शानच् । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे णित्स्वरः[1] । ऊती । अव रक्षणादिषु । ' ऊतियूतिजूति° ' इत्यादिना निपाननादन्तोदात्तः । ' सुपां सुलुक् ° ' इति तृतीयायाः सवर्णदीर्घः ॥ ॥ २५ ॥

' वैश्वानरं मनसा ' इति नवर्चं चतुर्दशं सूक्तम् । तत्रानुक्रमणिका—' वैश्वानरं नव तृचौ वैश्वानरीयमारुतौ जागतौ द्वृच आत्मस्तुतिर्वा पूर्वात्मगीतान्योपाध्यायस्तुतिः ' इति । ' वैश्वानरं मनसा ' इत्याद्यौ तृचौ जागतौ । प्रथमस्य वैश्वानरोऽग्निर्देवता द्वितीयस्य[2] मरुतः[2] । सप्तम्याद्यास्तिस्रस्त्रिष्टुभः । ' अग्निरस्मि ' इति द्वृचस्याग्निः परं ब्रह्म वा देवता । नवम्यास्तु विश्वामित्रोपाध्यायस्य[3] स्तुत्यत्वात्[3] स एव देवता । सप्तमीवर्जितस्य सूक्तस्य विश्वामित्र ऋषिः । सप्तम्या ब्रह्मवाक्यत्वात् ' यस्य वाक्यं स ऋषिः ' इति न्यायेन ब्रह्म ऋषिः । ' वैश्वानरं मनसा ' इत्याद्यस्तृच आभिप्लविके चतुर्थेऽहनि आग्निमारुते वैश्वानरीयनिविद्धाने विनियुक्तः[4] । ' तृतीयस्य ' इति खण्डे सूत्रितं—' वैश्वानरं मनसेति तिस्रः ' (आश्व. श्रौ. ७. ७) इति । अयमेव तृचो बृहस्पतिसवेऽप्याग्निमारुते वैश्वानरीयनिविद्धानीयः । ' प्र यन्तु वाजाः ' इति द्वितीयतृचो बृहस्पतिसवे मारुतनिविद्धानीयः । उभयमपि ' उशनसस्तोमेन ' इति खण्डे सूत्रितं—' वैश्वानरं मनसाग्निं निचाय्य प्र यन्तु वाजास्तविषीभिरग्नयः ' (आश्व. श्रौ. ९. ५) इति । अग्निचयने संचिताग्न्यनुशंसने ' अग्निरस्मि ' इत्येषा । ' अथाग्निं संचितमनुगीतमनुशंसेत् ' इत्युपक्रम्य सूत्रितम्—' अग्निरस्मि जन्मना जातवेदा इति त्रिर्मध्यमया वाचा ' (आश्व. श्रौ. ४. ८) इति ॥

१. त–णिचः स्वरः । २. ख-ग-च-ज-ण-भ-ल–' द्वितीयस्य मरुतः ' नास्ति । ३. ख-ग-च-ज-ण-ञ-स–°पाध्यायस्तुतित्वात् ; ल–°पाध्यायस्तुत्यत्वात् । ४. ख-ग-च-ज-ण-भ-स–नियुक्तः ।

वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥ १ ॥

वैश्वानरम् । मनसा । अग्निम् । निऽचाय्य । हविष्मन्तः । अनुऽसत्यम् । स्वः३विदम् ।
सुऽदानुम् । देवम् । रथिरम् । वसुऽयवः । गीःऽभिः । रण्वम् । कुशिकासः । हवामहे ॥१॥

विश्वामित्रः स्तौति । हे अग्ने ᵛहविष्मन्तः संभृतहविष्काः ᵛवसूयवः धनमात्मन इच्छन्तः ᵛकुशिकासः[1] कुशिकगोत्रोत्पन्ना वयं ᵛवैश्वानरम् । विश्वे नरा अग्निप्रणयनादिक्रियाया नेतारो यस्येति विश्वानरः अग्निः[2] । तस्य संबन्धी वैश्वानरः । अपत्यमिति यावत् । यद्वा[3] विश्वानर एव वैश्वानरः । तद्धितोऽनन्यार्थो राक्षसवायसादिवत् । तम् ᵛअनुषत्यं सत्येनानुगतं कर्मानुरूपफलप्रदाने[4] सत्यप्रतिज्ञं ᵛस्वर्विदं स्वर्गादिलक्षणफलस्य ज्ञातारम् अत एव ᵛसुदानुं सुष्ठु फलस्य दातारं ᵛरथिरं रथवन्तम् अत एव ᵛरण्वं यज्ञान् गच्छन्तं ᵛदेवं द्योतमानं तमिमम् ᵛअग्निं ᵛमनसा ᵛनिचाय्य अन्तःकरणेन एवंविधगुणविशिष्टस्त्वमिति ज्ञात्वा ᵛगीर्भिः स्तुतिलक्षणाभिर्वाग्भिः ᵛहवामहे इह कर्मणि त्वामाह्वयामः ॥ वैश्वानरम् । ' नरे संज्ञायाम् ' इति पूर्वपदस्य दीर्घत्वम् । विश्वानरस्येदमित्यर्थे ' तस्येदम् ' इत्यण् । प्रत्ययस्वरः । निचाय्य । ' चायृ पूजानिशामनयोः ' इत्यस्य ल्यपि रूपम् । लित्स्वरः । अनुषत्यम् । अनुगतं सत्येन । ' अवादयः क्रुष्टाद्यर्थे तृतीयया ' इति समासः । सुषामादित्वात् षत्वम् । निरुदकादित्वादन्तोदात्तत्वम् । सुदानुम् । ' डुदाञ् दाने ' । ' दाभाभ्यां नुः ' इति कर्तरि नुप्रत्ययः । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । रथिरम् । रथशब्दान्मतुबर्थे ' मेधारथाभ्यामिरन्निरचौ वक्तव्यौ ' इति इरच् । चित्स्वरः । वसूयवः । वसु आत्मन इच्छन्त इति ' सुप आत्मनः क्यच् ' । ' अकृत्सार्वधातुकयोः° ' इति दीर्घः । ' क्याच्छन्दसि ' इत्युप्रत्ययः । अतो लोपः । प्रत्ययस्वरः । रण्वम् । रविर्गत्यर्थः । रण्वति यज्ञान्[5] गच्छतीति[6] रण्वः । पचाद्यजन्तः । चित्स्वरः । कुशिकासः । कुशिकशब्दात् ' गोत्रम् ' इत्यर्थे विदादित्वादञ् । तस्य बहुषु ' यञञोश्च ' (पा. सू. २. ४. ६४) इति लुक् । हवामहे । ह्वयतेः ' बहुलं छन्दसि ' इति संप्रसारणम् । निघातः ॥

तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ॥ २ ॥

तम् । शुभ्रम् । अग्निम् । अवसे । हवामहे । वैश्वानरम् । मातरिश्वानम् । उक्थ्यम् ।
बृहस्पतिम् । मनुषः । देवऽतातये । विप्रम् । श्रोतारम् । अतिथिम् । रघुऽस्यदम् ॥ २ ॥

योऽग्निः पूर्वमन्त्रे प्रतिपादितः ᵛतं ᵛशुभ्रं द्योतमानं ᵛवैश्वानरं विश्वानरसंबन्धिनं ᵛमातरिश्वानम् । मातरि अन्तरिक्षे श्वसिति विद्युदादिरूपतया चेष्टते इति मातरिश्वा अग्निः । तम् ᵛउक्थ्यम् उक्थैः

१. ख-ग-च-ज-ण-न-भ-कुशिकाः; प-कुशिकासः कुशिकाः । २. ख-ग-च-ज-ण-न-भ-ल-स-कश्चित्; फ-अग्निः कश्चित् । ३. ख-ग-च-ण-ण-भ-ल-यदा । ४. प-फ-कर्मफलप्रदाने । ५. ख-ग-च-ज-ण-यज्ञम् । ६ त-आगच्छतीति ।

शस्त्रैः शंसनीयं [v]बृहस्पतिं बृहतो यज्ञस्य पतिं पालकतया स्वामिनं [v]विप्रं मेधाविनं [v]श्रोतारं स्तोत्रशस्त्रादिमन्त्रवाक्यं शृण्वन्तम् [v]अतिथिम् आतिथेयपूजार्हतया यदृच्छया प्राप्तं [v]रघुष्यदम्। रघुर्लघुः स्यदो वेगो यस्येति क्षिप्रगन्तारम्। यद्वा स्यदशब्देन[1] अश्वा[2] लक्ष्यते। रघुस्यदः क्षिप्रगन्ता इत्यर्थः। तम् एवंविधगुणयुक्तम्[3] [v]अग्निम् [v]अवसे अस्माकं रक्षणाय [v]हवामहे कुशिकगोत्रजा वयम् आह्वयामः। किंच [v]मनुषः मनुष्यस्य [v]देवतातये यज्ञार्थं त्वामाह्वयामः॥ शुभ्रम्। 'शुभ दीप्तौ'। अस्मात्[4] 'स्फायितञ्चि०' इत्यादिना कर्तरि रक्। किरुवादुणाभावः। प्रत्ययस्वरः। मातरिश्वानम्। निर्माणहेतुत्वात् माता अन्तरिक्षम्। तत्र श्वसिति प्राणितीति मातरिश्वा अग्निः। 'श्वनुक्षन्०' इत्यादिना मातरिश्वन्छब्दस्य[5] कन्प्रत्ययान्तत्वेन निपातनात्पूर्वपदान्तोदात्तत्वम्। उक्थ्यम्। उक्थेन स्तोत्रेण स्तुत्यः। तत्र भवः इत्यर्थे 'भवे छन्दसि' इति यत्। 'तित्स्वरितम्[6]' इति स्वरितः। देवतातये। देव एव देवतातिः। स्वार्थिकस्तातिल्। देवतातिशब्देन यज्ञो लक्ष्यते तत्संप्रदानकत्वाद्यज्ञस्य। लित्स्वरः। रघुस्यदम्। 'स्यन्दू प्रस्रवणे' इत्यस्मात् घञन्तः स्यदशब्दः। 'स्यदो जवे' इति निपातनादनुनासिकलोपः। कृदुत्तरपदप्रकृतिस्वरत्वम्॥

अश्वो न क्रन्दञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः॥ ३॥

अश्वः। न। क्रन्दन्। जनिऽभिः। सम्। इध्यते। वैश्वानरः। कुशिकेभिः। युगेऽयुगे।
सः। नः। अग्निः। सुऽवीर्यम्। सुऽअश्व्यम्। दधातु। रत्नम्। अमृतेषु। जागृविः॥३॥

यः [v]वैश्वानरः अग्निः [v]कुशिकेभिः स्तोत्रं कुर्वाणैर्होत्रादिभिः [v]युगेयुगे प्रतिदिनं [v]समिध्यते आज्याहुतिप्रक्षेपेण[7] सम्यक् दीप्यते। तत्र दृष्टान्तः। [v]अश्वो [v]न इति। यथा जातोऽश्वः[8] [v]क्रन्दन् हेषारवं कुर्वन् [v]जनिभिः जनयित्रीभिः वडवाभिः स्तन्यप्रदानेन प्रतिदिनं सम्यक् पोष्यते तद्वत्। [v]अमृतेषु मरणधर्मरहितेषु देवेषु मध्ये [v]जागृविः ज्वालया जाग्रत् दीप्यमानः [v]सः [v]अग्निः [v]सुवीर्यं शोभनापत्ययुक्तं [v]स्वश्व्यं शोभनाश्वादिपशुयुक्तं [v]रत्नम् उत्तमं धनं [v]नः अस्माकं [v]दधातु विदधातु प्रयच्छतु॥ युगेयुगे। 'नित्यवीप्सयोः' इति द्विर्वचनम्। परस्यात्रेडितत्वात् अनुदात्तत्वे पूर्वपदप्रकृतिस्वरः। स्वश्व्यम्। अश्वशब्दः क्रन्प्रत्ययान्तः आद्युदात्तः। बहुव्रीहौ 'आद्युदात्तं द्वयच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। यकारोपजनश्छान्दसः। यद्वा। अश्वेषु साधवोऽश्व्याः। 'तत्र साधुः' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। बहुव्रीहौ पूर्वोक्तस्वरः। दधातु। दधातेर्लोटि रूपम्। रत्नम्। 'रमु क्रीडायाम्'। 'रमेर्णिच्च' इत्यधिकरणे नप्रत्ययस्तकारश्चान्तादेशः। रमन्तेऽस्मिन्निति रत्नम्। 'नित्' इत्यनुवृत्तौ आद्युदात्तः। जागृविः। क्विन्प्रत्ययान्तः। नित्त्वादाद्युदात्तः॥

१. ख-ग-च-ज-ण-भ-स्यदःशब्देन। २. त-तद्वान्। ३. ख-ग-च-ज-ण-न-फ-भ-एवंविधं युक्तम्। ४. त-इत्यस्मात्। ५. ख-ग-ज-ण-भ-स-मातरिश्वच्छन्दात् न-ल-मातरिश्वच्छन्दः। ६. ख-ग-ज-ण-न-भ-स-तित्स्वरितः। ७. त-आज्याद्याहुति०। ८. प-जात्यश्वः।

प्र यन्तु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ॥ ४ ॥

प्र । यन्तु । वाजाः । तविषीभिः । अग्नयः । शुभे । सम्ऽमिश्लाः । पृषतीः । अयुक्षत ।
बृहत्ऽउक्षः । मरुतः । विश्वऽवेदसः । प्र । वेपयन्ति । पर्वतान् । अदाभ्याः ॥ ४ ॥

[v]वाजाः वेगवन्तः [v]अग्नयः [v]प्र [v]यन्तु जलमभिलक्ष्य[1] गच्छन्तु । गताश्च तेऽग्नयः [v]तविषीभिः बलयुक्तैः[2] मरुद्भिः[3] [v]शुभे जले [v]संमिश्लाः परस्परं[4] संगताः सन्तः [v]पृषतीः बिन्दून् [v]अयुक्षत अयुञ्जन् । जले बिन्दूनकुर्वन् । यद्वा वाजाः वेगवन्तोऽग्नयस्तविषीभिर्बलयुक्तैर्मरुद्भिर्जलमनुलक्ष्य प्रयन्तु गच्छन्तु । ते च मरुतः शुभे जले संमिश्ला अग्निभिः संगताः सन्तः पृषतीश्चित्रवर्णा वाहनरूपा वडवा अयुक्षत । रथे मेघभेदनार्थे[5] ता अयौक्षुः । रथारूढास्ते [v]विश्ववेदसः प्राणिकृतकर्माभिज्ञानयुक्ताः [v]अदाभ्याः केनाप्यतिरस्कार्याः [v]मरुतः एवंविधा वायवः [v]बृहदुक्षः प्रभूतसेक्तॄन्[6] [v]पर्वतान् मेघान् [v]प्र [v]वेपयन्ति । यथा प्रभूता वृष्टिर्भवति तथा मेघान् चालयन्ति ॥ तविषीभिः । ' तव गतौ ' इति सौत्रो धातुः । अस्मात् ' तवेर्णिद्वा ' इति टिषच् निच्च । तवन्ति संचरन्त्याकाशे इति तविषा वायवः । ' टिड्ढाणञ्° ' इति ङीप् । लिङ्गव्यत्ययः[7] । निघातादनुदात्तः । पृषतीः । ' पृषु[8] सेचने ' ' पृ पालनपूरणयोः ' इति वा । अस्मात्[9] वर्तमाने ' पृषद्बृहन्महत्° ' इति निपातनादतिप्रत्ययः शतृवद्भवति । ' उगितश्च ' इति ङीप् । पर्यन्तीति पृषत्यः शीकराः । पूर्णन्ति पालयन्तीति पृषत्यो वडवाः । अयुक्षत । ' युजिर् योगे ' इत्यस्य लुङि सिचि रूपम् । निघातः । बृहदुक्षः । ' उक्ष सेचने ' इत्यस्मात्क्विप् । कृदुत्तरपदप्रकृतिस्वरः । वेपयन्ति । ' टुवेपृ कम्पने ' । निघातः । पर्वतान् । ' पर्व पूरणे ' इत्यस्मात् ' भृमृदृशि° ' इत्यादिना अतच् । पर्वति पूरयति भूमिमुदकेन इति पर्वतो मेघः । व्यत्ययेनाद्युदात्तः ॥

अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥ ५ ॥

अग्निऽश्रियः । मरुतः । विश्वऽकृष्टयः । आ । त्वेषम् । उग्रम् । अवः । ईमहे । वयम् ।
ते । स्वानिनः । रुद्रियाः । वर्षऽनिर्णिजः । सिंहाः । न । हेषऽक्रतवः । सुऽदानवः ॥५॥

[v]अग्निश्रियः वैद्युतमग्निं श्रयन्तः [v]विश्वकृष्टयः । विश्वस्य वृक्षादेः कृष्टिराकर्षणं नमनोन्नमनादिलक्षणं कर्म येभ्यो भवति ते विश्वकृष्टयः । एवंविधा ये [v]मरुतः विद्यन्ते तेषां च मरुतां [v]त्वेषं दीप्तम् [v]उग्रम् उत्कृष्टम् [v]अवः रक्षणम् [v]आ [v]ईमहे कुशिका [v]वयम् आ समन्तात् याचामहे । [v]ते मरुतः

---

१. त–बलमभिलक्ष्य । २. ख-ग-च-ज-ण-भ–' बलयुक्तैः ' नास्ति । ३. ख-प-फ-भ–' मरुद्भिः ' नास्ति । ४. ख-प-फ-भ–' परस्परं ' नास्ति । ५. त–मेघभेदनार्थम् । ६. त–प्रभूतं सेक्तृन् । ७. त-ब–अत्र लिङ्गव्यत्ययः । ८. ख-ग-च-ज-ण-फ-भ–पृष सन्धाने, न–पृष संदधाने । ९. त–इत्यस्मात् ।

[v]रुद्रियाः रुद्रपुत्राः[1] [v]वर्षनिर्णिजः । निर्णिक्शब्दो रूपवाची ' निर्णिक् वभ्रिः ' इति तन्नामसु पाठात् । वर्षेण रूपं स्वभावो येषां ते[2] वर्षनिर्णिजो वर्षकाः । [v]हेषक्रतवः । हेषारवस्य क्रतुः करणं येषां ते कृत-हेषारवाः [v]सिंहा [v]न सिंहा इव [v]स्वानिनः शब्दवन्तः एवंविधास्ते मरुतः [v]सुदानवः सुष्ठु जलस्य[3] दातारो भवन्ति ॥ अग्निश्रियः । ' श्रिञ् सेवायाम् ' । ' वचिप्रच्छि-[4]' इत्यादिना क्विप् संप्रसारणाभावो धातोर्दीर्घश्च । जसि इयङादेशः । कृत्स्वरः । उग्रम् । गमॢ गतौ ' । उत्पूर्वः । ऋज्रेन्द्राग्र ' ' इति निपातनात् रप्रत्ययो मकारलोप उपसर्गस्यान्तलोपश्च । उद्गच्छतीत्युग्रः । प्रत्ययस्वरः । ईमहे । ईकान्ति-गत्यादिषु[5] । व्यत्ययेनात्मनेपदम् । अदादित्वाच्छपो लुक् । निघातः । स्वानिनः । स्वानो घञन्तः । तद्वन्तः । ' अत इनिठनौ ' इतीनिः । प्रत्ययस्वरः[6] । रुद्रियाः । रुद्रशब्दाच्छान्दसो घः । तस्येयादेशः । प्रत्ययस्वरः ॥ ॥ २६ ॥

व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ॥ ६ ॥

व्रातम्ऽव्रातम् । गणम्ऽगणम् । सुशस्तिऽभिः । अग्नेः । भामम् । मरुताम् । ओजः । ईमहे । पृषत्ऽअश्वासः । अनवभ्रऽराधसः । गन्तारः । यज्ञम् । विदथेषु । धीराः ॥ ६ ॥

कुशिका वयम् [v]अग्नेर्भामं भासकं [v]मरुतामोजः तेजः [v]व्रातंव्रातं व्राते व्राते प्रतिसमूहं [v]गणंगणं गणे गणे महति समूहे[7] क्रियमाणाभिः [v]सुशस्तिभिः । शोभनाः शस्तयः स्तुतयो यैर्मन्त्रैः क्रियन्ते ते सुशस्तयः । तैर्मन्त्रैः [v]ईमहे तादृशं मारुतं तेजो याचामहे । [v]पृषदश्वासः । पृषत्यश्चित्रवर्णा अश्वा येषां ते तादृशाः । [v]अनवभ्रराधसः । न विद्यतेऽवभ्रंशो यस्य तदनवभ्रम् । अनवभ्रं राधो धनं येषां तेऽनवभ्रराधनाः । संपूर्णधना इति यावत् । [v]धीराः कर्माभिज्ञारते मरुतः [v]विदथेषु यज्ञेषु [v]यज्ञं यजनीयं[8] हविः[9] अभिलक्ष्य [v]गन्तारः गमनशीला भवन्ति ॥ गणंगणम् । ' गण संख्याने ' । पचाद्यच् । ' नित्यवीप्सयोः ' इति द्विर्वचनम् । परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः । सुशस्तिभिः । बहुव्रीहौ ' नभ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । भामम् । ' भा दीप्तौ[10] ' । ' अर्तिस्तुसु ' इत्यादिना मन् । निरस्वरः । ओजः । ' उब्ज आर्जवे ' । ' उब्जेर्बले लोपश्च ' (उ. सू. ४. ६३१) इत्यसुन् । तत्संनियोगेन बकारलोपः । आर्धधातुकलक्षणो गुणः । निरस्वरः । ईमहे । ईकान्त्यादिषु । निघातः । अनवभ्रराधसः । अनवभ्रम् । ' नभ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । बहुव्रीहौ[11] पूर्वपद-स्वरः । गन्तारः । ताच्छीलिकस्तृन् । विदथेषु । ' विद ज्ञाने ' । ' रदिविदिभ्यां कित् ' इत्यथ-प्रत्ययः । कित्त्वादगुणः । विदन्त्यस्मिन्कर्मजातमध्वर्व्वादय इति विदथो यज्ञः । प्रत्ययस्वरः ॥

---

१. ख-ग-च-ज-ण न-भ-स-रुद्रपुत्राः मरुतः । २. प-ते हेषक्रतवः । ३. ल-जनस्य । ४. त-किंव्वचिप्रच्छि° । ५. त-गत्यादिषु । ६. ख-ग-च-न-ण-न-फ-भ-स-' प्रत्ययस्वरः ' नास्ति । ७. त-प-समूहे समूहे । ८. ग-च-ज-ण-यजनीयहविः । ९. त-दाँसा इत्यस्मात् । १०. ख-ग-च-जण-भ-ल-स-उत्तरबहुव्रीहौ ।

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥ ७ ॥

अग्निः । अस्मि । जन्मना । जातऽवेदाः । घृतम् । मे । चक्षुः । अमृतम् । मे । आसन् ।
अर्कः । त्रिऽधातुः । रजसः । विऽमानः । अजस्रः । घर्मः । हविः । अस्मि । नाम ॥ ७ ॥

[1]साक्षात्कृतपरतत्त्वरूपः* अग्निर्द्वृचेन स्वात्मनः सर्वात्मकत्वानुभवमाविष्करोति[1]। हे कुशिकाः । भोक्तृभोग्यभावेन द्विविधं हीदं सर्वं जगत् । ' एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः ' (बृ. उ. १. ४. ६) इति श्रुतेः । तत्र सकलभोक्तृवर्गरूपेणान्नादोऽग्निः । स च अग्निवाय्वादित्यभेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्षद्युलोकानधितिष्ठति । तदुक्तं वाजसनेयके–' स त्रेधात्मानं व्यभजत । आदित्यं तृतीयं वायुं तृतीयम् ' (बृ. उ. १. २. ३) इति[2]। तत्र[3] सः [v]अग्निः अहं [v]जन्मना एव [v]जातवेदाः [v]अस्मि । श्रवणमननादिसाधननिरपेक्षेण[4] स्वभावत एव साक्षात्कृतपरतत्त्वस्वरूपोऽस्मि । [v]घृतं [v]मे [v]चक्षुः । यदेतत्[5] विश्वस्य विभासकं[6] मम स्वभावभूतप्रकाशात्मकं चक्षुस्तद्धृतम् । इदानीमत्यन्तं दीप्तम् । यदेतत् [v]अमृतं कर्मफलं दिव्यादिव्यविविधविषयोपभोगात्मकं[7] तत् [v]मे मम [v]आसन् आस्ये वर्तते । सकलभोक्तृवर्गात्मना स्वयमेवावस्थानात् । एवं स्वात्मनः पृथिव्यधिष्ठातृरूपताम् अभिधाय[8] वाय्वात्मनान्तरिक्षाधिष्ठातृतामाह[9] । [v]अर्कः जगत्स्रष्टा[10] प्राणः । ' सोऽचैन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वम् ' (श. ब्रा. १०. ६. ५) इति श्रुतेः । स प्राणोऽहं [v]त्रिधातुः । त्रेधात्मानं विभज्य तत्र वाय्वात्मना[10] [v]रजसः अन्तरिक्षस्य [v]विमानः विमाता अधिष्ठाता अस्मि । तथादित्यरूपेण द्युलोकाधिष्ठातृतामाह[11] । [v]अजस्रो [v]घर्मः इति । अजस्रोऽनुपक्षीणो घर्मः प्रकाशात्मा[11] द्युलोकाधिष्ठाता आदित्योऽहमस्मि[12]। एवं भोक्तृरूपमात्मनोऽनुसंधाय भोग्यरूपतामपि[13] अनुसंधत्ते । यत् [v]हविः भोग्यं प्रसिद्धमस्ति तदप्यहमेव [v]अस्मि । यद्वा । अहमग्निरस्मि । देवानां हविष्प्रापणात् अङ्गनादिगुणयुक्तोऽस्मि । किंच जन्मना उत्पत्त्या जातवेदा जातप्रज्ञोऽस्मि[14]। उत्पत्तिक्षणे एव सर्वज्ञोऽहमस्मि । अथवा जातं सर्वं स्वात्मरूपतया वेत्तीति जातवेदाः । सर्वात्मक इत्यर्थः । तत्कथमित्युच्यते । घृतं मे चक्षुः । यदेतद्धृतं प्रसिद्धमस्ति तन्मे चक्षुःस्थानीयम् । यथा लोके चक्षुर्भासकं एवं घृतं मयि प्रक्षिप्तं ज्वालामुत्पादयन्मम भासकम् । अमृतं प्रभारूपं यदमृतमविनाशि ज्योतिर्मे ममासन् आस्ये वर्तते । त्रिधातुः प्राणापानव्यानात्मना त्रिधा वर्तमानोऽर्कोऽर्चनीयो यः[15] प्राणोऽस्ति सोऽपि अहमेवास्मि[16]। तथा च रजसोऽन्तरिक्षस्य विमानो विशेषेण माता परिच्छेत्ता वायुश्चाहमस्मि । किंच अजस्रो घर्मो नैरन्तर्येण संतापकारी सूर्यश्चाहमस्मि । किं बहुना आज्यपुरोडाशादिरूपं यदेतद्धविरस्ति तदुपलक्षितं सर्वमप्यहमस्मि । ' सर्वं खल्विदं ब्रह्म '

---

१. प–द्वृचेन साक्षात्कृतस्वात्मस्वरूपम् आविष्करोति । * त–°तत्त्वस्वरूपः । २. न–इति च । ३. त–' तत्र ' नास्ति । ४. त–°साधननैरपेक्षेण; ल–°साधननैरुपेक्ष्येण । ५. ख-ग-च-ज-ण-फ-भ–चक्षुःपदेन । ६. त–अवभासकम् । ७. ख-ग-च-ज-ण-प-फ-भ–°भोगात्मकं चक्षुः । ८. ख-ग-च-ज-ण-प-फ-भ-स–' अभिधाय .....ष्ठातृतामाह ' नास्ति । ९. त–जगतः स्रष्टा । १०. ख-प-फ-भ-स–वा स्वात्मना; ग-च-ज-ण–वास्यात्मना । ११. ख-ग-च-ज-ण-प-फ-भ-स–' द्युलोकाधि° .....प्रकाशात्मा ' नास्ति । १२. त-ल–आदित्योऽप्यहमस्मि । १३. त–भोग्यरूपताम् । १४. त–जातज्ञानोऽस्मि । १५. ख-ग-च-ज-ण-न-भ-ल-स–' यः' नास्ति । १६. त–अहमस्मि ।

(छा. उ. ३. १४. १) इति श्रुतेः। नामशब्दः प्रसिद्धौ । तदनेनाग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्व-मुक्तं भवति ॥ चक्षुः । ' चक्षिङ् व्यक्तायां वाचि ' । ' उसिन् ' इत्यनुवृत्तौ ' चक्षेः शिच्च ' इत्युसिन् । शिद्भावात् ख्याञादेशाभावः । निस्स्वरः । आसन् । आस्यशब्दस्य ' पद्दन्नोमास् ' इत्यादिना आसनादेशः । ' सुपां सुलुक्- ' इति सप्तम्या लुक् । विमानः । ' माङ् माने ' । ' कृत्यल्युटो बहुलम् ' इति कर्तरि ल्युट् । लिस्स्वरः । अजस्रः । ' जसु मोक्षणे ' । नञ्पूर्वः । ' नमिकम्पिस्म्यजसकमहिंसदीपो रः ' (पा. सू. ३. २. १६७) इति ताच्छील्किो रप्रत्ययः । नञ्पूर्वो जसिर्नेरन्तर्ये वर्तते । नस्स्वरः । ' जस[1] उपक्षये ' वा ॥

त्रिभिः पवित्रैरपुपोद्ध्यर्कं हृदा मतिं ज्योतिरनु प्रजानन् ।
वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत् ॥ ८ ॥

त्रिऽभिः । पवित्रैः । अपुपोत् । हि । अर्कम् । हृदा । मतिम् । ज्योतिः । अनु । प्रऽजानन् । वर्षिष्ठम् । रत्नम् । अकृत । स्वधाभिः । आत् । इत् । द्यावापृथिवी इति । परि । अपश्यत् ॥८॥

सर्वात्मकः अग्निः[2] [v]हृदा अन्तःकरणवृत्त्या [v]मतिं मननीयं [v]ज्योतिः स्वप्रकाशरूपं परब्रह्माख्यं तेजः [v]अनु [v]प्रजानन् श्रवणमननादिक्रमेण[3] प्रकर्षेण संशयविपर्यासभावनाबुद्धिनिरासेन स्वात्मरूपतया जानानः सन् [v]पवित्रैः पावनैः [v]त्रिभिः अग्निवायुसूर्यैः [v]अर्कम् अर्चनीयं[4] स्वात्मानम् [v]अपुपोद्धि तेभ्योऽपि निर्मलतया पावनं परिच्छेद खलु । यथा दशापवित्रेण सोमं पावयति तद्वत् । एवं जानानोऽग्नि. [v]वर्षिष्ठं स्वात्मानमुत्तमं[5] [v]स्वधाभिः। स्वेन लोकान् दधातीति[6] स्वधा[7]। तैरग्निवायुसूर्यैः [v]रत्नं रमणीयम् [v]अकृत अकार्षीत् । [v]आदित् अमन्तरमेवमात्मनि ज्ञाते[8] सति [v]द्यावापृथिवी तत्र परिकल्पिते द्यावा-पृथिव्यौ तदुपलक्षितं सर्वं[9] जगत्[10] [v]पर्यपश्यत् । परितः सर्वतः स्वात्मतया[11] अदर्शत् । 'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति ' इति श्रुतेः ॥ पवित्रैः । ' पूञ् पवने ' । अस्मात्[12] ' कर्तरि चर्षिदेवतयोः ' (पा. सू. ३. २. १८६) इति देवतायामभिधेयायां कर्तरि इत्रप्रत्ययः । पुनन्तीति पवित्रा अग्निवायुसूर्याः । प्रत्ययस्वरः । अपुपोत् । ' पूञ् पवने ' इत्यस्य यङ्लुगन्तस्य[13] रूपम् । संज्ञा-पूर्वकस्य विधेरनित्यत्वात् अभ्यासस्य गुणाभावः । ' यद्धितुपरं छन्दसि ' (पा. सू. ८. १. ५६) इति न निघातः । अर्कम् । ' अर्च पूजायाम् ' । ' कृदाधारार्चिकलिभ्यः कः ' इति कप्रत्ययः । हृदा । हृदयशब्दस्य ' पद्दन्नोमास्° ' इत्यादिना हृदादेशः । मतिम् । ' मन ज्ञाने[14] ' । ' मन्त्रे वृषेषपच° ' इत्यादिना कर्मणि क्तिन् उदात्तः[15] । अकृत । करोतेर्लुङि सिच् । तस्य ' हल्ङ्याद्भ्यः ' इति लोपः । द्यावापृथिवी । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरः ॥

---

१. त-ल-जस् । २. त-अग्निः हिरण्यगर्भः । ३. स-°मननादिक्रमेण । ४. त-अर्चनीयं निरति-शयानन्दलक्षणम् । ५. त-उत्तमं स्वात्मानम् । ६. त-दधर्तीति स्वधाः । ७. त-विज्ञाते । ८. ख-ग-च-ज-ण-भ-' सर्व ' नास्ति । ९. न-जगच्च । १०. ख-ग-च-ज-ण-फ-भ-प्राप्ततया । ११. त-इत्यस्मात् । १२. त-यङ्लुकि लङि । १३. त-ज्ञाने इत्यस्मात् । १४. त-उदात्त इत्युक्तत्वात् ।

शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानाम् ।
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥ ९ ॥

शतऽधारम् । उत्सम् । अक्षीयमाणम् । विपःऽचितम् । पितरम् । वक्त्वानाम् ।
मेळिम् । मदन्तम् । पित्रोः । उपऽस्थे । तम् । रोदसी इति । पिपृतम् । सत्यऽवाचम् ॥९॥

यस्मादुपाध्यायाद्विश्वामित्रो वैश्वानरास्यं परं ब्रह्माज्ञासीत्तमिममुपाध्यायमनयर्चा स्तौति । हे [v]रोदसी द्यावापृथिव्यौ [v]शतधारम् अपरिमितजलधारायुक्तम् [v]अक्षीयमाणं न कदापि[1] विच्छिन्नप्रवाहम् [v]उत्सम् । लुप्तोपममेतत्[2] । उत्समिव सततप्रवाहोपेतं[3] स्रोत इवाविच्छिन्नवाक्सरणीसमेतं [v]विपश्चितं मेधाविनं सकलशास्त्राभिज्ञं [v]पितरं शिष्याणां विद्योपदेशेन पालकं [v]वक्त्वानां वक्तव्यानां वेदवाक्यानां [v]मेळिं मेलकं नानाशाखागतानां वाक्यानामेकस्मिन्नर्थे संकलय्य वक्तारं [v]पित्रोः द्यावापृथिव्योः [v]उपस्थे समीपे [v]मदन्तं ज्ञानातिशयेन हृष्यन्तम् अत एव [v]सत्यवाचम् अज्ञातार्थाभावात्परप्रतारणे च कारणाभावात् सत्यवादिनम् । [v]तम् इममुपाध्यायं [v]पिपृतम् अपेक्षितफलप्रदानेन संपूर्णं कुरुतम् । यद्वा पालयतम् ॥ उत्सम् । 'उन्दी क्लेदने' । अस्मात् 'उन्द्यमिगृधिकुषिभ्यः क्ित्' (उ.सू. ३. ३४८) इति सप्रत्ययः । कित्त्वान्नकारलोपः । उनत्तीत्युत्सः । व्यत्ययेनाद्युदात्तः । विपश्चितम् । विशेषेण पातीति विपा वाक् । विपां वाचश्चिनोतीति क्विप् । 'ह्रस्वस्य पिति० ' इति तुक् । 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनात् द्वितीयाया अप्यलुक्[4] । कृदुत्तरपदस्वरः । वक्त्वानाम् । 'वच परिभाषणे' । अस्मात् 'कृत्यार्थे तवैकेन्केन्यत्वनः ' इति त्वन्प्रत्ययः । 'चोः कुः ' इति कुत्वम् । निरस्वरः । मेळिम् । मिलिः[5] संपर्कार्थो धातुः । अस्मादौणादिक इप्रत्ययः । रोदसी । आमन्त्रितत्वाद्विघातः । पिपृतम् । 'पॄ पालनपूरणयोः' । छान्दसो जुहोत्यादिः । 'अतिपिपर्त्योश्च ' इत्यभ्यासस्येत्वम् । निघातः ॥ ॥ २७॥

'प्र वो वाजाः ' इति पञ्चदशर्चं पञ्चदशं सूक्तम् । अत्रानुक्रमणिका—'प्र वः पञ्चोना गायत्रं त्वृतव्या वाद्या' इति । विश्वामित्र ऋषिः । गायत्री छन्दः । अग्निर्देवता । आद्या ऋतुदेवत्या वा । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दस्यस्य सूक्तस्य विनियोगः । 'प्र वो वाजा उपसद्याय ' (आश्व. श्रौ. ४.१३) इति । आभिप्लविकेषूक्थ्येषु 'प्र वो वाजाः ' इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च— 'प्र वो वाजा अभिद्यवोऽभि प्रयांसि वाहसा ' (आश्व. श्रौ. ७. ८) इति । सूक्तस्याद्या सामिधेनी । सूत्रितं च—' प्र वो वाजा अभिद्यवोग्न आ याहि वीतये ' (आश्व. श्रौ. १. २) इति । सामिधेनीषु ' समिध्यमानः' इत्येका । सूत्रितं च—' समिध्यमानो अध्वरे समिद्धो अग्न आहुतेति द्वे ' (आश्व. श्रौ. १. २) इति । आधाने तृतीयायामिष्टौ सामिधेनीविध्यमानेद्धवत्योर्मध्ये ' पृथुपाजाः ' इति द्वे धाय्ये । सूत्रितं च—' प्रागुपोत्तमायाः पृथुपाजा अमर्त्य इति द्वे ' (आश्व. श्रौ. २. १) इति । एवमन्यत्रापि यत्र यत्र सप्तदश[6] सामिधेन्यस्तत्र तत्रैते धाय्ये इति द्रष्टव्यम् । विषुवत्येकविंशतिः सामिधेन्यः । तत्र ' पृथुपाजा अमर्त्यः ' इति षड्चो धाय्याः । ' पृथुपाजा अमर्त्य इति षट् धाय्याः सामिधेनीनाम् ' (आश्व. श्रौ. ८. ६) इति सूत्रितम् । महाव्रतेऽपि पञ्चविंशतिसंख्याकाः

१. ख-ग-च-ज-ण-फ-भ-क्वापि । २. ख-ग-च-ज-ण-न-प-फ-भ-ल-स-' लुप्तोपममेतत् ' नास्ति । ३. ख-ग-च-ज-ण-न-भ-ल-स-शतप्रवाहोपेतम् । ४. त-अलुक् । ५ ख-गच-ज-ण-फ-भ-मिलः । ६. ख-ग-ज-ण-फ-भ-सप्तदशधा ।

सामिधेन्यः । तत्राप्येताः पङ्क्तीर्द्रष्टव्याः । अग्नीषोमप्रणयने ' होता देवो अमर्त्यः ' इति तृचः । सूत्रितं च—' होता देवो अमर्त्यः पुरस्तादुप ब्रुवाग्ने दिवेदिवे ' (आश्व. श्रौ. ४. १०) इति । ' ईळेन्यो नमस्यस्तिरः ' इति तिस्रः सामिधेन्यः । सूत्रितं च—' ईळेन्यो नमस्यन्तिरोऽग्निं दूतं वृणीमहे ' (आश्व. श्रौ. १. २) इति ॥

प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या । देवाञ्जिगाति सुम्नयुः ॥ १ ॥

प्र । वः । वाजाः । अभिऽद्यवः । हविष्मन्तः । घृताच्या । देवान् । जिगाति । सुम्नयुः ॥१॥

हे ऋतवः [v]वाजाः । वजन्ति[1] गच्छन्तीति वाजा मासाः । [v]अभिद्यवः । अभितो द्यवो दिवसा येष्वित्यभिद्यवोऽर्धमासाश्च । [v]हविष्मन्तः हविर्भाजो देवाः । [v]घृताच्या । घृतमञ्चतीति[2] घृताची गौः । तथा च तैत्तिरीयकं—' देवा हविष्मन्तो गौर्घृताची ' (तै. सं.२.५.७.४) इति । यद्वा हविष्मन्तो हविषः क्षीरादेः प्रदातारः पशवो घृताच्या । घृतमञ्चति प्राप्नोतीति घृताची स्रुक् । तथा च वाजसनेयकं—' पशवो हविष्मन्तः स्रुग्घृताची ' इति । तया घृताच्या सहिता हविष्मन्तो देवाः पशवश्च मासाश्चार्धमासाश्चेति सर्वे [v]वः युष्माकं यजनार्थं प्रभवन्ति । तेषु वाजादिषु प्रभवत्सु सत्सु [v]सुम्नयुः सुखमात्मन इच्छन् यजमानः [v]देवाञ्जिगाति यज्ञद्वारा देवान् प्राप्नोति । उक्तार्थं तैत्तिरीयब्राह्मणं—' प्र वो वाजा इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुः ' (तै. सं. २. ५ ७. ४) इति ॥ अभिद्यवः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । घृताच्या । ' घृक्षरणदीप्त्योः ' । अस्मात्[3] ' अञ्जिघृसिभ्यः क्तः ' (उ. सू. ३. ३६९) इति कर्मणि क्तः । घृतमाज्यमञ्चतीति ' ऋत्विग्दधृक् ' इत्यादिना क्विन् । ' अनिदिताम् ' इत्युपधालोपः । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' चौ ' इति पूर्वपदान्तोदात्तत्वम् । जिगाति[4] । गातिः गत्यर्थः[4] । छान्दसो जुहोत्यादिः । निघातः । सुम्नयुः । सुम्नं सुखमात्मन इच्छन्निति[5] ' सुप आत्मनः क्यच् ' । ' क्याच्छन्दसि ' इत्युः[6] । प्रत्ययस्वरः ॥

ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् ॥ २ ॥

ईळे । अग्निम् । विपःऽचितम् । गिरा । यज्ञस्य । साधनम् । श्रुष्टीऽवानम् । धितऽवानम् ॥२॥

[v]विपश्चितं मेधाविनं [v]यज्ञस्य [v]साधनं यज्ञस्य निर्वाहकं [v]श्रुष्टीवानं सुखवन्तं यद्वा वेगवन्तं [v]धितावानम् । वानं[7] वननीयं धनं धितं निहितं यस्य तं निहितधनम् । तमिमम् [v]अग्निं [v]गिरा स्तुतिलक्षणया वाचा [v]ईळे विश्वामित्रोऽहं स्तौमि ॥ ईळे । ' ईड स्तुतौ ' । श्रुष्टीवानम् । ' वन षण[8] संभक्तौ ' इत्यस्माद्विच् । श्रुष्टी वनतीति श्रुष्टीवा । कृदुत्तरपदस्वरः । धितावानम् । दधातेः निष्ठायां धिरादेशश्छान्दसः । ' वन संभक्तौ ' । कर्मणि घञ् । बहुव्रीहौ ' निष्ठा ' इति धितशब्दस्य पूर्वनिपातः । पूर्वपदप्रकृतिस्वरः ॥

---

१. न-प-भ–व्रजन्ति । २. त-न-ल–घृतमञ्चति जा(क्षा)रयतीति । ३. त–इत्यस्मात् । ४. ख-ग-च-ज-ण-फ-भ–जिगातिर्गत्यर्थः । ५. ख-ग-च-ज-ण-भ-ल–इच्छन्तीति । ६. त–इत्युप्रत्ययः । ७. ख-ग-च-ज-ण-भ-स–' वानं ' नास्ति । ८. त–' षण ' नास्ति ।

अग्ने शकेम ते वयं यमं देवस्य वाजिनः । अति द्वेषांसि तरेम ॥ ३ ॥

अग्ने । शकेम । ते । वयम् । यमम् । देवस्य । वाजिनः । अति । द्वेषांसि । तरेम ॥ ३ ॥

हे [v]अग्ने [v]वाजिनः संभृतहविष्काः [v]वयं [v]देवस्य द्योतमानस्य[1] [v]ते तव [v]यमं यमनम् आ यज्ञममासेः अत्रावस्थानं कर्तुं [v]शकेम शक्यास्म[2]। वाजिनो वेगवतो देवस्य इति वा योजनीयम्। ततः कारणात् [v]द्वेषांसि अस्मदीयानि पापानि [v]अति [v]तरेम पापेभ्य उत्तीर्णा भवेम ॥ शकेम । 'शकॢ शक्तौ' इत्यस्य[3] आर्शादिङि 'लिङ्याशिष्यङ्' इत्यङ्प्रत्ययः । 'किदाशिषि' इति यासुट् । सलोपेयादेशयलोपगुणसलोपाः । आमन्त्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । उदात्तनिवृत्तिस्वरः । यमम् । 'यम उपरमे' इत्यस्माद्भावे घञ् । 'यम उपरमे' इति निपातनात् वृद्ध्यभावः[4]। ञित्स्वरः । तरेम । 'तॄ प्लवनतरणयोः' । प्रार्थने लिङि रूपम् । निघातः ॥

समिध्यमानो अध्वरेऽग्निः पावक ईड्यः । शोचिष्केशस्तमीमहे ॥ ४ ॥

सम्ऽइध्यमानः । अध्वरे । अग्निः । पावकः । ईड्यः । शोचिःऽकेशः । तम् । ईमहे ॥४॥

यः [v]अग्निः [v]अध्वरे यज्ञे [v]समिध्यमानः घृताज्याहुतिभिः सम्यक् प्रज्वाल्यमानः अत एव [v]शोचिष्केशः[5] ज्वालाकेशः [v]पावकः शोधकः [v]ईड्यः स्तोतृभिः प्रशस्यो भवति [v]तम् इममभिमतफलार्थम् [v]ईमहे वयं याचामहे ॥ ईड्यः । 'ईड स्तुतौ' इत्यस्माण्यत् । अस्य[6] 'तित्स्वरितम्[7]' इति स्वरितत्वे प्राप्ते 'ईडवन्द[8]' इत्यादिना आद्युदात्तत्वम् । ईमहे । ई कान्त्यादिषु । अयं[8] धातुरत्र याच्ञार्थः । निघातः ॥

पृथुपाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः । अग्निर्यज्ञस्य हव्यवाट् ॥ ५ ॥

पृथुऽपाजाः । अमर्त्यः । घृतऽनिर्निक् । सुऽआहुतः । अग्निः । यज्ञस्य । हव्यऽवाट ॥ ५ ॥

[v]पृथुपाजाः प्रभूततेजोरूपः [v]अमर्त्यः मरणधर्मरहितः [v]घृतनिर्णिक् । घृतस्य विलयनद्वारा शोधनं येनेति घृतनिर्णिक् । [v]स्वाहुतः सुष्ठु होत्रादिभिः सम्यगिष्टः । एवंभूतः [v]अग्निर्यज्ञस्य ज्योतिष्टोमादेः [v]हव्यवाट् हव्यानां वोढा भवति ॥ पृथुपाजाः । कुदुत्तरपदस्वरः । स्वाहुतः । जुहोतेः कर्मणि क्तः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । हव्यवाट् । 'वहश्च' इति ण्विः ॥ ॥ २८ ॥

तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः । आ चक्रुरग्निमूतये ॥ ६ ॥

तम् । सऽबाधः । यतऽस्रुचः । इत्था । धिया । यज्ञऽवन्तः । आ । चक्रुः । अग्निम् । ऊतये ॥६॥

१. त–'द्योतमानस्य' नास्ति । २. ख-ग-च-ज-ण-फ-भ–शक्तास्म । ३. त–इत्यस्मात् । ४. ल–ह्रस्वभावः । ५. ख-ग-च-ज-ण-प-फ-भ–दीप्तज्वालः । ६. त–तस्य । ७. ख-ग-ज-ण-त-भ-स–तित्स्वरितः । ८. त–इत्ययम् ।

[v]सबाधः । रक्षोघ्नमन्त्रोच्चारणेन तद्विषयबाधा सह वर्तन्ते इति सबाधः । [v]यज्ञवन्तः यजनीयहविर्युक्ताः [v]यतस्रुचः । यताः संयताः स्रुचो जुह्वाद्याः यैस्ते यतस्रुचः ऋत्विजः । [v]इत्था इत्थमनेन प्रकारेण क्रियमाणया [v]धिया स्तुत्या [v]तम् एवंभूतम् [v]अग्निमूतये राक्षसबाधात्[1] रक्षणाय [v]आ अभिमुखं [v]चक्रुः कुर्वन्ति ॥ सबाधः । ' बाधृ विलोडने ' इत्यस्मात् क्विप् । कृदुत्तरपदस्वरः । इत्था । इदंशब्दात् प्रकारार्थे इदमस्थमुः । तस्य ' सुपां सुलुक्° ' इति डादेशः । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । चक्रुः । ' डुकृञ् करणे ' इत्यस्य लिटगुमि यणादेशे कृते तस्य ' द्विर्वचनेऽचि ' इति स्थानिवद्भावात् द्विर्वचनम् । निघातः ॥

होता देवो अमर्त्यः पुरस्तादेति मायया । विदथानि प्रचोदयन् ॥ ७ ॥

होता । देवः । अमर्त्यः । पुरस्तात् । एति । मायया । विदथानि । प्रऽचोदयन् ॥ ७ ॥

[v]होता होमनिष्पादकः [v]अमर्त्यः मरणधर्मरहितः [v]देवो द्योतमानः [v]विदथानि वेदितव्यानि कर्माणि [v]प्रचोदयन् प्रकर्षेण प्रेरयन् सोऽग्निः [v]मायया कर्मविषयाभिज्ञानेन[2] युक्तः सन् [v]पुरस्तात् कर्मप्रारंभकाले एव [v]एति अस्मानागच्छति[3] ॥ मायया । ' माङ् माने शब्दे च ' इत्यस्मात् ' माच्छाससिसूभ्यो यः ' इति कर्तरि कर्मणि वा यप्रत्ययः । मिमीते जानीते कर्म मीयतेऽनयेति वा माया कर्मविषयज्ञानम् । प्रत्ययस्वरः । विदथानि । ' विद ज्ञाने ' इत्यस्मात् ' रुदिविदिभ्यां किन् ' (उ. सू. ३. ३९५) इति कर्मणि अथप्रत्ययः । किन्वादगुणः । प्रत्ययस्वरः ॥

वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते । विप्रो यज्ञस्य साधनः ॥ ८ ॥

वाजी । वाजेषु । धीयते । अध्वरेषु । प्र । नीयते । विप्रः । यज्ञस्य । साधनः ॥ ८ ॥

[v]वाजी बलवानग्निः [v]वाजेषु युद्धेषु [v]धीयते देवैः शत्रुहननार्थं[4] निधीयते । किंच [v]अध्वरेषु अग्निहोत्रादिषु [v]प्र [v]णीयते अध्वर्वादिभिः प्रकर्षेण आहवनीयादिस्थानेषु प्रक्षिप्यते । अत एव [v]विप्रः मेधावी सन्नग्निः [v]यज्ञस्य अग्निहोत्रादेः [v]साधनः साधको भवति ॥ धीयते । दधातेः[5] कर्मणि यक् । ' घुमास्थागापा° ' इत्यादिना ईत्वम् । निघातः । नीयते[6] । ' णीञ् प्रापणे ' इत्यस्य[6] कर्मणि यकि रूपम् । उपसर्गादसमासेऽपि णोपदेशस्य ' इति णत्वम् । साधनः । ' साध संसिद्धौ ' । नन्द्यादिखात्कर्तरि ल्युः । लित्स्वरः ॥

धिया चक्रे वरेण्यो भूतानां गर्भमा दधे । दक्षस्य पितरं तना ॥ ९ ॥

धिया । चक्रे । वरेण्यः । भूतानाम् । गर्भम् । आ । दधे । दक्षस्य । पितरम् । तना ॥ ९ ॥

योऽग्निः [v]धिया आधानपवमानेष्टिरूपेण कर्मणा [v]चक्रे आहवनीयरूपतया कृतोऽभूत् अत एव [v]वरेण्यः सर्वैर्यजमानैः कर्माङ्गत्वेन वरणीयः यश्चाग्निः [v]भूतानां स्थावरजङ्गमात्मकानां भूतजातानामन्तः

१. त-ल-राक्षसवधात् । २. ख-प-फ-भ-विषयाभिज्ञानेन । ३. त-अस्मानागच्छति । एति । इण् गतौ । ४. त-ल-शत्रुहननार्थे । ५. त-ल-डुधाञ् धारणपोषणयोः इत्यस्मात् । ६. ख-ग-च-न-भ-स-' नीयते .....इत्यस्य ' नास्ति; ज-ण-णीयते । णीञ् प्रापणे ।

[v]गर्भं स्वात्मानमेव गर्भरूपतया [v]आ [v]दधे सर्वत्र दधार [v]पितरं सर्वस्य जगतः पालकं तमिममग्निं [v]दक्षस्य दक्षप्रजापतेः [v]तना तनया वेदिरूपा भूमिर्दक्षपूर्णमास्याग्निहोत्रादिकर्मसिद्ध्यर्थं धारयति। भूमेर्दक्षदुहितृत्वे[1] मन्त्रवर्णः—' अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ' (ऋ. सं. १०. ७२. ५) इति ॥ चक्रे । करोतेः कर्मणि लिटि रूपम्। गर्भम्। ' गृ निगरणे ' इत्यस्मात् ' अर्तिगृभ्यां भन् ' इति भन्। गिरति गीर्यते वा गर्भः। नित्त्वादाद्युदात्तः। दधे । दधातेर्लिटि रूपम्। पितरम्। ' पा रक्षणे '। ' नप्तृनेष्टृ ' इत्यादिना तृजन्तत्वेन निपातनादिष्वम्। पाति पालयतीति पिता पालकः । चित्स्वरः । तना । यलोपश्छान्दसः ॥

नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत । अग्ने सुदीतिमुशिजम् ॥ १० ॥

नि । त्वा । दधे । वरेण्यम् । दक्षस्य । इळा । सहःऽकृत । अग्ने । सुऽदीतिम् । उशिजम् ॥ १० ॥

उक्तार्थः[2] अनयर्चा विधीयते। [v]सहस्कृत मथनाख्येन बलेन निष्पन्न हे [v]अग्ने [v]सुदीतिं शोभनदीप्तियुक्तम् [v]उशिजं पुरोडाशादिहविः कामयमानम्। यद्वा कर्मार्थिभिः काम्यमानम्। अत एव [v]वरेण्यं तैर्वरणीयं [v]त्वा एवंविधं त्वां [v]दक्षस्य दुहिता [v]इळा वेद्यादिलक्षणा भूमिः [v]नि [v]दधे अग्निहोत्रादिकर्मसमृद्ध्यर्थं[3] नितरां दधार ॥ इळा । ' ईड स्तुतौ ' । ' पुंसि संज्ञायाम् ' इत्यत्र प्रायिकवचनात् स्त्रियामेऽपि[4] घप्रत्ययः। ह्रस्वश्छान्दसः। संज्ञापूर्वकस्य विधेरनित्यत्वात् अगुणः[5]। ईड्यन्ते स्तूयन्तेऽस्यां यजमानैर्देवा इतीळा भूमिः। उदात्तनिवृत्तिस्वरेणान्तोदात्तः। प्रत्ययस्वरः। उशिजम्। ' वश कान्तौ ' इत्यस्मात् ' वशः[6] किच्च ' इतीजिप्रत्ययः। कित्त्वात्संप्रसारणम्। वष्टि हविः कामयते उश्यते काम्यते कर्मार्थिभिः इति वा उशिक् अग्निः। प्रत्ययस्वरः ॥ ॥ २९ ॥

अग्निं यन्तुरमप्तुरमृतस्य योगे वनुषः । विप्रा वाजैः समिन्धते ॥ ११ ॥

अग्निम् । यन्तुरम् । अप्ऽतुरम् । ऋतस्य । योगे । वनुषः । विप्राः । वाजैः । सम् । इन्धते ॥ ११ ॥

[v]वनुषः कर्मसिद्ध्यर्थं संभजमानाः [v]विप्राः मेधाविनोऽध्वर्वादयः [v]यन्तुरं सर्वस्य नियन्तारम्। यद्वा क्षिप्रं गन्तारम्। [v]अप्तुरम् अपां प्रेरकं तमिमम् [v]अग्निम् [v]ऋतस्य सत्यभूतस्य ज्योतिष्टोमादेः [v]योगे प्रयोगार्थं [v]वाजैः हविर्लक्षणैरन्नैः [v]समिन्धते सम्यग्दीपयन्ति ॥ यन्तुरम् । वर्णव्यत्ययः। यन्तारमित्यर्थः। अप्तुरम् । ' तुर त्वरणे ' । अपस्तुनोतीति त्वरयतीति क्विप् । कृदुत्तरपदस्वरः। योगे । ' युजिर् योगे '। भावे घञ्। ' चजोः कुघिण्ण्यतोः ' इति कुत्वम्। जित्स्वरः। वनुषः। ' वन षण संभक्तौ '। ' जनेर्डिः ' इत्यधिकारे बहुलवचनादस्मादपि उसिः[7]। प्रत्ययस्वरः। इन्धते। ' इन्धी दीप्तौ '। विघातः ॥

ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि । अग्निमीळे कविक्रतुम् ॥ १२ ॥

ऊर्जः । नपातम् । अध्वरे । दीदिऽवांसम् । उप । द्यवि । अग्निम् । ईळे । कविऽक्रतुम् ॥ १२ ॥

१. ख-ग-[illegible]-ण-[illegible]-[illegible]-°दुहितृत्वे। २. त-उक्तोऽर्थः। ३. त-प-फ-°सिद्ध्यर्थम्। ४. ख-ग-[illegible]-भ-स्त्रियेऽपि। ५. त-अगुणः। यद्वा घञर्थे कविधानमिति अधिकरणे कः। ६. ख-ग-च-ज-ण-भ-वशेः। ७. त-उसिप्रत्ययः।

[v]ऊर्जो [v]नपातं हविर्लक्षणैः अन्नैः[1] समिध्यमानत्वेनान्नस्य पुत्रम्। यद्वान्नस्य चतुर्थम्। यथान्नात्[2] आहुतिराहुतेरादित्य आदित्यादग्निरिति। [v]उप [v]द्यवि अन्तरिक्षस्य समीपे [v]दीदिवांसम् अतिशयेन दीप्यमानं [v]क्रिक्रतुम्। क्रतवो मेधाविनोऽध्वर्यवादयो मथनेन क्रतवः कर्तारो यस्येति। अध्वर्यवादिभिः निष्पाद्यमानं तमिमम् [v]अग्निम् [v]अध्वरे अस्मिन्यज्ञे [v]ईळे स्तुतिलक्षणाभिर्गीर्भिरहं स्तौमि॥ ऊर्जः। 'ऊर्ज बले' इत्यस्मात् 'भ्राजभास॰' इत्यादिना ताच्छील्किः क्विप्[3]। ऊर्जयति शरीरमित्यूर्क् अन्नम्। 'सावेकाचः॰' इति विभक्तेरुदात्तत्वम्। द्यवि। 'द्युत दीप्तौ' इत्यस्मात् औणादिको डुन्प्रत्ययः[4]। द्योतते किरणसंबन्धादिति द्युः अन्तरिक्षम्। नित्स्वरः[5]। ईळे[6]। लटि रूपम्॥

ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः। समग्निरिध्यते वृषा॥ १३॥

ईळेन्यः। नमस्यः। तिरः। तमांसि। दर्शतः। सम्। अग्निः। इध्यते। वृषा॥ १३॥

[v]ईळेन्यः स्तोतृभिरीड्यः अत एव [v]नमस्यः सर्वैर्नमस्कार्यः [v]तमांसि [v]तिरः ध्वान्तानि स्वप्रभाभिस्तिरस्कुर्वन् [v]दर्शतः कमनीयतया सर्वैर्दर्शनीयः। तादृशः [v]अग्निः [v]वृषा यजमानस्य कामानां वर्षिता [v]सम् [v]इध्यते आहुतिप्रक्षेपेण[7] प्रज्वाल्यते। उक्तार्थे वाजसनेयकम्—'ईड्येन्यो ह्येष नमस्यो ह्येष तिरस्तमांसि ददृशे समिद्धः' इति॥ ईळेन्यः। 'ईड स्तुतौ'। 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्यः[8]। प्रत्ययस्वरः। नमस्यः। नमस्यतेः 'अचो यत्' इति यत्। अतोलोपयलोपौ। 'तित्स्वरितः[9]' इति स्वरितः। दर्शतः। 'दृशिर् प्रेक्षणे'। अस्मात्[10] 'भृमृदृशि॰' इत्यादिना कर्मणि अतच्प्रत्ययः। चित्स्वरः। वृषा। 'वृषु[11] सेचने' इत्यस्मात् 'कनिन्युवृषि॰' इत्यादिना कनिन्। कित्त्वादगुणः। नित्त्वादाद्युदात्तः॥

अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईळते॥ १४॥

वृषो इति। अग्निः। सम्। इध्यते। अश्वः। न। देवऽवाहनः। तम्। हविष्मन्तः। ईळते॥१४॥

[v]वृषो वृषेव[12] कामानां वर्षिता [v]देववाहनः[13]। देवान् हवींषि वाहयति प्रापयतीति देववाहनः*। तत्र दृष्टान्तः। [v]अश्वो [v]न इति। यथाश्वो राजानं वाहयति स्वपुरं प्रापयतीति। वाहनमश्वः। तद्वत्[13] वाहनभूतो यः [v]अग्निः [v]समिध्यते आज्याहुतिप्रदानेन[14] सम्यक् दीप्यते [v]तं तादृशमग्निं [v]हविष्मन्तः

---

१. ख-ग-च-ज॰-न-भ-'अन्नैः' नास्ति। २. च-न-फ-यदन्नात्; ज-ण-अन्नात्। ३. त-क्विप्प्रत्ययः। ४. ख-ग-ज-ण-न-भ-स-डुन्प्रत्ययः; च-डुप्रत्ययः। ५. ख-ग-च-ज-ण-न-भ-स-त्रित्स्वरः। ६. त-ल-ईळे। ईड स्तुतौ इत्यस्य। ७. ज-ण-आज्याहुति॰। ८. त-केन्यप्रत्ययः। ९. ग-च-न-भ-स-तित्स्वरः। १०. त-इत्यस्मात्। ११. ख-ग-च-ज-ण-न-भ-वृधी; ल-वृष; स-वृषा। १२ ख-ग-च-ज-ण-भ-'वृषेव' नास्ति। १३. ख-ग-च-ज-ण-फ-अश्वो न अश्व इव देववाहनः देववान् (ज-ण-देवानां) हवींषि वाहनमत्वः (ज-ण-वाहनः) तद्वतो; भ-देववाहनः देवानां हवींषि वाहनमत्वः तद्वतो; स-देववाहनः देववान् मत्वः तद्वतो। * ल-लब्ध्वा वहनमिवाश्वः तद्वत् यद्वद्वाहनभूतो योऽग्निः समिध्येत आहुतिप्रदानेन सम्यग्दीप्यते तेन। १४. त-न-ल-स-आहुति॰।

संभृतहविष्का यजमानाः ᵛईळते कर्मसिद्ध्यर्थं स्तुवन्ति ॥ वृषा उ। गुणः। उत्तमवलम्ब्य प्रगृह्यसंज्ञा। देवबाहनः। ' वह प्रापणे ' इत्यस्माण्ण्यन्तात्कर्तरि ल्युः। लिस्वरः। समासे कृदुत्तरपदस्वरः[1] ॥

वृषणं त्वा वयं वृषन्वृषणः समिधीमहि । अग्ने दीद्यतं बृहत् ॥ १५ ॥

वृषणम्। त्वा। वयम्। वृषन्। वृषणः। सम्। इधीमहि। अग्ने। दीद्यतम्। बृहत्॥१५॥

ᵛवृषन् कामानां वर्षयितर्हे ᵛअग्ने ᵛवृषणः वृषाणः[2] घृताज्याहुतीनां[3] सेक्तारः ᵛवयं ᵛवृषणम् आहुतिद्वारा[4] उदकस्य सेक्तारम्। तथा[5] च[5] स्मृतिः–' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' (मनु. ३. ७६)इति। ᵛदीद्यतं दीप्यमानं ᵛबृहत् अत एव महान्तं ᵛत्वा[6] त्वाम्[6] अग्ने ᵛसमिधीमहि सम्यग्दीपयामः ॥ इधीमहि। ' ञिइन्धी दीप्तौ ' इत्यस्य प्रार्थने लिङि नकारलोपश्छान्दसः। निघातः। दीद्यतम्। दीदेतिः[7] दीप्तिकर्मा। तस्य शतरि रूपम्। ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम्॥ ॥ ३० ॥

' अग्ने जुषस्व ' इति षट्चं षोडशं सूक्तं वैश्वामित्रमाग्नेयम्। अत्रानुक्रमणिका—'अग्ने जुषस्व षट् तृतीयाद्युष्णिक्त्रिष्टुब्जगत्यः ' इति। पूर्वसूक्ते ' गायत्रं तु ' इत्युक्तत्वादेतदपि गायत्रम्। तृतीया तूष्णिक् चतुर्थी त्रिष्टुप् पञ्चमी जगती। ' अग्ने जुषस्व ' इति सवनीयपुरोडाशे स्विष्टकृतः प्रातःसवनीयानुवाक्या। सूत्रितं च—' अथ स्विष्टकृतोऽग्ने जुषस्व नो हविः ' (आश्व. श्रौ. ५. ४) इति। अतिरात्रे आश्विनशस्त्रे परिहिते सति चमसगणैः सहाश्विनोर्द्विकपालः पुरोडाशः सर्वहुतो होतव्यः। यदि पुरोडाशमवशेष्य स्विष्टकृतं कुर्युस्तस्य स्विष्टकृतः ' पुरोळा अग्ने ' इत्येषा याज्या। ' यद्येतस्य पुरोडाशस्य स्विष्टकृता चरेयुः पुरोळा अग्ने पचतः ' (आश्व. श्रौ. ६. ५) इति सूत्रितम्। माध्यंदिने सवने सवनीयपुरोडाशे स्विष्टकृतोऽनुवाक्या ' माध्यंदिने सवने ' इत्येषा। सूत्रितं च—' अग्ने जुषस्व नो हविर्माध्यंदिने सवने जातवेदः ' (आश्व. श्रौ. ५. ४) इति। तृतीयसवने सवनीयपुरोडाशस्य स्विष्टकृतोऽनुवाक्या ' अग्ने तृतीये सवने ' इत्येषा। सूत्रितं च—' अग्ने तृतीये सवने हि कानिप इत्यनुसवनमनुवाक्याः ' (आश्व. श्रौ. ५. ४) इति। आश्विनपुरोडाशस्य स्विष्टकृतो याज्या ' अग्ने वृधानः ' इत्येषा। सूत्रितं च—' अग्ने वृधान आहुतिमिति संयाज्ये ' (आश्व. श्रौ. ६. ५) इति॥

अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः । प्रातःसावे धियावसो ॥ १ ॥

अग्ने। जुषस्व। नः। हविः। पुरोळाशम्। जातऽवेदः।

प्रातःऽसावे। धियावसो इति धियाऽवसो ॥ १ ॥

विश्वामित्रः स्तौति। ᵛजातवेदः जातप्रज्ञ ᵛधियावसो। धिया स्तोत्रेण वसु धनं यस्मान्नवति सोऽयं धियावसुः। तस्य संबुद्धिः। कर्मानुरूपधनप्रद हे ᵛअग्ने ᵛप्रातःसावे अग्निष्टोमे प्रातःसवने

---

१. त-ल–°पदस्वरः। ईळते। ईड स्तुतौ। २. ख-ग-च-ज-ण-त-भ-ल–' वृषाणः ' नास्ति। ३. त–घृताद्याहुतीनाम्। ४. च-फ–वृष्टिद्वारा। ५. त–तदाह। ६. त-न-स-इमम्; ल–तमिमम्। ७. च-फ–दीद्यतिः।

[v]नः[1] अस्मत्संबन्धि [v]पुरोडाशं पुरोडाशात्मकं [v]हविः [v]जुषस्व सेवस्व ॥ जुषस्व । 'जुषी प्रीतिसेवनयोः' इत्यस्मात्[2] लोटि रूपम्। आमन्त्रितस्याविद्यमानवत्त्वेन पादादित्वान्निघातः। प्रातःसावे । 'षुञ् अभिषवे' । सवनं सावः । भावे घञ् । 'थाथघञ्क्ताजबित्रकाणाम् ' इत्यन्तोदात्तत्वम् । प्रियावसो । विभक्त्यलोपश्छान्दसः । आमन्त्रितत्वान्निघातः[3] ॥

पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः । तं जुषस्व यविष्ठ्य ॥ २ ॥

पुरोळाः । अग्ने । पचतः । तुभ्यम् । वा । ध । परिऽकृतः । तम् । जुषस्व । यविष्ठ्य ॥ २ ॥

[v]यविष्ठ्य युवतम हे [v]अग्ने यः [v]पुरोळाः । पुरोडाशन्तेऽध्वर्यवादयः[4] एनमिति[5] पुरोडाः[6] पुरोडाशः। [v]पचतः कपालयोः पक्वोऽस्ति। स च [v]तुभ्यं[7] त्वदर्थं[8] [v]परिष्कृतः [v]वा[9] [v]घ[10] पर्यग्निकरणादिभिरलंकृतः खलु । [v]तम् इमं पुरोडाशं [v]जुषस्व सेवस्व ॥ पुरोळाः । 'दाश्र दाने' इत्यस्मात् पुरस्पूर्वात् 'मन्त्रे श्वेतवहोक्थशम्पुरोडाशो ण्विन्' (पा. सू. ३. २. ७१) इति कर्मणि ण्विनि कृते 'श्वेतवहादीनां डस्पदस्य' (पा. सू. ३. २. ७१. १) इति डस्प्रत्यये च कृते 'अवयाः श्वेतवाः पुरोडाश्च' (पा. सू. ८. २. ६७) इति निपातनाद्दकारस्य डत्वम्। पुरोडाशन्त एनमिति पुरोडाः पुरोडाशः । डकारस्य ळकारो बह्वृचसांप्रदायिकः। कृदुत्तरपदस्वरः[11]। पचतः । 'डुपचष् पाके' इत्यस्मात् 'भृमृदृशि[12]' इत्यादिना कर्मणि अतच्प्रत्ययः। पच्यतेऽसाविति पचतः पक्वः। चित्स्वरः। घा । 'ऋचि तुनुघ°' इत्यादिना संहितायां दीर्घः । परिष्कृतः । 'संपर्युपेभ्यः करोतौ भूषणे' (पा. सू. ६. १. १३७) इति करोतेः सुडागमः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । यविष्ठ्य । यविष्ठ एव यविष्ठ्यः । 'पादार्घाभ्यां च' इत्यत्र चकारेण वस्वादीनां स्वार्थे यत्प्रत्ययस्योपादानात् यविष्ठशब्दात्स्वार्थिको यत्प्रत्ययः (का. ५. ४. २५)। आमन्त्रितत्वान्निघातः ॥

अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यम् । सहसः सूनुरस्यध्वरे हितः ॥ ३ ॥

अग्ने । वीहि । पुरोळाशम् । आऽहुतम् । तिरःऽअह्न्यम् ।

सहसः । सूनुः । असि । अध्वरे । हितः ॥ ३ ॥

हे [v]अग्ने [v]तिरोअह्न्यम् अह्नि तिरोहिते सति [v]आहुतम् आ समन्तात् हुतं [v]पुरोडाशं पुरोडाशात्मकं [v]हविः [v]वीहि भक्षय । [v]अध्वरे अस्मिन्यज्ञे [v]सहसः [v]सूनुः बलस्य पुत्रस्त्वं [v]हितः [v]असि आहवनीयादिस्थानेष्वस्माभिर्निहितोऽसि । तस्माद्वीहीति शेषः ॥ वीहि । वी कान्तिगत्यादिषु । लोटि रूपम् । हेरपित्त्वादन्तोदात्तत्वम् । आहुतम् । जुहोतेः कर्मणि क्त 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । तिरोअह्न्यम् । अह्नि भवमह्न्यम् । 'भवे छन्दसि' इति यत् । तिरोभूतमह्न्यं यस्मिन् काले स तिरोअह्न्यः । रात्रिकाल इत्यर्थः । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । 'प्रकृत्यान्तःपादम्°' इत्येङः प्रकृतिभावः । बहुव्रीहौ पूर्वपदस्वरः ॥

---

१. त–'नः' नास्ति । २. त–इत्यस्य । ३. ख-ग-च-ज-ण-न-भ-स–'आमन्त्रितत्वान्निघातः' नास्ति । ४. ख-ग-च-ज-ण-न-भ-स–'पुरोडाशन्तेऽध्वर्यवादयः' नास्ति । ५. न-भ-स–'एनमिति पुरोडाः' नास्ति । ६. त–तुभ्यं वा घ त्वदर्थमेव खलु । ७. त–'वा घ' नास्ति । ८. °पदप्रकृतिस्वरः ।

माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ।
अग्ने यह्वस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ॥ ४ ॥

माध्यंदिने । सवने । जातऽवेदः । पुरोळाशम् । इह । कवे । जुषस्व ।
अग्ने । यह्वस्य । तव । भागऽधेयम् । न । प्र । मिनन्ति । विदथेषु । धीराः ॥ ४ ॥

[v]कवे[1] मेधाविन् हे [v]जातवेदः [v]इह अस्मिन्[1] अग्निष्टोमाख्ये कर्मणि तत्र[2] च [v]माध्यंदिने मध्यंदिनसंबन्धिनि [v]सवने [v]पुरोडाशं माध्यंदिनसवनीयपुरोडाशं [v]जुषस्व सेवस्व । हे [v]अग्ने [v]विदथेषु यज्ञेषु [v]धीराः कर्मकुशला अध्वर्वादयः [v]यह्वस्य । यान्ति प्राप्नुवन्ति[3] देवा हवींष्यनेनेति यह्वो महानग्निः । यह्वस्य महतः [v]तव [v]भागधेयं भागतया परिकल्पितमिमं पुरोडाशं [v]न [v]प्र [v]मिनन्ति न हिंसन्ति । किंतु तुभ्यं प्रयच्छन्ति । तं जुषस्वेति शेषः ॥ माध्यंदिने । मध्यंदिनस्येदमित्यर्थे उत्सादित्वादञ् । जित्वादादिवृद्धिः । जित्वादेर्वाद्युदात्तत्वम् । यह्वस्य । ' या प्रापणे ' इत्यस्मात् ' शेवयह्वजिह्व° ' इति निपातनात्करणे वन्प्रत्ययः । हुगागमधातुहस्वौ । यान्त्यनेनेति यह्वोऽग्निः । व्यत्ययेनान्तोदात्तः । भागधेयम् । भागशब्दात्स्वार्थे ' भागरूपनामभ्यो धेयप्रत्ययो वक्तव्यः ' (पा. सू. ५. ४. ३६. २) इति धेयः[4] । प्रत्ययस्वरः । मिनन्ति । ' मिञ् हिंसायाम् ' इत्यस्य क्र्यादित्वात् श्ना । तस्मिन् ' मीनातेर्निगमे ' इति ह्रस्वत्वम् । ' हिनु मीना ' (पा. सू. ८. ४. १५) इति णत्वं न भवति सर्वविधीनां छन्दसि विकल्पितत्वादिति ॥

अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतम् ।
अथा देवेष्वध्वरं विपन्यया धा रत्नवन्तममृतेषु जागृविम् ॥ ५ ॥

अग्ने । तृतीये । सवने । हि । कानिषः । पुरोळाशम् । सहसः । सूनो इति । आऽहुतम् ।
अथ । देवेषु । अध्वरम् । विपन्यया । धाः । रत्नऽवन्तम् । अमृतेषु । जागृविम् ॥ ५ ॥

[v]सहसः [v]सूनो बलस्य पुत्र हे [v]अग्ने त्वं [v]तृतीये [v]सवने [v]आहुतं हूयमानं [v]पुरोडाशं [v]कानिषः कामयसे । [v]अथ अनन्तरम् [v]अध्वरम् अविनाशिनं [v]रत्नवन्तम् । रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते । तद्वन्तं फलप्रदं[5] [v]जागृविं जागरणकारिणम् । प्रातः सोमो जागृविर्भवति स्वप्ननिवारक इति । तमिमं सोमं [v]विपन्यया स्तुतिलक्षणया वाचा स्तुतस्त्वम् [v]अमृतेषु मरणधर्मरहितेषु [v]देवेषु इन्द्रादिषु [v]धाः धेहि । हि पूरणः । तृतीये । त्रिशब्दात्पूरणार्थे ' त्रेः संप्रसारणम्° ' (पा. सू. ५. २. ५५) इति तीयप्रत्ययः । तत्संनियोगेन संप्रसारणम् । ' हलः ' इति दीर्घो न भवति । अणिति(? अणः इति; पा. सू. ६. ३. १११) तत्रानुवर्तनात् प्रत्ययस्वरः । कानिषः । कनी कान्त्यादिषु । लेटि[6] ' सिब्बहुलम्° ' इति सिप् । तस्यार्धधातुकत्वादिडागमः । कान्तिरभिलाषः ।

---

१. प–कवे मेधाविन् जातवेदः जातप्रज्ञ हे अग्ने इहास्मिन् । २. फ–अत्र । ३. ख-ग-च-ज-ण-फ-भ–' प्राप्नुवन्ति ' नास्ति । ४. त–धेयप्रत्ययः । ५. त–तत्फलप्रदम् । ६. त–इत्यस्य लेटि ।

अकारस्य आकारो व्यत्ययेन । हियोगादनिघातः । धातुस्वरः । विपन्यया । ' पन स्तुतौ ' । भावे क्विप् । विरतं यातीति कप्रत्ययः । प्रत्ययस्वरः । धाः । दधातेः धातोः[1] छान्दसे लुकि रूपम् । पादादित्वादनिघातः । जागृविम् । क्विन्प्रत्ययान्तो जागृविशब्दः । नित्स्वरः ॥

अग्ने वृधान आहुतिं पुरोळाशं जातवेदः । जुषस्व तिरोअह्न्यम् ॥ ६ ॥

अग्ने । वृधानः । आऽहुतिम् । पुरोळाशम् । जातऽवेदः । जुषस्व । तिरःऽअह्न्यम् ॥ ६ ॥

ऽजातवेदः जातप्रज्ञ हे ऽअग्ने ऽवृधानः आहुतिभिर्वर्धमानस्त्वं ऽतिरोअह्नयम् । अह्निभवमह्नयं दिवसकृत्यम् । तिरोभूतमह्नयं यस्मिन्काले स तिरोअह्नयो रात्रिकालः । तस्मिन्काले ऽआहुतिं पुरोडाशात्म्यं हविः ऽजुषस्व सेवस्व ॥ आहुतिम् । जुहोतेः कर्मणि क्तिन् । ' तान्नौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम्[2] ॥ ॥ ३१ ॥

' अस्तीदम् ' इति षोडशर्चं सप्तदशं सूक्तं वैश्वामित्रम् । अत्रानुक्रमणिका–' अस्तीदं षोळशाद्या-चतुर्थीदशमीद्वादश्योऽनुष्टुभः षष्ठ्येकादश्युपान्त्ये च जगत्यः पञ्चम्यृस्त्विग्भ्यो वा ' इति । आद्या-चतुर्थीदशमीद्वादश्योऽनुष्टुभः षष्ठ्येकादश्युपान्त्ये च जगत्यः षष्ठ्येकादशी चतुर्दशी पञ्चदशी च जगत्यः। शिष्टा अष्टौ त्रिष्टुभः । पञ्चमी ' मन्यता नरः ' इत्येषा ऋत्विग्देवताकाग्निदेवताका वा । शिष्टा अग्निदेवताकाः । सूक्तविनियोगो लैङ्गिकः । वरुणप्रघासेषु अग्निप्रणयने ' इळायास्त्वा पदे ' इत्येषा । सूत्रितं च—' इळायास्त्वा पदे वयमग्ने विश्वेभिः स्वनीक देवैरिध्मवर्हिरासत्सीद ' (आश्व. श्रौ. २. १७) इति । तत्रैव अग्निप्रणयने[4] उत्तरवेद्यामग्नौ स्थापिते सति ' सीद होतः ' इत्येषा । ' निहितेऽग्नौ सीद होतः स्व उ लोके चिकित्वान् ' (आश्व. श्रौ. २. १७) इति सूत्रितम्[5] । अरण्यामग्निसमारोपणे ' अयं ते योनिः ' इत्येषा । सूत्रितं च—' अयं ते योनिर्ऋत्विय इत्यरणी गार्हपत्ये प्रतिनिधत्ते पाणौ वा ' (आश्व. श्रौ. ३. १०) इति ॥

अस्तीदमधिमन्थनमस्ति प्रजननं कृतम् ।
एतां विश्पत्नीमा भराग्निं मन्थाम पूर्वथा ॥ १ ॥

अस्ति । इदम् । अधिऽमन्थनम् । अस्ति । प्रऽजननम् । कृतम् ।
एताम् । विश्पत्नीम् । आ । भर । अग्निम् । मन्थाम । पूर्वऽथा ॥ १ ॥

यजमानोऽध्वर्यवादीन्प्रति ब्रूते । ऽइदम् अस्यर्थं यूपशकलम् ऽअस्ति । ऽअधिमन्थनम् । अरण्याः उपरि निधेयं मन्थनसाधनभूतं[6] दण्डरज्वादिकम् ऽअस्ति । ऽप्रजननम् अग्निजननसाधनभूतं[7] दर्भ-पिञ्जूलं ऽकृतं संपादितमस्ति । यद्वा प्रजननं मन्थनदण्डस्य विन्यासविशेषः । यस्मादेतानि यूपशकलादीन्यग्निमन्थनसाधनान्याहृतानि सन्ति तस्मात् ऽविश्पत्नीं विशां प्रजानामग्निसाध्याग्नि-होत्रद्वारा स्वर्गादिफलसंपादनेन पालयित्रीम् ऽएताम् अरणीम् ऽआ ऽभर हे अध्वर्यो आहर ।

---

१. त–' धातोः ' नास्ति । २. त–आहुतिमाहुतं पुरोडाशम् । ३. त–°स्वरत्वम् । जुषस्व । जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपम् । ४. ख-ग-च-ज-ण-फ-भ–अग्निप्रणयनेन । ५. त–सूत्रितं च । ६. ख-ग-च–मथनसाधनभूतम् । ७. ख-फ-भ–अग्निज्वलन० ।

तस्यामाहवनीयां [v]पूर्वथा यथा वयमाधानकालेऽग्निममन्थीम यथा वा पूर्वे महर्षयोऽग्निममन्थिषुः तद्वद्वयमेनम् [v]अग्निम् अस्मिन्कर्मणि [v]मन्थाम। मन्थनेन निष्पन्नं करवाम ॥ अस्तीति[1] पदद्वयस्य पादादित्वादनिघातः। विश्पत्नीम्। पतिशब्दस्य ' विभाषा सपूर्वस्य ' इति ङीप् नकारश्चान्तादेशः। ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्। भर। ' हृञ् हरणे ' इत्यस्य लोटि ' हृग्रहोर्भश्छन्दसि ' इति भकारः। मन्थाम। ' मन्थ विलोडने '। लोटि[2] रूपम्। निघातः। पूर्ववा। पूर्वशब्दात् इवार्थे ' प्रग्नपूर्वविश्वेमात्थाल् छन्दसि ' इति थाल्प्रत्ययः। ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् ॥

अरण्योर्निहितो जातवेदा गर्भइव सुधितो गर्भिणीषु ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ २ ॥

अरण्योः। निऽहितः। जातऽवेदाः। गर्भःऽइव। सुऽधितः। गर्भिणीषु।
दिवेऽदिवे। ईड्यः। जागृवत्ऽभिः। हविष्मत्ऽभिः। मनुष्येभिः। अग्निः ॥ २ ॥

[v]जातवेदाः सर्वविषयज्ञानवानयमग्निः [v]अरण्योर्निहितः। देवैर्यज्ञार्थं नितरां स्थापितोऽस्ति। अत्र[3] दृष्टान्तः। [v]गर्भइव इति। यथा गर्भः [v]गर्भिणीषु स्त्रीषु [v]सुधितः सुष्ठु निहितो वर्तते तद्वत्। स तादृशः [v]अग्निः [v]हविष्मद्भिः संभृतहविष्कैरत एव [v]जागृवद्भिः कर्मणि जागरूकैः [v]मनुष्येभिः मनुष्यैरस्माभिः [v]दिवेदिवे प्रत्यहमुत्पत्त्यर्थम् [v]ईड्यः स्तुतिरूपाभिर्गीर्भिः स्तोतव्यः ॥ अरण्योः। ' ऋ गतौ '। ' अतिसृधृधमि ' इत्यादिना अनिः[4]। प्रत्ययस्वरः। निहितः। दधातेः कर्मणि निष्ठायां ' दधातेर्हिः ' इति हिरादेशः। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्। सुधितः। दधातेः कर्मणि निष्ठा। तस्मिन् ' सुधित वसुधित ' इत्यादिना निपातनात् धिरादेशः[5]। दिवेदिवे। दिवु क्रीडादौ। इगुपधलक्षणः कः। ' नित्यवीप्सयोः ' इति द्विर्वचनम्। तस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः। जागृवद्भिः। ' जागृ निद्राक्षये ' इत्यस्य क्वसौ रूपम्। ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' इति विकल्पितत्वात् द्विर्वचनाभावः। ' वसुस्रंसुध्वंस्वनडुहां दः ' (पा. सू. ८. २. ७२) इति वसोः सकारस्य दत्वम्। प्रत्ययस्वरः ॥

उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ३ ॥

उत्तानायाम्। अव। भर। चिकित्वान्। सद्यः। प्रऽवीता। वृषणम्। जजान।
अरुषऽस्तूपः। रुशत्। अस्य। पाजः। इळायाः। पुत्रः। वयुने। अजनिष्ट ॥ ३ ॥

[v]चिकित्वान् ज्ञानवानध्वर्युस्त्वम् [v]उत्तानायाम् अधरारण्यामुत्तानशयायाम् उत्तरारणिम् [v]अव [v]भर अधोमुखां धारय। अनन्तरं सा अधरारणिः [v]सद्यः [v]प्रवीता तदानीमेव निष्क्रिरेतस्का सती [v]वृषणं कामानां वर्षकमग्निं [v]जजान जनयतु। अथ [v]अस्य अग्नेः [v]रुशत् तमो विनाशयत् [v]पाजः

१. ख-ग-च-ज-ण-फ-भ–अस्तीदमिति। २. त–इत्यस्य लोटि। ३. ल-स–तत्र। ४. त–अनिप्रत्ययः। ५. त–धि इत्यादेशः।

तेजोमात्रं[1] तन्नाभूत्[2]। अनन्तरम् ᵛअरुषस्तूपः आरोचमानतेजःसंघोपेतः ᵛइळायास्पुत्रः उत्तरवेद्याः[3] उत्पन्नः[4] अग्निः ᵛवयुने अरण्यां योनिस्थाने ᵛअजनिष्ट अजनि ॥ जजान। 'जन जनने'। लोडर्थे[5] लिटि 'बहुलमन्यत्रापि संज्ञाछन्दसोः' इति णिलोपः। प्रत्ययान्तत्वाभावादाम् न भवति। निघातः। अरुषस्तूपः। न विद्यते रुषः क्रोधो यस्येत्यरुषः। क्रोधराहित्येन रोचमान इत्यर्थः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। 'ष्टुञ् स्तुतौ'। 'स्तौतेर्दीर्घश्च' (उ. सू. ३. ३०५) इति पप्रत्ययः किच्च धातोर्दीर्घश्च। स्तूयते इति स्तूपस्तेजःसंघः। अरुषः आरोचमानस्तेजःसंघो यस्येति बहुव्रीहौ पूर्वपदस्वरः[6]। रुशत्। 'रुश हिंसायाम्'। शतरि रूपम्। वयुने। 'अज गतिक्षेपणयोः'[7]। 'अजियमिशीङ्भ्यश्च' इत्युनन् चित्संज्ञकः। अजनि वीयते वा वयुनमङ्गम्। प्रत्ययस्य व्यत्ययेनाद्युदात्तत्वम्। अजनिष्ट। 'जनी प्रादुर्भावे'। लुङि सिचि रूपम्। निघातः ॥

इळायास्त्वा पदे वयं नाभा पृथिव्या अधि।
जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥ ४ ॥

इळायाः। त्वा। पदे। वयम्। नाभा। पृथिव्याः। अधि।
जातऽवेदः। नि। धीमहि। अग्ने। हव्याय। वोळ्हवे ॥ ४ ॥

ᵛजातवेदः जातप्रज्ञ हे ᵛअग्ने अध्वर्यवादयः ᵛवयं ᵛपृथिव्याः ᵛअधि भूमेरुपरि उत्तरवेद्यां ᵛनाभा नाभौ तस्या नाभिस्थाने मध्यप्रदेशे। तदेव स्थानं विशेष्यते। ᵛइळायाः ᵛपदे मानस्या इडाया गोः पदे इडापदरूपे उत्तरवेद्यात्मके स्थाने ᵛत्वा त्वां ᵛहव्याय ᵛवोळ्हवे पुरोडाशादिलक्षणं हविर्वोढुं ᵛनि ᵛधीमहि निदधीमहि। उक्तार्थे ब्राह्मणम्—'इळायास्त्वा पदे वयं नाभा पृथिव्या अधीत्येतद्वा इळायास्पदं यदुत्तरवेदीनाभिर्जातवेदो नि धीमहीति निधास्यन्तो ह्येनं भवन्त्यग्ने हव्याय वोळ्हव इति हव्यं हि वक्ष्यन्भवति' (ऐ. ब्रा. १. २८) इति ॥ नाभा। 'णह बन्धने'। 'इष्' इत्यनुवृत्तौ 'नहो भश्च' इति इष् भकारश्चान्तादेशः। ञित्त्वादुपधावृद्धिः। नह्यतीति नाभिर्मध्यस्थानम्। 'सुपां सुलुक्' इति सप्तम्या डादेशः। ञित्स्वरः। धीमहि। दधातेर्लिङि रूपम्। 'लिङः सीयुट्' (पा. सू. ३. ४. १०२) इति सीयुट्। द्विर्वचनाभावश्छान्दसः। निघातः। वोळ्हवे। 'वह प्रापणे'। तुमर्थे[8] तवेन्। 'सहिवहोरोदवर्णस्य' इति धात्वकारस्यौत्वम्। ढत्वधत्वष्टुत्वढलोपाः। निरवादाद्युदात्तः ॥

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम्।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम् ॥ ५ ॥

मन्थत। नरः। कविम्। अद्वयन्तम्। प्रऽचेतसम्। अमृतम्। सुऽप्रतीकम्।
यज्ञस्य। केतुम्। प्रथमम्। पुरस्तात्। अग्निम्। नरः। जनयत। सुऽशेवम् ॥ ५ ॥

---

१. फ–तेजो मन्त्रतन्त्रात्मकमभूत्। २. त–'उत्तरवेद्याः उत्पन्नः' नास्ति। ३. ख-ग-च-ज-ण-ञ-भ–लडर्थे; त–इत्यस्य लोडर्थे। ४. त–पूर्वपदप्रकृतिस्वरः। ५. त–गतिक्षेपणयोः इत्यस्मात्। ६. त-ल–इत्यस्मात्तुमर्थे।

[v]नरः कर्मणां[1] नेतारो हे अध्वर्यवादयः [v]कविं क्रान्तदर्शिनम् [v]अद्रयन्तं द्रयमनाचरन्तमद्रैतं कुर्वाणं मनसा वाचा च एकविधमेव कर्म कुर्वाणमत एव [v]चेतसं प्रकृष्टज्ञानोपेतम् [v]अमृतं मरणधर्मरहितं [v]सुप्रतीकं शोभनरश्मिज्वालाभिः समेतं तमिमम् [v]अग्निं [v]मन्थत मन्थनेन[2] निष्पादयत। किंच। हे [v]नरः कर्मणां[3] नेतारः अध्वर्यवादयः[4] यूयं [v]यज्ञस्य ज्योतिष्टोमादेः [v]केतुं प्रज्ञापकं [v]प्रथमं मुख्याङ्गभूतम्। अग्निपूर्वकत्वात् सर्वेषामुत्तरक्रतूनाम्। [v]सुशेवं शोभनसुखोपेतं तादृशमग्निं [v]पुरस्तात् कर्मणः प्रारंभे [v]जनयत। तमिममग्निमेवंविधगुणयुक्तं कुरुतेति भावः। मन्थत। 'मन्थ विलोडने[5]'। लोटि रूपम्। पादादित्वादनिघातः। नरः। 'णीञ् प्रापणे[6]'। 'नयतेर्डिच्च' (उ. सू. २. २५७) इति ऋप्रत्ययः। डित्त्वाट्टिलोपः। नयन्ति कर्माणि नीयन्ते कर्माण्येभिरिति वा नरः। आमन्त्रितत्वात् निघातः। अद्रयन्तम्। द्रयमिवाचरतीत्यर्थे 'सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः' इत्याचारार्थे क्विप्। द्रयति। तस्य शतरि रूपं द्रयन्निति। न द्रयन्नद्रयन्। तम्। तत्पुरुषे तुल्यार्थ०। सुप्रतीकम्। बहुव्रीहौ 'कत्वादयश्च' इत्युत्तरपदाद्युदात्तत्वम्। जनयत। 'जनी प्रादुर्भावे[7]'। णिच्। 'अत उपधायाः' इति वृद्धौ प्राप्तायां 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाद्वा[8] 'मितां ह्रस्वः' इति ह्रस्वः। निघातः। सुशेवम्। शेवशब्दो वन्प्रत्ययान्त आद्युदात्तः। बहुव्रीहौ 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्॥ ॥ ३२ ॥

यदी मन्थन्ति बाहुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा।
चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन्॥ ६॥

यदि। मन्थन्ति। बाहुऽभिः। वि। रोचते। अश्वः। न। वाजी। अरुषः। वनेषु। आ।
चित्रः। न। यामन्। अश्विनोः। अनिऽवृतः। परि। वृणक्ति। अश्मनः। तृणा। दहन्॥६॥

[v]यदि अध्वर्यवादयः [v]बाहुभिः स्वकीयैर्हस्तैरग्निं [v]मन्थन्ति मथ्नन्ति ततः[9] स जातोऽग्निः [v]वनेषु काष्ठेषु [v]वाजी शीघ्रगमनवान् [v]अरुषः आरोचमानः सर्वेषां प्रीतिकरः सन् [v]आ [v]वि [v]रोचते आ समन्ताद्विशेषेण दीप्यते। तत्र दृष्टान्तः। [v]अश्वो [v]न इति[10]। यथाश्वो वनेषु वननीयेषु वाह्यार्ला-स्थानेषु वेगवानारोचमानो वर्तते तद्वत्। तत्रैव दृष्टान्तान्तरम्। [v]चित्रो [v]न इति[11]। यथा [v]यामन् यामनि[12] वेगगमने[13] [v]अश्विनोः देवभिषजोः[13] चित्रो नानाविधवर्णः[14] रथः आरोचमानो वर्तते तद्वत। [v]अनिवृतः केनाप्यप्रतिबद्धगमनः[15] सोऽयमग्निः [v]अश्मनः उपलान् [v]तृणा तृणानि[16] च[16] [v]दहन् भस्मसात्कुर्वन् [v]परि [v]वृणक्ति दग्धस्थानानि[17] परितो वर्जयति। तादृशोऽग्निरारोचते इति पूर्वेणान्वयः॥ मन्थन्ति। 'मन्थ विलोडने[18]'। लटि रूपम्। यदियोगादनिघातः। रोचते। 'रुच दीप्तौ'। भौवादिकः।

---

१. ख-ग-च-ज-ण-न-फ-भ-स-कर्मणः। २. ख-ग-च-ज-ण-त-भ-मथनेन। ३. ख-ग-च-ज-ण-न-फ-भ-स-कर्मणः। ४. त-हे अध्वर्यवादयः। ५. त-विलोडने इत्यस्य। ६. त-प्रापणे इत्यस्मात्। ७. त-ल-प्रादुर्भावे इत्यस्य। ८. ज-ण-मित्त्वात्; न-भ-ल-स-मिद्भावात्। ९. च-तदा। १०. ख-ग-च-ज-ण-भ-न-'इति' नास्ति। ११. ख-ग-च-ज-ण-भ-'इति' नास्ति। १२. च-यामे विशेषवेगगमने। १३. ख-ग-च-ज-ण-प-फ-भ-'देवभिषजोः' नास्ति। १४. ख-ग-च-ज-ण-भ-नानावर्णः। १५. ख-ग-च-ज-ण-प-फ-स-गमनः इत्यर्थः। १६. ख-ग-च-ज-ण-प-फ-तृणानीव; भ-स-तृणानिव। १७. ख-ग-ज-ण-प-भ-ल-स-तदधस्थानानि, च-फ-तदन्तश्चेस्थानानि। १८. त-विलोडने। अस्य।

लटि रूपम्। निघातः। यामन्। 'या प्रापणे'। 'आतो मनिन्क्वनिब्वनिपश्च' इति मनिन्। 'सुपां सुलुक्' इत्यादिना सप्तम्या लुक्। नित्स्वरः। अनिवृतः। 'वृञ् वरणे'[1]। निष्ठायां 'यस्य विभाषा' इतीट्प्रतिषेधः। निपूर्वो वृणोतिर्निवारणे वर्तते। न निवृतोऽनिवृतः। नञ्स्वरः[2]। वृणक्ति। 'वृजी वर्जने'। रुधादिः। 'चोः कुः' इति कुत्वम्। निघातः। तृणा। 'तृहं[3] हिंसायाम्'। 'तृहः क्रो हलोपश्च' (उ. सू. ५. ६८६) इति क्रः। कित्त्वादगुणः हलोपश्च। तृह्यते तद्वादिभिरिति तृणम्। नित्स्वरः॥

जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः।
यं देवास ईडन्यं विश्वविदं हव्यवाहमदधुरध्वरेषु॥ ७॥

जातः। अग्निः। रोचते। चेकितानः। वाजी। विप्रः। कविऽशस्तः। सुऽदानुः।
यम्। देवासः। ईडन्यम्। विश्वऽविदम्। हव्यऽवाहम्। अदधुः। अध्वरेषु॥ ७॥

[v]जातः मन्थनानन्तरमुत्पन्नः स च [v]चेकितानः सर्वं[4] जानानः सन् [v]वाजी सततगमनस्वभावः [v]विप्रः कर्माभिज्ञः अत एव [v]कविशस्तः कविभिर्मेधाविभिर्ऋत्विग्भिः स्तुतः [v]सुदानुः सुष्ठु कर्मफलस्य दाता एवंविधः [v]अग्निः [v]रोचते दीप्यते। [v]देवासः देवाः इन्द्रादयः [v]ईड्यं होत्रादिभिः[5] स्तुत्यं [v]विश्वविदं सर्वस्य जगतो वेदितारं [v]यम् अग्निम् [v]अध्वरेषु ज्योतिष्टोमादियज्ञेषु [v]हव्यवाहं हव्यानां वोढारम् [v]अदधुः व्यदधुः सोऽग्निर्दीप्यते इति पूर्वेणान्वयः॥ चेकितानः। 'कित ज्ञाने' इत्यस्य यङ्लुकि 'गुणो यङ्लुकोः' इति अभ्यासस्य गुणः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। कविशस्तः। 'थाथघञ्क्ताजबित्रकाणाम्' इत्यन्तोदात्तत्वम्। अदधुः। दधातेर्लङि झेः 'सिजभ्यस्त-विदिभ्यश्च' इति जुस्। यदव्रत्तयोगादनिघातः। अडागमस्वरः॥

सीदं होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥ ८॥

सीद। होतरिति। स्वे। ऊँ इति। लोके। चिकित्वान्। सादय। यज्ञम्। सुऽकृतस्य। योनौ।
देवऽअवीः। देवान्। हविषा। यजासि। अग्ने। बृहत्। यजमाने। वयः। धाः॥ ८॥

यजमानो ब्रूते। [v]होतः होमनिष्पादक हे [v]अग्ने [v]स्वे स्वकीये [v]लोके उत्तरवेद्याः[6] नाभौ [v]सीद [v]उ त्वं होमनिमित्तम् उपविशैव। तथा [v]चिकित्वान् ज्ञानवांस्त्वं [v]सुकृतस्य सुकृतजन्योपभोगस्य [v]योनौ स्थाने उत्तमलोके [v]यज्ञं यज्ञस्य कर्तारं यजमानं [v]सादय स्थापय। किंच [v]देवावीः। देवान् हविष्प्रदानेन अवतीति देवावीः। तादृशस्त्वं [v]हविषा पुरोडाशादिलक्षणेन हव्येन [v]देवान् [v]यजासि

१. त–वरणे इत्यस्य। २. तै–'नञ्स्वरः' नास्ति। ३. ख-ग-तृ; ज-ण-तृहु; त-ल-तृह हिंसि; स–तृण। ४. ख-ग-च-ज-ण-प-फ-भ–'सर्वं' नास्ति। ५. ख-ग-च-ज-ण-प-फ-भ–स्तोत्रादिभिः। ६. ज-ण-न-भ-स–उत्तरवेद्याम्।

यज । अथ त्वं [v]यजमाने यागं कुर्वाणे मयि [v]बृहत् प्रभूतं पशुपुत्रादिममेतं [v]वयः अन्नं [v]धाः विधेहि ॥ सीद । सदेर्लोटि रूपम् । सादय । सदेर्ण्यन्तस्य लोटि रूपम् । णिच्स्वरः । देवावीः । अव रक्षणादिषु । ' अवितॄस्तृतन्त्रिभ्य ईः ' इति ईप्रत्ययः । कृदुत्तरपदस्वरः[1] । यजासि । यजेर्लेटि आडागमः । धाः । दधातेः छान्दसे[2] लुङि रूपम्[3] ॥

कृणोत॑ धू॒मं वृष॑णं सखा॒योऽस्ये॑धन्त इतन॒ वाज॒मच्छ॑ ।
अ॒यम॒ग्निः पृ॑तना॒षाट् सु॒वीरो॒ येन॑ दे॒वासो॒ अस॑हन्त॒ दस्यू॑न् ॥ ९ ॥

कृणोत । धूमम् । वृषणम । सखायः । अस्येधन्तः । इतन । वाजम् । अच्छ ।
अयम् । अग्निः । पृतनाषाट् । सुऽवीरः । येन । देवासः । असहन्त । दस्यून् ॥ ९ ॥

यजमानोऽध्वर्यवादीन्प्रति ब्रूते । हे [v]सखायः कर्मसहकारिणः[4] यूयं [v]वृषणं कामानां वर्षितारं [v]धूमम् । धुनोति[5] कम्पयतीति धूमोऽग्निः। एवंविधम्[6] अग्निं [v]कृणोत कुरुत । मथनेन[7] उत्पादयत । यद्यग्निर्न जायते[8] तदानीमाह । [v]अस्येधन्तः अक्षीणा अनुपरतसामर्थ्याः सन्तो यूयं [v]वाजं मथनलक्षणं युद्धम् [v]अच्छ अभ्याभिमुख्येन [v]इतन प्राप्नुत । [v]सुवीरः शोभनसामर्थ्योपेतः [v]अयमग्निः [v]पृतनाषाट् पृतनोपलक्षितं युद्धं सहमानो भवति । [v]येन युद्धं सहमानेनाग्निना [v]देवासः देवाः [v]दस्यून् उपक्षपयितॄनसुरान् [v]असहन्त अभ्यभवन् । तस्मादक्षीणबला यूयं मथनं[9] कुरुतेति भावः ॥ कृणोत । ' कृवि हिंसाकरणयोः ' । लोटि[10] तप्रत्ययस्य ' तसनसनथनाश्च ' इति तबादेशः । पित्त्वादनुणः । पादादित्वादनिघातः । उप्रत्ययस्वरः । धूमम् । ' धूञ् कम्पने[11] ' । ' इगियुधीन्धिदम्भि ' इत्यादिना मक् । कित्त्वादनुणाभावः । धुनोति कम्पयति दाह्यानीति धूमोऽग्निः । प्रत्ययस्वरः । इतन । ' इण् गतौ ' इत्यस्य लोटि तप्रत्ययस्य तनादेशः । निघातः । पृतनाषाट् । ' षह मर्षणे[12] ' । ' छन्दसि सहः ' इति ण्विः । णित्त्वादुपधावृद्धिः । ' सहेः साडः सः ' इति षत्वम् । कृदुत्तरपदस्वरः । असहन्त । ' षह मर्षणे ' इत्यस्य लङि रूपम् । यथोगादनिघातः । दस्यून् । ' दसु उपक्षये ' । ' यजिमनिशुन्धिदसिजनिभ्यो युच् ' इति युच् । दस्यन्तीति दस्यवः शत्रवः । व्यत्ययेनाद्युदात्तत्वम् ॥

अ॒यं ते॒ योनि॑र्ऋ॒त्वियो॒ यतो॑ जा॒तो अरो॑चथाः ।
तं जा॑नन्न॒ग्न आ सी॑दा॒था नो॑ वर्धया॒ गिरः॑ ॥ १० ॥

अयम् । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ।
तम् । जानन् । अग्ने । आ । सीद । अथ । नः । वर्धय । गिरः ॥ १० ॥

१. न–°पदप्रकृतिस्वरः । २. ख-ग-च-ज-ण-न-भ-स–छान्दसम् । ३. ख-ग-च-ज-ण-भ–रूपम् । उ पूरणः । ४. त–कर्मसहकारिणः अध्वर्यवादयः । ५. ख-ग-च-ज-ण-प-फ-भ-स–' धुनोति...एवंविधं ' नास्ति । ६. न–मन्थनेन । ७. त–जायेत । ८. च-न-भ-स–मन्थनम् । ९. त–इत्यस्य लोटि । १०. त–कम्पने इत्यस्मात् । ११. त–मर्षणे इत्यस्मात् ।

हे [v]अग्ने [v]ऋत्वियः वसन्ताद्यृतौ भवः [v]अयम् अङ्गुल्या निर्दिश्यमानः पलाशाश्वत्थादिमयः[1] काष्ठविशेषोऽरणिः [v]ते तव [v]योनिः उत्पत्तिस्थानं [v]यतः अरणेः [v]जातः त्वम् [v]अरोचथाः अशोभथाः। [v]जानन्[2] त्वं [v]तम् अरणिरूपं[3] काष्ठविशेषम्[3] [v]आ [v]सीद। तस्यामरण्यामारोपितः सन् नैरन्तर्येण तिष्ठ। [v]अथ अनन्तरं [v]नः अस्माकं [v]गिरः स्तुतिलक्षणा वाचः [v]वर्धय। यद्वा[4] गीःशब्देन तद्वन्तो लक्ष्यन्ते। तथा स्तोतॄनस्मान् वर्धय। पशुपुत्रादिभिः समृद्धान् कुरु॥ योनिः। 'यु मिश्रणे'। 'वहिश्रि-' इत्यादिना निप्रत्ययः। 'नित्' इत्युक्तत्वादाद्युदात्तः। ऋत्वियः। 'छन्दसि घस्' (पा. सू. ५. १. १०६) इति ऋतुशब्दात् प्राप्तार्थे[5] घस्प्रत्ययः। घस्य इयादेशः। 'स्तिति-' इति पदसंज्ञायाम् 'ओर्गुणः' (पा. सू. ६. ४. १४६) इति भसंज्ञाधीनो गुणो न भवति। प्रत्ययस्वरः। अरोचथाः। 'रुच दीप्तौ' इत्यस्य लङि रूपम्। यद्वृत्तयोगादनिघातः। सीद[6]। सदेर्लोटि 'पाघ्रा-' इत्यादिना सीदादेशः। निघातः। अथा[7]। 'निपातस्य च' इति संहितायां दीर्घः। वर्धय। 'वृधु वर्धने'। हेतुमति णिच्। निघातः॥ ॥ ३३ ॥

तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि॥ ११॥

तनूऽनपात्। उच्यते। गर्भः। आसुरः। नराशंसः। भवति। यत्। विऽजायते।
मातरिश्वा। यत्। अमिमीत। मातरि। वातस्य। सर्गः। अभवत्। सरीमणि॥ ११॥

योऽग्निर्यदा [v]गर्भः अरणीषु गर्भरूपतया वर्तते तदा सोऽग्निः [v]तनूनपादुच्यते। यद्वृणां तनूः शरीराणि न पातयति न दहतीति व्युत्पत्तेः। यद्वा तनूशब्देनापोऽभिधीयन्ते नपाच्छब्देनैकान्तिताः प्रजाः। तथा च अपां नप्ता। कथमेतत्[8]। आपस्तता अन्तरिक्षे। ताभ्य ओषधिवनस्पतयो जायन्ते। तेभ्यो ह्येष इति। [v]यत् यदा [v]विजायते विशेषेण प्रत्यक्षतया जायते तदा [v]आसुरः कर्मविघ्नकारिणामसुराणां हन्ता अत एव [v]नराशंसः नरैः कर्मणां नेतृभिरध्वर्वादिभिः इंसनीयो [v]भवति। [v]यत् यदा [v]मातरि अन्तरिक्षे स्वं[9] तेजः [v]अमिमीत निर्मिमीते तदा [v]मातरिश्वा भवति। मातरि अन्तरिक्षे श्वसिति चेष्टते इति व्युत्पत्तेः[10]। एवंविधस्याग्नेः [v]सरीमणि सरणे शीघ्रगमने [v]वातस्य वायोः [v]सर्गः सृष्टिः [v]अभवत् भवति[11]। यदाग्निररणीषु गर्भरूपतया वर्तते तदा तनूनपान्नामको भवति। यदा जायते तदा नराशंसनामको भवति। यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवतीति॥ तनूनपात्। 'तनु विस्तारे[12]'। 'कृपिचमितनिधनिसर्जिखर्जिभ्य ऊः' इति ऊप्रत्ययः। व्यत्ययेनाद्युदात्तः। नपात्। 'पा रक्षणे' 'पतॢ[13] गतौ' वा ण्यन्तः[13]। क्विप्। न पाति न पातयतीति वा नपात्। 'नभ्राण्नपान्नवेदा-' इत्यादिना निपातनात्[14] नञः प्रकृतिभावः। नञ्स्वरः। तनूनं पातीति तनूनपात्। कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते 'उभे वनस्पत्यादिषु युगपत्' इति उभयपदप्रकृतिस्वरत्वम्। आसुरः। असुरस्यायमासुरः। अहितकारित्वेन संबन्धी। 'तस्येदम्' इत्यण्। प्रत्ययस्वरः। नराशंसः।

---

१. ख-फ-भ-पालाशा-। २. त-जातस्त्वम्। ३. ख-प-फ-भ-अरणिविशेषकाष्टम्। ४. त-यद्वा गु शब्दे। गृणन्तीति गिरस्तोतारः। ५. त-भवार्थे। ६. त-सीद। षदॢ विशरणादिषु। ७. त-अथ। ८. त-कथमेतावत्। ९. ख-ग-च-ज-ण-भ-'स्वं' नास्ति। १०. ख-फ-व्युत्पत्तौ मातरिश्वा। ११. त-भवति। एतदुक्तं भवति। १२. त-विस्तारे इत्यस्मात्। १३. ख-ग-च-ज-ण-न-भ-स-पद गतौ। पातेः। १४. त-'निपातनात्' नास्ति।

'नृ नये[1]'। 'ऋदोरप्' इत्यप्[2]। प्रत्ययस्य पित्त्वान्नरशब्द आद्युदात्तः। 'शंसु स्तुतौ' इत्यस्मात् घञन्त आद्युदात्तः। नरशब्दस्य 'अन्येषामपि दृश्यते' इति दीर्घः। वनस्पत्यादित्वादुभयोः प्रकृतिस्वरत्वम्। विजायते। 'जनी प्रादुर्भावे'। दिवादित्वात् श्यन्। धातुस्वरः। अमिमीत। 'माङ् माने शब्दे च'। जुहोत्यादिः। 'भृञामित्' इत्यभ्यासस्येत्वम्। यद्योगादनिघातः। सरीमणि। 'सृ गतौ'। 'हृभृसृस्तृसूभ्यः[3]' (उ. सू. ४. ५८७) इति ईमनिन्प्रत्ययः। नित्स्वरः[4]॥

सुनिर्मथा निर्मथितः सुनिधा निहितः कविः।
अग्ने स्वध्वरा कृणु देवान्देवयते यज॥ १२॥

सुनिःऽमथा। निःऽमथितः। सुऽनिधा। निऽहितः। कविः।
अग्ने। सुऽअध्वरा। कृणु। देवान्। देवऽयते। यज॥ १२॥

हे [v]अग्ने [v]कविः मेधावी [v]सुनिर्मथा शोभनेन मन्थनेन [v]निर्मथितः नितरां मथितोऽसि। तथा [v]सुनिधा शोभनेन निधानेन[5] [v]निहितः असि। उत्तरवेद्यादिस्थानेषु नितरां प्रक्षिप्तोऽसि। किंच [v]स्वध्वरा अस्माभिः क्रियमाणानि कर्माणि सुष्ठु हिंसारहितानि[6] [v]कृणु कुरु। तथा [v]देवयते देवान्कामयमानाय यजमानाय [v]देवान् यजनीयानिन्द्रादीन् [v]यज पूजय॥ सुनिर्मथा। 'मथे विलोडने'। अस्मात् संपदादिलक्षणो भावे क्विप्। प्रादिसमासः। कृदुत्तरपदस्वरः। निर्मथितः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुनिधा। निपूर्वस्य[7] दधातेर्भावे 'आतश्चोपसर्गे' इत्यङ्। 'सुपां सुलुक्' इति तृतीयाया लुक्। कृदुत्तरपदस्वरः। कृणु। 'कृवि हिंसाकरणयोः' इत्यस्य लोटि 'धिन्विकृण्व्योः' इत्युप्रत्ययः। 'उतश्च प्रत्ययात्' इति हेर्लुक्। निघातः॥

अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजम्भम्।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते॥ १३॥

अजीजनन्। अमृतम्। मर्त्यासः। अस्रेमाणम्। तरणिम्। वीळुऽजम्भम्।
दश। स्वसारः। अग्रुवः। सम्ऽईचीः। पुमांसम्। जातम्। अभि। सम्। रभन्ते॥१३॥

[v]मर्त्यासः मर्त्याः ऋत्विजः[8] [v]अमृतं मरणधर्मरहितम् अत एव [v]अस्रेमाणं क्षयरहितं [v]वीळुजम्भं हविर्भक्षणार्थं दृढदन्तं [v]तरणिम्। तरन्ति यजमानाः पापमनेनेति[9] तरणिरग्निः। तम् [v]अजीजनन् मन्थनेनोदपीपदन्[10]। अथ [v]जातं तमग्निमभिलक्ष्य [v]स्वसारः सरन्त्यः [v]दश दशसंख्याकाः [v]अग्रुवः कर्मकरणार्थमग्रमङ्गन्तीति[11] अग्रुवोऽङ्गुलयः। तादृशाः[12] अङ्गुलयः [v]समीचीः परस्परं सङ्गताः सत्यः [v]सं

१. त–नये इत्यस्मात्। २. त–इत्यप्प्रत्ययः। ३. ख-ग-च-ज-ण-न-फ-भ–'नित्स्वरः' नास्ति। ४. त–विमानेन। ५. त–हिंसारहितानि प्रभूतानि। ६. फ–निपूर्वपदात्। ७. ख-प-फ-भ–'ऋत्विजः' नास्ति। ८. ख-प-फ-भ–अनेनेति। ९. ख-ग-च-प-फ-भ–मथनेनोदपादयन्; ज-ण–मन्थनेनोदपादयन्; ङ–मथनेनोत्पादयन्। १०. ख-प-फ-भ–'कर्मकरणार्थं... तादृशाः' नास्ति।

[v]रभन्ते शब्दं कुर्वते । जातमग्निं दृष्ट्वाध्वर्यवादयो हर्षाद्धस्तद्वयसंपुटेन[1] शब्दं कुर्वन्ति[1] इत्यर्थः । तत्र दृष्टान्तः । [v]पुमांसम् इति । यथा जातं पुत्रमुपलभ्य तत्रत्याः पित्रादयो हर्षादुद्घोषन्ति[2] तद्वत् ॥ अजीजनन् । ' जनी प्रादुर्भावे ' इत्यस्य ण्यन्तस्य लुङि चङि रूपम् । अस्रेमाणम् । ' स्रिवु गतिशोषणयोः '। भावे[3] ' मनिन् ' इति मनिन्प्रत्ययः । लघूपधगुणः । ' लोपो व्योर्वलि ' इति वलोपः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । तरणिम् । ' तॄ प्लवनतरणयोः[4] ' । ' अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः ' इत्यनिप्रत्ययः । गुणः । प्रत्ययस्वरः । स्वसारः । ' असु क्षेपणे ' इत्यस्मात् ' सुञ्यसेर्ऋन् ' इति ऋन्प्रत्ययः । सुष्ठु अस्यन्ति कर्मसु पदार्थानिति स्वसारः । ' न षट्स्वस्रादिभ्यः ' इति ङीपः प्रतिषेधः । निरुदात्तादयुदात्तः । अग्रुवः । ' अगि गतौ ' । जन्वादयश्च ' (उ.सू. ४.५४२) इति रुप्रत्ययः । निपातनान्नलोपः । जसि तन्वादित्वादुवङादेशः । प्रत्ययस्वरः । समीचीः । ' इण् गतौ ' इत्यस्मात् ' समीणः ' (उ. सू. ४. ५३२) इति चदूप्रत्ययो धातोर्दीर्घश्च । टित्त्वात् ' टिड्ढाणञ् ' इत्यादिना ङीप् । संयन्तीति समीच्यः । यद्वा संपूर्वस्याञ्चतेः क्विप् । ' समः समि ' इति समि इत्यादेशः । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' अचः ' इत्यकारलोपः । ' चौ ' इति दीर्घः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । एकादेशस्वरः । पुमांसम् । ' पा रक्षणे ' इत्यस्मात् ' पातेर्डुम्सुन् ' (उ. सू. ४. ६१७) इति डुम्सुन्प्रत्ययः । ' पुंसोऽसुङ् ' (पा. सू. ७. १. ८९) इत्यसुङादेशः । पानि कुलमिति पुमान् । नित्स्वरः । रभन्ते । ' रभ शब्दे ' इत्यस्य लटि रूपम् । निघातः ॥

प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि ।
न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत ॥ १४ ॥

प्र । सप्तऽहोता । सनकात् । अरोचत । मातुः । उपऽस्थे । यत् । अशोचत् । ऊधनि ।
न । नि । मिषति । सुऽरणः । दिवेऽदिवे । यत् । असुरस्य । जठरात् । अजायत ॥ १४॥

[v]सनकात् सनातनोऽग्निः [v]सप्तहोता । सप्त होतारो होत्रका यस्यासौ सप्तहोता सन् [v]प्र [v]अरोचत गार्हपत्यस्थानेऽदीप्यत । [v]यत् यदा [v]मातुः पृथिव्याः [v]उपस्थे उत्सङ्गे तत्रापि [v]ऊधनि ऊधःस्थाने उत्तरवेद्याम् [v]अशोचत् अशोभत तदा सोऽग्निः [v]सुरणः । सुष्ठु रणयति शब्दयतीति सुरणः । सर्वैः कमनीयतया दृश्यमानः सन् [v]दिवेदिवे प्रतिदिनं [v]न [v]नि [v]मिषति न निद्राति । किंतु सर्वदा यज्ञार्थं जागर्त्येव । [v]यत् यस्मात् [v]असुरस्य अग्नेः प्रेरकस्यारणारूपस्य काष्ठस्य [v]जठरात् उदरात् [v]अजायत कर्मार्थमुदपद्यत तस्मान्न निमिषतीति पूर्वेणान्वयः ॥ अरोचत । ' रुच दीप्तौ ' इत्यस्य लङि रूपम् । निघातः । अशोचत् । ' शुच दीप्तौ ' । ऊधनि । सकारस्य नकारश्छान्दसः । मिषति । ' मिषु सेचने ' इत्यस्य लटि रूपम् । सुरणः । ' रण शब्दे ' । ' तत्करोति ' इति णिच् । तस्मात् अकृच्छ्रार्थे खल् । नित्स्वरः । असुरस्य । ' असु क्षेपणे ' इत्यस्मात् ' असेरुरन् ' इत्युरन्प्रत्ययः । अस्यतीत्यसुरः । नित्स्वरः । जठरात् । ' जनी प्रादुर्भावे ' इत्यस्मात् ' जनेरठ च ' (उ. सू. ५. ७१६) इत्यरप्रत्ययः ठकारश्चान्तादेशः । प्रत्ययस्वरः । अजायत । ' जनी प्रादुर्भावे ' इत्यस्य लङि श्यनि ' श्नाजनोर्जा ' इति धातोर्जादेशः । यद्योगादनिघातः ॥

---

१. ख-फ-भ-हविशब्दं कुर्वन्ति; प-भ-हर्षशब्दं कुर्वन्ति । २. ख-फ-भ-हर्षन्ते घोषन्ति; प-हर्षन्ते । ३. त-इत्यस्मात् भावे । ४. त-प्लवनतरणयोः इत्यस्मात् ।

अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः ॥
द्युम्नवद्ब्रह्म कुशिकास एरिरे एकैको दमे अग्निं समीधिरे ॥ १५ ॥

अमित्रऽआयुधः । मरुताम्ऽइव । प्रऽयाः । प्रथमऽजाः । ब्रह्मणः । विश्वम् । इत् । विदुः ।
द्युम्नऽवत् । ब्रह्म । कुशिकासः । आ । ईरिरे । एकःऽएकः । दमे । अग्निम् । सम् । ईधिरे ॥१५॥

[v]अमित्रायुधः अमित्रैः कर्मविघ्नकारिभिरसुरैः सह योद्धारः । यद्वा अमित्राणि पापानि । तैः सह योद्धारः । तत्र दृष्टान्तः । [v]मरुतामिव [1]प्रयाः इति । यथा मरुतां देवानां प्रयाः प्रकर्षेण शत्रूनभियान्तीति प्रया बलानि शत्रूणां हन्तृणि तद्वत्कर्मविघ्नकारिणां पापानां च हन्तारः [v]ब्रह्मणः सर्वस्य जगतः स्रष्टुः [v]प्रथमजाः प्रथममुत्पन्नाः [v]कुशिकासः कुशिकगोत्रोत्पन्ना ऋषयः [v]विश्वं स्थावरजङ्गमात्मकं सर्वं जगत् [v]विदुः [v]इत् जानन्त्येव । तेऽमी[2] कुशिकाः [v]द्युम्नवत् हविर्युक्तं [v]ब्रह्म स्तोत्रम् [v]एरिरे । अग्नये आ समन्तात्प्रेरयन्ति । ते च [v]दमे स्वे स्वे गृहे [v]एकैकः [2]एकैकः[3] भूत्वा [v]अग्निं [v]समीधिरे आज्याद्याहुतिभिः सम्यग्दीपयन्ति ॥ अमित्रायुधः । 'युध संप्रहारे' । क्विप् । कृदुत्तरपदप्रकृतिस्वरः[3] । संहितायां पूर्वपदस्य दीर्घश्छान्दसः । प्रयाः । 'या प्रापणे' । 'अन्येभ्योऽपि दृश्यन्ते' इति विच् । प्रथमजाः । 'जनी प्रादुर्भावे' । 'जनसन-' इत्यादिना विट् । 'विड्वनोः' इत्यात्वम् । विदुः । विदेर्लटि 'विदो लटो वा' इति झेः उसादेशः । ईरिरे । 'ईर गतौ' इत्यस्य लिटि रूपम् । मन्त्रत्वादाम् न भवति । दमे । 'दमु उपशमने' । करणे घञ् । 'नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधः । जित्स्वरः । ईधिरे । 'जिइन्धी दीप्तौ' इत्ययय लिटि 'इन्धिभवतिभ्यां च' इति किद्वद्भावान्नकारलोपः । निघातः ॥

यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह ।
ध्रुवमया ध्रुवमुतागशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमम् ॥ १६ ॥

यत् । अद्य । त्वा । प्रऽयति । यज्ञे । अस्मिन् । होतरिति । चिकित्वः । अवृणीमहि । इह ।
ध्रुवम् । अयाः । ध्रुवम् । उत । अशमिष्ठाः । प्रऽजानन् । विद्वान् । उप । याहि । सोमम् ॥१६॥

[v]होतः होमनिष्पादक [v]चिकित्वः कर्मविषयज्ञानवन् हे अग्ने [v]अद्य इदानीं [v]प्रयति प्रवर्तमाने[4] [v]अस्मिन् ज्योतिष्टोमादौ [v]यज्ञे [v]त्वा त्वां [v]यत् यस्मात् कारणात् [v]अवृणीमहि स्वद्विषयं वरणमकुर्म तस्मात्तादृशस्त्वम् [v]इह कर्मणि देवान् [v]ध्रुवमयाः ध्रुवं यथा भवति तथास्माभिर्दत्तानि हवींषि प्रापय[5] । [v]उत अपि च [v]अशमिष्ठाः हविःस्वीकरणात्तृप्तैर्देवैः शान्ततरत्वमकारिष्ठाः । अथ[6] [v]प्रजानन् इमं यज्ञं सम्यक् जानन् [v]विद्वान् यत्किञ्चित्सर्वं जानानस्त्वं [v]सोमम् अस्माभिः क्रियमाण-

---

१. त–अमी । २. ख-फ-भ–एकः । ३. त– पदप्रकृतिस्वरः । ४. त–वर्तमाने । ५. ख-ग-ज-ण-भ-स–प्रापयः । ६. ख-ग-च-ज-ण-प-फ-भ–उत अथ ।

मिममभिषुतं सोममभिलक्ष्य उप याहि सर्मापे आगच्छ ॥ प्रयति । ' इण् गतौ ' इत्यस्य शतरि रूपम् । ' शतुरनुमः ' इति विभक्तेरुदात्तत्वम् । अवृणीमहि । ' वृञ् वरणे ' । क्र्यादित्वात् श्ना । लङि उत्तमबहुवचने ' ई हल्यघोः ' इति ईत्वम् । आमन्त्रितस्याविद्यमानवत्त्वेन पादादित्वात् अनिघातः । अयाः । ' या प्रापणे ' इत्यस्य लङि सिपि रूपम् । निघातः । अशमिष्टाः । ' शमु उपशमने ' इत्यस्य ण्यन्तस्य कर्मणि[1] लुङि ' स्यसिच्सीयुट्° ' (पा. सू. ६. ४. ६२) इति विकल्पेन इडागमः । तस्यासिद्धत्वात् ' णेरनिटि ' इति णिलोपः । निघातः । प्रजानन्[2] । ' ज्ञा अवबोधने ' । शतरि रूपम् । याहि । यातेर्लोटि रूपम्[2] ॥ ॥ ३४ ॥ ॥ २ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-
धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिता-
भाष्ये तृतीयाष्टके प्रथमोऽध्यायः समाप्तः ॥

---

१. ख-ग-च-ज-ण-न-भ-स-' कर्मणि ' नास्ति । २. ख-ग-च-ज-ण-न-भ-स-' प्रजानन्...रूपं ' नास्ति ।

॥ श्रीगणेशाय नमः ॥

यस्य[1] निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[1] ॥

तृतीयेऽनुवाके नव सूक्तानि । तत्र ' इच्छन्ति त्वा ' इति द्वाविंशत्यृचं प्रथमं सूक्तम् । तत्रेयमनुक्रमणिका—' इच्छन्ति व्यधिकैन्द्रम् ' इति । मण्डलद्रष्टा विश्वामित्र ऋषिः । इन्द्रो देवता । अनुक्तत्वात् त्रिष्टुप् छन्दः । आभिप्लविके प्रथमेऽहनि दशरात्रे प्रथमेऽहनि च माध्यंदिने सवनेऽच्छावाकशस्त्रे अहीनसूक्तस्थाने[2] द्वितीयमिदं संपातसूक्तम् । ' अभिप्लवपृष्ठ्याहानि ' इति खण्डे सूत्रितम्—' इमामू ष्विच्छन्ति त्वा शासद्वह्निरिति संपातः ' (आश्व. श्रौ. ७. ५.) इति । इन्द्रस्य वृत्रघ्नः संबन्धिनि पशौ ' सहदानुम् ' इति वपायाः[3] याज्या[3] । ' सहदानुं पुरुहूत क्षियन्तं स्तुत इन्द्रो मघवा यद्ध वृत्रा ' (आश्व. श्रौ. ३. ८.) इति सूत्रितम् । ' स्वस्तये वाजिभिश्च ' इत्येषेन्द्रे पशौ हविषो याज्या । सूत्रितं च—' स्वस्तये वाजिभिश्च प्रणेतः शुची वो हव्या मरुतः शुचीनाम् ' (आश्व. श्रौ. ३. ७.) इति । शुनासीरीये वैकल्पिकस्येन्द्रस्य शुनस्य ' शुनं हुवेम ' इत्यनुवाक्या । सूत्रितं च—' शुनं हुवेम मघवानमिन्द्रमभ्यायन्तो गव्यन्तो वाजयन्तः ' (आश्व. श्रौ. २. २०) इति ॥

इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥ १ ॥

इच्छन्ति । त्वा । सोम्यासः । सखायः । सुन्वन्ति । सोमम् । दधति । प्रयांसि ।
तितिक्षन्ते । अभिऽशस्तिम् । जनानाम् । इन्द्र । त्वत् । आ । कः । चन । हि । प्रऽकेतः ॥ १ ॥

विश्वामित्रः स्तौति । हे [V]इन्द्र [V]सोम्यासः सोमार्हा ब्राह्मणाः [V]त्वा त्वां शंसितुम् [V]इच्छन्ति अत एव [V]सखायः ते ब्राह्मणास्त्वदर्थं [V]सोमं [V]सुन्वन्ति अभिषुण्वन्ति । [V]प्रयांसि इतराण्यपि हवींषि [V]दधति त्वदर्थं धारयन्ति । त्वया प्रेरिताः सन्तः [V]जनानां सपत्नानाम् [V]अभिशस्तिं तत्कृतां हिंसां [V]तितिक्षन्ते सहन्ते । एवमनुग्राहकः [V]त्वत् त्वत्तोऽन्यः [V]कश्चन [V]हि को नाम पुरुषः खलु [V]आ [V]प्रकेतः सर्वतो जगति । प्रकेत्यते ज्ञाप्यत इति प्रकेतः । प्रज्ञापितः[4] विद्यते ॥ सोम्यासः । सोममर्हतीत्यर्थे ' सोममर्हति यः ' इति यः । प्रत्ययस्वरः । सुन्वन्ति । ' पुत्र् अभिषवे ' । स्वादित्वात् श्नुः[5] । ' सति शिष्टस्वरो[6] बलीयान् ' इति श्निप्रत्ययस्वरः[7] । दधति । दधातेर्लटि रूपम् । ' समानवाक्ये[8] युष्मदस्मदादेशनिघाताः ' (पा. सू. ८. १. १८. ५.) इति सोमपदस्य इतरवाक्येन[9] अन्वयान्न निघातः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । तितिक्षन्ते । ' तिज निशाने ' इत्यस्य क्षमायां ' गुप्तिज्किद्भ्यः सन् ' इति सन् । अभ्यस्तस्वरः । अभिशस्तिम् । ' शसु हिंसायाम् ' इत्यस्मात् भावे क्तिन् । ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम् । प्रकेतः । ' कित ज्ञाने '। कर्मणि घञ्[10] । ' थाथघञ्क्त° ' इत्यन्तोदात्तत्वम् ॥

१. ख-ग-घ-च-ज-ण-भ—' यस्य...°महेश्वरं ' नास्ति । २. ख—अहीनसूक्तस्यान्ते । ३. त-ख—वपायाज्या । ४. प—आज्ञापितः । ५. त—श्नुप्रत्ययः । ६. ख-ग-घ-च-ज-ण-न-फ-भ-स—शिष्टो । ७. ख-त—प्रत्ययस्वरः । ८. ख-ग-च-ज-ण—समानवाक्येषु । ९. त-ल-स—उत्तरवाक्येन । १०. त-ल—घञन्तः ।

न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ २ ॥

न । ते । दूरे । परमा । चित् । रजांसि । आ । तु । प्र । याहि । हरिऽवः । हरिऽभ्याम् ।
स्थिराय । वृष्णे । सवना । कृता । इमा । युक्ताः । ग्रावाणः । सम्ऽइधाने । अग्नौ ॥ २ ॥

[v]हरिवः[1] हरिद्वर्णौ[2] अश्वौ यस्य सोऽयं हरिवानिन्द्रः । हे हरिवः [v]परमा [v]चित् परमाणि दूरे वर्तमानान्यपि [v]रजांसि स्थानानि [v]ते तव [v]दूरे [v]न भवन्ति । तस्मात् [v]हरिभ्याम्[3] उपेतस्त्वं [v]तु[4] क्षिप्रम्[5] [v]आ [v]प्र [v]याहि । अस्मदीयं यज्ञमभिलक्ष्यागच्छ । [v]स्थिराय फलप्रदाने दृढचित्ताय अत एव [v]वृष्णे कामानां वर्षित्रे तुभ्यम् [v]इमा[6] इमानि [v]सवना सवनानि[7] प्रातरादीनि [v]कृता कृतानि । किंच । [v]अग्नौ आहवनीये [v]समिधाने आहुत्यधिकरणतया सम्यग्दीप्यमाने सति [v]ग्रावाणः उपलाः [v]युक्ताः सोमाभिषवार्थमुद्युक्ताः । अतस्त्वं क्षिप्रमागच्छेति भावः ॥ याहि । ' या प्रापणे ' इत्यस्य लोटि रूपम् । हरिवः । हरी अस्य स्त इति मतुप् । ' छन्दसीरः ' इति तस्य वत्वम् । आमन्त्रितत्वान्निघातः । स्थिराय । ' ष्ठा गतिनिवृत्तौ ' इत्यस्मात् ' अजिरशिशिर[8] ' इत्यादिना किरच्प्रत्ययान्तत्वेन निपातनादाकारलोपः । चित्स्वरः[9] । सवना । ' षुञ् अभिषवे ' इत्यस्मात् अधिकरणे ' ल्युट् च ' इति ल्युट् । सूयते सोमो यत्रेति सवनानि प्रातरादीनि । लित्स्वरः । समिधाने । ' जिइन्धी दीप्तौ ' इत्यस्य कानचि रूपम् । कित्त्वान्नकारलोपः । चित्स्वरः ॥

इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिरृघावान् ।
यदुग्रो धा बाधितो मर्त्येषु कस्त्वा ते वृषभ वीर्याणि ॥ ३ ॥

इन्द्रः । सुऽशिप्रः । मघऽवा । तरुत्रः । महाऽव्रातः । तुविऽकूर्मिः । ऋघावान् ।
यत् । उग्रः । धाः । बाधितः । मर्त्येषु । कः । त्वा । ते । वृषभ । वीर्याणि ॥ ३ ॥

[v]वृषभ कामानां वर्षक हे इन्द्र यस्त्वम् [v]इन्द्रः परमैश्वर्यसंपन्नः [v]सुशिप्रः । शिप्रशब्देन शिरस्त्राणमभिधीयते । शोभनशिरस्त्राणोपेतः । यद्वा शोभनहनुमान् । ' शिप्रे हनू नासिके वा ' (निरु. ६. १७) इति यास्कः । [v]मघवा धनवान् [v]तरुत्रः । तरन्त्यनेन शत्रून्देवा इति तरुत्रः इन्द्रः । [v]महाव्रातः मरुद्भिर्महान् व्रातः समूहो यस्येति[9] स तथोक्तः । [v]तुविकूर्मिः संग्रामे नानाविधकर्मणां कर्ता [v]ऋघावान् शत्रुविषयहिंसावान् अत एव [v]उग्रः शत्रूणां भयंकरः स तादृशस्त्वं [v]बाधितः असुरैः संग्रामे बाधितः सन् [v]मर्त्येषु मारयितृषु[8] असुरेषु [v]यत् यानि वीर्याणि[9] [v]धाः

१. त-स-हे हरिवः । २. ख-घ-न-भ-हरिवर्णौ; ण-स-हरितवर्णौ । ३. ज-ण-त-ल-हरिभ्यामश्वाभ्याम् । ४. ख-ग-च-ज-ण-भ-स-' तु क्षिप्रं ' नास्ति; त-ल-क्षिप्रम् । ५. ख-ग-घ-च-ज-ण-न-भ-स-इमानि सवनानि; ल-इमा इमानि सवनानि । ६. ल-' चित्स्वरः ' नास्ति । ७. त-यस्य । ८. त-तेष्वसुरेषु । ९. ख-ग-च-ज-ण-भ-स-वीर्याणि च ।

व्यधा इदानीं vते तव vस्या तानि vवीर्याणि vक्व क्रासते वद ॥ सुशिप्रः । ' सूपू गतौ ' । औणादिको रन्प्रत्ययः । बाहुलकात् सृ इत्यस्य शि इत्यादेशः । बहुव्रीहौ ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । तरुत्रः । तरतेः ' अशित्रादिभ्य इत्रोत्रौ ' इत्युत्रप्रत्ययः । व्ययययेनाद्युदात्तत्वम् । महावातः । ' आन्महतः ' इत्याकारादेशो महतस्तकारस्य । तुविकृमिः । करोतेरौणादिको मिप्रत्ययः । गुणे कृते करोतेरकारस्योत्वं छान्दसम् । ' हलि च ' इति दीर्घः । ऋघावान् । ऋन् (नृन्) हन्तीत्यृघाः । ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । दृशिग्रहणान्नलोपो हकारस्य घत्वम् । तदस्यास्तीति मतुबर्थे[१] ' छन्दसीवनिपौ ' इति वनिप् । व्ययययेनाद्युदात्तः । क्व । किंशब्दस्य सप्तम्यर्थे ' किमोऽत् ' इत्यत्प्रत्ययः । तस्मिन् ' क्वाति ' इति क्वादेशः । तित्स्वरः[२] ॥

त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ।
तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः ॥ ४ ॥

त्वम् । हि । स्म । च्यवयन् । अच्युतानि । एकः । वृत्रा । चरसि । जिघ्नमानः ।
तव । द्यावापृथिवी इति । पर्वतासः । अनु । व्रताय । निमिताऽइव । तस्थुः ॥ ४ ॥

हे इन्द्र vत्वम् vएकः असहाय एव vअच्युतानि च्युतिरहितानि[३] दृढमूलान्यपि तव प्रतिपक्षभूतानि रक्षांसि v च्यावयन् स्वस्वस्थानात् पातयन् तथा vवृत्रा वृत्राणि पापानि vजिघ्नमानः हिंसन् vचरसि vहि vस्म वर्तसे खलु। किंच एवंविधसामर्थ्योपेतस्य vतव vव्रताय कर्मणे आज्ञायै द्यावापृथिव्यौ vपर्वतासः[४] पर्वताश्च[४] vनिमितेव निखाता निश्चला इव vअनु vतस्थुः अनुकूलास्तिष्ठन्ति ॥ स्म । चादित्वादनुदात्तः । च्यावयन् । ' च्युङ् गतौ ' इत्यस्य ण्यन्तस्य शतरि रूपम् । णिच्स्वरः[५]। चरसि । ' चर गतिभक्षणयोः ' । हियोगादनिघातः । जिघ्नमानः । ' हन हिंसागत्योः ' इत्यस्य ' घञर्थे कविधानम् ' इति कः[६] । तस्य ' छन्दस्युभयथा ' इति सार्वधातुकत्वाच्छप् । तस्य श्लुः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् । हन्तीति[७] जिघ्नः । आचारार्थे क्विप् । अस्मात्ताच्छील्यार्थे चानश् । शप् । व्ययययेनाद्युदात्तत्वम् । द्यावापृथिवी । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरत्वम् । निमितेव । ' डुमिञ् प्रक्षेपणे ' इत्यस्य कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ' सुपां सुलुक्[९] ' इति सुपां डादेशः । ' इवेन[८] विभक्त्यलोपः[९] ' इत्युक्तत्वात् पूर्वपदस्वरः । तस्थुः । ' ष्ठा गतिनिवृत्तौ ' इत्यस्य लिट्युसि आतो लोपे कृते तस्य ' द्विर्वचनेऽचि ' इति स्थानिवद्भावात् द्विर्वचनम् । निघातः ॥

१. त–मत्वर्थे । २. त–तित्स्वरितः । ३. ख-ग-च-ज-ण-फ-भ–च्यवनरहितानि । ४. ख-ग-च-प-फ-भ-स–पर्वतासश्च । ५. ख-फ-भ–चित्स्वरः । ६. त-ऊ–कप्रत्ययः । ७. ख-ग-ज-ण-न-भ-ल-स–जिघ्नतीति । ८. फ–इवेन समासः । ९. ज-ण–लोपस्य ।

उताभये पुरुहूत श्रवोभिरेकों दृळ्हमंवदो वृत्रहा सन् ।
इमे चिंदिन्द्र रोदंसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते ॥ ५ ॥

उत । अभये । पुरुऽहूत । श्रवंःऽभिः । एकंः । दृळ्हम् । अवदः । वृत्रऽहा । सन ।
इमे इति । चित् । इन्द्र । रोदंसी इति । अपारे इति ।
यत् । सम्ऽगृभ्णाः । मघऽवन् । काशिः । इत् । ते ॥ ५ ॥

[v]उत इत्यामन्त्रणे । हे [v]इन्द्र [v]पुरुहूत पुरुभिर्बहुभिर्यज्वभिराहूत । यद्वा देवैरसुरेभ्यो रक्षार्थं बहुवारमाहूत । [v]श्रवोभिः वीर्यैरुपेतः[1] [v]एकः असहायस्त्वं [v]वृत्रहा वृत्रशत्रोर्हन्ता [v]सन् [v]अभये असुरेभ्यः सकाशान्मा बिभीतेति देवान् प्रति यद्वाक्यम् [v]अवदः अवोचस्तद्वाक्यं [v]दृढं सत्यमेव । किंच [v]मघवन् इन्द्र त्वम् [v]अपारे [v]चित् दूरपारेऽपि [v]इमे [v]रोदसी द्यावापृथिव्यौ [v]यत् यस्मात कारणात [v]संगृभ्णाः संगृह्णासि परस्परमधरोत्तरभावेन संयोजिते[2] करोषीति यावत । एषः [v]ते तव महिमा [v]काशिरित् प्रकाशो लोके प्रसिद्धः एव[3] । यद्वा यत् येन ते रोदसी संगृह्णामि ते तव काशिर्मुष्टिः महान् । ' काशिर्मुष्टिः ' (निरु. ६. १) इति यास्कः ॥ अभये । ' त्रिभी भये ' इत्यस्मात भावे ' एरच् ' इत्यच्प्रत्ययः । नञा समासे तस्य स्वरः । अवदः । ' वद व्यक्तायां वाचि ' । लङि रूपम् । निघातः । अपारे । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । संगृभ्णाः । ' ग्रह उपादाने ' । क्र्यादित्वात् श्ना । ' ग्रहिज्यावयि ' इत्यादिना संप्रसारणम् । ' हग्रहोर्भश्छन्दसि ' इति हकारस्य भकारः । ' इतश्च ' इति सिप इकारलोपः । ' बहुलं छन्दसि ' इत्यडभावः । समासस्वरः । काशिः । ' काश दीप्तौ ' । औणादिक इप्रत्ययः । प्रत्ययस्वरः ॥ ॥१॥

प्र सु ते इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्तु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु ॥ ६ ॥

प्र । सु । ते । इन्द्र । प्रऽवता । हरिऽभ्याम् । प्र । ते । वज्रः । प्रऽमृणन् । एतु । शत्रून् ।
जहि । प्रतीचः । अनूचः । पराचः । विश्वम् । सत्यम । कृणुहि । विष्टम् । अस्तु ॥ ६ ॥

हे [v]इन्द्र [v]ते तव [v]हरिभ्याम् अश्वाभ्यां युक्तो रथः शत्रूनभिलक्ष्य[4] [v]प्रवता प्रवणेन मार्गेण [v]सु सुष्ठु [v]प्र [v]एतु शीघ्रं गच्छतु । तथा [v]ते [v]वज्रः अशनिः [v]शत्रून् असुरान् [v]प्रमृणन् हिंसन्[5] [v]प्र एतु । त्वं च [v]प्रतीचः त्वदाभिमुख्येनागच्छतः शत्रून् [v]जहि मारय । तथा [v]अनूचः अनुगच्छतः पार्ष्णिग्राहानसुरान [v]पराचः पलायनपरांश्च जहि । एवं शत्रुषु बाधितेषु सत्सु [v]विश्वं जगत् [v]सत्यं [v]कृणुहि सत्यभूताग्निहोत्रादिकर्मपरं कुरु । एवंविधं सामर्थ्यं त्वयि [v]विष्टं निविष्टम् [v]अस्तु ॥ प्रवता । प्रशब्दात् ' उप-

१. ख-फ-ध्यैरुपेतः । २. ख-ग-च-ज-ण-भ-योजिते । ३. ख-ग-च-ज-ण-ञ-प-फ-भ-स-प्रभावः ।
४. ख-ग-च-फ-भ-अस्मानभिलक्ष्य । ५. ख-ग-च-ज-ण भ-ग-' हिंसन् ' नास्ति ।

सर्गाच्छन्दसि धात्वर्थे ' इति वतिः[1] । प्रत्ययस्वरः । प्रमृणन् । ' मृण हिंसायाम् ' । जहि । ' हन हिंसागत्योः ' इत्यस्य लोटि सिपो हिरादेशः । तस्मिन् ' हन्तेर्जः ' इति जादेशः । ' अतो हेः ' इति लुकि प्राप्ते आभाच्छास्यासिद्धत्वान्निवृत्तिः । हेर्ङित्त्वादन्तोदात्तः । प्रतीचः । ' अञ्चु गतिपूजनयोः ' । ' अञ्चेश्छन्दस्यसर्वनामस्थानम् ' इति विभक्तेरुदात्तत्वम् । पराचः । ' अनिगन्तोऽञ्चतौ वप्रत्यये ' इति गतेः प्रकृतिस्वरत्वम् । कृणुहि । ' कृवि हिंसाकरणयोः ' । अस्तु । ' अस भुवि ' ॥

यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं[1] सः ।
भद्रा ते इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥ ७ ॥

यस्मै । धायुः । अदधाः । मर्त्याय । अभक्तम् । चित् । भजते । गेह्यम् । सः ।
भद्रा । ते । इन्द्र । सुऽमतिः । घृताची । सहस्रऽदाना । पुरुऽहूत । रातिः ॥ ७ ॥

हे [v]इन्द्र [v]धायुः निरन्तरमैश्वर्यं दधानस्त्वं [v]यस्मै[2] [v]मर्त्याय मनुष्याय [v]अदधाः यद्वीर्यं दधासि[3] [v]सः मर्त्यः [v]अभक्तं [v]चित् पूर्वमप्राप्तमपि [v]गेह्यं गृहेषु भवं कनकपश्वादिकं[4] [v]भजते प्राप्नोति । किंच । हे [v]पुरुहूत बहुभिराहूतेन्द्र [v]घृताची । घृतशब्दो हविर्मात्रमुपलक्षयति । तथा[5] च सोमाज्यपुरोडाशादिलक्षणं हविरञ्चति प्राप्नोतीति घृताची । [v]ते तव [v]सुमतिः शोभना बुद्धिः [v]भद्रा कल्याणकरी । तथा तव [v]रातिः दानशक्तिः[6] [v]सहस्रदाना अपरिमितधनदानसमेता । इन्द्रस्य बहुदातृत्वे मन्त्रवर्णः—' भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर ' (ऋ. सं. ४. ३२. २०) इति ॥ धायुः । दधातेरौणादिक उण्प्रत्ययः । अदधाः । दधातेर्लङि रूपम् । यद्वृत्तयोगादनिघातः । मर्त्याय । मर्त एव मर्त्यः । वस्वादिषु पाठात् स्वार्थिको यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । गेह्यम् । गेहशब्दात् ' तत्र भवः ' इत्यर्थे ' भवे छन्दसि ' इति यत् । तित्स्वरितः । सुमतिः । ' मन्त्रे वृष° ' इत्यादिना मतिशब्दोऽन्तोदात्तः । समासे कृदुत्तरपदस्वरः । रातिः । ' रा दाने ' । ' मन्त्रे वृष° ' इत्यादिना क्तिन्नुदात्तः ॥

सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥ ८ ॥

सहऽदानुम् । पुरुऽहूत । क्षियन्तम् । अहस्तम् । इन्द्र । सम् । पिणक् । कुणारुम् ।
अभि । वृत्रम् । वर्धमानम् । पियारुम् । अपादम् । इन्द्र । तवसा । जघन्थ ॥ ८ ॥

हे [v]पुरुहूत [v]इन्द्र त्वं [v]सहदानुम् । दानुः[7] दानवी वृत्रमाता तया सह वर्तमानम् । तथा च मन्त्रवर्णः—' दानुः शये सहवत्सा ' (ऋ. सं. १. ३२. ९) इति । यद्वा सहदानुं दानुभिर्दानवैः

---

१. त-ल—वतिप्रत्ययः । २. ख-ग-च-ज-ण-प-फ-भ-स—परस्मै । ३. त—निदधासि । ४. ख-ग-घ-च-ज-ण-भ-स—कनकमश्वादिकम् । ५. ख-ग-च-ज-ण—' तथा ' नास्ति । ६. ख-ग-च—धनशक्तिः । ७. ख-ग-घ-च-ज-ण-न-भ—' दानुः ' नास्ति ।

सह वर्तत इति सहदानुः। तं [V]क्षियन्तं बाधमानं [V]कुणारुं क्रूणनशीलं कंचिदसुरम् [V]अहरतं हस्तहीनं कृत्वा [V]सं [V]पिणक् सम्यक् चूर्णीकुरु। किंच हे [V]इन्द्र [V]वर्धमानं सर्वत इषुमात्रं वर्धमानम्। 'स इषुमात्रमिषुमात्रं विश्वङ्ङवर्धत' (तै. सं. २. ४. १२. २) इति श्रुतेः। [V]पियारुं हिंस्रं [V]वृत्रं वृत्रासुरम् [V]अपादं पादहीनं कृत्वा [V]तवसा बलेन [V]अभि [V]जघन्थ हतवानसि। यद्वा सहदानुमुदकदानोपेतं क्षियन्तमाकाशे निवसन्तं कुणारुं गर्जन्तं वृत्रम्। वृणोत्याच्छादयति नभ इति वृत्रो मेघः। तमिमं वर्धमानं मेघं हस्तपादशून्यं कृत्वा संपिणक् संपिण्ढि। तथा च यास्कः— 'अहस्तमिन्द्र कृत्वा संपिण्ढि परिक्रूणनं मेघम्' (निरु. ६. १) इति॥ सहदानुम्। 'दो अवखण्डने'। 'दाभाभ्यां नुः' इति नुप्रत्ययः। द्यतीति दानुर्दानवः। यद्वा दानुर्दानम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। क्षियन्तम्। 'क्षि निवासगत्योः'। तुदादित्वाच्छः। प्रत्ययस्वरः। पिणक्। 'पिणृ संचूर्णने'। रुधादित्वात् श्नम्। हेर्लुक्। पकारस्य ककारश्छान्दसः। कुणारुम्। 'कुण शब्दने'। बाहुलकादूपसिद्धिः। आद्युदात्तः। जघन्थ। 'हन हिंसागत्योः' इत्यस्य लिटि थलि रूपम्। 'अभ्यासाच्च' इति धातुहकारस्य घत्वम्। निघातः। 'उपदेशेऽत्वतः' इतीट्प्रतिषेधः॥

नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ।
अस्तभ्नाद्द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः॥ ९॥

नि। सामनाम्। इषिराम्। इन्द्र। भूमिम्। महीम्। अपाराम्। सदने। ससत्थ।
अस्तभ्नात्। द्याम्। वृषभः। अन्तरिक्षम्। अर्षन्तु। आपः। त्वया। इह। प्रऽसूताः॥९॥

हे [V]इन्द्र [V]महीं महतीमत एव [V]अपाराम्[२] [V]इषिरां स्थानाभावेन चलन्तीम् एवंविधां [V]भूमिं [V]सामनां[३] समानाम्[४]। तथा च मन्त्रवर्णः—'गावो ते सामनावितः' (ऋ. सं. १०. ८५. ११) इति। यद्वा सम एव साम। तथा च शतपथे श्रूयते—'यदेव समः [1]लुषिणा समो मशकेन समो नागेन सम एतैस्त्रिभिर्लोकैस्तस्मादेव साम' (श. ब्रा. १४. ४. १) इति। तदस्यास्तीति सामनः[५]। तां साम्यवतीं कृत्वा [V]सदने स्वे[६] स्थाने [V]नि [V]ससत्थ निवेशयामासिथ[७]। तथा [V]वृषभः अभिमतफलानां वर्षक इन्द्रः [V]द्यां द्युलोकम् [V]अस्तभ्नात् यथा न पतति तथा धारयत्। तथा [V]अन्तरिक्षम्। एवं द्यावापृथिव्योरवस्थितौ सत्यां [V]त्वया [V]प्रसूताः मेघभेदनेन प्रेरिताः [V]आपः [V]इह भूमौ [V]अर्षन्तु आगच्छन्तु। तथा च मन्त्रवर्णः—'यः पृथिवीं व्यथमानामदृंहत्' (ऋ. सं. २. १२. २) इति॥ सामनाम्। सम एव साम। 'तदस्यास्ति०' इति मतुवर्थे पामादित्वान्नप्रत्ययः। प्रत्ययस्वरः। इषिराम्। 'इष गतौ'। 'इषिमदि०' (उ. सू. १. ५१) इत्यादिना किरच्प्रत्ययः। किरच्वादगुणः। चित्स्वरः। ससत्थ। 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्यान्तर्भावितण्यर्थस्य लिटि थलि 'उपदेशेऽत्वतः' इतीट्प्रतिषेधः। निघातः। अस्तभ्नात्। 'स्तम्भु स्तम्भने' इति सौत्रो धातुः। 'स्तम्भुस्तुम्भु०' इत्यादिना श्नाप्रत्ययः। 'श्नान्नलोपः[८]' इति धातुनकारलोपः[८]। अडागमस्वरः।

१. त—शब्दे। २. त-ल—अपारां पुरुपाराम्। ३. ज-ण—सामनां साम्यवतीं कृत्वा। ४. ख-ग-च-ज-ण-भ-स—'समानां' नास्ति। ५. त—सामना। ६. ख-ग-घ-च-ज-ण-न-भ-स—'स्वे' नास्ति। ७. ख-ग-च-ज-ण-भ—निवेदयामास; घ-प-स—निवेशयामास। ८. ख-ग-च-ज-ण-स—श्नसोरल्लोप इत्यादिना धातुनकारस्य लोपः।

अर्षन्तु । ' ऋषी गतौ ' । व्यत्ययेन शप्प्रत्ययः । गुणः । पादादित्वादनिघातः । आपः । ' आपॄ व्याप्तौ ' । क्विप् धातोर्दीर्घश्च । जसि ' अप्तृन्तृच् ' इत्यादिना दीर्घः । जसः सुत्वादनुदात्तत्वे धातुस्वरः । प्रसूताः । ' षू प्रेरणे ' इत्यस्य कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।
सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः ॥ १० ॥

अलातृणः । वलः । इन्द्र । व्रजः । गोः । पुरा । हन्तोः । भयमानः । वि । आर ।
सुऽगान् । पथः । अकृणोत् । निःऽअजे । गाः ।
प्र । आवन् । वाणीः । पुरुऽहूतम् । धमन्तीः ॥ १० ॥

हे ᵛइन्द्र ᵛअलातृणः । बहूदकतया अलमत्यर्थमातृद्यते हिंस्यत इत्यलातृणः । ᵛगोः माध्यमिकायाः वाचः ᵛव्रजः गोष्ठभूतः ᵛवलः । वृणोत्याकाशमिति वलो मेघः । ᵛपुरा ᵛहन्तोः तव वज्रप्रहारात् प्राक् ᵛभयमानः बिभ्यत् ᵛव्यार विशिष्टो बभूव । अनन्तरं स इन्द्रः ᵛगाः अपः ᵛनिरजे निर्गमयितुं ᵛसुगान् सुगमान् ᵛपथः मार्गान् ᵛअकृणोत् अकरोत् । अतः ᵛवाणीः वननीयाः ᵛधमन्तीः शब्दायमानास्ता आपः ᵛपुरुहूतं बहुभिराहूतं पार्थिवमुदकं प्रति ᵛप्रावन् अभ्यागच्छन् । एतामृचं यास्क एवं व्याख्यत्— ' अलातृणो वल इन्द्र व्रजो गोः । अलातृणोऽलमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यन्तरिक्षे गोरेतस्या माध्यमिकाया वाचः पुरा हननाद्भयमानो व्यार सुगान्पथो अकृणोन्निरजे गाः । सुगमनान्पथोऽकरोन्निर्गमनाय गवाम् । प्रावन्वाणीः पुरुहूतं धमन्तीः । आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं भवति । धमतिर्गतिकर्मा ' (निरु. ६. २.) ॥ अलातृणः । ' तृहि हिंसायाम् ' । अलंपूर्वात तृहेः ' घञर्थे कविधानम् ' इति कर्मणि कप्रत्ययः । अलमो मकारस्याकारः । समासस्वरः[1] । वलः । ' वल संवरणे ' । वलत्यत आच्छाद्यते नभोऽनेनेति[2] वलो मेघः । ' पुंसि संज्ञायाम् ' इति घः । प्रत्ययस्वरः । व्रजः । ' व्रज गतौ ' । ' गोचरसंचर० ' (पा० सू. ३.३.११९) इत्यादिना घप्रत्ययान्तत्वेन निपातनात् कृत्वाभावः । व्रजत्यन्तरिक्ष इति । प्रत्ययस्वरः । भयमानः । ' त्रिभी भये ' । व्यत्ययेन शप् । आर । ' ऋ गतौ ' इत्यस्य लिटि णलि रूपम् । निघातः । सुगान् । ' गमॢ गतौ ' इत्यस्मादधिकरणे ' सुदुरोरधिकरणे ' इति डप्रत्ययः । डित्वाट्टिलोपः । कृस्वरः[3] । निरजे । ' अज गतिक्षेपणयोः ' इत्यस्मान्संपदादिलक्षणो भावे क्विप् । कृदुत्तरस्वरः । आवन् । अव रक्षणगत्यादिषु इत्यस्य लङि रूपम् । पुरुहूतम् । ह्वयतेर्निष्ठायां यजादित्वात् संप्रसारणम् । ' हलः ' इति दीर्घः । धाथादिस्वरः । धमन्तीः । ' धमा शब्दे ' । शपि ' पाघ्रा ' इत्यादिना धमादेशः । ' वा छन्दसि ' इति जसः सवर्णदीर्घः । शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः ॥ ॥ २ ॥

---

१. त–' समासस्वरः ' नास्ति । २. ख-ग-च-ज-ण-फ-स–तमोऽनेनेति । ३. त–कृत्स्वरः । अकृणोत् । कृवि हिंसाकरणयोः इत्यस्य लटि (लङि) रूपम् ।

एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।
उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥ ११ ॥

एकः । द्वे इति । वसुमती इति वसुऽमती । समीची इति सम्ऽईची ।
इन्द्रः । आ । पप्रौ । पृथिवीम । उत । द्याम् ।
उत । अन्तरिक्षात् । अभि । नः । समीके । इषः । रथीः । सऽयुजः । शूर । वाजान् ॥ ११ ॥

योऽयम् [1]इन्द्रः [1]एकः असहाय एव सन् [1]पृथिवीम् [1]उत अपि च [1]द्यां [2]द्वे एते द्यावापृथिव्यौ [1]समीची परस्परं[3] संगते [1]वसुमती धनयुक्ते सत्यौ [1]आ [2]पप्रौ समन्तात् पूरयामास । [1]उत अपि च हे [1]शूर सामर्थ्योपेत तादृशस्त्वं [1]रथीः रथवान् सः[4] [2]नः अस्माकं [1]समीके समीपे [2]इषः स्थातुमिच्छन् [2]सयुजः संगतान् [1] वाजान् । वजन्ति गच्छन्तीति वाजा अश्वाः । तानश्वान् [1] [2]अन्तरिक्षात् अन्तरिक्षसकाशात् [2]अभि प्रेरय । रथारूढस्त्वम् अस्मत्समीपे[5] शीघ्रमागच्छेति भावः ॥ वसुमती । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः[6] । पप्रौ । ' प्रा पूरणे ' इत्यस्य लिटि णलि ' आत औ णलः ' इत्यौकारः । निघातः । इषः । ' इषु इच्छायाम् ' । अस्मादिगुपधलक्षणः कः । किस्वादगुणः । प्रत्ययस्वरः । रथीः । रथोऽस्यास्तीति[7] मतुबर्थे[8] ' छन्दसीवनिपौ ' इति ईप्रत्ययः । प्रत्ययस्वरः ॥

दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।
सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य ॥ १२ ॥

दिशः । सूर्यः । न । मिनाति । प्रऽदिष्टाः । दिवेऽदिवे । हर्यश्वऽप्रसूताः ।
सम् । यत् । आनट् । अध्वनः । आत् । इत् ।
अश्वैः । विऽमोचनम् । कृणुते । तत् । तु । अस्य ॥ १२ ॥

[1]हर्यश्वप्रसूताः । हरी अश्वौ यस्यासाविति हर्यश्व इन्द्रः । तेन प्रेरिताः [2]दिशः प्रागादयः[9] [1]दिवेदिवे प्रतिदिवसं [2]प्रदिष्टाः सूर्यस्य गमनार्थं दत्ता या दिशो विद्यन्ते ताः [2]सूर्यो [2]न [2]मिनाति न हिनस्ति । किंतु ताभिरेव व्रजति । [1]यत् यदा सूर्यः [2]अध्वनः गन्तव्यान् प्रदेशान् [1]अश्वैः गमनसाधनभूतैः [2]सम् [2]आनट् सम्यगश्नुते । [1]आदित् अनन्तरमेव [2]विमोचनं [1]कृणुते । अश्वानां विमोचनं कुरुते । [1]तत् एतत्सर्वं[10] कर्म[10] [2]अस्य तवैव खलु । [1]तु प्रसिद्धौ ॥ सूर्यः । ' षू प्रेरणे ' इत्यस्मात् ' सुसूधागृधिभ्यः क्रन् ' इति क्रन्प्रत्ययः । सुवति प्रेरयतीति सूर आदित्यः । सूर एव सूर्यः । वस्वादित्वात् स्वार्थिको यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । मिनाति । ' मीञ् हिंसायाम् ' ।

---

१. ख-ग-च-ज-ण-परस्परे । २. त-सन् । ३. न-ल-स-व्रजन्ति । ४. ख-ग-च-ज-ण-भ-तान् । ५. ग-च-स-°समीपे । ६. त-सवर्ण° । ७. रथोऽस्यास्तीति रथीः । ८. त- मत्वर्थे । ९. ख-ग-घ-च-त-न-फ-भ-स-' प्रागादयः ' नास्ति । १०. ख-ग-च-ज-ण-ल-एतत्सर्वकर्म ।

' मीनातेर्निगमे ' इति ह्रस्वः । हर्यश्वप्रसूताः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । आनट् । ' अशू व्याप्तौ ' इत्यस्य ' बहुलं छन्दसि ' इति लङः श्लुः । ' अभ्यतेश्च ' इति नुडागमः । वश्चादिना परत्वम् । यद्योगादनिघातः ॥

दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम् ।
विश्वे जानन्ति महिना यदागादिन्द्रस्य कर्म सुकृता पुरूणि ॥ १३ ॥

दिदृक्षन्ते । उषसः । यामन् । अक्तोः । विवस्वत्याः । महि । चित्रम् । अनीकम् ।
विश्वे । जानन्ति । महिना । यत् । आ । अगात् । इन्द्रस्य । कर्म । सुऽकृता । पुरूणि ॥१३॥

[v]विश्वे सर्वे जनाः [v]विवस्वत्याः विवासनवत्या निर्गमनपरायाः [v]अक्तोः रात्रेः संबन्धिनः [v]उषसो [v]यामन् यामनि निर्गमने सति [v]महि महत् [v]चित्रं चायनीयम् [v]अनीकं सौरं तेजः [v]दिदृक्षन्ते द्रष्टुमिच्छन्ति । [v]यत् यदा [v]आगात् उषःकालः[1] समन्तादागतः[1] व्यपैति तदा तेजो दिदृक्षमाणाः सर्वे जनाः [v]महिना महनीयान्यग्निहोत्रादीनि कर्माणि [v]जानन्ति कर्तव्यतयावबुध्यन्ते[2] । हे इन्द्र [v]पुरूणि बहूनि [v]सुकृता सुष्ठु कृतानि [v]कर्म कर्माणि[3] [v]इन्द्रस्य तवैव ॥ दिदृक्षन्ते । ' दृशिर् प्रेक्षणे ' इत्यस्य सनि ' ज्ञाश्रुस्मृदृशां सनः ' (पा. सू. १. ३. ५७) इत्यात्मनेपदम् । अभ्यस्तस्वरः । विवस्वत्याः । विवासतेः[4] संपदादिलक्षणः क्विप् । व्यत्ययेनोपधाह्रस्वत्वम् । तस्मात् ' तदस्यास्ति ' इति मतुप् । ' मादुपधायाः ' इति तस्य वत्वम् । मतुपः पित्त्वादनुदात्तत्वे धातुस्वरः । जानन्ति । ' ज्ञा अवबोधने ' । ' ज्ञाजनोर्जा ' इति जादेशः । निघातः । अगात् । ' इण् गतौ ' इत्यस्य लुङि रूपम् । यद्योगादनिघातः । सुकृता । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाद्म संभृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥ १४ ॥

महि । ज्योतिः । निऽहितम् । वक्षणासु । आमा । पक्वम् । चरति । बिभ्रती । गौः ।
विश्वम् । स्वाद्म । सम्ऽभृतम् । उस्रियायाम् । यत् । सीम् । इन्द्रः । अदधात् । भोजनाय ॥१४॥

[v]वक्षणासु । वक्ष्यन्ते यासूदकानीति वक्षणा नद्यः । तासु [v]महि महत् [v]ज्योतिः ज्योतिष्मदुदकं [v]निहितम् इन्द्रेण [v]आमा नवसूतिका [v]गौः [v]पक्वं क्षीरादिकं [v]बिभ्रती दधाना सती [v]चरति सर्वत्र वर्तते । [v]यत् यस्मादुदकात् [v]स्वाद्म स्वादुतरं [v]संभृतं स्वेन संपादितं दधिघृतक्षीरादिकं [v]सीम् एतत् [v]विश्वं सर्वम् [v]उस्रियायां गवि [v]भोजनाय [v]इन्द्रः [v]अदधात् । तस्मात् क्षीरादिकं बिभ्रती गौश्चरतीति पूर्वेणान्वयः ॥ वक्षणासु । ' वक्ष रोषे ' । अस्मात् ' करणाधिकरणयोश्च ' इति

१. ख-ग-च-ज-ण-प-फ-भ-ल-स–उषःकाले समन्तादागात् । २. ख-ग-च-न-भ-स–कर्तव्यतया च बुध्यन्ते । ३. ल–एतानि कर्माणि । ४. च-फ–विवासयतेः ।

करणे ल्युट् । लित्स्वरः । पक्वम् । पचतेर्निष्ठातकारस्य ' पचो वः ' इति वत्वम् । प्रत्ययस्वरः । चरति । चरतिर्गत्यर्थः । बिभ्रती । ' डुभृञ् धारणपोषणयोः ' । जुहोत्यादिः । शतुरुगित्त्वात् ' उगितश्च ' इति ङीप् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । उस्रियायाम् । ' वस निवासे ' । ' स्फायितञ्चि ' इत्यादिनाधिकरणे रक्प्रत्ययः । यजादित्वात् संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वाभावश्छान्दसः । स्वार्थिको घप्रत्ययः । प्रत्ययस्वरः ॥

इन्द्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः ॥ १५ ॥

इन्द्र । दृह्य । यामऽकोशाः । अभूवन् । यज्ञाय । शिक्ष । गृणते । सखिऽभ्यः ।
दुःऽमायवः । दुःऽएवाः । मर्त्यासः । निषङ्गिणः । रिपवः । हन्त्वासः ॥ १५ ॥

हे [v]इन्द्र [v]दृह्य दृढो भव । यतः [v]यामकोशाः । यान्त्यस्मिन्निति यामो मार्गः । तस्य कोशाः कोशवदाच्छादकाः[1] मार्गप्रतिबन्धका राक्षसाः [v]अभूवन् । त्वं [v]यज्ञाय यज्ञकर्त्रे [v]गृणते स्तोत्रं कुर्वते यजमानाय [v]सखिभ्यः पुत्रादिभ्यश्च[2] [v]शिक्ष अपेक्षितं फलं दत्स्व । [v]दुर्मायवः । दुष्टमायुधानि मिन्वन्ति प्रक्षिपन्तीति दुर्मायवः । [v]दुरेवाः दुष्टं गच्छन्तः [v]मर्त्यासः मारयितारः [v]निषङ्गिणः । निषङ्गशब्देन इषुधिरभिधीयते । तद्वन्तः । एवंविधसामर्थ्योपेताः [v]रिपवः शत्रवो राक्षसाः [v]हन्त्वासः त्वया हननीयाः ॥ दृह्य । ' दृह दृहि वृह वृहि वृद्धौ ' । व्यत्ययेन श्यन् । लोटि रूपम् । निस्वरः । अभूवन् । ' भू सत्तायाम् ' । अस्य लुङि रूपम् । ' गातिस्था[3] ' इति सिचो लुक् । ' भृसुवोस्तिङि ' इति गुणे प्रतिषिद्धे ' भुवो वुग्लुङ्लिटोः ' इति वुगागमः । निघातः । शिक्ष । ' शिक्ष विद्योपादाने ' । अयं[4] धातुरत्र दाने[5] वर्तते । व्यत्ययेन परस्मैपदम् । निघातः । दुर्मायवः । मिनोतेः ' कृवापाजिमि[6] ' इत्यादिना उण्प्रत्ययः । कृदुत्तरपदस्वरः । दुरेवाः । ' इण् गतौ ' । ' इण्शीङ्भ्यां वन् ' इति कर्तरि वन्प्रत्ययः । रिपवः । ' रपेरिच्चोपधायाः ' इत्युप्रत्ययः । उपधाया इत्वम् । प्रत्ययस्वरः । हन्त्वासः । ' हन हिंसागत्योः ' । ' कृत्यार्थे तवैकेन्केन्यत्वनः ' इति त्वन् । निखादाद्युदात्तः ॥ ॥ ३ ॥

सं घोषः शृण्वेऽवमैरमित्रैर्जहि न्येष्वशनिं तपिष्ठाम् ।
वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्बन्धयस्व ॥ १६ ॥

सम् । घोषः । शृण्वे । अवमैः । अमित्रैः । जहि । नि । एषु । अशनिम् । तपिष्ठाम् ।
वृश्च । ईम् । अधस्तात् । वि । रुज । सहस्व । जहि । रक्षः । मघऽवन् । बन्धयस्व ॥ १६ ॥

हे इन्द्र [v]अवमैः समीपे वर्तमानैः [v]अमित्रैः शत्रुभिरसुरैरुत्सृष्टो योऽशनिः [v]घोषः घुष्यमाणः [v]सं [v]शृण्वे सम्यगस्माभिः श्रूयते [v]तपिष्ठाम् अतिशयेन तापिकां ताम् [v]अशनिम् [v]एषु शत्रुष्वेव[5]

१. ख-ग-च-ज-ण-प-फ-भ-आच्छादकाः । २. ख-ग-च-ज-ण-न-स-पुत्रादिभ्यस्त्वम् । ३. ल-इत्ययम् । ४. ख-ग-च-ज-ण-फ-भ-आदाने । ५. ख-ग-घ-च-ज-ण-त-न-फ-भ-स-शत्रुषु अव ।

निधाय [1]जहि मारय । नः प्रयुक्तामशनिं[2] तानेव प्रापयेति भावः । [3]ईम् एनान् शत्रून् [4]अधस्तात् मूलतः [5]वृश्च[6] छिन्धि । किंच [7]वि [8]रुज तान् विशेषेण बाधस्व [9]सहस्व[10] अभिभव च । हे [11]मघवन् इन्द्र [12]रक्षः कर्मविघ्नकारीणि रक्षांसि [13]जहि मारय । अनन्तरमिमं यज्ञं [14]रन्धयस्व पारं नय[15] ॥ शृण्वे । निघातः । जहि । ' हन हिंसागत्योः ' । अस्य लोटि रूपम् । अशनिम् । ' अशू व्याप्तौ ' । ' अश्यवितृभ्यो ऽनिः ' इत्यनिप्रत्ययः । प्रत्ययस्वरः । नपिष्ठाम । तमृशब्दादिष्ठन्प्रत्ययः । निस्वरः । वृश्च । ' ओव्रश्चू छेदने ' । तुदादिः । प्रहिज्यादिना संप्रसारणम् । सहस्व । वाक्यभेदादनिघातः । रन्धयस्व । ' रध हिंसासंराद्धौ ' इत्यस्य ण्यन्तस्य लोटि ' रधिजभोरचि ' इति नुमागमः । वाक्यभेदादनिघातः ॥

उद्बृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ १७ ॥

उत् । बृह । रक्षः । सहऽमूलम् । इन्द्र । वृश्च । मध्यम् । प्रति । अग्रम् । शृणीहि ।
आ । कीवतः । सललूकम् । चकर्थ । ब्रह्मऽद्विषे । तपुषिम् । हेतिम् । अस्य ॥ १७ ॥

हे [16]इन्द्र [17]रक्षः कर्मविघ्नकारि रक्षःकुलं [18]सहमूलं मूलसहितं यथा भवति तथा [19]उद्बृह उद्धर । किंच [20]मध्यं तस्य मध्यभागं[21] [22]वृश्च छिन्धि । [23]प्रत्यग्रम् अग्रं[24] प्रत्यागतं तत [25]शृणीहि जहि । तस्य रक्षःकुलस्य मध्ये [26]सललूकं सरणशीलं रक्षः [27]आ [28]कीवतः । ' आङ् मर्यादायाम् ' । कियतः अनिर्ज्ञायमानपरिमाणात्[29] अतिदूरादेशात् [30]चकर्थ कुरु । कृत्वा च [31]ब्रह्मद्विषे ब्राह्मण द्वेषकारिणे तस्मै रक्षसे [32]तपुषिं तापकं [33]हेतिं घातकमायुधं [34]अस्य क्षिप । उक्तमर्थं यास्कोऽब्रवीत्—'उद्धर रक्षः सहमूलमिन्द्र । मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा । वृश्च मध्यं प्रति शृणीह्यग्रम् । अग्रमागतं भवति । आ कियतो देशात्सललूकं सल्लेर्ऊर्ध्वं भवति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्तेरभ्यस्तात् । तपुषिस्तपतेर्हेतिर्हन्तेः ' (निरु. ६. ३) इति ॥ बृह । ' बृहू[35] उद्यमने ' इत्यस्य लोटि रूपम् । शृणीहि । ' शृ हिंसायाम् ' । अस्य लोटि हौ ' ई हल्यघोः ' इतीत्वम् । निघातः । कीवतः । किंशब्दात् किं परिमाणमस्येत्यर्थे ' किमिदंभ्यां वो घः ' इति किंशब्दात् वतुबर्थीति ज्ञापितत्वात् वतुप् । घादेशाभावश्छान्दसः । ' इदंकिमोरीश्की ' इति की इत्यादेशः । सललूकम् । ' सृ गतौ ' । छान्दसी रूपसिद्धिः । चकर्थ । ' डुकृञ् करणे ' इत्यस्य लिटि थलि रूपम् । क्रादित्वादिडभावः । निघातः । तपुषिम् । ' तप संतापे ' इत्यस्मात् ' अर्तिपृवपियजितनिधनितपिभ्यो नित् ' इत्युसिप्रत्ययो नित्त्वं । अकारस्य इकारश्छान्दसः । निस्वरः । हेतिम् । ' हन हिंसागत्योः ' । ' ऊतियूतिजूतिसाति ' इत्यादिना निपातनादन्तोदात्तः । अस्य । ' असु क्षेपणे ' । लोटि रूपम् ॥

१. त-न-ल-स–प्रयुक्तमशनिम् । २. घ-ज-ण–नियुध्य । ३. त-स–' सहस्व ' नास्ति । ४. ख-ग-च-ज-ण-फ–नयस्व । ५. ज-न–व्रश्चू । ६. ख-ग-च-ज-ण-त–मध्यं भागम्; न–मध्यं मध्यम्; स–मध्यम् । ७. त–आग्रमग्रम् ८. ख-ग-च-ज-फ-भ–अभिज्ञायमानं । ९. ख-ग-ज-ण-न-भ-स–बृह ।

स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिषः आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥ १८ ॥

स्वस्तये । वाजिऽभिः । च । प्रनेतरिति प्रऽनेतः । सम् । यत् । महीः । इषः । आऽसत्सि । पूर्वीः ।
रायः । वन्तारः । बृहतः । स्याम । अस्मे इति । अस्तु । भगः । इन्द्र । प्रजाऽवान् ॥१८॥

[v]प्रणेतः प्रकर्षेण जगतो निर्वाहक हे [v]इन्द्र अस्मान् [v]वाजिभिः अश्वैः सहितान् कुरु [v]स्वस्तये [v]च अविनाशाय कुरु । [v]यत् यदा त्वं [v]सम् [v]आसत्सि अस्माकं समीपे यज्ञनिर्वाहार्थमासीदसि तदा वयं [v]महीः महान्ति [v]इषः अन्नानि [v]पूर्वीः प्रभूतानि [v]रायः धनानि [v]वन्तारः तेषां संभक्तारः सन्तः [v]बृहतः महान्तः [v]स्याम भवेम । किंच [v]प्रजावान् अपत्योपेतं [v]भगः धनम् [v]अस्मे अस्मासु [v]अस्तु भवतु ॥ आसत्सि । षदॢ विशरणादिषु । 'बहुलं छन्दसि' इति शपो लुक् । यद्योगादनिघातः । इषो राय इति च द्वे षष्ठ्यर्थे द्वितीये । वन्तारः । 'वन षण संभक्तौ' इत्यस्य तृचि आगमानुशासनस्य अनित्यत्वादिडभावः । चित्स्वरः । स्याम । 'अस भुवि' इत्यस्य लिङि रूपम् । अस्मे । अस्मच्छब्दस्य सप्तम्याः 'सुपां सुलुक्०' इति शे इत्यादेशः ॥

आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्रेरके ।
ऊर्वइव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् ॥ १९ ॥

आ । नः । भर । भगम् । इन्द्र । द्युऽमन्तम् । नि । ते । देष्णस्य । धीमहि । प्रऽरेके ।
ऊर्वःऽइव । पप्रथे । कामः । अस्मे इति । तम् । आ । पृण । वसुऽपते । वसूनाम् ॥ १९ ॥

हे [v]इन्द्र [v]नः अस्मदर्थं [v]द्युमन्तं दीप्तियुक्तं [v]भगं धनम् [v]आ [v]भर आ समन्तात् संभर । [v]देष्णस्य दानशीलस्य [v]ते तव संबन्धिनो धनस्य [v]प्ररेके प्ररेचने[1] दाने [v]नि [v]धीमहि धनदानस्य वयं पात्रभूताः स्म इत्यर्थः । कुत इत्यत आह । [v]अस्मे अस्माकं [v]कामः अभिलाषः [v]ऊर्वइव अनवासकामो वडवानल इव [v]पप्रथे प्रभूतो वर्तते । [v]वसूनां [v]वसुपते धनानां मध्ये उत्तमधनानामधिपते हे इन्द्र [v]तं महान्तं कामम् [v]आ [v]पृण बहुधनप्रदानेनापूरय ॥ भर । 'भृञ् भरणे' इत्यस्य लोटि रूपम् । देष्णस्य । 'डुदाञ् दाने' । 'गादाभ्यामिष्णुच्' इतीष्णुच्प्रत्ययः । अत्यर्थं ददातीति देष्णः । चित्स्वरः । धीमहि । दधातेर्लिङि 'बहुलं छन्दसि' इति शपो लुक् । 'छन्दस्युभयथा' इति सार्वधातुकत्वात् सीयुटः[2] सलोपः[2] । आर्धधातुकत्वात् आतो लोपः । निघातः । ऊर्वइव । पूर्वपदस्वरः । पप्रथे । 'प्रथ प्रख्याने' इत्यस्य लिटि रूपम् । पृण । 'पृण प्रीणने' इत्यस्य लोटि सेर्हिः । तुदादिः । 'अतो हेः' इति हेर्लुक् । वसूनाम् । निस्वादाद्युदात्तः ॥

१. न-ल-स-'यत्' नास्ति । २. ख-ग-च-फ-भ-रेचने । ३. ख-ग-घ-ज-ण-न-भ-ल-स-सीयुट् ।

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ २० ॥

इमम् । कामम् । मन्दय । गोभिः । अश्वैः । चन्द्रऽवता । राधसा । पप्रथः । च ।
स्वःऽयवः । मतिऽभिः । तुभ्यम् । विप्राः । इन्द्राय । वाहः । कुशिकासः । अक्रन् ॥ २० ॥

हे इन्द्र [v]इमं धनादिविषयं [v]कामम् अस्मदीयमभिलाषं [v]गोभिः अग्निहोत्रादिकर्मसाधनभूतैर्गवादिभिर्वाहनसाधनभूतैः [v]अश्वैः च[1] [v]चन्द्रवता दीप्तियुक्तेन [v]राधसा धनेन [v]च [v]मन्दय । एतानि दत्त्वा इममभिलाषं पूरय । किंच । एतैरस्मान् [v]पप्रथः प्रथितांश्च कुरु । पश्चात् [v]स्वर्यवः स्वर्गादिसुखमात्मन इच्छन्तः [v]विप्राः कर्मकुशलाः [v]कुशिकासः कुशिकाः [v]मतिभिः मननीयैर्मन्त्रैः [v]वाहः स्तोत्रम् [v]इन्द्राय [v]तुभ्यम् [v]अक्रन् अकार्षुः ॥ मन्दय । मदि स्तुत्यादिष्वित्यस्य लोटि रूपम् । गोभिः । ' सावेकाचः ' इति विभक्तेरुदात्तत्वं प्राप्ते ' न गोश्वन्साववर्ण ' इत्यादिना प्रतिषेधः । प्रकृतिस्वरः । पप्रथः । ' प्रथ प्रख्याने ' । क्विप् । ' छन्दस्युभयथा ' इति तस्य सार्वधातुकत्वात् शप् । तस्य ' बहुलं छन्दसि ' इति श्लुः । धातुस्वरः । अक्रन् । करोतेर्लुङि ' मन्त्रे घसह्वर ' इत्यादिना लुक् । निघातः ॥

आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥ २१ ॥

आ । नः । गोत्रा । दर्दृहि । गोऽपते । गाः । सम् । अस्मभ्यम् । सनयः । यन्तु । वाजाः ।
दिवक्षाः । असि । वृषभ । सत्यऽशुष्मः । अस्मभ्यम् । सु । मघऽवन् । बोधि । गोऽदाः ॥ २१ ॥

[v]गोपते[2] स्वर्गाधिपते हे इन्द्र [v]नः अस्मदर्थं [v]गोत्रा गोत्राण्यभ्राणि [v]गाः अपः प्रति [v]आ [v]दर्दृहि आदियस्व । अभ्राणि विदार्य[3] जलानि प्रापयेत्यर्थः । ततः [v]सनयः संभजनीयानि [v]वाजाः अन्नानि [v]अस्मभ्यम् अस्मदर्थं [v]सं [v]यन्तु समागच्छन्तु । [v]वृषभ कामानां वर्षितर्हे[4] इन्द्र त्वं [v]दिवक्षाः [v]असि दिवं व्याप्य वर्तमानत्वेन महानसि[5] । अत एव [v]सत्यशुष्मः सत्यसामर्थ्यः [v]मघवन् धनवन् हे इन्द्र [v]अस्मभ्यं [v]गोदाः गवां प्रदाता भवामीति [v]सु [v]बोधि सुष्ठु बुध्यस्व ॥ दर्दृहि । ' दृङ् आदरे ' । यङ्लुकि लोटि रूपम् । ' ऋतश्च ' (पा. सू. ७. ४. ९२) इत्यभ्यासस्य रुगागमः । निघातः । गाः । ' औतोऽम्शसोः ' (पा. सू. ६. १. ९३) इत्योकारस्याकारः । एकादेशस्वरः । अस्मभ्यम् । ' भ्यसो भ्यम् ' इति चतुर्थीबहुवचनस्य भ्यमादेशः । यन्तु । ' इण् गतौ ' । लोटि रूपम् । दिवक्षाः । ' अक्षू व्याप्तौ ' । असुन् । दिवं व्याप्नोतीति दिवक्षाः । कृदुत्तरपदस्वरः । गोदाः । ' डुदाञ् दाने ' । अस्मात्[6] विच् । कृदुत्तरपदस्वरः[7] ॥

१. ख-ग-च-त-' च ' नास्ति । २. त-गोपते गवां पते । ३. ख-ग-च-ज-ण-प-फ-भ-ल-स-विदार्य । ४. फ-वर्षक हे । ५. ज-ण-भ-भवसि । ६. ल-इत्यस्मात् । ७. त-कृदुत्तरपदप्रकृतिस्वरः ।

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ २२ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥२२॥

हे इन्द्र [v]वाजसातौ । वाजस्यान्नस्य सातिः लाभः[1] यस्मिन् सोऽयं वाजसातिः तस्मिन् । [v]भरे । बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः । तस्मिन्[2] संग्रामे [1]शुनं शूनम्[3] उत्साहेन प्रवृद्धम् । यद्वा[4] शुनमिति सुखनाम । सुखकरं [v]मघवानं धनवन्तम् अत एव [v]इन्द्रं निरतिशयैश्वर्यरूपं [1]नृतमं सर्वस्य जगतोऽतिशयेन नेतारं त्वां [v]हुवेम कुशिका वयं यज्ञार्थमाह्वयेम । तथा [v]शृण्वन्तम् अस्माभिः क्रियमाणां स्तुतिं शृण्वन्तम् [v]उग्रं शत्रूणां भयंकरं [v]समत्सु संग्रामेषु [v]वृत्राणि वृत्रोपलक्षितानि सर्वाणि रक्षांसि [v]घ्नन्तं हिंसन्तं [v]धनानां शत्रुसंबन्धिनां [v]संजितं सम्यग्जेतारं त्वाम् [1]ऊतये रक्षणाय वयमाह्वयेम ॥ शुनम् । 'टुओश्वि गतिवृद्ध्योः' इत्यस्य निष्ठायां 'यस्य विभाषा' इतीट्प्रतिषेधः । यजादित्वात संप्रसारणम् । दीर्घाभावश्छान्दसः । प्रत्ययस्वरः । हुवेम । ह्वयतेः 'बहुलं छन्दसि' इति संप्रसारणे कृते शपो लुकि कृते च लिङि रूपम् । निघातः । भरे । 'भृञ् भरणे' । करणे घः । वृषादित्वात् आद्युदात्तः । वाजसातौ । 'षणु दाने' । भावे क्तिन् । 'जनसन' इत्यादिना अनुनासिकस्यात्वम् । बहुव्रीहौ पूर्वपदस्वरः । समत्सु । 'अद भक्षणे' । संपूर्वात् क्विप् । संभक्षयन्ति योद्धृणामायूंषीति समदः संग्रामाः । कृदुत्तरपदस्वरः । घ्नन्तम् । 'हन हिंसागत्योः' इत्यस्य शतरि 'गमहन०' इत्यादिना उपधालोपः । 'हो हन्तेः०' इति कुत्वम्[5] । संजितम् । 'जि जये' । क्विप् तुक्[6] ॥ ॥ ४ ॥

'शासद्वह्निः' इति द्वाविंशत्यृचं द्वितीयं सूक्तम् । अत्रानुक्रमणिका—'शासत् कुशिको विश्वामित्र एव वा श्रुतेः' इति । इषीरथस्य पुत्रः कुशिको विश्वामित्र एव वा ऋषिः । इन्द्रो देवता । त्रिष्टुप्छन्दः । चातुर्विंशिकेऽहनि माध्यंदिने[7] सवने[8] अच्छावाकशस्त्र आरम्भणीयाया ऊर्ध्वमहीनसूक्तसंज्ञकमेतत्सूक्तं शंसनीयम् । सूत्रितं च —'अस्मा इदु प्रतवसे शासद्वह्निरितीतरावर्हानसूक्ते' (आश्व. श्रौ. ७. ४) इति । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रेऽहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि । तत्रेदं तृतीयं संपातसूक्तम् । 'इमामू षु वच्छन्ति त्वा शासद्वह्निरिति संपाताः' (आश्व. श्रौ. ७.५) इति ॥

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥ १ ॥

शासत् । वह्निः । दुहितुः । नप्त्यम् । गात् । विद्वान् । ऋतस्य । दीधितिम् । सपर्यन् ।
पिता । यत्र । दुहितुः । सेकम् । ऋञ्जन् । सम् । शग्म्येन । मनसा । दधन्वे ॥ १ ॥

---

१. च-फ-संभजनम् । २. घ-ज-ण-अस्मिन् । ३. ख-ग-च-ज-ण-भ-'शूनं' नास्ति । ४. ख-ग-च-ज-ण-त-न-भ-ल-स-'यद्वा.....सुखकरं' नास्ति । ५. ल-घत्वम् । ६. ल-'तुक्' नास्ति । ७. ख-ग-ज-ण-त-भ-स-माध्यंदिनसवने ।

कुशिकः[1] प्रसङ्गात् कंचित् शास्त्रार्थं ब्रूते[1]–' अपुत्रस्य[2] पितुः पुत्री दायादा पुत्रिका सती । यतः संतानकृत्तस्याः पुत्र इत्यनयोच्यते ' इति[2] । अपुत्रो[3] यः पिता कन्यामन्यकुलं प्रापयति स [v]बह्निः इत्युच्यते[3] । स पिता [v]शासत् । ' अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ' (वासिष्ठ. १७. १७) स्मृत्युक्तम्[4] अनुशासनं कुर्वन् [v]दुहितुः पुत्रिकायाः [v]नप्त्यं नप्तृभवं पिण्डदानादिकं कर्तव्यतया [v]गात् गच्छति । किं कुर्वन् । [v]विद्वान् अस्यां दुहितरि जातः पुत्रो मम स्वधाकरो भविष्यतीति जानन् [v]ऋतस्य[5] सत्यस्य पुत्रोत्पादनसमर्थस्य[5] रेतसः [v]दीधितिं धर्तारं जामातरं[6] तप्तृतिं[6] [v]सपर्यन् वस्त्रालंकारादिना पूजयन् [v]पिता नप्तृभवं[7] गच्छति । [v]यत्र यस्याः [v]दुहितुः पिता पालकः पतिर्जामाता [v]सेकं तस्यां रेतःसेकम् [v]ऋञ्जन् प्रसाधयन् यः [v]शग्म्येन केवलं सुखनिमित्तेन मनसा तया[8] स्वशरीरं[8] [v]सं दधन्वे संधत्ते । न तु पुत्रनिमित्तेन मनसा । एतमर्थं यास्कोऽप्याह–' प्रशास्ति वोढा सन्तानकर्मणे दुहितुः पुत्रभावम् । दुहिता दुर्हिता दूरे हिता दोग्धेर्वा । नप्तारमुपागमद्दौहित्रं पौत्रमिति । विद्वान्प्रजननयज्ञस्य रेतसो वाङ्मात्रङ्कारस्तस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधानं पूजयन् ' (निरु. ३. ४) इत्यादिना ॥ शासत । शासेः झरि अयथेतस्वाद्गुमभावः । दुहितुः । ' दुह प्रपूरणे ' । ' नप्तृनेष्टृ ' इत्यादिना तृचि निपातनादिडागमः । चिस्वरः । नप्त्यम् । नप्तरि भवम् । ' भवे छन्दसि ' इति यत् । ' रीङृतः ' इति रीङादेशः । ' यस्य ' इति लोपः । रेफलोपश्छान्दसः । गात् । ' इण् गतौ ' इत्यस्य छान्दसे लुङि रूपम् । ऋञ्जन्[9] । ऋञ्जतिः प्रसाधनकर्मा । शग्म्येन । शं सुखं गच्छन्तीति गमेरौणादिकः कप्रत्ययः । किच्चात ' गमहन[10] ' इत्यादिनोपधालोपः । शग्मे साधुः इति ' तत्र साधुः ' इति यत्प्रत्ययः । ' वीरवीर्यौ च ' इत्यत्र ' यतोऽनावः ' इत्यस्य अनित्यत्वज्ञापितत्वादत्र[11] नित्स्वरः । दधन्वे । धवि सौत्रो धातुः । लिटि रूपम् । प्रत्ययस्वरः । यद्योगादनिघातः ॥

न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।
यदीं मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥ २ ॥

न । जामये । तान्वः । रिक्थम् । अरैक् । चकार । गर्भम् । सनितुः । निऽधानम् ।
यदि । मातरः । जनयन्त । वह्निम् । अन्यः । कर्ता । सुऽकृतोः । अन्यः । ऋन्धन् ॥ २ ॥

अभ्रातृकाया दुहितुः पुत्रिकाकरणात् सा रिक्थभाक् इत्युक्तम्[12] । भ्रातृमत्यास्तस्या रिक्थभाक्त्वं नास्तीति ब्रूते । [v]तान्वः तनूज औरसः पुत्रः [v]जामये भगिन्यै [v]रिक्थं पित्र्यं धनं [v]न [v]अरैक् न प्रेचयति[12] न प्रददाति । किं तर्हि । [v]सनितुः एनां संभजमानस्य[13] भर्तुः [v]गर्भम् । षष्ठ्यर्थे द्वितीया । गर्भस्य [v]निधानं रेतःसेकनिधानीमेनां[14] [v]चकार । पाणिग्रहणेन संस्कृताम्[15] एनां करोति । न तु तस्यै रिक्थं

---

१. ख-ग-च-ज-ण–' कुशिकः.....ब्रते ' नास्ति । २. ख-ग-घ-च-ज-ण-त-न-भ-ल-स–' अपुत्रस्य .....इति ' नास्ति । ३. ख-ग-च-ज–शासद्वह्निरित्युच्यते । ४. ख-फ–स्मृत्युक्तेः । ५. ख-ग-च-ज-ण-न-ल-स–ऋतस्य पुत्रोत्पादनेन सत्यस्य समर्थस्य । ६. ख-ग-घ-च-ज-ण-प-फ-भ–बिट्पतिम्, त-न-ल-स–' जामातरं तप्तृतिं ' नास्ति । ७. ख-ग-च-ज-ण-फ-भ-स–नप्तृभावम् । ८. ख-ग-घ-च-ज-ण-प-फ-भ-स–तस्यां स्ववीर्यम् । ९. ख-ग-च-ज-ण-न-भ-ल-स–' ऋञ्जन् ' नास्ति । १०. न–अनित्यत्वस्य ज्ञापितत्वादत्र । ११. त-ल–इत्युक्त्वा । १२ ख-ग-घ-च-ज-ण-फ-भ-स–प्रेरयति । १३. त-ल-स–भजमानस्य । १४. ख-ग-च-ज-ण-फ-भ–रेतःसेकनिधानं निधानेन । १५. ज-ण–संस्कारिताम् ।

ददातीत्यभिप्रायः। 'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम्' (याज्ञ. २. १२४) इति याज्ञवल्क्यस्मरणात्। स्त्रीपुंसलक्षणस्यापत्यस्यैकोत्पाद्यत्वाविशेषात् पुमपत्यस्य को विशेष इत्याशङ्क्य विशेषं दर्शयति। [v]यदि यद्यपि [v]मातरः मातापितरौ [v]वह्निम्। अवह्निः स्त्री वह्निः पुमान् स्वभार्याया वोढृत्वात्[1]। अवह्निश्च वह्निश्च[2]। तादृशं स्त्रीपुंसलक्षणमपत्यं [v]जनयन्त। तथापि तयोर्मध्ये [v]अन्यः पुंलक्षणः [v]सुकृतोः शोभनस्य पिण्डदानादेः कर्मणः [v]कर्ता भवति। [v]अन्यः स्त्रीलक्षणः [v]ऋन्धन् वस्त्रालंकारादिना ऋध्यमान एव भवति। पिण्डदानादिकर्तृत्वात् पुत्रो दायार्हः दुहितुस्तथात्वं[3] नेति[3] न दायार्हा सा तु केवलं परस्मै दीयते। तथा च निरुक्तं—'न जामये भगिन्यै। जामिरन्येऽस्यां जनयन्ति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति। तान्व आत्मजः पुत्रो रिक्थं प्रारिचत्प्रादाच्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य यदिह मातरोऽजनयन्त वह्निं पुत्रमवह्निं च स्त्रियमन्यतरः संतानकर्ता भवति पुमान्दायादोऽन्यतरोऽर्धयित्वा जामिः प्रदीयते परस्मै' (निरु. ३. ६) इति॥ तान्वः[4]। तन्वाः प्राणाधिष्ठितत्वात्तनूः प्राणवती। तद्विकार इत्यर्थे 'प्राणिरजतादिभ्योऽञ्' इत्यञ्। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। रिक्थम्। 'रिचिर् विरेचने'। 'पातृतुदिवचिरिचिभ्यस्थक्'। प्रत्ययस्वरः। अरैक्। 'रिचिर् विरेचने' इत्यस्य लुङि सिचि 'वदव्रज०' इत्यादिना वृद्धिः। 'बहुलं छन्दसि' इतीडभावः। हल्ङ्यादिसंयोगान्तलोपौ। निधातः। सनितुः। 'षण संभक्तौ' इत्यस्य तृचि रूपम्। निधानम्। दधातेर्ल्युटि रूपम्। लिस्वरः। मातरः। 'पिता मात्रा' इति पितुः शेषे प्राप्ते मातुः शेषश्छान्दसः। द्विर्वचनस्य बहुवचनं पूजार्थम्। जनयन्त। जनेर्णिचि रूपम्। वह्निम्। 'पुमान् स्त्रिया' (पा. सू. १. २. ६७) इति वह्नेः शेषः। सुकृतोः। करोतेरौणादिकः क्तुप्रत्ययः[5]। ऋन्धन्। 'ऋधु वृद्धौ'। व्यत्ययेन श्नम्॥

अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे।
महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः॥ ३॥

अग्निः। जज्ञे। जुह्वा। रेजमानः। महः। पुत्रान्। अरुषस्य। प्रऽयक्षे।
महान्। गर्भः। महि। आ। जातम्। एषाम्। मही। प्रऽवृत्। हरिऽअश्वस्य। यज्ञैः॥३॥

हे इन्द्र [v]अरुषस्य रोचमानस्य[6] तव [v]प्रयक्षे यज्ञार्थं [v]जुह्वा ज्वालाभिः [v]रेजमानः कम्पमानः [v]अग्निः [v]महः प्रभूतान् [v]पुत्रान् रश्मीन् [v]जज्ञे उत्पादयामास। [v]एषां रश्मीनां [v]गर्भः जलात्मना[7] क्रोडीकारः [v]महान् आसीत्। किंच एषां रश्मीनां मेलनम् [v]आ [v]जातं सर्वत ओषध्यात्मना जातं [v]महि महदभूत्। किंच एषां रश्मीनां [v]प्रवृत् अनेन प्रकारेण प्रवृत्तिः [v]हर्यश्वस्य इन्द्रस्य [v]यज्ञैः[8] यजनार्हैः[8] सोमाज्याहुतिभिः[9] [v]मही महती भवति॥ जज्ञे। 'जनी प्रादुर्भावे' इत्यस्य लिटि रूपम्। अन्तर्भावितण्यर्थः। जुह्वा। 'जुहोतेर्द्वे दीर्घश्च' इति क्विप् द्विर्वचनं दीर्घश्च धातोः। 'उदात्तस्वरितयोः०' इति स्वरितत्वम्। हर्यश्वस्य। हरी अश्वौ यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

१. च-फ-उदर्यत्वात्। २. ख-ग-च-फ-'वह्निश्च' नास्ति; ल-स-वह्निः। ३. त-न-दुहितुस्तथात्वेऽपि। ४. ख-ग-च-ज-ण-त-न-भ-स-'तान्वः' नास्ति। ५. ख-ग-ज-ण-त-न-ल-स-क्तुन्प्रत्ययः। ६. ल-आरोचमानस्य। ७. च-फ-बलात्मना। ८. ख-ग-फ-यजनार्हैः; त-स-यज्ञैर्यजमानार्हैः। ९. स-सोमाज्यादिभिः प्रभृतिभिः।

अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ॥ ४ ॥

अभि । जैत्रीः । असचन्त । स्पृधानम् । महि । ज्योतिः । तमसः । निः । अजानन् ।
तम् । जानतीः । प्रति । उत् । आयन् । उषसः । पतिः । गवाम् । अभवत् । एकः । इन्द्रः ॥४॥

[v]जैत्रीः जित्वर्यो विशो मरुतः [v]स्पृधानं वृत्रेण सह[1] स्पर्धमानमिन्द्रम् [v]अभि [v]असचन्त सर्वतः समगच्छन्[2] । ते च मरुतः [v]महि महत् [v]ज्योतिः सूर्यस्य तेजः [v]तमसः तमोरूपात् वृत्रात् [v]निरजानन् निर्गतमजानिषुः । उदितं सूर्यं [v]जानतीः जानानाः [v]उषसः [v]तं [v]प्रति [v]उत् अभिलक्ष्यैव [v]आयन् प्रापुवन् । अथ तत्रोद्भूतानां[3] [v]गवां रश्मीनाम् [v]एकः अद्वितीय एव [v]इन्द्रः [v]पतिः [v]अभवत् ॥ जैत्रीः[4]। जयतेः तृनि* रूपम् । गुणस्य स्थाने व्यत्ययेन वृद्धिः[4] । निरस्वरः । असचन्त । ' पच समवाये ' इत्यस्य लङि रूपम् । स्पृधानम् । ' स्पर्ध संघर्षे ' । छन्दसि कानजादेशः । छन्दसि द्विर्वचनस्य विकल्पितत्वात् द्विर्वचनाभावः । चित्स्वरः । अजानन् । ' ज्ञा अवबोधने ' इत्यस्य लङि रूपम् । निघातः । आयन् । ' अय गतौ ' इत्यस्य लङि रूपम् ॥

वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः ।
विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥ ५ ॥

वीळौ । सतीः । अभि । धीराः । अतृन्दन् । प्राचा । अहिन्वन् । मनसा । सप्त । विप्राः ।
विश्वाम् । अविन्दन् । पथ्याम् । ऋतस्य । प्रऽजानन् । इत् । ता । नमसा । आ । विवेश ॥५॥

पुरा किलाङ्गिरसां गावः पणिनामकैरसुरैरपहृत्य निगूढे कस्मिंश्चित्पर्वते स्थापिताः । ते चाङ्गिरसस्तत्प्राप्त्यर्थमिन्द्रं तुष्टुवुः । स्तुतश्च सः[5] इन्द्रो गवान्वेषणाय[6] देवशुनीं प्राहिणोत् । सा च गवां[7] गवेषणपरा सती तत्स्थानमलभत । तया विज्ञापित इन्द्रस्ता गाः[8] आनीयाङ्गिरोभ्यः प्रादादित्यैतिहासिकी कथा । तथा चास्या ऋचोऽयमर्थः । [v]धीराः धीमन्तः [v]सप्त [v]विप्राः मेधाविनः सप्तसंख्याका अङ्गिरसः [v]वीळौ दृढे पर्वते [v]सतीः निगूढाः[9] सतीर्गाः [v]अभि अभिलक्ष्य [v]अतृन्दन् उपेक्षामकुर्वन् । ततस्तेऽङ्गिरसः पर्वतबिले गावः सन्तीति [v]मनसा निश्चित्य [v]प्राचा येन मार्गेण प्रविष्टास्तेनैव प्राचीनेन मार्गेण ता गाः [v]अहिन्वन्[10] निरगमयन् । यद्वा प्राचा । प्रकर्षेणेन्द्रमञ्चति

१. ख-ग-घ-च-ज-ण-त-न-प-फ-भ-' सह ' नास्ति । २. ख-ग-घ-च-ज-ण-न-फ-भ-स-अगच्छन्; त-आगच्छन् । ३ न-वा; ल-ततो । ४. ख-ग-च-ज-ण-भ-' जैत्री.....वृद्धिः ' नास्ति । *. न-ल-स-तृचि । ५. ख-ग-च-ज-ण-त-न-भ-ल-स-' सः ' नास्ति । ६. ख-ग-घ-च-ज-ण-भ-गवामन्वेषणाय । ७. ख-ग-च-ज-ण-त-न-फ-भ-स-' गवां ' नास्ति । ८. त-' गाः ' नास्ति । ९. ग-च-फ-निरुद्धाः; त-स-निगूळहाः;ल-निरुद्धाः । १०. ख-ग-च-ज-ण-फ-भ-अविन्दन् अलभन्त ।

प्राप्नोतीति प्राक् । तेनेन्द्रविषयेण मनसा । मन्यत इति मनः स्तोत्रम् । तेन स्तोत्रेणाहिन्वन् अवर्धयन् इन्द्रं[1] तुष्टमकुर्वन्[1] । स्तुत्वा च [v]ऋतस्य [v]पथ्यां यज्ञस्य[2] मार्गे साधुभूतां[2] [v]विश्वां सर्वामपहतां गाम् [v]अविन्दन् अलभन्त । ततः स इन्द्रः [v]ता तान्यङ्गिरसां कर्माणि [v]प्रजानन् [v]इत प्रकर्षेण जानन्निन्द्रो [v]नमसा नमस्कारेणाङ्गिरसः संभावयन् तैरधिष्ठितं पर्वतम् [v]आ [v]विवेश ॥ अतृन्दन् । ' उतृदिः[3] हिंसानादरयोः ' इत्यस्य लङि रुधादित्वात् श्नम् । तस्य ' श्नसोः° ' इत्यलोपः । निघातः । प्राचा । ' अञ्चेश्छन्दस्यसर्वनामस्थानम् ' इति विभक्तेरुदात्तत्वम् । अहिन्वन् । ' हि गतिवर्धनयोः ' इत्यस्य लङि रूपम् । अविन्दन् । ' विदॢ लाभे ' इत्यस्य लङि मुचादित्वान्नुम् । निघातः । पथ्याम् । पथि साधुरित्यर्थे ' तत्र साधुः ' इति यत्प्रत्ययः । ' यचि भम् ' इति भसंज्ञायां ' नस्तद्धिते ' इति टिलोपः । ' यतोऽनावः ' इत्यस्यानित्यत्वात ' तिरस्वरितः ' इति स्वरितः । विवेश । ' विश प्रवेशने ' इत्यस्य लिटि रूपम् ॥ ॥ ५ ॥

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ६ ॥

विदत् । यदि । सरमा । रुग्णम् । अद्रेः । महि । पाथः । पूर्व्यम् । सध्र्यक् । करिति कः । अग्रम् । नयत् । सुऽपदी । अक्षराणाम् । अच्छ । रवम् । प्रथमा । जानती । गात् ॥ ६ ॥

[v]यदि यदा [v]सरमा इन्द्रेण गवान्वेषणार्थं प्रेषिता सरमा नाम देवशुनी [v]अद्रेः [v]रुग्णं भग्नं द्वारं [v]विदत् अलभत तदानीमिन्द्रः [v]महि महत् [v]पूर्व्यं पूर्वं प्रेषणकालेऽज्ञादिनीं ते प्रजां करिष्यामि इति प्रतिज्ञातं [v]सध्र्यक् इतरैरपि भोज्यैः सह्रीचीनं [v]पाथः गव्यादिलक्षणमन्नं [v]कः अकार्षीत् तस्यै दत्तवान् । ततः [v]सुपदी शोभनपादयुक्ता सा सरमा [v]अक्षराणां क्षयरहितानां गवाम् [v]अग्रं प्रान्तं [v]नयत् प्राप्नोत्[4] । कुत इत्यत आह । यतः [v]रवं तेषां हम्भारवं [v]प्रथमा[5] प्रथमं [v]जानती सती [v]अच्छ शब्दाभिमुख्येन[6] [v]गात् जगाम ॥ विदत् । ' विदॢ लाभे ' इत्यस्य लुङि लृदित्त्वात् च्लेरङादेशः । तस्य स्वरः । सरमा । ' सृ गतौ ' । औणादिकोऽमप्रत्ययः । सरतीति सरमा[7] । ' सरमा सरणात्[8] ' (निरु. ११. २४) इति यास्कः । प्रत्ययस्वरः । रुग्णम् । ' रुजो भङ्गे ' इत्यस्य निष्ठायाम् ' ओदितश्च ' इति नत्वम् । प्रत्ययस्वरः । पाथः । ' पा रक्षणे ' । ' अत्ने च ' (उ. सू. ४. ६४४) इत्यसुन्प्रत्ययः । थुडागमः । पातीति पाथोऽन्नम् । नित्स्वरः । सध्र्यक् । ' अञ्चु गतिपूजनयोः ' । ' ऋत्विक्° ' इत्यादिना क्विन् । सहाञ्चतीति । ' सहस्य सध्रिः ' इति सध्र्यादेशः । क्विन्प्रत्ययस्य कुरत्वम् । ' अद्रिसध्र्योः अन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम् ' (पा सू. ६. ३. ९५. १) इति सध्रि इत्यादेशोऽन्तोदात्तः । यणादेशे कृते ' उदात्तस्वरितयोर्यणः स्वरितः ' इति यणः स्वरितत्वम् । कः । करोतेर्लुङि सिपि च्लेः ' मन्त्रे घसह्वर° ' इत्यादिना लुक् । गुणे कृते हल्ङ्यादिना सिपो लोपः । विसर्जनीयः । निघातः । नयत् । नयतेर्लङि रूपम् । सुपदी । ' पादोऽन्यतरस्याम् ' (पा. सू. ४. १. ८) इति ङीप् । गात् । इणो लुङि रूपम् ॥

१. च-फ-इन्द्रस्तुतिमकुर्वन् । २. ख-ग-घ-च-ज-ण-त-न-प-फ-भ-यज्ञमार्गे संभूताम्; स-यज्ञमार्गेण संभूताम् । ३. ख-ग-ज-ण-न-भ-ल-स-तृदिः । ४. ख-ग-च-फ-भ-म-प्राप्नोति । ५. ख-ग-च-ज-ण-' प्रथमा ' नास्ति । ६. च-आभिमुख्येन । ७. ल-' सरमा ' नास्ति । ८. ख-ग-च-ज-ण-न-भ-ल-स-सरणिः ।

अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्यन्नथाभवदङ्गिराः सद्यो अर्चन् ॥ ७ ॥

अगच्छत् । ऊँ इति । विप्रऽतमः । सखिऽयन् । असूदयत् । सुऽकृते । गर्भम् । अद्रिः ।
ससान । मर्यः । युवऽभिः । मखस्यन् । अथ । अभवत् । अङ्गिराः । सद्यः । अर्चन् ॥७॥

[v]विप्रतमः अतिशयेन मेधावी [v]सखीयन् अङ्गिरोभिः साकमात्मनः सखित्वमिच्छन् इन्द्रः [v]अगच्छत् [v]उ । गोभिरधिष्ठितं पर्वतमगमदेव । सः [v]अद्रिः सखित्वमिच्छन् [v]सुकृते सुष्ठु युद्धकर्त्रे इन्द्राय [v]गर्भं गवात्मकं गर्भम् [v]असूदयत् निरगमयत् । [v]युवभिः नित्यतरुणैर्मरुद्भिः सह [v]मखस्यन् गोधनमङ्गिरसामिच्छन् [v]मर्यः असुराणां मारयितेन्द्रः [v]ससान असुरैरपहृताः ताः[1] गाः भेजे । [v]अथ अनन्तरम् [v]अङ्गिराः ससानामङ्गिरसां मध्ये वरिष्ठोऽङ्गिरा ऋषिः इन्द्रात् ता गा लब्ध्वा [v]सद्यः तदानीमेव [v]अर्चन् इन्द्रं पूजयन् [v]अभवत् ॥ अगच्छत् । गमेर्लङि रूपम् । सखीयन् । सुप आत्मनः क्यच् । असूदयत् । 'षूद[2] निरासे[2]' इत्यस्य ण्यन्तस्य लङि रूपम् । ससान । 'षण[3] संभक्तौ' इत्यस्य लिटि णलि रूपम् । लित्स्वर.[4] । मखस्यन् । 'छन्दसि परेच्छायाम्[5]' इति[6] परेच्छायामपि क्यच् । सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः इति सुगागमः । एकादेशस्वरः । अङ्गिराः । 'सृ गतौ' । अङ्गारशब्द उपपदे सर्तेर्धातोरसुन्प्रत्ययः । उपपदे गकारात् परस्याकारस्येत्वम्[7] अन्त्यलोपश्च धातोर्लोपश्च 'अङ्गिराः' इति सूत्रेण निपात्यते । भूतकालेऽङ्गारेभ्यः सृत इति अङ्गिरा ऋषिः । 'अङ्गारेष्वङ्गिराः' (निरु. ३. १७) इति यास्कः । निस्स्वरः ॥

सतःसंतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम् ।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखीरमुञ्चन्निरवद्यात् ॥ ८ ॥

सतःऽसंतः । प्रतिऽमानम् । पुरः ऽभूः । विश्वा । वेद । जनिम । हन्ति । शुष्णम् ।
प्र । नः । दिवः । पदऽवीः । गव्युः । अर्चन् । सखा । सखीन् । अमुञ्चत् । निः । अवद्यात् ॥८॥

योऽयमिन्द्रः [v]सतमतः उत्तमस्य वसुनः[8] [v]प्रतिमानम् । प्रतिमीयत उपमीयतेऽनेन सर्वमिति प्रतिमानं प्रतिनिधिः[9] । यद्वा[9] सतःसतो जातस्य सर्वस्य प्रतिमानं स्वस्य महत्त्वेन प्रतिमातीयत्तया सर्वं परिच्छिनत्तीत्यर्थः[9] । [v]पुरोभूः युद्धे[10] पुरतः शत्रूनवाप्नोतीति पुरोभूश्च [v]विश्वा [v]जनिम सर्वाणि जातानि [v]वेद जानाति । [v]शुष्णं शुष्णनामानम्[11] असुरं [12] [v]हन्ति । [v]पदवीः कवितमः [v]गव्युः गोधनम्

१. ख-ग-घ-च-ज-ण-त-भ-स-'ताः' नास्ति । २. ख-ग-घ-ज-ण- सुद क्षरणे; स- षूद प्रेरणे । ३ ल-म-वन षण । ४. ख-ग-च-ज-ण-त-भ-स-'लित्स्वरः' नास्ति । ५. ख-ग-च-ज-ण-न-भ-स-'परेच्छायामिति' नास्ति । ६. ल-परस्यत्वम् । ७. ल-वस्तुनः । ८. ख-ग-घ-च-ज-ण-त-न-भ-ल-स-'प्रतिनिधिः' नास्ति । ९. ख-ग-घ-च-ज-ण-भ-'यद्वा.....°छिनत्तीत्यर्थः' नास्ति । १०. ख-ग-च-ज-ण-युद्धेषु । ११. च-तन्नामानम् । १२. घ-त-स-असुरं च ।

अङ्गिरसामिच्छन् अस्माकं [v]सखा इन्द्रः [v]सखीन् [v]नः अस्मान् [v]दिवः द्युलोकादागत्य [v]प्र [v]अर्चन् प्रकर्षेण पूजयन् [v]अवद्यात् वृत्रबाधरूपात्[1] दोषात्[1] [v]निः [v]अमुञ्चत् नितरां मुञ्चतु ॥ प्रतिमानम्। मातीति मानम्। औणादिको नन्प्रत्ययः[2]। यद्वा करणे ल्युट्। पुरोभूः। ' भू प्राप्तौ '। क्विप्। वेद। वेत्तेर्लेटि रूपम्। जनिम। ' जनी प्रादुर्भावे '। ' जनिहृभ्यामिमनिन् ' इति इमनिन्प्रत्ययः। भूतकालं जानातीति जनिम। ' सुपां सुलुक् ' इति सुपो लुक्। निःस्वरः। हन्ति। हन्तेर्लेटि रूपम्। वाक्यभेदादनिघातः। शुष्णम्। शोषयतीति[3] शुष्णः। प्र णः। ' उपसर्गाद्बहुलम् ' इति संहितायां णत्वम्। पदवीः। वी कान्त्यादिषु। क्विप्। पदानि वेत्ति परस्परसंगतानि करोतीति पदवीः कविः। गव्युः। गोशब्दात् ' परेच्छायां छन्दसि ' इति क्यच्। ' वान्तो यि प्रत्यये ' इति वान्तादेशः। ' क्याच्छन्दसि ' इत्युप्रत्ययः। प्रत्ययस्वरः। अर्चन्। अर्चतेः शतरि रूपम्। सखीन्। संहितायां नकारस्य ' दीर्घादटि[4] ' इति रुः। पूर्वस्य वर्णस्य ' अत्रानुनासिकः[5] ' इत्यनुनासिकादेशः। अमुञ्चत्। ' मुचॢ मोक्षणे ' इत्यस्य लङि ' शे मुचादीनाम् ' इति नुमागमः। निघातः। अवद्यात्। ' वद व्यक्तायां वाचि ' इत्यस्य नञ्पूर्वस्य गर्ह्यार्थे ' अवद्यपण्यवर्याः[6] ' (पा. सू. ३. १. १०१) इति निपातनात् यत्प्रत्ययः ॥

नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् ।
इदं चित्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥ ९ ॥

नि । गव्यता । मनसा । सेदुः । अर्कैः । कृण्वानासः । अमृतऽत्वाय । गातुम् ।
इदम् । चित् । नु । सदनम् । भूरि । एषाम् । येन । मासान् । असिसासन् । ऋतेन ॥९॥

[v]गव्यता गा इच्छता [v]मनसा युक्ताः [v]अर्कैः अर्चनीयैः स्तोत्रैः [v]अमृतत्वाय देवत्वप्राप्त्यर्थं [v]गातुम्। गच्छन्त्यनेनेति[7] गातुर्मार्गः। अमृतत्वप्राप्त्युपायभूतं मार्गं [v]कृण्वानासः कुर्वाणास्तेऽङ्गिरसः [v]नि [v]सेदुः सत्राख्ये कर्मणि[8] आसीदन्। [v]एषाम् अङ्गिरसाम् [v]इदं [v]चित् [v]सदनम् इदमेव सत्राख्ये कर्मणि आसदनं[9] [v]भूरि [v]नु प्रभूतम्। अमृतत्वप्राप्त्यर्थं महानुपायः खलु। कुत इत्यत आह। [v]ऋतेन सत्यभूतेन [v]येन सत्रकर्मणा तेऽङ्गिरसः [v]मासान् अभिप्लवषडहैः कल्पितान् मासान् [v]असिसासन् संभक्तुमैच्छन् ॥ गव्यता । गोशब्दात् क्यचि रूपम्। ' वान्तो यि प्रत्यये ' इति वान्तादेशः। एकादेशस्वरः। सेदुः। सदेर्लिटि ' अत एकहल्मध्येऽनादेशादेर्लिटि ' इत्येत्त्वाभ्यासलोपौ। निघातः। कृण्वानासः। ' कृवि हिंसाकरणयोः ' इत्यस्य ताच्छीलिकश्चानश्। ' धिन्विकृण्व्योरच ' इत्युप्रत्ययः। चित्स्वरः। गातुम्। ' गाङ् गतौ '। ' कमिमनिजनिगाभापायाहिभ्यः ' इति करणे तुप्रत्ययः। प्रत्ययस्वरः। असिषासन्। ' षण संभक्तौ ' इत्यस्य सनि ' जनसनखनां सञ्झलोः ' इत्यात्वम्। अभ्यासस्य ' सन्यतः ' इतीत्वम्। ' सनोतेरनः ' इति संहितायां षत्वम्। तदन्ताल्लडि रूपम्। यद्वृत्तयोगादनिघातः ॥

१. ख-ग-ण-फ-भ–वृत्रबाधारूपात् दोषात्; ल–शत्रुबाधरूपात् दोषात्; स–वृत्रवधरूपदोषात्। २. ख-ग-ज-ण-न-भ–नप्रत्ययः। ३. ख-ग-च-ज-ण-फ-भ-स–शोधयतीति। ४. ख-ग-च-ज-ण-भ–गच्छत्यनेनेति। ५. त-न–वर्त्मनि। ६. ख-ग-घ-ज-ण-भ–आसनम्।

संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।
वि रोदसी अतपद्घोष एषां जाते निःष्ठामदधुर्गोषु वीरान् ॥ १० ॥

सम्ऽपश्यमानाः । अमदन् । अभि । स्वम् । पयः । प्रत्नस्य । रेतसः । दुघानाः ।
वि । रोदसी इति । अतपत् । घोषः । एषाम् । जाते । निःऽस्थाम् । अदधुः । गोषु । वीरान् ॥ १० ॥

[v]स्वं स्वकीयं गोधनम् [v]अभि अभिलक्ष्य [v]संपश्यमानाः मदीया एता गाव इत्यात्मीयतया जानानाः[1] तेऽङ्गिरसः [v]प्रत्नस्य पुरा[2] जातस्य [v]रेतसः तदुपलक्षितस्य पुत्रस्य धारणार्थं [v]पयः [v]दुघानाः ता गाः पयो दुहन्तः सन्तः [v]अमदन् हृष्टा अभूवन् । [v]एषाम् अङ्गिरसां [v]घोषः हर्षोद्गत्पन्नो महाध्वनिः स्तुतिजातः[3] वा [v]रोदसी द्यावापृथिव्यौ [v]वि [v]अतपत् ते व्याप्य अतपिष्ट[4]। ततस्तेऽङ्गिरसः [v]जाते आत्मीयतया संपन्ने चराचरात्मके वस्तुनि [v]निःष्ठां पूर्वं यथा स्थितिमकार्षुः । तथा [v]गोषु आहृतासु [v]वीरान् रक्षाकर्मण्यतिशूरान् पुरुषान् [v]अदधुः स्थापयामासुः ॥ संपश्यमानाः । संपूर्वस्य दृशेः ' ' दृशेश्चेति वक्तव्यम् ' इत्यात्मनेपदम् । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः । अमदन् ।' मदी हर्षे ' इत्यस्य लुङि सिच्यङि रूपम् । निघातः । दुघानाः । ' दुह प्रपूरणे ' इत्यस्मात् शानच् । अदादित्वाच्छपो लुक् । घत्वं छान्दसम् । वृषादित्वादाद्युदात्तः । अतपत । विपूर्वस्य तपतेरत्र सकर्मकत्वादात्मनेपदाभावः । लङि रूपम् । घोषः । ' घुष[5] संशब्दने ' । घञन्तः । ञित्स्वरः । निःष्ठाम् । ' ष्ठा गतिनिवृत्तौ ' । ' स्थाः क च ' (पा. सू. ३. २. ७७) इति क्विप् । कृदुत्तरस्वरः[6] । अदधुः । दधातेर्लङि झेः ' सिजभ्यस्त° ' इति जुसादेशः । वाक्यभेदान्निघाताभावः । गोषु । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वे प्राप्ते ' न गोश्वन° ' इति प्रतिषिद्धत्वात् प्रातिपदिकस्वरः ॥ ॥६॥

स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिन्द्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥ ११ ॥

सः । जातेभिः । वृत्रऽहा । सः । इत् । ऊँ इति । हव्यैः ।
उत् । उस्रियाः । असृजत् । इन्द्रः । अर्कैः ।
उरूची । अस्मै । घृतऽवत् । भरन्ती । मधु । स्वाद्म । दुदुहे । जेन्या । गौः ॥ ११ ॥

[v]सः [v]इन्द्रः [v]जातेभिः सहायतया संपन्नैर्मरद्भिः सहितः सन् [v]वृत्रहा वृत्रस्यासुरस्य हन्ता भवति । [v]सेदु स एव इन्द्रः [v]अर्कैः अर्चनीयैः अत एव [v]हव्यैः होतव्यैर्मरद्भिः सहितः सन् [v]उस्रियाः । ऊर्ध्वं वसन्त्यासु क्षीरादिरूपं हविरित्युस्रिया गावः । यद्वा ऊर्ध्वं क्षीरदधिनवनीतादि क्रमेणासु वसतीति । ' उस्रियेति गोनामोस्त्राविणोऽस्यां भोगाः ' (निरु. ४. १९) इति यास्कः । ता गाः [v]उत् [v]असृजत् यज्ञार्थं सम्यक् ससर्ज । यस्मादेवं तस्मात् [v]घृतवत् घृतोपेतं क्षीरादिकं[7] हविः [v]भरन्ती

१. च-फ-पश्यमानाः । २. ख-ग-च-ज-ण-प-फ-भ-स-पुरः । ३. ख-ग-घ-च-फ-श्रुतजातः । ४. ख-ग-च-न-भ-ल-स-आवर्तिताः ; ज-ण-अवर्तत । ५. च-फ-घुषिरविशब्दने । ६. ल-कृदुत्तरपदस्वरः। ७. ख-ग-च-ज-ण-भ-क्षीरादि ।

बिभ्राणा अत एव [v]उरूची । उरु प्रभूतमग्निहोत्रादिकर्म अञ्चति हविः प्रदातुं प्राप्नोतीत्युरूची। [v]जेन्या जेतव्या प्रशस्ता [v]गौः [v]अस्मै यजमानाय [v]स्वाद्म स्वादुतरं क्षीरादि [v]दुदुहे दुह्यते स्म ॥ उक्षियाः । ' वस निवासे ' इत्यस्मात् ' स्फायितञ्चि° ' इत्यादिना रक्प्रत्ययः । उक्षशब्दात् स्वार्थे पृषोदरादित्वात् घप्रत्ययः । प्रत्ययस्वरः। यद्वा । ' सृ गतौ '। उत्पूर्वस्य सरतेः[1] कप्रत्ययः । पूर्वपदस्यान्तयलोपश्छान्दसः। अत्रापि स्वार्थिको घप्रत्ययः । असृजत् । ' सृज विसर्गे ' इत्यस्य लङि रूपम् । उरूची । उरु अञ्चतीति क्विन् । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । दुदुहे । ' दुह प्रपूरणे ' इत्यस्य लिटि रूपम् । जेन्या । जयतेः कृत्यार्थे केन्यप्रत्ययः । इकारलोपश्छान्दसः । प्रत्ययस्वरः ॥

पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।
विष्कभ्नन्तः स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥१२॥

पित्रे । चित् । चक्रुः । सदनम् । सम् । अस्मै । महि । त्विषिऽमत् । सुऽकृतः । वि । हि । ख्यन् । विऽस्कभ्नन्तः । स्कम्भनेन । जनित्री इति । आसीनाः । ऊर्ध्वम् । रभसम् । वि । मिन्वन् ॥१२॥

सत्रमनुतिष्ठन्तोऽङ्गिरसः [v]पित्रे [v]चित् पालकाय [v]अस्मै इन्द्राय [v]महि महत् [v]त्विषीमत् दीप्तिमत् [v]सदनम् उन्नतं[2] स्थानं [v]सं [v]चक्रुः। कथमिति तदुच्यते। यतः [v]सुकृतः समुपार्जितसुकृतकर्माणः[3] तेऽङ्गिरसस्तादृशमिन्द्रस्य उचितं स्थानं [v]वि [v]हि [v]ख्यन् विशेषेणादर्शयन् खलु । कुत इत्यत आह । [v]आसीनाः सत्रम् उपतिष्ठन्तः[4] तेऽङ्गिरसः[5] [v]जनित्री भवस्य जगतां जनयित्र्यौ द्यावापृथिव्यौ [v]स्कम्भनेन स्तम्भनसाधनेन[6] अन्तरिक्षेण [v]विष्कभ्नन्तः यथा ते रोदस्यौ[7] अधो न पततस्तथा विष्टब्धे कुर्वन्तः सन्तः [v]रभसं वेगवन्तं तमिन्द्रम् [v]ऊर्ध्वं द्युलोके[8] [v]वि [v]मिन्वन् हविःस्वीकरणार्थं विशेषेणास्थापयन् ॥ चक्रुः । करोतेर्लिटि युसि रूपम् । निघातः । ख्यन् । ' ख्या प्रकथने ' । अस्य लङि च्लेः ' अस्यतिवक्तिख्यातिभ्योऽङ् ' इत्यङादेशः । ' आतो लोप इटि° ' इत्याकारलोपः । हियोगादनिघातः । विष्कभ्नन्तः । ' स्कम्भु रोधने '। सौत्रो धातुः । तस्मात् शतरि रूपम् । ' वेः स्कभ्नातेर्नित्यम् ' (पा. सू. ८. ३. ७७) इति षत्वम् । शतृप्रत्ययस्वरः । जनित्री । ऋन्नेभ्यो ङीप् । ' जनिता मन्त्रे ' इति निपातनात् णिलोपः । ' वा छन्दसि ' इति सवर्णदीर्घः । आसीनाः । ' आस उपवेशने ' इत्यस्मात् शानच् । ' ईदासः ' (पा. सू. ७. २. ८३) इतीकारः । शानचो लसार्वधातुकस्वरे कृते धातुस्वरः । मिन्वन् । ' डुमिञ् प्रक्षेपणे ' इत्यस्य लङि रूपम् । निघातः ॥

महो यदिं धिषणा शिश्नथे धात्सद्योवृधं विभ्वं[9] रोदस्योः ।
गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥ १३ ॥

महः । यदिं । धिषणा । शिश्नथे । धात् । सद्यःऽवृधम् । विऽभ्वम् । रोदस्योः ।
गिरः । यस्मिन् । अनवद्याः । समऽईचीः । विश्वाः । इन्द्राय । तविषीः । अनुत्ताः ॥१३॥

---

१. ख-ग-च-ज-न-भ-ल-स-स्रवतेः । २. ल–उत्तमम् । ३. ख-ग-च-न-भ-स–समुपार्जितकर्माणः । ४. ख-ग-घ-ज-ण–अनुतिष्ठन्तः। ५. ख-ग-घ-च-ज-ण-न-भ–अङ्गिरसः । ६. ख-ग-च-ज-ण-न-फ-भ–स्तम्भसाधनेन । ७. ख-ग-च-ज-ण–रोदसी । ८. त–ऊर्ध्वलोके ।

[v]महो महती [v]धिषणा अस्माभिः क्रियमाणेन्द्रविषया स्तुतिः [v]रोदस्योः [v]शिश्नथे द्यावापृथिव्योरन्योन्यविश्लेषाय [v]सद्योवृधं तदानीमेव वर्धमानं [v]विश्वं विभुं तयोर्धारणसमर्थं साधनं [v]यदि [v]धात् अकरोत् ततस्त्र वर्तमाने [v]यस्मिन् इन्द्रे [v]अनवद्याः दोषरहिताः [v]गिरः स्तुतिलक्षणा वाचः [v]समीचीः संगता भवन्ति। इन्द्राय इति विभक्तिव्यत्ययः। तादृशस्येन्द्रस्य [v]विश्वाः [v]नविषीः सर्वाणि बलानि [v]अनुत्ताः अपरप्रेषितानि स्वभावसिद्धान्येव ॥ धिषणा। 'शिषृपा प्रागल्भ्ये'। ल्युः 'धिष च संज्ञायाम्' इति क्युप्रत्ययः। धातोर्धिषादेशः। धृष्णोत्यनयेति धिषणा स्तुतिः। प्रत्ययस्वरः। शिश्नथे। श्नथ हिंसार्थः। अस्मात् क्विप्। 'छन्दस्युभयथा' इति तस्य सार्वधातुकत्वात् शप्। तस्य 'बहुलं छन्दसि' इति श्लुः। 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्। धातुस्वरः। धात्। दधातेश्छान्दसं लुकि रूपम्। यदियोगादनिघातः। विश्वम्। भवतेः क्विप्। 'छन्दस्युभयथा' इति यणादेशः। 'उदात्तस्वरितयोर्यणः°' इति स्वरितत्वम्। अनुत्ताः। 'णुद प्रेरणे' इत्यस्य नञ्पूर्वस्य[1] निष्ठायां 'नसत्तनिषत्तानुत्त' इत्यादिना निपातनान्निष्ठातकारस्य नत्वाभावः[1]। नञः[2] स्वरः[3] ॥

मह्या ते सख्यं वव्रिम शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥ १४ ॥

महि। आ। ते। सख्यम्। वव्रिम। शक्तीः। आ। वृत्रऽघ्ने। निऽयुतः। यन्ति। पूर्वीः ॥
महि। स्तोत्रम्। अवः। आ। अगन्म। सूरेः। अस्माकम्। सु। मघऽवन्। बोधि। गोपाः॥१४॥

हे इन्द्र [v]ते तव [v]महि महत् [v]सख्यम् [v]आ [v]वव्रिम आकामये। [v]शक्तीः त्वत्संबन्धीनि दानानि चाकामये। [v]वृत्रघ्ने वृत्रासुरस्य हन्त्रे तुभ्यं [v]पूर्वीः बह्व्यः[3] [v]नियुतः वडवाः [v]आ [v]यन्ति वहनार्थमागच्छन्ति। [v]सूरेः विदुषस्तव [v]महि महत् [v]स्तोत्रम् [v]अवः हविर्लक्षणमन्नं च [v]आ [v]अगन्म प्रापयामः[4]। हे[5] [v]मघवन् इन्द्र तादृशस्त्वं [v]अस्माकं [v]सु[5] सुष्ठु [v]गोपाः पालयिता भवामीति [v]बोधि बुध्यस्व ॥ सख्यम्। 'सख्युर्यः' इति भावार्थे यप्रत्ययः। प्रत्ययस्वरः। वव्रिम। 'वश कान्तौ'। लटि रूपम्। नियुतः। 'यु मिश्रणे'। क्विप्। नितरां युवन्ति मिश्रयन्त्यात्मानं रथेष्विति नियुतो वडवाः। अगन्म। गमेर्लङ्युत्तमबहुवचने 'बहुलं छन्दसि' इति शपो लुक्। 'स्वोश्च' इति मकारस्य नकारः। निघातः। बोधि। बुधेर्लोटि हेर्धिं रूपम्। निघातः। गोपाः। 'गुपू रक्षणे'। 'गुपूधूप°' इत्यादिना आयप्रत्ययः। तदन्तात् क्विप्। अतोलोपयलोपौ। प्रत्ययस्वरः॥

महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।
इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निम् ॥ १५ ॥

महि। क्षेत्रम्। पुरु। चन्द्रम्। विविद्वान्। आत्। इत्। सखिऽभ्यः। चरथम्। सम्। ऐरत्। इन्द्रः। नृऽभिः। अजनत्। दीद्यानः। साकम्। सूर्यम्। उषसम्। गातुम्। अग्निम्॥१५॥

---

१. च-फ-नञ्पूर्वस्य नुदविदेति विकल्पनात् निष्ठातकारस्य नत्वाभावः। २. च-ण-न-भ-ल-स-नञ्स्वरः। ३. ख-ग-च-ज-ण-बह्वयोऽपि। ४. ख-ग-च-ज-ण-न-फ-भ-याचामहे। ५. ख-ग-च-ज-ण-भ-'सु' नास्ति।

योऽयम्[1] इन्द्रः [v]महि महत् [v]क्षेत्रं केदारादि [v]पुरु प्रभूत [v]चन्द्रं हिरण्यं च[2] [v]विविद्वान् अर्थिभ्यः [v]सखिभ्यः अस्मभ्यं लम्भयन् । [v]आदित् अनन्तरं [v]चरथं चरात्मकं गवादिकं च [v]समंरत सम्यक् प्रैरयत् । दत्तवानित्यर्थः । [v]दीद्यानः दीप्यमानः सोऽयम् [v]इन्द्रः [v]नृभिः नेतृभिः कर्मसहाय-भूतैर्मरुद्भिः [v]साकं सहितः सन् [v]सूर्यं कालस्य निर्वाहकम्[3] आदित्यम् [v]उषसम् उषःकालं [v]गातुम् । गायन्ति स्तुवन्त्यस्यामिन्द्रादिदेवानिति गातुः पृथिवी । ताम् । [v]अग्निम् अग्निहोत्रादिकर्मसाधनभूतम् आहवनीयादिलक्षणमग्निं च [v]अजनत अजनयत् ॥ पुरु चन्द्रम् । संहितायां 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुडागमः । तस्य श्चुत्वेन शकारः । पदकाले नास्ति सुडागमः । पुरु । कुप्रत्ययस्वरः । चन्द्रम् । रक् । प्रत्ययस्वरः । चरथम् । चर गत्यर्थः । अस्मादौणादिकोऽथप्रत्ययः । प्रत्ययस्वरः । अजनत् । जनेर्ण्यन्तस्य लङि रूपम् । 'बहुलमन्यत्रापि संज्ञाच्छन्दसोः' इति णिलुक् । गातुम् । 'गै शब्दे' । 'गापायाहिभ्यः' इति तुप्रत्ययः । प्रत्ययस्वरः ॥ ॥ ७ ॥

अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चन्द्राः ।
मघ्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः ॥ १६ ॥

अपः । चित् । एषः । विऽभ्वः । दमूनाः । प्र । सध्रीचीः । असृजत् । विश्वऽचन्द्राः ।
मघ्वः । पुनानाः । कविऽभिः । पवित्रैः । द्युऽभिः । हिन्वन्ति । अक्तुऽभिः । धनुत्रीः ॥१६॥

[v]दमूनाः । दान्तं मनो यस्यासौ दमूनाः दान्तमनाः[4] । यद्वा दाम्यतीति दमूनाः । उपरत इत्यर्थः । स [v]एषः एवेन्द्रः[5] [v]विभ्वः व्याप्तः [v]सध्रीचीः परस्परसंगताः[6] [v]विश्वश्चन्द्राः विश्वस्याह्लादयित्रीः । विश्वस्याह्लादो याभ्यस्ता इति वा । एवंभूताः [v]अपः [v]प्र [v]असृजत सृष्टवान् । सृष्ट्वाश्च ता आपः [v]मघ्वः माधुर्योपेतान् सोमान्[7] [v]कविभिः [v]पवित्रैः अग्निवायुसूर्यैः [v]पुनानाः शोधयिष्यः [v]धनुत्रीः सर्वस्य जगतः प्रीणयित्र्यः सत्यः[8] [v]द्युभिः दिवसैः [v]अक्तुभिः [v]चित रात्रिभिः च[9] [v]हिन्वन्ति । रात्रिंदिवं[10] सर्वं जगत् स्वस्वव्यापारप्रवणं कुर्वन्तीत्यर्थः ॥ दमूनाः । 'दमु उपशमे' । 'दमेरूनसिः' इत्यूनसिप्रत्ययः । दाम्यतीति दमूनाः । यद्वा दान्तशब्दस्य दभावो मनसो मकारात परस्याकारस्य ऊकारश्छान्दसः । असृजत् । 'सृज विसर्गे' । हिन्वन्ति । 'हि गतौ' । निघातः । धनुत्रीः । 'धन धान्ये' इत्यस्मात् अशित्रादित्वात उत्रप्रत्ययः । शार्ङ्गरवादिषु क्वीन् द्रष्टव्यः । निस्वरः ॥

---

१. ख-ग-च-ज-फ-सोऽयम् ; त-अयम् । २. ख-ग-घ-च-ज-ण-न-फ-भ-स-'च' नास्ति । ३. ख-ग च-फ-भ-निवासम् । ४. ख-ग-च-ज-ण-फ-भ-'दान्तमनाः' नास्ति । ५. ख-ग-च-ज-ण-न-भ-स-देवेन्द्रः । ६. ख-ग-च-ज-ण-त-न-भ-परस्परं संगताः । ७. च-त-'सोमान्' नास्ति । ८. त-न-स-'सत्यः' नास्ति । ९. न-ल-स-अक्तुभी रात्रिभिः । १०. ग-स-रात्रिदिवम् ; च-न-ल-रात्रिदिवसम् ।

अनु॑ कृ॒ष्णे व॑सु॒धिती॑ जिहाते उ॒भे सूर्य॑स्य म॒ंहना॑ यजत्रे ।
परि॒ यत्ते॑ महि॒मान॑ं वृ॒जध्यै॒ सखा॑य इन्द्र॒ काम्या॑ ऋजि॒प्याः ॥ १७ ॥

अनु॑ । कृ॒ष्णे इति॑ । व॒सु॒धिती॒ इति॑ वसु॑ऽधिती । जि॒हा॒ते॒ इति॑ ।
उ॒भे इति॑ । सूर्य॑स्य । म॒ंहना॑ । यजत्रे॒ इति॑ ।
परि॑ । यत् । ते॒ । म॒हि॒मान॑म् । वृ॒जध्यै॑ । सखा॑यः । इ॒न्द्र॒ । काम्याः॑ । ऋ॒जि॒प्याः ॥ १७ ॥

हे ᵛइन्द्र ᵛसूर्यस्य सुष्ठु जगतः प्रेरकस्य तव ᵛमंहना महत्त्वेन सामर्थ्येन ᵛवसुधिती वस्तव्यपदार्थधारणोपेते ᵛयजत्रे यजनार्हे ते ᵛउभे ᵛकृष्णे अहोरात्रे ᵛअनु ᵛजिहाते पुनःपुनरावृत्य वर्तेते । किंच । ᵛऋजिप्याः ऋजुगतयः ᵛसखायः ते मित्रभूताः ᵛकाम्याः कमनीया मरुतः ᵛवृजध्यै कर्मविघ्नकारिणामसुराणां वर्जनाय परिभवाय । ᵛयत् यस्य ᵛते तव ᵛमहिमानं सामर्थ्यमनुसृत्य ᵛपरि परितः प्रभवन्ति ॥ जिहाते । ' ओहाङ् गतौ ' । जुहोत्यादिः । ' भृञामित् ' इत्यभ्यासस्येत्वम् । निघातः । मंहना । ' महि वृद्धौ ' । ल्युट् । लित्स्वरः । वृजध्यै । ' वृजी वर्जने ' । तुमर्थे कध्यैप्रत्ययः । किरवादेशाभावः । प्रत्ययस्वरः । काम्याः । कमेर्ण्यन्तस्य ' अचो यत् ' इति यत्प्रत्ययः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । ऋजिप्याः । ' ओप्यायी वृद्धौ ' । क्विप् । ' लोपो व्योर्वलि ' इति यलोपः । पूर्वपदस्योकारस्येकारो व्यत्ययेन । बहुवचनस्यैकवचनं छान्दसम् । कृदुत्तरपदप्रकृतिस्वरः ॥

पति॑र्भव वृत्रहन्त्सू॒नृता॑नां गि॒रां वि॒श्वायु॑र्वृष॒भो व॑यो॒धाः ।
आ नो॑ गहि स॒ख्येभिः॑ शि॒वेभि॑र्म॒हान्म॒हीभि॑रू॒तिभिः॑ सर॒ण्यन् ॥ १८ ॥

पतिः॑ । भ॒व॒ । वृ॒त्र॒ऽह॒न् । सू॒नृता॑नाम् । गि॒राम् । वि॒श्वऽआ॑युः । वृ॒ष॒भः । व॒यः॒ऽधाः ।
आ । नः॒ । ग॒हि॒ । स॒ख्येभिः॑ । शि॒वेभिः॑ । म॒हान् । म॒हीभिः॑ । ऊ॒तिऽभिः॑ । स॒र॒ण्यन् ॥ १८ ॥

हे ᵛवृत्रहन् इन्द्र ᵛविश्वायुः । विश्वं संपूर्णमायुर्यस्यासौ विश्वायुः । अविनाशी ᵛवृषभः कामानां वर्षिता ᵛवयोधाः अन्नस्य दाता तादृशस्त्वं ᵛसूनृतानां ᵛगिराम् अस्माभिः क्रियमाणानां प्रियतमानां वाचां ᵛपतिः स्वामी ᵛभव । ᵛसरण्यन् सरणं यज्ञार्थं[1] गमनमिच्छन् ᵛमहान् ᵛमहीभिः महतीभिः ᵛऊतिभिः रक्षाभिः ᵛशिवेभिः कल्याणैः ᵛसख्येभिः फलप्रदानरूपोपकारलक्षणैः सख्यैश्च सहितस्त्वं ᵛनः अस्मान् प्रति ᵛआ ᵛगहि यज्ञार्थमागच्छ ॥ सूनृतानाम् । ' ऊन परिहाणे ' । सुतरामूनयत्यप्रियमिति सूनृतिः प्रियमुच्यते । तच्च तद्वतं[2] सत्यं चेति सूनृतम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्[3] । वयोधाः । वयस्युपपदे दधातेर्विच् । गहि । गमेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । सेर्हिरादेशः । अपिच । तस्य ङित्त्वात् ' अनुदात्तोपदेश° ' इत्यादिना मलोपः । तस्यासिद्धत्वात् ' अतो हेः ' इति हेर्लुक् न भवति । निघातः । सरण्यन् । सरणशब्दात् क्यच् । एकादेशस्वरः ॥

---

१. त–यज्ञार्हम् । २. ख-ग-च-ज-ण-त-न-भ-स–तद्वतं च । ३. ख-ग-च-ज-ण-न-भ–इत्युत्तरपदोदात्तत्वम् ।

तमङ्गिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजाम् ।
द्रुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः ॥ १९ ॥

तम् । अङ्गिरस्वत् । नमसा । सपर्यन् । नव्यम् । कृणोमि । सन्यसे । पुराऽजाम् ।
द्रुहः । वि । याहि । बहुलाः । अदेवीः ।
स्वरिति स्वः । च । नः । मघऽवन् । सातये । धाः ॥ १९ ॥

हे इन्द्र [v]अङ्गिरस्वत् अङ्गिरस इव [v]नमसा स्तोत्रेण [v]सपर्यन् पूजयन् विश्वामित्रोऽहं [v]तं तादृशमहिमोपेतं [v]पुराजां पुरातनं त्वां [v]सन्यसे संभजनाय [v]नव्यं [v]कृणोमि । स्तोतव्यतयाभिनवं करोमि । [v]अदेवीः तमोरूपत्वेनाद्योतमानान् [v]बहुलाः बहून् [v]द्रुहः द्रोग्धॄन् शत्रुभूतान् राक्षसान् [v]वि [v]याहि विशेषेण मृतिं प्रापय । हे [v]मघवन् इन्द्र [v]नः अस्मभ्यं [v]स्वः स्वं[1] धनं[1] [v]च [v]सातये संभजनार्थं [v]धाः धेहि ॥ अङ्गिरस्वत् । अङ्गिरस इव । 'तेन तुल्यम्' इति वतिप्रत्ययः । 'नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्' इति भसंज्ञायां सकारस्य रुत्वाभावः। सपर्यन् । सपरशब्दः कण्ड्वादिः। नव्यम् । 'णु स्तुतौ' इत्यस्मात् 'अचो यत्' इति यत्प्रत्ययः । 'धातोस्तन्निमित्तस्य' इति वान्तादेशः । 'यतोऽनावः' इत्याद्युदात्तत्वम् । कृणोमि । कृवेर्लटि रूपम् । सन्यसे । सनतेर्भावे क्विप् । 'यसु प्रयत्ने' । अस्मात् क्विप् । सनः संभजनस्य यसे यत्नाय । संभजनार्थमित्यर्थः। पुराजाम् । जनेर्विटि आत्वे रूपम। याहि । यातेर्लोटि रूपम् । स्वः । 'स्वरादिनिपातमव्ययम्' इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सुपो लुक् । सातये । 'षण[3] संभक्तौ' । भावे क्तिन् । 'जनसन' इत्यादिना आत्वम् । 'ऊतियूति' इत्यादिना निपातनादुदात्तः ॥

मिहः पावकाः प्रततता अभूवन्त्स्वस्ति नः पिपृहि पारमासाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः ॥ २० ॥

मिहः । पावकाः । प्रऽततताः । अभूवन् । स्वस्ति । नः । पिपृहि । पारम् । आसाम् ।
इन्द्र । त्वम् । रथिरः । पाहि । नः । रिषः । मक्षुऽमक्षु । कृणुहि । गोऽजितः । नः ॥२०॥

हे [v]इन्द्र ते [v]पावकाः पापानां शोधयित्र्यः [v]मिहः सेचनसाधनान्यापः [v]प्रततताः लोके प्रकर्षेण विस्तृताः [v]अभूवन् । [v]आसाम् अपां [v]स्वस्ति विनाशरहितं [v]पारं तीरं [v]नः अस्मदर्थं [v]पिपृहि जलैः संपूर्णं कुरु । जलभवारपारीणं कुर्वित्यर्थः । [v]रथिरः रथवान् [v]त्वं [v]रिषः हिंसकात् शत्रोः सकाशात् [v]नः अस्मान् [v]पाहि पालय । अनन्तरं [v]नः अस्मान् [v]मक्षुमक्षु[4] अतिशीघ्रं[4] [v]गोजितः गवादिपशूनां जेतॄन् [v]कृणुहि कुरु । वृष्टिप्रदानेन तटाकादिजलाशयान् संपूर्णान् कृत्वा गवादिधनयुक्तान् कुर्विति भावः ॥ अभूवन् । 'भू सत्तायाम्' इत्यस्य लुङि रूपम् । निघातः । पिपृहि । 'पॄ पालनपूरणयोः' ।

---

१. ख-ग-च-ज-ण-न-भ-स–स्वधनम् । २. ख-ग-ज-ण-न-भ-स–सपरः; च–सपर पूजायाम् । ३. स–वन षण । ४. ख-ग-च-न-स–मक्षु शीघ्रम्; भ–मक्षुमक्षु शीघ्रम् ।

नृहोऽयादिः । ' अर्तिपिपर्त्योश्च ' इत्यभ्यासस्येत्वम् । हेर्ङित्त्वादगुणः । निघातः । रथिरः । मत्वर्थे ' मेधारथाभ्यामिरन्निरचौ ' इतीरच्प्रत्ययः । रिपः । ' रिष हिंसायाम् ' । क्विप् । ' सावेकाचः ' इति विभक्तेरुदात्तत्वम् । मक्षूमक्षू । ' निरयवीप्सयोः ' इति द्विर्वचनम् । संहितायाम् ' ऋचि तुनुघमक्षुतङ् ' इति दीर्घः ॥

अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥ २१ ॥

अदेदिष्ट । वृत्रऽहा । गोऽपतिः । गाः । अन्तरिति । कृष्णान् । अरुषैः । धामऽभिः । गात् ।
प्र । सूनृताः । दिशमानः । ऋतेन । दुरः । च । विश्वाः । अवृणोत् । अप । स्वाः ॥२१॥

[v]वृत्रहा वृत्रस्य हन्ता [v]गोपतिः गवां स्वामी सन्निन्द्रः [v]गाः [v]अदेदिष्ट अस्मभ्यं दिशतु । तथा [v]कृष्णान् कर्मविघ्नकारिणोऽसुरान् [v]अरुषैः आरोचमानैः[1] [v]धामभिः तेजोभिः [v]अन्तर् अन्तर्धानं विनाशं [v]गात् गमयतु । तथा [v]सूनृताः प्रियतमा गाः [v]ऋतेन प्रतारणवर्जितेन[2] सत्येन वाक्येन [v]प्र [v]दिशमानः अङ्गिरोभ्यः प्रदिशन्निन्द्रः [v]विश्वाः सर्वाणि [v]दुरः गवां स्वेच्छया निर्गमनद्वाराणि [v]स्वाः स्वकीया गाः [v]च [v]अप [v]अवृणोत् । व्रजे गाः स्थापयित्वा तानि द्वाराण्याच्छादितवानित्यर्थः ॥ अदेदिष्ट । ' दिश अतिसर्जने ' इत्यस्मात् यङ्लुकि लङि व्यत्ययेनात्मनेपदम् । अडागमस्वरः । गोपतिः । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरः । गात् । ' इण् गतौ ' । अन्तर्भावितण्यर्थः । दिशमानः । दिशेः व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरेणानुदात्तत्वे शरस्वरः । अवृणोत् । ' वृञ् वरणे ' इत्यस्य लङि रूपम् ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ २२ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥२२॥

व्याख्यातेयमृक् ॥ ॥ ८ ॥

' इन्द्र सोमं सोमपते ' इति सप्तदशर्चं तृतीयं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च—' इन्द्र सोमं त्र्यूना ' इति । पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि मरुत्वतीये ' इन्द्र सोमम् ' इतीदं सूक्तं निविद्धानीयम्[3] । ' द्वितीयस्य ' इति खण्डे सूत्रितम्[4]—' इन्द्र सोमं पा त उतिरवमेति मध्यंदिनः ' (आश्व. श्रौ. ७. ६) इति । गोसवविषमयोरपि मरुत्वतीयशस्त्र एतत्सूक्तम् । सूत्रितं च—' इन्द्र

---

१. ख-ग-घ-च-ज-ण-त-न-प-फ-भ-स-आरोचनैः । २. ख-ग-च-ण-भ-प्रतारणावर्जितेन । ३. ख-न-च्च-ज-ण-त-न-भ-स-निविद्धानम् । ४. ख-ग-च-ज-ण-न-भ-सूत्रितं च ।

सोममेतायामेति मध्यंदिनः' (आश्व. श्रौ. ९. ८) इति । उक्तिद्वलभिदोरपि मरुत्वतीय एतत्सूक्तम् । सूत्रितं च—' इन्द्र सोममिन्द्रः पूर्भिदिति मध्यंदिनः ' (आश्व. श्रौ. ९. ८) इति ॥

इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥ १ ॥

इन्द्र । सोमम् । सोमऽपते । पिब । इमम् । माध्यंदिनम् । सवनम् । चारु । यत् । ते ।
प्रऽप्रुथ्य । शिप्रे इति । मघऽवन् । ऋजीषिन् । विऽमुच्य । हरी इति । इह । मादयस्व ॥१॥

विश्वामित्रो ब्रूते । [V]सोमपते सोमस्याधिपते हे [V]इन्द्र [V]इमम् अस्माभिर्माध्यंदिने सवने क्रियमाणं [V]सोमं सोमरसं [V]पिब । [V]यत् यस्मात् [V]ते त्वदर्थं क्रियमाणं [V]माध्यंदिनं मध्यंदिनसंबन्धि [V]सवनं निष्केवल्याख्यं शस्त्रं [V]चारु रमणीयं वर्तते । [V]मघवन् धनवन् [V]ऋजीषिन् । ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते । तद्वन् हे इन्द्र [V]हरी रथे योजितावश्वौ रथात् [V]विमुच्य [V]शिप्रे हनू [V]प्रप्रुथ्य अत्रत्येन ग्रासेन पूरयित्वा [V]इह देवयजनदेशे [V]मादयस्व तावश्वौ हर्षय ॥ प्रप्रुथ्य । 'प्रोथृ पर्याप्तौ' इत्यस्य ल्यपि रूपम् । ह्रस्वश्छान्दसः । लित्स्वरः । ऋजीषिन् । 'अर्ज पर्ज अर्जने' इत्यस्मात् 'अर्जेश्च ऋजि च' (उ. सू. ४. ४६८) इतीषन्प्रत्ययः ऋजि इत्यादेशश्च धातोः । अर्ज्यन इत्यृजीषम् । तदस्यास्ति इति इनिप्रत्ययः । आमन्त्रितत्वान्निघातः । मादयस्व । मदि स्तुत्यादिषु । हेतुमण्णिच्[1] । निघातः ॥

गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥ २ ॥

गोऽआशिरम् । मन्थिनम् । इन्द्र । शुक्रम् । पिब । सोमम् । ररिम । ते । मदाय ।
ब्रह्मऽकृता । मारुतेन । गणेन । सऽजोषाः । रुद्रैः । तृपत् । आ । वृषस्व ॥ २ ॥

हे [V]इन्द्र [V]गवाशिरं गव्यस्य पयस आशीर्मिश्रणं यस्मिन् तं [V]सोमम् । अपि च [V]मन्थिनं मन्थसंयुक्तं [V]शुक्रम् अभिनवं यद्वा शुक्रामन्थिग्रहे वर्तमानम् । एवं त्रिषु सवनेषु वर्तमानमिमं सोमं [V]पिब । [V]ते तव [V]मदाय हर्षाय [V]ररिम तं सोमं वयं प्रयच्छामः । [V]मारुतेन । मरुतां गणो मारुतः । स च ब्रह्मकृत् । ब्रह्म स्तोत्रं करोतीति ब्रह्मकृत्[2] । इन्द्रस्तोत्रं कुर्वाणेन मारुतेन [V]गणेन [V]रुद्रैः एकादशसंख्याकैः रुद्रैश्च [V]सजोषाः संगतस्त्वं [V]तृपत् सोमपानेन तृप्यन् [V]आ [V]वृषस्व । तमिमं सर्वतो जठरे सिञ्च धारय ॥ गवाशिरं । श्रीणातेः[3] आङ्पूर्वात् क्विपि 'अपस्पृधेथामानृचुः' इत्यादिना निपातनात् आशिरादेशः[4] । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । पिबा[5] । 'व्यचोऽतस्तिङः' इति संहितायां दीर्घः ।

१. ल-स-हेतुमति णिच् । २. ख-ग-च-ज-ण-न-भ-स-ब्रह्मकृता । ३. ख-ग-च-ज-ण-न-भ-श्रणातेः । ४. ल-शिरादेशः । ५. ख-ग-च-ज-ण-त-न-भ-स-पिब ।

ररिम । रातेः छान्दसं[1] वर्तमाने लिटि रूपम् । असमानवाक्यत्वान्निघाताभावः । ' आगमा अनुदात्ताः ' इति हृटोऽनुदात्तत्वान प्रत्ययस्वरः । तृपत् । ' तृप प्रीणने ' । तुदादिः । आगमानुशासनस्यानित्यत्वान नुमभावः । तृपस्व । ' तृपु सेचने ' । व्यत्ययेन शः ॥

ये ते शुष्मं ये तविषीमवर्धन्नर्चन्त इन्द्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ॥

ये । ते । शुष्मम् । ये । तविषीम् । अवर्धन् । अर्चन्तः । इन्द्र । मरुतः । ते । ओजः । माध्यंदिने । सवने । वज्रऽहस्त । पिब । रुद्रेभिः । सऽगणः । सुऽशिप्र ॥ ३ ॥

हे [v]इन्द्र [v]ये [v]मरुतः [v]ते तव [v]शुष्मं शत्रूणां[2] शोषकं तेजः [v]ये च मरुतः [v]तविषीं बलं च [v]अवर्धन्[3] युद्धसहकारितयावर्धयन् ते मरुतः [v]अर्चन्तः त्वां स्तुवन्तः सन्तः [v]ते तव [v]ओजः युद्धसामर्थ्यम्[4] अवर्धयन् । [v]वज्रहस्त वज्रयुक्तः[5] हस्तः[6] यस्येति तादृश [v]सुशिप्र शोभनहनो । ' शिप्रे हनू नासिके वा ' इति यास्कः । हे इन्द्र [v]रुद्रेभिः । रोदयन्ति शत्रूनिति रुद्राः मरुतः । तैः [v]सगणः त्वं [v]माध्यंदिने [v]सवने सोमं [v]पिब ॥ अवर्धन् । ' वृधु वर्धने ' । अन्तर्भावितण्यर्थः । यङ्लुगयोगादनिघातः । माध्यंदिने । उत्सादित्वादञ् । जित्त्वादाद्युदात्तः ॥

त इन्वस्य मधुमद्विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥ ४ ॥

ते । इत् । नु । अस्य । मधुऽमत् । विविप्रे । इन्द्रस्य । शर्धः । मरुतः । ये । आसन् । येभिः । वृत्रस्य । इषितः । विवेद । अमर्मणः । मन्यमानस्य । मर्म ॥ ४ ॥

[v]ये [v]मरुतः [v]इन्द्रस्य [v]शर्धः बलभूताः [v]आसन् [v]ते [v]इत् त एव मरुतः [v]अस्य । द्वितीयार्थे षष्ठी । इममिन्द्रं [v]मधुमत् । तव सहाया वयमास्महे त्वं युद्धमभिगच्छेति माधुर्योपेतं वाक्यं यथा भवति तथा [v]विविप्रे [v]नु क्षिप्रं प्रेरयन्[6] । [v]येभिः यैर्युद्धसहायैर्मरुद्भिः [v]इषितः प्रेरित इन्द्रः [v]अमर्मणः परैः अविदितमर्मस्थानस्य अत एव [v]मन्यमानस्य न कोऽपि मम हन्तेत्यभिमन्यमानस्य [v]वृत्रस्य असुरस्य [v]मर्म यस्मिन् स्थाने प्रहतौ सत्यां स मरिष्यति तादृशं स्थानं [v]विवेद अज्ञासीत्[7] ॥ विविप्रे । ' विप क्षेपणे ' इत्यस्य लिटि व्यत्ययेनात्मनेपदम् । इरेचः ' इरयो रे ' इति रे इत्यादेशः । निघातः । आसन् । ' अस भुवि ' इत्यस्य लडि रूपम् । यङ्लुगयोगान्निघाताभावः । विवेद । ' विद ज्ञाने ' इत्यस्य लिटि रूपम् । लिट्स्वरः । मर्म । ' मृङ् प्राणत्यागे ' इत्यस्मादौणादिको मनिन् । नित्स्वरः ॥

१. च-ज-ण-भ—छन्दसि । २. ख-ग-घ-च-ज-ण-न-प-फ-भ-स—' शत्रूणां शोषकं ' नास्ति । ३. ख-ग-घ-च-ज-ण-फ-भ—अवर्धन् अवर्धयन् । ४. च-फ—विविधसामर्थ्यम् । ५. स—वज्रयुक्तौ हस्तौ । ६. च—अभिप्रेरयन् । ७. फ—ज्ञातवान् ।

मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥ ५ ॥

मनुष्वत् । इन्द्र । सवनम् । जुषाणः । पिब । सोमम् । शश्वते । वीर्याय ।
सः । आ । ववृत्स्व । हरिऽअश्व । यज्ञैः । सरण्युऽभिः । अपः । अर्णा । सिसर्षि ॥ ५ ॥

हे [v]इन्द्र [1]मनुष्वत् मनोर्यज्ञमिव ममेदं [1]सवनं यज्ञं [v]जुषाणः सेवमानस्त्वं [v]शश्वते शाश्वताय [v]वीर्याय परपरिभवलक्षणाय सामर्थ्यायेमं [v]सोमं [v]पिब । हे [1]हर्यश्व हरितवर्णाश्वोपेत[1] [v]सः तादृशस्त्वं [v]यज्ञैः यजनीयैः मरुद्भिः साकम् [v]आ [v]ववृत्स्व आगच्छ । किंच [v]सरण्युभिः एकश्रुतिमन्मन्त्रानात्मन इच्छद्भिः यद्वा सरण्युभिः सरणशीलैर्मरुद्भिः सहितस्त्वम् [1]अपः अन्तरिक्षस्थितान्युदकानि [1]अर्णा पार्थिवान्युदकानि [v]सिसर्षि प्रापय । यद्वा अपः । पञ्चम्यन्तमेतत्पदम् । अपो व्यासादन्तरिक्षात् सकाशात अर्णांसि प्रापय[2] ॥ ववृत्स्व । ' वृतु वर्तने ' । व्यत्ययेन शपः श्लुः । लोटि रूपम् । सरण्युभिः । रण शब्दार्थः । क्विप् । समानो रणो ध्वनिर्येषां ते सरणा मन्त्राः । तानिच्छन्तः । सुपः क्यच् । ' क्याच्छन्दसि ' इति उप्रत्ययः । यद्वा ' सृ गतौ ' । ' सृयुवचिभ्योऽन्युजागृजक्रुचः ' (उ. सू. ३. ३६१) इत्यन्युच्प्रत्ययः । ' रषाभ्यां ' (पा. सू. ८. ४. १) इति णत्वम् । चित्त्वादन्तोदात्तः । अपः । ' आपू व्याप्तौ ' । ' आप्नोतेः क्विप् ह्रस्वश्च ' इति क्विप् धातोर्ह्रस्वश्च । ' सावेकाचः ' इति विभक्तेरुदात्तत्वम् । सिसर्षि । ' सृ गतौ ' । छान्दसो जुहोत्यादिः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् ॥ ॥ ५ ॥

त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँइव प्रासृजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन वव्रिवांसं परि देवीरदेवम् ॥ ६ ॥

त्वम् । अपः । यत् । ह । वृत्रम् । जघन्वान् । अत्यान्ऽइव । प्र । असृजः । सर्तवै । आजौ ।
शयानम् । इन्द्र । चरता । वधेन । वव्रिऽवांसम् । परि । देवीः । अदेवम् ॥ ६ ॥

हे [v]इन्द्र [v]त्वं [v]देवीः देवनशीलाः [v]अपः [v]परि [v]वव्रिवांसं परित आवृत्य वर्तमानमत एव [v]अदेवं बहूदकतयास्वच्छत्वेनाप्रतिभासमानं [v]शयानम् एकत्र निश्चलतया वर्तमानं [v]वृत्रं मेघं [v]यत यदा [v]चरता तमुद्दिश्य वर्तमानेन [v]वधेन युद्धेन [v]जघन्वान् हतवानसि तदा त्वम् [v]आजौ युद्धे [v]सर्तवै अतिवेगगमनाय [v]अत्यानिव यथाश्वान्[3] प्रेरयसि तथा त्वमपः उदकान्यन्तरिक्षादाकाशात् [v]प्रासृजः [v]ह प्रकर्षेण मेघभेदनं कृत्वासृजः खलु । तं यजाम इत्युत्तरेणान्वयः ॥ जघन्वान् । 'हन हिंसागत्योः ' इत्यस्य क्वसौ ' विभाषा गमहनविदविशाम् ' इनीटो विकल्पितत्वादत्र इडभावः । ' अभ्यासाच्च ' इति हकारस्य घत्वम् । प्रत्ययस्वरः । असृजः । ' सृज विसर्गे ' । शविकरणः[4] । यद्योगादनिघातः । सर्तवै । ' सृ गतौ ' । तुमर्थे तवैप्रत्ययः । ' अन्तश्च तवै युगपत् ' इति धातोः प्रत्ययस्य चोदात्तत्वम् ।

---

१. न-ल-स-' हरितवर्णाश्वोपेत ' नास्ति । २. ख-ग-ज-ण-भ-स-प्रापय च । ३. ख-प-फ-भ-यथा त्वमश्वान् । ४. च-फ-शविकरणः ।

आजौ । ' अज गतिक्षेपणयोः ' । ' अज्यतिभ्यां च ' (उ. सू. ४. ५७०) इति इण्प्रत्ययः । णित्त्वादुपधावृद्धिः । अजन्ति गच्छन्त्यस्मिन्निरयाजिर्युद्धम् । प्रत्ययस्वरः । सर्तवाजावित्यत्र संहितायाम् आयादेशे कृते तस्य ' लोपः शाकल्यस्य ' इति यकारलोपः । सर्वविधीनां छन्दसि विकल्पितत्वात् सवर्णदीर्घत्वे कर्तव्ये यलोपो नासिद्धो भवति । सवर्णदीर्घः । शयानम् । ' शीङ् स्वप्ने ' । शानच् । अदादित्वाच्छपो लुक् । ङित्त्वालसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः । वधेन । हन्तेर्भावे ' हनश्च वधः ' इत्यप्प्रत्ययो वधादेशश्च धातोरन्तोदात्तश्च । वव्रिवांसम् । ' वृञ् वरणे ' इत्यस्य क्वसौ इडागमश्छान्दसः । प्रत्ययस्वरः ॥

यजा॑म इन्नमसा वृ॒द्धमिन्द्रं॑ बृ॒हन्त॑मृ॒ष्वमज॑रं युवा॑नम् ।
यस्य॑ प्रि॒ये म॒मतु॑र्य॒ज्ञिय॑स्य॒ न रोद॑सी महि॒मानं॑ म॒माते॑ ॥ ७ ॥

यजा॑मः । इत् । नम॑सा । वृ॒द्धम् । इन्द्र॑म् । बृ॒हन्त॑म् । ऋ॒ष्वम् । अज॑रम् । युवा॑नम् ।
यस्य॑ । प्रि॒ये इति॑ । म॒मतुः॑ । य॒ज्ञिय॑स्य । न । रोद॑सी॒ इति॑ । म॒हि॒मान॑म् । म॒माते॒ इति॑ ॥ ७ ॥

[v]नमसा हविर्लक्षणेनान्नेन [v]वृद्धं प्रवृद्धम् अत एव [v]बृहन्तं महान्तम् [1]ऋष्वम् । ऋष्यते गम्यते स्तुतिलक्षणैर्मन्त्रैरिति ऋष्वं स्तोतव्यम् । [v]अजरं जरारहितम् अत एव [v]युवानं नित्यतरुणम् एवंविधम् [1]इन्द्रं [v]यजाम [v]इत् । कुशिका वयं यज्ञसिद्ध्यर्थं स्तुतिवाक्यैः पूजयामः । [v]प्रिये प्रियतमे अपरिमिते [v]रोदसी द्यावापृथिव्यौ [v]यज्ञियस्य यज्ञार्हस्य [v]यस्य इन्द्रस्य तव [v]महिमानं वैभवं [v]न [v]ममतुः न परिच्छेत्तुं शक्नुतः । न [v]ममाते इति द्वितीयं क्रियापदमादरार्थम् ॥ यजामः । यजेर्लटि रूपम् । ऋष्वम् । ' ऋषी गतौ ' । ' सर्वनिघृष्वऋष्व° ' इत्यादिना वप्रत्ययान्तो निपातितः । प्रत्ययस्वरः[1] । प्रिये । ' ईदूदेत्° ' इति प्रगृह्यसंज्ञा । ममतुः । ' मा माने ' इत्यस्य लिटयतुसि रूपम् । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । महिमानम् । महिशब्दात् तस्य भावः इत्यर्थे पृथ्वादित्वादिमनिच् । चित्स्वरः । ममाते । ' माङ् माने शब्दे च ' इत्यस्य लिटयातामि रूपम् ॥

इन्द्र॑स्य॒ कर्म॑ सु॒कृता॑ पु॒रूणि॑ व्र॒तानि॑ दे॒वा न मि॑नन्ति॒ विश्वे॑ ।
दा॒धार॒ यः पृ॑थि॒वीं द्याम्ते॒मां ज॒जान॒ सूर्यं॑मु॒षस॑ꣳ सु॒दꣳसाः॑ ॥ ८ ॥

इन्द्र॑स्य । कर्म॑ । सु॒ऽकृ॒ता । पु॒रूणि॑ । व्र॒तानि॑ । दे॒वाः । न । मि॒न॒न्ति॒ । विश्वे॑ ।
दा॒धार॑ । यः । पृ॒थि॒वीम् । द्याम् । उ॒त । इ॒माम् । ज॒जान॑ । सूर्य॑म् । उ॒षस॑म् । सु॒ऽदꣳसाः॑ ॥ ८ ॥

[v]विश्वे सर्वे [v]देवाः [v]इन्द्रस्य तव [v]कर्म कर्माणि [v]सुकृता सुकृतानि सुष्ठु निर्मितानि पृथिव्यादीनि [v]पुरूणि बहूनि [v]व्रतानि यज्ञादीनि च [v]न [v]मिनन्ति । एतानि[2] सर्वाणि तव[2] कर्माणि न हिंसन्ति । किंत्वादियन्ते । किंच [v]यः अयमिन्द्रः [v]पृथिवीं भूलोकं [v]द्यां द्युलोकम् [v]उत अपि च

१. ल–प्रत्ययस्वरः । यज्ञियस्य । यज्ञशब्दादर्हत्यर्थे ' यज्ञर्तिभ्यां घखञौ ' इति घप्रत्ययः । घस्य इयादेशः । प्रत्ययस्वरः । २. ख-ग-घ-च-ज-ण-न-भ–सर्वाणि ।

[v]इमाम् इममन्तरिक्षलोकं च एतांस्त्रीन् लोकान् [v]दाधार। [v]सुदंसाः सुकर्मा शोभनकर्मा सन्निन्द्रः [v]सूर्यं लोकप्रकाशकमादित्यम् [v]उषसम् अग्निहोत्रादिकर्मनिर्वाहकमुषःकालं [v]जजान उत्पादयामास। 'इन्द्रस्य कर्म सुकृता पुरूणि' इत्येतत्पदकदम्बकम् 'एको द्वे वसुमती' इत्यस्मिन् वर्गे पठितम् (ऋ. सं. ३.३०.१३)। अत्रापि तदेव[1] पठ्यते[1] किमिति[2] पदकाले नोत्सृज्यत इति चेन्न। वाक्यभेदात्। तत्र 'इन्द्रस्य कर्म सुकृता पुरूणि' इत्येकं वाक्यम्। अत्र तु 'कर्म सुकृता' इत्येकं वाक्यं 'पुरूणि व्रतानि' इत्यपरम्। किंच तत्रत्यं पदकदम्बकं प्रथमान्तम् अत्रत्यं द्वितीयान्तम्। अतो वाक्यभेदात् विभक्तिभेदाच्च[3] पदकाले नोत्सृज्यते ॥ मिनन्ति। 'मीञ् हिंसायाम्' इत्यस्य लटि रूपम्। निघातः। दाधार। 'धृञ् धारणे' इत्यस्य लिटि रूपम्। तुजादित्वात् अभ्यासस्य[4] दीर्घः[5]। लित्स्वरः। जजान। 'जन जनने' इत्यस्यान्तर्भावितण्यर्थस्य लिटि रूपम्। लित्स्वरः। सुदंसाः। 'सोर्मनसी०' इत्युत्तरपदाद्युदात्तत्वम् ॥

अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमम्।
न द्यावं इन्द्र तवसस्त ओजो नाहा न मासाः शरदो वरन्त ॥ ९ ॥

अद्रोघ। सत्यम्। तव। तत्। महित्वम्। सद्यः। यत्। जातः। अपिबः। ह। सोमम्।
न। द्यावः। इन्द्र। तवसः। ते। ओजः। न। अहा। न। मासाः। शरदः। वरन्त ॥९॥

[v]अद्रोघ द्रोहवर्जित हे इन्द्र [v]तव[6] [v]तन्महित्वं तादृशं माहात्म्यं [v]सत्यं यथार्थम्। [v]यत् यस्मात् [v]जातः उत्पन्नः [v]सद्यः तदानीमेव [v]सोमम् अस्माभिर्दीयमानं सोमरसम् [v]अपिबः। [v]ह प्रसिद्धौ। किंच [v]तवसः बलवतः [v]ते तव [v]ओजः सामर्थ्यं [v]द्यावः दिवः[7] दिवोपलक्षिताः सर्वे लोकाः [v]न [v]वरन्त न वारयन्ति। किंच [v]अहा प्रतिपदादीन्यहानि न वारयन्ति। तथा [v]मासाः चैत्राद्याः [v]शरदः संवत्सराश्च तव सामर्थ्यं न वारयन्ति'। किंतु[8] तव सामर्थ्यमनुसृत्य सर्वे वर्तन्त इति भावः ॥ अद्रोघ। 'आमन्त्रितस्य च' इति षाष्ठिकमाद्युदात्तत्वम्। अपिबः। यद्योगादनिघातः। मासाः। 'मसी परिमाणे'। मस्यते परिमीयते त्रिंशता दिनैरिति मासः। कर्मणि घञ्। ञित्त्वादाद्युदात्तः। शरदः। 'शॄ हिंसायाम्' इत्यस्मात् 'शृदृभसोऽदिः' इत्यधिकरणेऽदिप्रत्ययः। शीर्यन्तेऽस्यां तृणगुल्मवनस्पतीनां[9] तेजांसीति शरत्। प्रत्ययस्वरः। वरन्त। 'वृञ् वरणे'। अन्तर्भावितण्यर्थोऽत्र निवारणे वर्तते। भौवादिकः। छान्दसे लङि रूपम्। निघातः ॥

सद्यस्कीनाम्न्यकाहे निष्केवल्यशस्त्रे 'त्वं सद्यो अपिबः' इति सूक्तमुखीया। सूत्रितं च—'त्वं सद्यो अपिबो जात इन्द्रानु त्वाहिन्ने अध देव देवाः' (आश्व. श्रौ. ९. ५) इति ॥

---

१. ख-ग-ज-ण-भ–तदेवमुच्यते; च-न-फ-स–तदेव उच्यते। २. ख-ग-च-ज-ण-न-फ-भ-स–'किमिति' नास्ति। ३. ख-च-फ-भ–'विभक्तिभेदाच्च' नास्ति। ४. त–अभ्यासदीर्घः। ५. ख-ग-त-न-ल-स–ते तव। ६. घ-न-ल-स–'दिवः' नास्ति। ७. त–निवारयन्ति। ८. त–'किंतु' नास्ति। ९. ख-ग-च-ज-ण-न-भ-स–गुल्मवनस्पतीनाम्।

त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन् ।
यद्द द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥ १० ॥

त्वम् । सद्यः । अपिबः । जातः । इन्द्र । मदाय । सोमम् । परमे । विऽओमन् ।
यत् । ह । द्यावापृथिवी इति । आ । अविवेशीः । अथ । अभवः । पूर्व्यः । कारुऽधायाः ॥१०॥

हे [1]इन्द्र [2]सद्यः तदानीमेव [3]जातः [4]परमे [5]व्योमन् उत्तमे स्थाने स्थितः [6]त्वं [7]मदाय हर्षाय [8]सोमम् [9]अपिबः । [10]यत् यदा त्वं [11]द्यावापृथिवी द्यावापृथिव्यौ [12]आविवेशीः [13]ह आ समन्तात् भृशं प्रविष्टोऽसि खलु । [14]अथ अनन्तरं [15]पूर्व्यः पुरातनः सन् [16]कारुधायाः कर्मणां विधाता [17]अभवः खलु ॥ व्योमन् । अव रक्षणगत्यादिषु । विपूर्वस्यावतेः ' नामन् सीमन् ' इत्यादिना मनिन् । ' उवरुवर ' इत्यादिना ऊठ् । विशेषेणौम व्याप्तिर्यस्य तत् । ' सुपां सुलुक् ' इत्यादिना सुपो लुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । आविवेशीः । ' विश प्रवेशने ' इत्यस्य यङ्लुकि लङि सिपि ' यङो वा ' इतीडागमः । ' इतश्च ' इति सिप इकारलोपः । यङोगादनिघातः । कारुधायाः । कारुः । करोतेः कृवापाजिमिस्वदिसाध्यशूभ्य उण्प्रत्ययः । णित्त्वात् वृद्धिः । दधातेः ' वहिहाधाभ्यश्छन्दसि ' इत्यसुन् । ' णित् ' इत्यनुवृत्तेः ' आतो युक् चिण्कृतोः ' इति युगागमः । समासे[18] ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति सूत्रात पूर्वपदप्रकृतिस्वरः[19] ॥ ॥ १० ॥

अहन्नहिं परिशयानमर्णो ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः ॥ ११ ॥

अहन् । अहिम् । परिऽशयानम् । अर्णः । ओजायमानम् । तुविऽजात । तव्यान् ।
न । ते । महिऽत्वम् । अनु । भूत् । अध । द्यौः ।
यत् । अन्यया । स्फिग्या । क्षाम् । अवस्थाः ॥ ११ ॥

[20]तुविजात । बहूनि जातानि पृथिव्यादीनि यस्मात् सोऽयं तुविजातः । हे तुविजात इन्द्र [21]तव्यान् अतिशयेन प्रवृद्धस्त्वम् [22]अर्णः [23]परिशयानम् उदकं परितः शयानमुदकमन्तः कृत्वा परितो वर्तमानमत एव [24]ओजायमानं बलमाचरन्तम् [25]अहिम् । आ समन्ताद्धन्ति अपहरत्युदकमित्यहिर्मेघः । तमिमं मेघम् [26]अहन् उदकप्रेरणाय हतवानसि । [27]अध अथ [28]ते [29]महित्वं महिमानं [30]द्यौः न [31]अनु [32]भूत् नानुभवति न जानाति । [33]यत् यस्मात् त्वम् [34]अन्यया एकतरया [35]स्फिग्या कट्या [36]क्षां भूमिम् [37]अवस्थाः अवच्छाद्य तिष्ठसि ॥ अहन् । हन्तेः लङि[1] सिब्लोपे[2] रूपम्[3] । अहिम् । ' हन हिंसागत्योः ' । आङि ' श्रिहनिभ्यां ह्रस्वश्च ' इति इण्प्रत्ययः ङिच्च पूर्वपदस्य[4] ह्रस्वश्च[5] । वृषादित्वात् आद्युदात्तत्वम्[6] ।

---

१. ख-फ-भ-' समासे..... [2]प्रकृतिस्वरः ' नास्ति ; ग-च-ज-ण-नित्स्वरः । २. ख-ग-च-ज-ण-लङ् । ३. ख-ग-च-ज-ण-भ-सिलोपः; त-सिलोपे रूपं; न-सिपि रूपम् । ४. च-पूर्वपदह्रस्वश्च । ५. ख-त-आद्युदात्तः ।

ओजायमानम्। ओजःशब्दादाचारार्थे 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्प्रत्ययः सलोपश्च। ङित्त्वादात्मनेपदम्। प्रत्ययस्वरः। तव्यान्। तु इति सौत्रो धातुः। अस्मात् तृजन्तात् 'तुश्छन्दसि' इतीयसुन्। 'तुरिष्ठेमेयःसु' इति तृचो लोपः। भसंज्ञायामोर्गुणः। इकारलोपश्छान्दसः। निरस्वरः। भूत्। भवतेर्लुङि रूपम्। स्फिग्या। 'यचि भम्' इति भसंज्ञायाः[1] बाधितत्वात्[1] 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां जश्त्वम्। तृतीयायाः पूर्वसवर्णः। क्षाम्। 'क्षि निवासगत्योः'। 'अन्येभ्योऽपि दृश्यते' इति निरुपपदादपि डप्रत्ययः। ततष्टाप्। क्षियन्ति निवसन्त्यस्यां प्राणिन इति क्षा भूमिः। उदात्तनिवृत्तिस्वरेणान्तोदात्तः। अवस्थाः। 'वस आच्छादने'[2] इत्यस्य लङि अनुदात्तत्वान आगमनेपदम्। थासि अदादित्वाच्छपो लुक्। यद्योगादनिघातः। अडागमस्वरः॥

यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः।
यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत्॥ १२॥

यज्ञः। हि। ते। इन्द्र। वर्धनः। भूत्। उत। प्रियः। सुतऽसोमः। मियेधः।
यज्ञेन। यज्ञम्। अव। यज्ञियः। सन्। यज्ञः। ते। वज्रम्। अहिऽहत्ये। आवत्॥१२॥

हे [V]इन्द्र अस्मदीयोऽयं [V]यज्ञः [V]ते तव [V]वर्धनः हविष्प्रदानेन वर्धयिता [V]भूत् [V]हि भवति खलु। [V]उत अपि च [V]सुतसोमः अभिषुतसोमवान् [V]मियेधः सारभूतोऽयं यज्ञः तव[3] [V]प्रियः। स त्वं [V]यज्ञियः यज्ञार्हः [V]सन् [V]यज्ञं यज्ञस्य कर्तारं यजमानं [V]यज्ञेन अनुष्ठीयमानेनानेन [V]अव फलप्रदानेन रक्ष। किंचायं [V]यज्ञः [V]ते तव [V]वज्रमहिहत्ये वृत्रहनने कर्मणि [V]आवत् रक्षतु॥ वर्धनः। 'वृधु वर्धने' इत्यस्य [V]ण्यन्तस्य[4] नन्द्यादित्वात् ल्युप्रत्ययः। लित्स्वरः। भूत्। हियोगादनिघातः। अव। अवतेर्लोटि रूपम्। निघातः। सन्। असेः[5] शतरि रूपम्। प्रत्ययस्वरः। अहिहत्ये। 'हन हिंसागत्योः' इत्यस्य भावे 'हनस्त च' इति क्यप् तकारश्चान्तादेशः। कृदुत्तरपदस्वरः। आवत्। अवतेश्छान्दसे लङि रूपम्। निघातः॥

यज्ञेनेन्द्रमवसा चक्रे अर्वागेनं सुम्नाय नव्यसे ववृत्याम्।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः॥ १३॥

यज्ञेन। इन्द्रम्। अवसा। आ। चक्रे। अर्वाक्। आ। एनम्। सुम्नाय। नव्यसे। ववृत्याम्।
यः। स्तोमेभिः। ववृधे। पूर्व्येभिः। यः। मध्यमेभिः। उत। नूतनेभिः॥ १३॥

हे इन्द्र सर्वो यजमानः [V]अवसा स्वरक्षकेण [V]यज्ञेन [V]इन्द्रं त्वाम् [V]अर्वाक् [V]आ [V]चक्रे हविष्प्रदानेनाभिमुखं करोति[6]। तथाहं [V]नव्यसे नवतराय [V]सुम्नाय धनाय [V]एनं त्वाम् [V]आ [V]ववृत्याम्

१. ल–भसंज्ञां बाधित्वा। २. ख-ग-च-ज-ण-त-न-भ-स-निवासे। ३. ख-ज-ण-प-भ–ते तव। ४. ख-ग-च-ण-भ–'ण्यन्तस्य' नास्ति। ५. त–अस्तेः। ६. त–कुर्यात्।

यज्ञेनावृत्तं मदभिमुखं कुर्याम् । कीदृशस्त्वम् । यः पूर्व्येभिः पुरातनैः स्तोमेभिः स्तोत्रैः ववृधे । तथा यः इन्द्रः मध्यमेभिः मध्ये भवैः स्तोत्रैः उत अपि च नूतनेभिः अस्माभिः क्रियमाणैः अधुनातनैः स्तोत्रैर्वर्धते ॥ चक्रे । करोतेर्लिटि रूपम् । नव्यसे । नवशब्दादीयसुनि भसंज्ञायामकारलोपे ईकारलोपश्छान्दसः । नित्त्वादाद्युदात्तः । ववृत्याम् । ' वृतु वर्तने ' । लिङि ' बहुलं छन्दसि ' इति शपः श्लुः । व्यत्ययेन परस्मैपदम् । निघातः । ववृधे । ' वृधु वर्धने ' इत्यस्य लिटि रूपम् । प्रत्ययस्वरः । मध्यमेभिः । मध्यशब्दात् शैषिकार्थे ' मध्यान्मः ' (पा. सू. ४. ३. ८) इति मप्रत्ययः । प्रत्ययस्वरः । नूतनेभिः । नवशब्दस्य ' स्नसनन्त्राश्च प्रत्यया वक्तव्या नू इत्यादेशश्च ' (पा. म. ५. ४. ३०. ६) इति तनन्प्रत्ययो नू इत्यादेशश्च ॥

विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमंहः ।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥ १४ ॥

विवेष । यत् । मा । धिषणा । जजान । स्तवै । पुरा । पार्यात् । इन्द्रम् । अंहः ।
अंहसः । यत्र । पीपरत् । यथा । नः । नावाऽइव । यान्तम । उभये । हवन्ते ॥ १४ ॥

यत् यदा धिषणा इन्द्रं स्तवानीति मदीया बुद्धिर्मा विवेष व्याप्नोत् तदाहं स्तोत्रं जजान करोमि । बुद्धेः स्वरूपं दर्शयति । अहं पार्यात् पारे भवादतिदूरवर्तिनः विघ्नकारिणः अंहः पुरा पूर्वं स्तवै स्तवानि । यत्र यस्यां धिषणायामेव जातायां सत्यां स इन्द्रः नः अस्मान् अंहसः पापरूपाद्दारिद्र्यात् यथा पीपरत् यथा पारं नयेत् तथास्मदुभयपार्श्ववर्तिधनार्थिनो जनाः हवन्ते आह्वयन्ति । तत्र दृष्टान्तः । नावेव यान्तम् । यथा नद्यादिषु नौकया यान्तं गच्छन्तं पुरुषम् उभये उभयकूलवर्तिनः जना हवन्ते आह्वयन्ति तद्वत् ॥ विवेष । ' विषॢ व्याप्तौ ' इत्यस्य लिटि णलि रूपम् । लित्स्वरः । जजान । ' जन जनने ' इत्यस्य लिट्युत्तमे णलि रूपम् । वाक्यभेदात् अनिघातः । अंहसः । अम गत्यादिषु । ' अमेर्हुक् च ' (उ. सू. ४. ६५२) इत्यसुन्प्रत्ययो हुगागमश्च । नित्स्वरः । पीपरत् । ' पॄ पालनपूरणयोः ' इत्यस्य लुङि चङि ह्रस्वाभ्यासेत्वदीर्घगुणाः । यथायोगादनिघातः । लित्स्वरः । नावेव । ' नुद प्रेरणे ' इत्यस्मात् ' ग्लानुदिभ्यां डौः ' (उ. सू. २. २२२) इति डौप्रत्ययः । नुद्यत इति नौः प्लवः । ' सावेकाचः ' इति तृतीयाया उदात्तत्वम् । ' इवेन नित्यसमासः विभक्त्यलोपः ' इत्यादि । उभये । उभशब्दात् परस्य तयपः ' उभादुदात्तो नित्यम् ' (पा. सू. ५. २. ४४) इत्ययजादेशः । वचनसामर्थ्यादादेः उदात्तत्वम् । हवन्ते । ह्वयतेर्लटि रूपम् ॥

माध्यंदिने सवन आग्नीध्रीयस्य ' आपूर्णो अस्य ' इति प्रस्थितयाज्या । सन्नितं च—' आपूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः ' (आश्व. श्रौ. ५. ५) इति ॥

१. ख-ग-घ-च-ज-ण-त-न-फ-भ-स–' स्तोत्रैः ' नास्ति । २. त–इन्द्रम् । ३. ख-ग-घ-च-ज-ण-भ-ल–' आह्वयन्ति ' नास्ति । ४. त-न–दृष्टान्तमाह । ५. त–यथा प्लवेन नद्यादौ गच्छन्तं नद्यादेरस्मदुभयपार्श्ववर्तिनः धनार्थिनः । ६. ख-ग-च-ज-ण-न-भ-ल–' नित्यसमासः ' नास्ति । ७. ख-ग-ज-ण-भ-ल-स–उभयशब्दात् परस्य ।

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥ १५ ॥

आऽपूर्णः । अस्य । कलशः । स्वाहा । सेक्ताऽइव । कोशम् । सिसिचे । पिबध्यै ।
सम् । ऊँ इति । प्रियाः । आ । अववृत्रन् । मदाय ।
प्रऽदक्षिणित् । अभि । सोमासः । इन्द्रम् ॥ १५ ॥

हे इन्द्र ᵛअस्य तव पानार्थं ᵛकलशः द्रोणकलशः सोमेन ᵛआपूर्णः । ᵛस्वाहा[1] स्वाहाकृतो दत्तश्च सोमसहितः कलशः ᵛपिबध्यै तव पानार्थं ᵛसिसिचे। तं[2] सोमं[3] चोदिताधारे[3] सिञ्चामि। तत्र दृष्टान्तः। ᵛकोशं ᵛसेक्तेव । यथा सेक्ता सेचकः जलपूर्णात् कोशात् दृतेः सकाशात् जलं पात्रान्तरे सिञ्चति तद्वत् । ᵛप्रियाः स्वादुतमाः ᵛसोमासः दत्तास्ते सोमाः ᵛइन्द्रं त्वाम् ᵛअभि अभिलक्ष्यैव ᵛमदाय तव हर्षार्थं ᵛप्रदक्षिणित् प्रादक्षिण्येन ᵛसम् ᵛआववृत्रन् सम्यगावृत्य वर्तन्ताम् ॥ आपूर्णः। 'पॄ पालनपूरणयोः' इत्यस्य कर्मणि निष्ठा । 'रदाभ्याम्०' इति तस्य नत्वम् । 'गतिरनन्तरः' इति गतिस्वरः[4] । स्वाहा । निपातत्वादाद्युदात्तः । सेक्तेव कोशम्। 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः । सिसिचे । 'षिच[5] क्षरणे' इत्यस्य लिटि रूपम्। पिबध्यै । 'पा पाने' इत्यस्य तुमर्थे शध्यैन्प्रत्ययः। शित्त्वात् पिबादेशः । नित्त्वादाद्युदात्तः। आववृत्रन्[6] । 'वृतु वर्तने' इत्यस्य लङि शप् । 'बहुलं छन्दसि' इति तस्य शपः श्लुः । व्यत्ययेन परस्मैपदम् । 'बहुलं छन्दसि' इति अे रुडागमः ॥

न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परि सन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा दृळ्हं चिदरुजो गव्यमूर्वम् ॥ १६ ॥

न । त्वा । गभीरः । पुरुऽहूत । सिन्धुः । न । अद्रयः । परि । सन्तः । वरन्त ।
इत्था । सखिऽभ्यः । इषितः । यत् । इन्द्र ।
आ । दृळ्हम् । चित् । अरुजः । गव्यम् । ऊर्वम् ॥ १६ ॥

हे ᵛपुरुहूत ᵛइन्द्र ᵛगभीरः ᵛसिन्धुः समुद्रः ᵛत्वा त्वां ᵛन वारयति। ततः[7] ᵛपरि परितः[7] वर्तमानाः ᵛसन्तः ᵛअद्रयः शैलास्त्वां ᵛन ᵛवरन्त न वारयन्ति। किंतु त्वामनुसृत्य वर्तन्ते । ᵛयत यस्मात ᵛइत्था इत्थमनेन प्रकारेण ᵛसखिभ्यः सखिभिर्देवैः ᵛइषितः प्रार्थितः त्वं ᵛदृळ्हं ᵛचित् अतिप्रबलमपि ᵛगव्यं गवि भवम् अवटे[8] वर्तमानम् ᵛऊर्वम् ऊर्वानलम् ᵛआ ᵛअरुजः सम्यगभाङ्क्षीः ॥ गभीरः ।

---

१. ण-त-न-स–'स्वाहा' नास्ति । २. ख-ग-त-न-फ-भ-स–'तं सोमं' नास्ति । ३. ख–चोदिताः; ग-फ–चोदिताधाराः; च-भ–चोदिताधारः; ज-ण–सिञ्चामि चोदिताधाराः । ४. ख-ग-ज-ण-न-फ-भ–स्वरः; च-ल–गतेः स्वरः । ५. ख-ग-ज-ण-न-भ-स–सिच । ६. ल–अववृत्रन । ७. ख-ग-ज-ण–ततः परितः; घ-ल–तथा परि परितः । ८. ख-ग-च-त-फ-भ-ल–अवते; न–मध्ये ।

'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च' । अस्मात् ईरच्प्रत्ययः[1] । धकारस्य भकारः आकारस्य ह्रस्वश्च 'गभीरगम्भीरौ' (उ. सू. ४. ४७५) इत्यनेन निपात्यते । चित्स्वरः । सिन्धुः । 'स्यन्दू प्रस्रवणे'। 'स्यन्देः संप्रसारणं धश्च' इत्युप्रत्ययः संप्रसारणं दकारस्य धकारः । 'नित्' इत्यनुवृत्तेराद्युदात्तः । परिषन्तः । सन्तः । अन्तेः शतरि रूपम्। 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वम् । केचित् परेः[2] क्रियान्वयम्[3] इच्छन्ति । तदा षत्वमनुपपन्नम् । परि। निपातस्वरः । सन्तः । प्रत्ययस्वरः । वरन्त । 'वृञ्[4] वरणे'। भौवादिकः । लङि रूपम् । निघातः । अरुजः । 'रुजो भङ्गे' इत्यस्य लङि रूपम् । गव्यम् । गोर्विकार इत्यर्थे 'गोपयसोर्यत्' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १७ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥१७॥

एषा ऋक् पूर्वमेव व्याख्याता ॥ ॥ ११ ॥

'प्र पर्वतानाम्' इति त्रयोदशर्चं चतुर्थं सूक्तम् । अत्रेयमनुक्रमणिका—'प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थीषष्ठयष्टमीदशम्यः षष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टुप्' इति। अत्र[5] चतुर्थीषष्ठयष्टमीदशमीनां नदीवाक्यत्वात्तत्र एव ऋषयः शिष्टानां विश्वामित्रवाक्यत्वात्[6] एव ऋषिः[7] । अन्त्यानुष्टुप् शिष्टास्त्रिष्टुभः । इन्द्रो देवता । यद्यपि षष्ठ्यां सप्तम्यां च विश्वामित्रो नद्यश्च स्तूयन्ते तथापीन्द्र एव[8] देवता । सूक्तविनियोगो लैङ्गिकः ॥ पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव । स च पौरोहित्येन लब्धधनः सर्वं धनमादाय विपाट्छुतुद्र्योः संभेदमाययौ[9] अनुययुरितरे । अथोत्तितीर्षुर्विश्वामित्रः[10] अगाधजले ते नद्यौ दृष्ट्वा उत्तरणार्थम् आद्याभिः[11] तिसृभिस्तुष्टाव ॥

प्र पर्वतानामुशती उपस्थादश्वेइव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥ १ ॥

प्र । पर्वतानाम् । उशती इति । उपऽस्थात् ।
अश्वे इवेत्यश्वेऽइव । विषिते इति विऽसिते । हासमाने इति ।
गावाऽइव । शुभ्रे इति । मातरा । रिहाणे इति । विऽपाट् । शुतुद्री । पयसा । जवेते इति ॥१॥

१. ख-ग-त-ईरट्प्रत्ययः; ण-कीरचप्रत्ययः; स-इरट्प्रत्ययः । २. न-परक्रियान्वयम् । ३. ख-ग-च-ज-ण-भ-वृङ् । ४. ख-ग-च-ज-ण-भ-तत्र । ५. ख-ग-च-ज-ण-त-न-भ-विश्वामित्रः, घ-विश्वामित्र ऋषिः । ६. ख-ग-च-ज-ण-न-भ-ल-स-'एव' नास्ति । ७. ख-ग-च-ज-ण-न-फ-भ-संभेदमागत्योत्तितीर्षुर्विश्वामित्रः । ८. ख-फ-प्राद्याभिः ।

[v]पर्वतानां गिरीणां[1] शैलानाम् [v]उपस्थात् उत्सङ्गान्निर्गत्य [v]उशती[2] समुद्रगमनं कामयमाने । गमने दृष्टान्तः । [v]अश्वेइव । यथा [v]विपिते मन्दुरातो विमुक्ते [v]हासमाने अन्योन्यजवेन[3] स्पर्धमाने । यद्वा हृष्यन्त्यावश्वे इव वडवे इव स्वरया गच्छन्त्यौ परस्परं हृष्यन्त्यौ[4] । तथा [v]गावेव [v]शुभ्रे । यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने । किंच [v]मातरा । यथा मातरौ धेनू [v]रिहाणे । अन्तर्णीतमन्नर्थो लिहिः । वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत् समुद्रं गन्तुं[5] जवात गच्छन्त्यौ [v]पयसा संयुक्ते [v]विपाट् । कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट् । [v]शुतुद्री । शु क्षिप्रं तु[6] तुन्ना[7] तुन्नेव द्रवति गच्छतीति शुतुद्री । एतन्नामके[8] नद्यौ [v]प्र [v]जवेते समुद्रं[9] प्रति[10] शीघ्रं गच्छतः । अत्र निरुक्तं—'पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्व इव विमुक्ते इति वा विपाटने इति वा हासमाने हासनिः स्पर्धायां हर्षमाणे वा गाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते' (निरु. ९. ३९) इति ॥ उशती । 'वश कान्तौ' । अस्य[11] शतुर्ङित्त्वात् 'ग्रहिज्यावयि-' इत्यादिना संप्रसारणम् । विपिते । 'पिज् बन्धने' इत्यस्य कर्मणि निष्ठा । संहितायां 'परिनिविभ्यः सेवसितसय-सिवुसह-' इत्यादिना षत्वम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः[12] । हासमाने । हासनिः स्पर्धाकर्मा हसे हसने वा । शानच् । तस्य लसार्वधातुकस्वरे कृते धातुस्वरः । रिहाणे । 'लिह आस्वादने' । स्वरितेत्त्वादुभयपदी । शानच् । अदादित्वाच्छपो लुक् । लकारस्य रेफश्छान्दसः । रेफमवलम्ब्य णत्वम् । चित्त्वादन्तोदात्तः । विपाट् । 'पट गतौ' 'पश[13] बाधनस्पर्शनयोः' इति वा णयन्तावेतौ विपूर्वौ । शकारस्य वश्चादिना षत्वम् । शुतुद्री । छान्दसी रूपसिद्धिः । जवेते । 'जु गतौ' । भौवादिः । ङित्त्वादाम्मनेपदम् । 'आतो ङितः' इति इयादेशः । निघातः ॥

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥ २ ॥

इन्द्रेषिते इतीन्द्रऽइषिते । प्रऽसवम् । भिक्षमाणे इति । अच्छ । समुद्रम् । रथ्याऽइव । याथः । समाराणे इति समऽआराणे । ऊर्मिऽभिः । पिन्वमाने इति । अन्या । वाम् । अन्याम् । अपि । एति । शुभ्रे इति ॥ २ ॥

हे नद्यौ [v]इन्द्रेषिते इन्द्रेण प्रेषिते [v]प्रसवं तस्येन्द्रस्यानुज्ञां [v]भिक्षमाणे प्रार्थयमाने युवां [v]समुद्रम् [v]अच्छ आभिमुख्येन [v]याथः गच्छथः । तत्र दृष्टान्तः । [v]रथ्येव इति[14] । यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत् । किं कुर्वत्यौ । [v]समाराणे परस्परं संगच्छन्त्यौ [v]ऊर्मिभिः तरङ्गैः [v]पिन्वमाने परिसरप्रदेशं संतर्पयन्त्यौ [v]शुभ्रे शोभमाने । युवां समुद्रं गच्छथ इति पूर्वेणान्वयः । तथा [v]वां युवयोर्मध्ये [v]अन्या एका [v]अन्याम् अपरां नदीम् [v]अप्येति अपिगच्छति । परस्परमैक्यमापद्यत इत्यर्थः ॥ इन्द्रेषिते । 'इष गतौ' इत्यस्य कर्मणि निष्ठायाः[15] 'नीपमह' इत्यादिना इडागमः ।

१. त-ल-'गिरीणां' नास्ति । २. ख-ग-च-प-फ-भ-उशती विपाट्छुतुद्री; घ-ज-ण-विपाट्छुतुद्री उशती । ३. त-अन्योन्यं जवेन । ४. ज-ण-'हृष्यन्त्यौ' नास्ति । ५. ख-ग-घ-च-ज-ण-प-फ-भ-गन्तुं प्रजवेते । ६. ख-ग-च-ज-ण-भ-शु; त-तुन्ना । ७. त-एतन्नामिके । ८. ज-ण-समुद्रप्रान्तम् । ९. ल-इत्यस्य । १०. त-°स्वरत्वम् । ११. ख-ग-ज-ण-स्पश । १२. ख-ग-च-ज-ण-भ-'इति' नास्ति । १३. त-निष्ठायाम् ।

' तृतीया कर्मणि ' इति पूर्वपदस्वरः। प्रसवम्। ' पू प्रेरणे ' इत्यस्य अप्। थाथादिस्वरः। भिक्षमाणे। ' भिक्ष याच्ञायाम् '। आत्मनेपदी। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। रथ्येव। रथस्येमौ। तस्येदम् इत्यर्थे ' रथाद्यत् ' इति यत्प्रत्ययः। तित्स्वरितः। इवेन विभक्त्यलोपः इत्यादि[1]। याथः। यातेर्लेटि रूपम्। समाराणे। ' ऋ गतौ ' इत्यस्य लिट्। संपूर्वस्यार्तेः ' समो गमि° ' इत्यादिना आत्मनेपदत्वात्[2] तस्य[3] कानजादेशः। ' ऋच्छत्यृताम् ' इति गुणः। पिन्वमाने। ' पिवि सेचने '। भ्वादिः। लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः[4]॥

अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती॥ ३॥

अच्छ। सिन्धुम्। मातृऽतमाम्। अयासम्। विऽपाशम्। उर्वीम्। सुऽभगाम्। अगन्म।
वत्सम्ऽइव। मातरा। संरिहाणे इति सम्ऽरिहाणे।
समानम्। योनिम्। अनु। संचरन्ती इति सम्ऽचरन्ती॥ ३॥

हे नद्यौ [V]मातृतमाम् अतिशयेन मातरं [V]सिन्धुं स्रवन्तीं श्रुतुद्रीं त्वाम् [V]अच्छ आभिमुख्येन [V]अयासं विश्वामित्रोऽहं प्राप्तोऽभूवम्। [V]उर्वीं महतीं [V]सुभगां सौभाग्यवतीं [V]विपाशं त्वाम् [V]अगन्म वयं प्राप्ताः स्मः। किं कुर्वत्यौ। [V]मातरा मातरौ द्वे धेनू [V]वत्समिव [V]संरिहाणे। अन्तर्णीतसन्नर्थो लिहिः। जिह्वया लेढुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत्। [V]समानम् एकं [V]योनिं स्थानं समुद्रम् [V]अनु अभिलक्ष्य [V]संचरन्ती सम्यक् चरन्त्यौ। युवामयासिषमिति पूर्वेणान्वयः॥ अयासम्। ' या प्रापणे ' इत्यस्य रूपम्। इडभावश्छान्दसः। अगन्म। गमेर्लङि ' बहुलं छन्दसि ' इति शपो लुक्। ' स्वोश्च ' इति मकारस्य नकारः। निघातः। संचरन्ती। चरतिर्गत्यर्थः। तृतीययुक्त्वाभावात्[4] आत्मनेपदाभावः। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति॥ ४॥

एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः।
न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति॥ ४॥

एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः। [V]एना एनेन [V]पयसा [V]पिन्वमानाः संतर्पयन्त्यः [V]देवकृतं देवेनेन्द्रेण[5] कृतं संदिष्टं [V]योनिं स्थानं समुद्रम् [V]अनु लक्ष्यीकृत्य [V]चरन्तीः गच्छन्त्यः [V]वयम् आस्महे।

१. ख-ग-ज-ण-भ–इत्यर्थादि; च–' इत्यादि ' नास्ति। २. ख-ग-च-ज-ण-न-भ-स–आत्मनेपदम्; त–आत्मनेपदत्वम्। ३. ख-ग-च-ज-ण-त-न-फ-भ-स–' तस्य.....धातुस्वरः ' नास्ति। ४. च-फ–तृतीया-योगाभावात्। ५. ख-ग-च-ज-ण-फ-भ–देवेन्द्रेण।

द्वयोर्बहुवचनं पूजार्थम्। तासामस्माकं [v]सर्गतक्तः सर्गे गमने प्रवृत्तः [v]प्रसवः उद्योगः [1]न [v]वर्तवे निवर्तनाय[1] न भवति। [v]किंयुः किमिच्छन् असौ [v]विप्रः ब्राह्मणः [v]नद्यः नदीः अस्मान् [v]जोहवीति भृशमाह्वयति ॥ एना। एतच्छब्दस्य[2] तृतीयाया एनादेशः। ' सुपां सुलुक्° ' इति तृतीयाया आजादेशः। ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम्। पिन्वमानाः। ' पिवि सेचने[3] ' । देवकृतम्। ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः। वर्तवे। ' वृतु वर्तने ' । तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। सर्गतक्तः। ' के च ' इति पूर्वपदप्रकृतिस्वरः। किंयुः। किमिच्छन्। ' क्यचि मान्ताव्ययप्रतिषेधः ' (पा. सू. ३. १. ८. १) इति छान्दसत्वादत्र प्रतिषेधो न भवतीति क्यच्। ' क्याच्छन्दसि ' इत्युप्रत्ययः। प्रत्ययस्वरः। नद्यः। छान्दसो यणादेशः। जोहवीति। ह्वेञः[4] यङ्लुकि ' अभ्यस्तस्य च ' इति संप्रसारणे कृते ' गुणो यङ्लुकोः ' इत्यभ्यासस्य गुणः। ' यङो वा ' इति इडागमः। गुणः। निघातः ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥ ५ ॥

रमध्वम्। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहूर्तम्। एवैः।
प्र। सिन्धुम्। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः ॥ ५ ॥

विश्वामित्रो नदीः प्रति ब्रूते। [v]ऋतावरीः। ऋतमुदकम्। तद्वत्यो हे नद्यो यूयं [v]मे विश्वामित्रस्य मम [v]सोम्याय। उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने [v]वचसे तदर्थम् [v]एवैः। पञ्चम्यर्थे तृतीया। शीघ्रगमनेभ्यः [v]मुहूर्तं मुहूर्तमात्रम् [v]उप [v]रमध्वम्। उपपूर्वो रमिरुपसंहारे वर्तते। क्षणमात्रं शीघ्रगमनादुपरता भवत। सामान्येन[5] नदीपूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं स्तुतुद्रीं प्रति ब्रूते। [v]कुशिकस्य राजर्षेः [v]सूनुः विश्वामित्रोऽहं [v]बृहती महत्या [v]मनीषा मनीषया स्तुत्या [v]अवस्युः आत्मनो रक्षणमिच्छन् सन् [v]सिन्धुं स्तुतुद्रीं त्वाम् [v]अच्छ आभिमुख्येन [v]प्र [v]अह्वे प्रकर्षेणाह्वयामि। अत्र निरुक्तम्—' उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा। प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः। कुशिको राजा बभूव ' (निरु. २. २५) इति ॥ रमध्वम्। ' रमु उपरमे ' । उपपूर्वाद्रमतेः ' विभाषाकर्मकात् ' (पा. सू. १. ३. ८५) इत्यात्मनेपदम्। ऋतावरीः। ऋतशब्दान्मत्वर्थे ' छन्दसीवनिपौ ' इति वनिप्। ' वनो र च ' इति ङीप् रेफश्चान्तादेशः। ' वा छन्दसि ' इति सवर्णदीर्घः। आमन्त्रितस्य पादादित्वात् षाष्ठिकमाद्युदात्तत्वम्। एवैः। ' इण् गतौ '। ' इण्शीङ्भ्यां वन् '। आर्धधातुकलक्षणो गुणः। नित्स्वरः। बृहती मनीषा। उभयत्र तृतीयायाः पूर्वसवर्णदीर्घः। अवस्युः। अवो रक्षणमिच्छन्। सुप आत्मनः क्यच्। ' नः क्ये ' इति नकारान्तस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुर्न भवति। ' क्याच्छन्दसि ' इत्युप्रत्ययः। अह्वे। ह्वयतेर्लुङि सिचः ' आत्मनेपदेष्वन्यतरस्याम् ' इत्यङादेशः। गुणः। निघातः ॥ ॥ १२ ॥

१. ख-ग-घ-च-ज-प-फ-भ–वर्तनाय; ण–वर्तमानाय; न–निवर्तनायः; स–निवर्तमानाय। २. च–इदंशब्दस्य। ३. ग-च-न-भ–सेवने; ज-ण–प्रीणने। ४. ल–ह्वयः। ५. त–सामान्येन च।

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥ ६ ॥

इन्द्रः । अस्मान् । अरदत् । वज्रेऽबाहुः । अप । अहन् । वृत्रम् । परिऽधिम् । नदीनाम् ।
देवः । अनयत् । सविता । सुऽपाणिः । तस्य । वयम् । प्रऽसवे । यामः । उर्वीः ॥ ६ ॥

नद्यः प्रत्यूचुः । हे विश्वामित्र ᵛवज्रबाहुः । वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः । तादृशो बलवान् ᵛइन्द्रः नदीः ᵛअस्मान् ᵛअरदत । रदतिः खननिकर्मा । अखनत् । कथमखनत् । उच्यते । ᵛनदीनां शब्दकारिणीनामपां ᵛपरिधिं परितो निहितमुदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः । तादृशं ᵛवृत्रम् । वृणोत्याकाशमिति वृत्रो मेघः । तं मेघम् ᵛअपाहन् जघान । तस्मिन् हते आपः पतिताः । ताभिर्गच्छन्तीभिर्वयं खाताः । एवं मेघहननद्वारेणाखनत् । न केवलमखनत् किं नहि ᵛसविता सर्वस्य जगतः प्रेरकः ᵛसुपाणिः शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात्तादृशः ᵛदेवः द्योतमानः इन्द्रः अस्मान् ᵛअनयत् । मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत् । ᵛतस्य तादृशसामर्थ्योपेतस्य इन्द्रस्य ᵛप्रसवे अभ्यनुज्ञायां वर्तमानाः ᵛउर्वीः उदकैः प्रभृताः ᵛवयं ᵛयामः गच्छामः । न तव वचनादुपरमामहे । उक्तार्थं[1] यास्को ब्रवीति—' इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खननिकर्मापाहन्वृत्रं परिधिं नदीनामिति व्याख्यानम् । देवोऽनयत्सविता सुपाणिः कल्याणपाणिः । पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणौ देवान् पूजयन्ति । तस्य वयं प्रसवे याम उर्वीरुर्व्यः ' (निरु. २. २६) इति ॥ अरदत् । रदतेर्लङि रूपम् । वज्रबाहुः । बहुव्रीहौ पूर्वपदस्वरः । अहन् । हन्तेर्लङि रूपम् । निघातः । परिधिम् । ' डुधाञ् धारणपोषणयोः ' इत्यस्मात् कर्मण्युपसर्गे ' घोः किः ' इति किप्रत्ययः । आतो लोपः । कृदुत्तरपदस्वरः । अनयत् । नयतेर्लङि रूपम् । सुपाणिः । ' पण व्यवहारे स्तुतौ च ' । ' अशिपणायी रुडायलुकौ च ' (उ. सू. ४. ५७२) इनीण् । आयलुक् । बहुव्रीहौ ' नञ्सुभ्याम् ' इति स्वरः । प्रसवे । ' षू प्रेरणे ' । ' ऋदोरप् ' इति भावेऽप्रत्ययः । ' थाथघञ्क्ताऽ ' इत्युत्तरपदान्तोदात्तत्वम्[2] । यामः । ' या प्रापणे ' इत्यस्य लटि रूपम् । निघातः । उर्वीः । उरुशब्दात् ' वोतो गुणवचनात ' इति ङीष् । ' वा छन्दसि ' इति सवर्णदीर्घः । प्रत्ययस्वरः ॥

प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥ ७ ॥

प्रऽवाच्यम् । शश्वधा । वीर्यम् । तत् । इन्द्रस्य । कर्म । यत् । अहिम् । विऽवृश्चत् ।
वि । वज्रेण । परिऽसदः । जघान । आयन् । आपः । अयनम् । इच्छमानाः ॥ ७ ॥

योऽयमिन्द्रः ᵛअहिं मेघं ᵛविवृश्चत् उदकप्रेरणार्थं जघानेति ᵛयत् ᵛकर्म छेदनरूपं ᵛतत् हवं तस्य ᵛइन्द्रस्य ᵛवीर्यं सामर्थ्यं ᵛशश्वधा सर्वदा ᵛप्रवाच्यं प्रकर्षेण वचनीयम्[3] । तथा स इन्द्रः ᵛपरिषदः परितः[4] सीदत आसीनान्[5] प्रतिबन्धकारिणोऽसुरान् ᵛवज्रेण ᵛवि ᵛजघान । अथ ᵛअयनं स्थानम्

१. ख-ग-च-ज-ण-त-न-भ—उक्तार्थं । २. ल—इत्युत्तरपदान्तोदात्तत्वम् । एकादेशस्वरः । ३. ख-ग-च-ज-ण-फ-भ—वाचनीयम् । ४. ल—परितः सीदन्तीति परिषदः । परित आसीनान् ।

[v]इच्छमानाः इच्छन्त्यः [v]आपः [v]आयन् यान्ति ॥ प्रवाच्यम् । ' वच परिभाषणे ' इत्यस्मात् ' ऋहलोर्ण्यत् ' इति ण्यत् । णिस्वादुपधावृद्धिः । ' वचोऽशब्दसंज्ञायाम् ' (पा. सू. ७. ३. ६७) इति कुत्वाभावः । व्ययत्ययेनाद्युदात्तत्वम् । यद्वा वाचयतेः ' अचो यत् ' । ' यतोऽनावः ' इति स्वरः । शश्वधा । शश्वच्छब्दात् स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः । विवृश्चत् । ' ओव्रश्चू छेदने ' । तुदादिः । लङि ' ग्रहिज्यावयि ' इत्यादिना संप्रसारणम् । ' सह सुपा ' इत्यत्र सहेति योगविभागात् समासः । समासस्वरः । परिपदः । क्विप् । संहितायां ' सदिरप्रतेः[1] ' इति षत्वम् । जघान । हन्तेर्लिटि णलि रूपम् । निघातः । आयन् । ' अय गतौ ' इत्यस्य लङि रूपम् । पादादित्वान्निघातः । इच्छमानाः । ' इषु इच्छायाम् ' इत्यस्मात् व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः ॥

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते । घोषान् । उत्ऽतरा । युगानि ।
उक्थेषु । कारो इति । प्रति । नः । जुषस्व ।
मा । नः । नि । करिति कः । पुरुषऽत्रा । नमः । ते ॥ ८ ॥

नद्यः प्रसन्नादिन्द्रस्तोत्रं[2] कृत्वा[3] विश्वामित्रं प्रत्यूचुः । [v]जरितः स्तोतर्हे विश्वामित्र [v]ते त्वदीयं [v]यत् संवादात्मकं [v]वचः त्वं [v]नः अर्भाद्या [v]घोषान् उद्घोषयन्[3] वर्तसे तद्वचः [v]मापि [v]मृष्ठाः मा विस्मार्षीः । किं कारणम् । [v]उत्तरा [v]युगानि उत्तरेषु याज्ञिकेषु[4] युगेषु[5] अहःसु [v]उक्थेषु [v]कारो शस्त्राणां[6] कर्तस्त्वं [v]नः अस्मान् [v]प्रति [v]जुषस्व संवादात्मकेन तेन वाक्येन प्रतिसेवस्व च । इदानीं [v]नः अस्मान् [v]पुरुषत्रा पुरुषेषु [v]मा [v]नि [v]कः । उक्तिप्रायुक्तिरूपसंवादवाक्याप्रयोगेण निन्द्यं पुंवत् प्रागल्भ्यं मा कार्षीः । [v]ते तुभ्यं [v]नमः ॥ मृष्ठाः । ' मृजूष्[7] शुद्धौ ' इत्यस्य लङि व्यत्ययेन आत्मनेपदम् । अदादित्वाच्छपो लुक् । श्रश्रादिना पत्वम् । निघातः । घोषान् । ' घुषिर्[8] संशब्दने[9] ' इत्यस्य शतरि सर्वविधीनां छन्दसि विकल्पितत्वात् ' अतो गुणे ' इति पररूपाभावः । सवर्ण दीर्घः । शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः । युगानि । ' युजिर् योगे ' । उञ्छादिषु घञन्तत्वेन निपातनादगुणत्वम् । विशिष्टविषयं[10] च निपातनमिष्यते । ' कालविशेषे रथाद्युपकरणे च ' इति तत्र पाठादेवान्तोदात्तत्वम् । ' कालाध्वनोरत्यन्तसंयोगे ' इति द्वितीया । कारो । करोतेः ' कृवापाजिमि ' इत्यादिना उण्प्रत्ययः । आमन्त्रितत्वान्निघातः । कः । करोतेर्लुङि च्लेः[11] ' मन्त्रे घस ' इत्यादिना लुक् । हल्ङ्यादिना सिचो लोपः । ' न माङ्योगे ' इत्यडभावः । पुरुषत्रा । ' देव मनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ' इति सप्तम्यर्थे त्राप्रत्ययः । प्रत्ययस्वरः ॥

---

१. न-ल-स-सदेरप्रतेः । २. प-' प्रसन्नादिन्द्रस्तोत्रं कृत्वा ' नास्ति । ३. ख-ग-च-ज-ण-प-फ-भ-त्वं मनीषा इत्यादिघोषान् (प-इत्याघोषान्) उद्घोषयन् । ४. ख-ग-च-फ-कुशिकेषु; ज-ण-' याज्ञिकेषु ' नास्ति । ५. न-यागेषु; स- योगेषु । ६. ख-ग-च-ज-ण-शास्त्राणाम् । ७. ख-फ-भ-मृजू । ८. ख-ग-ज-ण-न-भ-ल-स-घुष । ९. च-विशब्दने । १०. ख-ग-ज-ण-न-भ-ल-स-विश्लिष्टविषयम् । ११. ख-ग-च-ज-ण-न-भ-स-' च्लेः ' नास्ति ।

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ९ ॥

ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् । अनसा । रथेन ।
नि । सु । नमध्वम् । भवत । सुऽपाराः । अधःऽअक्षाः । सिन्धवः । स्रोत्याभिः ॥ ९ ॥

विश्वामित्रो नदीः प्रत्युवाच । [v]स्वसारः भगिन्यः [v]सिन्धवः हे नद्यः [v]कारवे स्तोत्रं कुर्वाणस्य मम वचनं [v]सु[1] सुष्ठु [v]ओ [v]शृणोत शृणुतैव[2] । [v]अनसा शकटेन [v]रथेन च सह [v]दूरात् विप्रकृष्टादृशात् [v]वः युष्मान् [v]ययौ प्राप्तोऽस्मि । यूयं [v]सु सुष्ठु [v]नि [v]नमध्वम् आत्मना स्वयं प्रह्वाः[3] [v]भवत[3] । तथा [v]सुपाराः । रथादीनां तीरात् सुखेनावरोहणारोहणे यथा स्यातां तथा शोभनरोधसश्च भवत । किंच यूयं [v]स्रोत्याभिः स्रवणशीलाभिरद्भिः [v]अधोअक्षाः रथाङ्गस्याक्षस्याधस्ताद्भवत । यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते । तस्मात् तत्परिमाणोदकाः[3] भवतेति अर्थाभिप्रायः[4] ॥ ओ इति प्रगृह्यसंज्ञा । शृणोत । ' श्रु श्रवणे ' इत्यस्य लोटि तप्रत्ययस्य ' तप्तनप्तनथनाश्च ' इति तबादेशः । पित्त्वादनुदात्तः । निघातः । ययौ । ' या प्रापणे ' इत्यस्य भूतमात्रे लिट्युत्तमे णलि ' आत औ णलः ' इत्यौकारः । णकादेशस्वरः । वः । युष्मच्छब्दस्य द्वितीयायाः ' बहुवचनस्य वस्नसौ ' इति वसादेशः । षू । ' निपातस्य ' इति संहितायां दीर्घः । नमध्वम् । ' णमु प्रह्वत्वे शब्दे च ' इत्यस्य कर्मकर्तरि ' न दुहस्नुनमां यक्चिणौ ' इति प्रतिषेधात् यगभावः । अधोअक्षाः । अधरशब्दस्य ' पूर्वाधरावराणामसि पुरधवश्चैषाम् ' इत्यसिप्रत्ययोऽधादेशश्च । अक्षशब्दः ' अशू व्याप्तौ ' इत्यस्मात् ' अशेर्देवने ' (उ. सू. ३. ३४५) इति सप्रत्ययान्तः । कृदुत्तरपदप्रकृतिस्वरः । सिन्धवः । आमन्त्रितत्वान्निघातः । स्रोत्याभिः । स्रोतःशब्दात् ' स्रोतसो विभाषा ड्यड्ड्यौ ' (पा. सू. ४. ४. ११३) इति ड्यप्रत्ययः । डित्त्वात् टिलोपः । प्रत्ययस्वरः ॥

आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ १० ॥

आ । ते । कारो इति । शृणवाम । वचांसि । ययाथ । दूरात् । अनसा । रथेन ।
नि । ते । नंसै । पीप्यानाऽइव । योषा । मर्यायऽइव । कन्या । शश्वचै । ते इति ते ॥ १० ॥

नद्यः पूर्वं विश्वामित्रं[5] प्रत्याख्यायानयचां तस्य वाक्यमाशुश्रुवुः । [v]कारो स्तोत्रं कुर्वाण हे विश्वामित्र [v]ते तव[6] [v]वचांसि इमानि वाक्यानि [v]आ [v]शृणवाम शृणुमः[7] । तव समीहितं प्रयोजनं कुर्म इत्यर्थः । [v]अनसा शकटेन [v]रथेन च सह [v]ययाथ । यतो [v]दूरात् आगतोऽसि । वयं च [v]ते स्वदर्थं [v]नि [v]नंसै नीचैर्नमाम । प्रत्येकविवक्षया[8] अत्रैकवचनम् । रथेन गन्तुं गाधोदका भवामेत्यर्थः ।

---

१. ख-ग-च-ज-ण-न-फ-भ-स-शृणोत सु सुष्ठु ओशृणोतैव । २. ज-ण-प्रह्वीभवत । ३. ख-ग-च-ज-ण-न-ल-परिमाणोदकाः । ४. घ-ल-अभिप्रायः । ५. त-सु । ६. ल-स-विश्वामित्रवाक्यम् । ७. ख-ग-घ-ज-ण-भ-ल-' तव ' नास्ति । ८. ख-ग-च-भ-आशृणुमः; ज-ण-आशृणुम । ९. ज-ण-ल-प्रत्येकं विवक्षया ।

तत्र दृष्टान्तः । [v]पीप्यानेव [v]योषा । पीप्याना पुत्रं स्तनं पाययन्ती योषा माता यथा प्रह्वीभवति । दृष्टान्तान्तरम् । यथा [v]कन्या युवतिः [v]मर्यायेव मनुष्याय पित्रे भ्रात्रे वा[1] [v]शश्वच्च परिष्वजनाय नम्रीभवति तद्वत् [v]ते[2] स्वदर्थं प्रह्वीभवामः[3] । ते[4] इति पुनरुक्तिरादरार्थम् । एतामृचं यास्क एवं व्याचष्टे– ' आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा ' (निरु. २.२७) इति[5] ॥ कारो । ' संबुद्धौ शाकल्यस्येतौ– ' (पा. सू. १. १. १६) इति प्रगृह्यसंज्ञा । शृणवाम । ' श्रु श्रवणे ' इत्यस्य लोटि ' आडुत्तमस्य पिच्च ' इत्याडागमः । पित्त्वात् गुणः । निघातः । ययाथ । ' या प्रापणे ' इत्यस्य भूतमात्रे लिटि थलि ' एकाच उपदेशेऽनुदात्तात् ' इतीट्प्रतिषेधः । लित्स्वरः । अनया । सहार्थे तृतीया । नंसै । ' णमु प्रह्वत्वे ' इत्यस्य लेट्युत्तमे लेटि सिब्बहुलमिति सिप् । ' वैतोऽन्यत्र ' इत्येकारादेशः । निघातः । पीप्यानेव । ' पीङ् पाने ' इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपम् । चित्स्वरः । योषा । ' यु मिश्रणे ' । ' वृतृवदिहनि[6] ' (उ. सू. ३. ३४२) इत्यादिना सप्रत्ययः । यौतीति योषा । वृषादित्वादाद्युदात्तः । शश्वच्च । ' स्वञ्च परिष्वङ्गे ' इत्यस्मात् संपदादिलक्षणो भावे क्विप् । पृषोदरादित्वादिष्टरूपसिद्धिरन्तोदात्तश्च ॥ ॥ १३ ॥

यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्रामं इषित इन्द्रजूतः ।
अर्षादहं प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ॥ ११ ॥

यत् । अङ्ग । त्वा । भरताः । सम्ऽतरेयुः । गव्यन् । ग्रामः । इषितः । इन्द्रऽजूतः ।
अर्षात् । अहं । प्रऽसवः । सर्गऽतक्तः । आ । वः । वृणे । सुऽमतिम् । यज्ञियानाम् ॥११॥

विश्वामित्रो नदीः प्रत्युवाच । [v]अङ्ग इत्यामन्त्रणे । हे नद्यः [v]यत् यस्मात् युष्माभिरुत्तितीर्षोः ममोत्तरणमभ्यनुज्ञातं तस्मात् [v]भरताः भरतकुलजा मदीयाः सर्वे [v]त्वा परस्परमेकतामापन्नां नदीं त्वां [v]संतरेयुः सम्यगुत्तीर्णा भवेयुः । तदेव विशिनष्टि । [v]गव्यन् गा उदकानि तरीतुमिच्छन् [v]इषितः त्वयाभ्यनुज्ञातः [v]इन्द्रजूतः युष्माकं प्रवर्तकेनेन्द्रेण च प्रेरितः [v]ग्रामः भरतानां संघः [v]अर्षात् संतरेत् । यतः [v]सर्गतक्तः गमनाय प्रवृत्तः [v]प्रसवः तेषामुद्योगः [v]अहं पूर्वं युष्माभिरनुज्ञातः । अहं तु [v]यज्ञियानां यज्ञार्हाणां [v]वः युष्माकं [v]सुमतिं शोभनां स्तुतिम् [v]आ [v]वृणे सर्वतः संभजे[6] ॥ भरताः । भरतशब्दादुत्सादित्वादञ् । तस्य ' यञञोश्च ' इति लुक् । अतच्प्रत्ययस्वरः[7] । संतरेयुः । तरतेर्लिङि जुसि रूपम् । झेर्लसार्वधातुकस्वरे धातुस्वरः । ' तिङि चोदात्तवति ' इति गतेर्निघातः । गव्यन् । गा आत्मन इच्छन् । सुपः क्यच् । एकादेशस्वरः । ग्रामः । ' ग्रसतेरा च ' (उ. सू. १.१४०) इति मन्प्रत्यय आकारादेशश्च । नित्स्वरः । इन्द्रजूतः । जू इति सौत्रो धातुर्गत्यर्थः । ' ऋयुकः किति ' इति निष्ठायामिट्प्रतिषेधः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः । अर्षात् । ' ऋ गतौ ' इत्यस्य लेटि तिपि ' सिब्बहुलम्[8] ' इति सिप् । लेटः आडागमः[8] । ' एकाचः[9] ' इतीट्प्रतिषेधः । गुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वृणे । ' वृङ् संभक्तौ ' इत्यस्य लटि रूपम् । यज्ञियानाम् । ' यज्ञर्त्विग्भ्यां घखञौ ' इति घप्रत्ययः । प्रत्ययस्वरः ॥

१. ख-ग-च-ज-ण-न-भ-स–' वा ' नास्ति । २. ख-ग–' तद्वत् ते ' नास्ति; च-ज-ण–ते; ल–तद्वत् । ३. ख-ग-च–प्रह्वीभवामि । ४. ख-ग-च-ज-न-फ-भ–' ते....इति ' नास्ति । ५. न–वृतृवदिहनि" । ६. त–समाभजे । ७. ख-ग-च-ज-ण-न-न-भ-म–अत्र च प्रत्ययस्वरः । ८. ल–लेटोऽडाटावित्याडागमः ।

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ।
प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ॥ १२ ॥

अतारिषुः । भरताः । गव्यवः । सम् । अभक्त । विप्रः । सुऽमतिम् । नदीनाम् ।
प्र । पिन्वध्वम् । इषयन्तीः । सुऽराधाः । आ । वक्षणाः । पृणध्वम् । यात । शीभम् ॥१२॥

[v]गव्यवः गा आत्मन इच्छन्तः [v]भरताः भरतकुलजाः सर्वे [v]अतारिषुः तां नदीं समतरन् । [v]विप्रः मेधावी विश्वामित्रः [v]नदीनां [v]सुमतिं शोभनां स्तुतिं [v]समभक्त समभजत । यूयं तु यथापूर्वम् [v]इषयन्तीः कुल्यादिद्वारा अन्नं[1] कुर्वाणा अत एव [v]सुराधाः शोभनधनोपेता यूयं [v]वक्षणाः कृत्रिमसरितः कुल्याः [v]प्र [v]पिन्वध्वं प्रकर्षेण तर्पयत । [v]आ [v]पृणध्वं ताः सर्वतः पूरयत च । [v]शीभं शीघ्रं [v]यात गच्छत च ॥ अतारिषुः । 'तॄ प्लवनतरणयोः' इत्यस्य लुङि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । अडागमस्वरः । गव्यवः । सुपः क्यच् । 'क्याच्छन्दसि' इत्युप्रत्ययः । तस्य स्वरः । अभक्त । 'भज सेवायाम्' इत्यस्य लुङि सिचः[2] 'झलो झलि' इति लोपः[2] । पादादित्वान्निघातः । पिन्वध्वम् । 'पिवि सेचने' इत्यस्य लोटि रूपम् । निघातः । इषयन्तीः । इषं कुर्वत्यः । 'तत्करोति' इति णिच् । 'णाविष्ठवत्प्रातिपदिकस्य' इति इष्टवद्भावात् 'टेः' इति टिलोपः । 'वा छन्दसि' इति सवर्णदीर्घः । प्रत्ययस्वरः । पृणध्वम् । 'पृण प्रीणने' । लोटि रूपम् । व्यत्ययेनात्मनेपदम् । वाक्यभेदान्निघातः । यात । 'या प्रापणे' इत्यस्य लोटि रूपम् । अत्रापि न निघातः । शीभम् । 'शीभृ कत्थने' । श्लाघ्यतेऽनेन तद्वानिति करणे घञ् । जित्स्वरः ॥

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनस्याघ्यौ शूनमारताम् ॥ १३ ॥

उत् । वः । ऊर्मिः । शम्याः । हन्तु । आपः । योक्त्राणि । मुञ्चत ।
मा । अदुःऽकृतौ । विऽएनसा । अघ्यौ । शूनम् । आ । अरताम् ॥ १३ ॥

पूर्वमुत्तीर्षुर्विश्वामित्रो नदीरुक्त्वा अधुना उत्तितीर्षुः[3] पुनराह । हे नद्यः [v]वः युष्माकम् [v]ऊर्मिः तरङ्गः [v]शम्याः युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः [v]उत् ऊर्ध्वं यथा भवन्ति[4] तथा [v]हन्तु गच्छतु । य तरङ्गो रज्जूनामधो गच्छत्तिन्नगभिप्रायः । तथा हे [v]आपः यूयं [v]योक्त्राणि ता रज्जूः [v]मुञ्चत । यथा न स्पृशन्ति तथा यान्तिवायभिप्रायः । [v]व्येनसा विगतपापे अत एव [v]अदुष्कृतौ कल्याणकर्मकारिण्यौ [v]अघ्ये[5] न केनापि तिरस्करणीये विपाट्छुतुद्यौ [v]शूनं समृद्धिं [v]मा [v]आरताम् आगच्छताम् । एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातोऽतरदिति ॥ ऊर्मिः । 'ऋ गतौ' । 'अर्तेरूच्च[6]' इति मिप्रत्ययः । 'ऊः' इत्ययमादेशो धातोः । ऋच्छतीत्यूर्मिः । प्रत्ययस्वरः । शम्याः । 'शमु उपशमे' । 'पोरदुपधात्' इति यत्प्रत्ययः । 'यतोऽनावः' इत्याद्युदात्तत्वम् । हन्तु । 'हन हिंसा-

---

१. ल–गमनम् । २. ख-ग-च-ज-ण–सिलोपः । ३. ल–उत्तीर्णः ४. ख-ग-घ-ज-ण-त-न-प-भ-स–भवति । ५. ख-ग-च-ज-ण-त-न-भ-ग–'अघ्ये' नास्ति । ६. त–अर्तेरूच ।

गत्योः ' इत्यस्य लोटि रूपम् । निघातः । योक्त्राणि । ' युजिर् योगे ' । करणे ' दाम्नीशसयुयुज० ' इत्यादिना ष्ट्रन्प्रत्ययः । नित्स्वरः । मुञ्चत । ' मुचॢ मोक्षणे ' । निघातः । अदुष्कृतौ । ' इसुसोः सामर्थ्ये ' इति विसर्जनीयस्य षत्वम् । श्येनसा । बहुव्रीहौ पूर्वपदस्वरः । सुपो डादेशः । अश्व्यौ । ' हन हिंसागत्योः ' इत्यस्य नञ्पूर्वस्य ' अश्व्यादयश्च ' इति निपातनात् यक् । किरवादुपधालोपः । ' हो हन्तेः० ' इति घत्वम् । सर्वविधीनां छन्दसि विकल्पितत्वादत्र औडः शीभावाभावः । एकादेशस्वरः । शूनम् । श्वयतेः ' नपुंसके भावे क्तः ' इति क्तः । यजादित्वात् संप्रसारणम् । ' हलः ' इति दीर्घत्वम् । ' ओदितश्च ' इति निष्ठानत्वम् । ' निष्ठा च द्व्यजनात् ' इत्याद्युदात्तः । अरताम् । ' ऋ गतौ ' इत्यस्य लुङि च्लेः ' सर्तिशास्त्यर्तिभ्यश्च ' इत्यङादेशः । ' ऋदृशोऽङि गुणः ' । ' न माङ्योगे ' इत्यडभावः । निघातः ॥ ॥ १४ ॥

' इन्द्रः पूर्भित् ' इत्येकादशर्चं पञ्चमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । अत्रानुक्रमणिका—' इन्द्रः पूर्भिदेकादश ' इति । अग्निष्टोमे माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे ' इन्द्रः पूर्भित् ' इति सूक्तम् । ' होत्रकाणाम् ' इति खण्डे सूत्रितम्—' इन्द्रः पूर्भिदुदु ब्रह्माणि ' (आश्व. श्रौ. ५. १६) इति । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे चातुर्विंशिकातिदिष्टस्य अहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि । तत्रेदं प्रथमम् । ' इन्द्रः पूर्भित्य एक इद्यस्तिग्मशृङ्गः ' (आश्व. श्रौ. ७. ५) इति । उद्भिद्बलभिदोर्निष्केवल्ये एतत्सूक्तं निविद्धानीयम् । सूत्रितं च—' इन्द्र सोममिन्द्रः पूर्भिदिति मध्यंदिनः ' (आश्व. श्रौ. ९. ८) इति ॥

इन्द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥ १ ॥

इन्द्रः । पूःऽभित् । आ । अतिरत् । दासम् । अर्कैः । विदत्ऽवसुः । दयमानः । वि । शत्रून् । ब्रह्मऽजूतः । तन्वा । ववृधानः । भूरिऽदात्रः । आ । अपृणत् । रोदसी इति । उभे इति ॥१॥

विश्वामित्रः स्तौति । [v]पूर्भित् असुरपुरां [1]भेत्ता अत एव [v]विदद्वसुः वेदयद्भिः स्वमहिमप्रत्यापकैर्वसुभिर्युक्तः [v]शत्रून् असुरान् [v]वि [v]दयमानः विशेषेण हिंसन् । तथा च यास्कः—' विदद्वसुर्दयमानो वि शत्रून् इति हिंसाकर्मा ' (निरु. ४. १७) इति । तादृशः [v]इन्द्रः [v]दासम् । दस्यतेऽनेन तम इति दासो वासरः । तम् [v]अर्कैः अर्चनीयैः स्वतेजोभिः [v]आतिरत् समन्तात् [2]अवर्धयत् इन्द्रस्य सूर्यात्मकत्वात् । तथा च स्मृतिः—' [3]चैत्रमासे [4]तपेदिन्द्रः ' इति । किंच । [v]ब्रह्मजूतः ब्रह्मणा जूतः [5]स्तोत्रेणाकृष्टः । यद्वा ब्रह्मणा जगत्स्रष्ट्रा [6]प्रेरितः [v]तन्वा [7]स्वशरीरेण [v]वावृधानः वर्धमानः [v]भूरिदात्रः । दायते लूयतेऽनेन शत्रुशिर इति दात्रमायुधम् । बहुविधायुधोपेतः । तादृश इन्द्रः [v]उभे [v]रोदसी [8]द्यावापृथिव्यौ [v]आपृणत सर्वतोऽतर्पयत् ॥ पूर्भित् । ' भिदिर् विदारणे ' । क्विप् । अतिरत् ।

---

१. ख-ग-च-ज-ण-त-न-यत् । २. च-न-फ-कृत्वम् । ३. ख-फ-भ-औडः न शीभावः; त-न-औडः शीभावः । ४. ख-ग-च-ज-ण-त-न-भ-ल-स-माध्यंदिनः । ५. च-फ-असुरपुरीभेत्ता; ६. ख-ग-घ-च-ज-ण-फ-भ-आ समन्तात् । ७. न-चैत्रे मासे; ल-ज्येष्ठमासे । ८. न-स-' जूतः ' नास्ति । ९. फ-जगत्स्रष्ट्रैव; स-जगत्स्रष्ट्रा । १०. च-फ-तन्वा ववृधानः शरीरेण वर्धनशीलः भूरिदात्रः बहुच्छेदनसाधनयुक्तः उभे रोदसी ।

तरतेर्ण्यत्ययेन शः । ' ऋत इद्धातोः ' इतीत्वम् । निघातः । दासम् । करणे घञ् । ञित्स्वरः । विदद्वसुः । विदेरन्तर्भावितण्यर्थस्य शतरि अदादित्वाच्छपो लुकि सति प्रत्ययस्वरेण शतुरुदात्तत्वम् । बहुव्रीहौ पूर्वपदस्वरः । दयमानः । ' दय दानगतिरक्षणहिंसादानेषु[1] ' । आत्मनेपदी । लटः शानच् । ' न लोकाव्यय[2] ' इति षष्ठीप्रतिषेधः । ववृधानः[3] । ' वृधु वर्धने ' । कानचि रूपम् । संहितायाम् अभ्यासस्य तुजादित्वाद्दीर्घः । भूरिदात्रः । ' दाप् लवने ' । करणे ' दात्रो ' इत्यादिना ष्ट्रन्प्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । अपृणत् । ' पृण प्रीणने[4] ' इत्यस्य लङि तुदादित्वाच्छः । निघातः । रोदसी । रुदेरसुनि रूपम् । ञित्स्वरः ॥

मघस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥ २ ॥

मघस्य । ते । तविषस्य । प्र । जूतिम् । इयर्मि । वाचम् । अमृताय । भूषन् ।
इन्द्र । क्षितीनाम् । असि । मानुषीणाम् । विशाम् । दैवीनाम् । उत । पूर्वऽयावा ॥ २ ॥

हे [V]इन्द्र [V]भूषन् स्वामलंकुर्वन्नहं [V]मघस्य महनीयस्य[5] स्तुत्यस्य [V]तविषस्य बलवतः [V]ते तव [1]जूतिं मनसा प्रेरितां [V]वाचं स्तुतिलक्षणाम् [V]अमृताय[6] अन्नार्थं[7] [V]प्र [1]इयर्मि प्रकर्षेणोच्चारयामि । [1]मानुषीणां [V]क्षितीनां मनोर्जातानां मनुष्याणाम् [1]उत अपि च [V]दैवीनां देवसंबन्धिनीनां [V]विशां प्रजानां [V]पूर्वयावा अग्रतो गन्ता त्वम् [V]असि ॥ मघस्य । ' मह पूजायाम् ' । ' नहेर्हलोपश्च ' (उ. सू. ५. ७०१) इति ' हलोपः ' इत्यनुवृत्तौ ' महेश्च ' इति खप्रत्ययो हलोपश्च । मह्यते पूज्यते सर्वैरिति मघः । ' खान्तस्याद्यादेः ' इत्यन्तोदात्तत्वम् । यद्यपि मकारादिर्भवति[8] तथापि वचनसामर्थ्याद्भवति । तविषस्य । तवतेः टिषच्प्रत्ययः[9] । चित्स्वरः । जूतिम् । ' ऊतियूति ' इत्यादिना क्तिनः[10] उदात्तत्वम् । इयर्मि । अर्तिर्जुहोत्यादिः । ' अर्तिपिपर्त्योश्च ' इत्यभ्यासस्येत्वम् । ' अभ्यासस्य[11] ' इतीयङादेशः । पादादित्वान्न निघातः । अभ्यस्तस्वरः । भूषन् । ' भूष अलंकारे ' इत्यस्य शतरि रूपम् । शतुर्लसार्वधातुकस्वरे[12] धातुस्वरः । असि । अस्तेर्लटि रूपम् । निघातः । मानुषीणाम् । ' मनोर्जातौ[13] ' इत्यञ् । पुगागमः । ' टिड्ढाणञ् ' इति ङीप । ञित्स्वरः । दैवीनाम् । ' देवाद्यञञौ ' इत्यञ् । अत्रापि पूर्ववत् ङीप् । ञित्स्वरः । पूर्वयावा । ' या प्रापणे ' इत्यस्मात् ' आतो मनिन् क्वनिब्वनिपश्च ' इति वनिप् । कृदुत्तरपदस्वरः ॥

इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ ३ ॥

इन्द्रः । वृत्रम् । अवृणोत् । शर्धऽनीतिः । प्र । मायिनाम् । अमिनात् । वर्पऽनीतिः ।
अहन् । विऽअंसम् । उशधक् । वनेषु । आविः । धेनाः । अकृणोत् । राम्याणाम् ॥ ३ ॥

१. ख-ग-ज-त-न-भ-ल-स-°हिंसाग्रहणेषु । २. ज-ण-वावृधानः । ३. भ-स-प्राणने । ४. प-मंहनीयस्य । ५. च-फ-स-अमृताय पानार्थम् ; ल-अमृतपानार्थम । ६. न-मकारादेर्न भवति । ७. च-फ-इषच्प्रत्ययः । ८. ज-ण-ल-क्तिन् । ९. त-°स्वरेण । १०. ल-इत्यस्य ।

[v]शर्धनीतिः । नयनं नीतिः कर्म । शर्धं प्रवृद्धं[1] नीतिः कर्म यस्य स तथोक्तः । सः [v]इन्द्रः [v]वृत्रम् असुरम् [v]अवृणोत् बलेनारुधत् । तथा [v]वर्पणीतिः युद्धे परप्रहाराणां निवारककर्मा इन्द्रः [v]मायिनाम् । द्वितीयार्थे षष्ठी । मायिनोऽसुरान् [v]प्र [v]अमिनात् प्रकर्षेणावधीत् । [v]उशधक् शत्रुवधं कामयमानः इन्द्रः [v]वनेषु गूढचारिणमसुरं [v]व्यंसं विगतांसं यथा भवति तथा [v]अहन् जघान । अथ तस्मिन् रात्रिचरे गवामपहर्तरि हते सति [v]राम्याणाम् । रमणं स्त्रीभिः सह क्रीडा रामः । तमर्हन्तीति राम्याः रात्रयः । तासां रात्रीणामन्तःस्थिताः [v]धेनाः गाः [v]आविः [v]अकृणोत् प्रकटा अकरोत् । रात्रीणाम् असुराक्रान्तत्वे तैत्तिरीयकम्—'अहर्देवानामासीद्रात्रिरसुराणां तेऽसुरा यदेवानां वित्तं वेद्यमासीत्तेन सह रात्रिं प्राविशन्निति ये दिवा स्तोतारो राम्यास्तेषां वाचो धेनाः' इति ॥ अवृणोत । 'वृञ् वरणे' इत्यस्य लङि रूपम् । निघातः । शर्धनीतिः । शर्धनीतिरुत्साहार्थः । अस्मात् कर्मणि घञ् । बहुव्रीहौ पूर्वपदस्वरः । अमिनात । 'मीञ् हिंसायाम्' इत्यस्य लङि 'मीनातेर्निगमे' इति ह्रस्वः । निघातः । अहन । हन्तेर्लङि रूपम् । उशधक् । 'वश कान्तौ' । पृषोदरादित्वात् रूपसिद्धिः । आविः । स्वरादिष्वन्तोदात्तत्वेन पठितत्वादन्तोदात्तः । धेनाः । 'धेट् पाने' । 'धेट इच्च' (उ. सू. ३. २९१) इति नप्रत्यय इकारश्चान्तादेशः । गुणः । धयन्ति तामिति धेना वाक् । 'धेना जिगानि' (ऋ. सं. १. २. ३) इत्यत्र प्रत्ययस्वरेणान्तोदात्तः । अत्र व्यत्ययेनाद्युदात्तत्वम् । अकृणोत । 'कृवि हिंसाकरणयोः' । निघातः । राम्याणाम् । 'रमु क्रीडायाम्' । राममर्हन्तीत्यर्थे 'छन्दसि च' इति यप्रत्ययः । तस्य स्वरः । यद्वा रमेः अन्तर्णीतण्यर्थात् 'अध्यादयश्च' इति यक्प्रत्ययः । 'प्ररमयति भूतानि नक्तंचारीण्युपरमयतीतराणि' (निरु. २. १८) इति यास्कः । वर्णव्यत्ययः ॥

इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥ ४ ॥

इन्द्रः । स्वःऽसाः । जनयन् । अहानि । जिगाय । उशिक्ऽभिः । पृतनाः । अभिष्टिः । प्र । अरोचयत् । मनवे । केतुम् । अह्नाम् । अविन्दत् । ज्योतिः । बृहते । रणाय ॥ ४ ॥

[v]स्वर्षाः स्वर्गप्रदः [v]इन्द्रः [v]अहानि स्वतेजोभिः [v]जनयन् [v]उशिग्भिः युद्धं कामयमानैरङ्गिरोभिः सह [v]पृतनाः परकीयाः सेनाः [v]अभिष्टिः अभिभावुकः सन् [v]जिगाय शत्रूनजैषीत् । शत्रुवधानन्तरं [v]मनवे मनुष्याय कर्मकर्त्रे यजमानाय [v]अह्नां [v]केतुं प्रज्ञापकं सूर्यं [v]प्रारोचयत् तथा च तमोरूपासुरवधात् प्रकर्षेणादीपयत् । ततः [v]बृहते महते[2] [v]रणाय युद्धप्रकाशनाय [v]ज्योतिः प्रकाशम् [v]अविन्दत् अलभत ॥ स्वर्षाः । 'षणु दाने' । क्विप् । 'जनसनखनां सञ्झलोः' इत्यात्वम् । 'सनोतेरनः' इति षत्वम् । 'अहरादीनां पत्यादिपूपसंख्यानम्' इति विसर्जनीयस्य रुत्वम् । जिगाय । 'जि जये' इत्यस्य लिटि 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः । लित्स्वरः[5] । पृतनाः । 'पृङ् व्यायामे[6]' । 'कृपृभ्यां कित्' इति तनन्प्रत्ययः । व्याप्रियन्तेऽत्र योद्धार इति पृतनाः सेनाः । निघादाद्युदात्तः । अभिष्टिः । अभिगन्ता । 'इषु[7] गतौ' । 'मन्त्रे वृष[8]' इत्यादिना क्तिन्नुदात्तः । स[9] हि भावपरोऽपि भवितारं लक्षयति[4] ।

१. च-ज-ण–वृद्धम् । २. ल–अत्र तु । ३. ख-ग-न-भ-स–अन्तर्णीतस्यार्थात् ; ज-ण–अन्तर्भावितण्यर्थात् । ४. ल-स–'महते' नास्ति । ५. ख-ग-च-ज-ण-त-न-फ-भ-स–'लित्स्वरः' नास्ति । ६. ख-ग-च-ज-ण-त-न-भ-स–आयामे । ७. न-ल-स–इषु । ८. ख-ग-च-ज-ण-न-भ-ल-स–'स हि... लक्षयति' नास्ति ।

' तिनुत्रतथ' इत्यादिना इट्प्रतिषेधः । शकन्ध्वादित्वात् पररूपत्वम् । कृदुत्तरस्वरः । अरोचयत् । ' रुच दीप्तौ ' इत्यस्य लङि रूपम् । मनवे । ' मन ज्ञाने ' । ' शॄस्वृस्निहि ' इत्यादिना उप्रत्ययः । निदनुवृत्तेराद्युदात्तः । अविन्दत् । ' विदॢ लाभे ' इत्यस्य ' शे मुचादीनाम् ' इति नुम् । पादादित्वादनिघातः । रणाय । ' क्रियाग्रहणं कर्तव्यम् ' इति संप्रदानसंज्ञा । रणतिः शब्दार्थः । ' वशिरण्योरुपसंख्यानम् ' (पा. सू. ३. ३. ५८. ३) इत्यप्प्रत्ययः । रणन्ति शब्दं कुर्वन्ति परस्परं योद्धारोऽत्रेति रणः संग्रामः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥ ५ ॥

इन्द्रः । तुजः । बर्हणाः । आ । विवेश । नृऽवत् । दधानः । नर्या । पुरूणि ।
अचेतयत् । धियः । इमाः । जरित्रे । प्र । इमम् । वर्णम् । अतिरत् । शुक्रम् । आसाम् ॥५॥

स तादृशः [V]इन्द्रः [V]तुजः बाधिकाः [V]बर्हणाः युद्धोत्साहेन वर्धमानाः परकीयाः सेनाः [V]नृवत् मनुष्यवत् [V]आ [V]विवेश प्रकाशं लब्ध्वा प्राविशत् । किं कुर्वन् । [V]पुरूणि बहूनि [V]नर्या युद्धनयनकारिणां योग्यानि धनानि [V]दधानः प्रयच्छन् आविवेश । स इन्द्रः [V]जरित्रे स्तोत्रे [V]इमाः दृश्यमानाः [V]धियः उपसः। ध्यायन्त्यासु मनुष्या इति। ता धियः [V]अचेतयत् अज्ञापयत । अथ [V]आसाम् उषसाम् [V]इमं [V]शुक्रं [V]वर्णं प्रकाशेन[1]युक्तं[1] [V]प्र [V]अतिरत् स्वतेजसा प्रकर्षेण वर्धयति । धीशब्दस्योषःपरत्वे मन्त्रवर्णः— ' शुक्रवर्णामुदु नो यंसते धियम् ' (ऋ. सं. १. १४३. ७) इति ॥ तुजः । ' तुज हिंसायाम् ' । क्विप् । धातुस्वरः । बर्हणाः । ' वृहि वृद्धौ ' । अस्मात् ' युच्[2] बहुलम् ' इति[3] कर्तरि युच् । व्यत्ययेनाद्युदात्तत्वम् । विवेश । विशतेर्लिटि[4] रूपम् । निघातः । नृवत । नृशब्दात् ' तेन तुल्यम् ' इति वतिप्रत्ययः । तस्य स्वरः । दधानः । दधातेः शानचि रूपम् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । नर्या । नरेषु[5] साधूनि[5] इत्यर्थे ' तत्र साधुः ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । अचेतयत । ' चिती संज्ञाने ' इत्यस्य ण्यन्तस्य लङि रूपम् । अडागमस्वरः । धियः । ' ध्यै चिन्तायाम् ' । ' अन्येभ्योऽपि दृश्यते ' इति क्विप् । दृशिग्रहणात् संप्रसारणम् । धातुस्वरः । इमाः । ' दृश्च ' (पा. सू. ७. २. १०९) इति दकारस्य मकारः । एकादेशस्वरः । अतिरत् । तरतेर्व्यत्ययेन शः । निघातः । आसाम् । ' इदमोऽन्वादेशेऽश् ' इत्यशादेशोऽनुदात्तश्च । प्रत्ययः सुस्वादनुदात्तः । अतः सर्वानुदात्तः ॥ ॥ १५ ॥

महो महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥ ६ ॥

महः । महानि । पनयन्ति । अस्य । इन्द्रस्य । कर्म । सुऽकृता । पुरूणि ।
वृजनेन । वृजिनान् । सम् । पिपेष । मायाभिः । दस्यून् । अभिभूतिऽओजाः ॥ ६ ॥

१. त–' प्रकाशेन युक्तम् ' नास्ति । २. ल–' युच् ' नास्ति । ३. च–इति वचनात् । ४. च–विशेर्लिटि । ५. ज-ण–नृषु साधुः ।

[v]महः महतः [v]अस्य एतादृशसामर्थ्यस्य [v]इन्द्रस्य [v]महानि महनीयानि [v]पुरूणि बहूनि [v]सुकृता[1] सुष्ठु कृतानि[1] [v]कर्म वृत्रहननादीनि कर्माणि [v]पनयन्ति स्तुवन्ति। 'इन्द्रस्य कर्म सुकृता पुरूणि' इत्येतत्पदकदम्बकम् अन्वार्थभेदात् पदकाले नोत्सृज्यते। तादृश इन्द्रः [v]वृजनेन। वर्ज्यन्ते शत्रवोऽनेनेति वृजनं बलम्। तेन बलेन [v]वृजिनान् पापरूपानसुरान् [v]सं [v]पिपेष सम्यक् चूर्णीचकार। तथा [v]अभिभूत्योजाः। अभिभूतिः शत्रुविषयोऽभिभवः। तत्रौजो बलमस्येत्यभिभूत्योजाः शत्रूणां पराभवे समर्थः। तादृश इन्द्रः [v]दस्यून् उपक्षपयितॄनसुरान् [v]मायाभिः कपटैः सं पिपेष॥ पनयन्ति। पनतेः स्तुत्यर्थस्य 'गुपूधूपविच्छिपणिपनिभ्यः[2]' इत्यायप्रत्ययः। ह्रस्वश्छान्दसः। निघातः। वृजनेन। 'वृजी वर्जने'। 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' इति क्युप्रत्ययः। कित्त्वादगुणः। प्रत्ययस्वरः। वृजिनान्। 'वृजी वर्जने'। 'वृजेः किच्च' (उ. सू. २. २०५) इतीनच्प्रत्ययः। वृजिनं पापम्। तद्वतः। अर्शआदित्वादच्। एकादेशस्वरः। पिपेष। 'पिष्लृ संचूर्णने[3]' इत्यस्य लिटि णलि रूपम्। निघातः। अभिभूत्योजाः। भूतिर्भवनम्। भावे क्तिन्। 'तादौ च निति[4]' इत्यभेः प्रकृतिस्वरत्वम्। अभिभूतावोजो यस्येति 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिः' इति समासः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति॥ ७॥

युधा। इन्द्रः। मह्ना। वरिवः। चकार। देवेभ्यः। सत्ऽपतिः। चर्षणिऽप्राः।
विवस्वतः। सदने। अस्य। तानि। विप्राः। उक्थेभिः। कवयः। गृणन्ति॥ ७॥

[v]सत्पतिः सतां देवानां पतिः [v]चर्षणिप्राः चर्षणीनां मनुष्याणामपेक्षितफलप्रदानेन कामपूरकः सः [v]इन्द्रः [v]मह्ना महता [v]युधा युद्धेन [v]वरिवः। भृशं व्रियतेऽर्थिभिरिति वरिवो धनम्। तादृशं धनं युद्धेन लब्ध्वा [v]देवेभ्यः देवनशीलेभ्यः स्तोतृभ्यः [v]चकार दत्तवान। [v]विप्राः मेधाविनः [v]कवयः स्तोतारः [v]विवस्वतः विशेषेणाग्निहोत्रादिकर्मार्थं वसतो यजमानस्य [v]सदने गृहे [v]अस्य इन्द्रस्य [v]तानि वृत्रहननबहुप्रदानादीनि कर्माणि [v]उक्थेभिः स्तोत्रैः [v]गृणन्ति स्तुवन्ति॥ युधा। 'युध संप्रहारे'। भावे संपदादिलक्षणः क्विप्। 'सावेकाचः[5]' इति विभक्तेरुदात्तता। वरिवः। 'वृञ् वरणे' इत्यस्य यङ्लुकि 'ऋतश्च' इत्यभ्यासस्य रिगागमः। तदन्तादसुन्। बाहुलकादिलोपः। नित्स्वरः। चकार। करोतेर्लिटि रूपम्। निघातः। सत्पतिः। अस्तेः शतरि रूपं सदिति। 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम्। चर्षणिप्राः। 'प्रा पूरणे'। विच्। विवस्वतः। विपूर्वात् 'वस निवासे' इत्यस्मात् संपदादिलक्षणो भावे क्विप्। 'तदस्यास्त्यस्मिन्[6]' इति मतुप्। 'मादुपधायाः[7]' इति तस्य वत्वम्। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। गृणन्ति। 'गृ शब्दे' इत्यस्य लटि रूपम्। निघातः॥

---

१. ख-ग-ज-ण-न-भ-स-सुकृतानि; च-सुकृता। २. ख-ग-च-ज-ण-न-भ-चूर्णने। ३. ख-ग-च-ज-ण-त-इत्येतस्मात्। ४. ख-ग-च-ज-ण-त-न-फ-भ-स-इत्यस्मात्।

सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥ ८ ॥

सत्राऽसहम् । वरेण्यम् । सहःऽदाम् । ससऽवांसम् । स्वः । अपः । च । देवीः ।
ससानं । यः । पृथिवीम् । द्याम् । उत । इमाम । इन्द्रम । मदन्ति । अनु । धीऽरणासः ॥८॥

[1]धीरणासः धिया स्तुत्या रणयन्तः[2] स्तोतारः [3]सत्रासाहं महतो वृत्रादेरभिभवितारम् अत एव [4]वरेण्यं सर्ववरणीयं [5]सहोदां दुर्बलस्यार्थिनो बलप्रदं [6]देवीः देवनशीलाः [7]अपः [7]स्वः [7]च स्वर्लोकं च [8]ससवांसं संभजमानम्[9] [7]इन्द्रम् [8]अनु [8]मदन्ति हृष्यन्ति । हर्षमनु स्वयं हृष्यन्तीत्यर्थः । [7]यः इन्द्रः [8]पृथिवीम् [7]उत अपि च [7]द्यां द्युलोकम् [8]इमाम् इममन्तरिक्षलोकं चैतान् त्रीन् लोकान् [7]ससान तत्तल्लोकवासिभ्यः[10] ददौ । तमनुमदन्तीत्यन्वयः ॥ सत्रासाहम् । ' षह मर्षणे ' । ' छन्दसि सहः ' इति ण्विः । णित्त्वादुपधावृद्धिः । ससवांसम् । ' षण संभक्तौ ' इत्यस्य क्रमादिष्वभावे नकारलोपे रूपम् । प्रत्ययस्वरः । ससान । ' षणु दाने ' इत्यस्य लिटि रूपम् । लित्स्वरः[11] । मदन्ति । मदि स्तुत्यादिषु इत्यस्य व्यत्ययेन परस्मैपदम् । निघातः । धीरणासः । रणतीति रणा वाक् । धिया स्तुत्या रणा येषां ते धीरणाः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥ ९ ॥

ससानं । अत्यान् । उत । सूर्यम् । ससान । इन्द्रः । ससान । पुरुऽभोजसम् । गाम् ।
हिरण्ययम् । उत । भोगम् । ससान । हत्वी । दस्यून् । प्र । आर्यम् । वर्णम् । आवत् ॥९॥

पूर्वमन्त्रे प्रतिपादितः सः [7]इन्द्रः [8]अत्यान् अश्वान् [7]ससान युद्धार्थं मरुद्भ्यो ददौ । [7]उत अपि च [8]सूर्यं जगत्प्रकाशकमादित्यं [7]ससान । प्राणिनां व्यवहारनिर्वाहाय तेभ्यो ददौ । तथा [8]पुरुभोजसं पुरुभिः सर्वैर्जनैः क्षीरादिद्वारेणोपभुज्यत इति पुरुभोजाः । क्षीरादिरूपबहुविधान्नोपेतां [8]गाम् अग्निहोत्रादिसिद्ध्यर्थं [7]ससान तेभ्यः[12] ददौ । [7]उत अपि च [7]हिरण्ययं सुवर्णमयं [8]भोगं धनम् । भुज्यतेऽस्मिन्निति भोगो गृहं वा । [7]ससान अर्थिभ्यो ददौ । ततः [7]दस्यून् बाधकानसुरान् [8]हत्वी हत्वा [8]आर्यम् उत्तमं [8]वर्णं त्रैवर्णिकं [7]प्र [8]आवत । यथा कर्मविघ्नो न भवेत्तथापालयत ॥ ससान । ' षणु दाने ' इत्यस्य लिटि णलि रूपम् । लित्स्वरः[13] । हिरण्ययम् । हिरण्यशब्दात् विकारार्थे ' मयड्वैतयोः[14] ' (पा. सू. ४.३. १४३) इति विहितस्य छन्दसि विषये ' ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि ' इति निपातनात् मयटो मकारलोपः । प्रत्ययस्वरः । हत्वी । हन्तेः क्त्वार्थे ' स्नात्व्यादयश्च ' इति निपातितः । प्रत्ययस्वरः । आवत् । अवतेर्लङि रूपम् ॥

---

१. ख-ग-घ-ज-ण-त-न-भ-ल-स-रमयन्तः । २. ख-न-स-भजमानम् । ३. फ-भ-तल्लोक° । ४. ग-ज-ण-सत्रासहम् । ५. ख-ग-ज-ण-न-फ-भ-ल-स-नित्स्वरः । ६. घ-ज-ण-भ-तेभ्यः प्राणिभ्यः । ७. ख-ग-घ-च-ज-ण-फ-भ-ल-भ-नित्स्वरः ।

इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवदमिताभिक्रतूनाम् ॥ १० ॥

इन्द्रः । ओषधीः । असनोत् । अहानि । वनस्पतीन् । असनोत् । अन्तरिक्षम् ।
बिभेद । वलम् । नुनुदे । विऽवाचः । अथ । अभवत् । दमिता । अभिऽक्रतूनाम् ॥ १० ॥

तादृशः [V]इन्द्रः [V]ओषधीः पक्वफलसंयुक्तास्तृणगुल्मादिकाः [V]असनोत् प्राणिनामुपभोगार्थं प्रादात् । तथा [V]अहानि दिवसांश्च आयुष्परिकल्प्यर्थं प्रायच्छत । किंच [V]वनस्पतीन् यज्ञार्थं खदिरपलाशादिलक्षणान्[1] वृक्षान् [V]असनोत् । तथा [V]अन्तरिक्षं संचारार्थं प्रादात् । तथा [V]वलम् । संवियतेऽनेन आकाशमिति वलो मेघः । तं मेघं [V]बिभेद उदकप्रेरणार्थमभिदत् । [V]विवाचः विरुद्धवाचः प्रतिकूलानसुरान् [V]नुनुदे प्राणिनां रक्षार्थं तान् बबाधे । [V]अथ अनन्तरम् [V]अभिक्रतूनाम् । क्रतुः कर्म । अभि आभिमुख्येन युद्धार्थं कर्म येषां तेऽभिक्रतवः बलीयांसः शत्रवः । तेषामपि [V]दमिता उपशमयिता [V]अभवत् अभूत्[2] । एवं हितकरणाहितपरिहाराभ्यां सर्वाः प्रजाः पालयति स्मेति भावः ॥ असनोत् । ' षणु दाने ' इत्यस्य लङि रूपम् । वनस्पतीन् । पारस्करप्रभृतित्वात् सुडागमः । वनशब्दः ' नड्विषयस्य ' इत्याद्युदात्तः । पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः । ' उभे वनस्पत्यादिषु युगपत् ' इत्युभयपदप्रकृतिस्वरत्वम् । बिभेद । ' भिदिर् विदारणे ' इत्यस्य लिटि रूपम् । लित्स्वरः । नुनुदे । ' नुद प्रेरणे ' इत्यस्य लिटि रूपम् । वाक्यभेदादनिघातः । प्रत्ययस्वरः । दमिता । ' दमु उपशमे ' इत्यस्य तृचि रूपम् । चित्स्वरः । अभिक्रतूनाम् । बहुव्रीहौ पूर्वपदस्वरः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ११ ॥

एषा ऋक्पूर्वमेव व्याख्याता ॥ ॥ १६ ॥

' तिष्ठा हरी ' इत्येकादशर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' तिष्ठा हरी ' इत्यनुक्रमणिका । अग्निष्टुति मरुत्वतीयशस्त्रे निविद्धानं सूक्तम् । सूत्रितं च—' तिष्ठा हरी यो जान एवेति मध्यंदिनः ' (आश्व. श्रौ. ९. ७) इति । इन्द्राग्न्योः कुलायनाम्न्येकाहेऽप्येतन्मरुत्वतीयनिविद्धानम् । सूत्रितं च—' तिष्ठा हरी तमु ष्टुहीति मध्यंदिनः ' (आश्व. श्रौ. ९. ७) इति । समूढे दशरात्रे तृतीये छन्दोमे मरुत्वतीयशस्त्रे एतत्सूक्तम् । सूत्रितं च—' तिष्ठा हरी प्र मन्दिन इमा उ त्वेति मरुत्वतीयम् ' (आश्व. श्रौ. ८. ७) इति । अतिरात्रे तृतीये पर्याये होतुः शस्त्रे परिहिते सति आद्या ' तिष्ठा हरी ' इत्येषा शस्त्रयाज्या । सूत्रितं च—' विश्वजिते तिष्ठा हरी रथ आ युज्यमानेति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

१. ख-ग-घ-च-ज-ण—°पालाशादि° । २. ल-स—' अभूत् ' नास्ति ।

तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।
पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय ॥ १ ॥

तिष्ठ । हरी इति । रथे । आ । युज्यमाना । याहि । वायुः । न । निऽयुतः । नः । अच्छ ।
पिबासि । अन्धः । अभिऽसृष्टः । अस्मे इति । इन्द्र । स्वाहा । ररिम । ते । मदाय ॥ १ ॥

विश्वामित्रः स्तौति । हे [v]इन्द्र [v]रथे स्यन्दने [v]युज्यमाना संयुज्यमानौ [v]हरी अश्वौ अभिलक्ष्य[1] कंचित्कालम् [v]आ [1]तिष्ठ । तत्र दृष्टान्तः [v]वायुर्न इति[2] । यथा वायू रथे नियुज्यमानाः [v]नियुतः वडवा अभिलक्ष्य कंचित्कालं तिष्ठति तद्वत् । अथ रथारूढस्त्वं [v]नः अस्मान् [v]अच्छ[3] अभिलक्ष्य आ [v]याहि शीघ्रमागच्छ । आगत्य च[4] [v]अस्मे अस्माभिः [v]अभिसृष्टः अनुज्ञातस्त्वम् [v]अन्धः सोमलक्षणमन्नं [v]पिबासि पिब । [v]स्वाहा । दत्तश्चायं सोमः । वयं [v]ते तव [v]मदाय हर्षाय स्वाहाकृतमिमं सोमं[5] [v]ररिम ददाम । अत्र ' याहि वायुर्न नियुतो नो अच्छ ' इत्यत्र रथेन आ याहीत्यर्थः । ' आपश्चित्पिप्युः स्तर्यो न गावः ' (ऋ. सं. ७. २३. ४) इत्यत्र[6] तन्न तथेति[6] पदकाले नोत्सृज्यते ॥ तिष्ठ । तिष्ठतेर्लोटि रूपम् । तिष्ठादेशस्याद्युदात्तः[7] । याहि । यातेर्लोटि रूपम् । हेर्ङित्त्वादन्तोदात्तः । वायुः । ' वा गतिगन्धनयोः ' इत्यस्मात् ' कृवापा[8] ' इत्यादिना उण् । आतो युक् । प्रत्ययस्वरः । पिबासि । पातेर्लेटयाडागमः । आगमस्यानुदात्तत्वात्[9] धातुस्वरः । अन्धः । ' अद भक्षणे ' । ' अदेर्नुम् धश्च ' इत्यसुन्नुमागमो धकारश्चान्तादेशः । अद्यते प्राणिभिः तद्वा[9] स्वयमत्तीति । तथा च श्रुतिः—' अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ' (तै. उ. २. २) इति । निस्वरः । अस्मे । ' सुपां सुलुक्[10] ' इति तृतीयायाः शे इत्यादेशः । ररिम । रातेर्लिटि रूपम् । वाक्यभेदादनिघातः । प्रत्ययस्वरः ॥

उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।
द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम् ॥ २ ॥

उप । अजिरा । पुरुऽहूताय । सप्ती इति । हरी इति । रथस्य । धूःऽसु । आ । युनज्मि ।
द्रवत् । यथा । सम्ऽभृतम् । विश्वतः । चित् । उप । इमम् । यज्ञम् । आ । वहातः । इन्द्रम् ॥ २ ॥

हे इन्द्र [v]पुरुहूताय पुरुभिर्बहुभिर्यजमानैर्यज्ञार्थमाहूताय तुभ्यम् [v]अजिरा शीघ्रगमनशीलौ[11] [v]सप्ती सर्पणशीलौ [v]हरी हरिनामकावश्वौ [v]रथस्य [v]धूर्षु युगप्रान्तेषु [v]उप [v]आ [v]युनज्मि अहं तथा योजयामि । [v]द्रवत् स रथः [v]यथा गच्छेत्तथेति शेषः । [v]विश्वतश्चित् सर्वतः [v]संभृतम् अग्निर्यजुर्भिः सविता स्तोमैः

---

१. घ-ज-अच्छ अभिलक्ष्य । २. ख-ग-घ-च-ज-ण-भ-' इति ' नास्ति । ३. ख-ग-च-ज-ण-भ-ल-' अच्छ ' नास्ति । ४. ख-ग-च-न-फ-भ-' च ' नास्ति । ५. ख-ग-घ-च-ज-ण-फ-भ-ल-सोमं च । ६. ख-ग-च-त-फ-भ-स-इत्येतन्न रथेति; ज-ण-इत्येतत् भिन्नार्थमिति; न-इत्यत्र अरथे इतीति । ७. च-फ-तिष्ठादेश आद्युदात्तः; ल-तिष्ठादेशस्याद्युदात्तत्वात् तत्राद्युदात्तत्वम् । ८. ज-ण-आगमस्यानुदात्तत्वापेक्षया; त-स-आगमानुदात्तत्वात्; ल-आगमस्यानुदात्तत्वम् । ९ न-ल-स-तन्वा । १०. त-न-शीघ्र° ।

इत्यादियज्ञसंभारैः संपूर्णम् ᵛइमं ᵛयज्ञं प्रति ᵛइन्द्रं त्वाम् ᵛउप ᵛआ ᵛवहातः तावश्वौ सम्यक् वहताम्॥ धूर्षु । धुर्वी हिंसार्थः । क्विप् । ' राल्लोपः ' इति वकारलोपः । ' वोरुपधायाः ' इति दीर्घः । ' सावेकाचः ' इति विभक्तेरुदात्तत्वम् । युनज्मि । ' युजिर् योगे ' । रुधादिः। लटि रूपम् । निघातः। द्रवत् । ' द्रु गतौ ' इत्यस्य छान्दसे[1] लङि रूपम् । व्यत्ययेनान्तोदात्तत्वम् । वहातः । वहेर्लेड्याडागमे रूपम् ॥

उपो॑ नयस्व वृषणा तपुष्पोतेमव॒ त्वं वृ॑षभ स्वधावः ।
ग्रसे॑तामश्वा॒ वि मु॑चेह शोणा॑ दि॒वेदि॑वे सदृशी॑रद्धि धा॒नाः ॥ ३ ॥

उपो॒ इति॑ । न॒यस्व॒ । वृ॒षणा॑ । तपु॑ष्पः । उ॒त । ई॒म् । अव॒ । त्वम् । वृ॒ष॒भ॒ । स्व॒धा॒ऽवः॒ । ग्रसे॑ताम् । अश्वा॑ । वि । मु॒च॒ । इ॒ह । शोणा॑ । दि॒वेऽदि॑वे । स॒दृ॒शीः॒ । अ॒द्धि॒ । धा॒नाः ॥३॥

ᵛवृषभ कामानां वर्षक ᵛस्वधावः अन्नवन् हे इन्द्र ᵛवृषणा सेचनसमर्थौ ᵛतपुष्पा तापकेभ्यः शत्रुभ्यो रक्षकावश्वौ ᵛउपो ᵛनयस्व अस्मत्समीपं प्रापय । ᵛउत अपि च ᵛत्वम् ᵛईम् एनं यजमानम् ᵛअव पालय । ᵛशोणा शोणवर्णौ तावश्वौ ᵛइह अस्मिन् देवयजने ᵛवि ᵛमुच विमुञ्च[2] । विमुक्तौ[3] तावश्वौ ᵛग्रसेतां विघसं[4] भक्षयताम् । त्वं तु ᵛसदृशीः एकरूपान् ᵛधानाः भृष्टयवान् ᵛदिवेदिवे प्रतिदिवसम् ᵛअद्धि भक्षय ॥ नयस्व । नयतेर्लोटि रूपम् । तपुष्पा । ' पा रक्षणे ' । ' आतोऽनुपसर्गे कः ' । ' सुपां सुलुक्० ' इति डादेशः । ' इसुसोः सामर्थ्ये ' इति संहितायां विसर्जनीयस्य सत्वम् । कृदुत्तरपदप्रकृतिस्वरः । अव । अवतेर्लोटि रूपम् । स्वधावः । ' मतुवसो०' इति नकारस्य रुत्वम् । निघातः । ग्रसेताम् । ' ग्रसु अदने ' इत्यस्य लोटि आतामि रूपम् । पादादित्वादनिघातः । आतामो लसार्वधातुकस्वरे धातुस्वरः । मुच । मुञ्चतेः लोटि[5] रूपम्[5] । आगमानुशासनस्यानित्यत्वान्नुमभावः । सदृशीः । समानशब्द उपपदे ' दृशिर् प्रेक्षणे ' इत्यस्मात् ' समानान्ययोश्च० ' इति कञ्प्रत्ययः । समानस्य ' दृग्दृशवतुषु ' इति सभावः । ' टिड्ढाणञ्० ' इत्यादिना ङीप् । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । अद्धि । ' अद भक्षणे ' इत्यस्य लोटि अदादित्वाच्छपो लुक् । ' हुझल्भ्यो हेर्धिः ' इति ध्यादेशः । निघातः । धानाः । ' डुधाञ् धारणपोषणयोः ' । ' धापृवस्यज्यतिभ्यो नः ' इति नप्रत्ययः । प्रत्ययस्वरः ॥

चातुर्विंशिकेऽहनि[5] माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे ' ब्रह्मणा ते ' इत्यारम्भणीया । सूत्रितं च—' ब्रह्मणा ते ब्रह्मयुजा युनज्म्युरुं नो लोकमनुनेषि विद्वान् ' (आश्व. श्रौ. ७. ४) इति ॥

---

१. ख-ग-ज-ण-न-भ-ल-छान्दसम् । २. ख-ग-च-ज-' विमुञ्च ' नास्ति; ल-स-मुक्तौ । ३. ख-ग-च-ज-ण-यवसम् । ४. ख-ग-च-ज-ण-त-न-भ-स-' लोटि रूपम् ' नास्ति । ५. ख-ग-च-ज-ण-भ-चतुर्विंशेऽहनि ।

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमादे आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँ उप याहि सोमम् ॥ ४ ॥

ब्रह्मणा । ते । ब्रह्मऽयुजा । युनज्मि । हरी इति । सखाया । सधऽमादे । आशू इति ।
स्थिरम् । रथम् । सुऽखम् । इन्द्र । अधिऽतिष्ठन् ।
प्रऽजानन् । विद्वान् । उप । याहि । सोमम् ॥ ४ ॥

हे [1]इन्द्र [2]ब्रह्मयुजा ब्रह्मणा मन्त्रेण योक्तव्यौ [3]सधमादे । माद्यन्ति योद्धारोऽत्रेति मादो युद्धम् । सहमादः सधमादः । तस्मिन् युद्धे [4]सखाया समानप्रसिद्धौ अत एव [5]आशू क्षिप्रगमनावेतौ [6]ते तव [7]हरी अश्वौ [8]ब्रह्मणा स्तोत्रेण [9]युनज्मि रथे संयोजयामि । [10]स्थिरं सुदृढं [11]सुखं सुष्ठुद्वारं तादृशं [12]रथम् [13]अधितिष्ठन् आरूढस्त्वं सोमपानार्थमायाहि । [14]प्रजानन् इत्याद्यगमन् ॥ ब्रह्मयुजा । युजेरौणादिकः कर्मणि क्विप् । युनज्मि । युजेः[3] लटि रूपम् । निघातः[4] । सधमादे । ' मदी हर्षे ' । अधिकरणे घञ् । ' सधमादस्थयोश्छन्दसि ' इति सहस्य सधादेशः । कृदुत्तरपदप्रकृतिस्वरः । रथम् । ' अधिशीङ्स्थासां कर्म ' इति कर्मसंज्ञा । सुखम् । ' खनु विदारणे ' । ' अन्येभ्योऽपि दृश्यते ' इति डः । कृदुत्तरस्वरः ॥

मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ॥ ५ ॥

मा । ते । हरी इति । वृषणा । वीतऽपृष्ठा । नि । रीरमन् । यजमानासः । अन्ये ।
अतिऽआयाहि । शश्वतः । वयम् । ते । अरम् । सुतेभिः । कृणवाम । सोमैः ॥ ५ ॥

हे इन्द्र [1]वृषणा कामानां सेचकौ [2]वीतपृष्ठा कमनीयपृष्ठभागौ [3]ते तव [4]हरी अश्वौ [5]अन्ये अस्मदन्ये[6] [7]यजमानासः यजमानाः [8]मा [9]नि [10]रीरमन् मा हर्षयन् । [11]वयं तु [12]सुतेभिः अभिषुतैः [13]सोमैः [14]ते तव [15]अरं पर्याप्तं [16]कृणवाम । यथा तव तृप्तिर्भवति तथा कुर्म इत्यर्थः । त्वं तु [17]अत्यायाहि [18]शश्वतः बहूनन्यानतिक्रम्य सोमपानार्थं शीघ्रमागच्छ ॥ वीतपृष्ठा । वी कान्त्यादिषु । अस्मात् क्तप्रत्ययः[7] । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । रीरमन् । ' रमु क्रीडायाम् ' इत्यस्य[8] ण्यन्तस्य[8] लुङि चङि रूपम् । ' न माङयोगे ' इत्यडभावः । निघातः । अत्यायाहि । यातेर्लोटि रूपम् । ' गतिर्गतौ ' इति पूर्वस्य निघातः । कृणवाम । कृणोतेर्लोटि रूपम् । निघातः[9] ॥ ॥ १७ ॥

' तवायं सोमः ' इति माध्यंदिने सवने नेष्टुः प्रस्थितयाज्या । सूत्रितं च—' तवायं सोमस्त्वमेह्यवाङिन्द्राय सोमाः प्रदिवः ' (आश्व. श्रौ. ५. ५) इति ॥

---

१. च-फ-क्षिप्रगमनवन्तौ । २. ख-ग-च-ज-ण-दृढम् । ३. ख-ग-च-ज-ण-न-भ-' युजेः ' नास्ति । ४. ख-ग-च-ज-ण-न-भ-' निघातः ' नास्ति । ५. न-ल-स-' अश्वौ ' नास्ति । ६. ख-ग-च-ज-ण-न-फ-भ-स-' अस्मदन्ये ' नास्ति । ७. ल-तप्रत्ययः । ८. ल-इत्यस्मात् । ९. ख-ग-च-ज-ण-भ-' निघातः ' नास्ति ।

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥ ६ ॥

तव । अयम् । सोमः । त्वम् । आ । इहि । अर्वाङ् । शश्वत्ऽतमम् । सुऽमनाः । अस्य । पाहि ।
अस्मिन् । यज्ञे । बर्हिषि । आ । निऽसद्य । दधिष्व । इमम् । जठरे । इन्दुम् । इन्द्र ॥ ६ ॥

हे [V]इन्द्र [V]अयं [V]सोमः[1] [V]तव स्वदर्थमभिषुतः । [V]त्वम् [V]अर्वाङ् सोमाभिमुख्येन [V]आ [V]इहि आयाहि । आगत्य च [V]सुमनाः शोभनमनस्को भूत्वा [V]अस्य इमं सोमं [V]शश्वत्तमं बहुतमं [V]पाहि पिब । [V]बर्हिषि प्रवृद्धे [V]अस्मिन् [V]यज्ञे [V]निषद्य उपविश्य [V]इन्दुं क्लेदनशीलम् [V]इमं सोमं [V]जठरे [V]आ [V]दधिष्व धारय । यथा नाभेरधस्तान्न गच्छति तथा धारय । ' अङ्गिरोभिरा गहि यज्ञियेभिः ' (ऋ. सं. १०. १४. ५) इत्यत्र न[2] यज्ञविशेषणं बर्हिः भिन्नरूपं[3] वा तत् इत्यतो नोत्सृज्यते ॥ इहि । ' इण् गतौ ' । अस्य लोटि रूपम् । निघातः । शश्वत्तमम् । उञ्छादित्वादन्तोदात्तत्वम् । पाहि । ' पा पाने ' इत्यस्य लोटि रूपम् । ' बहुलं छन्दसि ' इति शपो लुक् । निघातः । निषद्य । सदेर्ल्यपि ' सदिरप्रतेः[4] ' इति षत्वम् । लित्स्वरः । दधिष्व । दधातेर्लोटि ' छन्दस्युभयथा ' इति थास आर्धधातुकत्वादिडागमः । प्रत्ययस्वरः । इन्दुम् । ' उन्दी क्लेदने ' । ' उन्देरिच्चादेः ' इत्युप्रत्ययः । धातोर्गदेः इकारादेशः । ' नित् ' इत्यनुवृत्तेराद्युदात्तः ॥

स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥ ७ ॥

स्तीर्णम् । ते । बर्हिः । सुतः । इन्द्र । सोमः । कृताः । धानाः । अत्तवे । ते । हरिऽभ्याम् ।
ततऽओकसे । पुरुऽशाकाय । वृष्णे । मरुत्वते । तुभ्यम् । राता । हवींषि ॥ ७ ॥

हे [V]इन्द्र [V]ते तवोपवेशनार्थं [V]बर्हिः [V]स्तीर्णं विस्तृतम् । तथा [V]सोमः च त्वदर्थं [V]सुतः अभिषुतः । [V]ते तव [V]हरिभ्याम् [V]अत्तवे भक्षणार्थं [V]धानाः भृष्टयवाः [V]कृताः संपादिताः । [V]तदोकसे तत् बर्हिः ओको निलयो यस्य तस्मै [V]पुरुशाकाय बहुभिः स्तुत्याय यद्वा बहुसहायाय [V]वृष्णे कामानां[5] वर्षित्रे [V]मरुत्वते । मरुतो देवविशः । तद्वते । एवंभूताय [V]तुभ्यं [V]हवींषि सोमाद्यादीनि [V]राता अस्माभिर्दत्तानि । तानि सेवस्वेति भावः॥ स्तीर्णम् । ' स्तृञ् आच्छादने ' इत्यस्य[6] ' क्त इद्धातोः ' इतीत्वम् । ' रदाभ्याम्[7] ' इति निष्ठानत्वम् । प्रत्ययस्वरः। अत्तवे । ' अद भक्षणे ' इत्यस्मात् तुमर्थे तवेन्प्रत्ययः । निस्वरः । तदोकसे । बहुव्रीहौ पूर्वपदस्वरः । पुरुशाकाय । ' शच व्यक्तायां वाचि ' इत्यस्मात् कर्मणि घञ् । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । कृदुत्तरपदस्वरः । मरुत्वते । ' तसौ मत्वर्थे ' इति भसंज्ञायां तकारस्य जश्त्वाभावः । प्रत्ययस्य पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः । राता । ' रा दाने ' इत्यस्मात् कर्मणि क्तः । प्रत्ययस्वरः ॥

---

१. ख-स सोमः । २. ख-ग-च-ज-ण-फ-तु । ३. ख-ग-च-ज-ण-न-भ-स-रूपम । ४. न-भ-ल-सोरप्रतेः । ५. ख-ग-च-ज-ण-प-भ-' कामानां ' नास्ति । ६. ल-इत्यस्य निघ्राय्याम ।

इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः ॥ ८ ॥

इमम् । नरः । पर्वताः । तुभ्यम् । आपः । सम् । इन्द्र । गोभिः । मधुऽमन्तम् । अक्रन् ।
तस्य । आऽगत्य । सुऽमनाः । ऋष्व । पाहि । प्रऽजानन् । विद्वान् । पथ्याः । अनु । स्वाः ॥ ८ ॥

हे ᵛइन्द्र ᵛनरः कर्मणां नेतारोऽध्वर्वादयः ᵛपर्वताः ग्रावाणः ᵛआपः चैते सर्वे संभूय ᵛतुभ्यं त्वदर्थम् ᵛइमं सोमं ᵛगोभिः पयोभिः[1] ᵛमधुमन्तं माधुर्योपेतं ᵛसम् ᵛअक्रन् सम्यगकार्षुः । ᵛऋष्व दर्शनीय हे इन्द्र ᵛसुमनाः शोभनमनस्कः ᵛविद्वान् कर्माभिज्ञः ᵛस्वाः स्वकीयाः ᵛपथ्याः वैदिके पथि कर्मणि साधुभूताः स्तुतीः ᵛअनु ᵛप्रजानन् त्वम् ᵛआगत्य ᵛतस्य ᵛपाहि इममभिषुतं सोमं पिब ॥
अक्रन् । करोतेर्लुङि रूपम् । निघातः। आगत्य । गमेर्ल्यपि रूपम् । लिरस्वरः । पाहि । पातेर्लोटि रूपम्॥

याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन्गणास्ते ।
तेभिरेतं सजोषा वावशानो३ग्नेः पिब जिह्वया सोममिन्द्र ॥ ९ ॥

यान् । आ । अभजः । मरुतः । इन्द्र । सोमे । ये । त्वाम् । अवर्धन् । अभवन् । गणः । ते ।
तेभिः । एतम् । सऽजोषाः । वावशानः । अग्नेः । पिब । जिह्वया । सोमम् । इन्द्र ॥ ९ ॥

हे ᵛइन्द्र ᵛयान् ᵛमरुतः ᵛसोमे सोमपानविषये ᵛआभजः ममभावयः ᵛये[2] च[2] मरुतः ᵛत्वाम् ᵛअवर्धन् युद्धे प्रोत्साहोत्पादनेनावर्धयन् ये च मरुतः ᵛते तव ᵛगणः[3] ᵛअभवन् सहाया अभूवन्नित्यर्थः। हे ᵛइन्द्र एवंविधैः ᵛतेभिः तैर्मरुद्भिः ᵛसजोषाः संगतः सन् ᵛएतम् अभिषुतं ᵛसोमं ᵛवावशानः कामयमानस्त्वम् ᵛअग्नेः आहुत्यधिकरणभूतस्याहवनीयस्य ज्वालारूपया ᵛजिह्वया इमं ᵛपिब ॥
अभजः । ' भज सेवायाम् ' इत्यस्य लङि रूपम् । यदवृत्तयोगादनिघातः । अवर्धन । ' वृधु वर्धने ' इत्यस्य ण्यन्तस्य लङि रूपम् । ' छन्दस्युभयथा ' इति श्नेरार्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । अत्रापि यद्योगादनिघातः । अभवन् । वाक्यभेदादनिघातः । वावशानः । ' वश कान्तौ ' इत्यस्य यङ्लुकि चानशि रूपम् । चित्स्वरः । पिब । ' पा पाने ' । निघातः ॥

इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र ।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥ १० ॥

इन्द्र । पिब । स्वधया । चित् । सुतस्य । अग्नेः । वा । पाहि । जिह्वया । यजत्र ।
अध्वर्योः । वा । प्रऽयतम् । शक्र । हस्तात् । होतुः । वा । यज्ञम् । हविषः । जुषस्व ॥ १० ॥

---

१. ख-ग-च-ज-ण-फ-भ-' पयोभिः ' नास्ति । २. ख-ग-न-भ-स-वा; च-फ-एते । ३. ख-ग-घ-च-ज-ण-भ-गणः गणाः ।

हे [v]इन्द्र [v]स्वधया । स्वमात्मानं दधाति पोषयतीति स्वधा बलम् । तेन । बलादुपहृत्य [v]सुतस्य सुतमभिषुतं हुतं वा [v]पिब । [v]यजत्र यष्टव्य इन्द्र [v]अग्नेः ज्वालारूपया [v]जिह्वया [v]वा[1] आहुतं सोमं [v]पाहि पिब । हे [v]शक्र समर्थेन्द्र [v]अध्वर्योः [v]हस्तात् [v]वा [v]प्रयतं दातुमुपक्रान्तं सोमं पिब । अथवा [v]होतुः [v]यज्ञं यजनीयं[2] वषट्कारोपेतं [v]हविषः भागं [v]जुषस्व सेवस्व । सर्वथापि त्वमत्रागत्यास्माभिर्दीयमानं सोमं पिबेति भावः ॥ पिब । आमन्त्रितस्याविद्यमानत्वेन पादादित्वात् अनिघातः । अध्वर्योः । अध्वरं कामयतीति क्यच् । ' कव्यध्वर[3] ' इत्यकारलोपः । प्रत्ययस्वरः । ततः एकादेशस्वरः । प्रयतम् । ' यम उपरमे ' इत्यस्य कर्मणि निष्ठा । शक्र । ' शक्लृ शक्तौ ' । ' स्फायितञ्चि[3] ' इत्यादिना रक् । हस्तात् । ' असिहसि[3] ' इत्यादिना तन् । निस्स्वरः । होतुः । जुहोतेः नाच्छीलिकस्तृन् । निस्स्वरः । जुषस्व । ' जुषी प्रीतिसेवनयोः ' इत्यस्य लोटि रूपम् । निघातः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ११ ॥

पूर्वं[3] व्याख्याता[3] ॥ ॥ १८ ॥

' इमामू षु ' इत्येकादशर्चं सप्तमं सूक्तं त्रैष्टुभमैन्द्रम् । अत्रानुक्रमणिका—' इमामू षूपान्त्यां घोरोऽपश्यत् सा निर्दहेच्छस्यमानेति श्रूयते ' इति । दशम्या आङ्गिरसो घोर ऋषिः शिष्टानां विश्वामित्रः । अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्रे दशमीवर्जितम् ' इमामू षु ' इति सूक्तम् । सूत्रितं च[4]—' इमामू षित्युपोत्तमामुद्धरेत्सर्वत्र ' (आश्व. श्रौ. ५. १६) इति । पृष्ठ्याभिप्लवषडहयोः माध्यंदिनसवने[5] अच्छावाकशस्त्रे चातुर्विंशिकातिदिष्टस्याहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि । तत्रोपोत्तमावर्जमेतत्प्रथमं सूक्तम् । सूत्रितं च—' इमामू षित्यच्छन्ति त्वा ' (आश्व. श्रौ. ७. ५) इति ॥

इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ॥ १ ॥

इमाम् । ऊँ इति । सु । प्रऽभृतिम् । सातये । धाः । शश्वत्ऽशश्वत् । ऊतिऽभिः । यादमानः ।
सुतेऽसुते । ववृधे । वर्धनेभिः । यः । कर्मऽभिः । महत्ऽभिः । सुऽश्रुतः । भूत् ॥ १ ॥

विश्वामित्र इन्द्रं स्तौति । हे इन्द्र [v]ऊतिभिः । अवन्ति रक्षन्ति सर्वेभिरित्यूतयो मरुतः । तैः [v]शश्वच्छश्वत् सर्वदा [v]यादमानः संगतिं याचमानस्त्वं [v]प्रभृतिम् । प्रकर्षेण भ्रियते धार्यते[6] यज्ञार्थमिति

१. त–तु । २. ख-ग-च-ज-ण-प-फ-भ–यजनीयं चित् । ३. त–व्याख्यातेयमृक् । ४. ख-ग-च-ज-ण-भ-ल-स–' च ' नास्ति । ५. च–माध्यंदिने सवने । ६. त–' धार्यते ' नास्ति ।

प्रभृतिः सोमः स्तुतिर्वा[1]। [v]इमाम् इमं सोमम् इमां[2] स्तुतिं वा[3] [v]सातये अस्माकं धनलाभार्थं [v]सु [v]धाः सुष्ठु संपादय । तथा स इन्द्रः [v]सुतेसुते सोमे अभिषुते सति [v]वर्धनेभिः वर्धनकारिभिः सोमाज्यादिभिः हविर्भिः [v]ववृधे[4] वर्धते । [v]यः इन्द्रः [v]महद्भिः [v]कर्मभिः असुरवधमेघभेदनादिलक्षणैर्न्यायपरैः [v]सुश्रुतः लोके प्रसिद्धः [v]भूत् । स इन्द्र इति पूर्वेणान्वयः[5] ॥ प्रभृतिम् । ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम् । धाः । दधातेश्छान्दसे लुङि रूपम् । निघातः । शश्वच्छश्वत् । ' नित्यवीप्सयोः ' इति द्विर्वचनम् । यादमानः । ' दुयाचृ याच्ञायाम् ' । शानचि रूपम् । चकारस्य दकारश्छान्दसः । ववृधे । ' वृधु वर्धने ' इत्यस्मात् लिटि रूपम् । तुजादित्वादभ्यासस्य दीर्घः संहितायाम् । निघातः। वर्धनेभिः । वर्धतेर्ण्यन्तस्य नन्द्यादित्वात् ल्युट् । लित्स्वरः । सुश्रुतः । ' श्रु श्रवणे ' इत्यस्मात कर्मणि क्तः । ' गतिरनन्तरः ' इति गतिस्वरः । भूत् । भवतेर्लुङि रूपम् ॥

माध्यंदिने सवनेऽच्छावाकस्य प्रस्थितयाज्या ' इन्द्राय सोमाः प्रदिवः ' इत्येषा । सूत्रितं च— ' इन्द्राय सोमाः प्रदिवो विदाना आपूर्णो अस्य ' (आश्व. श्रौ. ५. ५) इति ॥

इन्द्रा॑य सोमाः प्र॒दिवो॑ विदा॒ना ऋ॒भुर्येभि॒र्वृष॑पर्वा॒ विहा॑यः ।
प्रय॑स्यमा॒नान्प्रति॒ षू गृ॑भा॒येन्द्र॑ पिब॒ वृष॑धूतस्य॒ वृष्ण॑ः ॥ २ ॥

इन्द्रा॑य । सोमाः॑ । प्र॒ऽदिवः॑ । विदा॑नाः । ऋ॒भुः । येभिः॑ । वृष॑ऽपर्वा । विऽहा॑यः ।
प्र॒ऽय॒स्यमा॑नान् । प्रति॑ । सु । गृ॒भा॒य॒ । इन्द्र॑ । पिब॑ । वृष॑ऽधूतस्य । वृष्ण॑ः ॥ २ ॥

हे इन्द्र [v]इन्द्राय तुभ्यं [v]सोमाः [v]प्रदिवः प्रगतेषु पूर्वेष्वहःसु [v]विदानाः अस्माभिर्लम्भिताः । [v]वृषपर्वा । वृषाणः[6] फलस्य वर्षकाः पर्वाणि कालावयवा वर्षाद्या यस्य स तथोक्तः । कालात्मक इत्यर्थः । अत एव [v]विहायाः । विजहात्युत्सृजत्यर्थानर्थिभ्य इति[7] विहाया महान् । तादृश इन्द्रः [v]येभिः यैर्दैत्यैः सोमैः [v]ऋभुः दीप्तो वर्तते । हे [v]इन्द्र त्वं [v]प्रयस्यमानान् प्रकर्षेण[8] मन्त्रैरुपयस्यमानानिमान् सोमान् [v]सु सुष्ठु [v]प्रति [v]गृभाय प्रतिगृहाण । गृहीत्वा च [v]वृषधूतस्य वृषभिर्ग्रावभिः अभिषुतं[9] [v]वृष्णः स्वर्गादिफलवर्षकमिमं सोमं [v]पिब ॥ प्रदिवः । दिवु क्रीडादौ । क्विप् । ' कालाध्वनोरत्यन्तसंयोगे ' इति द्वितीया । दिवशब्दो दिवसवाची । कृदुत्तरपदस्वरः । विदानाः । ' विदॢ लाभे ' इत्यस्य व्यत्ययेन शानच् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । विहायाः । ' ओहाक् त्यागे ' । ' वहिहाधाभ्यश्छन्दसि ' इत्यसुन् । ' णित् ' इत्यनुवृत्तेः ' आतो युक् चिण्कृतोः ' इति युगागमः । ' गतिकारकयोः[10] ' इति पूर्वपदप्रकृतिस्वरत्वम् । गृभाय । ' ग्रह उपादाने ' इत्यस्य लोटि हौ श्नाप्रत्ययस्य ' छन्दसि शायजपि ' इति शायजादेशः । ' हृग्रहोर्भः[11] ' इति भत्वम् । ' अतो हेः ' इति हेर्लुक् । निघातः ॥

माध्यंदिने सवनेऽच्छावाकशस्त्रे याज्या ' पिबा वर्धस्व ' इत्येषा । सूत्रितं च[12]—' पिबा वर्धस्व तव घा सुतास इति याज्या ' (आश्व. श्रौ. ५. १६) इति ॥

---

१. च—स्तुतिर्वा नाम् । २. ख-ग-च-ज-ण-भ—' इमां स्तुतिं वा ' नास्ति । ३. ख-ग-घ-च- ववृधे । ४. ज-ण—पूर्वेणान्वयः । ५. पूरणः । ६. ख-ग-च-फ-भ—वृषणाः । ७. ख-ग-ज-ण-त-न-भ-स—इति वा । ८. त—प्रक्षेपेण । ९. त—' च ' नास्ति ।

पिबा वर्धस्व तवं घा सुतासु इन्द्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥ ३ ॥

पिबं । वर्धस्व । तवं । घ । सुतासः । इन्द्रं । सोमासः । प्रथमाः । उत । इमे ।
यथा । अपिबः । पूर्व्यान् । इन्द्र । सोमान् । एव । पाहि । पन्यः । अद्य । नवीयान् ॥ ३॥

हे Vइन्द्र इमं सोमं Vपिब । ततः Vवर्धस्व शरीरेण पुष्टो भव । Vतव त्वदर्थं[1] Vप्रथमाः पुरातनाः Vउत अपि च Vइमे अभिनवाः उभयविधाः सोमासः[2] सोमाः Vसुतासः Vघ[3] ग्रावभिरभिषुताः खलु । हे Vइन्द्र Vपूर्व्यान् पुरातनान् Vसोमान् Vयथा त्वम् Vअपिबः Vएव एवम् Vअद्य अधुना Vपन्यः स्तुत्योऽत एव Vनवीयान् अतिशयेनाभिनवस्त्वम् इमानभिनवान् सोमान् Vपाहि पिब ॥ पिब । पातेर्लोटि रूपम् । वर्धस्व । तिङ उत्तरत्वान्निघाताभावः । अपिबः । यथायोगादनिघातः । पाहि । पातेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । निघातः । पन्यः । पनतेः स्तुत्यर्थस्य अन्येभ्योऽपि दृश्यत्वात् यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । नवीयान् । नवशब्दादीयसुनि रूपम् । नित्स्वरः ॥

महाँ अमंत्रो वृजनें विरप्श्युग्रं शवंः पत्यते धृष्णवोजंः ।
नाहं विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममन्दन् ॥ ४ ॥

महान् । अमंत्रः । वृजनें । विऽरप्शी । उग्रम् । शवंः । पत्यते । धृष्णु । ओजंः ।
न । अहं । विव्याच । पृथिवी । चन । एनम् । यत् । सोमासः । हरिंऽअश्वम् । अमंन्दन् ॥४॥

योऽयमिन्द्रः Vमहान् अतिशयितसामर्थ्यवान् Vवृजने बलोपलक्षिते युद्धे Vअमत्रः शत्रूणामभिभविता अत एव Vविरप्शी विरपणशीलो भुजास्फालनेन युद्धार्थं शत्रूणामाह्वानकारी । यद्वा विविधं रपणं स्तुतिलक्षणं यस्येति । सर्वैः[3] स्तुत्य इत्यर्थः । तादृशस्येन्द्रस्य Vउग्रम् उद्भूर्णं Vशवः बलं Vधृष्णु धर्षणशीलम् Vओजः पराक्रमलक्षणं तेजः Vपत्यते सर्वत्र प्रसरति । Vएनम् एतादृशमहिमोपेतमिन्द्रं Vपृथिवी विस्तीर्णा भूमिः Vन Vविव्याच न व्याप्नोति । अहशब्द एवार्थे । Vचन इत्यप्यर्थे । द्यौरपि न व्याप्नोतीत्यर्थः । Vयत् यदा Vसोमासः स्वाहाकृताः सोमाः Vहर्यश्वम् इन्द्रम् Vअमन्दन् अमादयन् । तदा तमेनं द्यावापृथिव्यौ व्यासुं न शक्नुत इत्यर्थः ॥ अमत्रः । अम गत्यादिषु । ' अमिनक्षियजि° ' इत्यादिना अत्रन्प्रत्ययः । नित्स्वरः । विरप्शी । ' रप लप व्यक्तायां वाचि ' । औणादिकः शप्रत्ययः । विविधं रपन्तीति विरप्शाः स्तोतारः । तेऽस्य सन्तीत्यत इनिः । यद्वा विविधं रपणं विरप्शम् । तदस्यास्तीति । प्रत्ययस्वरः । पत्यते । व्यत्ययेन कर्तरि यक् । निघातः । धृष्णु । ' जिधृषा प्रागल्भ्ये ' । त्रसिगृधिधृषिक्षिपेः क्नुप्रत्ययः । ' रषाभ्याम् ° ' इति णत्वम् । प्रत्ययस्वरः । विव्याच । व्यचेर्लिटि णलि ' लिटयभ्यासस्योभयेषाम् ' इत्यभ्यासस्य संप्रसारणम् । निघातः । चनेति निपातसमुदायश्चार्थे वर्तते । एवमादित्वादन्तोदात्तः । अमन्दन् । मदि स्तुत्यादिषु इत्यस्य लङि रूपम् । यद्योगादनिघातः ॥

---

१. न–त्वदर्थे । २. ख-ग-च-ज-ण-त-म-भ-स–सोमाः सुतासः; घ–सोमासः सुतासः घ; ल–सोमासः सुतासः । ३. न–' सर्वैः ' नास्ति ; ल– स सर्वैः ।

महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन ।
इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥ ५ ॥

महान् । उग्रः । ववृधे । वीर्याय । समऽआचक्रे । वृषभः । काव्येन ।
इन्द्रः । भगः । वाजऽदाः । अस्य । गावः । प्र । जायन्ते । दक्षिणाः । अस्य । पूर्वीः ॥५॥

[v]महान् युद्धकर्मणि बलवान् [v]उग्रः शत्रूणां भयंकरः [v]इन्द्रः [v]वीर्याय वीर्यकरणाय [v]वावृधे वर्धते[1] । [v]वृषभः फलस्याभिवर्षकः [v]भगः सर्वैर्भजनीयः सः [v]इन्द्रः [v]काव्येन । कवयः स्तोतारः । तत्कर्म स्तोत्रम् । तेन स्तोत्रेण [v]समाचक्रे संगच्छते । तादृशस्य [v]अस्य[2] इन्द्रस्य [v]गावः [v]वाजदाः क्षीरादिलक्षणान्नप्रदाः [v]प्र [v]जायन्ते । तथा [v]अस्य [v]पूर्वीः बह्व्यस्ता गावः [v]दक्षिणाः प्रजायन्ते ॥ वावृधे[3] । वर्धतेर्लिटि रूपम् । निघातः । वीर्याय । वीरे भवं वीर्यम् । ' भवे छन्दसि ' इति यत् । ' वीरवीर्यौ च ' इत्यत्र ' यतोऽनावः ' इत्यस्यानित्यत्वस्य ज्ञापितत्वात् तित्स्वरितः । समाचक्रे । करोतेर्लिटि रूपम् । ' गतिरगतौ ' इति पूर्वपदस्य[4] गतेर्निघातः । काव्येन । कवेः कर्म काव्यम् । ब्राह्मणादित्वात् ष्यञ् । जित्त्वादुपधावृद्धिः । जित्स्वरः । वाजदाः । ददातेः ' आतोऽनुपसर्गे कः ' । जायन्ते । ' जनी प्रादुर्भावे ' इत्यस्य लटि रूपम् । दक्षिणाः । ' दक्ष वृद्धौ ' इत्यस्मात् ' दुदक्षिभ्यामिनन् ' इतीनन्प्रत्ययः । नित्त्वादाद्युदात्तः ॥ ॥ १९ ॥

प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः ।
अतश्चिदिन्द्रः सदसो वरीयान्यदीं सोमः पृणति दुग्धो अंशुः ॥ ६ ॥

प्र । यत् । सिन्धवः । प्रऽसवम् । यथा । आयन् । आपः । समुद्रम् । रथ्याऽइव । जग्मुः ।
अतः । चित् । इन्द्रः । सदसः । वरीयान् । यत् । ईम् । सोमः । पृणति । दुग्धः । अंशुः ॥६॥

[v]सिन्धवः नद्यः [v]यथा [v]प्रसवम् । प्रकर्षेण सूयते इति प्रसवः कामः । तमनुसृत्य [v]यत् यदा [v]प्र [v]आयन् प्रकृष्टमतिदूरं समुद्रं गच्छन्ति तदा [v]आपः महान्तं [v]समुद्रं [v]रथ्येव रथिन इव [v]जग्मुः प्रीणनार्थं[5] गच्छन्ति । तद्वत् [v]अतश्चित् [v]सदसः अस्मादप्यन्तरिक्षादसौ [v]इन्द्रः [v]वरीयान् उरुतरः[6] खलु । [v]यदीं यमेनमिन्द्रं [v]दुग्धः अभिषुतः [v]अंशुः लताखण्डरूपोऽल्पः[7] [v]सोमः [v]पृणति प्रीणयति । यथाल्पा नद्योऽल्पीयांसि च जलानि महान्तं समुद्रं प्रीणयन्ति तद्वदल्पतरोंऽशुभूतः सोमः वरीयांसमिन्द्रं प्रीणयति ॥ प्रसवम् । सवतेः[8] कर्मण्यप् । थाथादिस्वरः । आयन् । अयतेर्लङि[9] रूपम् । यद्योगात् अनिघातः । रथ्येव । रथस्येमे रथ्याः । ' रथाद्यत् ' इति यत् । ' सुपां सुलुक्°[10] ' इति सुपो डादेशः । तित्स्वरितः[11] । इवेन विभक्त्यलोपः[12] पूर्वपदप्रकृतिस्वरः । जग्मुः । गमेर्लिटि रूपम् । ' गमहन°[13] '

१. ख-ग-घ-च-ज-ण-भ-अवर्धत । २. ख-ग-च-न-प-फ-भ-स-' अस्य ' नास्ति । ३. ज-ण-ववृधे । ४. ल-पूर्वस्य । ५. त-स-प्राणनार्थम् । ६. प-भ-पुरुतरः । ७. ख-ग-घ-च-ज-ण-प-फ-भ-लताखण्डजः । ८. ख-ग-च-ज-ण-सुवतेः । ९. फ-एतेर्लङि । १०. ख-ग-च-ज-ण-न-भ-स-' सुलुक्° ' नास्ति । ११. ख-ग-च-ज-ण-न-भ-नित्स्वरः । १२. ख-ग-च-ज-ण-त-न-भ-स-विभक्तेरलोपः । १३. ल-गमहनजन° ।

इत्यादिनोपधालोपः । निघातः । वरीयान् । उरुशब्दादीयसुनि ' प्रियस्थिर° ' इत्यादिना वरादेशः । निरुदात्तः । पृणति । ' पृण प्रीणने ' । तुदादिः । यद्योगादनिघातः । दुग्धः । दुहेः क्तः । ' एकाचः° ' इतीट्प्रतिषेधः । ' दादेर्धातोर्घः ' इति हकारस्य घत्वम् । ' झषस्तथोर्धोऽधः ' । प्रत्ययस्वरः ॥

समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः ॥ ७ ॥

समुद्रेण । सिन्धवः । यादमानाः । इन्द्राय । सोमम् । सुऽसुतम् । भरन्तः ।
अंशुम् । दुहन्ति । हस्तिनः । भरित्रैः । मध्वः । पुनन्ति । धारया । पवित्रैः ॥ ७ ॥

[v]समुद्रेण । सहिता नद्यादिरूपेणापोऽभिद्रवन्त्येनमिति समुद्रः । तेन [v]यादमानाः तेन सह संगतिं याचमानाः [v]सिन्धवः नद्यो यथा तं पूरयन्ति तद्वत् [v]हस्तिनः हस्तवन्तोऽध्वर्यवादयः [v]इन्द्राय तुभ्यं [v]सुषुतं सुष्ठ्वभिषुतं[1] [v]सोमं [v]भरन्तः संपादयन्तः [v]अंशुं [v]दुहन्ति लताखण्डमभिषुण्वन्ति । तथा तेऽध्वर्यवादयः[2] स्रवतो रसस्य [v]धारया [v]पवित्रैः पावनैः[3] [v]भरित्रैः[4] । कर्मकरणार्थं पदार्थान् बिभर्तीति भरित्रा बाहवः । तैः [v]मध्वः माधुर्योपेतान् सोमान् [v]पुनन्ति शोधयन्ति ॥ समुद्रेण । समुत्पूर्वात् द्रवतेः ' अन्येभ्योऽपि दृश्यते ' इति डः । डित्त्वाट्टिलोपः । यद्वा । ' उन्दी क्लेदने ' । संपूर्वस्य ' स्फायितञ्चि° ' इत्यादिना रक् । कित्त्वादुपधालोपः । उभयत्र प्रत्ययस्वरः । सुपा सहैकादेशे कृत एकादेश उदात्त एव । यादमानाः । ' दुयाचृ यात्ज्ञायाम् ' । शानच् । व्यत्ययेन चकारस्य दकारः । शानचो लसार्वधातुकस्वरे धातुस्वरः । दुहन्ति । ' दुह प्रपूरणे ' इत्यस्य लटि रूपम्[5] । भरित्रैः । ' डुभृञ् धारणपोषणयोः ' इत्यस्मात् ' अशित्रादिभ्य इत्रोत्रौ ' इतीत्रप्रत्ययः । प्रत्ययस्वरः । पुनन्ति । ' पूञ् पवने ' इत्यस्य लटि रूपम् ॥

हृदाइव कुक्षयः सोमधानाः समीं विव्याच सवना पुरूणि ।
अन्ना यदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ॥ ८ ॥

हृदाःऽइव । कुक्षयः । सोमऽधानाः । सम् । ईमिति । विव्याच । सवना । पुरूणि ।
अन्ना । यत् । इन्द्रः । प्रथमा । वि । आश । वृत्रम् । जघन्वान् । अवृणीत । सोमम् ॥८॥

इन्द्रस्य [v]कुक्षयः उदराणि [v]सोमधानाः । सोमो निधीयते येष्विति सोमधानाः । तत्र दृष्टान्तः । [v]हृदाइव । यथा हृदा जलाधारा भवन्ति तद्वत् । [v]ईं सोऽयमिन्द्रः [v]पुरूणि [v]सवना त्रीणि सवनानि [v]सं [v]विव्याच सम्यक् व्याप्नोति । [v]इन्द्रः [v]प्रथमा प्रथमानि [v]अन्ना भक्षणीयानि सोमादीन्यन्नानि [v]यत् यस्मात् [v]व्याश विशेषेण जघास ततः [v]वृत्रं [v]जघन्वान् वृत्रस्य हन्तेन्द्रः [v]सोमं माध्यंदिने[5] सवने[5] देवेभ्यः

---

१. ख-ग-च-फ-अभिषुतम् । २. ख-ग-च-ज-ण-अध्वर्यवादयः । ३. ख-ग-च-फ-पावमानैः । ४. ख-ग-घ-च-ज-ण-प-फ-भरित्रैः बाहुभिः मध्वः माधुर्योपेतान् सोमान् पुनन्ति शोधयन्ति । ५. ख-ग-च-ज-ण-फ-ल-' माध्यंदिन सवने ' नास्ति ।

vअवृणात ममभजत ॥ कुक्षयः[1] । ' कुप निष्कर्षे ' । ' प्रुषिकुदिशुधिभ्यः क्सिः ' (उ. सू. ३. ४३५) । कुष्यत इति कुक्षिः । प्रत्ययस्वरः । सोमधानाः । दधातेरधिकरणे त्युट् । लित्स्वरः । विद्याच । व्यत्ययेलिटि रूपम् । अन्ना । ' अद भक्षणे ' । अद्यत इत्यन्नम् । आश । ' अश भोजने ' इत्यस्य लिटि णलि रूपम् । ' अत आदेः ' इत्यभ्यासस्य दीर्घः । यद्योगादनिघातः । लित्स्वरः । वृत्रम् । ' न लोकाव्यय ' इति षष्ठीप्रतिषेधः । जघन्वान् । हन्तेः क्वसाविडभावे रूपम् । प्रत्ययस्वरः । अवृणात । ' वृङ् संभक्तौ ' इत्यस्य लङि रूपम्[2] ॥

आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ॥ ९ ॥

आ । तु । भर । माकिः । एतत् । परि । स्थात् । विद्म । हि । त्वा । वसुऽपतिम् । वसूनाम् ।
इन्द्र । यत् । ते । माहिनम् । दत्रम् । अस्ति । अस्मभ्यम् । तत् । हरिऽअश्व । प्र । यन्धि ॥९॥

हे vइन्द्र vतु क्षिप्रं धनम् vआ vभर । vएतत् त्वया दीयमानं धनं vमाकिः को वा vपरि vष्ठात् प्रतिबध्य तिष्ठेत् । vत्वा त्वां vवसूनां धनानां vवसुपतिम् उत्तमस्य धनस्य स्वामिनं vविद्म vहि जानीमः खलु । vते तव vमाहिनं vमंहनीयं[3] vयत् vदत्रं धनम् vअस्ति हे vहर्यश्व इन्द्र[3] vतत् धनम् vअस्मभ्यं vप्र vयन्धि प्रयच्छ ॥ तु । ' ऋचि तुनुघ° ' इत्यादिना संहितायां दीर्घः । भर । भरतेः लोटि रूपम् । माकिः । निपातः । स्थात् । तिष्ठतेश्छान्दसे लुङि रूपम् । ' उपसर्गात सुनोति° ' इत्यादिना संहितायां षत्वम् । निघातः । विद्म । वेत्तेर्लटि ' विदो लटो वा ' इति मसो मादेशः । प्रत्ययस्वरः । संहितायां ' ह्यचोऽनस्तिङः ' इति दीर्घः । वसुपतिम् । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरः । माहिनम् । ' महेरिनण् च ' इतीनण्प्रत्ययः । णित्त्वादुपधावृद्धिः । ग्रामादित्वादाद्युदात्तः । यन्धि । ' यमु उपरमे ' । लोटि ' बहुलं छन्दसि ' इति शपो लुक् । सेर्हिः । तस्य ' वा छन्दसि ' इति पित्त्वस्य विकल्पितत्वात् अत्राडित्त्वात् ' अडितश्च ' इति हेर्ध्यादेशः । निघातः ॥

जातकर्मण्यंसाभिमर्शने ' अस्मे प्र यन्धि ' (आश्व. गृ. १. १५) इत्येषा । यद्यपि ' सा निर्दहेत् ' इति वचनेन शंसने निषिद्धा तथाप्यभिमर्शनस्य शंसने चोदितत्वात् नोक्तदोषः[4] ॥

अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ॥ १० ॥

अस्मे इति । प्र । यन्धि । मघऽवन् । ऋजीषिन् । इन्द्र । रायः । विश्वऽवारस्य । भूरेः ।
अस्मे इति । शतम् । शरदः । जीवसे । धाः । अस्मे इति । वीरान् । शश्वतः । इन्द्र । शिप्रिन् ॥१०॥

---

१. ख-ग-च-ज-ण-' कुक्षयः ... रूपम् ' नास्ति । २. फ-महनीयम् । ३. न-ल-' इन्द्र ' नास्ति । ४. न-नोक्तदोषः । तथा च सूत्रितम्-इन्द्र श्रेष्ठानि द्रविणानि धेह्यस्मे प्रयोधि (प्रयन्धि) मघवन्नृजीषिन्निति चेति ।

vमघवन् धनवन् vऋजीषिन् गतसारसोमवन् हे vइन्द्र vविश्ववारस्य[1] । विश्वैः सर्वैः संभजनीयतया वरणं यस्य तत् । vभूरेः भूरि बहु vरायः धनम् । द्वितीयार्थे षष्ठी[1] । vअस्मे अस्मभ्यं vप्र vयन्धि प्रयच्छ । किंच vअस्मे अस्माकं vजीवसे जीवनाय vशतं vशरदः संवत्सरान् vधाः देहि । vशिप्रिन् शोभनहनो हे vइन्द्र vअस्मे अस्माकं vशश्वतः । शश्वदिति बहुनाम । बहून् vवीरान् पुत्रान् देहि ॥ जीवसे । 'जीव प्राणधारणे' इत्यस्य तुमर्थेऽसेप्रत्ययः । प्रत्ययस्वरः । शश्वतः । 'टुओश्वि गतिवृद्ध्योः' । अस्मात् 'संश्वद्वेहन्' इत्यादिना अतिप्रत्ययान्तत्वेन निपातनादिष्टरूपसिद्धिः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥११॥

शुनं[2] हुवेमेति व्याख्याता[2] ॥ ॥ २० ॥

'वार्त्रहत्याय' इत्येकादशर्चमष्टमं सूक्तम् । एकादश्यनुष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तं—'वार्त्रहत्याय गायत्रमन्त्यानुष्टुप्' इति । अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे 'वार्त्रहत्याय' इति उत्तमावर्जं[3] सूक्तं[3] शंसनीयम् । तथा[4] च सूत्रितं[4]—'वार्त्रहत्यायेत्युत्तमामुद्धरेत्' (आश्व.श्रौ. ६.४) इति । महाव्रते गायत्रीतृचाशीतावुत्तमावर्जमिदं सूक्तम् । पञ्चमारण्यके सूत्रितं—'वार्त्रहत्याय शवस इत्युत्तमामुद्धरति' (ऐ. आ. ५. २. ५) इति ॥

वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वा वर्तयामसि ॥ १ ॥

वार्त्रऽहत्याय । शवसे । पृतनाऽसह्याय । च । इन्द्र । त्वा । आ । वर्तयामसि ॥ १ ॥

विश्वामित्रः स्तौति । हे vइन्द्र vवार्त्रहत्याय वृत्रहननिमित्ताय vशवसे बलाय अपि vच vपृतनाषाह्याय[5] परकीयसेनाभिभवाय त्वाम् vआ सर्वतः vवर्तयामसि प्रवर्तयामः ॥ वार्त्रहत्याय । वृत्रघ्नः कर्म इत्यर्थे ब्राह्मणादित्वात् ष्यञ् । 'हनस्तोऽचिण्णलोः' (पा. सू. ७. ३. ३२) इति तकारः । जित्वादाद्युदात्तः । पृतनाषाह्याय । 'षह मर्षणे' इत्यस्मादाभावे 'शकिसहोश्च' इति यत् । संहितायां 'सहेः पृतनर्ताभ्यां च' (पा. सू. ८. ३. १०९) इति षत्वम् । दीर्घश्छान्दसः । वर्तयामसि । 'वृतु वर्तने' इत्यस्य ण्यन्तस्य मसः 'इदन्तो मसिः' इति मसि इत्यादेशः । निघातः ॥

१. ख-ग-च-ज-ण-प-फ–विश्ववारस्य सर्ववरणीयस्य ते भूरेः बहु रायः धनानि अस्मे । २. ज-ण–पूर्ववत् व्याख्याता; ल– शुनं हुवेमेति गतम् । ३. ग-ज-ण-स–उत्तमावर्जसूक्तम् । ४, ख-ग-च-ज-ण-त-न-भ-स–'तथा च सूत्रितं' नास्ति । ५. ख-ग-च-ज-ण-न-भ–पृतनासाह्याय ।

अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो । इन्द्र कृण्वन्तु वाघतः ॥ २ ॥

अर्वाचीनम् । सु । ते । मनः । उत । चक्षुः । शतक्रतो इति शतऽक्रतो ।
इन्द्र । कृण्वन्तु । वाघतः ॥ २ ॥

हे [v]शतक्रतो । शतं क्रतवो यस्यासौ शतक्रतुः । हे [v]इन्द्र [v]वाघतः । वहन्ति यज्ञियां धुरमिति वाघतः स्तोतारः । [v]ते तव [v]सु अस्मदभिमतफलसंपादनेन शोभनं [v]मनः [v]अर्वाचीनम् अस्मदभिमुखं [v]कृण्वन्तु कुर्वन्तु । [v]उत अपि च [v]चक्षुः त्वदीयं दर्शनम् अस्मास्वनुग्रहदृष्टिं[१] कुर्वन्तु ॥ अर्वाचीनम् । ' विभाषाञ्चेरदिक्स्त्रियाम् ' इति खप्रत्ययः । खस्येनादेशः[२] । चक्षुः । ' चक्षेः शिच्च ' इत्युसिप्रत्ययः । शिद्भावात् ख्याजादेशाभावः । ' नित् ' इत्यनुवृत्तेः आद्युदात्तश्च[३] । कृण्वन्तु । ' कृवि हिंसाकरणयोः ' इत्यस्य लोटि रूपम् । आमन्त्रितस्य अविद्यमानवत्त्वेन[४] पादादित्वादनिघातः । प्रत्ययस्वरः । वाघतः । ' वह प्रापणे ' । ' संश्रद्धेहत्° ' इत्यादिना अतिप्रत्ययान्तत्वेन निपाननादुपधावृद्धिः । हकारस्य घत्वम् । प्रत्ययस्वरः ॥

नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे । इन्द्राभिमातिषाह्ये ॥ ३ ॥

नामानि । ते । शतक्रतो इति शतऽक्रतो । विश्वाभिः । गीःऽभिः । ईमहे ।
इन्द्र । अभिमातिऽसह्ये ॥ ३ ॥

[v]शतक्रतो हे [v]इन्द्र [v]अभिमातिषाह्ये । मातिर्मानो गर्वः । अभितो मानो येषां तेऽभिमातयः शत्रवः । तेषां सहनमेव सह्यम्[५] । तस्मिन् युद्धे अस्माकमुपस्थिते सति [v]ते तव [v]नामानि शक्रवज्रहस्तादीनि[६] नामधेयानि यद्वा तदुपलक्षितानि बलानि[६] [v]विश्वाभिर्गीर्भिः सर्वाभिः स्तुतिलक्षणाभिर्वाग्भिः [v]ईमहे वयं याचामहे ॥ ईमहे । ई कान्त्यादिषु । व्यत्ययेनात्मनेपदम् । अदादित्वाच्छपो लुक् । निघातः ॥

पुरुष्टुतस्य धामभिः शतेन महयामसि । इन्द्रस्य चर्षणीधृतः ॥ ४ ॥

पुरुऽस्तुतस्य । धामऽभिः । शतेन । महयामसि । इन्द्रस्य । चर्षणिऽधृतः ॥ ४ ॥

हे इन्द्र [v]पुरुष्टुतस्य पुरुभिः बहुभिः स्तोतृभिः स्तुतस्य [v]शतेन अपरिमितसंख्याकैः [v]धामभिः तेजोभिः युक्तस्य [v]चर्षणीधृतः चर्षणीनां मनुष्याणां कर्मानुष्ठातृणामभिमतफलसंपादनेन धारकस्य [v]इन्द्रस्य । यद्वा । आकृपन्ति[७] सर्वमनेन इति चर्षणि बलम् । तद्धारकस्य तव [v]महयामसि महयामः[८] स्तोत्रं कुर्मः ॥ पुरुष्टुतस्य । ' ष्टुञ् स्तुतौ ' । कर्मणि क्तः । थाथादिस्वरः । संहितायां ' स्तुतस्तोमयोश्छन्दसि ' इति षत्वम् । महयामसि । ' मह पूजायाम् ' इत्यस्य लटि इदन्तो मसिः । निघातः ।

१. च-न-फ–अस्मदनुग्रहदृष्टिम् । २. ख-ग-च-ज-ण-न-भ-स–' खस्येनादेशः ' नास्ति । ३. ल-स–आद्युदात्तः । ४. ण-ल-स–अविद्यमानत्वेन । ५. ख-ग-च-ज-ण-न-फ–साह्यम् । ६. ख-ग-च-ज-ण-प-फ-भ–शक्रादिनामानि । ७. त–आकृषति । ८. न-ल-स–' महयामः ' नास्ति ।

चर्षणीधृतः । ' कृष आकर्षणे ' । ' कृषेरादेश्च चः ' (उ. सू. २. २६१) इत्यनिप्रत्ययः । ककारस्य चकारादेशः । यद्वा ' कृष विलेखने ' । कर्षन्तीति चर्षणयो मनुष्याः । ' धृ धारणे ' । क्विप् । कृदुत्तरपदस्वरः ॥

इन्द्रं॑ वृ॒त्राय॒ हन्त॑वे पुरुहू॒तमु॑प॒ ब्रुवे । भरे॑षु वाज॑सातये ॥ ५ ॥

इन्द्र॑म् । वृ॒त्राय॑ । हन्त॑वे । पु॒रु॒ऽहू॒तम् । उप॑ । ब्रु॒वे॒ । भरे॑षु । वाज॑ऽसातये ॥ ५ ॥

हे इन्द्र [V]वृत्राय [V]हन्तवे वृत्रनामकमसुरं हन्तुं [V]भरेषु युद्धेषु [V]वाजसातये अन्नोपलक्षितधनलाभाय च [V]पुरुहूतं पुरुभिराहूतम् [V]इन्द्रं बलवन्तं त्वाम् [V]उप [V]ब्रुवे सोमपानार्थं विश्वामित्रोऽहमाह्वयामि ॥ वृत्राय । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानम् । हन्तवे । हन्तेस्तुमर्थे तवेन्प्रत्ययः । निस्वरः । ब्रुवे । ' ब्रूञ् व्यक्तायां वाचि ' इत्यस्य लटयुत्तम इटि रूपम् । निघातः । वाजसातये । सनन सातिः । वाजस्य सातिर्वाजसातिः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरः ॥ ॥ २१ ॥

वाजे॑षु सास॒हिर्भ॑व॒ त्वामी॑महे शतक्रतो । इन्द्र॑ वृ॒त्राय॒ हन्त॑वे ॥ ६ ॥

वाजे॑षु । स॒स॒हिः । भ॒व॒ । त्वाम् । ई॒म॒हे॒ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ।

इन्द्र॑ । वृ॒त्राय॑ । हन्त॑वे ॥ ६ ॥

[V]शतक्रतो हे [V]इन्द्र [V]वाजेषु संग्रामेषु [V]सासहिः शत्रूणामभिभविता [V]भव । [V]वृत्राय [V]हन्तवे वृत्रं हन्तुं [V]त्वामीमहे प्रार्थयामहे ॥ सासहिः । ' सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ ' इति किप्रत्ययः । तस्य स्वरः । वृत्राय । कर्मणः संप्रदानम् । हन्तवे । तुमर्थे तवेन्प्रत्ययः ॥

द्यु॒म्नेषु॑ पृत॒नाज्ये॑ पृत्सु॒तूर्षु॑ श्रव॑:सु च । इन्द्र॒ साक्ष्वा॒भिमा॑तिषु ॥ ७ ॥

द्यु॒म्नेषु॑ । पृ॒त॒नाज्ये॑ । पृ॒त्सु॒तूर्षु॑ । श्रव॑:ऽसु । च॒ । इन्द्र॑ । साक्ष्व॑ । अ॒भि॒ऽमा॑तिषु ॥ ७ ॥

[V]द्युम्नेषु[1] द्योतमानेषु धनेषु प्राप्तव्येष्वभिमानिनो ये सपत्नाः [V]पृतनाज्ये । पृतनानामजनं गमनं यस्मिन्निति पृतनाज्यं संग्रामः । तस्मिन् संग्रामे च [V]पृत्सुतूर्षु पृतनासु[2] तरणशीलेषु शूरेषु [V]श्रवःसु बलेषु [V]च येऽभिमानिनः सपत्नाः सन्ति तान् हे[3] [V]इन्द्र[3] [V]साक्ष्व अभिभव । तथा [V]अभिमातिषु सर्वतो गर्वयुक्तेषु शत्रुषु पुरुषेषु ये सपत्नाः तांश्चाभिभव ॥ पृतनाज्ये । ' अज गतिक्षेपणयोः ' इत्यस्य ण्यन्तस्य ' अर्चो यत् ' । पृतनानामाज्यं पृतनाज्यम् । एकादेशस्वरः । पृत्सुतूर्षु । पृतनाशब्दस्य सौ परतः ' मांसपृतस्नू-नामुपसंख्यानम् ' इति पृदादेशः । ' ञिष्वरा संभ्रमे ' । तात्छीलिकः क्विप् । ' ज्वरत्वर° ' इत्यादिना ऊठ् । ' तत्पुरुषे कृति बहुलम् ' इति पूर्वपदस्य सप्तम्या अलुक् । कृदुत्तरपदस्वरः । साक्ष्व । ' षह[4] मर्षणे ' इत्यस्य लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ढत्वकरत्वे । दीर्घश्छान्दसः ॥

१. ल–हे इन्द्र द्युम्नेषु । २. ख-ग-ज-ण-भ-ल–पृतनातरणशीलेषु ; न-स–तरणशीलेषु । ३. न-ल-स–' हे इन्द्र ' नास्ति । ४. न-भ–सह ।

चातुर्विंशिकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे 'शुष्मिन्तमं न ऊतये' इति तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च—'शुष्मिन्तमं न ऊतये श्रायन्त इव सूर्यम्' (आश्व. श्रौ. ७.४) इति ॥

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् । इन्द्र सोमं शतक्रतो ॥ ८ ॥

शुष्मिन्ऽतमम् । नः । ऊतये । द्युम्निनम् । पाहि । जागृविम् ।

इन्द्र । सोमम् । शतक्रतो इति शतऽक्रतो ॥ ८ ॥

शतक्रतो हे इन्द्र शुष्मिन्तमं बलवतां मध्येऽतिशयेन बलवन्तं द्युम्निनं दीप्तिमन्तम् । यद्वा शुष्मिन्तमं शत्रूणां शोषकतमं द्युम्निनं यशस्विनम् । जागृविं जागरणशीलम् । पीतः सोमो जागृविः स्वप्ननिवारक इति । तादृशं नः अस्माकं संबन्धिनं सोमम् ऊतये अस्माकं रक्षणाय पाहि अत्रागत्य पिब ॥ शुष्मिन्तमम् । तमपः पित्त्वादनुदात्तत्वे प्रत्ययस्वरः । पाहि । पातेर्लोटि 'बहुलं छन्दसि' इति शपो लुक् । निघातः । जागृविः । क्विन्प्रत्ययान्तः । नित्त्वादाद्युदात्तः ॥

इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥ ९ ॥

इन्द्रियाणि । शतक्रतो इति शतऽक्रतो । या । ते । जनेषु । पञ्चऽसु ।

इन्द्र । तानि । ते । आ । वृणे ॥ ९ ॥

शतक्रतो हे इन्द्र ते तव संबन्धिषु पञ्चसु जनेषु गन्धर्वाः पितरो देवा असुरा रक्षांसि इत्येषु या यानि इन्द्रियाणि रूपग्रहणादिसामर्थ्यानि स्थितानि ते त्वदीयानि तानि इन्द्रियाण्यहम् आ वृणे संभजे[1] । यद्वा पञ्चजनेषु निषादपञ्चमेषु चतुर्षु जनेषु यानीन्द्रियाणि सामर्थ्यानि तानि त्वदीयान्यहमावृणे ॥ इन्द्रियाणि । 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' इति घच्प्रत्ययान्तत्वेन निपातनादन्तोदात्तः । वृणे । 'वृङ् संभक्तौ' इत्यस्य लटि रूपम् । निघातः ॥

अगन्निन्द्र श्रवो बृहद्द्युम्नं दधिष्व दुष्टरम् । उत्ते शुष्मं तिरामसि ॥ १० ॥

अगन् । इन्द्र । श्रवः । बृहत् । द्युम्नम् । दधिष्व । दुस्तरम् ।

उत् । ते । शुष्मम् । तिरामसि ॥ १० ॥

हे इन्द्र वृत्रहन्[2] बृहत् महत् श्रवः सोमलक्षणमस्माभिर्दीयमानमन्नम् अगन् त्वां गच्छतु । त्वं दुष्टरं दुस्तरं शत्रुभिः तरितुम्[3] अशक्यं द्युम्नं धनं दधिष्व अस्मभ्यं प्रयच्छ । वयं तु ते त्वदीयं शुष्मं बलम् उत्कृष्टं तिरामसि सोमाज्यादिभिर्वर्धयामः ॥ अगन् । गमेर्लङि 'बहुलं छन्दसि' इति शपो लुक् । हल्ङ्यादिना तिलोपः । 'मो नो धातोः' । अडागमस्वरः । दधिष्व । दधातेर्लोटि

१. ख-ग-च-फ-भ—'संभजे' नास्ति । २. घ-ल—'वृत्रहन्' नास्ति । ३. न-ल-स—तरीतुम् ।

' छन्दस्युभयथा ' इति थास आर्धधातुकत्वादिडागमः । निघातः । दुस्तरम् । तरतेः कृच्छ्रार्थे खल् । सुषामादित्वात् संहितायां षत्वम् । लित्स्वरः । तिरामसि । इदन्तो[1] मसिः[1] । निघातः ॥

अर्वावतो न आ गह्यथो शक्र परावतः ।
उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥ ११ ॥

अर्वाऽवतः । नः । आ । गहि । अथो इति । शक्र । पराऽवतः ।
ऊँ इति । लोकः । यः । ते । अद्रिऽवः । इन्द्र । इह । ततः । आ । गहि ॥ ११ ॥

vशक्र बलवन् हे इन्द्र vअर्वावतः अर्वाचीनात् समीपादेशात्[2] vअथो अपि च vपरावतः अतिदूरादेशात्[3] vनः अस्मानभिलक्ष्य vआ vगहि आगच्छ । vअद्रिवः । अत्ति भक्षयति शत्रूनिति अद्रिर्वज्रः । तद्वन् हे vइन्द्र vते तव vयः vउ vलोकः उत्तमो लोकोऽस्ति vततः तस्मादपि लोकात् vइह अस्मिन् देवयजने देशे सोमपानार्थम् vआ vगहि आगच्छ ॥ गहि । गमेर्लोटि रूपम् । परावतः । ' उपसर्गाच्छन्दसि धात्वर्थे ' इति वतिः । प्रत्ययस्वरः । अद्रिवः । ' मनुवमो रुः ' इति रुः । ततः । ' पञ्चम्यास्तसिल् ' इति तसिल् । लित्स्वरः ॥ ॥ २२ ॥

' अभि तष्टेव ' इति दशर्चं नवमं सूक्तम् । अत्रानुक्रमणिका—' अभि तष्टेव दश प्रजापतिः स वैश्वामित्रो वाच्यो वा द्वौ वा तौ न वैकोऽपि ' इति । विश्वामित्रगोत्रः प्रजापतिर्वाचः पुत्रः प्रजापतिर्वा ऋषिः । तावुभावपि समुच्चितावस्य सूक्तस्य ऋषी[4] इति द्वितीयः पक्षः । अथवा नोभावपि किंतु विश्वामित्र एवेति तृतीयः पक्षः । त्रिष्टुप् छन्दः । इन्द्रो देवता ॥

चातुर्विंशिकेऽहनि माध्यंदिने सवनेऽच्छावाकशस्त्रे ' अभि तष्टेव ' इत्यहरहःशस्यनामकं सूक्तम् । सूत्रितं च—' उदु ब्रह्माण्यभि तष्टेवेतीतरावहरहःशस्ये ' (आश्व. श्रौ. ७. ४) इति । एवं सर्वत्राहर्गणेषु द्वितीयादिष्वहःसु माध्यंदिने सवनेऽच्छावाकशस्त्र एतत्सूक्तम् ॥

अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः ।
अभि प्रियाणि मर्मृशत्परांसि कवींरिच्छामि संदृशे सुमेधाः ॥ १ ॥

अभि । तष्टाऽइव । दीधय । मनीषाम् । अत्यः । न । वाजी । सुऽधुरः । जिहानः ।
अभि । प्रियाणि । मर्मृशत् । परांसि । कवीन् । इच्छामि । सम्ऽदृशे । सुऽमेधाः ॥ १ ॥

यजमानः स्तोतारं प्रति ब्रूते । हे स्तोतः vमनीषाम् इन्द्रविषयां स्तुतिम् vअभि vदीधय सर्वतो दीप्तां कुरु । तत्र दृष्टान्तः । vतष्टेव । यथा तष्टा तक्षणेन काष्ठं संस्करोति तद्वत् । vसुधुरः

---

१. ख-ग-घ-च-ज-ण-न-भ-स-' इदन्तो मसिः ' नास्ति । २. ख-ग-घ-च-ज-ण-समीपदेशात् । ३. त-अतिदूरदेशात् । ४. त-ऋषिः ।

शोभनया धुरान्वितः [v]वाजी वेगवान् [v]अत्यो [v]न अश्व इव [v]जिहानः कर्मणि प्रवर्तमानः [v]पराणि उत्तमानि [v]प्रियाणि इन्द्रस्य प्रियतमानि । यद्वा[1] । पराणि[v] उत्तरेष्वहःसु क्रियमाणानि कर्माणि [v]अभि [v]मर्मृशत् अत्यर्थमभिमृशन् [v]सुमेधाः शोभनमेधावानहं [v]कवीन् । ये पूर्वम् अनुष्ठितयज्ञाः[2]देवभूयमगमन्[3] ते कवयः । तान् [v]संदृशे संद्रष्टुम् [v]इच्छामि । उक्तार्थे[3] ब्राह्मणम्—' अभि तष्टेव दीधया मनीषामित्यच्छावाकोऽहरहः शंसत्यभिवक्तत्यै रूपमभि प्रियाणि मर्मृशत्पराणीति यान्येव पराण्यहानि तानि प्रियाणि तान्येव तदभिमर्मृशतो यन्त्यभ्यारभमाणाः परो वा अस्माल्लोकात्स्वर्गो लोकस्तमेव तदभिवदति कवीरिच्छामि संदृशे सुमेधा इति ये वै ते न ऋषयः पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति ' (ऐ. ब्रा. ६. २०) इति । तष्टेव । ' तक्ष्नू त्वक्षू तनूकरणे ' इत्यस्य तृनि रूपम् । नित्स्वरः । दीधय । ' दीधीङ् दीप्तिदेवनयोः ' इत्यस्यान्तर्भावितण्यर्थस्य लोटि शपो ' बहुलं छन्दसि ' इति लुगभावः । व्यत्ययेन परस्मैपदम् । सुधुरः । ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । जिहानः । ' ओहाङ् गतौ ' इत्यस्य शानचि ' भृञामित् ' इत्यभ्यासस्येत्वम् । चित्त्वादन्तोदात्तत्वे प्राप्ते ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । मर्मृशत् । ' मृश आमर्शने ' इत्यस्य यङ्लुकि ' रुग्रिकौ च लुकि ' इत्यभ्यासस्य रुगागमः । तदन्ताच्छतरि रूपम् । ' नाभ्यस्ताच्छतुः ' इति नुमभावः । अभ्यस्तस्वरः । संदृशे । ' दृशिर् प्रेक्षणे ' इत्यस्मात् तुमर्थे ' दृशे विख्ये च ' इति केन्प्रत्ययान्तत्वेन निपातनादाद्युदात्तः । समासे कृदुत्तरपदस्वरः । सुमेधाः । ' नित्यमसिच प्रजामेधयोः ' इत्यसिच्प्रत्ययः । चित्स्वरः ॥

इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्याम् ।
इमा उ ते प्रण्योः३ वर्धमाना मनोवाता अध नु धर्मणि ग्मन् ॥ २ ॥

इना । उत । पृच्छ । जनिम । कवीनाम् । मनःऽधृतः । सुऽकृतः । तक्षत । द्याम् ।
इमाः । ऊँ इति । ते । प्रऽण्यः । वर्धमानाः । मनःऽवाताः । अध । नु । धर्मणि । ग्मन् ॥२॥

[v]उत इत्यामन्त्रणे । हे इन्द्र [v]कवीनां सुकृतकर्मणां देवभूयं[4] गतानां[4] [v]जनिम जन्म । केन कर्मणा दिवं गताः कुतो वा तेषामुत्पत्तिः इत्येतमर्थम्[5] [v]इना ईश्वरान् गुरून् [v]पृच्छ । ते कवयः [v]मनोधृतः संयतमनस्का अतः एव[6] [v]सुकृतः शोभनकर्माणः सन्तः [v]द्यां दिवं [v]तक्षत अकुर्वन् । [v]अध अथेदानीं [v]धर्मणि अस्मिन् यज्ञे [v]ते त्वदर्थं [v]प्रण्यः प्रणीयमानाः [v]मनोवाताः मनोवेगाः [v]वर्धमानाः त्वां[7] वर्धयन्त्यः [v]इमाः अस्माभिः क्रियमाणाः स्तुतयः [v]नु क्षिप्रं [v]ग्मन् त्वां गच्छन्तु । [v]उ सर्वत्र प्रसिद्ध्यर्थः ॥ पृच्छ । ' प्रच्छ ज्ञीप्सायाम् ' इत्यस्य लोटि तुदादित्वात् शः । तस्य ङित्त्वात् ग्रहिज्यादिना[8] संप्रसारणम् । निघातः । प्रण्यः । ' णीञ् प्रापणे ' इत्यस्मात् औणादिकः कर्मणि क्विप् । सर्वविधीनां छन्दसि विकल्पितत्वादियङादेशं बाधित्वा यणादेशः । ' उदात्तस्वरितयोः° ' इति स्वरितत्वम् । ग्मन् । गमेर्लङि ' बहुलं छन्दसि ' इति शपो लुक् । श्लेर्ङित्त्वात् ' गमहन° ' इत्यादिना उपधालोपः । निघातः ॥

---

१. ख-ग-च-ज-ण-न-भ-स–' यद्वा पराणि ' नास्ति; त-ल–उपराणि । २. च-भ–अनुष्ठितयज्ञोद्देवभूय° । ३. ख-ग-च-ज-ण-फ-भ–अस्मिन्नर्थे । ४. ख-ग-च-भ-स–देवभूयगतानाम्; ल–देवरूपं गतानाम् । ५. ख-ग–एतमर्थम्; न–एवमर्थम् । ६. ख-ग-च-ज-ण–' एव ' नास्ति । ७. ख-ग-च-न-भ-स–' त्वां ' नास्ति । ८. ख-ग-च-ज-ण–ग्रहिज्येत्यादिना ।

नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समञ्जन् ।
सं मात्राभिर्ममिरे येमुरुर्वी अन्तर्महो समृते धायसे धुः ॥ ३ ॥

नि । सीम् । इत् । अत्र । गुह्या । दधानाः । उत । क्षत्राय । रोदसी इति । सम् । अञ्जन् ।
सम् । मात्राभिः । ममिरे । येमुः । उर्वी इति ।
अन्तः । महो इति । समृते इति सम्ऽऋते । धायसे । धुरिति धुः ॥ ३

vअत्र भूलोके vगुह्या गुह्यानि[1] कर्माणि vसीमित् सर्वत एव vनि vदधानाः कुर्वाणा एते कवयः vउत अपि च vक्षत्राय बलाय धनाय वा vरोदसी द्यावापृथिव्यौ vसमञ्जन् । ओषधीभिः पृथिवीं देवैश्च दिवं संगतामकार्षुः। किंच ते vमात्राभिः । मीयन्ते मान्तीति वा मात्राः शिलोच्चयाः । ताभिर्मात्राभिः vसं vममिरे । ते रोदस्यावियत्तया परिच्छिन्ने चक्रुश्च । vसमृते परस्परं संगते vउर्वी विस्तीर्णे vमही महत्यौ ते द्यावापृथिव्यौ vयेमुः नियमितवन्तः । विष्टम्भकेनान्तरिक्षेण vअन्तः उदयच्छन् । तथा vधायसे तयोर्धारणार्थमन्तरिक्षं vधुः व्यधुः ॥ इदवधारणार्थे । गुह्या । गुहायां भवानि । भवार्थे यत् । 'यतोऽनावः' इत्याद्युदात्तः[2] । दधानाः । दधातेः शानचि रूपम् । अभ्यस्तस्वरः । अञ्जन् । 'अञ्जू व्यक्तिम्रक्षणगतिषु' इत्यस्य लङि झसोरल्लोपः । निघातः । मात्राभिः । 'मा माने' 'माङ् माने' वा । 'दुयाम०' इत्यादिना त्रन्प्रत्ययः । नित्स्वरः । ममिरे । 'माङ् माने' इत्यस्य लिटि रूपम् । 'चादिलोपे विभाषा' इति न निघातः । येमुः । 'यम उपरमे' इत्यस्य लिट्युसि रूपम् । तिङुत्तरस्वादनिघातः । धायसे । 'वहिहाधाभ्यश्छन्दसि' इत्यसुन् । नित्स्वरः । धुः । दधातेः लुङि रूपम् ॥

आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ ४ ॥

आऽतिष्ठन्तम् । परि । विश्वे । अभूषन् । श्रियः । वसानः । चरति । स्वऽरोचिः ।
महत् । तत् । वृष्णः । असुरस्य । नाम । आ । विश्वऽरूपः । अमृतानि । तस्थौ ॥ ४ ॥

vविश्वे सर्वे कवयो रथम् vआतिष्ठन्तम् इन्द्रं vपरि vअभूषन् । परितोऽलमकुर्वन् । vस्वरोचिः । स्वमेव रोचिर्यस्यासौ स्वरोचिः । स्वप्रभयैव दीप्यमान इत्यर्थः । अत एव vश्रियः दीप्तीः vवसानः आच्छादयन् सोऽयमिन्द्रः vचरति सर्वत्र वर्तते । vवृष्णः कामानां वर्षितुः vअसुरस्य । अस्यति प्रेरयति सर्वानन्तर्यामितयेत्यसुरः । तस्येन्द्रस्य vतत् तादृशमनुभूतपूर्वं vनाम । नमयति सर्वान् अनेन शत्रूनिति नाम कर्म । यद्वा नम्यते सर्वैर्नमस्क्रियते इति नाम इन्द्रस्य शरीरं[3] कर्म वा[4]। vमहत आश्रयोपेतं वर्तते । तथा vविश्वरूपः नानाविधरूपतां भजमानः स इन्द्रो वरुणात्मना vअमृतानि जलानि

१. घ-न-ल-स-गूढानि । २. त-इत्याद्युदात्तत्वम् । ३. ख-ग-च-ज-ण-न-फ-भ-स-'शरीरं' नास्ति । ४. च-'वा' नास्ति ।

[v]आ [v]तस्थौ अधितिष्ठति ॥ विश्वे । जसः शी । अभूषन् । ' भूष अलंकारे[1] ' इत्यस्य लङि रूपम् । वसानः । ' वस आच्छादने ' इत्यस्य शानचि रूपम् । तस्य लसार्वधातुकस्वरे[2] धातुस्वरः[3] । नाम । ' णमु प्रह्वत्वे ' इत्यस्मात् ' नामन्सीमन्° ' इत्यादिना मनिन्प्रत्ययान्तत्वेन निपातनादाद्युदात्तः । विश्वरूप इति तस्य संज्ञा । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । अमृतानि । ' कालाध्वनोरत्यन्तसंयोगे ' इति द्वितीया । तस्थौ । तिष्ठतेर्लिटि णलि रूपम् ॥

असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः सन्ति पूर्वीः ।
दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ॥ ५ ॥

असूत । पूर्वः । वृषभः । ज्यायान् । इमाः । अस्य । शुरुधः । सन्ति । पूर्वीः ।
दिवः । नपाता । विदथस्य । धीभिः । क्षत्रम् । राजाना । प्रऽदिवः । दधाथे इति ॥ ५ ॥

[v]वृषभः[3] कामानां वर्षकः [v]पूर्वः चिरन्तनोऽत एव [v]ज्यायान् इन्द्रः [v]असूत । अपः ससर्ज । [v]पूर्वीः बह्वयः [v]इमाः अनेन सृष्टा आपः [v]अस्य [v]शुरुधः । शुचः पिपासाया रोधयित्र्यः [v]सन्ति भवन्ति । [v]दिवो [v]नपाता दिवो न पातयितारौ हे राजानौ इन्द्रावरुणौ [v]प्रदिवः प्रकर्षेण द्योतमानस्य [v]विदथस्य यज्ञकारिणः स्तोतुः [v]धीभिः स्तुतिभिः [v]क्षत्रं धनं [v]दधाथे अस्मभ्यं दातुं धारयेथे ॥ असूत । ' षूङ् प्राणिगर्भविमोचने ' इत्यस्य लङि रूपम् । अडागमस्वरः । ज्यायान् । प्रशस्यशब्दात् ईयसुनि ' ज्य च ' (पा. सू. ५. ३. ६१) इति ज्यादेशः । ' ज्यादादीयसः ' (पा. सू. ६. ४. १६०) इति[4] ईयसः[5] आदेः ईकारस्य[6] आकारादेशः । नित्त्वादाद्युदात्तः । शुरुधः । पृषोदरादिः । नपाता । ' नभ्राण्नपात्° ' इति निपातनान् नञः प्रकृतिभावः । आमन्त्रितत्वात् निघातः । धीभिः । ' सावेकाचः[7] ' इति विभक्तेरुदात्तत्वम् । राजाना । आमन्त्रितत्वात् निघातः । दधाथे । दधातेर्लटि रूपम् । निघातः ॥ ॥ २३ ॥

त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
अपश्यमत्र मनसा जगन्वान्व्रते गन्धर्वाँ अपि वायुकेशान् ॥ ६ ॥

त्रीणि । राजाना । विदथे । पुरूणि । परि । विश्वानि । भूषथः । सदांसि ।
अपश्यम् । अत्र । मनसा । जगन्वान् । व्रते । गन्धर्वान् । अपि । वायुऽकेशान् ॥ ६ ॥

हे राजानौ इन्द्रावरुणौ [v]विदथे अस्मिन् यज्ञे [v]विश्वानि व्याप्तानि [v]पुरूणि यजनीयैः सोमादिभिः पूर्णानि [v]त्रीणि [v]सदांसि सवनानि [v]परि [v]भूषथः सर्वतोऽलंकुरुथः । हे इन्द्र त्वं [v]जगन्वान् यज्ञं प्रति गतवानसि । [v]अपि[8] संभावनायाम् । यतोऽहम् [v]अत्र [v]व्रते यज्ञे [v]वायुकेशान् वायुवत् चञ्चलरश्मीन्[9] [v]गन्धर्वान् सोमरक्षकान् स्वानभ्राजादीन् [v]मनसा [v]अपश्यम् । ते[8] च[8] स्वानभ्राजादयः

१. च-फ-अलंकरणे । २. ख-ग-च-ज-ण-न-भ-लसार्वधातुकस्वरः । ३. ख-ग-च-त-न-फ-भ-ल-स-तयोः पूर्वः वृषभः । ४. ख-ग-च-ज-ण-न-भ-स- ' इति ईयसः ' नास्ति । ५. ल-स-' ईकारस्य ' नास्ति । ६. ख-ग-च-ण-भ-स-अपिः । ७. ख-ग-च-ज-ण-फ-चलनशीलान् रश्मीन्; भ-ल-चलनरश्मीन् । ८. ख-ग-च-ज-ण-फ-भ-तत्र ।

तैत्तिरीयके स्पष्टमभिहिताः–' स्वान भ्राजाङ्घारे बभ्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान् रक्षध्वं मा वो दभन् ' (तै. सं. १. २. ७) इति ॥ भूषथः । ' भूष अलंकारे ' इत्यस्य लटि रूपम् । अपश्यम् । ' दृशिर् प्रेक्षणे ' इत्यस्य लङि रूपम् । पादादित्वादनिघातः । जगन्वान् । गमेः क्वसौ ' विभाषा गमहनविदविशाम् ' इति इट्टो विकल्पितत्वादत्र इडभावः । ' मो नो धातोः ' ' म्वोश्च ' इति मकारस्य नकारः । प्रत्ययस्वरः[1] । गन्धर्वान् । ' धृञ् धारणे ' इत्यस्य गोशब्दे उपपदे ' गवि गन् धृञो वः ' इति वप्रत्ययः । तत्संनियोगेन गोशब्दस्य[2] गनादेशः । प्रत्ययस्वरः ॥

तदिन्नवस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः ।
अन्यदन्यदसुर्यं१ वसाना नि मायिनो ममिरे रूपमस्मिन् ॥ ७ ॥

तत् । इत् । नु । अस्य । वृषभस्य । धेनोः । आ । नामऽभिः । ममिरे । सक्म्यम् । गोः ।
अन्यत्ऽअन्यत् । असुर्यम् । वसानाः । नि । मायिनः । ममिरे । रूपम् । अस्मिन् ॥ ७ ॥

ये यजमानाः [v]वृषभस्य अभिमतफलप्रदस्य [v]अस्य इन्द्रस्यार्थं [v]धेनोः [v]गोः [v]नामभिः विश्वायुर्विश्वव्यचा इत्यादिभिरुपलक्षितां गां [v]सक्म्यं संभजनार्हं तत्क्षीरादिकं हविः [v]नु क्षिप्रम् [v]आ [v]ममिरे आदुहन्ति । धातूनामनेकार्थत्वात् । तेन च हविषा यज्ञमनुष्ठाय देवभूयं प्राप्तास्ते कवयः [v]अन्यदन्यत् नूतनम् [v]असुर्यम् असुराणां बलं [v]वसानाः आच्छादयन्तः अत एव [v]मायिनः मायया स्वीकृतकामरूपाः[3] । यद्वा[4] मायिनः प्रज्ञावन्तः[4] सन्तः [v]अस्मिन् इन्द्रे [v]रूपं स्वं[5] स्वं रूपं[5] [v]नि [v]ममिरे इयत्तया परिच्छिद्य निदधुः ॥ इत् पूरणः[6] । ममिरे । ' माङ् माने ' । लिटि रूपम् । निघातः । सक्म्यम् । ' युजिरुचितिजां कुश्च ' (उ. सू. १. १४३) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् सचतेः मक्प्रत्ययः कुत्वं च । सचनं सक्मः । तत्र भवः इत्यर्थे ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तः । गोः । एकादेशस्वरः । असुर्यम् । असुरस्य स्वमित्यर्थे ' असुरस्य स्वम् ' (पा. सू. ४. ४. १२३) इति यत् । तित्स्वरितः । रूपम् । ' रूप रूपक्रियायाम् ' । ण्यन्तः । ' खष्पशिल्पशष्पवाष्परूषपर्पतल्पाः ' (उ. सू. ३. ३०८) इति पप्रत्ययान्तत्वेन निपातनात् पकारलोपोऽगुणत्वं च । रूपयति रूप्यते वेति रूपम् । प्रत्ययस्वरः ॥

तदिन्नवस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ॥ ८ ॥

तत् । इत् । नु । अस्य । सवितुः । नकिः । मे । हिरण्ययीम् । अमतिम् । याम् । अशिश्रेत् ।
आ । सुऽस्तुती । रोदसी इति । विश्वमिन्वे इति विश्वम्ऽइन्वे ।
अपिऽइव । योषा । जनिमानि । वव्रे ॥ ८ ॥

---

१. ख-ग-च-ज-ण-त-न-भ-स–' प्रत्ययस्वरः ' नास्ति । २. त-न-भ-स–गोशब्दस्य च । ३. ख-ग-ज-ण-प-फ-भ–स्वीकृतकामरूपाः सन्तः । ४. घ-च–' यद्वा... ...प्रज्ञावन्तः' नास्ति । ५. त–स्वरूपम् । ६. ख-ग-च-ण-ल–पूरणम् ।

ᵛतत् तस्मात् ᵛसवितुः सर्वस्य जगतोऽन्तर्यामितया प्रेरयितुः[1] ᵛअस्य इन्द्रस्य ᵛमे मम ᵛहिरण्ययीं सुवर्णमयीम् ᵛअमतिं दीप्तिं ᵛनकिः को वा परिच्छिनत्ति खलु । ᵛयां मदीयां दीप्तिम् ᵛअशिश्रेत् य आश्रयति सः ᵛसुष्टुती शोभनया स्तुत्या स्तुतः सन् ᵛविश्वमिन्वे सर्वस्य संतर्पयित्र्यौ ᵛरोदसी द्यावापृथिव्यौ ᵛआ ᵛवव्रे स्वकीयतया सर्वतो वृणुते । तत्र दृष्टान्तः । ᵛअपीव ᵛयोषा ᵛजनिमानि । यथा योषा स्त्री जनिमानि जातानि[2] अपत्यानि वृणोति तद्वत् । नुः[3] पूरणः[3] ॥ नकिः । निपातः । हिरण्ययीम् । हिरण्यस्य विकारार्थे ' मयड्वैतयोः° ' (पा. सू. ४. ३. १४३) इति मयट् । ' ऋत्व्यवास्त्व्य-वास्वमाध्वीहिरण्ययानि छन्दसि ' इति निपातनात् मयटो मकारलोपः । टित्त्वात् ' टिड्ढाणञ्° ' इति ङीप् । प्रत्ययस्वरः । अमतिम् । अम गत्यादिषु । अमेरतिः[4] इति अतिप्रत्ययः[4] । प्रत्ययस्वरः । अशिश्रेत् । श्रयतेर्लेङि ' बहुलं छन्दसि ' इति शपः श्लुः । यङ्लुक्योगादनिघातः । सुष्टुती । ' सुपां सुलुक्° ' इति तृतीयायाः सवर्णदीर्घः । विश्वमिन्वे । ' इवि व्याप्तिप्रीणनयोः ' इत्यस्मात् कर्मणि अण् । इदित्त्वात् नुम् । ' तत्पुरुषे कृति बहुलम् ' इति द्वितीयाया अलुक् । कृदुत्तरपदस्वरः । योषा । यौतेर्मिश्रीभावकर्मणः ' वृतृवदिहनिकमिकषियुसुचिभ्यः सः ' इति सप्रत्ययः । ग्रामादिवात् आद्युदात्तः । जनिमानि । ' जनी प्रादुर्भावे ' । ' हृजनिभ्यामिमनिन् ' इति इमनिन्प्रत्ययो भूतकाले । निरवादाद्युदात्तः । वव्रे । ' वृञ् वरणे ' इत्यस्य लिटि रूपम् ॥

युवं प्रत्नस्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातम् ।
गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानि ॥ ९ ॥

युवम् । प्रत्नस्य । साधथः । महः । यत् । दैवी । स्वस्तिः । परि । नः । स्यातम् ।
गोपाजिह्वस्य । तस्थुषः । विऽरूपा । विश्वे । पश्यन्ति । मायिनः । कृतानि ॥ ९ ॥

हे इन्द्रावरुणौ ᵛयुवं युवां ᵛप्रत्नस्य स्तोतुः ᵛमहः तादृशं श्रेयः ᵛसाधथः साधयथः । कीदृशं तदित्यत आह । ᵛयद्दैवी ᵛस्वस्तिः यदिदं देवसंबन्धि श्रेयः स्वाराज्यलक्षणम्[5] । किंच युवां ᵛनः अस्मान् ᵛपरि परितः ᵛस्यातं रक्षकौ भवेतम् । ᵛविश्वे सर्वे ᵛमायिनः देवाः ᵛगोपाजिह्वस्य । गोष्ठ्रा जिह्वा मा बिभीतेत्येतादृशी वाग्यस्य स तथोक्तः । ᵛतस्थुषः स्थिरतरस्येन्द्रस्य ᵛविरूपा नानाविधानि वृत्रहननादीनि ᵛकृतानि कर्माणि ᵛपश्यन्ति । एवमिन्द्रस्य विश्वरूपत्वमुक्तम् ॥ युवम् । युष्मच्छब्दस्य द्विवचने ' यवावौ द्विवचने ' (पा. सू. ७. २. ९२) इति युवादेशः । ' ङेप्रथमयोरम् ' (पा. सू. ७. १. २८) इति सुपः अमादेशः । साधथः । ' साध संसिद्धौ ' इत्यस्य ण्यन्तस्य लटि रूपम् । ' बहुलमन्यत्रापि° ' इति णेर्लुक् । निघातः । दैवी । ' देवाद्यञञौ ' इति अञ्प्रत्ययः । नित्स्वरः । स्यातम् । अस्तेर्लेङि रूपम् । गोपाजिह्वस्य । ' गुपू रक्षणे ' इत्यस्य आयप्रत्ययान्तस्य क्विपि अतोलोप-यलोपयोः कृतयो रूपं गोपा इति । बहुव्रीहौ पूर्वपदस्वरः । तस्थुषः । ' ष्ठा गतिनिवृत्तौ ' इत्यस्य क्वसौ ' वस्वेकाजाद्घसाम् ' इति प्राप्तस्य इटः ' संप्रसारणं संप्रसारणाश्रयं च बलीयः ' इति संप्रसारणस्य बलीयस्त्वान्निवृत्तिः । ' वसोः संप्रसारणम् ' । प्रत्ययस्वरः । पश्यन्ति । ' दृशिर् प्रेक्षणे ' । निघातः ॥

१. त–प्रसवितुः । २. त–जनितानि । ३. ख-घ-प–नु पूरणः; न-ल-स–' नुः पूरणः ' नास्ति । ४. च-फ–अमेरतिप्रत्ययः । ५. ख-ग-च-न–स्वराज्यलक्षणम् ।

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १० ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ १० ॥

व्याख्यातेयम्[1] ॥ ॥ २४ ॥ ॥ ३ ॥

अथ चतुर्थेऽनुवाके पञ्चदश सूक्तानि । तत्र ' इन्द्रं मतिः ' इति नवर्चं प्रथमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' इन्द्रं मतिर्नव ' इत्यनुक्रान्तम् । सूक्तविनियोगो लिङ्गादवगन्तव्यः ॥

इन्द्रं मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमतष्टा जिगाति ।
या जागृविर्विदथे शस्यमानेन्द्र यत्ते जायते विद्धि तस्य ॥ १ ॥

इन्द्रम् । मतिः । हृदः । आ । वच्यमाना । अच्छ । पतिम् । स्तोमऽतष्टा । जिगाति ।
या । जागृविः । विदथे । शस्यमाना । इन्द्र । यत् । ते । जायते । विद्धि । तस्य ॥ १ ॥

विश्वामित्रः स्तौति । हे इन्द्र [v]हृदः हृदयात् [v]वच्यमाना उच्यमाना [v]स्तोमतष्टा स्तोमकारिभिः कृता [v]मतिः स्तुतिः [v]पतिं[2] सर्वस्य जगतः स्वामिनं त्वाम् [v]अच्छ अभिलक्ष्य [v]आ [v]जिगाति समन्तात् गच्छतु[3] । [v]या मदीया स्तुतिः [v]जागृविः स्तुत्यस्य तव जागरणं कुर्वाणा [v]विदथे यज्ञे [v]शस्यमाना भवति । हे [v]इन्द्र [v]ते त्वदर्थं [v]यत् स्तोत्रं मत्तः [v]जायते तत् [v]विद्धि जानीहि । [v]तस्य इति द्वितीयार्थे षष्ठी ॥ मतिः । ' मन्त्रे वृष ' इत्यादिना क्तिन्नुदात्तः । हृदः । हृदयशब्दस्य ' पद्दोमास्° ' (पा. सू. ६. १. ६३) इत्यादिना हृदादेशः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । वच्यमाना । ' वच परिभाषणे ' इत्यस्य कर्मणि यक् । संप्रसारणाभावश्छान्दसः । प्रत्ययस्वरः । स्तोमतष्टा । ' तक्षू त्वक्षू तनूकरणे ' इत्यस्य कर्मणि निष्ठा । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । जिगाति । ' गा स्तुतौ छन्दसि ' इति जुहोत्यादिः । ' बहुलं छन्दसि ' इत्यभ्यासस्य इत्वम् । निघातः । जायते । ' जनी प्रादुर्भावे ' इत्यस्य लटि रूपम् । यद्वृत्तयोगादनिघातः । विद्धि । ' विद ज्ञाने ' इत्यस्य लोटि हेः ' हुझल्भ्यो हेर्धिः ' इति ध्यादेशः । वाक्यभेदादनिघातः ॥

दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना ।
भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः ॥ २ ॥

दिवः । चित् । आ । पूर्व्या । जायमाना । वि । जागृविः । विदथे । शस्यमाना ।
भद्रा । वस्त्राणि । अर्जुना । वसाना । सा । इयम् । अस्मे इति । सनऽजा । पित्र्या । धीः ॥ २ ॥

---

१. ज-ण–पूर्ववत् व्याख्याता; न–व्याख्याता । २. ख-ग-घ-च-ज-ण-प-फ-भ–तस्य पतिम् । ३. च-फ–गच्छति ।

हे इन्द्र ᵛदिवश्चित् द्योतमानात् सूर्यादपि ᵛपूर्व्या पूर्वे भवा उषःकालसंबन्धिनी ᵛआ ᵛजायमाना या स्तुतिलक्षणा वाक् विभवति ᵛसेयं वाक् ᵛविदथे यज्ञे ᵛशस्यमाना ᵛजागृविः स्तुत्यस्य तव जागरणं कुर्वाणा ᵛभद्रा कल्याणानि[1] ᵛअर्जुना शुक्लवर्णानि ᵛवरूथानि योग्यतया तेजांसि ᵛवसाना ᵛअस्मे अस्माकं ᵛपित्र्या पितृक्रमागता[2] अत एव ᵛसनजा पुरातनी सती ᵛधीः तव स्तुतिर्भवति ॥ दिवः । दिवेः क्विप् । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । अर्जुना । ' अर्जेर्णिलुक्च ' (उ. सू. ३. ३३८) इति उनन् । निरस्वरः । सनजा । जनेः ' अन्येभ्योऽपि दृश्यते ' इति डः । प्रत्ययस्वरः । पित्र्या । पितृशब्दात्तत आगत इत्यर्थे ' पितुर्यच्च ' इति यत्प्रत्ययः । ' रीङृतः ' (पा. सू. ७. ४. २७) इति रीङादेशः । ' यस्य° ' इति लोपः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् ॥

यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ॥ ३ ॥

यमा । चित् । अत्र । यमऽसूः । असूत । जिह्वायाः । अग्रम् । पतत् । आ । हि । अस्थात् ।
वपूंषि । जाता । मिथुना । सचेते इति । तमःऽहना । तपुषः । बुध्ने । आऽइता ॥ ३ ॥

प्रसंगादुषःकालं प्रशंसति । ᵛयमसूः । यमौ यमलौ सूत इति यमसूरुषोभिमानिनी देवता । सा ᵛयमा यमलावश्विनौ ᵛअत्र उषःकाले ᵛअसूत । अश्विनोरत्र शस्यमानत्वात्तावश्विनौ स्तोतुं मम ᵛजिह्वायाः ᵛअग्रं ᵛपतत् चञ्चलम् ᵛआ ᵛअस्थात् ᵛहि तिष्ठति खलु । ᵛतमोहना[3] तमसो हन्तारौ ᵛतपुषः । तपत्यस्मिन् सूर्य इति तपुः दिवसः[4] । तस्य ᵛबुध्ने मूले ᵛएता एतावागतौ ᵛमिथुना परस्परं[5] संगतौ[6] तावश्विनौ ᵛजाता उत्पन्नानि ᵛवपूंषि । उप्यन्ते निधीयन्ते इति वपूंषि उषःकाले क्रियमाणानि शस्त्रादीनि कर्माणि । ᵛसचेते संगच्छतः ॥ यमसूः । ' षूङ् प्राणिगर्भविमोचने ' इत्यस्य[6] क्विप् । कृदुत्तरपदस्वरः । असूत । तस्यैव धातोर्लङि अदादित्वाच्छपो लुक् । निघातः । पतत् । ' पतॢ गतौ ' । शतुर्लसार्वधातुकस्वरे धातुस्वरः । अस्थात् । ' ष्ठा गतिनिवृत्तौ ' । लुङि रूपम् । हियोगादनिघातः । वपूंषि । ' डुवप् बीजसंताने ' । ' अर्तिपॄवपियजितनिधनितपिभ्यो नित् ' इति उसिप्रत्ययः । ' निञ्च ' इत्युक्तत्वादाद्युदात्तः । सचेते । ' षच समवाये ' इत्यस्य लटि रूपम् । तपुषः । ' तप संतापे ' । ' अर्तिपॄवपि° ' इत्यादिना उसिः । बुध्ने । ' बन्ध बन्धने ' । ' बन्धेर्ब्धिबुधी च ' (उ. सू. ३. २८५) इति नक्प्रत्ययः । ब्धिबुधी एतावादेशौ धातोः । प्रत्ययस्वरः । एता । ' इण् गतौ ' इत्यस्य कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः स्वरः ॥

नकिरेषां निन्दिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।
इन्द्रे एषां दृंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥ ४ ॥

नकिः । एषाम् । निन्दिता । मर्त्येषु । ये । अस्माकम् । पितरः । गोषु । योधाः ।
इन्द्रः । एषाम् । दृंहिता । माहिनऽवान् । उत् । गोत्राणि । ससृजे । दंसनाऽवान् ॥ ४ ॥

---

१. ख-ग-च-ज-ण-न-फ-भ-ल-कल्याणा । २. घ-ज-ण-पितृक्रमादागता । ३. ल-तमोहना नाम । ४. त-देशः । ५. न-ल-परस्परसंगतौ । ६. ल-इत्यस्मात् ।

हे इन्द्र सत्रे प्रवृत्तानाम् vअस्माकं vये vपितरः अङ्गिरसः vगोषु पणिभिरपहृतेषु तन्निमित्तं vयोधाः योद्धारो वर्तन्ते तेषाम् vएषां vमर्त्येषु vनिन्दिता दूषकः vनकिः न कश्चिदस्ति । कुत इत्यत आह । vमाहिनावान् महिमोपेतः vदंसनावान् वृत्रहननादिकर्मवान् vइन्द्रः vएषाम् अङ्गिरसां vदंहिता[1] दंहितानि समृद्धानि[2] vगोत्राणि गवां वृन्दानि vउत् vससृजे तेभ्योऽङ्गिरोभ्यो ददौ[3]॥ निन्दिता । ' निदि कुत्सायाम् ' इत्यस्य तृचि रूपम् । मर्त्येषु । वस्वादित्वात् स्वार्थिको यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । योधाः । ' युध संप्रहारे ' इत्यस्य पचाद्यचि रूपम् । दंहिता । ' दृह दृहि वृद्धौ ' इत्यस्य निष्ठायां रूपम् । माहिनावान् । ' महेरिनण्च ' (उ. सू. २. २१४) इति इनण्प्रत्ययः। ' तदस्यास्ति° ' इति मतुप् । माहिनावानिति तस्य संज्ञा । ' मतौ बह्वचोऽनजिरादीनाम् ' (पा. सू. ६. ३. ११९) इति संहितायां दीर्घः । गोत्राणि । गवां समूह इत्यर्थे ' खलगोरथात् ' इत्यनुवृत्तौ ' इनित्रकट्यचश्च ' (पा. सू. ४. २. ५१) इति गोशब्दात् त्रप्रत्ययः । प्रत्ययस्वरः । ससृजे । ' सृज विसर्गे ' इत्यस्य लिटि रूपम् ॥

दशपेये निष्केवल्ये निविद्धानीयस्य पुरस्तात् ' सखा ह यत्र ' इत्येषा । सूत्रितं च—' सखा ह यत्र सखिभिर्नवग्वैरिति निविद्धानीययोराद्ये ' (आश्व. श्रौ. ९. ३) इति ॥

सखा ह यत्र सखिभिर्नवग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन् ।
सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ॥ ५ ॥

सखा । ह । यत्र । सखिऽभिः । नवऽग्वैः । अभिऽज्ञु । आ । सत्वऽभिः । गाः । अनुऽग्मन् । सत्यम् । तत् । इन्द्रः । दशऽभिः । दशऽग्वैः । सूर्यम् । विवेद । तमसि । क्षियन्तम् ॥ ५ ॥

vसखिभिः समानख्यानैः vसत्वभिः इन्द्रमभितः सीदद्भिः vनवग्वैः । मेधातिथिप्रभृतयोऽङ्गिरसः केचिन्नव मासान् सत्रमनुष्ठाय फलं लेभिरे केचिद्दश मासाननुष्ठायेति । तत्र ये नव मासान् सत्रमनुष्ठाय लब्धफला उदतिष्ठन् ते नवग्वाः । तैः सत्वभिः अङ्गिरोभिः vसखा समानख्यानः[4] इन्द्रः vयत्र यस्मिन् बिले पणिभिर्निरुद्धाः vगाः अभिलक्ष्य vअभिज्ञु अभिगतजानुकं यथा भवति तथा vअनुग्मन् अनुगच्छन् vइन्द्रः vतत् तत्र बिले vदशग्वैः । ये दश मासान् सत्रमनुष्ठाय लब्धफला उदतिष्ठन् ते दशग्वाः । vदशभिः दशसंख्याकैरङ्गिरोभिः सहितः सन् vतमसि बिलवर्तिन्यन्धकारे vक्षियन्तं निवसन्तं vसत्यं यथार्थप्रकाशं vसूर्यं vविवेद लेभे । ततो लब्धप्रकाशः स इन्द्रस्ता गा आनीयाङ्गिरोभ्यः प्रादादिति भावः । आहौ[5] पूरणौ[5] ॥ सखा । ' ख्या प्रकथने ' । ' समाने ख्यश्चोदात्तः ' इति इण्प्रत्ययः । डिच्च[6] । ' समानस्य छन्दसि° ' इति समानस्य सभावः । ' उदात्तः° ' इत्युक्तत्वेन[7] सामर्थ्यादुपपदस्य इति गम्यते । आद्युदात्तः । नवग्वैः । गमेरौणादिको ड्वप्रत्ययः । बहुव्रीहौ पूर्वपदस्वरः । अभिज्ञु । ' प्रसंभ्यां जानुनोर्ज्ञुः ' इति विधीयमानो ज्ञुः अभेरुत्तरस्य व्यत्ययेन भवति । सत्वभिः । ' षद्लृ विशरणगत्यवसादनेषु ' इत्यस्मात् ' प्र ईरसद्योस्तुट् च ' इति क्वनिप्प्रत्ययः । तुडागमः । निरवादाद्युदात्तः । अनुग्मन् । गमेः शतरि ' बहुलं छन्दसि ' इति

१. न-ल-स–' दंहिता ' नास्ति । २. च-संभृतानि । ३. ख-ग-च-ज-ण-प-फ-भ–ददौ । उत् पूरणः । ४. ख-ग-च-ज-ण-फ–समानस्थानः । ५. न-ल-स–' आहौ पूरणौ ' नास्ति । ६. ख-ग-त-न–डित्त्वम् । ७. ज-ण-ल–इत्युक्तेन ।

शपो लुकि कृते ' गमहन० ' इत्यादिना[1] उपधालोपः । प्रादिसमासः । शतृस्वरः । विवेद । ' विद ज्ञाने ' इत्यस्मात् लिटि णलि रूपम् । क्षियन्तम्[2] । ' क्षि निवासगत्योः ' इत्यस्य शतरि रूपम्[2] ॥ ॥२५॥

इन्द्रो मधु संभृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः ।
गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥ ६ ॥

इन्द्रः । मधु । सम्ऽभृतम् । उस्रियायाम् । पत्ऽवत् । विवेद । शफऽवत् । नमे । गोः ।
गुहा । हितम् । गुह्यम् । गूळ्हम् । अपऽसु । हस्ते । दधे । दक्षिणे । दक्षिणऽवान् ॥ ६ ॥

[v]इन्द्रः [v]उस्रियायां क्षीरदध्यादिक्रमेणोत्स्राविण्यां[3] भोगवत्यां[4] गवि [v]संभृतं संपादितं [v]मधु क्षीरादि [v]विवेद अज्ञासीत् । ततस्तदर्थं [v]पद्वत् पादयुक्तं [v]शफवत् खुरोपेतं गोधनं विवेद लेभे । कथं लब्धवानिति तदुच्यते । [v]नमे [v]गोः । गोरिति द्वितीयार्थे षष्ठी । पणिनामकैरसुरैरपहृतां गां नमे आनीतामकरोत् । तथा [v]दक्षिणावान् औदार्यवान् समर्थः स इन्द्रः [v]गुहा गुहायां [v]हितं [v]गुह्यं प्रच्छन्नम् अत एव [v]अप्सु अन्तरिक्षे [v]गूळ्हं[5] गूढचारिणं मायिनमसुरं [v]दक्षिणे [v]हस्ते [v]दधे दधार अग्रहीत् इत्यर्थः । द्वितीयाष्टके ' श्रुधी हवम् ' इत्यस्मिन् वर्गे ' गुहा हितम् ' इत्येतत् सम्यगभ्यधायि (ऋ. सं. २. ११. ५) ॥ उस्रियायाम् । प्रक्रिया सम्यक् पूर्वमेवावादि । विवेद । ' विद ज्ञाने ' ' विदृ लाभे ' । एतयोर्लिटि रूपम् । शफवत् । शफोऽस्यास्तीति मतुप् । ' हस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । नमे । ' णमु प्रह्वत्वे ' इत्यस्य लिटि रूपम् । द्विर्वचनस्य छन्दसि विकल्पितत्वादत्र द्विर्वचनाभावः । वाक्यभेदादनिघातः । गुह्यम् । ' गुहू संवरणे ' इत्यस्मात् ' शंसिगुहिदुहिभ्यो वेति वक्तव्यम् ' इति क्यप् । कित्त्वादगुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । दधे । दधातेर्लिटि रूपम् । दक्षिणावान् । ' दक्ष वृद्धौ ' । ' नुदक्षिभ्यामिनन् ' इति इनन्प्रत्ययः । तदस्यास्तीति मतुप् । संहितायाम् ' अन्येषामपि दृश्यते ' इति पूर्वपदस्य दीर्घः । निःस्वरः ॥

ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ॥ ७ ॥

ज्योतिः । वृणीत । तमसः । विऽजानन् । आरे । स्याम । दुःऽइतात् । अभीके ।
इमाः । गिरः । सोमऽपाः । सोमऽवृद्ध । जुषस्व । इन्द्र । पुरुऽतमस्य । कारोः ॥ ७ ॥

[v]तमसः रात्रेः सकाशात् [v]विजानन्[6] विशेषेण जानन्[7] प्रादुर्भवन् सूर्यात्मक इन्द्रः [v]ज्योतिर्वृणीत । जगद्व्यवहारनिर्वाहकं प्रकाशं समभक्त । यद्वा तमसस्तमोरूपात् वृत्रादेः विजानन् प्रादुर्भवन् ।

१. ख-ग-च-ज-ण-त-न-भ-स-इति । २. ख-ग-च-ज-ण-न-भ-स-' क्षियन्तं... ... रूपम् ' नास्ति । ३. ख-ग-घ-च-ज-ण-त-न-फ-भ-स-°क्रमेणोर्ध्वस्राविण्याम् । ४. ख-ग-घ-च-ज-ण-न-भ-स-' भोगवत्यां ' नास्ति । ५. ख-ग-ज-ण-न-भ-ल-स-' गूळ्हं ' नास्ति । ६. ख-ग-च-ज-ण-न-भ-स-' विजानन् ' नास्ति । ७. ल-' जानन् ' नास्ति ।

वृत्रं हत्वा प्रकाशमवृणीत । वयं ᵛदुरितात् पापात् ᵛआरे दूरे पापवर्जिताः सन्तः ᵛअभीके भयरहिते स्थाने ᵛस्याम भवेम । ᵛसोमपाः सोमस्य पातः अत एव ᵛसोमवृद्ध सोमपानेषु वृद्ध हे ᵛइन्द्र ᵛपुरुतमस्य । पुरून् बहून्[1] शत्रून् तामयति ग्लापयतीति पुरुतमः । तादृशस्य तव ᵛकारोः स्तोत्रं कुर्वाणस्य ऋत्विजः ᵛइमाः स्तुतिलक्षणाः ᵛगिरः वाचः ᵛजुषस्व सेवस्व[2]॥ वृणीत । ' वृङ् संभक्तौ ' इत्यस्य लङि रूपम् । विजानन् । ' ज्ञा अवबोधने ' । विशेषेण ज्ञानं प्रकाशः । प्रत्ययस्वरः । अभीके । न विद्यते भीर्यस्मिन् । ततः ' शेषाद्विभाषा ' (पा. सू. ५. ४. १५४) इति कप्प्रत्ययः । ' नञ्सुभ्याम् ' इत्यन्तोदात्तत्वे प्राप्ते ' कपि पूर्वम् ' (पा. सू. ६. २. १७३) इति पूर्वस्यान्तोदात्तत्वम् । पुरुतमस्य । ' तमु ग्लाने ' इत्यस्मात् ण्यन्तात् पचाद्यचि ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् ॥

ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥ ८ ॥

ज्योतिः । यज्ञाय । रोदसी इति । अनु । स्यात् । आरे । स्याम । दुःऽइतस्य । भूरेः । भूरि । चित् । हि । तुजतः । मर्त्यस्य । सुऽपारासः । वसवः । बर्हणाऽवत् ॥ ८ ॥

हे इन्द्र ᵛज्योतिः जगत्प्रकाशकः सूर्यः ᵛयज्ञाय अग्निहोत्रादिकर्मकरणाय ᵛरोदसी द्यावापृथिव्यौ ᵛअनु ᵛष्यात् अनुभवतु प्रकाशयतु । वयं ᵛभूरेः प्रभूतस्य ᵛदुरितस्य पापस्य ᵛआरे दूरे[3] ᵛस्याम भवेम । हे ᵛवसवः सर्वस्य वासयितार इन्द्रादयः ᵛसुपारासः सुपाराः शोभनपाराः स्तुत्याभिमुखीकर्तुं शक्या यूयं ᵛभूरि ᵛचित् अतिप्रभूतं ᵛबर्हणावत् समृद्धियुक्तं धनं ᵛतुजतः भूरिप्रदस्य ᵛमर्त्यस्य प्रयच्छथ[4] । अत्र योग्यक्रियाध्याहारः ॥ स्यात् । अस्तेर्लिङि रूपम् । संहितायाम् अनोरुत्तरस्यास्तेः ' उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ' (पा. सू. ८. ३. ८७) इति षत्वम् । निघातः । तुजतः । ' तुजि पिजि लजि हिंसादाननिकेतनेषु ' । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । बर्हणावत् । ' बृहि वृद्धौ ' इत्यस्य भावे औणादिको युप्रत्ययः । प्रत्ययस्वरः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ९ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥९॥

व्याख्यातेयम्[5] ॥ ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके द्वितीयोऽध्यायः समाप्तः ॥

१. ख-ग-च-ज-ण-न-भ-स-' बहून् ' नास्ति । २. ख-ग-च-ज-ण-न-' सेवस्व ' नास्ति । ३. ख-ग-च-ज-ण-स-' दूरे ' नास्ति । ४. घ-प्रयच्छथ । हि पूरणः । ५. ख-इत्येवं पूर्वमेव व्याख्याता; ज-ण-इति पूर्ववत्; न-व्याख्याता ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ[1] तृतीयाष्टकस्य तृतीयाध्याय आरभ्यते[1] । ' इन्द्र त्वा ' इति नवर्चं द्वितीयं सूक्तं वैश्वामित्रं गायत्रमैन्द्रम् । तथा चानुक्रान्तम्—' इन्द्र त्वा गायत्रं हि ' इति । अग्निष्टोमे प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे इदं सूक्तम् । सूत्रितं च—' इन्द्र त्वा वृषभमुद्वेदभीति तिस्रः ' (आश्व. श्रौ. ५. १०) इति । आद्या[2] प्रातःसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्या । सूत्रितं च—' इन्द्र त्वा वृषभं मरुतो यस्य ' (आश्व. श्रौ. ५. ५) इति ॥

इन्द्रं त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वो अन्धसः ॥१॥

इन्द्रं । त्वा । वृषभम् । वयम् । सुते । सोमे । हवामहे । सः । पाहि । मध्वः । अन्धसः ॥१॥

इन्दौ स्रवति सोमरसे रमते क्रीडतीति इन्द्रः । यद्वा इदं सर्वं जगत् साक्षाद्दर्शयतीतीन्द्रः । तस्य संबुद्धिः । हे [v]इन्द्र [v]वृषभं कामानां वर्षकं [v]त्वा त्वां [v]सुते ग्रावभिरभिषुते [v]सोमे [v]वयं [v]हवामहे सोमपानार्थमाह्वयामः । [v]सः त्वं [v]मध्वः मदकरम् [v]अन्धसः अन्नलक्षणं सोमं[3] [v]पाहि पिब । इन्द्रशब्दं यास्को बहुधा निर्विवेच—' इन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयतीति वेरां धारयतीति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्द्रे भूतानीति वा । तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वम् ' (निरु. १०. ८) इति । यत्र यत्र योऽर्थोऽनुगुणस्तत्र सोऽर्थः स्वीकार्यः । ' इदंदर्शनादित्यौपमन्यवः ' (निरु. १०. ८) । इदं ब्रह्म साक्षात्पश्यतीतीन्द्रः । तथा चारण्यके श्रूयते—' स एतमेव पुरुषं ब्रह्मततममपश्यदिदमदर्शमितीदँ । तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः[4] ' (ऐ. आ. २. ४. ३) इति ॥ इन्द्र । ' इदि परमैश्वर्ये ' इति धातुः । स्वमायया जगद्रूपत्वं परमैश्वर्यम् । अनेनाभिप्रायेण श्रूयते—' इन्द्रो मायाभिः पुरुरूप ईयते ' (ऋ. सं. ६. ४७. १८) इति । इन्दुशब्दे उपपदे रमतेः ' अन्येभ्योऽपि दृश्यते ' इति डः । पूर्वपदस्योकारलोपः । ' इदि परमैश्वर्ये ' इत्यस्मात् ' ऋज्रेन्द्राग्र° ' इत्यादिना रन्प्रत्ययान्तत्वेन निपातितः । एवमेतानि निर्वचनानि द्रष्टव्यानि । आमन्त्रिताद्युदात्तत्वम्[5] । हवामहे । ह्वयतेः ' बहुलं छन्दसि ' इति संप्रसारणे लटि रूपम् । मध्वः । मधुशब्दः ' फलिपाटि° ' इत्यादिना उन्प्रत्ययान्तः । आगमानुशासनस्यानित्यत्वान्नुमभावः । संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः । यणादेशः । अन्धसः । ' अदेर्नुम् धश्च ' इत्यसुन् । निस्स्वरः ॥

ब्राह्मणाच्छंसिनः प्रातःसवने ' इन्द्र क्रतुविदम् ' इति शस्त्रयाज्या । सूत्रितं च—' इन्द्र क्रतुविदं सुतमिति याज्या ' (आश्व. श्रौ. ५. १०) इति ॥

---

१. त-न- अथ (न-तृतीयाष्टके) तृतीयाध्याय आरभ्यते । २. ख-ग-च-ज-ण-फ-अथ । ३. त-सोमरसम् । ४. ख-ग-च-ज-भ-देवाः परोक्षप्रिया इव हि देवाः । ५. ख-ग-च-ज-ण-आमन्त्रितत्वादाद्युदात्तत्वम् ।

इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत । पिबा वृषस्व तातृपिम् ॥ २ ॥

इन्द्र । क्रतुऽविदम् । सुतम् । सोमम् । हर्य । पुरुऽस्तुत । पिब । आ । वृषस्व । ततृपिम् ॥२॥

हे [v]इन्द्र [v]क्रतुविदं क्रतोः प्रज्ञाया लम्भकं [v]सुतम् अभिषुतमिमं [v]सोमं [v]हर्य पातुं कामयस्व । हे [v]पुरुष्टुत पुरुभिर्बहुभिः स्तुतेन्द्र [v]तातृपिं तर्पकमाप्यायनकारिणमिमं सोमं [v]पिब । पीतमिमं सोमम् [v]आ [v]वृषस्व जठरे सिञ्च । यथा नाभेरधो न पतति तथा धारयेति भावः ॥ हर्य । ' हर्य गतिकान्त्योः ' इत्यस्य लोटि रूपम् । निघातः । पुरुष्टुत । ' स्तुतस्तोमयोश्छन्दसि ' इति संहितायां षत्वम् । वृषस्व । ' वृष सेचने ' इत्यस्य लोटि रूपम् । आङ[1] उत्तरत्वात्[2] निघातः । ततृपिम् । ' तृप प्रीणने ' इत्यस्मात् ' छन्दसि सदादिभ्यो दर्शनात् ' (पा. सू. ३. २. १७१. २) इति किन् । तस्य लिङ्वद्भावात् द्विर्वचनादि । संहितायाम् ' अन्येषामपि ' इत्यभ्यासस्य दीर्घः । निस्वादाद्युदात्तः ॥

इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः । तिर स्तवान विश्पते ॥३॥

इन्द्र । प्र । नः । धितऽवानम् । यज्ञम् । विश्वेभिः । देवेभिः । तिर । स्तवान । विश्पते ॥ ३ ॥

हे [v]स्तवान स्तोतृभिः स्तूयमान [v]विश्पते विशां मरुतां पते हे [v]इन्द्र [v]विश्वेभिर्देवेभिः सर्वैः यजनीयैर्देवैः[3] सहितस्त्वं [v]धितावानम् । वन्यते संभज्यते इति वानं हविः । धितं निहितं हविर्यस्य तम् । संभृतहविष्कमित्यर्थः । अस्मदीयमिमं [v]यज्ञं [v]प्र [v]तिर प्रकर्षेण वर्धय । हविःस्वीकरणेन संपूर्णं कुरु इति भावः ॥ नः । ' उपसर्गाद्बहुलम् ' इति संहितायां णत्वम् । धितावानम् । ' डुधाञ् धारणपोषणयोः ' इत्यस्मान्निष्ठा । बहुव्रीहौ पूर्वपदस्वरः । तिर । तरतेर्व्यत्ययेन शः । प्रत्ययस्वरः । स्तवान । ' ष्टुञ् स्तुतौ ' । ' सम्यानच् स्तुवः ' इत्युपपदाभावेऽपि कर्मण्यानच्प्रत्ययः । आमन्त्रितत्वात् निघातः ॥

इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते । क्षयं चन्द्रास इन्दवः ॥४॥

इन्द्र । सोमाः । सुताः । इमे । तव । प्र । यन्ति । सत्ऽपते । क्षयम् । चन्द्रासः । इन्दवः ॥४॥

हे [v]सत्पते [v]इन्द्र [v]चन्द्रासः आह्लादयितारः [v]इन्दवः दीप्ताः [v]सुताः अभिषुताः [v]इमे अस्माभिर्दत्ताः [v]सोमाः [v]तव[4] [v]क्षयम् । क्षियन्ति निवसन्त्यन्नादीनि अत्रेति क्षयो जठरम् । [v]प्र [v]यन्ति प्रकर्षेण गच्छन्ति । तान् धारयेति भावः ॥ क्षयम् । ' क्षि निवासगत्योः ' इत्यस्मादधिकरणे घप्रत्ययः । प्रत्ययस्वरेण अन्तोदात्तत्वे[5] प्राप्ते ' क्षयो निवासे ' इत्याद्युदात्तत्वम् । चन्द्रासः । ' चदि आह्लादने दीप्तौ[6] च[7] ' । अस्मात् ' स्फायितञ्चि[8] ' इत्यादिना रक्प्रत्ययः । ' आज्जसेरसुक् ' इत्यसुक्[9] । प्रत्ययस्वरः । इन्दवः । ' उन्देरिच्चादेः ' (उ. सू. १. १२) इति उप्रत्ययः । ' नित् ' इत्यनुवृत्तेराद्युदात्तः ॥

१. ख-ग-च-ज-ण-भ-आदुत्तरत्वात् । २. ज-ण-यजनीयदेवैः । ३. ख-ग-च-न-भ-ल-स-' तव ' नास्ति । ४. ख-ग-ज-ण-न-भ-स-अन्तोदात्ते । ५. ख-ग-च-न-भ-ल-स-दीप्तौ; ज-ण-' दीप्तौ च ' नास्ति । ६. ल-इत्यसुगागमः ।

दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम् । तव व्रुक्षास इन्दवः ॥ ५ ॥

दधिष्व । जठरे । सुतम् । सोमम् । इन्द्र । वरेण्यम् । तव । व्रुक्षासः । इन्दवः ॥ ५ ॥

हे [v]इन्द्र [v]वरेण्यं सर्ववरणीयं [v]सुतम् अभिषुतं [v]सोमं [v]जठरे [v]दधिष्व धारय । [v]इन्दवः दीप्ता इमे सोमाः [v]तव [v]व्रुक्षासः । दिवि क्षियन्ति निवसन्तीति व्रुक्षासः । अतस्त्वं स्वभूतान्[1] तान् धारयेति भावः ॥ दधिष्व । दधातेर्लोटि रूपम् । ' आगमा अनुदात्ताः ' इतीटोऽनुदात्तत्वात् प्रत्ययस्वरः । वरेण्यम् । ' वृङ् संभक्तौ ' । ' वृङ एण्यः[2] ' इति[2] एण्यप्रत्ययः । वृषादित्वादाद्युदात्तः । व्रुक्षासः । क्षियतेः[3] ' अन्येभ्योऽपि दृश्यते ' इति डप्रत्ययः । कृदुत्तरपदस्वरः ॥ ॥१॥

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥६॥

गिर्वणः । पाहि । नः । सुतम् । मधोः । धाराभिः । अज्यसे ।

इन्द्र । त्वाऽदातम् । इत् । यशः ॥ ६ ॥

[v]गिर्वणः गीर्भिर्वननीय । तथा च यास्कः—' गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति ' (निरु. ६. १४) इति । तादृशेन्द्र [v]नः अस्मदीयं [v]सुतम् अभिषुतमिमं सोमं [v]पाहि पिब । यतः[4] [v]मधोः मदकरस्य सोमस्य [v]धाराभिः [v]अज्यसे सिच्यसे हे [v]इन्द्र [v]त्वादातमित् त्वया शोधितं विशदीकृतमेव [v]यशः अन्नमस्मासु भवति ॥ गिर्वणः । ' वन संभक्तौ ' इत्यस्मादसुन् । गिर उपधाया दीर्घाभावश्छान्दसः । ' आमन्त्रितस्य° ' इति पाष्टिकमाद्युदात्तत्वम् । पाहि । ' पा पाने ' इत्यस्माल्लोटि रूपम् । आमन्त्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । प्रत्ययस्वरः । त्वादातम् । ' दैप् शोधने ' । सत्यपि पकारे ' नानुबन्धकृतमनेजन्तत्वम् ' (परिभा. ७) इत्येजन्त एवायम् । ततः ' आदेचः° ' इत्यात्वम् । अस्मात् कर्मणि क्तः । ' दाधा घ्वदाप् ' इत्यत्र अदाप् इति प्रतिषेधेन घुसंज्ञाया अभावात् ' दो दद्घोः ' इति ददादेशो न भवति । त्वेति युष्मच्छब्दस्य तृतीया । ' कर्तृकरणे कृता बहुलम् ' इति समासः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः । यशः । ' अशू व्याप्तौ ' । ' अशेर्युट् च ' इत्यसुन् । तत्संनियोगेन धातोः[5] युडागमः । नित्त्वादाद्युदात्तः ॥

अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता । पीत्वी सोमस्य वावृधे ॥७॥

अभि । द्युम्नानि । वनिनः । इन्द्रम् । सचन्ते । अक्षिता । पीत्वी । सोमस्य । ववृधे ॥ ७ ॥

[v]वनिनः । वनं देवताविषयं संभजनमस्यास्तीति वनी[6] । तस्य देवान् संभजमानस्य यजमानस्य [v]द्युम्नानि द्योतमानानि [v]अक्षिता क्षयरहितानि संपूर्णानि सोमादीनि हवींषि [v]इन्द्रम् [v]अभि अभितः [v]सचन्ते समवयन्ति । तेषु मध्ये [v]सोमस्य [v]पीत्वी सोमं पीत्वा [v]वावृधे स इन्द्रो वर्धते ॥ वनिनः ।

१. ख-ग-च-ण-न-भ-स-' स्वभूतान् ' नास्ति । २. ख-ग-च-ज-ण-न-भ-स-' एण्यः इति ' नास्ति । ३. फ-क्षेः । ४. त-अतः । ५. ज-धातोः देवनेऽर्थे । ६. ख-ग-च-त-न-फ-भ-' वनी ' नास्ति ।

'अत इनिठनौ' इतीनिप्रत्ययः। तस्य स्वरः। सचन्ते। 'षच समवाये' इत्यस्य[1] लटि रूपम्। अक्षिता। 'क्षि क्षये' इत्यस्य निष्ठा। अत्र ण्यदर्थः[2] इति दीर्घाभावः। तस्मादेव 'क्षियो दीर्घात्' इति निष्ठानत्वाभावः[3]। नञा समासे तस्य स्वरः। पीत्वी। 'पा पाने' इत्यस्मात् क्त्वाप्रत्ययस्य 'स्नात्व्यादयश्च' इति निपातनात् त्वी इत्यादेशः। प्रत्ययस्वरः। 'घुमास्थागापा०' इत्यादिना ईत्वम्॥

अर्वावतो न आ गहि परावतश्च वृत्रहन्। इमा जुषस्व नो गिरः ॥८॥

अर्वाऽवतः। नः। आ। गहि। पराऽवतः। च। वृत्रऽहन्। इमाः। जुषस्व। नः। गिरः ॥८॥

हे [v]वृत्रहन् इन्द्र [v]अर्वावतः अर्वाचीनात् समीपादेशात्[4] [v]परावतः अतिदूरादेशात्[5] वा [v]नः अस्मानभिलक्ष्य [v]आ [v]गहि आगच्छ। आगत्य च [v]नः अस्मदीयाः [1]इमाः स्तुतिलक्षणाः [1]गिरः वाचः [v]जुषस्व सेवस्व॥ परावतः। 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिः। प्रत्ययस्वरः॥

यदन्तरा परावतमर्वावतं च हूयसे। इन्द्रेह तत आ गहि ॥९॥

यत्। अन्तरा। पराऽवतम्। अर्वाऽवतम्। च। हूयसे। इन्द्र। इह। ततः। आ। गहि ॥९॥

हे [v]इन्द्र [v]यत् यस्मिन् [v]परावतम् अतिविप्रकृष्टस्य देशस्य [v]अर्वावतं अतिसंनिकृष्टस्य[6] देशस्य [v]च [v]अन्तरा तयोर्मध्यदेशे [v]हूयसे सम्यगिज्यसे [v]ततः तस्मादेशात् [v]इह अस्मिन् यज्ञे [v]आ [v]गहि सोमपानार्थमागच्छ॥ परावतम् अर्वावतम्। 'अन्तरान्तरेण युक्ते' (पा. सू. २. ३. ४) इति द्वितीया। ततः। पञ्चम्यास्तसिल्। लित्स्वरः॥ ॥ २॥

'आ तू न इन्द्र' इति नवर्चं तृतीयं सूक्तं वैश्वामित्रं गायत्रमैन्द्रम्। 'आ तू नः' इत्यनुक्रान्तम्। अतिरात्रे द्वितीये पर्याये ब्राह्मणाच्छंसिशस्त्रे एतदादिके द्वे सूक्ते। सूत्रितं च—'आ तू न इन्द्र मद्यगिति सूक्ते' (आश्व. श्रौ. ६. ४) इति॥

आ तू न इन्द्र मद्यग्घुवानः सोमपीतये। हरिभ्यां याह्यद्रिवः ॥ १ ॥

आ। तु। नः। इन्द्र। मद्यक्। हुवानः। सोमऽपीतये। हरिऽभ्याम्। याहि। अद्रिऽवः ॥१॥

[v]अद्रिवः[7] वज्रिन्[7] हे [v]इन्द्र [v]हुवानः होतृभिराह्वयमानस्त्वं [v]मद्यक् मदभिमुखः सन् [v]नः अस्मदीये यज्ञे [v]सोमपीतये सोमपानार्थं [v]हरिभ्याम् अश्वाभ्यां सह [v]तु क्षिप्रम् [v]आ [1]याहि॥ तु। 'ऋचि तुनुघ०' इत्यादिना संहितायां दीर्घः। मद्यक्। मामञ्चतीति 'ऋत्विग्दधृक्०' इत्यादिना क्विन्। 'प्रत्ययोत्तरपदयोश्च' इत्यस्मच्छब्दस्यैकवचने मपर्यन्तस्य मादेशः। 'विश्वग्देवयोश्च टेरद्यञ्चतावप्रत्यये' इति टेः अद्रि इत्यादेशः। 'अद्रिसभ्योरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम्'

१. ज-ण-इत्यस्मात्। २. ख-ग-अण्यदर्थे। ३. ज-ण-निष्ठातस्य नत्वाभावः। ४. ख-ग-च-ज-ण-प-फ-भ-स-समीपदेशात्। ५. घ-ज-ण-स-अतिदूरदेशात्। ६. च-न-स-संनिकृष्टस्य। ७. ख-ग-च-न-फ-भ-ल-स-हे अद्रिवः हे वज्रिन्।

इति वचनात् अद्यादेशः अन्तोदात्तः । यणादेशे कृते ' उदात्तस्वरितयोर्यणः° ' इति यणः स्वरितत्वम् । ' क्विन्प्रत्ययस्य कुः ' इति कुत्वम् । सोमपीतये । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । अद्रिवः । ' मतुवसोः° ' इति रुत्वम् । आमन्त्रितत्वान्निघातः ॥

सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् । अयुज्रन्प्रातरद्रयः ॥ २ ॥

सत्तः । होता । नः । ऋत्वियः । तिस्तिरे । बर्हिः । आनुषक् । अयुज्रन् । प्रातः । अद्रयः ॥२॥

हे इन्द्र [v]नः अस्मदीये यज्ञे [v]होता ऋत्विक् तवाह्वानार्थम् [v]ऋत्वियः प्राप्तकालः सन् [v]सत्तः निषण्णो वर्तते । तथा [v]बर्हिरानुषक् अनुषक्तं परस्परसंबद्धं[1] यथा भवति तथा [v]तिस्तिरे हविःष्वासन्नेषु[2] स्तीर्णमभूत्[3] । तथा [v]प्रातः प्रातःसवने सोमाभिषवार्थम् [v]अद्रयः ग्रावाणः [v]अयुज्रन् परस्परं संगता अभूवन् । तस्मात् सोमपानार्थं त्वमागच्छेति भावः ॥ सत्तः । षद्लृ विशरणादिषु[4] इत्यस्मात् ' गत्यर्थाकर्मकश्लिष° ' (पा. सू. ३. ४. ७२) इत्यादिना कर्तरि क्तः । सर्वविधीनां छन्दसि विकल्पितत्वादत्र निष्ठातकारस्य नत्वाभावः । ऋत्वियः । ऋतुशब्दात् ' छन्दसि घस् ' इति घस्प्रत्ययः । घस्येयादेशः । ' सिति° ' इति पदसंज्ञायाम् ' ओर्गुणः ' इति भसंज्ञाधीनो गुणो न भवति । यणादेशः । प्रत्ययस्वरः । तिस्तिरे । ' स्तृञ् आच्छादने ' इत्यस्य कर्मणि लिटि ' ऋत इद्धातोः ' इतीत्वम् । द्विर्वचने ' शर्पूर्वाः खयः ' इति तकारस्य शेषः । ' लिटस्तझयोरेशिरेच् ' इति तप्रत्ययस्य एश् इत्यादेशः । पादादित्वादनिघातः । प्रत्ययस्वरः । आनुषक् । ' षञ्ज संगे ' । क्विप् । ' अनिदिताम्° ' इति नलोपः । आङन्वोरुपसर्गयोः प्राक् प्रयोगः । गतिसमासः । कृदुत्तरपदस्वरः । अयुज्रन् । ' युजिर् योगे ' इत्यस्य लुङि ' च्लेः ' इतो वा ' इत्यङादेशः । ' बहुलं छन्दसि ' इति रुडागमः । पादादित्वादनिघातः । अडागमस्वरः ॥

इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद । वीहि शूर पुरोळाशम् ॥ ३ ॥

इमा । ब्रह्म । ब्रह्मऽवाहः । क्रियन्ते । आ । बर्हिः । सीद । वीहि । शूर । पुरोळाशम् ॥३॥

[v]ब्रह्मवाहः[4] । ब्रह्माणि[5] स्तोत्राणि स्तुत्यतया वहतीति ब्रह्मवाहा ब्रह्मणा स्तोत्रेण प्राप्यते इति वा । हे स्तुत्य[5] इन्द्र तुभ्यम्[5] [v]इमा इमानि [v]ब्रह्म ब्रह्माणि स्तोत्राणि अस्माभिः [v]क्रियन्ते । अतः [v]बर्हिः [v]आ [v]सीद स्तुत्यतया बर्हिषि यज्ञे उपविश । हे [v]शूर समर्थेन्द्र अस्माभिर्दीयमानमिमं [v]पुरोडाशं पुरोडाशाख्यं हविः [v]वीहि भक्षय ॥ ब्रह्मवाहः । ' वह प्रापणे ' इत्यस्मात् ' वहिहाधाभ्यश्छन्दसि ' इत्यसुन् । ' णित् ' इत्यनुवृत्तेरुपधावृद्धिः । आमन्त्रितत्वान्निघातः । क्रियन्ते । करोतेः कर्मणि यक् । ' रिङ् शयग्लिङ्क्षु ' इति रिङादेशः । प्रत्ययस्वरः । पादादित्वादनिघातः । बर्हिः । कालाध्वनोरत्यन्तसंयोगे द्वितीया । वीहि । वी कान्त्यादिषु । लोटि रूपम् । हेर्डित्वादुदात्तः । पुरोळाशम् । ' दाश्र दाने ' इत्यस्मात् पुरस्पूर्वात् ' मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ' (पा. सू. ३. २. ७१) । पुरो दाशन्त एनमिति । निपातनाद्दकारस्य ळकारः । कृदुत्तरपदस्वरः ॥

१. ग–परस्परं संबद्धम्; ज-ण–परस्परं संबद्धम् । २. ख-ग-च-ज-ण-न-भ–सत्रेषु स्तीर्णम् । ३. ज-ण–विशरणे । ४. न-ल-स–ब्रह्माणि; फ-भ–ब्रह्मवाहा ब्रह्माणि । ५. ख-ग-च-न-फ-भ–स्तुत्य; ल–ब्रह्मवाह इन्द्र !

रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन् । उक्थेष्विन्द्र गिर्वणः ॥ ४ ॥

ररन्धि । सवनेषु । नः । एषु । स्तोमेषु । वृत्रऽहन् । उक्थेषु । इन्द्र । गिर्वणः ॥ ४ ॥

हे [v]गिर्वणः गीर्भिः स्तुतिभिर्वननीय [v]वृत्रहन् वृत्रस्य हन्तर्हे [v]इन्द्र [v]नः अस्माकं संबन्धिषु त्रिषु[1] [v]सवनेषु [v]एषु क्रियमाणेषु [v]स्तोमेषु स्तोत्रेषु [v]उक्थेषु शस्त्रेषु[2] च [v]रारन्धि रमस्व ॥ रारन्धिः । रमतेर्लोटि ' बहुलं छन्दसि ' इति शपः श्लुः । ' छन्दस्युभयथा ' इति हेरार्धधातुकत्वेनाङित्वात् ' अङितश्च ' इति हेर्धिः । सवनेषु । सूयते सोमो येष्विति अधिकरणे सुनोतेर्युट् । लित्स्वरः । णः । नसो नकारस्य ' नश्च धातुस्थोरुषुभ्यः ' इति संहितायां णत्वम् ॥

मतयः सोमपामुरुं रिहन्ति शवसस्पतिम् । इन्द्रं वत्सं न मातरः ॥ ५ ॥

मतयः । सोमऽपाम् । उरुम् । रिहन्ति । शवसः । पतिम् । इन्द्रम् । वत्सम् । न । मातरः ॥५॥

हे इन्द्र [v]मतयः अस्माभिः क्रियमाणाः स्तुतयः [v]उरुं महान्तं [v]सोमपां सोमस्य पातारं [v]शवसः बलस्य [v]पतिम् [v]इन्द्रं त्वां [v]रिहन्ति लिहन्ति । तत्र दृष्टान्तः । [v]वत्सं [v]न । यथा वत्सं [v]मातरः धेनवो लिहन्ति तद्वत् ॥ मतयः । ' मन ज्ञाने ' इत्यस्मात् कर्मणि ' मन्त्र वृष° ' इत्यादिना क्तिन्नुदात्तः । उरुम् । ' ऊर्णुञ् आच्छादने ' इत्यस्मात् महत्यर्थे गम्यमाने ' महति ह्रस्वश्च ' (उ. सू. १. ३२) इति कुप्रत्ययो धातोर्ह्रस्वश्च । प्रत्ययस्वरः । रिहन्ति । ' लिह आस्वादने ' इत्यस्य लटि रूपम् । रलयोरभेदः । प्रत्ययस्वरः । शवसस्पतिमिति संहितायां ' षष्ठ्याः पतिपुत्रपृष्ठ° ' इत्यादिना ' विसर्जनीयस्य सत्वम् । वत्सम् । ' वद व्यक्तायां वाचि ' । अस्मात् ' वृतृवदिहनि° ' इत्यादिना सप्रत्ययः । वदत्यभीक्ष्णं मातरमिति वत्सो गोबालः । प्रत्ययस्वरः ॥ ॥ ३ ॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे । न स्तोतारं निदे करः ॥ ६ ॥

सः । मन्दस्व । हि । अन्धसः । राधसे । तन्वा । महे । न । स्तोतारम् । निदे । करः ॥६॥

हे इन्द्र [v]सः तथाविधस्त्वं [v]महे महते [v]राधसे धनाय [v]अन्धसः अस्माभिर्दीयमानस्य सोमस्य पानेन [v]तन्वा शरीरेण सह [v]मन्दस्व हृष्टो भव । हिः अत्र समुच्चयार्थः । किंच त्वं [v]स्तोतारं मां [v]निदे निन्दायै विषयभूतं [v]न [v]करः मा कार्षीः ॥ मन्दस्व । मदि स्तुत्यादिषु इत्यस्य लोटि रूपम् । ' हि च ' इति निघातप्रतिषेधेन भवितव्यमिति चेन्न[4] । तत्र ' अप्रातिलोम्ये ' इति वर्तते । अत्र हेः समुच्चयार्थत्वान्निघातः । तन्वा । ' उदात्तस्वरितयोः ' इति स्वरितत्वम् । महे । तकारलोपश्छान्दसः । ' बृहन्महतोरुपसंख्यानम् ' इति विभक्तेरुदात्तत्वम् । निदे । ' णिदि कुत्सायाम् ' इत्यस्मात् संपदादिलक्षणो भावे क्विप् । आगमानुशासनस्यानित्यत्वान्नुमभावः । ' सावेकाचः° ' । इति विभक्तेरुदात्तत्वम् । करः । करोतेर्लुङि च्लेः ' कृमृदृरुहिभ्यश्छन्दसि ' इत्यङादेशः । निघातः ॥

---

१. ख-ग-च-न-भ-स-' त्रिषु ' नास्ति । २. ख-ग-च-न-भ-स-' शस्त्रेषु ' नास्ति । ३. ख-ग-च-त-भ-स-ररन्धि । ४. ख-ग-ज-ण-त-न-चेत् ।

वयमिन्द्र त्वायवो हविष्मन्तो जरामहे । उत त्वमस्मयुर्वसो ॥ ७ ॥

वयम् । इन्द्र । त्वाऽयवः । हविष्मन्तः । जरामहे । उत । त्वम् । अस्मऽयुः । वसो इति ॥७॥

हे [v]इन्द्र [v]त्वायवः यज्ञार्थं त्वामात्मन इच्छन्तस्त्वत्कामाः सन्तः [v]हविष्मन्तः संभृतहविष्काः [v]वयं [v]जरामहे त्वां स्तुमः । हे [v]वसो सर्वस्य वासक इन्द्र [v]उत [v]त्वम् अपि [v]अस्मयुः हविःस्वीकरणार्थम् अस्मानात्मन इच्छन् भव ॥ त्वायवः । त्वामिच्छन्तीत्यर्थे ' सुप आत्मनः क्यच् ' । ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः । ' वयश्छन्दसि ' इत्युप्रत्ययः । त्वद्यव इति प्राप्तौ ' युष्मदस्मदोरनादेशे ' इत्यविभक्तादपि इलादौ स्त्रत्ययेनात्वम् । प्रत्ययस्वरः । हविष्मन्तः । ' तसौ मत्वर्थे ' इति भसंज्ञायां सकारस्य रुत्वाभावः । ' स्वरविधौ व्यञ्जनमविद्यमानवत् ' इति परिभाषानाश्रयणात् मतुप उदात्तताभावः । इसिप्रत्ययस्वरः । जरामहे । ' जरतिः स्तुतिकर्मा ' इति यास्कः । अस्मयुः । अस्मानिच्छतीत्यर्थे सुपः क्यच् । तस्मादुप्रत्ययः । पूर्वपदान्तलोपश्छान्दसः । प्रत्ययस्वरः ॥

मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ् याहि । इन्द्र स्वधावो मत्स्वेह ॥ ८ ॥

मा । आरे । अस्मत् । वि । मुमुचः । हरिऽप्रिय । अर्वाङ् । याहि ।

इन्द्र । स्वधाऽवः । मत्स्व । इह ॥ ८ ॥

हे [v]हरिप्रिय हरी अश्वौ प्रियौ यस्य तादृश हे इन्द्र [v]अस्मत् अस्मत्तः [v]आरे दूरे रथे योजितावश्वौ [v]मा [v]वि [v]मुमुचः मा विमोचय । ताभ्यामुपेत एव [v]अर्वाङ् अस्मदभिमुखेन [v]याहि आगच्छ[1]। हे [v]स्वधावः सोमलक्षणान्नवन्* [v]इन्द्र [v]इह अस्मिन् देवयजने [v]मत्स्व सोमं पीत्वा हृष्टो भव[1] ॥ अस्मत् । अस्मच्छब्दस्य पञ्चमीबहुवचनस्य ' पञ्चम्या अत् ' (पा. सू. ७. १. ३१) इत्यदादेशः । मुमुचः । ' मुच्लृ मोक्षणे ' इत्यस्य ण्यन्तस्य छान्दसे लुङि चङि रूपम् । अभ्यासस्य दीर्घाभावश्छान्दसः । ' न माङ्योगे ' इत्यडभावः । निघातः । हरिप्रिय । आमन्त्रितस्य पादादित्वात् पाष्टिकमाद्युदात्तत्वम् । मत्स्व । मदि स्तुत्यादिषु इत्यस्य लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । आमन्त्रितस्याविद्यमानत्वेन पादादित्वादनिघातः ॥

अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना । घृतस्नू बर्हिरासदे ॥ ९ ॥

अर्वाञ्चम् । त्वा । सुऽखे । रथे । वहताम् । इन्द्र । केशिना ।

घृतस्नू इति घृतऽस्नू । बर्हिः । आऽसदे ॥ ९ ॥

१. च-फ-आगच्छ । आगत्य इह अस्मिन् यज्ञे स्वधावः हे स्वधावन् इन्द्र मत्स्व मन्दस्व ।
*. ज-सवनीयपुरोडाशादिरूपमन्नं तद्वन् ।

हे [v]इन्द्र [v]घृतस्नू श्रमजनितजलप्रस्रवणयुक्तौ [v]केशिना केशिनौ स्कन्धप्रदेशे लम्बमानकेशयुक्तौ हरी [v]आसदे आसदनीयं[1] [v]बर्हिः अभिलक्ष्य [v]सुखे सुखकरे [v]रथे [v]अर्वाञ्चम् अस्मदभिमुखं [v]त्वा त्वां [v]वहताम् ॥ अर्वाञ्चम् । अञ्चतेः क्विनि ' उगिदचाम्[2] ' इति नुम् । वहताम् । वहेर्लोटि रूपम् । तसो लसार्वधातुकस्वरे कृते धातुस्वरः । आसदे । सदेः कृत्यार्थे केन्प्रत्ययः । नित्स्वरः । कृदुत्तरपद प्रकृतिस्वरः ॥ ॥ ४ ॥

' उप नः सुतम् ' इति नवर्चं चतुर्थं सूक्तं वैश्वामित्रं गायत्रमैन्द्रम् । ' उप नः ' इत्यनुक्रमणिका । पूर्वसूक्तेन सहोक्तो विनियोगः ॥

उप॑ नः सु॒तमा ग॑हि॒ सोम॑मिन्द्र॒ गवा॑शिरम् । हरि॑भ्यां॒ यस्ते॑ अस्म॒युः ॥१॥

उप॑ । नः॒ । सु॒तम् । आ । ग॒हि॒ । सोम॑म् । इ॒न्द्र॒ । गोऽआ॑शिरम् ।

हरि॑ऽभ्याम् । यः । ते॒ । अ॒स्म॒ऽयुः ॥ १ ॥

हे [v]इन्द्र [v]नः अस्मदीयं [v]सुतम् अभिषुतं [v]गवाशिरं पयसा मिश्रितं [v]सोमं प्रति [v]उप [v]आ [v]गहि समीप आगच्छ । यतः [v]हरिभ्याम् अश्वाभ्यां युक्तः [1]ते[2] तव[3] रथः [v]अस्मयुः अस्मान् कामयमानो वर्तते ॥ गवाशिरम् । आङ्पूर्वस्य श्रीणातेः क्विपि ' अपस्पृधेथामानृचुः[4] ' (पा. सू. ६. १. ३६) इत्यादिनाशिर इत्यादेशः । बहुव्रीहौ पूर्वपदस्वरः ॥

तमिन्द्र॑ मद॒मा ग॑हि ब॒र्हिःष्ठां ग्रा॒वभिः॑ सु॒तम् । कु॒विन्नु॑ अ॒स्य॑ तृ॒प्णवः॑ ॥ २ ॥

तम् । इ॒न्द्र॒ । म॒द॒म् । आ । ग॒हि॒ । ब॒र्हिः॒ऽस्थाम् । ग्रा॒वऽभिः॑ । सु॒तम् ।

कु॒वित् । नु । अ॒स्य॒ । तृ॒प्णवः॑ ॥ २ ॥

हे [v]इन्द्र [v]ग्रावभिः [v]सुतम् अभिषुतं [v]बर्हिःष्ठां बर्हिषि स्थितं [v]मदम् । माद्यते[1] अनेनेति मदः सोमः । [v]तम् इमं[2] सोमम्[3] [v]आ [v]गहि आगच्छ । [v]कुवित् प्रभूतं यथा भवति तथा [v]अस्य सोमस्य पानेन[4] [v]नु क्षिप्रं [v]तृप्णवः तृप्तो भव ॥ मदम् । ' मदी हर्षे ' । ' मदोऽनुपसर्गे ' इत्यप्प्रत्ययः । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । बर्हिःष्ठाम् । ' ष्ठा गतिनिवृत्तौ ' । क्विप् । संहितायां पूर्वपदसकारस्य ' आदेशप्रत्यययोः ' इति षत्वम् । ष्टुत्वम् । कृदुत्तरपदस्वरः । तृप्णवः । ' तृप प्रीणने ' इत्यस्य लेड्यडागमः । कुवित्योगादनिघातः । क्षुभ्नादिषु[5] ' नृनमन तृप्नोति[6] ' इति पठितम् । तथापि सर्वविधीनां छन्दसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति । प्रत्ययस्वरः ॥

इन्द्रं॒मित्था गिरो॒ ममाच्छा॑गुरिषि॒ता इ॒तः । आ॒वृ॒ते सोम॑पीतये ॥ ३ ॥

इन्द्र॑म् । इ॒त्था । गिरः॑ । मम॑ । अच्छ॑ । अ॒गुः॒ । इ॒षि॒ताः । इ॒तः ।

आ॒ऽवृ॒ते । सोम॑ऽपीतये ॥ ३ ॥

१. ल–आसादनीयम् । २. न-ल-स–तव; प–यः ते तव । ३. न-ल-स–मद्यते । ४. ख-ग-ज-ण-भ–सोममिमम्; घ–तं मदं सोमम्; ल-स–सोममिमं सोमम् । ५. न-स–पाने । ६. च–यद्यपि क्षुभ्नादिषु ।

हे इन्द्र [v]इषिताः स्वदर्थं प्रेरिताः [v]इत्था इत्थमनेन प्रकारेण उच्यमानाः [v]मम [v]गिरः स्तुतिलक्षणा वाचः [v]इन्द्रं त्वाम् [v]इतः अस्माद्देवयजनदेशात् [v]अच्छागुः आभिमुख्येन गच्छन्तु । किमर्थम् । [v]सोमपीतये सोमपानार्थम् [v]आवृते त्वामावर्तयितुम् ॥ इत्था । इदंशब्दात् ' था हेतौ च छन्दसि ' इति व्यत्ययेन थाप्रत्ययः । इदमः ' एतेतौ रथोः ' इति इदित्यादेशः । प्रत्ययस्वरः । अच्छ । ' अच्छ गत्यर्थवदेषु ' इति गतिसंज्ञा । अगुः । ' इण् गतौ ' इत्यस्य लुङि रूपम् । निघातः ॥

इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे । उक्थेभिः कुविदागमत् ॥ ४ ॥

इन्द्रम् । सोमस्य । पीतये । स्तोमैः । इह । हवामहे । उक्थेभिः । कुवित् । आऽगमत् ॥४॥

[v]स्तोमैः त्रिवृत्पञ्चदशादिस्तोमसाध्यैः स्तोत्रैः [v]उक्थैः उक्थैः इत्थं च [v]इह कर्मणि [v]सोमस्य [v]पीतये सोमपानार्थम् [v]इन्द्रं[1] [v]हवामहे वयमाह्वयामः । [v]कुवित् बहुवारमाहूतः स इन्द्रः [v]आगमत् यज्ञं प्रत्यागच्छतु ॥ आगमत् । गमेर्लेटयडागमः । ' आगमा अनुदात्ताः ' इत्यटोऽनुदात्तत्वात् धातुस्वरः । ' तिङि चोदात्तवति ' इति गतेर्निघातः । कुविद्योगादनिघातः ॥

इन्द्र सोमाः सुता इमे तान्दधिष्व शतक्रतो । जठरे वाजिनीवसो ॥ ५ ॥

इन्द्र । सोमाः । सुताः । इमे । तान् । दधिष्व । शतक्रतो इति शतऽक्रतो ।

जठरे । वाजिनीवसो इति वाजिनीऽवसो ॥ ५ ॥

हे [v]शतक्रतो [v]इन्द्र [v]इमे [v]सोमाः [v]सुताः ग्रावभिस्त्वदर्थमभिषुताः। हे [v]वाजिनीवसो अन्नधन[2] । यद्वा । वाजोऽन्नमासु फलत्वेनास्तीति वाजिन्यः क्रियाः । तासां[3] वासक हे इन्द्र [v]तान् सोमरसान् [v]जठरे [v]दधिष्व धारय ॥ वाजिनीवसो । वाजशब्दात् मत्वर्थे ' अत इनिठनौ ' इति इनिप्रत्ययः । ' ऋन्नेभ्यो ङीप् ' इति ङीप् । तासां वसो । ' संबुद्धौ च ' इति गुणः । आमन्त्रितत्वादाष्टमिकमनुदात्तत्वम् ॥ ॥ ५ ॥

विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ॥ ६ ॥

विद्म । हि । त्वा । धनम्ऽजयम् । वाजेषु । दधृषम् । कवे । अध । ते । सुम्नम् । ईमहे ॥६॥

हे [v]कवे क्रान्तदर्शिन्निन्द्र [v]वाजेषु युद्धेषु [v]दधृषं शत्रूणामभिभवितारम् अत एव [v]धनंजयम् । धनं जयतीति धनंजयः । तादृशं [v]त्वा त्वां [v]विद्म [v]हि जानीमः खलु । [v]अध अनन्तरं [v]ते तव [v]सुम्नं धनम् [v]ईमहे याचामहे ॥ विद्म । विदेर्लटि ' विदो लटो वा ' इति मसो मादेशः । पादादित्वात् अनिघातः[4]। धनंजयम् । ' जि जये ' इत्यस्मात् धने[5] उपपदे ' संज्ञायां भृतृवृजिधारिसहितपिदमः '

---

१. ख-ग-च-ज-ण-फ-भ-इन्द्रं त्वाम् । २. च-सेनाधन । ३. ख-ग-च-ज-ण-वसो । ४. ज-अनिघातः । ध्रुवोऽस्तिङः इति दीर्घः । ५. ज-ण-धनशब्दे ।

इति खच्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' इति पूर्वपदस्य मुमागमः। चित्त्वादन्तोदात्तः। दृषत्पम्। 'जिघृषा प्रागल्भ्ये' इत्यस्य यङ्लुकि अभ्यासस्य रीगभावश्छान्दसः। तदन्तात् पचाद्यच् 'यङोऽचि च' इति यङो लुक्। लघूपधगुणे प्राप्ते 'न धातुलोपे०' इति तस्य प्रतिषेधः। चित्त्वादन्तोदात्तः॥

इममिन्द्र गवाशिरं यवाशिरं च नः पिब। आगत्या वृषभिः सुतम् ॥ ७ ॥

इमम्। इन्द्र। गोऽआशिरम्। यवऽआशिरम्। च। नः। पिब।

आऽगत्य। वृषऽभिः। सुतम्॥ ७ ॥

हे [v]इन्द्र [v]गवाशिरं गव्यमिश्रणोपेतं[1] तथा [v]यवाशिरं[2] यवमिश्रणोपेतं [v]वृषभिः ग्रावभिः [v]सुतम् अभिषुतं [v]नः अस्मदीयम् [v]इमं सोमं देवयजनम् [v]आगत्य [v]पिब॥ गवाशिरं यवाशिरमित्यत्र आङ्पूर्वस्य श्रीणातेः क्विपि 'अपस्पृधेथामानृचुः' इत्यादिनाशिर इत्यादेशः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

तुभ्येदिन्द्र स्व ओक्ये[3] सोमं चोदामि पीतये। एष रारन्तु ते हृदि ॥ ८ ॥

तुभ्य। इत्। इन्द्र। स्वे। ओक्ये। सोमम्। चोदामि। पीतये।

एषः। ररन्तु[4]। ते। हृदि॥ ८ ॥

हे [v]इन्द्र [v]तुभ्येत् तुभ्यमेव [v]पीतये पानार्थं [v]स्वे स्वकीये [v]ओक्ये स्थाने जठरेऽभिषुतमिमं [v]सोमं [v]चोदामि प्रेरयामि। [v]एषः पीतः सोमः [v]ते तव [v]हृदि हृदये [v]ररन्तु[4] अत्यर्थं रमताम्॥ तुभ्य। युष्मच्छब्दस्य चतुर्थ्येकवचने 'तुभ्यमह्यौ०' इति तुभ्यादेशः। 'सुपां सुलुक्०' इति सुपो लुक्। 'ङयि च' इत्याद्युदात्तः। ओक्ये। वस्वादित्वात् स्वार्थिको यत्प्रत्ययः। तित्स्वरितः। चोदामि। 'चुद प्रेरणे'। ण्यन्तस्य लटि रूपम्। 'बहुलमन्यत्रापि' इति णेर्लुक्। निघातः। ररन्तु[4]। 'रमु क्रीडायाम्' इत्यस्य यङ्लुकि लोटि सर्वविधीनां छन्दसि विकल्पितत्वात् अत्राभ्यासस्य नुमभावः। संहितायाम् 'अन्येषामपि०' इत्यभ्यासस्य दीर्घः। निघातः। हृदि। हृदयशब्दस्य 'पद्दोमास्हृत्०' इत्यादिना हृदादेशः। 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम्॥

त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे। कुशिकासो अवस्यवः ॥ ९ ॥

त्वाम्। सुतस्य। पीतये। प्रत्नम्। इन्द्र। हवामहे। कुशिकासः। अवस्यवः॥ ९ ॥

हे [v]इन्द्र [v]अवस्यवः त्वत्तो रक्षणमिच्छन्तः [v]कुशिकासः कुशिकगोत्रोत्पन्ना वयं [v]सुतस्य ग्रावभिरभिषुतस्य सोमस्य [v]पीतये पानार्थं [v]प्रत्नं पुरातनं [v]त्वां [v]हवामहे स्तुतिलक्षणाभिर्गीर्भिः

१. घ-ल-गव्यमिश्रणोपेतं सोमम्। २. ख-ग-च-ज-ण-न-भ-स-'यवाशिरं' नास्ति। ३. ज-ण-रारन्तु। ४. ज-ण-रारन्तु।

आह्वयामः ॥ पीतये । ' स्थागापापचो भावे ' इति क्तिन् । ' हिष्ठवत्सरतिशस्थान्तानाम् ' (फि. सू. ७) इत्यन्तोदात्तत्वम् । हवामहे । ह्वयतेर्लटि ' बहुलं छन्दसि ' इति संप्रसारणे रूपम् । अवस्यवः । अव इच्छन्तीत्यर्थे सुपः क्यच् । ' क्याच्छन्दसि ' इत्युप्रत्ययः । कुशिकासो अवस्यवः इत्यत्र संहितायाम् ' अव्यादवद्यात्° ' (पा. सू. ६. १. ११६) इत्यादिना एडः प्रकृतिभावः ॥ ॥ ६ ॥

' आ याह्यर्वाङ् ' इत्यष्टर्चं पञ्चमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' आ याह्यष्टौ ' इत्यनुक्रमणिका । दशरात्रे चतुर्थेऽहनि स्तोमवृद्धौ माध्यंदिने सवनेऽच्छावाकशस्त्रे स्तोमाभिशंसनार्थमिदं सूक्तम् । सूत्रितं च—' आ याह्यर्वाङित्यष्टर्चान्यावपेरन् ' (आश्व. श्रौ. ७ १२) इति । महाव्रतेऽपि आवपनीयम्[1] ॥

आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् ।
प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते ॥ १ ॥

आ । याहि । अर्वाङ् । उप । वन्धुरेऽस्थाः । तव । इत् । अनु । प्रऽदिवः । सोमऽपेयम् ।
प्रिया । सखाया । वि । मुच । उप । बर्हिः । त्वाम् । इमे । हव्यऽवाहः । हवन्ते ॥ १ ॥

हे इन्द्र [v]वन्धुरेष्ठाः । वन्धुरशब्देन ईषाद्वयसंबन्धस्थानम्[2] अभिधीयते । तेन तद्विशिष्टो रथो लक्ष्यते । तस्मिन् रथे निष्ठंस्वम् [v]अर्वाङ् अस्मदभिमुखः सन् [v]आ[3] अभिलक्ष्य[3] [v]उप[4] [v]याहि[4] समीप आगच्छ । [v]प्रदिवः प्रत्नं पूर्वकमागतं [v]तवेत् तवैव संबन्धि [v]सोमपेयं सोमपानं त्वम् [v]अनु उद्दिश्य [v]प्रिया तव प्रियतमौ [v]सखाया समानख्यानावश्वौ [v]बर्हिः [v]उप बर्हिषः समीपे [v]वि [v]मुच विमुञ्च । [v]हव्यवाहः । हव्यं वहन्तीति[5] हव्यवाहः । [v]इमे ऋत्विजः [v]त्वां [v]हवन्ते सोमपानार्थमाह्वयन्ति । तस्मात् आगच्छेति भावः ॥ वन्धुरेष्ठाः । तिष्ठतेर्विच् । ' तत्पुरुषे कृति बहुलम् ' इति सप्तम्या अलुक् । प्रदिवः । सकारान्तमव्ययम् । सोमपेयम् । ' पा पाने ' इत्यस्य भावे ' अचो यत् ' इति यत्प्रत्ययः । ' ईद्यति ' इतीत्वम् । आर्धधातुकलक्षणो गुणः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । समासे कृदुत्तरपदस्वरः । मुच । मुञ्चतेर्लोटि आगमानुशासनस्यानित्यत्वान्नुमभावः ॥

आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम् ।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः ॥ २ ॥

आ । याहि । पूर्वीः । अति । चर्षणीः । आ । अर्यः । आऽशिषः । उप । नः । हरिऽभ्याम् ।
इमाः । हि । त्वा । मतयः । स्तोमऽतष्टाः । इन्द्र । हवन्ते । सख्यम् । जुषाणाः ॥ २ ॥

---

१. न–आवपनीयमिदम् । तथा पञ्चमारण्यके सूत्रं ते अन्तरेणायाह्यर्वाङ् उपवन्धुरेष्ठा इति । २. च-फ-भ–ईषाद्वयसंबद्धस्थानम् । ३. ख-ग-घ-ज-ण-त-न-प-भ-ल-स–अनु अभिलक्ष्य; च-फ–प्रदिवः द्युलोकात । ४. घ-च-ज-ण-न–उपायाहि । ५. च-फ–वाहयन्तीति ।

हे [v]इन्द्र [v]पूर्वीः सर्वाः [v]चर्षणीः प्रजाः [v]अति [v]आ [v]याहि अतिक्रम्यागच्छ । द्वितीय[1] आङ् पूरणः[1] । [v]अर्यः अस्माकं स्वामी त्वं [v]नः [v]आशिषः त्वमत्रागत्य सोमं पिबेत्येवमादिका अस्माकं प्रार्थनाः [v]हरिभ्याम् अश्वाभ्यां युक्तः सन् [v]उप आगच्छ । किंच ते तव [v]सख्यं [v]जुषाणाः सेवमानाः [v]स्तोमतष्टाः स्तोमकारिभिः स्तोतृभिः कृताः [v]इमाः [v]मतयः स्तुतयः [v]हवन्ते सोमपानार्थं [v]त्वा[2] त्वामाह्वयन्ति । [v]हि प्रसिद्धौ । करणे कर्तृव्यापारः । काष्ठानि पचन्तीतिवत्*॥ आ । संहितायाम् 'आडोऽनुनासिकश्छन्दसि' इत्यनुनासिकः । अर्यः । 'ऋ गतौ' । 'अर्यः स्वामिवैश्ययोः' इति निपातनात् यत्प्रत्ययः । 'यतोऽनावः' इत्याद्युदात्तत्वे प्राप्ते 'अर्यस्य स्वाम्याख्या चेत्' (फि. सू. १७) इत्यन्तोदात्तत्वम् । आशिषः । क्विपि 'शास इदङ्हलोः' इत्युपधाया इत्वम् । 'शासिवसिघसीनां च' इति षत्वम् । स्तोमतष्टाः । 'तक्षू त्वक्षू तनूकरणे' इत्यस्मात् कर्मणि क्तः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः॥

आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम् ॥ ३ ॥

आ । नः । यज्ञम् । नमःऽवृधम् । सऽजोषाः । इन्द्र । देव । हरिऽभिः । याहि । तूयम् ।
अहम् । हि । त्वा । मतिऽभिः । जोहवीमि । घृतऽप्रयाः । सधऽमादे । मधूनाम् ॥ ३ ॥

[v]देव द्योतमान हे [v]इन्द्र [v]नः अस्माकं [v]नमोवृधं नमसोऽन्नस्य वर्धकमिमं [v]यज्ञं [v]हरिभिः अश्वैः [v]सजोषाः सहप्रीतिः[3] त्वं [v]तूयं क्षिप्रम् [v]आ [v]याहि । [v]घृतप्रयाः । घृतसहितानि प्रयांस्यन्नरूपाणि हवींषि यस्य स तथोक्तः । तादृशः [v]अहं [v]मधूनां सोमानां [v]सधमादे । सह माद्यन्ति यत्र सोमे इति सधमादः । तस्मिन् स्थाने [v]मतिभिः स्तुतिभिः [v]त्वा त्वां [v]जोहवीमि [v]हि भृशमाह्वयामि खलु ॥ जोहवीमि । यङ्लुकि 'अभ्यस्तस्य च' इति संप्रसारणम् । 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः । 'यङो वा' इतीडागमः । हियोगादनिघातः । 'अभ्यस्तानामादिः' इत्याद्युदात्तः । घृतप्रयाः । 'घृ क्षरणदीप्त्योः' इत्यस्मात् 'अन्निघृसिभ्यः क्तः' इति क्तप्रत्ययः । बहुव्रीहौ पूर्वपदस्वरः ॥

आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वङ्गा ।
धानावदिन्द्रः सवनं जुषाणः सखा सख्युः शृणवद्वन्दनानि ॥ ४ ॥

आ । च । त्वाम् । एता । वृषणा । वहातः । हरी इति । सखाया । सुऽधुरा । सुऽअङ्गा ।
धानाऽवत् । इन्द्रः । सवनम् । जुषाणः । सखा । सख्युः । शृणवत् । वन्दनानि ॥ ४ ॥

१. ख-ग-च-ज-ण-त-न-भ-ल-स-'द्वितीय आङ् पूरणः' नास्ति । २. न-ल-'त्वां' नास्ति । * 'आह्वानकर्तृत्वं पुरुषेष्वेव न तु व्यापारभूतस्तुतौ । यथा पाककर्तृत्वं पुरुष एव न काष्ठेषु तथात्रेति' इत्ययं पाठः ज-पुस्तके टिप्पणीरूपेण दत्तः । ३. न-सहप्रीतः ।

हे इन्द्र [v]वृषणा सेचनसमर्थौ [v]सुधुरा शोभनया धुरान्वितौ [v]स्वङ्गा शोभनावयवोपेतौ [v]सखाया शोभनरूपौ [v]एता एतौ [v]हरी [v]त्वाम् [v]आ[१] [v]वहातः[१] यज्ञं प्रत्यागमनाय रथे त्वामावहतः। अथ[२] [v]धानावत् भृष्टयवोपेतं [v]सवनं [v]जुषाणः सेवमानः [v]सखा सखिभूतः सः [v]इन्द्रः [v]सख्युः स्तोतुर्मम [v]वन्दनानि स्तोत्राणि [v]शृणवत् [v]च[३] शृणुयात् ॥ वहातः। वहेर्लेटयाडागमे रूपम्। ' चवायोगे प्रथमा ' इति न निघातः। शृणवत्। ' श्रु श्रवणे ' इत्यस्य लेटयडागमे रूपम्। निघातः॥

कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन्।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥ ५ ॥

कुवित्। मा। गोपाम्। करसे। जनस्य। कुवित्। राजानम्। मघऽवन्। ऋजीषिन्।
कुवित्। मा। ऋषिम्। पपिऽवांसम्। सुतस्य। कुवित्। मे। वस्वः। अमृतस्य। शिक्षाः ॥५॥

हे इन्द्र [v]कुवित् अपि च [v]मा मां [v]जनस्य [v]गोपां गोप्तारं [v]करसे कुरु। तथा हे [v]मघवन् धनवन् [v]ऋजीषिन् सोमवन् हे इन्द्र मां[४] [v]राजानं सर्वस्य स्वामिनं कुरु। [v]कुवित् च [v]मा माम् [v]ऋषिम् अतीन्द्रियार्थस्य द्रष्टारं कुरु। ' ऋषिर्दर्शनात् ' (निरु. २. ११) इति यास्कः। तथा [v]सुतस्य अभिषुतस्य सोमस्य [v]पपिवांसं पातारं कुरु[५]। अपि च [v]मे मह्यम् [v]अमृतस्य क्षयरहितं [v]वस्वः वसु [v]शिक्षाः प्रयच्छ ॥ करसे। ' कृञ् करणे '। लेटयडागमे रूपम्। कुविद्योगादनिघातः। म ऋषिम् इत्यत्र संहितायाम् ' ऋत्यकः ' इति प्रकृतिभावो ह्रस्वश्च। पपिवांसम्। ' पा पाने ' इत्यस्य क्वसौ ' वस्वेकाजाद्घसाम् ' इतीडागमः। प्रत्ययस्वरः। शिक्षाः। शिक्षतिर्दानकर्मा। अस्मात् लेटयाडागमे रूपम्। कुविद्योगादनिघातः। ' आगमा अनुदात्ताः ' इत्याटोऽनुदात्तत्वे धातुस्वरः ॥

आ त्वा बृहन्तो हरयो युजाना अर्वाङिन्द्र सधमादो वहन्तु।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः ॥ ६ ॥

आ। त्वा। बृहन्तः। हरयः। युजानाः। अर्वाक्। इन्द्र। सधऽमादः। वहन्तु।
प्र। ये। द्विता। दिवः। ऋञ्जन्ति। आताः। सुऽसंमृष्टासः। वृषभस्य। मूराः ॥ ६ ॥

हे [v]इन्द्र [v]त्वा त्वां [v]बृहन्तः महान्तः [v]युजानाः रथे युज्यमानाः [v]हरयः अश्वाः [v]सधमादः सह मादयन्तः सन्तः [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]वहन्तु। [v]वृषभस्य कामानां वर्षितुरिन्द्रस्य [v]मूराः शत्रूणां मारकाः [v]सुसंमृष्टासः इन्द्रस्य हस्ताभ्यां पृष्ठभागे सुष्ठु संस्पृष्टाः [v]दिवः नभसः सकाशादागच्छन्तः [v]ये अश्वाः [v]आताः। आभिमुख्येन गम्यन्ते प्राणिभिरतस्तत्कार्यं प्रति इत्याताः दिशः[६]। सर्वा दिशः [v]द्विता। द्विधा[७] यथा भवति तथा [v]प्र [v]ऋञ्जन्ति प्रकर्षेण साधयन्ति॥ युजानाः। ' युजिर् योगे '। ' युजिबुधिदृशः किच्च ' (उ. सू. २. २४७) इत्यानच्[८]।

१. ल–आवहातश्च। २. त–अथ परोक्षस्तु। ३. ख-ग-च-न-फ-भ-ल–' च ' नास्ति। ४. ज–कुवित् मामू। ५. घ-ज-ण-कुवित् कुरु। ६. ख-ग-च-ज-ण-न-भ-स–' दिशः ' नास्ति। ७. घ-ल–द्वेधम्; स–द्विधम्। ८. ख-ग-ज-ण-त-भ-स–इति कित्त्वादानच्; च–कित्त्वम् आनचः; न–इति।

चित्त्वादन्तोदात्तः । सधमादः । ' मदी हर्षे ' इत्यस्मात्ण्यन्तात् क्विप् । कृदुत्तरपदस्वरः । द्विता । द्विशब्दात् ' संख्याया विधार्थे धा ' इति धाप्रत्ययः । धकारस्य तकारश्छान्दसः । प्रत्ययस्वरः । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । आताः । ' अत सातत्यगमने ' इत्यस्मात् कर्मणि घञ् । व्यत्ययेनाद्युदात्तः ॥

इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ॥ ७ ॥

इन्द्र । पिब । वृषऽधूतस्य । वृष्णः । आ । यम् । ते । श्येनः । उशते । जभार ।
यस्य । मदे । च्यवयसि । प्र । कृष्टीः । यस्य । मदे । अप । गोत्रा । ववर्थ ॥ ७ ॥

हे ᵛइन्द्र ᵛवृषधूतस्य ग्रावभिरभिषुतं ᵛवृष्णः अभिमतफलसेचकं सोमं ᵛपिब । ᵛश्येनः शंसनीयगतिः[1] छन्दोरूपः सुपर्णः ᵛउशते सोमं कामयमानाय ᵛते तुभ्यं ᵛयं सोमम् ᵛआ ᵛजभार आजहार । ᵛयस्य सोमस्य ᵛमदे हर्षे संजाते[2] सति ᵛकृष्टीः । आकर्षन्ति वशीकुर्वन्ति कर्मणा[3] सर्वान्[3] इति कृष्टयो मनुष्याः । तान् सपत्नभूतान्[4] मनुष्यान् ᵛप्र ᵛच्यावयसि प्रकर्षेण पातयसि । ᵛयस्य सोमस्य ᵛमदे संजाते सति ᵛगोत्रा । गामुदकं रश्मिभिरावृतं वर्षास्वृतुषु[5] त्रायन्ते पालयन्तीति गोत्रा मेघाः । तान् ᵛअप ᵛववर्थ अपावृणोषि ॥ वृषधूतस्य । ' धूञ् कम्पने ' इत्यस्य निष्ठायां ' यस्य विभाषा ' इतीट्प्रतिषेधः । ' तृतीया कर्मणि ' इति पूर्वपदस्वरः । श्येनः । ' श्यैङ् गतौ ' । ' शास्त्याहृज्रविभ्य इनच् ' (उ. सू. २. २०४) इतीनच्प्रत्ययः । श्यायते इति श्येनः । चित्त्वादन्तोदात्तः । जभार । हरतेर्लिटि णलि रूपम् । ' हृग्रहोर्भश्छन्दसि ' इति भकारः । यङ्लुत्तयोगादनिघातः । लित्स्वरः । मदे । ' मदी हर्षे ' । ' मदोऽनुपसर्गे ' इत्यप्प्रत्ययः । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । गोत्रा । ' त्रैङ् पालने ' इत्यस्य ' आतोऽनुपसर्गे कः ' इति कः । सुपो डादेशः । एकादेशस्वरः । ववर्थ । ' वृञ् वरणे ' इत्यस्य लिटि थलि ' ऋतो भारद्वाजस्य ' इतीट्प्रतिषेधः । गुणः । लित्स्वरः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ८ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥८॥

' शुनं हुवेम ' इत्येषा[6] व्याख्याता[6] ॥ ॥ ७ ॥

' अयं ते अस्तु ' इति पञ्चर्चं षष्ठं सूक्तं वैश्वामित्रं बार्हतमैन्द्रम् । अत्रानुक्रमणिका— ' अयं ते पञ्च बार्हतं तु ' इति । महाव्रते बार्हत्यां तृचाशीताविदं सूक्तम् (ऐ. आ. ५. २. ४) । षोडशिशस्त्रे

---

१. ख-ग-च-ण-भ–शंसनीयं गच्छतीति । २. ख-ग-च-भ–संज्ञाते । ३. ख-ग-च-ज–ण–कर्माणि सर्वाणि । ४. त-न-स–संपन्नभूतान् । ५. ख-ग-च-ज-ण-न-फ-भ–वर्षासु; त–वर्षाव्यतिरिक्तेषु वृतुषु । ६. ज-ण–इति पूर्ववत्; स–इति गतम् ।

' अयं ते अस्तु हर्यतः ' इत्याद्यस्तृचो विनियुक्तः । सूत्रितं च—' अयं ते अस्तु हर्यत इत्यौष्णिहबार्हतौ तृचौ ' (आश्व. श्रौ. ६. २) इति ॥

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥ १ ॥

अयम् । ते । अस्तु । हर्यतः । सोमः । आ । हरिऽभिः । सुतः ।
जुषाणः । इन्द्र । हरिऽभिः । नः । आ । गहि । आ । तिष्ठ । हरितम् । रथम् ॥ १ ॥

हे ᵛइन्द्र ᵛहरिभिः[1]। हरन्ति सोमरसानेभिः इति हरयो ग्रावाणः । तैः ᵛआ ᵛसुतः सर्वतोऽभिषुतः ᵛहर्यतः कमनीयः ᵛजुषाणः प्रीतिविषयः ᵛअयं ᵛसोमः ᵛते तुभ्यम् ᵛअस्तु । त्वं ᵛहरिभिः अश्वैर्युक्तं ᵛहरितं हरिद्वर्णं ᵛरथम् ᵛआ ᵛतिष्ठ अधितिष्ठ । ततः ᵛनः अस्मानभिलक्ष्य ᵛआ ᵛगहि आगच्छ । हर्यतः । ' हर्य गतिकान्त्योः ' इत्यस्मात् ' भृमृदृशि° ' इत्यादिना अतच्प्रत्ययः । चित्त्वादन्तोदात्तः । हरितम् । ' हृञ् हरणे ' । ' हृग्रहोर्भच्छन्दसि ' (उ. सू. ३. ३७३) इतीतन्प्रत्ययः । नित्त्वादाद्युदात्तः । रथम् । ' रमु क्रीडायाम् ' । ' हनिकुषिनी° ' इत्यादिना क्थन्प्रत्ययः । कित्त्वादनुनासिकलोपः । निरस्वरः ॥

हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।
विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥ २ ॥

हर्यन् । उषसम् । अर्चयः । सूर्यम् । हर्यन् । अरोचयः ।
विद्वान् । चिकित्वान् । हरिऽअश्व । वर्धसे । इन्द्र । विश्वाः । अभि । श्रियः ॥ २ ॥

हे ᵛइन्द्र ᵛहर्यन् सोमं कामयमानस्त्वम् ᵛउषसम् उषःकालम् ᵛअर्चयः पूजयसि । तथा ᵛहर्यन् उदिते सूर्ये सोमं कामयमानस्त्वं ᵛसूर्यम् ᵛअरोचयः दीपयसि । हे ᵛहर्यश्व इन्द्र ᵛविद्वान् एतत्सर्वं जानानः ᵛचिकित्वान् अस्मदभिलषितफलविषयज्ञानवांस्त्वं ᵛविश्वाः सर्वाः ᵛश्रियः नः संपदः ᵛअभि ᵛवर्धसे अभिमतफलप्रदानेनाभितो वर्धयसि ॥ चिकित्वान् । ' कित ज्ञाने ' इत्यस्य क्वसौ रूपम् । प्रत्ययस्वरः । वर्धसे । ' वृधु वर्धने ' इत्यस्य अन्तर्भावितण्यर्थस्य लटि रूपम् । निघातः ॥

द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥ ३ ॥

द्याम् । इन्द्रः । हरिऽधायसम् । पृथिवीम् । हरिऽवर्पसम् ।
अधारयत् । हरितोः । भूरि । भोजनम् । ययोः । अन्तः । हरिः । चरत् ॥ ३ ॥

१. प–हरिभिः ग्रावभिः ।

सोऽयम् ᵛइन्द्रो ᵛहरिधायसम् । हरितो हरितवर्णा धायसो धारका रश्मयो यस्याः सा । तां ᵛद्याम् ᵛअधारयत् । तथा ᵛहरिवर्पसम् ओषधिभिर्हरितवर्णां ᵛपृथिवीम् अधारयत् । ᵛहरितोः हरिद्वर्णयोः[1] ᵛययोः[2] द्यावापृथिव्योर्मध्ये स्वकीययोरश्वयोः ᵛभूरि प्रभूतं ᵛभोजनम् । भुज्यत इति भोजनं यवसादि । लभ्यते[3] । ययोश्च[4] द्यावापृथिव्योः ᵛअन्तः मध्ये ᵛहरिः इन्द्रः ᵛचरत् चरति । ते द्यावापृथिव्याविन्द्रः अधारयत्[5] इत्यर्थः ॥ हरिधायसम् । ' दुधाञ् धारणपोषणयोः ' इत्यस्मात् ' वहिहाधाभ्यश्छन्दसि ' इत्यसुन् । ' णिन् ' इत्यनुवृत्तेः आतो युक् । बहुव्रीहौ पूर्वपदस्वरः । पृथिवीम् । ' प्रथेः पिवन् संप्रसारणं च ' इति पिवन्प्रत्ययः । ' पृद्भोरादिभ्यश्च ' इति ङीप् । प्रत्ययस्वरेणान्तोदात्तः । हरिवर्पसम् । ' वृङ् संभक्तौ ' । ' वृङ्शीङ्भ्यां रूपस्वाङ्गयोः ' इत्यसुन्प्रत्ययः पुगागमश्च । संभज्यते तदिति[6] वर्पो रूपम्[7] । बहुव्रीहौ पूर्वपदस्वरः । हरितोः । ' हृञ् हरणे ' इत्यस्मात् ' हृसृरुहियुभ्य इतिः ' (उ. सू. १. ९७) इति इतिप्रत्ययः । प्रत्ययस्वरः । भोजनम् । ' भुज पालनाभ्यवहारयोः ' इत्यस्मात् ' कृत्यल्युटो बहुलम् ' इति कर्मणि ल्युट् । लित्स्वरः । अन्तः । स्वरादिष्वन्तोदात्तत्वेन पठितत्वादन्तोदात्तः । चरत् । चरतिर्गत्यर्थः । लेटि रूपम् । यद्वृत्तयोगादनिघातः ॥

जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥ ४ ॥

जज्ञानः । हरितः । वृषा । विश्वम् । आ । भाति । रोचनम् ।
हरिऽअश्वः । हरितम् । धत्ते । आयुधम् । आ । वज्रम् । बाह्वोः । हरिम् ॥ ४ ॥

ᵛवृषा कामानां वर्षकः ᵛहरितः हरिद्वर्णोपेतः ᵛजज्ञानः जात इन्द्रः ᵛविश्वं सर्वं ᵛरोचनं दीप्यमानं लोकम् ᵛआ ᵛभाति सर्वतः प्रकाशयति । तथा ᵛहर्यश्वः इन्द्रः ᵛहरितं हरिद्वर्णोपेतम् ᵛआयुधं ᵛधत्ते बाह्वोर्धत्ते । तथा ᵛहरिं शत्रूणां प्राणापहारकं[8] ᵛवज्रं ᵛबाह्वोः[9] ᵛआ धत्ते ॥ जज्ञानः । ' जनी प्रादुर्भावे ' इत्यस्य लिटः कानच् । ' गमहन[10] ' इत्यादिना उपधालोपः । चित्त्वादन्तोदात्तः । भाति । ' भा दीप्तौ ' इत्यस्य अन्तर्भावितण्यर्थस्य लटि रूपम् । रोचनम् । ' रुच दीप्तौ ' इत्यस्मात् ' अनुदात्तेतश्च हलादेः ' इति युच् । चित्त्वादन्तोदात्तः । बाह्वोः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् ॥

इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ ५ ॥

इन्द्रः । हर्यन्तम् । अर्जुनम् । वज्रम् । शुक्रैः । अभिऽवृतम् ।
अप । अवृणोत् । हरिऽभिः । अद्रिऽभिः । सुतम् । उत् । गाः । हरिऽभिः । आजत ॥५॥

---

१. च-न-भ-स-हरितवर्णयोः । २. ख-ग-च-ज-ण-न-भ-स-' ययोः ' नास्ति । ३. न-लक्ष्यते । ४. ख-ग-त-न-भ-स-तयोश्च । ५. ख-भ-धारयति । ६. ज-हरितं वर्पो रूपं ययोरिति । ७. न-स-प्रहारकम्; ल-प्राणहारकम् । ८. ख-ग-घ-त-न-भ-ल-स-वा ।

सोऽयम् [v]इन्द्रः [v]हर्यन्तं कमनीयम् [v]अर्जुनं शुभ्रम्। शुभ्रत्वमुपपादयति। [v]शुक्रैः शुभ्रैः क्षीरादिभिः[1] [v]अभिवृतं व्याप्तं [v]वज्रं वेगवन्तं [v]हरिभिः। हरन्त्येभिः सोमरसान् इति हरयः। तैः [v]अद्रिभिः ग्रावभिः [v]सुतम् अभिषुतं सोमम्[2] [v]अपावृणोत् आवरणरहितमकरोत्। तथा च मन्त्रवर्णः — ' पूषा राजानमाघृणिरपगूळ्हं गुहा हितम्। अविन्दत् ' (ऋ. सं. १. २३. १४) इति। तथा [v]गाः पणिभिरपहृता गाः [v]हरिभिः अश्वैरुपेतः स इन्द्रः [v]उत् [v]आजत बिलात्[3] निरगमयत्॥ अर्जुनम्। ' अर्ज पर्ज अर्जने ' इत्यस्मात् ' अर्जेर्णिलुक् च ' इत्युनन्। निस्वरः। अभिवृतम्। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्। आजत। ' अज गतिक्षेपणयोः '। लङि व्यत्ययेनात्मनेपदम्। निघातः॥ ॥ ८ ॥

' आ मन्द्रैः ' इति पञ्चर्चं सप्तमं सूक्तं वैश्वामित्रं बार्हतमैन्द्रम्। ' आ मन्द्रैः ' इत्यनुक्रमणिका। पूर्वसूक्ते ' बार्हतं तु ' इत्युक्तत्वादस्यापि बार्हतत्वम्। ' विशेषविनियोगस्तु यत्र श्रुत्या न सूत्रितः। स्मार्तं[4] तत्र विजानीयादग्निधानादिशास्त्रतः[5] ' ॥

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः।
मा त्वा के चिन्नि यमन्वि न पाशिनोऽति धन्वेव ताँ इहि ॥ १ ॥

आ। मन्द्रैः। इन्द्र। हरिऽभिः। याहि। मयूररोमऽभिः।

मा। त्वा। के। चित्। नि। यमन्। विम्। न। पाशिनः। अति। धन्वऽइव। तान्। इहि॥ १ ॥

हे [v]इन्द्र [v]मन्द्रैः मादयितृभिः [v]मयूररोमभिः मयूररोमसदृशरोमयुक्तैः [v]हरिभिः अश्वैरुपेतस्त्वम् [v]आ [v]याहि यज्ञं प्रत्यागच्छ। [v]के [v]चित् अपि जनाः [v]त्वा त्वां [v]मा [v]नि [v]यमन् मा नियच्छन्तु। गमनप्रतिबन्धं मा कुर्वन्तु इत्यभिप्रायः। प्रतिबन्धे दृष्टान्तः। [v]विं [v]न। यथा [v]पाशिनः पाशहस्ता व्याधाः विं गच्छन्तं पक्षिणं नियच्छन्ति तद्वत् मा नियच्छन्तु। किंच[6] [v]धन्वेव। यथा पान्था धन्व मरुदेशं शीघ्रम् [v]अति गच्छन्ति तद्वद्गमनप्रतिबन्धकानतीत्य शीघ्रम् [v]इहि आगच्छ॥ मन्द्रैः। मदि स्तुत्यादिषु इत्यस्य ' स्फायितञ्चि° ' इत्यादिना रक्प्रत्ययः। इदित्त्वान्नुम्। प्रत्ययस्वरः। मयूररोमभिः। मयूररोमवद्रोमाणि येषामिति ' सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च ' (पा. सू. २. २. २४. १२) इति समासः उत्तरपदलोपश्च[7]। मयूरशब्दः ' मीनातेरूरन् ' (उ. सू. १. ६७) इत्यूरन्प्रत्ययान्तः। मीनाति सर्पानिति मयूरो बर्ही। निस्वादाद्युदात्तत्वे प्राप्ते ' मादीनाम्° ' (फि. सू. ५३) इति सूत्रेण मध्योदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। यमन्। ' यम उपरमे ' इत्यस्य लेटयडागमे रूपम्। इहि। ' इण् गतौ ' इत्यस्य लोटि रूपम्॥

१. त–दीपादिभिः। २. ख-ग-घ-च-ज-ण-न-भ-स–' सोमं ' नास्ति। ३. ख-ग-च-ज-ण-न-फ-भ-स–बलात्। ४. ख-ग-च-ज-ण-न-फ-भ–शास्त्रम्। ५. न–°शास्त्रतः। गुरुणा प्रस्तक्ष्यमाणः स्नातकः आ मन्द्रैः इत्युपाशु ब्रूयात्। तथा गुरवे प्रस्तक्ष्यमाण इति खण्डे सूत्रितम्–उपांश्वा मन्द्रैरिन्द्र हरिभिरिति चेति। ६. ख-ग-च-न-भ-स–यद्वा। ७. ख-ग-न-भ-स–वा उत्तरपदलोपश्च।

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः ॥ २ ॥

वृत्रऽखादः । वलम्ऽरुजः । पुराम् । दर्मः । अपाम् । अजः ।
स्थाता । रथस्य । हर्योः । अभिऽस्वरे । इन्द्रः । दृळ्हा । चित् । आऽरुजः ॥ २ ॥

सोयम् [v]इन्द्रः [v]वृत्रखादः । वृत्रं खादति हिनस्तीति वृत्रखादः । [v]वलंरुजः । वृणोत्याकाशम् इति वलो मेघः । तस्य भञ्जकः । तथा च मन्त्रवर्णः—' बिभेद वलम् ' (ऋ. सं. ३. ३४. १०) इति । ततः [v]अपामजः मेघभेदनद्वारा अपां प्रेरकः [v]पुरां शत्रुसंबन्धिनां[1] पुराणां[2] [v]दर्मः दारकः । तथा [v]हर्योः अश्वयोः [v]अभिस्वरे अस्मदाभिमुख्येन प्रेरणे निमित्तभूते सति [v]रथस्य [v]स्थाता रथमधिष्ठाता । तथा [v]दृळ्हा [v]चित् दृढानामतिबलवतां शत्रूणामपि [v]आरुजः समन्ताद्भञ्जको भवति ॥ वृत्रखादः । ' खाद भक्षणे ' इत्यस्मात् कर्मण्यण् । कृदुत्तरपदस्वरः । वलंरुजः । ' रुजो भङ्गे ' । कर्मण्युपपदे मूलविभुजादित्वात् कप्रत्ययः । ' तत्पुरुषे कृति बहुलम् ' इति द्वितीयाया अलुक् । थाथादिस्वरः । आरुजः । ' रुजो भङ्गे ' इत्यस्मादिगुपधलक्षणः कः । समासे थाथादिस्वरः ॥

गम्भीराँ उदधीरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्याइवाशत ॥ ३ ॥

गम्भीरान् । उदधीन्ऽइव । क्रतुम् । पुष्यसि । गाःऽइव ।
प्र । सुऽगोपाः । यवसम् । धेनवः । यथा । ह्रदम् । कुल्याःऽइव । आशत ॥ ३ ॥

हे इन्द्र त्वं [v]गम्भीरान् महावकाशान् [v]उदधीन्[3] समुद्रान्[4] उदकैर्यथा पोषयसि तद्वत् [v]क्रतुं यज्ञस्य कर्तारमिमं यजमानमभिमतफलप्रदानेन [v]पुष्यसि पोषयसि । अत्र दृष्टान्तः । यथा [v]सुगोपाः समीचीनो गोपालः यवसेन [v]गाः पोषयति तद्वत् । [v]यथा [v]धेनवः [v]यवसं तृणादिकं प्राप्नुवन्ति तद्वत् त्वं सोमान् प्राप्नोषि । ते च सोमाः [v]कुल्याइव कृत्रिमसरितः [v]ह्रदं महाजलाशयं यथा प्राप्नुवन्ति तद्वत् त्वाम् [v]प्र[5] [v]आशत व्याप्नुवन्ति ॥ गम्भीरान् । ' गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ' इत्यस्मात् ' गभीरगम्भीरौ ' (उ. सू. ४. ४७५) इत्यनेन सूत्रेण इरच्प्रत्ययः । नुमागमोपधाह्रस्वभकाराः सर्वे निपात्यन्ते । चित्त्वादन्तोदात्तः । उदधीनिव । उदकशब्दे उपपदे दधातेरधिकरणेऽर्थे ' कर्मण्यधिकरणे च ' इति किप्रत्ययः । उदकशब्दस्य ' पेपंवासवाहनधिषु च ' (पा. सू. ६.३.५८) इत्युदभावः । कृत्स्वरः । इवेन विभक्त्यलोपः । पुष्यसि । ' पुष पुष्टौ ' इत्यस्यान्तर्णीतण्यर्थस्य लटि रूपम् । निघातः । सुगोपाः । गोपायतेः क्विपि रूपम् । यथा । ' यथेति पादान्ते ' (फि. सू. ८५) इति निघातः । आशत । ' अशू व्याप्तौ ' इत्यस्माल्लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । निघातः ॥

---

१. ख-ग-च-ज-ण-न-भ-स-शत्रुसंबन्धिनीनाम् । २. ख-ग-च-ज-ण-न-भ-स-' पुराणां ' नास्ति । ३. घ-उदधीनिव । ४. ज-ण-समुद्रानिव । ५. न-ल-स-' प्र ' नास्ति ।

आ नस्तुजं रयिं भरांशं न प्रतिजानते ।
वृक्षं पक्वं फलमङ्कीव धूनुहीन्द्र संपारणं वसु ॥ ४ ॥

आ । नः । तुजम् । रयिम् । भर । अंशम् । न । प्रतिऽजानते ।
वृक्षम् । पक्वम् । फलम् । अङ्कीऽइव । धूनुहि । इन्द्र । सम्ऽपारणम् । वसु ॥ ४ ॥

हे [v]इन्द्र [v]नः अस्माकं [v]तुजं शत्रूणां बाधकं [v]रयिं धनेनोपलक्षितं पुत्रम् [v]आ [v]भर संपादय । तत्र दृष्टान्तः [v]अंशं [v]न । यथा पिता [v]प्रतिजानते व्यवहारज्ञाय पुत्राय स्वकीयस्य धनस्य भागं ददाति तद्वत् । किंच [v]पक्वं [v]फलं प्रति [v]वृक्षम् [v]अङ्कीव अङ्कुशी यथा धूनोति तथा स्वं [v]संपारणम् अस्मदिच्छायाः सम्यक् पूरकं [v]वसु धनं [v]धूनुहि चालय । प्रयच्छेत्यर्थः ॥ प्रतिजानते । ' ज्ञा अवबोधने ' इत्यस्य शतरि रूपम् । प्रादिसमासः । ' शतुरनुमः[०] ' इति विभक्तेरुदात्तत्वम् । धूनुहि । ' धूञ् कम्पने ' इत्यस्य लोटि रूपम् । संपारणम् । ' पॄ पालनपूरणयोः ' इत्यस्य ण्यन्तस्य करणे ल्युट् । समासे कृत्स्वरः ॥

स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥ ५ ॥

स्वऽयुः । इन्द्र । स्वऽराट् । असि । स्मत्ऽदिष्टिः । स्वयशःऽतरः ।
सः । ववृधानः । ओजसा । पुरुऽस्तुत । भव । नः । सुश्रवःऽतमः ॥ ५ ॥

हे [v]इन्द्र [v]स्वयुः धनवानसि । तथा [v]स्वराट् स्वर्गस्य राजा [v]असि । [v]स्मद्दिष्टिः भद्रवाक्यः [v]स्वयशस्तरः अतिशयेन प्रभूतकीर्तिरसि[१] । हे [v]पुरुष्टुत बहुभिराहूतेन्द्र [v]सः स्वम् [v]ओजसा बलेन [v]वावृधानः वर्धमानः सन् [v]नः अस्मदर्थं[१] [v]सुश्रवस्तमः अतिशयेन शोभनान्नोपेतः[२] [v]भव ॥ स्वयुः । स्वशब्दात् मत्वर्थीयो युः । स्वराट् । ' राजृ दीप्तौ ' । क्विप् । व्रश्चादिना षत्वम् । स्मद्दिष्टिः । स्मत् सुमदित्यर्थे । उकारलोपश्छान्दसः । बहुव्रीहौ पूर्वपदस्वरः । पुरुष्टुत । संहितायां ' स्तुतस्तोमयोश्छन्दसि ' इति षत्वम् । भव । भवतेर्लोटि रूपम् । ' द्व्यचोऽतस्तिङ ' इति संहितायां दीर्घः । सुश्रवस्तमः । श्रवःशब्दोऽसुन्नन्तः । बहुव्रीहौ ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । तदन्तादतिशायने तमप् । तस्य पित्त्वादनुदात्तत्वे बहुव्रीहिस्वरः ॥ ॥ ९ ॥

' युध्मस्य ते ' इति पञ्चर्चमष्टमं सूक्तं वैश्वामित्रमैन्द्रम् । ' युध्मस्य ' इत्यनुक्रमणिका । दशरात्रे चतुर्थेऽहनि निष्केवल्ये ' युध्मस्य ते ' इति सूक्तं निविद्धानम् । सूत्रितं च—' कुह श्रुत इन्दो युध्मस्य त इति निष्केवल्यम् ' (आश्व. श्रौ. ७.११) इति । ऋषभनाम्नि[३] एकाहेऽपि निष्केवल्य इदं सूक्तं निविद्धानम् । सूत्रितं च—' युध्मस्य त इति मध्यंदिनः ' (आश्व. श्रौ. ९. ७) इति ॥

१. च-फ–धनरूपयशस्वान् स पूर्वोक्तः ओजसा बलेन वावृधानः पुनःपुनर्वर्धनशीलः पुरुष्टुत बहुभिः स्तुत नोऽस्माकम् । २. च–शोभनान्नप्रदाता । ३. ख-ग-च-ज-ण-स–ऋषभस्य ।

युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्याणीन्द्र श्रुतस्य महतो महानि ॥ १ ॥

युध्मस्य । ते । वृषभस्य । स्वऽराजः । उग्रस्य । यूनः । स्थविरस्य । घृष्वेः ।
अजूर्यतः । वज्रिणः । वीर्याणि । इन्द्र । श्रुतस्य । महतः । महानि ॥ १ ॥

हे [v]इन्द्र [v]युध्मस्य योधनशीलस्य [v]वृषभस्य अभिमतफलसेचकस्य [v]स्वराजः धनाधिपतेः [v]उग्रस्य समर्थस्य [v]यूनः नित्यतरुणस्य [v]स्थविरस्य चिरंतनस्य [v]घृष्वेः शत्रूणां संघर्षकस्य [v]अजूर्यतः जरारहितस्य [v]वज्रिणः [v]श्रुतस्य त्रिषु लोकेषु प्रसिद्धस्य अत एव [v]महतः [v]ते तव [v]वीर्याणि [v]महानि महान्ति खलु ॥ युध्मस्य । ' युध संप्रहारे ' । ' इषुयुधीन्धिदसि° ' इत्यादिना मक्प्रत्ययः । यूनः । यौतेः ' कनिन्युवृषि° ' इत्यादिना कनिन् । ' श्वयुवमघोनामतद्धिते ' इति संप्रसारणम् । निरस्वरः । स्थविरस्य । ' अजिरशिशिरशिथिल° ' इत्यादिना किरन्प्रत्ययान्तो निपातितः । घृष्वेः । ' घृषु संघर्षे ' । ' कृविघृष्विच्छवि° ' इत्यादिना क्विन्प्रत्ययान्तो निपात्यते । निरस्वादाद्युदात्तः ॥

महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥ २ ॥

महान् । असि । महिष । वृष्ण्येभिः । धनऽस्पृत् । उग्र । सहमानः । अन्यान् ।
एकः । विश्वस्य । भुवनस्य । राजा । सः । योधय । च । क्षयय । च । जनान् ॥ २ ॥

हे [v]महिष महनीय[1] [v]उग्र इन्द्र त्वं [v]महानसि । [v]धनस्पृत् धनानि दानभोगाद्यर्थैः पारं नयंस्त्वं [v]वृष्ण्येभिः वीर्यैः [v]अन्यान् शत्रून् [v]सहमानः अभिभवन् वर्तसे । तथा [v]विश्वस्य सर्वस्य [v]भुवनस्य [v]एकः असहायः [v]राजा [v]सः त्वं [v]योधय [v]च सपत्नान् प्रहर । [v]जनान् [v]क्षयय [v]च निवासय । बाधकान् हत्वा साधुजनान् स्वस्थाने स्थापयेत्यभिप्रायः ॥ महिष । ' मह पूजायाम् ' । ' अविमह्योष्टिषच् ' (उ. सू. १. ४५) इति टिषच्प्रत्ययः । आमन्त्रितत्वान्निघातः । वृष्ण्येभिः । वृष्णि भवानि । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तः । योधय । ' युध संप्रहारे ' इत्यस्य ण्यन्तस्य लोटि रूपम् । ' चादिषु च ' इति न[2] निघातः[2] । णिरस्वरः । क्षयय । ' क्षि निवासगत्योः ' इत्यस्य ण्यन्तस्य लोटि रूपम् । अत्रापि पूर्ववदनिघातः ॥

प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी ॥ ३ ॥

प्र । मात्राभिः । रिरिचे । रोचमानः । प्र । देवेभिः । विश्वतः । अप्रतिऽइतः ।
प्र । मज्मना । दिवः । इन्द्रः । पृथिव्याः । प्र । उरोः । महः । अन्तरिक्षात् । ऋजीषी ॥३॥

---

१. ज-ण–मंहनीय । २. ज-ण–अनिघातः; न-स–त्वनिघातः ।

[v]रोचमानः दीप्यमानः [v]विश्वतः सर्वैः[1] [v]अप्रतीतः एतावदस्य सामर्थ्यमित्यपरिच्छिद्यमानः [v]ऋजीषी सोमवान् [v]इन्द्रः [v]मात्राभिः। मीयन्ते परिच्छिद्यन्ते इति मात्राः शिलोच्चयाः। तेभ्योऽपि [v]प्र [v]रिरिचे प्रकर्षेण महत्तयातिरिक्तोऽभूत्। तथा [v]देवेभिः देवेभ्योऽपि [v]मज्मना। मज्जयति शत्रून् दुःखसागरे इति मज्म बलम्। तेन बलेन [v]प्र रिरिचे। तथा [v]दिवः [v]पृथिव्याः द्यावापृथिवीभ्यां च[2] [v]प्र रिरिचे। तथा [v]उरोः विस्तीर्णात् [v]महः महतः [v]अन्तरिक्षात् अपि [v]प्र रिरिचे॥ मात्राभिः। 'माङ् माने शब्दे च' इत्यस्मात् 'हुयामाश्रुभसिभ्यस्त्रन्' इति त्रन्प्रत्ययः। नित्त्वादाद्युदात्तः। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति संहितायां दीर्घः। रोचमानः। 'रुच दीप्तौ' इत्यस्मात् शानचि रूपम्। तस्य लसार्वधातुकस्वरे धातुस्वरः। अप्रतीतः। 'इण् गतौ'। कर्मणि क्तः। प्रादिसमासः। नञा समासे तस्य स्वरः। मज्मना। 'टुमस्जो शुद्धौ'। औणादिको मनिन्प्रत्ययः। 'झलां जश् झशि' इति जश्त्वम्। चित्त्वादन्तोदात्तः। पृथिव्याः। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम्॥

उरुं गभीरं जनुषाभ्यु[1]ग्रं विश्वव्यचसमवतं मतीनाम्।
इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति॥ ४॥

उरुम्। गभीरम्। जनुषा। अभि। उग्रम्। विश्वऽव्यचसम्। अवतम्। मतीनाम्।
इन्द्रम्। सोमासः। प्रऽदिवि। सुतासः। समुद्रम्। न। स्रवतः। आ। विशन्ति॥ ४॥

[v]उरुं महान्तम् अत एव [v]गभीरं महावकाशं [v]जनुषा जन्मना स्वभावत एव [v]उग्रं शत्रूणां भयंकरम्। गभीरत्वमेवोच्यते। [v]विश्वव्यचसं विश्वव्याप्तं [v]मतीनां स्तुतीनां[2] स्तोतॄणां वा[3] [v]अवतं रक्षकं तादृशम् [v]इन्द्रं [v]प्रदिवि पूर्वेद्यवहःसु [v]सुतासः ग्रावभिरभिषुताः [v]सोमासः सोमाः [v]अभि आभिमुख्येन [v]आ [v]विशन्ति। तत्र दृष्टान्तः [v]समुद्रं [v]न। यथा [v]स्रवतः स्रवन्त्यो नद्यः समुद्रम् आविशन्ति तद्वत्॥ जनुषा। 'जनी प्रादुर्भावे' इत्यस्मात् 'जनेरुसिः' इत्युसिप्रत्ययः। विश्वव्यचसम्। 'व्यच व्याजीकरणे' इत्यस्मादसुन्। 'व्यचेः कुटादित्वमनसीति वक्तव्यम्' इत्यत्र 'अनसि' इति पर्युदासात् ङित्त्वाभावः। विश्वव्यचा इतीन्द्रस्य नाम। 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदस्यान्तोदात्तत्वम्। अवतम्। अव रक्षणादिषु। औणादिकोऽतच्प्रत्ययः। चित्त्वादन्तोदात्तः॥

यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया।
तं ते हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभं पातवा उ॥ ५॥

यम्। सोमम्। इन्द्र। पृथिवीद्यावा। गर्भम्। न। माता। बिभृतः। त्वाऽया।
तम्। ते। हिन्वन्ति। तम्। ऊँ इति। ते। मृजन्ति। अध्वर्यवः। वृषभ। पातवै। ऊँ इति॥ ५॥

हे[4] [v]इन्द्र [v]पृथिवीद्यावा द्यावापृथिव्यौ [v]त्वाया त्वत्कामनया [v]यं [v]सोमं [v]बिभृतः अन्तर्धारयतः। अत्र दृष्टान्तः [v]गर्भं [v]न। यथा [v]माता गर्भं बिभर्ति तद्वत्। हे [v]वृषभ कामानां

१. त-सर्वैः देवैः। २. ख-ग-च-च यः; न-स-यः। ३. ख-ग-ज-ण-न-स-स्तोतॄणां वा; घ-प-स्तोत्राणाम्; च-फ-स्तोतॄणाम्। ४. ज-ण-'हे' नास्ति।

वर्षक हे इन्द्र [V]अध्वर्यवः अध्वरं यजमानायेच्छन्तः [V]ते त्वदर्थं [V]तं सोमं [V]हिन्वन्ति प्रेरयन्ति । किंच [V]ते तव [V]पातवै पानाय [V]तं सोमं [V]मृजन्ति शोधयन्ति । [V]उ प्रसिद्धौ ॥ पृथिवीद्यावा । ' दिवो द्यावा ' इति द्यावादेशः । आद्युदात्तः । ' नोत्तरपदेऽनुदात्तादावृपृथिवीरुद्रपूषमन्थिषु ' इत्यत्र पर्युदासात् ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरः । कृतसमासस्य विपर्यासश्छान्दसः । बिभृतः । ' डुभृञ् धारणपोषणयोः ' इत्यस्माल्लटि ' भृञामित् ' इत्यभ्यासस्येत्वम् । यद्वृत्तयोगादनिघातः । अजादिप्रत्ययपरत्वाभावादत्र ' अभ्यस्तानामादिः ' इति स्वरो न भवति । प्रत्ययस्वरः । त्वाया । त्वामिच्छतीत्यर्थे ' सुप आत्मनः क्यच् ' । पूर्वपददकारस्याकारश्छान्दसः । ' अ प्रत्ययात् ' इति भावेऽप्रत्ययः । ' सुपां सुलुक् ' इति तृतीयायाः सवर्णदीर्घः । एकादेशस्वरः । अध्वर्यवः । अध्वरमिच्छन्तः । सुपः क्यच् । ' कव्यध्वरपृतनस्यर्चि लोपः ' इत्यकारलोपः । ' क्याच्छन्दसि ' इत्युप्रत्ययः । प्रत्ययस्वरः । पातवै । ' पा पाने ' । तुमर्थे[1] तवैप्रत्ययः । ' अन्तश्च तवै युगपत् ' इति धात्वन्तस्य प्रत्ययस्य चोदात्तत्वम् । ' उञः ' इति प्रगृह्यसंज्ञा ॥ ॥ १० ॥

' मरुत्वान् ' इति पञ्चर्चं नवमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' मरुत्वान् ' इत्यनुक्रमणिका[2] । दशरात्रे चतुर्थेऽहनि मरुत्वतीयशस्त्रे[3] एतत् सूक्तं[4] निविद्धानीयम्[5] । सूत्रितं च—' श्रुधी हवमिन्द्र मरुत्वाँ इन्द्रेति मरुत्वतीयम् ' (आश्व. श्रौ. ७. ११) इति । ऋषभनाम्न्येकाहेऽपि मरुत्वतीयशस्त्रे एतन्निविद्धानम् । सूत्रितं च—' मरुत्वाँ इन्द्र युध्मस्य त इति मध्यंदिनः ' (आश्व. श्रौ. ९. ७) इति ॥

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥ १ ॥

मरुत्वान् । इन्द्र । वृषभः । रणाय । पिब । सोमम् । अनुऽस्वधम् । मदाय ।
आ । सिञ्चस्व । जठरे । मध्वः । ऊर्मिम् । त्वम् । राजा । असि । प्रऽदिवः । सुतानाम् ॥ १ ॥

हे [V]इन्द्र यः [V]वृषभः अपां वर्षिता [V]मरुत्वान् । मरुतो देवविशः तद्वान्[6] । स त्वम् [V]अनुष्वधं स्वधया सवनीयपुरोडाशादिरूपेण[7] अन्नेनानुगतं [V]सोमं [V]रणाय रमणीयसंग्रामार्थं[8] [V]मदाय तं सोमं [V]पिब । किंच [V]मध्वः मदकरस्य सोमस्य [V]ऊर्मिं संघातं बहुरसं [V]जठरे । जग्धमन्नमस्मिन्निष्ठतीति जठरमुदरम् । तस्मिन्नुदरे [V]आ [V]सिञ्चस्व सर्वतः क्षारय । यतः [V]त्वं [V]प्रदिवः पूर्वेद्युरहःसु [V]सुतानाम् अभिषुतानां सोमानां [V]राजासि ईशितासि । न केवलमधुनातनानामिति भावः । उक्तमर्थं यास्को ब्रवीति—' मरुत्वानिन्द्र मरुद्भिस्तद्वान् वृषभो वर्षितापां रणाय रमणीयाय संग्रामाय पिब सोममनुष्वधमन्वन्नं मदाय मदनीयाय जैत्रायासिञ्चस्व जठरे मधुन ऊर्मिम् । मधु सोममित्यौपमिकं

---

१. त–इत्यस्मात्तुमर्थे । २. न–इत्यनुक्रमणिका । दशमेऽहनि मरुत्वतीयशस्त्रे इदं सूक्तम् । तथा च ' दशमेऽहनि ' इति खण्डे सूत्रं–मरुत्वानिन्द्रेति मरुत्वतीयमिति । महामते मरुत्वतीयशस्त्रे एतत्सूक्तम् । पञ्चमारण्यके कया शुभा सवयसः सनीळा मरुत्वानिन्द्र वृषभो रणायेति सूत्रितत्वात् । ३. ग-च–मरुत्वतीयस्य तृतीयशस्त्रे; ज-ण–मरुत्वतीयाख्यतृतीयशस्त्रे । ४. ख-ग-च-ज-ण-स–' सूक्तं ' नास्ति । ५. ख-ग-च-ज-ण-त-स–निविद्धानम् । ६. ख-ग–तद्वन् । ७. त–हवनीय° । ८. ख-ग-च-फ-स–रमणीयाय संग्रामार्थम्; ज-ण–रमणीयाय संग्रामाय संग्रामार्थम् ।

माद्यतेः । इदमपीतरन्मध्वेतस्मादेव । त्वं राजासि पूर्वेष्वह्नःसु सुतानाम् ' (निरु. ४. ८) इति ॥ अनुस्वधम् । स्वधामनुगम्य वर्तमानम् । ' अत्यादयः क्रान्ताद्यर्थे द्वितीयया ' इति समासः । संहितायां ' पूर्वपदात् ' (पा. सू. ८. ३. १०६) इति षत्वम् । निरुदकादित्वादन्तोदात्तत्वम् । ऊर्मिम् । ' अर्तेरूच्च[1] ' इति मिप्रत्ययः । धातोः ऊ इत्यादेशो रपरः । प्रत्ययस्वरः ॥

' सजोषा इन्द्र ' इति मरुत्वतीयग्रहस्य याज्या । सूत्रितं च— ' सजोषा इन्द्र सगणो मरुद्भिरिति भक्षयित्वैतत्पात्रम् ' (आश्व. श्रौ. ५. १४) इति ॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ २ ॥

सऽजोषाः । इन्द्र । सऽगणः । मरुत्ऽभिः । सोमम् । पिब । वृत्रऽहा । शूर । विद्वान् ।
जहि । शत्रून् । अप । मृधः । नुदस्व । अथ । अभयम् । कृणुहि । विश्वतः । नः ॥ २ ॥

हे [v]शूर बलवन् हे [v]इन्द्र [v]सजोषाः संगतो देवैः [v]मरुद्भिः [v]सगणः मरुद्भिरेव[2] [v]वृत्रहा वृत्रस्य हन्ता [v]विद्वान् कर्मविषयाभिज्ञस्त्वं [v]सोमं [v]पिब । ततो नः [v]शत्रून् [v]जहि । [v]मृधः हिंसकान् शत्रून् [v]अप [v]नुदस्व । यद्वा मृधः । हिंस्यन्तेऽत्र प्राणिन इति मृधः संग्रामाः[3] । तत्र वर्तमानान् शत्रूनपनुदस्व । [v]अथ अनन्तरं [v]नः अस्माकं [v]विश्वतः सर्वतः [v]अभयं [v]कृणुहि कुरु । सर्वतो भयरहितानस्मान् कुर्वित्यर्थः ॥ वृत्रहा । हन्तेः ' ब्रह्मभ्रूणवृत्रेषु क्विप् ' । अभयम् । ' जिभी भये ' इत्यस्मात् ण्यत् । नञा[4] समासे[5] तस्य स्वरः । विश्वतः । पञ्चम्यास्तसिल् । लित्स्वरः ॥

उत ऋतुभिर्ऋतुपाः पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥ ३ ॥

उत । ऋतुऽभिः । ऋतुऽपाः । पाहि । सोमम् । इन्द्र । देवेभिः । सखिऽभिः । सुतम् । नः ।
यान् । आ । अभजः । मरुतः । ये । त्वा । अनु । अहन् । वृत्रम् । अदधुः । तुभ्यम् । ओजः ॥ ३ ॥

[v]उत अपि च हे [v]ऋतुपाः कालनिर्वाहकतया ऋतूनां पातः । ऋतुषु सोमं पिबतीति वा ऋतुपाः । यद्वा ऋतुभिः[6] मरुद्भिः सह सोमं पिबतीति ऋतुपाः । तादृश हे [v]इन्द्र [v]सखिभिः समानख्यानैः [v]ऋतुभिः मरुद्भिः [v]देवेभिः देवैः सहितस्त्वं [v]नः संबन्धिनं[6] [v]सुतम् अभिषुतं [v]सोमं [v]पाहि पिब । किंच[7] [v]यान् [v]मरुतः [v]आभजः युद्धसहायार्थमसेवथाः [v]ये च मरुतः [v]त्वा त्वां युद्धे[8] स्वामिनम् [v]अनु अभजन्त । ततस्त्वं [v]वृत्रम् [v]अहन् हतवानसि । ते मरुतः [v]तुभ्यं त्वदर्थम् [v]ओजः युद्धे शत्रु-

१. ख-न-ल-स-अर्तेरू च । २. ख-ग-घ-च-ज-ण-न-प-फ-ल-स-' मरुद्भिरेव ' नास्ति । ३. ख-ग-च-ज-ण-न-स-संग्रामाः । ४. ख-ग-च-ज-ण-न-स-नञ्समासे । ५. घ-ज-ण-ऋतुभिः निर्वाहकैः । ६. ज-सवने । ७. घ-ज-ण-किंच त्वम् । ८. ख-ग-ज-ण-त-न-युधि ।

हननादिरूपं पराक्रमम् [v]अदधुः अकुर्वन् ॥ अभजः । ' भज सेवायाम् ' इत्यस्य लङि रूपम् । यद्वृत्तयोगादनिघातः । अहन् । ' हन हिंसागत्योः ' इत्यस्य लङि सिपो हल्ङ्यादिना लोपः । पादादित्वात् अनिघातः । अदधुः । दधातेर्लङि झेः ' सिजभ्यस्त° ' इति जुस् । वाक्यभेदादनिघातः ॥

मरुत्वतीयशस्त्रे याज्या ' ये त्वाहिहत्ये ' इत्येषा । सूत्रितं च—' ये त्वाहिहत्ये मघवन्नवर्धन्निति याज्या ' (आश्व. श्रौ. ५. १४) इति ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥ ४ ॥

ये । त्वा । अहिऽहत्ये । मघऽवन् । अवर्धन् । ये । शाम्बरे । हरिऽवः । ये । गोऽइष्टौ ।
ये । त्वा । नूनम् । अनुऽमदन्ति । विप्राः । पिब । इन्द्र । सोमम् । सऽगणः । मरुत्ऽभिः ॥४॥

हे [v]मघवन् धनवन् [v]इन्द्र [v]ये मरुतः [v]अहिहत्ये वृत्रहननरूपे कर्मणि [v]त्वा त्वाम् [v]अवर्धन्[1]। ' प्रहर भगवो जहि वीरयस्व ' इति बलदानेनावीवृधन् । हे [v]हरिवः अश्ववन्निन्द्र [v]ये च [v]शाम्बरे शम्बरवधसंबन्धिनि युद्धे त्वामवीवृधन् । इन्द्रः शम्बरमवधीदित्यस्मिन्नर्थे मन्त्रवर्णः—' यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् । ओजायमानं यो अहिं जघान ' (ऋ. सं. २. १२. ११) इति । तथा [v]ये मरुतः [v]गविष्टौ पणिनामकैरसुरैः सह गवार्थे युद्धे च त्वामवीवृधन् । [v]विप्राः मेधाविनः [v]ये च मरुतः [v]नूनम् इदानीं त्वाम् [v]अनुमदन्ति मादयन्ति तादृशैस्तैः [v]मरुद्भिः [v]सगणः सन् इमं [v]सोमं [v]पिब ॥ अहिहत्ये । हन्तेर्भावे ' हनस्तच ' इति क्यप् । कृदुत्तरपदस्वरः । अवर्धन् । ' वृधु वृद्धौ ' इत्यस्य ण्यन्तस्य लङि रूपम् । ' छन्दस्युभयथा ' इति झेरार्धधातुकत्वात् णेर्लोपः । यद्वृत्तयोगादनिघातः । शाम्बरे । शम्बरस्येदमित्यर्थे ' तस्येदम् ' इत्यणप्रत्ययः । गविष्टौ । ' इषु इच्छायाम् ' । भावे क्तिन् । बहुव्रीहौ पूर्वपदस्वरः । अनुमदन्ति । मदि स्तुत्यादिषु इत्यस्य लटि व्यत्ययेन परस्मैपदम् । आगमानुशासनस्यानित्यत्वान्नुमभावः । झेर्लसार्वधातुकस्वरे कृते धातुस्वरः । ' तिङि चोदात्तवति ' इति गतेर्निघातः ॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ५ ॥

मरुत्वन्तम् । वृषभम् । ववृधानम् । अकवऽअरिम् । दिव्यम् । शासम् । इन्द्रम् ।
विश्वऽसहम् । अवसे । नूतनाय । उग्रम् । सहःऽदाम् । इह । तम् । हुवेम ॥ ५ ॥

हे इन्द्र [v]मरुत्वन्तं मरुद्भिस्तद्वन्तं [v]वृषभं मेघभेदनद्वारा अपां वर्षकं [v]ववृधानं वृत्रहननादिकर्मसु उत्साहेन वर्धमानम् [v]अकवारिं प्रभूतशत्रुकं[2] यद्वा अकुत्सितारिम् । तथा च मन्त्रः—' स्वरिरमत्रो

१. घ-त-ल-अवर्धयन्; न-अवर्धन् अवर्धयन् । २. ख-ग-घ-च-ज-ण-प-फ-भ-ल-प्रभूतशब्दम् ।

ववक्षे रणाय ' (ऋ. सं. १. ६१. ९) इति । vदिव्यं दिवि स्वर्गलोके वर्तमानम् । vशासं हितोपदेशाहितपरिहाराभ्यां शासितारं vविश्वासाहं विश्वस्य प्रतिपक्षस्य सर्वस्याभिभवितारम् vउग्रं शत्रुषु[1] उद्गूर्णं vसहोदां युद्धसहकारिणां मरुतां बलप्रदं vतं तादृशसामर्थ्योपेतम् vइन्द्रं vनूतनाय नवतराय vअवसे रक्षणाय vइह कर्मणि vहुवेम स्वामाह्वयेम ॥ नूतनाय । नवशब्दस्य नू इत्यादेशः । तमनखाश्च प्रत्यया वक्तव्याः इति तनप्रत्ययः ॥ ॥ ११ ॥

' सद्यो ह ' इति पञ्चर्चं दशमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' सद्यो ह ' इत्यनुक्रमणिका । अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे ' सद्यो ह जातः ' इत्येतत्सूक्तम् । सूत्रितं च—' सद्यो ह जात एवा स्वाभिन्द्रः ' (आश्व. श्रौ. ५. १६) इति । चातुर्विंशिकेऽप्यहनि मैत्रावरुणशस्त्रेऽहरहः-शस्यसंज्ञकमेतत्सूक्तम् । सूत्रितं च—' सद्यो ह जात इत्यहरहःशस्यं मैत्रावरुणः ' (आश्व. श्रौ. ७. ४) इति । अहर्गणे द्वितीयादिष्वहःसु माध्यंदिनसवनेऽस्मिन् शस्त्रे एतत्सूक्तम् । ' अहरहःशस्यानीति होत्रका द्वितीयादिष्वेव ' (आश्व. श्रौ. ७. १) इति सूत्रितम् । साद्यस्के एकाहे मरुत्वतीये शस्त्रे ' सद्यो ह जातः ' इत्याद्या सूक्तमुखीया । सूत्रितं च—' सद्यो ह जातो वृषभः कनीनस्त्वं सद्यो अपिबो जात इन्द्र ' (आश्व. श्रौ. ९. ५) इति ॥

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥ १ ॥

सद्यः । ह । जातः । वृषभः । कनीनः । प्रऽभर्तुम् । आवत् । अन्धसः । सुतस्य ।
साधोः । पिब । प्रतिऽकामम् । यथा । ते । रसऽआशिरः । प्रथमम् । सोम्यस्य ॥ १ ॥

vवृषभः वृष्टिद्वारा अपां वर्षिता vसद्यः तदानीमेव vजातः उत्पन्नः vकनीनः कमनीयः इन्द्रः vसुतस्य अभिषुतस्य vअन्धसः हविर्लक्षणस्य अन्नस्य[2] सोमस्य vप्रभर्तुं प्रकर्षेण भर्तारं[3] संग्रहीतारं यजमानम् vआवत् रक्षतु[4] । vह प्रसिद्धौ । किंच तादृशस्त्वं vप्रतिकामं कामे कामे सोमपानेच्छायां[5] सत्यां vते तव vयथा कामस्य पूर्तिर्भवति तथा vसाधोः रसात्मना संसिद्धं vरसाशिरः गोपयोमिश्रणोपेतं vसोम्यस्य सोममयं रसं vप्रथमं सर्वेभ्यो देवेभ्यः पुरस्तात् vपिब ॥ प्रतिकामम् । कामं कामं प्रति[6] । वीप्सायामव्ययीभावः । समासस्वरः । यथा । अपादान्तत्वादेव लित्स्वरः । रसाशिरः । आङ्-पूर्वात् श्रीणातेः क्विपि ' अपस्पृधेथाम् ° ' इत्यादिना आशिर[7] इत्यादेशः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । सोम्यस्य । सोमशब्दात् मयडर्थे ' मये च ' इति यप्रत्ययः ॥

१. ज-ण-शत्रुपक्षेषु । २. ख-ग-घ-च-ज-ण-न-फ-भ-स-' अन्नस्य ' नास्ति । ३. ख-ग-ज-ण-त-भ-स-भर्तारं तम् । ४. च-अरक्षत् । ५. ख-ग-च-त-न-फ-भ-स-सोमपाने त्वरायाम् । ६. च-ज-ण-प्रति इति । ७. ल-आशिर ।

यज्जायंथास्तदहंरस्य कामेंऽशोः पीयूषंमपिबो गिरिष्ठाम् ।
तं ते मांता परि योषा जनित्री महः पितुर्दम आसिञ्चदग्रे ॥ २ ॥

यत् । जायंथाः । तत् । अहंः । अस्य । कामे । अंशोः । पियूषम् । अपिबः । गिरिऽस्थाम् ।
तम् । ते । माता । परि । योषा । जनित्री । महः । पितुः । दमे । आ । असिञ्चत् । अग्रे ॥२॥

हे इन्द्र त्वं यत् यस्मिन्नहनि जायथाः अजायथाः तदहः तस्मिन्नेवाहनि अस्य सोमस्य कामे पिपासायां सत्यां गिरिष्ठां गिरिस्थां पर्वतस्य उच्चस्थाने वर्तमानम् अंशोः सोमलताखण्ड-विशिष्टस्य ऋजीषस्य पीयूषम् अभिनवं रसम् अपिबः पीतवानसि । उत्पत्तिक्षण एव सोमपाने कारणं दर्शयति । ते तव जनित्री माता योषा युवतिरदितिः महः महतः पितुः जनकस्य कश्यपस्य दमे सूतिकागृहे अग्रे स्तन्यदानात् प्राक् तं तादृशं सोमं परि आसिञ्चत् तवास्ये परितोऽक्षारयत् ॥ जायथाः । ' जनी प्रादुर्भावे ' इत्यस्य लङि ' बहुलं छन्दसि ' इत्यडभावः । यद्वृत्तयोगादनिघातः । जनित्री । ' जनिता मन्त्रे ' इति निपातनात् णेर्लोपः ॥

उपस्थायं मातरमन्नमैट्ट तिग्मंमपश्यदाभि सोममूधंः ।
प्रयावयंन्नचरद्गृत्सो अन्यान्महानिं चक्रे पुरुधप्रतीकः ॥ ३ ॥

उपऽस्थायं । मातरम् । अन्नम् । ऐट्ट । तिग्मम् । अपश्यत् । अभि । सोमम् । ऊधंः ।
प्रऽयावयंन् । अचरत् । गृत्सः । अन्यान् । महानिं । चक्रे । पुरुधऽप्रतीकः ॥ ३ ॥

स इन्द्रः मातरम् उपस्थाय प्रार्थयित्वा अन्नमैट्ट तामन्नमयाचत । ' ईळिरध्येषणाकर्मा ' (निरु. ७. १५) इति यास्कः । ततस्तस्याः ऊधः ऊधसि क्षीररूपेण स्थितं तिग्मं दीप्तं सोमम् अभि अपश्यत् सर्वतोऽदर्शत् । गृत्सः । अभिकाङ्क्ष्यते सर्वैर्देवैः शत्रुहननार्थमिति गृत्स इन्द्रः । अन्यान् सपत्नान् प्रयवयन् स्वस्वस्थानात् प्रकर्षेणोच्चालयन् अचरत सर्वत्र चरति । किंच पुरुधप्रतीकः तेजोयोगात् बहुधा विक्षिप्ताङ्गः सन् महानि महान्ति वृत्रहननादीनि कर्माणि चक्रे ॥ उपस्थाय । तिष्ठतेर्ण्यपि ' घुमास्था° ' इतीत्वे प्राप्ते ' न ल्यपि ' इति प्रतिषेधः । लित्स्वरः । ऐट्ट । ईळिर्याच्ञार्थः । तस्माल्लङि रूपम् । ' आडजादीनाम् ' इत्याडागमः । ष्टुत्वम् । निघातः । तिग्मम् । ' तिज निशाने ' अस्मात् ' युजिरुचितिजां कुश्च ' इति मक्प्रत्ययः कवर्गादेशश्च । प्रयवयन् । ' यु मिश्रणामिश्रणयोः ' इत्यस्य ण्यन्तस्य शतरि रूपम् । लित्स्वरः । गृत्सः । ' गृधु अभिकाङ्क्षायाम् ' । ' गृधिपण्योर्दकौ च ' इति सप्रत्ययो दकारश्चान्तादेशः । वृषादित्वात्

१. ख-ग-ज-ण-न-भ-स–ततः; च–तत् । २. ख-ग-घ-च-ज-ण-त-न-ल-स–' पर्वतस्य ' नास्ति । ३. घ-ल–उच्चैःस्थाने । ४. ज-ण–अभिषुतम् । ५. त-लङि रूपम् । ६. ख-ग-च-भ-स–सर्वतोऽदर्शयत्; घ-ज-ण–सर्वतो ददर्श; न–सर्वानदर्शयत् । ७ ज-ण–प्रयावयन् । ८. ख-ग-च-न-भ-स–' सन ' नास्ति ९. ल–इत्यस्मात् । १०. ज-ण–कवर्गान्तादेशश्च । ११. ज-ण-न-स–प्रयावयन् ।

आद्युदात्तः । पुरुधप्रतीकः । पुरुशब्दः[1] इह संख्यावाची[1] । ' संख्याया विधार्थे धा ' इति धाप्रत्ययः । ह्रस्वश्छान्दसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिन्द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥ ४ ॥

उग्रः । तुराषाट् । अभिभूतिऽओजाः । यथाऽवशम् । तन्वम् । चक्रे । एषः ।
त्वष्टारम् । इन्द्रः । जनुषा । अभिऽभूय । आऽमुष्य । सोमम् । अपिबत् । चमूषु ॥ ४ ॥

यः [v]एषः इन्द्रः [v]उग्रः शत्रूणां भयंकरः [v]तुराषाट् त्वरया[2] शत्रूणामभिभविता अत एव[2] [v]अभिभूत्योजाः[3] शत्रूणामभिभवनपराक्रमोपेतः सन् [v]तन्वम् आत्मीयं शरीरं [v]यथावशं [v]यथाकामं नानाविधरूपोपेतं [v]चक्रे । तथा च मन्त्रवर्णः—' रूपंरूपं मघवा बोभवीति ' (ऋ. सं. ३. ५३. ८) इति । सः [v]इन्द्रः [v]जनुषा जन्मना सामर्थ्येन [v]त्वष्टारं त्वष्टृनामकमसुरम् [v]अभिभूय [v]चमूषु चमसेषु स्थितम् [v]आमुष्य चोरयित्वा [v]सोममपिबत् । ' त्वष्टा हतपुत्रो वेन्द्रम् ' इत्यादि ' प्रासहा सोममपिबत् ' (तै. सं. २. ४. १२. १) इति तैत्तिरीयकम् ॥ तुराषाट् । ' जित्वरा संभ्रमे ' । क्विप् । ' उवरत्वर° ' इत्यादिना ऊठ् । सहेः ' छन्दसि सहः ' इति ण्विः । ' कर्तृकरणे कृता बहुलम् ' इति समासः । ' तत्पुरुषे कृति बहुलम् ' इति तृतीयायाः[4] अलुक् । ' सहेः साडः सः ' इति षत्वम् । कृदुत्तरपदस्वरः । यथावशम् । वशं काममनतिक्रम्य इत्यव्ययीभावसमासः । समासस्वरः । आमुष्य । ' मुष स्तेये ' । ल्यप् । चमूषु । ' चमु अदने ' । ' कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ' इत्यूप्रत्ययः । प्रत्ययस्वरः ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ५ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥५॥

सिद्धैषा[5] ॥ ॥ १२ ॥

' शंसा महाम् ' इति पञ्चर्चमेकादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम् । ' शंसा महाम् ' इत्यनुक्रमणिका । समूळ्हे दशरात्रेऽष्टमेऽहनि मरुत्वतीयशस्त्रे एतत्सूक्तम् । सूत्रितं च—' शंसा महां महश्चित्वमिन्द्र ' (आश्व. श्रौ. ८. ७) इति ॥

१. च—पुरुशब्दात् । २. घ-ज-ण—त्वरया शत्रूणां हन्ता; च—वेगसहनशीलः । ३. ख-ग-न-भ-ल-स—' अभिभूत्योजाः ' नास्ति । ४. ल—तृतीयाया अपि । ५. ख—पूर्वमेव व्याख्याता; ज-ण—सिद्धैषा पूर्ववत् ।

शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥ १ ॥

शंस । महाम् । इन्द्रम् । यस्मिन् । विश्वाः । आ । कृष्टयः । सोमऽपाः । कामम् । अव्यन् ।
यम् । सुऽक्रतुम् । धिषणे इति । विभ्वऽतष्टम् । घनम् । वृत्राणाम् । जनयन्त । देवाः ॥१॥

हे होतः [v]महां महान्तम् [v]इन्द्रं [v]शंस शस्त्रैः स्तुहि । [v]यस्मिन् इन्द्रे रक्षितरि सति [v]विश्वाः [v]कृष्टयः सर्वे मनुष्याः [v]सोमपाः यज्ञमनुष्ठाय सोमपाः सन्तः [v]कामम् । काम्यते इति कामः स्वर्गादिः । तम् [v]आ [v]अव्यन् सर्वतः प्राप्नुवन्ति । [v]धिषणे देवमनुष्यादीनां धारयित्र्यौ । यद्वा । प्रगल्भे समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ । [v]देवाः च [v]सुक्रतुम् । क्रतुः[1] कर्म जगत्पालनादि । शोभनः क्रतुर्यस्यासौ सुक्रतुः । तादृशं[1] [v]विभ्वतष्टं विभुना ब्रह्मणा तष्टं[2] जगदाधिपत्ये स्थापितं महान्तं [v]वृत्राणां पापरूपाणां [v]घनं हन्तारं [v]यम् इन्द्रं [v]जनयन्त अजनयन् ॥ शंस । ' शन्सु स्तुतौ ' इत्यस्य लोटि रूपम् । पादादित्वादनिघातः । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घः । अव्यन् । वी[3] कान्तिगत्यादिषु[3] । लङि रूपम् । यद्वृत्तयोगादनिघातः । अट्स्वरः । सुक्रतुम् । ' कृत्वादयश्च ' इत्युत्तरपदाद्युदात्तः । धिषणे । ' शिधृषा प्रागल्भ्ये ' इत्यस्मात् ' धृषेर्धिष च संज्ञायाम् ' इति क्युप्रत्ययः । धिष इत्यादेशः । प्रत्ययस्वरः । घनम् । हन्तेः ' पुंसि संज्ञायाम् ' इति घः । ' हो हन्तेः[4] ' इति कुत्वम् । प्रत्ययस्वरः । जनयन्त । जनेर्ण्यन्तस्य लङि रूपम् । यद्वृत्तयोगादनिघातः ॥

यं नु नाकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः ॥ २ ॥

यम् । नु । नाकिः । पृतनासु । स्वऽराजम् । द्विता । तरति । नृऽतमम् । हरिऽस्थाम् ।
इनऽतमः । सत्वऽभिः । यः । ह । शूषैः । पृथुऽज्रयाः । अमिनात् । आयुः । दस्योः ॥२॥

[v]पृतनासु । व्याप्रियन्तेऽत्र योद्धार इति पृतनाः संग्रामाः । तेषु [v]स्वराजं [v]हरिष्ठां हरिस्थां हरियुक्ते[5] रथे[5] वर्तमानं [v]नृतमं बलस्य युद्धे नेतृतमं [v]द्विता युद्धमासाद्य सेनां द्विधा कृत्वा वर्तमानं [v]यम् इन्द्रं [v]नकिः न कश्चिदपि [v]तरति उत्तीर्यं गच्छति । न कोऽप्यभ्यस्ति[6] इत्यर्थः । [v]नु प्रसिद्धौ । स इन्द्रः [v]इनतमः अतिशयेन सेनास्वामी [v]सत्वभिः परितः सीदद्भिर्मरुद्भिः सह[7] [v]यः यान् गच्छन् [v]शूषैः । शोषयन्ति परबलानीति शूषाणि बलानि । तैः [v]पृथुज्रयाः युद्धं प्रति तीव्रवेगः सन् [v]दस्योः शत्रोः [v]आयुः अन्नं प्राणं वा [v]अमिनात्[7] संग्रामेषु मिनाति हिनस्ति[7] । [v]ह प्रसिद्धौ । अत्र निरुक्तं—

---

१. ख-ग-घ-च-ज-ण-फ-भ—शोभनक्रतुम् । २. न-स—' तष्टं ' नास्ति । ३. ख-ग-च-ज-ण-न-भ-स—' वी कान्तिगत्यादिषु ' नास्ति । ४. ख-ग-च-ज-ण—हरियुक्तरथे । ५. ख-ग-च-ज-ण-त-न-फ-भ-ल-स—कोऽप्यस्ति; घ-प—कोऽपि । ६. ख-ग-घ-च-ज-ण-न-भ-ल-स—' सह ' नास्ति । ७. ख-ग-न-भ-स—मिनाति हिनस्ति; घ—अमिनात् संग्रामेषु हिनस्ति; च-ल—अमिनात् हिनास्ति ।

' पृथुज्रयाः पृथुजवः । पृथुज्रया अमिनादायुर्दस्योः । प्रामापयदायुर्दस्योः ' (निरु. ५. ९) इति ॥ तरति । ' तॄ प्लवनतरणयोः ' इत्यस्य लटि रूपम् । यदवृत्तयोगादनिघातः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यः । ' या प्रापणे ' । औणादिकः कप्रत्ययः । आतो लोपः । प्रत्ययस्वरः ॥

सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥ ३ ॥

सहऽवा । पृत्ऽसु । तरणिः । न । अर्वा । विऽआनशिः । रोदसी इति । मेहनाऽवान् ।
भगः । न । कारे । हव्यः । मतीनाम् । पिताऽइव । चारुः । सुऽहवः । वयःऽधाः ॥ ३ ॥

य इन्द्रः सहावा[1] बलवान् पृत्सु संग्रामेषु तरणिः । शत्रूनुत्तीर्य वर्तते इति तरणिः । तत्र दृष्टान्तः अर्वा न । यथार्वा बलवानश्वः शत्रुबलं तरति तथा रोदसी द्यावापृथिव्यौ व्यानशिः व्याप्नुवन् मेहनावान् । मिह्यते सिच्यते दीयतेऽर्थिभ्य इति मेहनं धनम् । तद्वान्भवति । तादृश इन्द्रः कारे । क्रियते इति कारो यज्ञादिः । तस्मिन् यज्ञे भगो न पूषा देव इव हव्यः हवनीयः मतीनां स्तोतॄणां स्तुतीनां वा पितेव पालयिता चारुः कमनीयः सुहवः सुष्ठ्वाह्वानोपेतः वयोधाः अन्नस्य[2] दाता[2] भवति ॥ सहावा । सहोऽस्यास्तीति मतुबर्थे ' छन्दसीवनिपौ ' इति वनिप् । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घः । पृत्सु । पृतनाशब्दस्य सौ परतः ' मांस्पृत्स्नूनामुपसंख्यानम् ' इति पृदादेशः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । व्यानशिः । ' अशू व्याप्तौ ' इत्यस्मात् छन्दसि सदादित्वात् किप्रत्ययः । तस्य लिङ्वद्भावः । ' अत आदेः ' इत्यभ्यासस्य दीर्घे कृते ' अश्नोतेश्च ' इति नुडागमः । प्रादिसमासः । कारे । करोतेः कर्मणि घञ् । ' कर्षात्वतो घञोऽन्त उदात्तः ' इत्यन्तोदात्तत्वम् । हव्यः । जुहोतेः ' अचो यत् ' । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । सुहवः । ह्वयतेः ' भावेऽनुपसर्गस्य ' (पा. सू. ३. ३.७५) इत्यप्प्रत्ययः । संप्रसारणम् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । ' आद्युदात्तं द्व्यच्छन्दसि ' इति बहुव्रीहौ उत्तरपदाद्युदात्तत्वम् ॥

धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥ ४ ॥

धर्ता । दिवः । रजसः । पृष्टः । ऊर्ध्वः । रथः । न । वायुः । वसुऽभिः । नियुत्वान् ।
क्षपाम् । वस्ता । जनिता । सूर्यस्य । विऽभक्ता । भागम् । धिषणाऽइव । वाजम् ॥ ४ ॥

स इन्द्रः दिवः द्युलोकस्य रजसः अन्तरिक्षस्य च धर्ता धारकः पृष्टः[3] सर्वत्र वर्तमानः रथो न तदीयो रथ इव ऊर्ध्वः वायुः ऊर्ध्वगन्ता वसुभिः सहायतया निवसद्भिः मरुद्भिः[4]

---

१. ख-ग-च-ण-फ-भ–सहावा सहायवान् ; घ-ज-प–सहावा सहावान् । २. ख-ग-च-ज-ण–अन्नदाता । ३. त–पृष्टः व्याप्तः । ४. ख-ग-घ-च-ज-ण-न-भ-ल-स–' मरुद्भिः ' नास्ति ।

[V]नियुत्वान् सहायवान्। यद्वा नेत्ययमुत्तरेणापि संबध्यते। यथा वायुर्नियुत्वान् नियुक्तामकवडवाभिः तद्वान् एवमिन्द्रो वसुभिर्मरुद्भिः सहायवान्। तथा [V]क्षपां [V]वस्ता रात्रिमाच्छादयन् [V]सूर्यस्य जगत्प्रकाशकस्यादित्यस्य [V]जनिता जनयिता [V]भागं भजनीयं [V]वाजं कर्मफलरूपमन्नं [V]विभक्ता साधु विभागकर्ता भवति। तत्र दृष्टान्तः। [V]धिषणेव। यथा आढ्यानां वाक् अस्येदमिति विभागं करोति तद्वत्॥ रजसः। 'रञ्ज रागे' इत्यस्मात् 'भूरञ्जिभ्यां कित्' (उ. सू. ४. ६५६) इत्यसुन्। कित्त्वान्नलोपः। रज्यते प्रकाशेनेति रजोऽन्तरिक्षम्। नित्त्वादाद्युदात्तः। वस्ता। 'वस आच्छादने' इत्यस्य तृचि रूपम्। जनिता। जनयतेस्तृचि 'जनिता मन्त्रे' इति निपातनात् णिलोपः। चित्त्वादन्तोदात्तः। विभक्ता। 'भज सेवायाम्' इत्यस्य साधुकारिण्यर्थे तृन्। 'एकाच उपदेशे' इतीट्प्रतिषेधः। 'तादौ च निति कृत्यतौ' इति गतेः प्रकृतिस्वरत्वम्॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ ५॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ।
शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥५॥

'शुनं हुवेम' इति पूर्ववत्'॥ ॥ १३ ॥

'इन्द्रः स्वाहा' इति पञ्चर्चं द्वादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम्। दशरात्रे नवमेऽहनि मरुत्वतीयशस्त्रे इदं सूक्तम्। सूत्रितं च-'तृतीयस्येन्द्रः स्वाहा गायत्साम' (आश्व. श्रौ. ८. ७) इति॥

इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान्।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः१ः कामंमृध्याः॥ १॥

इन्द्रः। स्वाहा। पिबतु। यस्य। सोमः। आऽगत्य। तुम्रः। वृषभः। मरुत्वान्।
आ। उरुऽव्यचाः। पृणताम्। एभिः। अन्नैः। आ। अस्य। हविः। तन्वः। कामम्। ऋध्याः॥१॥

अयम् [V]इन्द्रः [V]स्वाहा स्वाहाकृतमिमं सोमं [V]पिबतु। [V]यस्य इन्द्रस्यायं [V]सोमः स इन्द्रो यज्ञं प्रति [V]आगत्य [V]तुम्रः कर्मविघ्नकारिणां हिंसकः [V]वृषभः यष्टृणामभिमतफलवर्षकः [V]मरुत्वान् मरुन्निस्तद्वान् [V]उरुव्यचाः प्रभूतव्याप्तिः सन् [V]एभिः अस्माभिर्दत्तैः [V]अन्नैः सोमादिलक्षणैर्हविर्भिः [V]आ [V]पृणतां समन्तात् परयतु। ततः [V]अस्य इन्द्रस्य संबन्धिनः [V]तन्वः शरीरस्य [V]कामं पुष्ट्यादिलक्षणविषयमभिलाषं [V]हविः अस्माभिर्दत्तम् [V]आ [V]ऋध्याः सर्वतः पूरयतु॥ तुम्रः। तुमिराहननार्थः। उरुव्यचाः। व्यचेरसुन्। 'व्यचेः कुटादिरवमनसीति वक्तव्यम्' इत्यत्र 'अनसि' इति पर्युदासात् ङित्त्वाभावः। कृदुत्तरस्वरः। ऋध्याः। ऋध्नोतेः आशीर्लिङि रूपम्॥

१. ख-एवं पूर्वं व्याख्याता; स-सिद्धम्।

आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।
इह त्वा धेयुर्हरयः सुशिप्र पिबा त्वस्य सुषुतस्य चारोः ॥ २ ॥

आ । ते । सपर्यू इति । जवसे । युनज्मि । ययोः । अनु । प्रऽदिवः । श्रुष्टिम् । आवः ।
इह । त्वा । धेयुः । हरयः । सुऽशिप्र । पिब । तु । अस्य । सुऽसुतस्य । चारोः ॥ २ ॥

हे इन्द्र ᵛते तव ᵛजवसे यज्ञं प्रत्यागमनाय ᵛसपर्यू परिचारकौ[1] हरी ᵛआ ᵛयुनज्मि रथे योजयामि । ᵛप्रदिवः पुरातनस्त्वं ᵛययोः अश्वयोः ᵛश्रुष्टिं वेगम् । 'श्रुष्टीति क्षिप्रनाम' इति यास्कः । तम् ᵛअनु ᵛआवः अनुगच्छसि । हे ᵛसुशिप्र शोभनहनो इन्द्र ᵛहरयः रथे योजितास्तेऽश्वाः ᵛइह कर्मणि ᵛत्वा त्वां ᵛधेयुः यज्ञं प्रति धारयन्तु । तत आगतस्त्वं ᵛसुषुतस्य सुष्ठ्वभिषुतं ᵛचारोः कमनीयम् ᵛअस्य इमं सोमं ᵛनु क्षिप्रं ᵛपिब ॥ सपर्यू । सपरशब्दः कण्ड्वादिः । तदन्तात्[2] औणादिकः कुप्रत्ययः । आवः । अव रक्षणादिषु । छान्दसे लङि रूपम् । यदवृत्तयोगात् अनिघातः । धेयुः । दधातेराशीर्लिङि 'किदाशिषि' इति यासुट् । 'एर्लिङि' (पा. सू. ६. ४. ६७) इत्येकारादेशः । निघातः । पिब । पादादित्वादनिघातः । सुषुतस्य[3] । 'षुञ् अभिषवे' । कर्मणि क्तः । 'गतिरनन्तरः' इति गतिस्वरः । 'उपसर्गात्सुनोति०' इत्यादिना संहितायां षत्वम् ॥

गोभिर्मिमिक्षुं दधिरे सुपारमिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मन्दानः सोमं पपिवाँ ऋजीषिन्त्समस्मभ्यं पुरुधा गा इषण्य ॥ ३ ॥

गोभिः । मिमिक्षुम् । दधिरे । सुऽपारम् । इन्द्रम् । ज्यैष्ठ्याय । धायसे । गृणानाः ।
मन्दानः । सोमम् । पपिऽवान् । ऋजीषिन् । सम् । अस्मभ्यम् । पुरुधा । गाः । इषण्य ॥ ३ ॥

ᵛगृणानाः स्तोत्रं कुर्वाणा ऋत्विजः ᵛमिमिक्षुं स्तोतृणामभिमतफलं वर्षितुमिच्छन्तं ᵛसुपारं शोभनपारम् । स्तुतिभिरभिमुखीकर्तुं शक्यमित्यर्थः । तादृशम् ᵛइन्द्रं ᵛज्यैष्ठ्याय धनादिसंपत्त्या श्रेष्ठत्वाय ᵛधायसे चिरकालमायुर्धारणाय च ᵛगोभिः गोमिश्रितैः सोमैः ᵛदधिरे धारयन्ति । शेषः प्रत्यक्षः । हे ᵛऋजीषिन् सोमवन्निन्द्र स त्वं ᵛमन्दानः मोदमानः ᵛसोमं ᵛपपिवान् सोमस्य पाता सन् स्तोतृभ्यः ᵛअस्मभ्यं ᵛपुरुधा बहुधा ᵛगाः अग्निहोत्रादिकर्मसिद्ध्यर्थं धेनूः ᵛसम् ᵛइषण्य सम्यक् प्रेरय ॥ गोभिः । 'सावेकाचः०' इति विभक्तेरुदात्तत्वे प्राप्ते 'न गोश्वन्साववर्ण०' इति प्रतिषेधः । मिमिक्षुम् । 'मिह सेचने' इत्यस्य सनि 'एकाचः०' (पा. सू. ७. २. १०) इतीट्प्रतिषेधे 'हलन्ताच्च' इति किद्भावः । 'सनाशंसभिक्ष उः' । प्रत्ययस्वरः । ज्यैष्ठ्याय । ज्येष्ठस्य भाव इत्यर्थे ब्राह्मणादित्वात् ष्यञ् । जित्त्वादाद्युदात्तः । गृणानाः । 'गृ शब्दे' । क्र्यादित्वात् श्ना । चित्त्वादन्तोदात्तः । मन्दानः । मदि स्तुत्यादिषु इत्यस्य शानचि 'बहुलं छन्दसि' इति शपो लुक् । पुरुधा । पुरुशब्दः

१. ख-ग-च-फ–सपरिचारकौ; ज-ण-सपरिचारकौ; न-ल-स–परिवारकौ । २. च-फ–ततः । ३. त–सुसुतस्य ।

इह संख्यावाची। 'संख्याया विधार्थे धा' इति धाप्रत्ययः। इषण्य। 'इष[१] गतौ'। इषणमिच्छतीति छन्दसि परेच्छायां क्यच्। तदन्तादन्तर्भावितण्यर्थाल्लोटि रूपम्॥

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन्॥ ४॥

इमम्। कामम्। मन्दय। गोभिः। अश्वैः। चन्द्रऽवता। राधसा। पप्रथः। च।
स्वःऽयवः। मतिऽभिः। तुभ्यम्। विप्राः। इन्द्राय। वाहः। कुशिकासः। अक्रन्॥ ४॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ ५॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ।
शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥५॥

एते व्याख्याते॥ ॥ १४ ॥

'चर्षणीधृतम्' इति द्वादशर्चं त्रयोदशं सूक्तं वैश्वामित्रमैन्द्रम्। अत्रानुक्रमणिका—'चर्षणीधृतं द्वादशाद्यान्त्यौ तृचौ जागतगायत्रौ' इति। आद्यस्तृचो जागतोऽन्त्यस्तृचो गायत्रः। शिष्टा ऋचस्त्रिष्टुभः। सूक्तविनियोगो लैङ्गिकः। उक्थे क्रतौ मैत्रावरुणशस्त्रेऽनुरूपतृचानन्तरमाद्यस्तृचः शंसनीयः। सूत्रितं च—'चर्षणीधृतमस्तभ्नादित्यामसुर इति तृचौ' (आश्व. श्रौ. ६. १) इति। विष्णुवति निष्केवल्ये 'नृणामु त्वा' इति तृचः। 'विष्णुवान्' इति खण्डे सूत्रितं—'नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तिस्रः' (आश्व. श्रौ. ८. ६) इति। बृहस्पतिसवे अप्ययं[२] तृचो निष्केवल्ये निविद्धानीयः। सूत्रितं च—'नृणामु त्वेति मध्यंदिनः[३]' (आश्व. श्रौ. ९. ५) इति। महाव्रतेऽपि निष्केवल्येऽयं तृचः। दशरात्रे चतुर्थेऽहनि मरुत्वतीये 'इन्द्र मरुत्वः' इति तिस्रः। षष्ठेऽहनि 'षष्ठस्य' इति खण्डे सूत्रितम्—'इन्द्र मरुत्व इति तिस्र इति मरुत्वतीयम्' (आश्व. श्रौ. ८. १) इति। बृहस्पतिसवेऽपि मरुत्वतीयशस्त्रे[४] अयं तृचो निविद्धानीयः। सूत्रितं च—'इन्द्र मरुत्व इह नृणामु त्वेति मध्यंदिनः[५]' (आश्व. श्रौ. ९. ५) इति। आद्या मरुत्वतीयग्रहस्यानुवाक्या। सूत्रितं च—'मरुत्वतीयेन ग्रहेण चरन्तीन्द्र मरुत्व इह पाहि सोमम्' (आश्व. श्रौ. ५. १४) इति। तृतीये पर्याये होतुः शस्त्रे 'इदं ह्यन्वोजसा' इति स्तोत्रियस्तृचः। सूत्रितं च—'इदं ह्यन्वोजसा महाँ इन्द्रो य ओजसा' (आश्व. श्रौ. ६. ४) इति॥

१. ख-ग-ज-ण-त-न-भ-ल-स-इषु। २. ख-ग-ज-एवायम्; च-चायम्। ३. ख-ग-च-ज-ण-न-भ-स-माध्यंदिनः। ४. ग-च-ज-ण-मरुत्वतीयगृहस्य शस्त्रे। ५. ख-ग-च-ज-न-भ-स-माध्यंदिनः।

चर्षणीधृतं मघवानमुक्थ्यमिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ १ ॥

चर्षणिऽधृतम् । मघऽवानम् । उक्थ्यम् । इन्द्रम् । गिरः । बृहतीः । अभि । अनूषत ।
ववृधानम् । पुरुऽहूतम् । सुवृक्तिऽभिः । अमर्त्यम् । जरमाणम् । दिवेऽदिवे ॥ १ ॥

[v]बृहतीः प्रभूताः [v]गिरः अस्मदीयाः स्तुतिलक्षणा वाचः [v]चर्षणीधृतं चर्षणीनां मनुष्याणामभिमतफलप्रदानेन धारकं पोषकम् । यद्वा । आकृष्टन्त्यनेन सर्वमिति चर्षणि बलं तद्धारकम् । [v]मघवानं धनवन्तम् [v]उक्थ्यम् उक्थैः शस्त्रैः शंसनीयं [v]वावृधानं बलधनादिसंपत्त्या प्रतिक्षणं वर्धमानं [v]पुरुहूतं स्तोतृभिर्बहुवारमाहूतम् [v]अमर्त्यं मरणधर्मरहितं [v]सुवृक्तिभिः शोभनस्तुतिवाक्यैः [v]दिवेदिवे प्रत्यहं [v]जरमाणं स्तूयमानं तमिमम् [v]इन्द्रम् [v]अभ्यनूषत अभितः सर्वतः स्तुवन्तु ॥ बृहतीः । ' वा छन्दसि ' इति सवर्णदीर्घः । अनूषत । ' णू स्तवने ' । अस्मात्लुङि सिच् । धातोः कुटादित्वात् सिचो ङित्त्वेन गुणाभावः । सुवृक्तिभिः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । यद्वा । सुवृक्तय इति स्तुतिकरणभूताः[1] ऋचो वृक्तिशब्देनोच्यन्ते । ' क्तिच्क्तौ च° ' इति क्तिच् । कृत्स्वरेणान्तोदात्तः । दिवेदिवे । ' नित्यवीप्सयोः ' इति द्विर्वचनम् । परस्यात्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः ॥

शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।
वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् ॥ २ ॥

शतऽक्रतुम् । अर्णवम् । शाकिनम् । नरम् । गिरः । मे । इन्द्रम् । उप । यन्ति । विश्वतः ।
वाजऽसनिम् । पूःऽभिदम् । तूर्णिम् । अप्ऽतुरम् ।
धामऽसाचम् । अभिऽसाचम् । स्वःऽविदम् ॥ २ ॥

[v]मे मदीयाः [v]गिरः स्तुतिलक्षणा वाचः [v]शतक्रतुम् । शतं क्रतवो यज्ञा यस्य तम् । [v]अर्णवं पर्जन्यात्मना उदकवन्तं [v]शाकिनम् । शक्नोत्येभिरिन्द्र इति शाकाः सहायभूता मरुतः । तद्वन्तं [v]नरं सर्वस्य जगतो नेतारं [v]वाजसनिं वाजस्यान्नस्य दातारं [v]पूर्भिदं शत्रुपुराम्[2] भेत्तारं [v]तूर्णिं युद्धं प्रति शीघ्रं गन्तारम् [v]अप्तुरं मेघभेदनद्वारा अपां प्रेरकं [v]धामसाचं तेजो भजमानम् । यद्वा धनं धाम । तदर्थिभिः[3] सह योजयितारम् । [v]अभिषाचं शत्रूणामभिभवितारं [v]स्वर्विदं स्वर्गस्य लम्भकं तमिमम्[4] [v]इन्द्रं [v]विश्वतः सर्वतः[5] [v]उप [v]यन्ति उपगच्छन्तु ॥ अर्णवम् । अर्णोऽस्यास्तीति मत्वर्थे ' अर्णसः सलोपश्च ' इति वप्रत्ययः सकारलोपश्च । प्रत्ययस्वरः । नरम् । ' नयतेर्डिच्च ' इति ऋप्रत्ययः । अमः सुप्त्वादनुदात्तत्वे प्रत्ययस्वरः । यन्ति । ' इण् गतौ ' इत्यस्य लटि ' इणो यण् '

१. ख-ग-च-ज-ण-न-भ–करणभूताः । २. ख-ग-ज-ण–शत्रुपुरः । ३. ख-ग-च-भ–तदेभिः; ज-ण–तर्दभिः । ४. ख-ग-च-ज-ण-त-न-भ-स–तम् । ५. ख-ग-च-ज-ण-ल–' सर्वतः ' नास्ति ।

इति यण्। निघातः। वाजसनिम्। ' षणु दाने '। ' खनिकष्यञ्यसिवसि° ' इत्यादिना इप्रत्ययः। ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्। तूर्णिम्। ' ऋित्वरा संभ्रमे '। ' वहिश्रि° ' इत्यादिना निप्रत्ययः। ' ज्वरत्वर° ' इत्यादिना ऊठ्। ' नित् ' इत्यतिदेशादाद्युदात्तः। असुरम्। ' तुर त्वरणे '। क्विप्। कृदुत्तरपदस्वरः। अभिषाचम्। ' षच समवाये '। ण्यन्तस्य[1] क्विप्॥

आ॒ऽकरे॒ वसो॑र्जरि॒ता प॑नस्यतेऽने॒हस॒ः स्तुभ॒ इन्द्रो॑ दुवस्यति।
वि॒ऽवस्व॑तः सद॑न॒ आ हि पि॑प्रि॒ये स॑त्रा॒साह॑मभिमाति॒हनं॑ स्तुहि॥ ३॥

आऽकरे। वसोः। जरिता। पनस्यते। अनेहसः। स्तुभः। इन्द्रः। दुवस्यति।
विऽवस्वतः। सदने। आ। हि। पिप्रिये। सत्राऽसहम्। अभिमातिऽहनम्। स्तुहि॥ ३॥

[v]जरिता शत्रूणां जरयिता[2] [v]इन्द्रः [v]आकरे। आकीर्यते युद्धार्थं धनमत्रेत्याकरो युद्धम्। तस्मिन् [v]वसोः धनस्य स्थानभूते युद्धे [v]पनस्यते सर्वैः स्तूयते। यद्वा वसोः। वसत्याभिमुख्येन तिष्ठतीति वसुः शत्रुः तस्य जरयितेति योजनीयम्। स इन्द्रः [v]अनेहसः अपापाः [v]स्तुभः स्तुतीः [v]दुवस्यति परिचरति। तासां फलं प्रयच्छन् पूजयतीत्यर्थः। किंच स इन्द्रः [v]विवस्वतः विशेषेण अग्निहोत्रार्थं वसतो हविष्मतो वा यजमानस्य [v]सदने गृहे [v]आ [v]पिप्रिये [v]हि सोमपानादिना अत्यन्तं[3] प्रीतो भवति खलु। [v]सत्रासाहं[4] शत्रूणामेव हन्तारं यद्वा मरुद्भिः सह शत्रूणामभिभवितारम् अत एव [v]अभिमातिहनं शत्रूणां हन्तारमिन्द्रं [v]स्तुहि हे विश्वामित्रेति॥ आकरे। ' कॄ विक्षेपे '। अधिकरणे ' ऋदोरप् ' इत्यप्। थाथादिस्वरेणान्तोदात्तः। जरिता। ' जॄष् वयोहानौ ' इत्यस्यान्तर्भावितण्यर्थस्य तृचि रूपम्। चित्त्वादन्तोदात्तः। पनस्यते। पनस्यतिः स्तुतिकर्मा। तस्य कर्मणि लटि रूपम्। निघातः। अनेहसः। हन्तेर्नञि उपपदे ' नञि हन एह च ' (उ. सू. ४. ६६३) इत्यसिप्रत्ययः एह इत्ययं चादेशो धातोः। ' नञ्सुभ्याम् ' इति स्वरेणान्तोदात्तः। स्तुभः। स्तोभतिः अर्चतिकर्मा[5]। क्विप्। दुवस्यति। दुवः परिचरणमात्मन इच्छतीत्यर्थे क्यच्। निघातः। पिप्रिये। ' प्रीङ् तर्पणे '। लिटि रूपम्। हियोगादनिघातः॥

नृ॒णामु॒ त्वा॒ नृत॑मं गी॒र्भिरु॒क्थैर॒भि प्र वी॒रम॑र्चता स॒बाध॑ः।
सं सह॑से पुरु॒मा॒यो जि॑हीते॒ नमो॑ अस्य॒ प्रदि॑व॒ एक॑ ईशे॥ ४॥

नृणाम्। ऊँ इति। त्वा। नृऽतमम्। गीःऽभिः। उक्थैः। अभि। प्र। वीरम्। अर्चत। सऽबाधः।
सम्। सहसे। पुरुऽमायो। जिहीते। नमः। अस्य। प्रऽदिवः। एकः। ईशे॥ ४॥

हे इन्द्र [v]सबाधः। रक्षोघ्नमन्त्रोच्चारणेन तद्विषयबाधया सह वर्तन्त इति सबाधः ऋत्विजः। [v]नृणां [v]नृतमं मनुष्याणामतिशयेन स्वस्वकर्मणि[6] नेतारं [v]वीरं सामर्थ्योपेतं [v]त्वा[7] त्वां [v]गीर्भिः

१. ज–ण्यन्तात्। २. ज–ण–जरिता जरयिता। ३. ख-ग-च-ज-ण-फ-भ–आसमन्तम्। ४. त–सत्रासाहं सत्यमेव। ५. ज-ण–स्तुतिकर्मा। ६. ख-ग-च-ज-ण-न-फ-भ-स–स्वकर्मणि। ७. ख-ग-च-न-फ-भ-ल-स–' त्वा ' नास्ति।

स्तुतिसाधनभूतैर्वाक्यैः ᵛउक्थैः शस्त्रैश्च ᵛअभि आभिमुख्येन ᵛप्र ᵛअर्चत प्रकर्षेणार्चन्ति । ᵛपुरुमायः बृत्रहननादिबहुकर्मा स इन्द्रः ᵛसहसे बलाय ᵛसं ᵛजिहीते गमनोद्यमं करोति । किंच ᵛप्रदिवः पुरातनः ᵛएकः असहायः स इन्द्रः ᵛनमः नमसः ᵛअस्य हविर्लक्षणस्यान्नस्य ᵛईशे इष्टे । यद्वा अस्य सर्वस्य जगत ईष्टे । तस्मै[1] इन्द्राय नमः ॥ नृणाम् । ' नामन्यतरस्याम् ' इति विभक्तेरुदात्तत्वम् । अर्चत । अर्चतेर्लेटि झेस्तादेशः ' तिङां तिङो भवन्ति ' इति वचनात् । सबाधः । ' बाधृ विलोडने ' । क्विप् । ' वोपसर्जनस्य ' इति सहस्य सत्वम् । कृदुत्तरपदस्वरः । पुरुमायः । ' अन्तोदात्तप्रकरणे त्रिचक्रादीनामुपसंख्यानम् ' इत्यन्तोदात्तत्वम् । ईशे । ' ईश ऐश्वर्ये ' इत्यस्य लटि ' लोपस्त आत्मनेपदेषु ' इति तलोपः । निघातः ॥

पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इन्द्राय द्यावः ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ॥ ५ ॥

पूर्वीः । अस्य । निःऽसिधः । मर्त्येषु । पुरु । वसूनि । पृथिवी । बिभर्ति ।
इन्द्राय । द्यावः । ओषधीः । उत । आपः । रयिम् । रक्षन्ति । जीरयः । वनानि ॥ ५ ॥

ᵛमर्त्येषु मनुष्येषु ᵛअस्य इन्द्रस्य[2] ᵛनिष्षिधः अनुशासनानि ᵛपूर्वीः हितोपदेशादिभिः प्रभूतानि नानाप्रकाराणि भवन्ति । इन्द्रस्य शासितृत्वे मन्त्रः—' उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ' (ऋ. सं. १. १०. ५) इति । तथा शासकाय तस्मै ᵛइन्द्राय ᵛपृथिवी ᵛपुरु पुरूणि बहूनि ᵛवसूनि धनानि ᵛबिभर्ति अन्तर्धारयति । किंच ᵛद्यावः द्युलोकाः ᵛओषधीः ओषधयः ᵛउत अपि च ᵛआपः जलानि ᵛजीरयः । जीर्यन्त इति जीरयो मनुष्याः । ᵛवनानि वृक्षाश्च एते सर्वे इन्द्रस्याज्ञया तदुपभोगयोग्यं ᵛरयिं धनं ᵛरक्षन्ति ॥ निष्षिधः । ' षिधु गत्याम् ' । क्विप् । संहितायां निसः सकारेण हणो व्यवधानं[3] छान्दसत्वात् अनादृत्य[4] ' उपसर्गात्सुनोति° ' इत्यादिना षत्वम्* । निसः सकारस्य ' ष्टुना ष्टुः ' इति षत्वम् ॥ ॥ १५ ॥

तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्याऽपिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥ ६ ॥

तुभ्यम् । ब्रह्माणि । गिरः । इन्द्र । तुभ्यम् । सत्रा । दधिरे । हरिऽवः । जुषस्व ।
बोधि । आपिः । अवसः । नूतनस्य । सखे । वसो इति । जरितृऽभ्यः । वयः । धाः ॥ ६ ॥

हे ᵛहरिवः अश्ववन् ᵛइन्द्र ᵛतुभ्यं त्वदर्थं ᵛब्रह्माणि स्तोत्राणि तथा ᵛतुभ्यं ᵛगिरः शस्त्राणि च ᵛसत्रा सत्यमेव ᵛदधिरे ऋत्विजो धारयन्ति । तानि ᵛजुषस्व सेवस्व । हे ᵛवसो सर्वस्य वासयितः

१. त-तस्मात् । २. ख-ग-च-त-फ-भ-इन्द्रस्य पूर्वीः । ३. ज-ण—व्यवधानेऽपि । ४. ज-ण—' अनादृत्य ' नास्ति । *' विप्रतिषिद्धं चानधिकरणवाचीति सूत्रे दर्शनात् उपसर्गादिति सूत्रे गुणरक्षितस्यापि ग्रहणं कदाचिदिति ' इत्ययं पाठः ज-पुस्तके टिप्पणीरूपेण निविष्टः ।

[v]सखे सखिभूत हे इन्द्र [v]आपिः व्याप्तस्त्वं [v]नूतनस्य[1] नवतरम्[2] [v]अवसः अन्नलक्षणं हविः [v]बोधि त्वदर्थं दीयमानं जानीहि । अतस्त्वं [v]जरितृभ्यः स्तोतृभ्योऽस्मभ्यं [v]वयः अन्नं [v]धाः देहि ॥ तुभ्यम् । ' ङयि च ' इत्याद्युदात्तत्वम् । जुषस्व । ' जुषी प्रीतिसेवनयोः ' इत्यस्य लोटि रूपम् । वाक्यभेदात् अनिघातः । बोधि । ' बुध अवगमने ' इत्यस्य लोटि ' वा छन्दसि ' इति हेर्विकल्पेन ङित्त्वादत्र पित्त्वात् गुणः[3] । ' हुझल्भ्यो हेर्धिः ' इति ध्यादेशः । ङित्त्वादन्तोदात्तः ॥

इन्द्रं मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥ ७ ॥

इन्द्र । मरुत्वः । इह । पाहि । सोमम् । यथा । शार्याते । अपिबः । सुतस्य ।
तव । प्रऽनीती । तव । शूर । शर्मन् । आ । विवासन्ति । कवयः । सुऽयज्ञाः ॥ ७ ॥

हे [v]मरुत्वः मरुद्भिस्तद्वन् हे [v]इन्द्र त्वम् [v]इह अस्मदीये यज्ञे आगत्य [v]सोमं [v]पाहि पिब । [v]यथा त्वं पूर्वं [v]शार्याते शार्यातेः पुत्रे तस्मिन् राजनि यज्ञं कुर्वाणे [v]सुतस्य अभिषुतं सोमम् [v]अपिबः तथा अत्रापि[4] पिबेत्यर्थः । इन्द्रः शार्यातस्य यज्ञे सोमरसानपिबदित्येषोऽर्थः कौषीतके स्पष्टमुक्तः । तथा मन्त्रवर्णश्च—' आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे ' (ऋ. सं. १. ५१. १२) इति । हे [v]शूर इन्द्र [v]तव संबन्धिनि [v]शर्मन् शर्मणि निर्बाधस्थाने स्थिताः [v]सुयज्ञाः सुष्ठुकृतयज्ञाः [v]कवयः मेधाविनो यजमानाः [v]प्रणीती तव हविषां प्रणयनेन प्रापणेन [v]आ समन्तात् [v]विवासन्ति त्वामेव परिचरन्ति । विवासतिः परिचरणकर्मा ॥ शार्याते । शर्यातेरयमित्यर्थे ' तस्येदम् ' इत्यण्प्रत्ययः । अपिबः । यथायोगादनिघातः । अडागमस्वरः । प्रणीती । नयतेर्भावे क्तिन् । ' तादौ च निति कृति° ' इति गतेः प्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति तृतीयायाः सवर्णदीर्घः । ' उपसर्गादसमासेऽपि°[6] ' इति[6] णत्वम् ॥

स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।
जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥ ८ ॥

सः । वावशानः । इह । पाहि । सोमम् । मरुत्ऽभिः । इन्द्र । सखिऽभिः । सुतम् । नः ।
जातम् । यत् । त्वा । परि । देवाः । अभूषन् । महे । भराय । पुरुऽहूत । विश्वे ॥ ८ ॥

हे [v]इन्द्र [v]वावशानः सोमं कामयमानः [v]सः तादृशस्त्वं [v]सखिभिः समानख्यानैः [v]मरुद्भिः सह [v]नः अस्मत्संबन्धिनि [v]इह अस्मिन् यज्ञे [v]सुतम् अभिषुतं [v]सोमं [v]पाहि पिब । हे [v]पुरुहूत पुरुभिः बहुभिः[7] आहूतेन्द्र [v]जातं सोमपानेन[8] प्रबलं संपन्नं [v]यत् यं त्वां [v]विश्वे सर्वे [v]देवाः [v]महे महते

१. ज–नूतनम् । २. ख-ग-च-ण-फ-भ-स–नवतरस्य । ३. ख-ग-च-भ–गुणः कृतः । ४. ख-ग-घ-च-ज-ण-न-फ-भ-ल-स–अत्र । ५. ख-ग-च-ज-ण-भ–प्रकृतिः । ६. ख-ग-च-न-फ-भ–असमासेऽपि; त-ल-स–असमासेति । ७. ख-ग-च-न-फ-भ-स–' बहुभिः ' नास्ति । ८. न-ल-स–पानेन ।

vभराय । ह्रियन्ते योधानामायूंष्यत्रेति भरः संग्रामः । तस्मै संग्रामाय vपरि vअभूषन् सर्वतोऽलमकुर्वन्॥ वावशानः । वशेर्यङ्लुकि चानशि रूपम् । चित्त्वादन्तोदात्तः । अभूषन् । ' भूष अलंकारे ' । भूवादिः । लङि रूपम् । यद्योगादनिघातः । भराय । ' हृञ् हरणे ' । अधिकरणे घः । ' हृग्रहोर्भश्छन्दसि ' इति हकारस्य भकारः । वृषादित्वादाद्युदात्तः ॥

अस्यूर्यं मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः ।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥ ९ ॥

अप्ऽतूर्ये । मरुतः । आपिः । एषः । अमन्दन् । इन्द्रम् । अनु । दातिऽवाराः ।
तेभिः । साकम् । पिबतु । वृत्रऽखादः । सुतम् । सोमम् । दाशुषः । स्वे । सधऽस्थे ॥९॥

हे vमरुतः यः vएषः इन्द्रः vअसूर्ये अपां प्रेरणे vआपिः युष्माकं सखा सन् वर्तते vदातिवाराः । वारो वरणीयं बलं धनं वा । दत्तबला दत्तधना वा । ते मरुतस्तम् vइन्द्रमनु vअमन्दन् अहृष्यन् । vवृत्रखादः वृत्रस्य हिंसकः स इन्द्रः vतेभिः तैर्मरुद्भिः vसाकं vदाशुषः हविर्दत्तवतो यजमानस्य vस्वे स्वकीये vसधस्थे । सह तिष्ठन्त्यस्मिन्निति सधस्थं गृहम् । तस्मिन् vसुतम् अभिषुतं vसोमं vपिबतु ॥ असूर्ये । ' तूरी त्वराहिंसयोः ' इत्यस्मात् ' अदभ्यादयश्च ' इति यत्प्रत्ययः[1] । ' यतोऽनावः ' इत्याद्युदात्तः । समासे कृदुत्तरपदस्वरः । अमन्दन् । मदि स्तुत्यादिषु । परस्मैपदी । पादादित्वादनिघातः । वृत्रखादः । ' खाद भक्षणे ' । कर्मण्यण् । दाशुषः । ' दाश्र दाने ' इत्यस्य क्वसौ ' दाश्वान्साह्वान्मीढ्वांश्च ' इति द्विर्वचनाद्यभावः । वसोः संप्रसारणम् । प्रत्ययस्वरः । सधस्थे । ' सध मादस्थयोश्छन्दसि ' इति सहस्य सधादेशः ॥

इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वस्य गिर्वणः ॥ १० ॥

इदम् । हि । अनु । ओजसा । सुतम् । राधानाम् । पते । पिब । तु । अस्य । गिर्वणः ॥१०॥

हे vराधानां vपते धनानां स्वामिन् vगिर्वणः गीर्भिः स्तुतिभिर्वननीय हे इन्द्र vइदम् vअनु अनेनानुक्रमेण । उशानुक्रमेणेत्यर्थः । vओजसा बलेन ग्रावभिः vसुतम् अभिषुतम् vअस्य[2] इमं[2] सोमं vनु क्षिप्रं vपिब vहि ॥

यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् । स त्वा ममत्तु सोम्यम् ॥ ११ ॥

यः । ते । अनु । स्वधाम् । असत् । सुते । नि । यच्छ । तन्वम् ।
सः । त्वा । ममत्तु । सोम्यम् ॥ ११ ॥

---

१. ज-ण-यकृप्रत्ययः । २. ख-ग-च-न-फ-भ-ल-स-' अस्य इमं ' नास्ति ।

हे इन्द्र [v]ते[1] [v]तवदर्थं [v]यः सोमः [v]स्वधाम् अन्नम् [v]अनु अनुसृत्य ग्रावभिरभिषुतः [v]असत् [v]सुते तस्मिन् सोमे [v]तन्वं स्वकीयं शरीरं [v]नि [v]यच्छ प्रेरय। [v]सः सोमः [v]सोम्यं सोमार्हं [v]त्वा त्वां [v]ममत्तु मादयतु ॥ असत्। अस्तेर्लेट्यडागमे रूपम्। यङ्लुक्तयोगादनिघातः। आगमस्यानुदात्तत्वे[2] धातुस्वरः ॥

प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू शूर राधसे ॥ १२ ॥

प्र। ते। अश्नोतु। कुक्ष्योः। प्र। इन्द्र। ब्रह्मणा। शिरः। प्र। बाहू इति। शूर। राधसे ॥१२॥

हे [v]इन्द्र स सोमः [v]ते तव [v]कुक्ष्योः कुक्षेरुभयोः पार्श्वयोः उभौ[3] पार्श्वौ[4] [v]प्र [v]अश्नोतु प्रकर्षेण व्याप्नोतु। तथा [v]ब्रह्मणा स्तोत्रेण सहितः स सोमः [v]शिरः शरीरम्। अवयवादिनावयवी लक्ष्यते। त्वच्छरीरं [v]प्र अश्नोतु। हे [v]शूर इन्द्र [v]राधसे धनाय तव[4] [v]बाहू अपि [v]प्र अश्नोतु ॥ अश्नोतु। 'अशू व्याप्तौ' इत्यस्य लोटि व्यत्ययेन परस्मैपदम्। निघातः। कुक्ष्योः। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् ॥ ॥ १६ ॥

'धानावन्तम्' इत्यष्टर्चं चतुर्दशं सूक्तं वैश्वामित्रमैन्द्रम्। अत्रेयमनुक्रमणिका—'धानावन्तमष्टौ पूर्वार्धे गायत्रं षष्ठी जगती' इति। आदितश्चतस्रो गायत्र्यः 'तृतीये धानाः' इति षष्ठी जगती शिष्टास्त्रिष्टुभः। सूक्तविनियोगो लिङ्गादवगन्तव्यः। प्रातःसवनीयपुरोडाशस्यानुवाक्या 'धानावन्तम्' इत्याद्या। सूत्रितं च—'धानावन्तं करम्भिणमिति प्रातःसवनेऽनुवाक्या' (आश्व. श्रौ. ५.४) इति ॥

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः ॥ १ ॥

धानाऽवन्तम्। करम्भिणम्। अपूपऽवन्तम्। उक्थिनम्। इन्द्र। प्रातः। जुषस्व। नः ॥१॥

हे [v]इन्द्र [v]धानावन्तम्। धाना भृष्टयवाः। तद्वन्तं [v]करम्भिणम्। करम्भो दधिमिश्राः सक्तवः। तद्वन्तम् [v]अपूपवन्तं सवनीयपुरोडाशोपेतम् [v]उक्थिनं शस्त्रिणं [v]नः अस्मदीयमिमं सोमं [v]प्रातः प्रातःसवने [v]जुषस्व सेवस्व ॥ प्रातः। स्वरादिषु[5] अन्तोदात्तत्वेन पठितत्वादन्तोदात्तः ॥

पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च। तुभ्यं हव्यानि सिस्रते ॥ २ ॥

पुरोळाशम्। पचत्यम्। जुषस्व। इन्द्र। आ। गुरस्व। च। तुभ्यम्। हव्यानि। सिस्रते ॥२॥

हे [v]इन्द्र [v]पचत्यं पचने साधुं [v]पुरोडाशम्[6]। पुरो दाशन्त एनमिति पुरोडाशो हविः। [v]जुषस्व। किंच [v]आ [v]गुरस्व। पुरोडाशभक्षणार्थमुद्यमं कुरु। [v]हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि [v]तुभ्यं त्वदर्थं [v]सिस्रते आहवनीयं गच्छन्ति। तानि सेवस्वेति भावः ॥ पचत्यम्। पचतशब्दात् 'तत्र साधुः' इति यत्प्रत्ययान्तस्य पदस्य [7]अचश्चाभावात् अत्र 'यतोऽनावः' इत्यस्य प्राप्तिर्नास्ति। तित्स्वरितः। गुरस्व। 'गुरी उद्यमने'। शविकरणी। निघातः। सिस्रते। 'सृ गतौ'। छन्दसि जुहोत्यादिः। व्यत्ययेनात्मनेपदम् ॥

१. ख-ग-च-न-फ-भ-ल-स—'ते' नास्ति। २. च—आगमानुदात्तत्वे। ३. ख-ग-च-ज-ण-त-न-भ-ल-स—'उभौ पार्श्वौ' नास्ति। ४. ख-ग-च-ज-ण-न-भ—ते। ५. ज-ण—घृतादिषु। ६. त—पुरोळाशम्। ७. च—अच्चकत्वाभावात्।

पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणाम् ॥३॥

पुरोळाशम्। च। नः। घसः। जोषयासे। गिरः। च। नः। वधूयुःऽइव। योषणाम् ॥३॥

हे इन्द्र ᵛनः अस्मत्संबन्धिनं ᵛपुरोडाशं ᵛघसः भक्षय ᵛच। ᵛनः अस्मदीयाः स्तुतिलक्षणाः ᵛगिरश्च[1] ᵛजोषयासे सेवस्व[1]। तत्र दृष्टान्तः। ᵛवधूयुरिव ᵛयोषणाम्। यथा वधूयुः स्त्रीकामो योषणां भजनीयां युवतिं सेवते तद्वत्॥ घसः। 'घस्लृ अदने' इत्यस्य लेट्यडागमे रूपम्। 'चवायोगे प्रथमा' इति न निघातः। जोषयासे। 'जुषी प्रीतिसेवनयोः' इत्यस्य ण्यन्तस्य लेट्यडागमे रूपम्। आगमस्यानुदात्तत्वे णिच्स्वरः। पादादित्वादनिघातः। वधूयुरिव। 'सुप आत्मनः क्यच्'। 'क्याच्छन्दसि' इत्युप्रत्ययः। प्रत्ययस्वरः। योषणाम्। 'युष भजने' इति सौत्रो धातुः। 'कृत्यल्युटो बहुलम्' इति ल्युट्। लित्स्वरः॥

पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः। इन्द्र क्रतुर्हि ते बृहन् ॥ ४ ॥

पुरोळाशम्। सनऽश्रुत। प्रातःऽसावे। जुषस्व। नः। इन्द्र। क्रतुः। हि। ते। बृहन् ॥४॥

हे ᵛसनश्रुत पुराणतया प्रसिद्ध हे ᵛइन्द्र ᵛनः अस्मत्संबन्धिनमिमं ᵛपुरोडाशं ᵛप्रातःसावे। सूयतेऽत्र सोम इति सावः। तस्मिन् प्रातःसवने ᵛजुषस्व। यतः ᵛते तव ᵛक्रतुः कर्म ᵛबृहन् महत् ᵛहि॥ प्रातःसावे। 'षुञ् अभिषवे'। कर्मणि घञ्। प्रादिसमासः। थाथादिस्वरेणान्तोदात्तः॥

माध्यंदिनसवने सवनीयपुरोडाशस्य[2] 'माध्यंदिनस्य सवनस्य धानाः' इत्यनुवाक्या। सूत्रितं च—'माध्यंदिनस्य सवनस्य धाना इति माध्यंदिने' (आश्व. श्रौ. ५. ४) इति॥

माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम्।
प्र यत्स्तोता जरिता तूर्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥ ५ ॥

माध्यंदिनस्य। सवनस्य। धानाः। पुरोळाशम्। इन्द्र। कृष्व। इह। चारुम्।
प्र। यत्। स्तोता। जरिता। तूर्णिऽअर्थः। वृषऽयमाणः। उप। गीःऽभिः। ईट्टे ॥ ५॥

हे ᵛइन्द्र ᵛमाध्यंदिनस्य मध्यंदिने भवस्य ᵛसवनस्य संबन्धिनीः ᵛधानाः भृष्टयवान् ᵛचारुं कमनीयं ᵛपुरोडाशं च ᵛइह कर्मणि आगत्य ᵛकृष्व भक्षणेन संस्कुरु। ᵛयत् यदा ᵛजरिता भवत्परिचरणं[3] कुर्वाणः ᵛतूर्ण्यर्थः त्वां स्तोतुमितस्ततस्त्वरितगमनः अत एव ᵛवृषायमाणः वृषेवाचरन् ᵛस्तोता ᵛगीर्भिः स्तुतिलक्षणाभिर्वाग्भिः ᵛउप समीपे ᵛप्र ᵛईट्टे प्रकर्षेण स्तौति। तदा पुरोडाशादिहवींषि भक्षयेति भावः॥ माध्यंदिनस्य। मध्यंदिनशब्दात् तत्र भवार्थे उत्सादित्वादञ्। जित्त्वादाद्युदात्तः। चारुम्। 'चर गतिभक्षणयोः'। 'दृसनिजनिचरिचटिरहिभ्यो ञुण्' इति ञुण्। णित्त्वादुपधावृद्धिः।

---

१. ल–गिरो जोषयासे सेवस्व च। २. ख-ग-च-ज-ण-फ-भ–सवनीयपुरोडाशे। ३. प–तव परिचरणम्।

ञित्त्वादाद्युदात्तः । तूर्ण्यर्थः । तूर्णिः । ' ऋत्वरा संभ्रमे ' इत्यस्मात् ' वहिश्रि° ' इत्यादिना निप्रत्ययो निच्च । अर्थः । ' ऋ गतौ ' । ' उषिकुषिगार्तिभ्यस्थन् ' इति थन् । बहुव्रीहौ पूर्वपदस्वरः । वृषायमाणः । वृषेवाचरतीत्यर्थे ' कर्तुः क्यङ् सलोपश्च ' इति क्यङ् । ' अकृत्सार्वधातुकयोर्दीर्घः ' । ङित्त्वात् ' अनुदात्तङितः° ' इत्यात्मनेपदम् । लट् । शानच् । तस्य लसार्वधातुकस्वरे धातुस्वरः । ईट्टे । ' ईड स्तुतौ ' इत्यस्य लटि रूपम् । यद्योगादनिघातः ॥ ॥ १७ ॥

तृतीयसवने सवनीयपुरोडाशस्य ' तृतीये धानाः ' इत्यनुवाक्या । सूत्रितं च—' तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने ' (आश्व. श्रौ. ५. ४) इति ॥

तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ॥ ६ ॥

तृतीये । धानाः । सवने । पुरुऽस्तुत । पुरोळाशम् । आऽहुतम् । ममहस्व । नः ।
ऋभुऽमन्तम् । वाजऽवन्तम् । त्वा । कवे । प्रयस्वन्तः । उप । शिक्षेम । धीतिऽभिः ॥ ६ ॥

हे [V]पुरुष्टुत पुरुभिर्बहुभिः स्तोतृभिः स्तुत हे इन्द्र [V]तृतीये [V]सवने [V]नः अस्मदीयान्[1] [V]धानाः हुतान् भृष्टयवान् [V]आहुतं [V]पुरोळाशं च [V]मामहस्व भक्षणेन महय[2] संभावय[2] । हे [V]कवे इन्द्र [V]प्रयस्वन्तः संभृतहविष्का वयम् [V]ऋभुमन्तम् । ऋभवो ये केचन देवास्तद्वन्तं [V]वाजवन्तम् । वाजो नाम सुधन्वनः पुत्रस्तद्वन्तं [V]त्वा[3] त्वां[3] [V]धीतिभिः स्तुतिभिः [V]उप [V]शिक्षेम समीपे परिचरेम ॥ आहुतम् । जुहोतेः कर्मणि क्तः । ' गतिरनन्तरः ' इति गतेः स्वरः । मामहस्व । ' मह पूजायाम् ' इत्यस्य यङ्लुगन्तस्य लोटि व्यत्ययेनात्मनेपदम् । शपो लुगभावश्छान्दसः[4] । शिक्षेम । शिक्षतेः आशीर्लिङि ' लिङ्याशिष्यङ् ' इत्यङ्प्रत्ययः । निघातः । धीतिभिः । ' हिष्टवत्सरतिशत्थान्तानाम् ' इत्यन्तोदात्तत्वम् ॥

पूष्णवते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥ ७ ॥

पूष्णऽवते । ते । चकृम । करम्भम् । हरिऽवते । हरिऽअश्वाय । धानाः ।
अपूपम् । अद्धि । सऽगणः । मरुत्ऽभिः । सोमम् । पिब । वृत्रऽहा । शूर । विद्वान् ॥ ७ ॥

हे इन्द्र [V]पूष्णवते । पूषा नाम कश्चिद्देवोऽदन्तकः[5] । तद्वते [V]ते तुभ्यं [V]करम्भं दधिमिश्रं सक्तुं [V]चकृम भक्षणार्थं कुर्मः । तथा च श्रुतिः—' पूषा प्रपिष्टभागोऽदन्तको हि ' (तै. सं. २. ६. ८. ५) इति । [V]हरिवते । हरिनामकावश्वौ तद्वते [V]हर्यश्वाय हरितवर्णाश्वयुक्तायेन्द्राय तुभ्यं धानाः चकृम[6] भक्षणार्थं

१. ख-ग-घ-च-ज-ण-प-भ-ल—अस्मदीयाः । २. ख-ग-च-भ—महयस्व; घ-ज-ण—महय; न-स-महस्व । ३. ख-ग-च-ल—त्वा; न-भ-स—त्वाम् । ४. त—°छान्दसः । निघातः । ५. प—कश्चन देवः । ६. न-ल-स—' चकृम ' नास्ति ।

कुर्मः। तथा च मन्त्रवर्णः–'प्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः' (ऋ. सं. ३.३५.३) इति । [v]मरुद्भिः [v]सगणः त्वम् [v]अपूपं पुरोडाशम् [v]अद्धि भक्षय । हे [v]शूर असहाय हे इन्द्र [v]वृत्रहा वृत्रस्य हन्ता [v]विद्वान् सर्वं जानानस्त्वं [v]सोमं [v]पिब ॥ पूषण्वते । पूषशब्दस्य[1] मतुप् । 'अनो नुट्' इति नुडागमः । 'रषाभ्याम्०' इति णत्वम् । चकृम । करोतेश्छान्दसे वर्तमाने लिटि क्रादिश्वात्[2] इडभावः । निघातः । हरिवते । 'छन्दसीरः' इति मतुपो वत्वम् ॥

प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ॥ ८ ॥

प्रति । धानाः । भरत । तूयम् । अस्मै । पुरोळाशम् । वीरऽतमाय । नृणाम् ।
दिवेऽदिवे । सऽदृशीः । इन्द्र । तुभ्यम् । वर्धन्तु । त्वा । सोमऽपेयाय । धृष्णो इति ॥ ८ ॥

यजमानोऽध्वर्यवादीन् प्रति ब्रूते । हे अध्वर्यवादयः [v]अस्मै इन्द्राय [v]धानाः [v]तूयं क्षिप्रं [v]प्रति[3] [v]भरत संपादयत । [v]नृणां [v]वीरतमाय अस्मै इन्द्राय [v]पुरोडाशं च संपादयत । अथ प्रत्यक्षकृतः। हे [v]धृष्णो शत्रूणामभिभवनशील हे [v]इन्द्र [v]सदृशीः एकविधाः स्तुतयः [v]तुभ्यं त्वदर्थं [v]दिवेदिवे प्रतिदिवसम् अस्माभिः क्रियन्ते । ताः स्तुतयः [v]सोमपेयाय सोमपानार्थं [v]त्वा[4] त्वां[4] [v]वर्धन्तु उत्साहेन प्रवृद्धं कुर्वन्तु ॥ सदृशीः । 'समानान्ययोश्च' इति कप्रत्ययः । 'टिड्ढाणञ्०' इत्यादिना ङीप् । 'ऽदृदृशवतुषु' इति समानस्य सभावः ॥ ॥ १८ ॥

'इन्द्रापर्वता' इति चतुर्विंशत्यृचं पञ्चदशं सूक्तम् । अत्रेयमनुक्रमणिका—'इन्द्रापर्वता चतुर्विंशतिराद्यैन्द्रापार्वती पञ्चदश्यादिद्वे वाचे ससर्पर्ये चतस्रो रथाङ्गस्तुतयोऽन्त्या अभिशापास्ता वसिष्ठद्वेषिण्यो न वसिष्ठाः शृण्वन्ति । दशमीषोडश्यौ जगत्यौ त्रयोदशी गायत्री द्वादशीविंशीद्वाविंश्योऽनुष्टुभोऽष्टादशी बृहती' इति । विश्वामित्र ऋषिः । दशमी षोडशी च द्वे जगत्यौ त्रयोदशी गायत्री द्वादशीविंशीद्वाविंश्यस्तिस्रोऽनुष्टुभोऽष्टादशी बृहती शिष्टास्त्रिष्टुभः । आद्येन्द्रापर्वतदेवताका पञ्चदशीषोडश्यौ वाग्देवत्ये तदुत्तराश्चतस्रो रथाङ्गदेवताकाः शिष्टा ऐन्द्र्यः ॥

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥ १ ॥

इन्द्रापर्वता । बृहता । रथेन । वामीः । इषः । आ । वहतम् । सुऽवीराः ।
वीतम् । हव्यानि । अध्वरेषु । देवा । वर्धेथाम् । गीःऽभिः । इळया । मदन्ता ॥ १ ॥

[v]इन्द्रापर्वता इन्द्रश्च पर्वतश्च । हे इन्द्रापर्वतौ [v]बृहता [v]रथेन आगत्य [v]वामीः वननीयाः [v]सुवीराः शोभनपुत्रोपेताः [v]इषः अन्नानि [v]आ [v]वहतम् अस्मदर्थं धारयतम् । प्रयच्छतमित्यर्थः ।

१. च-ज–पूषशब्दात् । २. ज-ण–क्रादिनियमात । ३. ख-ग-चं-ज-ण-न-भ-स–'प्रति' नास्ति । ४. ख-ग-न-भ-स–त्वाम्; च-ल–त्वा ।

किंच हे देवौ द्योतमानौ [v]अध्वरेषु अस्मत्संबन्धिषु यज्ञेषु [v]हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि [v]वीतं भक्षयतम् । तथा [v]इळया अस्माभिर्दत्तेन हविषा [v]मदन्ता हृष्यन्तौ युवां [v]गीर्भिः स्तुतिलक्षणाभिः[१] अस्मदीयाभिर्वाग्भिः [v]वर्धेथां समृद्धौ भवतम् ॥ इन्द्रापर्वता । आमन्त्रितस्य पादादित्वात् पाष्टिकमाद्युदात्तत्वम् । सुवीराः । बहुव्रीहौ ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् । वीतम् । वी कान्त्यादिषु इत्यस्य लोटि अदादित्वाच्छपो लुक् । प्रत्ययस्वरः । वर्धेथाम् । ' वृधु वृद्धौ ' इत्यस्य लोटि आथामो लसार्वधातुकस्वरे धातुस्वरः ॥

अहर्गणेष्वन्त्यवर्जितेष्वहःसु हारियोजनस्य[२] ' तिष्ठा सु कम् ' इत्यनुवाक्या । सूत्रितं च— ' तिष्ठा सु कं मघवन्मा परागा अयं यज्ञो देवया अयं मियेधः ' (आश्व. श्रौ. ६. ११) इति ॥

तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः ॥ २ ॥

तिष्ठ । सु । कम् । मघऽवन् । मा । परा । गाः । सोमस्य । नु । त्वा । सुऽसुतस्य । यक्षि ।
पितुः । न । पुत्रः । सिचम् । आ । रभे । ते । इन्द्र । स्वादिष्ठया । गिरा । शचीऽवः ॥ २ ॥

हे [v]मघवन् धनवन्निन्द्र [v]कं सुखेनास्मिन् यज्ञे [v]सु [v]तिष्ठ सुष्ठु कंचित्कालमत्र तिष्ठ । [v]मा [v]परा [v]गाः अस्मदीयाद्यज्ञान्मा गच्छ । तत्र कारणमाह । [v]सुषुतस्य सुष्ठ्वभिषुतेन [v]सोमस्य सोमेन [v]नु क्षिप्रं [v]त्वा[३] त्वां[३] [v]यक्षि यजे । हे [v]शचीवः शक्तिमन् [v]इन्द्र [v]ते तव [v]सिचं वस्त्रप्रान्तं [v]स्वादिष्ठया स्वादुतरया स्तुतिलक्षणया [v]गिरा [v]आ [v]रभे आलभे । गृह्णामीत्यर्थः । तत्र दृष्टान्तः । [v]पितुर्न । यथा [v]पुत्रः मधुरया वाचा पितुर्जनकस्य चेलाञ्चलं[४] गृह्णाति तद्वत् ॥ सु कमिति निपातद्वयम् । प्रथमस्य ' निपाता आद्युदात्ताः ' इत्याद्युदात्तत्वम् । द्वितीयस्य ' चादयोऽनुदात्ताः ' इत्यनुदात्तत्वम् । सोमस्य यक्षि । ' यज देवपूजासंगतिकरणदानेषु ' । ' स्वरितञितः० ' इत्यात्मनेपदम् । तस्य लुङि सिचि ' एकाचः० ' इतीट्प्रतिषेधः । वश्चादिना षत्वम् । ' पढोः कः सि ' इति कत्वम् । सिचः सकारस्य षत्वम् । निघातः । रभे । ' डुलभष् प्राप्तौ ' । लटयुत्तम इटि रूपम् । रलयोरभेदः । निघातः । स्वादिष्ठया । स्वादुशब्दादिष्ठनि रूपम् । निखादाद्युदात्तः ॥

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् ।
एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥ ३ ॥

शंसाव । अध्वर्यो इति । प्रति । मे । गृणीहि । इन्द्राय । वाहः । कृणवाव । जुष्टम् ।
आ । इदम् । बर्हिः । यजमानस्य । सीद । अथ । च । भूत् । उक्थम् । इन्द्राय । शस्तम् ॥ ३ ॥

१. ख-ग-च-फ-भ-स–श्रुतिलक्षणाभिः । २. ख-ग-च-ज-ण-न-भ-स–' हारियोजनस्य ' नास्ति । ३. ख-ग-न-भ–त्वाम्; च-ल–त्वा । ४. च-ज-ण–चैलाञ्चलम्; स–वस्त्राञ्चलम् ।

शंसिष्यन् होताध्वर्युं ब्रूते । हे [v]अध्वर्यो आवां [v]शंसाव । होतस्त्वमेव शंससि । कथमहं शंसानि । अत आह । [v]प्रति [v]मे [v]गृणीहि इति । त्वं मे प्रतिगृणीहि । ' ओथामोदैव ' इत्यादिकः[1] होतुरुत्साहजननः प्रतिगरः (आश्व. श्रौ. ७. ११) । तं दास्व[2] । तथा [v]इन्द्राय [v]जुष्टं प्रीतियुक्तं [v]वाहः स्तोत्रं [v]कृणवाव करवाव[3] । त्वं [v]यजमानस्य [v]इदं [v]बर्हिः अस्मिन् बर्हिषि [v]आ [v]सीद उपविश । [v]अथ [v]च अनन्तरम् [v]इन्द्राय इन्द्रार्थमावाभ्यां क्रियमाणम् [v]उक्थं शस्त्रं [v]शस्तं[4] प्रशस्तं [v]भूत् भवतु ॥ शंसाव । ' शंसु स्तुतौ ' इत्यस्य लोटयुत्तमद्विवचने रूपम् । ' आडुत्तमस्य° ' इत्याडागमः । उत्तमस्य पिद्वद्भावादनुदात्तत्वे धातुस्वरः । मे । ' अनुप्रतिगृणश्च ' (पा· सू· १. ४. ४१) इति संप्रदानसंज्ञा । जुष्टम् । ' नित्यं मन्त्रे ' इत्याद्युदात्तत्वम् ॥

जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥ ४ ॥

जाया । इत् । अस्तम् । मघऽवन् । सा । इत् । ऊँ इति । योनिः ।
तत् । इत् । त्वा । युक्ताः । हरयः । वहन्तु ।
यदा । कदा । च । सुनवाम । सोमम् । अग्निः । त्वा । दूतः । धन्वाति । अच्छ ॥ ४ ॥

हे[1] [v]मघवन् धनवन्निन्द्र[5] [v]अस्तम् । अस्यन्ते क्षिप्यन्ते पदार्था अत्रेत्यस्तं गृहम् । [v]जायेत् जायैव गृहं भवति । ' न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ' इति स्मृतेः । तथा [v]सेत् सा जायैव [v]योनिः पुरुषस्य मिश्रणस्थानम् । [v]उ प्रसिद्धगर्थः । तस्मात् [v]तदित् तत्र गृहे एव[6] [v]युक्ताः रथे योजिताः [v]हरयः अश्वाः [v]त्वा त्वां [v]वहन्तु । वयं तु [v]यदा [v]कदा [v]च त्वदर्थं [v]सोमं [v]सुनवाम अभिषुतं करवाम तदास्माभिः प्रहितः [v]दूतः [v]अग्निः [v]त्वा त्वाम् [v]अच्छ आभिमुख्येन [v]धन्वाति गच्छेत् ॥ अस्तम् । ' असु क्षेपणे ' । ' असिहसिमृग्रिण्वामि° ' इत्यादिना तन्प्रत्ययः । नित्त्वात् आद्युदात्तः । सुनवाम । ' षुञ् अभिषवे ' इत्यस्य लोटि रूपम् । यद्वृत्तयोगादनिघातः । त्वा । ' युष्मत्तत्ततक्षुष्वन्तःपादम् ' इति संहितायां षत्वम् । धन्वाति । धवि गत्यर्थः । लेट्याडागमे रूपम् । निघातः ॥

अहर्गणेऽन्त्यवर्जितेष्वहःसु हारियोजनस्य वैकल्पिकी ' परा याहि ' इत्यनुवाक्या । ' परा या हि मघवन्ना च याहीति वानुवाक्या ' (आश्व. श्रौ. ६. ११) इति सूत्रितम् ॥

परा याहि मघवन्ना च याहीन्द्र भातरुभयत्रा ते अर्थम् ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ ५ ॥

परा । याहि । मघऽवन् । आ । च । याहि । इन्द्र । भ्रातः । उभयत्र । ते । अर्थम् ।
यत्र । रथस्य । बृहतः । निऽधानम् । विऽमोचनम् । वाजिनः । रासभस्य ॥ ५ ॥

१. ख-ग-च-फ–इत्याकारकः । २. ख-ग-च-ज-ण–वदस्व । ३. ख-ग-न-भ-स–' करवाव ' नास्ति । ४. ख-ग-ज-ण-भ-स–' शस्तं ' नास्ति । ५. ख-ग-च-ज-ण-न-भ-स–मघवन् धनवन् । ६. ल–एव यत्र ते जाया तिष्ठति ।

हे ᵛमघवन् धनवन् ᵛइन्द्र त्वं ᵛपरा ᵛयाहि अस्माद्देवयजनात् पराङ्मुखो गृहं प्रति गच्छ । अथवा देवयजनं प्रति ᵛआ ᵛयाहि । हे ᵛभ्रातः पोषक ᵛउभयत्र अपि ᵛते तव ᵛअर्थम् । अर्यते प्राप्यत इत्यर्थः प्रयोजनम् । अस्ति तत्र जाया अत्र सोमः । प्रयोजनान्तरमाह । ᵛयत्र गृहं प्रति गमने ᵛबृहतः महतः ᵛरथस्य उपरि ᵛनिधानम् अवस्थानं प्रयोजनम् । अत्र स्थितौ ᵛरासभस्य हेषारवं कुर्वतः ᵛवाजिनः अश्वस्य रथात् ᵛविमोचनं प्रयोजनम् ॥ अर्थम् । ' ऋ गतौ ' । ' उपिकुपिगार्तिभ्यस्थन् ' इति थन् । नित्स्वरः । निधानम् । दधातेर्भावे ल्युट् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । रासभस्य । ' रासृ शब्दे ' । ' रासिवसिभ्यां च ' (उ. सू. ३. ४०५) इति कर्तरि अभच्प्रत्ययः । ग्रामादिरवादाद्युदात्तः ॥ ॥ १९ ॥

अन्त्येष्वहःसु हारियोजनस्य ' अपाः सोमम् ' इत्यनुवाक्या । सूत्रितं च— ' हारियोजनोऽपाः सोममस्तमिन्द्र प्र याहि ' (आश्व. श्रौ. ६. ११) इति ॥

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥ ६ ॥

अपाः । सोमम् । अस्तम् । इन्द्र । प्र । याहि । कल्याणीः । जाया । सुऽरणम् । गृहे । ते ।
यत्र । रथस्य । बृहतः । निऽधानम् । विऽमोचनम् । वाजिनः । दक्षिणाऽवत् ॥ ६ ॥

हे ᵛइन्द्र ᵛसोमम् ᵛअपाः । अत्रैव स्थित्वा सोमं पिब । पीत्वा ᵛअस्तं गृहं ᵛप्र ᵛयाहि प्रकर्षेण गच्छ । ᵛते तव ᵛगृहे ᵛकल्याणीः मङ्गलकारिणी ᵛजाया शची विद्यते । ᵛसुरणं शोभनगीतादिध्वनिश्चास्ति । यद्वा[१] । सुरणं सुरमणीयं यथा भवति तथा गृहे जाया तिष्ठति[१] । ᵛयत्र इत्यादि गतम् । ᵛदक्षिणावत् । अत्र स्थितौ सत्यां रथे योजितानां वाजिनां विमोचनं खादनपानादिना दक्षिणावत् प्रयोजनवद्भवति । विमुक्तेभ्यो वाजिभ्यः खादनं पानं चोपहरन्ति ॥ अपाः । ' पा पाने ' । लुङि ' गातिस्था° ' इति सिचो लुक् । अडागमस्वरः । कल्याणीः । कल्याणमस्यास्तीति मत्वर्थे ' छन्दसीवनिपौ ' इति ईप्रत्ययः । प्रत्ययस्वरः । सुरणम् । रण शब्दार्थः । अस्मादकृच्छ्रार्थे खल् । नित्स्वरः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । समासे कृदुत्तरपदस्वरः ॥

इमे भोजा अङ्गिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ॥ ७ ॥

इमे । भोजाः । अङ्गिरसः । विऽरूपाः । दिवः । पुत्रासः । असुरस्य । वीराः ।
विश्वामित्राय । ददतः । मघानि । सहस्रऽसावे । प्र । तिरन्ते । आयुः ॥ ७ ॥

हे इन्द्र ᵛइमे यागं कुर्वाणाः ᵛभोजाः सौदासाः क्षत्रियास्तेषां याजकाः ᵛविरूपाः नानारूपाः मेधातिथिप्रभृतयः ᵛअङ्गिरसः च ᵛदिवः ᵛअसुरस्य देवेभ्योऽपि बलवतो रुद्रस्य ᵛपुत्रासः पुत्राः ᵛवीराः

१. ख ग-च-ज-ण-न-भ-स-' यद्वा...तिष्ठति ' नास्ति ।

बलवन्तो मरुतः ते सर्वे [V]विश्वामित्राय महां [V]सहस्रसावे । सहस्रं सूयतेऽत्रेति सहस्रसावोऽश्वमेधः । तस्मिन्नश्वमेधे [V]मघानि मंहनीयानि[1] धनानि [V]ददतः प्रयच्छन्तः सन्तः [V]आयुः जीवनमन्नं वा [V]प्र [V]तिरन्ते प्रकर्षेण वर्धयन्ति ॥ दिवस्पुत्रास इति संहितायां ' षष्ठ्याः पतिपुत्र° ' इति विसर्जनीयस्य सत्वम् । ददतः । ' डुदाञ् दाने ' इत्यस्य शतरि रूपम् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । तिरन्ते । तरतेर्व्यत्ययेन शः ॥

रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम् ।
त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मन्त्रैरनृतुपा ऋतावा ॥ ८ ॥

रूपम्ऽरूपम् । मघऽवा । बोभवीति । मायाः । कृण्वानः । तन्वम् । परि । स्वाम् ।
त्रिः । यत् । दिवः । परि । मुहूर्तम् । आ । अगात् । स्वैः । मन्त्रैः । अनृतुऽपाः । ऋतऽवा ॥८॥

[V]मघवा धनवानिन्द्रः [V]रूपंरूपं यद्यद्रूपं कामयते तत्तद्रूपं [V]बोभवीति भृशं[2] प्राप्नोति[2] । तत्तद्रूपात्मको भवति । तत्र कारणमुच्यते । [V]मायाः अनेकरूपग्रहणसामर्थ्योपेताः [V]कृण्वानः कुर्वाणः [V]स्वां [V]तन्वं स्वकीयां तनूम् । [V]परि पञ्चम्यर्थे । स्वस्माच्छरीरान्नानाविधानि शरीराणि निर्मिमीते । यद्वा स्वां तनूं नानाविधरूपोपेतां करोति । तथा च मन्त्रवर्णः–' इन्द्रो मायाभिः पुरुरूपः ' (ऋ. सं. ६.४७.१८) इति । [V]यत् यस्मात् [V]स्वैर्मन्त्रैः स्वकीयैः स्तुतिलक्षणैर्वाक्यैराहूतः [V]अनृतुपाः । न केवलमृतुष्वेव पिबति किंतु अनृतुष्वपि । बहुशः सोमं पिबन्नित्यर्थः । [V]ऋतावा सत्यवान् तादृश इन्द्रः [V]दिवः स्वर्गलोकात् [V]परि [V]मुहूर्तम् एकस्मिन्नेव मुहूर्ते नानादेशवर्तिषु यज्ञेषु तत्रापि [V]त्रिः त्रिषु सवनेषु [V]आगात् आगच्छति ॥ बोभवीति । भवतेर्यङ्लुकि तिपि ' यङो वा ' इतीडागमः । निघातः । अगात् । इणो लुङि रूपम् । यद्वृत्तयोगादनिघातः ॥

महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिन्धुमर्णवं नृचक्षाः ।
विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिन्द्रः ॥ ९ ॥

महान् । ऋषिः । देवऽजाः । देवऽजूतः । अस्तभ्नात् । सिन्धुम् । अर्णवम् । नृऽचक्षाः ।
विश्वामित्रः । यत् । अवहत् । सुऽदासम् । अप्रियायत । कुशिकेभिः । इन्द्रः ॥ ९ ॥

[V]महान् तपसा अतिशयितसामर्थ्यवान् [V]ऋषिः अतीन्द्रियार्थद्रष्टा [V]देवजाः द्योतमानानां तेजसां जनयिता [V]देवजूतः तैस्तेजोभिराकृष्टः [V]नृचक्षाः नृणां कर्मनेतॄणामध्वर्यादीनामुपद्रष्टा सः [V]विश्वामित्रः [V]अर्णवम् उदकवन्तं [V]सिन्धुं विपाट्छुतुद्र्योः संभेदम्[3] [V]अस्तभ्नात् निरुद्धवेगमकरोत् । किंच स विश्वामित्रः [V]सुदासं पैजवनं राजानं [V]यत् यदा [V]अवहत् अयाजयत् तदानीम् [V]इन्द्रः [V]कुशिकेभिः कुशिकगोत्रोत्पन्नैर्ऋषिभिः सह [V]अप्रियायत प्रिय इवाचरत् ॥ अवहत् । ' वह प्रापणे ' इत्यस्य लङि

१. ल–महनीयानि । २. ख-ग-घ-च-ज-ण-न-भ-स–' भृशं प्राप्नोति ' नास्ति । ३. ख-ग-घ-च-ज-ण-न-प-फ-भ-स-संभेदनम् ।

रूपम्। यद्योगादनिघातः। अप्रियायत। प्रिय इवाचरतीत्यर्थे 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्। तदन्तालुङि रूपम्। पादादित्वादनिघातः॥

हंसाइव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा।
देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥ १० ॥

हंसाःऽइव। कृणुथ। श्लोकम्। अद्रिऽभिः। मदन्तः। गीःऽभिः। अध्वरे। सुते। सचा। देवेभिः। विप्राः। ऋषयः। नृऽचक्षसः। वि। पिबध्वम्। कुशिकाः। सोम्यम्। मधु॥१०॥

हे [v]विप्राः मेधाविनो हे [v]ऋषयः अतीन्द्रियार्थस्य द्रष्टारो हे [v]नृचक्षसः नृणां कर्मनेतॄणां विशेषेण द्रष्टारो हे [v]कुशिकाः कुशिकगोत्रोत्पन्ना हे पुत्राः [v]अध्वरे यज्ञे [v]अद्रिभिः ग्रावभिः सोमे [v]सुते अभिषुते सति [v]गीर्भिः [v]मदन्तः स्तुतिभिर्देवान् मादयन्तो यूयं [v]श्लोकम्। श्लोक्यते शस्यतेऽनेनेति श्लोकः शस्त्रम्। [v]कृणुथ सम्यगुच्चारयत। तत्र दृष्टान्तः। [v]हंसाइव। यथा हंसाः सम्यक् शब्दं कुर्वन्ति तद्वत्। किंच [v]देवेभिः [v]सचा यष्टव्यदेवैः सहिता यूयं [v]सोम्यं सोममयं [v]मधु मधुकरं रसं [v]वि [v]पिबध्वं परस्पर-व्यतिहारेण पिबत॥ श्लोकम्। 'श्लोकृ शब्दे'। करणे घञ्। ञित्त्वादाद्युदात्तः। मदन्तः। 'मदी हर्षे' इत्यस्यान्तर्भावितण्यर्थस्य व्यत्ययेन शप्। पिबध्वम्। 'पा पाने'। 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्। सोम्यम्। सोमशब्दात् 'मये च' इति यप्रत्ययः॥ ॥ २० ॥

उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुञ्चता सुदासः।
राजा वृत्रं जङ्घनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥ ११ ॥

उप। प्र। इत। कुशिकाः। चेतयध्वम्। अश्वम्। राये। प्र। मुञ्चत। सुऽदासः।
राजा। वृत्रम्। जङ्घनत्। प्राक्। अपाक्। उदक्। अथ। यजाते। वरे। आ। पृथिव्याः॥११॥

हे [v]कुशिकाः कुशिकगोत्रोत्पन्ना हे पुत्राः [v]उप [v]प्रेत अश्वस्य समीपे प्रकर्षेण गच्छत। तत्र गत्वा [v]चेतयध्वं सावधाना भवत। यद्वा। अश्वरक्षिणः सावधानान् कुरुत। [v]सुदासः पैजवनस्य राज्ञः [v]अश्वं [v]राये तस्य दिग्विजयेन धनलाभाय [v]प्र [v]मुञ्चत। [v]राजा देवानां स्वामीन्द्रः [v]वृत्रं कर्मविघ्न-कारिणमसुरं [v]प्रागपागुदक् पूर्वपश्चिमोत्तरेषु देशेषु [v]जङ्घनत् भृशं हतवान्। तस्मादश्वं विमुञ्चतेति भावः। [v]अथ अनन्तरं [v]पृथिव्याः[1] [v]वरे उत्तमे देवयजनदेशे [v]यजाते स राजा यजेत॥ चेतयध्वम्। 'चिती संज्ञाने' इत्यस्य ण्यन्तस्य लोटि रूपम्। आमन्त्रितस्याविद्यमानवत्त्वेन तिङ उत्तरत्वान्न निघातः। जङ्घनत्। 'हन हिंसागत्योः' इत्यस्य यङ्लुकि 'नुगतोऽनुनासिकान्तस्य' इत्यभ्यासस्य नुगागमः[2]। तदन्तालेट्यडागमः। प्राक्। अञ्चतेः क्विनि रूपम्। 'अनिगन्तोऽञ्चतौ वप्रत्यये' इति गतेः स्वरः। यजाते। यजतेर्लेट्यडागमः। निघातः। वरे। 'वृञ् वरणे' इत्यस्मात् 'ग्रहवृ-दृनिश्चिगमश्च' इत्यप्प्रत्ययः। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः॥

१. घ-ज-ण-आ पृथिव्याः। २. ज-नुगागमः। अभ्यासाच्च इति कुत्वम्।

य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् ॥ १२ ॥

यः । इमे इति । रोदसी इति । उभे इति । अहम् । इन्द्रम् । अतुष्टवम् ।
विश्वामित्रस्य । रक्षति । ब्रह्म । इदम् । भारतम् । जनम् ॥ १२ ॥

हे कुशिकाः कुशिकपुत्राः ᵛयः ᵛअहं विश्वामित्रः ᵛउभे ᵛइमे ᵛरोदसी द्यावापृथिव्यौ ᵛइन्द्रमतुष्टवं स्तावयामि[1] । द्यावापृथिवीभ्यामिन्द्रस्य स्तोत्रं मया कारितमित्यर्थः । यद्वा । उभयो रोदस्योः अन्तरवस्थितम्[2] इन्द्रं स्तौमि । स्तोत्रं कुर्वाणस्य ᵛविश्वामित्रस्य मम ᵛइदम् इन्द्रविषयं ᵛब्रह्म स्तोत्रं ᵛभारतं भरतकुलं[3] ᵛजनं[3] ᵛरक्षति पालयति ॥ अतुष्टवम् । 'ष्टुञ् स्तुतौ' । ण्यन्तस्य लुङि च्लि रूपम् । यद्वृत्तयोगादनिघातः । भारतम् । भरतशब्द उत्सादिः । ञित्त्वादाद्युदात्तः ॥

विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे । करदिन्नः सुराधसः ॥ १३ ॥

विश्वामित्राः । अरासत । ब्रह्म । इन्द्राय । वज्रिणे । करत् । इत् । नः । सुऽराधसः ॥ १३ ॥

ᵛविश्वामित्राः ᵛवज्रिणे वज्रहस्ताय ᵛइन्द्राय ᵛब्रह्म स्तोत्रम् ᵛअरासत अकुर्वन् । स्तुतः स इन्द्रः ᵛनः अस्मान् ᵛसुराधसः शोभनधनोपेतान् ᵛकरदित् करोत्वेव ॥ अरासत । 'रासृ शब्दे' इत्यस्य लङि 'बहुलं छन्दसि' इति शपो लुक् । निघातः । करत् । करोतेर्लुङि च्लेः 'कृमृदरुहिभ्यश्छन्दसि' इत्यङादेशः । सुराधसः । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् ॥

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् ।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः ॥ १४ ॥

किम् । ते । कृण्वन्ति । कीकटेषु । गावः । न । आऽशिरम् । दुह्रे । न । तपन्ति । घर्मम् ।
आ । नः । भर । प्रऽमगन्दस्य । वेदः । नैचाऽशाखम् । मघऽवन् । रन्धय । नः ॥ १४ ॥

हे इन्द्र ᵛकीकटेषु अनार्यनिवासेषु जनपदेषु । यद्वा । क्रियाभिर्यागदानहोमलक्षणाभिः किं फलिष्यतीत्यश्रद्दधानाः प्रत्युत पिबत खादतायमेव लोको न पर इति वदन्तो नास्तिकाः कीकटाः तेषु । ᵛगावः ᵛते तव ᵛकिं ᵛकृण्वन्ति किं कुर्वन्ति । न क्वचित्तवोपयोगं कुर्वन्तीत्यर्थः । अनुपयोगं दर्शयति । ᵛआशिरं सोममिश्रणयोग्यं पयः ᵛन ᵛदुह्रे न दुहन्ति । किंच ᵛघर्मं प्रवर्ग्याख्यकर्मोपयुक्तं महावीरपात्रं स्वपयःप्रदानद्वारेण ᵛन ᵛतपन्ति ᵛन दीपयन्ति । एतेन सांनाय्यार्थमपि नोपयुज्यन्ते इत्यपि सूचितं भवति । एवं क्वचिदपि वैदिके कर्मण्यनुपयुक्तास्ता गाः ᵛनः अस्मभ्यम् ᵛआ ᵛभर

१. ख-ग-च-ज-ण-न-भ-स्तौमि; घ-स्तवामि । २. ख-ग-च-ज-ण-न-भ-स-अन्तरस्थितम् ।
३. ख-ग-च-त-न-भ-ल-स-भरतकुलजनम् ।

आहर । न केवलं ता एव । किं तर्हि ᵛप्रमगन्दस्य । द्वैगुप्यादिरक्षणपरिमाणं गतोऽर्थो मामेव गमिष्यतीति बुद्ध्या परेषां ददातीति मगन्दो वार्धुषिकः । तस्यापत्यं पुत्रादिः प्रमगन्दः । प्रकल्पादिवदपत्यार्थः प्रशब्देन द्योत्यते । तस्यात्यन्तकुसीदिकुलस्य[१] ᵛवेदः धनमाहर । किंच हे ᵛमघवन् धनवन्निन्द्र ᵛनैचाशाखम् । नीचासु शूद्रयोनिषु उत्पादिता[२] शाखा[३] पुत्रपौत्रादिपरंपरा येन स नीचाशाखः । 'शूद्रापत्यैश्च[३] केवलैः' 'शूद्रावेदी* पतत्यधः' इति च पातकहेतुत्वेन स्मरणात् । पतितस्य संबन्धि धनं नैचाशाखम् । तद्धनं ᵛनः अस्मभ्यं ᵛरन्धय साधय । एतेषां तद्धनं[४] तव नोपयुज्यते अस्मदायत्तं तु तद्धनं यागादिद्वारा तवोपयुज्यते । तस्मात्तदस्मभ्यं प्रयच्छेति भावः ॥ एतमर्थं यास्कोऽप्याह—' किं ते कुर्वन्ति कीकटेषु गावः । कीकटा नाम देशोऽनार्यनिवासः । कीकटाः किंकृताः किं क्रियाभिः इतिप्रेप्साः[५] वा । नैव चाशिरं दुहे न तपन्ति घर्मं घरणम्[६] । आ हर नः प्रमगन्दस्य धनानि । मगन्दः कुसीदी मांगदो मामागमिष्यतीति च ददाति । तदपत्यं प्रमगन्दः अत्यन्तकुसीदिकुलीनः[७] । प्रमदको वा योऽयमेवास्ति लोको न पर इति प्रेप्सुः । पण्डको वा पण्डकः पण्डगः[८] प्रार्दको वा प्रार्दयत्याण्डौ । आण्डावाणी इव व्रीडयति । तस्त्थं नैचाशाखम् । नीचाशाखो नीचैःशाखः । शाखाः शक्नोतेः । आणिररणात् । तन्नो मघवन् रन्धय[९] इति रध्यतिर्वशगमने' (निरु. ६. ३२) इति ॥ आशिरम् । आङ्पूर्वात् श्रीणातेः क्विपि 'अपस्पृधेथाम्[१०]' इत्यादिना आशिर इत्यादेशः । दुहे । दुहेर्लिटि 'इरयो रे' इति रेआदेशः । द्विर्वचनस्य विकल्पितत्वात् द्विर्वचनाभावः । 'चादिलोपे विभाषा' इति न निघातः । नैचाशाखम् । 'तस्येदम्' इत्यण् । प्रत्ययस्वरः । रन्धय । रधेर्ण्यन्तस्य 'रधिजभोरचि' इति नुमागमः ॥

'ससर्परीर्ह्वचे[१०] प्राहुरितिहासं पुराविदः । सौदासनृपयज्ञे वै वसिष्ठात्मजशक्तिना । विश्वामित्रस्याभिभूतं बलं वाक् च समन्ततः । वासिष्ठेनाभिभूतः स ह्यवासीदथ गाधिजः । तस्मै ब्राह्मीं तु सौरीं वा नाम्ना वाचं ससर्परीम् । सूर्यवेश्मन आहृत्य ददुर्वै जमदग्नयः । कुशिकानां मतिः सा वागमतिं तामपानुदत्[१०]' (अनु. भा. ३. ५३) ॥

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥ १५ ॥

ससर्परीः । अमतिम् । बाधमाना । बृहत् । मिमाय । जमदग्निऽदत्ता ।
आ । सूर्यस्य । दुहिता । ततान । श्रवः । देवेषु । अमृतम् । अजुर्यम् ॥ १५ ॥

१. ख-ग-च-ज-ण-त-न-भ-स–तस्यापत्यं तत्कुसीदकुलस्य । २. त–उत्पादिताः शाखाः । ३. ख-ग-च-ज-ण-त-न-फ-भ-स–शूद्रवित्तैश्च; 'शूद्रो वित्तैस्तु शूद्रसंबन्धिकेवलवित्तसंग्रहे शूद्रत्वं प्राप्नोति' इति ज–पुस्तके टिप्पणीरूपेण लिखितम् । *'तत्स्त्रीगमने शूद्रत्वमधःपतति पतितश्च भवति इति भावः' इति ज–पुस्तके टिप्पणीरूपेण समावेशितम् । ४. त-फ-भ–यद्धनम् । ५. न–इतिप्रेप्सवः । ६. ख-ग-च-ण–हरणम्; ज-स–हर्म्यम्; त–घर्णम् । ७. ख-ग-च-ज-ण-न-भ-ल–अत्यन्तकुसीदकुलीनः । ८. ख-ग-च-त–पन्नगः । ९. ख-ग-च-ण-न-भ-ल–रन्धयस्व । १०. ख-ग-च-ज-ण-न-भ-स–'ससर्परी°..... तामपानुदत्' नास्ति; त–...अपानुदत् । उप प्रेतेति कुशिको विश्वामित्रोऽन्वयोजयत् । लब्ध्वा वाचं स हृष्टात्मा जमदग्नीनपूजयत् । ससर्परीरिति द्वाभ्यामृग्भ्यां वाचं स्तुवन्स्वयम् ॥

Vजमदग्निदत्ता जमदग्निभिः प्रज्वलिताग्निभिर्ऋषिभिरस्मभ्यं दत्ता Vअमतिम् अज्ञानं Vबाधमाना Vससर्परीः सर्वत्र शब्दरूपतया सर्पणशीला वाक् Vबृहत् प्रभूतं यथा भवति तथा Vमिमाय नभसि शब्दं करोति। सैषा Vसूर्यस्य Vदुहिता वाग्देवता Vदेवेषु इन्द्रादिषु Vअजुर्यं क्षयरहितम् Vअमृतम् अमृतलक्षणं Vश्रवः अन्नम् Vआ Vतनोति समन्तात् स्वाहाकारवाचा[1] तनोति॥ जमदग्निदत्ता। 'दाण् दाने' इत्यस्य निष्ठायां 'दो दद्धोः' इति ददादेशः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। अजुर्यम्। 'जॄ वयोहानौ'। 'ऋहलोर्ण्यत्'। 'बहुलं छन्दसि' इत्युत्वम्। 'नञ्सुभ्याम्' इत्यन्तोदात्तत्वम् ॥२१॥

ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पाञ्चजन्यासु कृष्टिषु।
सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥ १६ ॥

ससर्परीः। अभरत्। तूयम्। एभ्यः। अधि। श्रवः। पाञ्चऽजन्यासु। कृष्टिषु।
सा। पक्ष्या। नव्यम्। आयुः। दधाना। याम्। मे। पलस्तिऽजमदग्नयः। ददुः ॥१६॥

Vससर्परीः सर्वत्र गद्यपद्यात्मकत्वेन सर्पणशीला वाग्देवता Vपाञ्चजन्यासु Vकृष्टिषु। निषाद-पञ्चमाश्चत्वारो वर्णाः पञ्चजनाः। तत्संबन्धिनीषु प्रजासु यत् Vश्रवः अन्नं विद्यते तन्नोऽस्मभ्यम् Vअधि अधिकं यथा भवति तथा Vतूयं क्षिप्रम् Vअभरत् भरतु संपादयतु। Vपलस्तिजमदग्नयः पलस्तयः पलिता दीर्घायुषो जमदग्नयो मुनयः Vयां वाचं सूर्यादाहृत्य Vमे मह्यं Vददुः अददुः[2] Vपक्ष्या पक्षस्य पक्षादिनिर्वाहकस्य सूर्यस्य दुहिता Vसा वाक् Vनव्यं नवतरम् Vआयुः अन्नं जीवनं वा Vदधाना मम कुर्वाणा भवतु॥ पाञ्चजन्यासु। 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' इति ञ्यप्रत्ययः। ञ्नित्यादिर्नित्यम्। पक्ष्या। पक्षे भवा। दिगादिभ्यश्चत्। तित्स्वरितः। नव्यम्। नवशब्दात् वस्वादित्वात् स्वार्थिको यत्। पलस्तिजमदग्नयः पलस्तयो जमदग्नयः। कर्मधारयसमासः। समासस्वरः॥

स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि।
इन्द्रः पातल्ये ददतां शरीतोरिष्टनेमे अभि नः सचस्व ॥ १७ ॥

स्थिरौ। गावौ। भवताम्। वीळुः। अक्षः। मा। ईषा। वि। वर्हि। मा। युगम्। वि। शारि।
इन्द्रः। पातल्ये३ इति। ददताम्। शरीतोः। अरिष्टऽनेमे। अभि। नः। सचस्व ॥ १७॥

राज्ञः सुदासो यज्ञेऽवभृथं कृत्वा यज्ञशालातो निर्गन्तुमिच्छन् रथे अश्वादिकं[3] युञ्जानो विश्वामित्रो रथाङ्गानि स्तौति। Vगावौ। गच्छत इति गावावश्वौ। Vस्थिरौ[4] Vभवताम्। Vअक्षः च Vवीळुः दृढो भवतु। Vईषा दण्डश्च Vमा Vवि Vवर्हि विनष्टो मा भवतु। Vयुगं च Vमा Vवि Vशारि विशीर्णं मा भवतु। Vइन्द्रः Vपातल्ये पतनशीले कीलके Vशरीतोः विशरणात् प्राक् Vददतां धारयतु। हे[5] Vअरिष्टनेमे अहिंसितप्रधिविशिष्ट हे[6] रथ Vनः अस्मान् Vअभि आभिमुख्येन Vसचस्व संगतो भव॥

१. ल-स-स्वाहाकारवाचम्। २. ख-ग-न-भ-स-अदुः। ३. ख-ग-च-न-भ-स-अश्वादि।
४. च-स्थिरौ स्थिरौ। ५. ख-ग-च-ज-ण-हे इन्द्र। ६. ख-ण-घ-च-ज-ण-भ-स-'हे' नास्ति।

वि वर्हि । ' वृहि वृद्धौ ' । विपूर्वो वृहिर्विनाशे वर्तते । अस्मात् कर्मकर्तरि लुङि ' चिण् भावकर्मणोः ' इति चिण् । ' चिणो लुक् ' इति तप्रत्ययस्य लुक् । निघातः । युगम् । युगशब्दे[1] उल्छादिषु रथाद्युपकरणेऽर्थे घञन्तत्वेन निपातनादगुणत्वम् । तत्र पाठादन्तोदात्तत्वम् । शारि । ' शॄ हिंसायाम् ' इत्यस्य लुङि रूपम् । अरिष्टनेमे । पादादित्वात् पाष्टिकमाद्युदात्तत्वम् ॥

बलं धेहि तनूषु नो बलमिन्द्रानळुत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥ १८ ॥

बलम् । धेहि । तनूषु । नः । बलम् । इन्द्र । अनळुत्ऽसु । नः ।
बलम् । तोकाय । तनयाय । जीवसे । त्वम् । हि । बलऽदाः । असि ॥ १८ ॥

हे [v]इन्द्र [v]नः अस्माकं [v]तनूषु शरीरेषु [v]बलं [v]धेहि । [v]नः अस्मत्संबन्धिरथवाहेषु [v]अनळुत्सु[2] अनडुत्सु[2] [v]बलं धेहि । [v]तोकाय पुत्राय [v]तनयाय पौत्राय च [v]जीवसे चिरं जीवनाय [v]बलम् आयुर्विधेहि। एतादृशं दातृत्वं कुत इत्यत आह । [v]त्वं [v]बलदाः । बलं ददातीति बलदाः । [v]असि [v]हि सर्वेषु लोकेषु प्रसिद्धोऽसि खलु ॥ अनळुत्सु । ' वह प्रापणे ' । ' अनसि वहेः क्विबनसो डश्च ' इति क्विप् । अनसः सकारस्य डत्वम् । वहेर्यजादित्वात् संप्रसारणम् । ' वसुस्रंसुध्वंस्वनडुहां दः ' इति हकारस्य दत्वम् । कृदुत्तरस्वरः[3]। असि । हियोगादनिघातः । सिपः पित्त्वादनुदात्तत्वे धातुस्वरः ॥

अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥ १९ ॥

अभि । व्ययस्व । खदिरस्य । सारम् । ओजः । धेहि । स्पन्दने । शिंशपायाम् ।
अक्ष । वीळो इति । वीळित । वीळयस्व । मा । यामात् । अस्मात् । अव । जीहिपः । नः ॥ १९ ॥

हे इन्द्र [v]खदिरस्य [v]सारम् । सारेण हि आणिः क्रियते । तं खदिरस्य सारभूतमाणिम् [v]अभि [v]व्ययस्व अभितस्तत्तत्स्थानेषु दार्ढ्यार्थं निधेहि । [v]स्पन्दने रथस्य गमने सति [v]शिंशपायां शिंशपाख्यदारुनिर्मिते रथस्य फलके [v]ओजो [v]धेहि दार्ढ्यं कुरु । हे [v]वीळो दृढ[4] [v]वीळित अस्माभिर्दृढीकृत हे [v]अक्ष [v]वीळयस्व त्वं दृढो भव। यद्वा अस्मान् दृढीकुरु । [v]यामात् गच्छतः अस्माद्रथात्[5] [v]नः अस्मान् [v]मा [v]अव [v]जीहिपः मा पीपतः ॥ खदिरस्य । ' अजिरशिशिर° ' इत्यादिना किरच्प्रत्ययान्तत्वेन निपातनादन्तोदात्तः । वीळित । वीळयतेर्ण्यन्तस्य निष्ठायामिडागमः । ' निष्ठायां सेटि ' (पा. सू. ६.४. ५२) इति णेर्लुक् । वीळयस्व । आमन्त्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । यामात् । ' या प्रापणे ' इत्यस्मात् ' अर्तिस्तुसुहुसृ° ' इत्यादिना मन्प्रत्ययः । नित्त्वादाद्युदात्तः । जीहिपः । ' ओहाक् त्यागे ' । ण्यन्तस्य लुङि चङि रूपम् । अकारस्येकारश्छान्दसः ॥

१. ज-ण-युगशब्दस्य । २. न-ल-अनडुत्सु; स-अनळुत्सु । ३. ज-ण-कृदुत्तरपदस्वरः । ४. ख-ग-च-भ-स-' दृढ ' नास्ति । ५. घ-ज-ण-भ-रथादस्मात् ।

अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् ।
स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ॥ २० ॥

अयम् । अस्मान् । वनस्पतिः । मा । च । हाः । मा । च । रिरिषत् ।
स्वस्ति । आ । गृहेभ्यः । आ । अवऽसै । आ । विऽमोचनात् ॥ २० ॥

यजमान आत्मनः श्रेय आशास्ते । Vवनस्पतिः वनस्पतिनिर्मितः Vअयं रथो रथारूढान् Vअस्मान् Vमा Vच Vहाः मा त्याक्षीत् । किंच Vमा Vरीरिषत् अस्मान् मा विनाशयतु । किंच Vआ Vगृहेभ्यः यावद्गृहान् प्राप्नुयाम तावदस्मभ्यं Vस्वस्ति भवतु । तथा Vआ Vअवसै । पञ्चम्यर्थे चतुर्थी । यावद्रथवेगावसानं तावत् । Vआ Vविमोचनात् यावद्रथयोजिताश्वविमोचनं तावत् स्वस्ति भवतु ॥ हाः । 'ओहाक् त्यागे' । लुङि 'मन्त्रे घस०' इत्यादिना सिचो लुक् । पुरुषव्यत्ययः । 'चवायोगे प्रथमा' इति न निघातः । रीरिषत् । 'रिष हिंसायाम्' इत्यस्य ण्यन्तस्य लुङि चङि रूपम् । द्वितीयस्वाग्निघातः । गृहेभ्यः । ग्रहेः 'गेहे कः' इति कः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । अवसै । 'षोऽन्तकर्मणि' । क्विप् । चतुर्थ्येकवचने आतो लोपाभावश्छान्दसः । वृद्धिः । एकादेशस्वरः ॥ ॥ २२ ॥

'इन्द्रोतिभिः' इत्याद्याश्चतस्रो वसिष्ठद्वेषिण्यः । पुरा[1] खलु[1] विश्वामित्रशिष्यः सुदा नाम राजर्षिरासीत् । स च केनचित् कारणेन वसिष्ठद्वेष्योऽभूत् । विश्वामित्रस्तु शिष्यस्य रक्षार्थमाभिर्ऋग्भिः वसिष्ठमशपत् । इमा अभिशापरूपाः । ता ऋचो वसिष्ठा न शृण्वन्ति ॥

इन्द्रोतिभिर्बहुलाभिर्नो अद्य यात्श्रेष्ठाभिर्मघवञ्छूर जिन्व ।
यो नो द्वेष्टयधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥ २१ ॥

इन्द्र । ऊतिऽभिः । बहुलाभिः । नः । अद्य । यात्ऽश्रेष्ठाभिः । मघऽवन् । शूर । जिन्व ।
यः । नः । द्वेष्टि । अधरः । सः । पदीष्ट ।
यम् । ऊँ इति । द्विष्मः । तम् । ऊँ इति । प्राणः । जहातु ॥ २१ ॥

परस्य शापं करिष्यन् आदावात्मनो रक्षां कुरुते प्रथमेनार्धर्चेन । हे Vशूर शौर्यवन् पराभिभवशक्त हे Vमघवन् धनवन् Vइन्द्र Vअद्य अस्मिन्काले Vयात् । यातयतिर्वधकर्मा । यातयतीति यात् । 'सुपां सुलुक्०' इति शसो लुक् । यातः शत्रून् हिंसतः Vनः अस्मान् Vऊतिभिः त्वदीयाभी रक्षाभिः Vजिन्व प्रीणय । कीदृशीभिः । Vबहुलाभिः बह्वीभिः Vश्रेष्ठाभिः प्रशस्यतराभिः । अथ शपति । Vनः अस्मान् Vयः शत्रुर्द्वेष्यः Vद्वेष्टि[2] अस्मद्विषयामप्रीतिं करोति Vसः Vअधरः निकृष्टः सन् Vपदीष्ट पततु । वयं च Vयमु Vद्विष्मस्तमु तं द्वेष्यं Vप्राणः देहमध्ये वर्तमानः पञ्चवृत्तिर्वायुः Vजहातु परित्यजतु । उशब्दौ पूरकौ ॥

---

१. ख-ग-च-ज-ण-भ-स-'पुरा खलु' नास्ति । २. त-'द्वेष्टि' नास्ति ।

परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति ।
उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति ॥ २२ ॥

परशुम् । चित् । वि । तपति । शिम्बलम् । चित् । वि । वृश्चति ।
उखा । चित् । इन्द्र । येषन्ती । प्रऽयस्ता । फेनम् । अस्यति ॥ २२ ॥

हे[१] [v]इन्द्र [v]परशुं [v]चित् यथा कुठारं[१] प्राप्य वृक्षः [v]वि [v]तपति विशिष्टतापयुक्तो भवति। एवं मदीयो द्वेष्टा वितपतु । [v]शिम्बलं [v]चित् शल्मलीकुसुमं यथा अनायासेन वृन्तात् विच्छिद्यते । एवं मद्द्वेष्टा[२] [v]वि [v]वृश्चति विच्छिन्नावयवः[३] भवतु । [v]प्रयस्ता प्रहता[४] [v]येषन्ती स्रवन्ती [v]उखा [v]चित् स्थालीव स द्वेष्टा मदीयमन्त्रसामर्थ्येन प्रहतः सन् [v]फेनमस्यति फेनं मुखादुद्गिरतु ॥

न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः ।
नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति ॥ २३ ॥

न । सायकस्य । चिकिते । जनासः । लोधम् । नयन्ति । पशुं । मन्यमानाः ।
न । अवाजिनम् । वाजिना । हासयन्ति । न । गर्दभम् । पुरः । अश्वात् । नयन्ति ॥ २३ ॥

पुरा[१] खलु[१] तपसः क्षयो मा प्रापदिति शापान्निवृत्तं मौनिनं[६] विश्वामित्रं वसिष्ठपुरुषा बद्ध्वा आनीतवन्तः । तान् प्रति विश्वामित्रो ब्रूते । हे [v]जनासः जनाः [v]सायकस्य अवसानकारिणो विश्वामित्रस्य मन्त्रगणसामर्थ्यं[७] [v]न [v]चिकिते भवद्भिर्न ज्ञायते । अत एव [v]लोधं लुब्धं तपसः क्षयो मा भूदिति लोभेन तूष्णीं स्थितमृषिं [v]पशु[८] [v]मन्यमानाः । पशु इति निपातः पशुशब्दसमानार्थः । पशुवन्मन्यमानाः[८] एते [v]नयन्ति बद्ध्वा स्वकीयं देशं प्रापयन्ति । एवं[९] स्वसामर्थ्यं प्रदर्श्य विसदृशो वसिष्ठो मया सह स्पर्धितुं नार्हतीति धिक्करोति । [v]नावाजिनम् इति[९] । अवाजिनम् । वाचामिनो[१०] वाजिनः सर्वज्ञः । तद्विलक्षणं मूर्खजनं [v]वाजिना वागीशाः न [v]हासयन्ति हास्यास्पदं न कुर्वन्ति । तेन सह न स्पर्धन्त इत्यर्थः । तथा [v]गर्दभं रासभम् [v]अश्वात् [v]पुरः पुरस्तात् [v]न [v]नयन्ति[१०] । एवमेव विसदृशो वसिष्ठो न मया स्पर्धितुमीष्ट इत्यर्थः ॥

---

१. न–ल–परशुं चित् । चिच्छब्द उपमार्थः । यथा परशुं कुठारम् । २. ग-च–स द्वेष्टा । ३. त–वृक्तः विच्छिन्नावयवः । ४. घ-प-भ–अपहता; ख-ग-च-ज-ण–आपहता । ५. ख-ग-च-ज-ण-भ–'पुरा खलु' नास्ति । ६. ख-ग-च-ज-ण-भ–'मौनिनं' नास्ति । ७. ख-ग-च-ज-ण-भ–मन्त्रसामर्थ्यम् । ८. ख-ग-घ-च-ज-ण-भ–पशुवत् मन्यमानाः । ९. ख-ग-घ-च-ज-ण-भ–वसिष्ठं धिक्करोति । १०. ख-ग-घ-च-ज-ण-भ–मूर्खं वाजिनाः वागीशाः न नयन्ति ।

इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम् ।
हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ ॥ २४ ॥

इमे । इन्द्र । भरतस्य । पुत्राः । अपऽपित्वम् । चिकितुः । न । प्रऽपित्वम् ।
हिन्वन्ति । अश्वम् । अरणम् । न । नित्यम् । ज्याऽवाजम् । परि । नयन्ति । आजौ ॥२४॥

हे [v]इन्द्र [v]भरतस्य [v]पुत्राः भरतवंश्याः [v]इमे विश्वामित्राः [v]अपपित्वम् अपगमनं वसिष्ठेभ्यः[1] [v]चिकितुः जानन्ति। [v]प्रपित्वं प्रगमनं [v]न जानन्ति। शिष्टैः सह तेषां संगतिर्नास्ति। ब्राह्याः[2] एव त इत्यर्थः। अपि च [v]आजौ संग्रामे [v]नित्यं सहजम् [v]अरणं [v]न अरिमिव वसिष्ठान् प्रति [v]अश्वं [v]हिन्वन्ति प्रेरयन्ति। ततश्च [v]ज्यावाजं बलं धनुः [v]परि [v]णयन्ति। वसिष्ठान् हन्तुं शरसंधानेन चरन्ति[3] ॥ ॥ २३ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके नव सूक्तानि। तत्र 'इमं महे' इति द्वाविंशत्यृचं प्रथमं सूक्तं त्रैष्टुभं वैश्वदेवं विश्वामित्रपुत्रस्य वाक्पुत्रस्य वा प्रजापतेरार्षम्। अत्रेयमनुक्रमणिका—'इमं महे द्व्यधिकोक्तगोत्रः प्रजापतिर्हि वैश्वदेवं ह' इति। अस्मिन् सूक्ते आद्याग्नेयी ततः[4] पराः[4] सप्तर्चौ द्यावापृथिव्यास्ततः परा द्युदेवताका। दशमी द्यावापृथिव्यैकादशी सावित्री ततः परं 'सुकृत्' इति त्वाष्ट्री आर्भवी च 'विद्युद्रथाः' इति मारुती सारस्वती च ततः परं तिस्रो विश्वेन्द्राग्निदेवताकाः 'स्वदस्व' इत्याग्नेयीति। एवं वैश्वदेवं[5] सूक्तम्[5]। सूक्तविनियोगो लैङ्गिकः। अग्निप्रणयने राजन्यस्य 'इमं महे' इति प्रतिपत्। 'पञ्चम्यां पौर्णमास्याम्' इत्यत्र सूत्रितम्—'इमं महे विदथ्याय शूषम्' (आश्व. श्रौ. २. १७) इति ॥

इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः ।
शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ॥ १ ॥

इमम् । महे । विदथ्याय । शूषम् । शश्वत् । कृत्वः । ईड्याय । प्र । जभ्रुः ।
शृणोतु । नः । दम्येभिः । अनीकैः । शृणोतु । अग्निः । दिव्यैः । अजस्रः ॥ १ ॥

[v]महे महते [v]विदथ्याय विदथे यज्ञे मन्थनेन[6] निष्पाद्यमानाय [v]ईड्याय सर्वैः स्तुत्यायाग्नये [v]शूषं सुखकरम् [v]इमं स्तोमं [v]शश्वत्कृत्वः भूयो भूयः [v]प्र [v]जभ्रुः प्रभरन्ति प्रकर्षेण धारयन्ति। उच्चारयन्तीत्यर्थः। सः [v]अग्निः [v]दम्येभिः परेषां दमनकुशलैः दमे[7] गृहे विद्यमानैर्वा[7] [v]अनीकैः[8] तेजोभिः युक्तः सन् [v]नः अस्मदीयमिमं स्तोमं[9] [v]शृणोतु। [v]दिव्यैः दिवि भवैस्तेजोभिः [v]अजस्रः निरन्तरं

१. ख-ग-च-ज-ण-त-भ-ल—वासिष्ठेभ्यः। २. त-ल—ब्राह्माः। ३. ख-ग-ज-ण—वारन्ति; घ-भ—वारयन्ति; त-न—व्यापर्यन्ति; ल—आवर्यान्त। ४. ल—ततः परम्। ५. ख-ग-ज-ण-त-न-भ—वैश्वदेवसूक्तम्। ६. ख-घ-ज-ण-न-भ—मथनेन। ७. ख-ग-च-ज-ण-न-भ-स—'दमे गृहे विद्यमानैर्वा' नास्ति। ८. च—अनीकैः अनेकैः। ९. ख-ग-च-त-फ-भ-ल-स—स्तोत्रम्।

युक्तोऽग्निरिमं स्तोमं vशृणोतु । 'शश्वत्कृत्व ईड्याय प्र जभ्रुरिति स्वानामेवैनं तच्छ्रैष्ठ्यं गमयति' (ऐ. ब्रा. १. २८) इति ब्राह्मणानुसारेण महदादिगुणविशिष्टाय[1] यजमानाय[1] इममग्निं प्रजभ्रुः प्रहरन्त्यृत्विज इति वा व्याख्येयम् । उत्तरोऽर्धर्चः[2] समान एव ॥ विदथ्याय। तत्र भव इत्यर्थे 'भवे छन्दसि' इति यत्। तित्स्वरितः[3]। ईड्याय। 'ईडवन्द' इत्यादिना उदात्तत्वम्। दम्येभिः। 'तत्र साधुः' इति यत्। 'यतो नावः' इत्यायुदात्तत्वम्[4]। दिव्यैः। दिवमर्हतीत्यर्थे 'छन्दसि च' इति यप्रत्ययः। अजस्रः। 'जसु मोक्षणे'। नञ्पूर्वः। 'नमिकम्पि' इत्यादिना ताच्छीलिको रप्रत्ययः। नञा समासे तस्य स्वरः ॥

महि॑ म॒हे दि॒वे अ॑र्चा पृथि॒व्यै कामो॑ म इ॒च्छञ्च॑रति प्रजा॒नन् ।
ययो॑र्ह॒ स्तोमे॑ वि॒दथे॑षु दे॒वाः स॑प॒र्यवो॒ मा॒दय॑न्ते॒ सचा॒योः ॥ २ ॥

महि॑ । म॒हे । दि॒वे । अ॒र्च॒ । पृ॒थि॒व्यै । कामः॑ । मे॒ । इ॒च्छन् । च॒र॒ति॒ । प्र॒ऽजा॒नन् ।
ययोः॑ । ह॒ । स्तोमे॑ । वि॒दथे॑षु । दे॒वाः । स॒प॒र्यवः॑ । मा॒दय॑न्ते । सचा॑ । आ॒योः ॥ २ ॥

हे स्तोतः vमहे महत्यै vदिवे द्युलोकदेवतायै महत्यै vपृथिव्यै च vमहि महत् त्वं vप्रजानन् स्तोत्रम् vअर्च कुरु। vमे मम vकामः मनोरथः सर्वान् भोगान् vइच्छन् vचरति सर्वत्र वर्तते। vआयोः मनुष्यस्य vविदथेषु यज्ञेषु vययोः द्यावापृथिव्योः vस्तोमे स्तोत्रे vसपर्यवः पूजाकामाः vदेवाः स्तोतारो वा[5] vसचा vमादयन्ते vह सह माद्यन्ति खलु ॥ पृथिव्यै। 'उदात्तयणः' इति विभक्तेरुदात्तत्वम्। सपर्यवः। सपर्यामिच्छतीत्यर्थे सुपः क्यच्॥

युवो॒र्ऋ॒तं रो॑दसी स॒त्यम॑स्तु म॒हे षु णः॑ सुवि॒ताय॒ प्र भू॑तम् ।
इ॒दं दि॒वे नमो॑ अग्ने पृथि॒व्यै स॑प॒र्यामि॒ प्रय॑सा॒ यामि॒ रत्न॑म् ॥ ३ ॥

यु॒वोः॑ । ऋ॒तम् । रो॒द॒सी॒ इति॑ । स॒त्यम् । अ॒स्तु॒ । म॒हे । सु । नः॒ । सु॒वि॒ताय॑ । प्र । भू॒त॒म् ।
इ॒दम् । दि॒वे । नमः॑ । अ॒ग्ने॒ । पृ॒थि॒व्यै । स॒प॒र्यामि॑ । प्रय॑सा । यामि॑ । रत्न॑म् ॥ ३ ॥

हे vरोदसी द्यावापृथिव्यौ vयुवोः युवयोः vऋतम् आनृशंस्यं vसत्यं यथार्थम् vअस्तु। युवां vनः अस्माकं vमहे महते vसुविताय अभ्युदयाय यज्ञसमाप्त्यर्थं vसु सुष्ठु vप्र vभूतं प्रभवतम्। हे vअग्ने vदिवे vपृथिव्यै च vइदं vनमः अस्तु। vप्रयसा हविर्लक्षणेनान्नेन vसपर्यामि परिचरामि। vरत्नम् उत्तमं धनं vयामि याचे। यातिर्याच्ञाकर्मा ईमह इत्यादिषु पठितत्वात्॥ सु। संहितायां 'सुञः' (पा. सू. ८. ३. १०७) इति षत्वम्। नः। संहितायां 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। सुविताय । 'इण् गतौ'। अधिकरणे क्तः। शोभनं गम्यतेऽस्मिन्निति तत् सुवितम्। उवङादेशः

१. ख-ग-च-ज-ण-न-भ-स-°विशिष्टयजमानाय । २. ख-ल-उत्तरार्धर्चः । ३. ख-ग-च-ज-ण-त-न-भ-स-तित्स्वरः । ४. ख-ग-च-ज-ण-न-फ-भ-ल-स-'इत्यायुदात्तत्वं' नास्ति । ५. ख-ग-च-ज-ण-त-भ-स-'वा' नास्ति ।

छान्दसः। भूतम्। भवतेर्लोटि ' बहुलं छन्दसि ' इति शपो लुकि रूपम्। यद्वा। छान्दसे लुङि सिचः ' गातिस्था° ' इति लुक्। निघातः। दिवे पृथिव्यै। ' नमःस्वस्ति° ' (पा. सू. २. ३.१६) इत्यादिना चतुर्थी। सपर्यामि। कण्ड्वादिः परिचरणे वर्तते। प्रत्ययस्वरः। यामि। यातेर्लटि रूपम्। वाक्यभेदादनिघातः ॥

उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः।
नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ॥ ४ ॥

उतो इति। हि। वाम्। पूर्व्याः। आऽविविद्रे।
ऋतवरी इत्यृतऽवरी। रोदसी इति। सत्यऽवाचः।
नरः। चित्। वाम्। सम्ऽइथे। शूरऽसातौ। ववन्दिरे। पृथिवि। वेविदानाः ॥ ४ ॥

vउतो अपि च हे[1] vऋतावरी। ऋतं सत्यम्। तद्वत्यौ हे vरोदसी द्यावापृथिव्यौ vपूर्व्याः पूर्वे भवाः पुरातनाः vसत्यवाचः महर्षयः vवां युवाभ्याम् vआविविद्रे vहि तं तमपेक्षितमर्थं लेभिरे खलु[2]। तथा[2] हे vपृथिवि vशूरसातौ शूराणां सातिर्लाभो[3] यस्मिन् तस्मिन् vसमिथे संगमननिमित्ते[3] युद्धे vनरश्चित् अद्यतनाः[4] मनुष्याश्च vवां युवयोर्माहात्म्यं vवेविदानाः जानन्तः अतः[5] द्यावापृथिव्यौ vववन्दिरे स्तुवन्ति ॥ आविविद्रे। ' विदृ लाभे ' इत्ययमुभयपदी। लिटि ' इरयो रे ' इति रे इत्यादेशः। ' सह सुपा ' इत्यत्र ' सह ' इति योगविभागादाङा सह समासः। समिथे। ' इण् गतौ '। ' समीणः ' (उ. सू. २.१६८) इति थक्प्रत्ययः। प्रत्ययस्वरः ॥

को अद्धा वेद क इह प्र वोचदेवाँ अच्छा पथ्या[6] का समेति।
दक्षे एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥ ५ ॥

कः। अद्धा। वेद। कः। इह। प्र। वोचत्। देवान्। अच्छ। पथ्या। का। सम्। एति।
दक्षे। एषाम्। अवमा। सदांसि। परेषु। या। गुह्येषु। व्रतेषु ॥ ५ ॥

vकः वा[6] vअद्धा सत्यभूतं तादृशमर्थं vवेद वेत्ति। vकः वा vइह अस्मिन् प्रज्ञातमर्थं vप्र vवोचत् प्र ब्रवीति। किं तत्तदुच्यते। vदेवान् vअच्छ अभिलक्ष्य vका vपथ्या पथि साधुः समीचीनः को वा मार्गः vसमेति सम्यक् प्राप्नोतीति। इममर्थं न कश्चिज्जानाति। न कोऽपि ब्रवीति। किं ते देवा विद्यन्ते। बाढमित्याह। vएषां दिवि स्थितानां नक्षत्ररूपाणां देवानाम् vअवमा अधोमुखानि

१. ख-ग-च–' हे ' नास्ति। २. ख-ग-च-ज-ण-न-भ–' खलु। तथा ' नास्ति। ३. ख-ग-च-ज-ण-न-भ-स–समिथे। ४. ख-ग-घ-च-ज-ण-न-भ–अन्यतराः। ५. घ-ज-ण–सन्तः; त–' अतः ' नास्ति। ६. ख-ग-च-ज-ण-त-न-प-फ-भ-स–' वा ' नास्ति।

vसदांसि स्थानानि vदृष्टये दृश्यन्ते । तथापि vपरेषु उत्तमेषु vगुह्येषु दुर्ज्ञानेषु[1] vव्रतेषु कर्मसु अनुष्ठितेषु[2] vया[3] यानि दिवि[3] देवस्थानानि लभ्यन्ते तत्रागन्तुं को मार्ग इति वेदमन्तरेण न कश्चिज्जानातीत्यभिप्रायः ॥ अद्धा । स्वरादिष्वन्तोदात्तत्वेन पठितत्वादन्तोदात्तः । वोचत् । 'ब्रूञ् व्यक्तायां वाचि' । लुङि 'ब्रुवो वचिः' इति वच्यादेशः । 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङादेशः । 'वच उम्' इत्युमागमः । निघातः ॥ ॥ २४ ॥

कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विधृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥ ६ ॥

कविः । नृऽचक्षाः । अभि । सीम् । अचष्ट ।
ऋतस्य । योना । विधृते इति विऽधृते । मदन्ती इति ।
नाना । चक्राते इति । सदनम् । यथा । वेः । समानेन । क्रतुना । संविदाने इति सम्ऽविदाने ॥६॥

vकविः क्रान्तदर्शी vनृचक्षाः नृणां द्रष्टा सूर्यः [1]सीम् एते द्यावापृथिव्यौ vअभि vअचष्ट सर्वतः पश्यति । vऋतस्य vयोना जलस्य स्थानेऽन्तरिक्षे vमदन्ती हृष्यन्त्यौ vविधृते । घृतमस्या ओषधयो जलममुष्या इति । एवंविधरसोपेते vसमानेन । 'समानमेतदुदकमुच्चैत्यव चाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः' (ऋ. सं. १. १६४. ५१) इति परस्परप्रीणनाख्येनैकेन vक्रतुना कर्मणा vसंविदाने परस्परमैकमत्यं प्राप्ते ते द्यावापृथिव्यौ vनाना पृथग्भूतं vसदनं स्थानं vचक्राते । तथा च श्रुतिः—'इमौ वै लोकौ सहास्तां तौ व्यैताम्' (ऐ. ब्रा. ४. २७) इति । तत्र दृष्टान्तः । vयथा vवेः कुलायं नाना भवति तद्वत् ॥ अचष्ट । 'चक्षिङ् व्यक्तायां वाचि' इत्यस्य लङि 'स्कोः संयोगाद्योः०' इति ककारलोपः । निघातः । संविदाने । 'विद ज्ञाने' इत्यस्य 'समो गमि०' इत्यादिनात्मनेपदे शानच् । चित्त्वादन्तोदात्तः ।

समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ॥ ७ ॥

समान्या । वियुते इति विऽयुते । दूरेअन्ते इति दूरेऽअन्ते ।
ध्रुवे । पदे । तस्थतुः । जागरूके इति ।
उत । स्वसारा । युवती इति । भवन्ती इति । आत् । ऊँ इति । ब्रुवाते इति । मिथुनानि । नाम ॥७॥

vसमान्या समाने परस्परप्रीणनाख्येन[4] कर्मणा ऐकमत्यं गते vवियुते वियुज्य[5] वर्तमाने vदूरेअन्ते । दूरेऽन्तोऽवसानं ययोस्ते दूरेअन्ते अविनाशिन्यौ ते द्यावापृथिव्यौ vजागरूके जागरणशीले सत्यौ vध्रुवे

१. ख-ग-च-ज-ण-त-न-फ-भ-स-स्थानेषु; घ-ज्ञानेषु । २. ख-ग-च-ज-भ-त-न-फ-स-अनुष्ठितेषु च । ३. ख-स-यानि; ग-च-या दिवि; घ-ज-ण-त-न-भ-ल-या यानि । ४. ख-ग-च-ज-ण-फ-भ-परस्परप्रेरणाख्येन । ५. ख-ग-च-फ-भ-वियुज्यमाने ।

अविनाशिनि [v]पदे अन्तरिक्षे [v]तस्थतुः तिष्ठतः[1]। [v]उत अपि च [v]युवती नित्यतरुणे [v]स्वसारा भगिन्यौ एकस्मादात्मनो जाते इति [v]भवन्ती भवन्त्यौ[2] तस्थतुरित्यन्वयः। [v]आदु[3] अनन्तरं [v]मिथुनानि द्वन्द्वानि [v]नाम उर्वी, पृथ्वी, बहुले, दूरेअन्ते, रोदसी, पुरोहिते इत्यादीनि नामानि [v]ब्रुवाते ते परस्परं ब्रूतः। उर्व्यादिभिर्द्वन्द्वनामभिर्द्यावापृथिव्यावुच्येते इत्यर्थः॥ समान्या। 'सुपां सुलुक्०' इति विभक्तेर्डादेशः। दूरेअन्ते। 'इण् गतौ'। 'दुरीणो लोपश्च' (उ. सू. २. १७७) इति रक्प्रत्ययो धातोर्लोपश्च। 'रो रि' (पा. सू. ८. ३.१४) इति रेफलोपः। 'दूलोपे०' इति दीर्घः। अन्तशब्दः अमेः 'असिहसि०' इत्यादिना तन्प्रत्ययान्तः। 'सप्तम्युपमान०' इति बहुव्रीहिः। 'हलदन्तात्०' इति सप्तम्या अलुक्। पूर्वपदस्वरः। जागरूके। 'जागृ निद्राक्षये' इत्यस्मात् ताच्छील्यार्थे[4] 'जागरूकः' (पा. सू. ३.२.१६५) इत्यूकप्रत्ययः। प्रत्ययस्वरः। स्वसारा। 'न षट्स्वस्रादिभ्यः' इति ङीपः[5] प्रतिषेधः[6]॥

विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते।
एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम्॥ ८॥

विश्वा। इत्। एते इति। जनिम। सम्। विविक्तः। महः।
देवान्। बिभ्रती इति। न। व्यथेते इति।
एजत्। ध्रुवम्। पत्यते। विश्वम्। एकम्। चरत्। पतत्रि। विषुणम्। वि। जातम्॥८॥

[v]एते द्यावापृथिव्यौ [v]विश्वेत् [v]जनिम सर्वाण्यपि भूतजातानि [v]सं [v]विविक्तः अवकाशप्रदानेन संविभज्य[7] कुरुतः। किंच [v]महः महतः [v]देवान् इन्द्रसूर्यादीन् सरित्समुद्रपर्वतादींश्च [v]बिभ्रती बिभ्राणे अपि ते[8] [v]न [v]व्यथेते न खिद्येते। किंच [v]एजत् जङ्गमात्मकं [v]ध्रुवं स्थावरात्मकं च [v]विश्वं जगत् [v]एकं स्थानं पृथिवीमेव [v]पत्यते अभिगच्छति। तथा [v]चरत् चञ्चलं पशुजातं [v]पतत्रि पक्षिजातं च [v]विषुणं विष्वक्[9] नानारूपमनयोर्मध्ये [v]वि तिष्ठते। योग्यक्रियाध्याहारः॥ विविक्तः। 'विचिर् पृथग्भावे'। जुहोत्यादिः। निघातः। बिभ्रती। 'डुभृञ् धारणपोषणयोः' इत्यस्य शतरि 'नाभ्यस्ताच्छतुः' इति नुमभावः। अभ्यस्तस्वरः। एजत्। 'एजृ कम्पने'। शतरि रूपम्। पत्यते। 'पद गतौ'। दिवादिरात्मनेपदी। दकारस्य तकारो व्यत्ययेन। निघातः॥

सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः॥ ९॥

सना। पुराणम्। आधि। एमि। आरात्। महः। पितुः। जनितुः। जामि। तत्। नः।
देवासः। यत्र। पनितारः। एवैः। उरौ। पथि। विऽउते। तस्थुः। अन्तरिति॥ ९॥

---

१. च-फ-आसतुः। २. ख-ग-च-न-भ-ल-स-'भवन्त्यौ' नास्ति। ३. ख-ग-च-न-भ-ल-स-आत्। ४. त-ताच्छील्येऽर्थे। ५. च-त-ङीप्प्रतिषेधः। ६. ख-ग-च-भ-सेभज्य। ७. ल-'ते' नास्ति। ८. घ-ज-ण-विष्वक् विजातम्।

हे द्यौः [V]महः महत्याः [V]पितुः सर्वस्य पालयित्र्याः [V]जनितुः जनयित्र्याश्च तव [V]रूना रूनातनं [V]पुराणं पूर्वकमागतं [V]नः अस्माकं [V]तत् [V]जामि जामित्वम् । सर्वमेकरूपमात्[1] जामित्वमिति द्यौर्भगिनी भवति । तादृशं भगिनीत्वं तत् [V]आरात् अधुना [V]अध्येमि स्मरामि । दिवः पितृत्वे जनयितृत्वे च मन्त्रवर्णः—'द्यौर्मे पिता जनिता नाभिरत्र' (ऋ. सं. १·१६४·३३) इति । [V]यत्र यस्यां दिवि [V]अन्तः मध्ये [V]उरौ विस्तीर्णे [V]व्युते विविक्ते [V]पथि नभसि[2] [V]पनितारः त्वां स्तुवन्तः [V]देवासः देवाः [V]एवैः गमनसाधनैः स्वैः स्वैर्वाहनैः सहिताः सन्तः [V]तस्थुः । तत्र स्थिता देवा मदीयं[3] स्तोत्रं शृण्वन्नित्यवति भावः ॥ पुराणम् । पुराशब्दात् ईश्वरिकार्थे 'सायंचिरम्०' इति ट्युप्रत्ययः । 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (पा. सू. ४. ३. १०५) इति निपातनात्तुडभावः । निपातनादेवान्तोदात्तत्वम् । एमि । 'इक् स्मरणे' । अदादिः । लटि रूपम् । निघातः । व्युते । 'वेञ् तन्तुसंताने' । कर्मणि क्तः । यजादित्वात् संप्रसारणम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः । तस्थुः । तिष्ठतेर्लिटि रूपम् । यत्रयोगादनिघातः ॥

इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥ १० ॥

इमम् । स्तोमम् । रोदसी इति । प्र । ब्रवीमि । ऋदूदराः । शृणवन् । अग्निऽजिह्वाः ।
मित्रः । सम्ऽराजः । वरुणः । युवानः । आदित्यासः । कवयः । पप्रथानाः ॥ १० ॥

हे [V]रोदसी द्यावापृथिव्यौ [V]इमं युष्मदीयं [V]स्तोमं[3] स्तोत्रं [V]प्र [V]ब्रवीमि प्रकर्षेण वदामि । [V]ऋदूदराः । ऋदु मृदु उदरं येषां ते ऋदूदराः । यद्वा । मृदुरुदरे सोमो येषां ते ऋदूदराः । [V]अग्निजिह्वाः । अग्निर्जिह्वास्थानीयो येषां ते तथोक्ताः । [V]सम्राजः सम्यग्दीप्यमानाः [V]युवानः नित्यतरुणाः । यद्वा । यजमानान् अभिमतफलैर्मिश्रीकुर्वन्तः । [V]कवयः क्रान्तदर्शिनः [V]पप्रथानाः स्वानि स्वानि कर्माणि प्रथयन्तो मित्रादयो देवाः [V]शृणवन् तदिदं स्तोत्रं शृण्वन्तु ॥ शृणवन् । 'श्रु श्रवणे' इत्यस्य लेट्यडागमः । अग्निजिह्वाः । त्रिचक्रादित्वादन्तोदात्तत्वम् । पप्रथानाः । 'प्रथ प्रख्याने' इत्यस्य कानचि रूपम् । चित्त्वादन्तोदात्तः ॥ ॥ २५ ॥

हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥ ११ ॥

हिरण्यऽपाणिः । सविता । सुऽजिह्वः । त्रिः । आ । दिवः । विदथे । पत्यमानः ।
देवेषु । च । सवितरिति । श्लोकम् । अश्रेः । आत् । अस्मभ्यम् । आ । सुव । सर्वऽतातिम् ॥ ११ ॥

---

१. ख-ग-च-न-फ-भ-स-सर्वमस्मात् । २. च-फ-देवासः देवसंबन्धिनः पनितारः उद्गातारः एवं स्तोत्रैः तस्थुः । ३. ख-ग-च-भ-स-'स्तोमं' नास्ति ।

vहिरण्यपाणिः । दानार्थं हिरण्यं पाणौ हस्ते यस्य स तथोक्तः । यद्वा । देवकर्तृकयागे सवितुर्ऋत्विग्भूतस्य हस्ते प्राशित्रं भक्षणार्थमध्वर्यवो ददुः । तत्प्राशित्रं तस्य हस्तौ चिच्छेद । ततोऽध्वर्यवो हिरण्मयौ हस्तौ कृत्वा संदधुः । ततोऽयं हिरण्यपाणिः । तथा च कौषीतकं—'सवित्रे प्राशित्रं प्रतिजह्रुस्तत्तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदधुस्तस्माद्धिरण्यपाणिः' इति । vसुजिह्वः शोभनवाक् vसविता vविदथे यज्ञे vत्रिः त्रिषु सवनेषु vदिवः नभसः सकाशात् vआ vएत्यमानः आगच्छन् भवतीति शेषः । परोऽर्धर्चः प्रत्यक्षः । हे vसवितः त्वं vदेवेषु स्तोतृषु विद्यमानं च vश्लोकम् । श्लोक्यतेऽनेनेति श्लोकः स्तोत्रम् । तत् vअग्रेः प्रामुहि vच । vआत् अनन्तरं vसर्वतातिं सर्वमपेक्षितं फलम् vअस्मभ्यम् vआ vसुव प्रेरय ॥ हिरण्यपाणिः । हिरण्यशब्दं यास्को बहुधा निर्वक्ति—'हिरण्यं कस्मात् ह्रियत आयम्यमानमिति वा ह्रियते जनाञ्जनम्' (निरु. २·१०) इत्यादिना । पाणिशब्दं च निर्विवेच—'पाणिः पणायतेः पूजाकर्मणः' (निरु २·२६) इति ॥ 'हर्य कान्तिगत्योः[1]' । 'हर्यतेः कन्यन् हिर च' इति कन्यन्, हिर इत्ययमादेशो धातोः । नित्त्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदस्वरः । एत्यमानः । 'पद गतौ' । दिवादिरात्मनेपदी । दकारस्य तकारश्छान्दसः । अग्रेः । 'श्रिञ् सेवायाम्' इत्यस्य लङि 'बहुलं छन्दसि' इति शपो लुक् । 'चवायोगे प्रथमा' इति न निघातः । सुव । 'षू प्रेरणे' । तुदादिः । सर्वतातिम् । सर्वदेवात्तातिल् स्वार्थिकः । लित्स्वरः ॥

सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।
पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥ १२ ॥

सुऽकृत् । सुऽपाणिः । स्वऽवान् । ऋतऽवा । देवः । त्वष्टा । अवसे । तानि । नः । धात् ।
पूषण्ऽवन्तः । ऋभवः । मादयध्वम् । ऊर्ध्वऽग्रावाणः । अध्वरम् । अतष्ट ॥ १२ ॥

vसुकृत् सुष्ठु जगतः कर्ता vसुपाणिः कल्याणपाणिः vस्ववान् धनवान् vऋतावा सत्यसंकल्पः vत्वष्टा vदेवः vतानि यान्यस्माकमपेक्षितानि vअवसे रक्षणाय vनः अस्मभ्यं vधात् ददातु । vऋभवः । उरु भान्तीत्यृभवः । हे ऋभवः vपूषण्वन्तः पूष्णा सहिता यूयं vमादयध्वम् । अस्मान् धनप्रदानेन हृष्टान् कुरुत । vऊर्ध्वग्रावाणः सोमाभिपवार्थमुद्यतग्रावाणः सन्तः ऋत्विज इममस्मदीयम् vअध्वरमतष्ट अतुर्वन् ॥ अतष्ट । 'तक्षू त्वक्षू तनूकरणे' । ऊदित्त्वादत्रेडभावः । 'झलो झलि' इति सिलोपः[2] । 'स्कोः संयोगाद्योः[3]' इति ककारलोपः । बहुवचनस्यैकवचनं छान्दसम् ॥

विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥ १३ ॥

विद्युत्ऽरथाः । मरुतः । ऋष्टिऽमन्तः । दिवः । मर्याः । ऋतऽजाताः । अयासः ।
सरस्वती । शृणवन् । यज्ञियासः । धाता । रयिम् । सहऽवीरम् । तुरासः ॥ १३ ॥

---

१. त–गतिकान्त्योः । २. च–सिचो लोपः; ज-ण–सलोपः ।

[v]विद्युद्रथाः विद्योतमानरथोपेताः [v]ऋष्टिमन्तः दीप्तिमन्तः । ऋष्टिरायुधविशेषः तद्वन्तो वा । [v]दिवः द्योतमानाः[१] [v]मर्याः शत्रूणां मारयितारः[२] [v]ऋतजाताः उदकाद्यज्ञाद्वा प्रादुर्भूताः । यद्वा । ऋतमुदकं जातं[३] येभ्यस्ते ऋतजाताः । [v]अयासः सततगमनशीलाः [v]यज्ञियासः यज्ञार्हाः [v]मरुतः [v]सरस्वती । गद्यपद्यरूपेण प्रसरणमस्या अस्तीति सरस्वती । वाग्देवता च । एते सर्वे देवा मदीयमिमं स्तोमं[४] [v]शृणवन् शृण्वन्तु । [v]तुरासः अस्माकं फलप्रदाने त्वरणयुक्ता हे मरुतः [v]सहवीरं पुत्रसहितं [v]रयिं धनं [v]धात अस्मभ्यं धत्त ॥ धात । दधातेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' तप्तनप्तनथनाश्च ' इति तबादेशः । पादादित्वादनिघातः । तपः पित्त्वादनुदात्तत्वे धातुस्वरः । तुरासः । ' तुर त्वरणे ' । इगुपधलक्षणः कः । आमन्त्रितत्वान्निघातः ॥

विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ॥ १४ ॥

विष्णुम् । स्तोमासः । पुरुऽदस्मम् । अर्काः । भगस्यऽइव । कारिणः । यामनि । ग्मन् ।
उरुऽक्रमः । ककुहः । यस्य । पूर्वीः । न । मर्धन्ति । युवतयः । जनित्रीः ॥ १४ ॥

[v]स्तोमासः । स्तूयन्त एभिरिति स्तोमाः स्तोत्राणि । [v]अर्काः अर्चनीयानि शस्त्राणि च [v]भगस्येव धनस्य [v]कारिणः कर्तृणीव स्थितानि तानि [v]यामनि संततं प्रतायमानेऽस्मिन् यज्ञे [v]पुरुदस्मं बहुकर्माणम् । यद्वा । बहून् दस्यत्युपक्षपयतीति पुरुदस्मः । तं [v]विष्णुं देवं [v]ग्मन् गच्छन्तु । [v]पूर्वीः बह्व्यः [v]जनित्रीः सर्वस्य[५] जनयित्र्यः [v]युवतयः परस्परमसंकीर्णाः [v]ककुहः । कं स्कुभ्नन्ति विस्तारयन्तीति ककुभो दिशः । यद्वा । ककुबुच्छ्रयार्थः । उच्छ्रिता इव हि दिशो वृक्षाग्रेषूपलभ्यमानाः तिष्ठन्ति । एता दिशो विष्णोराज्ञां [v]न [v]मर्धन्ति न हिंसन्ति । सः[६] विष्णुः [v]उरुक्रमः । उरुर्महान्[७] क्रमः[७] पादविक्षेपो यस्य सः । त्रिविक्रमावतारे एकेनैव पादेन सर्वं जगदाक्रम्यातिष्ठत ॥ ग्मन् । गमेर्लुङि ' मन्त्रे घस° ' इत्यादिना च्लेर्लुक् । ककुभः । पृषोदरादित्वाद्रूपस्वरसिद्धिः ॥

इन्द्रो विश्वैर्वीर्यैः३ः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः ॥ १५ ॥

इन्द्रः । विश्वैः । वीर्यैः । पत्यमानः । उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ।
पुरम्ऽदरः । वृत्रऽहा । धृष्णुऽसेनः । सम्ऽगृभ्य । नः । आ । भर । भूरि । पश्वः ॥ १५ ॥

[v]विश्वैः सर्वैः [v]वीर्यैः सामर्थ्यैः [v]पत्यमानः प्राप्यमाणः सः [v]इन्द्रः [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]महित्वा स्वकीयेन महिम्ना [v]आ [v]पप्रौ पूरयामास । शेषः[८] प्रत्यक्षकृतः[८] । [v]पुरंदरः

१. त–ल–द्योतमानाः द्योतमानस्य रुद्रस्य पुत्रा वा । २. त–मारयितारः मनुष्येभ्यो हिता वा । ३. त–जायते । ४. त-ण–स्तोमं स्तोत्रम् । ५. ख-ग-घ-च-ज-ण-भ–यस्य सर्वस्य । ६. ख-ग-घ-च-ज-ण-न-भ-स–' सः ' नास्ति । ७. ख-ग-घ-च-ण-न-भ-स–' उरुः...क्रमः ' नास्ति; ज–उरुः विस्तृतः क्रमः । ८ ख-ग-घ-च-ज-ण-न-भ-स–' शेषः प्रत्यक्षकृतः ' नास्ति ।

शत्रुपुरां दारयिता [v]वृत्रहा वृत्रस्य हन्ता [v]घृष्णुषेणः पराभिभवनशीलसेनोपेतः[1] स त्वं [v]पश्वः पशून् [v]संगृभ्य संगृह्य [v]नः अस्मभ्यं [v]भूरि प्रभूतं यथा भवति तथा [v]आ [v]भर देहि। यद्वा। पश्वः पशोर्भूरि बहुत्वं बहून् पशूंश्च यच्छेति॥ पुरंदरः। 'दृ विदारणे' इत्यस्य पुरशब्द उपपदे 'पृःसर्वयोर्दारिसहोः' इति खच्प्रत्ययः। 'वाचंयमपुरंदरौ च' इति निपातनात् पूर्वपदस्यामागमः। च्फित्वात् अन्तोदात्तः। घृष्णुषेणः। 'पूर्वपदात्' इति संहितायां षत्वम्। यदा षावं तदा 'रषाभ्याम्०' इति णत्वम्। संगृभ्य। ग्रहेर्ल्यपि स्थानिवद्भावात् संप्रसारणम्। 'हग्रहोर्भश्छन्दसि' इति भत्वम्। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। पश्वः। पशुशब्दात् शसः 'जसादिषु छन्दसि वावचनम्' इति सवर्णदीर्घाभावः॥ ॥ २६ ॥

नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥ १६ ॥

नासत्या। मे। पितरा। बन्धुऽपृच्छा। सऽजात्यम्। अश्विनोः। चारु। नाम।
युवम्। हि। स्थः। रयिऽदौ। नः। रयीणाम्। दात्रम्। रक्षेथे इति। अकवैः। अदब्धा॥ १६॥

हे नासत्यावश्विनौ [v]बन्धुपृच्छा। हविष्प्रदातृत्वेन बन्धूनस्मान् अपेक्षितमर्थं पृच्छतः इति बन्धूनां प्रष्टारौ। युवां [v]मे [v]पितरा[2] पालयितारौ भवतम्। युवयोः [v]अश्विनोः [v]सजात्यं सजाते भवं संगतं [v]चारु [v]नाम कर्मनामेयं[3] खलु। हे अश्विनौ [v]युवं युवां [v]नः अस्मभ्यं [v]रयीणां धनानां मध्ये [v]रयिदौ उत्तमस्य धनस्य दातारौ [v]स्थः [v]हि भवथः खलु। किंच [v]अदब्धा केनाप्यतिरस्कृतौ युवां [v]दात्रं हविषां दातारं माम् [v]अकवैः अकुत्सितैः शोभनैः कर्मभिः [v]रक्षेथे पालयतम्॥ नासत्या। 'नभ्राण्नपात्०' इत्यादिना निपातनान्नञः प्रकृतिभावः। बन्धुपृच्छा। पृच्छेः क्विप्। 'सुपां सुलुक्०' इति सुपो डादेशः। सजात्यम्। सजाते भवम्। 'भवे छन्दसि' इति यत्। तित्स्वरितः। स्थः। अस्तेर्लटि रूपम्। हियोगादनिघातः॥

महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इन्द्रे।
सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥ १७ ॥

महत्। तत्। वः। कवयः। चारु। नाम। यत्। ह। देवाः। भवथ। विश्वे। इन्द्रे।
सखा। ऋभुऽभिः। पुरुऽहूत। प्रियेभिः। इमाम्। धियम्। सातये। तक्षत। नः॥ १७॥

हे [v]कवयः मेधाविनो हे[4] देवाः [v]वः युष्माकं [v]तत् तादृशं [v]महत्[5] प्रभूतं [v]नाम कर्म नमनं वा [v]चारु मनोहरं खलु। [v]यत् येन कर्मणा [v]विश्वे सर्वे यूयम् [v]इन्द्रे इन्द्रोपलक्षिते लोके [v]देवाः [v]भवथ [v]ह देवत्वं प्राप्नुथ खलु। हे [v]पुरुहूत बहुभिराहूत हे[6] इन्द्र त्वं [v]प्रियेभिः प्रियतमैः [v]ऋभुभिः।

१. त–°सेनोपेतः समरुद्गण इत्यर्थः। २. ल-स–पितरौ। ३. ल–नासत्याविति नाम रूपं च कमनीयम्। ४. ज-ण–'हे' नास्ति। ५. त–महत्तत्। ६. ज-ण–'हे' नास्ति।

ऋतेन भवन्त्यृतेन भान्तीति वा । ऋभुभिर्देवैः [v]सखा असि । इन्द्रसहिता ऋभवो यूयम् [v]इमाम् अस्मदीयां [v]धियं स्तुतिं [v]नः अस्माकं [v]सातये धनादिलाभार्थं [v]तक्षत स्वीकुरुत ॥ यत् । 'सुपां सुलुक्०' इत्यादिना सुपो लुक् । भवथ । भवतेर्लटि रूपम् । यद्वृत्तयोगादनिघातः । सख ऋभुभिः इत्यत्र[१] संहितायाम् 'ऋत्यकः' इति प्रकृतिभावो ह्रस्वत्वं च ॥

अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥ १८ ॥

अर्यमा । नः । अदितिः । यज्ञियासः । अदब्धानि । वरुणस्य । व्रतानि ।
युयोत । नः । अनपत्यानि । गन्तोः । प्रजाऽवान् । नः । पशुऽमान् । अस्तु । गातुः ॥१८॥

[v]अर्यमा । ऋच्छति सर्वदा गच्छतीत्यर्यमा सूर्यः । [v]अदितिः देवमाता [v]यज्ञियासः यज्ञार्हा देवा यस्य [v]वरुणस्य [v]व्रतानि कर्माणि [v]अदब्धानि अहिंसितानि भवन्ति स[२] वरुणः[२] ते चार्यमादयो देवाः [v]नः अस्मान् रक्षन्त्विति शेषः । ते यूयं [v]नः अस्माकम् [v]अनपत्यानि अपत्यानां[३] पुत्राणामहितानि कर्माणि । यद्वा । पतनकारणं न भवतीत्यपत्यम् । तदन्यान्यनपत्यानि पतनकारणानि[४] कर्माणि [v]गन्तोः सन्मार्गात् [v]युयोत पृथक्कुरुत । यथा तान्यहितानि[५] कर्माणि न स्पृशन्ति तथा कुरुतेत्यर्थः । अथ [v]गातुः । गायन्ति स्तुवन्तीन्द्रादीनत्रेति गातुर्गृहम् । [v]नः अस्मदीयं गृहं [v]पशुमान् पश्वादियुक्तं [v]प्रजावान् अपत्योपेतम् [v]अस्तु ॥ अर्यमा । 'ऋ गतौ' । 'श्नसुक्षन्ष्लीहन्क्लेदन्०' इत्यादिना निपातनात् रूपसिद्धिः । अदितिः । 'दीङ् क्षये' इत्यस्य कर्तरि क्तिच् । नञा[६] समासः[६] । 'अदितिरदीना' (निरु. ४. २२) इति यास्कः । छान्दसं ह्रस्वत्वम् । नञः[७] स्वरः[७] । युयोत । यौतेः अमिश्रीभावकर्मणो लोटि 'बहुलं छन्दसि' इति शपः श्लुः । 'तप्तनप्०' इति तप्रत्ययस्य तबादेशः । गन्तोः । 'गमॢ गतौ' । 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यः[८]' इति तुन्प्रत्ययः । निस्वादाद्युदात्तः । गातुः । '[९]गायाहिभ्यश्च' (उ. सू. १. ७२) इति तुप्रत्ययः ॥

देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वतातां ।
शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्वन्तरिक्षम् ॥ १९ ॥

देवानाम् । दूतः । पुरुध । प्रऽसूतः । अनागान् । नः । वोचतु । सर्वऽतातां ।
शृणोतु । नः । पृथिवी । द्यौः । उत । आपः । सूर्यः । नक्षत्रैः । उरु । अन्तरिक्षम् ॥१९॥

[v]पुरुध पुरुषु बहुषु[८] देशेषु [v]प्रसूतः अग्निहोत्रार्थं विहितः[९] । यद्वा । पुरुभिर्यजमानैः प्रसूतो यष्टव्यदेवाह्वानार्थं प्रेरितः [v]देवानां [v]दूतः । तथा च तैत्तिरीयकम्—'अग्निर्देवानां दूत आसीत्'

१. न-ल-स—इत्यस्य । २. ख-ग-घ-च-ज-ण-न-भ-स—'स वरुणः' नास्ति । ३. ख-ग-घ-च-ज-ण-न-भ—'अपत्यानां' नास्ति । ४. ख-ग-च-ज-ण-त-न-भ—पातनकारणानि । ५. ज-ण—तदहितानि; न—अहितानि । ६. त—नञ्समासः । ७. च-ज-ण-स—नञ्स्वरः । ८. ज—बहुप्रकारेषु । ९. त—विहृतः ।

इति । तादृशोऽग्निः कर्मकर्तृसाधनवैगुण्येन सापराधान् [v]नः[1] अस्मान् [v]अनागान् अनागसः [v]सर्वताता सर्वत्र [v]वोचतु ब्रवीतु । किंच [v]पृथिवी [v]द्यौः च [v]उत अपि च [v]आपः [v]सूर्यः च [v]नक्षत्रैरुरु विस्तीर्णम् [v]अन्तरिक्षं च । एते सर्वे देवाः [v]नः अस्मदीयां स्तुतिं [v]शृणोतु शृण्वन्तु । प्रत्येकविवक्षया एकवचनम् ॥ प्रसूतः । 'पू प्रेरणे' । कर्मणि क्तः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः । अनागान् । शसि सकारलोपश्छान्दसः । सवर्णदीर्घे कृते 'तस्माच्छसो नः०' इति नत्वम् । वोचतु । 'वच परिभाषणे' । 'व्यत्ययो बहुलम्' इति शपोऽडादेशः । वच उम् । गुणः । निघातः । नक्षत्रैः । 'नक्ष गतौ' । 'अमिनक्षियजिबन्धिपतिभ्योऽत्रन्' इत्यत्रन्प्रत्ययः । नित्त्वादाद्युदात्तः । यद्वा । न क्षरति न क्षीयते इति वा नक्षत्रम् । 'नभ्राण्नपात्०' इति नञः प्रकृतिभावः । नञः[2] स्वरः[3]॥

शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।
आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥ २० ॥

शृण्वन्तु । नः । वृषणः । पर्वतासः । ध्रुवऽक्षेमासः । इळया । मदन्तः ।
आदित्यैः । नः । अदितिः । शृणोतु । यच्छन्तु । नः । मरुतः । शर्म । भद्रम् ॥ २० ॥

[v]वृषणः अभिमतफलसेचका मरुतः [v]पर्वतासः । पृणन्ति पूरयन्त्यर्थिनां कामानिति पर्वता ग्रावाभिमानिनो देवाः [v]ध्रुवक्षेमासः निश्चलस्थानाः [v]इळया हविर्लक्षणेनान्नेन[4] [v]मदन्तः माद्यन्तः सन्तः [v]नः अस्मदीयां स्तुतिं [v]शृण्वन्तु । किंच [v]आदित्यैः अपत्यभूतैरादित्यैः उपेता[4] [v]अदितिः [v]नः अस्मदीयां स्तुतिं [v]शृणोतु । [v]मरुतः च [v]नः अस्मभ्यं [v]भद्रं कल्याणकरं [v]शर्म सुखं [v]यच्छन्तु ददतु ॥ आदित्यैः । अदितेरपत्यानीत्यर्थे 'दित्यदिति०' इति ण्यः । प्रत्ययस्वरेणान्तोदात्तः । सुपा सहैकादेशे कृते एकादेश उदात्तः ॥

प्रवत्स्यन्यजमानः 'सदा सुगः' इत्यृचं जपन् गच्छेत् । सूत्रितं च—'सदा सुगः पितुमाँ अस्तु पन्था इति पन्थानमवरुह्य' (आश्व. श्रौ. २. ५) इति ॥

सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥ २१ ॥

सदा । सुऽगः । पितुऽमान् । अस्तु । पन्थाः । मध्वा । देवाः । ओषधीः । सम् । पिपृक्त ।
भगः । मे । अग्ने । सख्ये । न । मृध्याः । उत् । रायः । अश्याम् । सदनम् । पुरुऽक्षोः ॥२१॥

हे अग्ने अस्माकं [v]पन्थाः मार्गः [v]सदा सर्वदा [v]सुगः सुखेन गन्तुं शक्यः [v]पितुमान् अन्नवांश्च [v]अस्तु । हे [v]देवाः [v]मध्वा माधुर्योपेतेनोदकेन [v]ओषधीः [v]सं [v]पिपृक्त संपर्चयत । सेचयतेत्यर्थः ।

१. त-न-स-'नः' नास्ति; ल-अपि । २. च-ज-ण-स-नञ्स्वरः । ३. त-हविर्लक्षणान्नेन । ४. च-सहिता

हे [v]अग्ने [v]त्वया [v]सख्ये संजाते सति [v]मे मम [v]भगः धनं [v]न [v]मृध्याः न विनश्यतु। किंच [v]रायः धनस्य [v]पुरुक्षोः बहुन्नस्य च [v]सदनं स्थानम् [v]उत [v]अश्याम[1] प्राप्नुयाम् ॥ सदा। स्वरादित्वाद्युदात्तत्वेन पाठादाद्युदात्तः। पिपृक्त। 'पृची संपर्के'। लोटि 'बहुलं छन्दसि' इति शपः श्लुः। 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम्। मृध्याः। मृधिर्हिंसार्थः[1]। लिङि 'तिङां तिङो भवन्ति' इति तिपः स्थिप् ॥

पशौ पुरोडाशस्विष्टकृतः 'स्वदस्व हव्या' इति याज्या। सूत्रितं च—'स्वदस्व हव्या समिषो दिदीहीति पुरोडाशस्विष्टकृतः' (आश्व. श्रौ. ३. ५) इति ॥

स्वद॑स्व ह॒व्या समिषो॑ दिदीह्यस्म॒द्र्य॑ग्क्सं मि॑मीहि श्रवां॑सि ।
विश्वाँ॑ अग्ने पृ॒त्सु ताञ्जे॑षि॒ शत्रू॑नहा॒ विश्वा॑ सु॒मना॑ दीदिही॒ नः ॥ २२ ॥

स्वद॑स्व । ह॒व्या । सम् । इषः॑ । दि॒दी॒हि॒ । अ॒स्म॒द्र्य॑क् । सम् । मि॒मी॒हि॒ । श्रवां॑सि ।
विश्वा॑न् । अ॒ग्ने॒ । पृ॒त्ऽसु । ता॒न् । जे॒षि॒ । शत्रू॑न् । अहा॑ । विश्वा॑ । सु॒ऽमना॑ः । दी॒दि॒हि॒ । नः॥२२॥

हे [v]अग्ने [v]हव्या हवनयोग्यानि हवींषि [v]स्वदस्व स्वादय। अस्माकम् [v]इषः अन्नानि [v]सं [v]दिदीहि सम्यक् प्रकाशय। दीपितानि तानि [v]श्रवांसि अन्नानि [v]अस्मद्र्यक् अस्मदभिमुखानि [v]सं [v]मिमीहि संमानय[2]। कुरु[2] इत्यर्थः। ततः [v]पृत्सु संग्रामेषु [v]तान् बाधकान् [v]विश्वान् सर्वान्[3] [v]शत्रून् [v]जेषि जय। अथ [v]सुमनाः शोभनमनस्कः सन् [v]नः अस्माकं [v]विश्वा [v]अहा सर्वाण्यहानि [v]दीदिहि अग्निहोत्रादिकर्मयोग्यानि प्रकाशय ॥ स्वदस्व। 'स्वद आस्वादने'। लोटि रूपम्। थासो लसार्वधातुकस्वरे धातुस्वरः। दिदीहि। 'दिवु क्रीडादौ' इत्यस्य लोटि 'बहुलं छन्दसि' इति विकरणस्य श्लुः। परत्वात् 'हलि च' इति दीर्घत्वे[4] कृते पश्चात् वलि लोपः। निघातः। अस्मद्र्यक्। अस्मानञ्चति इति अञ्चतेः क्विप्। 'विष्वग्देवयोश्च टेः०' इति[5] टेरद्यादेशः। सुपां सुलुगिति सुपो लुक्। अद्यादेशस्यान्तोदात्तत्वेन निपातनात् यणादेशे कृते 'उदात्तस्वरितयोः[6]' इति यणः स्वरितत्वम्। मिमीहि। 'माङ् माने शब्दे च'। जुहोत्यादिः। तस्य लोटि व्यत्ययेन परस्मैपदम्। निघातः। सुमनाः। 'सोर्मनसी०' इत्युत्तरपदाद्युदात्तत्वम्। दीदिहि। दिवेर्यङ्लुकि लोटि तुजादित्वादभ्यासस्य दीर्घः। वलि[6] लोपः[6] ॥ ॥ २७ ॥

'उपसः पूर्वाः' इति द्वाविंशत्यृचं द्वितीयं सूक्तं त्रैष्टुभम्। 'उपसः' इत्यनुक्रमणिका। प्रजापतेरार्षं वैश्वदेवं 'प्रजापतिर्हि वैश्वदेवं ह' इति पूर्वसूक्ते हिहशब्दप्रयोगात्[7]। सूक्तविनियोगो लैङ्गिकः। अत्राद्योषस्या ततः परं नवर्चोऽन्त्यादिदेवतास्ततः परा अहोरात्रदेवताका ततश्चतस्रो रोदस्योः पञ्चदशी द्युनिशोर्वा षोडशी दिग्देवताका ततः पञ्चो वर्षत इन्द्रस्य केचिदमेस्त्वष्टुश्चेति मन्यन्ते ॥

१. ख-ग-ज-ण-मृधि हिंसार्थम्; च-मृधि हिंसार्थे; भ-ल-स-मृधि हिंसार्थः। २. ख-ग-च-समानम्; ज-ण-संमानय समानम्; न-समानवनम्। ३. ल-'सर्वान्' नास्ति। ४. त-दीर्घे। ५. ख-ग-च-ज-ण-त-न-भ-स-'इति ... ...उदात्तस्वरितयोः' नास्ति। ६. ख-ग-च-ज-ण-न-भ-स-'वलि लोपः' नास्ति। ७. ख-ग-च-ज-ण-त-न-भ-स-हशब्दप्रयोगात्।

उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे अक्षरं पदे गोः ।
व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकम् ॥ १ ॥

उषसः । पूर्वाः । अध । यत् । विऽऊषुः । महत् । वि । जज्ञे । अक्षरम् । पदे । गोः ।
व्रता । देवानाम् । उप । नु । प्रऽभूषन् । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १ ॥

[v]पूर्वाः उदयकालात् प्राचीनाः [v]उषसः [v]यत् यदा [v]व्यूषुः व्युच्छन्ति [v]अध तदानीम् [v]अक्षरम् । न क्षरतीत्यक्षरम् । अविनाश्यादित्याख्यं [v]महत् प्रभूतं ज्योतिः [v]गोः उदकस्य [v]पदे स्थाने समुद्रे नभसि वा[1] [v]वि [v]जज्ञे उत्पद्यते । अथोदिते सूर्ये [v]प्रभूषन् अग्निहोत्रादिकर्मसु प्रभवितुमिच्छन् यजमानः [v]व्रता कर्माणि [v]देवानां [v]नु क्षिप्रम् [v]उप समीपं नेष्यति[2] । योग्यक्रियाध्याहारः । तदिदं [v]देवानाम् [v]एकं मुख्यम् [v]असुरत्वम्[3] । अस्यति क्षिपति सर्वानित्यसुरः प्रबलः । तस्य भावोऽसुरत्वं प्राबल्यम् । महदैश्वर्यम् ॥ व्यूषुः । 'उष प्लुष दाहे' इत्यस्य विपूर्वस्य लिट्युसि रूपम् । 'सह' इति योगविभागात् समासः । यद्वृत्तयोगादनिघातः । प्रभूषन् । भवतेः सनि द्विर्वचनस्य छन्दसि विकल्पितत्वात् अत्र[4] द्विर्वचनाभावः । तदन्ताच्छतरि रूपम् । प्रादिसमासः । शतुर्लसार्वधातुकस्वरे धातुस्वरः ॥

मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः ।
पुराण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम् ॥ २ ॥

मो इति । सु । नः । अत्र । जुहुरन्त । देवाः । मा । पूर्वे । अग्ने । पितरः । पदऽज्ञाः ।
पुराण्योः । सद्मनोः । केतुः । अन्तः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ २ ॥

हे [v]अग्ने [v]अत्र अस्मिन् काले [v]देवाः [v]नः अस्मान् [v]सु सुष्ठु [v]मो [v]जुहुरन्त मा हिंस्युः । तथा [v]पदज्ञाः कर्माण्यनुष्ठाय देवपदमनुभवन्तः [v]पूर्वे पुरातनाः [v]पितरः [v]मा हिंसिषुः । यस्मात् [v]केतुः यज्ञानां प्रज्ञापकः सूर्यः [v]पुराण्योः पुरातनयोः [v]सद्मनोः । सीदन्त्यनयोर्देवमनुष्या इति सद्मनी रोदसी । तयोः [v]अन्तः मध्ये उदेति । तस्मादत्र मा हिंसन्नित्यर्थः । [v]महद्देवानाम् इत्यादि पूर्ववत् ॥ जुहुरन्त । 'हु असञ्चाकरणे' । लुङि जुहोत्यादित्वात् श्लुः । व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इत्युत्वम् । संज्ञापूर्वकस्य विधेरनित्यत्वाददादेशाभावेऽन्तादेशः ॥

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीध्ये पूर्व्याणि ।
समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥ ३ ॥

वि । मे । पुरुऽत्रा । पतयन्ति । कामाः । शमि । अच्छ । दीध्ये । पूर्व्याणि ।
सम्ऽइद्धे । अग्नौ । ऋतम् । इत् । वदेम । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ३ ॥

---

१. च-ज-ण-च । २. न-स-तिष्ठति । ३. ख-ग-घ-ज-ण-न-भ-ल-स-'असुरत्वं' नास्ति । ४. च-न-'अत्र' नास्ति ।

हे अग्ने [v]मे मम [v]पुरुत्रा बहवः [v]कामाः अभिलाषाः [v]वि [v]पतयन्ति विविधं गच्छन्ति। [v]शमि अग्निष्टोमादिलक्षणं कर्म [v]अच्छ अभिलक्ष्याहं [v]पूर्व्याणि पुरातनानि स्तोत्राणि तदर्थं [v]दीद्ये दीपयामि। पश्चात् यज्ञार्थम् [v]अग्नौ [v]समिद्धे दीप्यमाने सति [v]ऋतमित् सत्यमेव [v]वदेम। अनृतवचने हि यज्ञे वैगुण्यं स्यादिति ॥ पुरुत्रा। 'देवमनुष्यपुरुष०' इत्यादिना त्राप्रत्ययः। पतयन्ति। 'पतॢ गतौ'। स्वार्थिको णिच् ॥

समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु ।
अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम् ॥ ४ ॥

समानः। राजा। विऽभृतः। पुरुऽत्रा। शये। शयासु। प्रऽयुतः। वना। अनु।
अन्या। वत्सम्। भरति। क्षेति। माता। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ ४ ॥

[v]समानः साधारणः सर्वेषाम्। यद्वा एक एव। [v]राजा दीप्यमानोऽग्निः [v]पुरुत्रा बहुषु देशेषु [v]विभृतः अग्निहोत्रार्थं विहृतो भवति। यद्वा। राजा अभिषुतः सोमः सर्वेषु देशेषु यज्ञार्थं विहृतो भवति। स चाग्निः सोमो वा [v]शयासु वेदिषु[1]। शेरते हविरादयः पदार्था अत्रेति शया वेद्यः। तासु [v]शये शेते निवसति। [v]वनानु अनुवनं वनेष्वरणिरूपेषु काष्ठेषु [v]प्रयुतः विभक्तोऽग्निर्वर्तते। सोमश्चेत्[2] वनेषु चमसेषु विभक्तो वर्तते। तस्य द्वे मातरौ द्यावापृथिव्यौ। तयोः [v]अन्या द्यौः अस्याः[3] भूमेः[3] जायमानतया [v]वत्सं वत्सभूतमग्निं सोमं वा [v]भरति वृष्ट्यादिरूपेण भरति पोषयति। [v]माता वसुधा [v]क्षेति केवलं निवासयति ॥ विभृतः। 'हृञ्[4] हरणे[4]'। कर्मणि क्तः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। पुरुत्रा। अधिकरणे त्राप्रत्ययः। शये। 'शीङ् स्वप्ने'। 'लोपस्तः०' इति तकारलोपः। 'शीङः सार्वधातुके गुणः'। शयासु। 'शीङ् स्वप्ने'। 'एरच्' इत्यधिकरणेऽच्। भरति। 'भृञ् भरणे'। भूवादिः। 'एकान्याभ्यां समर्थाभ्याम्' इति पूर्वस्य न निघातः। क्षेति। 'क्षि निवासगत्योः' इत्यस्य लटि 'बहुलं छन्दसि' इति विकरणस्य लुक् ॥

आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः ।
अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम् ॥ ५ ॥

आऽक्षित्। पूर्वासु। अपराः। अनूरुत्। सद्यः। जातासु। तरुणीषु। अन्तरिति।
अन्तःऽवतीः। सुवते। अप्रऽवीताः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ ५ ॥

[v]पूर्वासु जीर्णास्वोषधीषु [v]आक्षित् आवर्तमानः तथा [v]अपराः नव्या ओषधीः [v]अनूरुत् अनुरुन्धन् उत्पत्त्यानुगुण्येनानुतिष्ठन्नग्निः सूर्यो वा [v]सद्यो [v]जातासु तदानीमुत्पन्नासु [v]तरुणीषु पल्लवितास्वोषधीषु [v]अन्तः वर्तते। ता ओषधयः [v]अप्रवीताः केनापि पुरुषेणानिषिक्तरेतस्काः

१. न-ल-स-'वेदिषु' नास्ति। २. च-फ-सोमश्च। ३. ख-ग-च-फ-अस्यां भूतेः। ४. ख-ग-च-ज-ण-भृञ् भरणे; न-भ-स-भृञ् हरणे।

अनभ्यक्ता वा ᵛअन्तर्वतीः अग्निना गर्भवत्यो भूत्वा ᵛसुवते फलं पुष्पं चोत्पादयन्ति । तदिदं देवानामैश्वर्यम् ॥ आक्षित् । ' क्षि निवासगत्योः ' । क्विप् । अनूरुत् । ' अनो रुध कामे ' । अस्मात् क्विप् । ' अन्येषामपि दृश्यते ' इति दीर्घः[१] । कृत्स्वरः । तरुणीषु । ' नञ्स्नञीकक्ष्वुंस्तरुणतलुनानामुपसंख्यानम् ' (पा. म. ४·१·१५·६) इति ङीप् । अन्तर्वतीः । ' ऋयः ' इति मतुपो वत्वम् । सुवते । ' षूङ् प्राणिगर्भविमोचने ' इत्यस्य लटि रूपम् । निघातः ॥ ॥ २८ ॥

शयुः परस्तादध नु द्विमाताबन्धुनश्चरति वत्स एकः ।
मित्रस्य ता वरुणस्य व्रतानि महद्देवानाममुरत्वमेकम् ॥ ६ ॥

शयुः । परस्तात् । अध । नु । द्विऽमाता । अबन्धनः । चरति । वत्सः । एकः ।
मित्रस्य । ता । वरुणस्य । व्रतानि । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ६ ॥

ᵛद्विमाता । द्वे द्यावापृथिव्यौ मातरौ यस्य स द्विमाता । यद्वा द्वयोर्लोकयोर्निर्माता । सूर्यः ᵛपरस्तात् पश्चिमायां दिशि अस्तवेलायां[२] ᵛशयुः शयानोऽव्याप्रियमाणो भवति । ᵛअध ᵛनु अथोदयवेलायाम् ᵛएकः द्यावापृथिव्योः साधारणः तयो रसादानात् ᵛवत्सः पुत्रः ᵛअबन्धनः अप्रतिबद्धगतिः अनालम्बनः[३] एकः सन् ᵛचरति नभसि गच्छति । ᵛता तानीमानि ᵛमित्रस्य ᵛवरुणस्य मित्रावरुणयोः ᵛव्रतानि कर्माणि[४] ॥ शयुः । ' शीङ् स्वप्ने ' । भृमृशीतृचरि° ' इत्यादिना उप्रत्ययः । द्विमाता । ' नद्यृतश्च ' इति प्राप्तस्य कपः ' ऋतश्छन्दसि ' इति प्रतिषेधः ॥

द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः ।
प्र रण्यानि रण्यवाचो भरन्ते महद्देवानाममुरत्वमेकम् ॥ ७ ॥

द्विऽमाता । होता । विदथेषु । सम्ऽराट् । अनु । अग्रम् । चरति । क्षेति । बुध्नः ।
प्र । रण्यानि । रण्यऽवाचः । भरन्ते । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ७ ॥

ᵛद्विमाता द्वयोर्लोकयोर्निर्माता ᵛविदथेषु यज्ञेषु ᵛहोता देवानामाह्वाता ᵛसम्राट् यज्ञेषु सम्यक् राजमानोऽग्निः ᵛअन्वग्रम् अग्रे[५] दिवि ᵛचरति सूर्यभूतस्तत्र वर्तते । ᵛबुध्नः सर्वस्य कर्मणो मूलभूतः सन् ᵛक्षेति भूमौ वसति । यद्वा । अग्रं मुख्यं भागं चरति भक्षयति[६] । क्षेति यज्वनां गृहेषु निवसति । यद्वा । बुध्नः प्रतिष्ठा अन्तेभागी स्विष्टकृद्रूपेण । ' प्रतिष्ठा वै स्विष्टकृत् ' इति श्रुतेः । किंच ᵛरण्यवाचः रमणीयवाचः स्तोतारः ᵛरण्यानि रमणीयानि स्तोत्राणि ᵛप्र ᵛभरन्ते प्रकर्षेण[७] कुर्वन्ति । तदिदं देवानामैश्वर्यम् ॥ चरति । ' चादिलोपे° ' इति न[८] निघातः[८] ॥

१. त–अनोर्दीर्घः । २. ल–अस्तमयवेलायाम् । ३. ख-भ–अनालम्बेन; च-फ-बलेन । ४. ज-ण–कर्माणि । तदिदं देवानामैश्वर्यम् । ५. ख-ग-घ-च-ज-ण-त-भ-स–अन्वग्रे । ६. ख-ग-च-ज-ण-न-भ-स–' भक्षयति ' नास्ति । ७. न-ल-स–प्रणयन्ति । ८. ख-ग-च-ज-ण–निघाताभावः ।

शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत् ।
अन्तर्मतिश्चरति निष्षिधं गोर्महद्देवानामसुरत्वमेकम् ॥ ८ ॥

शूरस्यऽइव । युध्यतः । अन्तमस्य । प्रतीचीनम् । ददृशे । विश्वम् । आऽयत् ।
अन्तः । मतिः । चरति । निःऽसिधम् । गोः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥८॥

[v]अन्तमस्य समीपे वर्तमानस्य दावाग्नेः[1] [v]आयत् अभिमुखमागच्छत् [v]विश्वं भूतजातं [v]प्रतीचीनं पराङ्मुखं [v]ददृशे दृश्यते । तत्र दृष्टान्तः । [v]शूरस्येव । यथा [v]युध्यतः युद्धं कुर्वाणस्य शूरस्य समर्थस्य राज्ञः अभिमुखमागच्छत् परबलं पराङ्मुखं दृश्यते तद्वत् । [v]मतिः सर्वैर्ज्ञायमानः सोऽग्निः [v]गोः उदकस्य [v]निष्षिधं हिंसिकां दीप्तिम् [v]अन्तः [v]चरति अन्तर्धारयति ॥ युध्यतः । ' युध संप्रहारे ' । दिवादिः[2] । तस्य शतरि रूपम् । अन्तमस्य । अन्तशब्दात् ' अत इनिठनौ ' इति ठन् । अतिशयेनान्तिकः इत्यर्थे तमप् । ' तमे तादेश्च ' इति तादिलोपः । नित्त्वादाद्युदात्तः । प्रतीचीनम् । प्रतिपूर्वस्याञ्चतेः क्विन् । तस्मात् ' विभाषाञ्चेरदिक्स्त्रियाम् ' इति ङीः । ईनादेशः । प्रत्ययस्वरः । आयत् । ' या प्रापणे ' इत्यस्याङ्पूर्वस्य शतरि रूपम्; आङ्पूर्वस्य ' अय पय गतौ ' इत्यस्य शतरि रूपं वेति व्युत्पत्त्यनवधारणादनवग्रहः ॥

नि वेवेति पलितो दूत आस्वन्तर्महाँश्चरति रोचनेन ।
वपूँषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकम् ॥ ९ ॥

नि । वेवेति । पलितः । दूतः । आसु । अन्तः । महान् । चरति । रोचनेन ।
वपूंषि । बिभ्रत् । अभि । नः । वि । चष्टे । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ९ ॥

[v]पलितः पालयिता पूर्णो वा देवानां [v]दूतः अग्निः [v]आसु ओषधीषु [v]नि [v]वेवेति नितरां व्याप्य वर्तते । [v]महान् सोऽग्निः [v]रोचनेन सूर्येण सह [v]अन्तः रोदस्योर्मध्ये [v]चरति । [v]वपूंषि नानाविधानि रूपाणि [v]बिभ्रत् सोऽग्निः [v]नः अस्मान् यष्टॄन् [v]अभि [v]वि [v]चष्टे विशेषेणानुग्रहदृष्ट्या पश्यति ॥ वेवेति । वी गत्यादिषु । यङ्लुकि ईडभावे रूपम् । रोचनेन । सहार्थे तृतीया । बिभ्रत् । ' डुभृञ् धारणपोषणयोः ' इत्यस्य शतरि रूपम् । अभ्यस्तस्वरः ॥

विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः ।
अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकम् ॥ १० ॥

विष्णुः । गोपाः । परमम् । पाति । पाथः । प्रिया । धामानि । अमृता । दधानः ।
अग्निः । ता । विश्वा । भुवनानि । वेद । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १० ॥

---

१. ल–देवाग्नेः; स–दीप्तामेः । २. ख-ग-ज-ण-न-भ-स–दिवादित्वात् ।

[v]विष्णुः व्यासः [v]गोपाः सर्वस्य गोपायिता [v]प्रिया प्रियतमानि [v]अमृता क्षयरहितानि [v]धामानि तेजांसि [v]दधानः सोऽग्निः [v]परमं [v]पाथः स्थानं [v]पाति रक्षति। यद्वा। धामानि लोकधारकाणि अमृता उदकानि दधानः सन् परमं पाथः उदकस्य स्थानमन्तरिक्षं पाति। सः [v]अग्निः [v]ता तानि [v]विश्वा सर्वाणि [v]भुवनानि भूतजातानि [v]वेद जानाति॥ गोपाः। गोपायतेः क्विपि अतोलोपयलोपौ। अग्निष्टा इत्यत्र संहितायां 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' इति षत्वम्॥ ॥ २९ ॥

नाना चक्राते यम्याः वपूंषि तयोरन्यद्रोचते कृष्णमन्यत्।
श्यावी च यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकम्॥ ११॥

नाना। चक्राते इति। यम्याः। वपूंषि। तयोः। अन्यत्। रोचते। कृष्णम्। अन्यत्। श्यावी। च। यत्। अरुषी। च। स्वसारौ। महत्। देवानाम्। असुरऽत्वम्। एकम्॥११॥

[v]यम्या यमरूपे मिथुनभूते अहश्च रात्रिश्चेत्येते[१] [v]नाना[२] नानाविधानि [v]वपूंषि शुक्लकृष्णादीनि रूपाणि [v]चक्राते कुरुतः। [v]श्यावी कृष्णवर्णा [v]अरुषी शुक्लतया आरोचमाना [v]यत् ये परस्परं [v]स्वसारौ भवतः [v]तयोः मध्ये [v]अन्यत् अर्जुनमहः [v]रोचते किरणसंबन्धाद्दीप्यते। [v]अन्यत् रात्रिलक्षणं [v]कृष्णं तमःसंबन्धात् कृष्णवर्णमाभाति॥ यम्याः। सुपो डादेशः। रोचते। 'एकान्याभ्यां समर्थाभ्याम्' इति न निघातः॥

माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची।
ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम्॥ १२॥

माता। च। यत्र। दुहिता। च। धेनू इति।
सबर्दुघे इति सबरऽदुघे। धापयेते इति। समीची इति सम्ऽईची।
ऋतस्य। ते इति। सदसि। ईळे। अन्तः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१२॥

[v]माता सर्वेषां निर्मातृत्वान्माता पृथिवी [v]च [v]दुहिता दूरे निहिता[३] द्यौः [v]च। 'दुहिता दुर्हिता दूरे हिता दोग्ध्रेर्वा' (निरु. ३. ४) इति यास्कः। एते [v]सबर्दुघे सबरः स्वीयस्य क्षीररूपरसस्य[४] दोग्ध्र्यौ अत एव [v]धेनू जगतः प्रीणयित्र्यौ ते[५] द्यावापृथिव्यौ [v]यत्र अन्तरिक्षे [v]समीची परस्परं संगते सत्यौ [v]धापयेते स्वकीयं रसमन्योन्यं पाययेते [v]ऋतस्य उदकस्य [v]सदसि स्थानभूते तस्मिन्नन्तरिक्षे [v]अन्तः स्थिते द्यावापृथिव्यौ [v]ईळे अहं स्तौमि। यद्वा। वृष्टिलक्षणं[६] रसं द्यौः पृथिवीं धापयते[६] आहुतिलक्षणं

१. ख-ग-च-फ-रात्रिश्चैते; प-रात्रिश्चेति। २. ख-ग-घ-च-ज-ण-न-भ-ल-स-'नाना' नास्ति। ३. त-विनिहिता। ४. घ-रसस्य; न-ल-स-क्षीररूपस्य। ५. न-ल-स-'ते' नास्ति। ६. ख-ग-च-ज-ण-न-भ-स-द्यौः वृष्टिलक्षणं रसम्।

रसं द्यां[1] पृथिवीति एवमन्योन्यं माता च दुहिता च भवतः। ऋतस्य सदसि स्थाने यज्ञसदने स्थितोऽहं ते उभे स्तौमि ॥ सबर्दुघे। 'सबःशब्दः क्षीरवाची' इति संप्रदायविद आहुः। तस्मिन्नुपपदे 'दुह प्रपूरणे' इत्यस्माद्धातोः 'दुहः कब्घश्च' इति कप्रत्ययो घश्चान्तादेशः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। धापयेते। 'धेट् पाने' इत्यस्य ण्यन्तस्य लटि 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदे प्राप्ते 'पादिषु धेट उपसंख्यानम्' इत्यात्मनेपदम्। यद्वृत्तयोगादनिघातः ॥

अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः।
ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम् ॥ १३ ॥

अन्यस्याः। वत्सम्। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः।
ऋतस्य। सा। पयसा। अपिन्वत। इळा। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१३॥

[v]अन्यस्याः पृथिव्याः [v]वत्सम् अग्निं [v]रिहती उदकधारारूपया जिह्वया लिहती द्यौः [v]मिमाय मेघद्वारा ध्वनिं करोति। [v]धेनुः प्रीणयित्री सा द्यौः [v]कया जलवर्जितया[2] [v]भुवा तत्रत्यं जलमादाय स्वकीयम् [v]ऊधः मेघरूपं [v]नि [v]दधे उदकेन निहितमकरोत्। [v]सा जलवर्जिता [v]इळा पृथिवी [v]ऋतस्य सत्यभूतस्यादित्यस्य [v]पयसा उदकेन [v]अपिन्वत वर्षाकाले[3] सिक्ता भवति। 'आदित्याज्जायते[4] वृष्टिः' (मनु. ३.७६) इति स्मृतेः॥ रिहती। 'लिह आस्वादने' इत्यस्य शतरि रूपम्। 'शतुरनुमः[5]' इति ङीप उदात्तत्वम्। अपिन्वत[6]। 'पिवि सेचने'। मुचादिरात्मनेपदी। निघातः॥

पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा।
ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम् ॥ १४ ॥

पद्या। वस्ते। पुरुऽरूपा। वपूंषि। ऊर्ध्वा। तस्थौ। त्रिऽअविम्। रेरिहाणा।
ऋतस्य। सद्म। वि। चरामि। विद्वान्। महत्। देवानाम्। असुरऽत्वम्। एकम् ॥१४॥

[v]पद्या। जगत्स्रष्टुः परमेश्वरस्य पद्भ्यां जातत्वात् पद्या भूमिः। तथा च मन्त्रवर्णः— 'पद्भ्यां भूमिः' (ऋ. सं. १०.९०.१४) इति। यद्वा पादसंचारे साधुः पद्या भूमिः [v]पुरुरूपा नानाविधस्वरूपाणि [v]वपूंषि स्थावरजङ्गमात्मकानि रूपाणि [v]वस्ते आच्छादयति। सैषा भूमिः [v]ऊर्ध्वा उत्तरवेद्यात्मनोन्नता सती स्वसारभूतेन हविषा [v]त्र्यविम्। सार्धसंवत्सरवयस्को वत्सरूपविरित्युच्यते। तत्प्रमाणमादित्यम्। त्रीन् लोकान् अवति स्वतेजसा व्याप्नोतीति त्र्यविरिति वा। [v]रेरिहाणा लिहती [v]तस्थौ। [v]ऋतस्य सत्यभूतस्यादित्यस्य [v]सद्म स्थानं [v]विद्वान् जानानोऽहं [v]वि [v]चरामि हविर्भिः तमादित्यं परिचरामि॥ पद्या। पादशब्दात् 'भवे छन्दसि' इति यत्। 'पद्यत्यतदर्थे' (पा. सू. ६.३.५३) इति पादस्य पद्भावः। यद्वा। 'तत्र साधुः' इति यत्। 'यतोऽनावः' इति

---

१. ख-ग-च-ज-ण-न-भ-स-'द्यां' नास्ति। २. त-जलावर्जितया। ३. ख-ग-च-प्रवर्षकाले; त-वर्षाकाले। ख-ग-च-ज-ण-न-भ-स-'आदित्याज्जायते.....अपिन्वत' नास्ति।

आद्युदात्तत्वम्। ऽयविम्। अव रक्षणादिषु। ' °इन् ' (उ. सू. ४. ५५७) इतीन्प्रत्ययः। कृस्वरः। रेरिहाणा। ' लिह आस्वादने ' इत्यस्य यङ्लुकि शानचि रूपम्। अभ्यस्तस्वरः॥

पदेइव निहिते दस्मे अन्तस्तयोरन्यद्गुह्यमाविरन्यत्।
सध्रीचीना पथ्या३ सा विषूची महद्देवानामसुरत्वमेकम्॥ १५॥

पदेइवेति पदेऽइव। निहिते इति निऽहिते। दस्मे। अन्तरिति।
तयोः। अन्यत्। गुह्यम्। आविः। अन्यत्।
सध्रीचीना। पथ्या। सा। विषूची। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ १५॥

Vपदेइव। पद्येते ज्ञायेते तत्तदसाधारणलिङ्गेनेति पदे। अहश्च रात्रिश्चेत्येते Vदस्मे सर्वैर्दर्शनीये ते उभे Vअन्तः नभसि मध्ये[1] Vनिहिते स्थापिते इव वर्तेते। Vतयोः अहोरात्रयोः Vअन्यत् रात्रिलक्षणं Vगुह्यम् अप्रकाशमानतया गूढमिवास्ते। Vअन्यत् अहः Vआविः सूर्यप्रकाशेन प्रकटं भवति। Vसध्रीचीना अहोरात्रयोः परस्परमेलनरूपा Vपथ्या मार्गः। काल इत्यर्थः। Vसा Vविषूची। पुण्यकृतोऽपुण्यकृतश्च प्राप्नोतीति विषूची भवति। सर्वे जना अहोरात्रयोर्वर्तन्ते। यद्वा। पदेइव देवमनुष्यादीनां[2] स्थानभूते द्यावापृथिव्यौ अन्तरन्तरिक्षे निहिते वर्तेते। तयोरन्यत् अन्या[3] द्यौः गुह्यमस्माभिः अदृश्यमानतया[4] गूढा[5] वर्तते। अन्या पृथिवी आविः सर्वैः दृश्यमानत्वेन[6] प्रकटा भवति। सध्रीचीनेति पूर्ववत्॥ सध्रीचीना। सहपूर्वादञ्चतेः क्विन्। ' सहस्य सध्रिः ' इति सध्र्यादेशः। ' विभाषाञ्चेरदिक्स्त्रियाम् ' इति खः[7]॥ ॥ ३० ॥

आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः।
नव्यानव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम्॥ १६॥

आ। धेनवः। धुनयन्ताम्। अशिश्वीः। सबःऽदुघाः। शशयाः। अप्रऽदुग्धाः।
नव्याःऽनव्याः। युवतयः। भवन्तीः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ १६॥

Vधेनवः वृष्टिद्वारा सर्वस्य जगतः प्रीणयित्र्यः Vअशिश्वीः शिशुरहिताः। यद्वा शिशवो न भवन्तीत्यशिश्वीः। Vशशयाः नभसि शयाना वर्तमानाः केनापि Vअप्रदुग्धाः अक्षीणरसाः Vसबर्दुघाः उदकलक्षणस्य क्षीरस्य दोग्ध्र्यः Vयुवतयः परस्परमिश्रणोपेताः Vनव्यानव्याः अतिशयेन नूतनाः Vभवन्तीः दिशो मेघा वा Vआ Vधुनयन्ताम् आदुहन्तु। मेघपक्षे अशिश्वीर्भवन्तीरित्यत्र लिङ्व्यत्ययः॥

१. ख-ग-घ-च-ज-ण-न-भ-ल-स-' मध्ये ' नास्ति। २. ख-ग-घ-च-ज-ण-न-भ-स-मनुष्यादीनाम्। ३. ल-' अन्या ' नास्ति ४. च-दृश्यतया; ज-ण-अदृश्यतया। ५. ख-ग-च-ज-ण-भ-गुह्या; न-गुह्या; ल-गूढम्। ६. ख-ग-च-ज-ण-न-दृश्यमाना; स-दृश्यमानतया। ७. ख-ग-ज-ण-न-भ-स-स्वरः; च-फ-ईनादेशः। प्रत्ययस्वरः।

धुनयन्ताम् । ' धूञ् कम्पने ' । णिचि ' धूभ्रीणोर्नुग्वक्तव्यः ' (पा. सू. ७. ३. ३७. १) इति नुक् । हस्वश्छान्दसः । अशिश्रीः । ' सल्यशिश्रीति भाषायाम् ' इति व्यत्ययेन छन्दसि भवति ॥

यदन्यासु वृषभो रोरवीति सो अन्यस्मिन्यूथे नि दधाति रेतः ।
स हि क्षपावान्त्स भगः स राजा महद्देवानामसुरत्वमेकम् ॥ १७ ॥

यत् । अन्यासु । वृषभः । रोरवीति । सः । अन्यस्मिन् । यूथे । नि । दधाति । रेतः । सः । हि । क्षपाऽवान् । सः । भगः । सः । राजा । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १७ ॥

[v]वृषभः अपां वर्षकः [v]यत् यः पर्जन्यात्मेन्द्रः [v]अन्यासु दिक्षु [v]रोरवीति मेघद्वारा भृशं शब्दं करोति [v]सः पर्जन्य इन्द्रः [v]अन्यस्मिन् [v]यूथे दिशां वृन्दे [v]रेतः उदकं [v]नि [v]दधाति तत्र वर्षति । लोके[1] हि[1] वृषभः कासुचिद्गोषु रेतःसेकार्थं रवं करोत्यन्यस्मिन् गोयूथे रेतः सिञ्चति तद्वत् । [v]सः इन्द्रः [v]क्षपावान् । क्षिपति शत्रूनुदकं वेति क्षेपणवान् । यद्वा । क्षपा रात्रिः । तथा रात्रिपर्याययागानां स्तोत्राणां भागभूता या रात्रिः सोच्यते । तद्वान् । [v]सः [v]भगः सर्वैर्भजनीयः । [v]सः [v]राजा [v]हि तत्तत्कर्मानुरूपफलप्रदानेन सर्वेषां राजा खलु ॥ रोरवीति । ' रु शब्दे ' इत्यस्य यङ्लुगन्तस्य लटि रूपम् । ' एकान्याभ्यां समर्थाभ्याम् ' इति प्रथमस्य न निघातः । यूथे । ' युमिश्रणे ' । ' तिथपृष्ठगूथयूथप्रोथाः ' (उ. सू. २. १६९) इति थक्प्रत्ययान्तत्वेन निपातनाद्दीर्घः । रेतः । ' रीङ् क्षरणे ' इत्यस्मात् ' सुरीभ्यां तुट् च ' इत्यसुन्प्रत्ययस्तुडागमश्च । निरुक्तादाद्युदात्तः ॥

वीरस्य नु स्वश्र्यं जनासः प्र नु वोचाम विदुरस्य देवाः ।
षोळ्हा युक्ताः पञ्चपञ्चा वहन्ति महद्देवानामसुरत्वमेकम् ॥ १८ ॥

वीरस्य । नु । सुऽअश्र्यम् । जनासः । प्र । नु । वोचाम । विदुः । अस्य । देवाः । षोळ्हा । युक्ताः । पञ्चऽपञ्च । आ । वहन्ति । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १८ ॥

हे [v]जनासः जनाः [v]वीरस्य शूरस्येन्द्रस्य [v]स्वश्र्यं शोभनाश्वोपेतत्वं [v]नु क्षिप्रं [v]प्र [v]वोचाम प्रकर्षेण वदाम । तथा [v]देवाः अपि [v]अस्य इन्द्रस्य स्वश्वत्वं [v]नु[2] क्षिप्रं[2] [v]विदुः जानन्ति । किं तत्स्वश्वत्वम् । तदुच्यते । [v]षोळ्हा मासानां द्वन्द्वयोगकाले षोढा दृश्यमाना ऋतवोऽश्वा निरूप्यन्ते । ते च षट्संख्याका ऋतवो हेमन्तशिशिरयोः समासेन [v]पञ्चपञ्च [v]युक्ताः सन्तः कालात्मकमिन्द्रम् [v]आ [v]वहन्ति । तदिदम् इन्द्रस्य स्वश्वत्वं यदृतुभिरूढत्वम् ॥ षोळ्हा । षष्शब्दात् ' संख्याया विधार्थे धा ' इति धाप्रत्ययः । ' षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च ' (पा.सू. ६.३. १०९. ३-४) इत्युत्वं ष्टुत्वं च । प्रत्ययस्वरः ॥

त्वाष्टे पशौ हविषोऽनुवाक्या ' देवस्त्वष्टा ' इत्येषा । सूत्रितं च—' देवस्त्वष्टा सविता विश्वरूपो देव त्वष्टर्यद्ध चारुत्वमानट् ' (आश्व. श्रौ. ३.८) इति ॥

---

१. ख-ग-घ-च-ज-ण-प-फ-भ- यथा । २. ख-च-क्षिप्रम् ; न-ल-स-' नु क्षिप्रम् ' नास्ति ।

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम् ॥ १९ ॥

देवः । त्वष्टा । सविता । विश्वऽरूपः । पुपोष । प्रऽजाः । पुरुधा । जजान ।
इमा । च । विश्वा । भुवनानि । अस्य । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १९ ॥

[v]सविता अन्तर्यामितया सर्वस्य प्रेरकः [v]विश्वरूपः नानाविधरूपः [v]त्वष्टा त्वष्टृनामकः [v]देवः [v]प्रजाः [v]पुरुधा बहुधा [v]जजान जनयति । ताश्च [v]पुपोष पोषयति । [v]इमा इमानि [v]विश्वा विश्वानि सर्वाणि [v]भुवनानि भूतजातानि [v]च [v]अस्य त्वष्टुः संबन्धीनि ॥ विश्वरूपः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् ॥

मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ।
शृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम् ॥ २० ॥

मही इति । सम् । ऐरत् । चम्वा । समीची इति सम्ऽईची ।
उभे इति । ते इति । अस्य । वसुना । न्यृष्टे इति निऽऋष्टे ।
शृण्वे । वीरः । विन्दमानः । वसूनि । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ २० ॥

[v]मही महत्यौ [v]समीची परस्परं[1] संगते[1] [v]चम्वा । चमन्त्यदन्त्यनयोः देवमनुष्याः[2] इति चम्वौ । यद्वा । चम्येते अद्येते भूतजातैरिति चम्वौ द्यावापृथिव्यौ । [v]समैरत् इन्द्रः प्रजापश्वादिभिः[3] सम्यगयोजयत् । [v]ते [v]उभे द्यावापृथिव्यौ [v]अस्य इन्द्रस्य [v]वसुना तेजसा धनेन वा [v]न्यृष्टे नितरां व्याप्ते भवतः । [v]वीरः समर्थः स इन्द्रः [v]वसूनि शत्रूनभिभूय तदीयानि धनानि [v]विन्दमानः लभमानः सन् [v]शृण्वे सर्वैः श्रूयते । 'तवेदिदमभितश्चेकिते वसु' (ऋ. सं. १·५३·३) इत्यादिषु दृष्टत्वात् ॥ ऐरत् । 'ईर गतौ' इत्यस्य लङि रूपम् । न्यृष्टे । 'ऋषी गतौ' । कर्मणि क्तः । 'गतिरनन्तरः' इति गतेः स्वरः । शृण्वे । 'श्रु श्रवणे' इत्यस्य व्यत्ययेन कर्मणि शुः । 'लोपस्त आत्मनेपदेषु' इति तलोपः । विन्दमानः । 'विदृ लाभे' इत्यस्य लटि शानचि रूपम् । तस्य लसार्वधातुकस्वरे[4] धातुस्वरः[4] ॥

इमां च नः पृथिवीं विश्वधायाः उप क्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकम् ॥ २१ ॥

इमाम् । च । नः । पृथिवीम् । विश्वऽधायाः । उप । क्षेति । हितऽमित्रः । न । राजा ।
पुरःऽसदः । शर्मऽसदः । न । वीराः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ २१ ॥

---

१. त–परस्परसंगते । २. ख-ग-च-ज-ण-न-भ–देवाः मनुष्याः । ३. फ–प्रजाः पश्वादिभिः ।
४. ख-ग-च-ज-ण-न-भ-स–लसार्वधातुकस्वरः ।

[v]विश्वधायाः विश्वस्य धाता सर्वान्नो वा [v]नः अस्माकं [v]राजा इन्द्रः [v]इमां [v]पृथिवीम् अन्तरिक्षं [v]च [v]उप तयोः समीपे [v]क्षेति निवसति । तत्र दृष्टान्तः । [v]हितमित्रो [v]न । यथा कस्यचित् हितोपदेष्टा सुहृत् समीपे निवसति तद्वत् । [v]वीराः समर्था युद्धसहाया मरुतः [v]पुरःसदः युद्धार्थं पुरतो निश्चयेन गन्तार इन्द्रस्य [v]शर्मसदो [v]न । नञ्चार्थे । शर्मणि गृहे सीदन्तश्च भवन्ति । यत्र यत्रासौ तत्र तत्र संनिधिं कुर्वाणा इत्यर्थः ॥ क्षेति । ' क्षि निवासगत्योः ' इत्यस्य लटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । निघातः ॥

निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति ।
सखायस्ते वामभाजः स्याम महद्देवानाममुरत्वमेकम् ॥ २२ ॥

निःऽसिध्वरीः । ते । ओषधीः । उत । आपः । रयिम् । ते । इन्द्र । पृथिवी । बिभर्ति ।
सखायः । ते । वामऽभाजः । स्याम । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ २२ ॥

हे पर्जन्यात्मक [v]इन्द्र [v]ओषधीः ओषधयः [v]ते [v]निष्षिध्वरीः निष्षिध्वर्यो[1] नितरां[1] स्वत्कर्तृकसिद्धिमत्यः । [v]उत अपि च [v]आपः त्वत्तो निःसृताः । [v]पृथिवी [v]ते तव भोगयोग्यं [v]रयिं धनं [v]बिभर्ति । ' पुरू वसूनि पृथिवी बिभर्ति ' (ऋ. सं. ३.५१.५) इति हि निगमः । ततः [v]ते तव [v]सखायः हविष्प्रदानेनोपकारकाः[2] स्तोतारः[3] वयं [v]वामभाजः [v]स्याम सर्वे वननीयधनभागिनो भवेम । तदेतद्देवानां महदैश्वर्यम् ॥ निष्षिध्वरीः । ' षिधु संराद्धौ ' । संपदादिलक्षणो भावे क्विप् । तदस्यास्ति इत्यर्थे ' छन्दसीवनिपौ° ' इति वनिप् । ' वनो र च ' इति ङीप् रेफश्च । निसा सह समासः । निसः सकारं छान्दसत्वादनादृत्य ' उपसर्गात्सुनोति° ' इत्यादिना षत्वम् । ङीपः पित्त्वादनुदात्तत्वे धातुस्वरः । बिभर्ति । ' डुभृञ् धारणपोषणयोः ' इत्यस्य लटि ' भृञामित् ' इत्यभ्यासस्येत्वम् । निघातः । वामभाजः । ' भज सेवायाम् ' । ' भजो ण्विः ' (पा. सू. ३.२.६२) इति ण्विः । कृदुत्तरपदस्वरः ॥ ॥ ३१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके
तृतीयोऽध्यायः समाप्तः ॥

---

१. ख-ग-घ-च-ज-न-भ-ल-स–' निष्षिध्वर्यो नितरां ' नास्ति । २. ख-ग-च-ज-ण-न-भ–हविष्प्रदानोपकारकाः । ३. ल–स्तोतारो वा ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

'न ता मिनन्ति' इत्यष्टर्चं तृतीयं सूक्तं विश्वामित्रस्य वाचः[1] पुत्रस्य वा प्रजापतेरार्षं त्रैष्टुभं वैश्वदेवम् । तथा चानुक्रमणिका–'न ताष्टौ' इति । सूक्तविनियोगो लिङ्गादवगन्तव्यः । अस्मिन् सूक्ते प्रायेणादित्यैः सह संवत्सरः स्तूयते ॥

न ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि ।
न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ॥ १ ॥

न । ता । मिनन्ति । मायिनः । न । धीराः । व्रता । देवानाम् । प्रथमा । ध्रुवाणि ।
न । रोदसी इति । अद्रुहा । वेद्याभिः । न । पर्वताः । निऽनमे । तस्थिऽवांसः ॥ १ ॥

[v]मायिनः कपटबुद्ध्युपेता असुराः [v]देवानाम् इन्द्रादीनां [v]प्रथमा प्रथमानि सृष्ट्यनन्तरभावीनि[2] [v]ध्रुवाणि स्थिराणि केनापि चालयितुमशक्यानि [v]ता तानि लोके प्रसिद्धानि[3] [v]व्रता व्रतानि लोकपालनादिकर्माणि [v]न [v]मिनन्ति न हिंसन्ति । तथा [v]धीराः विद्वांसोऽपि [v]न हिंसन्ति । तथा [v]अद्रुहा देवमनुष्यादिषु प्रजासु द्रोहवर्जिते [v]रोदसी द्यावापृथिव्यौ [v]वेद्याभिः स्वाश्रयतया सर्वैर्वेदनीयाभिः प्रजाभिः सहिते[4] तानि[4] कर्माणि [v]न मिनीतः । तदेतदुपपादयति । [v]तस्थिवांसः पृथिव्यामूर्ध्वतया स्थिताः [v]पर्वताः [v]न [v]निनमे निनमनीयाः[5] न भवन्ति । एतदुक्तं भवति । यद्देवमनुष्यादीनां द्यावापृथिव्याधारकतया अवस्थापनं[6] यच्च[7] पर्वतादीनामुन्नततयावस्थापनं[7] तदिदं देवानां[8] कर्म । तच्च कोऽप्यन्यथयितुमर्हति इति ॥ मिनन्ति । 'मीङ् हिंसायाम्' इत्यस्य लटि 'मीनातेर्निगमे' इति ह्रस्वः । निघातः । वेद्याभिः । वेदनमर्हन्ति । 'छन्दसि च' इति यत्प्रत्ययः । निनमे । 'णमु प्रह्वत्वे' इत्यस्य कृत्यार्थे केन्प्रत्ययः । कृत्स्वरः ॥

षड्भारां एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः ।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ॥ २ ॥

षट् । भारान् । एकः । अचरन् । बिभर्ति । ऋतम् । वर्षिष्ठम् । उप । गावः । आ । अगुः ।
तिस्रः । महीः । उपराः । तस्थुः । अत्याः ।
गुहा । द्वे इति । निहिते इति निऽहिते । दर्शे । एका ॥२॥

---

१. च–वाचस्पतेः । २. ख-ग-च-फ-भ-स–वृष्ट्यनन्तरभावीनि । ३. त–प्रदानानि । ४. ख-ग-च ज-त-न-भ-स–सहितानि । ५. घ-ण-न-भ–नमनीयाः । ६. ख-ग-च-ण-न-भ-स–अवस्थानम् । ७. ख-ग घ-च-ण-न-भ-ल-स–'यच्च.....स्थापनं' नास्ति । ८. ल–देवतानाम् ।

[v]अचरन् स्थायी [v]एकः संवत्सरः [v]षट् षट्संख्याकान् [v]भारान् । भ्रियते पुष्पविकासादि येष्विति[१] भारा ऋतवः । वसन्तताद्दीन् [v]बिभर्ति अवयवत्वेन धारयति । तथा [v]ऋतं सत्यभूतं [v]वर्धिष्ठं वृद्धतरमादित्यात्मकं तमेव संवत्सरं [v]गावः रश्मयः [v]उप [v]आगुः प्राप्नुवन्ति । किंच तस्मिन्नेव संवत्सरे [v]अत्याः अतनशीला आगमापायिधर्मोपेताः [v]तिस्रो [v]महीः त्रयो लोकाः [v]उपराः उपर्युपरि वर्तमानाः [v]तस्थुः तिष्ठन्ति । लोकत्रयमेव दर्शयति । [v]गुहा गुहायां स्वात्मनि [v]द्वे[२] द्यौश्चान्तरिक्षं चेत्येते [v]निहिते न दृश्येते । [v]एका भूमिः [v]दर्शि सर्वभूताधारतया दृश्यते ॥ भारान् । 'डुभृञ् धारणपोषणयोः' इत्यस्मादधिकरणे घञ् । 'कर्षात्वतो घञः[०]' इत्यन्तोदात्तत्वम् । निहिते । दधातेः कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । दर्शि । 'दृशिर् प्रेक्षणे' । कर्मणि लुङि चिणि 'चिणो लुक्' इति प्रत्ययस्य लुक् । वाक्यभेदादनिघातः ॥

त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम् ॥ ३ ॥

त्रिऽपाजस्यः । वृषभः । विश्वऽरूपः । उत । त्रिऽउधा । पुरुध । प्रजाऽवान् ।
त्रिऽअनीकः । पत्यते । माहिनऽवान् । सः । रेतःऽधाः । वृषभः । शश्वतीनाम् ॥ ३ ॥

[v]त्रिपाजस्यः ग्रीष्मवर्षाहेमन्ताख्यैस्त्रिभिर्ऋतुभिः पाजस्यमुरो यस्य स त्रिपाजस्यः । त्र्युरस्क इत्यर्थः । उरोवचनश्च पाजस्यशब्दः । 'इन्द्रस्य क्रोडोऽदित्यै पाजस्यम्' (वा. सं. २५. ८) इति अश्वमेधमन्त्रे उरःपरतयाम्नानात्, पाजसि बले साधुरिति व्युत्पत्तेश्च सर्वेषामङ्गानां मध्ये उरसो बलवत्त्वात् । [v]वृषभः स्वावयवभूते वर्षर्तौ अपां वर्षकः [v]विश्वरूपः तत्तद्रसाधारणकार्यैः पुष्पविकासादिभिर्लिङ्गैर्नानारूपः [v]उत अपि च [v]त्र्युधा । वसंतशरद्धेमन्ताख्यैस्त्रिभिर्ऋतुभिरूधो यस्य स त्र्युधा । [v]प्रजावान् । प्रकर्षेण जायन्त इति व्रीह्यादयः प्रजाः । [v]पुरुध नानाप्रकारेण विद्यमानव्रीहियवादिरूपप्रजावान्[३] । किंच [v]त्र्यनीकः त्रिभिरुष्णवर्षशीतास्त्यैः अनीकैः गुणैरुपेतः[४] [v]माहिनावान् महत्त्ववान् संवत्सराभिमानी देवः [v]पत्यते आगच्छति । [v]वृषभः सेचनसमर्थः [v]सः संवत्सरः [v]शश्वतीनां बह्वीनाम् ओषधीनां पुष्पफलादिसंपत्तये [v]रेतोधाः रेतस उदकस्य धर्ता भवति ॥ त्र्युधा । बहुव्रीहौ 'ऊधसोऽनङ्' इति अनङ् सर्वविधीनां छन्दसि विकल्पितत्वात् पुंस्त्वेऽपि भवति । ऊकारस्य ह्रस्वश्छान्दसः । 'उत्तरपदान्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम्' इत्युत्तरपदान्तोदात्तत्वम् ॥

अभीक आसां पदवीरबोध्यादित्यानामवो चारु नाम ।
आपश्चिदस्मा अरमन्त देवीः पृथग्व्रजन्तीः परि षीमवृञ्जन् ॥ ४ ॥

अभीके । आसाम् । पदऽवीः । अबोधि । आदित्यानाम् । अवे । चारु । नाम ।
आपः । चित् । अस्मै । अरमन्त । देवीः । पृथक् । व्रजन्तीः । परि । सीम् । अवृञ्जन् ॥४॥

---

१. ख-ग-च-सर्वे येष्विति, ण-सर्वं यैरिति । २. घ-न-भ-ल-द्वे भूमी । ३. ल-व्रीहियवादिरूपप्रजावान् । ४. ख-ग-घ-ण-त-न-भ-स-गुणैरुपेतः ।

संवत्सरः [v]आसाम् ओषधीनाम् [v]अभीके समीपे [v]पदवीः । पदानि तत्तद्गुनविशिष्टपुष्पफलादीनि वेति प्रजनयतीति पदवीः सन् [v]अबोधि बुध्यते सावधानो वर्तते । तथा[1] [v]आदित्यानाम्[1] । आदित्या मासाः संख्यासाम्यात् । यद्वा । आदित्यसंक्रमणनिमित्तत्वादादित्या मासाः । ' मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः । चैत्राद्यः स ज्ञेयः ' इति स्मृतेः । तेषां चैत्रादीनां मासानां [v]चारु [v]नाम मधुश्च माधवश्चेत्यादि नामधेयम् [v]अह्वे आह्वयामि । उच्चारयामीत्यर्थः । किंच [v]देवीः द्योतनशीलाः [v]पृथक् इतस्ततः [v]व्रजन्तीः गच्छन्त्यः [v]आपश्चित् आपोऽपि [v]अस्मै संवत्सराय [v]अरमन्त संवत्सरसंबन्धिमासचतुष्टये वृष्टिद्वारा रमन्ते । ताः[2] आपः [v]सीम् पुनं संवत्सरं [v]परि [v]अवृञ्जन् अष्टसु मासेषु परिवर्जयन्ति ॥ पदवीः । वी गत्यादिषु । क्विप् । अबोधि । ' बुध अवगमने ' इत्यस्य लुङि ' दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ' इति कर्तरि चिण् । ' चिणो लुक् ' । निघातः । आदित्यानाम् । आदित्यसंबन्धिन इत्यर्थे ' दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ' इति ण्यः । अतोलोपयलोपौ । प्रत्ययस्वरः । अह्वे । ह्वयतेर्लुङि सिचः ' आत्मनेपदेष्वन्यतरस्याम् ' इति अडादेशः । गुणः । निघातः । अवृञ्जन् । ' वृजी वर्जने ' इत्यस्य लुङि श्नमि रूपम् । निघातः ॥

त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ॥ ५ ॥

त्री । सधऽस्था । सिन्धवः । त्रिः । कवीनाम् । उत । त्रिऽमाता । विदथेषु । सम्ऽराट् ।
ऋतऽवरीः । योषणाः । तिस्रः । अप्याः । त्रिः । आ । दिवः । विदथे । पत्यमानाः ॥ ५ ॥

प्रजापतिः स्वविज्ञानं सिन्धूनां निवेदयति । हे [v]सिन्धवः आपः सर्वसाक्षिण्यो यूयम् । [v]त्री [v]षधस्था त्रयो लोकाः । ते च प्रत्येकं [v]त्रिः भवन्ति । तथा ' त्रयो वा इमे त्रिवृतो लोकाः ' इति श्रुतिः । ' न द्यावा इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विश्वचन्त भूमयः ' (ऋ. सं. ८.६.१५) इति प्रत्येकं बहुवचनश्रवणात् । बहुवचनं[3] च कपिञ्जलन्यायेन त्रित्वे पर्यवसितम् । ते च लोकाः [v]कवीनां देवानां निवासस्थानानि भवन्ति । [v]उत अपि च [v]त्रिमाता त्रयाणाममीषां लोकानां निर्माता संवत्सरः सूर्यो वा [v]विदथेषु यज्ञेषु [v]सम्राट् यजनीयतया सम्यग्दीप्यमानो वर्तते । तथा [v]ऋतावरीः उदकवत्यः [v]अप्याः नभस्या आप्तव्या वा [v]तिस्रः [v]योषणाः त्रिसंख्याका इला सरस्वती भारती[4] इत्येवंरूपाः परस्परमिश्रणोपेताः देवताः[5] [v]विदथे यज्ञे [v]दिवः दिवसस्य [v]त्रिः त्रिषु सवनेषु [v]आ [v]पत्यमानाः आगच्छन्त्यो भवन्ति ॥ सधस्था । ' पूर्वपदात् ' इति संहितायां षत्वम् । योषणाः । युष इति सौत्रो धातुः । ल्युटि रूपम् । लित्स्वरः । तिस्रः । ' तिसृभ्यो जसः ' इत्याद्युदात्तत्वम् । अप्याः । अप् इत्यन्तरिक्षनाम । तत्र भवाः । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् ॥

१. ख-ग-च-ण-न-भ-' तथा आदित्यानां ' नास्ति । २. च-किंच ताः । ३. ल-बहुत्वम् । ४. ख-ग-ण-न-स-मही । ५. ख-ग-घ-च-ण-न-फ-भ-स-' देवताः ' नास्ति ।

त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ॥ ६ ॥

त्रिः । आ । दिवः । सवितः । वार्याणि । दिवेऽदिवे । आ । सुव । त्रिः । नः । अह्नः ।
त्रिऽधातु । रायः । आ । सुव । वसूनि । भग । त्रातः । धिषणे । सातये । धाः ॥ ६ ॥

vसवितः सर्वस्य प्रेरक हे आदित्य vदिवः द्युलोकादागत्य त्वं vवार्याणि सर्वैः संभजनीयानि धनानि vदिवेदिवे प्रतिदिनं vत्रिः vआ vसुव त्रिवारमस्मभ्यं प्रेरय प्रयच्छेत्यर्थः । तदेवोच्यते । vभग सर्वैर्भजनीय vत्रातः अस्माकं रक्षक हे आदित्य vत्रिधातु त्रिधातूनि पशुकनकरत्नभेदेन त्रिप्रकाराणि vवसूनि धनानि vरायः । रान्ति क्षीरादीनीति रायो गोधनानि । तानि च vनः अस्मभ्यम् vअह्नः संबन्धिषु vत्रिः त्रिषु सवनेषु vआ vसुव प्रयच्छ । vधिषणे माध्यमिके हे वाक् vसातये धनलाभाय vधाः अस्मान् कुरु ॥ त्रिः । 'द्वित्रिचतुर्भ्यः सुच्' (पा. सू. ५. ४. १८) इति सुच् । चित्स्वरः । सुव । 'षू प्रेरणे' । तुदादिः । लोटि रूपम् । त्रिधातु । 'डुधाञ् धारणपोषणयोः' इत्यस्मात् 'सितनिगमिमसि०' इत्यादिना तुन्प्रत्ययः । धिषणे । आमन्त्रितत्वात् निघातः ॥

त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी ।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय ॥ ७ ॥

त्रिः । आ । दिवः । सविता । सोसवीति । राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी ।
आपः । चित् । अस्य । रोदसी इति । चित् । उर्वी इति ।
रत्नम् । भिक्षन्त । सवितुः । सवाय ॥ ७ ॥

vसविता देवः vदिवः दिवसस्य vत्रिः त्रिषु कालेषु vआ vसोषवीति अस्मभ्यं धनान्यासुवतु । प्रेरयतु । किंच vराजाना राजानौ vसुपाणी कल्याणपाणी मित्रावरुणौ[1] vआपः । आप्नोति सर्वं जगत् इत्यापः अन्तरिक्षम् । निरयबहुवचनान्तत्वात् बहुवचनम् । vचित् अपि च vउर्वी विस्तीर्णे vरोदसी द्यावापृथिव्यौ एता देवताः vसवितुः प्रेरकस्य vअस्य देवस्य vसवाय सवेन प्रेरणेन vरत्नम् अपेक्षितमर्थं vभिक्षन्त याचन्ते ॥ सोसवीति । 'षू प्रेरणे' इत्यस्य यङ्लुकि लटि रूपम् । मित्रावरुणा । 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम् । भिक्षन्त । 'भिक्ष याच्ञायाम्' इत्यस्य लङि रूपम् । सवाय । 'जव सवौ च' (पा. सू. ३. ३. ५६. ४) इति अजन्तत्वेन निपातनादन्तोदात्तत्वम् ॥

१. च-मित्रावरुणा मित्रावरुणौ ।

त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।
ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ॥ ८ ॥

त्रिः । उत्ऽतमा । दुःऽनशा । रोचनानि । त्रयः । राजन्ति । असुरस्य । वीराः ।
ऋतऽवानः । इषिराः । दुःऽदभासः । त्रिः । आ । दिवः । विदथे । सन्तु । देवाः ॥ ८ ॥

[v]दूणशा दुर्नशा केनापि विनाशयितुमशक्यानि [v]रोचनानि दीप्यमानानि [v]त्रिः त्रीण्युत्तमानि स्थानानि सन्ति । एतेषु त्रिषु स्थानेषु [v]असुरस्य । अस्यति क्षिपति सर्वमित्यसुरः कालात्मा संवत्सरः । तस्य [v]वीराः पुत्राः [v]त्रयः अग्निवायुसूर्यरूपाः [v]राजन्ति शोभन्ते । तानेव विशिनष्टि । [v]ऋतावानः । ऋतं सत्यभूतमग्निहोत्रादिकं कर्म तद्वन्तः । [v]इषिराः यज्ञार्थं शीघ्रगतिमन्तः [v]दूळभासः दुर्दभासः केनापि स्वतेजसा तिरस्कर्तुमशक्या एते सर्वे [v]देवाः [v]विदथे अस्मदीये यज्ञे [v]दिवः अह्नः[1] संबन्धिषु[1] [v]त्रिः त्रिषु सवनेषु [v]आ [v]सन्तु समन्ताद्यजनीयतया भवन्तु ॥ उत्तमा । ' उत्तमश्चत्तमौ सर्वत्र ' इत्युच्छादिषु पाठादन्तोदात्तत्वम् । दृणशा । नशेः कृच्छ्रार्थे खल् । ' दुरो दाशनाशदभेषूत्वं वक्तव्यम् ' इति रेफस्य उत्वम् । उत्तरपदादेः ष्टुत्वम् । लित्स्वरः । दूळभासः । पूर्ववदुत्वष्टुत्वे[2] ॥ ॥ १ ॥

' प्र मे विविक्वान् ' इति षड्चं चतुर्थं सूक्तम् । विश्वामित्र ऋषिः । त्रिष्टुप् छन्दः । विश्वेदेवाः देवता । अत्रानुक्रमणिका—' प्र मे षट् ' इति । सूक्तविनियोगो लैङ्गिकः ॥

प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।
सद्यश्चिद्या दुदुहे भूरि धासेरिन्द्रस्तदग्निः पनितारो अस्याः ॥ १ ॥

प्र । मे । विविक्वान् । अविदत् । मनीषाम् । धेनुम् । चरन्तीम् । प्रऽयुताम् । अगोपाम् ।
सद्यः । चित् । या । दुदुहे । भूरि । धासेः । इन्द्रः । तत् । अग्निः । पनितारः । अस्याः ॥ १ ॥

[v]विविक्वान् विवेकवानिन्द्रोऽग्निर्वा [v]मे मम [v]मनीषां देवताविषयां स्तुतिं [v]प्र [v]अविदत् प्रकर्षेण जानातु । तत्र दृष्टान्तः । [v]चरन्तीं यवसे इतस्ततो गच्छन्तीं [v]प्रयुतां पृथग्भूतामेकाकिनीम् [v]अगोपां गोसृरहितां यथाकामं चरन्तीं [v]धेनुं नवसूतिकां गामिव देवतानां प्रीणयित्रीं स्तुतिमविददित्यन्वयः । [v]या स्तुतिरूपा धेनुः [v]सद्यश्चित् तदानीमेव [v]धासेः । धारयति प्राणान्[3] धीयते दीयते अर्थिभ्यः इति वा धासिरन्नम् । कर्मणि षष्ठी । [v]भूरि बह्वन्नमपेक्षितं फलं [v]दुदुहे दुग्धे [v]इन्द्रः [v]अग्निः अन्ये च देवाः [v]अस्याः स्तुतिरूपाया धेनोः [v]तत् तस्यान्नभूतस्य पयसः [v]पनितारः स्तोतारो भवन्ति । यद्वा । इन्द्राग्नी स्तोतारो वयं चास्या धेनोस्तत्पयः प्राप्नुमः ॥ विविक्वान् । ' विचिर् पृथग्भावे ' इत्यस्य क्वसौ रूपम् । अविदत् । ' विद ज्ञाने ' इत्यस्य लङि ' बहुलं छन्दसि ' इति शः । दुदुहे । ' दुह प्रपूरणे ' इत्यस्य लिटि रूपम् । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । पनितारः । ' पन स्तुतौ ' इत्यस्य तृचि रूपम् ॥

---

१. ख-ग-च-अह्नः संबन्धिषु । २. ख-ग-च-ण- पूर्ववदुत्वं ष्टुत्वम् । ३. ख-ग-च-ण-भ-प्राणानिति धासिः ।

इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम् ॥ २ ॥

इन्द्रः । सु । पूषा । वृषणा । सुऽहस्ता । दिवः । न । प्रीताः । शशयम् । दुदुह्रे ।
विश्वे । यत् । अस्याम् । रणयन्त । देवाः । प्र । वः । अत्र । वसवः । सुम्नम् । अश्याम् ॥२॥

[v]वसवः सर्वस्य वासयितारो हे देवाः [v]इन्द्रः [v]पूषा च [v]वृषणा अभिमतफलस्य सेक्तारौ [v]सुहस्ता कल्याणपाणी नासत्यौ मित्रावरुणौ वा । 'राजाना मित्रावरुणा सुपाणी' इत्यादिषु दृष्टत्वात् । एते सर्वे देवाः । [v]न इति संप्रत्यर्थे । इदानीं [v]प्रीताः सन्तः [v]शशयं नभसि शयानं मेघं [v]दिवः नभसः सकाशात् [v]सु[1] [v]दुदुह्रे । वृष्टिद्वारापेक्षितं फलं सुष्ठु[2] दुहन्ति । [v]यत् यस्मात् [v]विश्वे सर्वे [v]देवाः [v]अस्यां वेद्यां [v]रणयन्त रमयन्ते[3] [v]वः युष्माकं संबन्धिनि [v]अत्र लोके [v]सुम्नं सुखकरमपेक्षितं फलं [v]प्र [v]अश्यां प्राप्नुयाम् ॥ सुहस्ता । हसेः 'असिहसि°' इत्यादिना तन्प्रत्ययः । निरवादाद्युदात्तः । बहुव्रीहौ 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । दुदुह्रे । 'दुह प्रपूरणे' इत्यस्य लिटि 'इरयो रे' । रणयन्त । 'रमु क्रीडायाम्' । ण्यन्तस्य लङि रूपम् । वर्णव्यापत्तिः । अश्याम् । 'अशू व्याप्तौ' इत्यस्य लिङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । व्यत्ययेन परस्मैपदम् ॥

या जामयो वृष्णं इच्छन्ति शक्तिं नमस्यन्तीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ॥ ३ ॥

याः । जामयः । वृष्णे । इच्छन्ति । शक्तिम् । नमस्यन्तीः । जानते । गर्भम् । अस्मिन् ।
अच्छ । पुत्रम् । धेनवः । वावशानाः । महः । चरन्ति । बिभ्रतम् । वपूंषि ॥ ३ ॥

[v]या [v]जामयः । जमन्ति वर्षाकाले प्रादुर्भवन्तीति जामय ओषधयः । [v]वृष्णे अपां वर्षकायेन्द्राय [v]शक्तिं सेचनसामर्थ्यम् [v]इच्छन्ति । [v]नमस्यन्तीः प्रह्वीभूतास्ता ओषधयः [v]अस्मिन् इन्द्रे [v]गर्भं वृष्टिद्वारा पुष्पफलादिलक्षणगर्भाधानादिसामर्थ्यं [v]जानते जानन्ति । [v]वावशानाः फलं कामयमानाः [v]धेनवः सर्वस्य प्रीणयित्र्य ओषधयः [v]महः महान्ति नानाप्रकाराणि [v]वपूंषि रूपाणि [v]बिभ्रतं व्रीहियवनीवाराद्यफललक्षणं [v]पुत्रं तनयम् [v]अच्छ आभिमुख्येन [v]चरन्ति प्राप्नुवन्ति । लोके हि हम्भारवं कुर्वाणाः धेनवः[4] वत्समभिलक्ष्य गच्छन्ति । तद्वत् । यद्वा जामयः । जमन्ति सर्वत्र प्रसरन्तीति जामयः सूर्यदीप्तयः । वृष्णेऽपां वर्षकाय । स्वरश्मिभिर्भौमान् रसानादाय पुनर्वर्षतीति वर्षकः सूर्यः । 'आदित्याज्जायते वृष्टिः' इति स्मृतेश्च । तस्मै वर्षणशक्तिम्[5] इच्छन्ति । ता दीप्तयोऽस्मिन्नादित्ये गर्भम् अम्बुगर्भाधानसामर्थ्यं जानन्ति ॥ जामयः । जमतेर्गतिकर्मणः 'जनिघसिभ्यामिण्' इति विधीयमानो बहुलवचनादस्मादपि भवति । नमस्यन्तीः । नमःशब्दात् 'नमोवरिवश्चित्रङः क्यच्'

१. घ-ण-प्र सु । २. घ-ण-प्रकर्षेण सुष्ठु । ३. च-रमयन्ते तस्मात । ४. ल-धेनवः नवप्रसूता गावः । ५. ण-वर्षकशक्तिम् । .

इति क्यच् । तदन्ताच्छतरि रूपम् । प्रत्ययस्वरः । जानते । ' ज्ञा अवबोधने ' इत्यस्य लटि रूपम् । अच्छ । ' निपातस्य च ' इति संहितायां दीर्घः ॥

अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥ ४ ॥

अच्छ । विवक्मि । रोदसी इति । सुमेके इति सुऽमेके । ग्राव्णः । युजानः । अध्वरे । मनीषा ।
इमाः । ऊँ इति । ते । मनवे । भूरिऽवाराः । ऊर्ध्वाः । भवन्ति । दर्शताः । यजत्राः ॥ ४ ॥

vअध्वरे यज्ञे vग्राव्णः सोमाभिषवार्थमुपलान् vयुजानः प्रयुञ्जानोऽहं vसुमेके सुरूपे vरोदसी द्यावापृथिव्यौ vमनीषा मनस ईषया स्तुतिलक्षणया वाचा vअच्छ[1] vविवक्मि आभिमुख्येन स्तौमि। हे अग्ने vते तव vभूरिवाराः यजमानैर्बहुवारं वरणीयाः vदर्शताः कमनीयतया दर्शनीयाः vयजत्राः पूज्याः vइमाः दीप्तयः vमनवे मनुष्यव्यवहारार्थम्[2] vऊर्ध्वाः ऊर्ध्वमुखाः vभवन्ति[3] ॥ विवक्मि । ' वच परिभाषणे ' । लटि[4] ' बहुलं छन्दसि ' इति शपः श्लुः । ' अर्तिपिपर्त्योश्च, बहुलं छन्दसि ' इत्यभ्यासस्य इत्त्वम् । चकारस्य कुत्वं व्यत्ययेन । युजानः । ' युजिरुधिदृशः किच्च ' इति आनच् । कित्त्वात् अगुणः । चित्त्वादन्तोदात्तः । मनीषा । सुपो डादेशः ॥

या ते जिह्वा मधुमती सुमेधा अग्ने देवेष्वुच्यत उरूची ।
तयेह विश्वाँ अवसे यजत्रान सादय पायया चा मधूनि ॥ ५ ॥

या । ते । जिह्वा । मधुऽमती । सुऽमेधाः । अग्ने । देवेषु । उच्यते । उरूची ।
तया । इह । विश्वान् । अवसे । यजत्रान् । आ । सादय । पायय । च । मधूनि ॥ ५ ॥

हे vअग्ने vते तव vमधुमती उदकवती vसुमेधाः । शोभना मेधा प्रज्ञा यस्याः सा । सर्वस्य ज्ञापयित्री vया vजिह्वा ज्वाला vउरूची बहुव्याप्तिः सती vदेवेषु मध्ये आह्वानार्थम् vउच्यते प्रेर्यते[4] vतया जिह्वया vयजत्रान् यजनीयान् vविश्वान् देवान् vइह कर्मण्यस्माकम् vअवसे रक्षणाय vआ vसादय उपवेशय । किंच तान् विश्वान् देवान् vमधूनि मदकरान् सोमान् vपायय ॥ सुमेधाः । ' नित्यमसिच्प्रजामेधयोः ' इति असिच् । उच्यते । ' वच परिभाषणे ' । कर्मणि यकि रूपम् । यङ्लुक्योगादनिघातः । उरूची । अञ्चतेः क्विन् । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' अनुदात्तस्य च यत्रोदात्तलोपः ' इति ङीप उदात्तत्वम् । पायय । ' पा पाने ' इत्यस्य णौ परतः ' शाच्छासाह्वाव्यावेपां युक् ' इति युक् । तिङ उत्तरत्वादनिघातः ॥

१. घ-च-ग-न-स-अच्छा । २. ख-ग-घ-च-ण-फ-भ-स-अनुष्ठानव्यवहारार्थम्; त- मनुष्यानुष्ठानव्यवहारार्थम् । ३. घ-भवन्ति । उ पूरणः; ण-भवन्ति । उः पूरणः । ४. ख-ग-च-ण-न-भ-स-लेटि । ५. ल-प्रेर्यते । यद्वा मधुमती माधुर्यवती सुमेधाः शोभनप्रज्ञानोपेता उरूची । महत इन्द्रादीनश्नुते पूजयतीत्युरूची जिह्वा वाक देवेषु आह्वानार्थं प्रेर्यते ।

या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयदेव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥ ६ ॥

या । ते । अग्ने । पर्वतस्यऽइव । धारा । असश्चन्ती । पीपयत् । देव । चित्रा ।
ताम् । अस्मभ्यम् । प्रऽमतिम् । जातऽवेदः । वसो इति । रास्व । सुऽमतिम् । विश्वऽजन्याम् ॥६॥

[v]देव दीप्यमान हे [v]अग्ने [v]चित्रा नानारूपा [v]असश्चन्ती अस्मादन्यत्र संगतिमकुर्वाणा [v]या [v]ते तव प्रमतिः प्रकृष्टा[1] बुद्धिः [v]पीपयत् अपेक्षितफलदानेनास्मान् वर्धयति। तत्र दृष्टान्तः। [v]पर्वतस्येव [v]धारा। यथा पर्वतस्य मेघस्योदकधारा ओषधिवनस्पत्यादिषु संगतिं कुर्वाणा तान्[2] वर्धयति तद्वत्। [v]वसो सर्वस्य वासयितः [v]जातवेदः जातप्रज्ञ हे अग्ने [v]तां [v]प्रमतिं परहितकरणसमर्थां बुद्धिम् [v]अस्मभ्यं [v]रास्व दत्स्व। तथा [v]विश्वजन्यां सर्वजनहितां [v]सुमतिं शोभनां बुद्धिं दत्स्व ॥ असश्चन्ती। सश्चतिर्गतिकर्मा। शतरि ' उगितश्च ' इति ङीप्। नञा समासे नञ्स्वरः। पीपयत्। ' पा पाने '। ण्यन्तस्य लुङि चङि रूपम्। ' चङ्यन्यतरस्याम् ' इति चङि परतः[3] पूर्वस्योदात्तत्वम्। यद्वृत्तयोगादनिघातः। प्रमतिम्। ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम्। रास्व। ' रा दाने '। व्यत्ययेन आत्मनेपदम्। लोटि रूपम्। आमन्त्रितस्याविद्यमानत्वात् निघाताभावः ॥ ॥ २ ॥

' धेनुः प्रत्नस्य ' इति नववं पञ्चमं सूक्तं वैश्वामित्रं त्रैष्टुभमाश्विनम्। तथा चानुक्रान्तं— ' धेनुर्नवाश्विनम् ' इति। प्रातरनुवाके आश्विनकनौ[4] त्रैष्टुभे छन्दस्याश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। सूत्रितं च–' धेनुः प्रत्नस्य क उ श्रवदिति सूक्ते ' (आश्व. श्रौ. ४. १५) इति। व्यूढेऽहे दशरात्रे द्वितीये छन्दोमे प्रउगशस्त्रेऽयमाश्विनश्चतुर्थस्तृचः। ' द्वितीयस्याग्निं वः ' इति खण्डे सूत्रितं– ' धेनुः प्रत्नस्य काम्यं दुहाना ब्रह्मा ण इन्द्रोप याहि विद्वान् ' (आश्व. श्रौ. ८.१०) इति ॥

धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश्चरति दक्षिणायाः ।
आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः ॥ १ ॥

धेनुः । प्रत्नस्य । काम्यम् । दुहाना । अन्तरिति । पुत्रः । चरति । दक्षिणायाः ।
आ । द्योतनिम् । वहति । शुभ्रऽयामा । उषसः । स्तोमः । अश्विनौ । अजीगरिति ॥ १ ॥

[v]धेनुः प्रीणयित्र्युषाः [v]प्रत्नस्य पुरातनस्याग्नेः [v]काम्यं कमनीयं पयः [v]दुहाना दोग्ध्री भवति। [v]दक्षिणायाः उषसः [v]पुत्रः सूर्यस्तस्याः [v]अन्तः [v]चरति। उषसोऽनन्तरं [v]शुभ्रयामा। सूर्यकिरणसंपर्कात् शुभ्रतया गमनं यस्यासौ शुभ्रयामा दिवसः। [v]द्योतनिं सर्वस्य प्रकाशकं सूर्यम्[5] [v]आ [v]वहति बिभर्ति। अतः [v]उषसः पुरा [v]अश्विनौ स्तोतुं [v]स्तोमः स्तोत्रकारी होत्रादिः [v]अजीगः जागर्ति उत्तिष्ठति ॥ शुभ्रयामा। ' या प्रापणे '। आतो मनिन्। बहुव्रीहौ पूर्वपदस्वरः। अजीगः। ' जागृ निद्राक्षये '। लङि तिपि अदादित्वात् शपो लुक्। आकारस्य ईकारश्छान्दसः। गुणे कृते हल्ङ्यादिना तिपो लोपः ॥

---

१. त-ल-प्रकृष्टार्था। २. ख-ग-ण-न-भ-ल–ताः। ३. ख-ग-च-ण-न-भ–' परतः ' नास्ति। ४. त–आश्विने क्रतौ। ५. त–सूर्यकिरणसंपर्कम्।

सुयुग्वहन्ति प्रति वामृतेनोर्ध्वा भवन्ति पितरेव मेधाः ।
जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक् ॥ २ ॥

सुऽयुक् । वहन्ति । प्रति । वाम् । ऋतेन । ऊर्ध्वाः । भवन्ति । पितराऽइव । मेधाः ।
जरेथाम् । अस्मत् । वि । पणेः । मनीषाम् । युवोः । अवः । चकृम । आ । यातम् । अर्वाक् ॥२॥

हे अश्विनौ [v]सुयुक् सुष्ठु रथे योजिता अश्वाः [v]ऋतेन सत्यभूतेन रथेन [v]वां युवां [v]प्रति [v]वहन्ति। यज्ञं प्रत्यागमनाय धारयन्ति । [v]मेधाः यज्ञाश्च [v]ऊर्ध्वाः युष्मदभिमुखम् ऊर्ध्वाः [v]भवन्ति । तत्र दृष्टान्तः । [v]पितरेव । यथा पुत्राः पितरौ मातापितरावभिलक्ष्य गच्छन्ति तद्वत् । [v]अस्मत् अस्मत्तः सकाशात् [v]पणेर्मनीषां आसुरीं बुद्धिं [v]वि [v]जरेथां विशेषेण नाशयतम् । वयं तु [v]युवोः युवयोः [v]अवः हविर्लक्षणमन्नं [v]चकृम कुर्मः । युवाम् [v]अर्वाक् अस्मदाभिमुख्येन [v]आ [v]यातम् ॥ सुयुक् । युजेः क्विप् । 'सुपां सुलुक्०' इति सुपो लुक् । पितरेव । 'पिता मात्रा' इति पितुः शेषः । सुपो डादेशः । जरेथाम् । 'जॄष् वयोहानौ' । ण्यन्तस्य 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वात् वृद्ध्यभावः । 'छन्दस्युभयथा' इति आर्धधातुकत्वात् णिलोपः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः ॥

सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ३ ॥

सुयुक्ऽभिः । अश्वैः । सुऽवृता । रथेन । दस्रौ । इमम् । शृणुतम् । श्लोकम् । अद्रेः ।
किम् । अङ्ग । वाम् । प्रतिं । अवर्तिम् । गमिष्ठा । आहुः । विप्रासः । अश्विना । पुराऽजाः ॥३॥

हे अश्विनौ [v]सुयुग्भिः सुष्ठु योजितैः [v]अश्वैः [v]सुवृता । पुनःपुनरावर्तते इति वृत्तक्रम्[1] । शोभनचक्रोपेतेन [v]रथेन आगत्य [v]दस्रौ शत्रूणामुपक्षपयितारौ युवाम् [v]अद्रेः । आद्रियते सर्वैरित्यद्रिः स्तोता । तस्य [v]इमं [v]श्लोकं स्तोत्रं [v]शृणुतम् । [v]अङ्ग हे अश्विनौ [v]विप्रासः[2] मेधाविनः [v]पुराजाः पुरातना ऋषयः [v]वां युवाम् [v]अवर्तिम् अस्माकं वृत्तिहानिं [v]प्रति [v]गमिष्ठा अतिशयेन गन्तारावित्ति [v]किम् [v]आहुः किं[3] कथयन्ति[3] । न कथयन्तीत्यर्थः । प्रथमाष्टकेऽष्टमेऽध्याये 'सुवृता रथेन' (ऋ. सं. १. ११८. ३) इत्यादि गतम् ॥ गमिष्ठा । गन्तृशब्दादिष्ठनि रूपम् ॥

आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते ।
इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे ॥ ४ ॥

आ । मन्येथाम् । आ । गतम् । कत् । चित् । एवैः । विश्वे । जनासः । अश्विना । हवन्ते ।
इमा । हि । वाम् । गोऽऋजीका । मधूनि । प्र । मित्रासः । न । ददुः । उस्रः । अग्रे ॥ ४ ॥

१. ख-ग-च-फ-सुवृत्तक्रम् । २. ण-विप्रासः विप्राः । ३. न-स-कथयन्तीति ।

[v]कच्चित् इति प्रश्ने । हे अश्विनौ [v]आ [v]मन्येथाम् इमां मदीयां स्तुतिं जानीतम् । किंच [v]एवैः गमनसाधनैरश्वैः [v]आ [v]गतं यज्ञं प्रत्यागच्छतम् । [v]विश्वे सर्वे [v]जनासः स्तोतारः [v]अश्विना अश्विनौ [v]वां युवां [v]हवन्ते स्तुतिलक्षणाभिर्वाग्भिराह्वयन्ति । किंच [v]गोऋजीका गवां पयसा मिश्रणोपेतानि [v]मधूनि मदकराणि[1] सोमरसरूपाणि [v]इमा इमानि हवींषि युवाभ्यां [v]प्र [v]ददुः[2] अध्वर्यवादयः प्रयच्छन्ति । तत्र दृष्टान्तः । [v]मित्रासो [v]न । यथा मित्राणि मित्रेभ्योऽपेक्षितं ददति तद्वत् । [v]उस्रः । वसतिनभसीत्युस्रः सूर्यः । [v]अग्रे उषसोऽग्र उदेति । तस्मादागच्छतमिति भावः[3] ॥ मन्येथाम्[4] । ' मन ज्ञाने ' । दिवादिः । लोटि रूपम् । इमा । सुपो डादेशः । गोऋजीका । ' प्रकृत्यान्तःपादम् ' इत्येङः प्रकृतिभावः[5] । ददुः । ' दाण् दाने ' इत्यस्य लिट्युसि रूपम् । हियोगादनिघातः । उस्रः । ' वस निवासे ' । ' स्फायितञ्चि° ' इत्यादिना रक् । किरवात् संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वाभावश्छान्दसः ॥

तिरः पुरू चिदश्विना रजांस्याङ्गूषो वां मघवाना जनेषु ।
एह यातं पथिभिर्देवयानैर्दस्रावि मे वां निधयो मधूनाम् ॥ ५ ॥

तिरः । पुरु । चित् । अश्विना । रजांसि । आङ्गूषः । वाम् । मघऽवाना । जनेषु ।
आ । इह । यातम् । पथिऽभिः । देवऽयानैः । दस्रौ । इमे । वाम् । निऽधयः । मधूनाम् ॥५॥

हे अश्विनौ [v]पुरू [v]चित् बहून्यपि [v]रजांसि स्थानानि [v]तिरः स्वतेजसा तिरस्कुर्वन्तौ वां युवाम् [v]इह कर्मणि [v]देवयानैः [v]पथिभिः मार्गैः [v]आ [v]यातम् आगच्छतम् । [v]मघवाना धनवन्तौ हे अश्विनौ [v]जनेषु स्तोतृषु [v]वां युवयोः [v]आङ्गूषः आ समन्तात् घोषणीयं स्तोत्रं वर्तते । [v]दस्रौ शत्रूणामुपक्षपयितारौ हे अश्विनौ [v]वां युवयोः [v]मधूनां मदकराणां सोमानाम् [v]इमे[5] [v]निधयः । निधीयतेऽत्र सोम इति निधयः पात्रविशेषाः । सन्ति । तस्मादागच्छतमिति भावः ॥ आङ्गूषः । आङ्पूर्वात् घुषेः कर्मणि घञ् । आघुष्यत इत्याघोषः । घो इत्यस्य पृषोदरादित्वात् गू इत्यादेशः । ' आडोऽनुनासिकश्छन्दसि ' इति अनच्यप्यनुनासिकश्छान्दसः । यद्वा । अगिर्गत्यर्थः । अस्मात् ' अङ्गूषः ' इति सूत्रेण उषच्प्रत्ययान्तो निपातितः । अङ्गति गच्छति देवानित्यङ्गूषः स्तोत्रम् । अङ्गूषः एव आङ्गूषः । प्रज्ञादित्वात् स्वार्थिकः अण् । प्रत्ययस्वरः । ' एह यातम् ' इत्यर्धर्चो गतः ॥ ॥ ३ ॥

अशोर्यामेऽतिरिक्तोक्थ्ये अच्छावाकशस्त्रे ' पुराणमोकः ' इति चतस्रो विकल्पेन याज्याः । सूत्रितं च—'यदि नाधीयात्पुराणमोकः सख्यं शिवं वामिति चतस्रो याज्याः' (आश्व. श्रौ.९. ११) इति ॥

पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जुह्वाव्याम् ।
पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥ ६ ॥

पुराणम् । ओकः । सख्यम् । शिवम् । वाम् । युवोः । नरा । द्रविणम् । जुह्वाव्याम् ।
पुनरिति । कृण्वानाः । सख्या । शिवानि । मध्वा । मदेम । सह । नु । समानाः ॥ ६ ॥

१. ख-ग-घ-ण—मधुकराणि । २. च—ददुः हि । ३. घ—भावः । हि पूरणः । ४. ख-ग-च-ण-त-न-भ-स—' मन्येथां ..... प्रकृतिभावः ' नास्ति । ५. ख-ग-ण-न-भ-ल-स—' इमे ' नास्ति ।

हे अश्विनौ [v]वां युवयोः [v]पुराणं पुरातनं [v]सत्यम् [v]ओकः सेत्यं [v]शिवं कल्याणकरं भवति । किंच [v]नरा नरावस्मदीयस्य कर्मणो नेतारौ[1] [v]युवोः युवयोः [v]द्रविणं धनं [v]जह्नाव्यां जह्नुकुलजायां भवति । [v]शिवानि सुखकराणि युवयोः [v]सख्या[2] सख्यानि [v]पुनः[3] [v]कृण्वानाः कुर्वन्तः [v]समानाः हविष्प्रदानेन उपकारकत्वान्मित्रभूता एकीभूताः सन्तः वयं [v]मध्वा मदकरेण सोमेन वां युवां [v]सह युगपत् [v]नु क्षिप्रं [v]मदेम हर्षयेम ॥ सत्यम् । सख्युर्भाव इत्यर्थे 'सख्युर्यः' इति यप्रत्ययः । जह्नाव्याम् । जह्नोः संबन्धिनीत्यर्थे ' तस्येदम् ' इत्यण् । ' ओर्गुणः ' । ह्रस्वदीर्घयोर्व्यत्ययः । मदेम । ' मदी हर्षे ' इत्यस्य आशीर्लिङि लिङ्याशिष्यङ्प्रत्ययः । निघातः ॥

अश्विना वायुना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना ।
नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू ॥ ७ ॥

अश्विना । वायुना । युवम् । सुऽदक्षा । नियुत्ऽभिः । च । सऽजोषसा । युवाना ।
नासत्या । तिरःऽअह्न्यम् । जुषाणा । सोमम् । पिबतम् । अस्रिधा । सुदानू इति सुऽदानू ॥७॥

[v]सुदक्षा शोभनसामर्थ्योपेतौ [v]युवाना नित्यतरुणौ [v]नासत्या । न विद्यतेऽसत्यं ययोस्तौ । [v]सुदानू शोभनफलस्य दातारौ हे अश्विनौ [v]वायुना [v]नियुद्भिः अश्वैः[4] [v]च [v]सजोषसा संगतौ [v]जुषाणा सोमविषयप्रीतियुक्तौ [v]अस्रिधा अनुपक्षीणौ [v]युवं युवां [v]तिरोअह्न्यम् अह्नि तिरोहिते हूयमानमिमं [v]सोमं [v]पिबतम् ॥ नियुद्भिः । यौतेः क्विप् । तिरोअह्न्यम् । अह्नि भवमह्न्यम् । ' भवे छन्दसि ' इति यत् । तिरोभूतमह्न्यं यस्मिन् काले स तिरोअह्न्यः । पूर्वपदप्रकृतिस्वरः[5] ॥

अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥ ८ ॥

अश्विना । परि । वाम् । इषः । पुरूचीः । ईयुः । गीःऽभिः । यतमानाः । अमृध्राः ।
रथः । ह । वाम् । ऋतऽजाः । अद्रिऽजूतः । परि । द्यावापृथिवी इति । याति । सद्यः ॥ ८ ॥

हे अश्विनौ[6] [v]पुरूचीः । पुरु[7] अञ्चन्ति गच्छन्ति[8] इति पुरूचीः । बहूनि [v]इषः हविर्लक्षणान्यन्नानि [v]वां युवां [v]परि [v]ईयुः परितो गच्छन्ति । तथा [v]अमृध्राः केनाप्यतिरस्कृताः [v]यतमानाः कर्मणि प्रवर्तमानाः स्तोतारः [v]गीर्भिः स्तुतिलक्षणाभिर्वाग्भिर्युवां परिचरन्ति । [v]ऋतजाः ऋतस्योदकस्य जनयिता । ऋते यज्ञे प्रादुर्भवतीति वा । [v]अद्रिजूतः स्तोतृभिराकृष्टः [v]वां युवयोः [v]रथः [v]द्यावापृथिवी द्यावापृथिव्यौ [v]सद्यः तदानीमेव [v]परि [v]याति [v]ह सर्वतः प्राप्नोति खलु । अश्विनो रथस्य वेगवत्त्वे मन्त्रवर्णः[9]–

१. घ–नेतारौ अश्विनौ; त-ल–नेतारौ हे अश्विनौ । २. न-ल-स–' सख्या ' नास्ति । ३. त–पुनःपुनः । ४. ख-ग-घ-च-ण-त-न-भ-ल-स–' अश्वैः ' नास्ति । ५. त–बहुव्रीहौ पूर्वपदप्रकृतिस्वरः; ल–: बहुव्रीहौ पूर्वपदस्वरः । ६. च–अश्विना अश्विनौ । ७. ख-ग-घ-च-ण-भ-स–पुरुमञ्चति गच्छति; न–पुरुमञ्चन्ति गच्छन्ति; ल–पुरुतममञ्चन्ति गच्छन्ति । ८. ख-ग-च-ण-न-फ-भ-मन्त्रः ।

'यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति' (ऋ. सं. १. ११७.२) इति। अतः कारणादस्मदीयं यज्ञं प्रत्यागच्छतमिति भावः॥ ईयुः। 'इण् गतौ' इत्ययस्य लिटि 'दीर्घ इणः किति' इत्यभ्यासस्य दीर्घः। पादादित्वादनिघातः। यतमानाः। 'यती प्रयत्ने' इत्यस्य शानचि रूपम्। शपः पित्त्वादनुदात्तत्वे शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। ऋतजाः। जनेर्विट्। 'विड्वनोः०' इत्यात्वम्। अद्रिजूतः। जू इति सौत्रो धातुः। कर्मणि क्तः। 'तृतीया कर्मणि' इति पूर्वपदस्वरः॥

अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे।
रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः॥ ९॥

अश्विना। मधुसुत्ऽतमः। युवाकुः। सोमः। तम्। पातम्। आ। गतम्। दुरोणे।
रथः। ह। वाम्। भूरि। वर्पः। करिक्रत्। सुतऽवतः। निःऽकृतम्। आऽगमिष्ठः॥ ९॥

हे अश्विनौ[1] यः [V]सोमः [V]मधुषुत्तमः मधुरसमत्यन्तं[2] प्रेरयन् [V]युवाकुः युवां कामयमानो वर्तते। यद्वा। युवाकुर्वसतीवरीप्रभृतिभिर्मिश्रित इत्यर्थः। [V]तम् इमं सोमं [V]पातं पिबतम्। [V]दुरोणे अस्माकं गृहे [V]आ [V]गतम् आगच्छतम्। [V]भूरि प्रभूतं [V]वर्पः वारकं तेजः रूपं वा सर्वैर्वरणीयं धनं वा [V]करिक्रत् पुनःपुनः कुर्वन् [V]वां युवयोः [V]रथः [V]सुतवतः सोमम् अभिषुतवतः[3] यजमानस्य [V]निष्कृतम्। 'निरित्येष समित्येतस्य स्थाने' (निरु. १२.७) इति यास्कः। संस्कारि। यद्वा। संस्कृतं गृहम् [V]आगमिष्ठः अतिशयेनागच्छन् भवति॥ युवाकुः। यौतेः 'कटिकुषिभ्यां काकुः' इति बाहुलकादस्मादपि भवति। प्रत्ययस्वरेण मध्योदात्तः। करिक्रत्। करोतेर्यङ्लुकि शतरि 'दाधर्ति दर्धर्ति दर्धर्षि०' इत्यादिना ऋवाभावे यणादेशे कृतेऽङ्गस्यानृकारान्तत्वादभ्यासस्य रिगागमो न प्राप्नोतीति सोऽपि निपात्यते। अभ्यस्तस्वरः। निष्कृतम्। करोतेरादिकर्मणि क्तः। संस्कर्तुं प्रवृत्त इत्यर्थः। थाथादिस्वरः॥४॥

'मित्रो जनान्' इति नवर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभं मैत्रम्। 'मित्रो मैत्रं चतुर्गायत्यन्तम्' इत्यनुक्रमणिका। आदितः पञ्च त्रिष्टुभः शिष्टाश्चतस्रो गायत्र्यः। मित्रो देवता। अग्निहोत्रार्थे पयसि वर्षत्रिन्दुपतने 'मित्रो जनान्' इत्यनया समिधमादध्यात्। सूत्रितं च-'मित्रो जनान्यातयति ब्रुवाण इति समिदाधानम्' (आश्व. श्रौ. २. ११) इति॥

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत॥ १॥

मित्रः। जनान्। यातयति। ब्रुवाणः। मित्रः। दाधार। पृथिवीम्। उत। द्याम्।
मित्रः। कृष्टीः। अनिऽमिषा। अभि। चष्टे। मित्राय। हव्यम्। घृतऽवत्। जुहोत॥ १॥

---

१. च-अश्विना आश्विनौ। २. ख-घ-ण-भ-मधुररसमत्यन्तम्; ल-मधुररसममृतम्। ३. ख-ग-च-पुनः अभिषुतवतः।

ᵛब्रुवाणः स्तूयमानः शब्दं कुर्वाणो वा ᵛमित्रः । प्रकर्षेण सर्वंमींयते ज्ञायते तथा सर्वान् वृष्टिप्रदानेन त्रायत इति वा मित्रः सूर्यः । ᵛजनान् कर्षकादिजनान् ᵛयातयति । कृष्यादिकर्मसु प्रयत्नं कारयति । तथा ᵛमित्रः एव ᵛपृथिवीमुत अपि च ᵛद्याम् एतावुभौ लोकौ वृष्टिद्वारा अन्नं यागांश्च जनयन् ᵛदाधार धारयति । तथा सति ᵛमित्रः ᵛअनिमिषा अनिमिषेणानुग्रहदृष्ट्या ᵛकृष्टीः कर्मवतो मनुष्यान् ᵛअभि ᵛचष्टे सर्वतः पश्यति । एतत्सर्वं ज्ञात्वा हे ऋत्विजः ᵛघृतवत् उपस्तरणाभिघारणयुक्तं ᵛहव्यं हवनयोग्यं पुरोडाशादिकं तस्मै ᵛमित्राय देवाय ᵛजुहोत जुहुत प्रयच्छतेत्यर्थः । उक्तार्थं यास्को ब्रवीति– ' मित्रो जनान्यातयति ब्रुवाणः शब्दं कुर्वन् । मित्र एव धारयति पृथिवीं च दिवं च । मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति । कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा । मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातम् । जुहोतिर्दानकर्मा ' (निरु. १०. २२) इति ॥ यातयति । ' यती प्रयत्ने ' इत्यस्य ण्यन्तस्य लटि रूपम् । दाधार । 'तुजादीनाम्° ' इत्यभ्यासस्य दीर्घः । जुहोत । जुहोतेर्लोटि प्रत्ययस्य तबादेशः । गुणः । निघातः ॥

देवसुवां हविःषु मित्रस्य सत्यस्य ' प्र स मित्र ' इति याज्या । एषैव प्रातर्होमस्य कालात्ययनिमित्ते मैत्रे चरौ याज्या । सूत्रितं च— ' प्र स मित्र मतों अस्तु प्रयस्वांस्त्वां नष्टवान्महिमाय पृच्छते ' (आश्व. श्रौ. ४. ११) इति । ' तत इष्टिर्मित्रः सूर्योऽभि यो महिना दिवं प्र स मित्र मतों अस्तु प्रयस्वानिति संस्थितायाम् ' (आश्व. श्रौ. ३. १२) इति च ॥

प्र स मित्र मतों अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥ २ ॥

प्र । सः । मित्र । मर्तः । अस्तु । प्रयस्वान् । यः । ते । आदित्य । शिक्षति । व्रतेन ।
न । हन्यते । न । जीयते । त्वाऽऊतः । न । एनम् । अंहः । अश्नोति । अन्तितः । न । दूरात् ॥२॥

हे ᵛआदित्य ᵛव्रतेन यज्ञेन युक्तः ᵛयः मनुष्यः ᵛते तुभ्यं ᵛशिक्षति हविर्लक्षणमन्नं ददाति हे ᵛमित्र ᵛसः ᵛमर्तः मनुष्यः ᵛप्रयस्वान् अन्नवान् ᵛप्र ᵛअस्तु प्रभवतु । ᵛत्वोतः त्वया रक्षितः सः[1] मनुष्यः केनापि ᵛन ᵛहन्यते न बाध्यते[2] । ᵛन ᵛजीयते नाभिभूयते च । ᵛएनं तुभ्यं हविर्दत्तवन्तं पुरुषम् ᵛअंहः पापम् ᵛअन्तितः समीपात् ᵛन ᵛअश्नोति न प्राप्नोति[3] । ᵛदूरात् अपि ᵛन प्राप्नोति ॥ शिक्षतिर्दानकर्मा । व्यत्ययेन परस्मैपदम् । यद्वृत्तयोगादनिघातः । जीयते । जयतेः कर्मणि यकि ' अकृत्सार्वधातुकयोः° ' इति दीर्घः । त्वोतः । ' तृतीया कर्मणि ' इति पूर्वपदस्वरः । अश्नोति । ' अशू व्याप्तौ ' । स्वादिः । व्यत्ययेन परस्मैपदम् ॥

देवसुवां हविःषु मित्रस्य सत्यस्यानुवाक्या । ' अनर्मीवास इळया मदन्तः प्र स मित्र मतों अस्तु प्रयस्वान् ' (आश्व. श्रौ. ४. ११) इति सूत्रितम्[4] ॥

---

१. ख-ग-घ-च-ण-न-भ-ल-स–' सः ' नास्ति । २. ण–वध्यते । ३. त–व्याप्नोति । ४. त-न-ल–सूत्रम् ।

अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥ ३ ॥

अनमीवासः । इळया । मदन्तः । मितऽज्ञवः । वरिमन् । आ । पृथिव्याः ।
आदित्यस्य । व्रतम् । उपऽक्षियन्तः । वयम् । मित्रस्य । सुऽमतौ । स्याम ॥ ३ ॥

हे मित्र [v]अनमीवासः रोगवर्जिताः [v]इळया अन्नेन [v]मदन्तः माद्यन्तः [v]पृथिव्याः [v]वरिमन् विस्तीर्णे प्रदेशे [v]मितज्ञवः मितजानुकाः [v]आ यथाकामं सर्वत्र गच्छन्तः [v]आदित्यस्य संबन्धि [v]व्रतं कर्म [v]उपक्षियन्तः तस्य कर्मणः समीपे निवसन्तः । तदीयं[1] कर्म[1] कुर्वाणा इत्यर्थः । तादृशाः [v]वयं [v]मित्रस्य आदित्यस्य [v]सुमतौ शोभनायामनुग्रहबुद्धयां [v]स्याम वर्तेमहि ॥ मदन्तः । ' मदी हर्षे ' इत्यस्य शतरि व्यत्ययेन शप् । मितज्ञवः । जानुशब्दस्य ज्ञुरुछान्दसः । वरिमन् । उरुशब्दात् पृथ्वादित्वादिमनिच् । ' प्रियस्थिर° ' इत्यादिना वरादेशः । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । व्यत्ययेनाद्युदात्तः ॥

अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ४ ॥

अयम् । मित्रः । नमस्यः । सुऽशेवः । राजा । सुऽक्षत्रः । अजनिष्ट । वेधाः ।
तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ ४ ॥

[v]अयं पूर्वमन्त्रे प्रतिपादितः [v]मित्रः सूर्यः [v]नमस्यः सर्वैर्नमस्करणीयः [v]सुशेवः शोभनसुखः । सुखेन सेव्य इत्यर्थः । [v]राजा सर्वस्य जगतः प्रकाशप्रदानेन स्वामी [v]सुक्षत्रः । क्षत्रशब्देन बलमुच्यते । शोभनबलोपेतः [v]वेधाः सर्वस्य जगतो विधाता । एवंगुणोपेतः सूर्यः [v]अजनिष्ट प्रादुरभूत् । [v]तस्य एवंविधगुणोपेतस्य [v]यज्ञियस्य यज्ञार्हस्य सूर्यस्य [v]सुमतौ शोभनायां बुद्धौ [v]भद्रे कल्याणकारिणि [v]सौमनसे सौमनस्ये [v]अपि यजमानाः [v]वयं [v]स्याम भवेम ॥ नमस्यः । नमसि साधुः । ' तत्र साधुः ' इति यत् । तित्स्वरितः । अजनिष्ट । ' जनी प्रादुर्भावे ' इत्यस्य लुङि सिचि रूपम् । सौमनसे । सुमनस इदमित्यर्थे ' तस्येदम् ' इत्यण् । प्रत्ययस्वरः ॥

महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।
तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ॥ ५ ॥

महान् । आदित्यः । नमसा । उपऽसद्यः । यातयत्ऽजनः । गृणते । सुऽशेवः ।
तस्मै । एतत् । पन्यऽतमाय । जुष्टम् । अग्नौ । मित्राय । हविः । आ । जुहोत ॥ ५ ॥

१. ख-ग-घ-च-ण-न-भ-स-तदीयकर्म ।

योऽयम् vआदित्यः vमहान् अत एव vनमसा नमस्कारेण 1उपसद्य. सर्वैरपसदनीयः vयातयज्जनः । प्रातःप्रातः स्वस्वकर्मणि प्रवर्तनीया जना येनेति स तथोक्तः । vगृणते स्तोत्रं कुर्वते जनाय vसुशेवः च भवति vतस्मै vपन्यतमाय स्तुत्यतमाय vमित्राय आदित्याय vजुष्टं प्रीतिविषयम् vएतत् vहविः vअग्नौ vआ vजुहोत जुहुत ॥ यातयज्जनः । ' यती प्रयत्ने ' इत्यस्य ण्यन्तस्य शतरि रूपम् । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरे प्राप्ते मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । गृणते । ' गृ शब्दे ' । ' शतुरनुमः० ' इति विभक्तेरुदात्तत्वम् । पन्यतमाय । पनतेरण्यादित्वात् यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । जुष्टम् । ' नित्यं मन्त्रे ' इत्याद्युदात्तत्वम् ॥ ॥ ५ ॥

अभिप्लवषडहे दशरात्रे च सप्तदशैकविंशादिस्तोमे सति होत्रादिकशस्त्रेष्वावापस्थाने[1] पञ्चसप्तादि-संख्याका ऋच आवपनीयाः । तत्र मैत्रावरुणशस्त्रे ' मित्रस्य चर्षणीधृतः ' इत्याद्याश्चतस्र आवापार्थाः[2] । सूत्रितं च—' मित्रस्य चर्षणीधृत इति चतस्रो मैत्र्यः ' (आश्व. श्रौ. ७.५) इति ॥

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ६ ॥

मित्रस्य । चर्षणिऽधृतः । अवः । देवस्य । सानसि । द्युम्नम् । चित्रश्रवःऽतमम् ॥ ६ ॥

vचर्षणीधृतः मनुष्याणां वृष्टिप्रदानेन धारकस्य vमित्रस्य vदेवस्य संबन्धि vअवः अन्नं vसानसि सर्वैः[3] संभजनीयं vद्युम्नं तदीयं धनं च vचित्रश्रवस्तमम् अतिशयेन चायनीयकीर्तियुक्तम् ॥ सानसि । सनोतेः ' भानसिपर्णसि ' इत्यादिना असिच्प्रत्ययान्तत्वेन निपातनादुपधावृद्धिः । चित्रवादन्तोदात्तः । ' स्वमोः० ' इति स्वमोर्लुक् ॥

प्रातर्होमस्य कालात्यये मैत्रेष्टिः । तस्याम् ' अभि यो महिना ' इत्यनुवाक्या । सूत्रितं च—' अभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वान् ' (आश्व. श्रौ. ३. १२) इति ॥

अभि यो महिना दिवं मित्रो बभूव सप्रथाः । अभि श्रवोभिः पृथिवीम् ॥७॥

अभि । यः । महिना । दिवम् । मित्रः । बभूव । सऽप्रथाः । अभि । श्रवःऽभिः । पृथिवीम् ॥७॥

vयः vमित्रः vमहिना स्वकीयेन महिम्ना vदिवम् अन्तरिक्षम् vअभि vबभूव अभिभवति स मित्रः vसप्रथाः । प्रथः प्रसिद्धिः कीर्तिः । तत्सहितः vश्रवोभिः वृष्टिद्वारोत्पादितैरन्नैः vपृथिवीम् अपि अभिभवति । बहुन्नयुक्तां करोतीत्यर्थः ॥ सप्रथाः । ' प्रथ प्रख्याने ' । असुन् । ' वोपसर्जनस्य ' इति सहस्य सभावः ॥

मित्राय पञ्च येमिरे जना अभिष्टिशवसे । स देवान्विश्वान्बिभर्ति ॥ ८ ॥

मित्राय । पञ्च । येमिरे । जनाः । अभिष्टिऽशवसे । सः । देवान् । विश्वान् । बिभर्ति ॥ ८ ॥

vपञ्च vजना निषादपञ्चमाश्चत्वारो वर्णाः vअभिष्टिशवसे शत्रूणामभिगन्तृबलयुक्ताय vमित्राय vयेमिरे हवींष्युद्यच्छन्ति । vसः तादृशो मित्रः vविश्वान् सर्वान् vदेवान् vबिभर्ति । स्वस्वरूपतया

१. ल–°शस्त्रे याज्यापस्थाने । २. च–आवपनीया इत्यर्थः । ३. त–सर्वैरस्माभिः

धारयति ॥ अभिष्टिशवसे । इषेः ' मन्त्रे वृष° ' इत्यादिना क्सिन् । ' तादौ च निति° ' इत्यभेः अन्तोदात्तत्वम्[1] । शकन्ध्वादित्वात् पररूपत्वम् । बहुव्रीहौ पूर्वपदस्वरः ॥

मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे । इषं इष्टव्रता अकः ॥ ९ ॥

मित्रः । देवेषु । आयुषु । जनाय । वृक्तऽबर्हिषे । इषः । इष्टऽव्रताः । अकरित्यकः ॥ ९ ॥

^vमित्रः भगवानादित्यः ^vदेवेषु द्योतमानादिगुणयुक्तेषु ^vआयुषु मनुष्येषु मध्ये यो जनो वृक्तबर्हिः । वृक्तं लूनं बर्हिर्येन सः । बर्हिर्लवनासादनपूर्वं हविषो दाता ऋत्विगित्यर्थः । तस्मै ^vवृक्तबर्हिषे ^vजनाय ^vइष्टव्रताः । इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यन्ति ताः ^vइषः तादृशान्यन्नानि ^vअकः करोति । तस्मै ददातीत्यर्थः ॥ वृक्तबर्हिषे । ' ओव्रश्चू छेदने ' । कर्मणि निष्ठायां ' यस्य विभाषा ' इति इट्प्रतिषेधः । बहुव्रीहौ पूर्वपदस्वरः । अकः । करोतेर्लुङि च्लेः ' मन्त्रे घस° ' इत्यादिना लुक् । सिपो हल्ङ्यादिलोपः । निघातः ॥ ॥ ६ ॥

' इहेह वः ' इति सप्तर्चं सप्तमं सूक्तं वैश्वामित्रं जागतमृभुदेवताकम् । अन्त्यस्तृच इन्द्रदेवताकश्च । तथा चानुक्रान्तम्–' इहेह वः सप्तार्भवं जागतं तृचोऽन्त्य ऐन्द्रश्च ' इति । सूक्तविनियोगो लैङ्गिकः । आग्नेयाश्वत्सरः पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयाः । सूत्रितं च– ' इहेह व इति चत्वारः ' (आश्व. श्रौ. ७. ५) इति ॥

इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥ १ ॥

इहऽइह । वः । मनसा । बन्धुता । नरः । उशिजः । जग्मुः । अभि । तानि । वेदसा ।
याभिः । मायाभिः । प्रतिजूतिऽवर्पसः । सौधन्वनाः । यज्ञियम् । भागम् । आनश ॥ १ ॥

हे ऋभवः ^vवः युष्माकं ^vबन्धुता । बध्नन्ति फलेन संयोजयन्तीति बन्धवः कर्माणि । तेषां समूहः[2] बन्धुता । ^vइहेह सर्वत्र[3] ^vमनसा सर्वैर्ज्ञायते । ^vनरः हे मनुष्या ऋभवः ^vउशिजः यज्ञभागं कामयमाना भवन्तः ^vवेदसा यज्ञभागप्रापककर्मविषयज्ञानेन ^vतानि तादृशानि कर्माणि ^vअभि ^vजग्मुः प्राप्नुवन्ति । कानि तानि । ^vमायाभिः । मीयन्ते ज्ञायन्त इति मायाः कर्माणि । ^vयाभिः मायाभिर्यैः कर्मभिः ^vप्रतिजूतिवर्पसः प्रतिपक्षाभिभवनशीलतेजोयुक्ताः ^vसौधन्वनाः । सुधन्वा नामाङ्गिरसः पुत्रः कश्चिदृषिः । तस्य पुत्राः सौधन्वनाः । ते च त्रय ऋभुर्विभ्वा वाज इति । एतन्नामका यूयं ^vयज्ञियं यज्ञार्हं ^vभागं सोमपानादिलक्षणम् ^vआनश प्राप्ताः[4] स्थ । तथा च मन्त्रवर्णः–' ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ' (ऋ. सं. १. १६१. ६) इति । अयमर्थो ब्राह्मणेऽपि ' ऋभवो वै देवेषु तपसा सोमपीथमभ्यजयन् ' (ऐ. ब्रा. ३. ३०) इत्यत्रोपाख्यानपूर्वकं स्पष्टमभिहितः ।

---

१. त–न–उदात्तत्वम् । २. ख–ग–घ–च–ण–त–न–भ–ल–स–भावः । ३. ख–ग–घ–च–ण–न–भ–स–सर्वम् । ४. ख–घ–त–न–भ–व्याप्ताः ।

यद्वा । नरः कर्मणां[1] नेतारो हे ऋभव उशिजः कामयमाना वेदसा हविर्लक्षणेन धनेन युक्ताः स्तोतारो वो युष्माकं तानि चमसतक्षणादीनि[2] कर्माणि बन्धुता बन्धुतया सख्येन मनसा जग्मुः अभिगच्छन्ति । कानि इत्याशङ्कायामाह। यैः चमसतक्षणादिभिः[3] कर्मभिर्यज्ञार्हं भागं यूयमामुत तान्यभिगच्छन्ति। युष्माकं बुद्धिनैपुणानि चिन्तयन्तीत्यर्थः ॥ इहेह । 'नित्यवीप्सयोः' इति द्विर्वचनम्। परस्यात्रेडितत्वात् अनुदात्तत्वे पूर्वपदस्वरः । बन्धुता । 'बन्ध बन्धने'। 'शॄस्वृस्निहि०' इत्यादिना कर्तरि उप्रत्ययः । समूह इत्यर्थे 'ग्रामजनबन्धुसहायेभ्यस्तल्' (पा. सू. ४.२.४२) इति तल्। लित्स्वरः[4] ॥

याभिः शचीभिश्चमसाँ अपिंशत ययां धिया गामरिंणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेनं देवत्वमृभवः समानश ॥ २ ॥

याभिः । शचीभिः । चमसान् । अपिंशत । ययां । धिया । गाम् । अरिंणीत । चर्मणः ।
येनं । हरी इतिं । मनसा । निःऽअतक्षत । तेनं । देवऽत्वम् । ऋभवः । सम् । आनश ॥ २ ॥

हे[5] ऋभवः[6] याभिः शचीभिः शक्तिभिः चमसान् चतुरः अपिंशत विभक्तवन्तः स्थ । यया धिया प्रज्ञया गां मृताम्[7] अरिणीत चर्मणः चर्मणा[8] योजनात् प्रापितवन्तः स्थ । येन मनसा प्रज्ञानेन हरी एतन्नामकाविन्द्रस्याश्वौ निरतक्षत नितरामकुरुत । तथा च[9] मन्त्रवर्णः–'य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी' (ऋ. सं. १.२०.२) इति[10]। तेन सर्वेणानेन कर्मणा देवत्वं यज्ञभागार्हत्वलक्षणं[10] देवभावं समानश सम्यक् प्राप्ताः स्थ ॥ अपिंशत । 'पिश अवयवे'। तुदादिः। तस्य लङि मध्यमे रूपम् । यद्वृत्तयोगादनिघातः । अरिणीत । 'री गतिरेषणयोः'। क्र्यादिः । तस्य लङि रूपम् । अत्रापि पूर्ववदनिघातः । निरतक्षत । 'तक्षू त्वक्षू तनूकरणे'। लङि रूपम् । पूर्ववत् अनिघाते 'तिङि चोदात्तवति' इति गतेर्निघातः । अडुदात्तः । आनश । अभ्योतेर्लिटि रूपम् । निघातः॥

इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥ ३ ॥

इन्द्रस्य । सख्यम् । ऋभवः । सम् । आनशुः । मनोः । नपातः । अपसः । दधन्विरे ।
सौधन्वनासः । अमृतऽत्वम् । आ । ईरिरे । विष्ट्वी । शमीभिः । सुऽकृतः । सुऽकृत्यया ॥३॥

मनोर्नपातः मनुष्यस्याङ्गिरसः[11] पुत्राः अपसः यागादिलक्षणकर्मवन्तः ऋभवः इन्द्रस्य सख्यं समानख्यानत्वं[12] समानशुः सम्यक् प्राप्नुवन् । तथेन्द्रस्य सख्यं प्राप्तास्त ऋभवः दधन्विरे । पूर्वं

१. ख-ग-ण-त-न-भ-ल–कर्माणि; च-स–कर्माणि । २. ख-ग-च-ण-त-न-भ-स–°भक्षणादीनि । ३. ख-ग-च-ण-त-न-भ-स–°भक्षणादिभिः । ४. ल–लितीति प्रत्ययस्वरः । पूर्वस्योदात्तत्वम् । ५. त–'हे ऋभवः' नास्ति । ६. त–मृतां सर्ताम् । ७. त–'चर्मणा' नास्ति । ८. ख-ग-च-ण-न-भ-ल-स–अयम् । ९. त-ल–इति । ऋभवः । उरु प्रभूतं भान्तीति ऋतेन सत्येन भान्तीति वा तादृशा हे ऋभवः । १०. ख-ग-घ-च-ण-भ–यज्ञभागार्हलक्षणम्; ल–यज्ञलक्षणम् । ११. ल–मनुष्यस्याङ्गिरसस्य । १२. ख-ग-घ-च-ण-फ-भ-स–समानख्यानत्वं प्राप्ताः ।

मनुष्यत्वेन मरणयोग्या अपीदानीमिन्द्रस्य सख्येन प्राणान् धारयन्ति । तथा च[1] मन्त्रः–' अधारयन्त वह्नयः ' (ऋ. सं. १. २०. ८) इति । [v]सौधन्वनाः सुधन्वनामकस्यर्षेः पुत्रा ऋभवः [v]सुकृतः शोभनकर्माणः सन्तः प्रभूतैः [v]शमीभिः देवत्वप्राप्तिप्रतिबन्धनिवारणहेतुभिः कर्मभिः [v]सुकृत्यया शोभनेन कर्मणा च [v]विष्टी व्याप्य [v]अमृतत्वमेरिरे देवत्वं प्रापुः । तथा च मन्त्रान्तरमाम्नायते— ' मर्तासः सन्तो अमृतत्वमानशुः ' (ऋ. सं. १. ११०. ४) इति ॥ नपातः । ' नञ्राप्नपात्० ' इत्यादिना नञः प्रकृतिभावः । दधन्विरे । धविर्गत्यर्थः । व्यत्ययेनात्मनेपदम् । लिटि रूपम् । ईरिरे । ' ईर गतौ ' । मन्त्रत्वान् आम् न भवति । निघातः । सुकृत्यया । करोतेर्भावे ' कृञः श च ' इति क्यप् । प्रत्ययस्य व्यत्ययेनान्तोदात्तत्वम् । समासे कृदुत्तरस्वरः ॥

इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।
न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ॥ ४ ॥

इन्द्रेण । याथ । सऽरथम् । सुते । सचा । अथो इति । वशानाम् । भवथ । सह । श्रिया ।
न । वः । प्रतिऽमै । सुऽकृतानि । वाघतः । सौधन्वनाः । ऋभवः । वीर्याणि । च ॥ ४ ॥

हे ऋभवो यूयम् [v]इन्द्रेण [v]सचा सह [v]सरथं समानमेकं रथमारुह्य [v]सुते अभिषुतसोमवति यज्ञे [v]याथ गच्छथ । [v]अथो अनन्तरमिन्द्रेण सह एकरथमारूढा यूयं [v]वशानाम् । उश्यते काम्यते यजमानेन स्वर्गादिलक्षणं[2] फलम्[3] एभिरिति वशाः मनुष्याः । तेषां [v]श्रिया स्तुतिहविरादिरूपया [v]सह [v]भवथ । हे [v]सौधन्वनाः सुधन्वनः पुत्राः [v]वाघतः । अमृतत्वादिलक्षणफलस्य वोढारो मेधाविनो वा इति यास्कः । तादृशा हे [v]ऋभवः [v]वः युष्माकं [v]सुकृतानि देवत्वस्य प्रापकाणि शोभनानि कर्माणि [v]न [v]प्रतिमै । प्रतिमातुमियत्तया परिच्छेत्तुं न केनापि शक्यानि । तथा [v]वीर्याणि युष्माकं सामर्थ्यानि [v]च नैव प्रतिमातुं शक्यानि ॥ वशानाम् । ' वश कान्तौ ' । ' वशिरण्योरुपसंख्यानम् ' इति करणे अप्प्रत्ययः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वशाशब्दो वन्ध्यावचनश्चेत् अन्तोदात्तः[4] भवति । ' वशा मेषा अवसृष्टास आहुताः ' (ऋ. सं. १०. ९१. १४) इति । वः । युष्मच्छब्दस्य षष्ठीबहुवचने वसादेशः । निघातः । प्रतिमै । ' माङ् माने ' । विच् । प्रतिमाः प्रतिमानम् । तस्य चतुर्थ्येकवचने आतो लोपाभावश्छान्दसः[5] । एकादेशस्वरः ॥

आभिप्लविके पञ्चमेऽहनि वैश्वदेवशस्त्रे ' इन्द्र ऋभुभिः ' इत्यार्भवस्तृचः । सूत्रितं च–' घृतवती भुवनानामभिश्रियेन्द्र ऋभुभिर्वाजवद्भिरिति तृची ' (आश्व. श्रौ. ७. ७.) इति । आद्या तृतीयसवने होतुः प्रस्थितयाज्या । सूत्रितं च–' इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितमिन्द्रावरुणा सुतपाविमं सुतम् ' (आश्व. श्रौ. ५.५) इति ॥

---

१. ग-च-भ-ल-स–' च ' नास्ति । २. ख-ग-च-भ–स्वर्गादिलक्षणफलम् । ३. ख-ग-च-ण-न-भ-स–इत्यन्तोदात्तः । ४. ख-ग-ण-न-भ-ल-स–लोपश्छान्दसः । ५. ख-ग-च-ण-न-भ-ल-स–आद्यः ।

इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥ ५ ॥

इन्द्र । ऋभुऽभिः । वाजवत्ऽभिः । सम्ऽउक्षितम् । सुतम् । सोमम् । आ । वृषस्व । गभस्त्योः ।
धिया । इषितः । मघऽवन् । दाशुषः । गृहे । सौधन्वनेभिः । सह । मत्स्व । नृऽभिः ॥५॥

हे [v]इन्द्र [v]वाजवद्भिः । वाजो नाम ऋभूणां भ्राता । यद्वा । वाजोऽन्नम् । तत्सहितैः [v]ऋभुभिः सहितस्त्वं [v]समुक्षितं सम्यगद्भिः[1] सिक्तं[1] ग्रावभिः [v]सुतं [v]सोमं [v]गभस्त्योः । बप्सत्यदन्त्याभ्यामन्नमिति गृह्णन्ति पदार्थानाभ्यामिति वा गभस्ती बाहू । तयोर्बाह्वोः [v]आ [v]वृषस्व आक्षारय[2] । ग्रहमुभाभ्यां बाहुभ्यां गृहीत्वा सोमं पिबेत्यर्थः । हे [v]मघवन्[3] इन्द्र [v]धिया स्तोत्ररूपेण कर्मणा [v]इषितः प्रेरितस्त्वं [v]दाशुषः हविर्दत्तवतो यजमानस्य [v]गृहे [v]सौधन्वनेभिः सुधन्वनः पुत्रैः [v]नृभिः मनुष्यैर्ऋभुभिः [v]सह साकं [v]मत्स्व सोमपानेन हृष्टो भव ॥ समुक्षितम् । ' उक्ष सेचने ' । कर्मणि क्तः । ' गतिरनन्तरः ' इति गतेः स्वरः । गभस्त्योः । ' भस भर्त्सनदीप्त्योः ' इत्यस्मात् ' भसेर्गट्च ' इति सूत्रेण तिप्रत्ययो धातोः गडागमश्च । यद्वा । गृह्णातेः पृषोदरादित्वादेवं नेयम् । मत्स्व । मदि स्तुत्यादिषु । लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । निघातः ॥

इन्द्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥ ६ ॥

इन्द्र । ऋभुऽमान् । वाजऽवान् । मत्स्व । इह । नः । अस्मिन् । सवने । शच्या । पुरुऽस्तुत ।
इमानि । तुभ्यम् । स्वसराणि । येमिरे । व्रता । देवानाम् । मनुषः । च । धर्मऽभिः ॥ ६ ॥

[v]पुरुष्टुत बहुभिः स्तुत हे [v]इन्द्र [v]ऋभुमान् ऋभुणा तद्वान् [v]वाजवान् वाजेन ऋभोर्भ्रात्रा युक्तः [v]शच्या इन्द्राण्या कर्मणा वा सहितः सन् [v]नः अस्माकम् [v]इह कर्मणि [v]अस्मिन् तृतीयसवने [v]मत्स्व हृष्टो भव । हे इन्द्र [v]तुभ्यं त्वदर्थम् [v]इमानि [v]स्वसराणि अहानि [v]येमिरे । तव सोमपानार्थं त्रिषु सवनेषु नियतान्यासते । किंच [v]देवानाम् अग्न्यादीनां [v]व्रता व्रतानि कर्माणि [v]च [v]मनुषः मनुष्यस्य [v]धर्मभिः कर्मभिः साकं त्वदर्थं नियतान्यासते ॥

इन्द्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।
शतं केतेभिरिषिरेभिरायवे सहस्रिणीथो अध्वरस्य होमनि ॥ ७ ॥

इन्द्र । ऋभुऽभिः । वाजिऽभिः । वाजयन् । इह । स्तोमम् । जरितुः । उप । याहि । यज्ञियम् ।
शतम् । केतेभिः । इषिरेभिः । आयवे । सहस्रिऽनीथः । अध्वरस्य । होमनि ॥ ७ ॥

---

१. ख-ग-घ-च-ण-फ-भ-सम्यगभिषिक्तम् । २. ग-च-प्रक्षारय । ३ त-मघवन् धनवन्; न-ल-स- मघवन् हे ।

हे [v]इन्द्र [v]वाजिभिः[१] वाजयुक्तैः [v]ऋभुभिः सहितस्त्वं [v]वाजयन् स्तोतुर्वाजमन्नं कुर्वाणः [v]इह यज्ञे [v]यज्ञियं यज्ञार्हं [v]जरितुः स्तोतुः[२] [v]स्तोमं स्तोत्रम् [v]उप [v]याहि आगच्छ। पुनः किंविशिष्टः। [v]केतेभिः। केत्यते ज्ञायते सर्वैमेभिरिति केताः प्राज्ञाः[३] मरुतः। तैः [v]शतं शतसंख्याकैः [v]दृषिरेभिः दृषिरैर्गमनकुशलैः अश्वैः सहितः [v]आयवे मनुष्याय यजमानाय [v]सहस्रनीथः बहुप्रकारनयनोपेतः [v]अध्वरस्य। न विद्यते ध्वरो हिंसा यस्य तादृशस्य सोमस्य [v]होमनि होमे आगच्छेति शेषः॥ वाजयन्। वाजं करोतीति णिच्। 'णाविष्ठवत्[०]' इतीष्ठवद्भावात् 'तुरिष्ठेमेयःसु' इति टिलोपः। केतेभिः। 'कित ज्ञाने'। घञ्। ञित्त्वादाद्युदात्तः॥ ॥ ७ ॥

'उषो वाजेन' इति सप्तर्चमष्टमं सूक्तं वैश्वामित्रमुषोदेवताकम्। तथा चानुक्रान्तम्–'उष उषस्यम्' इति। प्रातरनुवाके उषस्ये क्रतावाश्विनशस्त्रे च त्रैष्टुभे छन्दस्येतस्य सूक्तस्य विनियोगः। सूत्रितं च– 'उषो वाजेनेदमु त्यत्' (आश्व. श्रौ. ४. १४) इति॥

उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि।
पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे॥ १॥

उषः। वाजेन। वाजिनि। प्रऽचेताः। स्तोमम्। जुषस्व। गृणतः। मघोनि।
पुराणी। देवि। युवतिः। पुरम्ऽधिः। अनु। व्रतम्। चरसि। विश्वऽवारे॥ १॥

[v]वाजेन [v]वाजिनि अन्नेनान्नवति। तथा च मन्त्रः–'सं वाजैर्वाजिनीवति' (ऋ. सं. १. ४८. १६) इति। [v]मघोनि धनवति हे [v]उषः [v]प्रचेताः प्रकृष्टज्ञानवती सती[४] त्वं[५] [v]गृणतः तव स्तोत्रं कुर्वतः[६] स्तोतुः [v]स्तोमं स्तोत्रं [v]जुषस्व सेवस्व[७]। यद्वा। वाजेन हविर्लक्षणेनान्नेन सह स्तोमं जुषस्वेति संबन्धः। [v]विश्ववारे विश्वैः सर्वैर्वरणीये हे उषः [v]देवि [v]पुराणी पुरातनी। [v]युवतिः[७] इत्युपमा। तद्वच्छोभमाना। 'सुसंकाशा मातृमृष्टेव योषा' (ऋ. सं. १. १२३. ११) इतिवत्। [v]पुरंधिः। पुरु बहु धीः स्तोत्रलक्षणं कर्म यस्याः सा। बहुस्तोत्रवती। 'पुरंधिर्बहुधीः' इति यास्कः। पुरंधिः शोभमाना वा। एवंविधगुणोपेता त्वम् [v]अनु [v]व्रतं यज्ञकर्माभिलक्ष्य [v]चरसि यष्टव्यतया वर्तसे॥ मघोनि। मघशब्दान् मतुबर्थे 'छन्दसीवनिपौ[०]' इति वनिप्। स्त्रियाम् 'ऋन्नेभ्यो ङीप्'। 'श्वयुवमघोनामतद्धिते' इति संप्रसारणे कृते गुणः। संबुद्धौ 'अम्बार्थनद्योर्ह्रस्वः'। निघातः। पुराणी। पुराणशब्दः 'पुराणप्रोक्तेषु[०]' इत्यन्तोदात्तत्वेन निपातितः। 'टिड्ढाणञ्[०]' इति ङीप्। 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्यन्तोदात्तत्वम्। पुरंधिः। पृषोदरादित्वात् उकारस्य अमादेशः ईकारस्य ह्रस्वश्च। 'आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्' इत्याद्युदात्तत्वम्॥

१. ख-ग-घ-च-ण-फ-भ–वाजिभिः अन्नवद्भिः। २. ख-ग-च-न-भ-स–'स्तोतुः' नास्ति। ३. घ-च-ण-ल–प्रज्ञाः। ४. ग-च-फ–त्वम्; ण-न-ल-स–सती। ५. ल–कुर्वाणस्य। ६. ख-ग-घ-च-ण-न-भ-स–'सेवस्व' नास्ति। ७. ख-ग-घ-च-ण-फ-भ–युवतिस्तरुणी।

उषो देव्यमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयन्ती ।
आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णा पृथुपाजसो ये ॥ २ ॥

उषः । देवि । अमर्त्या । वि । भाहि । चन्द्रऽरथा । सूनृताः । ईरयन्ती ।
आ । त्वा । वहन्तु । सुऽयमासः । अश्वाः । हिरण्यऽवर्णाम् । पृथुऽपाजसः । ये ॥ २ ॥

हे [v]उषो [v]देवि [v]अमर्त्या मरणधर्मरहिता [v]चन्द्ररथा सुवर्णमयरथोपेता [v]सूनृताः प्रियसत्यरूपा वाचः [v]ईरयन्ती उच्चारयन्ती । तथा च मन्त्रवर्णः–' सुन्नावरी सूनृता ईरयन्ती ' (ऋ. सं. १. ११३. १२) इति । तादृशी त्वं [v]वि [v]भाहि सूर्यकिरणसंबन्धात् विशेषेण दीप्यस्व[1] । [v]पृथुपाजसः प्रभूतबलयुक्ता अरुणवर्णाः [v]ये [v]अश्वाः विद्यन्ते [v]सुयमासः सुष्ठु नियन्तुं शक्या रथे योजितास्तेऽश्वाः [v]हिरण्यवर्णां [v]त्वा त्वाम् [v]आ [v]वहन्तु ॥ सुयमासः । यमेरकृच्छ्रार्थे खल् । लित्स्वरः ॥

उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः ।
समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व ॥ ३ ॥

उषः । प्रतीची । भुवनानि । विश्वा । ऊर्ध्वा । तिष्ठसि । अमृतस्य । केतुः ।
समानम् । अर्थम् । चरणीयमाना । चक्रम्ऽइव । नव्यसि । आ । ववृत्स्व ॥ ३ ॥

हे [v]उषः देवि [v]विश्वा सर्वाणि [v]भुवनानि [v]प्रतीची । प्रति आभिमुख्येनाञ्चति प्राप्नोतीति प्रतीची । [v]अमृतस्य मरणधर्मरहितस्य सूर्यस्य [v]केतुः प्रज्ञापयित्री त्वम् [v]ऊर्ध्वा नभस्युन्नता [v]तिष्ठसि । [v]नव्यसि पुनःपुनर्जायमानतया नवतरे हे उषो देवि [v]अर्थम्[2] । अर्यते गम्यतेऽस्मिन्नित्यर्थो मार्गः । [v]समानम् एकं मार्गमुदयात् प्राचीनकाललक्षणं [v]चरणीयमाना चरितुमिच्छन्ती त्वम् [v]आ [v]ववृत्स्व पुनस्तस्मिन् मार्गे आवृत्ता भव । तत्र दृष्टान्तः । [v]चक्रमिव । यथा नभसि चरितुः सूर्यस्य रथाङ्गं पुनःपुनरावर्तते तद्वत् ॥ प्रतीची । प्रतिपूर्वादञ्चतेः क्विन् । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' अचः ' इत्यकारलोपे ' चौ ' इति दीर्घः[3] । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । केतुः । ' चायृ पूजानिशामनयोः ' इत्यस्मात् ' चायः की च ' इति तुः । की इत्यादेशः । आर्धधातुकलक्षणो गुणः । अर्थम् । अर्तेस्थन्प्रत्ययः । नव्यसि । नवशब्दात् ईयसुनि ङीपि रूपम् । ईकारलोपश्छान्दसः । ववृत्स्व । ' वृतु वर्तने ' । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः ॥

१. घ-च-ण-त-न-भ-ल-स–दीप्यसे । २. घ-च-ण-न-फ-भ–त्वं चक्रमिव चरणीयमाना समानमर्थं उत्तमं मार्गम् आववृत्स्व आवर्तनं कुरुष्व । अर्थम् । अर्थ्यते गम्यते मार्गोऽस्मिन्नित्यर्थः; ल-स–अर्थम् । अर्थ्यते गम्यते मार्गोऽस्मिन्नित्यर्थः ।

अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी ।
स्वर्जनन्ती सुभगा सुदंसा आन्तादिवः पप्रथे आ पृथिव्याः ॥ ४ ॥

अव । स्यूमऽइव । चिन्वती । मघोनी । उषाः । याति । स्वसरस्य । पत्नी ।
स्वः । जनन्ती । सुऽभगा । सुऽदंसाः । आ । अन्तात् । दिवः । पप्रथे । आ । पृथिव्याः ॥ ४ ॥

येयम् उषाः स्यूमेव वस्त्रमिव विस्तृतं तमः अव चिन्वती अवचयमपक्षयं प्रापयन्ती मघोनी धनवती स्वसरस्य । सुष्ठ्वस्यति क्षिपति तम इति स्वसरः सूर्यो वासरो वा । तस्य पत्नी सती याति गच्छति । स्वः स्वकीयं तेजः जनन्ती जनयन्ती सुभगा सुधना[१] सौभाग्ययुक्ता[२] वा सुदंसाः शोभनाग्निहोत्रकर्मा[३] सेयमुषाः[४] दिवः द्युलोकस्य आ अन्तात् पृथिव्याः च आ अन्तात् आवसानात्[५] पप्रथे प्रथते प्रकाशते इत्यर्थः ॥ स्यूमेव । ' षिवु तन्तुसंताने ' । ' अविषिविभ्यः कित् ' इति मन्प्रत्ययः । ' छ्वोः शूडनुनासिके च ' इति ऊठ् । यणादेशः । ' सुपां सुलुक्० ' इति सोर्लुक् । नित्त्वादाद्युदात्तः । चिन्वती । ' शतुरनुमः० ' इति ङीप उदात्तत्वम् । जनन्ती । ' जन जनने ' इत्यस्य ण्यन्तस्य शतरि रूपम् । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वेन णिलोपः ॥

अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिम् ।
ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक् ॥ ५ ॥

अच्छ । वः । देवीम् । उषसम् । विऽभातीम् । प्र । वः । भरध्वम् । नमसा । सुऽवृक्तिम् ।
ऊर्ध्वम् । मधुधा । दिवि । पाजः । अश्रेत् । प्र । रोचना । रुरुचे । रण्वऽसंदृक् ॥ ५ ॥

हे स्तोतारः वः युष्मान् अच्छ अभिलक्ष्य विभातीं शोभमानाम् उषसं[४] देवीं[४] प्रति वः युष्माकं संबन्धिना नमसा नमस्कारेण सह सुवृक्तिं शोभनां[५] स्तुतिं प्र भरध्वं यूयं कुरुत । मधुधा । मधुराणि स्तुतिलक्षणानि वाक्यानि दधातीति । मधु[६] सोमः[७] । तं धारयतीति[८] वा । यद्वा । मधुधादित्यधात्री । यद्वा । अवग्रहाभावादव्युत्पन्नावयवम् अखण्डमिदं[९] पदम् उपोनाम । सेयमुषाः दिवि नभसि ऊर्ध्वं पाजः ऊर्ध्वाभिमुखं पाजस्तेजः अश्रेत् श्रयति[१०] । तथा[११] रोचना रोचनशीला रण्वसंदृक् रमणीयदर्शनोषाः प्र रुरुचे प्रकर्षेण दीप्यते । यद्वा । रोचना लोकान् प्र रुरुचे प्रकर्षेण स्वतेजसा दीपयति । तथा च मन्त्रवर्णः–' व्युच्छन्ती हि रश्मिभिर्विश्वमाभासि रोचनम् ' (ऋ. सं. १. ४९. ४) इति ॥ रण्वसंदृक् । रवेर्गत्यर्थस्य अचप्रत्ययः । इदित्त्वात् नुमागमः । संपूर्वात् दृशेः क्विन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

---

१. च-फ-सुष्ठु सौभाग्ययुक्ता । २. च-फ-शोभनाग्निहोत्रकर्मोपेतेयमुषाः । ३. ख-ग-घ-च-ण-त-न-स-अवसानात् । ४. त-उषोदेवीम् । ५. ख-ग-त-न-फ-भ-स-शोभमानाम्; च-सुष्ठु शोभमानाम् । ६. त-मधुः । ७. ख-ग-घ-च-ण-त-न-भ-स-स्तोमः । ८. ग-च-भ-धारयन्तीति । ९. च-फ-सदिदम् । १०. च-आश्रयति । ११. ख-ग-च-यथा च; घ-ण-भ-तथा च ।

ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात् ।
आयतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः ॥ ६ ॥

ऋतऽवरी । दिवः । अर्कैः । अबोधि । आ । रेवती । रोदसी इति । चित्रम् । अस्थात् ।
आऽयतीम् । अग्ने । उषसम् । विऽभातीम् । वामम् । एषि । द्रविणम् । भिक्षमाणः ॥ ६ ॥

[v]ऋतावरी सत्यवती येयमुषाः [v]दिवः द्युलोकात् [v]अर्कैः तेजोभिः [v]अबोधि सर्वैर्ज्ञायते । ततः [v]रेवती धनवती येयं [v]रोदसी द्यावापृथिव्यौ [v]चित्रं नानाविधरूपयुक्तं यथा भवति तथा [v]आ [v]अस्थात् सर्वतो व्याप्य तिष्ठति हे [v]अग्ने [v]आयतीं त्वदभिमुखमागच्छन्तीं [v]विभातीं भासमानाम् [v]उषसम् उषोदेवीं [v]भिक्षमाणः हवींषि याचमानस्त्वं [v]वामं वननीयं [v]द्रविणम् अग्निहोत्रादिलक्षणं धनम् [v]एषि प्राप्नोषि ॥ अबोधि । 'बुध अवगमने' । कर्मणि लुङि 'चिण् भावकर्मणोः' इति चिण् । 'चिणो लुक्' । रेवती । रयिशब्दात् मतुप् । 'छन्दसीरः' इति वत्वम् । 'रयेर्मतौ बहुलम्' इति संप्रसारणपरपूर्वत्वे[1] । गुणः । 'उगितश्च' इति ङीप् । 'रेशब्दाच्चोपसंख्यानम्' इति मतुप उदात्तत्वम् ॥

ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥ ७ ॥

ऋतस्य । बुध्ने । उषसाम् । इषण्यन् । वृषा । मही इति । रोदसी इति । आ । विवेश ।
मही । मित्रस्य । वरुणस्य । माया । चन्द्राऽइव । भानुम् । वि । दधे । पुरुऽत्रा ॥ ७ ॥

[v]वृषा वृष्टिद्वारा अपां[2] प्रेरक आदित्यः [v]ऋतस्य अग्निहोत्रादिकर्मकरणे सत्यभूतस्याह्नः [v]बुध्ने मूले [v]उषसामिषण्यन् प्रेरणं कुर्वन् [v]मही महत्यौ [v]रोदसी द्यावापृथिव्यौ [v]आ [v]विवेश स्वतेजोभिः[3] सर्वतः प्रविष्टवान् । यद्वा । वृषा वर्षितेषण्यन् सर्वतो गच्छन्नुषसां संबन्धी रश्मिसमूहो रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयम् । तत उषाः [v]मही महती[4] [v]मित्रस्य [v]वरुणस्य मित्रावरुणयोः [v]माया[4] प्रभारूपा सती [v]चन्द्रेव सुवर्णानीव [v]भानुं स्वप्रभां [v]पुरुत्रा बहुषु देशेषु [v]वि [v]दधे विदधाति सर्वत्र प्रसारयति॥ मही । अल्लोपश्छान्दसः । पुरुत्रा । 'देवमनुष्य०' इत्यादिना अधिकरणे त्राप्रत्ययः ॥ ॥ ८ ॥

'इमा उ वाम्' इत्यष्टादशर्चं नवमं सूक्तम् । अत्रेयमनुक्रणिका–'इमा उ द्वयूनैन्द्रावरुणबार्हस्पत्यपौष्णसावित्रसौम्यमैत्रावरुणास्तृचा अन्त्यो जमदग्न्यार्षो वा चतुर्ध्याद्या गायत्र्यः' इति । कृत्स्नस्य विश्वामित्र ऋषिरन्त्यस्य तृचस्य जमदग्निर्वा । आद्यास्त्रिष्टुभः शिष्टाः पञ्चदश गायत्र्यः । प्रथमस्येन्द्रावरुणौ देवता द्वितीयस्य बृहस्पतिस्तृतीयस्य पूषा चतुर्थस्य सविता पञ्चमस्य सोमः षष्ठस्य

१. त–संप्रसारणं पररूपत्वे; न–संप्रसारणं परपूर्वत्वम् । २. ख-ग-च-ण-भ-स–'अपां' नास्ति । ३. ख-ग-घ-च-ण-न-भ-स–'स्वतेजोभिः' नास्ति । ४. ख-ग-घ-च-ण-फ-भ–मित्रस्य वरुणस्य माया महती मित्रावरुणयोः या माया ।

मित्रावरुणौ । आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ सत्यां स्वस्वशस्त्रे होत्रका अन्त्यमूक्तमवशेष्य स्तोमाभिशंसनार्थं[1] तृचादिसंख्या ऋच आवपेयुः । तत्र मैत्रावरुणस्यावापार्थमाद्यस्तृचः । सूत्रितं च—' इमा उ वां भृमयो मन्यमाना इति तिस्रः ' (आश्व. श्रौ. ७. ९) इति ॥

इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क[2]त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥ १ ॥

इमाः । ऊँ इति । वाम् । भृमयः । मन्यमानाः । युवाऽवते । न । तुज्याः । अभूवन् ।
क । त्यत् । इन्द्रावरुणा । यशः । वाम् । येन । स्म । सिनम् । भरथः । सखिऽभ्यः ॥ १ ॥

हे [v]इन्द्रावरुणा[2] इन्द्रावरुणौ [v]वां युवयोः संबन्धिन्यः [v]मन्यमानाः बलिभिः शत्रुभिः अभिमन्यमानाः[3] अत एव [v]भृमयः भ्रमणशीलाः [v]इमाः प्रजाः । [v]उ[4] पूरणः[4] । [v]युवावते । तृतीयार्थे चतुर्थी । यौवनवता बलिना शत्रुणा [v]तुज्याः हिंस्याः [v]न [v]अभूवन् न भवन्तु । अपि[5] च[5] [v]वां युवयोः [v]त्यत् तादृशं[6] [v]यशः [v]क कुत्रास्ते । [v]येन यशसा [v]सखिभ्यः अस्मभ्यं [v]सिनम् अन्नं [v]भरथः [v]स्म प्रदातुं संपादयथः । तत् क्वास्ति[7] इत्यन्वयः[8] । यद्वा । हे इन्द्रावरुणौ वां युवयोः संबन्धिन्य इमा अस्माभिः क्रियमाणा भृमयो युवां प्राप्तुं भ्रमणशीलाः[9] मन्यमानाः । मन्यतिरर्चतिकर्मा । युवाम् अर्चन्त्यस्ताः[10] स्तुतयो युवावते युवाभ्यां सदृशायान्यस्मै देवाय न तुज्याः । तुजतिर्दानकर्मार्थः । प्रदेया मा भूवन् । शिष्टं समानम् ॥ भृमयः । ' भ्रमु अनवस्थाने ' । भ्रमेः ' संप्रसारणं च ' इति इन्प्रत्ययः संप्रसारणं च । व्यत्ययेनान्तोदात्तत्वम् । युवावते । ' युष्मदस्मद्भगां छन्दसि सादृश्य उपसंख्यानम् ' इति वतुप् । अविभक्तावपि युवादेशश्छान्दसः । तुज्याः । ' तुज[11] हिंसादाननिकेतनेषु ' । ' अच्यादयश्च ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । सिनम् । ' षिञ् बन्धने ' । ' इण्भीकापाशल्यतिभ्यो नक् ' इति नक् । व्यत्ययेनाद्युदात्तत्वम् ॥

अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति ।
सजोषाविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे ॥ २ ॥

अयम् । ऊँ इति । वाम् । पुरुऽतमः । रयिऽयन् । शश्वत्ऽतमम् । अवसे । जोहवीति ।
सऽजोषौ । इन्द्रावरुणा । मरुत्ऽभिः । दिवा । पृथिव्या । शृणुतम् । हवम् । मे ॥ २ ॥

हे [v]इन्द्रावरुणा[12] इन्द्रावरुणौ [v]रयीयन् रयिमात्मन इच्छन् [v]अयमु[13] [v]पुरुतमः वैदिककर्मप्रवृत्ततयातिशयेन पुरुर्महानयं यजमानः [v]अवसे रक्षणायान्नाय वा [v]वां युवां [v]शश्वत्तमं सर्वदा [v]जोहवीति

---

१. ख-ग-च-ण-स्तोमातिशंसनार्थम् ; त-न-भ-स-स्तोमातिशंसनार्थाः । २. न-ल-स-' इन्द्रावरुणा ' नास्ति । ३. ण-अभिनन्द्यमानाः । ४. ख-ग-घ-च-ण-न-भ-ल-स-' उ पूरणः ' नास्ति । ५. ख-ग-घ-च-ण-न-भ-स-' अपि च ' नास्ति । ६. ख-ग-च-ण-एतादृशम् । ७. न-ल-स-क्वास्ते । ८. घ-इत्यन्वयः । उ पूरणः । ९. ख-ग-च-ण-फ-भ-स-भ्रमणशीलाः । १०. त-अर्चन्त्य एताः । ११. त-तुजि । १२. न-ल-स-' इन्द्रावरुणा ' नास्ति । १३. त-स-अयम् ।

भृशमाह्वयति । [v]मरुद्भिः देवविशेषैः [v]दिवा [v]पृथिव्या च [v]सजोषौ संगतौ युवां [v]मे मम [v]हवं युष्मदीयमाह्वानं [v]शृणुतम् ॥ पुरुतमः । तमपो व्यत्ययेनाद्युदात्तत्वम् ॥ जोहवीति । ह्वयतेर्यङ्लुकि 'अभ्यस्तस्य च' इति संप्रसारणे कृते रूपम् । दिवा । 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । पृथिव्या । 'उदात्तयणो हल्पूर्वात्' इति उदात्तत्वम् । हवम् । ह्वयतेः 'भावेऽनुपसर्गस्य' इति अप् । प्रत्ययस्य पित्त्वादनुदात्तत्वम् ॥

अस्मे तदिन्द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः ।
अस्मान्वरूत्रीः शरणैरवन्त्वस्मान्होत्रा भारती दक्षिणाभिः ॥ ३ ॥

अस्मे इति । तत् । इन्द्रावरुणा । वसु । स्यात् । अस्मे इति । रयिः । मरुतः । सर्वऽवीरः । अस्मान् । वरूत्रीः । शरणैः । अवन्तु । अस्मान् । होत्रा । भारती । दक्षिणाभिः ॥ ३ ॥

[v]इन्द्रावरुणा[1] हे इन्द्रावरुणौ[1] [v]अस्मे अस्मासु [v]तत् अभिलषितं तादृशं [v]वसु धनं [v]स्यात् भवतु[2] । हे [v]मरुतः [v]सर्ववीरः सर्वेषु[3] कर्मसु वीरः[3] समर्थः [v]रयिः पुत्रपौत्रयुक्तः[4] पशुसंघः[4] । 'पशवो वै रयिः' इति तैत्तिरीयकम् । सः[5] [v]अस्मे अस्माकं भवतु । [v]वरूत्रीः सर्वैः संभजनीया देवपत्न्यः [v]शरणैः । शृणन्ति शीतादिक्लेशमिति शरणानि गृहाः । तैः [v]अस्मान् [v]अवन्तु । [v]होत्रा । ह्वयन्तेऽस्यां हवींषीति । यद्वा[6] । ह्वयते तत्र प्राण इति होत्रा वाक् । तथा च श्रुतिः–'वाचि हि प्राणं जुहुमः प्राणे वा वाचम्' इति । यद्वा । होत्रेति यज्ञनाम । ह्वयते अत्र हविरिति[6] । यज्ञश्च वागुच्यते । 'वाचं यच्छन्ति वाग्वै यज्ञः' (ऐ. ब्रा. ५. २४) इति ब्राह्मणम् । तादृशी [v]भारती सरस्वती [v]दक्षिणाभिः गोरूपाभिर्दक्षिणाभिः यद्वा उदाराभिर्वाग्भिः [v]अस्मान् पालयतु[7] ॥ वसु ष्यात् इत्यत्र संहितायां 'पूर्वपदात्' इति षत्वम् । वरूत्रीः । 'प्रसितस्कभित[8]' इत्यादिना ङीबन्तत्वेन निपातनादिष्टसिद्धिः । होत्रा । 'हु दानादनयोः[8]' । 'हुयामाश्रुभसिभ्यस्त्रन्' इत्यधिकरणे त्रन्प्रत्ययः ॥

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य । रास्व रत्नानि दाशुषे ॥ ४ ॥

बृहस्पते । जुषस्व । नः । हव्यानि । विश्वऽदेव्य । रास्व । रत्नानि । दाशुषे ॥ ४ ॥

[v]विश्वदेव्य सर्वदेवहित हे [v]बृहस्पते [v]नः अस्मत्संबन्धीनि [v]हव्यानि हवनयोग्यानि पुरोडाशादीनि[9] हवींषि[9] [v]जुषस्व सेवस्व । ततस्त्वं [v]दाशुषे हविर्दत्तवते यजमानाय मह्यं [v]रत्नानि उत्तमानि धनानि [v]रास्व देहि ॥ रास्व । 'रा दाने' । व्यत्ययेनात्मनेपदम् ॥

१. ग-घ-ण-भ–हे इन्द्रावरुणा इन्द्रावरुणौ; च-न-स–हे इन्द्रावरुणौ । २. च-फ–भवेत् । ३. ख-ग-च–सर्वकर्मवीरः; घ-ण-न-भ-स–सर्वकर्मसु वीरः । ४. ख-ग-घ-च-ण-न-फ-भ-ल-स–पुत्रपशुसंघः । ५. ख-ग-च-ण–'सः' नास्ति । ६. ख-ग-च-ण-न-भ-स–'यद्वा ... ... हविरिति' नास्ति । ७. त–पालयतु । यद्वा होत्रा होतुरग्नेः पत्नी भारती सूर्यपत्नी च सरस्वती च तिस्रो देव्यः पालयन्त्विति । ८. ख-ग-च-ण-न-भ–दानादानयोः । ९. घ-त- ल–पुरोडाशादिहवींषि ।

शुचिम॒र्कैर्बृह॒स्पतिमध्व॒रेषु॑ नमस्यत । अना॒म्योज॒ आ च॑के ॥ ५ ॥

शुचि॑म् । अ॒र्कैः । बृ॒ह॒स्पति॑म् । अ॒ध्व॒रेषु॑ । न॒म॒स्य॒त । अना॑मि । ओजः॑ । आ । च॒के ॥ ५ ॥

हे ऋत्विजो यूयम् [v]अध्वरेषु [v]शुचिं शुद्धं [v]बृहस्पतिम् [v]अर्कैः अर्चनीयैः स्तोत्रैः [v]नमस्यत परिचरत । [v]अनामि अनमनशीलं परैरनभिभवनीयम् [v]ओजः तस्य बलम् [v]आ [v]चके सर्वतो याचे[1] ॥ बृहस्पतिम् । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । चके । कमेर्लिटयुत्तमे मकारलोपश्छान्दसः ॥ ॥ ९ ॥

वृ॒षभं च॑र्षणी॒नां वि॒श्वरू॑पमदा॒भ्यम् । बृ॒ह॒स्पति॒ वरे॑ण्यम् ॥ ६ ॥

वृ॒ष॒भम् । च॒र्ष॒णी॒नाम् । वि॒श्वऽरू॑पम् । अ॒दा॒भ्यम् । बृ॒ह॒स्पति॑म् । वरे॑ण्यम् ॥ ६ ॥

[v]चर्षणीनां मनुष्याणां [v]वृषभम् अभिमतफलवर्षकं [v]विश्वरूपं व्याप्तरूपम् । यद्वा । विश्वरूपानामकगोवाहनोपेतम् । तथा च मन्त्रवर्णः—' बृहस्पतिर्विश्वरूपामुपाजत ' (ऋ. सं. १. १६१. ६) इति । [v]अदाभ्यं[2] केनाप्यतिरस्करणीयं [v]वरेण्यं सर्वैर्भजनीयं [v]बृहस्पतिम् । अभिमतफलं याचे* इति पूर्वेणान्वयः[2] ॥ विश्वरूपम् । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । यद्वा । विश्वरूपास्य अस्तीति[3] अर्शआदित्वात् अच्प्रत्ययः । मरुद्भृधादित्वात् पूर्वपदान्तोदात्तत्वम् । अदाभ्यम् । ' दभेश्चेति वक्तव्यम् ' इति ण्यत्प्रत्ययः ॥

इ॒यं ते॑ पूषन्नाघृणे सुष्टु॒तिर्दैव्य॑ नव्यसी । अ॒स्माभि॒स्तुभ्यं॑ शस्यते ॥ ७ ॥

इ॒यम् । ते॒ । पू॒ष॒न् । आ॒घृ॒णे॒ । सु॒ऽस्तु॒तिः । दैव्य॑ । न॒व्य॒सी॒ ।

अ॒स्माभिः॑ । तु॒भ्य॑म् । शस्य॑ते ॥ ७ ॥

[v]आघृणे दीप्तिमन्[4] हे [v]पूषन् [v]देव [v]नव्यसी नवतरा [v]इयं [v]सुष्टुतिः शोभनस्तुतिरूपा[5] वाक् [v]ते त्वत्संबन्धिनी भवति । सैषा स्तुतिः [v]अस्माभिः[6] स्तोतृभिः [v]तुभ्यं त्वदर्थं [v]शस्यते क्रियते[7] । तां जुषस्वेत्युत्तरेणान्वयः ॥

तां जु॑षस्व॒ गिरं॒ मम॑ वाज॒यन्ती॑मवा॒ धिय॑म् । व॒धूयु॑रि॒व योष॑णाम् ॥ ८ ॥

ताम् । जु॒ष॒स्व॒ । गिर॑म् । मम॑ । वा॒ज॒ऽय॒न्ती॒म् । अ॒व॒ । धिय॑म् । व॒धूयुः॑ऽइव । योष॑णाम् ॥८॥

हे पूषन् स्तोत्रं कुर्वाणस्य [v]मम [v]तां तादृशीं [v]गिरं स्तुतिलक्षणां वाचं [v]जुषस्व सेवस्व । स्तुत्या प्रीतस्त्वं [v]वाजयन्तीं वाजमन्नमिच्छन्तीं हर्षकारिणीं [v]धियम् इमां स्तुतिं प्रति[8] [v]अव अभिगच्छ । तत्र दृष्टान्तः । [v]वधूयुरिव । यथा वधूयुः स्त्रीकामः [v]योषणां स्त्रियं प्रत्यागच्छति तद्वत् ॥ वाजयन्तीम् ।

---

१. ख-ग-घ-च-ण-न-फ-भ-स–ययाचे । २. च-फ–अदाभ्यं अहिंस्यं वरेण्यं वरणीयं बृहस्पतिं नमस्यत इति पूर्वेणान्वयः । *ख-ग-भ–आचके । ३. भ–सतीति । ४. ल–दीप्तिमान् । ५. ख-ग-घ-च-ण-न-भ-स–शोभना स्तुतिरूपा । ६. त-न-स–अस्माभिः वाणी । ७. ख-ग-च-ण-भ-ल-स–' क्रियते ' नास्ति । ८. ख-ग-घ-च-ण-फ-भ–' प्रति ' नास्ति ।

वाजशब्दादिच्छतीत्यर्थे क्यच्। तदन्ताच्छतरि ङीपि रूपम्। ङीपोऽनुदात्तत्वे प्रत्ययस्वरः[१]। अव। अव रक्षणादिषु इत्यस्य लोटि रूपम्॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पूषाविता भुवत्॥९॥

यः। विश्वा। अभि। विऽपश्यति। भुवना। सम्। च। पश्यति।

सः। नः। पूषा। अविता। भुवत्॥ ९॥

[v]यः पूषा [v]विश्वा [v]भुवना सर्वान् लोकान् [v]अभि आभिमुख्येन [v]विपश्यति विशेषेण पश्यति। किंच तानि [v]सं [v]पश्यति तत्तद्वस्तुयाथात्म्यं[२] सम्यक् जानाति[३]। [v]सः तादृशः [v]पूषा देवः [v]नः अस्माकम् [v]अविता रक्षकः [v]भुवत् भवतु[४]॥ विपश्यति। यङ्लुगन्तयोगादनिघातः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। 'तिङि चोदात्तवति' इति गतेर्निघातः। पश्यति। अत्र सकर्मकत्वात् परस्मैपदम्। पूर्ववदनिघातः। भुवत्। भवतेर्लेटि[५] अडागमः। 'भूसुवोस्तिङि' इति गुणप्रतिषेधे उवङादेशः। निघातः॥

दशरात्रस्य षष्ठेऽहनि वैश्वदेवशस्त्रे 'तत्सवितुः' इति द्वे ऋचौ प्रतिपत्तृचस्य द्वितीयातृतीये[६]। सूत्रितं च- 'तत्सवितुर्वरेण्यमिति द्वे दोषो आगात्' (आश्व. श्रौ. ८. १) इति। अभिप्लवपृष्ठ्यषडहयोर्द्वितीयेऽहनि वैश्वदेवशस्त्रे प्रतिपत्तृचस्यैते एव प्रथमाद्वितीये। सूत्रितं च-'तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवम्' (आश्व. श्रौ. ७. ६) इति[७]॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ १०॥

तत्। सवितुः। वरेण्यम्। भर्गः। देवस्य। धीमहि। धियः। यः। नः। प्रऽचोदयात्॥१०॥

[v]यः सविता देवः [v]नः अस्माकं [v]धियः कर्माणि धर्मादिविषया वा[८] बुद्धीः [v]प्रचोदयात् प्रेरयेत्[९] [v]तत् तस्य[१०] [v]देवस्य[१०] [v]सवितुः[१०] सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य[११] [v]वरेण्यं सर्वैः

---

१. ल-प्रत्ययस्वरः। एकादेशस्वरः। २. ख-ग-च-ण-फ-स-यद्वस्तुयाथात्म्यम्। ३. ण-जानाति च। ४. घ-भवतु। च पूरणः। ५. च-°लेटि रूपम्। ६. ख-ग-च-फ-भ-स-द्वितीयतृतीये। ७. न-सूत्रितं च। अभि त्यं देव सवितारमोण्योरित्येका। तत्सवितुर्वरेण्यमिति द्वे इति। तथा तत्सवितुरित्येषा उपनयने वटोरुपदेशे विनियुक्ता। सूत्रितं च-पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाहेति। तथा अनुप्रवचनीयहोमेऽप्येषा। सूत्रितं च-सदसस्पतिमद्भुतमिति सावित्र्या द्वितीयमिति। ब्रह्मयज्ञेऽप्येषा। ओंपूर्वा व्याहृतयः सावित्रीमन्वाहेति सूत्रितं। उपाकरणोत्सर्जनयोरप्येषा। ओंपूर्वा व्याहृतयः सावित्री च त्रिरभ्यस्येति तथोत्सर्गे इति च सूत्रात्। सायंप्रातः संध्योपासनेऽप्येषा। तथा च सूत्रं। सावित्रीं जपेदर्धास्तमिते मंडले आनक्षत्रदर्शनादेवं प्रातरिति। पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि आभिप्लविकेषु द्वितीयचतुर्थे षष्ठेऽप्यहःसु च वैश्वदेवशस्त्रे तत्सवितुरिति द्वे ऋचौ प्रतिपत्तृचस्य द्वितीयातृतीये। तथा च सूत्रितं। तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवमिति। युग्मेष्वेवमभिप्लव इति च। ८. ण-फ-भ-'वा' नास्ति। ९. ख-ग-च-त-फ-भ-स-तस्य। १०. त-न-ल-सर्वासु श्रुतिषु प्रसिद्धस्य देवस्य द्योतमानस्य। ११. त-परमेश्वरस्य आत्मभूतम्; ल-परमेश्वरस्य आत्ममूलभूतम्।

उपास्यतया ज्ञेयतया च संभजनीयं [v]भर्गः[1] अविद्यातत्कार्ययोर्भर्जनाद्भर्गः[2] स्वयंज्योतिः[3] परब्रह्मात्मकं तेजः [v]धीमहि वयं ध्यायामः। यद्वा । तत् इति भर्गोविशेषणम् । सवितुः [v]देवस्य तत्तादृशं भर्गो धीमहि[4]। किं तदित्यपेक्षायामाह । यः इति लिङ्व्यत्ययः। यद्भर्गो धियः प्रचोदयात् । तन् ध्यायेमेति[5] समन्वयः। यद्वा । यः[6] सविता सूर्यो धियः कर्माणि प्रचोदयात् प्रेरयति तस्य सवितुः सर्वस्य[7] प्रसवितुः[8] देवस्य द्योतमानस्य सूर्यस्य तत्सर्वैः दृश्यमानतया[9] प्रसिद्धं वरेण्यं[10] सर्वैः संभजनीयं भर्गः पापानां तापकं तेजोमण्डलं धीमहि ध्येयतया मनसा धारयेम । यद्वा । भर्गःशब्देनान्नमभिधीयते । यः सविता देवो धियः प्रचोदयति तस्य प्रसादाद्भर्गोऽन्नादिलक्षणं फलं धीमहि धारयामः । तस्याधारभूता भवेमेत्यर्थः । भर्गःशब्दस्यान्नपरत्वे धीशब्दस्य[11] कर्मपरत्वे[12] चाथर्वणं–' वेदांश्छन्दांसि सवितुर्वरेण्यं भर्गो देवस्य कवयोऽन्नमाहुः । कर्माणि धियस्तदु ते प्रब्रवीमि प्रचोदयंत्सविता याभिरेति ' (गो. ब्रा. १. ३२) इति ॥ भर्गः । ' भ्रस्ज पाके ' । असुन् । ' भ्रस्जो रोपधयो रमन्यतरस्याम् ' (पा. सू. ६. ४. ४७) इति रोपधयोर्लोपो रमागमः । न्यङ्क्वादिपाठात्[13] कुत्वम् । धीमहि । ध्यायतेर्लिङि ' बहुलं छन्दसि ' इति संप्रसारणम् । व्यत्ययेनात्मनेपदम् । यद्वा । ' धीङ् आधारे ' । लिङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । प्रचोदयात् । चोदयतेर्लेट्याडागमः । यद्वृत्तयोगादनिघातः । आगमस्यानुदात्तत्वे णिचः[14] स्वरः[14] ॥ ॥ १० ॥

देवस्य सवितुर्वयं वाजयन्तः पुरंध्या । भगस्य रातिमीमहे ॥ ११ ॥

देवस्य । सवितुः । वयम् । वाजऽयन्तः । पुरम्ऽध्या । भगस्य । रातिम् । ईमहे ॥ ११ ॥

[v]वाजयन्तः वाजमन्नमात्मन इच्छन्तः [v]वयं [v]देवस्य द्योतमानस्य [v]सवितुः [v]पुरंध्या तद्विषयस्तुत्या प्रज्ञया वा [v]भगस्य भजनीयस्य धनस्य [v]रातिं[13] दानम् [v]ईमहे याचामहे ॥ रातिम् । ' मन्त्रे वृष° ' इत्यादिना क्तिन उदात्तत्वम् ॥

देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः । नमस्यन्ति धियेषिताः ॥१२॥

देवम् । नरः । सवितारम् । विप्राः । यज्ञैः । सुवृक्तिऽभिः । नमस्यन्ति । धिया । इषिताः ॥१२॥

[v]नरः कर्मणां नेतारः [v]विप्राः मेधाविनोऽध्वर्यवादयः [v]धियेषिताः कर्मणा बुद्ध्या वा प्रेर्यमाणाः सन्तः [v]सवितारं [v]देवं त्वां [v]यज्ञैः यजनीयैर्हविर्भिः [v]सुवृक्तिभिः शोभनस्तोत्रैश्च [v]नमस्यन्ति परिचरन्ति ॥ नमस्यन्ति । ' नमोवरिवश्चित्रङः क्यच् ' इति क्यच् ॥

अग्नीषोमप्रणयने ' सोमो जिगाति ' इत्याद्यास्तिस्र ऋचः । सूत्रितं च—' सोमो जिगाति गातुविदेवानां तमस्य राजा वरुणस्तमश्विनेत्यर्धर्चं आरमेत् ' (आश्व. श्रौ. ४. १०) इति ॥

१. ख-ग-घ-च-ण-भ–तद्भर्गः । २. ख-ग-च-ण-भ–अविद्याभञ्जनात् तत्कार्ययोर्भजनम् (भर्जनं-भ); न-फ–अविद्यातत्कार्ययोः भञ्जनं (भर्जनं-न) । ३. ख-ग-च-ण-न-भ-स–स्वयंज्योतिः तेजः । ४. त-न-ल–धीमहि । तद्योऽहं सोऽसौ योऽसौ सोऽहमिति वयं ध्यायेम । ५. ख-ग-च–ध्यायामीति; ण–ध्यायाम; न-भ-स–ध्यायामेति । ६. ख-ग-च-ण-फ-भ-स–' यः ' नास्ति । ७. ख-ग-घ-च-ण-भ-ल–' सर्वस्य प्रसवितुः ' नास्ति । ८. त–दृश्यतया । ९. ख-ग-च-ण-वरेण्यं च । १०. ख-ग-च-ण-न-भ-स–' धीशब्दस्य कर्मपरत्वे ' नास्ति । ११. त–न्यङ्क्वादित्वात् । १२. त–णिच्स्वरः । १३. ख-ग-च-ण-न-भ-ल-स–' रातिं ' नास्ति ।

सोमो जिगाति गातुविद्देवानामेति निष्कृतम् । ऋतस्य योनिमासदम् ॥१३॥

सोमः । जिगाति । गातुऽवित् । देवानाम् । एति । निःऽकृतम् ।
ऋतस्य । योनिम् । आऽसदम् ॥ १३ ॥

[v]गातुवित्। गातुः वेदिमार्गः[1] । तं जानानः [v]सोमो [v]जिगाति गच्छति। गन्तव्यं स्थानं दर्शयति । [v]देवानां संबन्धि[2] [v]निष्कृतं संस्कृतम्[2] [v]आसदं सर्वैरासदनीयम् [v]ऋतस्य यज्ञस्य [v]योनिं स्थानं हविर्धानाख्यम् [v]एति प्राप्नोति ॥ जिगाति । ' गा स्तुतौ ' । जुहोत्यादिः ॥

सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ॥ १४ ॥

सोमः । अस्मभ्यम् । द्विऽपदे । चतुःऽपदे । च । पशवे । अनमीवाः । इषः । करत् ॥१४॥

[v]सोमः स्तोतृभ्यः [v]अस्मभ्यं तथा [v]द्विपदे अस्मदीयाभ्यो द्विपाद्भ्यः प्रजाभ्यः [v]चतुष्पदे [v]पशवे चतुष्पादभ्यो गवादिपशुभ्यः [v]च [v]अनमीवाः रोगवर्जितानि [v]इषः अन्नानि [v]करत् करोतु ॥ चतुष्पदे । भसंज्ञायां पादस्य पद्भावः । ' इसुसोः सामर्थ्ये ' इति संहितायां सत्वम् । ' आदेशप्रत्यययोः ' इति षत्वम् । बहुव्रीहौ पूर्वपदस्वरः । करत् । करोतेर्लेट्यडागमः । इषस्करत् इत्यत्र संहितायां ' कः करत्करति° ' इत्यादिना सत्वम् ॥

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः । सोमः सधस्थमासदत् ॥ १५ ॥

अस्माकम् । आयुः । वर्धयन् । अभिऽमातीः । सहमानः ।
सोमः । सधऽस्थम् । आ । असदत् ॥ १५ ॥

सः [v]सोमः देवः [v]अस्माकमायुः अन्नं जीवनं वा[3] [v]वर्धयन् वृद्धिं प्रापयन् [v]अभिमातीः कर्मविघ्नकारिणः शत्रून् [v]सहमानः अभिभवन्नस्माकं [v]सधस्थं हविर्धानाख्यं स्थानम् [v]आसदत् आसीदतु ॥ असदत् । सदेर्लेटि रूपम् । निघातः ॥

अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे 'आ नो मित्रावरुणा ' इति स्तोत्रियस्तृचः[4] । सूत्रितं च– ' आ नो मित्रावरुणा नो गन्तं रिशादसा ' (आश्व. श्रौ. ५. १०) इति । चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणे शस्त्रे ' आ नो मित्रावरुणा ' इति षडहस्तोत्रियसंज्ञकस्तृचः । सूत्रितं च– ' आ नो मित्रावरुणा मित्रं वयं हवामहे ' (आश्व. श्रौ. ७. २) इति । स्तोमवृद्धावयमेव तृच आवापार्थः । सूत्रितं च–' आ नो मित्रावरुणेति तृचौ ' (आश्व. श्रौ. ७. ५) इति[5] । दाक्षायणे यज्ञे द्वे अमावास्ये कर्तव्ये। तत्रोत्तरस्यामावास्यायां द्वितीयेऽहनि मैत्रावरुणे ' आ नो मित्रावरुणा ' इति तस्यानुवाक्या। सूत्रितं च—' आ नो मित्रावरुणा यद्वंहिष्ठं नातिविधे सुदानू ' (आश्व. श्रौ. २. १४) इति ॥

---

१. ख-ग-घ-च-ण-त-न-भ-स–मार्गः । २. घ-त–निष्कृतं निःसृतम्; स–निष्कृतं निःकृतम् । ३. त-न-भ-स–च । ४. न–तृचः । तथा च सूत्रितं–आर्षे चैक आ नो मित्रावरुणेति । चातुर्विंशिके प्रातःसवनमैत्रावरुणशस्त्रे अयं तृच षळहस्तोत्रियसंज्ञकः । तथा च सूत्रं–चतुर्विंशे होताजनिष्ट इत्याज्यमानो मित्रावरुणेति । पृष्ठ्याभिप्लवषडहयोः सोमनिमित्तावापार्थमयं तृचः । सूत्रितं च–आ नो मित्रावरुणेति तृचाः प्र वो मित्रायेति ।

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥ १६ ॥

आ । नः । मित्रावरुणा । घृतैः । गव्यूतिम् । उक्षतम् । मध्वा । रजांसि । सुक्रतू इति सुऽक्रतू ॥ १६ ॥

[V]सुक्रतू शोभनकर्माणौ हे मित्रावरुणौ [V]नः अस्माकं [V]गव्यूतिं गवां मार्गं गोनिवासस्थानं [V]घृतैः क्षरणसाधनैः पयोभिः [V]आ [V]उक्षतं समन्तात् सिञ्चतम् । अस्मभ्यं दोग्ध्रीर्गाः प्रयच्छतमिति भावः । [V]रजांसि अस्मदावासस्थानानि [V]मध्वा मधुरेण[1] रसेन[1] सिञ्चतम् ॥ गव्यूतिम् । ' गोर्यूतौ छन्दसि ' इति वान्तादेशः । मध्वा । सर्वविधीनां छन्दसि विकल्पितत्वादत्र नुमागमाभावः ॥

उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥ १७ ॥

उरुऽशंसा । नमःऽवृधा । मह्ना । दक्षस्य । राजथः । द्राघिष्ठाभिः । शुचिऽव्रता ॥ १७ ॥

[V]शुचिव्रता परिशुद्धकर्माणौ[2] हे मित्रावरुणौ [V]उरुशंसा उरुभिर्बहुभिः शंसनीयौ । यद्वा । उरु महत् शंसः शस्त्रं ययोस्तौ । [V]नमोवृधा नमसा हविर्लक्षणेनान्नेन स्तोत्रेण वा वर्धमानौ [V]द्राघिष्ठाभिः अत्यन्तं दीर्घस्तुतिलक्षणाभिर्वाग्भिर्युक्तौ युवां [V]दक्षस्य । दक्षं धनं बलं वा । तस्य [V]मह्ना महत्त्वेन [V]राजथः ईशाथे ॥ उरुशंसा । ' शंसु स्तुतौ ' । कर्मणि घञ् । कृत्स्वरः । द्राघिष्ठाभिः । दीर्घशब्दादिष्ठनि ' प्रियस्थिर[3] ' इत्यादिना द्राघीय्यादेशः । नित्त्वादाद्युदात्तः ॥

मैत्रावरुणस्य ग्रहस्य याज्या ' गृणाना जमदग्निना ' इत्येषा । सूत्रितं च—' होता यक्षन्मित्रावरुणा गृणाना जमदग्निना ' (आश्व. श्रौ. ५. ५) इति । अध्यायोपाकरणे मण्डलाद्यन्तहोमे ' गृणाना जमदग्निना ' (आश्व. गृ. ३. ५. ७) इत्येषा[3] ॥

गृणाना जमदग्निना योनावृतस्य सीदतम् । पातं सोममृतावृधा ॥ १८ ॥

गृणाना । जमत्ऽअग्निना । योनौ । ऋतस्य । सीदतम् । पातम् । सोमम् । ऋतऽवृधा ॥ १८ ॥

हे मित्रावरुणौ [V]जमदग्निना एतन्नामकेन महर्षिणा [V]गृणाना स्तूयमानौ । यद्वा । जमदग्निना प्रज्वलिताग्निना विश्वामित्रेण स्तूयमानौ युवाम् [V]ऋतस्य यज्ञस्य [V]योनौ देवयजनाख्ये देशे [V]सीदतम् उपविशतम् । [V]ऋतावृधा ऋतस्य कर्मफलस्य वर्धयितारौ युवां [V]सोमं [V]पातं पिबतम् ॥ गृणाना । ' गृ शब्दे ' । व्यत्ययेन[4] कर्मणि शानच् । चित्त्वादन्तोदात्तः । सीदतम् । सदेर्लोटि ' पाघ्रा° ' इत्यादिना सीदादेशः । पातम् । ' पा पाने ' । ' बहुलं छन्दसि ' इति शपो लुक् ॥ ॥ ११ ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये दाशतय्यां तृतीये मण्डले पञ्चमोऽनुवाकः समाप्तः[5] च[5] तृतीयं मण्डलम् ॥

१. ल—मधुररसेन । २. ख-ग-घ-च-ण-भ—शुद्धकर्माणौ । ३. न—इत्येषा । तथा च सूत्रितम् । आवर्दस्त्वं शकुने भद्रमावद गृणाना जमदग्निनेति । उत्सर्जनेऽप्येषा । तथोत्सर्गे इति च सूत्रात् । ४. ख-ग-च-ण-न-भ-स—' व्यत्ययेन ' नास्ति । ५. स—इति ।

॥ श्रीः ॥

॥ अथ चतुर्थं मण्डलम् ॥

वामदेव्ये[1] चतुर्थे मण्डले[1] पञ्चानुवाकाः । तत्र प्रथमेऽनुवाके दश सूक्तानि । तेषु ' त्वां ह्यग्ने सदमित् ' इति विंशत्यृचं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका—' त्वां ह्यग्ने विंशतिरष्टयतिजगतीधृतय आद्या उपाद्याश्चतस्रो वारुण्यश्च वा ' इति । मन्त्रद्रष्टा वामदेव ऋषिः । प्रथमा चतुःषष्टयक्षरार्षिष्टुः द्वितीया द्विपञ्चाशदक्षरातिजगती तृतीया द्विसप्तत्यक्षरा[2] धृतिश्चतुर्थ्याद्या अनादेशपरिभाषया सप्तदश त्रिष्टुभः । कृत्स्नस्य सूक्तस्य ' मण्डलादिष्वाग्नेयम् ' इति परिभाषयाग्निर्देवता द्वितीयाद्याश्चतस्रो वरुणदेवत्या वा । सूक्तविनियोगो लैङ्गिकः । आद्या अध्यायोपाकरणे मण्डलादिहोमे विनियुक्ता ॥

त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे ।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् ॥ १ ॥

त्वाम् । हि । अग्ने । सदम् । इत् । सऽमन्यवः । देवासः ।
देवम् । अरतिम् । निऽएरिरे । इति । क्रत्वा । निऽएरिरे ।
अमर्त्यम् । यजत । मर्त्येषु । आ । देवम् । आऽदेवम् ।
जनत । प्रऽचेतसम् । विश्वम् । आऽदेवम् । जनत । प्रऽचेतसम् ॥ १ ॥

वामदेवः स्तौति । हे [v]अग्ने [v]समन्यवः । मन्युः स्पर्धा । तया सह वर्तमानाः । स्वसमानैः स्पर्धमाना इत्यर्थः । [v]देवासः देवनशीला इन्द्रादयो देवाः [v]देवं द्योतमानम् [v]अरतिं शीघ्रं गन्तारं [v]त्वां [v]सदमित् सदैव [v]न्येरिरे [v]हि । स्पर्धानिमित्ते युद्धे प्रेरयन्ति खलु । इतिशब्दो हेत्वर्थः । यस्मात् देवास्त्वां युद्धार्थं नितरां प्रेरयन्ति तस्माद्यजमानाः [v]क्रत्वा स्तुतिलक्षणेन कर्मणा [v]न्येरिरे । यज्ञकर्मणि देवान् हविः प्रापयितुं देवानाह्वातुं च त्वां नितरां प्रेरयन्ति खलु । [v]यजत यजनीय हे अग्ने [v]अमर्त्यं मरणधर्मरहितम् [v]आ सर्वतः [v]देवं द्योतमानं [v]प्रचेतसम् । प्रकृष्टं कर्मविषयं चेतो ज्ञानं यस्य तादृशं त्वां [v]मर्त्येषु यागं कुर्वाणेषु मनुष्येषु [v]आदेवम् आगन्तारं [v]जनत देवा हविःप्रापणार्थम्[3] अजनयन् । तथा [v]प्रचेतसं कर्माभिज्ञम्[4] [v]आदेवं तत्तद्यज्ञेष्वागन्तारं त्वां [v]विश्व [v]जनत युगपन्नानादेशवर्तिषु यज्ञेषु यौगपद्येन हविरानयनार्थं त्वां देवा अकुर्वन् ॥ न्येरिरे । ' ईर गतौ '। लिटि मन्त्रत्वात् आम् न भवति । सहेति योगविभागात् समासः । हियोगादनिघातः । क्रत्वा । ' जसादिषु छन्दसि वावचनम् ' इति नादेशाभावः । यणादेशः ॥

१. त-वामदेवे चतुर्थे मण्डले; स-अथ चतुर्थे वामदेवमण्डले । २. त-द्वासप्तत्यक्षरा । ३. ल-हविरानयनार्थम् । ४. ग-च-कर्मणोऽभिज्ञम् ।

स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।
ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतम् ॥ २ ॥

सः । भ्रातरम् । वरुणम् । अग्ने । आ । ववृत्स्व । देवान् ।
अच्छ । सुऽमती । यज्ञऽवनसम् । ज्येष्ठम् । यज्ञऽवनसम् ।
ऋतऽवानम् । आदित्यम् । चर्षणिऽधृतम् । राजानम् । चर्षणिऽधृतम् ॥ २ ॥

हे [v]अग्ने [v]सः तादृशस्त्वं [v]भ्रातरम् एकस्थानवासेन[1] भ्रातरं [v]वरुणम्[2] । वृणोत्युदकमिति वरुणः । तं देवं [v]यज्ञवनसं यज्ञैर्यजनीयैर्हविर्भिः संभजनीयं [v]यज्ञवनसं च यज्ञस्य[3] संभक्तारं[3] [v]ज्येष्ठम् अतिशयेन प्रशस्यम् [v]ऋतावानम् अपां स्वामितयोदकवन्तं सत्यवन्तं वा [v]आदित्यम् अदितेः पुत्रं [v]चर्षणीधृतं मनुष्याणामुदकप्रदानेन धारकं [v]सुमतीं[4] शोभनबुद्ध्या हेतुना [v]चर्षणीधृतं चर्षणिभिर्विद्वद्भिर्धृतं [v]राजानं राजन्तम् एतादृशं वरुणं देवं [v]देवान् देवनशीलान् स्तोतॄन्[5] [v]अच्छ अभि [v]आ [v]ववृत्स्व आवर्तय अभिमुखीकुरु ॥ ववृत्स्व । ' वृतु वर्तने ' । लोटि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । निघातः । सुमती । ' मन्त्रे वृष° ' इत्यादिना क्तिन्नुदात्तः । ' सुपां सुलुक्° ' इति तृतीयायाः पूर्वसवर्णदीर्घः । एकादेशस्वरः । ज्येष्ठम् । प्रशस्यस्येष्ठनि ' ज्य च ' इति ज्यादेशः । निष्ठादाद्युदात्तः । एकादेशस्वरः । यज्ञवनसम् । ' वन षण संभक्तौ ' । कर्मकर्तरि च असुन्प्रत्ययः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति पूर्वपदस्वरः ॥

प्रवर्ग्येऽभिष्टवे उत्तरस्मिन् पटले ' सखे सखायम् ' इत्येषा । सूत्रितं च—' सखे सखायमभ्या ववृत्स्वोर्ध्व ऊ षु ण ऊतये ' (आश्व. श्रौ. ४. ७) इति ॥

सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥ ३ ॥

सखे । सखायम् । अभि । आ । ववृत्स्व । आशुम् ।
न । चक्रम् । रथ्याऽइव । रंह्या । अस्मभ्यम् । दस्म । रंह्या ।
अग्ने । मृळीकम् । वरुणे । सचा । विदः । मरुत्ऽसु । विश्वऽभानुषु ।
तोकाय । तुजे । शुशुचान । शम् । कृधि । अस्मभ्यम् । दस्म । शम् । कृधि ॥ ३ ॥

---

१. च—एकेन स्थानवासेन; त-न—एकस्थानावासेन । २. ख-ग-च-ण-न-भ-ल-स—' वरुणं ' नास्ति । ३. ण—यज्ञसंभक्तारम् । ४. ण—सुमती सुमत्या । ५. ख-ग-घ-च-फ-भ-स—देवान्; त-न-ल—स्तोतॄन् देवान् ।

[v]सखे सखिभूत [v]दस्म दर्शनीय हे अग्ने[1] त्वं तव [v]सखायं वरुणम् [v]अस्मभ्यम् अस्मदर्थम् [v]आ [v]ववृत्स्व अभिमुखीकुरु। तत्र दृष्टान्तः। [v]रंह्या रंहणे गमने साधुभूतौ [v]रथ्येव रथे योजितौ अश्वौ[2] यथा [v]आशुं[3] शीघ्रगन्तृ [v]चक्रं लक्ष्यदेशं प्रति अभिमुखीकुरुतस्तद्वत्। हे [v]अग्ने [v]सचा तव सहाये [v]वरुणे [v]मृळीकं सुखकरं हविः [v]विदः लब्धवानसि। तथा [v]विश्वभानुषु सर्वतो व्याप्ततेजस्केषु [v]मरुत्सु सुखकरं लब्धवानसि। आग्निवारुणाग्निमारुतयोः कर्मणोरिष्टवानसीत्यर्थः। [v]शुशुचान दीप्यमान हे अग्ने [v]तोकाय। तुज्यते पीड्यतेऽनेन[4] माता गर्भवासेनेति तोकं पुत्रः। तस्मै [v]तुजे। गच्छत्यनेनानृण्यं पितेति तुक् पौत्रः। तस्मै [v]शं सुखं [v]कृधि कुरु। [v]दस्म दर्शनीय हे अग्ने [v]अस्मभ्यं [v]शं [v]कृधि सुखं कुरु॥ रथ्येव। रथस्येमावित्यर्थे ' रथाद्यत् ' इति यत्। ' सुपां सुलुक्° ' इति सुपो डादेशः। रंह्या। रंहशब्दात् ' तत्र साधुः ' इति यत्प्रत्ययः। ' यतोऽनावः ' इत्याद्युदात्तत्वम्॥

' त्वं नो अग्ने ' इत्येतदारभ्येदं सूक्तमुत्तराणि सूक्तानि च प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे च विनियुक्तानि। सूत्रितं च—' त्वं नो अग्ने वरुणस्य विद्वानित्येतत्प्रभृतीनि चत्वारि' (आश्व. श्रौ. ४. १३) इति। अवभृथेष्ट्यां स्विष्टकृदर्थेऽग्नीवरुणौ यष्टव्यौ। तत्र ' त्वं नो अग्ने ' इति द्वे याज्यानुवाक्ये। सूत्रितं च—' अग्नीवरुणौ स्विष्टकृदर्थे त्वं नो अग्ने वरुणस्य विद्वानिति द्वे ' (आश्व. श्रौ. ६. १३) इति। अस्नातो यद्यग्निहोत्रं जुहुयात् तदा[5] आग्निवारुणीष्टिः। तस्यामेते एव याज्यानुवाक्ये। ' तदाहुर्य आहिताग्निः ' इत्युपक्रम्याम्नातं—' तस्य याज्यानुवाक्ये त्वं नो अग्ने वरुणस्य विद्वान्स त्वं नो अग्नेऽवमो भवोती ' (ऐ. ब्रा. ७. ९) इति॥

त्वं नो॑ अग्ने॒ वरु॑णस्य॒ विद्वा॒न्देव॑स्य॒ हेळो॑ऽव॑ यासिसीष्ठाः।
यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो॒ विश्वा॒ द्वेषा॑सि॒ प्र मु॑मुग्ध्य॒स्मत्॥ ४॥

त्वम्। नः। अग्ने। वरुणस्य। विद्वान्। देवस्य। हेळः। अव। यासिसीष्ठाः।
यजिष्ठः। वह्नितमः। शोशुचानः। विश्वा। द्वेषांसि। प्र। मुमुग्धि। अस्मत्॥ ४॥

हे [v]अग्ने[1] [v]विद्वान् सर्वपुरुषार्थसाधनोपायज्ञः [v]त्वं [v]देवस्य द्योतमानस्य [v]वरुणस्य [v]हेळः क्रोधान् [v]नः अस्मत्संबन्धिनो वरुणकर्तृकान् पाशग्रहणान् [v]अव [v]यासिसीष्ठाः अपनय। किंच [v]यजिष्ठः यष्टृतमः [v]वह्नितमः हविषामतिशयेन वोढा [v]शोशुचानः अतिशयेन दीप्यमानस्त्वं [v]विश्वा सर्वाणि [v]द्वेषांसि पापानि द्वेष्टॄणि रजांसि वा [v]अस्मत् अस्मत्तः [v]प्र [v]मुमुग्धि प्रकर्षेण मोचय॥ हेळः। ' हेड् अनादरे '। क्विप्। शसि रूपम्। शसः सुत्वादनुदात्तत्वे धातुस्वरः। यासिसीष्ठाः। यसेर्ण्यन्तादाशीर्लिङ्। थासि सीयुडागमः। ' छन्दस्युभयथा ' इति लिङः सार्वधातुकत्वात् णिलोपाभावः। अवपूर्वो यासिर्विनाशे वर्तते। मुमुग्धि। मुञ्चतेर्लोटि रूपम्। ' बहुलं छन्दसि ' इति शपः श्लुः॥

---

१. ख-ग-घ-च-ण-फ-भ-अग्ने रंह्या साधुभूतः। २. च-अश्वौ यथा आशुं न चक्रम्; ण-अश्वाविव न यथा आशुम्। ३. ख-ग-च-ण-न-भ-स-पीड्यते। ४. ख-ग-च-ण-न-भ-स-तस्य। ५. ख-ग-च-अग्ने त्वम्।

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥ ५ ॥

सः । त्वम् । नः । अग्ने । अवमः । भव । ऊती । नेदिष्ठः । अस्याः । उषसः । विऽउष्टौ ।
अव । यक्ष्व । नः । वरुणम् । रराणः । वीहि । मृळीकम् । सुऽहवः । नः । एधि ॥ ५ ॥

हे [v]अग्ने [v]सः तादृशः [v]त्वम् [v]ऊती ऊत्या रक्षणेन [v]नः अस्माकम् [v]अवमः अर्वाचीनः प्रत्यासन्नः सन् [v]अस्या [v]उषसो [v]व्युष्टौ व्युच्छने प्रातःकालेऽग्निहोत्रादिकर्मसिद्ध्यर्थं [v]नेदिष्टः [v]भव अतिशयेनास्मदन्तिकस्थो भव । यद्वा । ऊत्या गमनेनास्माकमवमो रक्षको भव । किंच [v]नः अस्माकं [v]वरुणं वरुणकृतं जलोदरादिरोगम् आवरकं पापं वा [v]अव [v]यक्ष्व अवयज । विनाशयेत्यर्थः । [v]रराणः अस्मद्दत्ते हविषि रममाणः । यद्वा । यजमानेभ्यः अत्यन्तमीप्सितफलप्रदः[1] त्वं [v]मृळीकं सुखकरमिदं हविः [v]वीहि भक्षय । किंच [v]नः अस्माकं [v]सुहवः शोभनाह्वानोपेतः [v]एधि भव ॥ नेदिष्टः । अन्तिकशब्दादिष्ठनि ' अन्तिकबाढयोर्नेदसाधौ ' इति नेद इत्यादेशः । निरुवादाद्युदात्तः । रराणः । रमतेः कानचि मकारलोपश्छान्दसः । यद्वा । रातेः यङ्लुकि[2] व्यत्ययेन कानच् । ' अभ्यस्तानामादिः ' । एधि । अस्तेर्लोटि ' ध्वसोरेद्धावभ्यासलोपश्च ' इति ए इत्यादेशः । तस्यासिद्धत्वात् ' हुझल्भ्यो हेर्धिः ' । निघातः ॥ ॥ १२ ॥

अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ॥ ६ ॥

अस्य । श्रेष्ठा । सुऽभगस्य । सम्ऽदृक् । देवस्य । चित्रऽतमा । मर्त्येषु ।
शुचि । घृतम् । न । तप्तम् । अघ्न्यायाः । स्पार्हा । देवस्य । मंहना ऽइव । धेनोः ॥ ६ ॥

[v]सुभगस्य सुधनस्य सुष्ठु भजनीयस्याग्नेः [v]देवस्य [v]श्रेष्ठा अतिशयेन प्रशस्या [v]संदृक् संदृष्टिः [v]मर्त्येषु [v]चित्रतमा अतिशयेन चायनीया पूजनीया भवति । [v]स्पार्हा सर्वैः स्पृहणीया भवति । तत्र दृष्टान्तः । यथा [v]देवस्य क्षीरं कामयमानस्य पुरुषस्य [v]अघ्न्यायाः अहन्तव्याया गोः [v]शुचि तेजोयुक्तं [v]घृतं क्षरणयुक्तं [v]तप्तं क्षीरं स्पृहणीयं भवति । तत्रैव दृष्टान्तान्तरम् । यथा गां भिक्षमाणस्य मर्त्यस्य [v]धेनोः दोग्ध्र्या गोः [v]मंहनेव । मंहतिर्दानकर्मा । दानं यथा प्रियकरं भवति तद्वत् ॥ सुभगस्य । ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । स्पार्हा । ' कर्मण्यतो घञोऽन्त उदात्तः ' । देवस्य । दीव्यतीति देवः । दीव्यतेः कान्त्यर्थस्य पचाद्यचि रूपम् ॥

१. ख-ग-च-ण-न-भ-स-अत्यन्तफलप्रदः । २. ख-ग-च-ण-न-भ-ल-स-' यङ्लुकि ' नास्ति ।

त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥ ७ ॥

त्रिः । अस्य । ता । परमा । सन्ति । सत्या । स्पार्हा । देवस्य । जनिमानि । अग्नेः ।
अनन्ते । अन्तरिति । परिऽवीतः । आ । अगात् । शुचिः । शुक्रः । अर्यः । रोरुचानः ॥७॥

[v]अग्नेः अग्न्यभिमानिनः [१]अस्य [v]देवस्य [v]त्रिः त्रीण्यग्निवायुसूर्यात्मना त्रीणि [v]ता तानि प्रसिद्धानि [१]परमा उत्तमानि [१]सत्या यथार्थभूतानि [v]जनिमानि जन्मानि [v]स्पार्हा सर्वैः स्पृहणीयानि [v]सन्ति । यद्वा । अग्नेरेव त्रीणि जन्मानि ' दिवस्परि प्रथमं जज्ञे अग्निः ' (ऋ. सं. १०. ४५. १) इति ' त्रीणि जाना परि भूषन्त्यस्य ' (ऋ. सं. १.९५.३) इत्येवमादिषु मन्त्रेषु प्रसिद्धानि । [v]अनन्ते अपर्यन्ते[२] नभसि [१]अन्तः मध्ये स्वतेजसा [v]परिवीतः परिवेष्टितः[३] [v]शुचिः सर्वस्य[४] शोधकः [v]शुक्रः दीप्तियुक्तोऽत एव [v]रोरुचानः भृशं दीप्यमानः [१]अर्यः स्वामी तादृशो देवः [v]आगात् अस्मदीयं यज्ञं प्रत्यागच्छतु ॥ सत्या । ' शेश्छन्दसि बहुलम् ' इति शेर्लुक् । परिवीतः । ' ष्ट्येञ् संवरणे ' । कर्मणि क्तः । यजादित्वात् संप्रसारणम् । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अर्यः । ' ऋ गतौ ' । ' अर्यः स्वामिवैश्ययोः ' इति यत्प्रत्ययान्तो निपातितः । ' स्वामिन्यन्तोदात्तत्वं वक्तव्यम्[५] ' इत्यन्तोदात्तत्वम् ॥

स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥ ८ ॥

सः । दूतः । विश्वा । इत् । अभि । वष्टि । सद्म । होता । हिरण्यऽरथः । रम्ऽसुजिह्वः ।
रोहित्ऽअश्वः । वपुष्यः । विभाऽवा । सदा । रण्वः । पितुमतीऽइव । सम्ऽसत् ॥ ८ ॥

देवानां [v]दूतः [v]होता देवानामाह्वाता [v]हिरण्यरथः सुवर्णमयरथोपेतः[६] [v]रंसुजिह्वः रमणीयशोभनज्वालोपेतः [v]सः तादृशोऽग्निः [v]विश्वेत् सर्वाण्येव [v]सद्म देवयजनस्थानानि [v]अभि [v]वष्टि कामयते । पुनश्च कीदृशः । [v]रोहिदश्वः । रोहितवर्णाः[६] अश्वाः[६] यस्य स तथोक्तः । [v]वपुष्यः वपुषि रूपे साधुः [v]विभावा कान्तियुक्तोऽत एव [v]सदा [v]रण्वः रमणीयो भवति । तत्र दृष्टान्तः । [v]पितुमतीव [v]संसत् । यथा अन्नादिमत्[६] सम्यक् गृहं गृहं रमणीयं तद्वत् ॥ रंसुजिह्वः । रमतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । बहुव्रीहौ पूर्वपदस्वरः । वपुष्यः । ' तत्र साधुः ' इति यत् । तित्स्वरितः । विभावा । ' छन्दसीवनिपौ° ' इति वनिप् ॥

१. ख-ग-च-ण-फ-अपगतान्ते । २. घ-ण-परिवृतः । ३. च-फ-सर्वस्य जगतः । ४. ख-ग-च-ण-' वक्तव्यं ' नास्ति । ५. च-रोहितवर्णावश्वौ । ६. ख-ग-घ-च-भ-ल-स-अन्नादिवत् ।

स चेतयन्मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति ।
स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥ ९ ॥

सः । चेतयत् । मनुषः । यज्ञऽबन्धुः । प्र । तम् । मह्या । रशनया । नयन्ति ।
सः । क्षेति । अस्य । दुर्यासु । साधन् । देवः । मर्तस्य । सधनिऽत्वम् । आप ॥ ९ ॥

[v]यज्ञबन्धुः । यज्ञेऽग्निहोत्रादौ बन्धनं विनियोजनं यस्य स तथोक्तः । [v]सः अग्निः [v]मनुषः कर्मणि प्रवृत्तान् मनुष्यान् [v]चेतयत् जानाति । [v]मह्या महत्या [v]रशनया स्तुतिरूपया रज्वा युक्तं [v]तं तादृशमग्निं [v]प्र [v]नयन्ति उत्तरवेद्यादित्वध्वर्यवादयः प्रक्षिपन्ति । [v]मर्तस्य मनुष्यस्य [v]अस्य यजमानस्य [v]दुर्यासु गृहेषु [v]साधन् अभीष्टानि साधयन् [v]सः अग्निः [v]क्षेति वसति । सः [v]देवः द्योतमानोऽग्निः [v]सधनित्वं यस्य गृहे निवसति तेन धनिना साहित्यम् [v]आप प्राप्नोति । प्रभूतं धनं यजमानाय दापयित्वा[1] तेन सहितोऽभवदित्यर्थः ॥ साधन् । ' राध साध संसिद्धौ ' । ण्यन्तस्य शतरि रूपम् ॥

स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य ।
धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥ १० ॥

सः । तु । नः । अग्निः । नयतु । प्रऽजानन् । अच्छ । रत्नम् । देवऽभक्तम् । यत् । अस्य ।
धिया । यत् । विश्वे । अमृताः । अकृण्वन् । द्यौः । पिता । जनिता । सत्यम् । उक्षन् ॥ १० ॥

[v]प्रजानन् सर्वं जानानः [v]सः [v]अग्निः [v]देवभक्तं देवैः देवनशीलैः स्तोतृभिः संभजनीयम् [v]अस्य अग्नेः संबन्धि [v]यत् उत्तमं [v]रत्नं धनमस्ति तद्रत्नम् [v]अच्छ आभिमुख्येन [v]तु क्षिप्रं [v]नः अस्मान् [v]नयतु प्रापयतु । [v]अमृताः मरणधर्मरहिताः[2] [v]विश्वे सर्वे देवाः [v]धिया हविर्वहनलक्षणेन[3] कर्मणा हेतुना [v]यत् यमग्निम् [v]अकृण्वन् हविषां प्रापयितारमकुर्वन् । यस्य चाग्नेः [v]द्यौः [v]पिता पालयित्री [v]जनिता जनयित्री च । ' अग्ने दिवः सूनुरसि प्रचेताः ' (ऋ. सं. ३. २५. १) इति श्रवणात् । यद्वा । द्यौर्देवनशील आदित्यः पिता जनयिता च । ' आदित्यादग्निः ' इत्याम्नानात् । [v]सत्यं यथार्थभूतं तमग्निम् [v]उक्षन् । घृताद्याहुतिभिरध्वर्यवादयः सिञ्चन्ति ॥ देवभक्तम् । ' भज सेवायाम् ' । कर्मणि क्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः । उक्षन् । ' उक्ष सेचने ' । लङि रूपम् । ' बहुलं छन्दसि ' इत्यडभावः ॥ ॥ १३ ॥

स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ।
अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे ॥ ११ ॥

सः । जायत । प्रथमः । पस्त्यासु । महः । बुध्ने । रजसः । अस्य । योनौ ।
अपात् । अशीर्षा । गुहमानः । अन्ता । आऽयोयुवानः । वृषभस्य । नीळे ॥ ११ ॥

---

१. ल–दत्त्वा । २. ख-ग-घ-च-ण-न-भ-स– °रहिताश्च । ३. ख-ग-घ-च-ण-त-न-भ–हविर्लक्षणेन ।

[v]सः अग्निः [v]प्रथमः आहवनीयादिरूपतया श्रेष्ठः सन् [v]पस्त्यासु यजमानानां गृहेषु [v]जायत आहुत्यधिकरणतया संपद्यते । तथा [v]महः महतः [v]अस्य [v]रजसः अन्तरिक्षस्य [v]बुध्ने मूले पृथिव्यां तत्रापि [v]योनौ उत्तरवेद्यादिस्थाने संपद्यते । सोऽग्निः [v]अपात् पादवर्जितः [v]अशीर्षा शिरोवर्जितः । तदेवाह । [v]अन्ता आद्यन्ते पादशिरसी [v]गृहमानः गृह्यमानः । अविज्ञेयपादशिरा इत्यर्थः । [v]वृषभस्य वर्षणसमर्थस्य मेघस्य [v]नीळे निलये नभसि [v]आयोयुवानः धूमाकारेणात्मानमायोजयन् वर्तते । यद्वा । यः प्रथमो वैद्युतोऽग्निः पस्त्यासु नदीषु[1] बुध्नेऽन्तरिक्षे महो महतो रजस उदकस्य तेजसो वा योनौ स्थाने च चरति। अपादशीर्षा पादशिरोवर्जितः अन्ता आत्मनः पर्यन्तप्रदेशान् स्वतेजसा गृह्यमान आच्छादयन् पुनश्च आयोयुवानः तानि तेजांसि स्वात्मनि मिश्रीकुर्वन् वृषभस्य मेघस्य[2] नीळे स्थाने नभसि चरति सोऽग्निरधुना कर्मयोग्यतया अजायत ॥ अपात् । 'पादस्य लोपोऽहस्त्यादिभ्यः' इति अकारलोपः समासान्तः । गृह्यमानः । 'गुहू संवरणे' । शबविकरणी[3]। शानचि रूपम् । शानचो लसार्वधातुकस्वरे कृते प्रत्ययस्वरः । आयोयुवानः । 'यु मिश्रणे' । यङ्लुकि शानचि रूपम् । अभ्यस्तस्वरेणाद्युदात्तः ॥

प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे ।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ॥ १२ ॥

प्र । शर्धः । आर्त । प्रथमम् । विपन्या । ऋतस्य । योना । वृषभस्य । नीळे ।
स्पार्हः । युवा । वपुष्यः । विभाऽवा । सप्त । प्रियासः । अजनयन्त । वृष्णे ॥ १२ ॥

हे अग्ने [v]विपन्या स्तुत्या युक्तम् [v]ऋतस्य उदकस्य [v]योना[4] योनौ स्थाने [v]वृषभस्य वर्षणसमर्थस्य मेघस्य [v]नीळे कुलायभूतेऽन्तरिक्षे वैद्युताग्निरूपेण वर्तमानं त्वां [v]शर्धः तेजः [v]प्रथमं [v]प्र [v]आर्त प्रकर्षेण गच्छति । यश्चाग्निः [v]स्पार्हः सर्वैः स्पृहणीयः [v]युवा नित्यतरुणः [v]वपुष्यः कमनीयः [v]विभावा दीप्तिमान् तस्मै [v]वृष्णे अभिमतफलवर्षकाय अग्नये[5] [v]प्रियासः प्रियाः [v]सप्त होत्रकाः [v]अजनयन्त स्तोत्रम् अकुर्वन् ॥ आर्त । 'ऋ गतौ' । लङि व्यत्ययेनात्मनेपदम् । निघातः । विपन्या । 'पन च' इत्यस्य इन्प्रत्ययः । 'कृदिकारादक्तिनः' इति ङीष् । प्रत्ययस्वरेणान्तोदात्तः । 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् । विपन्यँ ऋतस्य इत्यत्र संहितायाम्[6] 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (पा. सू. ६.१.१२७) इत्यनिकोऽपि ह्रस्वोऽनुनासिकश्च ॥

अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥ १३ ॥

अस्माकम् । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतम् । आशुषाणाः ।
अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अन्तः । उत् । उस्राः । आजन् । उषसः । हुवानाः ॥ १३ ॥

---

१. त–महीषु; न–मर्दायेषु । २. ख-ग-च-ण-न-भ-स–'मेघस्य' नास्ति । ३. भ-स–शविकरणी । ४. ण-न-ल-स–'योना' नास्ति । ५. ख-ग-घ-च-ण-न-भ-ल-स–'अग्नये' नास्ति । ६. ख-ग-घ-च-ण-न-भ-स–'संहितायां' नास्ति ।

vअत्र लोके[1] पूर्वे vमनुष्याः vअस्माकं vपितरः अङ्गिरसःvऋतं यज्ञम् vआशुषाणाः अश्नुवानाः सन्तः vअभि vप्र vसेदुः अग्निमभिलक्ष्य प्रजग्मुः । तेऽङ्गिरसोऽङ्गिपरिचर्याबलात vअश्मव्रजाः पर्वतैः परिवृताः vवव्रे । वृणोत्याच्छादयतीति वव्रं पर्वतबिलान्तर्वर्ति तमः । तस्मिन् vअन्तः मध्ये स्थिताः vसुदुघाः सुष्ठु दोग्ध्रीः vउस्राः पणिभिरपहृता गाः vउत vआजन् तस्माद्बिलान्निरगमयन् । किं कुर्वन्तः । तमसो विध्वंसिनीः vउषसः देवीः प्रकाशार्थं vहुवानाः आह्वयन्तः ॥ वव्रे । वृणोतेरौणादिकः कः । 'कृत्रादीनां द्वे भवतः' इति द्विर्वचनम् ॥

ते मर्मृजत दद्रुवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।
पश्वयन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः ॥ १४ ॥

ते । मर्मृजत । ददृऽवांसः । अद्रिम् । तत् । एषाम् । अन्ये । अभितः । वि । वोचन् ।
पश्वऽयन्त्रासः । अभि । कारम् । अर्चन् । विदन्त । ज्योतिः । चकृपन्त । धीभिः ॥ १४ ॥

vते अङ्गिरसः vअद्रिं पणिभिरपहृतानां गवां निरोधकं पर्वतं vददृवांसः विदारयन्तः सन्तः[2] vमर्मृजत अग्निं पर्यचरन् । vएषाम् अङ्गिरसां vतत् तादृशं कर्म vअन्ये महर्षयः vअभितः सर्वत्र जगति vवि vवोचन् विशेषेणाकथयन् । vपश्वयन्त्रासः पशुनिर्गमनार्थानि यन्त्राण्युपाया येषां तेऽङ्गिरसः vकारम् अभिमतस्य प्रयोजनस्य कर्तारमग्निम् vअभि vअर्चन् अस्तुवन् । ततस्तमोपहम् आदित्याख्यं vज्योतिः vविदन्त अलभन्त । ततः vधीभिः बुद्धिभिः vचकृपन्त यज्ञानकुर्वन् ॥ मर्मृजत । 'मृजू शुद्धौ' । यङ्लुकि लडि व्यत्ययेनात्मनेपदम् । निघातः । चकृपन्त । 'कृपू सामर्थ्ये' । एयन्तस्य लुङि चङि सन्वद्भावाभावश्छान्दसः ।

ते गव्यता मनसा दृघमुब्धं गा येमानं परि षन्तमद्रिम् ।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ॥ १५ ॥

ते । गव्यता । मनसा । दृघम् । उब्धम् । गाः । येमानम् । परि । सन्तम् । अद्रिम् ।
दृळ्हम् । नरः । वचसा । दैव्येन । व्रजम् । गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥ १५ ॥

vनरः कर्मणां नेतारः vउशिजः अग्निं कामयमानाः vते अङ्गिरसः vगव्यता गा इच्छता vमनसा vदृघं गवां निर्गमनद्वारनिरोधकम् vउब्धं समुब्धं संहतम्[3] । यद्वा । उभिः पूरणार्थः । गोभिः पूर्णं vगा vयेमानं नियच्छन्तं vपरि सर्वतः vसन्तम् वर्तमानं vदृळ्हं दृढं vगोमन्तं गोभिर्युक्तं vव्रजं गवां निवासस्थानम् vअद्रिं पर्वतं vदैव्येन अग्निविषयेण vवचसा वेदात्मकेन स्तोत्रेण vवि vवव्रुः गोनिर्गमनार्थमुद्घाटितवन्तः ॥ उब्धम् । उन्नातिर्हन्तिना समानार्थः । यद्वा । 'उभ उम्भ पूरणे' । कर्मणि क्तः । येमानम् । यमेः कानचि एत्वाभ्यासलोपौ । चित्त्वादन्तोदात्तः । परि षन्तम् इत्यत्र संहितायाम् 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति षत्वम् ॥ ॥ १४ ॥

---

१. च -इह लोके । २. ख-ग-च-ण-न-भ-'सन्तः' नास्ति । ३. ख-ग-घ-च-ण-त-न-फ-भ-स-संहितम् ।

ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन् ।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥ १६ ॥

ते । मन्वत । प्रथमम् । नाम । धेनोः । त्रिः । सप्त । मातुः । परमाणि । विन्दन् ।
तत् । जानतीः । अभि । अनूषत । व्राः । आविः । भुवत् । अरुणीः । यशसा । गोः ॥१६॥

हे अग्ने ᵛते स्तोत्रं कुर्वाणा अङ्गिरसः ᵛमातुः जनन्याः ᵛधेनोः वाचः संबन्धि ᵛनाम स्तुतिसाधकं शब्दमात्रं ᵛप्रथमं पूर्वं ᵛमन्वत अजानत । पश्चात्तस्या वाचः संबन्धीनि ᵛत्रिः ᵛसप्त एकविंशतिसंख्याकानि स्तुतिसाधनानि छन्दांसि । तानि च गायत्र्यादीनि जगत्यन्तानि सप्त । अतिजगत्यादीन्यतिधृत्यन्तानि सप्त । कृतिप्रभृतीन्युत्कृतिपर्यन्तानि सप्तेति । एवं त्रिः सप्त छन्दांसि ᵛपरमाणि उत्तमानि ᵛविन्दन् अलभन्त । एवंविधच्छन्दोयुक्तैः[१] मन्त्रैरग्निमस्तुवन्निित्यर्थः । ᵛतत् ततः ᵛजानतीः सर्वं जानानाः[२] ᵛव्राः । व्रा इत्युषोनाम । उषसः ᵛअभ्यनूषत अस्तुवन् । ततः ᵛगोः सूर्यस्य ᵛयशसा तेजसा सह ᵛअरुणीः अरुणवर्णोषाः ᵛआविर्भुवत् आविरभूत् । यद्वा । तेऽङ्गिरसः प्रथमं पुरातनं नाम एहि सुरभि गुग्गुलुगन्धिनीति धेनोर्नामधेयं मन्वत उच्चारयामासुः । मातुर्भूम्याः स्वभूतानि पणिभिरपहृतानि त्रिः सप्त रत्नानि[३] विन्दन्[३] । तत उच्चरितं नाम जानन्त्यो गावोऽभ्यनूषत । हम्भारवलक्षणं शब्दमकुर्वन् । तदानीमुषाः प्रादुरभूदिति ॥ जानतीः । एकस्मिन् पक्षे ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । उभयत्र ' शतुरनुमो नद्यजादी ' इति ङीप उदात्तत्वम् । अनूषत । ' णु स्तुतौ ' । लुङि रूपम् । कुटादित्वादगुणः । अरुणीः । सोरलोपश्छान्दसः ' गौरीर्मिमाय ' (ऋ. सं. १. १६४. ४१) इतिवत् ॥

नेशत्तमो दुधितं रोचत द्यौरुदेव्या उषसो भानुरर्त ।
आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥ १७ ॥

नेशात् । तमः । दुधितम् । रोचत । द्यौः । उत् । देव्याः । उषसः । भानुः । अर्त ।
आ । सूर्यः । बृहतः । तिष्ठत् । अज्रान् । ऋजु । मर्तेषु । वृजिना । च । पश्यन् ॥ १७ ॥

ᵛतमः रात्रिकृतं ध्वान्तं ᵛदुधितम् । दुधिः प्रेरणकर्मा । प्रातरग्निविहरणकाले उषसा प्रेरितं सत् ᵛनेशात् अनश्यत । ततः ᵛद्यौः अन्तरिक्षं ᵛरोचत अदीप्यत । ततः ᵛदेव्याः देवनशीलायाः ᵛउषसो ᵛभानुः प्रभा ᵛउत् ᵛअर्त उद्गच्छति । अथ ᵛसूर्यो ᵛबृहतः महतः ᵛअज्रान् अजरान् पर्वतान् गमनशीलान् रश्मीन् वा ᵛआ ᵛतिष्ठत् अध्यतिष्ठत । किं कुर्वन् । ᵛमर्तेषु मनुष्येषु विद्यमानम् ᵛऋजु सत्कर्म ᵛवृजिना अनृजूनि[४] असत्कर्माणि ᵛच ᵛपश्यन् अध्यतिष्ठदिति शेषः ॥ नेशात् । ' णश अदर्शने ' । लङि ' णशिमन्योरलिट्येत्वं वक्तव्यम् ' (पा. म. ६. ४. १२०. ५) इति एत्वम् । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । रोचत । ' रुच दीप्तौ ' । लङि रूपम् । वाक्यभेदादनिघातः ॥

१. च-फ-एवं त्रिविध° । २. च-जानन्ति ताः; ण-जानन्तीति जानानाः । ३. ख-ग-च-ण-फ-भ-नामानि अविन्दन् । ४. त-न-वृजिनानि ।

आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम् ।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥ १८ ॥

आत् । इत् । पश्चा । बुबुधानाः । वि । अख्यन् । आत् । इत् । रत्नम् । धारयन्त । द्युऽभक्तम् ।
विश्वे । विश्वासु । दुर्यासु । देवाः । मित्र । धिये । वरुण । सत्यम् । अस्तु ॥ १८ ॥

vआदित् सूर्योदयादनन्तरं vबुबुधानाः पणिभिरपहृता निरोधान्निर्गता गा जानाना अङ्गिरसः vपश्चा पृष्ठदेशेषु[1] vव्यख्यन् अशेषेण ता गा अपश्यन् । तथा vआदित् अनन्तरं vद्युभक्तं दीप्तियुक्तं देवैः संभक्तं वा vरत्नं पणिभिरपहृतं धनं च vधारयन्त अधारयन् । लब्धगोधनानामङ्गिरसां vविश्वासु vदुर्यासु सर्वेषु गृहेषु vविश्वे यजनीयाः सर्वे vदेवाः आजग्मुः । हे vमित्र मित्रभूत हे vवरुण उपद्रवाणां वारक हे अग्ने vधिये कर्मणां कर्त्रे स्तोत्रे वा यजमानाय vसत्यमस्तु । यदेतत्त्वोपद्रववारणसामर्थ्यं तत्यथार्थभूतमस्तु ॥ पश्चा । ' पश्च पश्चा च छन्दसि ' इति निपातितः । बुबुधानाः । बुधेर्लिटि कानचि रूपम् । चित्वादन्तोदात्तः । द्युभक्तम् । ' भज सेवायाम् ' । कर्मणि क्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरः ॥

अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् ।
शुचूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः ॥ १९ ॥

अच्छ । वोचेय । शुशुचानम् । अग्निम् । होतारम् । विश्वऽभरसम् । यजिष्ठम् ।
शुचि । ऊधः । अतृणत् । न । गवाम् । अन्धः । न । पूतम् । परिऽसिक्तम् । अंशोः ॥ १९ ॥

हे अग्ने vशुशुचानं भृशं दीप्यमानं vहोतारं देवानामाह्वातारं vविश्वभरसम् आहुतिद्वारा वृष्टिप्रदानेन विश्वस्य पोषकं vयजिष्ठं यष्टृतमम् vअग्निं त्वाम् vअच्छ अभिलक्ष्य vवोचेय स्तवानि[2] । vगवाम् vऊधः vशुचि शुद्धं पयः vन vअतृणत् । तवाहुत्यर्थं यजमानो न दोग्धि । vअंशोः सोमलताखण्डस्य संबन्धि vअन्धः रसाख्यमन्नं vपूतं दशापवित्रेण शोधितं सत् vन vपरिषिक्तम् । गृहेषु न प्रक्षिप्तम्[3] । किंत्वनेन[4] यजमानेन केवलं स्तुतिरेव क्रियते[5] ॥ वोचेय । ब्रूञः आशीर्लिङि ' ब्रुवो वचिः ' । ' लिङ्याशिष्यङ् ' । ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् सीयुटः सलोपः । अतृणत् । ' उतृदिर् हिंसानादरयोः ' । दोहनमेव ऊधोर्हिंसनम्[6] । परिषिक्तम् । सिञ्चतेः कर्मणि क्तः । ' उपसर्गात्सुनोति ' इति संहितायां षत्वम् । ' गतिरनन्तरः ' इति गतेः स्वरः[7] ॥

१. ख-ग-च-त-न-फ-स-पृथग्देशेषु; भ-पृष्ठदेशेषु । २. ख-ग-घ-च-ण-फ-भ-स्तौमि । ३. ख-ग-च-क्षिप्तम् । ४. ख-घ-त-न-भ-स-किं तेन; च-फ-किमनेन । ५. भ-स-न क्रियते । ६. ख-ग-च-ऊधोर्हिंसा । ७. ल-प्रकृतिस्वरः ।

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥ २० ॥

विश्वेषाम् । अदितिः । यज्ञियानाम् । विश्वेषाम् । अतिथिः । मानुषाणाम् ।
अग्निः । देवानाम् । अवः । आऽवृणानः । सुऽमृळीकः । भवतु । जातऽवेदाः ॥ २० ॥

अयमग्निः [v]विश्वेषां सर्वेषां [v]यज्ञियानां यज्ञार्हाणां देवानाम् [v]अदितिः । अदितिर्देवमाता । तद्वदेवानां पोषक इत्यर्थः । यद्वा । विश्वेषां देवानामदितिर्भूस्थानीयः आधारभूत इति यावत् । ' इयं वा अग्निर्वैश्वानरः ' (तै. ब्रा. ३. ९ १७) इति श्रुतेः । तथायमग्निः [v]विश्वेषां [v]मानुषाणां मनुष्याणाम्[1] [v]अतिथिः अतिथिवत् पूज्यो भवति । [v]देवानां देवनशीलानां स्तोतॄणाम् [v]अवः अन्नं हविः [v]आवृणानः संभजन् [v]जातवेदाः । जातं सर्वं वेत्तीति जातवेदाः[2] । सः [v]अग्निः तेषां स्तोतॄणां [v]सुमृळीकः सुखकरः [v]भवतु ॥ अतिथिः । ' अत सातत्यगमने ' । ' ऋतन्यञ्जि[v] ' इत्यादिना इथिन्प्रत्ययः । निरवादाद्युदात्तः । मानुषाणाम् । मनोरपत्यानीत्यर्थे ' मनोर्जातावञ्यतौ पुक्च ' इति अञ्प्रत्ययः । जित्स्वादाद्युदात्तः ॥ ॥ १५ ॥

' यो मर्त्येषु ' इति विंशत्यृचं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयम् । ' यो मर्त्येषु ' इत्यनुक्रमणिका । अस्य सूक्तस्य प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्त एव विनियोग उक्तः ॥

यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।
होता यजिष्ठो महा शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥ १ ॥

यः । मर्त्येषु । अमृतः । ऋतऽवा । देवः । देवेषु । अरतिः । निऽधायि ।
होता । यजिष्ठः । महा । शुचध्यै । हव्यैः । अग्निः । मनुषः । ईरयध्यै ॥ १ ॥

[v]अमृतः मरणधर्मरहितः [v]यः अग्निः [v]मर्त्येषु मनुष्येषु [v]ऋतावा सत्यवान् [v]निधायि निहितः । यद्वा । मर्त्येषु मनुष्यसंबन्धिषु वागादीन्द्रियेषु निहितः । ' अग्निर्वाग्भूत्वा मुखं प्राविशत् ' (ऐ. उ. २. ४) इति श्रुतेः । [v]देवः देवनशीलो योऽग्निरिन्द्रादिषु [v]देवेषु [v]अरतिः अभिगन्ता शत्रूणाम् । यद्वा देवलोके गन्ता । निधायि निहितः । स च [v]होता देवानामाह्वाता [v]यजिष्ठः यष्टृतमः [v]अग्निः [v]महा स्वकीयेन महता तेजसा [v]शुचध्यै दीपितुमुत्तरवेद्यां निहितः । किंच [v]हव्यैः हवनीयैराज्यपुरोडाशादिभिर्हविर्भिः[3] हेतुभिः[4] [v]मनुषः मनुष्यस्य यजमानस्य [v]ईरयध्यै स्वर्गं प्रति प्रेरणाय निहितः ॥ अरतिः । ' ऋ गतौ ' । ' वहिवस्यर्तिभ्यश्चित् ' इत्यतिप्रत्ययः । चित्स्वादन्तोदात्तः । निधायि । दधातेः कर्मणि लुङि रूपम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । शुचध्यै । ' शुच दीप्तौ ' । तुमर्थे कध्यैप्रत्ययः । कित्त्वादगुणः । प्रत्ययस्वरः । ईरयध्यै । ईरयतेस्तुमर्थे शध्यैप्रत्ययः । शित्त्वेन सार्वधातुकत्वात् णिलोपाभावः ॥

१. न-ल-स-' मनुष्याणां ' नास्ति । २. त-ल-जातवेदाः । जातान्येनं विदन्तीति वा जातवेदाः
३. ख-ग-च-ण-°पुरोडाशादिर्हविर्भिः । ४. ख-ग-घ-च-ण-भ-' हेतुभिः ' नास्ति ।

इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।
दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्राँश्च ॥ २ ॥

इह । त्वम् । सूनो इति । सहसः । नः । अद्य । जातः । जातान् । उभयान् । अन्तः । अग्ने ।
दूतः । ईयसे । युयुजानः । ऋष्व । ऋजुऽमुष्कान् । वृषणः । शुक्रान् । च ॥ २ ॥

हे ᵛसहसः ᵛसूनो बलस्य पुत्र ᵛअग्ने ᵛअद्य अस्मिन् दिवसे ᵛनः अस्मदीये ᵛइह कर्मणि ᵛजातः आधानपवमानेष्टिभिः संस्कृतः ᵛत्वं ᵛजातान् उत्पन्नान् ᵛउभयान् देवमनुष्यान् ᵛअन्तः तेषामुभयेषां मध्ये ᵛदूतः हवींषि देवान् प्रापयितुम् ᵛईयसे गच्छसि । किं कुर्वन् । हे ᵛऋष्व दर्शनीयाग्ने ᵛऋजुमुष्कान् । मुष्कशब्देन मांसलोऽभिधीयते । ऋजवः प्रसाधकाः । ऋजवश्च ते मुष्काश्च इति ऋजुमुष्काः । तान् ᵛवृषणः रेतःसेचनसमर्थान् ᵛशुक्रान् दीप्यमानानश्वान् ᵛच ᵛयुयुजानः स्वरथे योजयन्[1] ईयसे[2] । यद्वा । ऋष्व महन्नग्ने युयुजानो हविर्वहने नियुज्यमानस्त्वं वृषणो हविःसेचनसमर्थान् यजमानान् शुक्रान् दीप्तान् देवांश्चेयसे ॥ सूनो सहसः । ' परमपि छन्दसि ' इति सहसः पराङ्गवद्भावात् द्वयोः सर्वानुदात्तत्वम् । ईयसे । ' ईङ् गतौ ' । दिवादिः । निघातः । युयुजानः । युजेः वर्तमाने लिटि कानचि रूपम् । ऋष्व । संहितायाम् ' ऋत्यकः ' इति प्रकृतिभावः । ऋजुमुष्कान् । समासस्वरः ॥

अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तरीयसे अरुषा युजानो युष्माँश्च देवान्विश आ च मर्तान् ॥ ३ ॥

अत्या । वृधस्नू इति वृधऽस्नू । रोहिता । घृतस्नू इति घृतऽस्नू ।
ऋतस्य । मन्ये । मनसा । जविष्ठा ।
अन्तः । ईयसे । अरुषा । युजानः । युष्मान् । च । देवान् । विशः । आ । च । मर्तान् ॥ ३ ॥

हे अग्ने ᵛऋतस्य सत्यभूतस्य तव संबन्धिनौ ᵛमनसा मनसोऽपि ᵛजविष्ठा वेगवत्तमौ ᵛवृधस्नू । वर्धयतीति वृधमन्नम् । तत् क्षरन्तौ । ᵛघृतस्नू । घृतमुदकं तत्स्रवन्तौ ᵛरोहिता रोहितवर्णौ ᵛअत्या अश्वौ ᵛमन्ये स्तौमि । ᵛअरुषा आरोचमानौ तावश्वौ ᵛयुजानः रथे युञ्जानस्त्वं ᵛयुष्मान् । देवेष्वग्नेरन्तर्भावात् यजनीयरूपेण कीर्तनम् । युष्मान् यष्टव्यान् ᵛदेवान् ᵛविशः परिचारकान् ᵛमर्तान् मनुष्यान् ᵛअन्तः । षष्ठ्यर्थे द्वितीया । तेषां मध्ये ᵛआ समन्तात् ᵛईयसे हविः स्वीकर्तुं यजमानान् गच्छसि । तद्धविः प्रदातुं देवान् गच्छसि ॥ मन्ये । मन्यतिः अर्चतिकर्मा[3] । मनसा । ' सुपां सुलुक्° ' इति पञ्चम्या आकारः । युजानः । ' युजिर् योगे ' । ' युजिबुधिदृशः किच्च ' इत्यानचप्रत्ययः । चित्त्वादन्तोदात्तः ॥

---

१. ख-ग-च-भ–योजयसे । २. ख-ग-च-ण–स्तुतिकर्मा ।

अर्यमणं वरुणं मित्रमेषामिन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥ ४ ॥

अर्यमणम् । वरुणम् । मित्रम् । एषाम् । इन्द्राविष्णू इति । मरुतः । अश्विना । उत ।
सुऽअश्वः । अग्ने । सुऽरथः । सुऽराधाः । आ । इत् । ऊँ इति । वह । सुऽहविषे । जनाय ॥४॥

हे [v]अग्ने [v]स्वश्वः शोभनाश्वोपेतः [v]सुरथः शोभनरथः[१] [v]सुराधाः शोभनधनोपेतः त्वम्[२] [v]एषां मर्त्यानां मध्ये [v]सुहविषे शोभनहविष्काय [v]जनाय यजमानाय [v]अर्यमणं[३] [v]वरुणं [v]मित्रं [v]इन्द्राविष्णू [v]मरुतः [v]अश्विना अश्विनौ च[४] यष्टव्यान् देवान् [v]आ [v]वह [v]इदु आह्वयैव । उः पूरणः ॥ इन्द्राविष्णू । 'ऋत्रेन्द्र०' इत्यादिना निपातनादिन्द्रशब्द आद्युदात्तः । 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम् । सुहविषे[५] । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् ॥

गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥ ५ ॥

गोऽमान् । अग्ने । अविऽमान् । अश्वी । यज्ञः । नृवत्ऽसखा । सदम् । इत् । अप्रऽमृष्यः ।
इळाऽवान् । एषः । असुर । प्रजाऽवान् । दीर्घः । रयिः । पृथुऽबुध्नः । सुभाऽवान् ॥ ५ ॥

हे [v]असुर बलवन् हे [v]अग्ने [v]एषः मदीयोऽयं [v]यज्ञः [v]गोमान् गोभिस्तद्वान् [v]अविमान् । अवयो मेषा अस्य सन्ति इति[५] तद्वान् [v]अश्वी अश्वोपेतश्चास्तु[६] । [v]नृवत्सखा । नरः कर्मणां नेतारोऽध्वर्यवादयः तद्वन्तः सखायोऽनुष्ठातारो यजमाना यस्य स तथोक्तः । [v]सदमित् सदैव [v]अप्रमृष्यः अप्रधृष्यश्चास्तु । तथा [v]इळावान् । इळा हविर्लक्षणमन्नम् । तद्वान् । [v]प्रजावान् पुत्रपौत्रादियुक्तश्चास्तु । [v]दीर्घः अविच्छिन्नानुष्ठानोपेतः [v]रयिः धनवान् । लुप्तमत्वर्थीयः । [v]पृथुबुध्नः । पृथूनि बहुलानि बुध्नानि धनादीनि कारणानि यस्य स तथोक्तः । [v]सभावान् उपद्रष्टृरूपसभायुक्तश्चास्तु ॥ नृवत्सखा । नरो येषां सन्तीति नृवत् । मतुप् । तस्य छान्दसं वत्वम् । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । बहुव्रीहौ पूर्वपदस्वरः ॥ ॥ १६ ॥

यस्ते इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस्तस्य स्वतवाँ× पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥ ६ ॥

यः । ते । इध्मम् । जभरत् । सिस्विदानः । मूर्धानम् । वा । ततपते । त्वाऽया ।
भुवः । तस्य । स्वऽतवान् । पायुः । अग्ने । विश्वस्मात् । सीम् । अघऽयतः । उरुष्य ॥ ६ ॥

---

१. ख-ग-घ-च-ण-न-भ-ल-स-'शोभनरथः' नास्ति । २. ख-ग-घ-च-ण-फ-भ-त्वम् उत अपि च । ३. ण-ल-स-अर्यमादीन् उतापि चाश्विनौ । ४. ख-ग-च-ण-न-सुहविषे इत्यत्र; त-भ-स-सुहविषे चेत्यत्र । ५. त-न-भ-ल-स-'इति' नास्ति । ६. ख-ग-घ-च-ण-फ-भ-अश्वोपेतश्च ।

हे [v]अग्ने [v]ते स्वदर्थं [v]यः पुमान् [v]सिष्विदानः[1] स्विद्यद्गात्रः सन् [v]इध्मं स्वस्समिन्धनार्थं काष्ठभारं [v]जभरत् आहरति। यः [v]वा [v]स्वाया स्वत्कामनया [v]मूर्धानं स्वमस्तकं [v]ततपते काष्ठभारेण तापयति [v]तस्य तादृशस्य पुंसः [v]स्वतवान्। 'स्वतवान्धनवान्[2]' इति तलवकारे उक्तम्[2]। धनवान् [v]भुवः भवसि। [v]पायुः पालयितासि। [v]सीम् एनं [v]विश्वस्मात् सर्वस्मात्[3] [v]अघायतः अघं पापमिच्छतः पुरुषात् [v]उरुष्य रक्ष॥ जभरत्[4]। हरतेर्लुङि चङि रूपम्। 'चङ्यन्यतरस्याम्' इति चङ्पूर्वस्य उदात्तत्वम्। सिष्विदानः। 'ञिष्विदा गात्रक्षरणे'। कानचि रूपम्। संहितायाम् 'आदेशप्रत्यययोः' इति धातुसकारस्य षत्वम्। स्वाया। स्वामात्मन इच्छतीत्यर्थे क्यच्। 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य स्वादेशः। दकारस्य छान्दसमात्वम्। क्यजन्तात् धातोर्भावे 'अ प्रत्ययात्' इति अकारप्रत्ययः। 'सुपां सुलुक्०' इति तृतीयाया आकारः। एकादेशस्वरः। भुवः। भवतेर्लेट्यडागमे रूपम्। 'भूसुवोस्तिङि' इति गुणप्रतिषेधः। आगमस्यानुदात्तत्वे धातुस्वरः। स्वतवाँ ५ पायुः इत्यत्र संहितायां 'स्वतवान्पायौ' (पा. सू. ८. ३. ११) इति नकारस्य रुत्वम्। 'अत्रानुनासिकः पूर्वस्य तु वा' इति आकारोऽनुनासिकः। रेफस्य विसर्जनीयः। 'कुप्वोः ५ क ५ पौ च' इति ५ प इत्यादेशः। अघायतः। अघमात्मन इच्छतीत्यर्थे सुपः क्यच्[4]। 'अश्वाघस्यात्' इति आत्वम्। तदन्ताच्छतृप्रत्ययः। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। उरुष्य। उरुशब्दः कण्ड्वादिः। लोटि रूपम्। निघातः॥

यस्ते भरादनिषते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत्।
आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान्॥ ७॥

यः। ते। भरात्। अनिडयते। चित्। अन्नम्। निऽशिषत्। मन्द्रम्। अतिथिम्। उत्ऽईरत्। आ। देवऽयुः। इनधते। दुरोणे। तस्मिन्। रयिः। ध्रुवः। अस्तु। दास्वान्॥ ७॥

हे अग्ने [v]यः पुमान् [v]अन्नियते अन्नमिच्छते [v]ते तुभ्यं हविर्लक्षणं[5] पुरोडाशादिकम् [v]अन्नं[5] [v]भरात् दातुं बिभृयात्। [v]चित् इति चार्थे। यश्च [v]मन्द्रं मदकरं सोमं [v]निशिषत् नितरां प्रयच्छति। यश्च [v]अतिथिम् अतिथिवत् पूज्यं त्वाम् [v]उदीरत् उत्तरवेद्यां प्रणयति। [v]आ अपि च यश्च [v]देवयुः देवं[6] त्वां[6] कामयमानः [v]दुरोणे स्वकीये गृहे [v]इनधते त्वां समिद्भिः समिन्धते [v]तस्मिन् एतस्मिन् पुरुषे [v]रयिः पुत्रः [v]ध्रुवः आस्तिक्यबुद्ध्या वैदिके मार्गे निश्चलः [v]अस्तु। तथा [v]दास्वान् औदार्योपेतश्चास्तु॥ भरात्। 'डुभृञ् धारणपोषणयोः' इत्यस्य लेट्यडागमे रूपम्। यद्वृत्तयोगादनिघातः। अन्नियते। अन्नमात्मन इच्छते। क्यच्। 'क्यचि च' इति ईत्वम्। ह्रस्वश्छान्दसः। निशिषत्। 'शासु अनुशिष्टौ'। लुङि 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरडादेशः। 'शास इदङ्हलोः' इति ईत्वम्। उदीरत्। 'ईर गतौ'। लेटि व्यत्ययेन परस्मैपदम्। अडागमः। आगमस्यानुदात्तत्वे धातुस्वरः[7]। 'तिङि चोदात्तवति' इति गतेर्निघातः। इनधते। 'ञिइन्धी दीप्तौ'। लटि व्यत्ययेन शप्। रुधादित्वात् श्नम्। 'श्नाभ्यस्तयोरातः'

---

१. न–सिष्विदानः सिस्विदानः। २. ख-ग-घ-च-ण-फ-भ–'स्वतवान्.....उक्तं' नास्ति। ३. न-ल-स–'सर्वस्मात्' नास्ति। ४. ख-ग-च-ण-फ-भ–'जभरत् .....क्यच्' नास्ति। ५. ल–अन्नं हविर्लक्षणं पुरोडाशादिकम्। ६. ख-ग-घ-च-ण-त-फ-भ-स–देवत्वम्। ७. त–धातुस्वरः। उभयत्र।

इति धातुनकारलोपः । क्विप्परत्वाभावात्[1] असोरल्लोपाभावः । यदवृत्तयोगादनिघातः । भमः स्वरः । दास्वान् । 'दासृ दाने' । संपदादिलक्षणो भावे क्विप् । 'तदस्यास्ति' इति मतुप् । 'मादुपधायाः०' इति वत्वम् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसम् ॥ ८ ॥

यः । त्वा । दोषा । यः । उषसि । प्रऽशंसात् । प्रियम् । वा । त्वा । कृणवते । हविष्मान् ।
अश्वः । न । स्वे । दमे । आ । हेम्याऽवान् । तम् । अंहसः । पीपरः । दाश्वांसम् ॥ ८ ॥

हे अग्ने [v]यः पुमान् [v]दोषा दोषायां रात्रौ त्वां[2] [v]प्रशंसात् संस्तुयात् । [v]यः[3] च[4] [v]उषसि प्रातःकाले त्वां[4] प्रशंसेत् । [v]हविष्मान् संभृतहविष्को यः [v]वा यजमानः [v]त्वा त्वां [v]प्रियं हविर्भिः प्रीतं [v]कृणवते कुर्यात्[4] । [v]आ अथ [v]दाश्वांसं हविर्दत्तवन्तं [v]तं[5] तादृशं[5] यजमानं [v]स्वे [v]दमे स्वकीये गृहे [v]हेम्यावान् सुवर्णनिर्मितकक्ष्यावान् [v]अश्वो [v]न अश्व इव संचरंस्त्वम् [v]अंहसः पापरूपादारिद्र्यात् [v]पीपरः पारं नय । तस्मै यजमानाय बहु धनं प्रयच्छेत्यर्थः ॥ दोषा । सप्तम्या आकारः । प्रशंसात् । 'शंसु स्तुतौ' । लेटि आडागमे रूपम् । कृणवते । 'कृवि हिंसाकरणयोः' इत्यस्य लेटि 'धिन्विकृण्व्योरच्च' इत्युप्रत्ययः । 'लेटोऽडाटौ' इत्यडागमः । यदवृत्तयोगादनिघातः । प्रत्ययस्वरः । हेम्यावान् । हेम अर्हति । 'छन्दसि च' इति यः । पीपरः । 'पॄ पालनपूरणयोः' इत्यस्य ण्यन्तस्य लुङि चङि रूपम् । निघातः ॥

यस्तुभ्यमग्ने अमृताय दाशदुवस्त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः ॥ ९ ॥

यः । तुभ्यम् । अग्ने । अमृताय । दाशत् । दुवः । त्वे इति । कृणवते । यतऽस्रुक् ।
न । सः । राया । शशमानः । वि । योषत् । न । एनम् । अंहः । परि । वरत् । अघऽयोः ॥ ९ ॥

हे [v]अग्ने [v]यः यजमानः [v]अमृताय मरणधर्मरहिताय [v]तुभ्यं [v]दाशत् हवींषि प्रयच्छेत् । [v]यतस्रुक् संयतस्रुक्[6] यश्च यजमानः [v]त्वे त्वयि [v]दुवः परिचर्यां [v]कृणवते करोति [v]शशमानः स्तोत्रं कुर्वाणः [v]सः यजमानः [v]राया धनेन [v]न [v]वि [v]योषत न पृथग्भवेत् । सदा धनयुक्तो भवेदित्यर्थः । [v]अघायोः पापमिच्छतो हिंसकस्य संबन्धि [v]अंहः आहननं पापम् [v]एनं यजमानं [v]न [v]परि [v]वरत् न परिवृणुयात् । न स्पृशेदित्यर्थः ॥ दाशत् । 'दाशृ दाने' । लेट्यडागमे रूपम् । त्वे । 'सुपां सुलुक्०' इति सप्तम्याः शे इत्यादेशः । कृणवते । यदवृत्तयोगादनिघातः । योषत् । 'यु मिश्रणे' । लेटि 'सिब्बहुलम्' इति सिप् । अडागमः । निघातः । वरत । 'वृञ् वरणे' । लेटि रूपम् ॥

---

१. ख-ग-च-ण-त-न-फ-भ-स-क्तित्परत्वाभावात् । २. त-त्वा त्वाम् । ३. फ-तथा । ४. च-त्वा त्वां प्रशंसात् वा हविष्मान् त्वा त्वां प्रियं कृण्वते कुर्वते । ५. ख-ग-च-ण-न-फ-भ-स-'तं तादृशं' नास्ति; ध-तम्; ल-तादृशम् । ६. ख-ग-च-ग-'संयतस्रुक्' नास्ति ।

यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं ररा॑णः ।
प्रीतेदस॒द्धोत्रा सा य॑विष्ठासा॒म यस्य॑ विध॒तो वृ॒धास॑ः ॥ १० ॥

यस्य॑ । त्वम् । अग्ने । अध्व॒रम् । जुजो॑षः । देव॑ः । मर्त॑स्य । सु॒ऽधि॒तम् । रर॑ाणः ।
प्री॒ता । इ॒त् । अस॑त् । होत्रा॑ । सा । य॒वि॒ष्ठ॒ । असा॑म । यस्य॑ । वि॒ध॒तः । वृ॒धास॑ः ॥ १० ॥

हे [V]अग्ने [V]रराणः रममाणः[1] [V]देवः दीप्यमानः [V]त्वं [V]यस्य [V]मर्तस्य मनुष्यस्य संबन्धि [V]सुधितं त्वदर्थं सुष्ठु निहितम् [V]अध्वरम् अनुपहतं हविर्लक्षणमन्नं [V]जुजोषः सेवेथाः[2] हे [V]यविष्ठ युवतम [V]सा [V]होत्रा स होता यजमानः [V]प्रीतेदसत् प्रीत एव भवेत् । [V]असाम तस्य यजमानस्य संबन्धिनो भवेम [V]यस्य [V]विधतः अग्निपरिचर्यां कुर्वतो यजमानस्य होत्रादयः [V]वृधासः यज्ञस्य वर्धयितारो भवन्ति ॥ जुजोषः । 'जुषी प्रीतिसेवनयोः' इत्यस्य 'बहुलं छन्दसि' इति श्लुः । अडागमः । अभ्यस्तस्वरः । सुधितम् । दधातेर्निष्ठायां 'सुधितवसुधित०' इति निपातनात् धादेशः । 'गतिरनन्तरः' इति गतेः स्वरः । असाम । अस्तेर्लोटि 'आडुत्तमस्य पिच्च' इति आडागमः । उत्तमस्य पिद्वद्भावादनुदात्तत्वे धातुस्वरः । विधतः । 'विध विधाने' । तुदादिः । 'शतुरनुमः' इति विभक्तेरुदात्तत्वम् ॥ ॥ १७ ॥

चित्तिमचि॑त्तिं चिनव॒द्वि वि॒द्वान्पृ॒ष्ठेव॑ वी॒ता वृ॑जि॒ना च॒ मर्ता॑न् ।
रा॒ये च॑ नः स्वप॒त्याय॑ देव॒ दिति॑ं च रास्वादि॑तिमुरुष्य ॥ ११ ॥

चित्ति॑म् । अचि॑त्तिम् । चि॒न॒व॒त् । वि । वि॒द्वान् । पृ॒ष्ठाऽइ॑व । वी॒ता । वृ॒जि॒ना । च॒ । मर्ता॑न् ।
रा॒ये । च॒ । नः॒ । सु॒ऽअप॒त्याय॑ । देव॒ । दिति॑म् । च॒ । रास्व॑ । अदि॑तिम् । उ॒रु॒ष्य॒ ॥ ११ ॥

[V]विद्वान् प्राणिनां पुण्यपापरूपाणि कर्माणि जानानः सोऽग्निः [V]चित्तिं ज्ञातव्यं पुण्यम् [V]अचित्तिम् अनुपादेयत्वेनाचेतनीयं पापम् । यद्वा । चित्तिं ज्ञानमचित्तिमज्ञानं [V]वि [V]चिनवत् विचिनोतु पृथक्करोतु । तत्र दृष्टान्तः । [V]पृष्ठेव । यथाश्वपालोऽश्वानां [V]वीता कान्तानि [V]वृजिना दुर्वहाणि च पृष्ठा पृष्ठानि हेयोपादेयत्वेन[3] पृथक्करोति तद्वत् । किंच [V]मर्तान् पुण्यकृतोऽपुण्यकृतः [V]च मनुष्यान् पृथक्करोतु । हे [V]देव अग्ने [V]स्वपत्याय शोभनपुत्रोपेताय [V]राये धनाय [V]नः अस्मान् कुरु । [V]दितिं दातारं [V]च [V]रास्व देहि । [V]अदितिम् । पञ्चम्यर्थे द्वितीया । अदातुः सकाशात् [V]उरुष्य रक्ष ॥ चित्तिम् । 'चिती संज्ञाने' । स्त्रियां क्तिन् । नित्त्वादाद्युदात्तः । चिनवत । चिनोतेर्लेट्यडागमः । दितिम् । 'दाण् दाने' । कर्तरि[4] क्तिन्[4] । रास्व । 'रा दाने' । लोटि व्यत्ययेनात्मनेपदम् । 'चवायोगे प्रथमा' इति न निघातः ॥

---

१. ख-ग-च-स-'रममाणः' नास्ति । २ ख-ग-घ-च-ण-ञ-फ-भ सेवसे । ३. घ-ञ-ल-स-हेयोपादेयत्वेन । ४. ख-च-ण-त-न-भ-कर्मणि क्तिच; ल-कर्मणि क्तिन् ।

कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।
अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥ १२ ॥

कविम् । शशासुः । कवयः । अदब्धाः । निऽधारयन्तः । दुर्यासु । आयोः ।
अतः । त्वम् । दृश्यान् । अग्ने । एतान् । पट्ऽभिः । पश्येः । अद्भुतान् । अर्यः । एवैः ॥ १२ ॥

हे Vअग्ने Vआयोः मनुष्यस्य Vदुर्यासु गृहेषु Vअदब्धाः केनाप्यतिरस्कृताः Vनिधारयन्तः निवसन्तः Vकवयः क्रान्तदर्शो देवाः Vकविं मेधाविनं त्वां Vशशासुः । होता भवेति शशंसुः । Vअतः कारणात् Vअर्यः यज्ञस्य स्वामी Vत्वं Vदृश्यान् दर्शनीयान् Vअद्भुतान् आश्चर्यरूपोपेतानिन्द्रादीन् Vएतान् देवान् Vएवैः गमनशीलैः Vपड्भिः पादैः स्वतेजोभिः Vपश्येः जानीयाः ॥ दृश्यान् । 'दृशिर् प्रेक्षणे' । 'ऋदुपधाच्चाकृपिचृतेः' (पा. सू. ३. १. ११०) इति कर्मणि क्यप् । किस्वादगुणः । पित्त्वादनुदात्तत्वे धातुस्वरः ॥

त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ॥ १३ ॥

त्वम् । अग्ने । वाघते । सुऽप्रनीतिः । सुतऽसोमाय । विधते । यविष्ठ ।
रत्नम् । भर । शशमानाय । घृष्वे । पृथु । चन्द्रम् । अवसे । चर्षणिऽप्राः ॥ १३ ॥

हे Vयविष्ठ युवतम Vघृष्वे दीप्तियुक्त । यद्वा[1] । परेषां धर्षणशील[1] हे Vअग्ने Vचर्षणिप्राः अपेक्षितफलप्रदानेन मनुष्याणां कामपूरकः Vसुप्रणीतिः सुष्ठूत्तरवेद्यां प्रणयनीयः Vत्वं Vसुतसोमाय Vविधते तव परिचरणं कुर्वते Vशशमानाय त्वां स्तुवते Vवाघते यज्ञनिर्वाहकाय यजमानाय Vपृथु प्रभूतं Vचन्द्रम् आह्लादकारि[2] Vरत्नम् उत्तमं धनम् Vअवसे रक्षणाय Vभर आहर प्रयच्छेत्यर्थः ॥ सुप्रणीतिः[3] । 'णीञ् प्रापणे' । कर्मणि क्तिन् । 'तादौ च निति कृति०' इत्यनन्तरप्रशब्दस्योदात्तत्वम् । पृथु श्चन्द्रम् इत्यत्र संहितायां 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुडागमः । श्चुत्वेन शकारः[3] ॥

अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोर्ऋतं येमुः सुध्य आशुषाणाः ॥ १४ ॥

अध । ह । यत् । वयम् । अग्ने । त्वाऽया । पट्ऽभिः । हस्तेभिः । चकृम । तनूभिः ।
रथम् । न । क्रन्तः । अपसा । भुरिजोः । ऋतम् । येमुः । सुऽध्यः । आशुषाणाः ॥ १४ ॥

---

१. ख-घ-च-ण-फ-भ-'यद्वा ... घर्षणशील' नास्ति । २. ख-घ-च-ण-फ-भ-आह्लादकरम् । ३. ख-च-ण-फ-भ-'सुप्रणीतिः ..... शकारः' नास्ति ।

हे vअग्ने vअधा[1] vह अथ खलु vवयं vत्वाया त्वत्कामनया vपद्भिः पादैः vहस्तेभिः हस्तैः vतनूभिः अन्यैश्चावयवैः vचकृम vयत् यस्मात् कारणात् कर्मसिद्ध्यर्थं त्वामुपपादयामस्तस्मात् vसुध्यः सुकर्माणः vआशुषाणाः कर्माणि[2] व्याप्नुवन्तस्तेऽङ्गिरसः vऋतं सत्यभूतं त्वां vभुरिजोः। बिभृतः कर्मकरणसामर्थ्यं पदार्थान् वेति भुरिजौ बाहू। तयोः vअपसा मन्थनाख्येन कर्मणा vयेमुः उद्यच्छन्ति। तत्र दृष्टान्तः। vरथं vन। यथा vक्रन्तः कारवः शिल्पिनः क्रामन्तोऽध्वगा वा हस्तयोः यथा रथमुद्यच्छन्ति तद्वत्। यद्वा। भुरिजोः। देवान् मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ। तयोर्मध्येऽपसा परिचरणकर्मणा सत्यभूतं तमग्निं येमुः उद्यच्छन्ति॥ अध। संहितायां ' निपातस्य च ' इति दीर्घः। क्रन्तः। करोतेः शतरि ' बहुलं छन्दसि ' इति विकरणस्य लुक्। प्रत्ययस्वरः। भुरिजोः[3]। ' डुभृञ् धारणपोषणयोः '। ' भृञ उच्च ' इति इजिप्रत्ययः। धातोरुकारो रपरः। प्रत्ययस्वरः[4]॥

अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन्।
दिवस्पुत्रा अङ्गिरसो भवेमाद्रिं रुजेम धनिनं शुचन्तः॥ १५॥

अध। मातुः। उषसः। सप्त। विप्राः। जायेमहि। प्रथमाः। वेधसः। नॄन्।
दिवः। पुत्राः। अङ्गिरसः। भवेम। अद्रिम्। रुजेम। धनिनम्। शुचन्तः॥ १५॥

वामदेवोऽन्यैः पञ्चभिरङ्गिरोभिः सह ब्रूते। vअध अपि च vमातुरुषसः सकाशात् vसप्त सप्तसंख्याकाः vविप्राः प्राज्ञा वयं स्मः। vप्रथमाः श्रेष्ठा वयं vवेधसः अग्नेः परिचारकान् vनॄन् वेधसो विधातॄन् रश्मीन् वा vजायेमहि वयं जनयामः। vदिवः द्योतमानस्यादित्यस्य vपुत्राः वयं vअङ्गिरसो vभवेम भूतिमन्तः स्याम। vशुचन्तः दीप्यमाना वयं vधनिनम् उदकवन्तम् vअद्रिं मेघं vरुजेम वर्षार्थं भिन्द्याम। यद्वा। धनिनं पणिनामकासुरापहृतगोधनयुक्तमद्रिं पर्वतं रुजेम। अङ्गिरसामादित्यपुत्रत्वमेवमाम्नायते—' तस्य यद्येतसः प्रथममुददीप्यत तदसावादित्योऽभवत ' इत्युपक्रम्य[4] ' येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् ' (गो. ब्रा. ३. ३४) इति॥ जायेमहि। ' जनी प्रादुर्भावे '। लिङि ' ज्ञाजनोर्जा ' इति जादेशः। वेधसः। ' डुधाञ् धारणपोषणयोः ' इत्यस्मात् ' विधाञो वेध च ' (उ. सू. ४.६६४) इति असिप्रत्ययः। धातोर्वेधः इत्यादेशः। दिवस्पुत्रा इत्यत्र संहितायां ' षष्ठ्याः पतिपुत्र° ' इति विसर्जनीयस्य सत्वम्। रुजेम। ' रुजो भङ्गे '। अदादिः। लिङि रूपम्॥ ॥१८॥

१. न-ल-स-अध। २. ख-घ-च-ण-फ-भ-ल-कर्मणि। ३. ख-च-ण-भ-ल-' भुरिजोः..... प्रत्ययस्वरः ' नास्ति। ४. त-यद्द्वितीयमासीत्तद्भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात् स भृगुर्वारुणिरथ यत्तृतीयमदीदेदिव त आदित्या अभवन्।

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥ १६ ॥

अध । यथा । नः । पितरः । परासः । प्रत्नासः । अग्ने । ऋतम् । आशुषाणाः ।
शुचि । इत् । अयन् । दीधितिम् । उक्थऽशासः ।
क्षाम । भिन्दन्तः । अरुणीः । अप । व्रन् ॥ १६ ॥

हे [1]अग्ने [v]अध अपि च [v]परासः श्रेष्ठाः [v]प्रत्नासः पुराणाः [1]ऋतं सत्यभूतं यज्ञं[1] [v]यथा यथावत् [v]आशुषाणाः अश्नुवानाः [v]नः अस्माकं [1]पितरः अङ्गिरसः [v]शुचि दीप्तं स्थानम् [v]अयन् अगच्छन् । तथा [v]दीधितिं तेजश्चागच्छन् । किंच [1]उक्थशासः उक्थानां शस्त्राणां शंसितारः [1]क्षाम क्षयकारणं तमः पापं वा[2] [v]भिन्दन्तः विनाशयन्तोऽङ्गिरसः [1]अरुणीः अरुणवर्णाः पणिभिरपहृता गा उषसो[3] वा[3] [v]अप [v]व्रन् अपावृण्वन् । प्रकाशितवन्त इत्यर्थः ॥ अयन् । 'इण् गतौ' । लङि 'इणो यण्' इति यण् । व्यत्ययेन अडागमः । दीधितिम् । 'दीधीङ् दीप्तिदेवनयोः' इत्यस्मात् क्तिनि ह्रस्वश्छान्दसः । नित्त्वादाद्युदात्तः । उक्थशासः । उक्थशब्द उपपदे 'शंसु स्तुतौ' इत्यस्मात् 'मन्त्रे श्वेतवहोक्थशम्पुरोडाशो ण्विन्' (पा. सू. ३. २. ७१) इति ण्विन् नकारलोपश्च निपातनादेव । पदकाले ह्रस्वश्छान्दसः । अरुणीः । गौरादिर्ङीषन्तः । एकादेशस्वरः । व्रन् । वृणोतेर्लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् । निघातः ॥

आग्रयण आग्नेन्द्रस्य हविषः 'सुकर्माणः' इति याज्या । सूत्रितं च—'सुकर्माणः सुरुचो देवयन्तो विश्वे देवास आ गत' (आश्व. श्रौ. २. ९) इति ॥

सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥ १७ ॥

सुऽकर्माणः । सुऽरुचः । देवऽयन्तः । अयः । न । देवाः । जनिम । धमन्तः ।
शुचन्तः । अग्निम् । ववृधन्तः । इन्द्रम् । ऊर्वम् । गव्यम् । परिऽसदन्तः । अग्मन् ॥ १७ ॥

[v]सुकर्माणः सुष्ठुनुष्ठितयागादिकर्माणः [v]सुरुचः शोभनदीप्तयः [v]देवयन्तः देवान् कामयमानाः [v]देवाः देवनशीलाः स्तोतारः [v]जनिम स्वकीयं मानुषं जन्म [v]धमन्तः यागादिलक्षणेन कर्मणा निर्मलीकुर्वन्तः । तत्र दृष्टान्तः । [v]अयो [v]न । यथा कर्मारा अयो भस्त्रेण धमन्ति तद्वत् । तादृशाः[4] [v]अग्निं [v]शुचन्तः हविर्भिर्दीपयन्तः [v]इन्द्रं [v]ववृधन्तः सोमेन स्तुत्या वा[5] वर्धयन्तोऽङ्गिरसः [v]परिषदन्तः परितः

---

१. ख-च-ण-न-फ-भ-ल-'यज्ञं' नास्ति । २. ख-च-ण-न-भ-स-च । ३. ख-च-ण-भ-'उषसो वा' नास्ति । ४. ख-च-फ-तादृशम्; भ-ल-तादृशः । ५. ल-'स्तुत्या वा' नास्ति ।

सीदन्तः सन्तः Vऊर्वं महान्तं Vगव्यं गोसंघम् Vअग्मन् प्राप्नुवन् ॥ सुकर्माणः[1] । ' सोर्मन्सा° ' इत्युत्तरपदाद्युदात्तत्वम् । धमन्तः । ' धमा शब्दाग्निसंयोगयोः ' । शतरि पाघ्रादिना धमादेशः । शपः पित्त्वात् अनुदात्तत्वे* शतुर्लसार्वधातुकस्वरः[1] । ववृधन्तः । ' वृधु वर्धने ' । व्यत्ययेन परस्मैपदम् । शतरि शपः श्लुः । गव्यम् । गवां समूह इत्यर्थे ' खलगोरथात् ' इति यः । अग्मन् । गमेर्लुङि च्लेर्लुकि रूपम् ॥

आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमान्त्युग्र ।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः ॥ १८ ॥

आ । यूथाऽइव । क्षुऽमति । पश्वः । अख्यत् । देवानाम् । यत् । जनिम । अन्ति । उग्र ।
मर्तानाम् । चित् । उर्वशीः । अकृप्रन् । वृधे । चित् । अर्यः । उपरस्य । आयोः ॥ १८ ॥

Vउग्र तेजस्विन् हे अग्ने Vदेवानाम् अङ्गिरसां संबन्धि Vयज्जनिम यं गोसंघम् Vअन्ति पर्वतस्य समीपे Vआ Vअख्यत आ समन्तादिन्द्रोऽपश्यत् । तत्र दृष्टान्तः । Vयूथेव । यथा Vपश्वः पशूनां गवां यूथानि Vक्षुमति अन्नवत्याढ्यगृहे वर्तमानानि पश्यन्ति जनास्तद्वत् । यद्वा । हे अग्ने तव परिचारकः अङ्गिरोगणः[2] देवानाम् इन्द्रादीनां यज्जनिम योऽयं जनः अन्ति महन्तिके पश्वः पणिभिः अपहृतान् पशून् आख्यत् समन्तान् पश्यति । तत्र दृष्टान्तः । यथा क्षुमति शब्दं कुर्वाणे गवां यूथा यूथे पशून् पश्यन्ति तद्वत् । Vमर्तानां Vचित मनुष्याणाम् Vउर्वशीः ऊरुभ्याम् अश्नुवानाः । ' उर्वभ्यश्नुत ऊरुभ्यामश्नुते ' (निरु. ५. १३) इति यास्कः । प्रजाः Vअकृप्रन् । ताभिरानीताभिर्गोभिः क्लृप्ताः समर्था अभवन् । Vचित अपि च Vअर्यः स्वामी लब्धगोधनः Vउपरस्य उप्तस्य निषिक्तस्यापत्यस्य Vवृधे वर्धनाय समर्थो भवति । तथा Vआयोः मनुष्यस्य भृत्यादेश्च पोषणे समर्थो भवति ॥ यूथेव । शसः सप्तम्या वा डादेशः । क्षुमति । क्षुत् इत्यन्ननाम । यद्वा । ' टुक्षु शब्दे ' । भावे क्विप् । छान्दसः तकारलोपः । ' तदस्यास्ति ' इति मतुप् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । अख्यत् । ' ख्या प्रकथने ' । लुङि च्लेः ' अस्यतिवक्तिख्यातिभ्योऽङ् ' इत्यङादेशः । आतो लोपः । जनिम । ' जनी प्रादुर्भावे ' । ' हृजनिभ्यामिमनिन् ' इति इमनिन्प्रत्ययः । निघ्वादाद्युदात्तः । अकृप्रन् । ' कृपू सामर्थ्ये ' । लुङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । रडागमः ॥

अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश्चारु चक्षुः ॥ १९ ॥

अकर्म । ते । सुऽअपसः । अभूम । ऋतम् । अवस्रन् । उषसः । विभातीः ।
अनूनम् । अग्निम् । पुरुधा । सुऽचन्द्रम् । देवस्य । मर्मृजतः । चारु । चक्षुः ॥ १९ ॥

---

१. ख-च-ण-न-भ-स-' सुकर्माणः ... °स्वरः ' नास्ति । * त-ल-अनुदात्तत्वम् । २. ख-च-त-भ-स-अङ्गिरसो गणः; ण-न-अङ्गिरसां गणः ।

हे अग्ने [v]ते तव परिचरणम् [v]अकर्म कुर्मः । तेन कर्मणा [v]स्वपसः शोभनकर्माणः [v]अभूम । [v]विभार्तीः व्युच्छन्त्यः [v]उषसः [v]ऋतं तेजः [v]अवस्रन् आच्छादयन्ति । धारयन्तीत्यर्थः । तथा ता उषसः [v]अनूनं संपूर्णं [v]पुरुधा बहुधा [v]सुश्चन्द्रं सुष्ठ्वाह्लादकारिणं यद्वा सुहिरण्यम् [v]अग्निं धारयन्ति । किंच [v]देवस्य द्योतमानस्य तव [1]चारु मनोहरं [v]चक्षुः तेजः [v]मर्मृजतः परिचरन्तो वयं स्वपसोऽभूमेति पूर्वेणान्वयः ॥ अकर्म । करोतेर्लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । मर्मृजतः । ' मृजूष् शुद्धौ ' । यङ्लुकि ' रुग्रिकौ च लुकि ' इत्यभ्यासस्य रुगागमः । झतरि ' नाभ्यस्ताच्छतुः ' इति नुमभावः । अभ्यस्तस्वरः ॥

एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥ २० ॥

एता । ते । अग्ने । उचथानि । वेधः । अवोचाम । कवये । ता । जुषस्व ।
उत् । शोचस्व । कृणुहि । वस्यसः । नः । महः । रायः । पुरुऽवार । प्र । यन्धि ॥ २० ॥

[v]वेधः विधातर्हे [v]अग्ने [v]कवये मेधाविने [1]ते तुभ्यम् [1]एता एतानि [1]उचथानि उक्थानि शस्त्राणि [v]अवोचाम । त्वं [v]ता तानि [v]जुषस्व सेवस्व । किंच त्वम् [1]उच्छोचस्व उद्दीप्यस्व । [1]नः अस्मान् [v]वस्यसः अतिशयेन धनयुक्तान् [v]कृणुहि कुरु । तदेवोच्यते । [1]पुरुवार पुरुभिर्बहुभिर्वरणीय [v]महो [v]रायः महद्धनं [v]प्र [v]यन्धि अस्मभ्यं प्रयच्छ ॥ अवोचाम । ' वच परिभाषणे ' । लुङि च्लेरङादेशः । पादादित्वादनिघातः । कृणुहि । ' कृवि हिंसाकरणयोः ' इत्यस्य लोटि रूपम् । तिङः उत्तरत्वादनिघातः । वस्यसः । वसुमच्छब्दात् ईयसुनि ' विन्मतोर्लुक् ' इति मतुपो लुकि टिलोपे च कृते ईकारलोपश्छान्दसः । यन्धि । यमेर्लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' वा छन्दसि ' इति हेर्विकल्पेन पित्त्वात् ' अङ्ङितश्च ' इति धिरादेशः ॥ ॥ १९ ॥

' आ वो राजानम् ' इति षोडशर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयम् । ' आ वः षळ्च ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः ॥

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ १ ॥

आ । वः । राजानम् । अध्वरस्य । रुद्रम् । होतारम् । सत्यऽयजम् । रोदस्योः ।
अग्निम् । पुरा । तनयित्नोः । अचित्तात् । हिरण्यऽरूपम् । अवसे । कृणुध्वम् ॥ १ ॥

हे ऋत्विग्यजमानाः [v]अध्वरस्य यज्ञस्य[1] [v]राजानम् अधिपतिं [v]होतारं देवानामाह्वातारं [v]रुद्रं रोरूयमाणं द्रवन्तं शत्रून् रोदयन्तं वा । यद्वा । ' एषा वा अग्नेस्तनूर्यद्रुद्रः ' इति रुद्रात्मकं [v]रोदस्योः

१. ख-च-ण-न-' यज्ञस्य ' नास्ति ।

द्यावापृथिव्योः vसत्ययजं सत्यस्यान्नस्य दातारम् । यद्वा । सत्ययजं सत्येन हविषा देवान् यजन्तम् । यद्वा । रोदस्योर्व्याप्य वर्तमानम् vहिरण्यरूपं सुवर्णप्रभम् एवंविधम् vअग्निं vवः युष्माकम् vअवसे रक्षणाय vतनयित्नोः । तनयित्नुरशनिः स ह्याकस्मिकः । तत्सदृशात् vअचित्तात् । न विद्यते चित्तं यस्मिन् तदचित्तम् । चित्तोपलक्षितसर्वेन्द्रियोपसंहारो मरणमिति यावत् । तस्मान्मरणात्[1] vपुरा प्रागेव vआ vकृणुध्वम् । यूयं समन्ताद्धविर्भिरग्निं भजध्वम् ॥ रुद्रम् । रोदयतेः 'रोदेर्णिलुक्च' (उ. सू. २. १७९) इति रक्प्रत्ययः । तनयित्नोः । तनिः शब्दार्थः । चुरादिरदन्तः । 'स्तनि-शुधिपुषिगमिमनिभ्यो णेरित्नुच्' (उ. सू.३. ३०९) इति इत्नुच्प्रत्ययः । चित्स्वरेणान्तोदात्तः । सुपा सहैकादेशे एकादेशस्वरः । कृणुध्वम् । 'कृवि हिंसाकरणयोः' । लोटि रूपम् ॥

अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ २ ॥

अयम् । योनिः । चकृम । यम् । वयम् । ते । जायाऽइव । पत्ये । उशती । सुऽवासाः ।
अर्वाचीनः । परिऽवीतः । नि । सीद । इमाः । ऊँ इति । ते । सुऽअपाक । प्रतीचीः ॥ २ ॥

हे अग्ने vतेऽ त्वदर्थं vयम् उत्तरवेदिलक्षणं प्रदेशं vवयं vचकृम कुर्मः । vअयं vयोनिः तव स्थानं भवति । तत्र दृष्टान्तः । vजायेव । यथा vपत्य vउशती पतिं कामयमाना vसुवासाः शोभनवस्त्रोपेता जाया स्वात्मसमीपे तस्य स्थानं करोति तद्वत् । हे vस्वपाक स्वपस्क सुकर्मन्नग्ने त्वं vपरिवीतः यष्टव्यदेवैस्तेजोभिर्वा परिवीतः vअर्वाचीनः अस्मदभिमुखः सन् vनि vषीद उत्तरवेद्यामुपविश । तत्र स्थितस्य vते तव vइमाः ज्वालाः स्तुतयः[2] वा vप्रतीचीः त्वदभिमुखाः प्रवर्तन्ते । vउ[3] पूरणः[4]॥ चकृम । करोतेर्लिटि रूपम् । वाक्यभेदान्निघाताभावः । अर्वाचीनः । 'विभाषाञ्चेरदिक्०' इति खः । परिवीतः । 'व्येञ् संवरणे' । कर्मणि निष्ठा । यजादित्वात् संप्रसारणम् । 'गतिरनन्तरः' इति गतेः स्वरः ॥

आशुण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः ।
देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥ ३ ॥

आऽशुण्वते । अदृपिताय । मन्म । नृऽचक्षसे । सुऽमृळीकाय । वेधः ।
देवाय । शस्तिम् । अमृताय । शंस । ग्रावाऽइव । सोता । मधुऽसुत् । यम् । ईळे ॥ ३ ॥

vवेधः स्तोत्राणां कर्तर्हे स्तोतः vआशुण्वते स्तोत्राकर्णनपराय vअदृपिताय अदृप्तायाप्रमत्ताय vनृचक्षसे नृणां द्रष्ट्रे vसुमृळीकाय सुसुखाय vअमृताय मरणधर्मरहिताय vदेवाय तस्मा अग्नये vमन्म स्तोत्रं vशस्तिं शस्त्रं च vशंस । vमधुषुत् मदकरस्य सोमस्य सोता । तत्र दृष्टान्तः । vग्रावेव । यथा ग्रावा सोमस्य vसोता तद्वत् । सोमाभिषवं कुर्वाणो यजमानः vयम् अग्निम् vईळे स्तौति । तस्मै शंसेति

१. ख-घ-च-ण-न-फ-भ-स-तन्मरणात् । २. ख-च-न-भ-स-'ते' नास्ति । ३. ख-च-ण-फ-भ-स-ऊतयः । ४. ख-च-न-भ-ल-स-'उ पूरणः' नास्ति ।

समन्वयः । यद्वा । मधुपुत् सोमसुद्यजमानोऽग्निर्माळे स्तौति । तत्र दृष्टान्तः । यथा ग्रावा सोमस्य सोता शब्दं करोति । ' प्रेते वदन्तु प्र वयं वदाम ग्रावभ्यः ' (ऋ. सं. १०. ९४. १) इत्यत्र ग्राव्णां शब्दकर्तृत्वं[1] श्रुतमिति ॥ आश्रृण्वते । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । ईळे । ' ईड स्तुतौ ' । लटि ' लोपस्त आत्मनेपदेषु ' इति तलोपः । यद्वा । लिटि तशब्दस्य एशादेशे कृते रूपम् ॥

त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।
कदा ते उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥ ४ ॥

त्वम् । चित् । नः । शम्यै । अग्ने । अस्याः । ऋतस्य । बोधि । ऋतऽचित् । सुऽआधीः ।
कदा । ते । उक्था । सधऽमाद्यानि । कदा । भवन्ति । सख्या । गृहे । ते ॥ ४ ॥

हे ᵛअग्ने ᵛत्वं ᵛचित् त्वमेव ᵛशम्यै । शर्माशब्दः कर्मनाम । ᵛअस्याः शम्यै ᵛनः अस्मत्संबन्धिनोऽस्य कर्मणो देवता भवसि । हे ᵛऋतचित् सत्यज्ञ हे अग्ने ᵛस्वाधीः सुकर्मा सुध्यानो वा त्वम् ᵛऋतस्य ᵛबोधि अस्मदीयं स्तोत्रं बुध्यस्व । ᵛते तव ᵛसधमाद्यानि सहमदनिमित्तानि ᵛउक्था शस्त्राणि ᵛकदा कस्मिन् काले ᵛभवन्ति भविष्यन्ति । तथास्मदीये ᵛगृहे ᵛते त्वया सह ᵛसख्या सख्यानि ᵛकदा भविष्यन्ति ॥ सधमाद्यानि । मादयतेर्ण्यन्तस्य ' अचो यत् ' इति यत् । ' सध मादस्थयोः° ' इति सहस्य सधादेशः । भवन्ति । ' विभाषा कदाकर्ह्योः ' (पा. सू. ३. ३. ५) इति भविष्यदर्थे लट् ॥

कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः ।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥ ५ ॥

कथा । ह । तत् । वरुणाय । त्वम् । अग्ने । कथा । दिवे । गर्हसे । कत् । नः । आगः ।
कथा । मित्राय । मीळ्हुषे । पृथिव्यै । ब्रवः । कत् । अर्यम्णे । कत् । भगाय ॥ ५ ॥

हे ᵛअग्ने ᵛत्वं ᵛतत् अस्मदीयं पापं ᵛवरुणाय ᵛकथा ᵛगर्हसे । केन हेतुना गर्हापूर्वमावेदयेः । ᵛह इति पूरणः । ᵛदिवे द्युलोकाय द्योतमानाय सूर्याय वा ᵛकथा कथं तत्पापमावेदयेः । ᵛनः अस्माकम् ᵛआगः तत्पापं[2] ᵛकत्[3] किमस्ति । त्वत्परिचरणान्नास्तीत्यर्थः । तथा ᵛमीळ्हुषे अभिमतफलसेवत्रे ᵛमित्राय ᵛपृथिव्यै च ᵛकथा ᵛब्रवः कथमागो ब्रूयाः । ᵛअर्यम्णे देवाय ᵛभगाय एतन्नामकाय च देवाय ᵛकत्[3] कथं ब्रूयाः ॥ कथा । किंशब्दात् ' था हेतौ च छन्दसि ' इति थाप्रत्ययः । ' प्राग्दिशो विभक्तिः ' इति विभक्तिसंज्ञायां ' किमः कः ' (पा. सू. ७. २. १०३) इति कादेशः । मीळ्हुषे । ' मिह सेचने ' । क्सौ ' दाश्वान् साह्वान् मीढ्वांश्च ' इति निपातितः । ब्रवः । ' ब्रूञ् व्यक्तायां वाचि ' । लेटि ' लेटोऽडाटौ ' इत्यडागमः । पादादित्वादनिघातः । आगमस्यानुदात्तत्वात् धातुस्वरः ॥ ॥ २० ॥

१. ख-ग-त-न-भ-ल-स-कर्तृत्वम् । २. ख-घ-च-ण-न-प-फ-भ-स-पापं कथा किं ते; त-तत्पापं कथा किं ते । ३. ख-च-ण-प-फ-भ-कत् पापम् ।

कद्विष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥ ६ ॥

कत् । धिष्ण्यासु । वृधसानः । अग्ने । कत् । वाताय । प्रऽतवसे । शुभम्ऽये ।
परिऽज्मने । नासत्याय । क्षे । ब्रवः । कत् । अग्ने । रुद्राय । नृऽघ्ने ॥ ६ ॥

हे [v]अग्ने [v]धिष्ण्यासु आग्नीध्रीयादिधिष्ण्येषु [v]वृधसानः घृताद्याहुतिभिर्वर्धमानस्त्वं [v]कत्[1] कथं ब्रूयाः । [v]प्रतवसे प्रकृष्टबलाय [v]शुभंये शुभस्य प्रापयित्रे [v]परिज्मने परितो गन्त्रे [v]नासत्याय सत्यस्य नेत्रे । यद्वा न विद्यतेऽसत्यं यस्य तस्मै । [v]वाताय वायवे । यद्वा नासत्याय इति वचनव्यत्ययः । नासत्याभ्यामश्विभ्याम् । [v]क्षे । क्षा इति पृथिवीमाह । क्षियन्ति निवसन्त्यस्यां प्राणिन इति । तस्यै क्षे पृथिव्यै च [v]कत् कथं ब्रूयाः । हे [v]अग्ने [v]नृघ्ने नृणां पापकृतां हन्त्रे [v]रुद्राय देवाय [v]कत् कथमागः [v]ब्रवः ब्रूयाः ॥ वृधसानः । ' वृधु वर्धने ' । ' असानच् ' इत्यनुवृत्तौ ' ऋक्षिवृधिमन्दिसहिभ्यः कित् ' इति असानच्प्रत्ययः । कित्त्वादगुणः । चित्त्वादन्तोदात्तः । शुभंये । ' या प्रापणे ' । विच् । ' तत्पुरुषे कृति बहुलम् ' इति द्वितीयायाः अप्यलुक्[2] । कृत्स्वरः । क्षे । ' क्षि निवासगत्योः ' । ' अन्येभ्योऽपि दृश्यते ' इत्यधिकरणे ङः । ततष्टाप् । चतुर्थ्येकवचने ' आतो धातोः ' इत्यत्र ' आतः ' इति योगविभागात् आकारलोपः । नृघ्ने । ' हन हिंसागत्योः ' । ' बहुलं छन्दसि ' इति क्विप् ॥

कथा महे पुष्टिभराय पूष्णे कद्रुद्राय सुमखाय हविर्दे ।
कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥ ७ ॥

कथा । महे । पुष्टिम्ऽभराय । पूष्णे । कत् । रुद्राय । सुऽमखाय । हविःऽदे ।
कत् । विष्णवे । उरुऽगायाय । रेतः । ब्रवः । कत् । अग्ने । शरवे । बृहत्यै ॥ ७ ॥

हे [v]अग्ने [v]महे महते [v]पुष्टिभराय पुष्टिधारकाय [v]पूष्णे एतन्नामकाय देवाय [v]कथा केन हेतुना पापं ब्रवीथाः । [v]सुमखाय सुपूजनीयाय सुयज्ञाय वा [v]हविर्दे अग्निरूपेण देवानां हविर्दात्रे । यद्वा स्विष्टकृत्त्वाद्धविषो दात्रे । [v]रुद्राय [v]कत् कथं ब्रूयाः । तथा [v]उरुगायाय उरुभिर्बहुभिः गीयमानाय[3] यद्वा प्रभूतकीर्तये [v]विष्णवे [v]रेतः क्षयहेतुं पापं [v]कत् कथं वदेः । [v]शरवे । शृणाति पक्वा ओषधीरिति शरुः शरत् संवत्सरः । यद्वा । हिंसिका निर्ऋतिः । [v]बृहत्यै महत्यै शरदे[4] निर्ऋत्यै वा [v]कत् कथं पापं [v]ब्रवः ब्रूयाः ॥ पुष्टिंभराय । ' डुभृञ् धारणपोषणयोः ' । संज्ञायां ' भृतृवृजि०' इत्यादिना खच् । ' अरुर्द्विषदजन्तस्य मुम्[5] ' इति पूर्वपदस्य मुमागमः[5] । चित्त्वादन्तोदात्तः । समासे कृत्स्वरः । हविर्दे । ' अनुदात्तस्य च यत्रोदात्तलोपः ' इति सुप उदात्तत्वम् । शरवे । ' शॄ हिंसायाम् ' । ' शॄस्वृस्निहित्रप्यसि०' इत्यादिना उप्रत्ययः । ' नित् ' इत्यनुवृत्तेराद्युदात्तः ॥

१. ख-घ-च-ण-प-फ-भ-कत् पापम् । २. त-अलुक् । ३. ख-च-ण-भ-स-गायमानाय । ४. ख-घ-च-ण-त-न-भ-स-शरवे । ५. ख-च-ण-त-न-भ-स-इति मुम् पूर्वपदस्य ।

कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ।
प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥ ८ ॥

कथा । शर्धाय । मरुताम् । ऋताय । कथा । सूरे । बृहते । पृच्छ्यमानः ।
प्रति । ब्रवः । अदितये । तुराय । साध । दिवः । जातऽवेदः । चिकित्वान् ॥ ८ ॥

हे अग्ने ᵛऋताय गन्त्रे सत्यभूताय वा ᵛमरुतां ᵛशर्धाय बलभूताय गणाय ᵛकथा केन हेतुना मदीयमागः प्रतिब्रूयाः । तेन ᵛपृच्छ्यमानः सन् तस्मै ᵛबृहते महते[1] ᵛसूरे सूर्याय ᵛकथा कथं वदेः । तथा ᵛअदितये देव्यै ᵛतुराय त्वरितगमनाय वायवे च[2]। अदितयेऽदीनाय तुराय वा । ᵛप्रति ᵛब्रवः । मदीयमागः कथं प्रतिब्रूयाः । यस्मादेवं तस्मात् हे ᵛजातवेदः अग्ने ᵛचिकित्वान् एतत्सर्वं[3] जानानस्त्वं ᵛदिवः दीप्तान् देवान् ᵛसाध साधय गच्छ । यद्वा । दिवो द्युलोकस्य यज्ञवहनलक्षणं कार्यं साध कुरु॥ सूरे । सर्वविधीनां छन्दसि विकल्पितत्वात् ङेर्यत्वाभावः । ' अतो गुणे ' इति पररूपत्वम् । पृच्छ्यमानः । ' प्रच्छ ज्ञीप्सायाम् ' । कर्मणि यक् । ग्रहिज्यादिना संप्रसारणम् । ज्ञानचौ लसार्वधातुकानुदात्तत्वे यक्स्वरः । साध । ' राध साध संसिद्धौ ' । अन्तर्भावितण्यर्थस्य लोटि व्यत्ययेन श्नु ॥

ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥ ९ ॥

ऋतेन । ऋतम् । निऽयतम् । ईळे । आ । गोः । आमा । सचा । मधुऽमत् । पक्वम् । अग्ने ।
कृष्णा । सती । रुशता । धासिना । एषा । जामर्येण । पयसा । पीपाय ॥ ९ ॥

हे ᵛअग्ने ᵛऋतेन सत्यभूतेन यज्ञेन ᵛनियतम् अनुस्यूतम् ᵛऋतम् उदकं ᵛगोः धेनोः पयः ᵛआ ᵛईळे आयाचे । सांनाय्यादिहविरर्थं गव्यं पयस्त्वां याचे इत्यभिप्रायः । ᵛआमा अपक्वा सा गौः ᵛमधुमत् माधुर्योपेतं ᵛपक्वं पयः ᵛसचा सह धारयति । ᵛकृष्णा कृष्णवर्णा ᵛसती ᵛएषा गौः ᵛरुशता श्वेतेन ᵛधासिना प्राणिनां धारकेण ᵛजामर्येण । जायन्त इति जाः प्रजाः । तासाम्[4] अमर्येण अमरणनिमित्तेन तेन ᵛपयसा ᵛपीपाय प्रजाः प्याययति । तवैष महिमा यद्रसान् परिणामयन्नेवं करोषि ॥ पीपाय । प्यायतेर्लिटि ' लिड्यङोश्च ' इति पीभावः ॥

ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
अस्पन्दमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥ १० ॥

ऋतेन । हि । स्म । वृषभः । चित् । अक्तः । पुमान् । अग्निः । पयसा । पृष्ठ्येन ।
अस्पन्दमानः । अचरत् । वयःऽधाः । वृषा । शुक्रम् । दुदुहे । पृश्निः । ऊधः ॥ १० ॥

---

१. ख-घ-च-ण-न-भ-ल-स–' महते ' नास्ति । २. न-ल-स–' च ' नास्ति । ३. न-स–तत्सर्वम् । ४. ख-घ-च-ण-भ–ताः जाः ।

[v]वृषभः अभिमतफलवर्षकः [v]पुमान् श्रेष्ठः सः [v]अग्निः [v]ऋतेन सत्यभूतेन [v]पृक्षेण धारकेण [v]पयसा [v]अक्तः सिक्तो भवति। [v]हि [v]ष्म[1] [v]चित्[2] त्रयः पूरणाः। [v]वयोधाः अन्नदः सोऽग्निः [v]अस्पन्दमानः एकत्रावस्थितः सन् एव [v]अचरत् सर्वत्र तेजसा चरति। तथा [v]वृषा अपां वर्षकः [v]मृभिः सूर्यैः [v]शुक्रं पयः [v]ऊधः अन्तरिक्षं मेघं वा [v]दुदुहे दोग्धि ॥ अक्तः। 'अञ्जू व्यक्तिम्रक्षणगतिषु'। कर्मणि निष्ठा। दुदुहे। द्विकर्मकोऽयं धातुः। ऊधः। 'अकथितं च' इति कर्मसंज्ञा ॥ ॥ २१॥

ऋतेनाद्रिं व्यसन्भिदन्तः समङ्गिरसो नवन्त गोभिः।
शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥ ११ ॥

ऋतेन। अद्रिम्। वि। असन्। भिदन्तः। सम्। अङ्गिरसः। नवन्त। गोभिः।
शुनम्। नरः। परि। सदन्। उषसम्। आविः। स्वः। अभवत्। जाते। अग्नौ ॥ ११ ॥

[v]अङ्गिरसः मेधातिथिप्रभृतयः [v]ऋतेन यज्ञेन हेतुना गवां निरोधकम् [v]अद्रिं पर्वतं [v]भिदन्तः विदारयन्तः सन्तः [v]व्यसन् व्यक्षिपन्[3]। ततस्ते [v]गोभिः [v]सं [v]नवन्त समगच्छन्त। [v]नरः कर्मणां नेतारः ते [v]शुनं सुखेन [v]उषसं [v]परि[4] [v]सदन्[5] परितः प्राप्नुवन्। ततः [v]स्वः सूर्योऽपि [v]आविः [v]अभवत्। सर्वमेतत् [v]अग्नौ त्वयि [v]जाते मथनेन[6] निष्पादिते सत्यभूदिति ॥ असन्। अस्यतेर्लुङि च्लेः 'अस्यतिवक्ति०' इत्यादिना अङादेशः। 'अनित्यमागमशासनम्[7]' इति धुगभावः ॥

ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने।
वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥ १२ ॥

ऋतेन। देवीः। अमृताः। अमृक्ताः। अर्णःऽभिः। आपः। मधुमत्ऽभिः। अग्ने।
वाजी। न। सर्गेषु। प्रऽस्तुभानः। प्र। सदम्। इत्। स्रवितवे। दधन्युः ॥ १२ ॥

हे [v]अग्ने [v]अमृताः अमरणहेतवः [v]अमृक्ताः रक्षःप्रभृतिभिरबाधिताः [v]मधुमद्भिः माधुर्योपेतैः [v]अर्णोभिः उदकैर्युक्ताः [v]देवीः देव्यो नद्यः [v]ऋतेन सत्येन यज्ञेन वा हेतुना [v]आपः आप्तव्याः सत्यः [v]सदमित् सदैव [v]स्रवितवे स्रवणाय [v]प्र [v]दधन्युः प्रगच्छन्ति। तत्र दृष्टान्तः। [v]वाजी [v]न। यथा [v]सर्गेषु प्रेरणेषु [v]प्रस्तुभानः प्रोत्साह्यमानः[8] अश्वः प्रगच्छति तद्वत् ॥ आपः। 'आप्लृ व्याप्तौ'। 'आप्नोतेः क्विप् ह्रस्वश्च' इति कर्मणि क्विप्। 'अमृन्०' इत्यादिना जसि दीर्घः। प्रस्तुभानः। स्तोभतिरर्चतिकर्मा ॥

१. त–स्म। २. ल–चिदिति। ३. ख-घ-च-ण-त-न-प-फ-भ-स–प्रक्षिपन्। ४. ख-घ-च-ण–परिषदन्। ५. च–मन्थनेन। ६. त–अनित्यमागमानुशासनम्। ७. त–प्रसह्यमानः।

मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः ।
मा भ्रातुरग्ने अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥ १३ ॥

मा । कस्य । यक्षम् । सदम् । इत् । दुरः । गाः । मा । वेशस्य । प्रऽमिनतः । मा । आपेः ।
मा । भ्रातुः । अग्ने । अनृजोः । ऋणम् । वेः । मा । सख्युः । दक्षम् । रिपोः । भुजेम ॥ १३ ॥

हे [v]अग्ने [v]दुरः अस्माकं हिंसकस्य [v]कस्य कस्यचिदपि जन्तोः [v]यक्षं यज्ञं [v]सदमित् सदैव [v]मा [v]गाः कदाचिदपि मा गच्छ । [v]प्रमिनतः हिंसकस्य [v]वेशस्य प्रातिवेश्यस्य[1] यज्ञं मा गाः । तथा [v]आपेः मद्व्यतिरिक्तस्य बन्धोर्यज्ञं [v]मा गच्छ । तथा [v]अनृजोः कुटिलचित्तस्य [v]भ्रातुः [v]ऋणम् ऋणवद्देयं हविः [v]मा [v]वेः मा कामयेथाः । तथा वयमपि [v]सख्युः मित्रस्य [v]रिपोः शत्रोः [v]दक्षं भोगसमर्थं धनं [v]मा [v]भुजेम मा भुञ्जीमहि । किंतु त्वया दत्तं धनं भुञ्जीमहि ॥ दुरः । 'ह प्रसह्यकरणे' । क्विप् । 'बहुलं छन्दसि' इति उत्वम् । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । भुजेम । 'भुज पालनाभ्यवहारयोः' । आशीर्लिङि व्यत्ययेन परस्मैपदम् । 'लिङ्याशिष्यङ्' इति अङ्प्रत्ययः ॥

रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानम् ॥ १४ ॥

रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः ।
प्रति । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः । महि । चित् । ववृधानम् ॥ १४ ॥

[v]सुमख सुयज्ञ सुधनेति वा हे [v]अग्ने [v]ररक्षाणः भृशमस्माकं रक्षिता [v]प्रीणानः हविर्भिः प्रीतः त्वं [v]तव [v]रक्षणेभिः स्वदीयैरवनैः [v]नः अस्मान् [v]रक्ष पालय । [v]प्रति [v]स्फुर अस्मान् प्रति दीप्यस्व । [v]वीळु दृढम् [v]अंहः पापं [v]वि [v]रुज विशेषेण नाशय । किंच [v]महि [v]चित् महदपि[2] [v]वावृधानं वर्धमानं वृद्धं वा बाधकं [v]रक्षः [v]जहि ॥ नः । 'नश्च धातुस्थोरुषुभ्यः' इति संहितायां णत्वम् । ररक्षाणः । रक्षेर्यङ्लुकि चानशि रूपम् । जहि । 'हन हिंसागत्योः' । लोटि 'हन्तेर्जः' इति जादेशः । आभाच्छास्त्रीयस्यासिद्धत्वात् 'अतो हेः' इति लुक् न भवति ॥

एभिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥ १५ ॥

एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश । मन्मऽभिः । शूर । वाजान् ।
उत । ब्रह्माणि । अङ्गिरः । जुषस्व । सम् । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥

१. ख-घ-च-ण-प-फ-भ-जनस्य; त-जनस्य प्रातिवेशस्य । २. ख-घ-च-ण-त-न-भ-ल-महत् ।

हे [v]अग्ने [v]एभिः मदीयैः[1] [v]अर्कैः अर्चनीयैः शस्त्रैः [v]सुमनाः शोभनमनस्कः [v]भव । हे [v]शूर [v]हमान् अस्मदीयान् हविर्लक्षणान् [v]वाजान् अन्नानि[2] [v]मन्मभिः स्तोत्रैः सह [v]स्पृश प्रतिगृहाण । [v]उत अपि च [v]अङ्गिरः । अङ्गति हवींषि प्राप्नोतीत्यङ्गिरा अग्निः । यद्वा । 'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' (ऐ. ब्रा. ३. ३४) इति ब्राह्मणम् । तेषामङ्गिरसां कारणत्वादग्नेरङ्गिरस्त्वम् । तत्कारणत्वे[3] च मन्त्रः 'ये अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे' (ऋ. सं. १०. ६२. ५) इति । तादृश हे अग्ने [v]ब्रह्माणि मन्त्रान् [v]जुषस्व सेवस्व । [v]देववाता । देवार्थं[4] गता देवान् स्तोतुं प्राप्तेत्यर्थः । तादृशी [v]शस्तिः शंसनं [v]ते त्वां [v]सं [v]जरेत संवर्धयतु ॥ स्पृश । 'स्पृश संस्पर्शने' । तुदादिः । देववाता । 'वा गतिगन्धनयोः' । 'गत्यर्थाकर्मक०' इति कर्तरि क्तः । देवः । पचाद्यजन्तः । 'क्ते च' इति चतुर्थ्यन्तस्य पदस्य प्रकृतिस्वरः ॥

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥

एता । विश्वा । विदुषे । तुभ्यम् । वेधः । नीथानि । अग्ने । निण्या । वचांसि ।
निऽवचना । कवये । काव्यानि । अशंसिषम् । मतिऽभिः । विप्रः । उक्थैः ॥ १६ ॥

[v]वेधः विधातर्हे [v]अग्ने [v]विदुषे कर्मविषयज्ञानवते [v]कवये क्रान्तदर्शिने [v]तुभ्यं [v]नीथानि फलप्रापकाणि[5] [v]निण्या नेयार्थानि गूढानि [v]निवचना नितरां वक्तव्यानि [v]काव्यानि कविभिर्मेधाविभिः कृतानि [v]एता [v]विश्वा एतानि[6] सर्वाणि [v]वचांसि वाक्यानि [v]मतिभिः मननीयैः स्तोत्रैः [v]उक्थैः शस्त्रैश्च सहितः [v]विप्रः प्राज्ञोऽहम् [v]अशंसिषम् अवोचम् । तानि सेवस्वेत्यर्थः ॥ ॥ २२ ॥

'कृणुष्व' इति पञ्चदशर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभं रक्षोहाग्निदेवताकम् । 'कृणुष्व पाजो नाक्षोद्यम्' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः । प्रवर्ग्येऽभिष्टवे 'कृणुष्व पाजः' इत्याद्याः पञ्चर्चो विनियुक्ताः । सूत्रितं च— कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पञ्च' (आश्व. श्रौ. ४. ६) इति ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥

कृणुष्व । पाजः । प्रऽसितिम् । न । पृथ्वीम् । याहि । राजाऽइव । अमऽवान् । इभेन ।
तृष्वीम् । अनु । प्रऽसितिम् । द्रूणानः । अस्ता । असि । विध्य । रक्षसः । तपिष्ठैः ॥१॥

हे [v]अग्ने [v]पाजः तेजःसंघं [v]कृणुष्व कुरुष्व विस्तारय । तत्र दृष्टान्तः । [v]प्रसितिं [v]न । यथा मृगयुः [v]पृथ्वीं विस्तीर्णां प्रसितिं प्रकर्षेण सीयते बध्यत इति प्रसितिर्वागुरा । तादृशीं प्रसितिं पक्षिग्रहणार्थं

---

१. घ-ण-न-भ-स-मदनीयैः; च-फ-भवदीयैः; प-महनीयैः । २. न-ल-स-'अन्नानि' नास्ति । ३. ख-च-तत्कारणम्; न-भ-स-तत्कारणे । ४. ख-च-ण-न-फ-भ-स-देवती(ता)र्थम् । ५. ख-घ-च-ण-प-फ-भ-प्रापकाणि । ६. ख-च-ण-भ-एतानि विश्वानि ।

वनगहनेषु प्रसारयति तद्वत् त्वमपि रक्षांसि हन्तुं महद्बलमग्रतस्तनुष्व । [v]इभेन गतभयेन तेजःसंघेन युक्तस्त्वं [v]याहि रक्षांसि हन्तुं गच्छ । तत्र दृष्टान्तः । [v]राजेव । यथा [v]अमवान् । राज्ञा[1] सह वर्तते इत्यमः अमात्यः । तद्वान् । यद्वा । अमोऽमनं रोगः । शत्रूणां कर्तव्यै रोगैस्तद्वान् । शत्रूणां रोगभूत इत्यर्थः । राजा [v]इभेन गजेन युक्तः सन् परबलं प्रतिगच्छति तद्वत् । किंच [v]तृष्वीम् । तृष्वीति क्षिप्रनाम । क्षिप्रगामिनीं [v]प्रसितिं प्रकृष्टां सेनाम् [v]अनु [v]द्रूणानः अनुगच्छन् । यद्वा । तृष्वीमिति तृतीयार्थे द्वितीया । तृष्व्या क्षिप्रया प्रसित्या अनुबद्धया[2] संततया गत्या द्रूणानः परसेनां हिंसन् [v]अस्ता शत्रूणां क्षेप्ता [v]असि । [v]तपिष्ठैः तप्ततमैः[3] तेजोभिः [v]रक्षसः राक्षसान् [v]विध्य ताडय । अत्र निरुक्तम्– ' कुरुष्व पाजः । पाजः पालनात् । प्रसितिमिव पृथ्वीम् । प्रसितिः प्रसहनात्तन्तुर्वा जालं वा । याहि राजेवामात्यवानभ्यमनवान्त्स्ववान्वेरावता गणेन गतभयेन हस्तिनेति वा । तृष्व्यानु प्रसित्या द्रूणानः । तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वा । अस्तासि विध्य रक्षसस्तपिष्ठैस्तपनतमैः[4] तपिष्ठतमैरिति वा ' (निरु. ६. १२) इति ॥ कृणुष्व । ' कृवि हिंसाकरणयोः ' । लोटि ' धिन्विकृण्व्योर च ' इत्युप्रत्ययः । व्यत्ययेनात्मनेपदम् । विकरणस्वरस्तु सतिशिष्टोऽपि लसार्वधातुकस्वरं न बाधते इति लसार्वधातुकस्वरः (पा. म. ६. १. १५८. ११) ॥

तवं भ्रमासं आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥ २ ॥

तवं । भ्रमासंः । आशुऽया । पतन्ति । अनु । स्पृश । धृषता । शोशुचानः ।
तपूंषि । अग्ने । जुह्वा । पतङ्गान् । असंम्ऽदितः । वि । सृज । विष्वक् । उल्काः ॥ २ ॥

हे [v]अग्ने [v]तव संबन्धिनः [v]भ्रमासः भ्राम्यन्तः [v]आशुया शीघ्रगतयो रश्मयः [v]पतन्ति सर्वतः प्रसरन्ति । [v]शोशुचानः भृशं दीप्यमानस्त्वं [v]धृषता अभिभवसमर्थेन तेजःसंघेन शत्रून् [v]अनु क्रमेण [v]स्पृश दह । दहनोपायं दर्शयति । [v]असंदितः परैरनिरुद्धस्त्वं [v]तपूंषि तापकानि तेजांसि [v]पतङ्गान् पतनशीलान् विस्फुलिङ्गान् [v]उल्काः चेत्येतत्त्रितयं [v]जुह्वा । हूयन्तेऽस्यामाहुतय इति जुहूर्ज्वाला । तया [v]विष्वक् सर्वतः [v]वि [v]सृज प्रसारय ॥ आशुया । आशुशब्दाज्जसः ' सुपां सुलुक्° ' इति याजादेशः । चित्स्वरः । धृषता । ' धृषं[5] प्रसहने ' । चुरादिराधृषीयः । व्यत्ययेन शः । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । जुह्वा । ' जुहोतेर्दीर्घश्च ' इति क्विप् द्विर्वचनं दीर्घत्वम् । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वस्य ' नोङ्धात्वोः ' इति प्रतिषेधे ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । असंदितः । ' दो अवखण्डने ' । कर्मणि निष्ठा । ' द्यतिस्यति° ' इति इत्वम् । नञा[6] समासे[6] तस्य स्वरः ॥

१. ख-ग-च-ण-न-म–राजा । २. ख-ग-च-ण-भ–अनुवृद्धया । ३. ख-ग-च-ण-स–तप्ततमैः ।
४. न-ल-म–' तृप्ततमैः ' नास्ति । ५. ख-ग-च-त-न-भ-ल-स- धृषु । ६. ख-ग-च-ण-भ–नञ्समासे ।

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ ३ ॥

प्रति । स्पशः । वि । सृज । तूर्णिऽतमः । भव । पायुः । विशः । अस्याः । अदब्धः ।
यः । नः । दूरे । अघऽशंसः । यः । अन्ति । अग्ने । माकिः । ते । व्यथिः । आ । दधर्षीत् ॥ ३ ॥

हे [v]अग्ने [v]तूर्णितमः त्वरिततमस्त्वं [v]स्पशः परबाधकान् रश्मीन् चारान्[1] वा सत्यानृतविवेकार्थं [v]वि [v]सृज शत्रून् [v]प्रति विशेषेण प्रेरय । [v]अदब्धः केनाप्यहिंसितस्त्वम् [v]अस्याः त्वदीयायाः [v]विशः अस्मदादिकायाः प्रजायाः [v]पायुः पालकः [v]भव । कस्मात्तद्रक्षणमित्यपेक्षायामाह । [v]नः अस्माकं [v]दूरे [v]यः [v]अघशंसः । अघं पापात्मकं शंसनमभिलापः कीर्तनं वा[2] यस्य सोऽघशंसः । [v]यः च अघशंसः [v]अन्ति अस्माकं समीपे तिष्ठति तस्मादुभयविधाच्छत्रोः पालको भव । किंच [v]ते त्वत्संबधिनोऽस्मान् [v]माकिः न कश्चिदपि [v]व्यथिः बाधको राक्षसः [v]आ [v]दधर्षीत् आधर्षयतु । अस्माकं कश्चिदपि परिभवं मा करोत्वित्यर्थः ॥ अन्ति । अन्तिकस्य कादिलोप आद्युदात्तत्वं च । अग्ने । पादादित्वात् पाष्टिकमाद्युदात्तत्वम् । माकिष्टे इति संहितायां ' युष्मत्तत्ततक्षुःष्वन्तःपादम् ' इति षत्वम् । दधर्षीत् । ' धृष प्रसहने ' । लङि ' बहुलं छन्दसि ' इति शपः श्लुः । ' बहुलं छन्दसि ' इति तिप ईडागमः । निघातः ॥

उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ ओषताति ग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ ४ ॥

उत् । अग्ने । तिष्ठ । प्रति । आ । तनुष्व । नि । अमित्रान् । ओषतात् । तिग्मऽहेते ।
यः । नः । अरातिम् । सम्ऽइधान । चक्रे । नीचा । तम् । धक्षि । अतसम् । न । शुष्कम् ॥ ४ ॥

[v]तिग्महेते । तिग्माः[3] तीक्ष्णाः* हेतयो ज्वाला यस्य स तथोक्तः । तादृश[3] हे [v]अग्ने [v]उत् [v]तिष्ठ रक्षोहननार्थमुद्यतो भव । शत्रून् [v]प्रत्या [v]तनुष्व ज्वालासंघं विस्तारय । तैस्तेजःसंघैः [v]अमित्रान् शत्रून् [v]नि [v]ओषतात् नितरां दह । हे [v]समिधान समिद्भिर्दीप्यमानाग्ने [v]यः पुमान् [v]नः अस्माकम् [v]अरातिम् । भावप्रधाननिर्देशः । अरातित्वं शात्रवं [v]चक्रे कुरुते । अरातिमदानं वा कुरुते । [v]तं पुमांसं [v]नीचा न्यग्भूतं [v]धक्षि दह । तत्र दृष्टान्तः । [v]अतसं [v]न । यथा [v]शुष्कम् अनार्द्रम् अतसं काष्ठं दहसि तद्वत् ॥ ओषतात् । ' उष दाहे ' । लोटि हेः ' तुह्योः ' इति तातङादेशः । धक्षि । दहेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' हो ढः ' इति ढत्वम् । भष्भावः । ' पढोः कः सि ' इति कत्वम् । निघातः ॥

१. ख-ग-च-ण-न-भ-परान् । २. ख-ग-घ-च-ण-न-भ-स-' वा ' नास्ति । ३. ख-ग-घ-च-ण-प-फ-भ-तीक्ष्णज्वाल । * स-तीव्राः ।

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥ ५ ॥

ऊर्ध्वः । भव । प्रति । विध्य । अधि । अस्मत् । आविः । कृणुष्व । दैव्यानि । अग्ने ।
अव । स्थिरा । तनुहि । यातुऽजूनाम् । जामिम् । अजामिम् । प्र । मृणीहि । शत्रून् ॥५॥

हे [v]अग्ने [v]ऊर्ध्वो [v]भव रक्षोहननार्थमुद्युक्तो भव । [v]अस्मत् अस्मत्तः [v]अधि अधिकान् राक्षसान् [v]प्रति [v]विध्य प्रत्येकं ताडय । [v]दैव्यानि तेजांसि च[1] [v]आविष्कृणुष्व आविष्कुरु । एतत्त्रयं विधाय [v]यातुजूनां यातयितुं प्राणिनः क्लेशयितुं ये जवं कुर्वन्ति तेषां यातुधानानां [v]स्थिरा दृढानि धनूंषि [v]अव [v]तनुहि अवगतज्यानि कुरु । किंच [v]जामिं[2] बन्धुम् [v]अजामिम् अबन्धुम्[2] एतादृशान्[3] [v]शत्रून् [v]प्र [v]मृणीहि प्रजहि । यद्वा । जामिं यः पूर्वं प्रहृतस्तम् । अजामिं पूर्वमप्रहृतम् । एवंभूतान् शत्रून् जहि । प्रहृतोऽयम् इत्युपेक्षां[4] मा कृथाः ॥ आविष्कृणुष्व इत्यत्र संहितायाम् 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वम् । तनुहि । तनोतेर्लोटि 'उतश्च प्रत्ययाच्छन्दसि वावचनम्' इति हेर्लुगभावः । यातुजूनाम् । 'जु गतौ' । 'क्विब्वचि०' इत्यादिना क्विप्[5] । दीर्घः[6] । आमि छान्दसो नुम् । मृणीहि । 'मृङ् प्राणत्यागे' । अन्तर्भावितण्यर्थस्य लोटि 'बहुलं छन्दसि' इति विकरणस्य श्ना । निघातः ॥ ॥ २३ ॥

स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥ ६ ॥

सः । ते । जानाति । सुऽमतिम् । यविष्ठ । यः । ईवते । ब्रह्मणे । गातुम् । ऐरत् ।
विश्वानि । अस्मै । सुऽदिनानि । रायः । द्युम्नानि । अर्यः । वि । दुरः । अभि । द्यौत् ॥६॥

[v]यविष्ठ युवतम यद्वा देवानां हवींषि मिश्रयितृतम हे अग्ने [v]यः पुमान् [v]ईवते गमनवते कल्याणहेतुभूतागमनाय[6] [v]ब्रह्मणे परिवृढाय तुभ्यं [v]गातुम् । । गीयते उच्चार्यते इति गातुः स्तोत्रम् । तत् [v]ऐरत् प्रेरयति । [v]सः पुमान् [v]ते तव [v]सुमतिं कल्याणकरीमनुग्रहात्मिकां बुद्धिं [v]जानाति लभत इत्यर्थः । [v]अस्मै स्तोत्रं कृतवते यजमानाय तदर्थं [v]विश्वानि सर्वाणि[9] [v]सुदिनानि शोभनानि[8] दिनानि[7] [v]रायः धनानि [v]द्युम्नानि द्युतिमन्ति रत्नकनकादीनि [v]दुरः गृहान् [v]अभि अभिलक्ष्य [v]अर्यः यज्ञानां स्वामी त्वं [v]वि [v]द्यौत् विशेषेण द्योतस्व । केचिदत्र वाक्यभेदमङ्गीकुर्वते । स्तोत्रं कृतवते यजमानाय विश्वानि सुदिनानि अभ्युदयकारीणि भवन्ति । रायः । रान्ति क्षीरादीनीति रायो गोधनानि[7] । द्युम्नानि द्योतमानानि कनकादीनि चास्मै भवन्ति । अर्यः कर्मणामनुष्ठाता सः[10] यजमानो दुरो गृहानभि

१. ख-ग-घ-च-ण-त-न-प-फ-भ-'च' नास्ति । २. न-ल-स-जामिमजामिं बन्धुमबन्धुम् । ३. ख-ग-तादृशान्; न-ल-स-'एतादृशान्' नास्ति । ४. न-भ-ल-स-इत्यपेक्षाम् । ५. ण-ल-क्विब्दीर्घौ । ६. ख-ग-घ-च-ण-त-प-फ-भ-स-कल्याणहेतुभूतगमनाय । ७. न-ल-स-'सर्वाणि' नास्ति । ८. ख-ग-घ-च-ण-भ-'शोभनानि दिनानि' नास्ति । ९. च-ल-धनानि । १०. ख-ग-च-ण-न-भ-स-'सः' नास्ति ।

वि[1] द्यौत् विशेषेण द्योतते॥ ईवते। 'ईं गतौ'। क्विप्। 'तदस्यास्ति॰' इति मतुप्। 'छन्दसीरः' इति मतुपो वत्वम्। ऐरत्। 'ईर गतौ'। यदवृत्तयोगादनिघातः[2]। अर्यः। 'ऋ गतौ'। 'अर्यः स्वामिवैश्ययोः' इति यत्प्रत्ययान्तो निपातितः[3]। स्वामिन्यन्तोदात्तत्वम्। द्यौत्। 'द्युत दीप्तौ'। छान्दसे लुङि 'द्युद्भ्यो लुङि' इति परस्मैपदम्। 'बहुलं छन्दसि' इत्यडभावः॥

सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः॥ ७॥

सः। इत्। अग्ने। अस्तु। सुऽभगः। सुऽदानुः। यः। त्वा। नित्येन। हविषा। यः। उक्थैः। पिप्रीषति। स्वे। आयुषि। दुरोणे। विश्वा। इत्। अस्मै। सुऽदिना। सा। असत्। इष्टिः॥७॥

हे [v]अग्ने [v]यः पुमान् [v]नित्येन यावज्जीवं संकल्पितेनाग्निहोत्रादिसाधनभूतेन [v]हविषा [v]त्वा त्वां [v]पिप्रीषति प्रीणयितुमिच्छति, [v]यः च [v]उक्थैः शस्त्रैः प्रीणयितुमिच्छति [v]सेत् स एव पुमान् [v]सुभगः शोभनधनः[4] सौभाग्यवान् वा [v]सुदानुः शोभनदानोपेतश्च [v]अस्तु। किंच [v]दुरोणे दुरवने कृच्छ्रलभ्ये [v]स्वे स्वकीये [v]आयुषि शतवर्षाख्ये जीवने[5] तिष्ठतु[6]। [v]अस्मै यजमानाय [v]विश्वा सर्वाणि [v]सुदिना शोभनानि दिनानि भवन्तु। अस्य [v]सा [v]इष्टिः स यज्ञः [v]असत् फलसाधनसमर्थो भवतु॥ पिप्रीषति। 'प्रीञ्[7] तर्पणे'। 'धातोः कर्मणः॰' (पा. सू. ३. १. ७) इति सन्। असत्। अस्तेर्लेट्यडागमः। इष्टिः। 'मन्त्रे वृष॰' इत्यादिना क्तिन्नुदात्तः॥

उखासंभरणीयेष्टावग्नेः क्षत्रभृतः 'अर्चामि ते' इति याज्या। सूत्रितं च— 'अर्चामि ते सुमतिं घोष्यर्वागितीदंप्रभृतिकर्मणाम्' (आश्व. श्रौ. ४. १) इति॥

अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्॥ ८॥

अर्चामि। ते। सुऽमतिम्। घोषि। अर्वाक्। सम्। ते। ववाता। जरताम्। इयम्। गीः। सुऽअश्वाः। त्वा। सुऽरथाः। मर्जयेम। अस्मे इति। क्षत्राणि। धारयेः। अनु। द्यून्॥ ८॥

हे अग्ने [v]ते तव [v]सुमतिम् अनुग्रहकरीं[8] शोभनां बुद्धिम् [v]अर्चामि[9] पूजयामि। [v]ववाता[10] पुनः-पुनस्त्वाम्[11] अभिगच्छन्ती इयम् उच्यमाना [v]गीः वाक् [v]घोषि घोषयुक्तं यथा भवति तथा [v]अर्वाक्

---

१. ख-ग-घ-च-ण-न-भ-स-'वि' नास्ति। २. ख-ग-च-ण-त-न-भ-ल-स-'यदवृत्तयोगादनिघातः' नास्ति। ३. ख-ग-च-ण-फ-भ-ल-निपातः। ४. त-ल-शोभनधनयुक्तः। ५. त-न-फ-भ-जीवने निमित्ते सति यस्त्वां प्रीणयति सः (त-अस्तु) सुभगोऽस्तु। यद्वा यस्त्वां प्रीणयति स्वकीये गृहे स्व आयुषि शतवर्षाख्ये जीवने। ६. ण-अस्तु तिष्ठतु; भ-तिष्ठतु अस्तु। ७. ख-ग-च-ण-त-न-भ-प्रीङ्। ८. ख-ग-न-भ-ल-स-अनुग्रहकराम्। ९. ण-अर्चामि अर्चयामि। १०. ण-वावाता। ११. ख-ग-च-प-फ-भ-पुनः त्वा त्वाम्; घ-ण-पुनःपुनस्त्वा त्वाम्।

त्वदभिमुखं ᵛते त्वां ᵛसं ᵛजरतां स्तौतु[1] । वयमपि ᵛस्वश्वाः शोभनाश्वोपेताः ᵛसुरथाः च । उपलक्षणमेतत् । पुत्रपौत्रादिभिः सहिताः सन्तः त्वां ᵛमर्जयेम अलंकुर्याम । परिचरेमेति यावत् । त्वं तु ᵛअनु ᵛद्यून् अन्वहम् ᵛअस्मे अस्मासु ᵛक्षत्राणि धनानि ᵛधारयेः निधेहि ॥ घोषि । 'घुषि[2] शब्दने' । औणादिक इन् । नित्त्वादाद्युदात्तः । वावाता[4] । 'वा गतिगन्धनयोः' इत्यस्य यङ्लुगन्तस्य निष्ठायां[5] रूपम् । मर्जयेम । 'मृजू शौचालंकारयोः' । ण्यन्तस्य लिङि रूपम् । वृद्ध्यभावश्छान्दसः ॥

इह त्वा भूरि चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ ९ ॥

इह । त्वा । भूरि । आ । चरेत् । उप । त्मन् । दोषाऽवस्तः । दीदिऽवांसम् । अनु । द्यून् ।
क्रीळन्तः । त्वा । सुऽमनसः । सपेम । अभि । द्युम्ना । तस्थिऽवांसः । जनानाम् ॥ ९ ॥

हे अग्ने ᵛइह रक्षोहननाख्ये कर्मणि यद्वा अस्मिन् लोके यः पुरुषः ᵛदोषावस्तः रात्रावहनि च ᵛदीदिवांसं दीप्यमानं ᵛत्वा[6] त्वाम् ᵛअनु ᵛद्यून् अन्वहं ᵛत्मन् आत्मना स्वयमेव ᵛउप समीपे ᵛभूरि भूयिष्ठं यथा भवति तथा ᵛआ ᵛचरेत् परिचरति। तस्माद्वयमपि ᵛजनानां शत्रूणां ᵛद्युम्ना द्युम्नानि धनानि ᵛअभि ᵛतस्थिवांसः त्वत्प्रसादादात्मसात्कुर्वन्तोऽत एव ᵛक्रीळन्तः[7] स्वे स्वे गृहे पुत्रपौत्रादिभिः सह संक्रीडमानास्तथा ᵛसुमनसः शोभनमनस्काः सन्तस्त्वां ᵛसपेम परिचरेम । यद्वा । दोषावस्तरिति संबुद्धिः । दोषाया रात्रिकृतस्य तमसो वस्तराच्छादयितर्निवारयितः ॥ त्मन् । आत्मन्शब्दस्य तृतीयायाः 'सुपां सुलुक्०' इति लुक् । 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः । दोषावस्तः । द्वन्द्वपक्षे 'कार्तकौजपादयश्च' इति पूर्वपदप्रकृतिस्वरः । संबुद्धिपक्षे आमन्त्रितस्य पादादित्वान् पाठिकमाद्युदात्तत्वम् । सपेम । 'षप समवाये' । लिङि रूपम् । निघातः ॥

यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवासि तस्य सखा यस्ते आतिथ्यमानुषग्जुजोषत् ॥ १० ॥

यः । त्वा । सुऽअश्वः । सुऽहिरण्यः । अग्ने । उपऽयाति । वसुऽमता । रथेन ।
तस्य । त्राता । भवासि । तस्य । सखा । यः । ते । आतिथ्यम् । आनुषक् । जुजोषत् ॥ १० ॥

हे ᵛअग्ने ᵛयः पुमान् ᵛस्वश्वः शोभनाश्वोपेतः ᵛसुहिरण्यः यागयोग्यधनोपेतः ᵛवसुमता व्रीह्यादिधनयुक्तेन ᵛरथेन सहितः सन् ᵛत्वा[8] त्वाम्[8] ᵛउपयाति परिचरणार्थं तव समीपं गच्छति । ᵛतस्य पुंसः ᵛत्राता सर्वदुरितेभ्यो रक्षकः ᵛभवसि । ᵛयः च पुमान् ᵛते तव ᵛआतिथ्यम् अतिथियोग्यां पूजाम् ᵛआनुषक् अनुक्रमेण ᵛजुजोषत प्रापयति ᵛतस्य पुंसः ᵛसखा तदुचितफलप्रदानेनोपकर्ता भवसि ॥

१. ख-ग-घ-च-ण-त-भ-स्तोतुं संसरताम् ; स-संसरताम । २. ण-त्वा त्वाम् । ३. च-फ-घुषि । ४. ल-ववाता । ५. ख-ग-च-ण-न-भ-स-'निष्ठायां' नास्ति । ६. न-ल-स-'त्वा' नास्ति । ७. ख-ग-च-ण-न-भ-स-क्रीडन्तः । ८. ख-ग-घ-च-भ-त्वा; त-न-ल-स-'त्वा त्वां' नास्ति ।

उपयाति । ' सह सुपा ' इत्यत्र सहेति योगविभागात् समासः । तिपः पित्त्वादनुदात्तत्वे धातुस्वरः । ' तिङि चोदात्तवति ' इति गतेर्निघातः । आतिथ्यम् । अतिथिशब्दात् तादर्थ्ये ' अतिथेर्ण्यः ' इति ण्यप्रत्ययः । प्रत्ययस्वरः । जुजोषत् । जोषयतेर्लङि ' बहुलं छन्दसि ' इति शपः श्लुः । अडागमः । ' छन्दस्युभयथा ' इति तिप आर्धधातुकत्वात् णिलोपः । ' अभ्यस्ताना मादिः ' इत्याद्युदात्तः[1] ॥ ॥ २४ ॥

महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ११ ॥

महः । रुजामि । बन्धुता । वचःऽभिः । तत् । मा । पितुः । गोतमात् । अनु । इयाय ।
त्वम् । नः । अस्य । वचसः । चिकिद्धि । होतः । यविष्ठ । सुक्रतो इति सुऽक्रतो । दमूनाः॥११॥

हे होतः देवानामाह्वातः यविष्ठ युवतम सुक्रतो शोभनप्रज्ञ हे अग्ने वचोभिः त्वदुद्देशेन कृतैः स्तोत्रैः समुपजाता येयं बन्धुता बन्धुभावस्तया बन्धुतया महः महतो राक्षसान् रुजामि भनज्मि[2] । तत् तादृशं स्तोत्रात्मकं वचः पितुः उत्पादयितुः गोतमात् ऋषेः सकाशात्[3] मा मां[4] वामदेवं[4] अन्वियाय प्राप्तम्[5] । दमूनाः दान्तमना दानमना वा शत्रूणामुपक्षपयिता वा तादृशः त्वं नः अस्मदीयस्य अस्य वचसः स्तोत्रात्मकमेतद्वाक्यं चिकिद्धि जानीहि ॥ चिकिद्धि । ' कित ज्ञाने ' । जौहोत्यादिकः । लोटि रूपम् । होतः । पादादित्वात् पाष्टिकमाद्युदात्तत्वम् । इतरयोस्तु ' नामन्त्रिते समानाधिकरणे[6] ' इति प्रथमस्य अविद्यमानवद्भावनिषेधात् अपादादित्वेन निघातः ॥

अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥ १२ ॥

अस्वप्नऽजः । तरणयः । सुऽशेवाः । अतन्द्रासः । अवृकाः । अश्रमिष्ठाः ।
ते । पायवः । सध्र्यञ्चः । निऽसद्य । अग्ने । तव । नः । पान्तु । अमूर ॥ १२ ॥

अमूर अमूढ सर्वज्ञ । यद्वा । अमूर अप्रतिहतगते हे अग्ने अस्वप्नजः अस्वपन्तः । जागरूका इति यावत् । तरणयः सततगमनस्वभावा आपद्भयस्तारका वा सुशेवाः सुसुखाः अतन्द्रासः अतन्द्रा अनलसाः सर्वदोद्युक्ताः अवृकाः अहिंसकाः अश्रमिष्ठाः अश्रान्ततमाः सध्र्यञ्चः परस्परं संगताः[6] पायवः रक्षकाः ते तादृशाः तव रश्मयः निषद्य अस्मद्यज्ञे निषण्णा भूत्वा नः अस्मान् पान्तु रक्षन्तु[7] ॥ अस्वप्नजः । स्वपितृषोर्नजिङ्प्रत्ययः । मध्येऽवग्रहश्छान्दसः । सध्र्यञ्चः । सहपूर्वादञ्चतेः क्विप् । ' सहस्य सध्रिः ' इति सहस्य सध्र्यादेशः । सध्र्यादेशस्य

१. त-इत्याद्युदात्तत्वम् । २. ख-ग-घ-च-ण-प-फ-भ-भिनद्मि । ३. त-सकाशात् तत् । ४. न-ल-स-वामदेवं माम् । ५. न-ल-स-' प्राप्तं ' नास्ति । ६. ख-ग-घ-च-ण-न-भ-स-संमताः । ७ ख-ग-घ-च-ण-न-भ-स-' रक्षन्तु ' नास्ति ।

अन्तोदात्तत्वनिपातनात्[1] यणादेशे ' उदात्तस्वरितयोः ' इति स्वरितत्वम्। अमूर। ' मुह वैचित्ये '। निष्ठायां ढकारस्य रेफश्छान्दसः। यद्वा। ' मूङ् बन्धने '। औणादिकः रक्[2] ॥

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ १३ ॥

ये। पायवः। मामतेयम्। ते। अग्ने। पश्यन्तः। अन्धम्। दुःऽइतात्। अरक्षन्।
ररक्ष। तान्। सुऽकृतः। विश्वऽवेदाः। दिप्सन्तः। इत्। रिपवः। न। अह। देभुः ॥१३॥

अत्रेयमैतिहासिकी कथा। उचथ्यस्य गर्भिणीं ममतानामधेयां भार्यां तदनुजो बृहस्पतिरचकमत। तस्यां रेत आधित्सुं तं बृहस्पतिं गर्भस्थं रेतोऽब्रवीत्। रेतोऽत्र मा सेक्षीरहमत्र वसामीति। एवमुक्तो बृहस्पतिर्निरुद्धरेतस्कः सन् रेतोरूपं गर्भं शशाप। जात्यन्धत्वरूपं दीर्घं तमः प्राप्नुहीति। ततस्तस्यां दीर्घतमा अजनिष्ट। स चान्ध्यपरिहारायाग्निं स्तुत्वा चक्षुरलभतेति। तदिदानीमाह। हे [v]अग्ने [v]पायवः रक्षकाः [v]पश्यन्तः अन्धोऽयमिति कृपादृष्ट्या पश्यन्तः [v]ते तव [v]ये रश्मयः [v]मामतेयं ममतायाः पुत्रम् [v]अन्धं चक्षुर्हीनं दीर्घतमसं [v]दुरितात् आन्ध्यलक्षणात् शापात्[3] [v]अरक्षन् चक्षुष्प्रदानेनापालयन्। [v]विश्ववेदाः विश्वप्रज्ञो भवान् [v]सुकृतः शोभनं[4] चक्षुष्प्रदानादिकर्म[4] कृतवतः [v]तान् रश्मीन् [v]ररक्ष आदरेण परिगृह्य पालयति[5]। तेषां परिग्रहसिद्धिः[6] अभिधीयते। [v]दिप्सन्त [v]इत् दम्भितुं परिभवितुम् इच्छन्त एव [v]रिपवः शत्रव एनं दीर्घतमसं [v]नाह [v]देभुः नैव परिभवन्ति खलु ॥ मामतेयम्। ममताया अपत्यमित्यर्थे ' स्त्रीभ्यो ढक् '। दिप्सन्तः। ' दम्भु दम्भे '। ' सनीवन्तर्ध° ' इत्यादिना इडभावः। ' दम्भ इच्च ' इति इकारः। देभुः। ' श्रन्थिग्रन्थिदम्भिस्वञ्जीनामुपसंख्यानम् ' (का. ६. १) इति लिटः किरुवादुपधालोपः ॥

त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान्।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यहयाण ॥ १४ ॥

त्वया। वयम्। सऽधन्यः। त्वाऽऊताः। तव। प्रऽनीती। अश्याम। वाजान्।
उभा। शंसा। सूदय। सत्यऽतातेऽ। अनुष्ठुया। कृणुहि। अहयाण ॥ १४ ॥

[v]अहयाण अलज्जितगमन[7]। ' अहयाणोऽहीतयानः ' (निरु.५.१५) इति यास्कः। तादृश हे अग्ने [v]वयं स्तोतारः [v]त्वया [v]सधन्यः त्वत्प्रसादात् समानधनाः [v]त्वोताः त्वया रक्षिता वयं [v]तव [v]प्रणीती प्रणीत्या तव प्रेरणेनानुज्ञया [v]वाजान् अन्नानि [v]अश्याम प्राप्नुयाम। हे [v]सत्यताते। सत्यं तनोतीति वा सत्यं तायते यस्मिन्निति वा सत्यतातिः। हे सत्यताते [v]शंसा पापानां शंसितारौ [v]उभा[8] उभौ

---

१. त–अन्तोदात्तत्वेन निपातनात्। २. त–रक्प्रत्ययः। ३. त–पापात्। ४. ख-ग-घ-च-ण-न-भ-ल-स–शोभनचक्षु°। ५. ख-ग-घ-च-ण-फ-भ–पालय। ६. त–परिग्रहप्रसिद्धिः। ७. ख-ग-घ-च-ण-भ–अलक्षितगमन; त-न-स–अलक्षितागमन। ८. न-ल-स–' उभा ' नास्ति।

आसन्नविप्रकृष्टौ शत्रू ᵛसूदय जहि। ᵛअनुष्टुया अनुक्रमेण ᵛकृणुहि। अस्मिन् सूक्ते प्रतिपादितमर्थं कुरु ॥ सधन्यः। धनमेषामस्तीति ' छन्दसीवनिपौ° ' इति ईप्रत्ययः। ' एरनेकाचः° ' इति यण्। ' उदात्तस्वरितयोः° ' इति स्वरितत्वम्। अनुष्टुया। ' अपदुःसुपु स्थः ' इति विधीयमानः कुप्रत्ययो बहुलवचनादनुपूर्वस्यापि भवति। ' सुपां सुलुक्° ' इति तृतीयाया याजादेशः। अहयाण। ' ह्री लज्जायाम् '। ' बहुलं छन्दसि ' इति शपः श्लुभावाभावः। ' अनित्यमागमशासनम् ' इति मुगभावः ॥

अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥ १५ ॥

अया । ते । अग्ने । सम्ऽइधा । विधेम । प्रति । स्तोमम् । शस्यमानम् । गृभाय ।
दह । अशसः । रक्षसः । पाहि । अस्मान् । द्रुहः । निदः । मित्रऽमहः । अवद्यात् ॥१५॥

हे ᵛअग्ने ᵛअया अनया ᵛसमिधा दीप्त्या स्तुत्या ᵛते त्वां ᵛविधेम परिचरेम । अस्माभिः ᵛशस्यमानम् ᵛइमं ᵛस्तोमं स्तोत्रं ᵛप्रति ᵛगृभाय प्रतिगृहाण। ᵛअशसः। शंसन्ति स्तुवन्तीति शसः स्तोतारः। ते न भवन्तीत्यशसो नृशंसाः। तान् ᵛरक्षसः ᵛदह भस्मसात्कुरु। हे ᵛमित्रमहः मित्रैः पूजनीय हे अग्ने ᵛद्रुहः द्रोग्धुः ᵛनिदः निन्दकात् ᵛअवद्यात् परिवादाच्च ᵛअस्मान् ᵛपाहि रक्ष ॥ गृभाय। ग्रहेर्लोटि ' छन्दसि शायजपि ' इति श्नः शायच्। ह्म्यग्रहोर्भः। पाहि। वाक्यभेदात् अनिघातः। निदः। ' णिदि कुत्सायाम् '। क्विप्। आगमशासनस्यानित्यत्वाद्नुमभावः। ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। अवद्यात्। ' अवद्यपण्य° ' इति यत्। ' ययतोश्चातदर्थे ' (पा. सू. ६. २. १५६) इत्यन्तोदात्तत्वम्। मित्रमहो अवद्यात् इत्यत्र संहितायाम् ' अव्यादवद्यात्° ' इति एकः प्रकृतिभावः ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके चतुर्थोऽध्यायः समाप्तः[1] ॥

१. त-न-भ-संपूर्णः ।

॥ श्रीगणेशाय नमः ॥

इत्थं तृतीयाष्टकगश्चतुर्थोऽध्याय आदरात् ।
व्याख्यातः सायणार्येण[1] पञ्चमो व्याकरिष्यते ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

चतुर्थे मण्डले प्रथमेऽनुवाके दश सूक्तानि । ' वैश्वानराय ' इति पञ्चदशर्चं पञ्चमं सूक्तं वामदेवस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकम् । अत्रानुक्रमणिका–' वैश्वानराय वैश्वानरीयम् ' इति । विनियोगो लैङ्गिकः ॥

वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।
अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥ १ ॥

वैश्वानराय । मीळ्हुषे । सऽजोषाः । कथा । दाशेम । अग्नये । बृहत् । भाः ।
अनूनेन । बृहता । वक्षथेन । उप । स्तभायत् । उपऽमित् । न । रोधः ॥ १ ॥

[v]सजोषाः सजोषसः[2] समानप्रीतियुक्ता वयमृत्विग्यजमानाः [v]वैश्वानराय विश्वनरसंबन्धिने[3] एतन्नामकाय [v]मीळ्हुषे अभिमतवृष्ट्यादिसेक्त्रे [v]बृहत बृहते महते [v]भाः भासमानाय [v]अग्नये देवाय [v]कथा कथं केन प्रकारेण [v]दाशेम दद्याम । सामर्थ्यात् हविरिति गम्यते । अथवा बृहद्भा इत्युत्तरत्र योज्यम् । कथा दाशेमेत्युक्तम् । किं तत्र आधिक्यमिति[4] तदुच्यते । योऽग्निर्बृहन्महान् भा भासमानश्च सन् [v]अनूनेन अविकलेन संपूर्णेन अत एव [v]बृहता प्रभूतेन [v]वक्षथेन वोढव्येन स्वशरीरेण [v]उप [v]स्तभायत् उप स्तभ्नाति । सामर्थ्यात् द्यामिति शेषः । द्युलोकं व्याप्नोतीत्यर्थः । तत्र दृष्टान्तः । [v]उपमिन्न [v]रोधः । उप समीपे मीयते क्षिप्यते इत्युपमित् स्थूणा । सा यथा तृणाच्छादनादिनिरोधकं वंशादिकमुपस्तभ्नाति तद्वत् । यद्वा । वक्षथेनोक्थलक्षणेन फलादिवाहकेन स्तोत्रेण सह द्युलोकमुपस्तभायत् ॥ स्तभायत् । स्तम्भुः सौत्रो धातुः । लङि ' छन्दसि शायजपि ' इति व्यत्ययेन अहावपि शायजादेशः । ' बहुलं छन्दसि ' इत्यडभावः ॥ किमिव । उपमिन्न रोधः । उप समीपे मीयते इत्युपमिदुदकम् । कूलमिव ॥

मा निन्दत य इमां मह्यं रातिं ददौ मर्त्याय स्वधावान् ।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ॥ २ ॥

मा । निन्दत । यः । इमाम् । मह्यम् । रातिम् । देवः । ददौ । मर्त्याय । स्वधाऽवान् ।
पाकाय । गृत्सः । अमृतः । विऽचेताः । वैश्वानरः । नृऽतमः । यह्वः । अग्निः ॥ २ ॥

१. ख-ग-ण-त-न-फ-भ-स–सायणाचार्यैः । २. ख-ग-च-ण-भ–' सजोषसः ' नास्ति । ३. ख-ग-च-ण-भ-ल-स–विश्वानरसंबन्धिने । ४. ख-ग-च–अधिकमिति ।

हे होत्रादयः अमुं वैश्वानरमग्निं [v]मा [v]निन्दत निन्दां[1] मा[1] कुरत । स्तुतेत्यर्थः । [v]यः [v]देवः दीप्यमानोऽग्निः [v]स्वधावान् अस्मदत्तेन हविर्लक्षणेनान्नेन तद्वान् सन् [v]मर्त्याय मरणधर्मायं[2] [v]पाकाय परिपक्वप्रज्ञाय [v]मह्यं यजमानाय [v]इमाम् इदानीं दीयमानप्रकारां [v]रातिं धनं [v]ददौ दत्तवान् । स विशेष्यते । [v]गृत्सः मेधावी । मेधाविनामैतत् । [v]अमृतः अमरणस्वभावः [v]विचेताः विशिष्टप्रज्ञः [v]वैश्वानरः विश्वैर्नरैः आहवनीयादिरूपेण नीयमानः[3] [v]नृतमः नेतृतमः फलादीनां [v]यह्वः महान् । महन्नामैतत् । [v]अग्निः अङ्गनादिगुणविशिष्टः । तादृशमग्निं स्तुतेति भावः ॥

सामं द्विबर्हा महि तिग्मभृष्टिः सहस्रंरेता वृषभस्तुविष्मान् ।
पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषाम् ॥ ३ ॥

सामं । द्विऽबर्हाः । महि । तिग्मऽभृष्टिः । सहस्रऽरेताः । वृषभः । तुविष्मान् ।
पदम् । न । गोः । अपऽगूळ्हम् । विविद्वान् ।
अग्निः । मह्यम् । प्र । इत् । ऊँ इति । वोचत् । मनीषाम् ॥ ३ ॥

[v]द्विबर्हाः द्वयोर्मध्यमोत्तमयोः स्थानयोः परिवृढः [v]तिग्मभृष्टिः तीक्ष्णतेजाः [v]सहस्ररेताः बहुविधहिरण्यरेतस्कः । रेतःशब्दः सारवाची । प्रभूतसारो वा । [v]वृषभः वर्षिता कामानां [v]तुविष्मान् बहुधनः[4] । ईदृशोऽयम् [v]अग्निः अत्यन्तगोपितं[5] [v]गोः [v]पदं [v]न नष्टाया गोः पदमिव [v]अपगूळ्हम् अत्यन्तरहस्यम् । मनीषाशब्दो ज्ञानवाची सन् अत्र ज्ञातव्ये वर्तते । [v]मनीषां ज्ञातव्यं [v]महि महत पृथ्यं [v]साम अस्मदभिमतं स्तोत्रं [v]विविद्वान् विशेषेण जानन् [v]मह्यं[6] [v]प्रेदु [v]वोचत् प्रैव ब्रवीतु ॥

प्र ताँ अग्निर्बभसत्तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः ।
प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ॥ ४ ॥

प्र । तान् । अग्निः । बभसत् । तिग्मऽजम्भः । तपिष्ठेन । शोचिषा । यः । सुऽराधाः ।
प्र । ये । मिनन्ति । वरुणस्य । धाम । प्रिया । मित्रस्य । चेततः । ध्रुवाणि ॥ ४ ॥

[v]यः [v]अग्निः [v]सुराधाः शोभनधनः सः [v]तिग्मजम्भः तीक्ष्णदंष्ट्रः सन् [v]तपिष्ठेन [v]शोचिषा अतिशयेन शत्रूणां तापकेन तेजसा [v]तान् वक्ष्यमाणान् द्वेष्टॄन् [v]प्र [v]बभसत प्रकर्षेण भर्त्सयतु । दहतु[7] इत्यर्थः ॥ ' भस भर्त्सनदीप्त्योः '। लेटि ' इतश्च लोपः° ' इतीकारलोपः । ' लेटोऽडाटौ ' इत्यडागमः ॥ तानित्युक्तं कानित्याह । [v]ये द्वेष्टारः[8] [v]चेततः[8] जानतः । एतदुभयविशेषणम् । [v]मित्रस्य [v]वरुणस्य च [v]प्रिया प्रियाणि [v]ध्रुवाणि स्थिराणि [v]धाम धामानि तेजःस्थानानि कर्माणि वा[8] [v]प्र [v]मिनन्ति प्रकर्षेण हिंसन्ति ॥ ' मीञ् हिंसायाम् ' । ' मीनातेर्निगमे ' इति ह्रस्वत्वम् । विकरणस्वरः ॥

१. ख-ग-च-ण-न-भ-मा निन्दाम् । २. च-फ-मरणधर्मसहिताय । ३. ख-ग-घ-च-ण-प-फ-भ-स्थापितः । ४. च-फ-बहुधनः विविद्वान् विशेषेण ज्ञानवान् । ५. ख-ग-घ-च-ण-प-फ-भ-' अत्यन्तगोपितं ' नास्ति । ६. न-ल-स-' मह्यं ' नास्ति । ७. ख-ग-च-ण-न-फ-भ-चेततः द्वेष्टॄन्; घ-प-चेततः द्वेष्टारः; त-स-चेततः । ८. ख-ग-च-ण-त-फ-भ-स-त्वाम्; घ-प-' वा ' नास्ति ।

अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।
पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥ ५ ॥

अभ्रातरः । न । योषणः । व्यन्तः । पतिऽरिपः । न । जनयः । दुःऽएवाः ।
पापासः । सन्तः । अनृताः । असत्याः । इदम् । पदम् । अजनत । गभीरम् ॥ ५ ॥

[v]अभ्रातरः भ्रात्रादिबन्धुरहिताः [v]योषणः [v]न गतभर्तृका योषित इव ॥ 'वा षपूर्वस्य निगमे' इति विकल्पनात् दीर्घाभावः ॥ ता यथा भर्तृगृहात् पितृगृहं प्रत्यायन्ति[1] तद्वत् [v]व्यन्तः गच्छन्तः । यज्ञादीनपहाय अमार्गे वर्तमाना इत्यर्थः । तथा [v]पतिरिपो [v]न[2] [v]जनयः[3] पतिद्वेषिण्यः स्त्रिय इव [v]दुरेवाः दुष्टगतयो दुराचारा अत एव [v]पापासः पापाः [v]सन्तः [v]अनृताः मानससत्यरहिताः [v]असत्याः वाचिकसत्यरहिता मनसा वाचाग्निमभजमानाः [v]इदं पापिभिरनुभूयमानतया प्रसिद्धं [v]गभीरम् अगाधं [v]पदं नरकस्थानम् [v]अजनत अजनयन्त उत्पादयन्ति ॥ लङि जनेरन्तर्भावितण्यर्थात् व्यत्ययेनैकवचनम् ॥ ॥ १ ॥

इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।
बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥ ६ ॥

इदम् । मे । अग्ने । कियते । पावक । अमिनते । गुरुम् । भारम् । न । मन्म ।
बृहत् । दधाथ । धृषता । गभीरम् । यह्वम् । पृष्ठम् । प्रयसा । सप्तऽधातु ॥ ६ ॥

हे [v]पावक शोधक [v]अग्ने [v]कियते अत्यल्पाय [v]गुरुं [v]भारं [v]न वोढुमशक्यं भारमिव । तं यथा धर्तुमसहमानः पातयति तद्वत् । स्वदीयं कर्म [v]अमिनते अहिंसतेऽत्यजते [v]मे मह्यम् [v]इदं दातव्यत्वेन प्रसिद्धं [v] बृहत् प्रभूतं [v]मन्म मननीयं धनं [v]दधाथ देहि । तदेव विशेष्यते । [v]धृषता शत्रूणां धर्षकेण [v]प्रयसा। अन्ननामैतत् । अन्नेन युक्तं [v]गभीरम् अन्यैरनवगाह्यं [v]यह्वं महत् [v]पृष्ठं स्प्रष्टुं योग्यं [v]सप्तधातु ग्राम्यारण्यभेदेन[4] सप्तप्रकारम् । 'सप्त ग्राम्याः पशवः सप्तारण्याः' (तै. सं. ७. २. २. १) इति श्रुतेः । ईदृग्धनं देहीत्यर्थः । गुरुं भारं न अन्यदीयं भारं यथान्यस्मै ददाति तद्वदस्माकं दातव्यं धनं देहीति वा योज्यम् ॥

तमिक्वेव समना समानमभि क्रत्वा पुनती धीतिरश्याः ।
ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ॥ ७ ॥

तम् । इत् । नु । एव । समना । समानम् । अभि । क्रत्वा । पुनती । धीतिः । अश्याः ।
ससस्य । चर्मन् । अधि । चारु । पृश्नेः । अग्रे । रुपः । आरुपितम् । जबारु ॥ ७ ॥

---

१. ख-ग-च-ण-फ–प्रत्यायान्ति । २. ख-ग-घ-च-ण-प-फ-भ–जनयः न । ३. घ-ल-स–ज्ञातव्यत्वेन ।
४. ख-ग-घ-च-ण-प-फ-भ-ग्राम्यपश्वरण्यपशुभेदेन ।

' अग्निर्द्युद्यादित्यास्त्रयोऽपि मतभेदेन वैश्वानरशब्दाभिधेयाः ' (निरु. ७. २३) इति यास्केनोक्तत्वादत्र आदित्यात्मना वैश्वानरः स्तूयते । [v]तमित् तमेव वैश्वानरं द्युस्थानं [v]समानं सर्वेषामेकरूपं [v]समना सदृशी तथोग्रा [v]पुनती अस्मान् शोधयित्री[1] [v]धीतिः मतिः अस्मदीया स्तुतिः [v]क्रत्वा तदुचितेन कर्मणा [v]न्वेव क्षिप्रमेव [v]अश्याः अभिप्राप्नुयात । भजेदित्यर्थः ॥ अश्नोतेर्लिङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । व्यत्ययेन परस्मैपदं मध्यमपुरुषत्वं च । पूर्वत्र तच्छब्दश्रुतेः यच्छब्दोऽध्याहार्यः ॥ यस्य द्युस्थानस्य वैश्वानरस्य [v]जबारु जवमानरोहि[2] जरमाणरोहि वा[3] [v]चारु दीप्तं मण्डलम् । ' जबारु जरमाणरोहीति वा जवमानरोहीति वा ' (निरु. ६. १७) इति यास्कः । [v]अग्रे पुरस्तात् पूर्वस्यां दिशि [v]रुपः । आरोपयति स्वात्मनि सस्यादीनि इति[4] रुबिति भूमिरुच्यते । तस्याः सकाशात् [v]ससस्य । लुप्तोपममेतत्[5] । स्वपत इव निश्चलस्य [v]पृश्नेः । द्युनामैतत् । ' स्वः पृश्निः ' (नि. १. ४. २) इति द्युलोकादित्ययोः साधारणनामसु पाठात् । ज्योतिरादिभिः स्पृश्यमानस्य द्युलोकस्य [v]अधि उपरि [v]चर्मन् चर्मणे चरणाय ॥ चरेरौणादिको मनिन् । ' सुपां सुलुक् ' इति चतुर्थ्या लुक् ॥ [v]आरुपितम् आरोपितं देवैः । तमश्या इति पूर्वत्रान्वयः ॥

प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति ।
यदुस्रियाणामप वारिव व्रन्पातिं प्रियं रुपो अग्रं पदं वेः ॥ ८ ॥

प्रऽवाच्यम् । वचसः । किम् । मे । अस्य । गुहा । हितम् । उप । निणिक् । वदन्ति ।
यत् । उस्रियाणाम् । अप । वाःऽइव । व्रन् ।
पातिं । प्रियम् । रुपः । अग्रम् । पदम् । वेरिति वेः ॥ ८ ॥

[v]मे मदीयस्य [v]अस्य वक्ष्यमाणस्य [v]वचसः वाक्यस्य [v]किं [v]प्रवाच्यम् अस्ति । तथ्यमेवोच्यत इत्यर्थः । किं तद्वच इत्युच्यते । [v]उस्रियाणाम् । गोनामैतत् । क्षीराद्युस्राविणीनां[5] गवां संबन्धि [v]यत् क्षीरं [v]वारिव उदकमिव तद्यथा सेकेनाविष्कुर्वन्ति तथा [v]अप [v]व्रन् अपवृण्वन्ति दोग्धारः । [v]निणिक् । नितरां नेनेक्ति शोधयतीति निणिक् क्षीरमुच्यते । तादृक् क्षीरमनेन वैश्वानरेण [v]गुहा गुहायाम् [v]उप [v]हितम् उपनिहितं [v]वदन्ति वेत्तारः । किंचार्यं[6] [v]वेः व्याप्तायाः [v]रुपः भूम्याः [v]प्रियं सर्वेषाम् आधारत्वेन प्रियभूतम् [v]अग्रं श्रेष्ठं [v]पदं स्थानं [v]पाति रक्षति ॥

इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः ।
ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥ ९ ॥

इदम् । ऊँ इति । त्यत् । महि । महाम् । अनीकम् । यत् । उस्रिया । सचत । पूर्व्यम् । गौः ।
ऋतस्य । पदे । अधि । दीद्यानम् । गुहा । रघुऽस्यत् । रघुऽयत् । विवेद ॥ ९ ॥

---

१. ख-ग-घ-च-ण-त-न-प-फ-भ-शोधयन्ती । २. ख-ग-घ-च-ण-प-फ-भ-जवमानम्; न-स-जवमानरोहि । ३. ख-ग-च-त-न-भ-स-' इति ' नास्ति । ४. त-लुप्तोपमैतत् । ५. ख-ग-च-ण-भ-क्षीरादिस्राविणीनाम् । ६. ख-ग-घ-च-ण-प-फ-भ-' किंचार्यं ' नास्ति ।

[v]इदमु इदमेव [v]यत् प्रसिद्धं [v]महि महत् पूज्यं [v]महां महतां देवानाम् [v]अनीकं समूहरूपं सूर्यमण्डलं वैश्वानर एवेति शेषः । [v]पूर्यं पूर्वकालीनं पूरकं वा [v]यत् मण्डलम् [v]उस्रिया क्षीरादुत्स्राविणी [v]गौः अग्निहोत्राद्यर्थं[1] [v]सचत सेवते । [v]ऋतस्य उदकस्य [v]पदे स्थानेऽन्तरिक्षे [v]अधि अधिकम् । यद्वा अधीति सप्तम्यर्थानुवादः[2] । [v]दीद्यानं द्योतमानं [v]गुहा गुहायां [v]रघुष्यत् शीघ्रं स्यन्दमानं [v]रघुयत् शीघ्रं गच्छत् सूर्यमण्डलं [v]विवेद वैश्वानरमेवेति ज्ञातवानस्मि ॥

अध द्युतानः पित्रोः सचासामनुत गुह्यं चारु पृश्नेः ।
मातुष्पदे परमे अन्ति षद्गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥ १० ॥

अध । द्युतानः । पित्रोः । सचा । आसा । अमनुत । गुह्यम् । चारु । पृश्नेः ।
मातुः । पदे । परमे । अन्ति । सत् । गोः । वृष्णः । शोचिषः । प्रऽयतस्य । जिह्वा ॥ १० ॥

[v]अध अथ [v]द्युतानः दीप्यमानः [v]पित्रोः द्यावापृथिव्योः [v]सचा सह मध्ये व्याप्तः सन् [v]पृश्नेः गोः संबन्धि [v]चारु रमणीयं [v]गुह्यम् ऊधसि निगूढं पयः [v]आसा स्वकीयेनास्येन [v]अमनुत पानाय अबुध्यत । उक्तमेवार्थं विवृणोति । [v]मातुः क्षीरादिनिर्मात्र्याः [v]गोः [v]परमे [v]पदे उत्कृष्टे स्थाने ऊधोलक्षणे [v]अन्ति [v]सत् समीपे विद्यमानं क्षीरं [v]वृष्णः फलानां वर्षितुः [v]शोचिषः दीप्तस्य [v]प्रयतस्य आहवनीयादिरूपेण नियतस्य वैश्वानरस्य [v]जिह्वा पातुमिच्छतीति शेषः ॥ ॥ २ ॥

ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्याम् ॥ ११ ॥

ऋतम् । वोचे । नमसा । पृच्छ्यमानः । तव । आऽशसा । जातऽवेदः । यदि । इदम् ।
त्वम् । अस्य । क्षयसि । यत् । ह । विश्वम् ।
दिवि । यत् । ऊँ इति । द्रविणम् । यत् । पृथिव्याम् ॥ ११ ॥

अहं यजमानः [v]नमसा नमस्कारेण सह [v]पृच्छ्यमानः अन्यैरनुयुज्यमानः सन् [v]ऋतं [v]वोचे सत्यं ब्रवीमि । किं तदित्युच्यते । हे [v]जातवेदः जातानां वेदितर्जातप्रज्ञ वा अग्ने [v]तवाशसा त्वत्स्तुत्या साधनेन [v]यदीदं धनं लब्धमस्माभिः स्यात् [v]अस्य धनस्य [v]त्वं [v]क्षयसि त्वमेवेश्वरो भवसि । तस्य[3] धनस्य यज्ञादिद्वारा अभ्यर्थत्वादिति भावः । अत्यल्पमिदमुक्तम् । [v]यद्ध [v]विश्वं यत्खलु कृत्स्नं धनमस्ति तस्यापीशिषे । विश्वमिति सामान्येन यदुक्तं तदेव विशदयति । [v]दिवि द्युलोके [v]यदु [v]द्रविणं यदेव धनं [v]यत् च [v]पृथिव्यां धनं तस्य सर्वस्य त्वमीश्वरो भवसि । ' यज्ञार्थं द्रव्यमुत्पन्नम् ' इति स्मरणात् । अग्निव्यतिरेकेण यज्ञासंभवादिति भावः ॥

१. त–अग्निहोत्राद्यर्था । २. त–°वादी । ३. त–अस्य ।

किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान् ।
गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म ॥ १२ ॥

किम् । नः । अस्य । द्रविणम् । कत् । ह । रत्नम् । वि । नः । वोचः । जातऽवेदः । चिकित्वान् ।
गुहा । अध्वनः । परमम् । यत् । नः । अस्य । रेकु । पदम् । न । निदानाः । अगन्म ॥ १२ ॥

पूर्वमन्त्रेण यस्य[1] धनस्य[2] अग्निस्वामित्वमुक्तम् [v]अस्य धनस्य[3] [v]किं [v]द्रविणं किं साधनभूतं [v]नः अस्मभ्यं[4] दातव्यं धनमस्ति । [v]कद्ध [v]रत्नं किं च रमणीयं हितकरं धनमस्ति । तद्धनं हे [v]जातवेदः जातधनाग्ने[5] [v]चिकित्वान् चेतनावानभिज्ञस्त्वं [v]नः अस्मभ्यं [v]वि [v]वोचः विब्रूहि । यद्वा । किं दातव्यं द्रविणमस्ति । अस्य द्रविणराशेः कद्ध रत्नमिति वा योज्यम् । [v]अस्य [v]अध्वनः धनप्राप्तिमार्गस्य [v]यत् [v]गुहा गुहायां निहितं गूढं [v]परमम् उत्कृष्टं प्राप्तव्यमस्ति तदपि [v]नः अस्मभ्यं विवोचः । वयं [v]रेकु रिक्तं [v]पदं गन्तव्यं स्थानं गृहादिकं [v]निदानाः अन्यैर्निन्द्यमानाः ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]न [v]अगन्म न प्राप्नुमः ॥

का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजम् ।
कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥ १३ ॥

का । मर्यादा । वयुना । कत् । ह । वामम् । अच्छ । गमेम । रघवः । न । वाजम् ।
कदा । नः । देवीः । अमृतस्य । पत्नीः । सूरः । वर्णेन । ततनन् । उषसः ॥ १३ ॥

[v]का [v]मर्यादा का प्रीत्यादिव्यवस्था का च [v]वयुना प्रज्ञानं पदार्थविषयं [v]कद्ध किं च [v]वामं वननीयं पदार्थजातम् । एतत्सर्वम् [v]अच्छ[6] [v]गमेम अभिगच्छेम । तत्र दृष्टान्तः । [v]रघवो [v]न [v]वाजम् । शीघ्रगामिनोऽश्वादयः संग्राममिव । तद्वत्[6] । [v]कदा कस्मिन् काले [v]नः अस्माकं व्यवहाराय [v]देवीः देव्यो द्योतमानाः [v]अमृतस्य अमरणधर्मस्यादित्यस्य [v]पत्नीः पत्न्यः पालयित्र्यः[7] [v]सूरः प्रसवित्र्यः [v]उषासः[8] उषसः[8] [v]वर्णेन प्रकाशेन [v]ततनन् विस्तारयेयुः । एवं सूर्यसंबन्धिन उषसः स्तुत्या[9] सर्वात्मनो वैश्वानरस्य स्तुतिरवगन्तव्या ॥ ततनन् । तनोतेर्लेटि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । द्विर्भावहलादिशेषौ ॥

अनिरेण वचसा फल्गवेन प्रतीत्येन कृधुनात्रुषासः ।
अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम् ॥ १४ ॥

अनिरेण । वचसा । फल्गवेन । प्रतीत्येन । कृधुना । अतृषासः ।
अध । ते । अग्ने । किम् । इह । वदन्ति । अनायुधासः । असता । सचन्ताम् ॥ १४ ॥

---

१. ख-ग-च-ण-फ-अस्य । २. ल-' धनस्य ' नास्ति । ३. न-स-' धनस्य ' नास्ति । ४. ख-ग-ण-त-न-भ-स-अस्मभ्यं तत्; च-फ-अस्मभ्यं यत् । ५. त-जातवेदोऽसि जातधनोऽसि; न-स-जातधनोऽसि । ६. ख-ग-घ-च-ण-न-भ-स-' अच्छ ... तद्वत् ' नास्ति । ७. त-ल-पालयित्र्यः पत्नीस्थानीया वा । ८. न-स-उषसः; ल-उषासः । ९. ख-ग-च-फ-भ-' स्तुत्या ' नास्ति ।

[v]अनिरेण । इरा अन्नं तद्रहितेन । [v]फल्गुवेन तुच्छेन[१] [v]प्रतीत्येन प्रतिगन्तव्येन । आरोहणेत्यर्थः । [v]कृधुना ह्रस्वेन । कृधिति ह्रस्वनाम ' कृधुको वन्त्रकः ' (नि. २. २. ६) इति तन्नामसूक्तत्वात् । एवंविधेन [v]वचसा [v]अतृपासः अतृप्ता जनाः [v]अध अधुना [v]इह अस्मिन् लोके हे [v]अग्ने [v]ते त्वां [v]किं [v]वदन्ति । निर्हविष्केण वचसा न किंचिल्लभ्यत इत्यर्थः । किंतु [v]अनायुधासः । आयुधशब्दः साधनं लक्षयति । हविरादिसाधनरहितास्ते [v]असता दुःखेन [v]सचन्तां संगच्छन्ताम् ॥

अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच ।
रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥ १५ ॥

अस्य । श्रिये । सम्ऽइधानस्य । वृष्णः । वसोः । अनीकम् । दमे । आ । रुरोच ।
रुशत् । वसानः । सुदृशीकऽरूपः । क्षितिः । न । राया । पुरुऽवारः । अद्यौत् ॥ १५ ॥

[v]समिधानस्य समिध्यमानस्य[२] ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]वृष्णः वर्षितुः फलस्य[३] [v]वसोः[४] वासयितुः [v]अस्य अग्नेः [v]अनीकं तेजःसंघः [v]दमे यागगृहे [v]आ [v]रुरोच सर्वतो दीप्यते । किमर्थम् । [v]श्रिये श्रेयसे यजमानानाम् । सोऽग्निः [v]रुशत् । वर्णनामैतत् । दीप्तं तेजः [v]वसानः आच्छादयन् अत एव [v]सुदृशीकरूपः सुष्ठु दर्शनीयरूपः [v]पुरुवारः बहुभिः ऋत्विग्भिर्यजमानैः[५] वरणीयः सन् [v]अद्यौत् द्योतते । किमिव । [v]राया अश्वादिधनेन [v]क्षितिर्न राजादिरिव । क्षितिरिति मनुष्यनाम ॥ ॥ ३ ॥

' ऊर्ध्व ऊ षु णः ' इत्येकादशर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयम् । ' ऊर्ध्व ऊ ष्वेकादश ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छन्दसीदम् । सूत्रितं च—' ऊर्ध्व ऊ षु णः ससस्य यद्वियुतेति पञ्च ' (आश्व. श्रौ. ४. १३) इति ॥

ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान् ।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषाम् ॥ १ ॥

ऊर्ध्वः । ऊँ इति । सु । नः । अध्वरस्य । होतः । अग्ने । तिष्ठ । देवऽताता । यजीयान् ।
त्वम् । हि । विश्वम् । अभि । असि । मन्म । प्र । वेधसः । चित् । तिरसि । मनीषाम् ॥ १ ॥

हे [v]अध्वरस्य [v]होतः यागसंबन्धिनां देवानामाह्वातः । यद्वा । होतरित्यत्र प्रकृत्यंशोऽनुवादः । हे होमनिष्पादक [v]अग्ने [v]यजीयान् यष्टृतमस्त्वं [v]नः अस्माकम् [v]ऊर्ध्व [v]ऊ [v]षु [v]तिष्ठ उन्नत एव तिष्ठ । नित्यमुन्नतो भवेत्यर्थः । कुत्रेति तदुच्यते । [v]देवताता देवतातौ । देवास्तायन्ते[१] विस्तीर्यन्ते* अत्रेति देवतातिर्यज्ञः । तस्मिन् । [v]त्वं [v]हि त्वं खलु [v]विश्वं सर्वं [v]मन्म मननीयं शत्रूणां धनम् [v]अभ्यसि अभिभवसि । किंच [v]वेधसश्चित् । चित् पूजायाम्[२] । स्तोतुर्यजमानादेः [v]मनीषां मतिं स्तुतिं [v]प्र [v]तिरसि प्रवर्धयसि । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

१. ख-न-भ–उक्थेन । २. ख-ग-च-ण-न-भ-स–' समिध्यमानस्य ' नास्ति । ३. ख-ग-घ-च-ण-प-फ-भ–वसोः फलस्य; न-स–फलस्य । ४. ख-ग-च-ण–ऋत्विग्यजमानैः । ५. च-फ–यज्ञे मन्म मननीयत्वं वेधसो ब्रह्मणो विश्वमभि अंसि हि खलु । देवनायाः । * त-न-भ–विस्तार्यन्ते ।

अमूरो होता न्यसादि विश्वरग्निर्मन्द्रो विदथेषु प्रचेताः ।
ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम् ॥ २ ॥

अमूरः । होता । नि । असादि । विक्षु । अग्निः । मन्द्रः । विदथेषु । प्रऽचेताः ।
ऊर्ध्वम् । भानुम् । सविताऽइव । अश्रेत् । मेताऽइव । धूमम् । स्तभायत् । उप । द्याम् ॥ २ ॥

[v]अमूरः अमूढः । प्रगल्भ इत्यर्थः । [v]होता होमनिष्पादकः [v]मन्द्रः मदनीयः[1] मादयिता वा [v]प्रचेताः प्रकृष्टज्ञानः [v]अग्निः देवः [v]विक्षु ऋत्विग्रूपासु[2] प्रजासु मध्ये [v]विदथेषु यागेषु निमित्तभूतेषु [v]न्यसादि नितरां स्थापितः । अथ तथाभूतोऽग्निः [v]भानुं दीप्तिं [v]सवितेव उदितः सूर्य इव [v]ऊर्ध्वम् [v]अश्रेत् ऊर्ध्वमुखमाश्रयति । किंच [v]मेतेव स्थूणेव । सा यथा स्वाधिष्ठितं[3] वंशादिकं स्तभ्नाति तद्वदयमग्निः [v]धूमं[4] स्वोत्थितं[5] [v]द्याम् [v]उप द्युलोकस्योपरि [v]स्तभायत् स्तभ्नाति ॥

यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद्देवतातिमुराणः ।
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥ ३ ॥

यता । सुऽजूर्णिः । रातिनी । घृताची । प्रऽदक्षिणित् । देवऽतातिम् । उराणः ।
उत् । ऊँ इति । स्वरुः । नवऽजाः । न । अक्रः । पश्वः । अनक्ति । सुऽधितः । सुऽमेकः ॥ ३ ॥

[v]यता संयता [v]सुजूर्णिः शोभनजवा सुष्ठु जीर्णा पुराणी[6] वा [v]घृताची । घृतमञ्चतीति घृताची जुहूः । [v]रातिनी । रातिर्धनम् । हविर्लक्षणधनवती । आज्यपूर्णा भवतीत्यर्थः । [v]देवतातिं यज्ञं तथा [v]उराणः उरु कुर्वाणोऽध्वर्युरग्निर्वा [v]प्रदक्षिणित् प्रदक्षिणमेतीति प्रदक्षिणित् । प्रदक्षिणगमनो भवति[6] । अकारलोपश्छान्दसः । [v]नवजाः नवजातस्तदानीमेवोत्पादितः [v]स्वरुः [v]न । यूपशकलवाची स्वरुरत्र यूपं लक्षयति । ' चषालवन्तः स्वरवः पृथिव्याम् ' (ऋ. सं. ३. ८. १०) इत्यादिषु स्वरुशब्देन यूपाभिधानाच्च । नकारः समुच्चये । यूपोऽपि [v]उदु । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । उन्नतो भवति । किंच [v]अक्रः आक्रमिता [v]सुमेकः सुदीप्तः [v]सुधितः स्वधितिरित्यर्थः । सोऽपि [v]पश्वः पशून् [v]अनक्ति गच्छति । यद्वा । सुधितः स्वरुरेव उदु उत्कृष्टः पश्वः पशूननक्ति । ' स्वरुणा पशुमनक्ति ' इति श्रुतेः ॥

स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।
पर्यग्निः पशुपा न होता त्रिविष्टयेति प्रदिवः उराणः ॥ ४ ॥

स्तीर्णे । बर्हिषि । सम्ऽइधाने । अग्नौ । ऊर्ध्वः । अध्वर्युः । जुजुषाणः । अस्थात् ।
परि । अग्निः । पशुऽपाः । न । होता । त्रिऽविष्टि । एति । प्रऽदिवः । उराणः ॥ ४ ॥

१. ख-ग-च-महनीयः; ण-न-भ-ल-स-मंहनीयः । २. त-न-स-ऋत्विग्भूतासु । ३. ख-ग-च-ण-फ-स्वधिष्ठितम् । ४. ख-ग-न-धूमश्चोत्थितम्; च-फ-चोत्थितं धूमम्; स-धूमांश्चाच्छादितम् । ५. घ-च-ण-त-न-फ-भ-स-पुराणा । ६. ख-ग-घ-च-ण-भ-ल-अभवत् ।

[v]बर्हिषि वेद्यां [v]स्तीर्णे आस्तृते सति [v]अग्नौ आहवनीयादिके [v]समिधाने सम्यगिध्यमाने च सति [v]अध्वर्युः अध्वरस्य नेता [v]जुजुषाणः देवान् प्रीणयन् [v]ऊर्ध्वः [v]अस्थात् तिष्ठति। [v]होता होमनिष्पादकः [v]प्रदिवः[१]। पुराणनामैतत्[१]। पुरातनः [v]उराणः स्वल्पमपि हविर्देवयोग्यत्वसंपादनेन उरु कुर्वाणः। ' उराण उरु कुर्वाणः ' इति निरुक्तम्। ' यद्वै देवैर्जोष्यते हविस्तद्विरिमाग्रं वर्धते ' इति श्रुतेः अग्नेरुरुकरणमुचितम्। ईदृशः [v]अग्निः [v]पशुपा [v]न पशूनां पालक इव पशून् [v]त्रिर्विष्टि त्रिरावृत्य [v]परि [v]एति। त्रिर्हि पर्ययणिः क्रियते॥

परि त्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा ऋतावा।
द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट्॥ ५॥

परि। त्मना। मितऽद्रुः। एति। होता। अग्निः। मन्द्रः। मधुऽवचाः। ऋतऽवा।
द्रवन्ति। अस्य। वाजिनः। न। शोकाः। भयन्ते। विश्वा। भुवना। यत्। अभ्राट्॥ ५॥

उक्तमेवार्थं स्पष्टयति। अयं [v]होता होमनिष्पादकः [v]अग्निः [v]त्मना आत्मना स्वरूपेणैव [v]मितद्रुः परिमितगतिः सन् [v]परि [v]एति परितो गच्छति पशुम्। कीदृशोऽयम्। [v]मन्द्रः मादनीयो मोदयिता वा [v]मधुवचाः मधुरवचनः[२] [v]ऋतावा यज्ञवान्। [v]वाजिनः हविष्मतः [v]अस्य अग्नेः [v]शोकाः [v]न दीप्तयोऽपि। नशब्दोऽप्यर्थे। [v]द्रवन्ति गच्छन्ति परितः। यद्वा नकार उपमार्थीयः[३]। वाजिनो न अश्वा इव द्रवन्तीति योज्यम्। [v]यत् यस्मात् अयम् [v]अभ्राट् भ्राजते तस्मात् [v]विश्वा [v]भुवना सर्वाणि भूतजातानि[४] [v]भयन्ते भीतानि भवन्ति॥ ॥ ४॥

भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः।
न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तन्वी३ रेप आ धुः॥ ६॥

भद्रा। ते। अग्ने। सुऽअनीक। सम्ऽदृक्। घोरस्य। सतः। विषुणस्य। चारुः।
न। यत्। ते। शोचिः। तमसा। वरन्त।
न। ध्वस्मानः। तन्वि। रेपः। आ। धुरिति धुः॥ ६॥

हे [v]स्वनीक शोभनज्वाल [v]अग्ने [v]घोरस्य भीतिजनकस्यापि [v]सतः [v]विषुणस्य विष्वक् सर्वतो व्याप्तस्य [v]ते तव [v]चारुः रमणीया [v]भद्रा स्तुत्या कल्याणी वा मूर्तिः [v]संदृक् संदृष्टिः। सम्यक् दृश्या भवतीत्यर्थः। [v]यत् यस्मात् [v]ते [v]शोचिः दीप्तिं [v]तमसा अन्धकारेण [v]न [v]वरन्त न वारयन्ति निशाः। यस्माच्च [v]ध्वस्मानः ध्वंसका राक्षसादयः ते [v]तन्वि तव शरीरे [v]रेपः पापं ध्वंसनादिरूपं [v]न [v]आ [v]धुः न दधति। न कुर्वन्ति। अतः संदृगिति संबन्धः॥

१. ख-ग-च-ण-भ-प्रदिवः उराणः उरुकुर्वाणोऽध्वर्युनामैतत्। २. ख-ग-घ-च-ण-न-प-फ-भ-स-मधुवचनः। ३. त-उपमार्थकः। ४. ख-ग-च-ण-भूतानि।

न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।
अधा मित्रो न सुधितः पावकोऽग्निर्दीदाय मानुषीषु विक्षु ॥ ७ ॥

न । यस्य । सातुः । जनितोः । अवारि । न । मातरापितरा । नु । चित् । इष्टौ ।
अध । मित्रः । न । सुऽधितः । पावकः । अग्निः । दीदाय । मानुषीषु । विक्षु ॥ ७ ॥

vजनितोः जनयितुर्वृष्टयुत्पादकस्य vयस्य वैश्वानरस्य vसातुः सनिः पश्चादिलक्षणं दानं दीप्तिर्वा vन vअवारि केनापि न वार्यते । किंच vमातरापितरा मातापितरौ द्यावापृथिव्यौ यस्य vइष्टौ प्रेषणे vनू vचित् क्षिप्रमेव vन प्रभवतः । vअध[1] अपि च vमित्रो vन सखेव vसुधितः सुतूसः vपावकः शोधकः vअग्निः vमानुषीषु मनोः संबन्धिनीषु vविक्षु प्रजासु vदीदाय दीप्यते ॥ ' दीपी दीप्तौ ' । पकारलोपश्छान्दसः । व्यत्ययेन परस्मैपदम् । लिट्यभ्यासस्य ह्रस्वे कृते तुजादित्वाद्दीर्घत्वम् ॥

द्वियं पञ्च जीजनन्त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु ।
उषर्बुधमथर्यो[3] न दन्तं शुक्रं स्वासं परशुं न तिग्मम् ॥ ८ ॥

द्विः । यम् । पञ्च । जीजनन् । सम्ऽवसानाः । स्वसारः । अग्निम् । मानुषीषु । विक्षु ।
उषःऽबुधम् । अथर्यः । न । दन्तम् । शुक्रम् । सुऽआसम् । परशुम् । न । तिग्मम् ॥ ८ ॥

vमानुषीषु मनोः संबन्धिनीषु vविक्षु प्रजासु vसंवसानाः संगच्छमानाः vद्विः vपञ्च दश vस्वसारः अङ्गुलयः[2] vयम् vअग्निं vजीजनन् मथनेन[3] उदपादयन् ॥ ' जनी प्रादुर्भावे ' । लुङि छान्दसत्वादडभावः ॥ कीदृश्य अङ्गुलयः । vअथर्यो vन स्त्रिय इव । कीदृशमग्निम् । vउषर्बुधम् उषसि बुध्यमानं vदन्तम् अदन्तं[4] हविषां भक्षकं vशुक्रं रश्मिभिर्दीप्यमानं vस्वासं शोभनास्यं vतिग्मं तीक्ष्णं vपरशुं vन परशुमिव रक्षसां हन्तारमिति शेषः ॥

तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः ।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः ॥ ९ ॥

तव । त्ये । अग्ने । हरितः । घृतऽस्नाः । रोहितासः । ऋजुऽअञ्चः । सुऽअञ्चः ।
अरुषासः । वृषणः । ऋजुऽमुष्काः । आ । देवऽतातिम् । अह्वन्त । दस्माः ॥ ९ ॥

हे vअग्ने vत्ये ते प्रसिद्धाः vतव vहरितः त्वत्संबन्धिनोऽश्वाः vदेवतातिम् अस्मदीयं यागं प्रति vआ vअह्वन्त ऋत्विग्भिराहूयन्ते ॥ लुङि ' लिपिसिचिह्वश्च ' इत्यङादेशः ॥ कीदृशाः । vघृतस्नाः घृतस्नुवः

१. ख-ग-च-त-भ-ल-स–उत । २. ख-ग-च-ण–अङ्गुल्यः । ३. ल-स–मन्थनेन । ४. ख-ग-च-ण-त-न-भ-सु–' अदन्तं ' नास्ति ।

बलातिशयान्नासापुटादिस्थानेभ्य उदकं क्षरन्तः [v]रोहितासः रोहिता लोहितवर्णाः [v]ऋज्वञ्चः । ऋजु अकुटिलमञ्चन्ति गच्छन्तीत्यृज्वञ्चः । [v]स्वञ्चः सुष्ठु गच्छन्तः [v]अरुषासः आरोचमानाः [v]वृषणः युवानो वर्षितारः[1] वा ॥ ' वा षपूर्वस्य निगमे ' इति विकल्पेन दीर्घविधानादत्र दीर्घाभावः ॥ [v]ऋजुमुष्काः ऋजुवृषणाः[2] [v]दस्माः दर्शनीयाः ॥

ये ह॒ त्ये ते॒ सह॑माना अ॒यास॑स्त्वे॒षासो॑ अग्ने अ॒र्चय॒श्चर॑न्ति ।
श्ये॒नासो॒ न दु॑व॒सनासो॒ अर्थं॑ तुवि॒ष्व॒णसो॒ मारु॑तं॒ न शर्धः॑ ॥ १० ॥

ये । ह॒ । त्ये । ते॒ । सह॑मानाः । अ॒यास॑ः । त्वे॒षास॑ः । अग्ने॒ । अ॒र्चय॑ः । चर॑न्ति ।
श्ये॒नास॑ः । न । दु॒व॒सनास॑ः । अर्थ॑म् । तु॒वि॒ऽस्व॒नस॑ः । मारु॑तम् । न । शर्धः॑ ॥ १० ॥

हे [v]अग्ने [v]ये [v]ह खलु [v]त्ये ते प्रसिद्धाः [v]सहमानाः शत्रूनभिभवन्तः [v]अयासः गमनशीलाः [v]त्वेषासः दीप्ताः [v]दुवसनासः परिचरणीयाः [v]ते त्वदीयाः [v]अर्चयः रश्मयः [v]श्येनासो [v]न अश्वा इव . [v]अर्थं गन्तव्यं [v]चरन्ति गच्छन्ति । कीदृशाः । [v]मारुतं [v]शर्धः [v]न मरुत्संबन्धी गण इव [v]तुविष्वणसः तुविस्वना अधिकध्वनयो भवन्ति ॥

अका॑रि ब्र॒ह्म स॑मिधा॒न तु॒भ्यं॑ शंसा॑त्यु॒क्थं यज॑ते॒ व्यू॑ धाः ।
होता॑रमग्निं मनु॒षो नि षे॑दुर्नम॒स्यन्त॑ उ॒शिज॒ः शंस॑मा॒योः ॥ ११ ॥

अका॑रि । ब्र॒ह्म । स॒म्ऽइ॒धा॒न । तु॒भ्य॑म् । शंसा॑ति । उ॒क्थम् । यज॑ते । वि । ऊँ॒ इति॑ । धाः॒ ।
होता॑रम् । अ॒ग्निम् । मनु॑षः । नि । से॒दुः॒ । न॒म॒स्यन्तः॑ । उ॒शिज॑ः । शंस॑म् । आ॒योः ॥ ११ ॥

हे [v]समिधान समिध्यमानाग्ने [v]तुभ्यं त्वदर्थं [v]ब्रह्म स्तोत्रम् [v]अकारि अस्माभिः कृतम् । होता [v]उक्थं शस्त्ररूपं स्तोत्रं [v]शंसाति शंसति ॥ ' शंसु स्तुतौ ' । ' लेटोऽडाटौ ' इत्याडागमः ॥ त्वां यजमानः [v]यजते । अतः कारणात् अस्मभ्यं धनं [v]वि [v]धाः विधेहि[3] ॥ दधातेर्हिच्छान्दसे लुङि ' बहुलं छन्दसि ' इत्यडभावः ॥ [v]उ इति पादपूरणः । किंच [v]आयोः मनुष्यस्य [v]शंसं शंसनीयं [v]होतारं देवानामाह्वातारम् [v]अग्निं त्वां [v]नमस्यन्तः पूजयन्तः [v]उशिजः पश्वादिलक्षणं धनं कामयमानाः [v]मनुषः मनुष्या ऋत्विजः [v]नि [v]षेदुः उपाविशन् । सेवन्ते इत्यर्थः ॥ ॥ ५ ॥

' अयमिह ' इत्येकादशर्चं सप्तमं सूक्तं वामदेवस्यार्षमाग्नेयम् । आद्या जगती द्वितीयाद्याः[4] पञ्चानुष्टुभः शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—' अयमिहादौ जगती पञ्चानुष्टुभः ' इति । सूक्तविनियोगो लैङ्गिकः । अग्निप्रणयने ' अयमिह ' इति वैश्यस्य प्रतिपत् । तथा च सूत्रितम्—' अयमिह प्रथमो धायि धातृभिरिति तु राजन्यवैश्ययोराद्ये ' (आश्व. श्रौ. २. १७) इति ॥

---

१. ख-ग-च-ण—वर्धितारः । २. ल-स—साधनमुष्काः । ३. त-न-भ-स—व्यधाः विधेहि । ४. ख-ग-च-ण-न-भ-स—' द्वितीयाद्याः ' नास्ति ।

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ १ ॥

अयम् । इह । प्रथमः । धायि । धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ।
यम् । अप्नवानः । भृगवः । विऽरुरुचुः । वनेषु । चित्रम् । विऽभ्वम् । विशेऽविशे ॥ १ ॥

[v]धातृभिः यज्ञार्थं कर्म कुर्वद्भिरध्वर्युभिः [v]इह अस्मिन् यज्ञे [v]होता देवानामाह्वाता [v]यजिष्ठः अतिशयेन यष्टा [v]अध्वरेषु यागेषु [v]ईड्यः ऋत्विग्भिः स्तूयमानः [v]प्रथमः सर्वेषां देवानां मुख्यः [v]अयम् आहवनीयादिस्थानेषु प्रत्यक्षेणोपलभ्यमानोऽग्निः [v]धायि अधायि निहितः ॥ दधातेः कर्मणि लुङ्[1] । ' बहुलं छन्दस्यमाङ्योगे० ' इत्यडभावः । ' तिङ्ङतिङः ' इति निघातः ॥ अयमग्निरित्युक्तम् । कोऽसावग्निरित्यत आह । [v]अप्नवानः भृगुसंबन्धी कश्चिदपि । स चान्ये [v]भृगवः च [v]वनेषु अरण्येषु [v]चित्रं दावाग्निरूपेण बहुधा दर्शनीयं [v]विशेविशे । वीप्सया सर्वजनव्यापित्वमुच्यते । सर्वस्या विशः प्रजायाः [v]विभ्वं विभुमीश्वरं [v]यं देवानां हविर्वाहकत्वेन[2] प्रसिद्धमग्निं[3] [v]विरुरुचुः दीप्तियुक्तं कुर्वन्ति स्म[4] । यमिति यच्छब्दस्यायमिति इदंशब्देन[5] संबन्धः ॥

' अग्ने कदा ते ' इति । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ आनुष्टुभे छन्दसि ' अग्ने कदा ते ' इत्याद्याः पञ्चर्चः । सूत्रितं च—' अग्ने कदा त इति पञ्च ' (आश्व. श्रौ. ४. १३) इति ॥

अग्ने कदा त आनुषग्भुवद्देवस्य चेतनम् ।
अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यम् ॥ २ ॥

अग्ने । कदा । ते । आनुषक् । भुवत् । देवस्य । चेतनम् ।
अध । हि । त्वा । जगृभ्रिरे । मर्तासः । विक्षु । ईड्यम् ॥ २ ॥

हे [v]अग्ने [v]अध अतः कारणात् [v]देवस्य द्योतमानस्य [v]ते तव संबन्धि [v]चेतनं तेजः [v]कदा [v]आनुषक् अनुषक्तं [v]भुवत् भवेत् ॥ लेट्यडागमः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः ॥ अतः कारणादित्युक्तम् । कस्माद्धेतोरित्युच्यते । [v]हि यस्मात् कारणात् [v]मर्तासः मनुष्याः [v]विक्षु विड्भिः[4] प्रजाभिः [v]ईड्यं स्तुत्यं [v]त्वा त्वां [v]जगृभ्रिरे जगृहिरे गृह्णन्ति ॥ ग्रहेर्धातोर्लिटि ' ह्मग्रहोर्भः० ' इति भत्वम् । ' बहुलं छन्दसि ' इति रुडागमः ॥

ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः ।
विश्वेषामध्वराणां हस्कर्तारं दमेदमे ॥ ३ ॥

ऋतऽवानम् । विऽचेतसम् । पश्यन्तः । द्याम्ऽइव । स्तृऽभिः ।
विश्वेषाम् । अध्वराणाम् । हस्कर्तारम् । दमेऽदमे ॥ ३ ॥

१. त–लुङि । २. ख-ग-च-ण-प-फ-भ–हव्यवाहकत्वेन । ३. ख-ग-घ-च-ण-[प]-फ-भ-स–दीप्तियुक्तं विरुरुचुः दीपितवन्तः । ४. ख-ग-च-ण-न-भ-ल–शब्देन । ५. ख-ग-घ-च-ण-प-फ-भ–' विड्भिः ' नास्ति ।

vऋतावानम् अमायिनं vविचेतसं विशिष्टज्ञानं vस्तृभिः नक्षत्रैः परिवृतं vद्यामिव विस्फुलिङ्गैः समेतं vविक्षेषां सर्वेषाम् vअध्वराणां यज्ञानां vहस्कर्तारं प्रभासकं[1] वृद्धेः[2] कर्तारं वा[2] अग्निं vपश्यन्तः ऋत्विगादयः vदमेदमे सर्वस्मिन् यज्ञगृहे । जगृभ्रिरे इति पूर्वेण संबन्धः ॥

आशुं दूतं विवस्वतो विश्वा यश्चर्षणीरभि ।
आ जभ्रुः केतुमायवो भृगवाणं विशेविशे ॥ ४ ॥

आशुम् । दूतम् । विवस्वतः । विश्वाः । यः । चर्षणीः । अभि ।
आ । जभ्रुः । केतुम् । आयवः । भृगवाणम् । विशेऽविशे ॥ ४ ॥

vयः अग्निः vविश्वाः vचर्षणीः सर्वाः प्रजाः vअभि भवति vआयवः मनुष्याः । आयव इति मनुष्यनाम[3] 'आयवः* यदवः' (नि. २. ३. १७) इति[3] मनुष्यनामसु पाठात् । vआशुं क्षिप्रगामिनं vविवस्वतः मनुष्यस्य यजमानस्य vदूतम् । विवस्वन्त इति मनुष्यनाम[4] । vकेतुं प्रज्ञापकं vभृगवाणं भृगुवदाचरन्तम् । दीप्यमानमित्यर्थः ॥ ' सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः ' इति क्विप्[5] । तदन्तालटो व्यत्ययेन शानच् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वात् आद्युदात्तत्वम् ॥ तमग्निं vविशेविशे सर्वस्यै प्रजायै vआ vजभ्रुः आजह्रुः ॥ 'हृग्रहोर्भः[6]' इति भत्वम् ॥

तमीं होतारमानुषक्चिकित्वांसं नि षेदिरे ।
रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ॥ ५ ॥

तम् । ईम् । होतारम् । आनुषक् । चिकित्वांसम् । नि । सेदिरे ।
रण्वम् । पावकऽशोचिषम् । यजिष्ठम् । सप्त । धामऽभिः ॥ ५ ॥

ऋत्विगादयो मनुष्याः vआनुषक् आनुपूर्येण vहोतारं देवानामाह्वातारं vचिकित्वांसं जानन्तम् ॥ ' कित ज्ञाने ' । लिटः क्वसुः । द्विर्भावहलादिशेषचुत्वदीर्घाः । प्रत्ययस्वरः ॥ vतमीं तमिममग्निं vनि vषेदिरे निषादयन्ति स्म । कीदृशम् । vरण्वं रमणीयं vपावकशोचिषं शोधकदीप्तिं vयजिष्ठं यष्टृतमं vसप्त सप्तभिः vधामभिः तेजोभिर्युक्तम् ॥ ॥ ६ ॥

तं शश्वतीषु मातृषु वन आ वीतमश्रितम् ।
चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ॥ ६ ॥

तम् । शश्वतीषु । मातृषु । वने । आ । वीतम् । अश्रितम् ।
चित्रम् । सन्तम् । गुहा । हितम् । सुऽवेदम् । कूचित्ऽअर्थिनम् ॥ ६ ॥

१. ख-ग-च-ण-न-फ-भ-प्रारम्भकम्; च-प-प्रारभकम् । २. ख-ग-घ-च-ण-न-प-फ-भ-स-' वृद्धेः कर्तारं वा ' नास्ति । ३. ख-ग-च-ण-' मनुष्यनाम... इति ' नास्ति । * ल-द्रुतवः आयवः । ४. न-ल-मनुष्यनामेदम् । ५. च-फ-क्विप् वा ।

[v]शश्वतीषु बह्वीषु [v]मातृषु अप्सु । ताः सस्यादिनिर्मातृकत्वात् मातर इत्युच्यन्ते । [v]वने [v]आ वृक्षसमूहे च । आकारश्चार्थे । [v]सन्तं विद्यमानं [v]वीतं कान्तम् [v]अश्रितं प्राणिभिर्दाहभयात् असेवितम् । दुरासदमित्यर्थः । [v]चित्रं चायनीयं [v]गुहा गुहायां [v]हितं निहितं [v]सुवेदं सुविज्ञानं सुधनं वा [v]कूचिदर्थिनं क्वापि हविष्यर्थिनं[1] समिदाज्यपुरोडाशादि हविः[2] स्वीकुर्वन्तम् ॥ क इत्यत्र वकारस्य छान्दसे संप्रसारणे परपूर्वत्वे च ' हलः ' इति दीर्घत्वम् ॥ एवंभूतं [v]तम्[3] अग्निं निषेदिरे इति पूर्वेण संबन्धः ॥

प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि ' ससस्य यद्वियुता ' इत्याद्याः पञ्चर्चः । सूत्रितं च— ' ससस्य यद्वियुतेति पञ्च ' (आश्व. श्रौ. ४. १३) इति ॥

ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन्रणयन्त देवाः ।
महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिद्ऋतावा ॥ ७ ॥

ससस्य । यत् । विऽयुता । सस्मिन् । ऊधन् । ऋतस्य । धामन् । रणयन्त । देवाः ।
महान् । अग्निः । नमसा । रातऽहव्यः । वेः । अध्वराय । सदम् । इत् । ऋतऽवा ॥ ७ ॥

[v]यत् यमग्निं [v]देवाः स्तोतारः [v]ससस्य स्वप्नस्य [v]वियुता वियुते वियोगे । उपसंहरत्यर्थः । [v]ऋतस्य उदकस्य [v]धामन् धामनि स्थाने[4] [v]सस्मिन् सर्वस्मिन् [v]ऊधन् ऊधनि यज्ञे [v]रणयन्त रमयन्ति । स्तोत्रैरिति शेषः । [v]महान् प्रभूतः [v]नमसा नमस्कारेण [v]रातहव्यः दत्तहविष्कः [v]ऋतावा सत्यवान् सः [v]अग्निः [v]सदमित् सदैव [v]अध्वराय अध्वरं यजमानैः कृतं यज्ञम् ॥ ' सुपां सुपो भवन्तीति वक्तव्यम् ' (पा. म. ७. १. ३९) इति वचनादत्र द्वितीयार्थे चतुर्थी ॥ [v]वेः वेत्ति जानाति । यद्वा । देवा इन्द्रादयः ससस्य ऋत्विग्भिः सेव्यस्य[5] यद्यस्याग्नेर्वियुता विशिष्टे सस्मिन् भजनीये ऋतस्य सत्यस्य धामन् धामनि योनौ ऊधन्नूधनि यज्ञे रणयन्त रमयन्ते । महान् प्रभूतो नमसा हविषा रातहव्यो दत्तहविष्क ऋतावा सत्यवान् सोऽग्निरध्वराय यज्ञार्थं सदमित् सदैव वेः[6] गन्ता भवति । अध्वराय यज्ञं वेः कामयते[7] वा ॥

वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी संचिकित्वान् ।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥ ८ ॥

वेः । अध्वरस्य । दूत्यानि । विद्वान् । उभे इति । अन्तरिति । रोदसी इति । सम्ऽचिकित्वान् ।
दूतः । ईयसे । प्रऽदिवः । उराणः । विदुःऽतरः । दिवः । आऽरोधनानि ॥ ८ ॥

---

१. ख-ग-च-फ–हविरर्थिनम् ; ण–हविषः अर्थिनम् ; स–हवींषि । २. त-ल–सर्वं हविः । ३. न-ल-स–' तं ' नास्ति । ४. ख-ग-घ-च-ण-त-न-भ-ल-स–' स्थाने ' नास्ति । ५. च-ण-न-भ–सत्यस्य । ६. ख-ग-घ-च-ण-न-भ-ल-स–' वेः ' नास्ति । ७. ख-ग-च-ण-त-भ-स–कामयमानः ।

हे अग्ने [v]विद्वान् सर्वं जानानस्त्वम् [v]अध्वरस्य यज्ञस्य संबन्धीनि [v]दूत्यानि दूतकर्माणि [v]वेः वेत्सि कामयसे[1] वा । यद्वा वेरिति यज्ञविशेषणम् । वेर्यजमानस्याभीष्टफलजनकस्याध्वरस्य यागस्य संबन्धीनि दूत्यानि दूतकर्माणि विद्वान् जानन्[1] । [v]उभे [v]रोदसी उभयो रोदस्योर्द्यावापृथिव्योः [v]अन्तः मध्ये स्थितमन्तरिक्षं [v]संचिकित्वान् सम्यक् जानन् [v]प्रदिवः पुराणः । पुराणनामेदं ' प्रत्नं प्रदिवः ' (नि. ३. २७. २) इति पुराणनामसु पाठात् । [v]उराणः अल्पमपि हविः उरु बहु कुर्वाणः । ' उराण उरु कुर्वाणः ' इति यास्केनोक्तत्वात् । [v]विदुष्टरः विद्वत्तरो देवानां [v]दूतः त्वं [v]दिवः स्वर्गस्य [v]आरोधनानि आरोहणानि । आरोहणार्हाणि स्थानानीत्यर्थः । देवानां हवींष्यर्पयितुम् [v]ईयसे गच्छसि ॥

कृष्णं त एम रुशतः पुरो भाश्चरिष्ण्वर्चिर्वपुषामिदेकम् ।
यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥ ९ ॥

कृष्णम् । ते । एम । रुशतः । पुरः । भाः । चरिष्णु । अर्चिः । वपुषाम् । इत् । एकम् ।
यत् । अप्रऽवीता । दधते । ह । गर्भम् । सद्यः । चित् । जातः । भवसि । इत् । ऊँ इति । दूतः ॥९॥

हे अग्ने [v]रुशतः रोचमानस्य [v]ते तव संबन्धि । अत्र एमशब्देन गमनमार्ग उच्यते । [v]एम वर्त्म [v]कृष्णं कृष्णवर्णं भवति । [v]भाः तव संबन्धिनी दीप्तिः [v]पुरः पुरस्ताद्भवति । [v]चरिष्णु संचरणशीलम् [v]अर्चिः त्वदीयं तेजः [v]वपुषां वपुष्मतां रूपवताम् । तेजस्विनामित्यर्थः । [v]एकम् [v]इत मुख्यमेव भवति । [v]यत् यं त्वाम् [v]अप्रवीता अनुपगता यजमानाः [v]गर्भं त्वज्जननहेतुमरणि [v]दधते [v]ह धारयन्ति खलु । स त्वं [v]सद्यश्चित् सद्य एव [v]जातः उत्पन्नः सन् [v]दूतः [v]भवसीदु यजमानस्य दूतो भवस्येव ॥

सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः ॥ १० ॥

सद्यः । जातस्य । ददृशानम् । ओजः । यत् । अस्य । वातः । अनुऽवाति । शोचिः ।
वृणक्ति । तिग्माम् । अतसेषु । जिह्वाम् । स्थिरा । चित् । अन्ना । दयते । वि । जम्भैः ॥ १० ॥

[v]सद्यो [v]जातस्य अरणिनिर्मथनादनन्तरमेवोत्पन्नस्याग्नेः [v]ओजः तेजः [v]ददृशानम् । ऋत्विगादिभिर्दृश्यमानं भवतीति शेषः । [v]वातः वायुः [v]यत् यदा [v]अस्य[2] अग्नेः [v]शोचिः दीप्तिम्[3] [v]अनु लक्षीकृत्य [v]वाति गच्छति तदा सोऽयमग्निः [v]अतसेषु वृक्षसंघेषु [v]तिग्मां तीक्ष्णां [v]जिह्वां ज्वालां [v]वृणक्ति संयोजयति । [v]स्थिरा [v]चित् स्थिराण्यपि [v]अन्ना अन्नरूपाणि काष्ठादीनि [v]जम्भैः तेजोभिः [v]वि [v]दयते विखण्डयति[4] । भक्षयतीत्यर्थः ॥

१. ख-ग-घ-च-ण-प-फ-भ-स-' कामयसे ... जानन् ' नास्ति; न-विद्वान् जानन् । २. ख-ग-घ-च-न-भ-स-यस्य । ३. च-दीप्तं तेजः । ४. ख-ग-च-फ-विस्यन्दयति ।

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥ ११ ॥

तृषु । यत् । अन्ना । तृषुणा । ववक्ष । तृषुम् । दूतम् । कृणुते । यह्वः । अग्निः ।
वातस्य । मेळिम् । सचते । निऽजूर्वन् । आशुम् । न । वाजयते । हिन्वे । अर्वा ॥ ११ ॥

[v]यत् यः अग्निः [v]तृषु क्षिप्रमेव [v]अन्ना अन्नानि काष्ठादीनि [v]तृषुणा क्षिप्रेण रश्मिसमूहेन [v]ववक्ष वहति । दहतीत्यर्थः । [v]यह्वः महान् सः [v]अग्निः [v]तृषुम् आत्मानं [v]दूतं [v]कृणुते यजमानदूतं[1] करोति । [v]निजूर्वन् काष्ठानि निःशेषेण दहन्नग्निः [v]वातस्य वायोः [v]मेळिं बलं [v]सचते सेवते । [v]आशुं [v]न । अश्वसादी यथाश्वं तथा [v]अर्वा गमनशीलोऽग्निः स्वरश्मिं [v]वाजयते वाजिनं बलवन्तं करोति । [v]हिन्वे प्रेरयति च ॥ ॥ ७ ॥

'दूतं वः' इत्यष्टर्चमष्टमं सूक्तं वामदेवस्यार्षं गायत्रीछन्दस्कमग्निदेवताकम् । तथा चानुक्रम्यते– 'दूतं वोऽष्टौ गायत्रं तु' इति । व्यूळहे दशरात्रे प्रथमे छन्दोमे इदं सूक्तं जातवेदस्यनिविद्धानीयम् । तथा च सूत्रितं—'दूतं[2] व इत्याग्निमारुतम्' (आश्व. श्रौ. ८. ९) इति । इदमादिके द्वे सूक्ते प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दसि विनियुक्ते । सूत्रितं च—'अग्ने पावक दूतं व इति सूक्ते' (आश्व. श्रौ. ४. १३) इति[3] ॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ १ ॥

दूतम् । वः । विश्वऽवेदसम् । हव्यऽवाहम् । अमर्त्यम् । यजिष्ठम् । ऋञ्जसे । गिरा ॥ १ ॥

हे अग्ने [v]विश्ववेदसम् । विश्वं समस्तं वेदो धनं यस्यासौ विश्ववेदाः । तं सर्वविदं वा [v]हव्यवाहं देवेभ्यो हविषां वोढारम् [v]अमर्त्यम् अमरणधर्माणं [v]यजिष्ठम् अतिशयेन यष्टारं [v]दूतं देवानां [v]वः त्वां [v]गिरा स्तुतिरूपया वाचा [v]ऋञ्जसे यजमानोऽहं प्रसाधयामि । वर्धयामीत्यर्थः । 'ऋञ्जतिः प्रसाधनकर्मा' इति यास्कः ॥

स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह वक्षति ॥ २ ॥

सः । हि । वेद । वसुऽधितिम् । महान् । आऽरोधनम् । दिवः ।
सः । देवान् । आ । इह । वक्षति ॥ २ ॥

[v]स [v]हि प्रसिद्ध एवाग्निः [v]वसुधितिं यजमानाभीष्टफलरूपधनस्य दानं [v]वेद वेत्ति । [v]महान् प्रभूतोऽग्निः [v]दिवः [v]आरोधनम् आरोहणं देवानां स्थानं वेत्ति । [v]सः अग्निः [v]इह अस्मिन् यज्ञे

---

१. ख-ग-च-न-भ-ल-स–यजमानं दूतम् । २. ख-ग-च-ण-भ-स–अग्ने पावक दूतं व इति सूक्ते इति; न–प्र यद्वस्त्रिष्टुभं दूतं व इत्याग्निमारुतमिति । प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि आश्विनशस्त्रे चैतदादिके द्वे सूक्ते । तथा च सूत्रितम्–अग्ने पावक दूतं व इति सूक्ते इति । प्रातरनुवाकन्यायेनेति च ।

[v]देवान् इन्द्रादीन् [1]आ [v]वक्षति आवहतु ॥ वहेर्धातोः ' लिङर्थे लेट् ' इति लेट्। तस्य तिप्। ' सिब्बहुलं लेटि ' इति सिप्। ' लेटोऽडाटौ ' इत्यडागमश्च। ' हो ढः ' इति ढत्वम्। ढत्वकत्व-धत्वानि। ' तिङ्ङतिङः ' इति निघातः ॥

स वेद देव आनमं देवाँ ऋतायते दमे। दाति प्रियाणि चिद्वसु ॥ ३ ॥

सः। वेद। देवः। आऽनमम्। देवान्। ऋतऽयते। दमे। दाति। प्रियाणि। चित्। वसु ॥३॥

[v]देवः द्योतमानः [v]सः अग्निः [v]आनमं यजमानादीनानमयितुं नमस्कारयितुं [v]देवान् इन्द्रादीन् [v]वेद क्रमेण[1] वेत्ति। [v]दमे यज्ञगृहे [v]ऋतायते ऋतं यज्ञमिच्छते यजमानाय [v]प्रियाणि [v]चित् अभीष्टान्यपि [v]वसु वसूनि पश्वादीनि[2] धनानि [v]दाति ददाति प्रयच्छति ॥

स होता सेदु दुत्यं चिकित्वाँ अन्तरीयते। विद्वाँ आरोधनं दिवः ॥ ४ ॥

सः। होता। सः। इत्। ऊँ इति। दूत्यम्। चिकित्वान्। अन्तः। ईयते।

विद्वान्। आऽरोधनम्। दिवः ॥ ४ ॥

[v]सः अग्निः [v]होता देवानामाह्वाता भवति। [v]सेदु स एवाग्निः [v]दूत्यं देवानां दूतकर्म [v]चिकित्वान् जानन् [v]दिवः स्वर्गस्य [v]आरोधनम् आरोहणम् आरोहणार्हं[3] देवानां स्थानं च [v]विद्वान् जानन् [v]अन्तः द्यावापृथिव्योर्मध्ये [v]ईयते गच्छति ॥ ' ईङ् गतौ '। ' दिवादिभ्यः श्यन् '। ' तिङ्ङतिङः ' इति निघातः ॥

ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः। य ईं पुष्यन्त इन्धते ॥ ५ ॥

ते। स्याम। ये। अग्नये। ददाशुः। हव्यदातिऽभिः। ये। ईम्। पुष्यन्तः। इन्धते ॥ ५ ॥

[v]ते तव यजमानाः [v]स्याम भूयाम। ते इत्युक्तम्। के इत्युच्यते। [v]ये यजमानाः [v]अग्नये [v]हव्यदातिभिः हविर्दानैः [v]ददाशुः प्रीतिं कुर्वन्ति। [v]ईम् एनमग्निं [v]पुष्यन्तः वर्धयन्तः [v]ये यजमानाः [v]इन्धते समिद्भिर्दीप्तियुक्तं कुर्वन्ति ॥

ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे। ये अग्ना दधिरे दुवः ॥ ६ ॥

ते। राया। ते। सुऽवीर्यैः। ससऽवांसः। वि। शृण्विरे। ये। अग्ना। दधिरे। दुवः ॥ ६ ॥

[v]ये यजमानाः [v]अग्ना अग्नौ ॥ ' सुपां सुलुक्° ' इत्याकारः ॥ [v]दुवः परिचर्यां[4] [v]दधिरे धारयन्ति। कुर्वन्तीत्यर्थः। [v]ते [v]ससवांसः अग्निं संभजमानाः [v]राया पश्वादिलक्षणेन धनेन [v]वि [v]शृण्विरे विश्रूयन्ते प्रख्यायन्ते। [v]ते [v]सुवीर्यैः शोभनवीर्योपेतैः पुत्रादिभिश्च विश्रूयन्ते ॥

---

१. ल–अनुक्रमेण। २. ख-ग-च-प-भ–' पश्वादीनि ' नास्ति। ३. ख-ग-घ-च-ण-न-भ-ल-स–आरोहणार्थम्। ४. ख-ग-च–सपर्याम्। ५. ख-ग-त-न-प-फ-भ-ल-स–' ते ' नास्ति।

अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः । अस्मे वाजास ईरताम् ॥ ७ ॥

अस्मे इति । रायः । दिवेऽदिवे । सम् । चरन्तु । पुरुऽस्पृहः ।

अस्मे इति । वाजासः । ईरताम् ॥ ७ ॥

[v]पुरुस्पृहः ऋत्विगादिभिरभिलष्यमाणाः [v]रायः पश्वादिधनानि [v]अस्मे अस्मासु यजमानेषु [v]दिवेदिवे प्रतिदिनं [v]सं [v]चरन्तु प्रचरन्त्यो भवन्तु ॥ दिव्शब्दादुत्तरस्याः सप्तम्याः 'सुपां सुलुक्' इत्यादिना शेआदेशः । 'ऊडिदम्' इत्यादिना च तस्योदात्तत्वम् । 'नित्यवीप्सयोः' इति द्विर्भावे सत्युत्तरभागस्य 'अनुदात्तं च' इत्यनुदात्तत्वम् ॥ [v]वाजासः अन्नानि च [v]अस्मे अस्मान् [v]ईरतां यज्ञार्थं प्रेरयन्तु ॥

स विप्रश्चर्षणीनां शवसा मानुषाणाम् । अति क्षिप्रेव विध्यति ॥ ८ ॥

सः । विप्रः । चर्षणीनाम् । शवसा । मानुषाणाम् । अति । क्षिप्राऽइव । विध्यति ॥ ८ ॥

[v]विप्रः मेधावी । विप्र इति मेधाविनाम 'विप्रो धीरः' (नि. ३. १५. १) इति तन्नामसु पाठात् । [v]सः अग्निः [v]शवसा बलेन । शव इति बलनाम 'पाजः शवः' (नि. २. ९. ३) इति तन्नामसु पाठात् । [v]मानुषाणां मनुसंबन्धिनां [1]चर्षणीनां प्रजानां [v]क्षिप्रेव क्षेप्याण्येव[4] विनाशयितुमर्हाणि । दुरितानीति शेषः । [v]अति [v]विध्यति अतिविध्यतु अतिशयेन नाशयतु ॥ ॥ ८ ॥

'अग्ने मृळ' इत्यष्टर्चं नवमं सूक्तं वामदेवस्यार्षं गायत्रीच्छन्दस्कमग्निदेवताकम्[2] । अनुक्रान्तं[3] च–'अग्ने मृळ' इति[5] । द्वितीये[4] छन्दोमे इदं सूक्तं जातवेदस्यनिविद्धानीयम् । सूत्रितं च[5]–'क्रीळं वः शर्धोऽग्ने मृळेत्याग्निमारुतम्' (आश्व. श्रौ. ८. १०) इति ॥

अग्ने मृळ महाँ असि य ईमा देवयुं जनम् । इयेथ बर्हिरासदम् ॥ १ ॥

अग्ने । मृळ । महान् । असि । यः । ईम् । आ । देवऽयुम् । जनम् ।

इयेथ । बर्हिः । आऽसदम् ॥ १ ॥

हे [v]अग्ने [v]मृळ अस्मान् सुखय । स त्वं [v]महान् [v]असि प्रभूतो[5] भवसि[5] । [v]यः त्वम् [v]ईम् इमं [v]देवयुं देवानां कामयितारं [v]जनं यजमानं [v]बर्हिः दर्भम् [v]आसदं यज्ञे आसत्तुम् [v]आ [v]इयेथ आगच्छसि ॥

स मानुषीषु दुळभो विक्षु प्रावीरमर्त्यः । दूतो विश्वेषां भुवत् ॥ २ ॥

सः । मानुषीषु । दुःऽदभः । विक्षु । प्रऽअवीः । अमर्त्यः । दूतः । विश्वेषाम् । भुवत् ॥ २ ॥

१. ख-ग-घ-च-ण-फ-भ–क्षिप्राण्येव; न–क्षिप्रमेव । २. स–गायत्रमाग्नेयम् । ३. स–अग्ने मृळेति अनुक्रान्तं च । सूक्तविनियोगो लैङ्गिकः । ४. न–व्यूळ्हे दशरात्रे द्वितीये छन्दोमे आग्निमारुतशस्त्रे इदं सूक्तम् । तथा च सूत्रम् । ५. ख-ग-घ-च-ण-प-फ-भ–'प्रभूतो भवसि' नास्ति ।

vदूळभः दुर्दभो राक्षसादिना दुर्हिंसः vमानुषीषु मनुसंबन्धिनीषु[1] vविक्षु प्रजासु vप्रावीः प्रकर्षेण गन्ता vअमर्त्यः अमरणधर्मा vसः अग्निः vविश्वेषां सर्वेषां देवानां vदूतः vभुवत् भवतु ॥

स सद्म परि णीयते होता मन्द्रो दिविष्टिषु । उत पोता नि षीदति ॥ ३ ॥

सः । सद्म । परि । नीयते । होता । मन्द्रः । दिविष्टिषु । उत । पोता । नि । सीदति ॥ ३ ॥

vसः अग्निः vसद्म यज्ञगृहं vपरि vणीयते ऋत्विग्भिः परितो नीयते । नीयमानः सन् vदिविष्टिषु यागेषु vमन्द्रः मदनीयः स्तुत्यः सोऽग्निः vहोता च भवति । vउत अपि च vपोता सन् vनि vषीदति यज्ञगृहे उपविशति ॥

उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे । उत ब्रह्मा नि षीदति ॥ ४ ॥

उत । ग्नाः । अग्निः । अध्वरे । उतो इति । गृहऽपतिः । दमे ।

उत । ब्रह्मा । नि । सीदति ॥ ४ ॥

vउत अपि च vअग्निः vअध्वरे यागे vग्नाः देवपत्नीर्यजति । यष्टा भवतीत्यर्थः । यद्वा । ग्ना गच्छन् अध्वर्युर्भवति । vउतो अपि च सोऽग्निः vदमे यज्ञगृहे vगृहपतिः यजमानश्च भवति । vउत अपि च vब्रह्मा ब्राह्मणाच्छंसी सन् vनि vषीदति उपविशति ॥

वेषि ह्यध्वरीयतामुपवक्ता जनानाम् । हव्या च मानुषाणाम् ॥ ५ ॥

वेषि । हि । अध्वरिऽयताम् । उपऽवक्ता । जनानाम् । हव्या । च । मानुषाणाम् ॥ ५ ॥

vअध्वरीयतां यज्ञमिच्छतां vमानुषाणां मनुसंबन्धिनां[2] vजनानां[3] vहव्या vच हव्यानि हवींषि हे अग्ने vवेषि vहि कामयसे खलु । vउपवक्ता अध्वर्युप्रभृतीनां सर्वेषां कर्मणामनुज्ञार्थं 'मां प्रणय' इत्यादिरूपस्य वाक्यस्य वक्ता सन् ब्रह्मा चासि । 'ब्रह्मा त्वो वदति जातविद्याम्' (ऋ. सं. १०. ७१. ११) इति श्रुतेः । उपवक्ता[4] सर्वेषां कर्मणामवैकल्यार्थमुपद्रष्टा वा[5] सदस्योऽसि । 'स हि सप्तदशः कर्मणामुपद्रष्टा भवति' इत्यापस्तम्बेनोक्तत्वात् ॥

वेषीद्वस्य दूत्यं१ यस्य जुजोषो अध्वरम् । हव्यं मर्तस्य वोळ्हवे ॥ ६ ॥

वेषि । इत् । ऊँ इति । अस्य । दूत्यम् । यस्य । जुजोषः । अध्वरम् ।

हव्यम् । मर्तस्य । वोळ्हवे ॥ ६ ॥

१. प–मनुष्यसंबन्धिनीषु । २. प–मनुष्यसंबन्धिनीनाम् । ३. ल–जनानां यजमानानाम् । ४. ण–यद्वा उपवक्ता । ५. ख-ग-च-ण-त-न-प-फ-भ-स–'वा' नास्ति ।

हे अग्ने त्वं [v]मर्तस्य मनुष्यस्य [v]यस्य यजमानस्य [v]अध्वरं यागं [v]हव्यं हविः [v]वोळहवे वोढुम् ॥ वहेर्धातोः ' तुमर्थे सेसेनसे° ' इति तवेन्प्रत्ययः । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् ॥ [v]जुजोषः सेवेथाः ॥ ' जुषी प्रीतिसेवनयोः ' । लेट् । ' बहुलं छन्दसि ' इति शपः श्लुर्द्विर्भावश्च । ' लेटोऽडाटौ ' इत्यडागमः ॥ [v]अस्य यजमानस्य [v]दूत्यं दूतकर्म [v]वेषीदु कामयस एव ॥

अस्माकं जोष्यध्वरमस्माकं यज्ञमङ्गिरः । अस्माकं शृणुधी हवम् ॥ ७ ॥

अस्माकम् । जोषि । अध्वरम् । अस्माकम् । यज्ञम् । अङ्गिरः । अस्माकम् । शृणुधि । हवम् ॥७॥

हे [v]अङ्गिरः अग्ने त्वम् [v]अस्माकम् [v]अध्वरम् अस्मदीयं यागं [v]जोषि जुषस्व सेवस्व । [v]अस्माकम् अस्मदीयं [v]यज्ञं यजनसाधनं[1] हविश्च जुषस्व । [v]अस्माकम् अस्मदीयं [v]हवम् आह्वानरूपं स्तोत्रं च [v]शृणुधि शृणु ॥ शृणोतेर्लोण्मध्यमैकवचनम् । सिप् । तस्य हिरादेशः[2] ' श्रुवः शृ च ' इति धातोः श्रुप्रत्ययः शृभावश्च[3] । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः ॥

परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ ८ ॥

परि । ते । दुःऽदभः । रथः । अस्मान् । अश्नोतु । विश्वतः । येन । रक्षसि । दाशुषः ॥ ८ ॥

हे अग्ने त्वं [v]येन रथेन [v]विश्वतः विश्वासु सर्वासु दिक्षु गच्छन् [v]दाशुषः हविष्प्रदातॄन् यजमानान् [v]रक्षसि विघ्नेभ्यः पालयसि । [v]ते[4] त्वदीयः [v]दूळभः दुर्दभः दुर्हिंसः[5] सः [v]रथः [v]अस्मान् यजमानान् [v]परि परितः सर्वतः [v]अश्नोतु व्याप्नोतु ॥ अश्नोतेर्व्यत्ययेन परस्मैपदम् ॥ ॥ ९ ॥

' अग्ने तमद्य ' इत्यष्टर्चं दशमं सूक्तं वामदेवस्यार्षम् आग्नेयम्[6] । तथा चानुक्रमणिका—' अग्ने तमद्य पदपाङ्क्तं[7] पञ्चमी महापदपङ्क्तिरन्त्योष्णिक् चतुर्थी षष्ठ्युपान्त्या वा सप्तम्याः पञ्चकौ मुख्यौ तृतीयः सप्तको नवकश्चाष्टम्याः पञ्चकः पादश्चतुष्कः सप्तकश्चैष्टुभश्च ' इति । इदं कृत्स्नमपि सूक्तं पदपङ्क्तिश्छन्दस्कं ' पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः ' इत्युक्तलक्षणोपेतत्वात्[8] । पञ्चमी ' तव स्वादिष्टा ' इत्येषा महापदपङ्क्तिः ' पञ्च पञ्चकाः षट्कश्चैकः ' इति लक्षणसद्भावात् । अन्त्या ' शिवा नः सख्या ' इत्येषोष्णिक्छन्दस्का । चतुर्थीषष्ठीसप्तम्यः ' आभीष्टे अद्य ', ' घृतं न पूतं ', ' कृतं चिद्धि ष्मा ' इत्येतास्तिस्र उष्णिहः पदपङ्क्तयो वा । अत्र सप्तम्यष्टम्योः पदपङ्क्त्युष्णिहोः परिभाषोक्तपादविच्छेदापवादाय प्रकारान्तरेण विच्छेदः कृतः । दशमेऽहनि इदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—' अग्ने तमद्याश्वं न स्तोमैरित्याज्यम् ' (आश्व. श्रौ. ८. १२) इति । पिण्डपितृयज्ञे ' अग्ने तमद्य ' इत्यनयाग्निं प्रत्यागच्छेत् । सूत्रितं च— ' अग्निं प्रत्येयादग्ने तमद्याश्वं न स्तोमैः ' (आश्व. श्रौ. २. ७) इति । पौनराधेयिक्यां स्विष्टकृत्येवैव याज्या । सूत्रितं च—' अग्ने तमद्याश्वं न स्तोमैरिति संयाज्ये ' (आश्व. श्रौ. २. ८) इति ॥

१. ख-ग-घ-च-ण-प-ल-स—यजमानसाधनम् । २. त-ल—हिरादेशः । ३. च—प्रकृतेः शृभावश्च । ४. न-ल-स—' ते ' नास्ति । ५. ख-ग-च-ण-त-न-भ—दुर्हिंस्यः । ६. ख-ग-घ-च-ण-न-भ-ल-स—' आग्नेयं ' नास्ति । ७. त—पदपंक्ति । ८. ख-ग-च-ण-न-भ-स—इत्युक्तलक्षणत्वात् ।

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामा त ओहैः ॥१॥

अग्ने । तम् । अद्य । अश्वम् । न । स्तोमैः । क्रतुम् । न । भद्रम् । हृदिऽस्पृशम् ।

ऋध्याम । ते । ओहैः ॥ १ ॥

हे ᵛअग्ने ᵛअद्य अस्मिन्नहनि वयमृत्विगादयः ᵛओहैः इन्द्रादिप्रापकैः ᵛस्तोमैः स्तोत्रसमूहैः ᵛतं प्रसिद्धं ᵛते[1] त्वाम् ᵛऋध्याम समर्धयामः । कीदृशं त्वाम् । ᵛअश्वं ᵛन वोढारमश्वमिव तथा हविषो वाहकं ᵛक्रतुं ᵛन कर्तारमिव । उपकर्तारमित्यर्थः । तथा ᵛभद्रं भजनीयं ᵛहृदिस्पृशं हृदयंगमम् । अतिशयेन प्रियमित्यर्थः ॥

पौनराधेयिक्यामिष्टौ प्रधानस्य ' अधा ह्यग्ने ' इत्येषानुवाक्या । ' एभिर्नो अर्कैः ' इति तस्यां स्विष्टकृतोऽनुवाक्या । ' आभिष्टे अद्य ' इति प्रधानस्य याज्या । सूत्रितं च–' अधा ह्यग्ने क्रतोर्भद्रस्याभिष्टे अद्य गीर्भिर्गृणन्त एभिर्नो अर्कैः ' (आश्व. श्रौ. २. ८) इति ॥

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥ २ ॥

अध । हि । अग्ने । क्रतोः । भद्रस्य । दक्षस्य । साधोः । रथीः । ऋतस्य । बृहतः । बभूथ ॥२॥

ᵛअधा ᵛहि इदानीमेव हे ᵛअग्ने त्वं ᵛक्रतोः अस्मदीयस्य यागस्य ᵛरथीः नेता ᵛबभूथ भवसि ॥ ' छन्दसि लुङ्लङ्लिटः ' इति भवतेर्वर्तमानेऽर्थे लिटि सिपस्थल् । ' आर्धधातुकस्येड्वलादेः ' इतीडागमे प्राप्ते ' बभूथाततन्थ० ' इति निपातनादिडभावः ॥ कीदृशस्य यागस्य । ᵛभद्रस्य भजनीयस्य ᵛदक्षस्य प्रवृद्धस्य ᵛसाधोः अभीष्टफलानां साधकस्य ᵛऋतस्य सत्यभूतस्य ᵛबृहतः महतः ॥

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः ।
अग्ने विश्वेभिः सुमना अनीकैः ॥ ३ ॥

एभिः । नः । अर्कैः । भव । नः । अर्वाङ् । स्वः । न । ज्योतिः ।

अग्ने । विश्वेभिः । सुऽमनाः । अनीकैः ॥ ३ ॥

हे ᵛअग्ने ᵛज्योतिः ज्योतिष्मान् ᵛस्वर्ण सूर्य इव तथा ᵛविश्वेभिः विश्वैः समस्तैः ᵛअनीकैः तेजोभिः ᵛसुमनाः शोभनमनस्कस्त्वं ᵛनः अस्मदीयैः ᵛएभिः एतैः ᵛअर्कैः अर्चनीयैः स्तोत्रैः ᵛनः अस्माकम् ᵛअर्वाङ् अभिमुखः ᵛभव ॥

आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ॥४॥

आभिः । ते । अद्य । गीःऽभिः । गृणन्तः । अग्ने । दाशेम ।

प्र । ते । दिवः । न । स्तनयन्ति । शुष्माः ॥ ४ ॥

---

१. न-ल-स–' ते ' नास्ति ।

vअद्य अस्मिन् दिवसे हे vअग्ने vआभिः vगीर्भिः स्तुतिरूपाभिर्वाग्भिः vगृणन्तः त्वां स्तुवन्तो वयमृत्विगादयः vते तुभ्यं vदाशेम हवींषि दद्याम[1]। vदिवो vन सूर्यस्य रश्मय इव vते त्वदीयाः vशुष्माः शोधका ज्वालाः vप्र vस्तनयन्ति प्रकर्षेण शब्दायन्ते। यद्वा। दिवो न मेघा इव त्वदीया ज्वालाः शब्दायन्ते ॥

तव॒ स्वादि॒ष्ठाग्ने॑ संदृ॒ष्टिरि॒दा चि॒दह्न॒ इ॒दा चि॑दक्तोः।
श्रि॒ये रु॒क्मो न रो॑चत उपा॒के ॥ ५ ॥

तव॑। स्वादि॑ष्ठा। अग्ने॑। सम्ऽदृ॑ष्टिः। इ॒दा। चि॒त्। अह्नः॑। इ॒दा। चि॒त्। अ॒क्तोः॑।
श्रि॒ये। रु॒क्मः॑। न। रो॒च॒ते॒। उ॒पा॒के ॥ ५ ॥

हे vअग्ने vस्वादिष्ठा स्वादुतमा प्रियतमा vतव त्वदीया vसंदृष्टिः दीप्तिः vअह्नः vइदा vचित् दिवसस्येदानीं च vअक्तोः vइदा vचित्। अक्तुरिति रात्रिनाम ' शर्वरी अक्तुः ऊर्म्या ' (नि. १. ७. ४) इति रात्रिनामसु पाठात्। रात्रेरिदानीं च। अहोरात्र इत्यर्थः ॥ ' अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ' इत्यस्माद्धातोः ' किच्च ' इत्यौणादिकसूत्रेण तुप्रत्ययः तस्य किद्भावश्च। ' तितुत्र° ' इतीट्प्रतिषेधः। ' अनिदिताम्° ' इत्युपधानकारलोपः। ' चोः कुः ' इति कुत्वम् ॥ vरुक्मो vन अलंकार इव vश्रिये पदार्थमाश्रयितुम् vउपाके अन्तिके[2]। उपाक इत्यन्तिकनाम ' आके उपाके ' (नि. २. १६. ७) इति तन्नामसु पाठात्। vरोचते राजते ॥

घृ॒तं न पू॒तं त॒नूर॑रे॒पाः शु॒चि हि॑र॒ण्यम्। तत्ते॑ रु॒क्मो न रो॑चत स्वधावः ॥ ६ ॥

घृ॒तम्। न। पू॒तम्। त॒नूः। अ॒रे॒पाः। शु॒चि। हि॒र॒ण्यम्।
तत्। ते॒। रु॒क्मः॑। न। रो॒च॒त॒। स्व॒धा॒ऽवः॒ ॥ ६ ॥

हे vस्वधावः। स्वधाशब्दोऽन्नवाची। अन्नवन्नग्ने vघृतं शोधितं vघृतं vन आज्यमिव vतनूः त्वदीया मूर्तिः vअरेपाः पापरहिता भवति। vशुचि शुद्धं vहिरण्यं हितरमणीयं vते त्वदीयं vतत् प्रसिद्धं तेजः vरुक्मो vन भूषणमिव vरोचत रोचते भासते ॥

कृ॒तं चि॒द्धि ष्मा॒ सने॑मि॒ द्वेषोऽग्ने॑ इ॒नोषि॒ मर्ता॑त्। इ॒त्था यज॑मानादृतावः ॥ ७ ॥

कृ॒तम्। चि॒त्। हि। स्म॒। सने॑मि। द्वेषः॑। अग्ने॑। इ॒नोषि॑। मर्ता॑त्।
इ॒त्था। यज॑मानात्। ऋ॒त॒ऽवः॒ ॥ ७ ॥

हे vऋतावः[3] सत्यवन् vअग्ने vकृतं vचित् यजमानेन कृतमपि[4] vसनेमि चिरंतनम्। सनेमीति पुराणनाम ' सनेमि[5] पूर्व्यम् ' (नि. ३. २७. ४) इति पुराणनामसु पाठात्। vद्वेषः पापं[6] vमर्तात्

१. घ-च-प-भ-ल-दद्म। २. ल-अर्वाके अन्तिके। ३. ख-ग-च-न-स-ऋतवः। ४. घ-ण-त-प-भ-पापं कृतमपि। ५. त-प्रवयाः सनेमि। ६. ख-ग-घ-च-ण-न-भ-स-पापात्।

मनुष्यान् यजमानात् ᵛइत्था सत्यम्। इत्थेति सत्यनामैतत् ' अद्धा[१] इत्था[१] ' (नि. ३. १०. ५) इति तन्नामसु पाठात्। ᵛइनोषि ᵛहि ᵛस्म प्रेरयस्येव खलु। नाशयसीत्यर्थः ॥

शिवा नः सख्या सन्तु भ्रात्राग्ने देवेषु युष्मे।
सा नो नाभिः सदने सस्मिन्नूधन् ॥ ८ ॥

शिवा। नः। सख्या। सन्तु। भ्रात्रा। अग्ने। देवेषु। युष्मे इति।
सा। नः। नाभिः। सदने। सस्मिन्। ऊधन् ॥ ८ ॥

हे ᵛअग्ने ᵛनः अस्मदीयानि ᵛसख्या सख्यानि सखित्वानि[२] ᵛभ्रात्रा भ्रात्राणि भ्रातृसंबन्धीनि कर्माणि ᵛदेवेषु द्योतमानेषु ᵛयुष्मे युष्मासु ॥ ' सुपां सुलुक्° ' इति सप्तमीबहुवचनस्य शेआदेशः ॥ ᵛशिवा शिवानि ᵛसन्तु मङ्गलानि भवन्तु। ᵛसा सखित्वभ्रातृकर्मसंततिः ᵛसदने देवानां स्थाने ᵛसस्मिन्नूधन्[३] सर्वस्मिन् यज्ञे ᵛनः अस्माकं ᵛनाभिः बन्धनं भवति ॥ ॥ १० ॥ ॥ १ ॥

द्वितीयेऽनुवाके एकादश सूक्तानि। तत्र ' भद्रं ते ' इति षड्चं प्रथमं सूक्तं वामदेवस्यार्षं त्रिष्टुप्-छन्दस्कमग्निदेवताकम्। ' भद्रं षट् ' इत्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छन्दसीदमादिके द्वे सूक्ते विनियुक्ते। तथा च[४] सूत्रितं— ' भद्रं ते अग्न इति सूक्ते ' (आश्व. श्रौ. ४. १३) इति ॥

भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य।
रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् ॥ १ ॥

भद्रम्। ते। अग्ने। सहसिन्। अनीकम्। उपाके। आ। रोचते। सूर्यस्य।
रुशत्। दृशे। ददृशे। नक्तऽया। चित्। अरूक्षितम्। दृशे। आ। रूपे। अन्नम् ॥ १ ॥

हे ᵛसहसिन् बलवन् ᵛअग्ने ᵛते त्वदीयं ᵛभद्रं[५] भजनीयम् ᵛअनीकं तेजः[५] ᵛसूर्यस्य ᵛउपाके समीपभूते। दिवसे इत्यर्थः। ᵛआ ᵛरोचते समन्ताद्दीप्यते। ᵛरुशत् रोचमानं ᵛदृशे दर्शनीयं तेजः[६] ᵛनक्तया ᵛचित् रात्रावपि ᵛददृशे दृश्यते। आ इत्ययं शब्दः चेत्यर्थे[७] वर्तते। ᵛआ किंच ᵛअरूक्षितं स्निग्धं ᵛदृशे दर्शनीयम् ᵛअन्नं पुरोडाशादिरूपं हविः ᵛरूपे रूपवति त्वयि ऋत्विगादिभिः हुतं भवति ॥

---

१. ख-ग-च-ण-त-न-भ-ल–इत्था अद्धा; स–इत्था कृतम्। २. ख-ग-घ-च-ण-न-भ-स–' सखित्वानि ' नास्ति। ३. ल-स–सस्मिन्नूधनि। ४. ख-ग-च-ण-न-भ-स–' च ' नास्ति। ५. ख-ग-घ-च-ण-प-भ–अनीकं तेजः भद्रं मङ्गलम्; न-ल-अनीकं तेजः। ६. ल–त्वदीयं तेजः। ७. ल–किंचेत्यर्थे।

वि षाह्यग्ने गृणते मनीषां खं वेषसा तुविजात स्तवानः ।
विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥ २ ॥

वि । साहि । अग्ने । गृणते । मनीषाम् । खम् । वेषसा । तुविऽजात । स्तवानः ।
विश्वेभिः । यत् । ववनः । शुक्र । देवैः । तत् । नः । रास्व । सुऽमहः । भूरि । मन्म ॥२॥

हे [v]तुविजात मथनेन[1] अरणिद्वारा यज्ञादिकर्मसु बहुजन्मन् [v]अग्ने [v]स्तवानः ऋत्विगादिभिः स्तूयमानस्त्वं [v]वेषसा यज्ञादिकर्मणा । वेष इति कर्मनाम ' वेषः वेषः विष्टी ' (नि. २. १. ५) इति कर्मनामसु पाठात् । [v]मनीषां स्तुतिं [v]गृणते कुर्वते यजमानाय [v]खं यजमानप्राप्यस्य[2] पुण्यलोकस्य द्वारं [v]वि [v]षाहि विष्य । विमुञ्चेत्यर्थः ॥ ' षोऽन्तकर्मणि ' इत्यस्माद्धातोर्लोण्मध्यमपुरुषैकवचनं सिप् । ' दिवादिभ्यः[3] श्यन् ' । तस्य ' बहुलं छन्दसि ' इति लुक् । ' आदेच उपदेशेऽशिति ' इत्यात्वम् । सेर्हिरादेशः[3] । ' तिङुतिङः ' इति निघातः ॥ हे [v]शुक्र दीप्यमानाग्ने त्वं [v]विश्वेभिः विश्वैः सर्वैः ॥ ' बहुलं छन्दसि ' इति भिस ऐसभावः ॥ [v]देवैः इन्द्रादिभिः सह [v]यत् पश्वादिधनं [v]ववनः[4] यजमानेभ्यः प्रयच्छेः ॥ वनतेर्लेट् । तस्य सिपः ' इतश्च लोपः[5] इति इकारलोपः । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' श्लौ ' इति द्विर्वचनम् । हलादिशेषः । ' लेटोऽडाटौ ' इत्यडागमः । ' यदवृत्तान्नित्यम् ' इति निघाताभावः ॥ हे [v]सुमहः शोभनतेजस्काग्ने [v]भूरि प्रभूतं [v]मन्म[4] मननीयं [v]तत् धनं [v]नः अस्मभ्यं [v]रास्व देहि ॥

महापितृयज्ञे स्विष्टकृदग्निः कव्यवाहनो यष्टव्यः । तस्य द्वे अनुवाक्ये । तत्र ' त्वदग्ने काव्या ' इति द्वितीयानुवाक्या । तथा च सूत्रितं–' त्वदग्ने काव्या त्वन्मनीषाः स प्रत्नथा सहसा जायमानः ' (आश्व. श्रौ. २. १९) इति ॥

त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि ।
त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥ ३ ॥

त्वत् । अग्ने । काव्या । त्वत् । मनीषाः । त्वत् । उक्था । जायन्ते । राध्यानि ।
त्वत् । एति । द्रविणम् । वीरऽपेशाः । इत्थाऽधिये । दाशुषे । मर्त्याय ॥ ३ ॥

हे [v]अग्ने [v]काव्या काव्यानि हविर्वहनदेवतानयनादीन्यग्निसंबन्धीनि कर्माणि आध्वर्यवाणि कर्माणि वा [v]त्वत् त्वत्तः[6] [v]जायन्ते उत्पद्यन्ते । [v]मनीषाः स्तुतिरूपा वाचः [v]त्वत्[7] एव जायन्ते । [v]राध्यानि राद्धुं योग्यानि [v]उक्था उक्थानि शस्त्राणि [v]त्वत् त्वत्तो जायन्ते । [v]इत्थाधिये । धीरिति कर्मनाम । इत्थेति सत्यनामसु पाठात् सत्यकर्मणे [v]दाशुषे हवींषि दत्तवते [v]मर्त्याय मनुष्याय यजमानाय [v]वीरपेशाः । पेश इति रूपनाम । इदं विक्रान्तरूपम् । अत्र लिङ्गव्यत्ययेन वीरपेशा इति रूपम् । [v]द्रविणं पश्वादिधनं [v]त्वत् त्वत्तः [v]एति निर्गच्छति । उत्पद्यत इत्यर्थः ॥

१. त–मथनीय । २. त–यजमानेन प्राप्यस्य; न–यजमानेन प्रार्थ्यस्य । ३. ख-ग-च-ण-न-फ-भ-स–' दिवादिभ्यः... हिरादेशः ' नास्ति । ४. च-ण-न–वावनः । ५. ख-ग-च-भ-न-ल-स–' मन्म ' नास्ति । ६. न-ल-स–भवतः । ७. च-फ–त्वदु त्वत्तः ।

त्वद्वाजी वाजंभरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः ।
त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥ ४ ॥

त्वत् । वाजी । वाजम्ऽभरः । विऽहायाः । अभिष्टिऽकृत् । जायते । सत्यऽशुष्मः ।
त्वत् । रयिः । देवऽजूतः । मयःऽभुः । त्वत् । आशुः । जूजुऽवान् । अग्ने । अर्वा ॥ ४ ॥

हे [v]अग्ने [v]वाजी बलवान् [v]वाजंभरः हविर्लक्षणान्नस्य[1] वाहकः । अग्नेर्वाजंभर इत्येषा वैदिकी संज्ञा ॥ 'संज्ञायां भृतृवृजि०' इति वाजशब्दे कर्मण्युपपदे खच्प्रत्ययः । 'अरुर्द्विषदजन्तस्य०' इति मुमागमः । 'चितः' इत्यन्तोदात्तत्वम् ॥ [v]विहायाः महान् [v]अभिष्टिकृत् यज्ञकृत् अभ्येषणकृत् वा । [v]सत्यशुष्मः सत्यबलः पुत्रः [v]त्वत् त्वत्तः [v]जायते उत्पद्यते । [v]देवजूतः देवैः प्रेरितः [v]मयोभुः सुखप्रदः । मय इति सुखनामैतत् । [v]रयिः धनं [v]त्वत्[2] जायते । [v]आशुः शीघ्रगामी । अप्रतिहतगमन इत्यर्थः । [v]जूजुवान् वेगेन गच्छन् [v]अर्वा अश्वः [v]त्वत् भवतो जायते ॥

त्वामग्ने प्रथमं देवयन्तो देवं मर्ता अमृत मन्द्रजिह्वम् ।
द्वेषोयुतमा विवासन्ति धीभिर्दमूनसं गृहपतिममूरम् ॥ ५ ॥

त्वाम् । अग्ने । प्रथमम् । देवऽयन्तः । देवम् । मर्ताः । अमृत । मन्द्रऽजिह्वम् ।
द्वेषःऽयुतम् । आ । विवासन्ति । धीभिः । दमूनसम् । गृहऽपतिम् । अमूरम् ॥ ५ ॥

हे [v]अमृत अमरणशील [v]अग्ने [v]देवयन्तः देवानिच्छन्तः [v]मर्ताः मर्त्याः[3] मनुष्या यजमानाः [v]त्वां [v]धीभिः[4] स्तुतिभिः कर्मभिर्वा [v]आ [v]विवासन्ति समन्तात् परिचरन्ति । कीदृशं त्वाम् । [v]प्रथमं देवानाम् आद्यं [v]देवं द्योतमानं [v]मन्द्रजिह्वम् । देवानां मादयित्री जिह्वा यस्य तम् । [v]द्वेषोयुतं द्वेषसां पापानां पृथक्कर्तारं [v]दमूनस रक्षसां दमनकरेण मनसोपेतम् । दमूनःशब्दस्य कथमयमर्थ इति 'दमूना दममना वा दानमना वा दान्तमना वापि वा दम इति गृहनाम तन्मनाः स्यात्' (निरु. ४. ४) इति यास्केनोक्तत्वात् इति ॥ 'दमु उपशमे' । 'दमेरूनसिः' इत्यौणादिक ऊनसिप्रत्ययः ॥ [v]गृहपतिं गृहाणां पालयितारम् [v]अमूरम् अमूढम् । प्रगल्भमित्यर्थः ॥

स्वस्ययन्याम् 'आरे अस्मत्' इति स्वस्तिमतोऽग्नेर्याज्या । सूत्रितं[5] च[6]—'आरे अस्मदमतिमारे अंहः[6]' (आश्व. श्रौ. २. १०) इति[6] ॥

१. त–हविर्लक्षणस्यान्नस्य । २. घ-ण-प-भ-स–त्वत् त्वत्तः । ३. न-ल-स–'मर्त्याः' नास्ति । ४. ख-ग-च-ण-न-भ-ल-स–धीतिभिः । ५. ण–सूत्रितं च–स्वस्त्ययन्यां रक्षितवन्तौ । अग्ने रक्षा णो अंहसस्त्वं नः सोम विश्वत इति । अग्निः स्वस्तिमान् । स्वस्ति नो दिवो अग्ने पृथिव्याः । ६. ण-न–अंह इति पूर्वयोक्ते संयाज्ये ।

आरे अस्मदमतिमारे अंहं आरे विश्वां दुर्मतिं यन्निपासि ।
दोषा शिवः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति ॥ ६ ॥

आरे । अस्मत् । अमतिम् । आरे । अंहः । आरे । विश्वाम् । दुःऽमतिम् । यत् । निऽपासि ।
दोषा । शिवः । सहसः । सूनो इति । अग्ने । यम् । देवः । आ । चित् । सचसे । स्वस्ति ॥६॥

हे ᵛसहसः ᵛसूनो बलस्य पुत्र। मथ्यमानोऽग्निर्मथनकारिणां हि बलेन जायते इत्यग्नेर्बलपुत्रत्वम् । हे ᵛअग्ने ᵛदोषा रात्रौ ᵛशिवः शिवकरः ᵛदेवः द्योतमानस्त्वं ᵛयं यानस्मान् ᵛस्वस्ति अविनाशाय ᵛआ ᵛसचसे परितः सेवसे । ᵛचित् इति पूरणः । ᵛयत् यस्मात् कारणात् ᵛनिपासि यजमानान् नितरां पालयसि । तेभ्यः ᵛअस्मत् अस्मत्तः ᵛअमतिं पापरूपामशनेच्छाम् ᵛआरे दूरे कुरु । ' अशनाया वै पाप्मामतिः ' (ऐ. ब्रा. २. २) इति ब्राह्मणम् । ᵛआरे दूरेऽस्मत्तः ᵛअंहः पापं कुरु । आरे इति दूरनामैतत् । अस्मत्तः ᵛआरे दूरे ᵛविश्वां[1] सर्वां[1] ᵛदुर्मतिं दुर्मनस्त्वं कुरु ॥ ॥ ११ ॥

' यस्त्वामग्ने ' इति षड्र्चं द्वितीयं सूक्तम् । वामदेव[2] ऋषिः । त्रैष्टुभं छन्दः । अग्निर्देवता[2] । ' यस्त्वाम् ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

यस्त्वामग्न इनधते यतस्रुक्त्रिस्ते अन्नं कृणवत्सस्मिन्नहन् ।
स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान् ॥ १ ॥

यः । त्वाम् । अग्ने । इनधते । यतऽस्रुक् । त्रिः । ते । अन्नम् । कृणवत् । सस्मिन् । अहन् ।
सः । सु । द्युम्नैः । अभि । अस्तु । प्रऽसक्षत् । तव । क्रत्वा । जातऽवेदः । चिकित्वान् ॥१॥

हे ᵛअग्ने ᵛयतस्रुक् स्रुचा संबद्धः ᵛयः यजमानः ᵛत्वाम् ᵛइनधते दीप्तियुक्तं कुर्यात् । यः ᵛसस्मिन्नहन् सर्वस्मिन्नहनि ᵛते तुभ्यं ᵛत्रिः त्रिर्वारं सवनत्रये ᵛअन्नं हविर्लक्षणमन्नं ᵛकृणवत् कुर्यात् । हे ᵛजातवेदः जातानां वेदितरग्ने ᵛतव तोपकेन ᵛक्रत्वा इन्धनादिहेतुना कर्मणा ᵛप्रसक्षत् प्रसहमानं स्वदीयं तेजः ᵛचिकित्वान् जानन् ᵛसः यजमानः ᵛद्युम्नैः धनैर्यशोभिर्वा ᵛसु अत्यन्तम् ᵛअभ्यस्तु शत्रून् अभिभवतु ॥

इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन् ।
स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान् ॥ २ ॥

इध्मम् । यः । ते । जभरत् । शश्रमाणः । महः । अग्ने । अनीकम् । आ । सपर्यन् ।
सः । इधानः । प्रति । दोषाम् । उषसम् । पुष्यन् । रयिम् । सचते । घ्नन् । अमित्रान् ॥ २ ॥

---

१. ख-ग-न-भ-ल-स-' विश्वां सर्वां ' नास्ति । २. स-वामदेवस्यार्षं त्रैष्टुभमाग्नेयम् ।

हे vअग्ने vयः यजमानः vते तुभ्यम् vइध्मं होमसाधनं समिज्जातं vजभरत् आहरेत् ॥ 'हृञ् हरणे'। लिङर्थे लेट्। तस्य तिपः 'इतश्च लोपः०' इति इकारलोपः। 'बहुलं छन्दसि' इति शपः श्लुः। द्विर्वचनादिकार्यम्। 'लेटोऽडाटौ' इत्यडागमः। 'हृग्रहोर्भः०' इति भत्वम् ॥ vआश्रमाणः इध्माद्याहरणे श्रम्यन् vमहः महतः[1] तव vआ vअनीकम्। आकारश्चार्थे। तेजश्च vसपर्यन् परिचरन् यो यजमानः vदोषां vप्रति रात्रिं लक्षीकृत्य vउषसं प्रति उषःकालं च लक्षीकृत्य। कालद्वयेऽपीत्यर्थः। vइधानः इन्धानस्त्वां दीप्तियुक्तं करोति vपुष्यन् प्रजाभिः पशुभिश्च पुष्टः सन् vसः यजमानः vअमित्रान् शत्रून् vघ्नन् हिंसन् vरयिं धनं vसचते सेवते। सर्वदा पश्वादिधनसमृद्धो भवतीत्यर्थः ॥

उखासंभरणीयेष्टौ अग्नेः क्षत्रभृतोऽनुवाक्या। तथा च सूत्रितम्—'अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः। दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥ ३ ॥ अग्निरीशे बृहतः क्षत्रियस्य वाजस्य परमस्य रायः। यत्ते दिवो यत्पृथिव्या यदोषधीभ्यो यदृते त्वा भुवनं न वि ष्ठाः ॥ ४ ॥ यत्ते दिवो यत्पृथिव्या यदोषधीभ्यो यदृते त्वा भुवनं न वि ष्ठाः। अग्ने पुरीष्यासि विदानो नो वसो जरितारं सनेदसि ॥ ५ ॥ अग्ने पुरीष्यासि विदानो नो वसो जरितारं सनेदसि। अग्ने यज्ञेषु चोदय ॥ ६ ॥ अग्ने यज्ञेषु चोदय' (आश्व. श्रौ. ४. १) इति ॥

अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः।
दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥ ३ ॥

अग्निः। ईशे। बृहतः। क्षत्रियस्य। अग्निः। वाजस्य। परमस्य। रायः।
दधाति। रत्नम्। विधते। यविष्ठः। वि। आनुषक्। मर्त्याय। स्वधाऽवान्॥ ३ ॥

vअग्निः vबृहतः महतः vक्षत्रियस्य बलस्य vईशे ईश्वरः[2] भवति ॥ वर्तमानेऽर्थे लिट् ॥ किंच vअग्निः vपरमस्य उत्कृष्टस्य vवाजस्य अन्नस्य vरायः पश्वादेर्धनस्य चेशे। vयविष्ठः युवतमः vस्वधावान् अन्नवान् तेजस्वी वाग्निः[3] vविधते परिचरते। 'विधतिः परिचरणकर्मा' इति यास्कः। vमर्त्याय मनुष्याय यजमानाय vरत्नं रमणीयं धनम् vआनुषक् अनुषक्तं vवि vदधाति करोति ॥

यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः।
कृधी ष्वस्मॉं अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ ४ ॥

यत्। चित्। हि। ते। पुरुषऽत्रा। यविष्ठ। अचित्तिऽभिः। चकृम। कत्। चित्। आगः।
कृधि। सु। अस्मान्। अदितेः। अनागान्। वि। एनांसि। शिश्रथः। विष्वक्। अग्ने॥ ४ ॥

हे vयविष्ठ युवतम vअग्ने vयच्चिद्धि यद्यपि खलु vते त्वदीयेषु vपुरुषत्रा परिचारकेषु पुरुषेषु[4] vअचित्तिभिः अज्ञानैः vकच्चिदागः किंचिदपि पापं वयं vचकृम तथापि हे अग्ने vअस्मान् vअदितेः भूमेः vअनागान् अनागसः पापरहितान् vसु अत्यन्तं vकृधि कुरु। हे अग्ने vविष्वक् सर्वतो विद्यमानानि vएनांसि अस्माभिः कृतानि पापानि vवि vशिश्रथः विस्रथय[5] शिथिलीकुरु[5] ॥

१. च-फ-महत्। २. ल-ईशः। ३. ख-ग-च-ण-न-भ-स-चाग्निः; घ-अग्निः। ४. ख-ग-च-त-न-भ-स-'पुरुषेषु' नास्ति। ५. च-फ-विस्रथानि कुरु।

महश्चिदग्न एनसो अभीके ऊर्वाद्देवानामुत मर्त्यानाम् ।
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥ ५ ॥

महः । चित् । अग्ने । एनसः । अभीके । ऊर्वात् । देवानाम् । उत । मर्त्यानाम् ।
मा । ते । सखायः । सदम् । इत् । रिषाम । यच्छ । तोकाय । तनयाय । शम् । योः ॥५॥

हे [v]अग्ने [v]देवानाम् इन्द्रादीनाम् [v]उत अपि च [v]मर्त्यानां मनुष्याणाम् [v]अभीके अन्तिके । अभीक इत्यन्तिकनामैतत् । अस्माभिर्यत्पापं कृतं [v]महश्चित् महतोऽपि [v]ऊर्वात् विस्तृतादस्मात् [v]एनसः पापात् [v]ते त्वदीयाः [v]सखायः मित्रभूताः स्तोतारो वयं [v]सदमित् सर्वदैव [v]मा [v]रिषाम मा हिंसिता भूम । हे अग्ने त्वं [v]तोकाय पुत्राय [v]तनयाय पौत्राय [v]शं पापरूपोपद्रवाणां शान्ति [v]योः सुकृतोत्पादितं सुखं च [v]यच्छ देहि ॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।
एवो ष्वस्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥ ६ ॥

यथा । ह । त्यत् । वसवः । गौर्यम् । चित् । पदि । सिताम् । अमुञ्चत । यजत्राः ।
एवो इति । सु । अस्मत् । मुञ्चत । वि । अंहः । प्र । तारि । अग्ने । प्रऽतरम् । नः । आयुः ॥६॥

[v]यजत्राः यजनीयाः पूजार्हा हे [v]वसवः निवासयितारः[1] अग्नयः यूयं [v]यथा [v]ह यथैव [v]त्यत् त्यां तां [v]पदि पादे [v]सितां बद्धां [v]गौर्यं [v]चित् गौरीं गामपि [v]अमुञ्चत त्यक्तवन्तो भूयास्त । [v]एवो एवमेव [v]अस्मत् अस्मत्तः [v]अंहः पापं [v]सु अत्यन्तं [v]वि [v]मुञ्चत विमुक्तं कुरुत बहुवचनं पूजार्थम् । हे [v]अग्ने त्वया [v]प्रतरं प्रवृद्धं [v]नः अस्मदीयम् [v]आयुः [v]प्र [v]तारि प्रवृद्धं क्रियताम् ॥ ॥ १२ ॥

' प्रत्यग्निः ' इति पञ्चर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं तत्तन्मन्त्रवर्णाभिधेयोषःप्रभृतिदेवतं वा । तथा चानुक्रान्तं—' प्रत्यग्निः पञ्च लिङ्गोक्तदैवतं त्वेके ' इति । लैङ्गिको विनियोगः ॥

प्रत्यग्निरुषसामग्रमरुक्षद्विभातीनां सुमना रत्नधेयम् ।
यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति ॥ १ ॥

प्रति । अग्निः । उषसाम् । अग्रम् । अरुक्षत् । विऽभातीनाम् । सुऽमनाः । रत्नऽधेयम् ।
यातम् । अश्विना । सुऽकृतः । दुरोणम् । उत् । सूर्यः । ज्योतिषा । देवः । एति ॥ १ ॥

[v]सुमनाः शोभनमनस्कः [v]अग्निः [v]विभातीनां व्युच्छन्तीनाम् [v]उषसाम् उषोदेवतानां [v]रत्नधेयं रत्नधानम् । धनप्रकाशकमित्यर्थः । [v]अग्रं [v]प्रति[2] पूर्वकालं[2] लक्षीकृत्य [v]अरुक्षत्[3] प्रवृद्धो भवति ।

१. ख-ग-च-न-फ-भ-स–विवासितारः । २. ख-ग-च-ण-फ-भ–पूर्वकालीनम् ; घ-प–पूर्वकालम् ।
३. ख-ग-घ-च-ण-प-फ-भ–प्रत्यरुक्षत् ।

हे vअश्विना अश्विनौ युवां vसुकृतः यजमानस्य vदुरोणं गृहम् । दुरोणे[1] इति गृहनाम ' दुरोणे दुर्याः ' (नि. ३. ४. ७) इति गृहनामसु पाठात्[2] । vयातं गच्छतम् । vसूर्यः ऋत्विगादीनां प्रेरकः vदेवः vज्योतिषा स्वेन तेजसा vउत् vएति उषःकाले प्रादुर्भवतीत्यर्थः ॥

ऊर्ध्वं भानुं सविता देवो अश्रेद्दृप्सं दविध्वद्गविषो न सत्वा ।
अनु व्रतं वरुणो यन्ति मित्रो यत्सूर्यं दिव्यारोहयन्ति ॥ २ ॥

ऊर्ध्वम् । भानुम् । सविता । देवः । अश्रेत् । द्रप्सम् । दविध्वत् । गोऽइषः । न । सत्वा ।
अनु । व्रतम् । वरुणः । यन्ति । मित्रः । यत् । सूर्यम् । दिवि । आऽरोहयन्ति ॥ २ ॥

vसविता प्रेरकः vदेवः vऊर्ध्वम् उन्मुखं vभानुम् vअश्रेत् आश्रयति । vयत् यदा रश्मयः vसूर्यं vदिवि द्युलोके vआरोहयन्ति आरोहणं कारयन्ति तदा vवरुणः रात्र्यभिमानी देवः vमित्रः अहरभिमानी[3] अन्ये देवाश्च vव्रतं तत्संबन्धि कर्म vअनु vयन्ति अनुगच्छन्ति । अनुगमने दृष्टान्त उच्यते । vद्रप्सं पार्थिवं रजः vदविध्वत् धुन्वन् । विकिरन्नित्यर्थः । vगविषः गा इच्छन् vसत्वा vन वृषभ इव तद्वत् ॥

यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।
तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति ॥ ३ ॥

यम् । सीम् । अकृण्वन् । तमसे । विऽपृचे । ध्रुवऽक्षेमाः । अनवऽस्यन्तः । अर्थम् ।
तम् । सूर्यम् । हरितः । सप्त । यह्वीः । स्पशम् । विश्वस्य । जगतः । वहन्ति ॥ ३ ॥

vध्रुवक्षेमाः स्थिरनिवासाः सृष्टिकर्तारो देवाः vसीं सर्वतः vतमसे तमसः vविपृचे पृथक्करणाय vअर्थं जगल्लक्षणं कार्यम् vअनवस्यन्तः अविमुञ्चन्तः कुर्वन्त एव vयं सूर्यम् vअकृण्वन् अमृजन्नित्यर्थः । vयह्वीः महत्यः vसप्त सप्तसंख्याकाः vहरितः अश्वाः vविश्वस्य समस्तस्य vजगतः प्राणिसमूहस्य vस्पशं प्रेरकत्वेन ज्ञातारं vतं vसूर्यं vवहन्ति धारयन्ति ॥

वहिष्ठेभिर्विहरन्यासि तन्तुमव्ययन्नसितं देव वस्म ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः ॥ ४ ॥

वहिष्ठेभिः । विऽहरन् । यासि । तन्तुम् । अवऽव्ययन् । असितम् । देव । वस्म ।
दविध्वतः । रश्मयः । सूर्यस्य । चर्मऽइव । अव । अधुः । तमः । अप्ऽसु । अन्तरिति ॥ ४ ॥

---

१. ख-ग-च-ण-भ-' दुरोणे..... पाठात् ' नास्ति । २. ख-ग-घ-च-ण-भ-ल-स-' अहरभिमानी ' नास्ति ।

हे [v]देव द्योतमान सूर्य त्वं जगन्निर्वाहात्मकस्य रसस्यादानार्थं [v]तन्तुं[1] रश्मिसमूहं [v]विहरन् विस्तारयन् [v]असितं कृष्णवर्णं [v]वस्म नक्तंचराणां निवासभूतां रात्रिम् [v]अवव्ययन् अधाचीनं[2] यथा भवति तथा संवृण्वन्[3] । तिरस्कुर्वन्नित्यर्थः । [v]वहिष्ठेभिः वोढुमत्यन्तं शक्तैः अश्वैः [v]यासि गमनमार्गं गच्छसि । अस्यामृचि पूर्वार्धे सूर्यस्य प्रत्यक्षमर्थं प्रतिपाद्योत्तरार्धे परोक्षमर्थं प्रतिपादयितुमाह । [v]दविध्वतः धुन्वानाः [v]सूर्यस्य संबन्धिनः [v]रश्मयः किरणाः [v]अप्सु अन्तरिक्षे । आप इत्यन्तरिक्षनाम 'आकाशम् आपः पृथिवी' (नि. १. ३. ८) इति तन्नामसु पाठात् । [v]अन्तः मध्ये [v]चर्मेव चर्मवत् स्थितं [v]तमः अन्धकारम् [v]अवाधुः अवाचीनमदधुः । तिरस्कुर्वन्तीत्यर्थः ॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ॥ ५ ॥

अनायतः । अनिऽबद्धः । कथा । अयम् । न्यङ् । उत्तानः । अव । पद्यते । न ।
कया । याति । स्वधया । कः । ददर्श । दिवः । स्कम्भः । सम्ऽऋतः । पाति । नाकम् ॥ ५ ॥

आयतशब्दो दूरवाची । तद्विपरीतः [v]अनायतः आसीनः सन् [v]अयं प्रत्यक्षेणोपलभ्यमानो मण्डलाभिमानी सूर्यः [v]अनिबद्धः केनापि बद्धो न क्रियते । अपि चायं सूर्यः [v]न्यङ् अवाङ्मुखः सन् केनचित् [v]कथा कथं [v]न [v]अव [v]पद्यते न हिंस्यते । किंचायम् [v]उत्तानः ऊर्ध्वमुखत्वेन[4] तिष्ठन् [v]कया [v]स्वधया केन बलेन [v]याति गच्छति । स्वधाशब्दोऽन्नवाची अत्र तत्कार्यं बलं लक्षयति । अपि च [v]दिवः द्युलोकस्य [v]स्कम्भः स्तम्भः[5] [v]समृतः नाकेन[6] समवेतः सूर्यः [v]नाकं स्वर्गं [v]पाति पालयति । [v]को [v]ददर्श तत्त्वतः कः पश्यति । न कोऽपि जानातीत्यर्थः ॥ ॥ १३ ॥

'प्रत्यग्निरुषसः' इति पञ्चर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं मान्त्रवर्णिकदैवतं वा । तथा चानुक्रान्तं—'प्रत्यग्निः' इति । 'लिङ्गोक्तदैवतं तु' इति तुशब्दादस्यापि सूक्तस्य लिङ्गोक्तदैवतत्वम् । विनियोगो लैङ्गिकः ॥

प्रत्यग्निरुषसो जातवेदा अख्यदेवो रोचमाना महोभिः ।
आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ ॥ १ ॥

प्रति । अग्निः । उषसः । जातऽवेदाः । अख्यत् । देवः । रोचमानाः । महःऽभिः ।
आ । नासत्या । उरुऽगाया । रथेन । इमम् । यज्ञम् । उप । नः । यातम् । अच्छ ॥ १ ॥

[v]देवः द्योतमानः [v]जातवेदाः जातधनः [v]अग्निः [v]महोभिः तेजोभिः [v]रोचमानाः दीप्यमानाः [v]उषसः [v]प्रति उषसो लक्षीकृत्य [v]अख्यत् प्रबुद्धो भवति । [v]उरुगाया प्रभूतगमनौ हे [v]नासत्या अश्विनौ [v]रथेन [v]नः अस्मदीयम् [v]इमं [v]यज्ञम् [v]अच्छ अभिमुखम् [v]उप [v]यातम् उपगच्छतम् ॥

---

१. ण–तन्तुं रज्जुम् । २. घ-च-ल–अर्वाचीनम् । ३. ख-ग-घ-त-प-भ-ल-स–अवृण्वन्; च-ण-न-फ–अकृण्वन् । ४. ख-फ–ऊर्ध्वमुखः । ५. च-फ–स्कन्धः । ६. ख-ग-च-ण-फ–ऋतेन ।

ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ।
आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥ २ ॥

ऊर्ध्वम् । केतुम् । सविता । देवः । अश्रेत् । ज्योतिः । विश्वस्मै । भुवनाय । कृण्वन् ।
आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् । वि । सूर्यः । रश्मिऽभिः । चेकितानः ॥ २ ॥

[v]विश्वस्मै सर्वस्मै [v]भुवनाय लोकाय [v]ज्योतिः तेजः [v]कृण्वन् कुर्वन् [v]सविता प्रेरकः [v]देवः [v]ऊर्ध्वम् उन्मुखं[1] [v]केतुं प्रकाशकं भानुम् [v]अश्रेत् आश्रयति । [v]वि [v]चेकितानः सर्वं विशेषेण पश्यन् [v]सूर्यः [v]रश्मिभिः स्वकीयैः किरणैः [v]द्यावापृथिवी द्युलोकभूलोकौ[2] [v]अन्तरिक्षं च [v]आप्राः समन्तादपूरयत् ॥

आवहन्त्यरुणीर्ज्योतिषागान्महो चित्रा रश्मिभिश्चेकिताना ।
प्रबोधयन्ती सुवितायं देव्युषा ईयते सुयुजा रथेन ॥ ३ ॥

आऽवहन्ती । अरुणीः । ज्योतिषा । आ । अगात् । मही । चित्रा । रश्मिऽभिः । चेकिताना ।
प्रऽबोधयन्ती । सुविताय । देवी । उषाः । ईयते । सुऽयुजा । रथेन ॥ ३ ॥

[v]आवहन्ती धनानि धारयन्ती [v]अरुणीः अरुणवर्णाः ॥ प्रथमैकवचने द्वितीयाबहुवचनं छान्दसम् ॥ [v]ज्योतिषा तेजसा युक्ता [v]मही महती [v]रश्मिभिः किरणैः [v]चित्रा दर्शनीया [v]चेकिताना जानती उषाः [v]आगात् आगच्छत् । किंच [v]प्रबोधयन्ती सुप्तान् प्रबुद्धान् कुर्वती [v]देवी द्योतमाना [v]उषाः [v]सुयुजा शोभनयुक्तेन [v]रथेन [v]सुविताय सुखप्राप्तये [v]ईयते गच्छति ॥

आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथाम् ॥ ४ ॥

आ । वाम् । वहिष्ठाः । इह । ते । वहन्तु । रथाः । अश्वासः । उषसः । विऽउष्टौ ।
इमे । हि । वाम् । मधुऽपेयाय । सोमाः । अस्मिन् । यज्ञे । वृषणा । मादयेथाम् ॥ ४ ॥

हे अश्विनौ [v]इह यज्ञे [v]वहिष्ठाः वोढृतमाः [v]ते प्रसिद्धाः [v]रथाः रंहणा गन्तारः [v]अश्वासः अश्वाः [v]वां युवाम् [v]उषसः उषोदेवतायाः [v]व्युष्टौ व्युच्छनकाले[3] [v]आ [v]वहन्तु समन्तात् नयन्तु । [v]हि यस्मात् कारणात् हे [v]वृषणा वृषणौ कामानां वर्षितारौ हे अश्विनौ [v]इमे [v]सोमाः [v]वां युवां [v]मधुपेयाय मधोः सोमस्य पानाय [v]अस्मिन्यज्ञे [v]मादयेथां हर्षयेथाम् ॥

१. ख-ग-च-ज-ञ-फ-भ-स-सन्मुखं । २. ल-°भूलोकौ च । ३. ण-व्युष्टिकाले ।

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ॥ ५ ॥

अनायतः । अनिऽबद्धः । कथा । अयम् । न्यङ् । उत्तानः । अव । पद्यते । न ।
कया । याति । स्वधया । कः । ददर्श । दिवः । स्कम्भः । सम्ऽऋतः । पाति । नाकम् ॥५॥

इयमृक् पूर्वं व्याख्याता ॥ ॥ १४ ॥

' अग्निर्होता ' इति दशर्चं पञ्चमं सूक्तं वामदेवस्यार्षं गायत्रम् । अत्रेयमनुक्रमणिका—' अग्निर्होता दश गायत्रमृषिर्बोधत् इत्याभ्यां[1] सोमकं साहदेव्यमभ्यवदत्परास्याभिनावायुरयाचत ' इति । ' बोधयत् ' इति द्व्यृचेन सोमकराजा[2] स्तूयते ' एष वाम् ' इति द्व्यृचेनाश्विनौ शिष्टाभिः षड्भिरग्निः स्तूयते। अतस्त्व एव क्रमेण[3] देवताः । सूक्तविनियोगो लैङ्गिकः । पशोः पर्यग्निकरणे ' अग्निर्होता नः ' इत्याद्यस्तृचोऽनुवचनीयः । तथा च सूत्रितम्—' अग्निर्होता न इति तृचं पर्यग्नयेऽन्वाह ' (आश्व. श्रौ. ३. २) इति । प्रातरनुवाकेऽप्याग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चायं तृचो विनियुक्तः । तथा च सूत्रितम्–' अग्निर्होता नो अध्वर इति तिस्रः ' (आश्व. श्रौ. ४. १३) इति ॥

अग्निर्होता नो अध्वरे वाजी सन्परि णीयते । देवो देवेषु यज्ञियः ॥ १ ॥

अग्निः । होता । नः । अध्वरे । वाजी । सन् । परि । नीयते । देवः । देवेषु । यज्ञियः ॥१॥

[v]होता देवानामाह्वाता होमनिष्पादको वा [v]अग्निः [v]नः अस्मदीये [v]अध्वरे यागे । वाजीत्येतत् लुप्तोपमाकम् । [v]वाजी शीघ्रगामी वोढाश्व इव तथा देवेभ्यो हविर्वाहकः [v]सन् [v]परि [v]णीयते परितः समन्तात् प्राप्यते । तथा ब्राह्मणं च[4] भवति–' वाजी सन्परि णीयत इति वाजिनमिव ह्येनं सन्तं परिणयन्ति ' (ऐ. ब्रा. २. ५) इति । कीदृशोऽग्निः । [v]देवेषु द्योतमानेष्विन्द्रादिषु मध्ये [v]देवः द्योतमानः [v]यज्ञियः यज्ञार्हः ॥

परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् ॥ २ ॥

परि । त्रिऽविष्टि । अध्वरम् । याति । अग्निः । रथीःऽइव । आ । देवेषु । प्रयः । दधत् ॥ २ ॥

[v]देवेषु द्योतमानेष्विन्द्रादिषु । प्रयः हव्यनामेदम् । [v]प्रयः यजमानैर्दत्तं हवीरूपमन्नम् [v]आ [v]दधत् आ समन्ताद्धारयन् [v]अग्निः अङ्गनादिगुणविशिष्टोऽग्निः [v]त्रिविष्टि त्रिवारम् । सवनत्रयेऽपीत्यर्थः । [v]परि परितः समन्तात् [v]अध्वरं यजमानैः कृतं यागं [v]याति गच्छति । परिगमने दृष्टान्तः । [v]रथीरिव । रथवान् पुरुषो यथा शीघ्रं याति तद्वत् । तथा च ब्राह्मणं–' परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिवेत्येष हि रथीरिवाध्वरं पर्येति ' (ऐ. ब्रा. २. ५) इति ॥

१. ण-त-न-भ-स–इति द्वाभ्याम् । २. त–सोमको देवता राजा । ३. ख-ग-च-ण-न-भ-स–' क्रमेण नास्ति । ४. ख-ग-च-ण-त-न-भ-स–' च ' नास्ति ।

परि॒ वाज॑पतिः क॒विर॒ग्निर्ह॒व्यान्य॑क्रमीत् । दध॒द्रत्ना॑नि दा॒शुषे॑ ॥ ३ ॥

परि॑ । वाज॑ऽपतिः । क॒विः । अ॒ग्निः । ह॒व्यानि॑ । अ॒क्र॒मी॒त् । दध॑त् । रत्ना॑नि । दा॒शुषे॑ ॥ ३ ॥

[v]वाजपतिः वाजानामन्नानां पतिः पालकः । ' परि वाजपतिः कविरित्येष हि वाजानां पतिः' (ऐ. ब्रा. २. ५) इति ब्राह्मणम् । [v]कविः क्रान्तदर्शी मेधावी वा [v]दाशुषे हविर्दत्तवते यजमानाय [v]रत्नानि रमणीयानि धनानि [v]दधत् प्रयच्छन् [v]अग्निः [v]हव्यानि हवींषि [v]परि [v]अक्रमीत् परितः क्रामति । व्याप्नोति ॥

अ॒यं यः सृ॒ञ्जये॑ पु॒रो दैव॑वाते स॒मिध्य॑ते । द्यु॒माँ अ॑मित्र॒दम्भ॑नः ॥ ४ ॥

अ॒यम् । यः । सृ॒ञ्जये॑ । पु॒रः । दैव॑ऽवाते । स॒म्ऽइ॒ध्य॑ते । द्यु॒ऽमान् । अ॒मि॒त्र॒ऽद॒म्भ॑नः ॥ ४ ॥

[v]यः प्रसिद्धः [v]अयं प्रत्यक्षेणोपलभ्यमानोऽग्निः [v]दैववाते देववातस्य पुत्रे [v]सृञ्जये । सृञ्जयो नाम कश्चित्सोमयाजी । तस्मिन्निमित्तभूते सति। तद्यागार्थमित्यर्थः । सृञ्जयस्य यष्टृत्वं तैत्तिरीया आमनन्ति- ' वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यत्सृञ्जयान्बहुयाजिनोऽयीयजः[1] ' (तै. सं. ६. ६. २. २) इति । [v]पुरः पूर्वस्यां दिशि स्थितायामुत्तरवेद्यां [v]समिध्यते सम्यग्दीप्यते । [v]अमित्रदम्भनः शत्रूणां हिंसकः[2] सोऽग्निः [v]द्युमान् दीप्तिमान् भवतीति शेषः ॥

अ॒स्य घा वी॒र ई॒वतो॒ऽग्नेरी॑शीत॒ मर्त्यः॑ । ति॒ग्मज॑म्भस्य मी॒ळ्हुषः॑ ॥ ५ ॥

अ॒स्य॑ । घ॒ । वी॒रः । ई॒वतः॑ । अ॒ग्नेः । ई॒शी॒त॒ । मर्त्यः॑ । ति॒ग्मऽज॑म्भस्य । मी॒ळ्हुषः॑ ॥ ५ ॥

[v]वीरः स्तुतौ विक्रान्तः [v]मर्त्यः मरणधर्मा यजमानः [v]तिग्मजम्भस्य तीक्ष्णतेजसः [v]मीळ्हुषः अभिलषितफलानां सेक्तुः [v]ईवतः गमनवतः [v]अस्य [v]अग्नेः [v]ईशीत ईश्वरो भवेत् । [v]घ इति पादपूरणः । एतेन[3] यजमानः आत्मार्थाष्टफलं कारयितुं समर्थो भवतीत्यर्थः ॥ ॥ १५ ॥

तमर्वन्तं॑ न सा॒नसि॑मरु॒षं न दि॒वः शिशु॑म् । म॒र्मृ॒ज्यन्ते॑ दि॒वेदि॑वे ॥ ६ ॥

तम् । अर्वन्त॑म् । न । सा॒नसि॑म् । अ॒रु॒षम् । न । दि॒वः । शिशु॑म् । म॒र्मृ॒ज्यन्ते॑ । दि॒वेऽदि॑वे ॥ ६ ॥

यजमानाः [v]अर्वन्तं [v]न शीघ्रगामिनमश्वमिव [v]सानसिं संभजनीयं[4] [v]दिवः [v]शिशुं [v]न द्युलोकस्य पुत्रभूतं सूर्यमिव [v]अरुषम् आरोचमानं [v]तम् अग्निं [v]दिवेदिवे प्रतिदिनं [v]मर्मृज्यन्ते भृशं परिचरणं कुर्वन्ति[5] ॥

बो॒धद्य॒न्मा ह॑रि॒भ्यां कु॑मा॒रः सा॑हदे॒व्यः । अच्छा॒ न हू॒त उद॑रम् ॥ ७ ॥

बो॒धत् । यत् । मा॒ । ह॒रि॒ऽभ्याम् । कु॒मा॒रः । सा॒ह॒ऽदे॒व्यः । अच्छ॑ । न । हू॒तः । उत् । अ॒र॒म् ॥ ७ ॥

---

१. ख-ग-च-ण-°अयीयजः यज्ञे । २. प-दम्भकः । ३. ल-अनेन । ४. ख-ग-च-ण-भजनीयम् । ५. ख-ग-च-कुर्वीरन् ।

vसाहदेव्यः सहदेवनाम्नो राज्ञः पुत्रः vकुमारः सोमकाभिधो राजा vहरिभ्याम् अश्वाभ्याम् अश्वौ दातुं vमा मां vयत् यदा vबोधत् बोधयामास इमौ तवाश्वाविति । तदा अहम् vअच्छ आभिमुख्येन कुमारेण vहूतः[1] सन् vन vउदरं तावश्वावलब्ध्वा न निर्गतवानस्मि ॥

उत त्या यजता हरी कुमारात्साहदेव्यात् । प्रयता सद्य आ ददे ॥ ८ ॥

उत । त्या । यजता । हरी इति । कुमारात् । साहऽदेव्यात् । प्रऽयता । सद्यः । आ । ददे ॥८॥

vउत अपि च vसाहदेव्यात् सहदेवस्य पुत्रात् vकुमारात् सोमकाख्यात्[2] राज्ञः vयजता पूजनीयौ[3] vप्रयता प्रयतौ vत्या त्यौ तौ प्रसिद्धौ vहरी अश्वौ vसद्यः यस्मिन् दिने तेनाहूतस्तस्मिन्नेव दिने vआ vददे आदत्तवानस्मि । मन्त्रद्रष्टा ऋषिः ' बोधत् ' इत्यृग्द्वयेन कुमारमश्वेप्सयाभ्युपगम्य अश्वौ एतस्मात्[4] लब्ध्वा प्रीतोऽभवदित्यर्थः ॥

एष वां देवावश्विना कुमारः साहदेव्यः । दीर्घायुरस्तु सोमकः ॥ ९ ॥

एषः । वाम् । देवौ । अश्विना । कुमारः । साहऽदेव्यः । दीर्घऽआयुः । अस्तु । सोमकः ॥९॥

vदेवौ द्योतमानौ हे vअश्विना अश्विनौ vवां युवां तर्पकः vसाहदेव्यः सहदेवस्य पुत्रः vकुमारः vसोमकः सोमकाभिधानः vएषः राजा vदीर्घायुरस्तु शतायुष्को भवतु । ' एतमु हैव प्रोचतुः पर्वतनारदौ सोमकाय ' इत्यादिना ' सर्वे हैव महाराजा आसुः ' (ऐ. ब्रा. ७. ३४) इत्यनेन ब्राह्मणेन सोमकस्य राजत्वं स्पष्टीकृतम् ॥

तं युवं देवावश्विना कुमारं साहदेव्यम् । दीर्घायुषं कृणोतन ॥ १० ॥

तम् । युवम् । देवौ । अश्विना । कुमारम् । साहऽदेव्यम् । दीर्घऽआयुषम् । कृणोतन ॥१०॥

हे vदेवावश्विना द्योतमानावश्विनौ vयुवं युवां vतं[5] vसाहदेव्यं सहदेवस्य पुत्रं vकुमारं सोमकाख्यं राजानं vदीर्घायुषं शतायुष्कं vकृणोतन कुरुतम् । अनेन द्वृचेनास्य कुमारस्य दीर्घमायुः[6] अश्विनावृषिरयाचतेत्यर्थः ॥ ॥ १६ ॥

' आ सत्यो यातु ' इत्येकविंशत्यृचं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम् । अत्रेयमनुक्रमणिका– ' आ सत्यः सैकैन्द्रम् ' इति । तत्र ' ऐन्द्रम् ' इत्युक्तत्वादग्र्यधिकारो निवृत्त इत्यवगम्यते । चतुर्विंशेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रे इदं द्वितीयमहीनसूक्तम् । तथा च सूत्रितम्—' आ सत्यो यात्विन्द्र्यहीनसूक्तं द्वितीयं मैत्रावरुणः ' (आश्व. श्रौ. ७. ४) इति । समूढहे[7] दशरात्रे नवमेऽहनि निष्केवल्यशस्त्रे इदं सूक्तम् । तथा च सूत्रितम्–' आ सत्यो यात्वहं भुवं तत्त इन्द्रियमिति निष्केवल्यम् ' (आश्व. श्रौ. ८. ७) इति ॥

---

१. ख-ग-घ-च-त-न-भ-ल-स–आहूतः । २. ख-ग-च-न-भ-स–सोमकात् । ३. घ-ण-फ–यजनीयौ । ४. त–एतस्माच्च । ५. ख-ग-न-भ-ल-स–' तं ' नास्ति । ६. ख-ग-च-ण-न-भ-स–दीर्घायुः । ७. ख-ग-च-भ–अभ्यूळहे ।

आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥ १ ॥

आ । सत्यः । यातु । मघऽवान् । ऋजीषी । द्रवन्तु । अस्य । हरयः । उप । नः ।
तस्मै । इत् । अन्धः । सुषुम । सुऽदक्षम् । इह । अभिऽपित्वम् । करते । गृणानः ॥ १ ॥

ऋजीषी । ऋजीषशब्देन निष्पिष्टो विगतसारः सोमोऽभिधीयते । तद्वान् सत्यः सत्यवान् मघवान् धनवानिन्द्रः नः अस्माकम् उप समीपे आ यातु आगच्छतु । किंच अस्य इन्द्रस्य हरयः अश्वाः नोऽस्माकम् उप समीपे द्रवन्तु आगच्छन्तु । वयं यजमानाः इह अस्मिन् यज्ञे तस्मै इन्द्राय सुदक्षं शोभनबलम् । सारोपेतमित्यर्थः । इत् इदं प्रत्यक्षेणोपलभ्यमानम् अन्धः अन्नरूपं सोमं सुषुम अभिषुतं कुर्याम । गृणानः अस्माभिः स्तूयमान इन्द्रः अभिपित्वम् अस्मदभिमतप्राप्तिं करते करोतु ॥

अव स्य शूराध्वनो नान्तेऽस्मिन्नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥ २ ॥

अव । स्य । शूर । अध्वनः । न । अन्ते । अस्मिन् । नः । अद्य । सवने । मन्दध्यै ।
शंसाति । उक्थम् । उशनाऽइव । वेधाः । चिकितुषे । असुर्याय । मन्म ॥ २ ॥

हे शूर शत्रूणाम् अभिभवसमर्थेन्द्र अद्य इदानीम् अस्मिन् सवने माध्यंदिनाख्ये मन्दध्यै त्वां मादयितुं नः अस्मान् अव स्य विमुञ्च । तत्र दृष्टान्तः । अध्वनः गन्तव्यस्य मार्गस्य अन्ते समीपे न अश्वान्मनुष्या यथा मुञ्चन्ति तद्वत् । उशनेव काव्य इव वेधाः शंसिता यजमानो हे इन्द्र चिकितुषे सर्वं जानते असुर्याय असुराणां हिंसकाय तुभ्यं मन्म मननीयम् उक्थं शस्त्ररूपं स्तोत्रं शंसाति शंसनं करोति ॥

कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत्सप्त कारून्ह्वा चिच्चक्रुर्वयुना गृणन्तः ॥ ३ ॥

कविः । न । निण्यम् । विदथानि । साधन् । वृषा । यत् । सेकम् । विऽपिपानः । अर्चात् ।
दिवः । इत्था । जीजनत् । सप्त । कारून् । अह्वा । चित् । चक्रुः । वयुना । गृणन्तः ॥ ३ ॥

कविः मेधावी निण्यं न । निण्यमित्यन्तर्हितनामैतत् । अन्तर्हितं गूढमर्थमिव विदथानि वेदनीयानि कार्यजातानि साधन् साधयन् वृषा कामानां वर्षितेन्द्रः यत् यदा सेकं सेचनीयं सोमं

१. ण–अभिभवनसमर्थेन्द्र । २. ख–ग–ण–न–भ–मनुष्या यथा अश्वान्; घ–मनुष्या यथा अश्वान्; च–मनुष्या अयथा अश्वान्; त–ल–अश्वान्न मनुष्या यथा अश्वान्; न–अश्वान्न मनुष्या यथा । ३. ण–कर्मजातानि ।

[v]विपिपानः अत्यर्थं पिबन् [v]अर्चात् विशेषेणार्चति । सोमपाने श्रद्धां करोतीत्यर्थः । तदानीं [v]दिवः अमुष्मात् द्युलोकात्[1] [v]इत्था सत्यमेव [v]सप्त सप्तसंख्याकान् [v]कारून् रश्मीन् [v]जीजनत अजीजनत । जनयति । [v]गृणन्तः स्तूयमानाः रश्मयः [v]वयुना वयुनानि मनुष्याणां ज्ञानानि [v]अह्ना [v]चित् [v]दिवसेनापि [v]चक्रुः कृतवन्तः ॥

स्व१र्यद्वेदिं सुदृशीकमर्कैर्महि ज्योतीं रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥ ४ ॥

स्वः । यत् । वेदिं । सुऽदृशीकम् । अर्कैः । महि । ज्योतिः । रुरुचुः । यत् । ह । वस्तोः ।
अन्धा । तमांसि । दुधिता । विऽचक्षे । नृऽभ्यः । चकार । नृऽतमः । अभिष्टौ ॥ ४ ॥

[v]यद्ध यदा खलु [v]महि महत् प्रभूतं [v]ज्योतिः तेजोरूपं [v]यत् [v]स्वः यो द्युलोकः [v]अर्कैः रश्मिभिः [v]सुदृशीकं सुष्ठु दर्शनीयं [v]वेदि अवेदि ज्ञायते तदानीं देवास्तस्मिन् स्वर्गे [v]वस्तोः निवासार्थं [v]रुरुचुः दीप्तियुक्ता बभूवुः । [v]नृतमः नेतृतमः सूर्यः [v]अभिष्टौ अभ्यागमने [v]नृभ्यः नृणां [v]विचक्षे विशेषेण दर्शनाय [v]अन्धा अन्धकाररूपाणि निबिडानि [v]तमांसि [v]दुधिता दुधितानि नाशितानि [v]चकार कृतवान् ॥

ववक्ष इन्द्रो अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव ॥ ५ ॥

ववक्षे । इन्द्रः । अमितम् । ऋजीषी । उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ।
अतः । चित् । अस्य । महिमा । वि । रेचि । अभि । यः । विश्वा । भुवना । बभूव ॥ ५ ॥

[v]ऋजीषी । ऋजीषशब्देन निष्पिष्टो विगतसारः सोमोऽभिधीयते । तद्वान् [v]इन्द्रः परमैश्वर्ययुक्तः [v]अमितम् इयत्तारहितं महिमानं [v]ववक्षे उवाह । किंच [v]महित्वा महत्त्वेन स्वेन महिम्ना [v]उभे [v]रोदसी उभे द्यावापृथिव्यौ [v]आ [v]पप्रौ समन्तादपूरयत् । [v]यः इन्द्रः [v]विश्वा [v]भुवना सर्वाणि भुवनानि [v]अभि [v]बभूव तिरश्चकार । [v]अतश्चित् एभ्योऽपि विश्वेभ्यो भुवनेभ्यः [v]अस्य इन्द्रस्य [v]महिमा [v]वि [v]रेचि अतिरिरिचे । अधिको बभूवेत्यर्थः ॥ ॥ १७ ॥

विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।
अश्मानं चिद्ये बिभिदुर्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ॥ ६ ॥

विश्वानि । शक्रः । नर्याणि । विद्वान् । अपः । रिरेच । सखिऽभिः । निऽकामैः ।
अश्मानम् । चित् । ये । बिभिदुः । वचःऽभिः ।
व्रजम् । गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥ ६ ॥

१. ख-ग-च-ण-न-भ-स-लोकात् ।

[v]विश्वानि समस्तानि [v]नर्याणि मनुष्याणां हितानि वृष्ट्यादीनि कार्याणि [v]विद्वान् जानन् [v]शक्रः समर्थ इन्द्रः [v]निकामैः निकामयमानेभ्यः[1] [v]सखिभिः मित्रभूतेभ्यो मरुद्गणः ॥ व्यत्ययेन चतुर्थ्यर्थे तृतीया ॥ [v]अपः वृष्टिलक्षणान्युदकानि [v]रिरेच रिक्तीचकार । इन्द्रः सस्यादिफलसिद्ध्यर्थं मेघस्थान्युदकानि मरुद्भ्यो दत्तवानित्यर्थः । यद्वा । निकामैर्निकामयमानैः सखिभिर्मरुद्भिः सहितः सन् अपो नभसः सकाशात् । आप इत्यन्तरिक्षनामैतत् । अत्र विभक्तिव्यत्ययः । रिरेच व्यतिरिक्तः[2] बभूव । [v]ये मरुतः [v]वचोभिः वाग्रूपैर्ध्वनिभिः [v]अश्मानं [v]चित् पर्वतमपि मेघं वा । अश्मेति मेघनामैतत् । [v]बिभिदुः अभैत्सुः । [v]उशिजः कामयमानास्ते मरुतः [v]गोमन्तं गोभिरुपेतं [v]व्रजम् अङ्गिरसां संबन्धि गोस्थानं [v]वि [v]वव्रुः आच्छादयामासुः ॥

अपो वृत्रं वव्रिवांसं परा॑हन्प्रावत्ते वज्रं पृथिवी सचेताः ।
प्राणसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ॥ ७ ॥

अपः । वृत्रम् । वव्रिऽवांसम् । परा॑ । अहन् । प्र । आवत् । ते । वज्रम् । पृथिवी । सऽचेताः ।
प्र । अर्णांसि । समुद्रियाणि । ऐनोः । पतिः । भवन् । शवसा । शूर । धृष्णो इति ॥ ७ ॥

हे इन्द्र [v]प्रावत् राक्षसादिभ्यः प्रकर्षेण लोकान् पालयितृ [v]ते त्वदीयं[3] [v]वज्रम् [v]अपः वृष्टिलक्षणान्युदकानि [v]वव्रिवांसम् आवरकं[4] [v]वृत्रं मेघं [v]पराहन् प्रकर्षेण प्रेरयति स्म । [v]पृथिवी भूमिः [v]सचेताः चेतनावती । त्वया संगता बभूव । [v]धृष्णो धर्षणशील हे [v]शूर विक्रान्तेन्द्र त्वं [v]शवसा बलेन [v]पतिर्भवन् लोकानां पालकः सन् [v]समुद्रियाणि समुद्रसंबन्धीनि [v]अर्णांसि नभसि स्थितानि उदकानि [v]प्र [v]ऐनोः प्रेरकः अभूः[5] ॥

अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः ॥ ८ ॥

अपः । यत् । अद्रिम् । पुरुऽहूत । दर्दरः । आविः । भुवत् । सरमा । पूर्व्यम् । ते ।
सः । नः । नेता । वाजम् । आ । दर्षि । भूरिम् । गोत्रा । रुजन् । अङ्गिरःऽभिः । गृणानः ॥८॥

हे [v]पुरुहूत बहुभिराहूतेन्द्र [v]यत् यदा [v]अपः प्रति वृष्टिलक्षणान्युदकानि लक्षीकृत्य [v]अद्रिं मेघं [v]दर्दरः विदारितवानसि । [v]सरमा देवशुनी [v]पूर्व्यं पुरा [v]ते तुभ्यं पणिभिः अपहृतं[6] गोधनम् [v]आविर्भुवत् प्रकाशयामास । [v]अङ्गिरोभिः ऋषिभिः [v]गृणानः स्तूयमानः सन् [v]गोत्रा गोत्राण्यभ्राणि [v]रुजन् [v]नः अस्मान् [v]भूरिं प्रभूतं [v]वाजम् अन्नं [v]नेता प्रापयिता [v]सः त्वम् [v]आ [v]दर्षि आदरं कृतवानसि ॥

---

१. ख-ग-घ-च-ण-भ-कामयमानेभ्यः । २. च-फ-रिक्तः । ३. ख-ग-घ-प-फ-भ-स-त्वदीयं च ।
४. ख-ग-च-आवारकम् । ५. ख-ग-च-ण-त-न-भ-स-बभूव । ६. ख-ग-च-ण-भ-स-अपहृतं धनम्; न-स-आहृतम् ।

अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानम् ।
ऊतिभिस्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ॥ ९ ॥

अच्छ । कविम् । नृऽमनः । गाः । अभिष्टौ । स्वःऽसाता । मघऽवन् । नाधमानम् ।
ऊतिऽभिः । तम् । इषणः । द्युम्नऽहूतौ । नि । मायाऽवान् । अब्रह्मा । दस्युः । अर्त ॥ ९ ॥

हे [v]मघवन् धनवन्निन्द्र [v]नृमणः नृभिर्मनुष्यैर्मन्यते इति नृमणः । त्वं [v]कविं मेधाविनं[1] कुत्सम् [v]अच्छ[2] [v]गाः अभ्यगाः । किंच [v]स्वर्षाता । स्वर्धनम् । तस्य सातौ दाने निमित्ते [v]अभिष्टौ कवेरभिगमे सति [v]नाधमानं युद्धार्थं त्वां याचमानं कुत्सम् [v]ऊतिभिः शत्रुकृतोपद्रवपरिहाररूपै रक्षणैः [v]इषणः प्रेरितवानसि । [v]मायावान् कपटवान् [v]अब्रह्मा । ऋत्विग्भिः क्रियमाणं सर्वं कर्मजातमनुज्ञारूपेण जानन् ऋत्विग्विशेषो ब्रह्मशब्देनोच्यते । स न विद्यते यस्य असौ[3] अब्रह्मा । वेदोक्तकर्मस्वास्तिक्यरहितः इत्यर्थः । [v]दस्युः कुत्सस्य शत्रुः [v]द्युम्नहूतौ द्युम्नं धनं हूतिराह्वानं यस्यां युधि तस्यां [v]नि [v]अर्त विनष्टो बभूव । इन्द्रः[4] कुत्सेनाहूतः सन् तस्य शत्रुं हतवानित्यर्थः ॥

आ दस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः ।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी ॥ १० ॥

आ । दस्युऽघ्ना । मनसा । याहि । अस्तम् । भुवत् । ते । कुत्सः । सख्ये । निऽकामः ।
स्वे । योनौ । नि । सदतम् । सऽरूपा । वि । वाम् । चिकित्सत् । ऋतऽचित् । ह । नारी ॥ १० ॥

अत्र काचिदाख्यायिका श्रूयते । कथम् । रुनामकः कश्चिद्राजर्षिः । तस्य पुत्रः कुत्साख्यो[1] राजर्षिरासीत्[2] । स च कदाचित् शत्रुभिः सह युयुत्सुः संग्रामे स्वयमशक्तः सन् शत्रूणां हननार्थमिन्द्रस्य आह्वानं चकार । स चेन्द्रः कुत्सस्य गृहमागत्य तस्य शत्रून् जघान । तदनन्तरमतिप्रीत्या तयोः सख्यमभवत् । सख्यानन्तरमिन्द्र एनमपि स्वकीयं गृहं प्रापयामास । तत्र शची इन्द्रं प्राप्तुमागता सती तौ समानरूपौ दृष्ट्वा अयमिन्द्रोऽयं कुत्स इति विवेकाभावेन संशयं चकार इति । अनयाख्यायिकया प्रतीयमानोऽर्थोऽत्र प्रतिपाद्यते । हे इन्द्र [v]दस्युघ्ना दस्यूनां शत्रूणां हन्त्रा [v]मनसा युक्तस्त्वम् [v]अस्तं कुत्सस्य गृहम् । अस्तमिति गृहनामैतत् । [v]आ [v]याहि आगाः ॥ लुङर्थे लोट् ॥ [v]कुत्सः च [v]ते तव संबन्धिनि [v]सख्ये [v]निकामः नितरां कामयमानः [v]भुवत् अभवत् । ततः तौ[5] युवां [v]स्वे [v]योनौ स्वकीये स्थाने [v]नि [v]षदतं न्यसीदतम् । उपविष्टावभूतम् । [v]ऋतचित् सत्यदर्शनी [v]नारी इन्द्रस्य भार्या शची [v]सरूपा सरूपौ[6] समानरूपौ [v]वां[7] युवां [v]वि [v]चिकित्सत् संशयं चकार ॥ ॥ १८ ॥

१. ख-ग-घ-च-ण-फ-भ–मेधाविनं तम् । २. ख-ग-च–अच्छा । ३. न-ल-स– सः । ४. ख-ग-घ-च-ण-न-भ–‘ इन्द्रः ’ नास्ति । ५. प–कुत्सः । ६. ख-ग-घ-च-ण-फ-भ–वाम् । ७. च-न-ल–‘ सरूपौ ’ नास्ति । ८. ख-ग-घ-ण-न-भ-स–‘ वां ’ नास्ति ।

यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।
ऋज्रा वाजं न गध्यं युयूषन्कविर्यदह्न्पार्याय भूषात् ॥ ११ ॥

यासि । कुत्सेन । सऽरथम् । अवस्युः । तोदः । वातस्य । हर्योः । ईशानः ।
ऋज्रा । वाजम् । न । गध्यम् । युयूषन् । कविः । यत् । अह्न् । पार्याय । भूषात् ॥ ११ ॥

हे इन्द्र [v]अवस्युः कुत्सस्य रक्षणमिच्छन् ॥ छन्दसि क्यच् परेच्छायामपि दृश्यते ॥ [v]तोदः तोदकः शत्रूणां[१] हिंसकः[१] [v]वातस्य वायुसदृशयोर्वेगवतोः [v]हर्योः अश्वयोः [v]ईशानः ईश्वरस्त्वं [v]कुत्सेन कुत्सात्मत्येन राजर्षिणा [v]सरथं समानरथं[२] [v]यासि गच्छसि । [v]गध्यं ग्राह्यम् । ' गध्यं गृह्णातेः । ऋज्रा वाजं न गध्यं युयूषन्नित्यपि निगमो भवति ' (निरु. ५. १५) इति निरुक्तम् । [v]वाजं [v]न अन्नमिव [v]ऋज्रा ऋजुगामिनौ अश्वौ [v]युयूषन् स्वकीये रथे योजयन् [v]कविः प्राज्ञः कुत्सः [v]यत् यस्मिन् [v]अह्न् अहनि दिवसे [v]पार्याय पारणाय[३] आपन्निस्तरणाय [v]भूषात् प्रभवते । तस्मिन्नेव[४] दिने कुत्सेन सरथं यान्नीति पूर्वेण संबन्धः ॥

कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके ॥ १२ ॥

कुत्साय । शुष्णम् । अशुषम् । नि । बर्हीः । प्रऽपित्वे । अह्नः । कुयवम् । सहस्रा ।
सद्यः । दस्यून् । प्र । मृण । कुत्स्येन । प्र । सूरः । चक्रम् । वृहतात् । अभीके ॥ १२ ॥

' शुष्णं पिप्रुम् ' (ऋ. सं. १. १०३. ८) इत्यस्यामृचि प्रतिपादितः अर्थः[५] ' कुत्साय ' इत्यनेन ऋग्द्वयेन स्पष्टीक्रियते । हे इन्द्र त्वं [v]कुत्साय कुत्सार्थम् [v]अशुषम् । शूषमिति सुखनामैतत् । तद्रहितम् । अत्र दीर्घाभावः । [v]शुष्णं शुष्णनामानमसुरं [v]नि [v]बर्हीः न्यबर्हीः अवधीः । तथा [v]अह्नः दिवसस्य [v]प्रपित्वे प्रक्रमे पूर्वाह्णे [v]कुयवं कुयवनामानमसुरं च हतवानसि । तथा स त्वं [v]सहस्रा सहस्रेण बहुभिः परिजनैः सह [v]सद्यः यस्मिन् काले कुयवमवधीस्तस्मिन् काल एव [v]कुत्स्येन । कुत्स इति वज्रनामैतत् । कुत्स[६] एव[६] कुत्स्यं वज्रम् । तेन [v]दस्यून् शत्रून् [v]प्र [v]मृण जहि ॥ भूतार्थे[७] लोट् ॥ हतवानसि । तथा [v]सूरः प्रेरकस्य सूर्यस्य [v]चक्रम् आयुधम् [v]अभीके समीपे संग्रामे वा [v]प्र [v]वृहतात् प्रकर्षेण छिन्नवानसि[८] ॥

---

१. त–' शत्रूणां हिंसकः ' नास्ति । २. ख-ग-च-ण-न-प-फ-भ-स–' समानरथं ' नास्ति । ३. न–प्रेरणाय । ४. त-न-स–अस्मिन्नेव । ५. ख-ग-ण–अप्यर्थः । ६. त–' कुत्स एव ' नास्ति । ७. ख-ग-च-ण-न-भ-ल-स–भूतेऽर्थे । ८. त-स–स्थितवानसि; न–रक्षितवानसि ।

त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने वैदथिनाय रन्धीः ।
पञ्चाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥ १३ ॥

त्वम् । पिप्रुम् । मृगयम् । शूशुवांसम् । ऋजिश्वने । वैदथिनाय । रन्धीः ।
पञ्चाशत् । कृष्णा । नि । वपः । सहस्रा । अत्कम् । न । पुरः । जरिमा । वि । ददरिति ददः ॥ १३ ॥

हे इन्द्र [V]त्वं [V]पिप्रुं पिप्रुनामानमसुरं [V]शूशुवांसं प्रवृद्धं [V]मृगयं मृगयनामानमसुरं च हतवानसि किंच स त्वं [V]वैदथिनाय विदथिनः पुत्राय [V]ऋजिश्वने ऋजिश्वनाम्ने राज्ञे [V]रन्धीः वशमनयः । [V]पञ्चाशत् पञ्चाशत्संख्याकानि [V]सहस्रा सहस्राणि [V]कृष्णा कृष्णवर्णानि रक्षांसि [V]नि [V]वपः न्यवपः अवधीः । तथा स त्वं [V]जरिमा जरा [V]अत्कं [V]न वयोविशेषं रूपमिव [V]पुरः शम्बरस्य नगराणि [V]वि [V]ददः विदारितवानसि ॥

सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः ।
मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत् ॥ १४ ॥

सूरः । उपाके । तन्वम् । दधानः । वि । यत् । ते । चेति । अमृतस्य । वर्पः ।
मृगः । न । हस्ती । तविषीम् । उषाणः । सिंहः । न । भीमः । आयुधानि । बिभ्रत् ॥ १४ ॥

हे इन्द्र [V]सूरः प्रेरकस्य सूर्यस्य [V]उपाके समीपे [V]तन्वं त्वदीयं शरीरं [V]यत् यदा [V]दधानः धारकोऽभवः तदा [V]अमृतस्य मरणरहितस्य [V]ते त्वदीयं [V]वर्पः रूपं [V]वि [V]चेति व्यचेति । हे इन्द्र ज्ञातृभिर्विशेषेण अज्ञायत[१] । सूर्यस्य समीपे सर्वाणि रूपाणि मलिनीभवन्ति न तथेन्द्रस्य रूपं किंतु सूर्यस्य समीपे इन्द्रस्य रूपं विशेषेण भासमानं बभूवेत्यर्थः । अपि च हे इन्द्र [V]हस्ती [V]मृगः [V]न गजविशेषो मृग इव [V]तविषीं परेषां बलम् [V]उषाणः दहन् [V]आयुधानि वज्रादीनि शस्त्राणि [V]बिभ्रत बिभ्राणस्त्वं [V]सिंहो [V]न सिंह इव [V]भीमः भयंकरोऽभूः ॥

इन्द्रं कामा वसूयन्तो अग्मन्त्स्वर्मीळ्हे न सवने चकानाः ।
श्रवस्यवः शशमानासः उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥ १५ ॥

इन्द्रम् । कामाः । वसुऽयन्तः । अग्मन् । स्वःऽमीळ्हे । न । सवने । चकानाः ।
श्रवस्यवः । शशमानासः । उक्थैः । ओकः । न । रण्वा । सुदृशीऽइव । पुष्टिः ॥ १५ ॥

[V]कामाः राक्षसादिभयनिवारणार्थमिन्द्रं कामयमानाः [V]वसूयन्तः पश्वादिधनमिच्छन्तः स्तोतारः [V]इन्द्रं परमैश्वर्ययुक्तम् [V]अग्मन् अगमन् गच्छन्ति ॥ वर्तमानेऽर्थे[२] छान्दसो लुङ् ॥ कीदृशाः स्तोतारः ।

१. ख-ग-च-ण-प-फ-भ-ल-ज्ञायते; घ-न-आज्ञायते । २. त-वर्तमानार्थे ।

vस्वमीळ्हे vन युद्धे इव vसवने यज्ञे vचकानाः याचमानाः vअवस्यवः अन्नकामाः vउक्थैः स्तोत्रैः vशशमानासः शंसमानाः स्तुवन्तः । तदा सोऽयमिन्द्रः vओको vन स्तोतृणामावास इव भवति । vरण्वा रमणीया vसुदृशीव vपुष्टिः शोभनदर्शना लक्ष्मीरिव भवति ॥ ॥ १९ ॥

तमिद्व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥ १६ ॥

तम् । इत् । वः । इन्द्रम् । सुऽहवम् । हुवेम । यः । ता । चकार । नर्या । पुरूणि ।
यः । माऽवते । जरित्रे । गध्यम् । चित् । मक्षु । वाजम् । भरति । स्पार्हऽराधाः ॥ १६ ॥

vयः इन्द्रः vनर्या नर्याणि मनुष्यहितानि vपुरूणि बहूनि vता तानि प्रसिद्धानि कर्माणि vचकार अकरोत् । किंच vस्पार्हराधाः स्पृहणीयधनः vयः इन्द्रः vमावते मत्सदृशाय vजरित्रे स्तोत्रे vगध्यं vचित् ग्राह्यं संयोजनीयमपि vवाजम् अन्नं vमक्षु शीघ्रं vभरति आहरति । वयं स्तोतारो हे यजमानाः vवः युष्मभ्यं vतमित् तमेव vइन्द्रं vसुहवं शोभनमाह्वानं यथा भवति तथा vहुवेम आह्वयामः[१] ॥

तिग्मा यदन्तरशनिः पतात्ति कस्मिञ्चिच्छूर मुहुके जनानाम् ।
घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥ १७ ॥

तिग्मा । यत् । अन्तः । अशनिः । पतति । कस्मिन् । चित् । शूर । मुहुके । जनानाम् ।
घोरा । यत् । अर्य । सम्ऽऋतिः । भवति । अध । स्म । नः । तन्वः । बोधि । गोपाः ॥१७॥

हे vशूर विक्रान्तेन्द्र vयत् यदा vकस्मिंश्चित् सर्वस्मिन्नपि vजनानां मनुष्याणां vमुहुके मोहके युद्धे vअन्तः अस्माकं मध्ये vतिग्मा तीक्ष्णा vअशनिः vपतति पतेत् । हे vअर्य स्वामिन्निन्द्र vयत् यदास्माकं शत्रुभिः सह vघोरा भीमरूपा vसमृतिः युद्धं vभवति भवेत् । vअध तदानीं vनः अस्मदीयस्य vतन्वः शरीरस्य vगोपाः रक्षकः vबोधि vस्म अबोधि । शत्रुभ्यः सकाशात् अस्मान् रक्षकत्वेन बुद्धवानसि खलु ॥

भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ ।
त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वधा स्याः ॥ १८ ॥

भुवः । अविता । वामऽदेवस्य । धीनाम् । भुवः । सखा । अवृकः । वाजऽसातौ ।
त्वाम् । अनु । प्रऽमतिम् । आ । जगन्म । उरुऽशंसः । जरित्रे । विश्वधा । स्याः ॥ १८ ॥

१, ख-ग-घ-च-ण-भ–आह्वयाम; ल-स–आह्वयामि ।

हे इन्द्र त्वं [v]वामदेवस्य वामदेवाख्यस्य मन्त्रद्रष्टुर्मम संबन्धिनीनां [v]धीनां कर्मणाम् [v]अविता रक्षिता [v]भुवः भव । [v]अवृकः हिंसारहितस्त्वं [1]वाजसातौ युद्धे [v]सखा मम सुहृत् [v]भुवः भव । हे इन्द्र वयं [v]प्रमतिं प्रकृष्टज्ञानं [v]त्वामनु लक्षीकृत्य [v]आ [v]जगन्म आगच्छाम । स त्वं [v]विश्वध सर्वदा [v]जरित्रे स्तोत्रे [v]उरुशंसः महता शंसनेन युक्तः [v]स्याः भवेः ॥

एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ ।
द्यावो न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥ १९ ॥

एभिः । नृऽभिः । इन्द्र । त्वायुऽभिः । त्वा । मघवत्ऽभिः । मघऽवन् । विश्वे । आजौ ।
द्यावः । न । द्युम्नैः । अभि । सन्तः । अर्यः । क्षपः । मदेम । शरदः । च । पूर्वीः ॥१९॥

हे [v]मघवन् धनवन् [v]इन्द्र [v]विश्वे विश्वस्मिन् [v]आजौ संग्रामे [v]त्वायुभिः शत्रुजयार्थं त्वां कामयमानैः [v]मघवद्भिः स्वदर्थं दीयमानहविर्लक्षणैर्धनैरुपेतैः [v]एभिः प्रत्यक्षेणोपलभ्यमानैः [v]नृभिः[1] पुत्रपौत्रार्थैः परिजनैः सहिता वयं यजमानाः[2] [v]द्युम्नैः धनैः [v]द्यावो [v]न द्योतमानाः[3] प्रकाशमाना धनिनो यथा तथा [v]अर्यः अरीन् शत्रून्[3] [v]अभि [v]सन्तः अभिभवन्तः [v]क्षपः सर्वा रात्रीः [v]पूर्वीः बह्वीः [v]शरदश्च संवत्सरांश्च [v]मदेम स्तवाम । यजमानाः[4] सर्वेषु कालेषु स्तोत्रैरिन्द्रं हर्षयन्तीत्यर्थः ॥

एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।
नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः ॥ २० ॥

एव । इत् । इन्द्राय । वृषभाय । वृष्णे । ब्रह्म । अकर्म । भृगवः । न । रथम् ।
नु । चित् । यथा । नः । सख्या । वियोषत् । असत् । नः । उग्रः । अविता । तनूऽपाः ॥२०॥

[v]यथा इन्द्रः [v]नः अस्मदीयानि [v]सख्या सख्यानि कर्माणि [v]नू [v]चित् क्षिप्रमेव[5] [v]वियोषत् न पृथक्कुर्यात् । [v]उग्रः तेजस्वी [v]तनूपाः शरीराणां[6] पालक इन्द्रो यथा [v]नः अस्मान् [v]अविता रक्षिता [v]असत् स्यात् । तथा वयं यजमानाः [v]एवेत् एवमेवोक्तप्रकारेण [v]इन्द्राय [v]वृषभाय कामानां वर्षित्रे [v]वृष्णे नित्यतरुणाय [v]ब्रह्म स्तोत्रम् [v]अकर्म अकुर्म । तत्र दृष्टान्तः । [v]भृगवः दीप्तास्तक्षाणः [v]रथं [v]न रथमिव तद्वत् । यजमानेभ्यो यथेन्द्रोऽभीप्सितफलप्रदो भवति तथेन्द्रं यजमानाः स्तुवन्तीत्यर्थः ॥

१. ख-ग-च-ण-भ-' नृभिः..... यजमानाः ' नास्ति । २. ख-ग-घ-च-ण-न-भ-स-' द्योतमानाः ' नास्ति । ३. ख-ग-घ-च-ण-न-भ-स-' शत्रून् ' नास्ति । ४. ख-ग-च-ण-भ-यजमानाः त्वा त्वा ऋभिः पुत्रपौत्रार्थैः परिजनैः सहिता वयं यजमानाः । ५. न-भ-ल-स-' क्षिप्रमेव ' नास्ति । ६. ख-ग-च-ण-त-न-फ-भ-स-शरीरिणाम् ।

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ २१ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥

हे [v]इन्द्र [v]नु क्षिप्रं [v]स्तुतः पूर्वैर्ऋषिभिः संस्तुतः [v]नु क्षिप्रं [v]गृणानः अस्माभिः स्तूयमानश्च त्वम् [v]इषम् अन्नं [v]जरित्रे स्तोत्रे मह्यं [v]नद्यो [v]न अद्रिर्नदीरिव [v]पीपेः प्यायय प्रवृद्धं कुरु । हे[१] [v]हरिवः हरिवन् हरिसंज्ञकाश्वोपेतेन्द्र [v]ते तुभ्यं [v]नव्यं नवतरं [v]ब्रह्म स्तोत्रम् [v]अकारि अस्माभिः क्रियते । [v]रथ्यः रथवन्तो वयं [v]धिया प्रज्ञारूपया स्तुत्या [v]सदासाः त्वां सर्वदा भजमानास्त्वदर्थं हवीरूपस्य अन्नस्य[२] दातारो वा [v]स्याम भूयास्म ॥ ॥ २० ॥

'त्वं महाँ इन्द्र तुभ्यम्' इत्येकविंशत्यृचं सप्तमं सूक्तं वामदेवस्यार्षम्[३] । अत्रेयमनुक्रमणिका–'त्वं महाँ असिक्न्यामेकपदा' इति । 'असिक्न्यां यजमानो न होता' इत्येकपदा विराट् शिष्टा विंशतिः त्रिष्टुभः । इन्द्रो देवता । समूढहे दशरात्रेऽष्टमेऽहनि निष्केवल्ये इदं सूक्तं विनियुक्तम्[४] । तथा च सूत्रितं–'त्वं महाँ इन्द्र तुभ्यमिति निष्केवल्यम्' (आश्व. श्रौ. ८. ७) इति । इन्द्रस्य वृत्रघ्नः 'त्वं महाँ' इति पशुपुरोडाशस्यानुवाक्या । सूत्रितं च–'त्वं महाँ इन्द्र तुभ्यं ह क्षाः सत्राहणम्' (आश्व. श्रौ. ३. ८) इति ॥

त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान्त्सृजः सिन्धूँरहिना जग्रसानान् ॥ १ ॥

त्वम् । महान् । इन्द्र । तुभ्यम् । ह । क्षाः । अनु । क्षत्रम् । मंहना । मन्यत । द्यौः ।
त्वम् । वृत्रम् । शवसा । जघन्वान् । सृजः । सिन्धून् । अहिना । जग्रसानान् ॥ १ ॥

हे [v]इन्द्र [v]त्वं [v]महान् प्रभूतो भवसि । [v]क्षाः पृथिवी । क्षा इति पृथिवीनामैतत् । [v]मंहना महत्त्वेन युक्ता सती [v]तुभ्यं [v]ह त्वदर्थमेव [v]क्षत्रं त्वदीयं बलम् [v]अनु [v]मन्यत अन्वमन्यत । अनुमतीचकार । [v]द्यौः च त्वदर्थं बलमन्वमन्यत । हे इन्द्र [v]त्वं [v]शवसा त्वदीयेन बलेन [v]वृत्रं लोकानाम्[५] आवरकं वृत्रनामकम्[६] असुरं [v]जघन्वान् हतवान् । किंच [v]अहिना वृत्रेण [v]जग्रसानान् जग्रहाणान् ग्रस्तान् ॥ ग्रसतेर्लिटः कानजादेशः ॥ [v]सिन्धून् अपः[७] [v]सृजः असृजः[७] सृष्टवानसि[७] ॥

१. ग–इन्द्र हे; न-स–हे इन्द्र । २. ख-ग-च-ण-भ–अन्धसः अन्नस्य । ३. घ–वामदेव ऋषिः; न-ल-स–'वामदेवस्यार्ष' नास्ति । ४. ल–निविद्धानीयम् । ५. ख-ग-घ-च-ण-भ–'लोकानां... °नामकं' नास्ति । ६. ख-ग-घ-च-ण-न-भ-स–'अपः' नास्ति । ७. ण-त–असृजः ह सृष्टवानसि खलु ।

तव॑ त्विषो जनिमन्रेजत द्यौ रेज॒द्भूमि॑र्भि॒यसा॒ स्वस्य॑ म॒न्योः ।
ऋघा॑यन्त सु॒भ्व॑१॑: पर्व॑तास॒ आर्द॒न्धन्वा॑नि स॒रय॑न्त॒ आप॑: ॥ २ ॥

तव॑ । त्विषः । जनिमन् । रेजत । द्यौः । रेजत् । भूमिः । भियसा । स्वस्य । मन्योः ।
ऋघायन्त । सुऽभ्वः । पर्वतासः । आर्दन् । धन्वानि । सरयन्ते । आपः ॥ २ ॥

हे इन्द्र [v]त्विषः दीप्यमानस्य [v]तव त्वदीये [v]जनिमन् जन्मनि सति [v]द्यौः अन्तरिक्षं [v]स्वस्य स्वदीयात् [v]मन्योः कोपात् । पञ्चम्यर्थे षष्ठी । [v]भियसा जातभयेन[1] [v]रेजत अरेजत् । अकम्पत[2] । [v]भूमिः च [v]रेजत् कम्पमाना बभूव । [v]सुभ्वः महान्तः [v]पर्वतासः । पर्वता मेघाः । [v]ऋघायन्त सस्यादीनां वृष्टिप्रदानार्थं नियामकेन[3] त्वया अबाध्यन्त[4] । तथा[5] मेघाः [v]आर्दन् प्राणिनां पिपासारूपां पीडामहिंसन् । तथा मेघाः [v]धन्वानि उदकरहितान् देशान् [v]आपः अपः [v]सरयन्ते गमयन्ति ॥

भि॒नद्गि॒रिं श॒वस॑ा॒ वज्र॑मि॒ष्णन्नाविष्कृ॑ण्वा॒नः स॑हसा॒न ओज॑सः ।
वधी॑द्वृ॒त्रं व॒ज्रेण॑ मन्दसा॒नः सर॒न्नापो॒ जव॑सा॒ हत॑वृष्णीः ॥ ३ ॥

भि॒नत् । गि॒रिम् । श॒वसा । वज्र॑म् । इ॒ष्णन् । आ॒वि॒ःऽकृ॒ण्वा॒नः । स॒हऽसा॒नः । ओज॑सः ।
वधी॑त् । वृ॒त्रम् । व॒ज्रेण॑ । म॒न्द॒सा॒नः । सर॑न् । आपः॑ । जव॑सा । हत॑ऽवृष्णीः ॥ ३ ॥

[v]सहसानः शत्रूणामभिभवन् [v]ओजः तेजः [v]आविष्कृण्वानः आविष्कुर्वन् इन्द्रः [v]वज्रमिष्णन् वज्रं प्रेरयन् [v]शवसा बलेन [v]गिरिं पर्वतजातं [v]भिनत् अभिनत् बिभेद । किंच [v]मन्दसानः सोमेन मोदमान इन्द्रः [v]वज्रेण [v]वृत्रं वृत्रनामानमसुरं [v]वधीत् अवधीत् जघान । ततः [v]आपः वृत्रेणावृतान्युदकानि [v]हतवृष्णीः । हतो वृषा[6] वृत्रो यासां ता हतवृष्ण्यः । ता वृत्रवधानन्तरं निवारणरहिताः सत्यः [v]जवसा वेगेन [v]सरन् असरन्[7] अगच्छन्[7] ॥

सु॒वीर॑स्ते जनि॒ता म॑न्यत द्यौरिन्द्र॑स्य क॒र्ता स्वप॑स्तमो भूत् ।
य ई॒ं ज॒जान॑ स्व॒र्यं॑ सु॒वज्र॑मनप॒च्युतं॑ सद॑सो॒ न भूम॑ ॥ ४ ॥

सुऽवीरः । ते । जनिता । मन्यत । द्यौः । इन्द्रस्य । कर्ता । स्वपःऽतमः । भूत् ।
यः । ईम् । जजान । स्वर्यम् । सुऽवज्रम् । अनपऽच्युतम् । सदसः । न । भूम ॥ ४ ॥

१. त–जातेन भयेन । २. ख-ग-च-ण-न-भ-स–अकम्पयत् । ३. ख-ग-च-ण-फ-भ–नियामकत्वेन । ४. ख-ग-च–आबध्यन्त । ५. ख-ग-घ-च-ण-भ–' तथा मेघाः ' नास्ति । ६. ख-ग-घ-ण-त-न-भ-ल-स–' वृषा ' नास्ति । ७. ख-ग-घ-ण-न-भ-ल-स–अगच्छन् ; च-फ–आगच्छन् ; प–असरन् आगच्छन् ।

हे इन्द्र [v]यः प्रजापतिः [v]स्वर्यम् ऋत्विगादिभिः स्तुत्यं [v]सुवज्रं शोभनवज्रोपेतं [v]सदसः स्वकीयात् स्वर्गाख्यात् स्थानात् [v]अनपच्युतं विच्युतिरहितं च । [v]न इति समुच्चयार्थे । [v]भूम भूम्ना महत्त्वेन युक्तम् [v]ईम् एनं त्वां [v]जजान अजीजनत् ॥ ' जन जनने ' इति धातुः ॥ [v]द्यौः द्योतमानः [v]ते तव [v]जनिता जनयिता स प्रजापतिः [v]सुवीरः शोभनपुत्रवानहमस्मीति [v]मन्यत अमन्यत । किंच [v]इन्द्रस्य [v]कर्ता इन्द्रस्य[1] जनयिता प्रजापतिः [v]स्वपस्तमः अत्यन्तं[2] शोभनकर्मा[2] अभूत् ॥

य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इन्द्रः ।
सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ॥ ५ ॥

यः । एकः । इत् । च्यवयति । प्र । भूम । राजा । कृष्टीनाम् । पुरुऽहूतः । इन्द्रः ।
सत्यम् । एनम् । अनु । विश्वे । मदन्ति । रातिम् । देवस्य । गृणतः । मघोनः ॥ ५ ॥

[v]कृष्टीनां सर्वासां प्रजानां [v]राजा प्रभुः [v]पुरुहूतः बहूभिराहूतः [v]एक [v]इत् देवानां मध्ये मुख्य एव [v]यः [v]इन्द्रः [v]भूम भूतं निष्पन्नं शत्रुभ्यो भयं [v]प्र [v]च्यावयति प्रकर्षेण नाशयति । [v]विश्वे सर्वे यजमानाः [v]मघोनः मघवतः । हविर्लक्षणधनवत इत्यर्थः । [v]देवस्य इन्द्रसमाश्रयात् द्योतमानस्य [v]गृणतः स्तुवतः [v]रातिं बन्धुम् [v]एनम् इन्द्रम् [v]अनु लक्षीकृत्य [v]सत्यम् एव [v]मदन्ति स्तुवन्ति ॥ ॥ २१ ॥

सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।
सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ॥ ६ ॥

सत्रा । सोमाः । अभवन् । अस्य । विश्वे । सत्रा । मदासः । बृहतः । मदिष्ठाः ।
सत्रा । अभवः । वसुऽपतिः । वसूनाम् । दत्रे । विश्वाः । अधिथाः । इन्द्र । कृष्टीः ॥ ६ ॥

[v]विश्वे सर्वे [v]सोमाः [v]अस्य इन्द्रस्य [v]सत्रा । सत्रेति सत्यनामैतत् । सत्यमेव प्रभूताः [v]अभवन् । किंच [v]मदासः मदा मदकराः सोमाः [v]बृहतः महतोऽस्येन्द्रस्य [v]मदिष्ठाः मादयितृतमाः [v]सत्रा सत्यमेवाभवन् । हे [v]इन्द्र त्वं [v]वसुपतिः धनपतिः । न केवलं धनपतिः किंतु [v]वसूनां सर्वेषां पश्वादीनां धनानां पतिः [v]सत्रा सत्यमेव [v]अभवः भवसि । हे इन्द्र त्वं [v]दत्रे धने निमित्तभूते सति [v]विश्वाः सर्वाः [v]कृष्टीः स्तोत्रीः प्रजाः [v]अधिथाः धारयसि[3] ॥

त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इन्द्र कृष्टीः ।
त्वं प्रति प्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः ॥ ७ ॥

त्वम् । अध । प्रथमम् । जायमानः । अमे । विश्वाः । अधिथाः । इन्द्र । कृष्टीः ।
त्वम् । प्रति । प्रऽवतः । आऽशयानम् । अहिम् । वज्रेण । मघऽवन् । वि । वृश्चः ॥ ७ ॥

१. च-फ-' इन्द्रस्य ' नास्ति । २. ख-ग-घ-च-ण-त-भ-अत्यन्तशोभनकर्मा । ३. ण-रक्षकत्वेन धारयसि ।

vअथ अपि च vप्रथमम् एव vजायमानः vत्वम् vअमे वृत्रनिमित्ते भये सति vविशः सर्वाः vकृष्टीः प्रजाः vअधिथाः रक्षकत्वेन धारयसि । हे vमघवन् धनवन् vइन्द्र vत्वं vप्रति vप्रवतः प्रति प्रवणानुदकवतो देशान् लक्षीकृत्य vआशयानम् अपां निरोधकम् vअहिं वृत्रनामानमसुरं vवज्रेण vवि vवृश्चः व्यवृश्चः[1] छिन्नवानसि ॥

इन्द्रस्य वृत्रघ्नः पशौ ' सत्राहणम् ' इति हविषोऽनुवाक्या । सूत्रितं च–' सत्राहणं दाधृषिं तुम्रमिन्द्रं सहदानुं पुरुहूत क्षियन्तम् ' (आश्व. श्रौ. ३. ८) इति ॥

सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ८ ॥

सत्राऽहनम् । दधृषिम् । तुम्रम् । इन्द्रम् । महाम् । अपारम् । वृषभम् । सुऽवज्रम् ।
हन्ता । यः । वृत्रम् । सनिता । उत । वाजम् । दाता । मघानि । मघऽवा । सुऽराधाः ॥ ८ ॥

vसत्राहणं बहूनां शत्रूणां हन्तारं vदाधृषिम् अत्यन्तं धर्षकं vतुम्रम् । तुमिः प्रेरणकर्मा[2] । शत्रूणां प्रेरकं vमहां महान्तम् vअपारम् अपरिमाणम् । विनाशरहितमित्यर्थः । vवृषभं कामानां वर्षितारं vसुवज्रं शोभनेन वज्रेणोपेतम् vइन्द्रम् । वयं स्तोतारः स्तुमेति शेषः । vयः इन्द्रः vवृत्रं वृत्रनामानम् असुरं vहन्ता हिंसिता भवति । vउत अपि च य इन्द्रः vवाजम् अन्नं vसनिता दाता भवति । vसुराधाः[3] शोभनधनयुक्तो यः vमघवा इन्द्रः[4] vमघानि धनानि vदाता भवति । तमिन्द्रं स्तुमेति पूर्वेण अन्वयः[5] ॥ अत्र सर्वत्र तृनन्तत्वात् ' न लोकाव्यय[6] ' इति[7] षष्ठीप्रतिषेधे सति द्वितीयैव भवति ॥

अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सुनोत्यस्य प्रियासः सख्ये स्याम ॥ ९ ॥

अयम् । वृतः । चातयते । सम्ऽईचीः । यः । आजिषु । मघऽवा । शृण्वे । एकः ।
अयम् । वाजम् । भरति । यम् । सुनोति । अस्य । प्रियासः । सख्ये । स्याम ॥ ९ ॥

vमघवा धनवान् vयः इन्द्रः vआजिषु संग्रामेषु vएकः मुख्य एव vशृण्वे श्रूयते । vअयम् इन्द्रः vसमीचीः संगताः vवृतः । वृण्वन्त्याच्छादयन्ति लोकानिति वृतः शत्रुसेनाः । ताः vचातयते नाशयति । vअयम् इन्द्रः vयं[8] vवाजं यदन्नं[9] vसनोति यजमानाय ददाति तं वाजं vभरति यजमानस्य तदन्नं दातुं बिभर्ति । स्तोतारो वयम् vअस्य एवंभूतस्येन्द्रस्य vसख्ये सख्यिवे vप्रियासः प्रियाः vस्याम भवेम ॥

१. ख-ग-घ-च-ण-त-न-प-फ-भ-स–' व्यवृश्चः ' नास्ति । २. ण–प्रेरणे । ३. ख-ग-घ-ण-न-प-फ-भ–किंच मघवा धनवान् सुराधाः सत्यधनवान् । ४. घ-ल–संबन्धः । ५. ल–इत्यादिना । ६. ण–यं यत् । ७. ख-ग-च-ण-न-प-फ-भ-स–अन्नम् ।

अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळ्हं भयत एजदस्मात् ॥ १० ॥

अयम् । शृण्वे । अध । जयन् । उत । घ्नन् । अयम् । उत । प्र । कृणुते । युधा । गाः ।
यदा । सत्यम् । कृणुते । मन्युम् । इन्द्रः । विश्वम् । दृळ्हम् । भयते । एजत् । अस्मात् ॥१०॥

vअध अपि च vअयम् इन्द्रः vजयन् शत्रून् विजयन् vशृण्वे श्रूयते । सर्वत्र प्रख्यातो भवति । vउत अपि च vघ्नन् शत्रून् हिंसन् सर्वत्र श्रूयते । vउत अपि च vअयम्[1] इन्द्रः[2] vयुधा युद्धेन vगाः पशून् vप्र vकृणुते शत्रुसकाशात् आहरति । किंच vइन्द्रः vयदा vमन्युं कोपं vसत्यम् एव vकृणुते द्विषदर्थं करोति तदानीं vदृळ्हं[3] दृढं स्थिरं[3] स्थावररूपम्[4] vएजत् कम्पमानं जङ्गमरूपं च vविश्वं समस्तं जगत् vअस्मात् इन्द्रात् vभयते बिभेति ॥ ॥ २२ ॥

समिन्द्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।
एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता सम्भरश्च वस्वः ॥ ११ ॥

सम् । इन्द्रः । गाः । अजयत् । सम् । हिरण्या । सम् । अश्विया । मघऽवा । यः । ह । पूर्वीः ।
एभिः । नृऽभिः । नृऽतमः । अस्य । शाकैः । रायः । विऽभक्ता । सम्ऽभरः । च । वस्वः ॥११॥

vयो vह यः खलु vमघवा धनवान् vइन्द्रः vगाः असुराणां vसम् vअजयत् सम्यक् जितवान् भवति । किंच vहिरण्या हिरण्यानि हितरमणीयानि शत्रुसंबन्धीनि धनानि vसम् अजयत् । तथा vअश्विया अश्वियानि शत्रुसंबन्धिनोऽश्वसमूहान् सम्यक् जयति स्म । तथा vपूर्वीः बह्वीः शत्रुसेनाः समजयत् । इन्द्रः सर्वान् शत्रून् जित्वा सकलमपि पश्वादिधनमपहृतवानित्यर्थः । vशाकैः सामर्थ्यैः vनृतमः नेतृतमः पश्वादीनामतिशयेन निर्वाहकः स इन्द्रः vएभिर्नृभिः नेतृभिः स्तोतृभिः स्तुतः सन् vअस्य vरायः पश्वादिरूपस्य धनस्य vविभक्ता स्तोतृभ्यो विभागस्य कर्ता । दाता भवतीत्यर्थः । किंच vवस्वः वसुनो धनस्य vसंभरश्च संभर्ता धारकश्च भवति ॥

किय॑त्स्वि॒दिन्द्रो॒ अध्ये॑ति मा॒तुः किय॑त्पि॒तुर्ज॑नि॒तुर्यो ज॒जान॑ ।
यो अ॑स्य॒ शुष्मं॒ मुहु॒कैरिय॑र्ति॒ वातो॒ न जू॒तः स्त॒नय॑द्भि॒रभ्रैः॑ ॥ १२ ॥

किय॑त् । स्वि॒त् । इन्द्रः॑ । अधि॑ । ए॒ति॒ । मा॒तुः । किय॑त् । पि॒तुः । ज॒नि॒तुः । यः । ज॒जान॑ ।
यः । अ॒स्य॒ । शुष्म॑म् । मुहु॒कैः॑ । इय॑र्ति । वातः॑ । न । जू॒तः । स्त॒नय॑त्ऽभिः । अ॒भ्रैः॑ ॥१२॥

---

१. ख-ग-च-न-फ-भ-स-'अयमिन्द्रः' नास्ति । २. न-ल-स-'इन्द्रः' नास्ति । ३. ख-ग-घ-च-ण-त-न-भ-स-'स्थिरं' नास्ति । ४. त-स्थावररूपं च ।

यः [v]इन्द्रः [v]मातुः जनन्याः सकाशात् [v]कियत्स्वत् यावद्बलम् [v]अध्येति अधिगच्छति। [v]पितुः सकाशात्[१] [v]कियत् यावद्बलमधिगच्छति। [v]यः[२] इन्द्रः [v]जनितुः जनयितुर्यस्मात प्रजापतेः सकाशादिदं दृश्यमानं जगत्[३] [v]जजान अजनयत्। [v]यः इन्द्रः तस्मात् प्रजापतेः सकाशात् [v]अस्य जगतः [v]शुष्मं यावद्बलं [v]मुहुकैः मुहुर्मुहुः [v]इयर्ति प्रेरयति। [v]स्तनयद्भिः गर्जद्भिः [v]अभ्रैः मेघैः [v]जूतः प्रेरितः [v]वातो [v]न वायुरिव तथा स इन्द्रः स्तोतृभिर्जूतः प्रेरितः[४] हविष्प्रदानार्थमाहूतो भवति॥

क्षियन्तं त्वमक्षियन्तं कृणोतीयर्ति रेणुं मघवा समोहम्।
विभञ्जनुरशनिमाँइव द्यौरुत स्तोतारं मघवा वसौ धात्॥ १३॥

क्षियन्तम्। त्वम्। अक्षियन्तम्। कृणोति। इयर्ति। रेणुम्। मघऽवा। सम्ऽओहम्।
विऽभञ्जनुः। अशनिमान्ऽइव। द्यौः। उत। स्तोतारम्। मघऽवा। वसौ। धात्॥ १३॥

[v]मघवा धनवानिन्द्रः [v]क्षियन्तं धनराहित्येन क्षीयमाणं [v]त्वम् एकं जनम् [v]अक्षियन्तं धनेन अक्षीयमाणं [v]कृणोति करोति। अकिंचनः कश्चित्पुरुषः इन्द्रं स्तुत्वा धनसमृद्धोऽभवदित्यर्थः। [v]अशनिमान् अशनिना युक्तः [v]द्यौः [v]इव अन्तरिक्षमिव [v]विभञ्जनुः शत्रूणां विशेषेण भञ्जकः [v]मघवा इन्द्रः [v]समोहं समूढं[५] [v]रेणुं पापम् [v]इयर्ति स्तोतुः सकाशात् प्रेरयति[६]। [v]उत अपि च [v]मघवा धनवानिन्द्रः [v]स्तोतारं [v]वसौ धने [v]धात् अधात् निदधाति॥

अयं चक्रमिषणत्सूर्यस्य न्येतशं रीरमत्ससृमाणम्।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ॥ १४॥

अयम्। चक्रम्। इषणत्। सूर्यस्य। नि। एतशम्। रीरमत्। ससृमाणम्।
आ। कृष्णः। ईम्। जुहुराणः। जिघर्ति। त्वचः। बुध्ने। रजसः। अस्य। योनौ॥ १४॥

'प्रैतशं सूर्ये पस्पृधानम्' (ऋ. सं. १. ६१.१५) इत्यर्धर्चे पूर्वं काचिदाख्यायिका सूचिता। अत्रापि 'अयं चक्रम्' इति पूर्वार्धे सा[७] सूच्यते[७]। स्वश्वनामा कश्चिद्राजा। स च पुत्रार्थं सूर्यमुपास्ते। स च सूर्यः पुत्ररूपेण स्वयमेव तत्रोत्पन्नः सन् एतशाख्येन महर्षिणा सार्धं युद्धं चकार। तदानीं स ऋषिः युद्धे जयार्थमिन्द्रं तुष्टाव। स इन्द्रः तेन स्तूयमानः सन् स्वश्वपुत्रस्य सूर्यस्य संबन्धिनः संग्रामात् एनमपालयदिति। [v]अयम् इन्द्रः [v]सूर्यस्य [v]चक्रम् आयुधम् [v]इषणत् प्रैरयत्। [v]ससृमाणं युद्धार्थं सरन्तं गच्छन्तम् [v]एतशम्[८] एतशनामानमृषिं [v]नि [v]रीरमत् न्यरीरमत् निवारितवान्। [v]जुहुराणः कुटिलं यथा भवति तथा संचरन् [v]कृष्णः कृष्णवर्णो मेघः [v]त्वचः तेजसः [v]बुध्ने मूलभूते [v]रजसो [v]अस्य उदकस्य

१. ख-ग-घ-च-ण-न-भ-ल-'सकाशात्' नास्ति। २. ख-ग-च-न-सः। ३. ख-ग-घ-च-ण-त-प-फ-भ-कियज्जगत्। ४. ख-ग-च-ण-'प्रेरितः' नास्ति। ५. ख-भ-ल-संमूढम्। ६. ख-ग-घ-ण-भ-ल-प्रेरयति तत्; त-स-प्रेरयति ततः। ७. ख-ग-घ-च-ण-त-न-भ-स्तूयते; ल-सूच्यते, स-श्रूयते। ८. न-ल-स-'एतशं' नास्ति।

योनौ स्थानेऽन्तरिक्षे स्थितम् इमं एनमिन्द्रम् आ जिघर्ति आसिञ्चति । शत्रूणां प्रेरिताच्छकादेस्त्रस्तं ररक्षेत्यर्थः ॥

आसिक्न्यां यजमानो न होता ॥ १५ ॥

आसिक्न्याम् । यजमानः । न । होता ॥ १५ ॥

एकपदंयमृक्[1] पूर्वर्चा सह दृष्टान्तत्वेन संबध्यते । असिक्न्यां रात्रौ यजमानो न यजमान इव होता होतारमाह्वातारमग्निम् । द्वितीयार्थे प्रथमा । सोमेनासिञ्चति तद्वन्मेघ इन्द्रम् आसिञ्चतीत्यर्थः ॥ ॥ २३ ॥

गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशम् ॥ १६ ॥

गव्यन्तः । इन्द्रम् । सख्याय । विप्राः । अश्वऽयन्तः । वृषणम् । वाजयन्तः ।
जनिऽयन्तः । जनिऽदाम् । अक्षितऽऊतिम् । आ । च्यवयामः । अवते । न । कोशम् ॥ १६ ॥

गव्यन्तः गा इच्छन्तः अश्वायन्तः अश्वानिच्छन्तः वाजयन्तः वाजमन्नमिच्छन्तः जनीयन्तः जायाश्च[2] इच्छन्तः विप्राः मेधाविनः स्तोतारो वयं सख्याय इन्द्रसंबन्धिने सखित्वाय वृषणं कामानां वर्षितारं जनिदां जायाप्रदम् अक्षितोतिम् अक्षीणरक्षम् । सर्वदा रक्षाकरमित्यर्थः । एवंभूतम्[3] इन्द्रम् आ च्यावयामः आगमयामः । तत्र दृष्टान्तः । अवते कूपे । अवत इति कूपनाम ' अवतः अवटः क्विः ' (नि. ३. २३. ७) इति कूपनामसु पाठात् । कोशं न जलोद्धरणपात्रमिव । पुरुषा जलोद्धरणपात्रं जलेन पूरयितुं कूपे यथा आच्यावयन्ति तथा वयमाच्यावयाम इत्यर्थः[3] ।

त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानाम् ।
सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः ॥ १७ ॥

त्राता । नः । बोधि । ददृशानः । आपिः । अभिऽख्याता । मर्डिता । सोम्यानाम् ।
सखा । पिता । पितृऽतमः । पितॄणाम् । कर्ता । ईम् । ऊँ इति । लोकम् । उशते । वयोऽधाः ॥ १७ ॥

हे इन्द्र आपिः आप्तः ददृशानः सर्वं[4] पालकत्वेन[4] पश्यंस्त्वं नः अस्माकं त्राता रक्षकः बोधि भव । किंच । अभिख्याता अभिद्रष्टा मर्डिता सुखयिता सोम्यानां सोमार्हाणां यजमानादीनां सखा प्रजापतिना समानख्यातिः पिता पालकः । केवलं पालको न किंतु पितॄणां पालकानां मध्ये पितृतमः

---

१. ख-ग-घ-च-ण-त-प-फ-भ-स—एकपदीयमृक् । २. ख-ग-घ-ण-त-न-भ-स—जायां च । ३. ख-ग-घ-च-ण-न-प-फ-भ—कोशमाधारभूतमिन्द्रमवते रक्षणार्थं नाच्यावयामः न त्यजामः भजेमेत्यर्थः । ४. घ-ण-म-सं—सर्वपालकत्वेन ।

अतिशयेन पालकः [v]कर्तेमु पितृणां स्रष्टा च त्वं [v]लोकं स्वर्गादिलोकम्[1] [v]उशते कामयमानाय स्तोत्रे [v]वयोधाः । वय इत्यन्ननामैतत् । अन्नप्रदो भव ॥

सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः ।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र ॥ १८ ॥

सखिऽयताम् । अविता । बोधि । सखा । गृणानः । इन्द्र । स्तुवते । वयः । धाः ।
वयम् । हि । आ । ते । चकृम । सऽबाधः । आभिः । शमीभिः । महयन्तः । इन्द्र ॥ १८ ॥

हे इन्द्र त्वं [v]सखीयतां सखित्वमिच्छतामस्माकम् [v]अविता रक्षिता [v]बोधि भव। तथा [v]गृणानः स्तूयमानस्त्वं [v]सखा भव । हे [v]इन्द्र [v]स्तुवते स्तुतिं कुर्वते मह्यं [v]वयः अन्नं [v]धाः अधाः धेहि[2] । हे[3] [v]इन्द्र[3] [v]सबाधः बाधासहिताः [v]वयं [v]हि वयं खलु [v]ते त्वाम् [v]आ [v]चकृम आह्वयामः । किं कुर्वन्तः । [v]आभिः प्रत्यक्षेणोपलभ्यमानैः [v]शमीभिः स्तुतिरूपैः कर्मभिः [v]महयन्तः त्वां[4] पूजयन्तः ॥

इन्द्रस्य वृत्रघ्नः पुरोडाशस्य ' स्तुत इन्द्रः ' इति याज्या । सूत्रितं च—' स्तुत इन्द्रो मघवा यद्ध वृत्रैवा वस्व इन्द्रः सत्यः सम्राट् ' (आश्व. श्रौ. ३. ८) इति ॥

स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हन्ति ।
अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः ॥ १९ ॥

स्तुतः । इन्द्रः । मघऽवा । यत् । ह । वृत्रा । भूरीणि । एकः । अप्रतीनि । हन्ति ।
अस्य । प्रियः । जरिता । यस्य । शर्मन् । नकिः । देवाः । वारयन्ते । न । मर्ताः ॥ १९ ॥

[v]यद्ध यदा खलु [v]मघवा धनवान् [v]इन्द्रः [v]स्तुतः अस्माभिः स्तुतो भवति तदेन्द्रः [v]एकः असहाय एव [v]भूरीणि बहूनि [v]अप्रतीनि अप्रतिगमनानि । अभिगमनयुक्तानीत्यर्थः । [v]वृत्रा वृत्राणि शत्रून् [v]हन्ति हिनस्ति । [v]यस्य इन्द्रस्य [v]शर्मन् शर्मणि आश्रये वर्तमानं स्तोतारं [v]देवाः [v]नकिः [v]वारयन्ते निवारणं न कुर्वन्ति । [v]मर्ताः च [v]न निवारयन्ते[5] । [v]अस्य इन्द्रस्य [v]जरिता स्तोता [v]प्रियः भवति ॥

आग्निमारुतशस्त्रे ' एवा न इन्द्रः ' इति परिधानीया । सूत्रितं च–' एवा न इन्द्रो मघवा विरप्शीति परिदध्यात् ' (आश्व. श्रौ. ५. २०) इति ॥

१. ख-ग-घ-च-ण-न-भ-ल-स–' स्वर्गादिलोकं ' नास्ति । २. ख-ग-घ-च-ण-न-भ–देहि । ३. ख-ग-घ-च-ण-न-भ–' हे इन्द्र ' नास्ति । ४. ख-ग-घ-च-ण-न-प-फ-भ-स–' त्वां ' नास्ति । ५. ख-ग-च-ण-न-प-फ-भ-स–निवारयन्ते निवारणं (ख-ग-च-फ–निर्वारणं; भ-स–निर्धारणं) न कुर्वन्ति

एवा नु इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा ।
त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥ २० ॥

एव । नुः । इन्द्रः । मघऽवा । विऽरप्शी । करत् । सत्या । चर्षणिऽधृत् । अनर्वा ।
त्वम् । राजा । जनुषाम् । धेहि । अस्मे इति । अधि । श्रवः । माहिनम् । यत् । जरित्रे ॥ २० ॥

[v]विरप्शी बहुविधशब्दवान् [v]चर्षणीधृत् सर्वासां प्रजानां धारयिता [v]अनर्वा अप्रत्यृतः । केनापि प्रतिकूलेन न प्राप्त इत्यर्थः । [v]मघवा धनवान् [v]इन्द्रः [v]एवा एवमस्माभिः स्तुतः सन् [v]नः अस्माकं [v]सत्या सत्यरूपाण्यभिमतानि फलानि [v]करत् करोतु । हे इन्द्र [v]जनुषां जन्मवतां सर्वेषां [v]राजा प्रभुः[1] [v]त्वं [v]माहिनं महिम्नोपेतं [v]यत् [v]श्रवः यद्यशः [v]जरित्रे स्तोत्रे देयं तद्यशः [v]अस्मे अस्मासु [v]अधि अधिकारेण [v]धेहि । 'एवा न इन्द्रो मघवा विरप्शीत्युत्तमया परिदधातीयं[2] वा इन्द्रो मघवा विरप्शी' (ऐ. ब्रा. ३. ३८) इत्यादि ब्राह्मणम् ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ २१ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥

नू[3] ष्टुत इन्द्रेति व्याख्याता[3] ॥ ॥ २४ ॥

'अयं पन्थाः' इति त्रयोदशर्चमष्टमं सूक्तं त्रैष्टुभम् । अत्रानुक्रमणिका—'अयं पन्थाः सप्तोना संवाद इन्द्रादितिवामदेवानाम्' इति । 'यस्य वाक्यं स ऋषिः या तेनोच्यते सा देवता' इति परिभाषितत्वात् ऋषिदेवते तत्र तत्र ज्ञातव्ये । अस्मिन् सूक्ते इन्द्रादितिवामदेवसंवादरूपिणी[4] काचित् आख्यायिका श्लोकरूपेण सूच्यते—'गर्भस्थो ज्ञानसंपन्नो वामदेवो महामुनिः । मतिं चक्रे न जायेय योनिदेशात्तु मातृतः ॥ १ ॥ किंतु पार्श्वादितश्चेति ज्ञात्वा नु जननी स्विदम् । दध्यौ शान्त्यै शचीं देवीमदितिं स्विन्द्रमातरम् ॥ २ ॥ अदितिस्त्विन्द्रसहिता गर्भिणीमभ्यगाद्वने । अदितीन्द्रवामदेवाः संवादमथ चक्रिरे ॥३॥ संवाद इति सूत्रेण कथा सैषात्र सूच्यते। नोक्तो वक्तृविशेषोऽत्र ह्युपदेशेष्वनुक्तितः ॥ ४ ॥ अर्थतस्त्ववगन्तव्यो वक्तृभेद इति स्थितिः । इन्द्रोऽदितिर्ऋषिश्चास्मिन्मिथः सूक्ते समूचिरे ॥५॥ गर्भे शयानं सुचिरं मातुर्गर्भादनिर्गतम् । वामदेवं प्रतिब्रूत आद्ययर्चा शतक्रतुः ॥ ६ ॥ द्वितीयादिभिरर्धैश्चैर्ऋषिरत्राह पञ्चभिः । न ही न्वस्येति सप्त स्युरर्धर्चा अदितेर्वचः ॥ ७ ॥ ममच्चन त्वा युवतिरित्यृचः पञ्च वै मुनेः । दौर्गत्यशान्तिमत्राह वामदेवस्तथान्यया ॥ ८ ॥ एवमर्थाद्वक्तृभेद इति बह्वृचशासनम् । अर्थो विवेकस्पष्टत्वादुपदेशेषु नेरितः ॥ ९ ॥ ऋषिदैवतसिद्ध्यर्थं विवेकादर्थ ईरितः' (अनु. भा. ४. १८) इति ॥

---

१. ख-ग-घ-च-ण-प-फ-भ-'प्रभुः' नास्ति । २. ल-परिदध्यादियम् । ३. त-व्याख्यातेयम्; स-प्राग्व्याख्याता । ४. च-ण-°संवादरूपा ।

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥ १ ॥

अयम् । पन्थाः । अनुऽवित्तः । पुराणः । यतः । देवाः । उत्ऽअजायन्त । विश्वे ।
अतः । चित् । आ । जनिषीष्ट । प्रऽवृद्धः । मा । मातरम् । अमुया । पत्तवे । करिति कः ॥१॥

इन्द्रवाक्यम्[1]। [v]पुराणः अनादिः [v]अयं प्रत्यक्षेणोपलभ्यमानः [v]पन्थाः योनिनिर्गमनरूपो मार्गः [v]अनु आनुपूर्व्येण [v]वित्तः सर्वैर्जायमानैर्लब्धः । [v]यतः यस्माद्योनिमार्गात् [v]विश्वे सर्वे [v]देवाः [v]उदजायन्त उत्कर्षेणोत्पन्ना भवन्ति । तस्माद्योनिमार्गान्मनुष्या उत्पन्ना भवन्तीति[2] किमु[3] वक्तव्यम् । [v]अतश्चित् अस्माद्योनिमार्गादेव [v]प्रवृद्धः गर्भे प्रकर्षेण वृद्धिं गतो वामदेवः [v]आ [v]जनिषीष्ट आ समन्तात् जायताम् । [v]अमुया अमूं [v]मातरं [v]पत्तवे पतनाय । मरणायेत्यर्थः। [v]मा [v]कः मा करोतु ॥

नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥ २ ॥

न । अहम् । अतः । निः । अय । दुःऽगहा । एतत् । तिरश्चता । पार्श्वात् । निः । गमानि ।
बहूनि । मे । अकृता । कर्त्वानि । युध्यै । त्वेन । सम् । त्वेन । पृच्छै ॥ २ ॥

वामदेव एवमुक्तवन्तमिन्द्रं प्रत्याह । [v]अहम् [v]अतः योनिमार्गात् [v]न [v]निरया न निरयाणि । न निर्गच्छानि। [v]एतत् योनिनिर्गमरूपं वर्त्म [v]दुर्गहा दुर्ग्रहम्[4]। दुःखेन[5] ग्राह्यम्[5]। न प्राप्यं भवतीत्यर्थः। किंतु [v]तिरश्चता तिरश्चीनात् [v]पार्श्वात् [v]निर्गमानि निर्गच्छानि । योनिदेशादनिर्गतोऽहं पार्श्वं[6] भित्त्वा निर्गच्छानीत्यर्थः । अन्यैरकृतमिदमेव न केवलं मया क्रियते किंत्वन्यैः अकृतानि[7] [v]बहूनि कर्माणि [v]मे [v]कर्त्वानि कर्तव्यानि सन्ति। [v]त्वेन एकेन सपत्नेन विवदमानेन सह [v]युध्यै युद्धं करवाणि। [v]त्वेन एकेन बुभुत्सुना [v]सं [v]पृच्छै सम्यक् पृच्छानि[8] ॥

परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।
त्वष्टुर्गृहे अपिबत्सोममिन्द्रः शतधन्यं चम्वोः सुतस्य ॥ ३ ॥

पराऽयतीम् । मातरम् । अनु । अचष्ट । न । न । अनु । गानि । अनु । नु । गमानि ।
त्वष्टुः । गृहे । अपिबत् । सोमम् । इन्द्रः । शतऽधन्यम् । चम्वोः । सुतस्य ॥ ३ ॥

---

१. न-ल-स-'इन्द्रवाक्यं' नास्ति । २. ख-ग-घ-च-ण-त-न-भ-स-भवन्ति । ३. ल-किम् । ४. त-दुर्गहम् । ५. न-दुर्ग्रहणीयम् । ६. ख-ग-च-ण-फ-पार्श्वे । ७. ख-ग-च-ण-प-फ-भ-अकृता सपत्नेनाकृतानि । ८. त-पृच्छामि ।

मयि गर्भस्थिते[1] सतीन्द्रो मदीयां [v]मातरं [v]परायतीं परेतां म्रियमाणाम् [v]अन्वचष्ट अन्वब्रवीत् । एवमपि इदानीं गर्भे स्थितोऽहं पुराणं पन्थानं [v]न [v]नानु [v]गानि नानुगच्छानीति न । किंतु [v]नु क्षिप्रम् [v]अनु [v]गमानि अनुगच्छान्येव । वामदेवः स्वकीयमकृत्यकारित्वं परिहृत्येन्द्रस्याकृत्यकारित्वम् उत्तरार्धेन[2] प्रतिपादयति । [v]इन्द्रः [v]चम्वोः सोमाभिपवफलकयोः [v]सुतस्य सोमं सुतवतोऽभिषुतवतः [v]त्वष्टुः संबधिनि [v]गृहे अनुपहूतः सन् [v]शतधन्यं बहुधनेन क्रीतं [v]सोमम् [v]अपिबत् बलात्कारेण सोमस्य पानं कृतवान् । अयमर्थस्तैत्तिरीयैः 'त्वष्टा हतपुत्रो वीन्द्रं सोममाहरत्' (तै. सं. २. ४. १२. १) इत्यनुवाके महता प्रबन्धेन प्रपञ्चितः ॥

किं स ऋधक्कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः ।
नही न्वस्य प्रतिमानमस्त्यन्तर्जातेषुत ये जनित्वाः ॥ ४ ॥

किम् । सः । ऋधक् । कृणवत् । यम् । सहस्रम् । मासः । जभार । शरदः । च । पूर्वीः ।
नहि । नु । अस्य । प्रतिऽमानम् । अस्ति । अन्तः । जातेषु । उत । ये । जनिऽत्वाः ॥ ४ ॥

अदितिः [v]यम् इन्द्रं [v]सहस्रं बहून् [v]मासः मासान् [v]पूर्वीः बह्वीः [v]शरदश्च संवत्सरांश्च [v]जभार बभार ॥ बिभर्तेरिदं रूपम् ॥ गर्भे स्थित इन्द्रो बहुषु संवत्सरेष्वदितिं क्लेशितवानित्यर्थः । एवंभूतः [v]सः इन्द्रः [v]किं यत्[3] किमपि । सर्वमपीत्यर्थः । [v]ऋधक् विरुद्धं कर्म [v]कृणवत् अकरोत् । इन्द्रस्य आक्षेपम्[4] असहमानादितिरिन्द्रमातापि एनं प्रति ब्रूते । हे वामदेव [v]जातेषु उत्पन्नेषु देवादिषु[5] [v]अन्तः मध्ये [v]अस्य इन्द्रस्य [v]प्रतिमानम् उपमानं[6] [v]नहि [v]अस्ति न विद्यते खलु । [v]नु[7] इति पादपूरणार्थः[8] । [v]उत अपि च [v]ये देवादयः [v]जनित्वाः जनयितव्या जनयिष्यमाणास्तेषु मध्येऽस्येन्द्रस्य प्रतिमानं नास्ति ॥

अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येण न्यृष्टम् ।
अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥ ५ ॥

अवद्यम्ऽइव । मन्यमाना । गुहा । अकः । इन्द्रम् । माता । वीर्येण । निऽऋष्टम् ।
अथ । उत् । अस्थात् । स्वयम् । अत्कम् । वसानः ।
आ । रोदसी इति । अपृणात् । जायमानः ॥ ५ ॥

[v]गुहा गुहायां गह्वररूपे सूतिकागृहे जातम् [v]इन्द्रम् [v]अवद्यमिव गर्हमिव[9] [v]मन्यमाना जानती [v]माता इन्द्रजनन्यदितिः [v]वीर्येण सामर्थ्येन [v]न्यृष्टं नितरां प्राप्तम् [v]अकः अकरोत् । [v]अथ अनन्तरं

---

१. त–गर्भस्थे । २. त–उत्तरार्धेन । ३. ख-ग-च-न-भ-स–कियत् । ४. ख-ग-च-ण–क्षेपणम् । ५. ख-ग-घ-च-ण-न-भ-ल-स–'देवादिषु' नास्ति । ६. ख-ग-च-ण-न-भ–'उपमानं' नास्ति । ७. ख-ग-च-न-भ-स– हि । ८. त-ल–पूरणार्थः । ९. ख-ग-घ-च-ण-त-न-प-फ-भ-ल-स–'गर्हामिव' नास्ति ।

vजायमानः उत्पद्यमान इन्द्रः vस्वयम् एव[१] vअत्कं तेजः vवसानः आच्छादकः सन् । दधान इत्यर्थः । vउदस्थात् उत्कर्षेण अतिष्ठत्[२] । किंच vरोदसी द्यावापृथिव्यौ vआ vअपृणात् समन्तात् पूरयामास[३] ॥ ॥ २५ ॥

एता अर्षन्त्यललाभवन्तीर्ऋतावरीरिव संक्रोशमानाः ।
एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति ॥ ६ ॥

एताः । अर्षन्ति । अललाऽभवन्तीः । ऋतवरीःऽइव । सम्ऽक्रोशमानाः ।
एताः । वि । पृच्छ । किम् । इदम् । भनन्ति । कम् । आपः । अद्रिम् । परिऽधिम् । रुजन्ति ॥६॥

vअललाभवन्तीः अललेत्येवंरूपं शब्दं कुर्वत्यः vऋतावरीरिव उदकवत्य एव vएताः नद्यः vसंक्रोशमानाः इन्द्रमहत्त्वप्रतिपादकोद्भूतेन हर्षेण बहुविधं शब्दायमानाः सत्यः vअर्षन्ति गच्छन्ति । एवंभूता नद्यः vइदं vकिं vभनन्ति श्रोत्रग्राह्यं शब्दायमानं किं वदन्तीममर्थं हे ऋषे त्वम् vएताः नदीः vवि vपृच्छ विशेषेण पृष्टवान् भव । एवं संपृच्छ । विचारिते सति एतच्छब्दायमानमिन्द्रमाहात्म्यस्यैव वचनं भवतीत्यर्थः । किंच vआपः उदकानि vपरिधिम् आवरकं vकम् vअद्रिं कं मेघं vरुजन्ति भञ्जन्ति । आपः कमपि मेघं न भञ्जन्ति किंतु इन्द्रो मम पुत्र एव उदकावरकं[४] मेघं भङ्क्त्वा आपः प्रवर्तयतीत्यर्थः ॥

किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः ।
ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून् ॥ ७ ॥

किम् । ऊँ इति । स्वित् । अस्मै । निऽविदः । भनन्त । इन्द्रस्य । अवद्यम् । दिधिषन्ते । आपः ।
मम । एतान् । पुत्रः । महता । वधेन । वृत्रम् । जघन्वान् । असृजत् । वि । सिन्धून् ॥ ७ ॥

यदेन्द्रो वृत्रासुरं हतवान् तदा शाश्वतीं ब्रह्महत्यां प्राप्तवानिति वामदेवस्याभिप्रायमुक्त्वा अदितिः आह । vनिविदः । मरुत्वतीयशस्त्रे प्रयुज्यमानानि ' मरुत्स्तोत्रो मरुद्गणः ' इत्यादीनीन्द्रस्तुतिप्रतिपादकानि कानिचित् पदानि निविच्छब्देनोच्यन्ते । ता निविदः vअस्मै इमं वृत्रवधनिमित्तं ब्रह्महत्यारूपं पापं प्राप्तवन्तमिन्द्रं vकिमु vस्वित् vभनन्त भनन्ति । किं वदन्तीति चेत् । तर्हि इन्द्रं[५] पापरहितं मत्वा निविदः स्तुवन्ति । कथमिन्द्रस्य पापरहितत्वम् । उच्यते । vआपः फेनरूपेणास्य vइन्द्रस्य vअवद्यं ब्रह्महत्यादिरूपं पापं vदिधिषन्ते धारयन्ति । vमम vपुत्रः मदीयः पुत्र इन्द्रः[६] vमहता प्रभूतेन vवधेन । वध इति वज्रनामैतत् । वज्रेण vवृत्रं vजघन्वान् हतवान् । ततः vएतान् सिन्धून् उदकानि vवि vअसृजत् विशेषेण स्वैरत्वेन सर्तुं[७] सृष्टवान्[७] । इन्द्रेणोत्सृष्टा आपस्तस्य पापं जगृहुरित्यर्थः ॥

१. त-ल-स-' एव ' नास्ति । २. त-तिष्ठति । ३. ण-पूरयामास इति । ४. त-उदकावारकम् । ५. ख-ग-घ-च-ण-न-म-स-' इन्द्रं ' नास्ति । ६. त- यः इन्द्रः । ७. ण-समुत्सृष्टवान् ।

मर्मज्जन त्वा युवतिः परास मर्मज्जन त्वा कुषवा जगार ।
मर्मज्जिदापः शिशवे ममृडयुर्मर्मज्जिदिन्द्रः सहसोदतिष्ठत् ॥ ८ ॥

मर्मत्। चन। त्वा। युवतिः। पराऽआस। मर्मत्। चन। त्वा। कुषवा। जगार।
मर्मत्। चित्। आपः। शिशवे। ममृडयुः।
मर्मत्। चित्। इन्द्रः। सहसा। उत्। अतिष्ठत् ॥ ८ ॥

सूक्तशेषेण ऋषिरिन्द्रं स्तौति । हे इन्द्र [v]ममज्जन माद्यन्त्येव । प्रमत्तैवेत्यर्थः । [v]युवतिः स्वदीया मातादितिः [v]त्वा त्वां [v]परास पराचिक्षेप । किंच कुषवानाम्नी काचित्[1] राक्षसी सा [v]ममज्जन प्रमत्तैव [v]त्वा त्वां [v]जगार गिरति स्म । हे इन्द्र [v]ममज्जित् प्रमाद्यन्त्य एव [v]आपः [v]शिशवे जाताय तुभ्यं [v]ममृडयुः सुखयांचक्रुः[2] । [v]ममज्जित् माद्यन्नेव [v]इन्द्रः [v]सहसा स्वेन वीर्येण[3] [v]उदतिष्ठत् सूतिकागृहात् राक्षसीं बाधमानः सन् उत्कर्षेण तस्थौ ॥

मर्मज्जन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥ ९ ॥

मर्मत्। चन। ते। मघऽवन्। विऽअंसः। निऽविविध्वान्। अप। हनू इति। जघान।
अध। निऽविद्धः। उत्ऽतरः। बभूवान्। शिरः। दासस्य। सम्। पिणक्। वधेन ॥ ९ ॥

हे [v]मघवन् धनवन्निन्द्र [v]ममज्जन प्रमाद्यन्नेव व्यंसो नाम राक्षसः [v]निविविध्वान् प्रविध्यन् [v]ते [v]हनू त्वदीये हनू मुखपार्श्वे [v]अप [v]जघान अपहतवान् । [v]अध अथानन्तरं हे[4] इन्द्र [v]निविद्धः[5] राक्षसेन ताडितः त्वम्[5] [v]उत्तरः व्यंसादधिकबलः [v]बभूवान् भूतः सन् [v]दासस्य क्षीणस्य व्यंसस्य [v]शिरः [v]वधेन वज्रेण [v]सं [v]पिणक् पिष्टवानसि ॥

गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम् ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्वे इच्छमानम् ॥ १० ॥

गृष्टिः। ससूव। स्थविरम्। तवागाम्। अनाधृष्यम्। वृषभम्। तुम्रम्। इन्द्रम्।
अरीळ्हम्। वत्सम्। चरथाय। माता। स्वयम्। गातुम्। तन्वे। इच्छमानम् ॥ १० ॥

---

१. ख-ग-घ-च-ण-न-भ-स-'काचित्' नास्ति । २. ख-ग-घ-च-ण-भ-सुखं चक्रुः । ३. त-ल-वीर्येण सह । ४. ख-ग-च-फ-निविद्धः स्वेच्छया हे इन्द्र; घ-ण-निविद्धः स्वेच्छया; प-भ-हे इन्द्र निविद्धः स्वेच्छया; स-हे इन्द्र । ५. ण-त्वं हे इन्द्र ।

[v]गृष्टिः काचित् गौः [v]वत्सं यथा [v]ससूव सुषुवे। तथा [v]माता इन्द्रजनन्यदितिः [v]चरथाय[1] स्वेच्छया संचरणाय इन्द्रं ससूव[2] सुषुवे। कीदृशमिन्द्रम्। [v]स्थविरं वयसा प्रवृद्धं [v]तवागां प्रवृद्धबलम् [v]अनाधृष्यं शत्रुभिरनभिभाव्यं [v]वृषभं सेचनसमर्थं [v]तुत्रं प्रेरकम् [v]अरीळ्हं शत्रुभिरनभिभूतं [v]स्वयं [v]गातुम् अन्यनिरपेक्षगमनं [v]तन्वे स्वशरीराय[3] [v]इच्छमानम् इच्छन्तम्॥

उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः।
अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व॥ ११॥

उत। माता। महिषम्। अनु। अवेनत्। अमी इति। त्वा। जहति। पुत्र। देवाः।
अथ। अब्रवीत्। वृत्रम्। इन्द्रः। हनिष्यन्। सखे। विष्णो इति। विऽतरम्। वि। क्रमस्व॥११॥

[v]उत अपि च हे मदीय [v]पुत्र इन्द्र [v]अमी वह्न्यादयः [v]देवाः [v]त्वा त्वां [v]जहति त्यजन्ति। इत्युक्तवतीन्द्रस्य [v]माता अदितिः इन्द्रं [v]महिषं महान्तम्। महिष इति महन्नामैतत्। [v]अन्ववेनत् अयाचत। [v]अथ अनन्तरं हे [v]विष्णो व्यापनशील हे [v]सखे मित्रभूत हरे त्वं [v]वृत्रं [v]हनिष्यन् हन्तुम् इच्छन् [v]वितरं [v]वि [v]क्रमस्व अतिपराक्रमी भव इति [v]इन्द्रः विष्णुम् [v]अब्रवीत् उवाच॥

कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम्।
कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य॥ १२॥

कः। ते। मातरम्। विधवाम्। अचक्रत्। शयुम्। कः। त्वाम्। अजिघांसत्। चरन्तम्।
कः। ते। देवः। अधि। मार्डीके। आसीत्। यत्। प्र। अक्षिणाः। पितरम्। पादऽगृह्य॥१२॥

हे इन्द्र [v]यत् यस्मात् कारणात् पितुः सकाशात् जनिष्यमाणात् भीतस्त्वं त्वदीयं [v]पितरं [v]पादगृह्य पादेषु गृहीत्वा [v]प्राक्षिणाः प्रकर्षेणावधीः। तस्मात् कारणात् [v]ते त्वत्तोऽन्यः [v]कः देवः [v]मातरं स्वकीयजननीं [v]विधवां पितृवधेन पतिरहिताम् [v]अचक्रत् अकरोत्। [v]कः त्वत्तोऽन्यः [v]शयुं शयानं [v]चरन्तं जाग्रतं वा [v]त्वाम् [v]अजिघांसत् हन्तुमैच्छत्। [v]ते त्वत्तोऽन्यः [v]कः [v]देवः [v]मार्डीके प्रजानां सुखकरणे [v]अधि अधिकः [v]आसीत्। अयमर्थः 'ऋक्सामे वै देवेभ्यः' (तै. सं. ६. १. ३. ६) इत्यनुवाके 'यज्ञो दक्षिणामभ्यध्यायत्' इत्यादिब्राह्मणेन तैत्तिरीयकैर्बहुधा प्रपञ्चितः॥

---

१. ख-ग-घ-च-ण-भ-वत्सं चरथाय; त-ल-संचरथाय। २. त-सुषुव। ३. ख-ग-घ-च-ण-त-न-भ-स-शरीराय।

अवर्त्या शुनं आन्त्राणि पेचे न देवेषु विविदे मर्डितारम् ।
अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार ॥ १३ ॥

अवर्त्या । शुनः । आन्त्राणि । पेचे । न । देवेषु । विविदे । मर्डितारम् ।
अपश्यम् । जायाम् । अमहीयमानाम् । अध । मे । श्येनः । मधु । आ । जभार ॥ १३ ॥

अनया वामदेवः स्वकीयं दारिद्र्यं सूचयन्निन्द्रस्योत्कर्षमाह । वामदेवोऽहम् vअवर्त्या जीवनोपायराहित्येन vशुनः शुनकसंबन्धीनि vआन्त्राणि पुरीतन्ति vपेचे अपचम् । vदेवेषु द्योतमानेषु वह्न्यादिषु मध्ये इन्द्रादन्यं vमर्डितारं सुखयितारं vन vविविदे न लेभे । किंच vजायां स्वकीयां भार्याम् vअमहीयमानाम् अश्लाघनीयाम् vअपश्यम् अद्राक्षम् । vअध अथानन्तरं vश्येनः श्येनवच्छीघ्रगामीन्द्रः vमे मह्यं vमधु मधुरोपेतमुदकम् vआ vजभार आजहार ॥ ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके पञ्चमोऽध्यायः संपूर्णः[१] ॥

१. च-ल-समाप्तः ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

व्याख्यातः पञ्चमोऽध्यायस्तृतीयाष्टक[1] आदरात् ।
धीमता सायणाख्येन[2] षष्ठोऽध्यायोऽथ वर्ण्यते ॥

चतुर्थे मण्डले द्वितीयेऽनुवाकेऽष्ट सूक्तानि व्याख्यातानि । ' एवा त्वामिन्द्र ' इत्येकादशर्चं नवमं सूक्तम् । तस्य मण्डलादिपरिभाषया वामदेव ऋषिः । अनादेशपरिभाषया त्रिष्टुप् छन्दः । इन्द्रो देवता । तथा चानुक्रान्तम्–' एवैकादश ' इति । अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे इदं सूक्तम् । सूत्र्यते हि–' एवा त्वामिन्द्रोशन्नु षु णः सुमना उपाक इति याज्या ' (आश्व. श्रौ. ५. १६) इति । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि मैत्रावरुणशस्त्रे अहीनसूक्तं[3] तत्स्थाने[3] त्रीणि संपातसूक्तानि । तत्रेदं प्रथमं सूक्तम् । सूत्रितं च—' एवा त्वामिन्द्र यज्ञ इन्द्रः ' (आश्व. श्रौ. ७. ५) इति ॥

एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।
महामुभे रोदसी वृद्धमृष्वं निरेकमिद्दृणते वृत्रहत्ये ॥ १ ॥

एव । त्वाम् । इन्द्र । वज्रिन् । अत्र । विश्वे । देवासः । सुऽहवासः । ऊमाः ।
महाम् । उभे इति । रोदसी इति । वृद्धम् । ऋष्वम् ।
निः । एकम् । इत् । वृणते । वृत्रऽहत्ये ॥ १ ॥

[v]अत्र अस्मिन् यज्ञे[4] [v]वज्रिन् हे वज्रवन् [v]इन्द्र [v]सुहवासः सुहवाः शोभनाह्वामाः [v]ऊमाः रक्षकाः [v]विश्वे [v]देवासः सर्वे देवाः [v]उभे [v]रोदसी द्यावापृथिव्यौ च [v]एव[5] एवमुक्तप्रकारेण स्तूयमानं [v]महां महान्तं प्रभूतं [v]वृद्धं गुणैः प्रवृद्धम् [v]ऋष्वं दर्शनीयं [v]त्वाम् [v]एकमित् एकमेव [v]वृत्रहत्ये वृत्रहननार्थं [v]निः [v]वृणते निःशेषेण संभजन्ते ॥

अवासृजन्त्सतवे न देवा भुवः सम्राळिन्द्र सत्ययोनिः ।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥ २ ॥

अव । असृजन्त । जिव्रयः । न । देवाः । भुवः । सम्ऽराट् । इन्द्र । सत्यऽयोनिः ।
अहन् । अहिम् । परिऽशयानम् । अर्णः । प्र । वर्तनीः । अररदः । विश्वऽधेनाः ॥ २ ॥

१. ख–पञ्चमाध्याय° । २. त–सायणार्येण । ३. ल–अहीनसूक्तस्थाने । ४. त-ल– लोके । ५. ख-ग-घ-च-ण-भ-स–' एव ' नास्ति ।

हे [v]इन्द्र [v]देवाः त्वां[1] [v]जिव्रयो [v]न जीर्णाः प्रवृद्धाः पितरो यूनः पुत्रानिव [v]अवासृजन्त असुरवधार्थं प्रैरयन्। ततो हे इन्द्र [v]सत्ययोनिः सत्यनिवासस्त्वं [v]सम्राट् सर्वेषां लोकानामधीश्वरः [v]भुवः अभवः। [v]अर्णः उदकं लक्षीकृत्य [v]परिशयानं परितः समन्तात् शयनं कुर्वन्तम् [v]अहिं वृत्रासुरम् [v]अहन् अवधीः। [v]विश्वधेनाः विश्वस्य प्रीणयित्रीः [v]वर्तनीः सर्वत्र प्रवर्तिका नदीः[2] [v]प्र [v]अरदः प्रकर्षेण विलेखनं कृतवानसि। इन्द्रो वृत्रं हत्वा तेनावृतान्युदकानि प्रवाहरूपेण प्रवर्तयतीत्यर्थः॥

अतृप्णुवन्तं वियतमबुध्यमबुध्यमानं सुषुपाणमिन्द्र।
सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन्॥ ३॥

अतृप्णुवन्तम्। विऽयतम्। अबुध्यम्। अबुध्यमानम्। सुषुपानम्। इन्द्र।
सप्त। प्रति। प्रऽवतः। आऽशयानम्। अहिम्। वज्रेण। वि। रिणाः। अपर्वन्॥ ३॥

हे [v]इन्द्र त्वम् [v]अतृप्णुवन्तं भोगेषु अतृप्यन्तं [v]वियतं शिथिलाङ्गम् [v]अबुध्यं दुर्विज्ञानम् [v]अबुध्यमानं किमप्यजानन्तं [v]सुषुपाणं सुप्तं [v]सप्त सर्पणस्वभावाः [v]प्रवतः अपः [v]प्रति[3] [v]आशयानम् आवृत्य तिष्ठन्तम् [v]अहिं वृत्रम् [v]अपर्वन् अपर्वणि[4] पौर्णमास्यां [v]वज्रेण [v]वि [v]रिणाः व्यरिणाः। विशेषेण हतवानसि। पौर्णमास्यां वृत्रवधः 'त्वष्टा हतपुत्रः' इत्यनुवाके 'घ्नन्ति वा एनं पौर्णमास आमावास्यायां प्याययन्ति' (तै. सं. २. ५. २. ५) इति तैत्तिरीयेऽपि उक्तः[5]॥

अक्षोदयच्छवसा क्षामं बुध्नं वाणं वातस्तविषीभिरिन्द्रः।
दृळ्हान्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानाम्॥ ४॥

अक्षोदयत्। शवसा। क्षामं। बुध्नम्। वाः। न। वातः। तविषीभिः। इन्द्रः।
दृळ्हानि। औभ्नात्। उशमानः। ओजः। अव। अभिनत्। ककुभः। पर्वतानाम्॥ ४॥

[v]इन्द्रः परमैश्वर्ययुक्तः [v]शवसा बलेन [v]बुध्नम् अन्तरिक्षं [v]क्षाम क्षीणोदकम् [v]अक्षोदयत् संपिपेष। तत्र दृष्टान्तः। [v]वातः वायुः [v]तविषीभिः बलैः [v]वाणं उदकमिव तद्वत्। किंच [v]ओजः बलम् [v]उशमानः कामयमान इन्द्रः [v]दृळ्हानि दृढानि स्थिराण्यप्यभ्राणि [v]औभ्नात् अभाङ्क्षीत्। तथा [v]पर्वतानां गिरीणां [v]ककुभः पक्षान् [v]अवाभिनत् अत्यन्तमभैत्सीत्॥

अभि प्र दद्रुर्जनयो न गर्भं रथाइव प्र ययुः साकमद्रयः।
अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इन्द्र सिन्धून्॥ ५॥

अभि। प्र। दद्रुः। जनयः। न। गर्भम्। रथाःऽइव। प्र। ययुः। साकम्। अद्रयः।
अतर्पयः। विऽसृतः। उब्जः। ऊर्मीन्। त्वम्। वृतान्। अरिणाः। इन्द्र। सिन्धून्॥ ५॥

---

१. ख-ग-घ-च-ण-न-प-फ-भ-ल-स-'त्वां' नास्ति। २. ख-ग-घ-च-ण-त-भ-आपस्तासाम्; न-स-'नदीः' नास्ति। ३. त-न-ल-स-'प्रति' नास्ति। ४. ल-पर्वणि। ५. ख-ग-च-ण-न-भ-स-उक्तम्।

हे [v]इन्द्र त्वाम् [v]अद्रयः मरुतः [v]जनयः जनन्यः [v]गर्भं [v]न पुत्रमिव [v]अभि [v]प्र [v]ददुः अभिजग्मुः । किंच [v]रथाइव रंहणशीला रथा यथा तथा वृत्रवधार्थं त्वया [v]साकं [v]प्र [v]ययुः प्रकर्षेण अयासिषुः । हे[1] इन्द्र त्वं [v]विसृतः विसरणशीला नदीः [v]अतर्पयः अद्रिरपूरयः । तथा [v]ऊर्मीन् मेघान् [v]उब्जः अवधीः । तथा [v]त्वं [v]वृतान् वृत्रेणावृतान्[2] [v]सिन्धून् अपः [v]अरिणाः प्रैरयः ॥ ॥ १ ॥

त्वं महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम् ।
अरमयो नमसैजदर्णः सुतरणाँ अकृणोरिन्द्र सिन्धून् ॥ ६ ॥

त्वम् । महीम् । अवनिम् । विश्वऽधेनाम् । तुर्वीतये । वय्याय । क्षरन्तीम् ।
अरमयः । नमसा । एजत् । अर्णः । सुऽतरणान् । अकृणोः । इन्द्र । सिन्धून् ॥ ६ ॥

हे इन्द्र [v]त्वं [v]महीं महतीं [v]विश्वधेनां विश्वस्य प्रीणयित्रीं [v]तुर्वीतये तुर्वीतिनाम्ने राज्ञे [v]वय्याय वय्यनाम्ने च [v]क्षरन्तीम् अभीष्टान् कामान् दुहतीम् [v]अवनिं भूमिं [v]नमसा अन्नेन [v]एजत् एजता चलता [v]अर्णः अर्णसोदकेन च [v]अरमयः रमयसि । इन्द्रः पृथिवीमन्नोदकसमृद्धां करोतीत्यर्थः । किंच हे [v]इन्द्र त्वं [v]सिन्धून् जलानि [v]सुतरणान् सुष्ठु तीर्णानि [v]अकृणोः अकार्षीः ॥

प्राग्रुवो नभन्वो३ न वक्वा ध्वस्रा अपिन्वद्युवतीर्ऋतज्ञाः ।
धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिन्द्रः स्तर्यो३ दंसुपत्नीः ॥ ७ ॥

प्र । अग्रुवः । नभन्वः । न । वक्वाः । ध्वस्राः । अपिन्वत् । युवतीः । ऋतऽज्ञाः ।
धन्वानि । अज्रान् । अपृणक् । तृषाणान् । अधोक् । इन्द्रः । स्तर्यः । दम्ऽसुपत्नीः ॥ ७ ॥

इन्द्रः [v]नभन्वः शत्रूणां हिंसिकाः [v]वक्वाः [v]न सेना इव [v]ध्वस्राः कूलानां ध्वंसिकाः [v]युवतीः अद्भिर्मिश्रिताः [v]ऋतज्ञाः ऋतस्यान्नस्य जनयित्रीः [v]अग्रुवः । अग्रुव इति नदीनामैतत् । अग्रगामिनीः नदीः [v]प्र [v]अपिन्वत् प्रकर्षेणापूरयत् । तथा [v]धन्वानि निर्जलानुन्नतान् देशांश्च वृष्ट्या [v]अपृणक् अपूरयत् । तथा [v]अज्रान् मार्गस्य गन्तॄन् [v]तृषाणान् पिपासया युक्तान् पुरुषान् अपृणक् अपूरयत् । किंच [v]इन्द्रः [v]दंसुपत्नीः दमनपरा असुराः सुष्ठु पतयो यासां ताः [v]स्तर्यः स्तरीर्निवृत्तप्रसवा गाः [v]अधोक् अधुक्षत्[3] । इन्द्रो राक्षसकृतनिरोधदुःखात् निरुद्धप्रसवा अपि गा विमुच्य सप्रसवाश्चकारेत्यर्थः ॥

पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिन्धून् ।
परिष्ठिता अतृणद्बद्बधानाः सीरा इन्द्रः स्रवितवे पृथिव्या ॥ ८ ॥

पूर्वीः । उषसः । शरदः । च । गूर्ताः । वृत्रम् । जघन्वान् । असृजत् । वि । सिन्धून् ।
परिऽस्थिताः । अतृणत् । बद्बधानाः । सीराः । इन्द्रः । स्रवितवे । पृथिव्या ॥ ८ ॥

---

१. ग-च-ण-स-'हे' नास्ति । २. ख-ग-घ-च-ण-न-प-फ-भ-ळ-स-'वृत्रेणावृतान्' नास्ति ।
३. त-अधुक्षत ।

[v]वृत्रं वृत्राख्यमसुरं [v]जघन्वान् हतवानिन्द्रः [v]गूर्ताः तमिस्रया गीर्णाः [v]पूर्वीः बह्वीः [v]उषसः [v]शरदश्च संवत्सरांश्च [v]वि [v]असृजत् विशेषेण समर्ज । तथा [v]सिन्धून् वृत्रेणावृतान्युदकानि [v]असृजत् । किंच [v]इन्द्रः [v]परिष्ठिताः मेघेषु परितः स्थिताः [v]बद्बधानाः वृत्रेण परितो बध्यमानाः [v]सीराः नदीः । सीरा इति नदीनामैतत् । [v]पृथिव्या पृथिवीरूपेण मार्गेण [v]स्रवितवे स्रवितुं गमनार्थम् [v]अतृणत् अविध्यत् ॥

वज्रीभिः पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ ।
व्यन्धो अख्यदहिमाददानो निर्भूदुखच्छित्समरन्त पर्व ॥ ९ ॥

वज्रीभिः । पुत्रम् । अग्रुवः । अदानम् । निऽवेशनात् । हरिऽवः । आ । जभर्थ ।
वि । अन्धः । अख्यत् । अहिम् । आऽददानः ।
निः । भूत् । उखऽछित् । सम् । अरन्त । पर्व ॥ ९ ॥

हे [v]हरिवः हरिसंज्ञकाश्वोपेतेन्द्र त्वं [v]वज्रीभिः उपजिह्विकाभिः [v]अदानम् अद्यमानम् [v]अग्रुवः । अग्रू नाम काचित् । तस्याः [v]पुत्रं [v]निवेशनात् वल्मीकाख्यात् स्थानात् [v]आ [v]जभर्थ आहृतवानसि । [v]आददानः इन्द्रेणाहियमाणोऽग्रुवः पुत्रः [v]अन्धः पूर्वमन्धः सन् [v]अहिं सर्पं [v]वि [v]अख्यत् विशेषेण अपश्यत् । ततः [v]निर्भूत् वल्मीकान्निर्गतः अभूत्[1] । [v]उखच्छित् वल्मीकाख्याया उखायाश्छेदकानि [v]पर्व पर्वाणि अस्य सर्वाण्यङ्गानां शिथिलानि पर्वाणि [v]समरन्त समगच्छन्त । उपजिह्विकाभिः शिथिलीकृतानि अग्रुवः पुत्रस्य पर्वाणीन्द्रेण समधीयन्तेत्यर्थः ॥

प्र ते पूर्वाणि करणानि विप्राविद्वाँ आह विदुषे करांसि ।
यथायथा वृष्ण्यानि स्वगूर्तापांसि राजन्नर्याविवेषीः ॥ १० ॥

प्र । ते । पूर्वाणि । करणानि । विप्र । आऽविद्वान् । आह । विदुषे । करांसि ।
यथाऽयथा । वृष्ण्यानि । स्वऽगूर्ता । अपांसि । राजन् । नर्या । अविवेषीः ॥ १० ॥

हे [v]राजन् राजमानेन्द्र [v]वृष्ण्यानि वर्षणयोग्यानि [v]स्वगूर्ता स्वगूर्तानि स्वयमुद्गीर्णानि [v]नर्या नर्याणि मनुष्यहितानि [v]अपांसि त्वत्संबन्धीनि कर्माणि [v]यथायथा [v]अविवेषीः व्याप्नोः । अकार्षीरिति यावत् । तथातथा हे [v]विप्र प्राज्ञेन्द्र [v]विदुषे विदुषः सर्वं जानतः [v]ते त्वत्संबन्धीनि [v]पूर्वाणि पुरातनानि [v]करणानि कर्माणि [v]आविद्वान् आ समन्ताज्जानन् वामदेवः [v]करांसि त्वदीयानि कर्माणि [v]प्र प्रकर्षेण [v]आह ब्रवीति ॥

---

१. त–अभवत् ।

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

हे ᵛइन्द्र ᵛनु क्षिप्रं ᵛस्तुतः पूर्वैर्ऋषिभिः संस्तुतः ᵛनु क्षिप्रं ᵛगृणानः अस्माभिः स्तूयमानः त्वम् ᵛइषम् अन्नं ᵛजरित्रे स्तोत्रे मह्यं ᵛनद्यो ᵛन अद्रिर्नदीरिव ᵛपीपेः प्याययः । प्रवृद्धं कुरु । हे ᵛहरिवः हरिसंज्ञकाश्वोपेतेन्द्र ᵛते तुभ्यं ᵛनव्यं नवतरं ᵛब्रह्म स्तोत्रम् ᵛअकारि अस्माभिः क्रियते[1] । ᵛरथ्यः रथवन्तो वयं ᵛधिया प्रज्ञारूपया स्तुत्या ᵛसदासाः त्वां सर्वदा भजमानास्त्वदर्थं हवीरूपस्यान्नस्य दातारो वा ᵛस्याम भूयास्म ॥ ॥ २ ॥

' आ न इन्द्रः ' इत्येकादशर्चं दशमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम् । ' आ नः ' इत्यनुक्रमणिका । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि निष्केवल्ये एतन्निविद्धानीयम् । सूत्रितं च—' आ न इन्द्र इति निष्केवल्यम् ' (आश्व. श्रौ. ७. ५) इति । महाव्रतेऽप्येतत् संपातसूक्तम् । तथैव पञ्चमारण्यके सूत्रितं च—' आ न इन्द्रो दूरादा न आसादिति संपातः ' (ऐ. आ. ५. २. २) इति ॥

आ नू इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥ १ ॥

आ । नः । इन्द्रः । दूरात् । आ । नः । आसात् । अभिष्टिऽकृत् । अवसे । यासत् । उग्रः ।
ओजिष्ठेभिः । नृऽपतिः । वज्रऽबाहुः । सम्ऽगे । समत्ऽसु । तुर्वणिः । पृतन्यून् ॥ १ ॥

ᵛअभिष्टिकृत् यजमानसंबन्धिनामभीष्टानां कर्ता ᵛउग्रः तेजस्वी ᵛइन्द्रः ᵛनः अस्माकम् ᵛअवसे रक्षणाय ᵛदूरात् ᵛआ ᵛयासत् आयातु आगच्छतु । अपि च ᵛआसात् आसन्नादन्तिकाच्च ᵛनः अस्माकमवसे रक्षणाय ᵛआ यासत् आयातु । कीदृशः । ᵛसमत्सु संग्रामेषु ᵛसंगे शत्रुभिः संयोगे सति ᵛपृतन्यून् शत्रून् ᵛतुर्वणिः हिंसन् ᵛवज्रबाहुः वज्रहस्तः ᵛनृपतिः वृष्टिद्वारा नृणां मनुष्याणां पालकः ᵛओजिष्ठेभिः अतिशयेन तेजस्विभिः मरुद्भिर्युक्त इति शेषः ॥

आ नु इन्द्रो हरिभिर्यात्वच्छावार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥ २ ॥

आ । नः । इन्द्रः । हरिऽभिः । यातु । अच्छ । अर्वाचीनः । अवसे । राधसे । च ।
तिष्ठाति । वज्री । मघऽवा । विऽरप्शी । इमम् । यज्ञम् । अनु । नः । वाजऽसातौ ॥ २ ॥

१. ल–अक्रियत ।

ᵛअर्वाचीनः अस्मदभिमुखः ᵛइन्द्रः ᵛअवसे अस्मदीयाय रक्षणाय ᵛराधसे ᵛच धनाय च ᵛनः ᵛअच्छ अस्मान् अभि[1] लक्षीकृत्य[1] ᵛहरिभिः अश्वैः सह ᵛआ ᵛयातु आगच्छतु । किंच ᵛवज्री वज्रवान् ᵛमघवा धनवान् ᵛविरप्शी महान्[2] । विरप्शीति महन्नामसु पाठात् । अस्मदीयस्य कर्मणो द्वेष्टृभिरसुरादिभिः सह ᵛनः अस्माकं ᵛवाजसातौ युद्धे प्राप्ते सति ᵛइमम् अस्मदीयं ᵛयज्ञम् ᵛअनु उद्दिश्य ᵛतिष्ठाति तिष्ठतु ॥

इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः ।
श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम ॥ २ ॥

इमम् । यज्ञम् । त्वम् । अस्माकम् । इन्द्र । पुरः । दधत् । सनिष्यसि । क्रतुम् । नः ।
श्वघ्नीऽइव । वज्रिन् । सनये । धनानाम् । त्वया । वयम् । अर्यः । आजिम् । जयेम ॥ २ ॥

हे ᵛइन्द्र ᵛत्वं ᵛनः अस्मान् ᵛपुरो ᵛदधत् पुरस्कृतान् कुर्वन् ᵛअस्माकं ᵛक्रतुं क्रियमाणम् ᵛइमं ᵛयज्ञं ᵛसनिष्यसि संभजिष्यसि । अपि च ᵛश्वघ्नीव मृगयुर्मृगानिव हे ᵛवज्रिन् वज्रवन्निन्द्र ᵛत्वया ᵛअर्यः अरयः स्तोतारः ᵛवयं ᵛधनानां पश्वादिधनानां ᵛसनये लाभाय ᵛआजिं शत्रुसंबन्धिनं संग्रामं ᵛजयेम संजीयास्म[3] ॥

अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणस्य ' उशन्नु षु णः ' इति शस्त्रयाज्या । सूत्रितं च –' उशन्नु षु णः सुमना उपाक इति याज्या ' (आश्व. श्रौ. ५. १६) इति ॥

उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।
पा इन्द्र प्रतिभृतस्य मध्वः समन्धसा ममदः पृष्ठ्येन ॥ ४ ॥

उशन् । ऊँ इति । सु । नः । सुऽमनाः । उपाके । सोमस्य । नु । सुऽसुतस्य । स्वधाऽवः ।
पाः । इन्द्र । प्रतिऽभृतस्य । मध्वः । सम् । अन्धसा । ममदः । पृष्ठ्येन ॥ ४ ॥

हे ᵛस्वधावः अन्नवन् ᵛइन्द्र ᵛसुमनाः शोभनमनस्कस्त्वम् ᵛउपाके समीपे ᵛनः अस्मान् ᵛउशन्नु ᵛसु अत्यन्तं कामयमानः सन् ᵛसुषुतस्य सुष्ठुभिषुतं ᵛप्रतिभृतस्य संभृतं ᵛमध्वः मादकं ᵛसोमस्य सोमं ᵛनु क्षिप्रमेव ᵛपाः पिब । ᵛपृष्ठ्येन । पृष्ठशब्देन[4] माध्यंदिनसवने उद्गातृभिरुह्यमानं स्तोत्रमुच्यते । तत्संबन्धिना ᵛअन्धसा पीतेन सोमेन ᵛसं ᵛममदः प्रहृष्टो भव ॥

वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम् ॥ ५ ॥

वि । यः । ररप्शे । ऋषिऽभिः । नवेभिः । वृक्षः । न । पक्वः । सृण्यः । न । जेता ।
मर्यः । न । योषाम् । अभि । मन्यमानः । अच्छ । विवक्मि । पुरुऽहूतम् । इन्द्रम् ॥ ५ ॥

१. ख-ग-च-ण-प-फ–अभिलक्ष्य; त-न-स–अभिमुखीकृत्य । २. त–महानिन्द्रः । ३. त–जीयास्म ।
४. त-न-भ-ल–पृष्ठ्यशब्देन ।

vपक्कः पक्कफलः vवृक्षो vन वृक्ष इव । अत्र सृणिशब्दोऽङ्कुशवाची । तेनायुधमात्रं लक्ष्यते । vसृण्यः आयुधकुशलः vजेता vन शत्रुविजयी वीरपुरुष इव vयः[1] vनवेभिः नवैर्नूतनैः vऋषिभिः vवि vररप्शे विविधं स्तूयते । स्तोताहं vपुरुहूतं बहुभिराहूतं[2] तम् vइन्द्रम् vअच्छ अभि लक्षीकृत्य vविवक्मि विशेषेण[3] वच्मि[3] स्तौमि । तत्र दृष्टान्तः । vअभि vमन्यमानः मदीयेयं योषिदित्यभिजानन् vमर्यः मर्त्यः vयोषां vन स्त्रीमिव तद्वत् ॥ ॥ ३ ॥

गिरिर्न यः स्वतवाँ ऋष्व इन्द्रः सनादेव सहसे जात उग्रः ।
आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टम् ॥ ६ ॥

गिरिः । न । यः । स्वऽतवान् । ऋष्वः । इन्द्रः । सनात् । एव । सहसे । जातः । उग्रः ।
आऽदर्ता । वज्रम् । स्थविरम् । न । भीमः । उद्नाऽइव । कोशम् । वसुना । निऽऋष्टम् ॥६॥

vगिरिर्न पर्वत इव vस्वतवान् स्वयं प्रवृद्धः vऋष्वः महान् । ऋष्व इति महन्नाम ' महद् ब्रह्मः ऋष्वः ' (नि. ३. ३. ३) इति तन्नामसु पाठात् । vउग्रः ओजस्वी vयः vइन्द्रः vसहसे शत्रोरभिभवाय vसनादेव चिरादेव vजातः उत्पन्नः vभीमः शत्रूणां भयंकरः स इन्द्रः vउद्नेव vकोशम् उदकेन जलपात्रमिव vवसुना तेजसा vन्यृष्टं निगतं vस्थविरं बृहत्[4] vवज्रं vन वज्रं च । नेति चार्थे । vआदर्ता आदृतवान्[5] आसीत् ॥

न यस्य वर्ता जनुषा न्वस्ति न राधस आमरीता मघस्य ।
उद्ब्वृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥ ७ ॥

न । यस्य । वर्ता । जनुषा । नु । अस्ति । न । राधसः । आऽमरीता । मघस्य ।
उत्ऽब्वृषाणः । तविषीऽवः । उग्र । अस्मभ्यम् । दद्धि । पुरुऽहूत । रायः ॥ ७ ॥

हे इन्द्र vयस्य तव कश्चित् vजनुषा जन्मना स्वत एव vनु नूनं सत्यं vवर्ता वारयिता vन vअस्ति । vराधसः यज्ञादिकर्मणां साधकस्य vमघस्य त्वया दीयमानस्य धनस्य vआमरीता कश्चिदपि नाशयिता vन अस्ति । हे vतविषीवः बलवन् vउग्र तेजस्विन् हे vपुरुहूत बहुभिराहूतेन्द्र vउद्ब्वृषाणः अभीष्टान् कामान् वर्षकस्त्वं vरायः पश्वादिधनानि vअस्मभ्यं स्तोतृभ्यः vदद्धि देहि ॥

ईक्षे रायः क्षयस्य चर्षणीनामुत व्रजमपवर्तासि गोनाम् ।
शिक्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिम् ॥ ८ ॥

ईक्षे । रायः । क्षयस्य । चर्षणीनाम् । उत । व्रजम् । अपऽवर्ता । असि । गोनाम् ।
शिक्षाऽनरः । सम्ऽइथेषु । प्रहाऽवान् । वस्वः । राशिम् । अभिऽनेता । असि । भूरिम् ॥८॥

१. ख-ग-घ-च-ण-त-न-भ-ल-स-' यः ' नास्ति । २. ख-ग-घ-च-ण-प-फ-भ-ल-' बहुभिराहूतं ' नास्ति । ३. ख-ग-घ-च-ण-भ-' विशेषेण वच्मि ' नास्ति । ४. ख-ग-च-फ-भ-बृहत् महत् । ५. त-आदत्तवान् ।

हे इन्द्र त्वं [v]चर्षणीनां प्रजानां [v]रायः धनस्य[1] [v]क्षयस्य गृहस्य च [v]ईक्षे ईक्षसे । [v]उत अपि च [v]गोनां गवां [v]व्रजं समूहम् [v]अपवर्ता अपवारकः [v]असि । निरोधकेभ्योऽसुरेभ्यो गवां मोचयिता भवसीत्यर्थः । किंच हे इन्द्र [v]शिक्षानरः शिक्षया नेता प्रज्ञानां शासकः [v]समिथेषु युद्धेषु [v]प्रहावान् प्रहरणवांस्त्वं [v]भूरिं प्रभूतं [v]वस्वः धनस्य [v]राशिं समूहम् [v]अभिनेतासि प्रापयिता च[2] भवसि ॥

कया तच्छृण्वे शच्या शचिष्ठो ययां कृणोति मुहु का चिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥ ९ ॥

कया । तत् । शृण्वे । शच्या । शचिष्ठः । ययां । कृणोति । मुहु । का । चित् । ऋष्वः ।
पुरु । दाशुषे । विऽचयिष्ठः । अंहः । अथ । दधाति । द्रविणम् । जरित्रे ॥ ९ ॥

[v]शचिष्ठः अतिशयेन प्राज्ञः । तदिति लिङ्गव्यत्ययः । [v]तत् स इन्द्रः [v]कया [v]शच्या कया[3] प्रज्ञया । शचीति प्रज्ञानामैतत् । [v]शृण्वे श्रूयते । [v]ऋष्वः[4] महानिन्द्रः[5] [v]मुहु मुहुः [v]यया प्रज्ञया [v]का [v]चित् कानिचित् कर्माणि [v]कृणोति करोति । स इन्द्रः [v]दाशुषे हविर्दत्तवते यजमानाय [v]पुरु भूयिष्ठम् [v]अंहः पापं [v]विचयिष्ठः अतिशयेन नाशको भवति । [v]अथ अपि च [v]जरित्रे स्तोत्रे [v]द्रविणं पश्वादिधनं [v]दधाति ददाति ॥

मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥ १० ॥

मा । नः । मर्धीः । आ । भर । दद्धि । तत् । नः । प्र । दाशुषे । दातवे । भूरि । यत् । ते ।
नव्ये । देष्णे । शस्ते । अस्मिन् । ते । उक्थे । प्र । ब्रवाम । वयम् । इन्द्र । स्तुवन्तः ॥ १० ॥

हे इन्द्र त्वं [v]नः अस्मान् [v]मा [v]मर्धीः मा हिंसीः । किंतु त्वम् [v]आ [v]भर पोषको भव । हे इन्द्र [v]ते त्वदीयं [v]भूरि[6] बहुपि [v]यत् धनं[6] [v]दाशुषे हविर्दत्तवते यजमानाय [v]दातवे दातुम् । [v]प्र भवतीति शेषः । [v]नः अस्मभ्यं [v]तत् धनम् आहृत्य [v]दद्धि देहि । हे [v]इन्द्र त्वां [v]स्तुवन्तः [v]वयम् [v]अस्मिन् [v]उक्थे अस्मिन्निष्केवल्याख्यशस्त्रे [v]ते त्वदर्थं [v]नव्ये नूतने [v]शस्ते प्रशस्ते [v]देष्णे दातव्ये हविषि निमित्तभूते सति [v]प्र [v]ब्रवाम प्रकर्षेण त्वां वदाम ॥

---

१. त–धनस्य ईक्षे । २. ख-प-फ-भ–‘ च ’ नास्ति । ३. ख-प-फ-भ–‘ कया ’ नास्ति । ४. ख-ग-च-ण-प-फ-भ–यः ऋष्वः । ५. त-न-ल-स–‘ महानिन्द्रः ’ नास्ति । ६. ख-ग-घ-च-ण-प-फ-भ–यद्भूरि बहुपि धनम् ।

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ ४ ॥

'आ यात्विन्द्रः' इत्येकादशर्चमेकादशं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम् । 'आ यातु' इत्यनुक्रान्तम् । पृष्ठ्याभिप्लवपडहयोः प्रथमेऽहन्येतन्निविद्धानीयम् । सूत्रितं च—'आ यात्विन्द्रोऽवस इति मरुत्वतीयम्' (आश्व. श्रौ. ७. ५) इति ॥

आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥ १ ॥

आ । यातु । इन्द्रः । अवसे । उप । नः । इह । स्तुतः । सधऽमात् । अस्तु । शूरः ।
ववृधानः । तविषीः । यस्य । पूर्वीः । द्यौः । न । क्षत्रम् । अभिऽभूति । पुष्यात् ॥ १ ॥

सः ᵛइन्द्रः ᵛनः अस्माकम् ᵛअवसे रक्षणाय ᵛउप ᵛआ ᵛयातु उपागच्छतु । य इन्द्रः ᵛइह अस्मिन् यज्ञे ᵛस्तुतः । ᵛशूरः विक्रान्तः ᵛववृधानः प्रवृद्धोऽयमिन्द्रः ᵛसधमादस्तु अस्माभिः सह माद्यन् भवतु । ᵛयस्य इन्द्रस्य ᵛतविषीः तविष्यो बलानि ᵛपूर्वीः पूर्व्यो बहूनि । सन्तीति शेषः । यश्चेन्द्रः ᵛद्यौर्न द्योतमानः सूर्य इव ᵛअभिभूति परकीयं बलमभिभावुकं ᵛक्षत्रं स्वकीयं बलं तेजो वा ᵛपुष्यात् पुष्यतु । स इन्द्र उपायात्विति पूर्वेण संबन्धः ॥

तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन् ।
यस्य क्रतुर्विदथ्योऽ न सम्राट् साह्वान्तरुत्रो अभ्यस्ति कृष्टीः ॥ २ ॥

तस्य । इत् । इह । स्तवथ । वृष्ण्यानि । तुविऽद्युम्नस्य । तुविऽराधसः । नॄन् ।
यस्य । क्रतुः । विदथ्यः । न । सम्ऽराट् । सह्वान् । तरुत्रः । अभि । अस्ति । कृष्टीः ॥ २ ॥

ᵛतुविद्युम्नस्य बहुकीर्तेः ᵛतुविराधसः बहुधनस्य ᵛतस्येत् तस्येन्द्रस्यैव ᵛवृष्ण्यानि बलभूतान् ᵛनॄन् नेतॄन् मरुतो हे स्तोतारो यूयम् ᵛइह अस्मिन् यज्ञे ᵛस्तवथ स्तुत । ᵛसाह्वान् शत्रूनभिभावुकः ᵛतरुत्रः अस्मानापन्नस्तारकः ᵛयस्य इन्द्रस्य ᵛक्रतुः कर्म ᵛकृष्टीः शत्रुसंबन्धिनीः प्रजाः ᵛअभ्यस्ति अभिभवति । तत्र दृष्टान्तः । ᵛविदथ्यो ᵛन ᵛसम्राट् । विदथार्हः[1] यज्ञार्हः सम्राट् सकललोकानाम् अधिपतिरिव तद्वत् । तस्य वृष्ण्यानि इति पूर्वेण संबन्धः ॥

१. ल—विदथार्हो न ।

आ यात्विन्द्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात् ।
स्वर्णरादवसे नो मरुत्वान्परावतो वा सदनादृतस्य ॥ ३ ॥

आ । यातु । इन्द्रः । दिवः । आ । पृथिव्याः । मक्षु । समुद्रात् । उत । वा । पुरीषात् ।
स्वःऽनरात् । अवसे । नः । मरुत्वान् । पराऽवतः । वा । सदनात् । ऋतस्य ॥ ३ ॥

Vमरुत्वान् मरुद्भिः सहितः Vइन्द्रः Vनः अस्माकम् Vअवसे रक्षणाय Vदिवः स्वर्गलोकात् Vआ Vयातु आगच्छतु । Vपृथिव्याः भूलोकाच्च Vमक्षु शीघ्रम् Vआ यातु । Vउत Vवा अथवा Vसमुद्रात् अन्तरिक्षलोकाच्चायातु । समुद्र इत्यन्तरिक्षनाम ' सगरः समुद्रः अध्वरम्[1] ' (नि. १. ३. १५) इति तन्नामसु पाठात् । अथवा Vपुरीषात् उदकादायातु । पुरीषमित्युदकनाम ' मधु पुरीषं पिप्पलम् ' (नि. १. १२. १२) इति तन्नामसु पाठात् । Vस्वर्णरात् स्वरादित्यो नरो नेता यस्य तस्मालोकाद्वा आयातु । Vपरावतो Vवा दूराद्वा आयातु । Vऋतस्य उदकस्य Vसदनात् स्थानात् मेघलोकाद्वा आयातु ॥

स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विन्द्रम् ।
यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ ॥ ४ ॥

स्थूरस्य । रायः । बृहतः । यः । ईशे । तम् । ऊँ इति । स्तवाम । विदथेषु । इन्द्रम् ।
यः । वायुना । जयति । गोऽमतीषु । प्र । धृष्णुऽया । नयति । वस्यः । अच्छ ॥ ४ ॥

Vयः इन्द्रः Vस्थूरस्य स्थूलस्य Vबृहतः महतः Vरायः धनस्य Vईशे ईष्टे Vविदथेषु यज्ञेषु । विदथ इति यज्ञनामैतत् । Vतम्[2] Vइन्द्रम् Vउ[2] तमिन्द्रमेव वयं स्तोतारः Vस्तवाम । Vयः इन्द्रः Vवायुना प्राणरूपेण बलेन Vगोमतीषु सेनासु Vजयति शत्रून् विजयते । Vधृष्णुया धृष्णुः प्रगल्भो य इन्द्रः स्तोतॄन् Vवस्यः वसीयः श्रेष्ठं पश्वादिधनम् Vअच्छ अभि Vप्र Vनयति प्रापयति । तमेवेन्द्रं स्तवामेति पूर्वेण संबन्धः ॥

उप यो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै ।
ऋञ्जसानः पुरुवार उक्थैरेन्द्रं कृण्वीत सदनेषु होता ॥ ५ ॥

उप । यः । नमः । नमसि । स्तभायन् । इयर्ति । वाचम् । जनयन् । यजध्यै ।
ऋञ्जसानः । पुरुऽवारः । उक्थैः । आ । इन्द्रम् । कृण्वीत । सदनेषु । होता ॥ ५ ॥

१. ख-ग-च-ण-त-न-भ-स–अध्वरः । २. ख-ग-च-ण-भ-स–' तमिन्द्रमु ' नास्ति ।

[v]उप [v]स्तभायन् लोकानुपस्तम्भयन् [v]यजध्यै यष्टुं [v]वाचं गर्जितलक्षणां वाचं [v]जनयन् प्रजनयन् [v]ऋञ्जसानः प्रसाध्यमानः । 'ऋञ्जतिः प्रसाधनकर्मा' इति यास्कः । [v]उक्थैः शस्त्रलक्षणैः स्तोत्रैः [v]पुरुवारः बहुभिः[1] संभजनीयः [v]यः इन्द्रः [v]नमसि । नम इत्यन्ननामैतत् । यजमानैर्दत्ते हविषि [v]नमः यजमानेभ्यो यज्ञादिसाधनमन्नम् [v]इयर्ति प्रेरयति । इन्द्रो हविषा तृप्तः सन् वृष्टिद्वारा अन्नं प्रयच्छति तेन चान्नेन पुनर्यज्ञः प्रजायत इत्यर्थः । अस्मदीयः [v]होता [v]सदनेषु यज्ञगृहेषु[2] तम् [v]इन्द्रम् [v]आ [v]कृण्वीत अभिमुखीकरोतु ॥ ॥ ५ ॥

धिषा यदिं धिषण्यन्तः सरण्यान्त्सदन्तो अद्रिमौशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः ॥ ६ ॥

धिषा । यदिं । धिषण्यन्तः । सरण्यान् । सदन्तः । अद्रिम् । औशिजस्य । गोहे ।
आ । दुरोषाः । पास्त्यस्य । होता । यः । नः । महान् । सम्ऽवरणेषु । वह्निः ॥ ६ ॥

[v]धिषण्यन्तः धिषणामिन्द्रविषयां स्तुतिमिच्छन्तः [v]औशिजस्य । उशिजः कामयमाना ऋत्विजः । तेषां संबन्ध्यौशिजो यजमानः । तस्य [v]गोहे गृहे [v]सदन्तः निषीदन्तो जनाः [v]अद्रिम् । आदृणाति शत्रून् इत्यद्रिरिन्द्रः । तमिन्द्रं [v]धिषा स्तुत्या [v]यदि यदा [v]सरण्यान् उपागच्छेयुः तदा स इन्द्रः [v]आ यातु । [v]नः अस्माकं [v]संवरणेषु शत्रुसंबन्धिषु निरोधेषु [v]वह्निः वोढा [v]पास्त्यस्य पस्त्ये गृहे वसता यजमानेन [v]होता आह्वाता [v]दुरोषाः दुस्तरक्रोधः [v]यः इन्द्रः [v]महान् प्रभूतो भवति । स आयात्विति ॥

सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय ।
गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥ ७ ॥

सत्रा । यत् । ईम् । भार्वरस्य । वृष्णः । सिसक्ति । शुष्मः । स्तुवते । भराय ।
गुहा । यत् । ईम् । औशिजस्य । गोहे । प्र । यत् । धिये । प्र । अयसे । मदाय ॥ ७ ॥

[v]भार्वरस्य । भर्वरो जगन्नर्ता प्रजापतिः । तस्य पुत्रो भार्वरः । तस्य [v]वृष्णः कामानां वर्षितुरिन्द्रस्य संबन्धी [v]ईम् एषः [v]शुष्मः बलं [v]स्तुवते स्तोत्रं कुर्वन्तं यजमानं [v]सिषक्ति सेवते इति [v]यत् तत् [v]सत्रा सत्यमेव । [v]ईम् एतद्बलम् [v]औशिजस्य यजमानस्य [v]भराय भर्तुं [v]गुहा गुहायां गुहारूपे हृदये [v]प्र भवतीति [v]यत् तत्सत्यम् । यजमानस्य [v]गोहे गृहे [v]धिये कर्मणे [v]प्र भवतीति [v]यत् तत्सत्यम् । [v]अयसे गमनाय कामानां प्राप्तये [v]मदाय हर्षाय तत्र यद्बलं प्रभवति तत्सत्यम् । इन्द्रस्य बलं यजमानं सर्वदा पालयतीत्यर्थः ॥

१. च–पुरुभिः । २. ख-ग-घ-च-ण–'यज्ञगृहेषु' नास्ति ।

वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ।
विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो वहन्ति ॥ ८ ॥

वि । यत् । वरांसि । पर्वतस्य । वृण्वे । पयःऽभिः । जिन्वे । अपाम् । जवांसि ।
विदत् । गौरस्य । गवयस्य । गोहे । यदि । वाजाय । सुऽध्यः । वहन्ति ॥ ८ ॥

इन्द्रः Vपर्वतस्य मेघस्य Vवरांसि द्वाराणि Vवि Vवृण्वे विवृतानि कृतवानिति Vयत् । Vअपाम् उदकानां Vजवांसि वेगान् Vपयोभिः जलैः Vजिन्वे प्याययतीति यत् । Vयदि यदा Vसुध्यः शोभनकर्माणो यजमानाः Vवाजाय अन्नाय Vवहन्ति इन्द्रं प्रापयन्ति तदा Vगोहे गृहे Vगौरस्य गौरमृगस्य Vगवयस्य गवयमृगस्य च Vविदत् तौ द्वौ पशू लभते इति यत् । तत्सर्वं सत्रा इति पूर्वेण संबन्धः ॥

अभ्युदयेष्टौ इन्द्रस्य प्रदातुः ' भद्रा ते हस्ता ' इति याज्या । सूत्रितं च—' दीर्घस्ते अस्वङ्कुशो भद्रा ते हस्ता सुकृतोत पाणी ' (आश्व. श्रौ. ३.१३) इति ॥

भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र ।
का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥ ९ ॥

भद्रा । ते । हस्ता । सुऽकृता । उत । पाणी इति । प्रऽयन्तारा । स्तुवते । राधः । इन्द्र ।
का । ते । निऽसत्तिः । किम् । ऊँ इति । नो इति । ममत्सि ।
किम् । न । उत्ऽउत् । ऊँ इति । हर्षसे । दातवै । ऊँ इति ॥ ९ ॥

हे Vइन्द्र Vते त्वदीयौ Vभद्रा भद्रौ कल्याणौ Vहस्ता हस्तौ Vसुकृता सुकृतौ शोभनकर्माणौ भवतः । Vउत अपि च Vपाणी त्वदीयौ हस्तौ Vस्तुवते स्तोत्रे यजमानाय Vराधः धनं Vप्रयन्तारा प्रयन्तारौ प्रदातारौ भवतः । हे इन्द्र Vते त्वदीया Vनिषत्तिः निषदनं स्थितिः Vका । त्वमस्मान् Vकिमु किमर्थं Vनो Vममत्सि न मादयसि । Vकिम् Vउदुदु किमर्थमेव Vदातवै अस्माकं धनं दातुं Vन Vहर्षसे हृष्टो न भवसि[1] ॥

ऐन्द्रस्य वार्त्रघ्नस्य पशोः ' एवा वस्वः ' इति हविषो याज्या । सूत्रितं च—' एवा वस्व इन्द्रः सत्यः सम्राड्यद्वाग्वदन्त्यविचेतनानि ' (आश्व. श्रौ. ३. ८) इति ॥

एवा वस्व इन्द्रः सत्यः सम्राड्हन्ता वृत्रं वरिवः पूरवे कः ।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य ॥ १० ॥

एव । वस्वः । इन्द्रः । सत्यः । सम्ऽराट् । हन्ता । वृत्रम् । वरिवः । पूरवे । कृरिति कः ।
पुरुऽस्तुत । क्रत्वा । नः । शग्धि । रायः । भक्षीय । ते । अवसः । दैव्यस्य ॥ १० ॥

१. त-प-भवसि । उ पूरणः ।

[v]एवा एवमुक्तप्रकारेण स्तूयमानः [v]सत्यः सत्यवान् [v]वस्वः धनस्य [v]सम्राट् ईश्वरः [v]वृत्रं वृत्रनामानमसुरं [v]हन्ता हिंसिता [v]इन्द्रः [v]पूरवे मनुष्याय यजमानाय [v]वरिवः धनं [v]कः करोति । ददातीत्यर्थः । [v]कृत्वा कर्मणा स्तुतिहेतुना हे [v]पुरुष्टुत बहुभिर्यजमानैः स्तुतेन्द्र त्वं [v]नः अस्मभ्यं [v]रायः धनानि [v]शग्धि देहि । [v]ते त्वया दीयमानस्य [v]दैव्यस्य देवसंबन्धिनः [v]अवसः अन्नस्य ॥ कर्मणि षष्ठी ॥ अन्नं [v]भक्षीय अहं भजेय[1] ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योः न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ ६ ॥ ॥ २ ॥

तत्र[2] तृतीयानुवाके[3] एकादश सूक्तानि । तत्र ' यन्न इन्द्रः ' इत्येकादशर्चं प्रथमं सूक्तं वामदेव-स्यार्षं त्रैष्टुभमैन्द्रम् । ' यन्नः ' इत्यनुक्रमणिका । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रे द्वितीयमिदं संपातसूक्तम्[4] । सूत्रितं च–' एवा त्वामिन्द्र यन्न इन्द्रः ' (आश्व. श्रौ. ७. ५) इति ॥

यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित् ।
ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति ॥ १ ॥

यत् । नः । इन्द्रः । जुजुषे । यत् । च । वष्टि ।
तत् । नः । महान् । करति । शुष्मी । आ । चित् ।
ब्रह्म । स्तोमम् । मघऽवा । सोमम् । उक्था । यः । अश्मानम् । शवसा । बिभ्रत् । एति ॥ १ ॥

[v]इन्द्रः [v]नः अस्मदीयं [v]यत् हविर्लक्षणान्नादिकं [v]जुजुषे सेवते [v]यच्च हविरादिकं च [v]वष्टि कामयते [v]महान् प्रभूतः [v]शुष्मी बलवानिन्द्रः । चिदिति चार्थे । [v]ब्रह्म [v]चित् हविर्लक्षणपुरोडाशादि-कमन्नं च [v]स्तोमं स्तोत्रसमूहं च [v]सोमम् अभिषुतं सोमं च [v]उक्था उक्थानि शस्त्राणि चेत्येवंभूतं [v]तत् ब्रह्मादिचतुष्टयम् [v]आ [v]करति आकरोतु स्वीकरोतु । [v]मघवा धनवान् । अत्र[5] अश्मशब्दः[6] वज्रवाची । [v]अश्मानं वज्रं [v]बिभ्रत् धारयन् [v]शवसा बलेन युक्तः [v]यः इन्द्रः [v]एति आगच्छति । स इन्द्रः स्वीकरोत्विति पूर्वेण संबन्धः ॥

१. त–भजेयम् । २. घ-च-न–अथ । ३. घ-न–तृतीयेऽनुवाके । ४. ख-प-फ-भ–सूक्तम् । ५. ख-ग-घ-च-ण-न-भ-स–' अत्र ' नास्ति । ६. ल–अश्मन्शब्दः ।

वृषा वृषन्धि चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान् ।
श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ॥ २ ॥

वृषा । वृषन्धिम् । चतुःऽअश्रिम् । अस्यन् । उग्रः । बाहुऽभ्याम् । नृऽतमः । शचीऽवान् ।
श्रिये । परुष्णीम् । उषमाणः । ऊर्णाम् । यस्याः । पर्वाणि । सख्याय । विव्ये ॥ २ ॥

[v]वृषा कामानां वर्षिता [v]वृषन्धिं मेघभेदनद्वारेण वर्षं कुर्वन्तं [v]चतुरश्रिं चतसृभिः अश्रिभिः धाराभिरुपेतं वज्रं [v]बाहुभ्यां हस्ताभ्याम् [v]अस्यन् शत्रुषु प्रक्षिपन् [v]उग्रः उद्गूर्णबलः [v]नृतमः नेतृतमः [v]शचीवान् कर्मवानिन्द्रः [v]ऊर्णाम् आच्छादिकां [v]परुष्णीं पर्ववतीं नदीं [v]श्रिये आश्रयणार्थम् [v]उषमाणः सेवमानः[१] भवति । [v]यस्याः नद्याः [v]पर्वाणि भिन्नान् देशान् [v]सख्याय सखिकर्मणे [v]विव्ये संवृतवान् ॥

यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ।
दधानो वज्रं बाह्वोरुशन्तं द्यामंमेन रेजयत्प्र भूम ॥ ३ ॥

यः । देवः । देवऽतमः । जायमानः । महः । वाजेभिः । महत्ऽभिः । च । शुष्मैः ।
दधानः । वज्रम् । बाह्वोः । उशन्तम् । द्याम् । अमेन । रेजयत् । प्र । भूम ॥ ३ ॥

[v]देवः दीप्यमानः [v]देवतमः दातृतमः [v]जायमानः उत्पद्यमानः [v]यः इन्द्रः [v]महः महद्भिः [v]वाजेभिः अन्नैः [v]महद्भिः [v]शुष्मैः बलैः [v]च । युक्तोऽभवदिति शेषः । स इन्द्रः [v]बाह्वोः हस्तयोः [v]उशन्तं कामयमानं [v]वज्रं [v]दधानः धारयन् [v]अमेन बलेन [v]द्यां द्युलोकं च[२] [v]भूम भूलोकं च [v]प्र [v]रेजयत् प्रकम्पयति स्म ॥

विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन्रेजत क्षाः ।
आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः ॥ ४ ॥

विश्वा । रोधांसि । प्रऽवतः । च । पूर्वीः । द्यौः । ऋष्वात् । जनिमन् । रेजत । क्षाः ।
आ । मातरा । भरति । शुष्मी । आ । गोः । नृऽवत् । परिऽज्मन् । नोनुवन्त । वाताः ॥ ४ ॥

[v]विश्वा विश्वानि [v]रोधांसि । रोधःशब्देन उन्नतप्रदेशः[३] उच्यते[३] । उन्नतप्रदेशाः पर्वताश्च [v]पूर्वीः पूर्व्यो बहूनि [v]प्रवतः प्रवणानि । समुद्राश्चेत्यर्थः । [v]द्यौः द्युलोकश्च [v]क्षाः पृथिवी च [v]जनिमन् इन्द्रस्य जन्मनि सति [v]ऋष्वात् महतोऽस्मादिन्द्रात् [v]रेजत अरेजन्त[४] अकम्पन्त[४] । किंच [v]शुष्मी बलवान्

१. ख-ग-च-ण–सेवमानः । २. ख-ग-घ-च-ण-भ–'च' नास्ति । ३. ल–उन्नतप्रदेशाः उच्यन्ते । ४. ख-ग-घ-च-ण-न-भ-ल-स–अरेजत अकम्पत ।

इन्द्रः Vगोः गन्तुः सूर्यस्य Vमातरा मातरौ मातापितृभूतौ द्यावापृथिव्यौ च। Vआ इति चार्थे। Vआ Vभरति आ समन्तात् बिभर्ति। Vनृवत् मनुष्या इव Vवाताः इन्द्रेण प्रेरिता वायवश्च[1] Vपरिज्मन् अन्तरिक्षे Vनोनुवन्त शब्दायन्ते ॥

ता तू त इन्द्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या ।
यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥ ५ ॥

ता । तु । ते । इन्द्र । महतः । महानि । विश्वेषु । इत् । सवनेषु । प्रऽवाच्या ।
यत् । शूर । धृष्णो इति । धृषता । दधृष्वान् । अहिम् । वज्रेण । शवसा । अविवेषीः ॥ ५ ॥

हे Vइन्द्र Vमहतः प्रभूतस्य Vते त्वदीयानि Vता तानि कर्माणि Vतु क्षिप्रं Vमहानि महान्ति भवन्ति। Vविश्वेष्वित् सर्वेष्वेव Vसवनेषु प्रातःसवनादिकर्मसु त्वदीयानि कर्माणि[2] Vप्रवाच्या प्रवाच्यानि स्तोतृभिः प्रकर्षेण वक्तुं योग्यानि स्तुत्यानि इति[3] Vयत्[3]। हे Vधृष्णो प्रगल्भ हे Vशूर विक्रान्तेन्द्र Vदधृष्वान् पालकत्वेन लोकान् धारयन् Vशवसा बलेन युक्तस्त्वं Vधृषता धर्षकेण Vवज्रेण Vअहिं वृत्रमसुरम् Vअविवेषीः अवधीरिति यत्। एतदादीनि कर्माणि महान्तीति पूर्वेण संबन्धः। अत्र अविवेषीरिति वधकर्मा ॥ ॥ ७ ॥

ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊर्ध्नः ।
अधा ह त्वद्वृषमणो भियानाः प्र सिन्धवो जवसा चक्रमन्त ॥ ६ ॥

ता । तु । ते । सत्या । तुविऽनृम्ण । विश्वा । प्र । धेनवः । सिस्रते । वृष्णः । ऊर्ध्नः ।
अध । ह । त्वत् । वृषऽमनः । भियानाः । प्र । सिन्धवः । जवसा । चक्रमन्त ॥ ६ ॥

हे Vतुविनृम्ण अधिकबल[4] इन्द्र Vते त्वदीयानि Vविश्वा विश्वानि Vता तानि कर्माणि Vतु क्षिप्रं Vसत्या सत्यानि भवन्ति। हे इन्द्र Vवृष्णः कामानां वर्षितुस्त्वत्तो भयात् Vधेनवः गावः Vऊर्ध्नः स्वकीयादापीनात् Vप्र Vसिस्रते प्रकर्षेण क्षीरं क्षरन्ति। Vअध अपि च हे Vवृषमनः कामानां वर्षणपरमनस्केन्द्र Vसिन्धवः नद्यः Vत्वत् त्वत्तः Vभियानाः बिभ्यत्यः सत्यः Vजवसा वेगेन Vप्र Vचक्रमन्त Vह प्रकर्षेण गच्छन्ति खलु ॥

अत्राह ते हरिवस्ता उ देवीरवोभिरिन्द्र स्तवन्त स्वसारः ।
यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यन्दयध्यै ॥ ७ ॥

अत्र । अह । ते । हरिऽवः । ताः । ऊँ इति । देवीः । अवःऽभिः । इन्द्र । स्तवन्त । स्वसारः ।
यत् । सीम् । अनु । प्र । मुचः । बद्बधानाः । दीर्घाम् । अनु । प्रऽसितिम् । स्यन्दयध्यै ॥ ७ ॥

१. ख-ग-च-ण-भ-वायवः । २. ख-ग-घ-च-ण-न-भ-स-'कर्माणि' नास्ति । ३. ख-ग-च-ण-न-भ-'इति यत्' नास्ति । ४. त- अधिकधन ।

हे [v]इन्द्र त्वं [v]यत् यदा [v]बद्बधानाः बृत्रेण बध्यमानाः[१] [v]सीमनु एताः[२] नदीरुद्दिश्य [v]दीर्घाम् अत्यधिकां [v]प्रसितिं बन्धनम् [v]अनु [v]स्यन्दयध्यै यथाकामं स्यन्दितुं [v]प्र [v]मुचः प्रकर्षेणामोचयः। हे [v]हरिवः हरिवन् इन्द्र [v]अत्राह अत्रैव मोचनवेलायां [v]ता [v]उ ताः प्रसिद्धा एव [v]देवीः देव्यो द्योतमानाः [v]स्वसारः नद्यः। अत्र स्वसृशब्दो नदीवाची। [v]अवोभिः त्वत्कृतै रक्षणैः [v]ते त्वां [v]स्तवन्त स्तावयन्ति। नदीपूरणादिभिः कर्मभिः जना इन्द्रं स्तुवन्तीत्यर्थः॥

पिपीळे अंशुर्मद्यो न सिन्धुरा त्वा शमी शशमानस्य शक्तिः।
अस्मद्र्यक्शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः॥ ८॥

पिपीळे। अंशुः। मद्यः। न। सिन्धुः। आ। त्वा। शमी। शशमानस्य। शक्तिः।
अस्मद्र्यक्। शुशुचानस्य। यम्याः। आशुः। न। रश्मिम्। तुविऽओजसम्। गोः॥ ८॥

हे इन्द्र [v]मद्यः मादयिता [v]अंशुः सोमः [v]पिपीळे अपीड्यत। अभ्यषूयत[३] इत्यर्थः। नेति संप्रत्यर्थे। [v]न इदानीं [v]सिन्धुः स्यन्दमानः सोमः [v]त्वा त्वाम् [v]आ [v]यम्याः आयच्छतु। [v]शुशुचानस्य दीप्यमानस्य [v]शशमानस्य स्तुवतः संबन्धी [v]अस्मद्र्यक् अस्मदभिमुखं [v]शमी शमनं [v]शक्तिः स्तुतिकर्म च आयच्छतु। तत्र दृष्टान्तः। [v]आशुः शीघ्रगामी यन्ता [v]गोः गन्तुरश्वस्य [v]तुव्योजसं बहुबलम्। दृढमित्यर्थः। [v]रश्मिं [v]न अश्वबन्धनरज्जुमिव तद्वत्॥

अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि।
अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर्वनुषो मर्त्यस्य॥ ९॥

अस्मे इति। वर्षिष्ठा। कृणुहि। ज्येष्ठा। नृम्णानि। सत्रा। सहुरे। सहांसि।
अस्मभ्यम्। वृत्रा। सुऽहनानि। रन्धि। जहि। वधः। वनुषः। मर्त्यस्य॥ ९॥

हे [v]सहुरे सहनशीलेन्द्र त्वं [v]सत्रा सर्वदा [v]सहांसि शत्रूनभिभावुकानि [v]वर्षिष्ठा वर्षिष्ठानि प्रवृद्धानि [v]ज्येष्ठा ज्येष्ठानि प्रशस्तानि [v]नृम्णानि बलानि [v]अस्मे अस्मभ्यं [v]कृणुहि कुरु। हे इन्द्र त्वम् [v]अस्मभ्यं [v]सुहनानि शोभनवधानि [v]वृत्रा वृत्राणि शत्रून् [v]रन्धि रन्धय वशं नय। किंच [v]वनुषः हिंसकस्य [v]मर्त्यस्य मरणधर्मणः[४] शत्रोः संबन्धि [v]वधः हननसाधनमायुधं [v]जहि नाशय॥

अस्माकमित्सु शृणुहि त्वमिन्द्रास्मभ्यं चित्राँ उप माहि वाजान्।
अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः॥ १०॥

अस्माकम्। इत्। सु। शृणुहि। त्वम्। इन्द्र। अस्मभ्यम्। चित्रान्। उप। माहि। वाजान्।
अस्मभ्यम्। विश्वाः। इषणः। पुरम्ऽधीः। अस्माकम्। सु। मघऽवन्। बोधि। गोऽदाः॥ १०॥

१. प-फ-बाध्यमानाः। २. न-ल-स-एनाः। ३. न-अभ्यसूयत। ४. त- मरणशीलस्य।

हे vइन्द्र vत्वम् vअस्माकमित अस्मदीयाः[1] एव स्तुतीः[1] vसु सुष्ठु vशृणुहि । तथा हे इन्द्र त्वं vचित्रान् चायनीयानि vवाजान् अन्नानि vअस्मभ्यम् vउप vमाहि देहि । किंच vअस्मभ्यं vविश्वाः सर्वाः vपुरंधीः बुद्धीः[2] vहृषणः प्रेरय । अपि च हे vमघवन् धनवन्निन्द्र त्वं[3] vअस्माकं vगोदाः गवां दाता vसु सुष्ठु vबोधि भव ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योः न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ ८ ॥

' कथा महाम् ' इत्येकादशर्चं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम् । ' ऋतस्य हि ' इत्या-द्यास्तिस्र ऋतदेवताका वा । तथा चानुक्रान्तं—' कथोपान्त्यास्तिस्र ऋतदेव्यो वा ' इति । आभि-प्लविकेऽहनि दशरात्रे प्रथमेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रेऽहीनसूक्तस्य स्थान इदं तृतीयं संपात-सूक्तम् । सूत्रितं च—' कथा महामिन्द्रः पूर्भिद्य एक इत् ' (आश्व. श्रौ. ७. ५) इति । महाव्रते निष्केवल्ये एतत् । तथैव पञ्चमारण्यके शौनकेन सूत्रितं च—' कथा महामवृधत्कस्य होतुरिति संपातः ' (ऐ. आ. ५. २. २) इति ॥

कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः ।
पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय ॥ १ ॥

कथा । महाम् । अवृधत् । कस्य । होतुः । यज्ञम् । जुषाणः । अभि । सोमम् । ऊधः ।
पिबन् । उशानः । जुषमाणः । अन्धः । ववक्षे । ऋष्वः । शुचते । धनाय ॥ १ ॥

vमहां महान्तं गुणैः प्रवृद्धमिन्द्रं vकथा कथं केन प्रकारेण vअवृधत् वर्धयेत्[4] । अस्मत्प्रेरिता स्तुतिरिति शेषः । तस्य महिम्नोऽतिमहत्त्वादिति भावः । स एवेन्द्रः vहोतुः होमनिष्पादकस्य vकस्य यजमानस्य vयज्ञं यागं vजुषाणः प्रीयमाणः सन् vअभि । गच्छेदिति शेषः । उपसर्गश्रुतेरुचित-क्रियाध्याहारः । किंच vऊधः उद्गततमतिप्रवृद्धं vसोमम् vअन्धः सोमलक्षणमन्नं vपिबन् आस्वादयन् vउशानः तदेवान्नं कामयमानः vजुषमाणः सेवमानश्च vऋष्वः महानिन्द्रः vशुचते प्रदीप्ताय vधनाय हिरण्यादिलक्षणाय[5]। उक्तलक्षणं धनं कस्मै यजमानाय दातुं vववक्षे वहति । पीतमेवान्नं जठरे धारयति। अनेन वाक्यद्वयेन इन्द्रस्याचिन्त्यचरितत्वं ख्यापितं भवति ॥

---

१. ख-ग-च-ण-अस्मदीयामेव स्तुतिम् । २. ख-ग-च-ण-प-फ-भ-बद्धीः । ३. न-स-' त्वं ' नास्ति । ४. ख-ग-च-ण-अवर्धयत् । ५. ख-ग-च-ण-न-भ-स-हिरण्यार्थं लक्षणाय; त-हिरण्यार्थलक्षणाय ।

को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य ।
कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः ॥ २ ॥

कः । अस्य । वीरः । सधऽमादम् । आप । सम् । आनंश । सुमतिऽभिः । कः । अस्य ।
कत् । अस्य । चित्रम् । चिकिते । कत् । ऊती । वृधे । भुवत् । शशमानस्य । यज्योः ॥ २ ॥

[v]अस्य इन्द्रस्य संबन्धिनं [v]सधमादम् । सह माद्यन्तीति सधमादः संग्रामः । तं सह सोमपानं वा [v]वीरः स्तोत्राणामभिन्नाणां वा वीरयिता [v]कः पुमान् [v]आप प्राप्नोति । [v]कः च [v]अस्य इन्द्रस्य [v]सुमतिभिः शोभनाभिरनुग्रहबुद्धिभिः [v]समानंश संगच्छते । [v]कत् कदा वा [v]अस्य इन्द्रस्य [v]चित्रं चायनीयं धनं [v]चिकिते प्रज्ञायते । तत्प्रदानसमयं न कोऽपि जानातीत्यर्थः । [v]कत् कदा वा[1] [v]शशमानस्य स्तुवतः[2] [v]यज्योः यष्टुर्यजमानस्य [v]वृधे वर्धनाय [v]ऊती ऊत्या रक्षया [v]भुवत् भवेत् ॥

कथा शृणोति हूयमानमिन्द्रः कथा शृण्वन्नवसामस्य वेद ।
का अस्य पूर्वीरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे ॥ ३ ॥

कथा । शृणोति । हूयमानम् । इन्द्रः । कथा । शृण्वन् । अवसाम् । अस्य । वेद ।
काः । अस्य । पूर्वीः । उपऽमातयः । ह । कथा । एनम् । आहुः । पपुरिम् । जरित्रे ॥ ३ ॥

[v]इन्द्रः परमैश्वर्ययुक्तः [v]हूयमानम् आह्वयन्तं स्तोतारं [v]कथा कथं [v]शृणोति । स्तोत्राणि [v]शृण्वन् [v]अस्य स्तोतुः संबन्धीनि [v]अवसां रक्षणानि [v]कथा कथं च[3] [v]वेद वेत्ति । [v]पूर्वीः पुरातनानि [v]अस्य इन्द्रस्य संबन्धीनि [v]उपमातयः दानानि [v]काः [v]ह कानिचित्[4] सन्तीति शेषः । तानि दानानि [v]जरित्रे स्तोतुः संबन्धिनां कामानां [v]पपुरिं पूरयितारम् [v]एनम् इन्द्रं [v]कथा कथं च[5] [v]आहुः वदन्ति ॥

कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः ।
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत् ॥ ४ ॥

कथा । सऽबाधः । शशमानः । अस्य । नशत् । अभि । द्रविणम् । दीध्यानः ।
देवः । भुवत् । नवेदाः । मे । ऋतानाम् । नमः । जगृभ्वान् । अभि । यत् । जुजोषत् ॥ ४ ॥

[v]सबाधः सपत्नानां पीडासहितः [v]शशमानः इन्द्रविषयां स्तुतिं कुर्वन् [v]दीध्यानः कर्मभिः दीप्यमानो यजमानः [v]अस्य इन्द्रस्य संबन्धि [v]द्रविणं पश्वादिधनं [v]कथा कथम् [v]अभि [v]नशत्

१. ख-ग-च-ण-भ-'वा' नास्ति । २. ख-ग-घ-च-ण-भ-स्तुवतोऽस्य । ३. ख-ग-घ-च-ण-'च' नास्ति । ४. ख-ग-च-ण-न-भ-ञ-कानि । ५. ख-ग-च-ण-न-भ-'च' नास्ति ।

अभिप्राप्नोति । [v]नमः हविर्लक्षणमन्नं [v]जगृभ्वान् गृहीतवानिन्द्रः [v]यत् यदा [v]अभि [v]जुजोषत् माम् अभिसेवेत[1] तदा [v]देवः दीप्यमान इन्द्रः [v]मे मदीयानाम् [v]ऋतानां स्तोत्राणां[2] [v]नवेदाः अतिशयेन ज्ञाता [v]भुवत् भवेत् । अत्र निपातस्थो नकारोऽतिशयवाची ॥

कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।
कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे ॥ ५ ॥

कथा । कत् । अस्याः । उषसः । विऽउष्टौ । देवः । मर्तस्य । सख्यम् । जुजोष ।
कथा । कत् । अस्य । सख्यम् । सखिऽभ्यः । ये । अस्मिन् । कामम् । सुऽयुजम् । ततस्रे ॥५॥

[v]देवः द्योतमान इन्द्रः [v]अस्या [v]उषसो [v]व्युष्टौ प्रभाते [v]मर्तस्य मर्त्यस्य मनुष्यस्य स्तोतुः संबन्धि [v]सख्यं सखिकर्म [v]कथा कथं केन प्रकारेण [v]कत् कदा [v]जुजोष सेवेत । [v]ये स्तोतारः [v]अस्मिन् इन्द्रे [v]सुयुजं सुष्ठु प्रयुज्यमानं [v]कामं कामनीयं[3] हविः स्तोत्रं च [v]ततस्रे वितेनिरे [v]अस्य इन्द्रस्य [v]सख्यं सखिकर्म [v]सखिभ्यः स्तोतृभ्यः [v]कथा कथं [v]कत् कदाचित् । भवेदिति शेषः ॥ ॥ ९ ॥

किमादमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम ।
श्रिये सुदृशो वपुरस्य सर्गाः स्वर्ण चित्रतममिष आ गोः ॥ ६ ॥

किम् । आत् । अमत्रम् । सख्यम् । सखिऽभ्यः । कदा । नु । ते । भ्रात्रम् । प्र । ब्रवाम ।
श्रिये । सुऽदृशः । वपुः । अस्य । सर्गाः । स्वः । न । चित्रऽतमम् । इषे । आ । गोः ॥ ६ ॥

हे इन्द्र वयं यजमानाः ते त्वदीयम् [v]अमत्रं शत्रूनभिभावुकं [v]सख्यं सखिकर्म [v]सखिभ्यः स्तोतृभ्यः[4] [v]किमात् किं स्वित् [v]प्र [v]ब्रवाम प्रकर्षेण वदेम । [v]ते त्वदीयं [v]भ्रात्रं भ्रातृकर्म च [v]कदा [v]नु कदा खलु प्र ब्रवाम । [v]सुदृशः शोभनदर्शनस्य [v]अस्य इन्द्रस्य संबन्धिनः [v]सर्गाः उद्योगाः [v]श्रिये सर्वेषां स्तोतॄणां श्रेयसे । भवन्तीति शेषः । [v]स्वर्ण सूर्यो यथा दर्शनीयतमस्तथा [v]गोः गन्तुरिन्द्रस्य [v]चित्रतमं दर्शनीयतमं [v]वपुः शरीरम् [v]आ [v]इषे आ समन्तात् सर्वैरिष्यते ॥

द्रुहं जिघांसन्ध्वरसमनिन्द्रां तेतिक्ते तिग्मा तुजसे अनीका ।
ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ॥ ७ ॥

द्रुहम् । जिघांसन् । ध्वरसम् । अनिन्द्राम् । तेतिक्ते । तिग्मा । तुजसे । अनीका ।
ऋणा । चित् । यत्र । ऋणऽयाः । नः । उग्रः । दूरे । अज्ञाताः । उषसः । बबाधे ॥ ७ ॥

१. ख-ग-च-ण-म-ल–अभिसेवते । २. ख-ग-च-ण–च स्तोतॄणाम्; भ–च स्तोत्राणाम् । ३. ख-ग-ण-प-फ-भ–कमनीयम् । ४. ख-ग-च-ण–'स्तोतृभ्यः' नास्ति; न-स–तेभ्यः स्तोतृभ्यः ।

अयमिन्द्रः ᵛद्रुहं द्रोहं कुर्वतीं ᵛध्वरसं हिंसिकाम् ᵛअनिन्द्राम् इन्द्रमजानतीं राक्षसीं ᵛजिघांसन् हन्तुमिच्छन् ᵛतिग्मा तिग्मानि पूर्वमेव तीक्ष्णानि ᵛअनीका अनीकानि आयुधानि ᵛतुजसे तद्वधाय ᵛतेतिक्ते अत्यर्थं तीक्ष्णीकरोति। ᵛयत्र यासूषःसु तदुपलक्षितेष्वहःसु ᵛऋणा ᵛचित् ऋणान्यपि ᵛनः अस्मान् बाधन्त इति शेषः। ताः ᵛउषसः च ᵛउग्रः उद्गूर्णबलः ᵛऋणयाः ऋणस्य हन्तेन्द्रः। यातिः वधकर्मा। ᵛदूरे ᵛअज्ञाताः अननुभूताः सतीः ᵛबबाधे अपीडयत् ॥

ऋतपेयनाम्न्येकाहे मरुत्वतीयनिष्केवल्यशस्त्रयोः निविद्धानात्[1] पुरस्तात् ' ऋतस्य हि ' इत्येतदादिके द्वे ऋची क्रमेण शंसनीये। सूत्रितं च–' ऋतस्य हि शुरुधः सन्ति पूर्वीरिति सूक्तमुखीये[2] ' (आश्व. श्रौ. ९. ७) इति ॥

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति ।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः ॥ ८ ॥

ऋतस्य । हि । शुरुधः । सन्ति । पूर्वीः । ऋतस्य । धीतिः । वृजिनानि । हन्ति ।
ऋतस्य । श्लोकः । बधिरा । ततर्द । कर्णा । बुधानः । शुचमानः । आयोः ॥ ८ ॥

अत्र ऋतशब्देनेन्द्रो वादित्थो वा सत्यं वा यज्ञो वोच्यते। ᵛऋतस्य[3] ऋतदेवस्य संबन्धिन्यः ᵛपूर्वीः बह्वयः ᵛशुरुधः आपः ᵛसन्ति ᵛहि भवन्ति खलु। ᵛऋतस्य ऋतदेवस्य संबन्धिनी ᵛधीतिः प्रज्ञा तद्विषया स्तुतिर्वा ᵛवृजिनानि वर्जनीयानि पापानि ᵛहन्ति हिनस्ति। ᵛऋतस्य ऋतदेवस्य[3] संबन्धिनी ᵛश्लोकः स्तुतिरूपा वाक् ᵛआयोः गन्तुर्मनुष्यस्य संबन्धिनौ ᵛबधिरा बधिरौ प्रतिबद्धौ[4] ᵛकर्णा कर्णौ ᵛततर्द तृणत्ति। कीदृशः श्लोकः। ᵛबुधानः बुध्यमानः ᵛशुचमानः दीप्यमानः ॥

ऋतस्य दृळ्हा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि ।
ऋतेन दीर्घमिषणन्त पृक्षं ऋतेन गावं ऋतमा विवेशुः ॥ ९ ॥

ऋतस्य । दृळ्हा । धरुणानि । सन्ति । पुरूणि । चन्द्रा । वपुषे । वपूंषि ।
ऋतेन । दीर्घम् । इषणन्त । पृक्षः । ऋतेन । गावः । ऋतम् । आ । विवेशुः ॥ ९ ॥

ᵛवपुषे वपुष्मतः। षष्ठ्यर्थे चतुर्थी। ᵛऋतस्य ऋतदेवस्य संबन्धीनि ᵛदृळ्हा दृढानि ᵛधरुणानि धारकाणि ᵛपुरूणि बहूनि ᵛचन्द्रा चन्द्राण्याह्लादकानि ᵛवपूंषि रूपाणि ᵛसन्ति भवन्ति। ᵛऋतेन ऋतदेवेन ᵛदीर्घम् अत्यधिकं ᵛपृक्षः अन्नम् ᵛइषणन्त स्तोतार इच्छन्ति। ᵛऋतेन ऋतदेवेन ᵛगावः धेनवः ᵛऋतं यज्ञं दक्षिणास्वेन ᵛआ ᵛविवेशुः प्रविशन्ति। यद्वा। गावो रश्मय ऋतमुदकम् आविवेशुः ॥

१. ख-ग-च-ण-न-स–निविद्धानीयात्। २. घ-फ-भ–सूक्तमुखे। ३. ख-ग-च-ण–ऋतस्य देवस्य संबन्धिनी धीतिः प्रज्ञा वृजिना वर्जनीयानि पापानि हन्ति हिनस्ति। ऋतस्य ऋतदेवस्य संबन्धिन्यः पूर्वीः बह्वयः शुरुधः आपः सन्ति हि भवन्ति खलु। ऋतस्य इन्द्रस्य। ४. ख-ग-च-ण-न-भ-स–' प्रतिबद्धौ ' नास्ति।

ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः ।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥ १० ॥

ऋतम् । येमानः । ऋतम् । इत् । वनोति । ऋतस्य । शुष्मः । तुरऽयाः । ऊँ इति । गव्युः ।
ऋताय । पृथ्वी इति । बहुले इति । गभीरे इति ।
ऋताय । धेनू इति । परमे इति । दुहाते इति ॥ १० ॥

ऋतम् ऋतदेवं येमानः नियच्छन् स्तुतिभिर्वशीकुर्वन् स्तोता ऋतमित् ऋतदेवमेव वनोति संभजते। ऋतस्य ऋतदेवस्य[1] संबन्धि शुष्मः बलं तुरयाः तूर्णं गव्युः । उ इति चार्थे । जलकामश्च भवति । बहुले विस्तीर्णे गभीरे दुरवगाहे पृथ्वी द्यावापृथिव्यौ ऋताय ऋतदेवाय[2] भवतः । धेनू प्रीणयित्र्यौ परमे उत्कृष्टे द्यावापृथिव्यौ ऋताय ऋतदेवायैव दुहाते दोहनं कुर्वाते ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योः न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ १० ॥

' का सुष्टुतिः ' इत्येकादशर्चं तृतीयं सूक्तं वामदेवस्यार्षमैन्द्रम् । दशम्यनुष्टुप् शिष्टास्त्रिष्टुभः । तथा चानुक्रमणिका—' का सुष्टुतिरुपान्त्यानुष्टुप् ' इति । विनियोगो लैङ्गिकः ॥

का सुष्टुतिः शवसः सूनुमिन्द्रमर्वाचीनं राधस आ ववर्तत् ।
ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधो नो जनासः ॥ १ ॥

का । सुऽस्तुतिः । शवसः । सूनुम् । इन्द्रम् । अर्वाचीनम् । राधसे । आ । ववर्तत् ।
ददिः । हि । वीरः । गृणते । वसूनि । सः । गोऽपतिः । निःऽसिधाम् । नः । जनासः ॥ १ ॥

का कीदृशी सुष्टुतिः शवसः सूनुं बलस्य पुत्रम् । अतिबलिनमित्यर्थः । अर्वाचीनम् अस्मदभिमुखम् इन्द्रं परमैश्वर्ययुक्तं राधसे धनाय अस्मभ्यं धनं दातुम् आ ववर्तत् आवर्तयेत् । हे जनासः जना यजमानाः वीरः विक्रान्तः गोपतिः पश्वादिधनस्य पालकः सः इन्द्रः निष्षिधां निष्पेद्वृणां शत्रूणां संबन्धीनि वसूनि धनानि गृणते गृणद्भ्यः स्तोतृभ्यः नः अस्मभ्यं ददिर्हि दाता खलु भवति ॥

१. ख-ग-च-ण–देवस्य । २. ख-ग-च-ण–देवाय ।

स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इन्द्रः सत्यराधाः ।
स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥ २ ॥

सः । वृत्रऽहत्ये । हव्यः । सः । ईड्यः । सः । सुऽस्तुतः । इन्द्रः । सत्यऽराधाः ।
सः । यामन् । आ । मघऽवा । मर्त्याय । ब्रह्मण्यते । सुस्वये । वरिवः । धात् ॥ २ ॥

[v]सः इन्द्रः [v]वृत्रहत्ये वृत्राणां शत्रूणां हत्ये हनने निमित्तभूते सति [v]यामन् युद्धे [v]हव्यः आह्वातव्यो भवति । [v]सः इन्द्रः [v]ईड्यः स्तुत्यो भवति । [v]सः [v]इन्द्रः [v]सुष्टुतः सन् [v]सत्यराधाः यजमानेभ्यो दातुं सत्यधनो भवति । [v]मघवा धनवान् [v]सः इन्द्रः [v]ब्रह्मण्यते स्तोत्रमिच्छते [v]सुष्वये सोमं सुन्वते [v]मर्त्याय मनुष्याय यजमानाय [v]वरिवः धनम् । वरिव इति धननामैतत् । [v]आ [v]धात् आ समन्तात् ददाति ॥

तमिन्नरो वि ह्वयन्ते समीके रिरिक्वांसस्तन्वः कृण्वत त्राम् ।
मिथो यत्त्यागमुभयासो अग्मन्नरस्तोकस्य तनयस्य सातौ ॥ ३ ॥

तम् । इत् । नरः । वि । ह्वयन्ते । सम्ऽईके । रिरिक्वांसः । तन्वः । कृण्वत । त्राम् ।
मिथः । यत् । त्यागम् । उभयासः । अग्मन् । नरः । तोकस्य । तनयस्य । सातौ ॥ ३ ॥

[v]नरः नेतारो मनुष्याः [v]समीके युद्धे [v]तमित् तमेवेन्द्रं [v]वि [v]ह्वयन्ते विविधमाह्वानं कुर्वते । [v]तन्वः स्वकीयानि शरीराणि [v]रिरिक्वांसः तपसा रेचयन्तो यजमानास्तमेवेन्द्रं [v]त्रां त्रातारं [v]कृण्वत कृण्वते कुर्वते । [v]यत् यदा [v]मिथः परस्परं संगताः [v]उभयासः उभये यजमानाः स्तोतारश्च [v]त्यागं त्यागकर्तारं दातारमिन्द्रम् [v]अग्मन् उपगच्छन्ति[1] तदा [v]नरः उभयविधा मनुष्याः [v]तोकस्य पुत्रस्य [v]तनयस्य पौत्रस्य च [v]सातौ लाभे निमित्तभूते सति[2] तमेवेन्द्रं त्रातारं कुर्वन्तीति संबन्धः ॥

क्रतूयन्ति क्षितयो योगे उग्राशुषाणासो मिथो अर्णसातौ ।
सं यद्विशोऽववृत्रन्त युध्मा आदिन्नेम इन्द्रयन्ते अभीके ॥ ४ ॥

क्रतुऽयन्ति । क्षितयः । योगे । उग्र । आशुषाणासः । मिथः । अर्णऽसातौ ।
सम । यत् । विशः । अववृत्रन्त । युध्माः । आत् । इत् । नेमे । इन्द्रयन्ते । अभीके ॥ ४ ॥

हे [v]उग्र उरूर्णबलेन्द्र [v]आशुषाणासः व्याप्नुवन्तः [v]क्षितयः मनुष्याः । क्षितय इति मनुष्यनामैतत् । [v]अर्णसातौ सस्यादिफलसिद्ध्यर्थमुदकलाभे निमित्ते सति [v]मिथः परस्परं [v]योगे संबन्धे सति [v]क्रतूयन्ति क्रतूनि कर्माणीच्छन्ति । [v]यत् यदा [v]युध्माः योधयिष्यः [v]विशः प्रजाः [v]अभीके युद्धे ।

१. ख–अनुगच्छन्ति; प–उपागच्छन्ति । २. ख-ग-च-ण-न-भ–'सति' नास्ति ।

अभीक इति संग्रामनामैतत् । ᵛसम् ᵛअववृत्रन्त संवर्तन्ते परस्परं संगच्छन्ते ᵛआदित् तदानीमेव ᵛनेमे केचन भाग्यवन्तो योधकाः ᵛहृन्द्रयन्ते युद्धे इन्द्रमिच्छन्ति ॥

आदिद्ध नेम इन्द्रियं यजन्त आदित्पक्तिः पुरोळाशं रिरिच्यात् ।
आदित्सोमो वि पपृच्यादसुष्वीनादिज्जुजोष वृषभं यजध्यै ॥ ५ ॥

आत् । इत् । ह । नेमे । इन्द्रियम् । यजन्ते । आत् । इत् । पक्तिः । पुरोळाशम् । रिरिच्यात् ।
आत् । इत् । सोमः । वि । पपृच्यात् । असुस्वीन् । आत् । इत् । जुजोष । वृषभम् । यजध्यै ॥५॥

ᵛआदित् तदानीमेव युद्धकाले ᵛनेमे अन्ये योधाः ᵛहृन्द्रियं बलवन्तमिन्द्रं ᵛयजन्ते ᵛह पूजयन्ति[1] खलु । कश्चित् ᵛआदित् अनन्तरमेव ᵛपुरोळाशं पिष्टरूपं हविः ᵛपक्तिः पचन् ᵛरिरिच्यात् इन्द्राय दद्यात् । ᵛआदित्[2] अनन्तरमेव ᵛसोमः अभिषुतसोमो यजमानः ᵛअसुष्वीन् अनभिषुतसोमान् यजमानान् ᵛवि ᵛपपृच्यात् धनैः पृथक्कुर्यात्[2] । ᵛआदित् अनन्तरमेव कश्चित् ᵛवृषभं कामानां वर्षितारमिन्द्रं ᵛयजध्यै यष्टुं ᵛजुजोष सेवते ॥ ॥ ११ ॥

कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति ।
सध्रीचीनेन मनसाविवेनं तमित्सखायं कृणुते समत्सु ॥ ६ ॥

कृणोति । अस्मै । वरिवः । यः । इत्था । इन्द्राय । सोमम् । उशते । सुनोति ।
सध्रीचीनेन । मनसा । अविडवेनम् । तम् । इत् । सखायम् । कृणुते । समत्ऽसु ॥ ६ ॥

ᵛयः यजमानः ᵛसोमम् ᵛउशते कामयमानाय ᵛइत्था अमुत्र स्वर्गलोके स्थिताय ᵛइन्द्राय ᵛसुनोति अभिषवं करोति इन्द्रोऽपि ᵛअस्मै यजमानाय ᵛवरिवः धनं ᵛकृणोति करोति । ᵛसध्रीचीनेन संगतेन ᵛमनसा प्रवणेन चित्तेन ᵛअविवेनम् । वेनतिः कान्तिकर्मा । विवेनो विगतेच्छः । तदन्योऽविवेनः । आत्मानं कामयमानं ᵛतमित् तमेव सुन्वन्तं यजमानं ᵛसखायं मित्रं ᵛसमत्सु संग्रामेष्विन्द्रः ᵛकृणुते करोति ॥

य इन्द्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः ।
प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिन्द्रः ॥ ७ ॥

यः । इन्द्राय । सुनवत् । सोमम् । अद्य । पचात् । पक्तीः । उत । भृज्जाति । धानाः ।
प्रति । मनायोः । उचथानि । हर्यन् । तस्मिन् । दधत् । वृषणम् । शुष्मम् । इन्द्रः ॥ ७ ॥

---

१. ख-ग-च-ण-त-न-भ-स-पूजयन्ते । २. ख-ग-घ-च-ण-भ-स-' आदित् ... पृथक्कुर्यात् ' नास्ति ।

[v]अद्य अस्मिन् दिवसे [v]यः यजमानः [v]इन्द्राय परमैश्वर्ययुक्ताय देवाय [v]सोमं[1] सोमलक्षणमन्नं [v]सुनवत् सुनुयात् अभिषवं कुर्यात्। तथा यः [v]पक्त्री: पक्तव्यांश्च पुरोडाशादीन् [v]पचात् पचेत् पचनं कुर्यात्। [v]उत अपि च यः [v]धानाः भर्जनयोग्यान् यवान्। अत्र भृष्टयववाची धानाशब्दस्तद्योग्यं यवमात्रं लक्षयति। [v]भृज्जाति भृज्जेत भर्जनं कुर्यात्। [v]इन्द्रः [v]मनायोः स्तुतिमिच्छतो यजमानस्य [v]उचथानि स्तोत्राणि [v]प्रति [v]हर्यन् प्रतिकामयमानः सन् [v]तस्मिन् यजमाने [v]वृषणं कामानां वर्षणसमर्थं [v]शुष्मं बलं [v]दधत् धारयति॥

यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः।
अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं सोमसुद्भिः॥ ८॥

यदा। सऽमर्यम्। वि। अचेत्। ऋघावा। दीर्घम्। यत्। आजिम्। अभि। अख्यत्। अर्यः।
अचिक्रदत्। वृषणम्। पत्नी। अच्छ। दुरोणे। आ। निऽशितम्। सोमसुत्ऽभिः॥ ८॥

[v]यदा [v]ऋघावा[2] शत्रूणां हिंसक इन्द्रः [v]समर्यं सह मर्तव्यं शत्रुं [v]व्यचेत व्यजानीयात् विशेषेण जानीयात्। [v]यत् यदा [v]अर्यः स्वामीन्द्रः [v]दीर्घम् अत्यधिकम् [v]आजिं संग्रामम् [v]अभ्यख्यत अभिपश्येत तदा तस्य[3] इन्द्रस्य [v]पत्नी [v]दुरोणे यज्ञगृहे [v]सोमसुद्भिः सोमं सुन्वद्भिर्ऋत्विग्भिः [v]निशितं तीक्ष्णीकृतम्। सोमपानेनोत्साहवन्तमित्यर्थः। [v]वृषणं कामानां वर्षितारमिन्द्रम् [v]अच्छ अभि आ [v]अचिक्रदत आक्रन्दति आह्वयते॥

भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन्।
स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम्॥ ९॥

भूयसा। वस्नम्। अचरत्। कनीयः। अविऽक्रीतः। अकानिषम्। पुनः। यन्।
सः। भूयसा। कनीयः। न। अरिरेचीत्। दीनाः। दक्षाः। वि। दुहन्ति। प्र। वाणम्॥ ९॥

अत्र ऋग्द्वये संप्रदायविद्भिः पूर्वाचार्यैः केचित् श्लोकाः पठ्यन्ते। ते एव[4] लिख्यन्ते। 'अल्पं यः परिगृह्णाति मूल्यं पण्येन भूयसा। स क्रेतारं पुनर्गच्छन्न विक्रीतस्त्वयं[5] मया[6]॥ १॥ इति ब्रुवन्कामयते पुनर्मूल्यस्य पूरणम्। स[7] विक्रेता[8] पुनर्मूल्यं भूयसा न प्रपूरयेत्॥२॥ हीनं न लभते वस्नं[9] यदा विक्रीतवान्पुरा। यथासमयमेव स्यात्तयोर्न पुनरन्यथा॥ ३॥ अयं विक्रय एवेति समयश्चेत् कृतो[10] भवेत्। अथ मूल्यार्थमेतस्यादिचार्यैव[11] तु निर्णयः[9]॥४॥ इत्येवं समयोऽकारि तदा मूल्यं प्रपूर्यते[10]। तस्मादादौ मया कार्यः समयोऽत्रेति[11] चिन्तयन्[12]॥ ५॥ वामदेवो वशीकृत्य शक्रं स्तोत्रेण भूयसा। विक्रीणन्

१. ख-ग-च-ण-न-भ-'सोमं' नास्ति। २. त-ऋघावान् हिंसावान्। ३. ख-ग-च-ण-अस्य। ४. फ-अत्र। ५. ख-ग-च-ण-त-न-भ-स विक्रीतवान् पुरा। ६. ख-ग-च-ण-भ-विक्रेता न। ७. त-न-भ-स-वक्तुम्; ल-क्रेतुः। ८. ख-ग-च-ण-त-न-भ-स-कुतो। ९. ख-ण-°मेतस्यामविचार्यैव निश्चयः; ग-च-°मेतस्यामविचार्ये विनिश्चयः; न-भ-सु-° मेतस्यामविचार्यैव निर्णयः। १०. ल-प्रवर्तते। ११. ण-त-भ-समयो नेति चिन्तयेत्।

समयं चक्र इन्द्रं क इममित्यृचि ॥ ६ ॥ अतश्च द्वृच एकार्थो भूयसा वस्नमित्ययम्[1] ' इति ॥ अयमर्थः प्रतिपाद्यते । कश्चित् vभूयसा भूम्ना पण्येन द्रव्येण vकनीयः अल्पतरं vवस्नं वसु मूल्यं धनम् vअचरत् प्राप्नोति । vपुनर्यन् क्रेतारं पुनर्गच्छन् स विक्रेतायमर्थो मया vअविक्रीतः इति ब्रुवन् vअकानिषं मूल्यपूर्तिं कामयते ॥ व्यत्ययेन उत्तमपुरुषः ॥ vसः विक्रेता vभूयसा धनेन vकनीयः अल्पतरं मूल्यं vनारिरेचीत् क्रेतुः सकाशान्न रिक्तीकरोति । न लभत इत्यर्थः । vदीनाः असमर्थाः vदक्षाः समर्थाश्च vवाणं वचनं vवि vप्र vदुहन्ति यथोक्तं क्रयकाले तथैव लभन्ते ॥

क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः। यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत् ॥१०॥

कः । इमम् । दशऽभिः । मम । इन्द्रम् । क्रीणाति । धेनुऽभिः ।

यदा । वृत्राणि । जङ्घनत् । अथ । एनम् । मे । पुनः । ददत् ॥ १० ॥

vमम मदीयम् vइमं स्वभूतम् vइन्द्रं vधेनुभिः प्रीणयित्रीभिः vदशभिः दशसंख्याकाभिः स्तुतिभिः[2] vकः vक्रीणाति क्रयं करोति । तदानीं हे क्रेतारो युष्माकं मध्ये एवमपि समयः क्रियते । vयदा अयमिन्द्रः vवृत्राणि स्वकीयान् शत्रून् vजङ्घनत् हन्यात् vअथ अनन्तरमेव vएनम् इन्द्रं vमे मह्यं vपुनर्ददत् पुनर्दद्यात् ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योः न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।

अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥ ॥ १२ ॥

' को अद्य ' इत्यष्टर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं— ' को अद्याष्टौ ' इति । दशरात्रे चतुर्थेऽहनि माध्यंदिने सवने स्तोमवृद्धौ मैत्रावरुणशस्त्रे आरम्भणीयाया उपरिष्टादिदं सूक्तमावपनीयं च । सूत्रितं च—' स्तोमे वर्धमाने को अद्य नर्यः ' (आश्व. श्रौ. ७, १२) इति ॥

को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष ।
को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥ १ ॥

कः । अद्य । नर्यः । देवऽकामः । उशन् । इन्द्रस्य । सख्यम् । जुजोष ।

कः । वा । महे । अवसे । पार्याय । सम्ऽइद्धे । अग्नौ । सुतऽसोमः । ईट्टे ॥ १ ॥

---

१. ख-ग-च-ण-फ-भ-वस्नमीरितम्; ल-वस्नमित्यृचम् । २. ख-ग-च-ण-त-न-प-फ-भ-स-' स्तुतिभिः ' नास्ति ।

[v]अद्य अस्मिन् दिवसे [v]नर्यः[१] मनुष्यहितः[२] [v]देवकामः देवानिच्छन् [v]उशन् कामयमानः [v]कः यजमानः [v]इन्द्रस्य [v]मख्यं सखित्वं [v]जुजोष सेवते । किंच [v]सुतसोमः अभिषुतसोमः [v]को [v]वा यजमानः [v]अग्नौ [v]समिद्धे प्रज्वलिते सति [v]महे महते प्रवृद्धाय [v]पार्याय पारमर्हते [v]अवसे तर्पणाय[३] [v]ईट्टे इन्द्रं स्तौति ॥

को नानाम वचसा सोम्यायं मनायुर्वा भवति वस्त उस्राः ।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥ २ ॥

कः । नानाम । वचसा । सोम्यायं । मनायुः । वा । भवति । वस्ते । उस्राः ।
कः । इन्द्रस्य । युज्यम् । कः । सखिऽत्वम् । कः । भ्रात्रम् । वष्टि । कवये । कः । ऊती ॥ २ ॥

[v]कः यजमानः [v]वचसा वाग्रूपया स्तुत्या [v]सोम्याय सोमार्हायेन्द्राय [v]ननाम नमति प्रह्वीभवति । कः [v]वा इन्द्राय [v]मनायुः [v]भवति स्तुतिकामोऽस्ति । कः [v]उस्राः इन्द्रेण दत्ता गाः [v]वस्ते आच्छादयति । धारयतीत्यर्थः[४] । [v]कः [v]इन्द्रस्य [v]युज्यं साहाय्यं [v]वष्टि इच्छति । [v]कः [v]सखित्वं [v]को [v]भ्रात्रं भ्रातृभावं वष्टि इच्छति । [v]कवये[५] क्रान्तदर्शिने इन्द्राय [v]ऊती ऊतये तर्पणाय [v]कः । भवतीति शेषः ॥

को देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।
कस्याश्विनाविन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥ ३ ॥

कः । देवानाम् । अवः । अद्य । वृणीते । कः । आदित्यान् । अदितिम् । ज्योतिः । ईट्टे ।
कस्य । अश्विनौ । इन्द्रः । अग्निः । सुतस्य । अंशोः । पिबन्ति । मनसा । अविऽवेनम् ॥ ३ ॥

[v]अद्य अस्मिन् दिने [v]कः यजमानः [v]देवानां द्योतमानानामिन्द्रादीनाम् [v]अवः रक्षणं [v]वृणीते प्रार्थयते । [v]क [v]आदित्यान् देवान्[६] [v]अदितिं देवमातरं च [v]ज्योतिः उदकं च[७] [v]ईट्टे याचते । [v]अश्विनौ अश्विदेवौ[८] [v]इन्द्रः च [v]अग्निः च [v]मनसा स्तुत्या प्रीताः सन्तः [v]अविवेनम् अविगतकामम् । यथाकाममित्यर्थः । [v]कस्य यजमानस्य संबन्धिनं [v]सुतस्य अभिषुतस्य [v]अंशोः सोमस्य । सोममित्यर्थः[९] । [v]पिबन्ति पानं कुर्वन्ति ॥

---

१. ख-प-फ-भ–कः नर्यः । २. ल–मनुष्यः नृभ्यो हितः । ३. ख-ग-च-ण-त-न-प-फ-भ-स–अर्पणाय । ४. ख-ग-च-ण-भ–कः सखित्वं कः भ्रात्रं भ्रातृत्वं च धारयतीत्यर्थः । क इन्द्रस्य युज्यं साहाय्यं वष्टि इच्छति । कः कवये । ५. ख-ग-च-ण–'देवान्' नास्ति । ६. ख-ग-च-ण-न-भ–'च' नास्ति । ७. ख-ग-च-ण-भ–देवौ । ८. ख-ग-च-ण-भ–सोमम् ।

तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम् ॥ ४ ॥

तस्मै । अग्निः । भारतः । शर्म । यंसत् । ज्योक् । पश्यात् । सूर्यम् । उत्ऽचरन्तम् ।
यः । इन्द्राय । सुनवाम । इति । आह । नरे । नर्याय । नृऽतमाय । नृणाम् ॥ ४ ॥

[v]भारतः हविषो भर्ताग्निः । 'प्राणो भूत्वा प्रजा धारयन् भारतः' इति वाजसनेयकम् । [v]अग्निः [v]तस्मै यजमानाय [v]शर्म सुखं [v]यंसत् यच्छेत् । किंचायमग्निः [v]ज्योक् चिरकालम् [v]उच्चरन्तम् उद्यन्तं [v]सूर्यं [v]पश्यात् पश्येत् । [v]यः यजमानः [v]इन्द्राय [v]सुनवामेत्याह इन्द्रार्थं सोमाभिषवं कुर्यामिति ब्रवीति । कीदृशायेन्द्राय । [v]नरे नेत्रे [v]नर्याय नरहिताय [v]नृणां नराणां नेतृणां[1] मध्ये[1] [v]नृतमाय नेतृतमाय ॥

न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत् ।
प्रियः सुकृत्प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥ ५ ॥

न । तम् । जिनन्ति । बहवः । न । दभ्राः । उरु । अस्मै । अदितिः । शर्म । यंसत् ।
प्रियः । सुऽकृत् । प्रियः । इन्द्रे । मनायुः । प्रियः । सुप्रऽअवीः । प्रियः । अस्य । सोमी ॥ ५ ॥

[v]दभ्राः अल्पाः[2] [v]बहवो[3] [v]न[3] बहवोऽपि शत्रुजनाः[4] [v]तं यजमानं [v]न [v]जिनन्ति न हिंसन्तु । य इन्द्राय सुनवामेत्याह तमिति पूर्वेण संबन्धः । [v]अदितिः इन्द्रमाता [v]अस्मै[5] यजमानाय [v]उरु विस्तीर्णं [v]शर्म सुखं [v]यंसत् यच्छतु । किंच [v]इन्द्रे इन्द्राय [v]सुकृत् शोभनयागादीनां[6] कर्ता यजमानः [v]प्रियः भवति । [v]मनायुः इन्द्रविषयस्तुतिकामश्चास्येन्द्रस्य[7] [v]प्रियः भवति[7] । [v]सुप्रावीः सुष्ठु[8] प्रावितां[8] सुष्ठु प्रगच्छन्नुपगच्छन् वा यजमानोऽस्येन्द्रस्य [v]प्रियः भवति । [v]सोमी सोमवान् यजमानः [v]अस्य इन्द्रस्य [v]प्रियः भवति ॥ ॥ १३ ॥

सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः ॥ ६ ॥

सुप्रऽअव्यः । प्राशुषाट् । एषः । वीरः । सुस्वेः । पक्तिम् । कृणुते । केवला । इन्द्रः ।
न । असुस्वेः । आपिः । न । सखा । न । जामिः ।
दुःप्रऽअव्यः । अवऽअहन्ता । इत् । अवाचः ॥ ६ ॥

१. ख-ग-च-ण-भ-'नेतृणां मध्ये' नास्ति । २. ख-ग-च-ण-फ-भ-दक्षाः; घ-न-प-स-लक्ष्याः । ३. ख-ग-च-ण-न-'बहवो न' नास्ति । ४. ख-ग-घ-च-ण-त-न-स-शत्रुजाताः । ५. त-तस्मै । ६. ख-त-प-फ-शोभनमार्गादीनाम् । ७. ख-ग-मनोयुक्तो यजमानः; घ-च-ण-न-भ-स 'इन्द्रविषय°...भवति' नास्ति । ८. त-ल-हविर्भिः सुष्ठु प्रतर्पयिता ।

vप्राशुषाट् शत्रूणां प्रकर्षेण शीघ्रमभिभविता vवीरः विक्रान्तः vएषः vइन्द्रः vसुप्राव्यः सुष्ठु उपगच्छतो हविर्भिः सुष्ठु प्रतर्पयितुर्वा vसुन्वेः सुन्वतो यजमानस्य संबन्धिनीं vकेवला केवलामसाधारणां vपक्तिं vकृणुते आत्मनः कुरुते । किंचेन्द्रः vअसुन्वेः असुन्वतोऽयजमानस्य vआपिः व्याप्तः vन भवति । इन्द्रोऽयजमानस्य[1] vसखा[1] vन भवति । vजामिः बन्धुश्च vन भवति । अपि च vदुष्प्राव्यः दुरुपगमनस्य vअवाचः स्तुतिरहितस्य पुरुषस्य vअवहन्तेत् हिंसितैव भवति ॥

न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥ ७ ॥

न । रेवता । पणिना । सख्यम् । इन्द्रः । असुन्वता । सुतऽपाः । सम् । गृणीते ।
आ । अस्य । वेदः । खिदति । हन्ति । नग्नम् । वि । सुस्वये । पक्तये । केवलः । भूत् ॥ ७ ॥

vसुतपाः अभिषुतं सोमं पिबन् vइन्द्रः vरेवता धनवता vपणिना वणिजा लुब्धेन vअसुन्वता सोमाभिषवमकुर्वता अयजमानेन सह vसख्यं सखित्वं vन vसं vगृणीते न संस्तौति । नानुमन्यत इत्यर्थः । किंच vअस्य अयजमानस्य vनग्नं निरर्थकं vवेदः धनं ज्ञानं वा vआ vखिदति उद्धरति । vहन्ति हिनस्ति च । अपि च vसुष्वये सोमं सुन्वते vपक्तये हवींषि पचते यजमानाय vकेवलः असाधारणः सन् vवि vभूत् विभवति ॥

इन्द्रं परेऽवरे मध्यमासु इन्द्रं यान्तोऽवसितासु इन्द्रम् ।
इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥ ८ ॥

इन्द्रम् । परे । अवरे । मध्यमासः । इन्द्रम् । यान्तः । अवऽसितासः । इन्द्रम् ।
इन्द्रम् । क्षियन्तः । उत । युध्यमानाः । इन्द्रम् । नरः । वाजयन्तः । हवन्ते ॥ ८ ॥

vपरे उत्कृष्टाः vअवरे निकृष्टाश्च जनाः[2] vइन्द्रं[3] vहवन्ते आह्वयन्ति । vमध्यमासः मध्यमाश्च vइन्द्रम् एव हवन्ते । vयान्तः कार्यसिद्ध्यर्थं गच्छन्तो जनाः[4] इन्द्रमेवाह्वयन्ति । vअवसितासः निविष्टाश्च[5] vइन्द्रम् एवाह्वयन्ति । vक्षियन्तः गृहे निवसन्तो जनाः vइन्द्रम् एव हवन्ते । vउत अपि च vयुध्यमानाः युद्धं कुर्वाणा जना जयार्थमिन्द्रमेवाह्वयन्ति । vवाजयन्तः वाजमन्नमिच्छन्तः vनरः नेतारो मनुष्याः vइन्द्रम् एव vहवन्ते ॥ ॥ १४ ॥

'अहं मनुः' इति सप्तर्चं पञ्चमं सूक्तं वामदेवस्यार्षम् । अत्रेयमनुक्रमणिका—'अहं मनुः सप्ताद्याभिस्तिसृभिरिन्द्रमिवात्मानमृषिस्तुष्टावेन्द्रो वात्मानं परा नवाष्टौ वा श्येनरसुतिः' इति ।

---

१. ल–सखा सहायश्च । २. च–' जनाः ' नास्ति । ३. च-फ–इन्द्रमेव । ४. ख-ग-ण-न-म–जनाः जयार्थम् । ५. च–उद्योगिनो जनाः जयार्थं च ।

अत्र 'अहं मनुः' इत्याद्याभिस्तिसृभिरात्मानमिन्द्ररूपेण वामदेवः स्तुतवान्। यद्वा। इन्द्र एव आत्मानं स्तुतवान्। अतो वामदेववाक्यपक्षे[१] वामदेव ऋषिरिन्द्रो देवता। इन्द्रवाक्यपक्षे[२] त्विन्द्र ऋषिः परमात्मा देवता। त्रिष्टुप् छन्दः। अवशिष्टानां वामदेव ऋषिः। अवशिष्टाभिरुत्तरसूक्तेन च सुपर्णात्मना[३] ब्रह्म स्तूयते। अतस्तासां परब्रह्म देवता। इयेननाम्येकाहे माध्यंदिनसवने मरुत्वतीयशस्त्रे इदं सूक्तम्। सूत्रितं च—'इयेनाजिराभ्यामभिचरन्यजेताहं मनुर्गर्भे नु सन्' (आश्व. श्रौ. ९. ७) इति॥

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।
अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा॥ १॥

अहम्। मनुः। अभवम्। सूर्यः। च। अहम्। कक्षीवान्। ऋषिः। अस्मि। विप्रः।
अहम्। कुत्सम्। आर्जुनेयम्। नि। ऋञ्जे। अहम्। कविः। उशना। पश्यत। मा॥ १॥

इदमादिमन्त्रत्रयेण[४] गर्भे वसन् वामदेवः[५] उत्पन्नतत्त्वज्ञानः सन्[६] सार्वात्म्यं[७] स्वानुभवं[८] मन्वादिरूपेण प्रदर्शयन्नाह। [V]अहं वामदेव इन्द्रो[९] वा[९] [V]मनुरभवं सर्वस्य मन्ता प्रजापतिरस्मि। [V]अहम् एव [V]सूर्यश्च सर्वस्य प्रेरकः सविता चास्मि। [V]विप्रः मेधावी [V]कक्षीवान् दीर्घतमसः पुत्रः एतत्संज्ञकः[१०] [V]ऋषिः अप्यहमेव [V]अस्मि। [V]आर्जुनेयम्[११] अर्जुन्याः पुत्रं [V]कुत्सम् एतन्नामकमृषिम् [V]अहम् एव [V]न्यृञ्जे नितरां प्रसाधयामि। [V]कविः क्रान्तदर्शी [V]उशना एतदाख्य ऋषिः [V]अहम् एवास्मि। उक्तमुपलक्षणम्। परमार्थदृष्ट्या कृत्स्नमप्यहमेवास्मीत्यर्थः। हे जनाः [V]मा मां सर्वात्मकं [V]पश्यत। यूयमप्येवमेव स्वस्वरूपमनुभवतेत्युक्तं भवति[११]॥

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय।
अहमपो अनयं वावशाना मम देवासो अनुकेतमायन्॥ २॥

अहम्। भूमिम्। अददाम्। आर्याय। अहम्। वृष्टिम्। दाशुषे। मर्त्याय।
अहम्। अपः। अनयम्। वावशानाः। मम। देवासः। अनु। केतम्। आयन्॥ २॥

[V]अहं वामदेव इन्द्रो वा [V]आर्याय मनवे [V]भूमिं पृथ्वीम् [V]अददां दत्तवानस्मि। [V]दाशुषे हविर्दत्तवते [V]मर्त्याय मनुष्याय[१२] यजमानाय [V]वृष्टिं सस्याद्यभिवृद्ध्यर्थं वृष्टिलक्षणमुदकम् [V]अहम् एव

---

१. ख-ग-घ-च-ण-त-स—वामदेववाक्यत्वात्। २. ख-ग-ण—इन्द्रवाक्ये; च—इन्द्रवाक्यत्वे; स—इन्द्रवाक्यत्वात्। ३. ख-ग-च-त-न-स—सुपर्णात्मा। ४. त—°मन्त्रत्रयेऽयम्। ५. ग-च-ण—वामदेवोऽयम्। ६. ख-ग-च-ण-ल-स—'सन्' नास्ति। ७. ख-ग-च-ण-त-ल-स—सर्वात्म्यम्। ८. ग—मुस्वानुभवम्; च-ण—सुखानुभवम्; त-न—सानुभवम्। ९. त—'इन्द्रो वा' नास्ति। १०. ख-ग-च-ण-न—'एतत्संज्ञकः' नास्ति। ११. ख-ग-घ-च-ण-स—उक्तमुपलक्षणम्। परमार्थदृष्ट्या कृत्स्नमप्यहमेवास्मीत्यर्थः। हे जनाः मा (ख-ग-घ-ण—'मा' नास्ति) मां सर्वात्मकं पश्यत। यूयं मामेवं स्वस्वरूपमनुभवतेत्युक्तं भवति। किंच आर्जुनेयमर्जुन्याः पुत्रं कुत्समहं न्यृञ्जे प्रसाधये। अहं कविः सर्वज्ञः उशना (ग-च-स—उशानः) शुक्र इति मा मां पश्यत। १२. ख-ग-च-ण—'मनुष्याय' नास्ति।

अददाम् । किंच ᵛअहं ᵛवावशानाः शब्दायमानाः ᵛअपः उदकानि ᵛअनयं सर्वमपि प्रदेशम् अगमयम् । ᵛदेवासः वह्न्यादयो देवाः ᵛमम ᵛकेतं मदीयं संकल्पम् ᵛअनु ᵛआयन् अनुयन्ति ॥

अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य ।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम् ॥ ३ ॥

अहम् । पुरः । मन्दसानः । वि । ऐरम् । नव । साकम् । नवतीः । शम्बरस्य ।
शततमम् । वेश्यम् । सर्वताता । दिवःदासम् । अतिथिग्वम् । यत् । आवम् ॥ ३ ॥

ᵛअहं वामदेव इन्द्रो वा ᵛमन्दसानः सोमेन माद्यन् ᵛनव नवसंख्याकाः ᵛनवतीः नवतिसंख्याकाश्च ᵛशम्बरस्य एतन्नामकस्यासुरस्य संबन्धीनि ᵛपुरः पुराणि ᵛसाकं युगपदेव ᵛव्यैरम् अध्वंसयम्[१] । ᵛशततमं[२] शतसंख्यापूरणं पुरं ᵛवेश्यं दिवोदासनाम्ने[३] प्रवेशार्हमकरवम् । ᵛसर्वताता सर्वतातौ यज्ञे ᵛअतिथिग्वम् अतिथीनामभिगन्तारं ᵛदिवोदासं दिवोदासनामकं राजर्षिं ᵛयत्[४] यदा ᵛआवम्[४] अपालयम् । तदा पुरो[५] व्यैरमिति[५] पूर्वेण संबन्धः ॥

प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम् ॥ ४ ॥

प्र । सु । सः । विऽभ्यः । मरुतः । विः । अस्तु । प्र । श्येनः । श्येनेभ्यः । आशुऽपत्वा ।
अचक्रया । यत् । स्वधया । सुऽपर्णः । हव्यम् । भरत् । मनवे । देवऽजुष्टम् ॥ ४ ॥

अथैनदादिभिः श्येनः स्तूयते । हे ᵛमरुतः वेगेन मरुत्सदृशाः पक्षिणः ᵛसः प्रसिद्धः श्येनाख्यः ᵛविः पक्षी ᵛविभ्यः पक्षिभ्यो युष्मत्तः ᵛप्र ᵛसु ᵛअस्तु[६] बलेन प्रकृष्टो भवतु[६] । किंच ᵛश्येनेभ्यः शंसनीयगमनेभ्यः स्वसमानजातिभ्यः पक्षिभ्यः सकाशात् ᵛआशुपत्वा आशुपतनः शीघ्रगामी ᵛश्येनः प्रकृष्टो भवतु । ᵛसुपर्णः शोभनपतनः ᵛयत् यदा श्येनः ᵛअचक्रया चक्रवर्जितया ᵛस्वधया रथेन ᵛदेवजुष्टं देवैः सेवितं ᵛहव्यं सोमलक्षणं हविः ᵛमनवे[७] प्रजापतये[८] ᵛभरत् अहरत् द्युलोकसकाशादाहृतवान् । अत्र स्वधाशब्दो रथवाची[९] 'अचक्रया स्वधया वर्तमानम्' (ऋ. सं. १०. २७. १९) इत्यादौ दर्शनात् ॥

---

१. त-ल-प्रैरयम् । २. ख-ग-घ-च-ण-त-न-स-शततमं वेश्यम् । ३. ख-ग-घ-ण-ल-दिवोदासनाम्नः । ४. न-स-यदावम् । ५. ख-ग-घ-च-ण-त-न-स-'पुरो व्यैरमिति' नास्ति । ६. ख-ग-घ-च-ण-बलेन प्रकृष्टोऽस्तु भवतु । ७. न-ल-स-'मनवे' नास्ति । ८. ख-ग-घ-च-ण-न-ल-स-'प्रजापतये' नास्ति । ९. ख-ग-च-ण-त-फ-स-भक्षवाची; ल-रसवाची ।

भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि ।
तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥ ५ ॥

भरत् । यदि । विः । अतः । वेविजानः । पथा । उरुणा । मनःऽजवाः । असर्जि ।
तूयम् । ययौ । मधुना । सोम्येन । उत । श्रवः । विविदे । श्येनः । अत्र ॥ ५ ॥

[v]यदि यदा [v]विः पक्षी श्येनः [v]अतः अमुष्मात् द्युलोकात् [v]वेविजानः सोमपालकान्[1] भीषयन् [v]भरत् अहरत् । सोममाहृतवान् । तदा[2] [v]उरुणा विस्तीर्णेन [v]पथा अन्तरिक्षमार्गेण [v]मनोजवाः मनोवत् वेगयुक्तः सन् [v]असर्जि संसृष्टः आसीत् । [v]सोम्येन सोममयेन [v]मधुना अन्नेन[3] सह [v]तूयं क्षिप्रं [v]ययौ जगाम । [v]उत अपि च [v]अत्र अस्मिन् लोके [v]श्येनः सुपर्णः [v]श्रवः सोमाहरणनिमित्तं यशः [v]विविदे लेभे ॥

ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मन्द्रं मदम् ।
सोमं भरद्दाहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥ ६ ॥

ऋजीपी । श्येनः । ददमानः । अंशुम् । पराऽवतः । शकुनः । मन्द्रम् । मदम् ।
सोमम् । भरत् । दाहाणः । देवऽवान् । दिवः । अमुष्मात् । उत्ऽतरात् । आऽदाय ॥ ६ ॥

[v]ऋजीपी ऋजुगामी [v]परावतः दूरात् [v]अंशुं सोमं [v]ददमानः धारयन् [v]श्येनः शंसनीयगमनः [v]देववान् देवैः सहितः [v]शकुनः पक्षी [v]मन्द्रं मदनीयं[4] स्तुत्यं [v]मदं मदकरं [v]सोमम् [v]उत्तरात् उद्गततरात् [v]अमुष्मात् [v]दिवः द्युलोकात [v]आदाय स्वीकृत्य [v]दाहाणः[5] दृढीभवन् [v]भरत् अहरत् ॥

आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥ ७ ॥

आऽदाय । श्येनः । अभरत् । सोमम् । सहस्रम् । सवान् । अयुतम् । च । साकम् ।
अत्र । पुरम्ऽधिः । अजहात् । अरातीः । मदे । सोमस्य । मूराः । अमूरः ॥ ७ ॥

[v]श्येनः शंसनीयगमनः पक्षी [v]सवान् सवानां यज्ञानां [v]सहस्रं सहस्रसंख्याकम् [v]अयुतं [v]च अयुतसंख्याकम् । अपरिमितसंख्याकमित्यर्थः । [v]साकं सह [v]सोमं सोमलक्षणमन्नम् [v]आदाय आदानं कृत्वा [v]अभरत् अहरत् । आजहार । [v]अत्र अस्मिन् सोमे आहृते सति [v]पुरंधिः पुरंधीर्बहुकर्मा

१. ख-ग-च-ण-त-स-सोमकान्; न-सोमकामान् । २. ख-ग-घ-च-ण-त-न-स-यदा । ३. च-मधुराजेन । ४. ल-मादनीयम । ५. च-ण-दाहाणः ।

vअमूरः अमूढः प्राज्ञ इन्द्रः vसोमस्य संबन्धिनि vमदे हर्षे सति vमूराः मूढाः vअरातीः शत्रून् vअजहात् अत्यजत्। जघानेत्यर्थः। अत्रारातिशब्दः स्त्रीलिङ्गः ॥ ॥ १५ ॥

' गर्भे नु ' इति पञ्चर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभम्। अन्त्या शक्करी षट्पञ्चाशदक्षरा। श्येनो देवता। पूर्वसूक्ते ' अष्टौ वा ' इत्युक्तत्वात् अन्त्याया इन्द्रो वा देवता। तथा चानुक्रान्तं—'गर्भे नु पञ्चान्त्या शक्करी ' इति। श्येने निष्केवल्यशस्त्रे इदं सूक्तम्। सूत्रं तु पूर्वमुदाहृतम् ॥

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नधं श्येनो जवसा निरदीयम् ॥ १ ॥

गर्भे। नु। सन्। अनु। एषाम्। अवेदम्। अहम्। देवानाम्। जनिमानि। विश्वा।
शतम्। मा। पुरः। आयसीः। अरक्षन्। अधं। श्येनः। जवसा। निः। अदीयम् ॥ १ ॥

अत्रैषः[1] श्लोकः पठ्यते—' श्येनभावं समास्थाय गर्भाद्योगेन निःसृतः। ऋषिर्गर्भे शयानः सन् ब्रूते गर्भे नु सन्निति ' ॥ vगर्भे vनु गर्भे एव vसन् विद्यमानः vअहं वामदेवः vएषाम् इन्द्रादीनां vदेवानां vविश्वा विश्वानि सर्वाणि vजनिमानि जन्मानि vअनु vअवेदम् आनुपूर्व्येणाज्ञासिषम्। परमात्मनः सकाशात् सर्वे देवा जाता इत्यवेदिषमित्यर्थः। इतः पूर्वं vशतं बहूनि vआयसीः अयोमयानि अभेद्यानि vपुरः शरीराणि vमा माम् vअरक्षन् अपालयन्। यथाहं शरीरात् व्यतिरिक्तमात्मानं न जानीयां तथा मामरक्षन्नित्यर्थः। vअध अधुना[2] vश्येनः श्येनवस्थितः अहं[3] vजवसा वेगेन vनिरदीयं शरीरान्निरगमम्। अनावरणमात्मानं जानन्निर्गतोऽस्मीत्यर्थः। ' पुरुषे ह वा अयमादितः ' इति खण्डे ' गर्भ एवैतच्छयानो वामदेव एवमुवाच ' (ऐ. आ. २. ५. १) इत्यादिनायमर्थः सम्यक् प्रतिपादितः ॥

न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण ।
ईर्मा पुरंधिरजहादरातीरुत वातॉं अतरच्छूशुवानः ॥ २ ॥

न। घ। सः। माम्। अप। जोषम्। जभार। अभि। ईम्। आस। त्वक्षसा। वीर्येण।
ईर्मा। पुरंऽधिः। अजहात्। अरातीः। उत। वातान्। अतरत्। शूशुवानः ॥ २ ॥

vसः गर्भः vमां वामदेवं vजोषं पर्याप्तं vन vघ नैव vअप vजभार अपजहार। गर्भेऽपि वसतो मे मोहो नाभूदित्यर्थः। अहं तु vईम् इदं गर्भस्थं दुःखं vत्वक्षसा तीक्ष्णेन vवीर्येण ज्ञानसामर्थ्येन vअभि vआस अभ्यभवम्। vईर्मा सर्वस्य प्रेरकः vपुरंधिः पुरां धारकः परमात्मा vअरातीः गर्भसंश्रितान् शत्रून् vअजहात् अत्यजत्। जघान। vउत अपि च vशूशुवानः वर्धमानः परिपूर्णः परमात्मा vवातान् गर्भक्लेशकरान्[4] वायून् vअतरत् अतारीत् ॥

---

१. ख-ग-च-ण–तत्रैषः। २. ख-ग-घ-च-ण-भ–अनन्तरम्। ३. ख-ग-घ-च-ण-भ–अहं सन्। ४. ल–क्लेशकरान्।

अव॒ यच्छ्ये॒नो अस्व॑नीद॒ध द्योर्वि यद॑दि॒ वात॑ ऊ॒हुः पुरं॑धिम् ।
सृ॒जद॒र्यस्मा॒ अव॑ ह क्षि॒पज्ज्यां कृ॒शानु॒रस्ता॒ मन॑सा भु॒रण्यन् ॥ ३ ॥

अव॑ । यत् । श्ये॒नः । अस्व॑नीत् । अध॑ । द्योः । वि । यत् । यदि॑ । वा॒ । अतः॑ । ऊ॒हुः । पुर॑म्ऽधिम् । सृ॒जत् । यत् । अ॒स्मै॒ । अव॑ । ह॒ । क्षि॒पत् । ज्याम् । कृ॒शानुः॑ । अस्ता॑ । मन॑सा । भु॒रण्यन् ॥ ३ ॥

ᵛअध तदानीं सोमाहरणकाले ᵛयत् यदा ᵛश्येनः ᵛद्योः द्युलोकात् ᵛअव ᵛअस्वनीत् अवाङ्मुखं शब्दमकरोत् । ᵛयदि ᵛवा यदा च । वेति चार्थे । ᵛयत् यं ᵛपुरंधिं सोमम् ᵛअतः अस्माच्छ्येनात् ᵛवि ᵛऊहुः सोमपाला विक्षिप्तवन्तः । ᵛयत् यदा ᵛअस्ता शराणां क्षेप्ता ᵛमनसा मनोवेगेन ᵛभुरण्यन् गन्तुमिच्छन् ᵛकृशानुः एतन्नामकः सोमपालः ᵛज्यां धनुषः कोटौ मौर्वीं ᵛक्षिपत् ᵛह चिक्षेप खलु । ᵛअस्मै श्येनाय शरम् ᵛअव ᵛअसृजत् त्यक्तवान् । तथा च ब्राह्मणं—'तस्या अनुविसृज्य कृशानुः सोमपालः सव्यस्य पदो नखमच्छिदत्' (गो. ब्रा. ३. २६) इत्यादि । यदा सोमपाला इत्थमित्थं चक्रुस्तदा श्येनः सोममाजहारेत्यृचोत्तरया संबन्धः ॥

ऋ॒जि॒प्य ई॒मिन्द्रा॑वतो॒ न भु॒ज्युं श्ये॒नो ज॑भार बृह॒तो अधि॒ ष्णोः ।
अ॒न्तः प॑तत्पत॒त्र्य॑स्य॒ पर्ण॒मध॒ यामं॒नि प्र॑सि॒तस्य॒ तद्वेः ॥ ४ ॥

ऋ॒जि॒प्यः । ई॒म् । इन्द्र॑ऽवतः । न । भु॒ज्युम् । श्ये॒नः । ज॒भा॒र॒ । बृ॒ह॒तः । अधि॑ । स्नोः । अ॒न्तरिति॑ । प॒त॒त् । प॒त॒त्रि॒ । अ॒स्य॒ । पर्ण॑म् । अध॑ । याम॑नि । प्रऽसि॑तस्य । तत् । वेरिति॑ वेः ॥ ४ ॥

ᵛऋजिप्यः ऋजुगामी ᵛश्येनः ᵛइन्द्रवतः[1] इन्द्रो रक्षको यस्य तस्मात् ᵛबृहतः महतः ᵛअधि उपरि ᵛस्नोः स्थितात् द्युलोकात् ᵛईम् एनं सोमं ᵛजभार आजहार । तत्र दृष्टान्तः । इन्द्रवतः । इन्द्रः समर्थः । तद्वतो देशात् ᵛभुज्युं ᵛन भुज्युनामकं राजानं यथाश्विनावाजहतुस्तद्वत् । ᵛअध तदानीं ᵛयामनि युद्धे ᵛप्रसितस्य कृशानोरस्त्रैर्बद्धस्य ᵛवेः गन्तुः ᵛअस्य श्येनस्य[2] ᵛअन्तः मध्ये स्थितं ᵛपतत्रि पतनशीलं ᵛतत् ᵛपर्ण ᵛपतत् अपतत् ॥

अध॒ श्वेतं॑ क॒लशं॒ गोभि॑रक्तमापिप्या॒नं म॒घवा॑ शु॒क्रमन्धः॑ ।
अ॒ध्व॒र्युभि॑: प्रय॑तं मध्व॒ो अग्रमिन्द्रो॒ मदा॑य॒ प्रति॑ धत्पिबध्यै
शूरो॒ मदा॑य॒ प्रति॑ धत्पिबध्यै ॥ ५ ॥

अध॑ । श्वेत॑म् । क॒लश॑म् । गोभि॑: । अ॒क्त॒म् । आ॒ऽपि॒प्या॒नम् । म॒घऽवा॑ । शु॒क्रम् । अन्धः॑ ।
अ॒ध्व॒र्युऽभि॑: । प्रऽय॑तम् । म॒ध्व॒: । अग्र॑म् । इन्द्रः॑ । मदा॑य । प्रति॑ । ध॒त् । पि॒ब॒ध्यै ।
शूरः॑ । मदा॑य । प्रति॑ । ध॒त् । पि॒ब॒ध्यै ॥ ५ ॥

१. णं—इन्द्रावतः । २. ख-ग-घ-च-ण-न-प-फ-भ-स—'श्येनस्य' नास्ति ।

ᵛअध अधुना ᵛशूरः विक्रान्तः ᵛमघवा धनवान्[1] ᵛइन्द्रः ᵛश्वेतं शुभ्रं ᵛकलशं कलशो पात्रे स्थितं ᵛगोभिः गव्येन पयसा ᵛअक्तं सिक्तम् ᵛआपिप्यानम् आप्याययन्तं ᵛशुक्रं सारोपेतम् ᵛअध्वर्युभिः ᵛप्रयतं दत्तम्[2] ᵛअन्धः सोमलक्षणमन्नं ᵛमध्वः मधुरस्य सोमरसस्य[3] ᵛअग्रम् अग्रे[4] ᵛमदाय मदार्थं ᵛपिबध्यै पातुं[5] ᵛप्रति ᵛधत् प्रतिदधातु । पुनरुक्तिरादरार्था ॥ ॥ १६ ॥

' त्वा युजा ' इति पञ्चर्चं सप्तमं सूक्तं वामदेवस्यार्षं त्रैष्टुभम् इन्द्रासोमदेवताकम्[6] । अनुक्रान्तं[7] च[8]—' त्वा युजैन्द्रासोमम् ' इति । विनियोगो लैङ्गिकः ॥

त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः ।
अहन्नहिमरिणात्सप्त सिन्धूनपावृणोदपिहितेव खानि ॥ १ ॥

त्वा । युजा । तव । तत् । सोम । सख्ये । इन्द्रः । अपः । मनवे । सस्रुतः । कः । इति कः ।
अहन् । अहिम् । अरिणात् । सप्त । सिन्धून् । अप । अवृणोत् । अपिहिताऽइव । खानि ॥ १ ॥

हे ᵛसोम ᵛतव त्वदीये ᵛतत् तस्मिन् ᵛसख्ये सखित्वे सति[9] ᵛत्वा त्वया ᵛयुजा सहायेन ᵛइन्द्रः ᵛसस्रुतः सरणशीलाः ᵛअपः वृष्टिलक्षणान्युदकानि ᵛमनवे मनुष्येभ्यः ᵛकः अकरोत । किंच ᵛअहिं वृत्रमसुरम् ᵛअहन् हतवान् । ᵛसप्त सर्पणशीलाः ᵛसिन्धून् अपः ᵛअरिणात प्रेरयत् । ᵛअपिहितेव अपिहितानीव वृत्रेण तिरोहितानि च । अत्रेवशब्दश्चार्थे । ᵛखानि स्रोतसां द्वाराणि ᵛअपावृणोत उद्घाटितवान् ॥

त्वा युजा नि खिदत्सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो ।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥ २ ॥

त्वा । युजा । नि । खिदत् । सूर्यस्य । इन्द्रः । चक्रम् । सहसा । सद्यः । इन्दो इति ।
अधि । स्नुना । बृहता । वर्तमानम् । महः । द्रुहः । अप । विश्वऽआयु । धायि ॥ २ ॥

हे ᵛइन्दो सोम ᵛइन्द्रः ᵛसद्यः सपदि ᵛत्वा त्वया ᵛयुजा सहायेन ᵛसूर्यस्य प्रेरकस्य सवितुः संबन्धिनः पूर्वं[10] द्विचक्रस्य रथस्यैकं ᵛचक्रं ᵛसहसा अभिभावुकेन बलेन ᵛनि ᵛखिदत आच्छिनत । कीदृशम्[10] । ᵛअधि उपरि ᵛस्नुना स्थितेन ᵛबृहता महता अन्तरिक्षेण ᵛवर्तमानम् । किंच ᵛमहः महतः प्रभूतस्य ᵛद्रुहः द्रोग्धुः सूर्यस्य संबन्धि ᵛविश्वायु सर्वतो गन्तृ चक्रम् ᵛअप ᵛधायि इन्द्रेणापाहारि[10] ॥

---

१. ख-ग-ङ-च-त-प-फ-भ-स-' धनवान् ' नास्ति । २. ख-ग-घ-च-ण-न-भ-स-' दत्तं ' नास्ति । ३. त- सोमराजस्य । ४. ख-प-फ-भ-' अग्रे ' नास्ति । ५. ख-ग-घ-च-ण-त-प-फ-भ-पानाय पात्रम्; न-स-पात्रम् । ६. त-ऐन्द्रासोमदेवताकम् । ७. ख-ग-च-ण-भ-तथा चानुक्रान्तम् । ८. ख-ग-च-ण-फ-भ-सति च । ९. ख-ग-च-ण-प-फ-भ-' पूर्वं ' नास्ति । १०. च-फ-कीदृशं चक्रम् । स्नुना बृहता महता चक्रनेमिना युक्तं वर्तमानं विद्यमानं विश्वायु नित्यं महो द्रुहः द्रोहनाशार्थमपधायि इन्द्रेणापाहारि ।

अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून्मध्यंदिनादभीके ।
दुर्गे दुरोणे कृत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥ ३ ॥

अहन् । इन्द्रः । अदहत् । अग्निः । इन्दो इति । पुरा । दस्यून् । मध्यंदिनात् । अभीके ।
दुःऽगे । दुरोणे । कृत्वा । न । याताम् । पुरु । सहस्रा । शर्वा । नि । बर्हीत् ॥ ३ ॥

हे [v]इन्दो सोम [v]अभीके संग्रामे [v]दस्यून् शत्रून् [v]इन्द्रः [v]अहन् अवधीत् । [v]अग्निः कांश्चिच्छत्रून् [v]अदहत् ददाह । कीदृशाविन्द्राग्नी । [v]मध्यंदिनात् मध्याह्नात् [v]पुरा पुरस्तात् पूर्वाह्णे तव पानात् लब्धबलाविति[1] शेषः[2] । [v]यातां गच्छतामसुराणां [v]पुरु पुरूणि बहूनि सर्वा[3] सर्वाणि निरवशेषाणि [v]सहस्रा सहस्राण्यपरिमितानि [v]नि [v]बर्हीत् न्यबर्हीत् । इन्द्रोऽवधीत् । तत्र दृष्टान्तः । [v]दुरोणे दुरवगे रक्षितुमशक्ये [v]दुर्गे दुरवगाहे देशे [v]कृत्वा [v]न कर्मणा स्वकीयं कार्यमुद्दिश्य गच्छतः पथिकान् यथा धनलोलुपश्चोरो हन्ति तद्वत्[4] ॥

विश्वस्मात्सीमधमाँ इन्द्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।
अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः ॥ ४ ॥

विश्वस्मात् । सीम् । अधमान् । इन्द्र । दस्यून् । विशः । दासीः । अकृणोः । अप्रऽशस्ताः ।
अबाधेथाम् । अमृणतम् । नि । शत्रून् । अविन्देथाम् । अपऽचितिम् । वधत्रैः ॥ ४ ॥

हे [v]इन्द्र त्वं [v]सीम् एनान् [v]दस्यून् [v]विश्वस्मात् सर्वस्मात्[5] गुणात् [v]अधमान् हीनान्[6] [v]अकृणोः अकरोः । किंच [v]दासीः कर्महीनाः [v]विशः मानुषीः प्रजाः [v]अप्रशस्ताः गर्हिता अकृणोः । हे इन्द्रासोमौ युवां [v]शत्रून् [v]अबाधेथाम् । [v]नि [v]अमृणतं नितरां हिंसितवन्तौ । अपि च [v]वधत्रैः तेषां शत्रूणां प्रहारैः [v]अपचितिं पूजां जनेभ्यः [v]अविन्देथाम् अलभेथाम् ॥

एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः ।
आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥ ५ ॥

एव । सत्यम् । मघऽवाना । युवम् । तत् । इन्द्रः । च । सोम । ऊर्वम् । अश्व्यम् । गोः ।
आ । अदर्दृतम् । अपिऽहितानि । अश्ना । रिरिचथुः । क्षाः । चित् । ततृदाना ॥ ५ ॥

हे [v]सोम त्वं च [v]इन्द्रश्च इति युवामुभौ [v]ऊर्वं महान्तम् [v]अश्व्यम् अश्वसमूहं [v]गोः गवां समूहं च [v]आदर्दृतम् आदरयतम् । [v]अपिहितानि पणिभिराच्छादितानि गवां[6] वृन्दानि[6] [v]क्षाश्चित पणीनां

१. ख-ग-च-ण-न-फ-भ-स–लब्धबलविशेषौ । २. ख-ग-च-ण-फ-भ–शर्वा । ३. ख-ग-च-ण-भ-स–'तद्वत्' नास्ति । ४. ख-ग-घ-च-ण-भ-ल–'सर्वस्मात्' नास्ति । ५. ख-ग-घ-च-ण-न-भ-ल–'हीनान्' नास्ति । ६. ख-ग-च-ण-भ–गोवृन्दानि ।

भूमीश्च [v]अभा अशनपरेण बलेन [v]रिरिचथुः रेचितवन्तौ। हे [v]मघवानाः[1] मघवानौ धनवन्तावित्रासोमौ [v]ततृदाना शत्रूणां हिंसकौ [v]युवं युवाम् [v]एव एवमुक्तप्रकारेण यत्कृतवन्तौ [v]तत् सर्वं [v]सत्यम् एव ॥ ॥ १७ ॥

'आ नः स्तुतः' इति पञ्चर्चमष्टमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रम्। 'आ नः स्तुतः' इत्यनुक्रमणिका। विनियोगो लैङ्गिकः ॥

आ नः स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः ।
तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः ॥ १ ॥

आ । नः । स्तुतः । उप । वाजेभिः । ऊती । इन्द्र । याहि । हरिऽभिः । मन्दसानः ।
तिरः । चित् । अर्यः । सवना । पुरूणि । आङ्गूषेभिः । गृणानः । सत्यऽराधाः ॥ १ ॥

हे [v]इन्द्र [v]स्तुतः त्वं [v]वाजेभिः वाजैरन्नैः सह [v]तिरश्चित् प्राप्तानि। 'तिरः सत इति प्राप्तस्य' (निरु. ३. २०) इति यास्कः। [v]पुरूणि पूर्णानि [v]सवना सवनानि [v]नः अस्मदीयान् यज्ञान् [v]उप प्रति [v]ऊती ऊत्यै नोऽस्माकं रक्षणार्थं [v]हरिभिः अश्वैः [v]आ [v]याहि आगच्छ। कीदृशः। [v]मन्दसानः मोदमानः [v]अर्यः स्वामी [v]आङ्गूषेभिः स्तोत्रैः [v]गृणानः स्तूयमानः [v]सत्यराधाः सत्यधनः ॥

आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञम् ।
स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥ २ ॥

आ । हि । स्म । याति । नर्यः । चिकित्वान् । हूयमानः । सोतृऽभिः । उप । यज्ञम् ।
सुऽअश्वः । यः । अभीरुः । मन्यमानः । सुस्वानेभिः । मदति । सम् । ह । वीरैः ॥ २ ॥

[v]नर्यः नृभ्यो हितः [v]चिकित्वान् सर्वं जानन् [v]सोतृभिः सोममभिषुण्वद्भिर्ऋत्विग्भिः [v]हूयमानः आहूयमान इन्द्रोऽस्मदीयं [v]यज्ञम् [v]उप प्रति [v]आ [v]याति आगच्छतु। [v]हि [v]स्म इति पूरणौ। [v]स्वश्वः शोभनाश्वोपेतः [v]अभीरुः निर्भयशीलः [v]सुस्वानेभिः सुन्वद्भिर्यजमानैः [v]मन्यमानः स्तूयमानः [v]यः इन्द्रः [v]वीरैः शूरैर्मरुद्भिः सह [v]सं [v]मदति [v]ह सह[2] माद्यत्येव[2]। स इन्द्र आगच्छत्विति पूर्वेण संबन्धः ॥

श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मन्दयध्यै ।
उद्वावृषाणो राधसे तुविष्मान्करन्न इन्द्रः सुतीर्थाभयं च ॥ ३ ॥

श्रवय । इत् । अस्य । कर्णा । वाजयध्यै । जुष्टाम् । अनु । प्र । दिशम् । मन्दयध्यै ।
उत्ऽअवृषाणः । राधसे । तुविष्मान् । करत् । नः । इन्द्रः । सऽतीर्था । अभयम् । च ॥ ३ ॥

---

१. न-ल-स-'मघवाना' नास्ति। २. ख-फ-भ-स्म संमाद्यत्येव।

हे स्तोतः त्वम् [v]अस्य इन्द्रस्य संबन्धिनौ [v]कर्णा कर्णौ [v]वाजयध्यै इन्द्रं बलिनं कर्तुं [v]जुष्टामनु [v]दिशं सेवितासु सर्वासु दिक्षु [v]प्र [v]मन्दयध्यै प्रकर्षेणेन्द्रं मादयितुं च [v]श्रवय स्तोत्राणि श्रावय। [v]इत् इति पूरणः। [v]उद्वृषाणः सोमेनोत्सिच्यमानः [v]तुविष्मान् बलवान् [v]इन्द्रः [v]नः अस्माकं [v]राधसे धनार्थं [v]सुतीर्था शोभनानि तीर्थानि [v]अभयं [v]च भयराहित्यं च [v]करत् करोतु ॥

अच्छा यो गन्ता नाधमानमूती इत्था विप्रं हवमानं गृणन्तम् ।
उप त्मनि दधानो धुर्याश्वून्त्सहस्राणि शतानि वज्रबाहुः ॥ ४ ॥

अच्छ। यः। गन्ता। नाधमानम्। ऊती। इत्था। विप्रम्। हवमानम्। गृणन्तम्।
उप। त्मनि। दधानः। धुरि। आशून्। सहस्राणि। शतानि। वज्रऽबाहुः ॥ ४ ॥

[v]वज्रबाहुः वज्रहस्तः [v]यः इन्द्रः [v]त्मनि आत्मनि स्थितानात्मवश्यान् [v]सहस्राणि सहस्रसंख्याकान् [v]शतानि शतसंख्याकान् [v]आशून् शीघ्रगामिनोऽश्वान् [v]धुरि रथवहनप्रदेशे[1] [v]उप [v]दधानः संस्थापयन् [v]ऊती रक्षणार्थं [v]नाधमानं याचमानं [v]विप्रं मेधाविनं [v]हवमानम् आह्वयन्तम् [v]इत्था इत्थमनेन प्रकारेण [v]गृणन्तं स्तुवन्तं यजमानम् [v]अच्छ आभिमुख्येन [v]गन्ता गमनशीलः। भवतीति शेषः। स इन्द्रः सुतीर्थानि अभयं च करोत्विति पूर्वेण संबन्धः ॥

त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥ ५ ॥

त्वाऽऊतासः। मघऽवन्। इन्द्र। विप्राः। वयम्। ते। स्याम। सूरयः। गृणन्तः।
भेजानासः। बृहत्ऽदिवस्य। रायः। आऽकाय्यस्य। दावने। पुरुऽक्षोः ॥ ५ ॥

हे [v]मघवन् धनवन् [v]इन्द्र [v]त्वोतासः त्वया रक्षिताः [v]विप्राः मेधाविनः [v]गृणन्तः त्वां स्तुवन्तः [v]सूरयः स्तोतारः [v]वयं [v]बृहद्दिवस्य महद्दीप्तेः [v]आकाय्यस्य आ समन्तात् स्तुत्यस्य [v]पुरुक्षोः बहुनाम[2] बहुकीर्तेर्वा [v]ते त्वदीयस्य [v]रायः धनस्य [v]दावने दाने निमित्ते[3] सति [v]भेजानासः त्वां भजमानाः [v]स्याम भवेम ॥ ॥ १८ ॥

' नकिरिन्द्र ' इति चतुर्विंशत्यृचं नवमं सूक्तं वामदेवस्यार्षं गायत्रम्। अष्टमी चतुर्विंशी च द्वे अनुष्टुभौ। इन्द्रो देवता। ' दिवश्चिद्घा ' इत्ययं तृच उषोदेवताक इन्द्रदेवताकश्च। तथा चानुक्रान्तं— ' नकिश्चतुर्विंशतिर्दिवश्चित्तृच उषस्यश्च गायत्रं द्वादश्यन्त्ये चानुष्टुभौ ' इति। अतिरात्रे तृतीये पर्याये मैत्रावरुणशस्त्रे उक्तमावर्जमिदं सूक्तम्। तथा च सूत्रितं—' नकिरिन्द्र त्वदुत्तर इत्युक्तमामुद्धरेत् ' (आश्व. श्रौ. ६. ४) इति ॥

१. ख-ग-च-ण—रथवाहन° । २. च—बहुधनस्य । ३. ख-ग-च-ण-फ—निमित्तभूते ।

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् । नकिरेवा यथा त्वम् ॥ १ ॥

नकिः । इन्द्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति । वृत्रऽहन्

नकिः । एव । यथा । त्वम् ॥ १ ॥

हे ᵛवृत्रहन् ᵛइन्द्र वृत्रस्य नाशकेन्द्र । लोके एकोऽपीति शेषः । ᵛत्वत् त्वत्तः ᵛउत्तरः उत्कृष्टतरः ᵛनकिः ᵛअस्ति न भवति । त्वत्तः ᵛज्यायान् प्रशस्यतरः एकोऽपि ᵛन अस्ति । हे इन्द्र ᵛत्वं लोके ᵛयथा प्रसिद्धो भवसि तथाविध एकोऽपि ᵛनकिरेव अस्ति नैव भवति । कश्चिदपि लोके इन्द्रसदृशो नास्तीत्यर्थः ॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः । सत्रा महाँ असि श्रुतः ॥ २ ॥

सत्रा । ते । अनु । कृष्टयः । विश्वा । चक्राऽइव । ववृतुः । सत्रा । महान् । असि । श्रुतः ॥ २ ॥

हे इन्द्र ᵛकृष्टयः प्रजाः ᵛते त्वाम् ᵛअनु लक्षीकृत्य ᵛसत्रा सत्यमेव ᵛववृतुः वर्तन्ते । तत्र दृष्टान्तः । ᵛविश्वा विश्वानि व्यापानि ᵛचक्रेव चक्राणीव । यथा चक्राणि शकटमनुवर्तन्ते तद्वत् । हे इन्द्र ᵛमहान् त्वं ᵛसत्रा सत्यमेव ᵛश्रुतः विश्रुतः ᵛअसि । गुणैः प्रख्यातो भवसि ॥

विश्वे चनेदना त्वा देवास इन्द्र युयुधुः । यदहा नक्तमातिरः ॥ ३ ॥

विश्वे । चन । इत् । अना । त्वा । देवासः । इन्द्र । युयुधुः । यत् । अहा । नक्तम् । आ । अतिरः ॥ ३ ॥

हे ᵛइन्द्र ᵛविश्वे ᵛचनेत् सर्वे एव ᵛदेवासः असुरान् विजिगीषवो देवाः ᵛअना प्राणरूपेण बलेन ᵛत्वा त्वां सहायं लब्ध्वा ᵛयुयुधुः असुरैः सह युद्धं चक्रुः । ᵛयत् यस्मात् कारणात् ᵛअहा अहःसु ᵛनक्तं रात्रिषु च[1] ᵛआतिरः आ समन्तात् शत्रूनवधीः । अतः कारणात् युयुधुरिति पूर्वेण संबन्धः ॥

यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते । मुषाय इन्द्र सूर्यम् ॥ ४ ॥

यत्र । उत । बाधितेभ्यः । चक्रम् । कुत्साय । युध्यते । मुषायः । इन्द्र । सूर्यम् ॥ ४ ॥

ᵛयत्र यस्मिन् युद्धे ᵛउत अपि च हे ᵛइन्द्र त्वं ᵛबाधितेभ्यः कुत्ससहायेभ्यः ᵛयुध्यते युद्धं कुर्वते ᵛकुत्साय च ᵛसूर्यं सूर्यसंबन्धि ᵛचक्रं ᵛमुषायः अमुष्णाः । अपहृतवानसीत्यर्थः । तस्मिन् युद्धे 'प्रावः शचीभिरेतशम्' इति परेण संबन्धः ॥

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् । त्वमिन्द्र वनूँरहन् ॥ ५ ॥

यत्र । देवान् । ऋघायतः । विश्वान् । अयुध्यः । एकः । इत् । त्वम् । इन्द्र । वनून् । अहन् ॥ ५ ॥

---

१. ख-ग-च-ण-त-न-फ-भ-स-'च' नास्ति ।

हे [V]इन्द्र [V]त्वम् [V]एक [V]इत् असहाय एव [V]यत्र यस्मिन् संग्रामे [V]देवान् इन्द्रादीन् [V]ऋघायतः बाधमानान् [V]विश्वान्[1] सर्वान् राक्षसादीन् [V]अयुध्यः युद्धमकरोः । तथा [V]वनन् हिंसकान् [V]अहन् अवधीः ॥ ॥ १९ ॥

यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम् । प्रावः शचीभिरेतशम् ॥ ६ ॥

यत्र । उत । मर्त्याय । कम् । अरिणाः । इन्द्र । सूर्यम् । प्र । आवः । शचीभिः । एतशम् ॥ ६ ॥

[V]यत्र यस्मिन् संग्रामे [V]उत अपि च हे [V]इन्द्र त्वं [V]मर्त्याय मनुष्याय एतशाख्याय ऋषये [V]सूर्यम् [V]अरिणाः अहिंसीः । [V]कम् इति पूरणः । तदानीं [V]शचीभिः युद्धकर्मभिः [V]एतशम् एतत्संज्ञकमृषिं [V]प्रावः प्रकर्षेणारक्षः ॥

किमादतासि वृत्रहन्मघवन्मन्युमत्तमः । अत्राह दानुमातिरः ॥ ७ ॥

किम् । आत् । उत । असि । वृत्रऽहन् । मघऽवन् । मन्युमत्ऽतमः ।

अत्र । अह । दानुम् । आ । अतिरः ॥ ७ ॥

हे [V]वृत्रहन् वृत्राणामावरकाणां तमसां हन्तः [V]मघवन् धनवन् इन्द्र [V]त्वम् [V]आत अनन्तरमेव [V]उत अपि च । [V]किम् इति प्रश्ने । [V]मन्युमत्तमः [V]असि अत्यन्तं क्रोधवान् भवसि । [V]अत्र अस्मिन्नन्तरिक्षे [V]अह एव [V]दानुं दनोः पुत्रं वृत्रम् [V]आतिरः आ समन्तादहिंसीः ॥

एतद्घेदुत वीर्यमिन्द्र चकर्थ पौंस्यम् । स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥ ८ ॥

एतत् । घ । इत् । उत । वीर्यम् । इन्द्र । चकर्थ । पौंस्यम् ।

स्त्रियम् । यत् । दुःऽहनायुवम् । वधीः । दुहितरम् । दिवः ॥ ८ ॥

हे [V]इन्द्र [V]उत अपि च [V]यत यस्त्वम् [V]एतत उपलक्षितं [V]पौंस्यं बलं [V]वीर्यं सामर्थ्योपेतं [V]चकर्थ कृतवानसि । [V]घ [V]इत् इति पूरणौ । किंच [V]दुर्हणायुवं दुष्टं[2] हननम्[2] इच्छन्तीं [V]दिवः [V]दुहितरं द्युलोकसकाशादुत्पन्नां [V]स्त्रियम् उषसं [V]वधीः अवधीः ॥

दिवश्चिद्घा दुहितरं महान्महीयमानाम् । उषासमिन्द्र सं पिणक् ॥ ९ ॥

दिवः । चित् । घ । दुहितरम् । महान् । महीयमानाम् । उषसम् । इन्द्र । सम् । पिणक् ॥ ९ ॥

हे [V]इन्द्र [V]महान् त्वं [V]दिवः [V]दुहितरं द्युलोकस्य पुत्रीं [V]महीयमानां पूज्यमानाम् [V]उषसम् उषोदेवीं [V]सं [V]पिणक् [V]चिद्ध संपिष्टवानसि खलु ॥

१. ख-ग-च-ण-न-भ-स-'विश्वान्' नास्ति । २. च-फ-दुष्टहननम् ।

अपोषा अनसः सरत्संपिष्टादहं बिभ्युषी । नि यत्सीं शिश्नथद्वृषा ॥ १० ॥

अप । उषाः । अनसः । सरत् । सम्ऽपिष्टात् । अहं । बिभ्युषी ।

नि । यत् । सीम् । शिश्नथत् । वृषा ॥ १० ॥

[v]वृषा कामानां वर्षिता इन्द्रः[1] [v]यत् यदा [v]सीम् एतत् उषसः[2] संबन्धि[3] शकटं [v]नि [v]शिश्नथत् न्यवधीत् तदा [v]उषाः उषोदेवता [v]बिभ्युषी इन्द्रसकाशात् भीता सती [v]संपिष्टात् इन्द्रेण संचूर्णितात् [v]अनसः शकटात् [v]अप [v]सरत् अपासरत् अपजगाम । [v]अह इति पूरणः ॥ ॥ २० ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या । ससार सीं परावतः ॥ ११ ॥

एतत् । अस्याः । अनः । शये । सुऽसंपिष्टम् । विऽपाशि । आ । ससार । सीम् । पराऽवतः ॥ ११ ॥

[v]सुसंपिष्टम् इन्द्रेण सुष्ठु संचूर्णितम् [v]अस्याः उषसः संबन्धि [v]एतत् [v]अनः शकटं [v]विपाशि । विपाडाख्या नदी । तस्यां तत्तीरे [v]आ [v]शये आ समन्तात् शेते अशेत । [v]सीम् इयमुषोदेवता शकटे भग्ने सति [v]परावतः दूरदेशात् [v]ससार अपससार ॥

उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि । परि ष्ठा इन्द्र मायया ॥ १२ ॥

उत । सिन्धुम् । विऽबाल्यम् । विऽतस्थानाम् । अधि । क्षमि ।

परि । स्थाः । इन्द्र । मायया ॥ १२ ॥

हे [v]इन्द्र [v]उत अपि च [v]विबाल्यं विगतबाल्यावस्थां संपूर्णजलां [v]वितस्थानां वितिष्ठमानां [v]सिन्धुं नदीम् [v]अधि [v]क्षमि क्षमायां [v]मायया प्रज्ञया [v]परि [v]ष्ठाः पर्यस्थाः । सर्वतः स्थापनं कृतवानसि ॥

उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् । पुरो यदस्य संपिणक् ॥ १३ ॥

उत । शुष्णस्य । धृष्णुऽया । प्र । मृक्षः । अभि । वेदनम् ।

पुरः । यत् । अस्य । सम्ऽपिणक् ॥ १३ ॥

[v]उत अपि च हे इन्द्र [v]धृष्णुया धृष्णुः धर्षकस्त्वं [v]शुष्णस्य शुष्णनाम्नोऽसुरस्य संबन्धि [v]वेदनं वित्तम् [v]अभि अभितः सर्वतः [v]प्र [v]मृक्षः प्रकर्षेणाबाधथाः । [v]यत् यदा [v]अस्य शुष्णस्य [v]पुरः पुराणि नगराणि [v]संपिणक् संपिष्टवानसि । तदा प्र मृक्षः इति संबन्धः ॥

१. ख-ग-च-ण-'इन्द्रः' नास्ति । २. ल-उषःसंबन्धि

उत दासं कौलितरं बृहतः पर्वतादधि । अवाहन्निन्द्र शम्बरम् ॥ १४ ॥

उत । दासम् । कौलितरम् । बृहतः । पर्वतात् । अधि । अव । अहन् । इन्द्र । शम्बरम् ॥ १४ ॥

[v]उत अपि च हे [v]इन्द्र त्वं [v]दासम् उपक्षपयितारं [v]कौलितरं कुलितरनाम्नोऽसुरस्य [v]शम्बरम् असुरं [v]बृहतः महतः [v]पर्वतात् अद्रेः [v]अधि उपरि [v]अव अवाचीनं कृत्वा [v]अहन् हतवानसि ॥

उत दासस्य वर्चिनः सहस्राणि शतावधीः । अधि पञ्च प्रधीरिव ॥ १५ ॥

उत । दासस्य । वर्चिनः । सहस्राणि । शता । अवधीः । अधि । पञ्च । प्रधीन्ऽइव ॥ १५ ॥

[v]उत अपि च हे इन्द्र त्वं [v]प्रधीनिव चक्रस्य परितः स्थितान् शङ्कूनिव हिंसकान् [v]पञ्च [v]शता पञ्चशतानि पञ्चशतसंख्याकान् [v]सहस्राणि सहस्रसंख्याकान् [v]दासस्य लोकानामुपक्षपयितुः [v]वर्चिनः वर्चिनामकस्यासुरस्य संबन्धिनोऽनुचरान् पुरुषान् [v]अधि अधिकम् [v]अवधीः हतवानसि ॥ ॥ २१ ॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विन्द्र आभजत् ॥ १६ ॥

उत । त्यम् । पुत्रम् । अग्रुवः । पराऽवृक्तम् । शतऽक्रतुः ।

उक्थेषु । इन्द्रः । आ । अभजत् ॥ १६ ॥

[v]उत अपि च [v]शतक्रतुः शतकर्मा [v]इन्द्रः [v]त्यं तं प्रसिद्धम् [v]अग्रुवः एतन्नाम्न्याः [v]पुत्रं [v]परावृक्तम् एतन्नामकम् [v]उक्थेषु स्तोत्रेषु [v]आभजत् भागिनं कृतवान् । अयमर्थः ' वज्रीभिः पुत्रमग्रुवः ' (ऋ. सं. ४. १९. ९) इत्यस्यामृचि प्रतिपादित इति ॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः । इन्द्रो विद्वाँ अपारयत् ॥ १७ ॥

उत । त्या । तुर्वशायदू इति । अस्नातारा । शचीऽपतिः । इन्द्रः । विद्वान् । अपारयत् ॥ १७ ॥

[v]उत अपि च [v]अस्नातारा अस्नातारौ ययातिशापादनभिषिक्तौ [v]त्या त्यौ तौ प्रसिद्धौ [v]तुर्वशायदू तुर्वशनामानं यदुनामकं च राजानौ [v]शचीपतिः कर्मणां पालकः[1] । यद्वा शचीन्द्रस्य भार्या । तस्याः पतिर्भर्ता [v]विद्वान् सकलमपि जानन् [v]इन्द्रः [v]अपारयत् अभिषेकार्हावकरोत् ॥

उत त्या सद्य आर्या सरयोरिन्द्र पारतः । अर्णाचित्ररथावधीः ॥ १८ ॥

उत । त्या । सद्यः । आर्या । सरयोः । इन्द्र । पारतः । अर्णाचित्ररथा । अवधीः ॥ १८ ॥

[v]उत अपि च [v]सद्यः सपदि हे [v]इन्द्र त्वं [v]त्या त्यौ तौ [v]आर्या आर्यौ आर्यत्वाभिमानिनौ सन्तावपि । इन्द्रविषयभक्तिश्रद्धारहितावित्यर्थः । [v]सरयोः सरस्वा नद्याः [v]पारतः पारे तीरे वसन्तौ [v]अर्णाचित्ररथा अर्णानामकं चित्ररथनामकं च राजानौ [v]अवधीः अहिंसीः ॥

---

१. ख-ग-च-ण– पालक इन्द्रः ।

अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन् । न तत्ते सुम्नमष्टवे ॥ १९ ॥

अनु । द्वा । जहिता । नयः । अन्धम् । श्रोणम् । च । वृत्रऽहन् ।

न । तत् । ते । सुम्नम् । अष्टवे ॥ १९ ॥

हे [v]वृत्रहन् वृत्रस्य हिंसकेन्द्र त्वं [v]जहिता जहितौ सर्वैर्बन्धुभिस्त्यक्तौ [v]अन्धं चक्षुर्हीनमेकं [v]श्रोणं [v]च पङ्गुमपरं[१] च [v]द्वा[२] एतौ द्वौ[२] [v]अनु [v]नयः अन्धपङ्गुत्वपरिहारेण अनुनीतवानसि । हे इन्द्र [v]ते त्वया दत्तं [v]तत् [v]सुम्नं सुखम् [v]अष्टवे व्यासुं कोऽपि [v]न । प्रभवतीति शेषः ॥

शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् । दिवोदासाय दाशुषे ॥ २० ॥

शतम् । अश्मन्ऽमयीनाम् । पुराम् । इन्द्रः । वि । आस्यत् । दिवःऽदासाय । दाशुषे ॥ २० ॥

[v]इन्द्रः [v]अश्मन्मयीनां पाषाणैर्निर्मितानां [v]पुरां शम्बरस्य संबन्धिनां नगराणां [v]शतं शतसंख्याकं [v]दिवोदासाय एतन्नामकाय [v]दाशुषे हविर्दत्तवते यजमानाय [v]व्यास्यत् व्यक्षिपत्[३] ॥ ॥ २२ ॥

अस्वापयद्भीतये सहस्रा त्रिंशतं हथैः । दासानामिन्द्रो मायया ॥ २१ ॥

अस्वापयत् । दभीतये । सहस्रा । त्रिंशतम् । हथैः । दासानाम् । इन्द्रः । मायया ॥ २१ ॥

[v]इन्द्रो [v]मायया स्वकीयया शक्त्या [v]दासानां लोकानामुपक्षपयितॄणां राक्षसादीनां [v]त्रिंशतं त्रिंशत्संख्याकानि [v]सहस्रा सहस्राणि [v]दभीतये दभीतिनामकस्यार्थाय [v]हथैः हननसाधनैरायुधैः [v]अस्वापयत् अवधीत् ॥

स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥ २२ ॥

सः । घ । इत् । उत । असि । वृत्रऽहन् । समानः । इन्द्र । गोऽपतिः ।

यः । ता । विश्वानि । चिच्युषे ॥ २२ ॥

[v]उत अपि च हे [v]इन्द्र [v]यः त्वं [v]ता तानि [v]विश्वानि[४] समस्तान् शत्रून् [v]चिच्युषे प्राप्त्यावयः । हे [v]वृत्रहन् वृत्राणां शत्रूणां हिंसकेन्द्र [v]गोपतिः गवां पालकः [v]सः त्वं [v]समानः सर्वेषां यजमानानां समः सन् प्रख्यातः [v]असि । [v]घेत् इति पूरणौ ॥

उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम् । अद्या नकिष्टदा मिनत् ॥ २३ ॥

उत । नूनम् । यत् । इन्द्रियम् । करिष्याः । इन्द्र । पौंस्यम् ।

अद्य । नकिः । तत् । आ । मिनत् ॥ २३ ॥

---

१. ख-ग-च-त-प-फ-भ–पङ्गुमेकपदम् । २. ख-ग-च-फ– एतौ द्वा द्वौ; ण–एतौ द्वौ । ३. ख-ग-घ-च-ण-न-भ-ल-स–व्याक्षिपत् । ४. ख-ग-च-ण-ल–‘ विश्वानि ’ नास्ति ।

vउत अपि च हे vइन्द्र vयत् vपौंस्यं त्वदीयं बलम् vइन्द्रियं सामर्थ्योपेतं vनूनं vकरिष्याः कृतवानसि खलु । vअद्य[1] अद्यतनः कश्चित् vतत् बलं vनकिः vआ vमिनत् न हिंस्यात् ॥

वामंवामं त आदुरे देवो ददात्वर्यमा । वामं पूषा वामं भगो
वामं देवः करूळती ॥ २४ ॥

वामम्ऽवामम् । ते । आऽदुरे । देवः । ददातु । अर्यमा ।
वामम् । पूषा । वामम् । भगः । वामम् । देवः । करूळती ॥ २४ ॥

हे vआदुरे शत्रूणाम् आदारयितरिन्द्र[2] vते तव vवामंवामं यद्यत् वननीयं संभजनीयं धनमस्ति लोके तद्वामं वसु vअर्यमा अरीणां[3] नियमयिता एतन्नामकः vदेवो vददातु प्रयच्छतु । तथा vकरूळती कृत्तदन्तः vपूषा पोषकः vदेवः vवामं धनं ददातु । तथा[4] vभगः अपि vवामं[5] धनं ददातु । ननु[1] करूळतीत्येतत् संनिहितत्वाद्भग इत्यनेन संबन्धनीयम् । अथवा अर्यमादीनां त्रयाणामपि विशेषणत्वेन भाव्यम् । कथं पूष्णो विशेषणं स्यादिति साकाङ्क्षत्वात् । न । सांनिध्याकाङ्क्षयोः सद्भावेऽपि योग्यतामन्तरेण अन्वयायोगात् । ' तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि ' (तै. सं. २. ६. ८. ५) इत्यादिश्रुतिषु पूष्ण एवादन्तकत्वेन प्रसिद्धेः व्यवहितस्यापि तस्यैव विशेषणत्वं युक्तम् । ' वामं वननीयं भवति ' (निरु. ६. ३१) इत्यादि निरुक्तमत्र द्रष्टव्यम् ॥ ॥ २३ ॥

' कया नः ' इति पञ्चदशर्चं दशमं सूक्तं वामदेवस्यार्षमैन्द्रं गायत्रम् । ' अभी षु णः ' इत्येषा पादनिचृन्नाम गायत्री ' त्रयः ससकाः पादनिचृत् ' (अनु. ४. ४) इति तल्लक्षणयुक्तत्वात् । तथा चानुक्रमणिका— ' कया पञ्चोनाभी षु पादनिचृत् ' इति । सूक्तविनियोगो लैङ्गिकः । अग्निष्टोमे चातुर्विंशिकेऽहनि च माध्यंदिने सवने मैत्रावरुणस्य ' कया नः ' इत्याद्यस्तृचः स्तोत्रियः । सूत्रितं च— ' होत्रकाणां कया नश्चित्र आ भुवत् ' (आश्व. श्रौ. ७. ४) इति । वरुणप्रघासेषु कायस्य हविषः अनुवाक्या ' कया नः' इत्येषा । तथा च सूत्रितं—' कया नश्चित्र आ भुवद्भिरण्यगर्भः समवर्तताग्रे ' (आश्व. श्रौ. २. १७) इति ॥

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ १ ॥
कया । नः । चित्रः । आ । भुवत् । ऊती । सदाऽवृधः । सखा । कया । शचिष्ठया । वृता ॥ १ ॥

vसदावृधः सदा वर्धमानः vचित्रः चायनीयः पूजनीयः vसखा मित्रभूत इन्द्रः [1]कया [1]ऊती ऊत्या तर्पणेन vनः अस्मान् vआ vभुवत् आभिमुख्येन भवेत् । vशचिष्ठया प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन vकया vवृता केन वर्तनेन कर्मणा चाभिमुखो भवेत् ॥

१. ख-ग-ण-न-भ-स–' अद्य ' नास्ति । २. ख-प-फ-भ–दारयितरिन्द्र । ३. ख-ग-च-ण–अरीणां शत्रूणाम् । ४. ग-च–भगोऽपि । ५. ख-ग-च-ण-न-फ– अत्र ।

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळ्हा चिदारुजे वसु ॥ २ ॥

कः । त्वा । सत्यः । मदानाम् । मंहिष्ठः । मत्सत् । अन्धसः । दृळ्हा । चित् । आऽरुजे । वसु ॥२॥

[v]मंहिष्ठः पूजनीयः [v]सत्यः सत्यभूतः [v]मदानां मादयितॄणां मध्ये [v]कः मत्करः [v]अन्धसः सोमस्य रसः [v]दृळ्हा [v]चित् दृढान्यपि [v]वसु वसूनि शत्रूणां धनानि [v]आरुजे आ समन्तात् भङ्क्तुं[1] हे इन्द्र [v]त्वा त्वां [v]मत्सत् मादयेत् ॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ३ ॥

अभि । सु । नः । सखीनाम् । अविता । जरितॄणाम् । शतम् । भवासि । ऊतिऽभिः ॥ ३ ॥

हे इन्द्र त्वं [v]सखीनां समानख्यातीनां[2] [v]जरितॄणां स्तोतॄणाम् [v]अविता रक्षिता त्वं [v]शतं शतेन बह्वीभिः [v]ऊतिभिः रक्षाभिः सह [v]नः अस्माकं [v]सु सुष्ठु [v]अभि [v]भवासि अभिमुखो भव ॥

अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः । नियुद्भिश्चर्षणीनाम् ॥ ४ ॥

अभि । नः । आ । ववृत्स्व । चक्रम् । न । वृत्तम् । अर्वतः । नियुत्ऽभिः । चर्षणीनाम् ॥ ४ ॥

हे इन्द्र त्वं [v]वृत्तं [v]चक्रं [v]न वर्तमानं चक्रमिव [v]अर्वतः उपगन्तॄन् [v]नः अस्मान् [v]चर्षणीनाम् अस्मदीयानां मनुष्याणां [v]नियुद्भिः स्तुतिभिः [v]अभि [v]आ [v]ववृत्स्व अभ्यावर्तस्व ॥

प्रवता हि क्रतूनामा ह्या पदेव गच्छसि । अभक्षि सूर्ये सचा ॥ ५ ॥

प्रऽवता । हि । क्रतूनाम् । आ । ह । पदाऽइव । गच्छसि । अभक्षि । सूर्ये । सचा ॥ ५ ॥

हे इन्द्र त्वं [v]क्रतूनां कर्मणां यजमानानां संबन्धिनः[3] [v]प्रवता प्रवतः[4] प्रवणान् देशान् [v]पदेव पदानि स्वकीयानि स्थानानीव [v]आ [v]गच्छसि [v]हि आगतो भवसि खलु । [v]ह इति पूरणः । हे इन्द्र त्वामहं [v]सूर्ये सूर्येण [v]सचा सह [v]अभक्षि भजे ॥ ॥ २४ ॥

सं यत्ते इन्द्र मन्यवः सं चक्राणि दधन्विरे । अध त्वे अध सूर्ये ॥ ६ ॥

सम् । यत् । ते । इन्द्र । मन्यवः । सम् । चक्राणि । दधन्विरे । अध । त्वे इति । अध । सूर्ये ॥६॥

हे [v]इन्द्र [v]ते त्वदर्थं [v]मन्यवः स्तुतयः [v]यत् यदा [v]सं [v]दधन्विरे अस्माभिरनुमन्यन्ते । [v]चक्राणि चङ्क्रमणानि कर्माणि च [v]सं दधन्विरे । [v]अध तदानीं ताः स्तुतयः तानि कर्माणि च [v]त्वे त्वयि भवन्ति । [v]अध तदनन्तरं [v]सूर्ये च भवन्ति ॥

१. ख-ग-च-ण-त-न-फ-भ-स–भोक्तुम् । २. फ-ल–समानख्यानानाम् । ३. ग-च-फ–अस्मदीयानां संबन्धिनाम् । ४. ख-ग-घ-च-ण-त-न-भ-ल-स–‘ प्रवतः ’ नास्ति ।

उत स्मा हि त्वामाहुरिन्मघवानं शचीपते । दातारमविदीधयुम् ॥ ७ ॥

उत । स्म । हि । त्वाम् । आहुः । इत् । मघऽवानम् । शचीऽपते ।

दातारम् । अविऽदीधयुम् ॥ ७ ॥

हे vशचीपते कर्मपालकेन्द्र[1] vउत अपि च vमघवानं धनवन्तं vदातारं स्तोतृभ्योऽभीष्टप्रदं त्वा vत्वाम् vअविदीधयुम् । विदीधयुः अदीप्यमानः । न विदीधयुः अविदीधयुः । तं दीप्यमानम् vआहुः vस्म प्रवदन्ति खलु । vहि vइत् इति द्वयं पूरणार्थम् ॥

उत स्मा सद्य इत्परि शशमानाय सुन्वते । पुरू चिन्मंहसे वसु ॥ ८ ॥

उत । स्म । सद्यः । इत् । परि । शशमानाय । सुन्वते । पुरु । चित् । मंहसे । वसु ॥ ८ ॥

vउत अपि च हे इन्द्र त्वं vसद्य vइत् सद्य एव vशशमानाय स्तुतिं कुर्वते । 'शशमानः शंसमानः' (निरु. ६. ८) इति यास्केनोक्तत्वात् । vसुन्वते सोमाभिषवं कुर्वते यजमानाय vपुरु vचित् पुरूणि बहून्यपि vवसु वसूनि धनानि vपरि परितः vमंहसे vस्म प्रयच्छसि खलु ॥

नहि स्मा ते शतं चन राधो वरन्त आमुरः । न च्यौत्नानि करिष्यतः ॥ ९ ॥

नहि । स्म । ते । शतम् । चन । राधः । वरन्ते । आऽमुरः । न । च्यौत्नानि । करिष्यतः ॥ ९ ॥

हे इन्द्र vआमुरः बाधका राक्षसादयः vते त्वदीयं vशतं vचन शतपरिमितमपि vराधः धनं vनहि vवरन्ते vस्म न वारयन्ति खलु । किंच शत्रूणां हिंसनं vकरिष्यतः तव vच्यौत्नानि बलानि vन वारयन्ति[2] ॥

अस्माँ अवन्तु ते शतमस्मान्त्सहस्रमूतयः । अस्मान्विश्वा अभिष्टयः ॥ १० ॥

अस्मान् । अवन्तु । ते । शतम् । अस्मान् । सहस्रम् । ऊतयः ।

अस्मान् । विश्वाः । अभिष्टयः ॥ १० ॥

हे इन्द्र vते त्वदीयाः vशतं शतसंख्याकाः vऊतयः रक्षाः vअस्मान् vअवन्तु रक्षन्तु । vसहस्रं सहस्रसंख्याकास्त्वदीया रक्षाः vअस्मान् अवन्तु । vविश्वाः सर्वाणि vअभिष्टयः त्वदीयान्यभिगमनानि vअस्मान् अवन्तु ॥ ॥ २५ ॥

अस्माँ इहा वृणीष्व सख्याय स्वस्तये । महो राये दिवित्मते ॥ ११ ॥

अस्मान् । इह । वृणीष्व । सख्याय । स्वस्तये । महः । राये । दिवित्मते ॥ ११ ॥

१. ख-ग-घ-च-ण-भ–कर्मणां पालकेन्द्र । २. ख-ग-च-ण-फ–धारयन्ति ।

हे इन्द्र त्वम् [v]इह अस्मिन् यज्ञे [v]अस्मान् यजमानान् [v]सख्याय सखिभावाय [v]स्वस्तये अविनाशाय च [v]महः महते [v]दिविरमते दीप्तिमते [v]राये धनाय च [v]वृणीष्व संभजस्व ॥

अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा । अस्मान्विश्वाभिरूतिभिः ॥ १२ ॥

अस्मान् । अविड्ढि । विश्वहा । इन्द्र । राया । परीणसा । अस्मान् । विश्वाभिः । ऊतिऽभिः ॥१२॥

हे [v]इन्द्र त्वं [v]विश्वहा सर्वेष्वहःसु [v]परीणसा महता [v]राया धनेन [v]अस्मान् यजमानान् [v]अविड्ढि रक्ष । किंच [v]विश्वाभिः सर्वाभिः [v]ऊतिभिः रक्षाभिः [v]अस्मान् अविड्ढि[1] ॥

अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः । नवाभिरिन्द्रोतिभिः ॥ १३ ॥

अस्मभ्यम् । तान् । अप । वृधि । व्रजान् । अस्ताऽइव । गोऽमतः ।
नवाभिः । इन्द्र । ऊतिऽभिः ॥ १३ ॥

हे [v]इन्द्र त्वं [v]नवाभिः नूतनाभिः [v]ऊतिभिः रक्षाभिः [v]अस्तेव क्षेप्ता शूर इव [v]गोमतः गोभिः युक्तान् [v]तान् प्रसिद्धान् [v]व्रजान् गोनिवासान् [v]अस्मभ्यम् [v]अप [v]वृधि उद्घाटय[2] ॥

अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः । गव्युरश्वयुरीयते ॥ १४ ॥

अस्माकम् । धृष्णुऽया । रथः । द्युऽमान् । इन्द्र । अनपऽच्युतः । गव्युः । अश्वऽयुः । ईयते ॥१४॥

हे [v]इन्द्र [v]धृष्णुया धृष्णुः शत्रूणां धर्षकः [v]द्युमान् दीप्तिमान् [v]अनपच्युतः विनाशरहितः [v]गव्युः गोमान् [v]अश्वयुः अश्ववान् [v]अस्माकम् अस्मत्संबन्धी [v]रथः [v]ईयते सर्वत्र गच्छतु । तेन रथेनास्मान् रक्षेत्यर्थः ॥

' अस्माकमुत्तमं कृधि ' इत्यनया आदित्यं दृष्ट्वा रथादवरोहेत् । तथा च सूत्रितम्—' अस्माकमुत्तमं कृधीत्यादित्यमीक्षमाणो जपित्वावरोहेत् ' (आश्व. गृ. २. ६. १२) इति ॥

अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य । वर्षिष्ठं द्यामिवोपरि ॥ १५ ॥

अस्माकम् । उत्ऽतमम् । कृधि । श्रवः । देवेषु । सूर्य । वर्षिष्ठम् । द्याम्ऽइव । उपरि ॥ १५ ॥

हे [v]सूर्य सर्वस्य प्रेरकेन्द्र हे आदित्य वा त्वं [v]देवेषु द्योतमानेषु वह्न्यादिषु मध्ये [v]अस्माकम् अस्मत्संबन्धि [v]श्रवः यशः [v]उत्तमम् उत्कृष्टं [v]कृधि कुरु । तत्र दृष्टान्तः । [v]वर्षिष्ठम् अतिशयेन प्रवृद्धं सेचनसमर्थं वा [v]द्यामिव द्युलोकं यथा सर्वेषां लोकानाम् [v]उपरि स्थितमुत्कृष्टमकरोस्तद्वत् ॥ ॥ २६ ॥

---

१. ल–अविडि इति पूर्वेण संबन्धः । २. ख-ग-च-ण-त-न-प-फ-भ-स–उत्पादय; ल–उत्पाटय ।

' आ तू न इन्द्र ' इति चतुर्विंशत्यृचमेकादशं सूक्तं वामदेवस्यार्षं गायत्रमैन्द्रम्। अन्त्ये ' कनीनकेव ' इत्यादिके द्वे इन्द्रस्याश्वदेवताके। तथा चानुक्रान्तम्—' आ तू नश्चतुर्विंशतिरन्त्याभ्यामिन्द्राश्वौ स्तुतौ ' इति। गतो विनियोगः ॥

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि। महान्महीभिरूतिभिः ॥ १ ॥

आ। तु। नः। इन्द्र। वृत्रऽहन्। अस्माकम्। अर्धम्। आ। गहि।

महान्। महीभिः। ऊतिऽभिः ॥ १ ॥

हे [v]वृत्रहन् वृत्राणां शत्रूणां हिंसक [v]इन्द्र त्वं [v]नः अस्मान् प्रति [v]तु क्षिप्रम् [v]आ गच्छ। हे इन्द्र [v]महान् प्रभूतस्त्वं [v]महीभिः महतीभिः [v]ऊतिभिः रक्षाभिः सह [v]अस्माकमर्धं समीपम्[1] [v]आ [v]गहि आगच्छ ॥

भूमिश्चिद्धासि तूतुजिरा चित्र चित्रिणीष्वा। चित्रं कृणोष्यूतये ॥ २ ॥

भूमिः। चित्। घ। असि। तूतुजिः। आ। चित्र। चित्रिणीषु। आ।

चित्रम्। कृणोषि। ऊतये ॥ २ ॥

हे [v]चित्र चायनीय पूजनीयेन्द्र त्वं [v]भूमिश्चित् भ्रमणशीलोऽपि [v]तूतुजिः [v]धासिः[2] अस्मदभीष्टप्रदाता च भवसि। आकारश्चार्थे। [v]चित्रिणीषु चित्रकर्मयुक्तास्वस्मत्पासु प्रजासु [v]चित्रं चायनीयं धनम् [v]ऊतये रक्षणाय [v]आ [v]कृणोषि आ समन्तात् करोषि। घ इति पूरणः ॥

दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा। सखिभिर्ये त्वे सचा ॥ ३ ॥

दभ्रेभिः। चित्। शशीयांसम्। हंसि। व्राधन्तम्। ओजसा।

सखिऽभिः। ये। त्वे इति। सचा ॥ ३ ॥

हे इन्द्र त्वं [v]दभ्रेभिश्चित् अल्पैरपि [v]सखिभिः यजमानैः सह [v]शशीयांसम्। ' शश प्लुतगतौ '। उल्लङ्घमानं [v]व्राधन्तं महान्तमपि शत्रुम् [v]ओजसा बलेन [v]हंसि नाशयसि। [v]ये यजमानाः [v]त्वे त्वयि [v]सचा संगताः। तैरिति पूर्वेण संबन्धः ॥

वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः। अस्माँअस्माँ इदुदव ॥ ४ ॥

वयम्। इन्द्र। त्वे इति। सचा। वयम्। त्वा। अभि। नोनुमः।

अस्मान्ऽअस्मान्। इत्। उत्। अव ॥ ४ ॥

---

१. ख-ग-घ-च-भ-समीपे। २. ख-ग-ण-फ-भ-असि।

हे [v]इन्द्र [v]वयं यजमानाः [v]त्वे त्वयि [v]सचा संगताः स्मः । [v]वयं [v]त्वा त्वाम् [v]अभि [v]नोनुमः अतिशयेनाभिष्टुमः । हे इन्द्र त्वमपि [v]अस्मानस्मानित् सर्वानस्मानेव [v]उदव उत्कर्षेण रक्ष ॥

स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरा गहि ॥ ५ ॥

सः । नः । चित्राभिः । अद्रिऽवः । अनवद्याभिः । ऊतिऽभिः । अनाधृष्टाभिः । आ । गहि ॥ ५ ॥

हे [v]अद्रिवः वज्रवन्निन्द्र [v]सः त्वं [v]चित्राभिः चायनीयाभिः [v]अनवद्याभिः अनिन्दिताभिः [v]अनाधृष्टाभिः शत्रुभिरप्रधर्षितैः [v]ऊतिभिः रक्षणैः सहितः सन् [v]नः अस्मान् [v]आ [v]गहि आगच्छ ॥ ॥ २७ ॥

भूयामो षु त्वावतः सखाय इन्द्र गोमतः । युजो वाजाय घृष्वये ॥ ६ ॥

भूयामो इति । सु । त्वाऽवतः । सखायः । इन्द्र । गोऽमतः । युजः । वाजाय । घृष्वये ॥ ६ ॥

हे [v]इन्द्र [v]त्वावतः त्वत्सदृशस्य [v]गोमतः गोभिर्युक्तस्य देवस्य[1] संबन्धिनः [v]सखायः स्तोतारो वयं [v]घृष्वये महते [v]वाजाय अन्नाय [v]युजः संयुक्ताः [v]सु सुष्ठु [v]भूयामो भवामैव ॥

त्वं ह्येक ईशिष इन्द्र वाजस्य गोमतः । स नो यन्धि महीमिषम् ॥ ७ ॥

त्वम् । हि । एकः । ईशिषे । इन्द्र । वाजस्य । गोऽमतः ।

सः । नः । यन्धि । महीम् । इषम् ॥ ७ ॥

हे [v]इन्द्र [v]हि यस्मात् कारणात् [v]त्वम् [v]एकः एव [v]गोमतः गोभिर्युक्तस्य [v]वाजस्य अन्नस्य [v]ईशिषे प्रभवसि । अतः कारणात् [v]सः त्वं [v]नः अस्मभ्यं [v]महीं महतीम् [v]इषम् अन्नं [v]यन्धि प्रयच्छ ॥

न त्वा वरन्ते अन्यथा यद्दित्ससि स्तुतो मघम् । स्तोतृभ्य इन्द्र गिर्वणः ॥ ८ ॥

न । त्वा । वरन्ते । अन्यथा । यत् । दित्ससि । स्तुतः । मघम् । स्तोतृऽभ्यः । इन्द्र । गिर्वणः ॥ ८ ॥

हे [v]इन्द्र [v]गिर्वणः गिरां संभक्तः [v]स्तुतः अस्माभिः संस्तुतः [v]यत् यदा [v]स्तोतृभ्यः अस्मभ्यं [v]मघं धनं [v]दित्ससि दातुमिच्छसि । तदा [v]त्वा त्वाम् [v]अन्यथा प्रकारान्तरेण [v]न [v]वरन्ते न निवारयन्ति । किंतु सर्वेऽप्यनुकूला एव भवन्ति ॥

अभि त्वा गोतमा गिरानूषत प्र दावने । इन्द्र वाजाय घृष्वये ॥ ९ ॥

अभि । त्वा । गोतमाः । गिरा । अनूषत । प्र । दावने । इन्द्र । वाजाय । घृष्वये ॥ ९ ॥

१. ख-ग-च-ण–‘ देवस्य ’ नास्ति ।

हे [v]इन्द्र [v]त्वा त्वाम् [v]अभि लक्षीकृत्य [v]गोतमाः एतन्नामका ऋषयः [v]गिरा स्तुतिरूपया वाचा [v]दावने धनदानार्थं [v]प्र [v]अनूषत प्रकर्षेण स्तुवन्ति । [v]वृष्वये महते [v]वाजाय अन्नाय प्रस्तुवन्ति ॥

प्र ते वोचाम वीर्या३ या मन्दसान आरुजः । पुरो दासीरभीत्य ॥ १० ॥

प्र । ते । वोचाम । वीर्या । याः । मन्दसानः । आ । अरुजः ।

पुरः । दासीः । अभिऽइत्य ॥ १० ॥

हे इन्द्र [v]मन्दसानः सोमेन मोदमानस्त्वं [v]दासीः क्षेसुरसुरस्य स्वभूताः [v]याः [v]पुरः यानि नगराणि [v]अभीत्य अभिगम्य [v]आ [v]अरुजः आ समन्तात् अभाङ्क्षीः । हे इन्द्र [v]ते त्वदीयानि तत्र-त्यानि[1] [v]वीर्या[2] वीर्याणि वयं स्तोतारः [v]प्र [v]वोचाम प्रकर्षेण वदाम ॥ ॥ २८ ॥

ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या । सुतेष्विन्द्र गिर्वणः ॥ ११ ॥

ता । ते । गृणन्ति । वेधसः । यानि । चकर्थ । पौंस्या । सुतेषु । इन्द्र । गिर्वणः ॥ ११ ॥

हे [v]इन्द्र [v]गिर्वणः गिरां स्तुतिरूपाणां वाचां संभक्ता त्वं [v]यानि [v]पौंस्या पौंस्यानि बलानि [v]चकर्थ कृतवानसि । हे इन्द्र [v]वेधसः प्राज्ञाः[3] [v]सुतेषु अभिषुतेषु सोमेषु [v]ते त्वदीयानि [v]ता तानि बलानि [v]गृणन्ति कीर्तयन्ति ॥

अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः । ऐषु धा वीरवद्यशः ॥ १२ ॥

अवीवृधन्त । गोतमाः । इन्द्र । त्वे इति । स्तोमऽवाहसः ।

आ । एषु । धाः । वीरऽवत् । यशः ॥ १२ ॥

[v]स्तोमवाहसः स्तोमानां स्तोत्राणां वोढारः [v]गोतमाः ऋषयो हे [v]इन्द्र [v]त्वे त्वाम् [v]अवीवृधन्त स्तोत्रैर्वर्धयन्ति । त्वम् [v]एषु गोतमेषु [v]वीरवत् पुत्रपौत्रादियुक्तं [v]यशः अन्नम् [v]आ [v]धाः निधेहि ॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ॥ १३ ॥

यत् । चित् । हि । शश्वताम् । असि । इन्द्र । साधारणः । त्वम् ।

तम् । त्वा । वयम् । हवामहे ॥ १३ ॥

हे [v]इन्द्र [v]त्वं [v]यच्चिद्धि यद्यपि खलु [v]शश्वतां बहूनां सर्वेषां यजमानानां [v]साधारणः [v]असि सामान्यो भवसि । तथापि [v]तम् एव [v]त्वा त्वां [v]वयं स्तोतारः [v]हवामहे आह्वयामः ॥

१. ख-ग-च-ण-म-तत्र । २. न-स-'वीर्या' नास्ति । ३. ख-ग-च-ण-स-प्रज्ञाः ।

अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः । सोमानामिन्द्र सोमपाः ॥ १४ ॥

अर्वाचीनः । वसो इति । भव । अस्मे इति । सु । मत्स्व । अन्धसः ।

सोमानाम् । इन्द्र । सोमऽपाः ॥ १४ ॥

हे [v]वसो यज्ञनिवासक[1] इन्द्र त्वम् [v]अस्मे अस्मासु यजमानेषु [v]अर्वाचीनः अभिमुखः [v]भव । तथा हे [v]सोमपाः सोमानां पातः [v]इन्द्र त्वं [v]सोमानाम् [v]अन्धसः अन्नेन [v]सु सुष्ठु [v]मत्स्व माद्य ॥

अस्माकं त्वा मतीनामा स्तोम इन्द्र यच्छतु । अर्वागा वर्तया हरी ॥ १५ ॥

अस्माकम् । त्वा । मतीनाम् । आ । स्तोमः । इन्द्र । यच्छतु ।

अर्वाक् । आ । वर्तय । हरी इति ॥ १५ ॥

[v]मतीनां स्तोतृणाम् ॥ मन्यतेः कर्तरि क्तिच् ॥ [v]अस्माकं संबन्धि [v]स्तोमः स्तोत्रं हे [v]इन्द्र [v]त्वा त्वाम् [v]आ [v]यच्छतु अस्मासु नियच्छतु । त्वमपि [v]हरी त्वदीयावश्वौ [v]अर्वाक् अस्मदभिमुखं यथा भवति तथा [v]आ [v]वर्तय परिवर्तनं कुरु ॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ॥ १६ ॥

पुरोळाशम् । च । नः । घसः । जोषयासे । गिरः । च । नः । वधूयुःऽइव । योषणाम् ॥ १६ ॥

हे इन्द्र त्वं [v]नः अस्मदीयं [v]पुरोळाशं [v]च पुरोडाशरूपमन्नं च[2] [v]घसः अद्धि । तथा [v]नः अस्मदीयाः [v]गिरश्च स्तुतिरूपा वाचश्च [v]जोषयासे सेवस्व । तत्र दृष्टान्तः । [v]वधूयुरिव । स्त्रीकामो यथा [v]योषणां स्त्रीणां गिरः सेवते तद्वत् ॥ ॥ २९ ॥

सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे । शतं सोमस्य खार्यः ॥ १७ ॥

सहस्रम् । व्यतीनाम् । युक्तानाम् । इन्द्रम् । ईमहे । शतम् । सोमस्य । खार्यः ॥ १७ ॥

वयं स्तोतारः [v]इन्द्रं परमैश्वर्ययुक्तं [v]युक्तानां शिक्षितानां [v]व्यतीनां गमनवतामश्वानां [v]सहस्रं सहस्रसंख्याकम् [v]ईमहे याचामहे । तथा [v]सोमस्य अभिषुतसोमस्य[3] [v]शतं शतसंख्याकाः [v]खार्यः खारीः ईमहे द्रोणकलशान्[4] याचामहे[4]। अत्र मानविशेषवाचिना खारीशब्देन द्रोणकलश उपलक्ष्यते । अपरिमितद्रोणकलशान् बहून् यज्ञान् याचामह इत्यर्थः ॥

१. त—यज्ञे निवासक । २. ख-ग-च-ण-न-फ-भ-स—' च ' नास्ति । ३. ख-ग-घ-च-ण-प-फ-भ—अभिषुतस्य । ४. ल—' द्रोणकलशान् याचामहे ' नास्ति ।

सहस्रा ते शता वयं गवामा च्यावयामसि । अस्मत्रा राध एतु ते ॥ १८ ॥

सहस्रा । ते । शता । वयम् । गवाम् । आ । च्यवयामसि ।

अस्मऽत्रा । राधः । एतु । ते ॥ १८ ॥

हे इन्द्र Vते त्वदीयानि Vगवां Vसहस्रा सहस्रसंख्याकानि Vशता शतसंख्याकानि च Vआ Vच्यावयामसि आच्यावयामः । अस्मदभिमुखं कुर्मः । तथा Vअस्मत्रा अस्मासु त्वदीयं Vराधः धनं Vते त्वत्तः Vएतु आगच्छतु ॥

दश ते कलशानां हिरण्यानामधीमहि । भूरिदा असि वृत्रहन् ॥ १९ ॥

दश । ते । कलशानाम् । हिरण्यानाम् । अधीमहि ।

भूरिऽदाः । असि । वृत्रऽहन् ॥ १९ ॥

हे इन्द्र Vते त्वत्तः Vकलशानां कुम्भानाम् । कुम्भपरिमितानामिति यावत् । Vहिरण्यानां हितरमणीयानां धनानां Vदश दशसंख्याकानि Vअधीमहि धारयामः । हे Vवृत्रहन् वृत्राणां शत्रूणां हिंसकेन्द्र त्वं Vभूरिदाः Vअसि बहुप्रदो भवसि ॥

भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर । भूरि घेदिन्द्र दित्ससि ॥ २० ॥

भूरिऽदाः । भूरि । देहि । नः । मा । दभ्रम् । भूरि । आ । भर ।

भूरि । घ । इत् । इन्द्र । दित्ससि ॥ २० ॥

हे Vइन्द्र Vभूरिदाः बहुप्रदस्त्वं Vभूरि बहु धनं Vनः अस्मभ्यं Vदेहि प्रयच्छ । किंतु Vदभ्रम् अल्पं धनं Vमा प्रयच्छ । Vभूरि बहुलं धनमस्मभ्यम् Vआ Vभर आहर । किंच Vभूरि Vइत् अदभ्रमेव धनं Vदित्ससि Vघ अस्मभ्यं दातुमिच्छसि खलु ॥

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् । आ नो भजस्व राधसि ॥ २१ ॥

भूरिऽदाः । हि । असि । श्रुतः । पुरुऽत्रा । शूर । वृत्रऽहन् ।

आ । नः । भजस्व । राधसि ॥ २१ ॥

हे Vवृत्रहन् वृत्रस्य हिंसक Vशूर विक्रान्तेन्द्र Vभूरिदाः बहुप्रदस्त्वं Vपुरुत्रा पुरुषु बहुषु यजमानेषु Vश्रुतः Vअसि Vहि विख्यातो भवसि खलु । Vराधसि धने Vनः अस्मान् Vआ Vभजस्व आ समन्तात् भागिनः कुरु ॥

प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् । माभ्यां गा अनु शिश्रथः ॥ २२ ॥

प्र । ते । बभ्रू इति । विऽचक्षण । शंसामि । गोऽसनः । नपात् ।

मा । आभ्याम् । गाः । अनु । शिश्रथः ॥ २२ ॥

हे [v]विचक्षण प्राज्ञेन्द्र [v]ते त्वदीयौ [v]बभ्रू बभ्रुवर्णावश्वौ [v]प्र [v]शंसामि प्रकर्षेण स्तौमि । हे [v]गोसनः[1] गवां सनितः हे [v]नपात् न पातयितः स्तोतॄनविनाशयितः । किंतु पालयितरित्यर्थः । हे इन्द्र त्वम् [v]आभ्यां त्वदीयाभ्यामश्वाभ्यां [v]गा [v]अनु अस्मदीया गा लक्षीकृत्य [v]मा [v]शिश्रथः विनष्टा मा कार्षीः । गावोऽश्वदर्शनात् विभ्यिष्यन्ते । तन्मा भूदित्यर्थः ॥

कनीनकेव विद्रधे नवे दुपदे अर्भके । बभ्रू यामेषु शोभेते ॥ २३ ॥

कनीनकाऽइव । विद्रधे । नवे । दुऽपदे । अर्भके ।

बभ्रू इति । यामेषु । शोभेते इति ॥ २३ ॥

[v]विद्रधे विदढे व्यूढे [v]नवे नवजाते [v]अर्भके अल्पके[2] [v]दुपदे द्रुमाख्यस्थाने स्थिते [v]कनीनकेव कमनीये शालभञ्जिके इव हे इन्द्र [v]बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ [v]यामेषु यज्ञेषु [v]शोभेते कान्तियुक्तौ भवतः ॥ ' कनीनके कन्यके । कन्या कमनीया भवति केयं नेतव्येति वा कमनेनानीयत इति वा कनतेर्वा स्यात् कान्तिकर्मणः ' (निरु. ४. १५) इत्यादि निरुक्तम् ॥

अरं म उस्रयाग्नेऽरमनुस्रयाग्ने । बभ्रू यामेष्वस्रिधा ॥ २४ ॥

अरम् । मे । उस्रऽयाग्ने । अरम् । अनुस्रऽयाग्ने ।

बभ्रू इति । यामेषु । अस्रिधा ॥ २४ ॥

हे इन्द्र [v]अस्रिधा अस्रिधावहिंसकौ [v]बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ [v]यामेषु गमनेषु[3] प्राप्तेषु सत्सु [v]उस्रयाग्ने । उस्राभ्यामनड्वद्भ्यां युक्तेन रथेन यातीत्युस्रयामा । तस्मै [v]मे मह्यम् [v]अरम् अलं पर्याप्तकारिणौ भवताम् । [v]अनुस्रयाग्ने पद्भ्यामेव गच्छते मह्यम् [v]अरं[4] पर्याप्तकारिणौ भवताम् ॥

॥ ३० ॥ ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके षष्ठोऽध्यायः समाप्तः ॥

---

१. त–गोषणः । २. ख-ग-घ-च-ण-प-फ-भ-स–' अल्पके ' नास्ति । ३. ख-ग-घ-च-ण-प-फ-भ–यज्ञेषु; त-ल–यज्ञेषु गमनेषु; न-स–' गमनेषु ' नास्ति । ४. ख-ग-च-ण-न-भ-ल-स–' अरं ' नास्ति ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

चतुर्थेऽनुवाके त्रयोदश सूक्तानि । तत्र ' प्र ऋभुभ्यः ' इत्येकादशर्चं प्रथमं सूक्तं वामदेवस्यार्षं त्रैष्टुभम् । तुह्यादिपरिभाषया इदमादि सूक्तपञ्चकमृभुदेवताकम् । अत्रानुक्रमणिका—' प्र ऋभुभ्य एकादशार्भवं वा ' इति । व्यूढे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयमिदम् । तथा च सूत्रितं—' प्र ऋभुभ्यः प्र शुक्रैरिति वैश्वदेवम् ' (आश्व. श्रौ. ८. ८) इति ॥

प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।
ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥ १ ॥

प्र । ऋभुऽभ्यः । दूतम्ऽइव । वाचम् । इष्ये । उपऽस्तिरे । श्वैतरीम् । धेनुम् । ईळे ।
ये । वातऽजूताः । तरणिऽभिः । एवैः । परि । द्याम् । सद्यः । अपसः । बभूवुः ॥ १ ॥

तत्र ऋभूणां पूर्वं मनुष्याणामेव सतां तपसा देवत्वप्राप्तिः ' आर्भवं शंसत्यृभवो वै देवेभ्यः ' (ऐ. ब्रा. ३. ३०) इत्यत्र ब्राह्मणे स्पष्टमाम्नाता । केचन ऋभवो नाम सूर्यरश्मय इत्याचक्षते । अहं यजमानः ऋभुभ्यः उरुभासमानेभ्य एतन्नामकेभ्यो देवेभ्यः वाचं स्तुतिरूपां प्र इष्ये प्रेरयामि । किमिव । दूतमिव । यथा दूतं स्वकार्यं प्रति प्रेषयन्ति तद्वत् । किंच उपस्तिरे सोमोपस्तरणाय श्वैतरीं पयोयुक्तां श्वेततरां[1] वा[1] धेनुमीळे याचामि ऋभून् । ये ऋभवः वातजूताः वातसमानगतयः[2] अपसः जगदुपकारिकर्माणः सन्तः तरणिभिः तारकैः एवैः गमनशीलैरश्वैः द्याम् अन्तरिक्षं सद्यः तदानीमेव परि बभूवुः परिभवन्ति सर्वतो व्याप्नुवन्ति । अथ रश्मय एव ऋभव इत्युक्त्वादाद्दित्या वा रश्मयः परितो व्याप्नुवन्ति ॥

यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।
आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥ २ ॥

यदा । अरम् । अक्रन् । ऋभवः । पितृऽभ्याम् । परिऽविष्टी । वेषणा । दंसनाभिः ।
आत् । इत् । देवानाम् । उप । सख्यम् । आयन् । धीरासः । पुष्टिम् । अवहन् । मनायै ॥ २ ॥

यदा यस्मिन् काले ऋभवः पितृभ्यां मातापितृभ्यां परिविष्टी परिवेषणेन परिचर्यया वेषणा वेषणेन व्याप्त्या । यद्वा वेषेण जरद्रूपयोर्युवत्वकरणेन दंसनाभिः अन्यैश्चमसनिर्माणादिकर्मभिः[3] अरम्

---

१. ख-ग-घ-च-ण-प-फ-भ—' श्वेततरां वा ' नास्ति । २. ख-ग-घ-च-ण-प-फ-भ—वायुसमानगन्तव्याः; न-स—वातसमानगन्तव्याः । ३. ख-ग-च-ण-त-प-फ-भ-ल—स्वकर्मसामर्थ्यैश्च ।

अत्यर्थम् [v]अक्रन् [v]आदित् अनन्तरमेव [v]देवानाम् इन्द्रादीनां [v]सख्यं सख्यित्वं समानस्थानत्वं देवतात्वम् [v]उप [v]आयन् आगमन् । 'युवशा कर्वा' (ऋ. सं. १.१६१. ३) इति देवत्वप्राप्तेरेकान्तत्वेन देवैरुक्तत्वादिति भावः । किंच [v]धीरासः धीरा बुद्धिमन्तस्तेषां [v]पुष्टिं[1] गवादिविषयां [v]मनायै मतिकृते[2] यजमानाय [v]अवहन् वहन्ति धारयन्ति । यद्वा । सविषयां पुष्टिं . मनायै मनसे प्रकृष्टमनस्कत्वायावहन् ॥

पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुष्परसो नोऽवन्तु यज्ञम् ॥ ३ ॥

पुनः । ये । चक्रुः । पितरा । युवाना । सना । यूपाऽइव । जरणा । शयाना ।
ते । वाजः । विऽभ्वा । ऋभुः । इन्द्रऽवन्तः । मधुऽप्परसः । नः । अवन्तु । यज्ञम् ॥ ३ ॥

[v]ये ऋभवः [v]पितरा मातापितरौ [v]यूपेव छिन्नस्थाणू इव [v]जरणा जीर्णौ [v]शयाना शयानौ [v]पुनः [v]सना सदा [v]युवाना युवानौ [v]चक्रुः निरयतरणावकुर्वन् । [v]ते [v]वाजो [v]विभ्वा [v]ऋभुः च एतन्नामकास्त्रयः सुधन्वन आङ्गिरसस्य पुत्रा ऋभवः[3] [v]इन्द्रवन्तः अनुग्राहकेणेन्द्रेण तद्वन्तः [v]मधुष्परसः मधुरस्य सोमरसस्य[4] भक्षयितारः[4] मनोहररूपा वा [v]नः अस्मदीयं [v]यज्ञम् [v]अवन्तु रक्षन्तु गच्छन्तु वा ॥

यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।
यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥ ४ ॥

यत् । सम्ऽवत्सम् । ऋभवः । गाम् । अरक्षन् । यत् । सम्ऽवत्सम् । ऋभवः । माः । अपिंशन् ।
यत् । सम्ऽवत्सम् । अभरन् । भासः । अस्याः । ताभिः । शमीभिः । अमृतऽत्वम् । आशुः ॥४॥

[v]संवत्सम् । संवसन्ति भूतान्यस्मिन्निति संवत्सः संवत्सरः । संवत्सरपर्यन्तम् [v]ऋभवो [v]गां मृताम [v]अरक्षन् अपालयन् । स्वसामर्थ्यादिति [v]यत् यदेतत्कर्मास्ति । तथा [v]संवत्सं संवत्सरम् [v]ऋभवो [v]माः तस्या एव गोर्मांसम् [v]अपिंशन् अवयवानकुर्वन्निति [v]यत । किंच[5] [v]संवत्सं संवत्सरपर्यन्तम [v]अस्याः [v]भासः [v]अभरन् दीप्तीः अवयवशोभा अकुर्वन्निति [v]यत् [v]ताभिः [v]शमीभिः मृतायाः गोर्नवीकरणविषयैः कर्मभिः [v]अमृतत्वमाशुः देवत्वं प्राप्ताः । 'धेनुः कर्वा' इति देवत्वप्राप्तिसाधनत्वेन[6] देवैः प्रतिश्रुतत्वात् । यद्वा । अत्र संवत्समित्येतत् वत्सेन सहेति व्याख्येयम् ।

१. त-ल-पुष्टिं पोषम् । २. ख-ग-घ-च-ण-न-प-फ-भ-स-'मतिकृते' नास्ति । ३. ख-ग-घ-च-ण-त-न-प-फ-भ-ल-स-ऋषयः । ४. ख-ग-च-फ-भ-सोमरसं भक्षयितारः; प-सोमस्य रसं भक्षयितारः । ५. त-ल-किंच अमुया (त-मृतायाः) गोस्त्वचा अङ्गमुच्छाद्य तस्याः मांसं समयोजयन्नित्यर्थः । कुर्वन्निति यत् (त-'कुर्वन्निति यत्' नास्ति) । ६. ख-ग-च-ण-फ-भ-देवत्वप्राप्तिसाधनेन ।

ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।
कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ॥ ५ ॥

ज्येष्ठः । आह । चमसा । द्वा । कर । इति । कनीयान् । त्रीन् । कृणवाम । इति । आह ।
कनिष्ठः । आह । चतुरः । कर । इति । त्वष्टा । ऋभवः । तत् । पनयत् । वचः । वः ॥ ५ ॥

'एकं चमसं चतुरस्कृणोतन' (ऋ. सं. १. १६१. २) इति यदा[1] देवदूतोऽग्निर्ऋभूनाह देवत्वप्राप्त्युक्थेन[2] तदा तेषु[3] मध्ये देवत्वप्राप्त्युत्कः[4] एकः [5]ज्येष्ठः ऋभुरितरौ [5]आह । किमिति । उच्यते । [5]चमसा [5]द्वा [5]करेति । एकमेव सन्तं द्वौ कृणवामेति । [6]कनीयान् तदनन्तरो विश्वा [5]त्रीन् [5]कृणवाम करवाम [5]इत्याह । तदवरः[7] [5]कनिष्ठः वाजः[8] [5]चतुरस्कर चतुर्धा[9] करवाम[9] [5]इति [5]आह [5]तत् एव चतुष्करणरूपं हे [5]ऋभवः [5]त्वष्टा युष्मद्गुरुः [5]वः [5]वचः युष्मद्वचनं [5]पनयत् अस्तौत् । अङ्गीचकार इत्यर्थः ॥ ॥ १ ॥

सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।
विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो दृष्टवान् ॥ ६ ॥

सत्यम् । ऊचुः । नरः । एव । हि । चक्रुः । अनु । स्वधाम् । ऋभवः । जग्मुः । एताम् ।
विऽभ्राजमानान् । चमसान् । अहाऽइव । अवेनत् । त्वष्टा । चतुरः । दृष्टवान् ॥ ६ ॥

[5]नरः मनुष्यरूपा ऋभवः [5]सत्यमूचुः सत्यमेवाब्रुवन् । [5]हि यस्मादेते [5]एव एवं[10] [5]चक्रुः चतुरोऽकुर्वन् । यथोक्तं तथैव कृतत्वात्[11] इत्यभिप्रायः । [5]अनु चतुर्धाकरणानन्तरम् [5]एताम्[12] तृतीयसवनगतां[13] [5]स्वधां सोमाख्यममृतम् [5]ऋभवो [5]जग्मुः । 'एकं चमसं चतुरस्कृणोतन, साकं देवैर्यज्ञियासो भविष्यथ' (ऋ. सं. १.१६१. २) इति श्रुतत्वात् । अथ [5]त्वष्टा देवः [5]विभ्राजमानान् [5]अहेव अहानीव दीप्यमानान् [5]चमसान् [5]चतुरो [5]दृष्टवान् दृष्टवान् सन् [5]अवेनत् अकामयत[14]। अङ्गीचकारेत्यर्थः ॥

द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।
सुक्षेत्रा कृण्वन्नमयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥ ७ ॥

द्वादश । द्यून् । यत् । अगोह्यस्य । आतिथ्ये । रणन् । ऋभवः । ससन्तः ।
सुऽक्षेत्रा । अकृण्वन् । अनयन्त । सिन्धून् ।
धन्व । आ । अतिष्ठन् । ओषधीः । निम्नम् । आपः ॥ ७ ॥

---

१. ख-ग-च-ण-'यदा' नास्ति । २. ख-ग-घ-च-ण-त-न-भ-ल-स-देवत्वप्राप्त्युक्थेन देवत्वेन । ३. ख-ग-घ-च-ण-त-न-भ-तेषाम् । ४. ख-ग-घ-च-ण-त-न-भ-ल-स-'देवत्वप्राप्त्युत्कः' नास्ति । ५. त-ल-तत्कनिष्ठस्ततोऽपि कनीयान् । ६. ख-ग-च-ण-भ-कृणवाम । ७. ख-ग-घ-च-ण-न-प-फ-भ-स-हदम् । ८. ख-ग-घ-च-ण-प-फ-भ-कृतवन्तः । ९. ख-ग-घ-च-ण-प-फ-भ-एव । १०. ख-ग-घ-च-ण-फ-भ-तृतीयसवनगतामेताम् । ११. ख-ग-घ-च-ण-त-प-फ-भ-ल-अमन्यत ।

तत्र रश्मय एव ऋभव इत्युक्तत्वात् तद्रूपेण स्तूयन्ते। [v]यत् यदा [v]द्वादश[१] [v]द्यून् दिवसान्। आद्यांदिद्वादशवृष्टिनक्षत्राणीत्यर्थः। [v]अगोह्यस्य अगोप्यस्यादित्यस्य गृहे [v]आतिथ्ये। अकस्मादागतोऽतिथिः। तदुचितं सत्काररूपं कर्म आतिथ्यम्। तदर्थं [v]ससन्तः स्वपन्तः सुखेन निवसन्तः [v]ऋभवः [v]रणन् रमन्ते। 'अगोह्यस्य यदसस्तना गृहे' (ऋ. सं. १. १६१. ११) इत्युक्तम्। तदानीं [v]सुक्षेत्रा कृण्वन्। अकृष्टानि[२] शून्यानि[३] क्षेत्राणि वृष्ट्या सस्यादिसमृद्धान्यकुर्वन्। [v]सिन्धून् नदीः [v]अनयन्त प्रैरयन्। तस्मिन् काले [v]ओषधीः ओषधयः [v]धन्व निरुदकस्थानमाश्रित्य [v]आतिष्ठन्। [v]निम्नं नीचस्थानम् [v]आपः अतिष्ठन्। 'उद्वस्वस्मा अकृणोतना तृणं निवस्वपः' (ऋ. सं. १. १६१. ११) इत्युक्तम्॥

रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम्।
त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः॥ ८॥

रथम्। ये। चक्रुः। सुऽवृतम्। नरेऽस्थाम्। ये। धेनुम्। विश्वऽजुवम्। विश्वऽरूपाम्।
ते। आ। तक्षन्तु। ऋभवः। रयिम्। नः। सुऽअवसः। सुऽअपसः। सुऽहस्ताः॥ ८॥

[v]ये ऋभवः [v]सुवृतं सुचक्रं सुष्ठु वर्तमानं वा [v]नरेष्ठां नेतरि चक्रे वर्तमानं [v]रथं [v]चक्रुः। [v]ये च [v]विश्वजुवं[४] विश्वस्य प्रेरयित्रीं [v]विश्वरूपां बहुरूपामेतन्नामिकां वा[५] [v]धेनुं गां[५] चक्रुः अकुर्वन्। 'बृहस्पतिर्विश्वरूपामुपाजत' (ऋ. सं. १. १६१. ६) इति ह्युक्तम्। [v]ते महान्तः [v]ऋभवः [v]नः अस्माकं [v]रयिं धनम् [v]आ [v]तक्षन्तु सर्वतो निष्पादयन्तु। कीदृशास्त ऋभवः। [v]स्वपसः सुकर्माणः [v]स्ववसः शोभनान्नोपेताः सुरक्षणा[६] वा[६] [v]सुहस्ताः शोभनहस्ताः कुशलहस्ताः[६]॥

अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः।
वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा॥ ९॥

अपः। हि। एषाम्। अजुषन्त। देवाः। अभि। क्रत्वा। मनसा। दीध्यानाः।
वाजः। देवानाम्। अभवत्। सुऽकर्मा। इन्द्रस्य। ऋभुक्षाः। वरुणस्य। विऽभ्वा॥ ९॥

[v]एषाम् ऋभूणाम् [v]अपः अश्वरथनिर्माणादिरूपं कर्म [v]देवाः इन्द्रादयः [v]अजुषन्त असेवन्त। 'इन्द्रो हरी युयुजे अश्विना रथम्'(ऋ. सं.१.१६१.६) इत्यादिमन्त्रोक्तप्रकारेण स्वीकृतवन्त इत्यर्थः। कीदृशास्ते। [v]क्रत्वा वरप्रदानरूपेण कर्मणा [v]मनसा शोभनेन चित्तेनानुग्रहयुक्तेन [v]अभि [v]दीध्यानाः दीप्यमानाः। देवानाम्[७] अनुग्रहेण किं लब्धमित्याह। [v]सुकर्मा[८] शोभनव्यापारः [v]वाजः कनीयान्

१. ख-ग-च-ण-भ-स-'द्वादश' नास्ति। २. ख-ग-च-ण-स-अरिष्टानि; न-भ-अरिष्टानि शून्यानि। ३. त-ल-धेनुं विश्वजुवम्। ४. ख-ग-ण-भ-धेनुं गावम्; च-धेनुं गां च; त-ल-गां वा; न-गां च; स-वाचम्। ५. ख-ग-च-ण-त-न-भ-ल-स-'सुरक्षणा वा' नास्ति। ६. ख-ग-च-ण-त-न-भ-ल-स-'कुशलहस्ताः' नास्ति। ७. ख-ग-च-ण-भ-भवताम्; न-तेषाम्। ८. त-ल-सुकर्मा शोभनकर्मा।

[v]देवानां सर्वेषां संबन्धी [v]अभवत् । तथा [v]इन्द्रस्य संबन्धी [v]ऋभुक्षाः ऋभुश्रेष्ठः । [v]विभ्वा मध्यमः [v]वरुणस्य संबन्ध्यभवत् । [v]हि[?] पूरणः[?] ॥

ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥ १० ॥

ये । हरी इति । मेधया । उक्था । मदन्तः । इन्द्राय । चक्रुः । सुऽयुजा । ये । अश्वा ।
ते । रायः । पोषम् । द्रविणानि । अस्मे इति । धत्त । ऋभवः । क्षेमऽयन्तः । न । मित्रम ॥१०॥

[v]ये ऋभवः [v]हरी अश्वौ [v]मेधया प्रज्ञया[?] [v]उक्था उक्थैः स्तुतिभिः [v]मदन्तः हर्षयन्तः [v]चक्रुः । [v]ये च तौ [v]सुयुजा सुयुजौ सुयोजनावश्वौ[?] [v]इन्द्राय इन्द्रार्थं चक्रुः अकुर्वन् । हे [v]ऋभवः [v]ते यूयं [v]रायस्पोषं धनपुष्टिं [v]द्रविणानि गवादिधनानि च सुखानि वा [v]अस्मे अस्मासु [v]धत्त धारयत । किमिव । [v]क्षेमयन्तः क्षेममिच्छन्तः [v]मित्रं [v]न मित्रमिव । अत्र यद्यप्येक एव ऋभुनामा तत्संबन्धात् इतरेऽप्यृभव उच्यन्ते प्राणभृन्न्यायेन ॥

इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात ॥ ११ ॥

इदा । अह्नः । पीतिम् । उत । वः । मदम् । धुः । न । ऋते । श्रान्तस्य । सख्याय । देवाः ।
ते । नूनम् । अस्मे इति । ऋभवः । वसूनि । तृतीये । अस्मिन् । सवने । दधात ॥ ११ ॥

[v]इदा इदानीं चमसादिनिर्माणानन्तरम् [v]अह्नः सूत्याहसंबन्धिनस्तृतीये सवने [v]पीतिं सोमपानम् [v]उत अपि च [v]मदं तज्जनितं [v]वः युष्माकं [v]धुः ददुर्देवाः । [v]श्रान्तस्य श्रान्तात्तपोयुक्तात्[?] [v]ऋते [v]सख्याय सख्यित्वाय [v]न भवन्ति [v]देवाः । यत एते श्रान्ता अतो ददुरित्यर्थः । हे [v]ऋभवः [v]ते महान्तो यूयं [v]नूनं निश्चयम् [v]अस्मे अस्मासु [v]अस्मिन [v]तृतीये [v]सवने [v]वसूनि धनानि [v]दधात धारयत ॥ ॥ २ ॥

'ऋभुर्विभ्वा' इत्येकादशर्चं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमार्भवम् । 'ऋभुर्विभ्वा' इत्यनुक्रमणिका । व्यूढे दशरात्रे पञ्चमेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयमिदम् । 'ऋभुर्विभ्वा स्तुषे जनम्' (आश्व. श्रौ. ८. ८) इति सूत्रितत्वात् ॥

१. ख-ग-त-न-ल-स–'हि पूरणः' नास्ति । २. ख-ग-घ-च-ण-त-न-प-फ-भ-स–'प्रज्ञया' नास्ति । ३. ख-ग-ण-न-भ-स–सुयोजमानावश्वौ; घ-च-प-फ-ल–सुयोजमानावश्वाश्वौ । ४ ख-ग-घ-च-ण-प-फ-भ-स–श्रान्ताय श्रमयुक्ताय; न–श्रान्ताय तपोयुक्ताय ।

ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।
इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ॥ १ ॥

ऋभुः । विऽभ्वा । वाजः । इन्द्रः । नः । अच्छ । इमम् । यज्ञम् । रत्नऽधेया । उप । यात । इदा । हि । वः । धिषणा । देवी । अह्नाम् । अधात् । पीतिम् । सम् । मदाः । अग्मत । वः ॥१॥

[1]ऋभुर्विभ्वा [2]वाज [3]इन्द्रः चैते देवाः [4]नः अस्मदीयम् [5]इमं [6]यज्ञम् [7]अच्छ अभिमुखं [8]रत्नधेया अस्मभ्यं रत्नधानाय [9]उप [10]यात उपगच्छत । ननु इन्द्रः सोमस्वामित्वात्[1] आगच्छतु कथमेतेषां यज्ञप्राप्तिरिति चेत् । उच्यते । [11]इदा [12]हि इदानीं खलु [13]वः युष्माकं [14]धिषणा वाक् [15]देवी प्रजापतेः संबन्धिनी [16]अह्नां सोमाभिषवसंबन्धिनां [17]पीतिं सोमपानम् [18]अधात् । ' स प्रजापतिरब्रीतमवितारं तत्र वा इमेऽन्तेवासास्त्वमेवैभिः संपिबस्व ' (ऐ. ब्रा. ३.३०) इति ब्राह्मणम् । यस्मादेवं तस्मात [19]मदाः च [20]वः युष्मान् [21]सम् [22]अग्मत संगताः । यद्वा । वो मदा देवैः संगताः ॥

विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम् ।
सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम् ॥ २ ॥

विदानासः । जन्मनः । वाजऽरत्नाः । उत । ऋतुऽभिः । ऋभवः । मादयध्वम् ।
सम् । वः । मदाः । अग्मत । सम् । पुरंऽधिः । सुऽवीराम् । अस्मे इति । रयिम् । आ । ईरयध्वम् ॥२॥

हे [1]वाजरत्नाः सोमलक्षणेनान्नेन[2] राजमानाः [2]ऋभवः यूयं [3]जन्मनः जननस्य देवत्वलक्षणस्य[3] देवत्वप्राप्ति [4]विदानासः जानन्तः । यद्वा विदानासः सोमप्राप्तिं जानन्तो जन्मनः पूर्वं मनुष्यजन्मवन्तश्च सन्तः । उतशब्दश्चार्थे । [5]ऋतुभिः देवैः सह [6]मादयध्वम । [7]वः युष्मान् [8]मदाः सोमपानजनिताः [9]सम् [10]अग्मत संगताः । [11]पुरंधिः स्तुतिरपि [12]सम् अग्मत । ते यूयम् [13]अस्मे अस्माकं [14]सुवीरां शोभनैर्वीरैः पुत्रैः[4] उपेतां [15]रयिं धनम्[5] [16]ईरयध्वं प्रेरयत ॥

अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे ।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ॥ ३ ॥

अयम् । वः । यज्ञः । ऋभवः । अकारि । यम् । आ । मनुष्वत् । प्रऽदिवः । दधिध्वे ।
प्र । वः । अच्छ । जुजुषाणासः । अस्थुः । अभूत । विश्वे । अग्रिया । उत । वाजाः ॥ ३ ॥

१. ख-ग-घ-च-ण-प-फ-भ–सोमस्वामी । २. ख-ग-च-ण-न-भ–सोमलक्षणान्नेन । ३. ख-ग-च-ण–' देवत्वलक्षणस्य ' नास्ति । ४. ख-त-प-फ-भ–' पुत्रैः ' नास्ति । ५. न-स–' धनं ' नास्ति ।

हे [v]ऋभवः [v]वः युष्मदर्थम् [v]अयं [v]यज्ञः [v]अकारि। [v]यं यज्ञं [v]मनुष्वत् मनुष्यवत् [v]प्रदिवः प्रकर्षेण द्योतमानाः सन्तः [v]आ[1] [v]दधिध्वे[1] धारयत जठरे। तदर्थं [v]वः युष्मान् [v]अच्छ आभिमुख्येन [v]जुजुषाणासः सेवमानाः सोमाः [v]प्र[2] [v]अस्थुः[2] प्रतिष्ठन्ते। [v]उत अपि च धारयित्वा च हे [v]वाजाः ऋभवः [v]विश्वे यूयम् [v]अग्रिया अग्राह्या अग्रत्वसंपादिनो वा [v]अभूत भवथ॥

अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥ ४ ॥

अभूत्। ऊँ इति। वः। विधते। रत्नऽधेयम्। इदा। नरः। दाशुषे। मर्त्याय।
पिबत। वाजाः। ऋभवः। ददे। वः। महि। तृतीयम्। सवनम्। मदाय ॥ ४ ॥

हे [v]नरः नेतार ऋभवः [v]वः युष्माकमनुग्रहात् [v]इदा इदानीं तृतीये सवने [v]रत्नधेयं दातव्यं रत्नं [v]विधते। विधतिः परिचरणकर्मा। स्तुत्या परिचरते [v]दाशुषे हविर्दत्तवते [v]मर्त्याय यजमानाय मह्यम् [v]अभूत भवतु। तदर्थं हे [v]वाजाः [v]ऋभवः। एतदृचं विश्वनामकस्याप्युपलक्षणम्। इतरापेक्षया प्रत्येकं बहुवचनम्। यूयं [v]पिबत। तदर्थं [v]वः [v]ददे। किम्। [v]महि महत्प्रभूतं [v]तृतीयं [v]सवनम्। तत्संबन्धिनं सोममित्यर्थः। किमर्थम्। [v]मदाय हर्षाय तृप्तये वा ॥

आ वाजा यातापं न ऋभुक्षा महो नरो द्रविणसो गृणानाः।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्वइव ग्मन् ॥ ५ ॥

आ। वाजाः। यात। उप। नः। ऋभुक्षाः। महः। नरः। द्रविणसः। गृणानाः।
आ। वः। पीतयः। अभिऽपित्वे। अह्नाम्। इमाः। अस्तम्। नवस्वःऽइव। ग्मन् ॥ ५ ॥

हे [v]वाजाः [v]ऋभुक्षाः [v]नरः नेतारो यूयं [v]नः अस्मान्[2] [v]उप [v]आ [v]यात। किं कुर्वन्तः। [v]महः महतः [v]द्रविणसः धनस्य ॥ कर्मणि षष्ठ्यौ ॥ महत् द्रविणं [v]गृणानाः स्तुवन्तः। किंच [v]अह्नाम् [v]अभिपित्वे अभिपतने समासौ। तृतीये सवने इत्यर्थः। [v]वः युष्मान् [v]इमाः [v]पीतयः पानानि [v]आ [v]ग्मन् आगच्छन्ति। तत्र दृष्टान्तः। [v]अस्तम्। गृहनामैतत्। गृहं [v]नवस्वः नवप्रसवा गावः [v]इव ॥ ॥ ३ ॥

आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः।
सजोषसः सूरयो यस्य च स्थ मघवः पात रत्नधा इन्द्रवन्तः ॥ ६ ॥

आ। नपातः। शवसः। यातन। उप। इमम्। यज्ञम्। नमसा। हूयमानाः।
सऽजोषसः। सूरयः। यस्य। च। स्थ। मघवः। पात। रत्नऽधाः। इन्द्रऽवन्तः ॥ ६ ॥

१. ख-ग-घ-ण-भ-प्रदधिध्वे; च-प्रादधिध्वे। २. ख-ग-घ-च-ण-प-फ-भ-आ अस्थुः; न-स-अस्थुः। ३. न-ल-स-'अस्मान्' नास्ति।

हे ५शवसः ५नपातः बलस्य न पातयितारस्तस्य पुत्रा वा । बलवन्त इत्यर्थः । यूयं ५नमसा स्तोत्रेण ५हूयमानाः आकारिताः सन्तः ५इमं ५यज्ञम् ५उप ५आ ५यातन उपागच्छत । कीदृशा यूयम् । ५सजोषसः इन्द्रेण सह प्रीताः ५सूरयः मेधाविनः । इन्द्रस्य चैषां च कः प्रसङ्ग इत्युच्यते । ५यस्य ५च ५स्थ । चेति प्रसिद्धौ । यस्येन्द्रस्य संबन्धिनो यूयं भवथ तदुचिताश्वनिर्माणात्[1] इत्यभिप्रायः । यस्मादेवं तस्मात ५इन्द्रवन्तः प्रीतेन[2] इन्द्रेण तद्वन्तः ५रत्नधाः रमणीयधनानां[3] दातारो यूयं ५मध्वः मधुरं सोमं ५पात पिबत ॥

सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥ ७ ॥

सऽजोषाः । इन्द्र । वरुणेन । सोमम् । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ।
अग्रेऽपाभिः । ऋतुऽपाभिः । सऽजोषाः । ग्नाःऽपत्नीभिः । रत्नऽधाभिः । सऽजोषाः ॥ ७ ॥

हे ५इन्द्र त्वं ५वरुणेन राज्यभिमानिदेवेन ५सजोषाः समानप्रीतिः सन् ५सोमं ५पाहि पिब । हे ५गिर्वणः गीर्भिर्वननीय संभजनीयेन्द्र त्वं ५मरुद्भिः ५सजोषाः संगतः सन् सोमं ५पाहि पिब ॥ किंच ५अग्रेपाभिः प्रथमपातृभिः ५ऋतुपाभिः ऋतुयाजदेवैश्च ५ग्नाःपत्नीभिः । स्त्रीणां पालयित्र्यो देव्यो ग्नाःपत्न्यः । ताभिः । 'मना ग्ना इति स्त्रीणाम्' (निरु. ३. २१) इति निरुक्तम् । ५रत्नधाभिः रमणीयधनदातृभिर्ऋभुभिः सह पिब । यद्वा । एतत ग्नाःपत्नीभिरित्यस्य विशेषणम् । ताभिर्वा ५सजोषाः सोमं पिब ॥

सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥ ८ ॥

सऽजोषसः । आदित्यैः । मादयध्वम । सऽजोषसः । ऋभवः । पर्वतेभिः ।
सऽजोषसः । दैव्येन । सवित्रा । सऽजोषसः । सिन्धुऽभिः । रत्नऽधेभिः ॥ ८ ॥

हे ५ऋभवः ५आदित्यैः ५सजोषसः संगता यूयं ५मादयध्वम् । तथा ५पर्वतेभिः पर्ववद्भिः पर्वण्यर्च्यमानैर्देवविशेषैः ५सजोषसः मादयध्वम् । तथा च ५दैव्येन देवेभ्यो हितेन ५सवित्रा ५सजोषसः ५रत्नधेभिः रत्नानां दातृभिः ५सिन्धुभिः स्यन्दनस्वभावैर्नद्यभिमानिदेवैश्च ५सजोषसः[4] मादयध्वम् ॥

---

१. ल-स-तदुचिताश्च निर्माणात । २. ख-ग-च-ण फ-भ-तेन । ३. ख-ग-च-ण-भ-रमणीयानां धनानाम् ।

ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥ ९ ॥

ये । अश्विना । ये । पितरा । ये । ऊती । धेनुम् । ततक्षुः । ऋभवः । ये । अश्वा ।
ये । अंसत्रा । ये । ऋधक् । रोदसी इति । ये । विऽभ्वः । नरः । सुऽअपत्यानि । चक्रुः ॥९॥

[v]ये [१]ऋभवः [v]अश्विना अश्विनौ [v]ऊती ऊत्या क्रियया रथनिर्माणरूपया[२] अप्रीणयन् । [१]ये च [v]पितरा पितरौ [v]ततक्षुः तक्षणेन समपादयन् जीर्णौ सन्तावृतौ ऊत्या युवानौ [v]चक्रुः । [१]ये च [v]धेनुं ततक्षुः मृतायाः पुनर्नवीकरणेन । [v]ये च [v]अश्वा अश्वौ ततक्षुः । ' निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ' (ऋ. सं.१. १६१. ७) इत्याद्युक्तम् । [v]ये च [v]अंसत्रा अंसत्राणि कवचानि देवेभ्यश्चक्रुः । [v]ये च [v]रोदसी द्यावापृथिव्यौ [१]ऋधक् पृथक्[३] चक्रुः । एवमुक्तप्रकारेण[४] [v]ये [v]विभ्वः व्यासा ऋभवः [v]नरः नेतारः [v]स्वपत्यानि स्वपतनसाधनानि तत्प्राप्तिसाधनानि वा कर्माणि चक्रुः । ' तेऽग्रेपाः ' इत्युत्तरत्र संबन्धः[५] ॥

ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम् ।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥ १० ॥

ये । गोऽमन्तम् । वाजऽवन्तम् । सुऽवीरम् । रयिम् । धत्थ । वसुऽमन्तम् । पुरुऽक्षुम् ।
ते । अग्रेऽपाः । ऋभवः । मन्दसानाः । अस्मे इति । धत्त । ये । च । रातिम् । गृणन्ति ॥ १० ॥

हे ऋभवः [v]ये यूयं [v]गोमन्तं [१]गोमहितं[६] [v]वाजवन्तम् अन्नवन्तं[७] [१]सुवीरं शोभनपुत्रोपेतं [v]वसुमन्तं निवासयोग्यगृहादिधनोपेतं [१]पुरुक्षुं बहुलं [१]रयिं धनं [१]धत्थ धारयथ मह्यं दातुम्[८] । हे [१]ऋभवः [१]ते यूयम् [v]अग्रेपाः प्रथमं यातारः [v]मन्दसानाः माद्यन्तः सन्तः [v]अस्मे अस्मभ्यं [v]धत्त दत्त रयिम्[९] । [१]ये [v]च यूयं [१]रातिं दानं दत्तं सोमं वा [१]गृणन्ति स्तुवन्ति । ते[१०] धत्त । यद्वा । ये च रातिं गृणन्ति यजमानाः तेभ्योऽपि धत्त ॥

नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥ ११ ॥

न । अप । अभूत । न । वः । अतीतृषाम । अनिःऽशस्ताः । ऋभवः । यज्ञे । अस्मिन् ।
सम् । इन्द्रेण । मदथ । सम् । मरुत्ऽभिः । सम् । राजऽभिः । रत्नऽधेयाय । देवाः ॥ ११ ॥

१. ख-ग-च-ण-न-फ-भ-स–निर्माणरूपया । २. ख-ग-च-ण-न-प-फ-भ–विरुद्धं कर्म । ३. ख-ग-घ-च-ण-न-प-फ-भ–ये च नरो नेतारः विभ्वः ऋभवः स्वपत्यानि सुप्रजाः चक्रुः ते अग्ने पाहि (अग्रेपाः) इत्युत्तरत्र संबन्धः । ४. ख-ग-च-ण-न भ-स–गोहितम् । ५. ख-न-म–' अन्नवन्तं ' नास्ति; ग-च-ण-प-फ-भ–बलवन्तम्; त-ल–अन्नवन्तं बलवन्तम् । ६. ख-ग-घ-च-ण-न-प-फ-भ-ल–दत्त; म–ददातु । ७. ख-ग-घ-च-ण-भ-म–' रयिं ' नास्ति; न–ऋषिम् । ८. ख-ग-घ-च-ण-न-प-फ-भ–तेभ्यः ।

हे[1] ᵛऋभवः यूयं[2] ᵛनापाभूत नापगच्छत[3]। अपरुद्धा न भवत। वयं च ᵛवः युष्मान् ᵛन ᵛअतीतृषाम अत्यन्तं तृषितान् मा करवाम। अतो हे ऋभवः ᵛदेवाः ᵛअनिःशस्ताः अनिन्दिताः सन्तः ᵛअस्मिन् ᵛयज्ञे ᵛइन्द्रेण ᵛसं ᵛमदथ ᵛमरुद्भिः ᵛसं मदथ। ᵛराजभिः राजमानैरन्यैर्देवैः ᵛसं[4] मदथ[5] तृप्ता भवथ। किमर्थम्। ᵛरत्नधेयाय रमणीयाय धनदानाय ॥ ॥ ४ ॥

'इहोप यात' इति नवर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमार्भवम्। 'इहोप नव' इत्यनुक्रमणिका। तृतीयसवने मैत्रावरुणस्येदमुन्नीयमानसूक्तम्। सूत्रितं च—'आ त्वा वहन्त्वसाविदेवमिहोप यातेत्यनुसवनम्' (आश्व. श्रौ. ५. ५) इति ॥

इहोप॑ यात शवसो नपातः॑ सौधन्वना ऋभवो॒ माप॑ भूत।
अ॒स्मिन्हि व॒ः सव॑ने रत्न॒धेयं॑ गम॒न्त्विन्द्र॑मनु॑ वो॒ मदा॑सः ॥ १ ॥

इ॒ह। उप॑। या॒त। श॒व॒सः॒। न॒पा॒तः॒। सौ॒ध॒न्व॒नाः॒। ऋ॒भ॒वः॒। मा। अप॑। भू॒त॒।
अ॒स्मिन्। हि। व॒ः। सव॑ने। र॒त्न॒ऽधेय॑म्। ग॒म॒न्तु॒। इन्द्र॑म्। अनु॑। व॒ः। मदा॑सः ॥ १ ॥

हे ᵛशवसो ᵛनपातः बलस्य पुत्रास्तस्य न पातयितारो वा हे ᵛसौधन्वनाः सुधन्वनः पुत्राः हे ᵛऋभवः यूयम् ᵛइहोप ᵛयात अस्मिन् तृतीयसवने उपगच्छत। ᵛमाप ᵛभूत अपगता न भवत। ᵛअस्मिन् ᵛसवने ᵛरत्नधेयं रमणीयधनस्य दातारम् ᵛइन्द्रमनु[6] अनुसृत्य ᵛवः युष्मान् ᵛमदासः मदकराः सोमाः ᵛगमन्तु गच्छन्तु। अन्विति क्रियया वा संबध्यते। इन्द्रं युष्मांश्चान्वागच्छन्तु इत्यर्थः। ᵛहि पूरणः ॥

आ॒ग॒न्नृ॒भू॒णामि॒ह र॑त्न॒धेय॒मभू॒त्सोम॑स्य॒ सुषु॑तस्य पी॒तिः।
सु॒कृ॒त्यया॒ यत्स्व॑पस्यया॒ चँ॒ एकं॑ विचक्र॒ चम॑सं॒ चतु॒र्धा ॥ २ ॥

आ। अ॒ग॒न्। ऋ॒भू॒णाम्। इ॒ह। र॒त्न॒ऽधेय॑म्। अभू॑त्। सोम॑स्य। सु॒ऽसु॑तस्य। पी॒तिः।
सु॒ऽकृ॒त्यया॑। यत्। सु॒ऽअ॒प॒स्यया॑। च॒। एक॑म्। वि॒ऽच॒क्र॒। च॒मस॑म्। चतुः॒ऽधा ॥ २ ॥

ᵛऋभूणां युष्माकम् ᵛइह तृतीयसवने ᵛरत्नधेयं रत्नदानम् ᵛआगन् आगच्छतु मह्यम्। यद्वा। युष्माकमेव सोमार्थं रत्नमागन्[7]। यस्मात्[8] ᵛसोमस्य ᵛसुषुतस्य ᵛपीतिः पानम् ᵛअभूत् प्रजापतिना लब्धमित्यर्थः। तदपि कुत इति चेत्। उच्यते। ᵛयत् यस्मात् ᵛसुकृत्यया शोभनहस्तव्यापारेण ᵛस्वपस्यया शोभनरथनिर्माणादिकर्मेच्छया ᵛच ᵛएकं सन्तं ᵛचमसं ᵛचतुर्धा ᵛविचक्र कृतवन्तः ॥

---

१. ख-ग-घ-च-ण-न-भ-स-'हे ऋभवः यूयं' नास्ति। २. ख-ग-घ-च-ण-त-न-भ-ल-स-'नापगच्छत' नास्ति। ३. ख-ग-च-ण-न-भ-'सं मदथ' नास्ति। ४. ख-ग-घ-च-ण-न-भ-ल-स-इन्द्रम्। ५. ख-ग-च-ण-त-न-भ-ल-स-रत्नमागमत्।

व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥ ३ ॥

वि । अकृणोत । चमसम् । चतुःऽधा । सखे । वि । शिक्ष । इति । अब्रवीत ।
अथ । ऐत । वाजाः । अमृतस्य । पन्थाम् । गणम् । देवानाम् । ऋभवः । सुऽहस्ताः ॥ ३ ॥

हे[1] ऋभवो यूयं [v]चमसं [v]चतुर्धा [v]व्यकृणोत व्यकुरुत । कृत्वा च हे [v]सखे हे सखिभूताग्ने [v]वि [v]शिक्ष अनुगृहाण सोमपानम् [v]इत्यब्रवीत अवदत यूयम् । [v]अथ सोऽग्निर्युष्मानवादीत् खलु । किमिति। हे [v]वाजाः [v]ऋभवः [v]सुहस्ताः कुशलहस्ता यूयम् [v]अमृतस्य [v]अमरणधर्मकस्य स्वर्गस्य [v]पन्थां पन्थानम् [v]ऐत गच्छत । किं तदमृतमिति । [v]देवानाम् इन्द्रादीनां [v]गणं संघातमैत[2] ॥

किंमयः स्विच्चमस एष आस[3] यं काव्येन चतुरो विचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥ ४ ॥

किम्ऽमयः । स्वित् । चमसः । एषः । आस । यम् । काव्येन । चतुरः । विऽचक्र ।
अथ । सुनुध्वम् । सवनम् । मदाय । पात । ऋभवः । मधुनः । सोम्यस्य ॥ ४ ॥

[v]किंमयः [v]स्वित् किमात्मकः [v]एषः [v]चमसः [v]आस[4] । स्वित प्रश्ने । [v]यं चममेकं सन्तं [v]काव्येन कवीनां मेधाविनां[5] संबन्धिना कर्मणा कौशलेन [v]चतुरो [v]विचक्र कृतवन्तः । [v]अथ अधुना [v]सवनम् । सूयते इति सवनः सोमः । तं [v]मदाय हर्षाय [v]सुनुध्वं हे ऋत्विजः । हे [v]ऋभवः यूयं च [v]सोम्यस्य सोमसंबन्धिनं [v]मधुनः मधुरसं[6] [v]पात पिबत ॥

शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।
शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ॥ ५ ॥

शच्या । अकर्त । पितरा । युवाना । शच्या । अकर्त । चमसम् । देवऽपानम् ।
शच्या । हरी इति । धनुऽतरौ । अतष्ट । इन्द्रऽवाहौ । ऋभवः । वाजऽरत्नाः ॥ ५

१. ख-ग-च-ज-ञ-प-फ-भ–हे वाजाः सुहस्ताः शोभनहस्तोपेताः ऋभवो यो यूयं चमसं चतुर्धा व्यकृणोत व्यकुरुत । कृत्वा च हे सखे सखिभूताग्ने विशिक्षते (न-भ–विशिक्ष) अनुग्रहेण सोमपानमिति अब्रवीत (न–अब्रवीत) अवदत । अथ यूयममृतस्यामरणधर्मकस्य स्वर्गस्य पन्था पन्थानमभिगच्छत । किं तदमृतमिति देवानामिन्द्रादीनां गणं संघातमैत प्राप्ताः (न–' प्राप्ताः ' नास्ति) । २. ख-ग-घ-च-ण-ज-ञ-स–' आस ' नास्ति । ३. ख-ग-घ-च-ण-ज-भ-स–' मेधाविना ' नास्ति । ४. ख-ण-स–मधुरसम ।

हे [v]वाजरत्नाः रमणीयसोमान्ना हे [v]ऋभवः यूयं [v]शस्या कर्मणा [v]पितरा मातापितरौ [v]युवाना युवानौ [v]अकर्त अकुरुत । तथा [v]शस्या [v]चमसं [v]देवपानं देवपानार्हम् [v]अकर्त चतुर्धा-कुरुतेत्यर्थः । [v]शस्या [v]हरी अश्वौ[1] [v]अतष्ट तक्षणेन संपादितवन्तः । कीदृशौ हरी । [v]धनुतरौ शीघ्रं गन्तृतरौ [v]इन्द्रवाहौ इन्द्रवोढारौ ॥ ॥ ५ ॥

यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः ॥ ६ ॥

यः । वः । सुनोति । अभिऽपित्वे । अह्नाम् । तीव्रम् । वाजासः । सवनम् । मदाय ।
तस्मै । रयिम् । ऋभवः । सर्वऽवीरम् । आ । तक्षत । वृषणः । मन्दसानाः ॥ ६ ॥

हे [v]ऋभवः [v]वाजासः अन्नवन्तः [v]वः युष्मभ्यं [v]यः यजमानः [v]अह्नाम् [v]अभिपित्वे अभिपतने । तृतीयसवने इत्यर्थः । तस्मिन् [v]तीव्रं रसवत्तरं [v]सवनम् । सूयते इति सवनः सोमः । तं[2] [v]मदाय [v]सुनोति [v]तस्मै [v]सर्ववीरं बहुपुत्रोपेतं [v]रयिं धनं हे [v]वृषणः फलवर्षितारः [v]मन्दसानाः मोदमानाः सन्तः [v]आ [v]तक्षत संपादयतेत्यर्थः ॥

प्रातः सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते ।
समृभुभिः पिबस्व रत्नधेभिः सखीँर्या इन्द्र चकृषे सुकृत्या ॥ ७ ॥

प्रातरिति । सुतम् । अपिबः । हरिऽअश्व । माध्यंदिनम् । सवनम् । केवलम् । ते ।
सम् । ऋभुऽभिः । पिबस्व । रत्नऽधेभिः । सखीन् । यान् । इन्द्र । चकृषे । सुऽकृत्या ॥७॥

हे [v]हर्यश्व हरितवर्णाश्वोपेतेन्द्र [v]प्रातः प्रातःसवने [v]सुतम् अभिषुतं सोमम् [v]अपिबः पिबस्व । [v]माध्यंदिनं [v]सवनं [v]केवलं [v]ते परं तवैव नान्येषाम् । सवनत्रयस्य पृथगभिधानात्तृतीयसवनं परिशिष्यते । तृतीयसवने [v]रत्नधेभिः रमणीयदानैः [v]ऋभुभिः [v]सं [v]पिबस्व । हे [v]इन्द्र [v]यान् ऋभून् [v]सुकृत्या शोभनकर्मणा [v]सखीन् [v]चकृषे अकरोः ॥

ये देवासो अभवता सुकृत्या श्येनाइवेदधिं दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥ ८ ॥

ये । देवासः । अभवत । सुऽकृत्या । श्येनाःऽइव । इत् । अधि । दिवि । निऽसेद ।
ते । रत्नम् । धात । शवसः । नपातः । सौधन्वनाः । अभवत । अमृतासः ॥ ८ ॥

१. न-ल-स–'अश्वौ' नास्ति । २. ख-ग-च-ण-न-भ-स–'तं' नास्ति ।

हे ऋभवः [v]ये यूयं [v]सुकृत्या शोभनकर्मणा [v]देवासः देवाः [v]अभवत अभूत । [v]श्येनाइवेत शंसनीयगतयो गृध्रविशेषा इव [v]दिवि द्युलोके [v]अधि [v]निषेद अधिनिषण्णाः हे [v]शवसो [v]नपातः बलवन्तः [v]ते यूयं [v]रत्नं धनं [v]धात प्रयच्छत । हे [v]सौधन्वनाः सुधन्वनः[1] पुत्राः[2] [v]अमृतासः अमृता देवाः [v]अभवत ॥

यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ।
तदृभवः परिषिक्तं व एतत्सं मदेभिरिन्द्रियेभिः पिबध्वम् ॥ ९ ॥

यत् । तृतीयम् । सवनम् । रत्नऽधेयम् । अकृणुध्वम् । सुऽअपस्या । सुऽहस्ताः ।
तत् । ऋभवः । परिऽसिक्तम् । वः । एतत् । सम् । मदेभिः । इन्द्रियेभिः । पिबध्वम् ॥९॥

हे [v]सुहस्ताः शोभनहस्ताः [v]ऋभवः [v]रत्नधेयं रमणीयसोमदानवत्[3] [v]यत्तृतीयं [v]सवनम् [v]अकृणुध्वं[4] प्रसाधितवन्तः । [v]स्वपस्या शोभनकर्मेच्छया [v]एतत् [v]एतत् सवनं सवनगतं सोमद्रव्यं [v]परिषिक्तं परिषेचनवत् [v]वः युष्माकं संबन्धिभिः [v]मदेभिः माद्यद्भिः [v]इन्द्रियेभिः इन्द्रियैः [v]सं [v]पिबध्वम् । यद्यपि वदनमेव पानसाधनं तथापि चक्षुःश्रोत्रादीनामपि दर्शनश्रवणादिना तृप्तिसद्भावात पातृत्वमुपचर्यते ॥ ॥ ६ ॥

' अनश्वो जातः ' इति नवर्चं चतुर्थं सूक्तमार्भवम् । ऋषिर्वामदेवः । अन्त्या त्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । ' अनश्वोऽन्त्या त्रिष्टुप् ' इत्यनुक्रमणिका । आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानीयमिदम् । तथा च सूत्रितम्–' अनश्वो जातः परावतो य इति वैश्वदेवम् ' (आश्व. श्रौ. ७. ७) इति ॥

अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः ।
महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥ १ ॥

अनश्वः । जातः । अनभीशुः । उक्थ्यः । रथः । त्रिऽचक्रः । परि । वर्तते । रजः ।
महत् । तत् । वः । देव्यस्य । प्रऽवाचनम् । द्याम् । ऋभवः । पृथिवीम् । यत् । च । पुष्यथ ॥१॥

हे [v]ऋभवः अश्विनोः संबन्धी युष्मद्दत्तः [v]रथः [v]अनश्वो [v]जातः वाहनाश्वनिरपेक्षः संपन्नः । तथा [v]अनभीशुः प्रग्रहरहितः[3] [v]उक्थ्यः स्तुत्यः [v]त्रिचक्रः चक्रत्रययुक्तः सन्[4] [v]रजः अन्तरिक्षं [v]परि [v]वर्तते परिभ्रमति । [v]महत् प्रभूतं [v]तत् रथनिर्माणाख्यं कर्म [v]वः युष्माकं [v]देव्यस्य देवत्वस्य [v]प्रवाचनं प्रवक्तृ प्रख्यापकम् । [v]यच्च येन कर्मणा [v]द्यां[5] [v]पृथिवीं च[5] [v]पुष्यथ पुष्टां कुरुथ ॥

---

१. न-ल-स–' सुधन्वनः पुत्राः ' नास्ति । २. ख-ग-च-ण-त-न-स–सोमदानवन्तं तृतीयसवनम् अनुकृणुध्वम् (त–अकृणुध्वम्) । ३. ल–ग्रहरहितः । ४. ख-ग-च-ण–' सन् ' नास्ति । ५. ख-ग-च-ण-न–द्यावापृथिवी वा (न-च) ।

रथं॑ ये च॒क्रुः सु॒वृतं॑ सु॒चेत॑सोऽवि॑ह्वरन्तं॒ मन॑स॒स्परि॒ ध्यया॑ ।
ताँ ऊ॒ न्व१॑स्य सव॑नस्य पी॒तय॒ आ वो॑ वाजा ऋभवो वेदयामसि ॥ २ ॥

रथ॑म् । ये । च॒क्रुः । सु॒ऽवृत॑म् । सु॒ऽचेत॑सः । अवि॑ऽह्वरन्तम् । मन॑सः । परि॑ । ध्यया॑ ।
तान् । ऊँ॒ इति॑ । नु । अ॒स्य । सव॑नस्य । पी॒तये॑ । आ । वः॒ । वा॒जाः॒ । ऋ॒भ॒वः॒ । वे॒द॒या॒म॒सि॒ ॥२॥

[v]सुचेतसः शोभनचित्ताः [v]ये ऋभवः [v]सुवृतं सुवर्तनचक्रम्[1] [v]अविह्वरन्तम् अकुटिलं [v]रथं [v]मनसः [v]परि [v]ध्यया मनसो ध्यानेनाप्रयत्नेन [v]नु [v]क्षिप्रं [v]चक्रुः [v]तान् । उशब्द एवार्थे । तानेव [v]अस्य [v]सवनस्य [v]पीतये एतं सोमं पातुं हे [v]वाजाः हे [v]ऋभवः [v]वः युष्मान् [v]आ [v]वेदयामसि आवेदयामः ॥

तद्वो॑ वाजा ऋभवः सु॒प्रवा॑च॒नं दे॒वेषु॑ वि॒भ्वो॑ अभवन्महित्व॒नम् ।
जि॒व्री यत्स॒न्ता पि॒तरा॑ सना॒जुरा॑ पुन॒र्युवा॑ना च॒रथा॑य॒ तक्ष॑थ ॥ ३ ॥

तत् । वः॒ । वा॒जाः॒ । ऋ॒भ॒वः॒ । सु॒ऽप्रवा॑चनम् । दे॒वेषु॑ । वि॒ऽभ्वः॒ । अ॒भ॒व॒त् । म॒हि॒ऽत्व॒नम् ।
जि॒व्री इति॑ । यत् । स॒न्ता । पि॒तरा॑ । स॒ना॒ऽजुरा॑ । पु॒नः॒ । युवा॑ना । च॒रथा॑य । तक्ष॑थ ॥ ३ ॥

हे [v]वाजाः [v]ऋभवः हे [v]विभ्वः विभवः । इतरापेक्षया परस्परं बहुवचनमित्युक्तम् । [v]वः युष्माकं [v]तत् [v]महित्वनं महत्त्वं माहात्म्यं [v]देवेषु मध्ये [v]सुप्रवाचनं प्रवाच्यम् [v]अभवत । तदित्युक्तं यदित्याह । [v]जिव्री वृद्धौ [v]सन्ता सन्तौ [v]सनाजुरा सदा जीर्णौ सन्तौ [v]पितरा पितरौ [v]पुनर्युवाना निस्यतरुणौ [v]चरथाय यथेच्छं[2] संचरणाय [v]तक्षथ संपादितवन्तः ॥

एकं॑ वि चक्र च॒मस॑ं च॒तुर्व॑यं॒ नि॑श्चर्मणो॒ गामरि॑णीत धी॒तिभिः॑ ।
अथा॑ दे॒वेष्वमृ॑त॒त्वमान॑श॒ श्रुष्टी॑ वाजा ऋभव॒स्तद्व॒ उक्थ्य॑म् ॥ ४ ॥

एक॑म् । वि । च॒क्र॒ । च॒मस॑म् । च॒तुः॒ऽवय॑म् । निः॒ । च॒र्म॒णः॒ । गाम् । अरि॑णीत । धी॒तिऽभिः॑ ।
अथ॑ । दे॒वेषु॑ । अमृ॑त॒ऽत्वम् । आ॒न॒श॒ । श्रुष्टी॑ । वा॒जाः॒ । ऋ॒भ॒वः॒ । तत् । वः॒ । उ॒क्थ्य॑म् ॥ ४ ॥

हे ऋभवः [v]एकं [v]चमसम् एकमेव सन्तं पानसाधनं चमसं [v]चतुर्वयम् । वयाः शाखाः । चतुःशाखं चतुरवयवं [v]वि [v]चक्र व्यकुरुत । तथा [v]धीतिभिः कर्मभिः [v]चर्मणः नूतनां [v]गां [v]निः [v]अरिणीत समस्कुरुत । निरित्येष समित्येतस्य स्थाने । [v]अथ अतः कारणात् [v]देवेषु मध्ये [v]अमृतत्वमानश प्राप्नुत । हे [v]वाजाः हे [v]ऋभवः [v]तत् तादृशं [v]वः युष्माकं कर्म । [v]श्रुष्टी इति क्षिप्रनामैतत् । क्षिप्रम् [v]उक्थ्यं स्तुत्यं भवति ॥

---

१. ख-ग-च-ण-त-न-भ-सुवर्तनं चक्रम् ; स-सुवर्तमानं चक्रम् । २. ख-ग-न-ण-प-फ-भ-' यथेच्छम् ' नास्ति ।

ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन्नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासोऽवथा स विचर्षणिः ॥ ५ ॥

ऋभुतः । रयिः । प्रथमश्रवःऽतमः । वाजऽश्रुतासः । यम् । अजीजनन् । नरः ।
विभ्वऽतष्टः । विदथेषु । प्रऽवाच्यः । यम् । देवासः । अवथ । सः । विऽचर्षणिः ॥ ५ ॥

[v]ऋभुतः ऋभूणां सकाशात् [v]प्रथमश्रवस्तमः प्रथमं मुख्यमतिशयितं श्रवः[१] अन्नं यशो वा यस्य धनस्य तत् [v]रयिः धनम् । अस्माकं भवत्विति शेषः । [v]वाजश्रुतासः वाजैः अन्नैः[२] सह[३] विख्याताः[४] [v]नरः नेतारः ऋभवः [v]यं रयिम् [v]अजीजनन् उत्पादितवन्तः । [v]विभ्वतष्टः विभ्वभिर्ऋभुभिस्तष्टः तक्षणसंपन्नश्चमसोऽश्विनो रथो वा [v]विदथेषु यज्ञेषु [v]प्रवाच्यः प्रकर्षेण स्तुत्यः । हे [v]देवासः द्योतमानाः[५] यूयं [v]यं रथं चमसं वा[६] [v]अवथ रक्षथ । [v]स [v]विचर्षणिः विविधं द्रष्टा भवति द्रष्टव्यो भवनीत्यर्थः ॥ ॥ ७ ॥

स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥ ६ ॥

सः । वाजी । अर्वा । सः । ऋषिः । वचस्यया । सः । शूरः । अस्ता । पृतनासु । दुस्तरः ।
सः । रायः । पोषम् । सः । सुऽवीर्यम् । दधे ।
यम् । वाजः । विऽभ्वा । ऋभवः । यम् । आविषुः ॥ ६ ॥

[v]स [v]वाजी वेजनवान् बलवान् सन् [v]अर्वा अरणकुशलो भवति । [v]स [v]ऋषिः अतीन्द्रियज्ञानी सन् [v]वचस्यया स्तुत्या युक्तो भवति । [v]स [v]शूरः विक्रान्तः सन् [v]अस्ता क्षेप्ता शत्रूणां भवति । स्वयं च [v]पृतनासु संग्रामेषु [v]दुष्टरः नाभिभाव्यो भवति । [v]सः एव[७] [v]रायस्पोषं धनपुष्टिं [v]दधे धत्ते । [v]स [v]सुवीर्यं सुवीरत्वं दधे धत्ते । [v]यं मनुष्यं [v]वाजो [v]विभ्वा [v]ऋभवः च [v]आविषुः अरक्षन् । स एवमेवं भवतीति । अन्यस्य बहुवचनिर्देशस्त्रयाणाम् ऋभुव्यवहारप्राचुर्याभिप्रायः[८] ॥

श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेदयामसि ॥ ७ ॥

श्रेष्ठम् । वः । पेशः । अधि । धायि । दर्शतम् । स्तोमः । वाजाः । ऋभवः । तम् । जुजुष्टन ।
धीरासः । हि । स्थ । कवयः । विपःऽचितः । तान् । वः । एना । ब्रह्मणा । आ । वेदयामसि ॥७॥

---

१. ल–'श्रवः' नास्ति । २. न-ल-स–'अन्नैः' नास्ति । ३. ख-ग-च-ण-न-प-फ-भ–सदसि ख्यातः; घ-स–सदभिख्यातः; त–सदाभिख्यातः । ४. ख-ग-च-ण-प-भ–यं चमसं रथं वा । ५. ख-ग-घ-ण-त-न-भ–दाता; स–तदा । ६. त–ऋभुत्वव्यवहार० ।

[v]श्रेष्ठम् अस्युत्कृष्टमत एव [v]दर्शतं दर्शनीयं [v]वः युष्माकं [v]पेशः रूपम् [v]अधि [v]धायि अधिनिहितम्। अतस्तदुचितो यः [v]स्तोमः स्तोत्रमस्मत्कृतमस्ति हे [v]वाजा [v]ऋभवस्तं स्तोमं स्तोत्रं [v]जुजुष्टन सेवध्वम्। ये यूयं [v]धीरासो [v]हि धीमन्तः प्रसिद्धाः [v]कवयः मेधाविनः [v]विपश्चितः ज्ञानवन्तः [v]स्थ भवत[1] [v]नान्वः युष्मान् [v]एना एनेन [v]ब्रह्मणा मन्त्रेण शस्त्रात्मकेन [v]आ [v]वेदयामसि। अथवोक्तलक्षणाः विपश्चितः स्तोतारो यान्। स्तुवन्तीति शेषः। तान् ब्रह्मणा आ वेदयामसि प्रज्ञापयामः॥

यूयमस्मभ्यं धिषणाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना।
द्युमन्तं वाजं वृषशुष्ममुत्तमं मा नो रयिमृभवस्तक्षता वयः॥ ८॥

यूयम्। अस्मभ्यम्। धिषणाभ्यः। परि। विद्वांसः। विश्वा। नर्याणि। भोजना।
द्युऽमन्तम्। वाजम्। वृषऽशुष्मम्। उत्ऽतमम्।
आ। नः। रयिम्। ऋभवः। तक्षत। आ। वयः॥ ८॥

हे ऋभवः [v]यूयमस्मभ्यं [v]धिषणाभ्यस्परि स्तुतिभ्यो निमित्तभूताभ्यः। परीति पञ्चम्यर्थानुवादी। यद्वा[2]। अस्मन्मतिभ्योऽधिकानि[3] [v]नर्याणि नृभ्यो हितानि [v]विश्वा सर्वाणि [v]भोजना भोग्यानि [v]विद्वांसः जानन्तः सन्तः [v]आ [v]तक्षत संपादयत[4]। किं च [v]द्युमन्तं दीप्तिमन्तं हिरण्यादिरूपं [v]वाजं बलवन्तं [v]वृषशुष्मं सेक्तॄणां बलवतां शोषकम् [v]उत्तमं [v]रयिं [v]नः अस्माकं [v]वयः अन्नं च [v]आ तक्षत हे[5] [v]ऋभवः[6]॥

इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः।
येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः॥ ९॥

इह। प्रऽजाम्। इह। रयिम्। रराणाः। इह। श्रवः। वीरऽवत्। तक्षत। नः।
येन। वयम्। चितयेम। अति। अन्यान्। तम्। वाजम्। चित्रम्। ऋभवः। दद। नः॥९॥

[v]नः अस्माकम् [v]इह यज्ञे [v]रराणाः रममाणाः[7] [v]प्रजां पुत्रपौत्रादिरूपां [v]तक्षत संपादयत[8]। [v]इह एव यज्ञे [v]रयिं च तक्षत। [v]इह एव यज्ञे [v]श्रवः यशः [v]वीरवत् वीरैर्भृत्यादिभिरुपेतं तक्षत। किंच [v]वयं [v]येन वाजेन [v]अन्यान् अस्मत्समानान् [v]अति [v]चितयेम अतिक्रम्य ज्ञायेमहि। [v]तं [v]चित्रं चायनीयं [v]वाजम् अन्नं हे [v]ऋभवः [v]नः [v]दद अस्मभ्यं दत्त॥ ॥ ८॥

---

१. न-ल-स-'भवत' नास्ति। २. ख-ग-च-ण-न-भ-'यद्वा...अधिकानि' नास्ति। ३. ख-ग-च-ण-न-भ-'संपादयत' नास्ति; घ-संपादितवन्तः। ४. ख-ग-च-ण-प-फ-भ-'हे ऋभवः' नास्ति। ५. ख-ग-च-ण-प-फ-भ-स्तुताः सन्तः प्रजाम्; न-स-'रममाणाः...रूपां' नास्ति। ६. ख-ग-च-ण-भ-इह; न-स-'संपादयत' नास्ति।

'उप नो वाजाः' इत्यष्टर्चं पञ्चमं सूक्तं वामदेवस्यार्षमार्भवं त्रैष्टुभम्। पञ्चम्याद्याश्चतस्रोऽनुष्टुभः। तथा चानुक्रान्तम्–'उप नोऽष्टौ चतुरनुष्टुबन्तम्' इति। ध्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे आद्याः चतस्रः शस्याः। 'उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च' (आश्व. श्रौ. ८. ८) इति हि सूत्रितम्॥

उप नो वाजा अध्वरमृभुक्षा देवाँ यात पथिभिर्देवयानैः।
यथा यज्ञं मनुषो विक्ष्वा३सु दधिध्वे रण्वाः सुदिनेष्वह्नाम्॥ १॥

उप। नः। वाजाः। अध्वरम्। ऋभुक्षाः। देवान्। यात। पथिऽभिः। देवऽयानैः।
यथा। यज्ञम्। मनुषः। विक्षु। आसु। दधिध्वे। रण्वाः। सुऽदिनेषु। अह्नाम्॥ १॥

हे[1] वाजाः[1] हे ऋभुक्षाः[2] ऋभवो हे देवाः[3] नः[4] अध्वरं यागम्[5] उप यात उपगच्छत। देवयानैः देवैर्गन्तव्यैः पथिभिः मार्गैः। यथा येन प्रकारेण मनुषः मनोः संबन्धिनीषु आसु विक्षु प्रजासु यजमानेषु मध्ये हे रण्वाः रमणीया ऋभवः[6] अह्नां सुदिनेषु सुदिनत्वनिमित्तेषु यज्ञम् अस्मदीयं दधिध्वे धारयथ। यथा येन प्रकारेण यज्ञमागत्य सुदिनत्वं कुरुथ तथा यज्ञमायातेति॥

ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः।
प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः॥ २॥

ते। वः। हृदे। मनसे। सन्तु। यज्ञाः। जुष्टासः। अद्य। घृतऽनिर्णिजः। गुः।
प्र। वः। सुतासः। हरयन्त। पूर्णाः। क्रत्वे। दक्षाय। हर्षयन्त। पीताः॥ २॥

अद्य अस्मिन् यागदिने ते[4] एते[4] यज्ञाः यागसाधनाः सोमाः वो[5] हृदे युष्मद्धृदयाय[6] मनसे तत्प्रीतये[7] सन्तु भवन्तु। अद्यास्मिन दिने जुष्टासः पर्याप्ताः सोमाः घृतनिर्णिजः मिश्रणद्रव्येण दीप्तरूपाः गुः गच्छन्तु युष्मद्धृदयम्। सुतासः अभिषुताः सोमाः चमसेषु[8] पूर्णाः वः युष्मदर्थं प्र हरयन्त प्रहियन्ते। यद्वा। हर्यतेः कान्तिकर्मण इदं रूपम्। प्रकर्षेण वः युष्मान् कामयन्ते। क्रत्वे क्रतवे कर्मणे दक्षाय उत्साहाय[9] पीताः हर्षयन्त हर्षयन्तु॥

त्र्युदायं देवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः।
जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमम्॥ ३॥

त्रिऽउदायम्। देवऽहितम्। यथा। वः। स्तोमः। वाजाः। ऋभुक्षणः। ददे। वः।
जुह्वे। मनुष्वत्। उपरासु। विक्षु। युष्मे इति। सचा। बृहत्ऽदिवेषु। सोमम्॥ ३॥

---

१. ख-ग-च-ण-प-फ-भ–'हे वाजाः' नास्ति। २. प-भ–अस्मदीयं यागम्। ३. ख-ग-च-ण-प-फ-भ–वाजाः। ४. ख-ग-च-ण-फ-भ–ते; न-स–एते। ५. न-ल-भ–हृदयाय। ६. ख-ग-च-ण-त-न-प-फ-भ–सवनेषु। ७. ख-ग-घ-च-ण-फ-भ–बलाय।

[v]युदायं [v]युदयं सवनत्रयगमनोपेतं [v]देवहितं सोमाख्यमन्नं देवेभ्यो हितं देवैर्वा विहितम्[१] । तृतीयसवनस्थम्[२] इत्यर्थः । तत् [v]यथा [v]वः युष्मान् [v]ददे धारयति । हे [v]वाजाः हे [v]ऋभुक्षणः ऋभवो यथा [v]स्तोमः स्तोत्रं [v]वः ददे धारयति । [v]उपरासु । उप देवयजनसमीपे रमन्ते इत्युपराः । तासु [v]विक्षु प्रजासु [v]बृहद्दिवेषु प्रभूतदीप्तिषु देवेषु[३] मध्ये [v]मनुष्वत् मनुरिव [v]युष्मे युष्मदर्थं [v]सचा सह अनेकग्रहेषु प्रस्थितं [v]जुह्वे जुहोमि [v]सोमम् ॥

पीवोअश्वाः शुचद्रथा हि भूतार्यःशिप्रा वाजिनः सुनिष्काः ।
इन्द्रस्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय ॥ ४ ॥

पीवःऽअश्वाः । शुचत्ऽरथाः । हि । भूत । अर्यःऽशिप्राः । वाजिनः । सुऽनिष्काः ।
इन्द्रस्य । सूनो इति । शवसः । नपातः । अनु । वः । चेति । अग्रियम् । मदाय ॥ ४ ॥

हे [v]वाजिनः ऋभवः [v]पीवोअश्वाः पीवानोऽश्वा येषां ते तादृशाः । तथा [v]शुचद्रथाः दीप्तरथाः[४] [v]अयःशिप्राः । 'शिप्रे हनू नासिके वा' । अयोवत्सारभूतशिप्राः[५] [v]सुनिष्काः शोभनधनाश्च [v]भूत भवत । हे [v]इन्द्रस्य [v]सूनो सूनवः[६] पुत्रवद्रक्षणीया हे [v]शवसो [v]नपातः बलस्य पुत्रा बलिनः [v]वः युष्मभ्यं [v]मदाय [v]अनु [v]चेति अन्वजानाति । देवेषु [v]अग्रियम् अग्रे भवं तृतीयसवनम्[७] ॥

ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् ।
इन्द्रस्वन्तं हवामहे सदासातममश्विनम् ॥ ५ ॥

ऋभुम् । ऋभुक्षणः । रयिम् । वाजे । वाजिन्ऽतमम् । युजम् ।
इन्द्रस्वन्तम् । हवामहे । सदाऽसातमम् । अश्विनम् ॥ ५ ॥

हे [v]ऋभुक्षणः ऋभवः [v]ऋभुम् उरुभासमानं [v]रयिं धनरूपम् । तद्धेतुभूतत्वात् तच्छब्दयम् । [v]वाजे संग्रामे [v]वाजिन्तमम् अत्यन्तबलवन्तं [v]युजं परस्परयोगोपेतम् [v]इन्द्रस्वन्तम् इन्द्रवन्तमिन्द्रियवन्तं [v]सदासातमं सर्वदा दातृतमम् [v]अश्विनम् अश्ववन्तं भवतां गणं [v]हवामहे आह्वयामि ॥ ॥९॥

सेदु भवो यमवथ यूयमिन्द्रश्च मर्त्यम् ।
स धीभिरस्तु सनिता मेधसाता सो अर्वता ॥ ६ ॥

सः । इत् । ऋभवः । यम् । अवथ । यूयम् । इन्द्रः । च । मर्त्यम् ।
सः । धीभिः । अस्तु । सनिता । मेधऽसाता । सः । अर्वता ॥ ६ ॥

---

१. ख-ग-ण-न-भ-म-हितम् । २. ख-ग-च-ण-ल-तृतीयसवने स्थितम्; भ-तृतीयसवनस्थितम् । ३. ग-च-'देवेषु' नास्ति । ४. ख-ग-च-ण-फ-भ-सुष्ठु रथाः; न-स-सप्त रथाः; प-सुषु रथाः । ५. ख-ग-च-ण-फ-भ-अयोवा सारभूतनासिकाः; प-अयोवत् सारभूतनासिकाः । ६. ख-ग-च-ण-प-भ-सूनवः पुत्राः । ७. ख-ग-च-ण-प-फ-भ-तृतीयसवनं हि ।

हे [V]ऋभवः [V]यूयमिन्द्रश्च [V]यं [V]मर्त्यम् [V]अवथ रक्षथ । [V]सेत् स एव [V]अस्तु भवतु[१] । नान्यः श्रेष्ठो भवत्वित्यर्थः । [V]सः एव [V]धीभिः कर्मभिः [V]सनिता संभक्ता भवतु । [V]मेधसाता मेधसातौ यज्ञे [V]सः एव [V]अर्वता अरणवताश्वेन युक्तो भवतु ॥

वि नो वाजा ऋभुक्षणः पथश्चितन यष्टवे ।
अस्मभ्यं सूरयः स्तुता विश्वा आशास्तरीषणि ॥ ७ ॥

वि । नः । वाजाः । ऋभुक्षणः । पथः । चितन । यष्टवे ।
अस्मभ्यम् । सूरयः । स्तुताः । विश्वाः । आशाः । तरीषणि ॥ ७ ॥

हे [V]वाजाः हे [V]ऋभुक्षणः ऋभवः [V]नः अस्माकं [V]पथः मार्गान् [V]यष्टवे यष्टुं यज्ञमार्गान् [V]वि [V]चितन विचेतयत । प्रज्ञापयतेत्यर्थः । [V]अस्मभ्यं हे [V]सूरयः मेधाविनो यूयं [V]स्तुताः सन्तः [V]विश्वा [V]आशाः सर्वा दिशः [V]तरीषणि तरीतुम् । सामर्थ्यं वितरतेति शेषः ॥

तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम् ।
समश्वं चर्षणिभ्य आ पुरु शंस्त मघत्तये ॥ ८ ॥

तम् । नः । वाजाः । ऋभुक्षणः । इन्द्र । नासत्या । रयिम् ।
सम् । अश्वम् । चर्षणिऽभ्यः । आ । पुरु । शंस्त । मघत्तये ॥ ८ ॥

अनया स्तुतिमुपसंहृत्य[२] अभिमतमाशास्ते । हे [V]वाजाः हे [V]ऋभुक्षणः ऋभवो हे [V]इन्द्र हे [V]नासत्या अश्विनौ ते यूयं [V]नः अस्मभ्यं [V]चर्षणिभ्यः मनुष्येभ्यः स्तोतृभ्यः [V]तं [V]पुरु प्रभूतं [V]रयिं धनम् [V]अश्वं च पुरु प्रभूतं [V]मघत्तये धनदानाय [V]सम् [V]आ [V]शंस्त सम्यगाशासनं कुरुत ॥ ॥ १० ॥

' उतो हि वाम् ' इति दशर्चं षष्ठं सूक्तम् । वामदेव ऋषिः । त्रिष्टुप् छन्दः । दधिक्रा देवता । आद्या[३] द्यावापृथिव्या[३] । अत्रानुक्रमणिका—' उतो हि दश दाधिक्रं हि द्यावापृथिव्याद्या ' इति । विनियोगो लैङ्गिकः ॥

उतो हि वां दात्रा सन्ति पूर्वा या पुरुभ्यस्त्रसदस्युर्नितोशे ।
क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रम् ॥ १ ॥

उतो इति । हि । वाम् । दात्रा । सन्ति । पूर्वा । या । पुरुऽभ्यः । त्रसदस्युः । निऽतोशे ।
क्षेत्रऽसाम् । ददथुः । उर्वराऽसाम् । घनम् । दस्युऽभ्यः । अभिऽभूतिम् । उग्रम् ॥ १ ॥

---

१. ख-ग-घ-च-ण-न-भ-स–भवति । २. ख-ग-च-ण-फ-भ-स–स्तुतिमुपसंहरन् । ३. ख-ग-ण-भ–आद्या द्यावापृथिव्यौ; घ-च-त-प फ–आद्यायाः द्यावापृथिव्यौ ।

[v]उतो इति पूरणः । अस्या द्यावापृथिव्यत्वादत्र तद्वाचकशब्दाभावेऽपि ते एव संबोद्धव्ये । हे द्यावापृथिव्यौ [v]वां[1] युवाभ्यां सकाशात [v]दात्रा दानकर्त्रा पौरुकुत्सेन त्रसदस्युना लब्धानि [v]पूर्वा पूर्वाणि पुरातनानि पूरकाणि वा धनानि [v]सन्ति । [v]या यानि धनानि [v]पुरुभ्यः अर्थिभ्यो मनुष्येभ्यः[2] [v]त्रसदस्युः राजा [v]नितोशे न्यतोशत दत्तवान् । [v]क्षेत्रसाम् । क्षेत्राणि सर्वा भूमीः सनोतीति क्षेत्रसाः अक्षः । तं [v]ददथुः[3] । तथा [v]उर्वरासाम् । उर्वरा सर्वमस्याढ्या भूः । तां सनोतीत्युर्वरासाः पुत्रः । तं ददथुः। [v]घनं हननार्हम्[4] आयुधं [v]दस्युभ्यः दस्यूनां वधार्थं च ददथुः । कीदृशमायुधम् । [v]अभिभूतिम् अभिभवितारम् [v]उग्रम् उद्गूर्णबलम् । यद्वा । उत्तरार्धमेकं वाक्यम् । दातव्यानि धनान्युत्तमलक्षणं पुत्रं च ददथुः । दत्तवत्यौ स्थः । तानि मह्यमपि ददाथाम् इत्यर्थः[5] ॥

उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिम् ।
ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरम् ॥ २ ॥

उत । वाजिनम् । पुरुनिःऽसिध्वानम् । दधिऽक्राम् । ऊँ इति । ददथुः । विश्वऽकृष्टिम् ।
ऋजिप्यम् । श्येनम् । प्रुषितऽप्सुम् । आशुम् । चर्कृत्यम् । अर्यः । नृऽपतिम् । न । शूरम् ॥२॥

[v]उत अपि च [v]वाजिनं गमनवन्तम् । अश्वरूपं वा देवं अग्नेरश्वरूपत्वेन दधिक्राव्णत्वात्[6]। अग्नेस्तनूरूपत्वं ब्राह्मणे समाम्नातं–' तानग्निरश्वो भूत्वाभ्यद्रवत ' इति । [v]पुरुनिष्षिध्वानं पुरूणां बहूनां शत्रूणां निष्षेद्धारं [v]दधिक्राम् । दधदन्यं धारयन् क्रामतीति दधिक्राः । तमेतन्नामकं [v]देवम् । ऊः पूरणः । [v]विश्वकृष्टिम् । विश्वाः कृष्टयो रक्षणीयाः सेवका वा[7] मनुष्या यस्य तम् । [v]ऋजिप्यम् । ऋजोप्नोति गच्छतीत्यृजिप्यः । तं [v]श्येनं शंसनीयगमनं [v]प्रुषितप्सुं दीप्तरूपम्[8] [v]आशुं व्याप्तं शीघ्रगमनं वा[9] [v]अर्यः अरेः [v]चर्कृत्यं कर्तनशीलं [v]शूरं [v]नृपतिं [v]न राजानमिव स्थितं देवं द्यावापृथिव्यौ [v]ददथुः धारयतः ॥

यं सीमनु प्रवतेव द्रवन्तं विश्वः पुरुर्मदति हर्षमाणः ।
पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम् ॥ ३ ॥

यम् । सीम् । अनु । प्रवताऽइव । द्रवन्तम् । विश्वः । पुरुः । मदति । हर्षमाणः ।
पट्ऽभिः । गृध्यन्तम् । मेधऽयुम् । न । शूरम् । रथऽतुरम् । वातमऽइव । ध्रजन्तम् ॥ ३ ॥

[v]यं दधिक्रां [v]विश्वः [v]पूरुः सर्वोऽपि मनुष्यः [v]हर्षमाणः हृष्यन् हर्षयन् वा [v]मदति स्तौति । तं देवं द्यावापृथिव्यौ ददथुरिति संबन्धः । स देवो विशेष्यते। [v]सीं सर्वतः [v]प्रवतेव[11] प्रवणवता[12] निम्नेन मार्गेणोदकमिवानुक्रमेण [v]द्रवन्तं गच्छतं[13] [v]पड्भिः पादैः [v]गृध्यन्तम् अभिकाङ्क्षन्तं दिशो लङ्घितुम् ।

---

१. त–वां युवाम् । २. त–अर्थिमनुष्येभ्यः । ३. ख-ग-च-ण-प-भ–ददथुः ददाथाम् । ४. ख-ग-च-ण-भ–' हननार्हं ' नास्ति; न–घातार्हम । ५. त–इत्यर्थः । हि पूरणः । ६. ख-ग-च-ण-न-फ-भ–दधिक्राख्या; स–दधिक्राख्यम् । ७. ख-ग-च-न-प-फ-भ-स–तमेकम् । ८. ख-ग-च-ण-न-प-फ-भ–' वा ' नास्ति । ९. ख-ग-च-ण-न-फ-भ-स–दीप्तस्वरूपम् । १०. ख-ग-च-ण-फ-भ–च । ११. न-ल-स–प्रवता । १२. च-फ–प्रवणेनेव । १३. ख-ग-च-ण-न-प-फ-भ-स–' गच्छन्तं ' नास्ति ।

तत्र दृष्टान्तः । [v]मेधयुं [v]न [v]शूरं । संग्रामेच्छुं शूरमिव । यद्वा । यज्ञकर्मणेच्छुमध्वर्य्वादिकमिव । [v]रथतुरं रथेन गच्छन्तं [v]वातमिव [v]प्रजन्तं शीघ्रग[1] वायुमिव । उक्तविशेषविशिष्टान्[2] उदकशूरवायून् यथा सर्वो जनः स्तौति तथा[3] यं[4] देवं स्तौति तं ददथुरित्यर्थः ॥

यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ।
आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्यापं आयोः ॥ ४ ॥

यः । स्म । आऽरुन्धानः । गध्या । समत्ऽसु । सनुऽतरः । चरति । गोषु । गच्छन् ।
आविःऽऋजीकः । विदथा । निऽचिक्यत् । तिरः । अरतिम् । परि । आपः । आयोः ॥४॥

[v]यः [v]स्म यः खलु देवः [v]गध्या गध्यानि । ' गध्यतिर्मिश्रीभावकर्मा ' (निरु. ५. १५) इति निरुक्तम् । मिश्रयितव्यानि फलानि [v]समत्सु संग्रामेषु [v]आरुन्धानः सर्वतो निरोधयन् [v]सनुतरः संभक्ततरः [v]गोषु सर्वासु दिक्षु गोषु वा निमित्तभूतेषु [v]गच्छन् [v]आविर्ऋजीकः आविर्भूतसाधनः[4] आविर्भूतमुष्को वा [v]विदथा विदथानि ज्ञातव्यानि [v]निचिक्यत । पश्यतिकर्मैतत् । जानन् [v]अरतिम् अरमणं दुःखमभिगन्तारम् अरिं[5] वा [v]परि सर्वतः [v]तिरः [v]चरति तिरस्करोति[6] । कस्यारतिमिति । [v]आपः व्याप्तस्य[7] स्तोतुः [v]आयोः मनुष्यस्य यजमानस्य[8] ॥

उत स्मैनं वस्वमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् ॥ ५ ॥

उत । स्म । एनम् । वस्वऽमथिम् । न । तायुम् । अनु । क्रोशन्ति । क्षितयः । भरेषु ।
नीचा । अयमानम् । जसुरिम् । न । श्येनम् । श्रवः । च । अच्छ । पशुऽमत । च । यूथम् ॥५॥

[v]उत [v]स्म अपि खलु [v]एनं दधिक्रां [v]भरेषु संग्रामेषु [v]वस्वमथिं [v]तायुं [v]न वस्वमाथिनं तस्करमिव । तं दृष्ट्वा [v]क्षितयः मनुष्या यथा [v]अनु [v]क्रोशन्ति तद्वद्वैरिणः अनुक्रोशन्ति[9] । किंच [v]नीचा नीचैः [v]अयमानं गच्छन्तं [v]जसुरिं [v]न [v]श्येनं क्षुधितं श्येनं पक्षिणमिव[10] । तं यथा दृष्ट्वा पक्षिणः पलायन्ते तद्वत् । [v]श्रवः अन्नं कीर्तिं वा [v]पशुमत् [v]यूथं [v]च [v]अच्छ अभिलक्ष्य गच्छन्तमेनमनुक्रोशन्तीति संबन्धः[11] । 'अपि स्मैनं वस्वमथिमिव वस्वमाथिनम् ' (निरु. ४. २४) इत्यादिनिरुक्तमत्रानुसंधेयम् ॥ ॥ ११ ॥

१ ख-ग-च-ण-शीघ्रम्; स-शीघ्रगन्तारम् । २ त-उक्तविशेषण० । ३. ख-ग-च-ण-भ-तथाप्ययम; प-फ-तत्रापि यम । ४. ख-ग-च-फ-भाविर्भूतरथसारथिधनः; न-आविर्भूतधनसाधनः; भ-आविर्भूतनसाधनः; स-आविर्भूतेन साधनेन । ५. ख-ग-च-ण-प-फ-भ-परि तिरश्चरति सर्वतः (ख-सर्वः) तिरस्करोति । ६ ख-ग घ-च-ण-प-फ-भ-आप्तस्य; न-स-वाप्तस्य । ७. त-ल-यजमानस्य । आप इति वा देवताविशेषणम् । अद्भ्यः संभूत इत्यर्थः । ८. ख-ग घ-च-ण-न-भ-स-क्रोशन्ति । ९. त-श्येनपक्षिणमिव । १०. त-प-संबन्धः । च पूरणः ।

उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानाम् ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥ ६ ॥

उत । स्म । आसु । प्रथमः । सरिष्यन् । नि । वेवेति । श्रेणिऽभिः । रथानाम् ।
स्रजम् । कृण्वानः । जन्यः । न । शुभ्वा । रेणुम् । रेरिहत् । किरणम् । ददश्वान् ॥ ६ ॥

[v]उत [v]स्म अपि च खलु [v]आसु असुरसेनासु[1] [v]सरिष्यन् सर्तुमिच्छन् [v]प्रथमः प्रतमः[2] उत्कृष्टतमो मुख्यः सन् [v]रथानां [v]श्रेणिभिः राजिभिर्युक्तः सन् [v]नि [v]वेवेति नितरां गच्छति । इतस्ततो धावति । क इवेति । उच्यते । [v]स्रजम् । सृज्यते उत्पाद्यते रूपमनयेति स्रगलंकृतिः । तां [v]कृण्वानः कुर्वाणः[3] [v]जन्यो [v]न जनेभ्यो हितोऽश्व इव सुभ्वा । सुष्ठु भवतीति सुभ्वा शोभमानः । [v]किरणम् आस्यगतं खलीनं [v]ददश्वान् दशन्[4] [v]रेणुं स्वपादघातजनितं [v]रेरिहत् भृशं लेढि[5] ॥

उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमञ्जन् ॥ ७ ॥

उत । स्यः । वाजी । सहुरिः । ऋतऽवा । शुश्रूषमाणः । तन्वा । सऽमर्ये ।
तुरम् । यतीषु । तुरयन् । ऋजिप्यः । अधि । भ्रुवोः । किरते । रेणुम् । ऋञ्जन् ॥ ७ ॥

[v]उत अपि च [v]स्यः[6] सः[6] उक्तलक्षणः [v]वाजी वेजनवान् गमनवान् [v]समर्ये समरणे [v]सहुरिः सहनशीलः शत्रूणाम् [v]ऋतावा अन्नवान् [v]तन्वा स्वावयवेन[7] खुरादिना स्वतनुं [v]शुश्रूषमाणः [v]तुरं [v]यतीषु त्वरगामिनीष्वसुरसेनासु [v]तुरयन् त्वरयन् [v]ऋजिप्यः ऋजुगामी [v]रेणुं धूलिम् [v]ऋञ्जन् प्रसाधयंस्तमेव[8] रेणुं [v]भ्रुवोः [v]अधि उपरि [v]किरते विक्षिपति ॥

उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयन्ते ।
यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋञ्जन् ॥ ८ ॥

उत । स्म । अस्य । तन्यतोःऽइव । द्योः । ऋघायतः । अभिऽयुजः । भयन्ते ।
यदा । सहस्रम् । अभि । सीम् । अयोधीत् । दुःऽवर्तुः । स्म । भवति । भीमः । ऋञ्जन् ॥ ८ ॥

[v]उत [v]स्म अपि च खलु [v]द्योः दीप्यमानात् [v]तन्यतोः शब्दयितुरशनेः [v]इव [v]ऋघायतः हिंसतः [v]अस्य अस्मात् दधिक्रावाख्यात्[9] देवात् [v]अभियुजः अभियोक्तारोऽसुराः [v]भयन्ते बिभ्यति ।

१. त–आसुरसेनासु । २. ख-ग-घ-च-ण-प-फ-भ–'प्रतमः' नास्ति; न–प्रथतमः । ३. न-ल-स–'कुर्वाणः' नास्ति । ४. ख-ग-च-ण-भ–'दशन्' नास्ति । ५. फ–लेलिहन् । ६. ख-ग-च-ण-भ–स्यः; न-स–सः । ७. ख-ग-ण–सस्यावयवेन; च-प-भ–स्वस्यावयवेन, न-स–अस्यावयवेन । ८. ख-ग-च-ण-फ–प्रसाधयंस्तन्वा स्वस्यावयवेन खुरादिनामेव । ९. ख-ग-च-ण-त-न-प-फ-भ-स–'दधिक्रावाख्यात्' नास्ति ।

किंचायं vयदा vसौ सर्वतः vसहस्रम् vअभि vअयोधीत् संप्रहरेत् । तदा vऋजून् प्रसाधयन्नात्मानं vभीमः भयहेतुः vदुर्वर्तुः[1] दुर्वारश्च vभवति ॥

उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियन्तः परा दधिक्रा असरत्सहस्रैः ॥ ९ ॥

उत । स्म । अस्य । पनयन्ति । जनाः । जूतिम् । कृष्टिऽप्रः । अभिऽभूतिम् । आशोः ।
उत । एनम् । आहुः । सम्ऽइथे । विऽयन्तः । परा । दधिऽक्राः । असरत् । सहस्रैः ॥९॥

vउत vस्म अपि च खलु vअस्य दधिक्राण्णः vअभिभूतिम् अभिभवित्रीं vजूतिं पराभिभूतिं चेत्युभयं[2] वा vजनाः[3] vपनयन्ति स्तुवन्ति । कीदृशस्यास्य । vकृष्टिप्रः । कृष्टयो मनुष्याः । तेषां पूरकस्य vआशोः व्याप्तस्य वेगवतो वा । vउत अपि च vएनं vसमिथे संग्रामे vवियन्तः विविधं गच्छन्तो जना अयं vदधिक्राः देवः vसहस्रैः अनुचरैः परिवृतः vपरा vअसरत इति अस्मान् विहायान्यान् हन्तुं गत इति vआहुः । यद्वा । एनमेवमाहुः । वियन्तः शत्रवः परा । भवन्तीति शेषः । दधिक्राः[4] सहस्रैरसरत् गच्छतीति ॥

पवित्रेष्टौ 'आ दधिक्राः' इति दधिक्राण्णो याज्या । तथा च सूत्रितं–'दधिक्राण्णो अकारिषमा दधिक्राः शवसा पञ्च कृष्टीः' (आश्व. श्रौ. २. १२) इति ॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्यइव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥ १० ॥

आ । दधिऽक्राः । शवसा । पञ्च । कृष्टीः । सूर्यःऽइव । ज्योतिषा । अपः । ततान ।
सहस्रऽसाः । शतऽसाः । वाजी । अर्वा । पृणक्तु । मध्वा । सम् । इमा । वचांसि ॥ १० ॥

यः vदधिक्राः देवः vशवसा बलेन vपञ्च vकृष्टीः पञ्च जनान् देवमनुष्यासुररक्षःपितृसंज्ञकान् निषादपञ्चमान् चतुरो वर्णान् वा vसूर्यः[5] vज्योतिषा तेजसा यथा जगदावृणोति तद्वत् vअपः उदकानि vआ vततान आतनोति । vसहस्रसाः vशतसाः शतानां सहस्राणां च दाता vवाजी वेजनवान् vअर्वा अरणकुशलः स देवः vमध्वा मधुना मधुरेण फलेन vइमा इमान्युक्तानि स्तुतिवचांसि vसं vपृणक्तु संयोजयतु ॥ ॥ १२ ॥

'आशुं दधिक्राम्' इति षड्चं सप्तमं सूक्तम् । आदितः पञ्च त्रिष्टुभः[6] षष्ठ्यनुष्टुप् । ऋषिर्वामदेवः । पूर्वसूक्ते हीयुक्तत्वात् एतदपि[7] दाधिक्रम्[8] । तथा चानुक्रान्तम्—'आशुं षळन्त्यानुष्टुप्' इति । सूक्तविनियोगो लैङ्गिकः ॥

---

१. ख-ग-घ-च-ण-प-फ-भ–दुर्वर्तुः स्म । २. ख-ग-फ–चेत्युक्तं यजमानाः; च–चेत्युक्तं ये जनाः; ण-त–चेत्युक्तं य जनाः; न–चेतनां जनाः; प-भ–चेत्युक्तं यं जनाः; स–चेत्युक्तं यं वा जनाः । ३. त–दधिक्राः तु । ४. प– सूर्यइव । ५. ख-ग-च-ण-भ–त्रैष्टुभः । ६. ख-ग-च-ण-फ-भ–देवतापि दधिक्रा ।

आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।
उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन् ॥ १ ॥

आशुम् । दधिऽक्राम् । तम् । ऊँ इति । नु । स्तवाम । दिवः । पृथिव्याः । उत । चर्किराम ।
उच्छन्तीः । माम् । उषसः । सूदयन्तु । अति । विश्वानि । दुःऽइतानि । पर्षन् ॥ १ ॥

[v]आशुं शीघ्रगामिनं [v]तमु तमेव [v]दधिक्रां देवं [v]नु क्षिप्रं [v]स्तवाम । [v]उत अपि च [v]दिवः [v]पृथिव्याः च सकाशादस्य घासं [v]चर्किराम विक्षिपाम । [v]उच्छन्तीः तमो विवासयन्तीः [v]उषसः [v]मां प्रति [v]सूदयन्तु रक्षन्तु फलानि । [v]विश्वानि सर्वाणि [v]दुरितानि [v]अति [v]पर्षन् अतिपारयन्तु । अन्यदेवताकेषु मन्त्रेष्वन्यदेवतास्तुतिरस्मासां निपातभाक्त्वान्न विरुध्यते ॥

महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ॥ २ ॥

महः । चर्कर्मि । अर्वतः । क्रतुऽप्राः । दधिऽक्राव्णः । पुरुऽवारस्य । वृष्णः ।
यम् । पूरुऽभ्यः । दीदिऽवांसम् । न । अग्निम् । ददथुः । मित्रावरुणा । ततुरिम् ॥ २ ॥

[v]क्रतुप्राः कर्मणां पूरकोऽहं [v]महः[1] महतः[1] [v]अर्वतः अरणवतः[2] [v]पुरुवारस्य पुरुभिः[3] बहुभिर्वरणीयस्य [v]वृष्णः वर्षकस्य [v]दधिक्राव्णः[4] स्तुतिं [v]चर्कर्मि अत्यर्थं करोमि । हे [v]मित्रावरुणा मित्रावरुणौ युवां[5] [v]ततुरिं तारकं[6] [v]यं[7] [v]दीदिवांसं [v]नाग्निं दीप्यमानमग्निमिव स्थितं [v]पूरुभ्यः मनुष्येभ्यस्तेषामुपकाराय [v]ददथुः[8] धारयथः ॥

यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥ ३ ॥

यः । अश्वस्य । दधिऽक्राव्णः । अकारीत् । सम्ऽइद्धे । अग्नौ । उषसः । विऽउष्टौ ।
अनागसम् । तम् । अदितिः । कृणोतु । सः । मित्रेण । वरुणेन । सऽजोषाः ॥ ३ ॥

[v]यः यजमानः [v]अश्वस्य[8] अश्वरूपस्य व्यासस्य वा[8] [v]दधिक्राव्णः स्तुतिम् [v]उषसो [v]व्युष्टौ प्रभाते सति [v]अग्नौ [v]समिद्धे सति [v]अकारीत् अकार्षीत् । [v]मित्रेण [v]वरुणेन चाहोरात्राभिमानिदेवाभ्यां

---

१. ख-ग-च-ण-प-फ-भ-' महः महतः ' नास्ति । २. ख-ग-च-ण-प-फ-भ-अरणकुशलस्य । ३. न-ल-स-' पुरुभिः ' नास्ति । ४. ख-ग-च-ण-प-फ-भ-दधिक्राव्णः महः । ५. ख-ग-च-ण-भ-' युवां ' नास्ति । ६. ख-ग-च-ण-प-फ-भ-स-तारयितारम् । ७. प-यं दधिक्रावाणं ददथुः । ८. ख-ग-च-ण-प-फ-भ-अश्वस्याश्वस्य ।

[v]सजोषाः समानप्रीतिः [v]अदितिः अखण्डनीयो दधिक्राः [v]तं यजमानम् [v]अनागसं पापरहितं[2] [v]कृणोतु करोतु ॥

दधिक्राव्णो इष ऊर्जो मह्यो यदमन्महि मरुतां नाम भद्रम् ।
स्वस्तये वरुणं मित्रमग्निं हवामह इन्द्रं वज्रबाहुम् ॥ ४ ॥

दधिऽक्राव्णः । इषः । ऊर्जः । महः । यत् । अमन्महि । मरुताम् । नाम । भद्रम् ।
स्वस्तये । वरुणम् । मित्रम् । अग्निम् । हवामहे । इन्द्रम् । वज्रऽबाहुम् ॥ ४ ॥

[v]इषः अन्नसाधकस्य [v]ऊर्जः बलसाधकस्य [v]महः महतः [v]दधिक्राव्णः देवस्य [v]मरुतां स्तोतॄणां स्वभूतं [v]भद्रं[3] कल्याणं[3] [v]नाम नामरूपमस्ति [v]यत्* ततं[4] [v]अमन्महि स्तुमः। किंचात्र[5] निपातभाजो वरुणादींश्च[6] [v]स्वस्तये क्षेमाय [v]हवामहे ॥

इन्द्रमिद्वेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः ।
दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम् ॥ ५ ॥

इन्द्रम्ऽइव । इत् । उभये । वि । ह्वयन्ते । उत्ऽईराणाः । यज्ञम । उपऽप्रयन्तः ।
दधिऽक्राम् । ऊँ इति । सूदनम् । मर्त्याय । ददथुः । मित्रावरुणा । नः । अश्वम् ॥ ५ ॥

[v]इन्द्रमिव एनं दधिक्राम् [v]उदीराणाः युद्धाय उद्योगं[7] कुर्वन्तः [v]यज्ञमुपप्रयन्तः यज्ञमुपक्रम्य प्रवर्तमानाश्च [v]उभये [v]वि [v]ह्वयन्ते आह्वयन्ति। यं [v]मर्त्याय मर्त्यस्य [v]सूदनं प्रेरकम् [v]अश्वम् अश्वरूपं [v]दधिक्रां देवं हे [v]मित्रावरुणा मित्रावरुणौ[8] [v]नः अस्माकमर्थाय [v]ददथुः धारयथः। तं विह्वयन्ते। उभये इत्यत्र स्तोतृशंसितृभेदेन वा[9] उभयविधत्वम् अवगन्तव्यम्[10] ॥

'दधिक्राव्णो[11] अकारिषम्' इति षष्ठी पवित्रेष्ट्या अनुवाक्या। सूत्रितं च—'दधिक्राव्णो अकारिषमा दधिक्राः शवसा पञ्च कृष्टीः' (आश्व. श्रौ. २. १२) इति। दधिद्रप्सभक्षणेऽप्येषा। दधिक्राव्णो अकारिषमित्याग्नीध्रीये दधिद्रप्सान् भक्षयन्ति' (आ. श्रौ. ६. १२) इति सूत्रितत्वात् ॥

---

१. ख-ग-च-ण-न-भ-ल-स-'पापरहितं' नास्ति। २. ख-ग-ण-भ-ल-स-'भद्रं' नास्ति। ३. प-कल्याणं यत् नाम नामरूपमस्ति तत। * त-'यत्' नास्ति। ४. ख-ग-च-ण-प-फ-भ-किंच वरुणं मित्रमग्निमिन्द्रं कीदृशमिन्द्रं वज्रबाहुं च। ५. घ-ल-स-उद्योग्यम्; प-उत योग्यम। ६. न-ल-स-'मित्रावरुणौ' नास्ति। ७. ख-ग-च-ण-न-भ-ल-च। ८. त-अवगन्तव्यम्। इत उ पूर्णा। ९. न-दधिक्राव्णो अकारिषम् इत्याग्नीध्रीये दधिद्रप्सान् भक्षयन्तीति। दधिक्राव्णो अकारिषम् इत्याग्नीध्रीयं दधिद्रप्सान् प्राश्य इति सूत्रितत्वात्। दशरात्रस्य षष्ठेऽहनि तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे दधिक्राव्ण इत्येषा। सूत्रितं च। दधिक्राव्णो अकारिषमित्यनुष्टुब्विति। पवित्रेष्ट्यां दधिक्रावहविषो दधिक्राव्ण इति पुरोऽनुवाक्या। इमा जुह्वाना युष्मदा नमोभिर्दधिक्राव्णो अकारिषमिति सूत्रितत्वात्।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ ६ ॥

दधिऽक्राव्णः । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः ।
सुरभि । नः । मुखा । करत् । प्र । नः । आयूंषि । तारिषत् ॥ ६ ॥

[v]दधिक्राव्णः देवस्य स्तुतिम् [v]अकारिषं करवाणि । [v]जिष्णोः जयशीलस्य [v]अश्वस्य व्यापकस्य [v]वाजिनः वेगवतः[1] । स देवः [v]नः अस्माकं [v]मुखा मुखानि चक्षुरादीन्द्रियाणि [v]सुरभि सुरभीणि [v]करत् करोतु । [v]नः अस्मभ्यम् [v]आयूंषि [v]प्र [v]तारिषत् प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ॥१३॥

'दधिक्राव्ण इत्' इति पञ्चर्चमष्टमं सूक्तं वामदेवस्यार्षं दाधिक्रम् । आद्या त्रिष्टुप् शिष्टा जगत्यः । 'हंसः शुचिषत्' इत्येषा[2] सूर्यदेवताका । तथा चानुक्रमणिका–'दधिक्राव्णः पञ्च चतस्रोऽन्त्या जगत्योऽन्त्या सौरी' इति । सूक्तविनियोगो लैङ्गिकः ॥

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु ।
अपामग्नेरुषसः सूर्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोः ॥ १ ॥

दधिऽक्राव्णः । इत् । ऊँ इति । नु । चर्किराम । विश्वाः । इत् । माम् । उषसः । सूदयन्तु ।
अपाम् । अग्नेः । उषसः । सूर्यस्य । बृहस्पतेः । आङ्गिरसस्य । जिष्णोः ॥ १ ॥

[v]दधिक्राव्ण [v]इदु एतन्नामकस्य देवस्यैव स्तुतिं [v]नु क्षिप्रं [v]चर्किराम भृशं करवाम । [v]मां [v]विश्वा [v]इत् [v]उषसः सर्वा अपि ताः [v]सूदयन्तु कर्मसु प्रेरयन्तु । [v]अपाम्[2] [v]अग्नेः [v]उषसः [v]सूर्यस्य [v]बृहस्पतेः [v]आङ्गिरसस्य [v]जिष्णोः एतेषां देवतानामहं[3] स्तुतिं करवाणीति शेषः । तासामपि निपातभाक्त्वात् स्तुतिरविरुद्धा ॥

सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् ।
सत्यो द्रवो द्रवरः पतङ्गरो दधिक्रावेषमूर्जं स्वर्जनत् ॥ २ ॥

सत्वा । भरिषः । गोऽइषः । दुवन्यऽसत् । श्रवस्यात् । इषः । उषसः । तुरण्यऽसत् ।
सत्यः । द्रवः । द्रवरः । पतङ्गरः । दधिऽक्रावा । इषम् । ऊर्जम् । स्वः । जनत् ॥ २ ॥

[v]सत्वा गन्ता [v]भरिषः भरणकुशलः [v]गविषः गवां प्रेरकः एष्टा[4] वा[4] [v]दुवन्यसत् । दुवः परिचरणमिच्छन्तो दुवन्याः । तेषु सीदतीति दुवन्यसत् । [v]इषः इष्यमाणायाः [v]उषसः संबन्धिनि काले

---

१. च–अश्ववतः । २. ख-ग-च-ण-त-न-फ-भ-स–इत्येका । ३. न-ल-स–अहमग्न्यादिदेवतानाम् । ४. ख-ग-ण-प-फ-भ–'एष्टा वा' नास्ति ।

इत्यर्थः । यद्वा । इषः एष्टा एषणीयो वा । Vअवस्यात् अवस्येत् अन्नमिच्छेत् । किंच Vतुरण्यसत्[1] । त्वरया सीदतीति तुरण्यसत्[1] । Vसत्यः सत्सु तायमानः[2] Vद्रवः गन्ता Vद्रवरः प्रकृष्टवेगवान् Vपतङ्गरः । पतनेनोत्प्लवनेन पतनं पतङ्गः । तद्वान् पतङ्गरः । उक्तलक्षणः Vदधिक्रावा[3] देवः Vइषम् अन्नम् Vऊर्जं बलं Vस्वः स्वर्गं च Vजनत् जनयेत् उत्पादयेत् ॥

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥ ३ ॥

उत । स्म । अस्य । द्रवतः । तुरण्यतः । पर्णम् । न । वेः । अनु । वाति । प्रऽगर्धिनः ।
श्येनस्यऽइव । ध्रजतः । अङ्कसम् । परि । दधिऽक्राव्णः । सह । ऊर्जा । तरित्रतः ॥३॥

Vउत Vस्म अपि च खलु Vद्रवतः गच्छतः Vतुरण्यतः त्वरमाणस्य Vप्रगर्धिनः प्रकर्षेणाभिकाङ्क्षतः Vअस्य Vदधिक्राव्णः[4] देवस्य गतिं Vवेः गन्तुः पक्षिणः Vपर्णं Vन गमनं पत्रं वा अनुसृत्य[5] यथा वान्यन्ये[6] पक्षिणस्तद्वत् Vअनु Vवाति सर्वो वेगवान् जनः । सर्वेषामपि शीघ्रगामीत्यर्थः । किंच Vध्रजतः गच्छतः Vतरित्रतः तारयतोऽन्यान् ॥ अन्तर्भावितण्यर्थोऽयम् ॥ Vश्येनस्येव[7] Vअङ्कसं पादाधारम् उरःप्रदेशं[8] वा Vपरि परितः Vऊर्जा बलेन निमित्तेनान्नार्थं वा Vसह एकीभूय । संघेन गच्छन्तीति[9] शेषः ॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ॥ ४ ॥

उत । स्यः । वाजी । क्षिपणिम् । तुरण्यति । ग्रीवायाम् । बद्धः । अपिऽकक्षे । आसनि ।
क्रतुम् । दधिऽक्राः । अनु । सम्ऽतवीत्वत् । पथाम् । अङ्कांसि । अनु । आऽपनीफणत् ॥४॥

Vउत अपि च Vस्यः सः Vवाजी वेजनवानश्वरूपो देवः Vग्रीवायां गरणसाधनायां कण्ठे Vबद्धः Vअपिकक्षे कक्षप्रदेशे Vआसनि आस्ये च बद्धः । बद्धपल्यङ्कस्योक्तेषु स्थानेषु पाशबन्धाः संभवन्ति । एवं बद्धः[10] सन्[10] Vक्षिपणिं क्षेपणम् Vअनु Vतुरण्यति त्वरयति गन्तुम् । किंचायं Vदधिक्राः देवः Vक्रतुं कर्म प्रज्ञां वा Vअनु अनुसृत्य Vसंतवीत्वत् प्रवृद्धबलवान्[11] सन् Vपथां मार्गाणाम् Vअङ्कांसि कुटिलानि अनुसृत्य Vआपनीफणत् सर्वतो भृशं गच्छति ॥ फणतेर्गत्यर्थस्य यङ्लुकि इदं रूपम् ॥ 'अपि स वाजी वेजनवान्' (निरु. २.२८) इत्यादि निरुक्तमनुसंधेयम् ॥

---

१. ख-ग-घ-ण-भ–तुरण्यसत् त्वरया सीदतीति; त-न-ल-स–' तुरण्यसत्... तुरण्यसत ' नास्ति । २. ख-ण-प-भ–स्तूयमानः; ग-फ–सूयमानः । ३. ख-ग-ण-दधिक्रा । ४. न-ल-स–' दधिक्राव्णः ' नास्ति । ५. ख-प-फ-भ–अनु । ६. ख-फ-भ–वात्येति । ७. त-ल–श्येनस्येव तस्य देवस्य । ८. ख-फ–उरुप्रदेशम् । ९. ख-ल–गच्छतीति । १०. ग-घ-ण–बलवान । ११. ग-स–प्रवृद्धः बलवान् ।

दशरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रे[1] ' हंसः शुचिषत् ' इत्येषा । ' आहूय दूरोहणं रोहेत्हंसः शुचिषदिति पच्छोऽर्धर्चशः ' (आश्व. श्रौ. ८. २) इति सूत्रम् । स्मार्तविनियोगमाह शौनकः—' हंसः शुचिरदित्यं वा शुचिरीक्षेदिवाकरम्[2] । अन्तकाले जपन्नेति ब्रह्मणः सद्म शाश्वतम् ' (ऋग्वि. २. १३) इति ॥

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ५ ॥

हंसः । शुचिऽसत् । वसुः । अन्तरिक्षऽसत् । होता । वेदिऽसत् । अतिथिः । दुरोणऽसत् ।
नृऽसत् । वरऽसत् । ऋतऽसत् । व्योमऽसत् ।
अप्ऽजाः । गोऽजाः । ऋतऽजाः । अद्रिऽजाः । ऋतम् ॥ ५ ॥

अनया* सौर्यर्चा ' य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः' (छा. उ. १.६. ६) इत्यादिश्रुत्युक्तो मण्डलाभिमानी देवोऽस्ति यश्च सर्वप्राणिचित्तरूपस्थितः परमात्मा यच्च निरस्तसमस्तौपाधिकं परं ब्रह्म तत्सर्वमेकमेवेति प्रतिपाद्यते ॥ [v]हंसः । हन्तिर्गत्यर्थः । सर्वत्र सर्वदा गन्ता[3] ' योऽहं[3] सोऽसौ ' इत्यादिश्रुत्युक्तप्रकारेणैकीकृत्योपास्यः परमात्ममन्त्रप्रतिपाद्य आदित्यः । स च शुचौ दीप्ते द्युलोके सीदतीति [v]शुचिषत् । ' अथ यदतः परो दिवो ज्योतिर्दीप्यते ' (छा उ. ३. १३. ७) इत्यादिश्रुतेः । अनेन द्युस्थानः आदित्यः प्रतिपादितः । स एव मध्यस्थानो वायुरित्याह । [v]वसुः सर्वस्य वासयिता वायुः । स च [v]अन्तरिक्षसत् अन्तरिक्षसंचारी । अथ तस्यैव क्षितिस्थानवैदिकाग्निरूपतामाह । [v]होता देवानामाह्वाता होमनिष्पादको वा[4] [v]वेदिषत् वेद्यां गार्हपत्यादिरूपेण स्थितः[5] । [v]अतिथिः अतिथिवत् सर्वदा पूज्योऽग्निः । [v]दुरोणसत् । दुरोणं[6] गृहनाम । तत्र पाकादिसाधनत्वेन स्थितः । अनेन लौकिकाग्न्यात्मकत्वमुक्तम् । [v]नृषत् । नृषु मनुष्येषु चैतन्यरूपेण[7] सीदतीति नृषत् । अनेन परमात्मरूपत्वमुक्तम् । पुनरप्यादित्यात्मतामाह । [v]वरसत् । वरे वरणीये मण्डले सीदतीति वरसत् आदित्यः । ' वरं वा एतत्सद्मनां यस्मिन्नेष आसन्नस्तपति ' (४. २०) इति हि श्रूयते । ऋतं सत्यं ब्रह्म यज्ञो वा । तत्र सीदतीति [v]ऋतसत् अग्निः । व्योमान्तरिक्षम् । तत्र सीदतीति [v]व्योमसत् वायुः । इदानीमादित्यतोऽभ्यते । [v]अब्जाः उदकेषु जातः । उदकमध्ये ह्यवश्यं जायते । [v]गोजाः गोषु रश्मिषु

१. न–शस्त्रे वालखिल्ये । २. ख-ग-ण-न-फ-भ-स–शुचिरीक्ष्य दिवाकरम् । * प–पुस्तकेऽस्य मन्त्रस्य भाष्यमेवं दृश्यते–हे (?) हंसः सर्वगन्ता सूर्यः शुचिषत् शुचौ दीप्ते द्युलोके सीदति । वसुः सर्वस्य वासयिता वायुः । अन्तरिक्षसत् स एव अन्तरिक्षे वायुरूपेण संचरति । होता देवानामाह्वाताग्निः । वेदिषत् स एव वेद्यां गार्हपत्यादिरूपेण स्थितः अतिथिः अतिथिवत् सर्वदा पूज्योऽग्निः । दुरोणसत् दुरोणेषु गृहेषु स एव लौकिकाग्निरूपेण स्थितः । नृषत् नृषु मनुष्येषु जठराग्निस्वरूपेण स्थितः । वरसत् वरणीये मण्डले स्थितः । ऋतसत् ऋते यज्ञे स्थितः । व्योमसत् व्योमनि वैद्युताग्निरूपेण स्थितः । अब्जाः उदके वडवाग्निरूपेण स्थितः । गोजाः गोषु रश्मिषु सवितुः प्रकाशेषु उदयति (?) ऋतजाः सर्वैः दृश्यत्वेन सत्यजातः । अद्रिजाः अद्रौ उदयाचले प्रादुर्भूतः । ऋतं सत्यं तद्रूपेण स्थितः । ३. ख-ग-ण-भ–गन्ताहं सोऽहं सूर्योऽहम् । ४. ख-ग-ण-भ–अग्निः । ५. ख-ग-च-ण–आस्थितः । ६. त–दुरोण इति । ७. ख-ग-च-ण-न-फ-भ-स–चित्स्वरूपेण; घ–जठराग्निरूपेण ।

जातः । ऋतं सत्यम् । सर्वैर्दृश्यत्वेन सत्यजातः[1] । न ह्यसाविन्द्रादिवत् परोक्षो भवति । यद्वा । उदकेषु वैद्युतरूपेण वा वाडवरूपेण वा जातः । vअद्रिजाः अद्रावुदयाच्छैले जानः । एवं महानुभाव आदित्यः vऋतं सत्यमबाध्यं[2] सर्वाधिष्ठानं ब्रह्मतत्त्वम् । तद्रूपो ह्यसावेव । आदित्यस्योक्तरूपत्वं 'हंसः शुचिषदित्येष वै हंसः शुचिषत्' (ऐ. ब्रा. ४. २०) इत्यादिना ब्राह्मणे समाम्नातम् ॥ ॥ १४ ॥

'इन्द्रा को वाम्' इत्येकादशर्चं नवमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रावरुणम् । अत्रानुक्रमणिका— 'इन्द्रा को वामेकादशैन्द्रावरुणं तु' इति । आभिप्लविकेषूक्थेषु तृतीयसवने मैत्रावरुणशस्त्रेषु स्तोमवृद्धावावापार्थमेतदादिसूक्तद्वयम् । 'इन्द्रा को वामिति सूक्ते' (आश्व. श्रौ. ७.९) इति सूत्रितत्वात् ॥

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता ।
यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् ॥ १ ॥

इन्द्रा । कः । वाम् । वरुणा । सुम्नम् । आप । स्तोमः । हविष्मान् । अमृतः । न । होता ।
यः । वाम् । हृदि । क्रतुऽमान् । अस्मत् । उक्तः । पस्पर्शत् । इन्द्रावरुणा । नमस्वान् ॥ १ ॥

हे vइन्द्रा हे vवरुणा हे इन्द्रावरुणौ । परस्परापेक्षया द्विवचनम् । vवां युवयोः vसुम्नं सुखं vकः vस्तोमो vहविष्मान् हविर्भिरुपेतः सोमाज्यादिप्रदेयद्रव्योपेतं कतमत् स्तोत्रं सुम्नम् vआप । फलकरत्वेन प्राप्नुयादित्यर्थः । यद्वा । हविष्मानित्येतदुत्तरत्र योज्यम् । हविष्मान् हविर्युक्तः vअमृतः अमरणलक्षणः स्वर्गसाधनो[3] vहोता अग्निरिव[3] । स यथा तथा vयः[4] स्तोमो हे इन्द्रावरुणौ vवां युवयोः vहृदि हृदये vक्रतुमान् प्रज्ञोपेतः[5] vअस्मत् अस्मत्सकाशात् vउक्तः उदितः[6] vनमस्वान् हविष्मान् नमस्कारोपेतो वा vपस्पर्शत् स्पृशेत्[7] हृदयंगमो भवेत् । स क इति स्तोमप्रशंसा ॥

इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।
स हन्ति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥ २ ॥

इन्द्रा । ह । यः । वरुणा । चक्रे । आपी इति । देवौ । मर्तः । सख्याय । प्रयस्वान् ।
सः । हन्ति । वृत्रा । सम्ऽइथेषु । शत्रून् । अवःऽभिः । वा । महत्ऽभिः । सः । प्र । शृण्वे ॥ २ ॥

vहे इन्द्रा vवरुणा इन्द्रावरुणौ vदेवौ । हशब्दः[8] पूरणः प्रसिद्धौ वा[8] । vयः vमर्तः मरणधर्मा vप्रयस्वान् हविर्लक्षणान्नवान् सन् vसख्याय सख्यिनाय vआपी[9] बन्धू vचक्रे करोति[9] । vसः मर्तः vवृत्रा आवरकाणि पापानि vहन्ति । तथा vसमिथेषु संग्रामेषु vशत्रून् हन्ति । वाशब्दश्चार्थे । vमहद्भिः vअवोभिः रक्षणैः[10] vसः नरः vप्र vशृण्वे[10] प्रकृष्टं श्रूयते विख्यातो भवति ।

---

१. त—सत्याजातः । २. ख-ग-च-ण-भ—सत्यं वाबाध्यम्; फ—सत्यं वावाच्यम् । ३. ख-ग-च-ण-प-फ-भ—अमृतः मरणरहितः होता न स्वर्गसाधनभूतोऽग्निरिव । ४. ख-ग-घ-च-ण-न-स—अयम् । ५. ख-प-फ-भ—यज्ञोपेतः । ६. ख-ग-च-ण-फ-भ—अभिहितेन; त-प—अभिहितः; न-स—हिते । ७. ख-ग-च-ण-फ-भ—स्पृशेदेव । ८. ख-ग-च-ण-न-स—'हशब्दः ... वा' नास्ति । ९. ख-ग-च-ण-फ-भ—आपी चक्रे सबन्धू चक्रे; प—आपी चक्रे बन्धु (न्धू) चक्रे । १०. ख-ग-च-ण-प-फ-ण—रक्षणैश्च प्रशृण्वे ह ।

इन्द्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता ।
यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥ ३ ॥

इन्द्रा । ह । रत्नम् । वरुणा । धेष्ठा । इत्था । नृऽभ्यः । शशमानेभ्यः । ता ।
यदि । सखाया । सख्याय । सोमैः । सुतेभिः । सुऽप्रयसा । मादयैते इति ॥ ३ ॥

हे[१] इन्द्रावरुणौ [v]ता[२] । [v]ह इति प्रसिद्धौ। तौ खलु देवौ [v]इत्था इत्थं [v]नृभ्यः मनुष्येभ्यः [v]शशमानेभ्यः शंसमानेभ्यः[३] स्तोतृभ्योऽस्मभ्यं [v]रत्नं रमणीयं धनं [v]धेष्ठा दातृतमौ। भवत इति शेषः । [v]यदि [v]सखाया परस्परं यजमानस्य वा सखिभूतौ [v]सख्याय सखिकर्मणे सख्याय [v]सुतेभिः अभिषुतैः [v]सोमैः [v]सुप्रयसा शोभनसोमान्नवन्तौ [v]मादयैते माद्येताम्[४] । तर्हि रत्नानां दातारौ भवतः ॥

इन्द्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रम् ।
यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्निमाथामभिभूत्योजः ॥ ४ ॥

इन्द्रा । युवम् । वरुणा । दिद्युम् । अस्मिन् । ओजिष्ठम् । उग्रा । नि । वधिष्टम् । वज्रम् ।
यः । नः । दुःऽएवः । वृकतिः । दभीतिः । तस्मिन् । निमाथाम् । अभिऽभूति । ओजः ॥ ४ ॥

हे [v]इन्द्रा इन्द्रौ [v]वरुणा वरुणौ हे[५] [v]उग्रा उग्रौ। अत्र सर्वत्र परस्परापेक्षया द्विवचनं ' प्र मित्रयोर्वरुणयोः ' (ऋ. सं. ७.६६.१) इतिवत्। यद्वा। छान्दसत्वात व्यवहितस्यापि[६] आनङ्। [v]अस्मिन् शत्रौ [v]दिद्युं दीप्तम् [v]ओजिष्ठम् अतिशयेन तेजोवत्[७] [v]वज्रम्[७] आयुधं [v]नि [v]वधिष्टम् । वधार्थं प्रेरयतमित्यर्थः ।[v]यः शत्रुः [v]नः अस्माकं [v]दुरेवः दुष्प्रापः [v]वृकतिः अतिशयेनादाता [v]दभीतिः हिंसकः [v]तस्मिन् शत्रौ [v]अभिभूति अभिभावुकम् [v]ओजः बलं [v]युवं[८] युवां[८] [v]निमाथां कुरुतमित्यर्थः ॥

इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ५ ॥

इन्द्रा । युवम् । वरुणा । भूतम् । अस्याः । धियः । प्रेतारा । वृषभाऽइव । धेनोः ।
सा । नः । दुहीयत् । यवसाऽइव । गत्वी । सहस्रऽधारा । पयसा । मही । गौः ॥ ५ ॥

---

१. न-ल-स-' हे ' नास्ति । २. त-ता ह । ३. ख-ग-च-ण-न-भ-स-' शंसमानेभ्यः ' नास्ति । ४. ख-ग-च-ण-स-' माद्येतां ' नास्ति । ५. ख-ग-च-ण-न-भ-' हे ' नास्ति । ६. ख-ण-च-ण-न-भ-स-व्यवहितस्य; त-ल-व्यवहितेऽपि । ७ ख-ग-ण-भ-ओजोवन्तं दिद्युं दीप्तम्; त-तेजोवन्तं वज्रम्; च-फ-ओजोवन्तं दिद्युं दीप्तं वज्रम् । ८. ख-ण-भ-युवम्; न-ल-स-' युवं युवां ' नास्ति, प-इव ।

हे [v]इन्द्रा [v]वरुणा इन्द्रावरुणौ [v]युवं युवाम् [v]अस्या [v]धियः स्तुत्याः [v]प्रेतारा प्रीणयितारौ [v]भूतं भवतम् । [v]वृषभा सेक्तारौ वृषभौ [v]धेनोः [v]इव । [v]सा स्तुतिरूपा धेनुः [v]नः अस्माकं [v]दुहीयत् दुह्येत् । कामान् पूरयेत । [v]यवसा तृणादिघासेन[1] निमित्तेन[1] [v]गत्वी[2] गत्वा [v]पयसा [v]सहस्रधारा [v]महती महती [v]गौः [v]इव ॥ ॥ १५ ॥

तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।
इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम् ॥ ६ ॥

तोके । हिते । तनये । उर्वरासु । सूरेः । दृशीके । वृषणः । च । पौंस्ये ।
इन्द्रा । नः । अत्र । वरुणा । स्याताम् । अवःऽभिः । दस्मा । परिऽतक्म्यायाम् ॥ ६ ॥

हे[3] इन्द्रावरुणौ देवौ नः [v]हिते [v]तोके पुत्रे [v]तनये तत्पुत्रे[4] च [v]उर्वरासु सस्याढ्यासु भूमिषु निमित्तभूतासु [v]सूरः प्रेरकस्य सूर्यस्य [v]दृशीके चिरकालदर्शनाय । चिरजीवनायेत्यर्थः । तथा[5] [v]वृषणः सेक्तुरस्य [v]पौंस्ये [v]च[6] पुंस्त्वाय च पुनरपि प्रजननसामर्थ्याय च [v]दस्मा शत्रूणां हिंसकौ सन्तौ[7] [v]नः अस्माकम् [v]अवोभिः रक्षणैः सह[8] [v]परितक्म्यायां परितक्मने[9] निमित्तभूते सति । यद्वा रात्रिनामैतत् । रात्रौ हिंसकानां वधाय [v]स्यातां भवेताम् ॥

युवामिद्धयवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू ॥ ७ ॥

युवाम् । इत् । हि । अवसे । पूर्व्याय ।
परि । प्रभूती इति प्रऽभूती । गोऽइषः । स्वापी इति सुऽआपी ।
वृणीमहे । सख्याय । प्रियाय । शूरा । मंहिष्ठा । पितराऽइव । शंभू इति शम्ऽभू ॥ ७ ॥

हे इन्द्रावरुणौ [v]गविषः गा इच्छन्तो वयं [v]युवामित । [v]हि इति पादपूरणः । युवामेव [v]पूर्व्याय पुरातनाय युवाभ्यां कृताय [v]अवसे रक्षणाय । वृणीमहे इति संबन्धः । [v]प्रभूती प्रभवन्तौ [v]स्वापी शोभनबन्धुभूतौ । आपिरिति बन्धुनाम[10] । यद्वा । सुष्ठु व्यापनशीलौ [v]शूरा विक्रान्तौ [v]मंहिष्ठा अतिशयेन पूज्यौ युवां [v]सख्याय समानख्यानाय [v]प्रियाय च [v]परि [v]वृणीमहे परितः प्रार्थयामहे । [v]शंभू सुखस्य भावयितारौ [v]पितरेव पितरौ पुत्राय तद्वत् ॥

---

१. प–तृणादिनिमित्तेन । २. त-ल–गत्वी गमनशीला । ३. न-ल-स–'हे' नास्ति । ४. च–च पौत्रे । ५. ख-ग-च-ण-न-भ-स–'तथा' नास्ति । ६. ख-ग-च-ण-न-भ-स–'च' नास्ति । ७. त–तौ । ८. प-भ-सह अत्र । ९. त–परितस्तकने । १०. ख-ग-च-ण-भ–बन्धुः ।

ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू ।
श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥ ८ ॥

ताः । वाम् । धियः । अवसे । वाजयन्तीः ।
आजिम् । न । जग्मुः । युवयूः । सुदानू इति सुऽदानू ।
श्रिये । न । गावः । उप । सोमम् । अस्थुः । इन्द्रम् । गिरः । वरुणम् । मे । मनीषाः ॥८॥

[v]सुदानू शोभनफलदातारौ हे देवौ [v]वां युवां [v]वाजयन्तीः रत्नमिच्छन्त्यः[1] [v]धियः स्तुतयः [v]जग्मुः गच्छन्ति । [v]युवयूः युवां कामयमानाः पदातयः[2] [v]अवसे रक्षणाय[3] [v]आजिं [v]न संग्राममिव । किंच [v]श्रिये दध्यादिश्रयणाय [v]गावः [v]सोमं [v]न सोममिव [v]इन्द्रं [v]वरुणं च [v]मे मदीयाः [v]मनीषाः मनसः[3] ईश्वराः[3] [v]गिरः[4] स्तुतयः [v]उप [v]अस्थुः तिष्ठन्ति प्रीणयन्तीत्यर्थः ॥

इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः ।
उपेमस्थुर्जोष्टारइव वस्वो रघवीरिव श्रवसो भिक्षमाणाः ॥ ९ ॥

इमाः । इन्द्रम् । वरुणम् । मे । मनीषाः । अग्मन् । उप । द्रविणम् । इच्छमानाः ।
उप । ईम् । अस्थुः । जोष्टारःऽइव । वस्वः । रघ्वीःऽइव । श्रवसः । भिक्षमाणाः ॥ ९ ॥

[v]इन्द्रं [v]वरुणं च [v]मे मम [v]मनीषाः स्तुतयः[5] [v]द्रविणमिच्छमानाः सत्यः[6] [v]उप [v]अग्मन् उपगच्छन्ति । [v]जोष्टारः सेवकाः [v]वस्वः धनस्य लाभाय धनिकं[7] स्वामिनम्[8] [v]इव । [v]रघ्वीरिव लघ्व्य इव शीघ्रगामिन्य इव [v]श्रवसः अन्नस्य अन्नं [v]भिक्षमाणाः एनमिन्द्रं[9] वरुणं च [v]उप [v]अस्थुः उपतिष्ठन्ते ॥

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम ।
ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥ १० ॥

अश्व्यस्य । त्मना । रथ्यस्य । पुष्टेः । नित्यस्य । रायः । पतयः । स्याम ।
ता । चक्राणौ । ऊतिऽभिः । नव्यसीभिः । अस्मऽत्रा । रायः । निऽयुतः । सचन्ताम् ॥१०॥

[v]अश्व्यस्य अश्वसमूहस्य [v]रथ्यस्य रथरूपस्य[9] रथार्हस्य वा [v]पुष्टेः पोषस्य [v]नित्यस्य अविचलितस्य [v]रायः धनस्य [v]त्मना[10] आत्मना स्वयमेवाप्रयत्नेन[10] [v]पतयः [v]स्याम । [v]ता नौ देवौ [v]चक्राणा

१. प–अन्नमिच्छन्त्यः । २. त–‘ पदातयः ... रक्षणाय ’ नास्ति । ३. ख-ग-च-ण-फ–मनसा इषाः; प-भ–मनस ईषाः । ४. ख-प-फ-भ–गिरयः ताः; ग-च-ण–गिरः ताः । ५. ख-प-फ-भ–इमाः स्तुतयः । ६. ख-ग-च-ण-न-भ-स–सन्तः । ७. ख-ग-च-ण-प-फ-भ–अधिकं स्वामिनाम् । ८. ख-फ-भ–ईमेनम् । ९. त–रथसमूहरूपस्य । १०. ख-ग-च-ण-न-भ-स–‘ त्मना ... ‘ प्रयत्नेन ’ नास्ति ।

चक्रममाणौ[1] गन्तारौ । भवतमिति[2] शेषः । [V]नव्यसीभिः नूतनाभिः [V]ऊतिभिः रक्षाभिः [V]अस्मत्रा अस्मासु [V]नियुतः अश्वाः [V]रायः धनानि च [V]सचन्तां सेवन्ताम् ॥

आ नो बृहन्ता बृहतीभिरूती इन्द्रं यातं वरुण वाजसातौ ।
यद्दिव्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितारं ओजः ॥ ११ ॥

आ । नः । बृहन्ता । बृहतीभिः । ऊती । इन्द्रं । यातम् । वरुण । वाजऽसातौ ।
यत् । दिव्यवः । पृतनासु । प्रऽक्रीळान् । तस्य । वाम् । स्याम । सनितारः । ओजः ॥ ११ ॥

हे [V]बृहन्ता महान्तौ हे [V]इन्द्र हे [V]वरुण [V]बृहतीभिः महतीभिः [V]ऊती ऊतिभिः रक्षाभिः सह [V]आ [V]यातम् आगच्छतम् । [V]वाजसातौ[3] संग्रामेऽन्नलाभनिमित्तभूते वा [V]यत् यस्मिन्नाजौ संग्रामे [V]पृतनासु सेनासु [V]दिव्यवः । आयुधनामैतत् । आयुधानि शत्रुसंबन्धीनि [V]प्रक्रीळान् प्रक्रीडन्ते । [V]तस्य तादृशस्य [V]आजेः युद्धस्य[4] [V]सनितारः संभक्तारः [V]स्याम भवेम । [V]वां युवयोरनुग्रहात् ॥ ॥ १६ ॥

' मम द्विता ' इति दशर्चं दशमं सूक्तम् । पुरुकुत्सस्य पुत्रस्त्रसदस्यू राजर्षिः[5] । आद्यासु षट्स्वात्मनः स्तुत्यस्तत्र आत्मा देवता । अवशिष्टानां चतसृणामिन्द्रावरुणौ देवता । त्रिष्टुप् छन्दः । अत्रानुक्रमणिका—' मम द्विता दश त्रसदस्युः पौरुकुत्स्यः षळाद्या आत्मस्तवः ' इति । उक्तो विनियोगः पूर्वसूक्ते ॥

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥ १ ॥

मम । द्विता । राष्ट्रम् । क्षत्रियस्य । विश्वऽआयोः । विश्वे । अमृताः । यथा । नः ।
क्रतुम् । सचन्ते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥ १ ॥

[V]क्षत्रियस्य क्षत्रियजात्युत्पन्नस्य[6] [V]विश्वायोः कृत्स्नमनुष्यायुःशस्य । मम इत्यात्मनो निर्देशः । [V]द्विता क्षितिस्वर्गभेदेन द्विरूपं [V]राष्ट्रम् । [V]मम त्रसदस्योः [V]विश्वे सर्वे [V]अमृताः देवाः [V]यथा [V]नः अस्माकं[7] भवन्ति तथा राष्ट्रं प्रजाश्रेयस्यर्थः । [V]वरुणस्य वारकस्य वरणात्मनो वा [V]कृष्टेः मनुष्यस्य तद्वतो वा [V]उपमस्य । अन्तिकनामैतत् । सर्वेषामन्तिकतमस्य [V]वव्रेः । रूपनामैतत् । रूपवतो मम [V]क्रतुं कर्म [V]सचन्ते सेवन्ते [V]देवाः सर्वेऽपि । अहं च [V]राजामि । राजतिरैश्वर्यकर्मा[8] । सर्वेश्वरः[9] भवामि । यद्वा । उपमस्य वव्रेः कृष्टे राजामीति योज्यम् ॥

---

१. ख-ग-च-ण-भ—चक्रमार्णा; घ-न-ल-स—चक्रममार्णा । २. ख-ग-च-ण-भ-स—अवर्तामति । ३. ख-ग-च-ण-फ-भ—ततोऽस्मदीये वाजसातौ; प—नोऽस्मदीये वाजसातौ । ४. न-ल-स—'युद्धस्य' नास्ति । ५. च-प-फ—राजर्षिः ऋषिः । ६. ख-ग-च-ण-प-फ-भ-स—जात्युत्पन्नस्य । ७. प—अस्मदीया । ८. ख-ग-च-ण-फ-भ—सर्वैश्वर्यकर्मा । ९. त—सर्वस्येश्वरः ।

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥ २ ॥

अहम् । राजा । वरुणः । मह्यम् । तानि । असुर्याणि । प्रथमा । धारयन्त ।
क्रतुम् । सचन्ते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥ २ ॥

[v]अहम् एव च [v]राजा [v]वरुणः भवामि । [v]मह्यं मदर्थमेव [v]प्रथमा मुख्यानि [v]तानि प्रसिद्धानि [v]असुर्याणि असुरविघातकानि बलानि [v]धारयन्त । अधारयन् देवाः । शिष्टं गतम् ॥

अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।
त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥ ३ ॥

अहम् । इन्द्रः । वरुणः । ते इति । महिऽत्वा ।
उर्वी इति । गभीरे इति । रजसी इति । सुमेके इति सुऽमेके ।
त्वष्टाऽइव । विश्वा । भुवनानि । विद्वान् । सम् । ऐरयम् । रोदसी इति । धारयम् । च ॥३॥

[v]अहं त्रसदस्युः [v]इन्द्रः इन्द्रोऽप्यस्मि । अहं [v]वरुणः च । [v]ते[1] [v]महित्वा महित्वेन [v]उर्वी विस्तीर्णे [v]गभीरे दुरवगाहे अवकाशवत्यौ वा [v]सुमेके सुरूपे [v]रजसी[2] द्यावापृथिव्यौ[3] ते अप्यहमेव । [v]विद्वान् जानन्नहं [v]त्वष्टेव प्रजापतिरिव [v]विश्वा [v]भुवनानि सर्वाणि भूतानि [v]समैरयं संप्रैरयम् । [v]रोदसी द्यावापृथिव्यौ [v]धारयं [v]च धृतवानस्मि[3] ॥

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य ।
ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम ॥ ४ ॥

अहम् । अपः । अपिन्वम् । उक्षमाणाः । धारयम् । दिवम् । सदने । ऋतस्य ।
ऋतेन । पुत्रः । अदितेः । ऋतऽवा । उत । त्रिऽधातु । प्रथयत् । वि । भूम ॥ ४ ॥

[v]अहम् एव [v]उक्षमाणाः सिञ्चतीः [v]अपः [v]अपिन्वम् असेचयम् । तथा [v]ऋतस्य उदकस्य आदित्यस्य वा [v]सदने स्थाने निमित्ते[4] सति [v]दिवं द्युलोकं [v]धारयम् । यद्वा । उदकाधारे स्थाने

१. त–ये । २. त–रजसी राजमाने रोदसी । ३. ख-ग-च-ण-प-फ-भ–राजमाने रोदसी द्यावापृथिव्यौ धारयन् च धृतवानस्मि । किंच (प–किंचित्) विद्वान त्वष्टेव प्रजापतिरिव विश्वा सर्वाणि भुवनानि समैरयं प्रेरयामि । ४. त–निमित्तभूते ।

दिवमादित्यं धारयम् । अहमेव vऋतेन उदकेन निमित्तेन vअदितेः vपुत्रः vऋतावा[1] अभूवम् । vउत अपि च vभूम व्याप्तमाकाशं vत्रिधातु त्रिप्रकारं vवि विशेषेण vप्रथयत् । मदर्थमेव[2] क्षित्यादिलोकत्रयमकार्षीत्[3] परमेश्वरः ॥

मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते ।
कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥ ५ ॥

माम् । नरः । सुऽअश्वाः । वाजयन्तः । माम् । वृताः । सम्ऽअरणे । हवन्ते ।
कृणोमि । आजिम् । मघऽवा । अहम् । इन्द्रः । इयर्मि । रेणुम् । अभिभूतिऽओजाः ॥ ५ ॥

vमां मामेव vस्वश्वाः शोभनाश्वाः vवाजयन्तः संग्राममिच्छन्तः vनरः नेतारो भटाः । अनुगच्छन्ति इति शेषः । vमाम् एव[4] vवृताः सन्तः vसमरणे संग्रामे vहवन्ते आह्वयन्ति युद्धार्थम् । vमघवा धनवान् vअहमिन्द्रः सन् vआजिं रणं[5] vकृणोमि करोमि । vअभिभूत्योजाः परेषाम्[6] अभिभाविबलोऽहं vरेणुम् vइयर्मि प्रेरयामि ॥ ॥ १७ ॥

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम् ।
यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥ ६ ॥

अहम् । ता । विश्वा । चकरम् । नकिः । मा । दैव्यम् । सहः । वरते । अप्रतिऽइतम् ।
यत् । मा । सोमासः । ममदन् । यत् । उक्था ।
उभे इति । भयेते इति । रजसी इति । अपारे इति ॥ ६ ॥

vअहं त्रसदस्युः vता तानि प्रसिद्धानि vविश्वा सर्वाणि vचकरम् अकार्षम् । vअप्रतीतम् अप्रतिगतं vमा मां vदैव्यं vसहः[7] देवसंबन्धि सहो बलं vनकिः vवरते नैव वारयति । vयत् यस्मात् vसोमासः सोमाः vमा मां vममदन् अमदयन्[8] । vयत् च[9] vउक्था शस्त्राण्यपि ममदन् तस्मात् मत्तः vअपारे दूरपारे[10] vउभे[11] vरजसी द्यावापृथिव्यौ[12] vभयेते चलतः[13] ॥

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥ ७ ॥

विदुः । ते । विश्वा । भुवनानि । तस्य । ता । प्र । ब्रवीषि । वरुणाय । वेधः ।
त्वम् । वृत्राणि । शृण्विषे । जघन्वान् । त्वम् । वृतान् । अरिणाः । इन्द्र । सिन्धून् ॥७॥

१. त–ऋतावा यज्ञवान् । २. ख-ग-च-ण-प-फ-भ-स–ममर्थमेव । ३. च-फ–लोकत्रयमपि प्रख्यापयत् । ४. ख-ग-च-ण-फ–मामेव । ५. न-ल-स–'रणं' नास्ति । ६. ख-ग-च-ण-प-भ–अन्येषाम्; स–एषाम् । ७. त–'सहः' नास्ति । ८. त–अमादयन् । ९. ख-ग-च-न-प-भ–यस्मात् । १०. ख-ग-घ-च-प-फ-भ–अदूरे पारे; न–अदूरे; स–दूरे पारे । ११. ख-ग-च-ण-भ–उभे तु । १२. ख-ग-च-ण-प-भ–द्यावापृथिव्यौ उभे । १३. ल–बिभ्य(भी)तः ।

इतः परमिन्द्रावरुणयोः स्तुतिः । हे वरुण [V]तस्य [V]ते । कर्मणि षष्ठी। तं[१] त्वां [V]विश्वा सर्वाणि [V]ता तानि [V]भुवनानि भूतजातानि [V]विदुः जानन्ति । हे [V]वेधः । स्तोतृनामैतत् । हे स्तोतः [V]वरुणाय [V]प्र [V]ब्रवीमि वरुणं स्तौमि । हे [V]इन्द्र [V]त्वं [V]वृत्राणि वैरिणः [V]जघन्वान् हतवानिति [V]ऋग्विधे श्रूयसे। किंच हे इन्द्र [V]त्वं [V]वृतान् आच्छन्नान्[२] [V]सिन्धून् स्यन्दनस्वभावानपूंषघान्[३] [V]अरिणाः अगमयः॥

अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ॥ ८ ॥

अस्माकम्। अत्र । पितरः । ते । आसन् । सप्त । ऋषयः । दौःऽगहे । बध्यमाने ।
ते । आ । अयजन्त । त्रसदस्युम् । अस्याः । इन्द्रम् । न । वृत्रऽतुरम् । अर्धऽदेवम् ॥८॥

पुरुकुत्सस्य महिषी दौर्गहे बन्धनस्थिते[४] । पत्यावराजकं[५] दृष्ट्वा राष्ट्रं पुत्रस्य[६] लिप्सया ॥ यदृच्छया समायातान् सप्तर्षीन्पर्यपूजयत् । ते च प्रीताः पुनः[७] प्रोचुर्यजेन्द्रावरुणौ भृशम् ॥ सा चेन्द्रावरुणादिष्ट्वा त्रसदस्युमजीजनत् । इतिहासमिमं जानन्नृषिर्ब्रूते ऋचाविदम्[८] ॥ अथ [V]अस्माकमत्र अस्मिन्नराजके देशेऽस्यां पृथिव्यां वा [V]पितरः पालयितारः उत्पादकाः[९] [V]ते [V]आसन् अभवन्। [V]ते [V]सप्त [V]ऋषयः प्रसिद्धाः [V]दौर्गहे दुर्गाहस्य पुत्रे पुरुकुत्से [V]बध्यमाने दृढं पार्श्वयमात् [V]अस्याः अस्यै पुरुकुत्सान्यै [V]त्रसदस्युम् [V]आयजन्त प्रादुरिन्द्रावरुणयोरनुग्रहात्। कीदृशं तम्। [V]वृत्रतुरं वृत्रस्य शत्रोर्हन्तारम् [V]अर्धदेवं देवानामर्धे[१०] समीपे वर्तमानम्। यद्वा । देवानामर्धभूतम् [V]इन्द्रं [V]न इन्द्रमिव स्थितं पुत्रं दत्तवन्तः। 'यत्सर्वेऽमर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः' (तै. सं. ५. ४. ८. ३) इति तैत्तिरीयकम् ॥

पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥ ९ ॥

पुरुऽकुत्सानी । हि । वाम् । अदाशत् । हव्येभिः । इन्द्रावरुणा । नमःऽभिः ।
अथ । राजानम् । त्रसदस्युम् । अस्याः । वृत्रऽहनम् । ददथुः । अर्धऽदेवम् ॥ ९ ॥

हे [V]इन्द्रावरुणौ[११] [V]पुरुकुत्सानी पुरुकुत्सस्य पत्नी ऋषिप्रेरिता [V]वां युवाम् [V]अदाशत [V]हि अप्रीणयत्[१२] खलु । [V]हव्येभिः हविर्भिः [V]नमोभिः स्तुतिभिश्च । [V]अथ [V]राजानं [V]त्रसदस्युं वृत्रहणम् [V]अर्धदेवम् उक्तलक्षणं पुत्रम् [V]अस्याः अस्यै पुरुकुत्सान्यै [V]ददथुः दत्तवन्ताविति ॥

---

१. ख-ग-च-ण-भ-'तं' नास्ति । २. ख-ग-च-ण-प-भ-आवृतान् । ३. ख-ग-च-फ-स्यन्दनस्वभावान् मेघान् अप्सुतान्; ण-स-स्यन्दनस्वभावान् अप्सुतान्; प-सिन्धून् मेघान् अप्सुतान्। ४. ख-ग-त-भ-बन्धने स्थिते; ण-बन्धने स्थाने । ५. ख-ग-च-ण-प-फ-भ-अराजकम्; न-म-अपि सा । ६. ख-ग-च-ण-प-फ-भ-पुरुकुत्सस्य । ७. ख-ग-च-ण-भ-प्रति° । ८. ख-ग-च-ण-प-फ-द्रुचाविति; न-भ-स-द्रुचादिति । ९. ख-ग-च-ण-न-भ-स-च । १०. ख-ग-च-ण-प-फ-भ-'उत्पादकाः' नास्ति । ११. ख-ग-च-ण-न-प-फ-भ-स-देवानां मध्ये । १२. च--फ-भ-इन्द्रावरुणा इन्द्रावरुणौ । १३. ख-ग-च-ण-त-न-प-फ-भ-स-प्रीणयति ।

राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ॥ १० ॥

राया । वयम् । ससऽवांसः । मदेम । हव्येन । देवाः । यवसेन । गावः ।
ताम । धेनुम् । इन्द्रावरुणा । युवम् । नः । विश्वाहा । धत्तम् । अनपऽस्फुरन्तीम् ॥ १० ॥

[1]राया धनेन [2]मदेम [3]ससवांसः युवां[1] संभक्तारः [4]वयम् । [5]हव्येन [6]देवाः मोदन्तु[2] [7]यवसेन च[3] [8]गावः । [9]तां [10]धेनुं प्रीणयित्रीं रयिं हे इन्द्रावरुणौ [11]विश्वाहा विश्वस्य हन्तारौ [12]युवं युवां [13]नः अस्माकं [14]धत्तं दत्तम् । कीदृशीम् । [15]अनपस्फुरन्तीम् अनवहिंसिताम् । यद्वा । विश्वाहेत्यव्ययम् । सर्वदेत्यर्थः ॥ ॥ १८ ॥

' क उ श्रवत ' इति सप्तर्चमेकादशं सूक्तम् । सुहोत्रपुत्रौ पुरुमीळहाजमीळहावृषी । त्रिष्टुप् छन्दः । अश्विनौ देवता । अत्रानुक्रमणिका—' क उ श्रवत्समस पुरुमीळहाजमीळहौ सौहोत्रौ त्वाश्विनं हि ' इति । प्रातरनुवाकाश्विनशस्त्रयोराश्विने क्रतौ त्रैष्टुभे छन्दसीदमादिके द्वे सूक्ते । ' धेनुः प्रत्नस्य क उ श्रवत ' (आश्व. श्रौ. ४. १५) इति सूत्रितत्वात ॥

क उ श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते ।
कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥ १ ॥

कः । ऊँ इति । श्रवत् । कतमः । यज्ञियानाम् । वन्दारु । देवः । कतमः । जुषाते ।
कस्य । इमाम् । देवीम् । अमृतेषु । प्रेष्ठाम् । हृदि । श्रेषाम । सुऽस्तुतिम । सुऽहव्याम ॥ १ ॥

[1]यज्ञियानां यज्ञार्हाणां देवानां मध्ये [2]क [3]उ देवः [4]श्रवत शृणुयात स्तुतिम् । [5]कतमः देवः [6]वन्दारु वन्दनशीलं स्तोत्रम् । [7]कतमः [8]देवः [9]जुषाते सेवते । [10]कस्य [11]हृदि [12]इमां [13]प्रेष्ठां प्रियतरां [14]देवीं द्योतमानां [15]सुहव्यां शोभनाह्वोपेतां शोभनैर्हविर्भिर्युक्तां वा [16]सुष्टुतिं शोभनां[4] स्तुतिम्[5] [17]अमृतेषु मध्ये [18]श्रेषाम श्लेषयेम श्राययेम[6] वा । अश्विनावन्तरेण स्तुतेः को देवः स्वामी भवेदिति ॥

को मृळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः ।
रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहिता वृणीत ॥ २ ॥

कः । मृळाति । कतमः । आऽगमिष्ठः । देवानाम् । ऊँ इति । कतमः । शम्ऽभविष्ठः ।
रथम् । कम् । आहुः । द्रवत्ऽअश्वम् । आशुम । यम् । सूर्यस्य । दुहिता । अवृणीत ॥ २ ॥

१. ख-ग-घ-च-ण-प-फ-भ-ह्विषाम ; न-' युवां ' नास्ति । २. त-मोदन्ते । ३. ख-ग-च-ण-न-भ-स-' च ' नास्ति । ४ ल-' शोभनां स्तुतिं ' नास्ति । ५. त-' श्रायये ' नास्ति ।

vको vमृळाति को देवो मृडाति[1] सुखयेत् अस्मान्। vकतमः देवः vआगमिष्ठः आगन्तृतमः अस्मद्यज्ञं प्रति। vदेवानामु देवानां मध्ये vकतमः देवः vशंभविष्ठः सुखस्य भावयितृतमः। एवमुक्तगुणविशिष्टः को भवेत् अश्विनावन्तरेणेति भावः। vकं vरथं vद्रवदश्वमाशुम्[2] vआहुः ब्रुवते। vयं रथं vसूर्यस्य vदुहिता सूर्यस्य पत्नी vअवृणीत समभजत्। तं कं रथं वेगवन्तमाहुः॥

मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम्।
दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा॥ ३॥

मक्षु। हि। स्म। गच्छथः। ईवतः। द्यून्। इन्द्रः। न। शक्तिम्। परितक्म्यायाम्।
दिवः। आऽजाता। दिव्या। सुऽपर्णा। कया। शचीनाम। भवथः। शचिष्ठा॥ ३॥

vमक्षु शीघ्रम्। vहि vस्म इति पूरणौ। vईवतः गमनवत आगामिनः vद्यून् दिवसान् सुत्यासंबन्धिनः प्रति vगच्छथः। vइन्द्रः vशक्तिं vन स्वकीयां शक्तिं यथा vपरितक्म्यायां रात्रावतीतायाम्। प्रदर्शयतीति शेषः। सुत्याहन्युषःकाले इन्द्रो यथा गच्छति तद्वत् युवामपि[3] गच्छतमित्यर्थः[4]। vदिवः द्युलोकात् vआजाता आगतौ vदिव्या दिवि भवौ vसुपर्णा शोभनगमनौ युवां vशचीनां युष्मत्संबन्धिनां कर्मणां शक्तीनां वा मध्ये vकया शच्या vशचिष्ठा शक्तिमत्तरौ शोभनकर्मवन्तौ वा vभवथः॥

का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना।
को वां महश्चित्त्यजसो अभीके उरुष्यतं माध्वी दस्रा न ऊती॥ ४॥

का। वाम्। भूत्। उपऽमातिः। कया। नः। आ। अश्विना। गमथः। हूयमाना।
कः। वाम्। महः। चित्। त्यजसः। अभीके।
उरुष्यतम्। माध्वी इति। दस्रा। नः। ऊती॥ ४॥

vवां युवयोः vका vउपमातिः। उप समीपे मातिर्मानं गुणानां परिच्छित्तिर्यस्यां सा स्तुतिः का vभूत् भवेत्। vकया स्तुत्या vहूयमाना[4] आहूयमानौ सन्तौ vनः अस्मान् vआ vगमथः आगच्छथः। vवां युवयोः vअभीके आसन्नप्रदेशे vमहश्चित् महतः vत्यजसः। त्यज्यते परित्यज्यते सर्वैरिति त्यजः क्रोधः। तस्य सोढा vकः भवेत्। हे vमाध्वी[5] मधुररसस्योदकस्य स्रष्टारौ हे vदस्रा शत्रूणामुपक्षपयितारौ अश्विनौ vनः अस्मान् vऊती ऊत्या रक्षया[6] vउरुष्यतम्। रक्षाकर्मैतत्। रक्षतम्॥

१. त–मृळाति मृळयेत्। २. त-ल–द्रवदश्वमाशुं च। ३. ख-ग घ-च-ण-भ–युवामागच्छतमित्यर्थः। ४. ख-ण-फ-भ–हूयमाना हूयमानौ; ग-च–हूयमाना ह्वयमानौ; न-ल-स–हूयमानौ। ५. ग-च-ण-भ–माध्वी मधु। ६. ख-ग-घ-च-ण-त-प–रक्षणाय; भ-ल-स–रक्षणया।

उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वाम् ।
मध्वा माध्वी मधु वां प्रुषायन्यत्सीं वां पृक्षो भुरजन्त पक्काः ॥ ५ ॥

उरु । वाम् । रथः । परि । नक्षति । द्याम् । आ । यत् । समुद्रात् । अभि । वर्तते । वाम् । मध्वा । माध्वी इति । मधु । वाम् । प्रुषायन् । यत् । सीम् । वाम् । पृक्षः । भुरजन्त । पक्काः ॥५॥

हे अश्विनौ [v]वां [v]रथः [v]द्यां [v]परि द्युलोकस्य परितः [v]उरु प्रभूतं [v]नक्षति गच्छति । [v]यत् यस्मात् [v]आ अर्वाक् [v]समुद्रात् समुद्द्रवणसाधनादन्तरिक्षात् [v]वां प्रति [v]अभि [v]वर्तते आभिमुख्येन गच्छति । हे [v]माध्वी उक्तलक्षणौ[1] [v]मध्वा मधुरेण पयसा [v]मधु मधुरं सोमरसं[2] [v]प्रुषायन् सिञ्चन्त्यध्वर्यवः । [v]यत् यस्मात् [v]सीं सर्वतः [v]वां [v]पृक्षः युवयोः सोमं [v]पक्काः पक्वा यवाः [v]भुरजन्त प्राप्नुवन्ति[3] । तस्मादभिवर्तते वामिति ॥

सिन्धुर्ह वां रसया सिञ्चदश्वान्घृणा वयोऽरुषासः परि ग्मन् ।
तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥ ६ ॥

सिन्धुः । ह । वाम् । रसया । सिञ्चत् । अश्वान् । घृणा । वयः । अरुषासः । परि । ग्मन् ।
तत् । ऊँ इति । सु । वाम् । अजिरम् । चेति । यानम् । येन । पती इति । भवथः । सूर्यायाः ॥६॥

[v]वां युवयोः[4] [v]अश्वान् [v]सिन्धुः स्यन्दमानो मेघ उदकं वा [v]रसया रसेन [v]सिञ्चत असेचयत् । [v]घृणा दीप्त्या[5] [v]वयः पक्षिसदृशा वेतारः[6] वा अश्वाः [v]अरुषासः आरोचमानाः सन्तः [v]परि परितः [v]ग्मन् गच्छन्ति । [v]वां [v]यानं गमनसाधनं प्रसिद्धो रथः [v]अजिरम् । क्षिप्रनामैतत्[7] । [v]सु सुष्ठु [v]चेति ज्ञायते । [v]येन रथेन [v]सूर्यायाः [v]पती पालयितारौ वोढारौ [v]भवथः सः[8] रथश्चेतीति ॥

इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥ ७ ॥

इहऽइह । यत् । वाम् । समना । पपृक्षे । सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना ।
उरुष्यतम् । जरितारम् । युवम् । ह । श्रितः । कामः । नासत्या । युवद्रिक् ॥ ७ ॥

हे अश्विनौ [v]यत्[9] यस्मात् । यया वा सुमत्या[10] । [v]इहेह अस्मिन्नेव यज्ञे [v]समना समानमनस्कौ । सदृशाविश्यर्थः । तौ [v]वां युवां सुमत्या[10] [v]पपृक्षे स्तुत्या संयोजयामि । [v]सेयम् इदानीं क्रियमाणा

१. ख-ग-उक्तलक्षणौ मधुरस्य सोदकस्य स्रष्टारौ; च-ण-फ-उक्तलक्षणा मधुरस्योदकस्य स्रष्टारौ; प-भ-मधुररसस्योदकस्य स्रष्टारौ । २. प-सोमरसं वां । ३. त-प्राप्नुवन्ति स्थिता भवन्ति; ल-प्राप्नुवन्ति मिश्रिता भवन्ति । ४. ख-ग-घ-च-ण-न-भ-स-' युवयोः ' नास्ति । ५. ख-प-फ-भ-दीप्त्याः । ६. त-ल-वेतारः गन्तारः । ७ त-क्षिप्रम् । ८. च-तदु; फ-तदु सः । ९ ख-ग-च-ण-प-फ-भ-' यत्... सुमत्या ' नास्ति । १०. ख-प-फ-भ-यत् यया सुमत्या ।

[v]सुमतिः शोभनस्तुतिः[१] [v]अस्मे अस्माकमेव फलवती भवत्विति शेषः । हे [v]वाजरत्ना रमणीयाक्षौ । ' अक्षं वै वाजः ' (श. ब्रा. ९. ३. ४. १) इति श्रुतेः । [v]युवं युवां [v]जरितारं[२] गरितारं[३] स्तोतारं माम् [v]उरुष्यतं रक्षतम् । हे [v]नासत्या अश्विनौ [v]कामः अस्मदीयः [v]युवद्रिक् [v]ह युवामेव गच्छन् [v]श्रितः प्राप्तः ॥ ॥ १९ ॥

' तं वां रथम् ' इति सप्तर्चं द्वादशं सूक्तम् । पुरुमीळहाजमीळहावेव ऋषी । त्रिष्टुप् छन्दः । अश्विनौ देवता । ' तं वाम् ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसुयुम् ॥ १ ॥

तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । पृथुऽज्रयम् । अश्विना । सम्ऽगतिम् । गोः ।
यः । सूर्याम् । वहति । वन्धुरऽयुः । गिर्वाहसम् । पुरुऽतमम् । वसुऽयुम् ॥ १ ॥

हे अश्विनौ[४] [v]वां युवयोः [v]रथं [v]वयं[५] स्तोतारः [v]अद्य सुत्याहनि [v]हुवेम आह्वयामः । कीदृशं तम्[६] । [v]पृथुज्रयं प्रथितवेगं [v]गोः[७] गवां [v]संगतिं[८] संगमयितारम् । [v]यः रथः [v]सूर्यां [v]वहति धारयति । [v]वन्धुरयुः रथे निवासाधारभूतः काष्ठो वन्धुरं तद्वान् । [v]तं [v]गिर्वाहसं गिरां स्तुतीनां वोढारं [v]पुरुतमं प्रभूततमं [v]वसूयुं वसुमन्तम् ॥

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥ २ ॥

युवम् । श्रियम् । अश्विना । देवता । ताम् । दिवः । नपाता । वनथः । शचीभिः ।
युवोः । वपुः । अभि । पृक्षः । सचन्ते । वहन्ति । यत् । ककुहासः । रथे । वाम् ॥ २ ॥

हे [v]दिवो [v]नपाता आदित्यस्य पुत्रस्थानीयौ द्युलोकस्य वा न पातयितारौ हे[९] अश्विनौ [v]युवं युवां [v]देवता देवते ॥ विभक्तिव्यत्ययः ॥ [v]तां प्रसिद्धां [v]श्रियं [v]शचीभिः कर्मभिः शक्तिभिर्वा [v]वनथः संभजेथे । यद्वा । वनतिर्दानार्थः । [v]युवोः युवयोः [v]वपुः शरीरं [v]पृक्षः अन्नानि सोमलक्षणानि [v]अभि [v]सचन्ते प्राप्नुवन्ति[१०] [v]यत् यदा [v]रथे [v]वां [v]वहन्ति [v]ककुहासः[११] महान्तोऽश्वाः । यद्वा । स्तुतयो वां युवां रथे वहन्ति[११] ॥

---

१. त–शोभना स्तुतिः । २. ख-ग-ण-प-भ–अवस्युवं रक्षणमिच्छन्तं जरितारम् । ३. त–' गरितारं ' नास्ति । ४. च-प-फ–अश्विना अश्विनौ । ५. ख-ग-न-भ-स–' वयं ' नास्ति । ६. ख-ग-च-ण-न-फ-भ–' तं ' नास्ति । ७. ख-ग-च-ण-भ-स–गोः संगतिम्; न–गोः संगतिं गवाम् । ८. प–हे अश्विना । ९. त-न-ल-स–' प्राप्नुवन्ति ' नास्ति । १०. ख-ग-ण–ये ककुहास्ते; च-भ–ये ककुहासः । ११. त-ल–वहन्ति वाहयन्ति ।

को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥ ३ ॥

कः । वाम् । अद्य । करते । रातऽहव्यः । ऊतये । वा । सुतऽपेयाय । वा । अर्कैः ।
ऋतस्य । वा । वनुषे । पूर्व्याय । नमः । येमानः । अश्विना । आ । ववर्तत् ॥ ३ ॥

[v]कः यजमानः [v]अद्य [v]वां युवयोः [v]करते कुर्यात् स्तुतिम् । [v]अर्कैः मन्त्रैः [v]रातहव्यः दत्तसोमः [v]ऊतये [v]वा रक्षणाय वा [v]सुतपेयाय सोमपानाय [v]वा । [v]ऋतस्य उदकस्य यज्ञस्य [v]वा [v]पूर्व्याय पुराणाय [v]वनुषे संभजनाय हे [v]अश्विना अश्विनौ[1] [v]नमो [v]येमानः नमस्कारं कुर्वाणः कः [v]आ [v]ववर्तत आवर्तयेत्[2] यज्ञं प्रति ॥

हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम् ।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥ ४ ॥

हिरण्ययेन । पुरुभू इति पुरुऽभू । रथेन । इमम् । यज्ञम् । नासत्या । उप । यातम् ।
पिबाथः । इत् । मधुनः । सोम्यस्य । दधथः । रत्नम् । विधते । जनाय ॥ ४ ॥

हे [v]पुरुभू बहु[3] भवन्तौ[3] नासत्यौ[4] [v]इमं [v]यज्ञं [v]हिरण्ययेन[5] [v]रथेन [v]उप [v]यातम् । [v]सोम्यस्य सोमसंबन्धिनः [v]मधुनः मधुररसस्य ॥ कर्मणि षष्ठ्यौ ॥ सोमरसं [v]पिबाथः पिबथः । [v]विधते परिचरते [v]जनाय मह्यं [v]रत्नं रमणीयं धनं [v]दधथः धारयथः । दधतेर्दानार्थस्य लेटि[6] रूपम्[7] ॥

आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन्देवयन्तः सं यद्दे नाभिः पूर्व्या वाम् ॥ ५ ॥

आ । नः । यातम् । दिवः । अच्छ । पृथिव्याः । हिरण्ययेन । सुऽवृता । रथेन ।
मा । वाम् । अन्ये । नि । यमन् । देवऽयन्तः । सम् । यत् । ददे । नाभिः । पूर्व्या । वाम् ॥५॥

[v]नः अस्मान् [v]अच्छ अभि प्राप्तुं [v]दिवः द्युलोकात् [v]पृथिव्याः सकाशाद्वा[8] [v]आ [v]यातम् । केन साधनेन । [v]हिरण्ययेन हितरमणीयेन[9] [v]सुवृता शोभनावर्तनेन [v]रथेन । [v]वां युवाम् [v]अन्ये [v]देवयन्तः देवौ युवामिच्छन्तो[10] यजमानाः[10] [v]मा [v]नि [v]यमन् नियमनं मा कुर्वन् । [v]यत यस्मात् [v]पूर्व्या पूर्वार्हा इतरयष्टृभ्यः पूर्वभाविनी [v]नाभिः बन्धिका स्तुतिः [v]सं [v]ददे संबध्नाति । तस्मादायातम् ॥

१. न-ऋ-स-'अश्विनौ' नास्ति । २. त-अवर्तयत् । ३. त-बहूभवन्तौ । ४. च-प-फ-नासत्या नासत्यौ । ५. ख-ग-हिरण्मयेन । ६. त-लोटि । ७. प-रूपम् । इत् पूरणः । ८. ग-सकाशाद्वा अत्र । ९. प-रमणीयेन । १०. ख-ग-च-ण-प-फ-भ-स-युवामिच्छमानाः ।

नू नो॑ र॒यिं पु॑रुवी॒रं बृ॒हन्तं॑ दस्रा मिमाथामु॒भये॑ष्वस्मे ।
नरो॒ यद्वा॑मश्विना स्तो॒मम॒वन्त्स॒धस्तु॑तिमाजमी॒ळ्हासो॑ अग्मन् ॥ ६ ॥

नु । नः । र॒यिम् । पु॒रु॒ऽवी॒रम् । बृ॒हन्त॑म् । दस्रा । मिमाथाम् । उ॒भये॑षु । अ॒स्मे इति॑ ।
नरः॑ । यत् । वा॒म् । अ॒श्वि॒ना । स्तो॒मम् । आ॒व॒न् । स॒धऽस्तु॑तिम् । आ॒ज॒ऽम॒ी॒ळ्हासः॑ । अ॒ग्म॒न् ॥६॥

[v]नु क्षिप्रं [v]नः अस्माकं [v]रयिं धनं [v]पुरुवीरं बहुपुत्रोपेतं [v]बृहन्तं महान्तं हे [v]दस्रा[1] अश्विनौ[1] [v]मिमाथां कुरुतम् । [v]उभयेषु पुरुमीळ्हाजमीळ्हेषु [v]अस्मे अस्मासु [v]यत् यदा [v]नरः नेतार ऋत्विजः पुरुमीळ्हसंबन्धिनः [v]वां युवयोः [v]स्तोमं स्तोत्रम् [v]आवन् अगमन् प्राप्ताः । तथा [v]सधस्तुतिं सहस्तुतिम् [v]आजमीळ्हासः अजमीळ्हसंबन्धिनोऽपि तैः सह [v]अग्मन् अगमन् ॥

इ॒हेह॒ यद्वां॒ सम॒ना प॑पृ॒क्षे सेय॒मस्मे सु॑म॒तिर्वा॑जरत्ना ।
उ॒रु॒ष्यतं॑ ज॒रि॒तारं॒ युवं॑ ह श्रि॒तः कामो॑ नासत्या यु॒वद्रि॑क् ॥ ७ ॥

इ॒हऽइ॑ह । यत् । वा॒म् । स॒मना । प॒पृ॒क्षे । सा । इ॒यम् । अ॒स्मे इति॑ । सु॒ऽम॒तिः । वा॒ज॒ऽर॒त्ना॒ ।
उ॒रु॒ष्यत॑म् । ज॒रि॒तार॑म् । युव॑म् । ह॒ । श्रि॒तः । कामः॑ । ना॒स॒त्या॒ । यु॒वद्रि॑क् ॥ ७ ॥

[2]'इहेह' इति गतम्[2] ॥ ॥ २० ॥

'एष स्य भानुः' इति सप्तर्चं त्रयोदशं सूक्तम् । आदितः षट् जगत्यः सप्तमी त्रिष्टुप् । मण्डलदृष्टा वामदेव ऋषिः । अश्विनौ देवता । 'एष स्य त्रिष्टुवन्तम्' इति द्व्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसीदं शस्त्रम् । तथा च सूत्रितम्–'अबोध्यग्निर्ज्म एष स्य भानुः' (आश्व. श्रौ. ४. १५) इति ॥

एष स्य भा॒नुरुदि॑यर्ति यु॒ज्यते॒ रथः॑ परिज्मा दि॒वो अ॒स्य सानवि ।
पृ॒क्षासो॑ अस्मिन्मिथु॒ना अधि॒ त्रयो॒ दृतिस्तु॒रीयो॑ मधु॒नो॒ वि र॑प्शते ॥ १ ॥

एषः । स्यः । भा॒नुः । उत् । इ॒य॒र्ति॒ । यु॒ज्यते॑ । रथः॑ । परि॑ऽज्मा । दि॒वः । अ॒स्य॒ । सा॒न॒वि॒ ।
पृ॒क्षासः॑ । अ॒स्मि॒न् । मि॒थु॒नाः । अधि॑ । त्रयः॑ । दृतिः॑ । तु॒रीयः॑ । म॒धु॒नः॑ । वि । र॒प्श॒ते॒ ॥ १ ॥

[v]एषः पुरतो दृश्यमानः [v]स्यः सः [v]भानुः दीप्तिमानादित्यः [v]उदियर्ति ऊर्ध्वं गच्छति । पुरस्तात् [v]रथः च युवयोः संबन्धी [v]परिज्मा परितो गन्ता [v]अस्य [v]दिवः द्योतमानस्यादित्यस्य [v]सानवि[3] सानौ

१. ख-ग-च-ण-फ-भ–हे दस्रा दस्रौ उपक्षपयितारावश्विनौ; प–दस्रा शत्रूणां क्षपयितारौ (उपक्षपयितारौ) अश्विना अश्विनौ । २. ण–इहेहेति पूर्ववत् व्याख्याता; त-न–व्याख्यातेयम्; प–पुस्तकेऽस्य मन्त्रस्य संपूर्णं भाष्यं वर्तते । ३. ख-ग-च-ण-भ-सानवि युज्यते ।

समुच्छ्रितप्रदेशे उदियर्तीति विरप्शते[1] इति वा संबन्धनीयम्। vअस्मिन् रथे vअधि उपरिभागे vमिथुनाः मिथुनीभूताः vत्रयः त्रिविधाः[2] vपृक्षासः अन्नानि। त्रेधा विहितं चान्नम्। 'इदमन्नमशनं पानं खादश्च' इति हि श्रुतम्[3]। त्रिष्वपि पदार्थेषु मिथुनशब्दः तैत्तिरीयेषु[4] दृश्यते—'माता पिता पुत्रस्तदेव तन्मिथुनम्' इति। vदृतिस्तुरीयः। रसद्रव्याधारः पदार्थश्चर्ममयो दृतिरित्युच्यते। vमधुनः सोमरसस्य संबन्धी मधुपूर्णश्चतुर्थः vवि vरप्शते विविधं राजते॥

उद्वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु।
अपोर्णुवन्तस्तम आ परीवृतं स्वर्ण शुक्रं तन्वन्त आ रजः॥ २॥

उत्। वाम्। पृक्षासः। मधुऽमन्तः। ईरते। रथाः। अश्वासः। उषसः। विऽउष्टिषु।
अपऽऊर्णुवन्तः। तमः। आ। परिऽवृतम्। स्वः। न। शुक्रम्। तन्वन्तः। आ। रजः॥२॥

vपृक्षासः पृक्षास्त्रिविधान्नवन्तः vमधुमन्तः सोमरसोपेताः vअश्वासः अश्वयुक्ताः vवां युवयोः vरथाः। यद्वा। मधुमन्तः पृक्षा रथा अश्वासोऽश्वाः vउषसो vव्युष्टिषु व्युच्छनेषु[5] सत्सु vउत् vईरते उन्मुखं गच्छन्ति। किं कुर्वन्तः। vपरीवृतं परितो व्याप्तं vतमः vआ सर्वतः vअपोर्णुवन्तः अपाकुर्वन्तः vस्वर्न आदित्य इव vशुक्रं दीप्तं vरजः तेजश्च vतन्वन्तः। आकारश्चार्थे। यद्वा। रजोऽन्तरिक्षं शुक्रं दीप्तं तन्वन्तः॥

मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युञ्जाथां रथम्।
आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना॥ ३॥

मध्वः। पिबतम्। मधुऽपेभिः। आसऽभिः। उत। प्रियम्। मधुने। युञ्जाथाम्। रथम्।
आ। वर्तनिम्। मधुना। जिन्वथः। पथः। दृतिम्। वहेथे इति। मधुऽमन्तम्। अश्विना॥ ३॥

vमध्वः मधुरं सोमरसं vमधुपेभिः सोमपानार्हैः vआसभिः आस्यैः vपिबतम्। vउत अपि च vप्रियं vरथं vमधुने मधुलाभाय vयुञ्जाथाम् अश्वैर्युक्तं कुरुतम्। vवर्तनिं यजमानगृहम् vआ[6] गच्छतमिति शेषः। vपथः गमनमार्गान् vमधुना vजिन्वथः प्रीणयतम्। यद्वैकं वाक्यम्। पथो वर्तनिमाकाशं जिन्वथः। vदृतिं vमधुमन्तं हे vअश्विना[7] vवहेथे धारयथः॥

---

१. ल–वा रप्शते। २. ख-ग-च-ण–त्रिविधाः मिथुनं त्रेधा विहितं पात्र इदमन्नमशनम्; त–त्रिविधाः विहितं वा इदमन्नमशनं पानं खादश्चेति हि श्रुतम्; भ-ल-स–त्रिविधाः त्रेधाः (स–'त्रेधाः' नास्ति) त्रेधा विहितं (ब–°विहितं पात्रम्) वा इदमन्नमशनं पानं खादश्चेति (स–खादयश्चेति) हि श्रुतिः। ३. त–तैत्तिरीये। ४. ख-ग-च-ण-फ-भ–व्युच्छितेषु। ५. ख-ग-च-ण-न-भ-स–'आ' नास्ति। ६. प–अश्विना अश्विनौ।

हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः ।
उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥४॥

हंसासः । ये । वाम् । मधुऽमन्तः । अस्रिधः । हिरण्यऽपर्णाः । उहुवः । उषःऽबुधः ।
उत्ऽअप्रुतः । मन्दिनः । मन्दिऽनिस्पृशः । मध्वः । न । मक्षः । सवनानि । गच्छथः ॥ ४ ॥

[v]हंसासः अध्वनि शीघ्रं गन्तारः [v]मधुमन्तः माधुर्योपेताः [v]अस्रिधः अद्रोग्धारः [v]हिरण्यपर्णाः हितरमणीयपर्णाः [v]उहुवः वोढारः [v]उषर्बुधः उषसि बुध्यमानाः [v]उदप्रुतः उदकस्य प्रावयितारः [v]मन्दिनः[१] हर्षयितारः[१] [v]मन्दिनिस्पृशः मन्दिनं सोमं स्पृशन्तः । इत्थंलक्षणाः[२] अश्वा [v]ये सन्ति तैरश्वैः [v]मध्वो [v]न मधुनेव[३] [v]मक्षः मक्षिकाः [v]सवनानि अस्मदीयानि [v]गच्छथः ॥

स्वध्वरासो मधुमन्तो अग्नय उस्रा जरन्ते प्रति वस्तोरश्विना ।
यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमन्तमद्रिभिः ॥ ५ ॥

सुऽअध्वरासः । मधुऽमन्तः । अग्नयः । उस्रा । जरन्ते । प्रति । वस्तोः । अश्विना ।
यत् । निक्तऽहस्तः । तरणिः । विऽचक्षणः । सोमम् । सुसाव । मधुऽमन्तम् । अद्रिऽभिः ॥५॥

[v]स्वध्वरासः शोभनयागसाधनाः [v]मधुमन्तः हूयमानसोमवन्तः [v]अग्नयः गार्हपत्यादयः [v]उस्रा सह[४] निवसन्तावश्विनौ [v]प्रति [v]वस्तोः अन्वहमुषःकाले [v]जरन्ते स्तुवन्ति । [v]यत् यदा [v]निक्तहस्तः समन्त्रेणोदकेन शोधितहस्तः [v]तरणिः कर्मणस्तारयिता [v]विचक्षणः विविधं[५] द्रष्टा[६] अध्वर्युः [v]सोमं [v]मधुमन्तम् [v]अद्रिभिः ग्रावभिः [v]सुषाव अभिषुतवान् । तदा तेऽग्नयः स्तुवन्ति तस्मादागच्छतमित्यर्थः ॥

आकेनिपासो अहभिर्दविध्वतः स्वर्ण शुक्रं तन्वन्त आ रजः ।
सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पथः ॥ ६ ॥

आकेऽनिपासः । अहऽभिः । दविध्वतः । स्वः । न । शुक्रम् । तन्वन्तः । आ । रजः ।
सूरः । चित् । अश्वान् । युयुजानः । ईयते । विश्वान् । अनु । स्वधया । चेतथः । पथः ॥६॥

[v]आकेनिपासः । आकेऽन्तिके निपतन्तीत्याकेनिपा रश्मयः । ते[७] च[८] [v]अहभिः अहोभिः[९] [v]दविध्वतः कम्पयन्तो ध्वंसयन्तः[८] वा तमांसि । [v]स्वर्न आदित्य इव [v]शुक्रं दीप्तं [v]रजः [v]आ

१. ख-ग-च-ण-'मन्दिनः हर्षयितारः' नास्ति । २. त-उक्तलक्षणाः । ३. त-मधुमिव । ४. ख-ग-सदरसि; च-प-फ-भ-सदसि; ण-भ-सदीप्ति । ५. ख-ग-च-ण-फ-भ-विविधद्रष्टा । ६. फ-तथा । ७. त-ल-प्रकाशप्रभिर्ङैरहोभिर्वा । ८. ख-ग-च-ण-न-भ-स-'ध्वंसयन्तः' नास्ति ।

[v]तन्वन्तः भवन्त्यश्विनोरश्वाः [v]सूरश्चित् सूर्यश्च [v]अश्वान्युयुजानः योजयन् [v]ईयते गच्छति। हे अश्विनौ[1] युवां [v]विश्वान् [v]पथः आगमनमार्गाननुक्रमेण [v]स्वधया अन्नेन सोमलक्षणेन [v]चेतथः चेतयथः प्रज्ञापयथः॥

प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति।
येन सद्यः परि रजांसि याथो हविष्मन्तं तरणिं भोजमच्छ॥ ७॥

प्र। वाम्। अवोचम्। अश्विना। धियम्ऽधाः। रथः। सुऽअश्वः। अजरः। यः। अस्ति।
येन। सद्यः। परि। रजांसि। याथः। हविष्मन्तम्। तरणिम्। भोजम्। अच्छ॥ ७॥

[v]धियंधाः कर्मणां धारकोऽहम् हे [v]अश्विना[2] [v]वां [v]प्र [v]अवोचं प्रब्रवीमि स्तौमि। [v]स्वश्वः[3] [v]अजरः अजीर्णो नित्यनूतनोऽजरयिता वा [v]रथः [v]यः [v]अस्ति। [v]येन रथेन [v]सद्यः तदानीमेव [v]रजांसि लोकान् [v]परि [v]याथः[4]। तेन रथेन [v]हविष्मन्तं सोमादिहविर्युक्तं [v]तरणिं तारकं शीघ्रगामिनं [v]भोजं भोजयितारमस्मद्यागम् [v]अच्छ प्राप्तुम्[5]। आगच्छतमिति शेषः॥ ॥ २१ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके त्रयोदश सूक्तानि। तत्र 'अग्रं पिब' इति सप्तर्चं प्रथमं सूक्तं वामदेवस्यार्षं गायत्रम्। कृत्स्नम्[6] इन्द्रवायुदेवताकम् आद्या केवलवायव्या। तथा चानुक्रान्तम्—'अग्रं वायव्या-ऽैन्द्रवायवं तु गायत्रम्' इति। सूक्तविनियोगो लैङ्गिकः। आद्ये ह्ये ऐन्द्रवायवग्रहस्य याज्ये। तथा च सूत्रितम्—'अग्रं पिबा मधूनामिति याज्ये भनवानम्' (आश्व. श्रौ. ५. ५) इति॥

अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु। त्वं हि पूर्वपा असि॥ १॥

अग्रम्। पिब। मधूनाम्। सुतम्। वायो इति। दिविष्टिषु।
त्वम्। हि। पूर्वऽपाः। असि॥ १॥

हे [v]वायो त्वम् [v]अग्रम् इन्द्रादिभ्यः पूर्वं [v]मधूनां मधुररसानां सोमानां संबन्धिनं [v]सुतम् अभिषुतं रसं [v]पिब। कुत्रेति तदुच्यते। [v]दिविष्टिषु दिवः स्वर्गस्य प्रापकेषु यज्ञेषु। यद्वा। अस्माकं दिवः स्वर्गस्यै-षणेषु निमित्तेषु। [v]त्वं [v]हि त्वं खलु [v]पूर्वपा [v]असि। हिशब्दः 'देव दधिषे पूर्वपेयम्' (ऋ. सं. ७. ५२. १) इत्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थः। वायोरग्रपानं 'देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्नहं प्रथमः पिबेयम्' (ऐ. ब्रा. २. २५) इत्यादिब्राह्मणे स्पष्टमाम्नातम्। तत्र हि वायुराजि प्रथमं धावित्वाग्रपानं लब्धवान्॥

शतेना नो अभिष्टिभिर्नियुत्वाँ इन्द्रसारथिः। वायो सुतस्य तृम्पतम्॥ २॥

शतेन। नः। अभिष्टिऽभिः। नियुत्वान्। इन्द्रऽसारथिः। वायो इति। सुतस्य। तृम्पतम्॥ २॥

१. प–अश्विना अश्विनौ। २. त-प–अश्विना अश्विनौ। ३. ख-ग-च-ण-त-प-फ-भ–स्वश्वः सुष्ठु अश्वः। ४. प–याथः परितो गच्छथः। ५. त–अभिप्राप्तुम्। ६. त–कृत्स्नं सूक्तम्। ७. त–केवला वायव्या।

हे ᵛवायो ᵛनियुत्वान् नियुद्भिस्तद्वान् ᵛइन्द्रसारथिः इन्द्रसहायः सन् त्वं ᵛशतेन अपरिमितैः ᵛअभिष्टिभिः अभित एषणीयैः कामैर्निमित्तभूतैरागच्छेति शेषः । आगत्य च ᵛसुतस्य सुतमभिषुतं ᵛनः[1] अस्मदीयं[1] सोमं ᵛतृप्तनं पिबतं त्वमिन्द्रश्च । इन्द्रस्य साहित्यं ब्राह्मणे एवोक्तं—' तृतीयभागिन्द्रोऽभवत्त्रिभाग्वायुः ' इति, ' तृतीये हैव संग्रहीतारो वदन्तेऽमुनैवानूकाशेन यदद इन्द्रः सारथिरिव भूत्वोदजयत् ' (पं. ब्रा. २. २५) इति वा ॥

आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः । वहन्तु सोमपीतये ॥ ३ ॥

आ । वाम् । सहस्रम् । हरयः । इन्द्रवायू इति । अभि । प्रयः । वहन्तु । सोमऽपीतये ॥ ३ ॥

हे ᵛइन्द्रवायू ᵛवां युवां ᵛसहस्रं ᵛहरयः सहस्रसंख्याका अश्वाः ᵛप्रयः अन्नं प्रति त्वरयन्तः सन्ति । अत्र हरिशब्दोऽश्वसामान्यवचनः । ते ᵛसोमपीतये[2] ᵛआ ᵛवहन्तु ॥

रथं हिरण्यवन्धुरमिन्द्रवायू स्वध्वरम् । आ हि स्थाथो दिविस्पृशम् ॥ ४ ॥

रथम् । हिरण्यऽवन्धुरम् । इन्द्रवायू इति । सुऽअध्वरम् । आ । हि । स्थाथः । दिविऽस्पृशम् ॥ ४ ॥

हे ᵛइन्द्रवायू ᵛहिरण्यवन्धुरं हिरण्मयनिवासाधारकाष्ठोपेतं ᵛदिविस्पृशं द्युलोकस्पर्शिनं ᵛस्वध्वरं शोभनाध्वरवन्तं[3] ᵛरथम् ᵛआ ᵛस्थाथः ᵛहि आस्थितौ[4] खलु । यस्मादेवं तस्मादागच्छतमित्यर्थः । स्वध्वरं प्रत्यास्थाथ इति वा व्याख्येयम् ॥

' रथेन पृथु ' इत्यादिकस्तृचो दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रे ऐन्द्रवायवो द्वितीयः । सूत्रितं च—' रथेन पृथुपाजसा बहवः सूरचक्षसः ' (आश्व. श्रौ ७. १२) इति ॥

रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् । इन्द्रवायू इहा गतम् ॥ ५ ॥

रथेन । पृथुऽपाजसा । दाश्वांसम् । उप । गच्छतम् । इन्द्रवायू इति । इह । आ । गतम् ॥ ५ ॥

हे ᵛइन्द्रवायू ᵛपृथुपाजसा प्रभूतबलेन ᵛरथेन ᵛदाश्वांसं दातारं यजमानम् ᵛउप ᵛगच्छतम् । तदर्थम् ᵛइह अस्मिन् यज्ञे ᵛआ[5] ᵛगतम्[5] आगच्छतम् ॥

इन्द्रवायू अयं सुतस्तं देवेभिः सजोषसा । पिबतं दाशुषो गृहे ॥ ६ ॥

इन्द्रवायू इति । अयम् । सुतः । तम् । देवेभिः । सऽजोषसा । पिबतम् । दाशुषः । गृहे ॥ ६ ॥

हे ᵛइन्द्रवायू ᵛअयं सोमः ᵛसुतः अभिषुतः । ᵛतं सोमं ᵛदेवेभिः देवैः ᵛसजोषसा समानप्रीती[6] ᵛदाशुषः हविर्दातुः ᵛगृहे यागशालायां ᵛपिबतम् ॥

---

१. ख-ग-ण-न-भ-ल-स–' नः अस्मदीयं ' नास्ति । २. त–सोमपीतये पानाय; प–सोमपीतये पानाय अभि । ३. प–शोभनयज्ञवन्तम् । ४. ख-ग-च-ण-भ–स्थितौ । ५. ख-ग-च-ण-न-म-स–' आ गतं ' नास्ति । ६. ल–समानप्रीतौ सन्तौ ।

इह प्रयाणमस्तु वामिन्द्रवायू विमोचनम् । इह वां सोमपीतये ॥ ७ ॥

इह । प्रऽयानम् । अस्तु । वाम् । इन्द्रवायू इति । विऽमोचनम् । इह । वाम् । सोमऽपीतये ॥७॥

हे [v]इन्द्रवायू [v]वां युवयोः [v]इह अस्मिन् यज्ञे [v]प्रयाणं गमनम् [v]अस्तु । [v]इह अस्मिन्नेव यज्ञे [v]वां [v]सोमपीतये [v]विमोचनम् अश्वानाम् अस्तु । पर्यवसानत एकार्थत्वेऽप्यादरार्थत्वादविरोधः ॥ ॥ २२ ॥

' वायो शुक्रः ' इति चतुर्ऋचं द्वितीयं सूक्तमानुष्टुभं[2] वामदेवस्यार्षम्[3] ऐन्द्रवायवम्। आद्या केवलवायव्या । अत्रानुक्रमणिका—' वायो चतुष्कमाद्या[4] वायव्यानुष्टुभं तु[5] ' इति । सूक्तविनियोगो लैङ्गिकः । आद्या दशरात्रे चतुर्थेऽहनि प्रउगशस्त्रे वायव्यतृचे प्रथमा । ' वायो शुक्रो अयामि ते विहि होत्रा अवीताः ' (आश्व. श्रौ. ७. ११) इति सूत्रितम् ॥

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ १ ॥

वायो इति । शुक्रः । अयामि । ते । मध्वः । अग्रम् । दिविष्टिषु ।
आ । याहि । सोमऽपीतये । स्पार्हः । देव । नियुत्वता ॥ १ ॥

हे [v]वायो [v]ते तुभ्यं [v]शुक्रः व्रतचर्यादिना दीप्तोऽहं [v]मध्वः मधुरं सोमरसम् ॥ कर्मणि षष्ठी ॥ [v]अग्रम् इतरेभ्यः पूर्वम् [v]अयामि आययामि[6]॥ अयतिरन्तर्भावितण्यर्थः ॥ किमर्थम् । [v]दिविष्टिषु दिवो द्युलोकस्यैषणेषु सत्सु हे [v]देव वायो [v]स्पार्हः स्पृहणीयस्त्वं [v]नियुत्वता । नियुत् वायोः प्रतिनियतोऽश्वः । तेन साधनेन [v]आ [v]याहि [v]सोमपीतये सोमपानाय ॥

' इन्द्रश्च ' इत्यादिस्तृचो दशरात्रे चतुर्थेऽहन्यैन्द्रवायवो द्वितीयः । सूत्रितं च—' इन्द्रश्च वायवेषां सोमानामा चिकितान सुकृत् ' (आ. श्रौ. ७. ११) इति ॥

इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः ।
युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥ २ ॥

इन्द्रः । च । वायो इति । एषाम् । सोमानाम् । पीतिम् । अर्हथः ।
युवाम् । हि । यन्ति । इन्दवः । निम्नम् । आपः । न । सध्र्यक् ॥ २ ॥

हे [v]वायो त्वम् [v]इन्द्रश्च [v]एषां गृहीतानां [v]सोमानां [v]पीतिं पानम् [v]अर्हथः । [v]युवां [v]हि खलु [v]इन्दवः सोमाः [v]यन्ति प्राप्नुवन्ति । [v]निम्नं खातप्रदेशम्[7] [v]आपो [v]न [v]सध्र्यक् उदकानि यथा सहैव गच्छन्ति तद्वत् सर्वे सोमा युवां हि यन्ति ॥

१. ल–वां युवाम् । २. त–सूक्तं वामदेवस्यार्षमानुष्टुभम् । ३. त–ख-ग-च-ण-त-न-स–चतुष्कमानुष्टुभमाद्या वायव्या । ४. त–प्रापयामि; प–आगच्छामि । ५. न–नीचं प्रदेशम; ल–खातं प्रदेशम ।

वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥ ३ ॥

वायो इति । इन्द्रः । च । शुष्मिणा । सऽरथम् । शवसः । पती इति ।
नियुत्वन्ता । नः । ऊतये । आ । यातम् । सोमऽपीतये ॥ ३ ॥

हे वायो त्वम् इन्द्रश्च हे शवसस्पती बलस्य पती शुष्मिणा बलवन्तौ नियुत्वन्ता नियुत्सङ्काशवन्तौ युवां सरथं समानमेव रथमारुहेति शेषः । न ऊतये रक्षणाय[1] सोमपीतये सोमपानायात्र आ यातम् आगच्छतम् । यद्वा । सरथमधितिष्ठतम् आरुह्य चायातमिति च वाक्यद्वयम् ॥

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
अस्मे ता यज्ञवाहसेन्द्रवायू नि यच्छतम् ॥ ४ ॥

याः । वाम् । सन्ति । पुरुऽस्पृहः । निऽयुतः । दाशुषे । नरा ।
अस्मे इति । ताः । यज्ञऽवाहसा । इन्द्रवायू इति । नि । यच्छतम् ॥ ४ ॥

हे नरा नेतारौ हे यज्ञवाहसा यज्ञवाहकौ इन्द्रवायू याः पुरुस्पृहः बहुभिः स्पृहणीयाः नियुतः सन्ति[2] अस्मे अस्मभ्यं दाशुषे हविर्दत्तवते यजमानाय मदर्थं[3] ताः नियुतः नि यच्छतम् ॥ ॥ २३ ॥

' विहि होत्राः ' इति पञ्चर्चं तृतीयं सूक्तं वामदेव्यं वायव्यम् । अत्रानुक्रमणिका—' विहि पञ्च वायव्यम् ' इति । सूक्तविनियोगो लैङ्गिकः । आधा[4] दशरात्रे चतुर्थेऽहनि प्रउगशस्त्रे वायव्यतृचस्य द्वितीया । तथा च सूत्रितं—' विहि होत्रा अवीता वायो शतं हरीणाम् ' (आश्व. श्रौ. ७. ११) इति ॥

विहि होत्रा अवीता विपो न रायो अर्यः ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ १ ॥

विहि । होत्राः । अवीताः । विपः । न । रायः । अर्यः ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ १ ॥

हे वायो विहि वीहि भक्षय । होत्राः होमसाधिकाः सोमाहुतीः अवीताः अन्यैः पूर्वमभक्षिताः विपो न शत्रूणां वेपयिता राजेव । किंच अर्यः स्तोतुर्मम रायः धनानि । संपादयेति शेषः । हे वायो चन्द्रेण आह्लादकेन रथेन आ याहि सुतस्य सोमस्य पीतये पानाय ॥

---

१. ख-ग-घ-च-ण-प-भ-अस्मद्रक्षणाय । २. ख-ग-घ-च-ण-प-भ-वां युष्माकं सन्ति ताः । ३. प-मद्यम । ४. ख-ग-च-ण-भ-अथ च; भ-अथ ।

निर्युवाणो अशस्तीर्निर्युत्वाँ इन्द्रसारथिः ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ २ ॥

निःऽयुवानः । अशस्तीः । नियुत्वान् । इन्द्रऽसारथिः ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ २ ॥

हे [v]वायो त्वम् [v]अशस्तीः अभिशस्तीः [v]निर्युवाणः निःशेषेण नियोजयन् [v]नियुत्वान् नियुत्संज्ञकाश्ववान् [v]इन्द्रसारथिः इन्द्रसहायः सन् [v]आ [v]याहि ॥

अनु कृष्णे वसुधिती येमाते विश्वपेशसा ।
वायवा चन्द्रेण रथेनं याहि सुतस्य पीतये ॥ ३ ॥

अनु । कृष्णे इति । वसुधिती इति वसुऽधिती । येमाते इति । विश्वऽपेशसा ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ ३ ॥

[v]कृष्णे कृष्णवर्णे [v]वसुधिती वसूनां धात्र्यौ [v]विश्वपेशसा विश्वरूपे द्यावापृथिव्यौ त्वाम् [v]अनु [v]येमाते अनुगच्छतः ॥

वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ ४ ॥

वहन्तु । त्वा । मनःऽयुजः । युक्तासः । नवतिः । नव ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ ४ ॥

हे [v]वायो [v]त्वा त्वां [v]मनोयुजः मनःसमानगतयः [v]युक्तासः परस्परसंयुक्ताः[1] [v]नवतिर्नव नवोत्तरनवतिसंख्याका अश्वाः [v]वहन्तु धारयन्तु ॥

' वायो शतम् ' इति पञ्चमी पूर्वोक्त एव तृचे तृतीया । सूत्रं पूर्वमेवोक्तम् ॥

वायो शतं हरीणां युवस्व पोष्याणाम् ।
उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥ ५ ॥

वायो इति । शतम् । हरीणाम् । युवस्व । पोष्याणाम् ।
उत । वा । ते । सहस्रिणः । रथः । आ । यातु । पाजसा ॥ ५ ॥

---

१. ख-फ-भ-°संयुक्ताः भवन्ति ।

हे [v]वायो त्वं [v]पोष्याणां पोषणीयानां [v]हरीणां [v]शतं [v]युवस्व योजय रथे। [v]उत [v]वा अपि[1] च[2] [v]ते [v]सहस्रिणः सहस्रसंख्यापूरका अश्वाः। तैर्युक्तः [v]रथः [v]पाजसा बलेन [v]आ [v]यातु आगच्छतु ॥ ॥ २४ ॥

'इदं वामास्ये' इति षड्चं चतुर्थं सूक्तं वामदेवस्यार्षं गायत्रमैन्द्राबार्हस्पत्यम्। अत्रानुक्रमणिका—'इदं वां षळैन्द्राबार्हस्पत्यं गायत्रम्' इति। सूक्तविनियोगो लैङ्गिकः ॥

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते ॥ १ ॥

इदम्। वाम्। आस्ये। हविः। प्रियम्। इन्द्राबृहस्पती इति।
उक्थम्। मदः। च। शस्यते ॥ १ ॥

हे [v]इन्द्राबृहस्पती [v]वामास्ये[3] [v]इदं [v]प्रियं [v]हविः सोमरूपम्। प्रक्षिपामीति शेषः। [v]उक्थं शस्त्रं [v]च [v]मदः मदजनकं [v]शस्यते ॥

अयं वां परि षिच्यते सोम इन्द्राबृहस्पती। चारुर्मदाय पीतये ॥ २ ॥

अयम्। वाम्। परि। सिच्यते। सोमः। इन्द्राबृहस्पती इति। चारुः। मदाय। पीतये ॥ २ ॥

हे [v]इन्द्राबृहस्पती [v]वाम् आस्ये [v]चारुः[3] शोभनः[3] [v]अयं [v]सोमः [v]परि [v]षिच्यते परितो दीयते। [v]मदाय हर्षाय [v]पीतये पानाय च ॥

ऐन्द्राबार्हस्पत्यायामिष्टौ प्रधानस्य 'आ न इन्द्रा' इति तृतीयानुवाक्या उत्तरा याज्या। सूत्रितं च—'आ न इन्द्राबृहस्पती अस्मे इन्द्राबृहस्पती' (आश्व. श्रौ. २. ११) इति ॥

आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम्। सोमपा सोमपीतये ॥ ३ ॥

आ। नः। इन्द्राबृहस्पती इति। गृहम्। इन्द्रः। च। गच्छतम्। सोमऽपा। सोमऽपीतये ॥ ३ ॥

हे [v]इन्द्राबृहस्पती। अथ विविच्योच्यते। हे बृहस्पते त्वं च [v]इन्द्रश्च [v]सोमपा सोमपौ युवां[4] [v]सोमपीतये सोमपानाय [v]नः [v]गृहम् अस्मद्यागसंबन्धिं[5] [v]आ [v]गच्छतम् ॥

अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम्। अश्वावन्तं सहस्रिणम् ॥ ४ ॥

अस्मे इति। इन्द्राबृहस्पती इति। रयिम्। धत्तम्। शतऽग्विनम्।
अश्वऽवन्तम्। सहस्रिणम् ॥ ४ ॥

१. न-ल-स-अथवा। २. प-वामास्ये युष्मदीये मुखे। ३. ख-ग-ण-न-भ-स-सोमः। ४. ख-ग-ण-भ-युवं युवाम्। ५. त-अस्मद्यागसंबन्धिनम्।

अस्या विनियोगः पूर्वमन्त्रेण सहोक्तः। हे [v]इन्द्राबृहस्पती [v]अस्मे अस्मभ्यं [v]रयिं धनं [v]धत्तम्[१]। कीदृशं रयिम्। [v]शतग्विनं शतसंख्याकाभिर्गोभिर्युक्तम् [v]अश्वावन्तम् अश्ववन्तं [v]सहस्रिणं सहस्रसंख्यायुक्तम् ॥

इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे। अस्य सोमस्य पीतये ॥ ५ ॥

इन्द्राबृहस्पती इति। वयम्। सुते। गीःऽभिः। हवामहे। अस्य। सोमस्य। पीतये ॥ ५ ॥

[v]सुते[२] सोमेऽभिषुते [v]गीर्भिः स्तुतिभिः। शिष्टं[३] गतम्[४] ॥

सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा ॥ ६ ॥

सोमम्। इन्द्राबृहस्पती इति। पिबतम्। दाशुषः। गृहे। मादयेथाम्। तत्ऽओकसा ॥ ६ ॥

हे [v]इन्द्राबृहस्पती[५] युवां[६] [v]दाशुषः हविर्दातुर्यजमानस्य [v]गृहे [v]तदोकसा। तदेव यजमानगृहमोको निवासस्थानं ययोस्तौ। तादृशौ सन्तौ [v]सोमं [v]पिबतम्। पीत्वा च [v]मादयेथाम् इति ॥ ॥२५॥

'यस्तस्तम्भ' इत्येकादशर्चं पञ्चमं सूक्तं वामदेवस्यार्षं त्रैष्टुभम्। दशमी जगती। दशम्येकादश्याविन्द्राबृहस्पतिदेवताके शिष्टा नव बार्हस्पत्यः[७]। अत्रानुक्रमणिका—'यस्तस्तम्भैकादश बार्हस्पत्यमन्त्ये ऐन्द्र्यौ चोपान्त्या जगती'। आभिपूर्विकेपूक्थेषु तृतीयसवने ब्राह्मणाच्छंसिनः स्तोमवृद्ध्याविदं सूक्तमावापार्थम्। तथा च सूत्रं—'यस्तस्तम्भ यो अद्रिभित्' (आश्व. श्रौ. ७. ९) इति। आग्ने बृहस्पतिसवे[८] मरुत्वतीयनिष्केवल्ययोः सूक्तमुखीये। सूत्रितं च—'यस्तस्तम्भ धुनेतय इति सूक्तमुखीये' (आश्व. श्रौ. ९. ५) इति ॥

यस्तस्तम्भ सहसा वि ज्मो अन्तान्बृहस्पतिस्त्रिषधस्थो रवेण।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥ १ ॥

यः। तस्तम्भ। सहसा। वि। ज्मः। अन्तान्। बृहस्पतिः। त्रिऽसधस्थः। रवेण।
तम्। प्रत्नासः। ऋषयः। दीध्यानाः। पुरः। विप्राः। दधिरे। मन्द्रऽजिह्वम् ॥ १ ॥

[v]यः [v]बृहस्पतिः बृहतो देवस्य[९] यज्ञस्य वा पालयिता देवः [v]सहसा बलेन [v]ज्मः पृथिव्याः [v]अन्तान्। दश दिश इत्यर्थः। तान् [v]वि [v]तस्तम्भ विविधं स्तम्भितवान् नियमितवान्। [v]त्रिषधस्थः त्रिषु स्थानेषु वर्तमानः [v]रवेण एवं तिष्ठतेत्यनेन शब्देन [v]तं देवं [v]प्रत्नासः पुराणाः [v]ऋषयः अतीन्द्रियद्रष्टारः [v]दीध्यानाः दीप्यमानाः [v]विप्राः मेधाविनो यजमानादयः [v]पुरः [v]दधिरे पुरस्तात् स्थापितवन्तः स्तुत्यादिना। [v]मन्द्रजिह्वं[१०] मादनजिह्वं मोदनजिह्वम्[११] ॥

१. ख-ग-च-न-प-भ-स-धत्तं दत्तम्। २. ख-ग-च-ण-प-फ-भ-हे इन्द्राबृहस्पती सुते। ३. त-शिष्टं स्पष्टम्; प-वयं वा हवामहे। अस्य सोमस्य पीतये। ४. ल-इन्द्राबृहस्पती इन्द्रश्च बृहस्पतिश्च। ५. ख-ग-च-ण-न-भ-स-त्राम्। ६. त-बार्हस्पत्याः। ७. ख-ग-च-ण-न-भ-ल-स-°सवने। ८. त-वेदस्य। ९. ख-ग-च-ण-फ-भ-मन्द्रजिह्वं मन्द्रा जिह्वा यस्यासौ मन्द्रजिह्वः तम्; त-मन्द्राजिह्वं मोदनजिह्वम्; न-मन्द्राजिह्वं मादनजिह्वं तम्; प-मन्द्रजिह्वं कीदृशं मन्द्रा जिह्वा यस्यासौ मन्द्रजिह्वः तं मन्द्रजिह्वम।

धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ॥ २ ॥

धुनऽइतयः । सुऽप्रकेतम् । मदन्तः । बृहस्पते । अभि । ये । नः । ततस्रे ।
पृषन्तम् । सृप्रम् । अदब्धम् । ऊर्वम् । बृहस्पते । रक्षतात् । अस्य । योनिम् ॥ २ ॥

हे [1]बृहस्पते [2]धुनेतयः । धुना शत्रूणां कम्पयित्रीतिर्गतिर्येषां ते । तादृशाः [3]सुप्रकेतं शोभनप्रज्ञं[4] त्वां [5]मदन्तः मादयन्तः [6]नः अस्मत्संबन्धिनः [7]ये ऋत्विजः [8]अभि [9]ततस्रे आत्मानमुपक्षिपन्ति[5] स्तुवन्ति वा [10]अस्य एषां [11]योनिं कारणं यज्ञं यजमानं वा मां [12]रक्षतात रक्ष । योनिर्विशेष्यते । [13]पृषन्तं फलानि सिञ्चन्तं [14]सृप्रं सर्पणस्वभावम् [15]अदब्धम् अहिंसितम् [16]ऊर्वम् उरुम् ॥

'बृहस्पते या' इत्यादिके द्वे बार्हस्पत्ये पशौ वपापुरोडाशयोरनुवाक्ये । 'बृहस्पते या परमा परावदिति द्वे[6]' (आश्व. श्रौ. ३. ७) इति[7] हि[8] सूत्रितम् ॥

बृहस्पते या परमा परावदत आ ते ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ३ ॥

बृहस्पते । या । परमा । पराऽवत् । अतः । आ । ते । ऋतऽस्पृशः । नि । सेदुः ।
तुभ्यम् । खाताः । अवताः । अद्रिऽदुग्धाः । मध्वः । श्चोतन्ति । अभितः । विऽरप्शम् ॥ ३ ॥

हे [1]बृहस्पते [2]या प्रसिद्धा [3]परमा उत्कृष्टा [4]परावत अत्यन्तं दूरभूता वसतिः स्वर्गाख्यास्ति । यद्वा लिङ्गव्यत्ययः । परमं स्थानमस्ति । [5]अतः अस्माद्देशात [6]आ । आ इत्यर्वागर्थे । अधस्तात् [7]ते तव संबन्धिनः [8]ऋतस्पृशः यज्ञं स्पृशन्तोऽध्वाः [9]नि [10]षेदुः निषण्णा भवन्ति । [11]तुभ्यं [12]खाता [13]अवताः[9] । लुप्तोपमेयम् । यथा खाताः कूपाः[10] [14]अभितः [15]श्चोतन्ति तद्वत [16]अद्रिदुग्धाः ग्रावभिरभिषुताः सोमाः [17]विरप्शं विशेषेण शब्देन[11] स्तोत्रं यथा भवति तथा [18]मध्वः मधुरसं श्चोतन्ति स्रवन्ति ॥

बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ॥ ४ ॥

बृहस्पतिः । प्रथमम् । जायमानः । महः । ज्योतिषः । परमे । विऽओमन् ।
सप्तऽआस्यः । तुविऽजातः । रवेण । वि । सप्तऽरश्मिः । अधमत् । तमांसि ॥ ४ ॥

अयं [1]बृहस्पतिः मन्त्राभिमानी देवः [2]महः महतः [3]ज्योतिषः दीप्तस्य आदित्यस्य [4]परमे निरतिशये [5]व्योमन् व्योमनि [6]प्रथमं [7]जायमानः प्रादुर्भवन् [8]सप्तास्यः सप्तच्छन्दोमयमुखः [9]तुविजातः बहुप्रकारं

१. ख-ग-च-ण-न-प-फ-भ-स-शोभनयज्ञम् । २. त-आत्मानमुपक्षपयन्ति । ३. ख-ग-च-ण-न-भ-स-'द्वे इति' नास्ति । ४. ल-च । ५. त-ल-अवताः अवटाः । ६. ख-भ-अवताः; प-फ-अवटाः । ७. त-शब्दनम् ।

संभूतः [v]रवेण शब्देन [v]ससरश्मिः सर्पणस्वभावतेजोयुक्तः [v]तमांसि [v]वि [v]अधमत् । 'धमतिर्गतिकर्मा' (निरु. ६. २) इति निरुक्तम् । विविधं गच्छति । नाशयतीत्यर्थः ॥

स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ ५ ॥

सः । सुऽस्तुभा । सः । ऋक्वता । गणेन । वलम् । रुरोज । फलिऽगम् । रवेण ।
बृहस्पतिः । उस्रियाः । हव्यऽसूदः । कनिक्रदत् । वावशतीः । उत् । आजत् ॥ ५ ॥

[v]सः [v]बृहस्पतिः [v]सुष्टुभा शोभनस्तुतिमता [v]ऋक्वता दीप्तिमता [v]गणेन अङ्गिरसां [v]रवेण शब्देन च सह [v]फलिगम् ॥ 'णिफला विशरणे' ॥ फलिर्भेदः । तेन गच्छतीति फलिगम् । [v]वलं[1] वलनामानमसुरं [v]रुरोज बभञ्ज । द्वितीयः सशब्दः[2] पूरणः । स एव देवः [v]उस्रियाः भोगानामुत्स्राविणीः [v]हव्यसूदः क्षीरादिहविष्प्रेरिकाः [v]वावशतीः वावश्यमानाः गाः [v]कनिक्रदत् शब्दं कुर्वन् [v]उदाजत् उद्घाटयति स्म ॥ ॥ २६ ॥

'एवा पित्रे' इति बार्हस्पत्ये पशौ हविषो याज्या । 'एवा पित्रे विश्वदेवाय वृष्णे विश्वे अद्य मरुतो विश्व ऊती' (आश्व. श्रौ. ३. ७) इति सूत्रितत्वात् । अग्निष्टोमे वैश्वदेवशस्त्रे एषैव धाय्या । तथा च सूत्रम्—'एवा पित्रे विश्वदेवाय वृष्ण आ नो भद्राः क्रतवो यन्तु विश्वतः' (आश्व. श्रौ. ५. १८) इति[3] ॥

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥ ६ ॥

एव । पित्रे । विश्वऽदेवाय । वृष्णे । यज्ञैः । विधेम । नमसा । हविःऽभिः ।
बृहस्पते । सुऽप्रजाः । वीरऽवन्तः । वयम् । स्याम । पतयः । रयीणाम् ॥ ६ ॥

[v]पित्रे पालकाय [v]विश्वदेवाय सर्वदेवतारूपाय । देवानां मन्त्रप्रतिपाद्यत्वादस्य च मन्त्राभिमानित्वात् विश्वदेवत्वम्[4] । यद्वा । अत्र देवशब्दः स्तुत्यर्थः । सर्वैः स्तुत्याय [v]वृष्णे वर्षकाय बृहस्पतये देवाय [v]एव एवमुक्तप्रकारेण [v]यज्ञैः तत्साधनैः [v]हविर्भिः आज्यचर्वादिलक्षणैः [v]नमसा स्तुत्या च [v]विधेम परिचरेम । हे [v]बृहस्पते [v]सुप्रजाः शोभनपुत्राः[5] [v]वीरवन्तः वीर्योपेताः [v]वयं [v]रयीणां धनानां [v]पतयः [v]स्याम ॥

१. त–तं वलम् । २. ल–तच्छब्दः । ३. त–इति वैश्वदेवति; न–इति नवेति; ल–इति मवेति । ४. ख-ग-ण-न-भ-स–वैश्वदेवत्वम् । ५. त–शोभनप्रजाः ।

स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥ ७ ॥

सः । इत् । राजा । प्रतिऽजन्यानि । विश्वा । शुष्मेण । तस्थौ । अभि । वीर्येण ।
बृहस्पतिम् । यः । सुऽभृतम् । बिभर्ति । वल्गुऽयति । वन्दते । पूर्वऽभाजम् ॥ ७ ॥

इदमाद्यचतुस्त्रयं पुरोहितप्रशंसा इति ब्राह्मणम् (ए. ब्रा. ८. २६) । अथवा सूक्तस्य ऋग्द्वयवर्जितस्य बार्हस्पत्यत्वात् बृहस्पतेरेव स्तुतिः । [v]स [v]इत् स एव [v]राजा मूर्धाभिषिक्तः अन्यः[१] वा राजमानः [v]प्रतिजन्यानि । जन्यं युद्धं प्रति बलानीत्यर्थः । प्रत्यर्थिजनपदानि वा तानि [v]विश्वा सर्वाणि [v]शुष्मेण बलेन [v]वीर्येण शरीरसामर्थ्येन वा [v]अभि अभिगम्याक्रम्य [v]तस्थौ तिष्ठति । स इत्युक्तं क इत्याह । [v]यः [v]बृहस्पतिं बृहतां महतां[२] पालयितारं देवमुक्तलक्षणं पुरोहितं वा [v]सुभृतं सुष्ठु हविःस्तोत्रादिनाच्छादनादिना वा [v]बिभर्ति भरति [v]वल्गूयति स्तौति । [v]वन्दते नमस्करोति च [v]पूर्वभाजम् इतरेभ्यः प्रथमं[३] संभक्तारं[३] कृत्वा । एवं यः करोति स एव[४] तस्थाविति ॥

स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन्ब्रह्मा राजनि पूर्व एति ॥ ८ ॥

सः । इत् । क्षेति । सुऽधितः । ओकसि । स्वे । तस्मै । इळा । पिन्वते । विश्वऽदानीम् ।
तस्मै । विशः । स्वयम् । एव । नमन्ते । यस्मिन् । ब्रह्मा । राजनि । पूर्वः । एति ॥ ८ ॥

[v]स [v]इत् स एव [v]क्षेति निवसति । [v]सुधितः सुष्ठु तृप्तः सन्[५] [v]स्वे स्वकीये एव [v]ओकसि सदने । स एव समृद्धो निर्बाधः सन् सुखेनास्ते । [v]तस्मा [v]इळा भूमिः [v]विश्वदानीं सर्वकालं[६] [v]पिन्वते वर्धते फलैः । [v]तस्मै [v]विशः प्रजाः [v]स्वयमेव [v]नमन्ते प्रणता भवन्ति । दण्डनमन्तरेण स्वयमेव दत्तकरा भवन्ति । [v]यस्मिन् [v]राजनि [v]ब्रह्मा [v]पूर्वः प्रथमं पूज्यः सन् [v]एति गच्छति । वर्तत इत्यर्थः ॥

अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ॥ ९ ॥

अप्रतिऽइतः । जयति । सम् । धनानि । प्रतिऽजन्यानि । उत । या । सऽजन्या ।
अवस्यवे । यः । वरिवः । कृणोति । ब्रह्मणे । राजा । तम् । अवन्ति । देवाः ॥ ९ ॥

१. ख-ग-च-ण-न-भ-यः । २. त- महतां मन्त्राणाम् । ३. न-प्रथमसंभक्तारम् । ४. त-इत् । ५. त-सन् । कुत्र । ६. च-सर्वदा ।

स एव [v]अप्रतीतः अन्यैरप्रतिगतः सन् यानि धनानि [v]प्रतिजन्यानि प्रतिस्पर्धिजनसंबन्धीनि [v]उत अपि च [v]सजन्या जनसंबन्धीनि [v]धनानि [v]सं [v]जयति[1]। [v]यः [v]राजा [v]अवस्यवे अवसीयसे[2] धनरहिताय रक्षणमिच्छते [v]ब्रह्मणे ब्राह्मणाय वा प्रीणनमिच्छते बृहस्पतये वा [v]वरिवः धनं [v]कृणोति करोति ददाति। स उक्तप्रकारेण महान् भवति। [v]तम् एव [v]देवाः [v]अवन्ति रक्षन्ति ॥

'इन्द्रश्च सोमम्' इति दशमी तृतीयसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्या। सूत्रितं च—'इन्द्रश्च सोमं पिबतं बृहस्पते आ वो वहन्तु सप्तयो रघुष्यदः' (आश्व. श्रौ. ५. ५) इति[3] ॥

इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥ १० ॥

इन्द्रः। च। सोमम्। पिबतम्। बृहस्पते। अस्मिन्। यज्ञे। मन्दसाना।
वृषण्वसू इति वृषण्ऽवसू ॥ आ। वाम्। विशन्तु। इन्दवः। सुऽआभुवः।
अस्मे इति। रयिम्। सर्वऽवीरम्। नि। यच्छतम् ॥ १० ॥

हे [v]बृहस्पते त्वं [v]इन्द्रश्च [v]सोमं [v]पिबतम्। कीदृशौ युवाम्। [v]अस्मिन्यज्ञे [v]मन्दसाना हृष्यन्तौ [v]वृषण्वसू वर्षितृधनौ यजमानेभ्यो दीयमानधनावित्यर्थः। [v]वां युवां [v]स्वाभुवः सुष्ठु सर्वतो भवन्तः। कृत्स्नशरीरव्यापनसमर्था इत्यर्थः। तादृशाः [v]इन्दवः सोमाः [v]विशन्तु युवयोः शरीरं प्रविशन्तु। [v]अस्मे अस्मभ्यं [v]रयिं धनं [v]सर्ववीरं सर्वपुत्रानुपेतं [v]नि [v]यच्छतं दत्तम् ॥

बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥ ११ ॥

बृहस्पते। इन्द्र। वर्धतम्। नः। सचा। सा। वाम्। सुऽमतिः। भूतु। अस्मे इति।
अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। जजस्तम्। अर्यः। वनुषाम्। अरातीः ॥ ११ ॥

हे [v]बृहस्पते हे [v]इन्द्र युवां[4] [v]नः अस्मान् [v]वर्धतं वर्धयतं प्रवृद्धान् कुरुतम्। [v]सा [v]सुमतिः युवयोरनुग्रहबुद्धिः [v]अस्मे अस्मासु [v]सचा सह [v]भूतु भवतु। [v]धियः कर्माणि [v]अविष्टं रक्षतं पारं नयतम्। [v]पुरंधीः। पुरं शरीरं धीयते स्थाप्यते याभिर्मतिभिस्ताः स्तुतीः [v]जिगृतं प्रबुध्यतम्। [v]वनुषां संभक्तॄणामस्माकम् [v]अर्यः गन्त्रीः [v]अरातीः। शत्रूनित्यर्थः। [v]जजस्तं युध्यतं क्षपयतमित्यर्थः[5]॥ छन्दस्यरातिशब्दः स्त्रीलिङ्गः॥ एवं स्तुतिं निगमय्याभीष्टं प्रार्थितवान् ॥ ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
श्रीमत्सायणमन्त्रीशो दाशतय्यास्तृतीयके । अष्टके सप्तमाध्यायं व्याकार्षीदतिपेशलम् ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके सप्तमोऽध्यायः समाप्तः[6] ॥

---

१. प–जयति संजयेत्। २. ख-ग-च-ण-न-भ–अवसीयते। ३. ख-ग-च-ण-न-भ-ल–इति। तत्पाठस्तु। ४. प–वां युवाम्। ५. त–क्षपयितुमित्यर्थः। ६. ग-ल–'समाप्तः' नास्ति।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथाष्टमं[1] व्याख्यातुमारभते[1]। ' इदमु त्यत् ' इत्येकादशर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमुषो-देवताकम्। ' इदमुषस्यं तु ' इत्यनुक्रान्तम्। प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे इदं सूक्तम्। सूत्रितं च—' उषो वाजेनेहमु त्यत् ' (आश्व. श्रौ. ४. १४) इति ॥

इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।
नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥ १ ॥

इदम्। ऊँ इति। त्यत्। पुरुऽतमम्। पुरस्तात्। ज्योतिः। तमसः। वयुनऽवत्। अस्थात्।
नूनम्। दिवः। दुहितरः। विऽभातीः। गातुम्। कृणवन्। उषसः। जनाय ॥ १ ॥

[v]इदमु पुरतो दृश्यमानमिदं [v]त्यत् तदस्माभिः स्तुत्यं सर्वप्रसिद्धं [v]पुरुतमम् अत्यन्तप्रभूतं [v]ज्योतिः तेजः [v]वयुनावत् ॥ वेतेः कान्तिकर्मण इदम् ॥ प्रकृष्टकान्तिमत्। अथवा वयुनमिति प्रज्ञानाम। प्रज्ञोपेतम्। सर्वस्य प्रज्ञापकमित्यर्थः। कीदृक् तेजः। [v]पुरस्तात् पूर्वस्यां दिशि [v]तमसः अन्धकारात् [v]अस्थात् उदतिष्ठत्। एवं सति [v]नूनं सत्यं [v]दिवः आदित्यस्य [v]दुहितरः दुहितृस्थानीयाः [v]विभातीः[2] विभानं कुर्वतीः [v]उषसो [v]जनाय यजमानानां [v]गातुं गमनं गमनादिव्यापारसामर्थ्यं [v]कृणवन् अकुर्वन्[3] ॥

अस्थुरु चित्रा उषसः पुरस्तान्मिताइव स्वरवोऽध्वरेषु ।
व्यू व्रजस्य तमसो द्वारोच्छन्तीरव्रञ्छुचयः पावकाः ॥ २ ॥

अस्थुः। ऊँ इति। चित्राः। उषसः। पुरस्तात्। मिताःऽइव। स्वरवः। अध्वरेषु।
वि। ऊँ इति। व्रजस्य। तमसः। द्वारा। उच्छन्तीः। अव्रन्। शुचयः। पावकाः ॥ २ ॥

[v]चित्राः चायनीयाः[3] [v]उषसः [v]पुरस्तात् पूर्वस्यां दिशि [v]अस्थुः तिष्ठन्ति। व्यासा इत्यर्थः। तत्र दृष्टान्तः। [v]अध्वरेषु [v]मिताः खाताः [v]स्वरवः यूपाः [v]इव। ते यथा वेद्याः पुरतो भासन्ते तद्वत्। यद्यपि स्वरुशब्दो यूपच्छेदपतितप्रथमशकलवाची ' यः प्रथमः शकलः परापतेत्स स्वरुः कार्यः' इत्युक्तत्वात् तथाप्यत्र मितशब्दश्रवणात् ' चषालवन्तः स्वरवः ' (ऋ. सं. ३. ८. १०) इत्यादौ तथा दर्शनाच्चात्र यूपवचनः। ताः [v]व्रजस्य वारकस्य[4] [v]तमसो [v]द्वारा द्वाराणि [v]वि [v]उच्छन्तीः [v]शुचयः दीप्ताः [v]पावकाः शोधिकाः [v]अव्रन् व्यावृण्वन्[5] ॥

१. स—अथ तृतीयस्याष्टमाध्यायव्याख्यानमारभते। २. च-फ—विभातीरुषसो जनाय गातुं कृण्वन् आविर्भावं कुर्वन्। ३. प—चायनीयाः श्लाघनीयाः। ४. ख-ग-ण—आवारकस्य; घ-प—अन्धकारस्य; च-फ-भ—आवरकस्य। ५. च—आवृण्वन्; प—व्यवृण्वन्। उ पूरणः।

उच्छन्तीरद्य चितयन्त भोजात्राधोदेयायोषसो मघोनीः ।
अचित्रे अन्तः पणयः ससन्त्वबुध्यमानास्तमसो विमध्ये ॥ ३ ॥

उच्छन्तीः । अद्य । चितयन्त । भोजान् । राधःऽदेयाय । उषसः । मघोनीः ।
अचित्रे । अन्तरिति । पणयः । ससन्तु । अबुध्यमानाः । तमसः । विऽमध्ये ॥ ३ ॥

vअद्य अस्मिन् दिने vउच्छन्तीः तमः विवासयन्त्यः vमघोनीः धनवत्यः vउषसः vभोजान् भोजयितॄन् यजमानान् तेषां vराधोदेयाय सोमादिधनदानाय vचितयन्त प्रज्ञापयन्ति । vअचित्रे अचायनीये vतमसो vविमध्ये[1] । अत्यन्तगाढान्धकारे इत्यर्थः । तत्र vपणयः वणिज इवादातारः vअबुध्यमानाः vससन्तु स्वपन्तु ॥

कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।
येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥ ४ ॥

कुवित् । सः । देवीः । सनयः । नवः । वा । यामः । बभूयात् । उषसः । वः । अद्य ।
येन । नवऽग्वे । अङ्गिरे । दशऽग्वे । सप्तऽआस्ये । रेवतीः । रेवत् । ऊष ॥ ४ ॥

हे vदेवीः द्योतमानाः vउषसो vवः युष्मान् vसनयः पुराणः vनवो vवा vयामः गमनसाधनः vसः[2] रथः vअद्य अस्मिन् यागदिने vकुवित् बहुवारं vबभूयात् भवेत् गच्छेदित्यर्थः । vयेन रथेन हे vरेवतीः धनवत्यो यूयं vनवग्वे vदशग्वे vसप्तास्ये सप्तच्छन्दोयुक्तमुखे vअङ्गिरे अङ्गिरोगणे । तौ[3] द्वौ तत्र येऽप्यङ्गिरसः[2] तेषां गणे । तथान्यत्र ' नवग्वो नु दशग्वो अङ्गिरस्तमः ' (ऋ. सं. १०. ६२. ६) इति । vरेवत् धनवत् यथा भवति तथा vऊष विभातं कृतवत्यः ॥ वसेर्व्युच्छनकर्मणो लिण्मध्यम-बहुवचनस्येदं रूपम् ॥

यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् ॥ ५ ॥

यूयम् । हि । देवीः । ऋतयुक्ऽभिः । अश्वैः । परिऽप्रयाथ । भुवनानि । सद्यः ।
प्रऽबोधयन्तीः । उषसः । ससन्तम् । द्विऽपात् । चतुःऽपात् । चरथाय । जीवम् ॥ ५ ॥

हे vदेवीः द्योतमानाः vउषसः vयूयं vहि खलु vऋतयुग्भिः यज्ञगामिभिः vअश्वैः vभुवनानि vसद्यः vपरिप्रयाथ परितः प्रकृष्टं गच्छथ । किं कुर्वत्यः । vससन्तं स्वपन्तं vद्विपाच्चतुष्पात् मनुष्य-

१. त–विमध्ये अन्धकारस्य अन्तर्मध्ये । २. ख-ग-च-ण-भ–' सः ' नास्ति । ३. त–यद्वैते त्रयोऽप्यङ्गिरसः ।

गवादिलक्षणं vजीवं vचरथाय चरणाय गमनादिव्यवहाराय vप्रबोधयन्तीः प्रबोधयन्त्यः सत्यः परिप्रयाथ ॥ ॥ १ ॥

क्व स्विदासां कतमा पुराणी ययां विधानां विदधुर्ऋभूणाम् ।
शुभं यच्छुभ्रा उषसश्चरन्ति न वि ज्ञायन्ते सदृशीरजुर्याः ॥ ६ ॥

क्व । स्वित् । आसाम् । कतमा । पुराणी । ययां । विऽधानां । विऽदधुः । ऋभूणाम् ।
शुभम् । यत् । शुभ्राः । उषसः । चरन्ति । न । वि । ज्ञायन्ते । सऽदृशीः । अजुर्याः॥६॥

vआसाम् उषसां मध्ये vक्व vस्वित् अभूदद्य[1] vकतमा[2] vपुराणी पुरातनी । vयया vऋभूणां संबन्धीनि vविधाना चमसादिनिर्माणानि vविदधुः अकुर्वन् ऋभवः । vयत् याश्च vउषसः vशुभ्राः दीप्ताः vशुभं vचरन्ति शोभां दीप्तिं कुर्वन्ति । ताः vअजुर्याः अशीर्णा नित्यनूतनाः vन[3] vवि vज्ञायन्ते । यतः[4] vसदृशीः सदृश्यः सर्वेष्वपि दिवसेष्वेकरूपा अतोऽद्यतन्य एता एताः पुराण्य इति न ज्ञायन्ते । उषासादृश्यं[5] ' सदृशीरद्य सदृशीरिदु श्वः ' (ऋ. सं. १. १२३. ८) इत्यत्र प्रतिपादितम् ॥

ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्वींजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप ॥ ७ ॥

ताः । घ । ताः । भद्राः । उषसः । पुरा । आसुः । अभिष्टिऽद्युम्नाः । ऋतजातऽसत्याः ।
यासु । ईजानः । शशमानः । उक्थैः । स्तुवन् । शंसन् । द्रविणम् । सद्यः । आप ॥ ७ ॥

vता vघ । घेति प्रसिद्धौ । ताः खलूपकारिण्यः[6] vता vभद्राः कल्याण्यः स्तुत्या वा vउषसः vपुरा पूर्वम् vआसुः अभवन् । vअभिष्टिद्युम्नाः अभिगमनमात्रेण द्युम्नं धनं यासां ताः । vऋतजातसत्याः । ऋतार्थं यज्ञार्थं जाताश्च ताः सत्याः सत्यफलाश्च तादृश्यः । vयासु उषःसु vईजानः यागं कुर्वाणः vउक्थैः शस्त्रैः vशशमानः शंसमानः vस्तुवन् सामभिः स्तोत्रं निष्पादयन् vशंसन् शस्त्राणि कुर्वन् vद्रविणं धनं vसद्यः vआप प्राप्नोति । ता भद्रा इति संबन्धः ॥

ता आ चरन्ति समना पुरस्तात्समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ॥ ८ ॥

ताः । आ । चरन्ति । समना । पुरस्तात् । समानतः । समना । पप्रथानाः ।
ऋतस्य । देवीः । सदसः । बुधानाः । गवाम् । न । सर्गाः । उषसः । जरन्ते ॥ ८ ॥

१. ख-ग-च-ण-प-फ-भ-अभूत् । २. त-कतमा च । ३. ख-ग-घ-च-ण-भ-ल-स-'न' नास्ति । ४. ख-ग-ण-त-न-भ-ल-यथा; स-तथा । ५. त-उषसा सादृश्यम्; न-उषस सादृश्यम् । ६. ख-ग-घ-ण-न-प-भ-ल-स-स्वरूपकारिण्यः; च-फ-स्वरूपचारिण्यः ।

[v]ताः उषसः [v]आ सर्वतः [v]चरन्ति । [v]समना[१] सर्वतः समानाः[१] [v]पुरस्तात् पूर्वस्यां दिशि [v]समानतः समानादेशात् अन्तरिक्षात्[२] [v]समना सर्वतः[३] [v]पप्रथानाः प्रथमानाः[४] [v]ऋतस्य यज्ञस्य [v]सदसः सदः । तत्रस्थम् ऋत्विग्घविरादिकम्[५] इत्यर्थः । [v]बुधानाः बोधयन्त्यः ॥ अन्तर्भावितण्यर्थोऽयम् ॥ एवं महानुभावाः [v]उषसो [v]जरन्ते स्तूयन्ते । [v]गवां [v]सर्गाः [v]न उदकानां सृष्टय इव । ' गवां सर्गा न रश्मयः ' (ऋ. सं. ४. ५२. ५) इति हि श्रुतम् । ता यथा सर्वत्र प्रसंगादुपकारत्वाच्च स्तूयन्ते तद्वत् ॥

ता इ॒त्वे॒व स॑म॒ना स॑मा॒नीरमी॑तवर्णा उ॒षस॑श्चरन्ति ।
गूह॑न्ती॒रम्व॒मसि॑तं रुश॒द्भिः शु॒क्रास्त॒नूभि॑: शु॒चय॑ो रु॒चा॒नाः ॥ ९ ॥

ताः । इत् । नु । एव । समना । समानीः । अमीतऽवर्णाः । उषसः । चरन्ति ।
गूहन्तीः । अम्वम् । असितम् । रुशत्ऽभिः । शुक्राः । तनूभिः । शुचयः । रुचानाः ॥ ९ ॥

[v]ताः[६] [v]एव उषसः । इदिति पूरणः । [v]नु अद्य [v]समना समानाः एकधेत्यर्थः । [v]समानीः एकरूपाः [v]अमीतवर्णाः अहिंसितवर्णाः[७] अपरिमितवर्णा वा [v]उषसश्चरन्ति सर्वतः । किं कुर्वत्यः । [v]अम्वम् । महन्नामैतत् । अतिमहत् [v]असितं कृष्णं[८] रूपं [v]गूहन्तीः गोपयन्त्यः [v]रुशद्भिः रोचमानैः [v]तनूभिः स्वशरीरैः [v]शुक्राः दीप्ताः [v]शुचयः शुद्धाः [v]रुचानाः रोचमाना रोचयन्त्यो वा ॥

र॒यिं दि॒वो दु॑हितरो विभा॒तीः प्र॒जाव॑न्तं यच्छता॒स्मासु॑ देवीः ।
स्यो॒नाद॒ा वः॑ प्रति॒बु॒ध्यमा॑नाः सु॒वीर्य॑स्य॒ पत॑यः स्याम ॥ १० ॥

र॒यिम् । दि॒वः । दु॒हि॒तरः । वि॒ऽभा॒तीः । प्र॒जाऽव॑न्तम् । य॒च्छ॒त॒ । अ॒स्मासु॑ । दे॒वीः ।
स्यो॒नात् । आ । वः॒ । प्र॒ति॒ऽबु॒ध्यमा॑नाः । सु॒ऽवीर्य॑स्य । पत॑यः । स्या॒म॒ ॥ १० ॥

हे [v]दिवो [v]दुहितरः द्योतमानस्यादित्यस्य दुहितृस्थानीयाः [v]विभातीः विभात्यो विशेषेण भानं कुर्वत्यः[९] [v]अस्मासु [v]प्रजावन्तं [v]रयिं पुत्राद्युपेतं धनं [v]यच्छत दत्त । हे [v]देवीः देव्यः [v]स्योनात् सुखात् निमित्तभूतात् [v]वः युष्मान् [v]प्रतिबुध्यमानाः प्रतिबोधयन्तो वयं [v]सुवीर्यस्य [v]पतयः [v]स्याम । पुत्रादिसहितस्य धनस्य पालका भवेम[१०] ॥

' तद्नो दिवः ' इति व्युष्टायां जपेत् ॥

१. ख-ग-ण-भ-ल–समानाः; च–समनाः; त-प–समना सर्वतः समानाः समेन । २. त–एकरूपादन्तरिक्षात् । ३. ख-ग-च-ण-न-भ-ल-स–' सर्वतः ' नास्ति । ४. ख-ग-प-भ–समेन प्रथमानाः । ५. ख-ग-घ-च-ण-भ–ऋत्विगादिकम्; ल–ऋत्विग्यशादिकम्; स–ऋत्विग्वशादिकम् । ६. ख-प-फ-भ– ता इत् ताः । ७. ख-प-फ-भ–' अहिंसितवर्णाः ' नास्ति । ८. च–तमोरूपम् । ९. त–कुर्वत्यः सत्यः । १०. प– भवेम । आ पूरणः ।

तद्द्यौर्दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः ।
वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी ॥ ११ ॥

तत् । वः । दिवः । दुहितरः । विऽभातीः । उप । ब्रुवे । उषसः । यज्ञऽकेतुः ।
वयम् । स्याम । यशसः । जनेषु । तत् । द्यौः । च । धत्ताम् । पृथिवी । च । देवी ॥ ११ ॥

हे [v]दिवो [v]दुहितरः हे [v]उषसः [v]विभातीः[1] [v]वः युष्मान् [v]तत् उत्तरार्धप्रथमपादेन वक्ष्यमाणं फलं [v]यज्ञकेतुः । यज्ञ एव केतुः प्रज्ञापको यस्य तादृशोऽहम् [v]उप [v]ब्रुवे उपेत्य ब्रवीमि । अथ बहुवदुच्यते । [v]वयं स्तुवन्तः[2] [v]जनेषु अस्मत्समानेषु मध्ये [v]यशसः कीर्तेः अन्नस्य[3] वा[4] स्वामिनः [v]स्याम । [v]तत् यशः [v]द्यौः [v]पृथिवी [v]च [v]देवी [v]धत्तां धारयताम्[5] ॥ ॥ २ ॥

' प्रति ष्या ' इति सप्तर्चं सप्तमं सूक्तं वामदेवस्यार्षं[6] गायत्रमुषोदेवताकम् । ' प्रति ष्या सप्त गायत्रम् ' इत्यनुक्रमणिका । प्रातरनुवाक उषस्ये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं शस्यम् । ' अथोषस्यः प्रति ष्या सूनरी ' (आश्व. श्रौ. ४. १४) इति हि सूत्रितम् ॥

प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः । दिवो अदर्शि दुहिता ॥१॥

प्रति । स्या । सूनरी । जनी । विऽउच्छन्ती । परि । स्वसुः । दिवः । अदर्शि । दुहिता ॥ १ ॥

[v]स्या सा संस्तूयमाना[6] [v]सूनरी सुष्ठु प्राणिनां नेत्री [v]जनी जनयित्री फलानां [v]स्वसुः स्वसृस्थानीयाया रात्रेः [v]परि उपरिभागे रात्रिपर्यवसानकाले [v]व्युच्छन्ती तमो विवासयन्ती । ' स्वसा स्वस्रे ज्यायस्यै ' (ऋ. सं. १. १२४. ८) इत्युक्तम् । [v]दिवः द्योतमानस्यादित्यस्य [v]दुहिता उषाः [v]प्रति [v]अदर्शि प्रतिदृश्यते सर्वैः ॥

अश्वेव चित्रारुषी माता गवामृतावरी । सखाभूदश्विनोरुषाः ॥ २ ॥

अश्वाऽइव । चित्रा । अरुषी । माता । गवाम् । ऋतऽवरी । सखा । अभूत् । अश्विनोः । उषाः ॥२॥

[v]अश्वेव [v]चित्रा चायनीया [v]अरुषी रोचमाना [v]गवां रश्मीनां [v]माता निर्मात्री [v]ऋतावरी यज्ञवती [v]उषाः [v]अश्विनोः [v]सखा समानख्याना सह स्तूयमाना [v]अभूत् भवति । अश्विनोः उषसा[7] सह स्तूयमानत्वात् सख्यित्वं परस्परम् ॥

उत सखास्यश्विनोरुत माता गवामसि । उतोषो वस्व ईशिषे ॥ ३ ॥

उत । सखा । असि । अश्विनोः । उत । माता । गवाम् । असि । उत । उषः । वस्वः । ईशिषे ॥३॥

---

१. प–विशेषेण भानु (? नं) कुर्वन्त्यः; त–विभातीर्विविधभानाः । २. ख-ग-च-ण-फ-भ-ल–ब्रुवन्तः; प-स–' स्तुवन्तः ' नास्ति । ३. प–' अन्नस्य वा ' नास्ति । ४. ख-ग-च-ण-फ-भ–धारयताम् । च पूरणः । ५. स–वामदेव्यम् । ६. त–प्रस्तूयमाना । ७. ख-ग-ण-भ-स–उषा उषसः; घ–उषसः ।

vउत अपि च vअश्विनोः vसखा[१] vअसि। vउत अपि च vगवां रश्मीनां vमाता vअसि। vउत अपि च हे vउषः vवस्वः धनस्य vईशिषे ईश्वरा[२] भवसि ॥

यावयद्द्वेषसं त्वा चिकित्वित्सूनृतावरि। प्रति स्तोमैरभुत्स्महि ॥ ४ ॥

यवयत्ऽद्वेषसम्। त्वा। चिकित्वित्। सूनृताऽवरि। प्रति। स्तोमैः। अभुत्स्महि ॥ ४ ॥

vयावयद्द्वेषसम्[३]। यवयन्तो वियुज्यमाना द्वेषांसि द्वेष्टारो यस्यास्तादृशी। पृथक्क्रियन्ते द्वेषांस्यनयेति वा[४]। रात्रौ हननायोद्युक्ता द्वेषिण उषःकाले हि पलायन्ते[५]। तादृशीं vचिकित्वित् ज्ञापयन्तीं vत्वा त्वां vसूनृतावरि[६]। सूनृतेति[७] वाङ्नाम। तद्वति[७] देवि vस्तोमैः स्तुतिभिः vप्रति vअभुत्स्महि प्रतिबोधयामः। स्तुम इत्यर्थः ॥

प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः। ओषा अप्रा उरु ज्रयः ॥ ५ ॥

प्रति। भद्राः। अदृक्षत। गवाम्। सर्गाः। न। रश्मयः। आ। उषाः। अप्राः। उरु। ज्रयः ॥ ५ ॥

vभद्राः स्तुत्याः vरश्मयः vप्रति vअदृक्षत प्रतिदृश्यन्ते। vगवाम्[८] उदकानां vसर्गा vन[९] वर्षधारा इवेयम् vउषाः vउरु vज्रयः महत्तेजः vआ vअप्राः आपूरयत ॥

आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः। उषो अनु स्वधामव ॥ ६ ॥

आऽपप्रुषी। विभाऽवरि। वि। आवः। ज्योतिषा। तमः। उषः। अनु। स्वधाम्। अव ॥ ६ ॥

हे vविभावरि विभावति vउषः त्वम् vआपप्रुषी आपूरयन्ती तेजसा जगत् vज्योतिषा तेजसा vतमः अन्धकारं vव्यावः व्यावृणोः। किंच vअनु[१०] पश्चात्[१०] vस्वधां हविर्लक्षणमन्नम् vअव रक्ष ॥

'आ[१०] द्यां तनोषि' इत्येषा देवानां हविःषु उषसोऽनुवाक्या। सूत्रितं च—'आ द्यां तनोषि रश्मिभिरावहन्ती पोष्या वार्याणि' (आश्व. श्रौ. ६. १४) इति[१०] ॥

आ द्यां तनोषि रश्मिभिरान्तरिक्षमुरु प्रियम्। उषः शुक्रेण शोचिषा ॥ ७ ॥

आ। द्याम्। तनोषि। रश्मिऽभिः। आ। अन्तरिक्षम्। उरु। प्रियम्। उषः। शुक्रेण। शोचिषा ॥ ७ ॥

हे vउषः vरश्मिभिः vद्यां दिवम् vआ vतनोषि। vउरु विस्तीर्णं vप्रियम् vअन्तरिक्षं रश्मिभिः vआ तनोषि। vशुक्रेण दीप्तेन vशोचिषा प्रकाशेन युक्ता सती एवं करोषि ॥ ॥ ३ ॥

---

१. त—सखा सखी। २. ख-ग-च-ण-प-फ-भ— ईश्वरी; ल-स—ईश्वरः। ३. प-ल—यवयद्द्वेषसम्। ४. ख-ग-च-ण-भ-ल-स—'वा' नास्ति। ५. ख-ग-च-ण-प-भ—पलायन्त इत्यर्थः। ६. ख-ग-च-ण-प-फ-भ— हे सूनृतावरि। ७. प—सत्यवागवति। ८. ख-ग-च-ण-भ—गवां सर्गा न उदकानाम्। ९. ख-ग-घ-च-ण-न-भ-ल-स—'अनु पश्चात्' नास्ति। १०. ख-ग-च-ण-भ-ल-स—'आ द्यां...इति' नास्ति।

'तद्देवस्य' इति सप्तर्चमष्टमं सूक्तं वामदेवस्यार्षं जागतं सावित्रम्। तथा चानुक्रम्यते—'तद्देवस्य सावित्रं तु जागतम्' इति। आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदम्[1]। तथा च सूत्रितं—'तद्देवस्य घृतेन द्यावापृथिवी इति तिस्रः' (आश्व. श्रौ. ७. ७) इति ॥

तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्रचेतसः ।
छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्देवो अक्तुभिः ॥ १ ॥

तत् । देवस्य । सवितुः । वार्यम् । महत् । वृणीमहे । असुरस्य । प्रऽचेतसः ।
छर्दिः । येन । दाशुषे । यच्छति । त्मना । तत् । नः । महान् । उत् । अयान् । देवः । अक्तुऽभिः ॥ १ ॥

[v]सवितुः प्रेरकस्य [v]देवस्य [v]वार्यं वरणीयं [v]महत् पूज्यं [v]तत् धनं [v]वृणीमहे प्रार्थयामः । [v]असुरस्य । असुर्बलम् । तद्वतः [v]प्रचेतसः प्रकृष्टमतेः[2] । देवस्येति संबन्धः । [v]येन धनेन युक्तः सन् [v]छर्दिः । गृहनामैतत् । गृहोपलक्षितं धनजातं [v]दाशुषे हविर्दत्तवते यजमानाय [v]त्मना आत्मनैव [v]यच्छति [v]तत् [v]छर्दिः [v]महान् [v]देवः सविता [v]अक्तुभिः रात्रिभिः । एतदहामप्युपलक्षणम् । सर्वैः दिवसैः सर्वेषु दिवसेषु [v]नः अस्माकम् [v]उदयान् उद्यच्छतु करोत्वित्यर्थः । यद्वा । छर्दिरिति तेजोनाम। तत्तेज उद्यच्छत्विति ॥

दिवो धर्ता भुवनस्य प्रजापतिः पिशङ्गं द्रापिं प्रति मुञ्चते कविः ।
विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत्सविता सुम्नमुक्थ्यम् ॥ २ ॥

दिवः । धर्ता । भुवनस्य । प्रजाऽपतिः । पिशङ्गम् । द्रापिम् । प्रति । मुञ्चते । कविः ।
विऽचक्षणः । प्रथयन् । आऽपृणन् । उरु । अजीजनत् । सविता । सुम्नम् । उक्थ्यम् ॥ २ ॥

[v]दिवः द्युलोकस्य [v]धर्ता धारकः । न केवलं दिव एव अपि तु [v]भुवनस्य कृत्स्नस्यापि लोकस्य धर्ता [v]प्रजापतिः प्रजानां प्रकाशवृष्ट्यादिना पालयिता [v]कविः प्राज्ञो देवः [v]पिशङ्गं [v]द्रापिं हिरण्मयं कवचं [v]प्रति [v]मुञ्चते । आच्छादयति प्रत्युदयम् । [v]विचक्षणः विविधं द्रष्टा स एव देवः[3] [v]प्रथयन् प्रख्यापयन् तेजः [v]आपृणन् आपूरयन् परितः [v]उरु प्रभूतं [v]सुम्नं सुखम् [v]उक्थ्यं स्तुत्यम् [v]अजीजनत् उत्पादयति ॥

१. ख-ण-न-भ-ल–सावित्रं निविद्धानम्; स–सावित्रं निविद्धानीयम् । २. ख-ग-ण-भ-ल-स–प्रकृष्टतमः; घ–प्रकृष्टस्य; च–प्रकृष्टतमस्य । ३. प–देवः सविता ।

आप्रा रजाँसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।
प्र बाहू अस्राक्सविता सवीमनि निवेशयन्प्रसुवन्नक्तुभिर्जगत् ॥ ३ ॥

आ । अप्राः । रजाँसि । दिव्यानि । पार्थिवा । श्लोकम् । देवः । कृणुते । स्वाय । धर्मणे ।
प्र । बाहू इति । अस्राक् । सविता । सवीमनि ।
निऽवेशयन् । प्रऽसुवन् । अक्तुऽभिः । जगत् ॥ ३ ॥

अयं [v]देवः सविता [v]दिव्यानि द्युसंबन्धीनि [v]पार्थिवा पार्थिवानि[1] [v]रजांसि लोकान् । तिस्रः खलु[2] द्यावः पृथिव्यश्च । ' तिस्रो भूमीर्धारयन् त्रीरुत द्यून् ' (ऋ. सं. २. २७. ८) इति हि श्रुतम् । [v]आप्राः । आपूरयति स्वाभिर्भाभिर्देवः । [v]स्वाय [v]धर्मणे स्वकीयाय धारणाय [v]श्लोकं प्रशस्तिं [v]कृणुते करोति । [v]सविता [v]सवीमनि प्रसवेऽनुज्ञायां निमित्तायां [v]बाहू स्वीयौ [v]प्र [v]अस्राक् प्रसृजति । प्रसारयतीत्यर्थः । किं कुर्वन् । [v]अक्तुभिः कान्तिभिः [v]जगत् [v]निवेशयन् स्वस्वकार्ये स्थापयन् [v]प्रसुवन् प्रेरयन् । अथवा अक्तुभिरिति रात्रिनाम । तदुपलक्षितैः सर्वैर्वासरैः सर्वेष्वपि दिनेष्वेवं करोतीत्यर्थः ॥

अदाभ्यो भुवनानि प्रचाकशद्व्रतानि देवः सविताभि रक्षते ।
प्रास्राग्बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥ ४ ॥

अदाभ्यः । भुवनानि । प्रऽचाकशत् । व्रतानि । देवः । सविता । अभि । रक्षते ।
प्र । अस्राक् । बाहू इति । भुवनस्य । प्रऽजाभ्यः । धृतऽव्रतः । महः । अज्मस्य । राजति ॥ ४ ॥

[v]सविता [v]देवः [v]अदाभ्यः अन्यैरहिंसितः सन् [v]भुवनानि [v]प्रचाकशत् दीपयन् [v]व्रतानि कर्माणि प्राणिनाम् [v]अभि [v]रक्षते । [v]भुवनस्य लोकस्य [v]प्रजाभ्यः[3] तन्नित्याभ्यः[4] [v]बाहू स्वीयौ [v]प्रास्राक् प्रसारयति । स्वस्वकर्मणे अनुजानातीत्यर्थः[4] । सर्वव्यापाराणां सूर्याधीनत्वात् । ' सविता वै प्रसवानामीशे ' (ऐ. ब्रा. १. १६) इति हि श्रुतिः । [v]धृतव्रतः धृतकर्मा स तथा कुर्वन् [v]महः महतः [v]अज्मस्य जगतः [v]राजति ईश्वरो भवति ॥

त्रिरन्तरिक्षं सविता महित्वना त्री रजाँसि परिभूस्त्रीणि रोचना ।
तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना ॥ ५ ॥

त्रिः । अन्तरिक्षम् । सविता । महिऽत्वना । त्री । रजाँसि । परिऽभूः । त्रीणि । रोचना ।
तिस्रः । दिवः । पृथिवीः । तिस्रः । इन्वति । त्रिऽभिः । व्रतैः । अभि । नः । रक्षति । त्मना ॥ ५ ॥

१. त–पृथिवीसंबन्धीनि । २. ग-च-ण-भ–तु । ३. ख-प-भ-ल–प्रजाभ्यस्तत्प्रजाभ्यः; ग-च–प्रजापतयस्तत्प्रजाभ्यः; ण–प्राजापत्यस्तत्प्रजाभ्यः । ४. ख-ग-च-ण-प-भ––अनुज्ञापयतीत्यर्थः ।

अयं vसविता vत्रिः त्रिभेदम् vअन्तरिक्षम् । अन्तरा क्षान्तं भवति जगदित्यन्तरिक्षम् । vपरिभूः परिभविता[1] सन् vमहित्वना महित्वेन vइन्वति व्याप्नोति । ' वायुर्विद्युद्वरुणाख्या त्रयो लोका अन्तरिक्षभेदाः स वायुलोकं स वरुणलोकम् ' (कौ. उ. १. ३) इत्यादिश्रुतेः । vत्री vरजांसि रजनात्मकानि त्रीणि क्षित्यन्तरिक्षद्युलक्षणान् त्रीन् लोकान् इन्वति । पूर्वमन्तरिक्षस्यैवावान्तरभेद उक्तः इह तु सामान्याकारेणेत्यपुनरुक्तिः। vत्रीणि vरोचना रोचनानि रोचमानान् अग्निवाय्वादित्यान् उक्तस्थानत्रयस्वामित्वेन इन्वति । पूर्वमन्तरिक्षस्यैवावान्तरभेद उक्तः । अथ द्युपृथिव्योरवान्तरभेद उच्यते । vतिस्रो vदिवः इन्द्रप्रजापतिसत्याख्यान्[2] त्रीन् लोकान् इन्वति । तथा vतिस्रः vपृथिवीः इन्वति । क्षित्यवान्तरभेदान् लोकान् इन्वति । एवं सर्वत्र व्याप्तो देवः vत्रिभिर्व्रतैः कर्मभिः उष्णवर्षहिमाख्यैः vनः अस्मान् vत्मना आत्मनैव स्वीयानुग्रहबुद्ध्यैव vअभि vरक्षति अभिरक्षतु । परिपालयतु ॥

बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो वशी ।
स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय त्रिवरूथमंहसः ॥ ६ ॥

बृहत्ऽसुम्नः । प्रऽसविता । निऽवेशनः । जगतः । स्थातुः । उभयस्य । यः । वशी ।
सः । नः । देवः । सविता । शर्म । यच्छतु । अस्मे इति । क्षयाय । त्रिऽवरूथम् । अंहसः॥६॥

यः vबृहत्सुम्नः प्रभूतधनः प्रभूतसुखो[3] वा[3] vप्रसविता प्रकर्षेणानुज्ञाता कर्मणां vनिवेशनः सर्वैर्गन्तव्यः । vजगतः जङ्गमस्य vस्थातुः स्थावरस्य vउभयस्य vयो vवशी vसः महान् vसविता vदेवः vनः अस्मभ्यं vशर्म सुखं vयच्छतु । कीदृशं शर्म । vत्रिवरूथम् । त्रीणि वरूथानि गृहाणि स्थानानि क्षित्यादीनि यस्य तत्तादृशम् । vअस्मे अस्माकम् vअंहसः पापस्य vक्षयाय भवत्विति शेषः ॥

राजक्रये ' आगन्देवः ' इत्येषानुवचनीया । सूत्रितं च–' आगन्देव ऋतुभिर्वर्धतु क्षयमित्यर्धर्चं आरमेत् ' (आश्व. श्रौ. ४. ४) इति ॥

आगन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषम् ।
स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतु ॥ ७ ॥

आ । अगन् । देवः । ऋतुऽभिः । वर्धतु । क्षयम् । दधातु । नः । सविता । सुऽप्रजाम् । इषम् ।
सः । नः । क्षपाभिः । अहऽभिः । च । जिन्वतु ।
प्रजाऽवन्तम् । रयिम् । अस्मे इति । सम् । इन्वतु ॥ ७ ॥

vदेवः vसविता vऋतुभिः सह vआगन् आगच्छतु ॥ गमेर्लङि रूपम् ॥ किंच vक्षयं गृहं vवर्धतु वर्धयतु । vनः अस्माकं vसुप्रजां शोभनपुत्राद्युपेतम् vइषम् अन्नं vदधातु ददातु । vसः एव

---

१. ख-प-फ-भ–परितो भविता । २. ख-भ– अग्नीन्द्रप्रजापतिसत्याख्यान् ; फ–अग्नीन्द्रप्रजापतिरित्याख्यान् । ३. ख-ग-च-ण-भ–' प्रभूतसुखो वा ' नास्ति ।

vनः अस्मान् vक्षपाभिः रात्रिभिः vअहभिश्च । सर्वेषु दिनेष्वित्यर्थः । vजिन्वतु प्रीणयतु धनादिभिः[1]। vअस्मे अस्मासु vप्रजावन्तं vरयिं vसमिन्वतु व्याप्नोतु । प्रापयत्वित्यर्थः ॥ ॥ ४ ॥

' अभूद्देवः ' इति षड्ऋचं नवमं सूक्तं वामदेवस्यार्षं सावित्रम् । अन्त्या त्रिष्टुप् शिष्टास्त्रिष्टुबन्त-परिभाषया जगत्यः । तथा चानुक्रमणिका—'अभूद्देवः षट् त्रिष्टुबन्तम् ' इति । अग्निष्टोमे वैश्वदेव-शस्त्रे सावित्रनिविद्धानमिदम्[2] । तथा च सूत्रम्—' अभूद्देव एकया च दशभिश्च स्वभूते ' (आश्व. श्रौ. ५. १८) इति । आद्या सावित्रग्रहस्यानुवाक्या । तथा च सूत्रं—' सावित्रेण ग्रहेण चरन्त्यभूद्देवः सविता वन्द्यो नु नः ' (आश्व. श्रौ. ५. १८) इति ॥

अभूद्देवः सविता वन्द्यो नु न इदानीमह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥ १ ॥

अभूत् । देवः । सविता । वन्द्यः । नु । नः । इदानीम् । अह्नः । उपऽवाच्यः । नृऽभिः ।
वि । यः । रत्ना । भजति । मानवेभ्यः । श्रेष्ठम् । नः । अत्र । द्रविणम् । यथा । दधत् ॥ १ ॥

सः vसविता vदेवः vअभूत् प्रादुरासीत् । अतः vनु क्षिप्रमेव vनः अस्माकं vवन्द्यः वन्दनीयो भवति । vइदानीं यागकाले vअह्नः तृतीयसवने vनृभिः अस्मदीयैर्होतृभिः vउपवाच्यः स्तुत्यः[3] भवति। vयः देवः vमानवेभ्यः[4] मनोरपत्येभ्यो यजमानेभ्यस्तेषामर्थाय vरत्ना रमणीयानि धनानि vवि vभजति स देवः vश्रेष्ठं प्रशस्यं vद्रविणं गवादिलक्षणं धनं vनः अस्मभ्यम्[5] vअत्र अस्मिन् कर्मणि vयथा vदधत् दद्यादित्यर्थः । तथा वन्द्य उपवाच्यश्चाभूदिति ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ २ ॥

देवेभ्यः । हि । प्रथमम् । यज्ञियेभ्यः । अमृतऽत्वम् । सुवसि । भागम् । उत्ऽतमम् ।
आत् । इत् । दामानम् । सवितः । वि । ऊर्णुषे । अनूचीना । जीविता । मानुषेभ्यः ॥२॥

vप्रथमं vदेवेभ्यो vहि । हिशब्दः प्रसिद्धौ। देवेभ्यः vयज्ञियेभ्यः यज्ञार्हेभ्यः vअमृतत्वं तत्साधनम् vउत्तमम् उत्कृष्टतमं vभागं सोमादिलक्षणं[6] vसुवसि अनुजानासि। vआदित् अनन्तरमेव vदामानं हविषां दातारं हे vसवितः vव्यूर्णुषे प्रकाशयसि। vमानुषेभ्यः यजमानेभ्यः vजीविता जीवितानि vअनूचीना अनुक्रमयुक्तानि । पितृपुत्रपौत्रा इत्यनुक्रमः । ईदृशानि जीवितानि पश्चात् व्यूर्णुषे ॥

१. ख-ग-घ-च-ण-त-प-फ-भ-ल-स–धनानि । २. ख-फ–सावित्रं निविद्धानमिदम् ; स–°निविद्धानीय-मिदम् । ३. त–स्तुत्यश्च । ४. ण– मानवेभ्यो यज्ञियेभ्यः । ५. ख-ग-च-ण-न-भ–अस्माकम् । ६. त–सोमाज्यादिलक्षणम् ।

अचित्ती यच्चकृमा दैव्ये जनें दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥ ३ ॥

अचित्ती । यत् । चकृम । दैव्ये । जने । दीनैः । दक्षैः । प्रऽभूती । पुरुषत्वता ।
देवेषु । च । सवितः । मानुषेषु । च । त्वम् । नः । अत्र । सुवतात् । अनागसः ॥ ३ ॥

हे सवितः वयम् अचित्ती अप्रज्ञया दैव्ये जने देवे त्वयि दीनैः दुर्बलैः पुत्रादिभिर्ऋत्विग्भिर्वा तथा दक्षैः प्रवृद्धैर्वा तैः प्रभूती प्रभूत्या । ऐश्वर्यमदेनेति यावत् । पुरुषत्वता पुरुषवत्तया च यत् आगः चकृम । न केवलं त्वय्येव कृतम् अपि तु देवेषु अन्येषु । मानुषेषु च अज्ञानादिभिः[1] यच्चकृम नः कृतवतोऽस्मान् त्वम् अत्र अस्मिन् कर्मणि अनागसः अपापान्[2] सुवतात् अनुजानीहि ॥

देवसुवां हविःषु सवितुः सत्यप्रसवस्य ' न प्रमिये ' इति याज्या । सूत्रितं[3] च—' न प्रमिये सवितुर्दैव्यस्य तद्बृहस्पते प्रथमम् ' (आश्व. श्रौ. ४. ११) इति ॥

न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति ।
यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥ ४ ॥

न । प्रऽमिये । सवितुः । दैव्यस्य । तत् । यथा । विश्वम् । भुवनम् । धारयिष्यति ।
यत् । पृथिव्याः । वरिमन् । आ । सुऽअङ्गुरिः ।
वर्ष्मन् । दिवः । सुवति । सत्यम् । अस्य । तत् ॥ ४ ॥

सवितुर्दैव्यस्य देवस्य तत् कर्म न प्रमिये न प्रमीयेत न प्रहिंस्येत । हिंसार्हं न भवतीत्यर्थः ॥ कृत्यार्थे केन्प्रत्ययः ॥ यद्वा । दैव्यस्येति अधिकरणे[4] षष्ठी । सा च कर्मार्था । दैव्यं कर्मेत्यर्थः । कथमहिंस्यमित्यत आह । यथा विश्वं भुवनं धारयिष्यति धारयति । विश्वधारणरूपं यत् कर्मास्ति तन्न प्रमिये । तथा स्वङ्गुरिः शोभनाङ्गुल्युपलक्षितहस्तः यत्[5] यः[6] पृथिव्या वरिमन्ना । आकारश्चार्थे । भूम्या उरुत्वे च सुवति प्रेरयति । तथा दिवः द्युलोकस्य वर्ष्मन् उरुत्वे च सुवति । अस्य देवस्य तत् उक्तं कर्म सत्यम् अबाध्यमिति ॥

---

१. ल–तथाज्ञानादिभिः । २. न-ल-स–' अपापान् ' नास्ति । ३. त–तथा च सूत्रम् । ४. त–व्यधिकरणे । ५. ख-ग-च-ण-भ-ल-स– यः; त–यम्; न-यत् । ६. न-ल-स–' प्रेरयति ' नास्ति ।

इन्द्रंज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।
यथायथा पतयन्तो वियेमिर एवैव तस्थुः सवितः सवाय ते ॥ ५ ॥

इन्द्रंऽज्येष्ठान् । बृहत्ऽभ्यः । पर्वतेभ्यः । क्षयान् । एभ्यः । सुवसि । पस्त्यंऽवतः ।
यथाऽयथा । पतयन्तः । विऽयेमिरे । एव । एव । तस्थुः । सवितरिति । सवाय । ते ॥ ५ ॥

हे [v]सवितः [v]इन्द्रज्येष्ठान् । इन्द्रः परमैश्वर्ययुक्तस्त्वमेवेन्द्रो वा ज्येष्ठो ज्यायान् पूज्यो येषां ते तादृशाः । तान् अस्मान् [v]बृहद्भ्यः महद्भ्यः [v]पर्वतेभ्यः अप्यधिकान् [v]सुवसि प्रेरयसि । किंच [v]एभ्यः यजमानेभ्यः [v]पस्त्यावतः गृहवतः [v]क्षयान् निवासान् ग्रामनगरादीन्[1] सुवसि प्रेरयसि । [v]यथा-यथा [v]पतयन्तः गच्छन्तः[2] स्वां[3] [v]वियेमिरे विनियम्यन्ते स्वया । [v]ते[4] तव [v]सवाय अनुज्ञायै [v]एवैव एवमेव नियमनमनतिक्रम्य [v]तस्थुः तिष्ठन्ति ॥

ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।
इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥ ६ ॥

ये । ते । त्रिः । अहन् । सवितरिति । सवासः । दिवेऽदिवे । सौभगम् । आऽसुवन्ति ।
इन्द्रः । द्यावापृथिवी इति । सिन्धुः । अत्ऽभिः ।
आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ ६ ॥

[v]ये यजमाना हे [v]सवितः [v]ते स्वदर्थं [v]सवासः सवाः सोमाः । द्वितीयार्थे प्रथमा । सोमान् । यद्वा । सवासः सवनानि प्रातरादीनि प्रति [v]त्रिरहन् अभिषुण्वन्ति । न केवलमेकस्मिन्नेवाहनि सवनत्रयेषु अपि तु [v]दिवेदिवे प्रतिदिनं [v]सौभगं सौभाग्यजनकम् [v]आसुवन्ति अभिषुण्वन्ति । तेभ्यः [v]नः अस्मभ्यम् [v]इन्द्रः [v]शर्म [v]यंसत् यच्छतु । [v]द्यावापृथिवी[5] द्यावापृथिव्यौ च [v]अद्भिः विशिष्टा [v]सिन्धुः सिन्ध्वभिमानिदेवता च [v]आदित्यैः सहिता [v]अदितिः च शर्म यंसत् । सावित्रे सूक्ते इन्द्रादीनां निपातमुक्त्वा[6] तेषां प्रार्थना न विरुध्यते ॥ ॥ ५ ॥

' को वस्त्राता ' इति दशर्चं दशमं सूक्तं वामदेवस्यार्षं विश्वदेवदेवताकम्[7] । अष्टम्याद्यास्तिस्रो गायत्र्यः शिष्टा अनादेशपरिभाषया त्रिष्टुभः । तथा चानुक्रम्यते—' को वो दश वैश्वदेवं त्रिगायत्र्यन्तं तु ' इति । विनियोगो लैङ्गिकः ॥

---

१. ख-ग-ण-संग्रामान् जगद्वीरादीन्; स-संग्रामान् संगरादीन् । २. ख-ग-च-ण-प-भ-गच्छन्तः प्राणिनः । ३. ख-ग-च-ण-भ-त्वया । ४. प-तथा ते । ५. न-ल-स-' द्यावापृथिवी ' नास्ति । ६. त-निपातभाक्त्वात्; प-निपातमुक्त्वक्तत्वात् । ७. ख-ग-च-ण-त-न-भ-ल-स-विश्वेदेवदेवताकम् ।

को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः।
सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ॥ १ ॥

कः। वः। त्राता। वसवः। कः। वरूता। द्यावाभूमी इति। अदिते। त्रासीथाम्। नः।
सहीयसः। वरुण। मित्र। मर्तात्। कः। वः। अध्वरे। वरिवः। धाति। देवाः ॥ १ ॥

हे [v]वसवः सर्वस्य वासयितारो देवाः [v]वः युष्मान् [v]कः [v]त्राता अस्ति। यतो यूयं वसवोऽत इत्यभिप्रायः। [v]कः[1] च [v]वरूता संभक्तास्ति। यद्वा। वो युष्माकं मध्ये कस्त्राता रक्षको देवः कश्च वरूता[2] वारयिता दुःखानां वरणीयो वा भवति। हे [v]द्यावाभूमी [v]नः अस्मान् [v]त्रासीथां रक्षतम्। हे [v]अदिते अखण्डनीये। एतदपि द्यावाभूम्योर्विशेषणम्। संख्याव्यत्ययः। यदीदं पृथग्देवतामन्त्रणं[3] स्यात् तर्हि निघातो न स्यात्। 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्याविद्यमानवत्त्वेनास्यैव पादादित्वात्। 'अदिते मित्र वरुणोत मृळ' (ऋ. सं. २. २७. १४) इति, 'आदित्या रुद्रा वसवः सुदानवः' (ऋ. सं. १०. ६६. १२) इतिवत्[4]। तस्यैव विशेषणत्वे समानाधिकरणे[5] इति सामानाधिकरण्यात्[5] 'अग्ने पावक रोचिषा' (ऋ. सं. ५. २६. १) इतिवत् अस्य निघातः सिध्यति। तस्मात् द्यावाभूमी इत्येतस्य विशेषणम्। हे [v]वरुण हे [v]मित्र युवां [v]सहीयसः [v]मर्तात् अभिभवितुः मनुष्यात् नस्त्रासीथाम्। हे [v]देवाः [v]वः युष्माकम् [v]अध्वरे यागे [v]कः [v]वरिवः धनं [v]धाति ददाति। यद्वा। वो युष्माकं मध्ये को वरिवो धाति[6] धारयति[6] ॥

प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो अमूराः।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ॥ २ ॥

प्र। ये। धामानि। पूर्व्याणि। अर्चान्। वि। यत्। उच्छान्। वियोतारः। अमूराः।
विधातारः। वि। ते। दधुः। अजस्राः। ऋतधीतयः। रुरुचन्त। दस्माः ॥ २ ॥

[v]ये देवाः [v]पूर्व्याणि पुरातनानि [v]धामानि स्थानानि वा [v]प्र [v]अर्चान् अर्चन्ति प्रयच्छन्ति स्तोतृभ्यः। [v]यत् ये च [v]वियोतारः दुःखानाम् अमिश्रयितारः[7] [v]अमूराः अमूढाः [v]वि [v]उच्छान् उच्छन्ति तमो विवासयन्ति देवाः। ते [v]विधातारः फलानां कर्तारः [v]अजस्राः नित्याः [v]वि [v]दधुः कुर्वन्त्यभिमतम्। किंच [v]ऋतधीतयः सत्यकर्माणः [v]दस्माः दर्शनीयाः [v]ते [v]रुरुचन्त रोचन्ते ॥

१. ख-ग-च-ण-प-भ-ल-स-'कः.....वरूता' नास्ति। २. ख-ग-ण-प-फ-भ-स-संचारयिता; च-संचरयिता; ल-संचरयिता। ३. ख-ग-च-ण-भ-ल-°मन्त्रेण; स-°मन्त्रणे। ४. चेतिवत्। ५. ख-ग-च-ण-समानाधिकरणे इति समानाधिकरणं यत्; त-नामन्त्रिते समानाधिकरणे इति अविद्यमानवत्त्वप्रतिषेधात्। ६. प-भ-धनं धाति ददाति तं रक्षत। ७. ख-ग-च-ण-न-भ-ल-स-आश्रयितारः; घ-नाशयितारः।

प्र पस्त्याऽमदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।
उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे ॥ ३ ॥

प्र । पस्त्याम् । अदितिम् । सिन्धुम् । अर्कैः । स्वस्तिम् । ईळे । सख्याय । देवीम् ।
उभे इति । यथा । नः । अहनी इति । निऽपातः ।
उषसानक्ता । करताम् । अदब्धे इति ॥ ३ ॥

vपस्त्यां सर्वैर्गन्तव्याम् vअदितिम्[1] अदीनां देवमातरं तां vदेवीं vसिन्धुं स्यन्दनशीलां नद्यभिमानिदेवीं vस्वस्तिं सुखनिवासामेतन्नामिकां देवीं vसख्याय आनुकूल्याय vअर्कैः मन्त्रैः vईळे[2] स्तौमि[3]। vउभे vअहनी द्यावापृथिव्यौ vयथा vनः अस्मान् vनिपातः नितरां पातः तथा स्तौमि । vउषासानक्ता अहोरात्राभिमानिदेवते vअदब्धे अदम्भनीये vकरतां कुरुताम् । अभिमतमिति शेषः ॥

व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।
इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तमर्मवद्वरूथम् ॥ ४ ॥

वि । अर्यमा । वरुणः । चेति । पन्थाम् । इषः । पतिः । सुवितम् । गातुम् । अग्निः ।
इन्द्राविष्णू इति । नृऽवत् । ऊँ इति । सु । स्तवाना ।
शर्म । नः । यन्तम् । अमऽवत् । वरूथम् ॥ ४ ॥

vअर्यमा देवः अस्माकं vपन्थां यज्ञादिमार्गं vवि vचेति ज्ञापयति । तथा vवरुणः वि चेति। vइषः अन्नस्य हविर्लक्षणस्य vपतिः पालकः vअग्निः vसुवितं सुखकरं vगातुं गमनं मार्गं वा स्वर्गादेः वि चेति । vइन्द्राविष्णू vसु सुष्ठु vस्तवाना स्तूयमानौ vनृवत् मनुष्यवत् मनुष्योपेतं vवरूथं वरणीयम् vअमवत् बलोपेतं vशर्म गृहं सुखं वा vनः अस्माकं vयन्तं यच्छतम् । vउ पूरणः ॥

आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरवि भगस्य ।
पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत नो उरुष्येत् ॥ ५ ॥

आ । पर्वतस्य । मरुताम् । अवांसि । देवस्य । त्रातुः । अवि । भगस्य ।
पात् । पतिः । जन्यात् । अंहसः । नः । मित्रः । मित्रियात् । उत । नः । उरुष्येत् ॥५॥

---

१. त–अदितिमदीतिम् । २. ख-ग-च-ण-भ–च ईळे; घ-प–प्र ईळे । ३. ख-ग-ण–प्रास्तोति; च–प्रास्तोदिति; न–'स्तौमि' नास्ति ; भ–प्रस्तौमि; स–स्तौति ।

vपर्वतस्य इन्द्रसखस्य[1] एतन्नामकस्य vदेवस्य vमरुतां च vत्रातुः रक्षकस्य vभगस्य देवस्य च vअवांसि रक्षणानि vआ vअघ्रि आवृणे । किंच vपतिः वरुणो देवः vजन्यात् जनसंबन्धात् vअंहसः पापात् vनः अस्मान् vपात् पातु रक्षतु । vउत अपि च vमित्रः च vमित्रियात् मित्रभावेन vनः अस्मान् vउरुष्येत् रक्षतु ॥ ॥ ६ ॥

नू रोदसी अहिना बुध्येन स्तुवीत देवी अप्येभिरिष्टैः ।
समुद्रं न संचरणे सनिष्यवो धर्मस्वरसो नद्योऽ३ अप व्रन् ॥ ६ ॥

नु । रोदसी इति । अहिना । बुध्न्येन । स्तुवीत । देवी इति । अप्येभिः । इष्टैः ।
समुद्रम् । न । सम्ऽचरणे । सनिष्यवः । धर्मऽस्वरसः । नद्यः । अप । व्रन् ॥ ६ ॥

हे[2] vरोदसी द्यावापृथिव्यौ युवाम् vअहिना vबुध्न्येन अहिर्बुध्न्यनामकेन देवेन सह vनु क्षिप्रम् vअप्येभिः आपनीयैः vइष्टैः कामैर्निमित्तभूतैः vस्तुवीत स्तुवे । vसनिष्यवः धनानां संभक्तुमिच्छन्तः vसंचरणे संचाराय समुद्रमध्यगमनाय vसमुद्रं[3] vन[3] समुद्रमिव । नं यथा स्तुवन्ति तद्वत् । यस्मादेते देवाः vधर्मस्वरसः दीप्तध्वनयः vनद्यः नदीः vअप vव्रन् अपवृण्वन्तीति परोक्ष इव । अथवा ते देवा नदीरपवृण्वन्तु इत्याशीः । तस्मात् स्तुवे इति संबन्धः ॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सानवग्नेः ॥ ७ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायताम् । अप्रऽयुच्छन् ।
नहि । मित्रस्य । वरुणस्य । धासिम् । अर्हामसि । प्रऽमियम् । सानु । अग्नेः ॥ ७ ॥

vअदितिः[4] vदेवी अदीना देवमाता vदेवैः अन्यैर्मित्रादिभिः सह vनः अस्मान् vनि vपातु पालयतु[4] । तथा[4] vत्राता पालकः vदेवः[4] । इन्द्रः इत्यर्थः । सोऽपि vअप्रयुच्छन् अप्रमाद्यन् vत्रायताम् । वयं च vमित्रस्य vवरुणस्य vअग्नेः च vसानु समुच्छ्रितं vधासिम् अन्नं सोमादिलक्षणं vप्रमियं हिंसितुं vनहि vअर्हामसि अर्हामः । समर्था भवामः । किंत्वनुष्ठानेन संवर्धितुम् अर्हाम[5] इत्यर्थः[6] ॥

अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य । तान्यस्मभ्यं रासते ॥ ८ ॥

अग्निः । ईशे । वसव्यस्य । अग्निः । महः । सौभगस्य । तानि । अस्मभ्यम् । रासते ॥ ८ ॥

१. ख-ग-च-ण-न-फ-भ-ल-स- अद्रेः सखस्य । २. प-देवी द्योतमाने हे । ३. ख-ग-च-ल- 'समुद्रं न' नास्ति । ४. च-फ- देवी द्योतमाना अदितिर्देवैः सह नोऽस्मान् निपातु रक्षतु । ५. ख-ण-भ-ल-स-तथा पालको देवः; च-फ-देवस्त्राता त्रायतां स च । ६. क-ख-ग-घ-च-ण-त-न-भ-ल- अर्हामेत्यर्थः ।

[v]अग्निः देवः [v]वसव्यस्य धनसमूहस्य [v]ईशे ईष्टे दातुम्। तथा [v]अग्निः [v]महः महतः [v]सौभगस्य सुभगत्वस्यापि ईशे। अतः [v]तानि धनानि सौभाग्यं च [v]अस्मभ्यं [v]रासते ददातु ॥

उषो मघोन्या वह सूनृते वार्या पुरु। अस्मभ्यं वाजिनीवति ॥ ९ ॥

उषः। मघोनि। आ। वह। सूनृते। वार्या। पुरु। अस्मभ्यम्। वाजिनीऽवति ॥ ९ ॥

हे [v]उषः हे [v]मघोनि धनवति हे [v]सूनृते प्रियसत्यरूपवागभिमानिनि हे [v]वाजिनीवति अन्नवति देवि [v]अस्मभ्यं [v]वार्या वरणीयानि [v]पुरु बहूनि धनानि [v]आ [v]वह प्रापय ॥

तत्सु नः सविता भगो वरुणो मित्रो अर्यमा।
इन्द्रो नो राधसा गमत् ॥ १० ॥

तत्। सु। नः। सविता। भगः। वरुणः। मित्रः। अर्यमा।
इन्द्रः। नः। राधसा। आ। गमत् ॥ १० ॥

येन [v]राधसा धनेन सह [v]सविता [v]भगो [v]वरुणो [v]मित्रोऽर्यमा [v]इन्द्रः प्रत्येकम् [v]आ [v]गमत् आगच्छति[1] यज्ञम्। [v]तत् राधो धनं ते देवाः [v]नः अस्मभ्यं [v]सु सुष्ठु प्रयच्छन्विति शेषः ॥ ॥ ७ ॥

' मही द्यावापृथिवी ' इति सप्तर्चमेकादशं सूक्तं वामदेवस्यार्षं द्यावापृथिव्यम्। पूर्वत्र ' त्रिगायत्र्यन्तं तु ' इत्युक्तत्वात् पञ्चम्याद्यास्तिस्रो गायत्र्यः शिष्टास्त्रिष्टुभः। ' मही सप्त द्यावापृथिवीयम् ' इत्यनुक्रमणिका। व्यूढे दशरात्रे पञ्चमेऽहनि वैश्वदेवशस्त्रे आदितश्चतुर्ऋचं द्यावापृथिव्यनिविद्धानीयम्। तथा च सूत्रितं–' मही द्यावापृथिवी इति चतस्र ऋभुर्विभ्वा ' (आश्व. श्रौ. ८. ८) इति ॥

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः।
यत्सीं वरिष्ठे बृहती विमिन्वन्रुवद्दोक्षा पप्रथानेभिरेवैः ॥ १ ॥

मही इति। द्यावापृथिवी इति। इह। ज्येष्ठे इति। रुचा। भवताम्। शुचयत्ऽभिः। अर्कैः।
यत्। सीम्। वरिष्ठे इति। बृहती इति। विऽमिन्वन्।
रुवत्। ह। उक्षा। पप्रथानेभिः। एवैः ॥ १ ॥

[v]इह यज्ञे [v]मही महत्यौ [v]ज्येष्ठे प्रशस्ये [v]द्यावापृथिवी द्यावापृथिव्यौ [v]रुचा दीप्त्या युक्ते [v]शुचयद्भिः दीपयद्भिः [v]अर्कैः मन्त्रैः सोमादिहविर्भिर्वा युक्ते [v]भवताम्। [v]यत् यस्मात् [v]सीं सर्वतः [v]वरिष्ठे उरुतरे [v]बृहती महत्यौ द्यावापृथिव्यौ [v]विमिन्वन् परिच्छिन्दन् स्थापयन् [v]उक्षा सेक्ता पर्जन्यः

१. ख-ग-च-ण-न-फ-भ-ल– आगच्छन्ति।

vपप्रथानेभिः प्रथमानैः vएवैः गमनशीलैर्मरुद्भिर्मेधैर्वा सह vरुवत् रौति शब्दं करोति। vह इति पूरणः। तस्मादृचा भवतामिति संबन्धः॥

देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे।
ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः॥ २॥

देवी इति। देवेभिः। यजते इति। यजत्रैः। अमिनती इति। तस्थतुः। उक्षमाणे इति।
ऋतवरी इत्यृतऽवरी। अद्रुहा। देवपुत्रे इति देवऽपुत्रे।
यज्ञस्य। नेत्री इति। शुचयत्ऽभिः। अर्कैः॥ २॥

vदेवी देव्यौ vयजते यष्टव्ये vअमिनती प्रजा अहिंसत्यौ vउक्षमाणे सिञ्चत्यौ vऋतावरी ऋतवत्यौ[1] vअद्रुहा अद्रोग्ध्र्यौ द्रोहमकुर्वत्यौ vदेवपुत्रे देवोत्पादिक्यौ vयज्ञस्य vनेत्री निर्वाहयित्र्यौ द्यावापृथिव्यौ vदेवेभिः देवैः vयजत्रैः यष्टव्यैः सहिते vशुचयद्भिः शोचयद्भिः[2] vअर्कैः मन्त्रैः[3] हविर्भिर्वा युक्ते vतस्थतुः तिष्ठतः स्यातामित्यर्थः॥

स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान।
उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत्॥ ३॥

सः। इत्। सुऽअपाः। भुवनेषु। आस। यः। इमे इति। द्यावापृथिवी इति। जजान।
उर्वी इति। गभीरे इति। रजसी इति। सुमेके इति सुऽमेके।
अवंशे। धीरः। शच्या। सम्। ऐरत्॥ ३॥

vस vइत् स एव vस्वपाः शोभनकर्मा सन् vभुवनेषु vआस आस्ते। vय vइमे vद्यावापृथिवी द्यावापृथिव्यौ vजजान उत्पादितवान्। यश्च प्रजापतिः vउर्वी उर्व्यौ विस्तीर्णे vगभीरे अविचले vसुमेके शोभनरूपे[4] vअवंशे उत्पत्तिरहिते अनाधारे वान्तरिक्षे vधीरः धीमान् vशच्या कुशलकर्मणा vसमैरत् सम्यक् प्रेरितवान्। स एव स्वपा इति॥

नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः॥ ४॥

नु। रोदसी इति। बृहत्ऽभिः। नः। वरूथैः। पत्नीवत्ऽभिः। इषयन्ती इति। सऽजोषाः।
उरूची इति। विश्वे इति। यजते इति। नि। पातम्। धिया। स्याम। रथ्यः। सदाऽसाः॥४॥

---

१. ख-ग-च-ण-प-फ-भ-सत्यवत्यौ। २. प-दीपयद्भिः। ३. प-अर्चनीयैः। ४. प-शोभनरूपे रजसी भुवने।

हे vरोदसी द्यावापृथिव्यौ vनु क्षिप्रं vपत्नीवद्भिः पत्नीसहितैः vबृहद्भिः महद्भिः vवरूथैः गृहैर्धनैर्वा सह vइषयन्ती अस्माकमन्नमिच्छन्त्यौ vसजोषाः परस्परं संगते vउरूची उर्वञ्चने vविश्वे व्याप्ते vयजते यष्टव्ये सत्यौ vनः अस्मान् vनि vपातं नितरां रक्षतम्। धियेत्यादि[१] गतम्[१] ॥

'प्र वाम्' इत्यादिगायत्रस्तृचो व्यूढे[२] दशरात्रे वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानीयत्वेन प्रक्षेप्यः। तथा च सूत्रितं—'प्र वां महि द्यवी इति तृचौ' (आश्व. श्रौ. ८. ११) इति ॥

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ॥ ५ ॥

प्र। वाम्। महि। द्यवी इति। अभि। उपऽस्तुतिम्। भरामहे।

शुची इति। उप। प्रऽशस्तये ॥ ५ ॥

हे द्यावापृथिव्यौ vद्यवी द्योतमाने vवां युवाभ्याम् vउपस्तुतिं स्तोत्रं vमहि महत् प्रभूतम् vअभि vप्र vभरामहे प्रकर्षेण संपादयामः। vशुची शुद्धे युवां vप्रशस्तये प्रशंसितुम् vउप। उपसर्गश्रुतेरुचित-क्रियाध्याहारः। उप गच्छाम इति शेषः ॥

पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ॥ ६ ॥

पुनाने इति। तन्वा। मिथः। स्वेन। दक्षेण। राजथः।

ऊह्याथे इति। सनात्। ऋतम् ॥ ६ ॥

हे देव्यौ vतन्वा स्वकीयया मूर्त्या vस्वेन vदक्षेण बलेन च vमिथः प्रत्येकं vपुनाने शोधयन्त्यौ यज्ञं यजमानं वा युवां vराजथः[३]। यद्वा। तन्वा स्वस्वशरीरैकदेशेन[४] मिथः परस्परं पुनाने शोध-यन्त्यौ। द्यौः स्वीयेनासारेण भुवं सा च स्वकीयेन काण्व्येन चन्द्रमसि स्थितेन दिवम् इति विवेकः। vसनात् सदाकालम् vऋतं यज्ञम् vऊह्याथे वहथः ॥

मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं नि षेदथुः ॥ ७ ॥

मही इति। मित्रस्य। साधथः। तरन्ती इति। पिप्रती इति। ऋतम्।

परि। यज्ञम्। नि। सेदथुः ॥ ७ ॥

vमही महत्यौ द्यावापृथिव्यौ vमित्रस्य मित्रभूतस्य स्तोतुरभिमतं vसाधथः[५]। vऋतम् अन्नं vतरन्ती तारयन्त्यौ vपिप्रती पूरयन्त्यौ vयज्ञं vपरि परितः vनि vषेदथुः आश्रयथः[६] ॥ ॥ ८ ॥

'क्षेत्रस्य पतिना' इत्यष्टर्चं द्वादशं सूक्तं वामदेवस्यार्षम्। आद्याचतुर्थीषष्ठीसप्तम्योऽनुष्टुभः पञ्चमी पुरउष्णिक्। 'आद्यक्षेरपुरउष्णिक्' इति हि तल्लक्षणम्। शिष्टास्तिस्रस्त्रिष्टुभः। आद्यास्तिस्रः

---

१. प–रथ्यः रथवन्तो वयं धिया स्तुत्या सदासाः त्वां सर्वदा भजमानाः स्याम भूयास्म। २. त–व्यूळ्हे। ३. त–राजथः ईशाने भवतः। ४. ख-ग-च-फ–स्वस्वशरीरैक्यादिना। ५. त–साधथः साधयथः। ६. ख-न-ल-स–आश्रयतः।

क्षेत्रपतिदेवताकाश्चतुर्थी शुनाख्यदेवताका पञ्चम्यष्टम्यौ शुनासीरदेवताके षष्ठीसप्तम्यौ सीतादेवताके । तथा चानुक्रमणिका–' क्षेत्रस्याष्टौ तिस्रः क्षैत्रपत्याः शुनायैका परा पुरउष्णिक् सान्त्या च शुनासीराभ्यामुपान्त्ये सीतायै ते[1] अनुष्टुभावाद्या च चतुर्थी च ' इति ॥ क्षेत्रस्य कर्पणेऽनेन सूक्तेन प्रत्यृचं जुहुयाज्जपेद्वा । तथा च सूत्रितं—' क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयाज्जपेद्वा ' (आश्व. गृ. २. १०. ४) इति ॥ अग्नेर्याम्ये होतुरतिरिक्तोक्थ्य आश्विनशस्त्रादूर्ध्वं चत्वार्यतिरिक्तोक्थ्यानि । तत्राद्या परिधानीया । सूत्रितं च–' क्षेत्रस्य पतिना वयमिति परिधानीया ' (आश्व. श्रौ. ९. ११) इति ॥

क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।
गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥ १ ॥

क्षेत्रस्य । पतिना । वयम् । हितेनऽइव । जयामसि ।
गाम् । अश्वम् । पोषयित्नु । आ । सः । नः । मृळाति । ईदृशे ॥ १ ॥

[v]वयं यजमानाः [v]क्षेत्रस्य [v]पतिना देवेन ॥ रुद्रं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे । स्वतन्त्र एव वा कश्चित्क्षेत्रस्य पतिरुच्यते ॥ [v]हितेनेव । इव शब्द एवार्थे । सर्वप्राणिहितेनैव तेन । अथवा मित्रेणेव[2] । यथा सख्युः साहाय्ये[3] सन्[3] स्वकार्यं साधयति तद्वत् । [v]जयामसि । जयामः क्षेत्रम् । स देवः [v]गामश्वं च [v]पोषयित्नु पोषयितृ गवाश्वलक्षणं धनम् [v]आ हरत्विति शेषः । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । [v]सः एव देवः [v]नः अस्मान् [v]ईदृशे उक्तलक्षणे धने दातव्ये सति [v]मृळाति सुखयति । ' क्षेत्रस्य[4] पतिना ' (निरु. १०. १५) इत्यादिनिरुक्तं जानीयात् ॥

अग्नेर्याम्ये मैत्रावरुणस्यातिरिक्तोक्थ्ये परिधानीया । सूत्रितं च–' क्षेत्रस्य पते मधुमन्तमूर्मिमिति परिधानीया ' (आश्व. श्रौ. ९. ११) इति ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥ २ ॥

क्षेत्रस्य । पते । मधुऽमन्तम् । ऊर्मिम् । धेनुःऽइव । पयः । अस्मासु । धुक्ष्व ।
मधुऽश्चुतम् । घृतम्ऽइव । सुऽपूतम् । ऋतस्य । नः । पतयः । मृळयन्तु ॥ २ ॥

हे [v]क्षेत्रस्य [v]पते त्वं [v]मधुमन्तं माधुर्योपेतम् [v]ऊर्मिं प्रवृद्धम्[5] उदकं [v]धेनुः [v]पयः [v]इव सा यथा दुग्धे तथा [v]अस्मासु [v]धुक्ष्व । [v]मधुश्चुतं मधुस्राविं [v]सुपूतं[6] [v]घृतमिव इत्युपमा । तादृशमुदकमित्यर्थः । [v]ऋतस्य यज्ञस्योदकस्य वा [v]पतयः स्वामिनः [v]नः अस्मान् [v]मृळयन्तु सुखयन्तु । यद्वा । ऋतस्य एतत् कर्मणि षष्ठी । ऋतं मृळयन्तु प्रयच्छन्तु । मृळतिरत्र दानकर्मा ॥

१. त–ते च । २. ख-ग-ण-फ-भ-ल-स–मित्रेणैव वा; न–मित्रेणेव वा । ३. त–साहाय्येन । ४. त–अत्र क्षेत्रस्य । ५. ख-ग-घ-च-ण-प-भ–प्रवृद्धं सुप्तं (पूतं) शोधितम्; फ–प्रवृद्धं सुपूतं शोधकम् । ६. ख-ग-घ-च-ण-फ-भ–तत् ।

ब्राह्मणाच्छंसिनोऽतिरिक्तोक्थ्ये परिधानीयैषा । ' मधुमतीरोषधीर्द्याव आप इति परिधानीया ' (आश्व. श्रौ. ९. ११) इति सूत्रितत्वात् ॥

मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥ ३ ॥

मधुऽमतीः । ओषधीः । द्यावः । आपः । मधुऽमत् । नः । भवतु । अन्तरिक्षम् ।
क्षेत्रस्य । पतिः । मधुऽमान् । नः । अस्तु । अरिष्यन्तः । अनु । एनम् । चरेम ॥ ३ ॥

[v]ओषधीः ओषध्यो व्रीहिप्रियङ्वादयः [v]नः अस्मभ्यं [v]मधुमतीः मधुमत्यः भवन्तु । तथा [v]द्यावः । तिस्रो दिव इत्युक्तत्वात् बहुवचनं युक्तम् । तथा [v]आपः [v]अन्तरिक्षं च नः [v]मधुमत्[1] [v]भवतु । किंच [v]क्षेत्रस्य [v]पतिः अपि [v]मधुमान्नो [v]अस्तु । [v]अरिष्यन्तः अन्यैरहिंस्यन्तो वयम् [v]एनं क्षेत्रपतिम् [v]अनु अनुसृत्य [v]चरेम संचरेम[2] सुखेन ॥

शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम् ।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय ॥ ४ ॥

शुनम् । वाहाः । शुनम् । नरः । शुनम् । कृषतु । लाङ्गलम् ।
शुनम् । वरत्राः । बध्यन्ताम् । शुनम् । अष्ट्राम् । उत् । इङ्गय ॥ ४ ॥

[v]वाहाः बलीवर्दाः [v]शुनम् । सुखनामैतत् । सुखं यथा भवति तथा वहन्तिवति शेषः । तथा [v]नरः नेतारो मनुष्याः कर्षकाः [v]शुनं कुर्वन्तु । तथा [v]लाङ्गलम् अपि [v]शुनं [v]कृषतु । [v]वरत्राः वरणेन त्रायमाणाः प्रग्रहाः [v]शुनं [v]बध्यन्ताम् । [v]अष्ट्रां प्रतोदं [v]शुनम् [v]उदिङ्गय प्रेरय । शुनाख्यो वाय्विन्द्रयोरन्यतमः सुखकृद्देवः । तदनुग्रहादेतत्सर्वं भवत्विति तस्य श्रुतिसामान्येन स्तुतिः ॥

शुनासीरीये पर्वणि शुनासीरदेवताकस्य हविषोऽनुवाक्यैषा अन्या ऋक् याज्या । सूत्रितं च— ' शुनासीराविमां वाचं जुषेथां शुनं नः फालाः[3] ' (आश्व. श्रौ. २. २०) इति ॥

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः ।
तेनेमामुप सिञ्चतम् ॥ ५ ॥

शुनासीरौ । इमाम् । वाचम् । जुषेथाम् । यत् । दिवि । चक्रथुः । पयः ।
तेन । इमाम् । उप । सिञ्चतम् ॥ ५ ॥

१. ख-ग-ण-भ-मधु मधुमत् । २. ख-प-फ-भ-' संचरेम ' नास्ति । ३. त-फाला विकृषन्तु भूमिम् ।

' शुदेवः शुनदेवता ' इति शौनकः[1] । अतः शुन इन्द्रः सीरो वायुः[2] । ' शुनो वायुः शुण्यन्तरिक्षे सीर आदित्यः सरणात् ' (निरु. ९. ४०) इति यास्कः । हे[3] vशुनासीरौ[3] तौ युवाम् vइमां वक्ष्यमाणां मदीयां vवाचं vजुषेथाम् । vयत् vपयः vदिवि vचक्रथुः vतेनेमां भूमिम् vउ vसिञ्चतम् ॥

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ॥ ६ ॥

अर्वाची । सुऽभगे । भव । सीते । वन्दामहे । त्वा ।
यथा । नः । सुऽभगा । अससि । यथा । नः । सुऽफला । अससि ॥ ६ ॥

हे vसुभगे vसीते त्वम् vअर्वाची अर्वागञ्चना vभव । vत्वा त्वां vवन्दामहे स्तुवीमहि । vयथा vनः vसुभगाससि शोभनधना भवसि । vयथा vनः vसुफलाससि तथा वन्दामहे ॥

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ ७ ॥

इन्द्रः । सीताम् । नि । गृह्णातु । ताम् । पूषा । अनु । यच्छतु ।
सा । नः । पयस्वती । दुहाम् । उत्तराम्ऽउत्तराम् । समाम् ॥ ७ ॥

vइन्द्रः देवः vसीतां सीताधारकाष्ठं[4] vनि vगृह्णातु । vतां सीतां vपूषा देवः vअनु vयच्छतु नियमयतु । vसा द्यौः vपयस्वती उदकवती[5] vदुहां दुह्यात्[6] । कदेति तदुच्यते । vउत्तरामुत्तरां vसमाम् उत्तरमुत्तरं[7] संवत्सरम् ॥

अस्या अष्टम्या विनियोगः ' शुनासीराविमाम् ' इत्यत्रोक्तः ॥

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥ ८ ॥

शुनम् । नः । फालाः । वि । कृषन्तु । भूमिम् । शुनम् । कीनाशाः । अभि । यन्तु । वाहैः ।
शुनम् । पर्जन्यः । मधुना । पयःऽभिः । शुनासीरा । शुनम् । अस्मासु । धत्तम् ॥ ८ ॥

१. ख-ग-ण-भ-स-शौनकः । हे शुनासीरा; ध-च-फ-ल-शौनकः । हे शुनासीरौ; त-शौनकः । हे शुनासीराः । २. त-वायुः । इन्द्रवायू वाय्वादित्याविति नैरुक्ताः । ३. ख-ग-च-ण-न-फ-भ-ल-स-' हे शुनासीरौ ' नास्ति । ४. ख-ग-च-ण-न-ल-स-सीताधारकाष्ठाम् । ५. प-उदकवती नोऽस्माकम् । ६. त-दुह्यते । ७. ग-च-ण-न-उत्तरम् ।

[v]नः[१] [v]भूमिं [v]फालाः भूमिविदारककाष्ठाः[१] [v]शुनं [v]वि [v]कृषन्तु । [v]शुनं यथा भवति तथा [v]कीनाशाः बलीवर्दरक्षकाः [v]वाहैः बलीवर्दैः [v]अभि [v]यन्तु अभिगच्छन्तु[२] । [v]शुनं यथा भवति तथा [v]पर्जन्यो [v]मधुना मधुरैः [v]पयोभिः उदकैः सिञ्चतु[३] । हे [v]शुनासीरा इन्द्रवायू वारुवादित्यौ वा [v]शुनं सुखम् [v]अस्मासु [v]धत्तं धारयतम् ॥ ॥ ९ ॥

' समुद्रादूर्मिः ' इत्येकादशर्चं त्रयोदशं सूक्तम् । अन्त्या जगती शिष्टास्त्रिष्टुभः । अग्निसूर्याब्गो-घृतानामन्यतमो देवता। वामदेव[४] ऋषिः[४] । अत्रानुक्रमणिका—' समुद्रादूर्मिरेकादशाग्नेयं जगत्यन्तं सौर्यं वापं वा गव्यं वा घृतस्तुतिर्वा ' इति । विषुवतीदं सूक्तमाज्यम् । तथा च सूत्रं—' समुद्रादूर्मि-रित्याज्यं त्यं सुमेपम् ' (आश्व. श्रौ. ८. ६) इति । व्यूढे दशरात्रे सप्तमेऽहनीदमेव सूक्तमाज्यम् । सूत्रितं च—' अथ छन्दोमाः समुद्रादूर्मिरित्याज्यम् ' (आश्व. श्रौ. ८. ९) इति ॥

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ १ ॥

समुद्रात् । ऊर्मिः । मधुऽमान् । उत् । आरत् । उप । अंशुना । सम् । अमृतऽत्वम् । आनट् ।
घृतस्य । नाम । गुह्यम् । यत् । अस्ति । जिह्वा । देवानाम् । अमृतस्य । नाभिः ॥ १ ॥

संमोदन्तेऽस्मिन्यजमाना इति वा[५] समुद्रोऽग्निः[५] पार्थिवः अथवा समुद्रद्रवन्त्यापोऽस्मादिति व्युत्पत्त्या वैद्युतोऽग्निः । तस्मात् [v]ऊर्मिः ऊर्मिवदुपर्युपरि उद्गूतः [v]मधुमान् माधुर्योपेतफलसमूहः [v]उदारत् उद्गच्छति । अथवा वैद्युतात् ऊर्म्युत्पादकः[६] रस उदारत् उद्गूतः । अथवा समुद्रात् समुद्रद्रवणसाधनात् आदित्यादूर्मी रस उदकलक्षण उदारत् । ' आदित्याज्जायते वृष्टिः ' इति श्रुतेः । यद्वा । समुद्रादुक्त-व्युत्पत्तेः[७] अन्तरिक्षादूर्मिरुदकमुदारत् । अथवा समुद्रादुक्तलक्षणात् गवामूधसः सकाशात् ऊर्मिरुज्वलः क्षीररसः । एतत् घृतपक्षेऽपि समानम् । यद्यपि घृतं क्षीराज्जायते तथापि तस्योधस उत्पत्तेरेवमुपचर्यते । शिष्टं वाक्यमग्न्यादिपञ्चसु पक्षेष्वपि समानम् । [v]अंशुना दीप्त्यांशेन वा [v]अमृतत्वं मोक्षम् [v]उप [v]सम् [v]आनट् । उपेति पूरणः । प्राप्नोति नरः । [v]घृतस्य दीप्तस्य क्षीरद्रव्यरूपस्य[८] वा [v]गुह्यं [v]नाम गोपनीयं नमनसाधनं [v]यदस्ति तद्ब्रवीमि । तत् [v]देवानां [v]जिह्वा आस्वादकजिह्वास्थानीयं भवति । तदेव [v]अमृतस्य [v]नाभिः बन्धकं भवति । तदुभयं घृतस्य नामेत्यर्थः । एवं सर्वमन्त्रेषु तत्तत्पक्षानुसारेण योज्यम् ॥

वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ २ ॥

वयम् । नाम । प्र । ब्रवाम । घृतस्य । अस्मिन् । यज्ञे । धारयाम । नमःऽभिः ।
उप । ब्रह्मा । शृणवत् । शस्यमानम् । चतुःऽशृङ्गः । अवमीत् । गौरः । एतत् ॥ २ ॥

---

१. ख-ग-च-ण-भ- ता फाला भूमिविदारककाष्ठाः; ल-स-ता भूमिफाला विदारककाष्ठाः । २. ग-घ-च-ण-भ-ल-स-' अभिगच्छन्तु ' नास्ति; न-आगच्छन्तु । ३. प-शुनं सिञ्चतु । ४. ख-ग-च-ण-न-भ-ल-स-' वामदेव ऋषिः ' नास्ति । ५. ख-ग-च-ण-न-भ-' वा समुद्रोऽग्निः ' नास्ति; ल-स- वा । ६. त-अग्न्युत्पादकः । ७. ख-ग-च-ण-न-भ-°क्तव्युत्पत्त्या । ८. न-ल-क्षरदद्रव्यरूपस्य । ९. ख-ग-च-ण-भ-स- च ।

ᵛवयं यजमानाः ᵛघृतस्य ᵛनाम ᵛप्र ᵛब्रवाम स्तुमः[1]। ᵛअस्मिन्यज्ञे ᵛनमोभिः नमस्कारैः हविर्भिर्वा ᵛधारयाम च। ᵛब्रह्मा परिवृढो देवः ᵛशस्यमानं स्तूयमानमिदम् ᵛउप ᵛश्रृणवत् शृणुयात्। ᵛचतुःशृङ्गः। चत्वारि शृङ्गाणि वेदचतुष्टयरूपाणि[2] यस्य सः। आदित्याग्निपक्षे एवम्[3]। इतरेष्वपि[4] यास्कोक्तव्युत्पत्त्या शृङ्गशब्दो व्याख्येयः। ᵛगौरः अरुणवर्णः[5] तादृशो देवः ᵛएतत् कर्म जगद्वा ᵛअवमीत् उद्गिरति निर्वहतीत्यर्थः॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश॥ ३॥

चत्वारि। शृङ्गा। त्रयः। अस्य। पादाः। द्वे इति। शीर्षे इति। सप्त। हस्तासः। अस्य। त्रिधा। बद्धः। वृषभः। रोरवीति। महः। देवः। मर्त्यान्। आ। विवेश॥ ३॥

यद्यपि सूक्तस्याग्निसूर्यादिपञ्चदेवताकत्वात् पञ्चधायं मन्त्रो व्याख्येयस्तथापि निरुक्तानुक्तनीत्या[6] यज्ञात्मकाग्नेः सूर्यस्य च प्रकाशकत्वेन तत्परतया व्याख्यायते। ᵛअस्य यज्ञात्मकस्याग्नेः ᵛचत्वारि ᵛशृङ्गा चत्वारो वेदाः शृङ्गस्थानीयाः। यद्यप्यापस्तम्बेन 'यज्ञं व्याख्यास्यामः स[7] त्रिभिर्वेदैर्विधीयते (परिभा. १. ३) इत्युक्तं तथाप्यार्थर्वणस्य इतरानपेक्षयैव एकाग्निसाध्यानां कृत्स्नकर्मणामभिधायकत्वात्तदपेक्षया चत्वारि शृङ्गेत्युक्तम्। ᵛत्रयो ᵛअस्य ᵛपादाः सवनानि त्रीण्यस्य पादाः। प्रवृत्तिसाधनत्वात् पादा इत्युच्यन्ते। ᵛद्वे ᵛशीर्षे ब्रह्मौदनं प्रवर्ग्यश्च। इष्टिसोमप्राधान्येनेदमुक्तम्। ᵛसप्त ᵛहस्तासः सप्त छन्दांसि। हस्ताः[8] अनुष्ठानस्य मुख्यसाधनम्। छन्दांस्यपि देवताप्रीणनस्य मुख्यसाधनमिति हस्तव्यवहारः। ᵛत्रिधा ᵛबद्धः मन्त्रब्राह्मणकल्पैः[9] त्रिप्रकारं बद्धः। बन्धनमस्य तन्निष्पाद्यत्वम्[10]। ᵛवृषभः फलानां वर्षिता ᵛरोरवीति। भृशं शब्दायते। ऋग्यजुःसामोक्थैः शस्त्रयागस्तुतिरूपैर्होत्राद्युत्पादितैर्ध्वनिभिरसौ रौति[11]। एवं ᵛमहो ᵛदेवः[12] ᵛमर्त्यान् ᵛआ ᵛविवेश। मर्त्यैर्यजमानैर्निष्पाद्यत्वात् प्रवेश उपचर्यते। अत्र यास्कः—'चत्वारिश्रृङ्गेति वेदा वा एत उक्ताः' (निरु. १३. ७) इत्यादिना निरवोचत्। तदत्रानुसंधेयम्॥ अथ* सूर्यपक्षे व्याख्यायते—अस्यादित्यस्य चत्वारि शृङ्गाणि चतस्रो दिशः। एताः[13] श्रयणार्थत्वात्[14] शृङ्गाणीत्युपचर्यन्ते। त्रयो अस्य पादाः। त्रयो वेदाः पादस्थानीया भवन्ति गमनसाधनत्वात्। तथा हि—'ऋग्भिः पूर्वाह्णे दिवि देव ईयते' इत्युपक्रम्य 'वेदैरशून्यस्त्रिभिरेति सूर्यः' (तै. ब्रा. ३. १२. ९. १) इति हि वेदत्रयेण गतिराम्नाता। द्वे शीर्षे। अहश्च रात्रिश्चेति द्वे शिरसी। सप्त हस्तासो अस्य। सप्त रश्मयः षड्विलक्षणा ऋतव एकः साधारण इति वा सप्त हस्ता भवन्ति। त्रिधा बद्धस्त्रिषु स्थानेषु क्षित्यादिषु अग्न्याद्यात्मकत्वेन[15] संबद्धः। ग्रीष्मवर्षाहेमन्तात्मकैस्त्रिभिस्त्रेधा बद्धो वा। वृषभो वर्षिता रोरवीति।

१. ख-ग-च-ण–स्तुवामः। २. त–दिव्यूपाणि वेदचतुष्टयरूपाणि वा। ३. ख-ग-च-ण-न-भ-स–इव। ४. ख-ग-च-ण–उत्तरेष्वपि; ल-स–अन्तरेष्वपि। ५. त–गौरवर्णः। ६. च-फ-स–°कृरीत्या। ७. त–स त्रयाणां वर्णानाम्। ८. त– हस्तः। ९. न–हस्तव्यापारः। १०. न-ल-स–मन्त्रकल्पब्राह्मणैः। ११. प-ल–स्तौति। १२. त–देवः एष यज्ञात्मा महानुभावो देवः। * 'अथ' इत्यारभ्य 'द्रष्टव्यम्' इत्यन्तस्य स्थाने 'एवं सूर्यादिपक्षे युक्त्या योज्यम्' इति पाठः प–पुस्तके वर्तते। १३. ख-न–एवाश्रवणार्थत्वात्; ग-भ-ल-स– एवश्रवणार्थत्वात्; च-ण-फ–एवाश्रयणार्थत्वात्; त–एवाश्रयणार्हत्वात्। १४. ख-ग-च-ण-भ-ल-स–अन्योन्यात्मकत्वेन।

शब्दं करोति वृष्ट्यादिद्वारा । स महो महान् देवो मर्त्यान् विवेश तत्रियन्नृतया[1] । 'सूर्य आत्मा जगतस्तस्थुषश्च' (ऋ. सं. १. ११५. १) इति हि श्रुतम् ॥ एवं स्वबादिपक्षेऽपि[2] योज्यम् । शाब्दिकास्तु शब्दब्रह्मपरतया चत्वारि शृङ्गेति चत्वारि पदजातानि नामाख्यातेे[3] चोपसर्गनिपाताश्च[4] इत्यादिना व्याचक्षते । अपरे स्वपरथा । तत्सर्वमत्र द्रष्टव्यम् ॥

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥ ४ ॥

त्रिधा । हितम् । पणिऽभिः । गुह्यमानम् । गवि । देवासः । घृतम् । अनु । अविन्दन् ।
इन्द्रः । एकम् । सूर्यः । एकम् । जजान । वेनात् । एकम् । स्वधया । निः । ततक्षुः ॥ ४ ॥

[v]पणिभिः असुरैः [v]गवि गोषु [v]त्रिधा क्षीरदध्याज्यभेदेन त्रिप्रकारं [v]हितं निहितं [v]गुह्यमानं गोपितं [v]घृतं दीप्तं रसरूपं वा द्रव्यं [v]देवासः देवाः [v]अन्वविन्दन् अलभन्त । तत्र [v]इन्द्र [v]एकं क्षीरं [v]जजान उदपादयत् । [v]सूर्य [v]एकं जजान । [v]वेनात् कान्तिमतः[4] अग्नेर्गमनवतो वायोर्वा [v]एकं घृतं [v]स्वधया अन्नेन निमित्तेन द्रव्येण वा साधनेन [v]निष्टतक्षुः निरपादयन् देवाः ॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ ५ ॥

एताः । अर्षन्ति । हृद्यात् । समुद्रात् । शतऽव्रजाः । रिपुणा । न । अवऽचक्षे ।
घृतस्य । धाराः । अभि । चाकशीमि । हिरण्ययः । वेतसः । मध्ये । आसाम् ॥ ५ ॥

[v]एताः आपो घृतधारा वा [v]अर्षन्ति अधः पतन्ति । [v]शतव्रजाः अपरिमितगतयः सत्यः [v]हृद्यात् हृदयङ्गमात् [v]समुद्रात् अन्तरिक्षात् रिपुणा जलमोकप्रतिबन्धकारिणा शत्रुणा वृत्रेण [v]नावचक्षे न अवदर्शनाय यथादृष्टं भवति तथा अर्षन्ति । ताः [v]घृतस्य [v]धारा [v]अभि [v]चाकशीमि अभिपश्यामि । कुत्रेति तदुच्यते । [v]हिरण्ययः हिरण्मयः [v]वेतसः अप्संभवोऽग्निर्वैद्युतः [v]आसाम् अपां [v]मध्ये वर्तत इति शेषः । अत्र घृतस्य धारा अभि चाकशीमीत्यनेन चरमपादेन होमाधारोऽग्निर्वैद्युतोऽग्निरादित्यो वोक्तः ॥ ॥१०॥

सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीषमाणाः ॥ ६ ॥

सम्यक् । स्रवन्ति । सरितः । न । धेनाः । अन्तः । हृदा । मनसा । पूयमानाः ।
एते । अर्षन्ति । ऊर्मयः । घृतस्य । मृगाःऽइव । क्षिपणोः । ईषमाणाः ॥ ६ ॥

---

१. त–तत्रियन्नृतया । २. त-न–अबादिपक्षेऽपि । ३. ग-च–नामाख्यातोपसर्गनिपाताश्च ।
४. ख-ग-च-ण-फ–एतयतः; प-ल-स–एकान्तिमतः; भ–एकायतः ।

अस्याग्नेरुपरि vसम्यक् vस्रवन्ति क्षरन्ति । घृतस्य[1] धाराः[1] । किमिव । vसरितो vन vधेनाः प्रीणयित्र्यो नद्य इव । vअन्तर्हृदा[2] vमनसा हृदयमध्यगतेन चित्तेन । भावनासचिवेनेति यावत् । तेन vपूयमानाः शुद्धीक्रियमाणाः । तदेवोच्यते । vएते vघृतस्य vऊर्मयः रसाः vअर्षन्ति गच्छन्ति । जुह्वाः सकाशादग्नेरुपरि पतन्ति । किमिव । vक्षिपणोः क्षेपकात् व्याधात् । vईषमाणाः पलायमानाः vमृगाइव । ते यथा कक्षं प्रविशन्ति तद्वत् । अनेन शैघ्र्यमुक्तं भवति ॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ७ ॥

सिन्धोःऽइव । प्रऽअध्वने । शूघनासः । वातऽप्रमियः । पतयन्ति । यह्वाः ।
घृतस्य । धाराः । अरुषः । न । वाजी । काष्ठाः । भिन्दन् । ऊर्मिभिः । पिन्वमानः ॥ ७ ॥

vसिन्धोः स्यन्दमानाया नद्याः सकाशात् vइव उदकानीव vप्राध्वने प्रवणवति देशे vशूघनासः आशुगन्त्र्यः । ' आशु इति च शु इति च क्षिप्रनामनी भवतः ' (निरु. ६. १) इति निरुक्तम् । vवातप्रमियः वायुवत् प्रकृष्टवेगाः vयह्वाः महत्यः vघृतस्य vधाराः vपतयन्ति गच्छन्त्यग्नेरुपरि । घृतमुदकमिति पक्षे सिन्धोरित्येत्र इवशब्दोऽनर्थकः । स्यन्दनसाधनादन्तरिक्षादुत्कलक्षणा घृतधारा उदकधाराः पतयन्ति गच्छन्ति भूमौ । किंच घृतसंस्थायाः vकाष्ठाः[3] मर्यादाभूतान् परिधीन् vभिन्दन् vऊर्मिभिः रश्मैः vपिन्वमानः वर्धमानो भवति । उदकमिति पक्षे काष्ठाः क्रान्त्वा स्थिता दिशो भिन्दन्नूर्मिभिः तरङ्गैः पिन्वमानो भवति । तत्र दृष्टान्तः । vअरुषो vन vवाजी आरोचमानो गर्वेण गमनशीलोऽश्व इव । स यथा[4] भिन्दन् पिन्वमानश्च भवति तद्वत् ॥

अभि प्रवन्त समनेव योषाः कल्याण्यः[5] स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ ८ ॥

अभि । प्रवन्त । समनाऽइव । योषाः । कल्याण्यः । स्मयमानासः । अग्निम् ।
घृतस्य । धाराः । सम्ऽइधः । नसन्त । ताः । जुषाणः । हर्यति । जातऽवेदाः ॥ ८ ॥

vघृतस्य vधाराः अमुम् vअग्निं vसमनेव समानमनस्काः vयोषाः योषितः पतिमिव vअभि vप्रवन्त अभिनमयन्ति । निमग्नं कुर्वन्ति । कीदृश्यस्ताः । vकल्याण्यः भद्ररूपाः vस्मयमानासः हसन्त्यः । किंच ताः vसमिधः सम्यग्दीपयित्र्यः सत्यः vनसन्त व्याप्नुवन्ति । vताः एव धाराः vजुषाणः प्रीयमाणः सेवमानो वा अयं vजातवेदाः vहर्यति कामयते । घृतशब्दस्योदकमिति पक्षेऽग्निजातवेदःशब्दाभ्यां वैद्युतोऽग्निरादित्यो वा गृह्यते । तं देवमुदकधारा अभि प्रवन्त नसन्त च । स[6] ताश्च हर्यति[6] ॥

---

१. त– घृतधाराः । २. त–किंच अन्तर्हृदा । ३. ख-च-त-फ-भ–काष्ठाः काष्ठान् । ४. त–यथा काष्ठाः । ५. ख-ग-च-ण– स ता वा हर्यीत; त-न– स च ता हर्यतीति (न–हर्यति) ।

कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥ ९ ॥

कन्याःऽइव । वहतुम् । एतवै । ऊँ इति । अञ्जि । अञ्जानाः । अभि । चाकशीमि ।
यत्र । सोमः । सूयते । यत्र । यज्ञः । घृतस्य । धाराः । अभि । तत् । पवन्ते ॥ ९ ॥

[v]कन्याइव अनूढा बालिका इव । ता यथा [v]वहतुम् उद्वाहं प्राप्तुम् [v]एतवा [v]उ एतुं पतिं गन्तुम् [v]अञ्जि अञ्जकमाभरणं तेजो वा [v]अञ्जानाः व्यञ्जयन्त्यः । एवं कुर्वत्यः कन्याइव स्वभर्तृभूतमाध्वरं वैद्युतं वाग्निमादित्यं वा वहतुम् एतुम्[1] अञ्जि व्यञ्जकं तदीयं रूपमञ्जाना व्यञ्जयन्तीः[2] [v]घृतस्य [v]धाराः [v]अभि [v]चाकशीमि अभिपश्यामि । घृतेनोदकेन च भौमस्य वैद्युतस्य चाग्नेः प्रज्वलनं प्रसिद्धम् । किंच ता धाराः [v]सोमः [v]सूयते [v]यत्र [v]यत्र[3] चेतरः[3] [v]यज्ञः तायते[4] [v]तत् तं यज्ञमभिलक्ष्य [v]पवन्ते गच्छन्ति खलु ॥

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ १० ॥

अभि । अर्षत । सुऽस्तुतिम् । गव्यम् । आजिम् । अस्मासु । भद्रा । द्रविणानि । धत्त ।
इमम् । यज्ञम् । नयत । देवता । नः । घृतस्य । धाराः । मधुऽमत् । पवन्ते ॥ १० ॥

हे[5] मदीया ऋत्विजः [v]गव्यं गोसमूहरूपं गोसंबन्धिनं वा [v]आजिं* संघातम्* [v]अभ्यर्षत अभिगच्छत[6] अभिगमयत वा [v]सुष्टुतिं शोभनां स्तुतिम् । अत्र गोशब्देनोदकानि गावो वोच्यन्ते । तत्संघातोऽभिप्रेतः । [v]अस्मासु यजमानेषु [v]भद्रा स्तुत्यानि [v]द्रविणानि [v]धत्त धारयत । स्तुत्या खलु फलं लप्स्यते । किंच [v]नः अस्मदीयम् [v]इमं [v]यज्ञं [v]देवता अत्र यष्टव्यान् देवान् [v]नयत प्रापयत । [v]घृतस्य [v]धारा [v]मधुमत् यथा[6] तथा[6] [v]पवन्ते गच्छन्ति ॥

'धामन्ते' इत्येषोत्तरसूक्तस्याद्या चाध्यायोत्सर्जनोपाकरणयोर्विनियुक्ते । 'धामन्ते विश्वम्' इति प्रतीकमुक्त्वा तदन्ते 'ट्वचाः[7]' (आश्व. गृ. ३. ५. ७) इति सूत्रितत्वात् ॥

---

१. ख-ग-च-ण-न-फ-भ-ल-स-एनम् । २. ख-ग-च-ण-त-न-भ-ल-स-व्यञ्जयन्त्यः । ३. ख-ग-च-ण-यत्र वा; भ-ल-स-अवतारः । ४. ख-ग-च-ण-भ-ल-स-तायात् । ५. फ-हे धाराः अस्माम् गव्यमुदकमयम् आजिं समूहं अभ्यर्षत वर्षत गायत वाम् । * ख-घ-ण-प-आजिं आसमन्तात्; ल-स-आसमन्तात् । ६. ख-ग-घ-च-ण-न-भ-ल-स-'यथा तथा' नास्ति । ७. त-इति द्वचाः ।

धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्य१न्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥ ११ ॥

धामन् । ते । विश्वम् । भुवनम् । अधि । श्रितम् । अन्तरिति । समुद्रे । हृदि । अन्तः । आयुषि । अपाम् । अनीके । सम्ऽइथे । यः । आऽभृतः । तम् । अश्याम । मधुऽमन्तम् । ते । ऊर्मिम् ॥ ११ ॥

[v]ते त्वदीये [v]धामन् धामनि तेजःस्थाने [v]विश्वं [v]भुवनम्[१] [v]अधि [v]श्रितम्[२] । [v]अन्तः [v]समुद्रे वडवाग्नित्वेन[३] [v]हृद्यन्तः सर्वप्राणिनां हृदये वैश्वानरत्वेन [v]आयुषि अन्ने सर्वप्राण्याहारत्वेन । यद्वा । आयुषीत्येतत् हृद्विशेषणम् । जठराग्निना खल्वायुः धार्यते[४] । [v]अपामनीके उदकसंस्त्याये वैद्युताग्नित्वेन [v]समिथे संग्रामे च शौर्याग्निरूपेण । एवं सर्वेषु स्थानेषु वर्तमानं धाम । तस्मिन् धामनि [v]यः ऊर्मिर्घृतरूप उदकरूपो वा रसः [v]आभृतः[५] स्थापितः [v]ते त्वदीयं [v]तं रसं [v]मधुमन्तं माधुर्योपेतम् [v]अश्याम व्याप्नुयाम ॥ ॥ ११ ॥ ॥ ५ ॥

इत्थं श्रीवुक्कभूपालसाम्राज्यैकधुरंधरः ।
विद्यातीर्थगुरोर्दृष्ट्या प्राप्तसार्वज्ञ्यवैभवः[६] ॥
श्रीमत्सायणमन्त्रीशः सकलागमतत्त्ववित् ।
दाशतय्यां माधवीये वेदार्थस्य प्रकाशने ॥
चतुर्थं मण्डलं सम्यक् वामदेवेन वीक्षितम् ।
अष्टोत्तरैस्तु पञ्चाशत्सूक्तैः पञ्च शतैरपि ॥
एकोनया नवत्या च युक्तैर्मन्त्रैश्च संमितम् ।
व्याकार्षीत्सुखबोधार्थं पश्यतैतद्विमत्सराः[७] ॥

॥ इति चतुर्थं मण्डलं समाप्तम् ॥

---

१. त–भुवनं कृत्स्नं भूतजातम् । २. त–श्रितं तदपि च धाम कुत्र कुत्रास्त इति । ३. त–अन्तरिक्षस्य मध्ये सूर्यमण्डलत्वेन । ४. त–ध्रियते । ५. त–आहृतः । ६. ख-ग-च-ण-भ–°सर्वज्ञ° ७. ख-ग-घ-च-ण-फ–पश्यन्तु गतमत्सराः; न–पश्य तद्वीतमत्सरः ।

॥ श्रीगणेशाय नमः ॥

॥ अथ पञ्चमं मण्डलम् ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

आत्रेये[1] पञ्चमे मण्डले षडनुवाकाः । तत्र प्रथमेऽनुवाके चतुर्दश सूक्तानि । तत्र ' अबोध्यग्निः ' इति द्वादशर्चं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका—' अबोधि द्वादश बुधगविष्ठिरौ ' इति । पञ्चमे मण्डलेऽनुक्तगोत्रमात्रेयं विद्यादिति परिभाषितत्वादात्रेयौ बुधगविष्ठिरावृषी । अनादेश-परिभाषया त्रिष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता । प्रातरनुवाके[2] आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विन-शस्त्रे चैतदादिचत्वारि सूक्तानि । तथा च सूत्रितम्–' अबोध्यग्निः समिधेति चत्वारि ' (आश्व. श्रौ. ४. १३) इति ॥ अध्यायोत्सर्जनोपाकरणयोर्धामन्ते विश्वमिति द्वृचत्वेन विनियोग उक्तः ॥

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वाइव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ १ ॥

अबोधि । अग्निः । सम्ऽइधा । जनानाम् । प्रति । धेनुम्ऽइव । आऽयतीम् । उषसम् ।
यह्वाःऽइव । प्र । वयाम् । उत्ऽजिहानाः । प्र । भानवः । सिस्रते । नाकम् । अच्छ ॥ १ ॥

अयं [v]अग्निः [v]जनानाम् अध्वर्य्वादीनां [v]समिधा समिद्भिः [v]अबोधि प्रबुद्धोऽभूत्[3] । [v]धेनुमिव । अग्निहोत्रार्थधेनुं प्रति यथा प्रातर्बुध्यते तद्वत् [v]आयतीम् आगच्छन्तीम् [v]उषसं [v]प्रति । उषःकाले इत्यर्थः । अथ[4] प्रबुद्धस्याग्नेः[5] [v]भानवः ज्वालाः [v]यह्वाः महान्तः [v]वयां शाखां [v]प्र [v]उज्जिहानाः प्रोद्गमयन्तो वृक्षाः [v]इव प्रोज्जिहानाः स्वाधिष्ठानं त्यजन्तः [v]नाकम् अन्तरिक्षम् [v]अच्छ आभिमुख्येन [v]प्र [v]सिस्रते प्रसरन्ति ॥

अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥ २ ॥

अबोधि । होता । यजथाय । देवान् । ऊर्ध्वः । अग्निः । सुऽमनाः । प्रातः । अस्थात् ।
सम्ऽइद्धस्य । रुशत् । अदर्शि । पाजः । महान् । देवः । तमसः । निः । अमोचि ॥ २ ॥

१. ख-च-फ–' आत्रेये ' नास्ति । २. ख-ग-च-ण-भ-ल-स–' प्रातरनुवाके ' नास्ति । ३. ख-ग-च-ण-न-भ-ल-स–प्रवृद्धोऽभूत् । ४. न-ल-स–अथवा । ५. ख-ग-घ-च-ण-न-भ-ल-स–प्रवृद्धस्याग्नेः ।

अयं [v]होता होमनिष्पादकः [v]अग्निः [v]देवान् यष्टव्यान् [v]यजथाय यष्टुम् [v]अबोधि बुध्यते[1]। सोऽग्निः प्रातःकाले [v]सुमनाः शोभनमनस्को यजमानानुग्रहबुद्धिः सन्[2] [v]ऊर्ध्वः [v]अस्थात् उत्तिष्ठति। [v]समिद्धस्य अस्य [v]रुशत् रोचमानं [v]पाजः बलं ज्वालालक्षणम् [v]अदर्शि दृश्यते। एवंभूतः[3] [v]महान् [v]देवः [v]तमसः अन्धकारात् [v]निरमोचि निर्मुक्तोऽभूत् ॥

यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः।
आदक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥ ३ ॥

यत्। ईम्। गणस्य। रशनाम्। अजीगरिति। शुचिः। अङ्क्ते। शुचिऽभिः। गोभिः। अग्निः।
आत्। दक्षिणा। युज्यते। वाजऽयन्ती। उत्तानाम्। ऊर्ध्वः। अधयत्। जुहूभिः ॥ ३ ॥

[v]यत् यदा [v]ईम् अयमग्निः [v]गणस्य संघात्मकस्य[4] जगतः [v]रशनां रज्जुमिव[5] व्यापारप्रतिबन्धकं तमः [v]अजीगः। गिरति गृह्णाति वा। समिद्धो भवतीत्यर्थः। तदा[6] [v]शुचिः दीप्तः [v]अग्निः[7] [v]शुचिभिः गोभिः दीप्तैः रश्मिभिः [v]अङ्क्ते व्यनक्ति विश्वं जगत्। [v]आत् अनन्तरमेव [v]दक्षिणा प्रवृद्धा [v]वाजयन्ती अन्नमिच्छन्त्याज्यधारा [v]युज्यते युक्ता भवति। अथवा दक्षिणा प्रवृद्धाज्यधारा युज्यते। तां च धाराम् [v]उत्तानाम् ऊर्ध्वतानामुपरि विस्तृताम् [v]ऊर्ध्वः उन्नतः सन् [v]जुहूभिः [v]अधयत् पिबति ॥

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम् ॥ ४ ॥

अग्निम्। अच्छ। देवऽयताम्। मनांसि। चक्षूंषिऽइव। सूर्ये। सम्। चरन्ति।
यत्। ईम्। सुवाते इति। उषसा। विरूपे इति विऽरूपे।
श्वेतः। वाजी। जायते। अग्रे। अह्नाम् ॥ ४ ॥

[v]अग्निं देवम् [v]अच्छ आभिमुख्येन [v]देवयतां देवानात्मन इच्छतां यजमानानां [v]मनांसि [v]सं [v]चरन्ति। देवा यष्टव्यास्तदर्थं कदायं वधिष्यतीति ध्यायन्तीत्यर्थः। [v]चक्षूंषीव सर्वेषां प्राणिनां यथा [v]सूर्ये संचरन्ति तद्वत्। [v]यत् यदा [v]ईम् एनमग्निम् [v]उषसा सह [v]विरूपे नानारूपे[8] द्यावापृथिव्यौ [v]सुवाते जनयतः। तदानीं [v]श्वेतः प्रकृष्टवर्णोपेतः [v]वाजी वेजनवानग्निः [v]अह्नाम् [v]अग्रे उदयकाले[9] [v]जायते[10] प्रवर्धत इत्यर्थः ॥

१. ख-ग-च-ण-फ-भ-ल–अबुध्यत। २. ख-ग-घ-च-ण-न-भ-स–'सन्' नास्ति। ३. न-ल– अथ तथाभूतः। ४. ल–संघातात्मकस्य। ५. न-ल-स–रज्जुरिव। ६. त–यदा च। ७. ख-ग-घ-च-ण-प-फ-भ–अग्निः आर्द्रिः भक्षकैः दाहकैरित्यर्थः। ८. ख-ग-च-ण-स–'नानारूपे' नास्ति। ९. त-प-ल–प्रातःकाले। १०. ल–जायते उत्पद्यते।

जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु ।
दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥ ५ ॥

जनिष्ट । हि । जेन्यः । अग्रे । अह्नाम् । हितः । हितेषु । अरुषः । वनेषु ।
दमेऽदमे । सप्त । रत्ना । दधानः । अग्निः । होता । नि । ससाद । यजीयान् ॥ ५ ॥

अयमग्निः vजेन्यः उत्पादनीयः vअह्नां vअग्रे उदयकाले vजनिष्ट प्रादुरभूत् । पश्चात् vहितेषु vवनेषु वनोत्थेषु काष्ठेषु vअरुषः आरोचमानः सन् vहितः स्थापितः । पश्चात् vदमेदमे तत्तद्यागगृहे vसप्त vरत्ना रमणीयाः सप्त ज्वालाः vदधानः धारयमाणः । अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानः vअग्निः vहोता होमनिष्पादकः सन् vयजीयान् यष्टव्यः सन् vनि vषसाद निषण्णो भवति ॥

जीवति यजमाने मृत इति शब्दो यदि स्यात्तदानीं सुरभिमतीष्टिः कार्या । तत्रेयमनुवाक्या । सूत्रितं च–' अग्निर्होता न्यसीदद्यजीयान्त्साध्वीमकर्देववीतिं नो अद्य ' (ऐ. ब्रा. ७. ९) इति ॥

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥ ६ ॥

अग्निः । होता । नि । असीदत् । यजीयान् । उपऽस्थे । मातुः । सुरभौ । ऊँ इति । लोके ।
युवा । कविः । पुरुनिःऽस्थः । ऋतऽवा । धर्ता । कृष्टीनाम् । उत । मध्ये । इद्धः ॥ ६ ॥

अयम् vअग्निः vहोता होमनिष्पादकः सन् vयजीयान् यष्टव्यश्च सन् vन्यसीदत् निषसाद । कुत्रेति तदुच्यते । vमातुः सर्वस्य निर्मातुर्भूम्याः vउपस्थे उत्संगे तत्रापि vसुरभौ आज्यादिसौरभ्ययुक्ते vलोके सर्वैर्दृष्टव्ये स्थाने वेदिलक्षणे । vउत अपि च vयुवा नित्यतरुणः सर्वत्र मिश्रितो वा vकविः मेधावी vपुरुनिःष्ठः बहुस्थानः vऋतावा यज्ञवान् vधर्ता सर्वस्य धारक एवंभूतः सन् vकृष्टीनाम् ऋत्विग्यजमानानां vमध्ये vइद्धः समिद्धः[1] सन् । वर्तत इति शेषः[2] ॥ ॥ १२ ॥

प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः ।
आ यस्ततान रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन ॥ ७ ॥

प्र । नु । त्यम् । विप्रम् । अध्वरेषु । साधुम् । अग्निम् । होतारम् । ईळते । नमःऽभिः ।
आ । यः । ततान । रोदसी इति । ऋतेन । नित्यम् । मृजन्ति । वाजिनम् । घृतेन ॥ ७ ॥

vत्यं तम् vअग्निं vनमोभिः स्तुतिभिः vनु क्षिप्रं vप्र vईळते स्तुवन्ति। कीदृशं तम् । vविप्रं मेधाविनम् vअध्वरेषु vसाधुं फलसाधकं vहोतारं होमनिष्पादकम् । vयः देवः vरोदसी द्यावापृथिव्यौ

१. त-प-ल- दीप्तः । २. ख-ग-घ-च-ण-प-फ-भ- शेषः । उ पूरणः ।

vऋतेन उदकेन vआ vततान विस्तारितवान्। अग्नौ प्रास्ताहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात्। अथवा ऋतेन सत्यभूतेन हविषा दिवं तथाभूतेन वृष्ट्यादिफलेन भुवं च आततान। vवाजिनम् अन्नवन्तं देवं यजमानाः vनित्यं vघृतेन उदकेनाज्येन वा vमृजन्ति परिचरन्ति॥

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः।
सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान् ॥ ८ ॥

मार्जाल्यः। मृज्यते। स्वे। दमूनाः। कविऽप्रशस्तः। अतिथिः। शिवः। नः।
सहस्रऽशृङ्गः। वृषभः। तत्ऽओजाः। विश्वान्। अग्ने। सहसा। प्र। असि। अन्यान् ॥८॥

vमार्जाल्यः संमार्जनीयोऽयमग्निः vमृज्यते परिचर्यते। vस्वे स्वकीये स्थाने। कीदृशोऽयम्। vदमूनाः दानमना दान्तमना वा vकविप्रशस्तः कविभिर्मेधाविभिः प्रशस्तः प्रकर्षेण स्तुत्यः vनः अस्माकम् vअतिथिः अतिथिवत् पूज्यः vशिवः सुखकरश्च। vसहस्रशृङ्गः अपरिमितज्वालः vवृषभः वर्षिता फलानां vतदोजाः। यत्प्रसिद्धं बलं तेजो वास्ति तदेवौजो यस्य तादृशः। सर्वबलस्वरूप इत्यर्थः। अथ प्रत्यक्षवादः। हे vअग्ने vविश्वान् vअन्यान् स्वस्मादतिरिक्तान् सर्वान् vसहसा बलेन vप्रासि। प्रेति परेत्यर्थे। पराभवसि। व्याप्तुं वा प्रभवसि॥

प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ।
ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणाम् ॥ ९ ॥

प्र। सद्यः। अग्ने। अति। एषि। अन्यान्। आविः। यस्मै। चारुऽतमः। बभूथ।
ईळेन्यः। वपुष्यः। विभाऽवा। प्रियः। विशाम्। अतिथिः। मानुषीणाम् ॥ ९ ॥

हे vअग्ने त्वं यज्ञमासाद्य vसद्यः[1] तदानीमेव vअन्यान् स्वसमानान् vअत्येषि अतिक्रामसि। vयस्मै यज्ञाय[2] vचारुतमः सन् vआविः vबभूथ। किंच त्वम् vईळेन्यः स्तुत्यः vवपुष्यः वपुष्करो दीप्तिकरो वा vविभावा विशिष्टदीप्तिमान् vप्रियः प्रियभूतः vविशां सर्वेषां प्राणिनां तथा vअतिथिः पूज्यः vमानुषीणां[3] प्रजानां भवसि॥

तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात्।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम् ॥ १० ॥

तुभ्यम्। भरन्ति। क्षितयः। यविष्ठ। बलिम्। अग्ने। अन्तितः। आ। उत। दूरात्।
आ। भन्दिष्ठस्य। सुऽमतिम्। चिकिद्धि। बृहत्। ते। अग्ने। महि। शर्म। भद्रम् ॥ १० ॥

---

१. ख-ग-घ-च-ण-प-फ-भ- प्र सद्यः। २. न-ल-स- 'यज्ञाय' नास्ति। ३. त-मानुषीणां यजमानरूपाणाम्।

हे ᵛयविष्ठ युवतम ᵛअग्ने ᵛक्षितयः[1] मनुष्याः यजमानाः ᵛतुभ्यं[1] ᵛभरन्ति संपादयन्ति। किम्। ᵛबलिं पूजां हविर्लक्षणाम् ᵛअन्तितः अन्तिकात् ᵛउत अपि च ᵛदूरात्। ᵛआ इति चार्थे। किंच ᵛभन्दिष्ठस्य अतिशयेन स्तोतुः ᵛसुमतिं स्तुतिम् ᵛआ ᵛचिकिद्धि आजानीहि। हे ᵛअग्ने ᵛते तव ᵛशर्म सुखम् अस्मभ्यं दातव्यं ᵛबृहत् महत् ᵛभद्रं[2] स्तुत्यं च ॥

आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठ यजतेभिः समन्तम् ।
विद्वान्पथीनामुर्वन्तरिक्षमेह देवान्हविरद्याय वक्षि ॥ ११ ॥

आ । अद्य । रथम् । भानुऽमः । भानुऽमन्तम् । अग्ने । तिष्ठ । यजतेभिः । सम्ऽअन्तम् ।
विद्वान् । पथीनाम् । उरु । अन्तरिक्षम् । आ । इह । देवान् । हविःऽअद्याय । वक्षि ॥११॥

हे ᵛभानुमः दीप्तिमन् ᵛअग्ने ᵛअद्य अस्मिन् यागदिने ᵛभानुमन्तं दीप्तिमन्तं ᵛसमन्तं सर्माचीनप्रान्तोपेतं ᵛरथं ᵛयजतेभिः यष्टव्यैर्देवैः सह ᵛआ ᵛतिष्ठ आरोह। ᵛविद्वान् यष्टव्यदेवपरिज्ञानवांस्त्वं ᵛपथीनां देवयजनमार्गान् प्रति ॥ द्वितीयार्थे षष्ठी ॥ ᵛउर्वन्तरिक्षं प्रभूतेऽन्तरिक्षे ᵛदेवान् यष्टव्यान् ᵛहविरद्याय हविर्भक्षणाय ᵛइह अस्मिन्[3] यज्ञे[3] ᵛआ ᵛवक्षि आवहसि ॥

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ १२ ॥

अवोचाम । कवये । मेध्याय । वचः । वन्दारु । वृषभाय । वृष्णे ।
गविष्ठिरः । नमसा । स्तोमम् । अग्नौ । दिविऽइव । रुक्मम् । उरुऽव्यञ्चम् । अश्रेत् ॥१२॥

वयमात्रेयाः ᵛकवये मेधाविने ᵛमेध्याय मेधार्हाय ᵛवृषभाय वर्षकाय फलानां ᵛवृष्णे सेक्त्रे यूने ᵛवृन्दारु वन्दनशीलं ᵛवचः स्तोत्रम् ᵛअवोचाम। अथ ऋषिरात्मानं परोक्षेणैव निर्दिश्य स्तुतिम् उपसंहरति। ᵛगविष्ठिरः अयमृषिः ᵛनमसा नमस्कारेण हविषा वा युक्तं ᵛस्तोमं स्तोत्रम् ᵛअग्नौ ᵛअश्रेत् श्रयति स्म। ᵛदिवि ᵛरुक्मं रोचमानम् ᵛउरुव्यञ्चम् उरुगमनमादित्यम् ᵛइव ॥ ॥ १२ ॥

'कुमारं माता ' इति द्वादशर्चं द्वितीयं सूक्तम्। अत्रेः पुत्रः कुमार ऋषिः जननात्रः[4] पुत्रो वृशो वोभौ वात्र ऋषी। ' कमेतं त्वं ', ' वि ज्योतिषा ' इत्यनयोस्तु वृश एव नोभौ न कुमारः। अन्त्या षट्पञ्चाशदक्षरा शक्करी शिष्टास्त्रिष्टुभः। अग्निर्देवता। अत्रानुक्रमणिका—' कुमारं कुमारो वृशो वा जान[5] उभौ[6] वा शक्कर्यन्तं कं वीत्यृचोस्तु वृश एव ' इति। प्रातरनुवाकाश्विनशस्त्रयोरप्यापि सूक्तस्य विनियोग उक्तः पूर्वसूक्तेन सह ॥

१. न– तुभ्यं क्षितयो मनुष्याः; ल-स–तुभ्यम्। २. ख-ग-घ-च-ण-प-फ-भ–महि भद्रं महत्। ३. न-ल-स–' अस्मिन् यज्ञे ' नास्ति। ४. ख-ग-घ-च-ण-त-प-फ-भ-ल-स–जरनाम्नः। ५. ख-ग-च-ण-न-फ-भ-ल–जार उभौ।

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥ १ ॥

कुमारम् । माता । युवतिः । सम्ऽउब्धम् । गुहा । बिभर्ति । न । ददाति । पित्रे ।
अनीकम् । अस्य । न । मिनत् । जनासः । पुरः । पश्यन्ति । निऽहितम् । अरतौ ॥ १ ॥

शाट्यायनब्राह्मणोक्त इतिहास इहोच्यते । राजा त्रैवृष्ण इक्ष्वाकुः[1] त्र्यरुणोऽभवदस्य[2] च[2] ॥ पुरोहितो वृशो जान[3] ऋषिरासीत्तदा खलु । संगृह्णन्ति रथान्[4] राज्ञां रक्षणाय पुरोहिताः ॥ त्र्यरुणस्य वृशो रश्मिं संजग्राह पुरोहितः । कुमारो वर्त्मनि क्रीडन्रथचक्रेण घातितः[5] ॥ छिन्नः कुमारश्चक्रेण ममाराथ पुरोहितः । त्वं हन्तास्येति राजानं राजा चापि पुरोहितम् ॥ त्वं हन्तास्य कुमारस्य नाहमित्यब्रवीत्तदा । यतस्त्वं रथवेगस्य नियन्तातस्त्वया हतः ॥ रथस्वामी यतो राजन् तस्मात्त्वं तस्य घातकः । एवं विवदमानौ ताविक्ष्वाकून्प्रष्टुमागतौ ॥ तौ पप्रच्छतुरिक्ष्वाकून् केनासौ निहतो द्विजः[6] । तेऽब्रुवन्रथयन्तारं हन्तारं वृशसंज्ञकम् ॥ स वृशो वार्शसाम्ना तं कुमारं समजीवयत् । एवमारुयाय तत्रैव पुनरन्यदुदीरितम् ॥ यत इक्ष्वाकवो रागात्[7] हन्तारमृषिमब्रुवन् । तस्मात्तेषां गृहेष्वग्नेस्तेजो निर्गतमेषु च ॥ गृहे पाकादयो नासन् तत्कारणमचिन्तयन् । वृशं कुमारहन्तारं यदवोचाम तेन नः ॥ अपाक्रमद्धरो वह्नेराहुयाम वृशं वयम् । इति संचिन्त्य[8] तमृषिमाह्वयामासुरादरात् ॥ समागत्य[9] ततः शीघ्रं तेषामग्नेर्हरो भवेत् । इति वार्शेन साम्नासावकामयत पूर्ववत् ॥ एवं गायन् स ऋषिर्ब्रह्महत्यां भार्याजातां[10] त्रसदस्योर्नृपस्य । पिशाचवेषां हर आदाय चाग्नेर्गृहान्नीत्वा कशिपौ स्थापयन्तीम्[11] ॥ दृष्ट्वा[12] सम्यक् तद्धरस्तोषयित्वा[12] साम्ना पश्चाद्योजयामास चाग्निम् । ततः सतेजाः संजातोऽभवत्पाकादि पूर्ववत् ॥ एवं शाट्यायनेनोक्तं ताण्डकोक्तमथोच्यते । वृशः पुरोधा अभवत्त्रसदस्योर्महीपतेः ॥ स रथं धावयन्राजा ब्राह्मणस्य कुमारकम् । चिच्छेद रथचक्रेण प्रमादात्सोऽब्रवीद्वृशम् ॥ पुरोहिते वर्तमाने त्वयि मां हन्तिरागता[13] । एषा त्वयापनेतव्या ऋषिमित्यब्रवीन्नृपः ॥ स ऋषिर्वार्शसाम्ना तं कुमारमुदजीवयत् ॥ vमाता कुमारस्योत्पादयित्री vयुवतिः यौवनोपेता vकुमारं पथि संचरन्तं vसमुब्धं चक्रेण हतं vगुहा गुहायां vबिभर्ति धारयति । vन vददाति vपित्रे तस्य जनकाय । यद्वा । माता सर्वस्य निर्मात्री पृथिवी समुब्धं सम्यक् निगूढं गुहा[14] बिभर्ति न ददाति पित्रे । vअस्य कुमारस्य vअनीकं रूपं vमिनत हिंसितं vजनासः जनाः vन vपश्यन्ति । किंतु vअरतौ अरमणे देशे vनिहितं स्थितं vपुरः पुरोदेशे[15] पश्यन्ति । अथवायं वृशेन पुनरुज्जीवितः कुमार आत्मानमपरोक्षतया वक्ति कथयति । जानः[16] वा तं जीवयित्वा वक्ति । अथवा । सूक्तस्य आभेयत्वात् कुमार इत्यग्निरुच्यते । तं माता अरणिर्युवतिर्मिश्रयन्ती समुब्धं निगूढं गुहायां बिभर्ति पित्रे उत्पादकाय यजमानाय न ददाति । अस्याग्नेर्मिनत् हिंसत् दाहकमनीकं तेजो जना न पश्यन्ति । किंतु अरतौ अरण्यां हितं[17] पश्यन्ति ॥

---

१. ख-ग-च-फ-भ-इक्ष्वाकुः । २. च-फ-त्रय एव ब्रवीन्मिथः । ३. ख-ग-ण-त-न-भ-ल- जारः । ४ तं-तथा । ५. ल-पातितः । ६. ण-भ-म-द्विजाः । ७. ख-ग-च-ण-न-फ-भ-स-वेगात्; त-ल-संगात् । ८. त-ल-निश्चित्य । ९. त-न-ल-रा आगत्य । १०. त-भार्यां जाताम् । ११. ख-ग-ण-त-न-भ-ल-स-स्थापयन्ती । १२. ख-ग-च-फ-दृष्ट्वा दृशः संस्तरे तोषयित्वा; ण-दृष्ट्वा वृषः संस्तरे तोषयित्वा; भ-दृष्ट्वा स्वकस्तरे स्तोषयित्वा; ल-दृष्ट्वा स्वकस्तद्धरस्तोषयित्वा; स-दृष्ट्वा सकंस्तरे (?) तोषयित्वा । १३. त-न-हतिरागता । १४. ल-गुहायाम् । १५. ख-ग-च-ण-भ-'पुरोदेशे' नास्ति । १६. ख-ग-च-ण-त-न-फ-भ-ल-स-जारः । १७. ल-निहितम् ।

कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥ २ ॥

कम् । एतम् । त्वम् । युवते । कुमारम् । पेषी । बिभर्षि । महिषी । जजान ।
पूर्वीः । हि । गर्भः । शरदः । ववर्ध । अपश्यम् । जातम् । यत् । असूत । माता ॥ २ ॥

अत्राग्नेरुत्पाद्यमानत्वात् कुमारशब्देन व्यवहारः । हे [v]युवते [v]त्वं [v]कमेतं [v]कुमारं [v]पेषी हिंसिका पिशाचिका सती [v]बिभर्षि । एवं वृशाख्यो महर्षिः कक्षिपुनाच्छन्नम्[1] अग्नेर्हरो ब्रूते । त्वयानुत्पादितत्वात् धारणमनुचितमित्यर्थः। [v]महिषी महती पूजनीयारणिः एनं [v]जजान अजनयत्। तदेवाह[2]। [v]गर्भः शिशोर्ग्राहकोऽरण्याः संबन्धी गर्भः [v]हि यस्मात् [v]पूर्वीः [v]शरदः गताननेकान् संवत्सरान् [v]ववर्ध ववृधे । अहं च ततो [v]जातम् [v]अपश्यम् । [v]यत् यस्मात् [v]माता अरणिः [v]असूत उदपादयत्। राजकुमारपक्षे[3] हे युवते भूदेवि कमेतं कुमारं पेषी सती बिभर्षि । अवशिष्टं कुमारजननपरतया[4] योज्यम् । एवमुत्तरत्रापि कुमाराग्निहरसोः परत्वेन यथोचितं व्याख्येयम् ॥

हिरण्यदन्तं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानम् ।
ददानो अस्मा अमृतं विपृक्त्किं मान्निन्द्राः कृणवन्ननुक्थाः ॥ ३ ॥

हिरण्यऽदन्तम् । शुचिऽवर्णम् । आरात् । क्षेत्रात् । अपश्यम् । आयुधा । मिमानम् ।
ददानः । अस्मै । अमृतम् । विपृक्त् । किम् । माम् । अनिन्द्राः । कृणवन् । अनुक्थाः ॥ ३ ॥

[v]हिरण्यदन्तं हिरण्यसदृशदन्तस्थानीयज्वालोपेतं [v]शुचिवर्णं प्रदीप्तवर्णम् [v]आयुधा आयुधानि आयुधस्थानीयान् स्फुलिङ्गान् ज्वाला वा [v]मिमानं निर्मिमाणमग्निम् [v]आरात् समीपे [v]क्षेत्रात् क्षेत्रे[5] देशे[5] [v]अपश्यं पश्येयम् । एवं वृशः कामयते । अहम् [v]अस्मै अग्नये [v]अमृतम् अविनाश्यमृतत्वसाधनं वा [v]विपृक्त् सर्वतो व्याप्तं हविः स्तोत्रं वा [v]ददानः दातास्मि । [v]माम् [v]अनिन्द्राः । इन्द्रः परमैश्वर्योऽग्निः । तद्रहिता अनिन्द्राः । इन्द्रमयजन्त इत्यर्थः । [v]अनुक्थाः अस्तुतय इन्द्रमस्तुवन्तश्च [v]किं [v]कृणवन् किं कुर्युः ॥

क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथं न पुरु शोभमानम् ।
न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति ॥ ४ ॥

क्षेत्रात् । अपश्यम् । सनुतरिति । चरन्तम् । सुऽमत् । यूथम् । न । पुरु । शोभमानम् ।
न । ताः । अगृभ्रन् । अजनिष्ट । हि । सः । पलिक्नीः । इत् । युवतयः । भवन्ति ॥ ४ ॥

१. त-ल- कक्षिपुनाच्छिन्नम् । २. ख-ग-घ-च-ण-भ-स-तदेव हि; ल-तदेवाहुः । ३. ल-राजकुमाराश्रियपक्षे । ४. त-कुमारमातृपरतया । ५. त-क्षेत्रदेशे ।

अहं वृषा इदानीं vक्षेत्रात् क्षेत्रे vसनुतः । अन्तर्हितनामैतत् । निगूढं vचरन्तम् अरण्यां[1] vयूथं vन गवां समूहमिव vसुमत् स्वयमेव vपुरु बहु vशोभमानम्[2] vअपश्यं पश्यामि । पुरा हरसः पिशाच्याक्रमणकाले vताः ज्वाला निर्वीर्याः vन vअगृभ्नन् नागृह्णन्त नराः । इदानीं vसः अग्निः vअजनिष्ट vहि । हरसा प्रादुरभूत् खलु । अत एव हेतोः vपलिक्नीरित् पलिक्न्यः पलिता जीर्णाः[3] ज्वाला एवेदानीं vयुवतयो vभवन्ति ॥

के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदास ।
य ईं जगृभ्रुरव ते सृजन्त्वाजाति पश्च उप नश्चिकित्वान् ॥ ५ ॥

के । मे । मर्यकम् । वि । यवन्त । गोभिः । न । येषाम् । गोपाः । अरणः । चित् । आस । ये । ईम् । जगृभ्रुः । अव । ते । सृजन्तु । आ । अजाति । पश्चः । उप । नः । चिकित्वान् ॥५॥

vके vमे मदीयं vमर्यकं मर्त्यसंघं राष्ट्रं vगोभिः सह vवि vयवन्त वियुक्तमकुर्वन् । गा[4] भृत्यांश्च व्ययोजयन्[4] । vयेषां vगोपाः अस्माकं गोपायिता[5] vअरणश्चित् अभिगन्ता vन vआस बभूव[6] । सोऽयमग्निः । vये द्वेषिणः vईम् एनं जनसंघं राष्ट्रं vजगृभुः गृह्णन्ति । vते vअव vसृजन्तु नश्यन्तु[7] । किंच vचिकित्वान् चेतनावान् अस्मद्विषयज्ञानवानग्निः vनः अस्माकं vपश्चः पशून् vउप vआजाति उपागच्छति ॥

वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु ।
ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥ ६ ॥

वसाम् । राजानम् । वसतिम् । जनानाम् । अरातयः । नि । दधुः । मर्त्येषु ।
ब्रह्माणि । अत्रेः । अव । तम् । सृजन्तु । निन्दितारः । निन्द्यासः । भवन्तु ॥ ६ ॥

vवसां वसतां प्राणिनां vराजानं स्वामिनं vजनानां प्राणिनां vवसतिम् आवासभूतं व्यरुणमुक्तलक्षणमग्निं[8] वा vअरातयो vनि vदधुः अगोपयन् vमर्त्येषु[9] लोकेषु मध्ये । vअत्रेः अत्रिगोत्रस्य वृशस्य vब्रह्माणि मन्त्राः स्तोत्राणि[10] वा vतं कुमारम्[11] अग्निं वा vअव vसृजन्तु । अथवा अत्रेः[12] अत्रिगोत्रस्य कुमारं ब्रह्माणि । यद्वा । वृशस्य ब्रह्माण्यत्रेरत्रिगोत्रम् ॥ कर्मणि षष्ठी ॥ तं कुमारमव सृजन्तु विसृजन्तु । vनिन्दितारः अस्मन्निन्दकाः vनिन्द्यासः अस्माभिर्निन्द्याः vभवन्तु । अत्रेर्ब्रह्माणीत्येतत्[13] उपजीव्य वृशमत्यात्रेयं वदन्ति । आत्रेयः कुमार इति पक्षे स एव प्राणमयम्[14] आत्मानमवसृजन्त्वित्याशास्ते ॥ १४ ॥

१. त–आरण्यम् । २. प– शोभमानमग्निम् । ३. ख-ग-च-ण-त-न-प-फ-भ-ल-स–' जीर्णाः ' नास्ति । ४. ख-ग-घ-च-ण-त-भ-ल-स–गोभृत्यांश्च वियोजयन्; न–गोभृत्यांश्च व्ययोजयन् । ५. न-भ-ल-स–गोपयिता । ६. ख-प-फ-भ– न बभूव । ७. ल– न पश्यन्तु । ८. ख-ग-च-ण-प-फ-भ–' व्यरुण° ... वा ' नास्ति । ९. त–मर्त्येषु तदीयेषु । १०. ख-ग-च-ण-भ–' स्तोत्राणि वा ' नास्ति । ११. ख-ग-च-ण-प-फ-भ– कुमारमरुणमुक्तलक्षणम् । १२. ख-ग-च-ण-भ-ल-स–अत्रेः अत्रिम् । १३. ख-ग-च-ण-त-न-भ-ल-स–अत्र ब्रह्माणीत्येते । १४. ख-ग-च-ण-त-न-भ-ल-स– शाणं मेगम् (?) ।

अज्ञःसवे आहवनीयोपस्थाने 'शुनश्चिच्छेपम्' इत्येषा। 'अग्निमाहवनीयमुपस्थापयांचकार-शुनश्चिच्छेपं निदितं सहस्रात्' (ऐ. ब्रा. ७. १७) इति ब्राह्मणम्।

शुनःश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः।
एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥ ७ ॥

शुनःऽशेपम्। चित्। निऽदितम्। सहस्रात्। यूपात्। अमुञ्चः। अशमिष्ट। हि। सः।
एव। अस्मत्। अग्ने। वि। मुमुग्धि। पाशान्। होतरिति। चिकित्वः। इह। तु। निऽसद्य ॥७॥

हे अग्ने [v]निदितं नितरां बद्धं [v]शुनःशेपम् ऋषिं [v]सहस्रात् अनेकरूपात्[1] [v]यूपात्[2] [v]अमुञ्चः अमोचयः। [v]चित् इति पूरणः। शुनःशेपमिति पदस्य मध्ये पदान्तरस्य संहितायां व्यत्ययेनावस्थितिः। [v]सः ऋषिः [v]अशमिष्ट [v]हि शान्तवान् खलु। यद्वा[3]। स हि यस्मादशमिष्ट। स्तुतिकर्मैतत्[3]। अस्तावीत्। तस्मादमुञ्च इति संबन्धः। [v]एव एवम् [v]अस्मत् अस्मत्तः [v]पाशान् [v]वि [v]मुमुग्धि विमोचय। हे [v]होतः[4] हे [v]चिकित्वः चेतनावन् [v]अग्ने [v]इह [v]तु वेद्यां [v]निषद्य अवस्थाय ॥

हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥ ८ ॥

हृणीयमानः। अप। हि। मत्। ऐयेः। प्र। मे। देवानाम्। व्रतऽपाः। उवाच।
इन्द्रः। विद्वान्। अनु। हि। त्वा। चचक्ष।
तेन। अहम्। अग्ने। अनुऽशिष्टः। आ। अगाम् ॥ ८ ॥

हे अग्ने [v]हृणीयमानः क्रुध्यंस्त्वं [v]मत् मत्तः [v]अप [v]ऐयेः [v]हि अपागाः खलु ॥ 'ईं गतौ' इत्यस्मात् इयन्विकरणात् लङि मध्यमे छान्दसे परस्मैपद आडागमे वृद्धौ व्यत्ययेन इयनोऽकारस्य एकारे च कृते रूपम् ॥ [v]मे मह्यं [v]देवानां [v]व्रतपाः कर्मणः पालकः [v]इन्द्रः [v]प्र [v]उवाच [v]हि। स एव [v]विद्वान् [v]त्वा [v]अनु [v]चचक्ष त्वां ददर्श। [v]तेन [v]अनुशिष्टः [v]अहं हे [v]अग्ने त्वाम् [v]आगाम् इति। एवं वृश आह ॥

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ ९ ॥

वि। ज्योतिषा। बृहता। भाति। अग्निः। आविः। विश्वानि। कृणुते। महिऽत्वा।
प्र। अदेवीः। मायाः। सहते। दुःऽएवाः। शिशीते। शृङ्गे इति। रक्षसे। विऽनिक्षे ॥९॥

---

१. ख-ग-घ-च-ण-न-भ-स-अनेकयूपात्। २. त-विद्वान्। ३. ख-ग-च-ण-त-न-भ-ल-स-स्तुतिकर्मत्वात्। ४. ख-ग-च-ण-प-फ-भ-होतर्देवानामाह्वातः।

अयम् vअग्निः vज्योतिषा तेजसा vबृहता महता vवि vभाति विशेषेण दीप्यते। अथ तथाभूतः सन् vमहिम्ना स्वमहत्त्वेन vविश्वानि सर्वाणि पदार्थजातानि vआविः vकृणुते प्रकटीकरोति। एवं प्रवृद्धोऽग्निः vअदेवीः अदेवनशीला आसुरीः vमायाः vदुरेवाः दुःखगमनाः[1] vप्र vसहते अभिभवति। किंच vशिशीते तीक्ष्णीकरोति। vशृङ्गे शृङ्गाणि। शृङ्गसदृशीर्हिंसिका वा ज्वालाः शिशीते तीक्ष्णीकरोति। किमर्थम्। vरक्षसे vविनिक्षे रक्षसो नाशाय। 'निश्यति शृङ्गे रक्षसो विनिक्षणनाय' (निरु. ४. १८) इति यास्कः॥

उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्त्वा उ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः॥ १०॥

उत। स्वानासः। दिवि। सन्तु। अग्नेः। तिग्मऽआयुधाः। रक्षसे। हन्तवै। ऊँ इति। मदे। चित्। अस्य। प्र। रुजन्ति। भामाः। न। वरन्ते। परिऽबाधः। अदेवीः॥ १०॥

vउत अपि च vअग्नेः vस्वानासः शब्दं कुर्वाणा ज्वालाः vदिवि vषन्तु द्युलोके प्रादुर्भवन्तु। किमर्थम्। vतिग्मायुधाः तीक्ष्णायुधस्थानीया ज्वालाः। vरक्षसे vहन्तवा vउ रक्षसो हननाय। उ इति पूरणः। vमदे vचित् हर्षे सति vअस्य अग्नेः vभामाः क्रोधा दीप्तयो वा vप्र vरुजन्ति प्रकर्षेण भङ्गं[2] गच्छन्ति पीडयन्ति वा रक्षांसि। vपरिबाधः परितो बाधिकाः vअदेवीः अदेवनाः आसुर्यः सेनाः vन vवरन्ते न वारयन्त्येनम्[3]॥

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम्।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम॥ ११॥

एतम्। ते। स्तोमम्। तुविऽजात। विप्रः। रथम्। न। धीरः। सुऽअपाः। अतक्षम्।
यदि। इत्। अग्ने। प्रति। त्वम्। देव। हर्याः। स्वःऽवतीः। अपः। एन। जयेम॥ ११॥

हे vतुविजात बहुभावमापन्नाग्ने vते त्वदर्थम् vएतं vस्तोमम् एतत् स्तोत्रं vविप्रः मेधावी स्तोता vरथं vन रथमिव vधीरः vस्वपाः शोभनकर्माहम् vअतक्षं समपादयम्। हे vअग्ने vदेव vत्वं vयदीत् एनं स्तोमं vप्रति vहर्याः प्रतिकामयेथाः। तर्हि vस्वर्वतीः स्वरणवतीर्ध्यानिमतीः vअपः vएना एनेन vजयेम प्राप्नुयाम॥

१. त–दुरवगमनाः। २. त–पीडाम्; न-ल-स–यावाम्। ३. ख-ग-च-ण-न-प-फ-भ-ल-स–अदेवताः ४. ख-च-ण-भ–वारयन्त्येव; न-स–वारयन्त्येतम्।

तुविग्रीवो वृषभो वावृधानोऽशत्रुरर्यः समजाति वेदः ।
इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्बर्हिष्मते
मनवे शर्म यंसत् ॥ १२ ॥

तुविऽग्रीवः । वृषभः । ववृधानः । अशत्रु । अर्यः । सम् । अजाति । वेदः ।
इति । इमम् । अग्निम् । अमृताः । अवोचन् । बर्हिष्मते । मनवे । शर्म । यंसत् ।
हविष्मते । मनवे । शर्म । यंसत् ॥ १२ ॥

vतुविग्रीवः बहुज्वालः प्रभूतग्रीवो वा vवृषभः वर्षिता कामानां vववृधानः वर्धमानोऽग्निः vअर्यः अरेः vवेदः धनम् vअशत्रु अकण्टकं vसमजाति संयोजयति । vइतीमम् अर्थम् vअग्निम् vअमृताः अन्ये देवाः vअवोचन् । यस्मादेवं तस्मात् vबर्हिष्मते यागवते vमनवे मनुष्याय यजमानाय vशर्म सुखं vयंसत् यच्छतु । vहविष्मते च[1] vशर्म vयंसत् ॥ ॥ १५ ॥

' त्वमग्ने वरुणः ' इति द्वादशर्चं तृतीयं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयम् । ' त्वमग्ने वसुश्रुतः[2] ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः ' अबोध्यग्निः ' इत्यत्रोक्तः ॥

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ॥ १ ॥

त्वम् । अग्ने । वरुणः । जायसे । यत् । त्वम् । मित्रः । भवसि । यत् । सम्ऽइद्धः ।
त्वे इति । विश्वे । सहसः । पुत्र । देवाः । त्वम् । इन्द्रः । दाशुषे । मर्त्याय ॥ १ ॥

हे vअग्ने vत्वं vवरुणः तमसां वारको राज्यभिमानी देवोऽपि त्वमेव vयत् यदा vजायसे । किंच vत्वं vमित्रः अहरभिमानी देवः प्रमीतेस्त्राता vयत् यदा vसमिद्धः । त्वमुत्पन्नमात्रः सन्[3] तमो निवारयसि प्रवृद्धः सन् हितकारी भवसीत्यर्थः । vत्वे त्वयि vविश्वे सर्वेऽपि vदेवाः वर्तन्ते । त्वद्दत्तेन हविषा तेषां जीवनात् । ' ते देवा बिभ्यतोऽग्निं प्राविशन् ' (तै. सं. ६. २. २. ६) इति हि श्रुतेः[4] । हे vसहसस्पुत्र बलेन मथ्यमानत्वात् । किंच vत्वम् vइन्द्रः स्वामी vदाशुषे हविर्दात्रे vमर्त्याय[5] यजमानाय ॥

विवाहे चतुर्थ्यामाज्याहुतौ ' त्वमर्यमा ' इत्येषा । सूत्रितं च—' त्वमर्यमा भवसि यत्कनीना-मिति विवाहे चतुर्थीम् ' (आश्व. गृ. १. ४. ७) इति ॥

१. प–मनवे । २. स–वसुश्रुतः आद्या विराट् तृतीया माक्षरौद्रावैष्णवीति । ३. ख-ध-च-ण-प-फ-भ-सन् भवसि । ४. ल–श्रुतिः । ५. च–मर्त्याय मनुष्याय ।

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि ।
अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥ २ ॥

त्वम् । अर्यमा । भवसि । यत् । कनीनाम् । नाम । स्वधाऽवन् । गुह्यम् । बिभर्षि ।
अञ्जन्ति । मित्रम् । सुऽधितम् । न । गोभिः ।
यत् । दम्पती इति दम्ऽपती । सऽमनसा । कृणोषि ॥ २ ॥

हे अग्ने vत्वमर्यमा vभवसि । सर्वेषां नियमितासि । vयत् यदा vकनीनां कन्यकानां संबन्ध्यसि । किंच हे vस्वधावन् हविर्लक्षणान्नवन् vगुह्यं गोपनीयं vनाम vबिभर्षि वैश्वानर इति तन्नाम । vसुधितं सुष्ठु[1] निहितं[1] vमित्रं vन मित्रमिव त्वां vगोभिः । विकारे प्रकृतिशब्दः । गोविकारैः[2] क्षीरादिभिः vअञ्जन्ति । vयत् यस्मात् vदम्पती जायापती vसमनसा समानमनस्कौ vकृणोषि करोषि ॥

तवं श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥ ३ ॥

तवं । श्रिये । मरुतः । मर्जयन्त । रुद्र । यत् । ते । जनिम । चारु । चित्रम् ।
पदम् । यत् । विष्णोः । उपऽमम् । निऽधायि । तेन । पासि । गुह्यम् । नाम । गोनाम् ॥ ३ ॥

अनयाग्नेर्माध्यमिकी मूर्तिरुच्यते । हे अग्ने vतव vश्रिये श्रयणाय vमरुतः अपः[3] अन्तरिक्ष्याः vमर्जयन्त मार्जयन्ति । हे vरुद्र वृष्ट्या[4] रुद्रवद्वर्धितरग्ने[5] vते तव vयत् vजनिम जन्म वैद्युतलक्षणं vचारु चरणीयं[6] vचित्रं चाथनीयं[7] च[7] । तत्कथमिति चेदुच्यते । vविष्णोः व्यापनशीलस्य देवस्य vउपमं vगुह्यम् अगम्यं vयत् vपदं vनिधायि । अनेनान्तरिक्षमुक्तम् । 'उपमेयमिव विष्णोर्मध्यमं पदं तस्मान्नान्तरिक्षं पश्यन्ति' इति ब्राह्मणम् । vतेन vगोनाम् उदकानां vगुह्यं vनाम नामानि vपासि रक्षसि ॥

तवं श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त ।
होतारमग्निं मनुषो नि षेदुर्दशस्यन्त उशिजः शंसमायोः ॥ ४ ॥

तवं । श्रिया । सुऽदृशः । देव । देवाः । पुरु । दधानाः । अमृतम् । सपन्त ।
होतारम् । अग्निम् । मनुषः । नि । सेदुः । दशस्यन्तः । उशिजः । शंसम् । आयोः ॥ ४ ॥

---

१. ख-च-ण-न-प-फ-भ-ल-स-'सुष्ठु निहितं' नास्ति । २. ख-च-ण-प-फ-भ-'गोविकारैः' नास्ति । ३. त-'अपः' नास्ति । ४. ल-दृष्ट्या; स-धिष्ण्या । ५. च-न-रुद्रवद्वर्धिताग्ने; त-रुद्रवधिताग्ने । ६. च-रमणीयम् । ७. च-शोभनम् ।

हे [v]देव अग्ने [v]सुदशः [v]तव [v]श्रिया समृद्धया [v]देवाः इन्द्रादयः [v]पुरु अत्यधिकं [v]दधानाः त्वयि प्रीतिं धारयन्तः [v]अमृतं [v]सपन्त स्पृशन्ति । [v]होतारं होमनिष्पादकम् [v]अग्निं [v]मनुषः मनुष्याः [v]नि [v]देवुः परिचरन्ति ऋत्विजः । किं कुर्वन्तः । [v]दशस्यन्तः हविर्वितरन्तः [v]शंसं फलम् [v]उशिजः कामयमानस्य [v]आयोः मनुष्यस्य यजमानस्यार्थम् ॥

न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः ।
विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥ ५ ॥

न । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । न । काव्यैः । परः । अस्ति । स्वधाऽवः ।
विशः । च । यस्याः । अतिथिः । भवासि । सः । यज्ञेन । वनवत् । देव । मर्तान् ॥ ५ ॥

हे [v]अग्ने [v]त्वत् त्वत्तोऽन्यः [v]न [v]अस्ति [v]होता [v]पूर्वः पूरकः[१] पुराणो वा [v]यजीयान् यष्टा वा । [v]काव्यैः स्तोत्रैः स्तुत्यः [v]परः परस्तान् परस्मिन्नपि काले [v]न अस्ति । हे [v]देव हे [v]स्वधावः अन्नवन्[२] [v]यस्याः [v]विशः प्रजाया ऋत्विग्रूपायाः [v]अतिथिः [v]भवासि अतिथिवत्पूज्यः[३] भवसि । [v]सः[४] [v]यज्ञेन [v]मर्तान् अस्मद्द्वेष्टॄन् [v]वनवत् वृश्चति[५] हिनस्ति[६] । यद्वा । मर्तान् परिचारकान् वनवत् संभजेत् ॥

वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः ।
वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ॥ ६ ॥

वयम् । अग्ने । वनुयाम । त्वाऽऊताः । वसुऽयवः । हविषा । बुध्यमानाः ।
वयम् । सऽमर्ये । विदथेषु । अह्नाम् । वयम् । राया । सहसः । पुत्र । मर्तान् ॥ ६ ॥

हे [v]अग्ने [v]वयं यजमानाः [v]त्वोताः त्वया रक्षिताः सन्तः[७] [v]वनुयाम । शत्रून् पीडयाम संभजेमहि वा धनम् । कीदृशा वयम् । [v]वसूयवः वसुकामाः[८] [v]हविषा त्वां [v]बुध्यमानाः बोधयन्तः [v]वयं [v]समर्ये समरणे जयेम शत्रूनिति शेषः । [v]विदथेषु यागेषु प्राप्नुयाम बलम् । यद्वा । वनुयामेत्येतदनुषज्यते । [v]अह्नां सर्वेष्वहःसु । किंच [v]वयं हे [v]सहसस्पुत्र बलस्य पुत्र पालक[९] वाग्ने [v]राया धनेन सह [v]मर्तान्[९] पुत्रभृत्यादीन् लभेमहि ॥ ॥ १६ ॥

१. ल–प्रेरकः । २. ख-घ-च-ण-भ–अन्नवन्नग्ने । ३. ख-च-ण-न-प-फ-भ-ल-स–' अतिथिवत् पूज्यः ' नास्ति । ४. प– स त्वम् । ५. त–वृश्चसि हि(हिं)ससि; प–हिंससि । ६. ख-घ-च-ण-न-प-भ-ल-स–सन्तो वयम् । ७. प-धनकामाः । ८. ल–बलपालक । ९. न–मर्त्यान् ।

यो नु आगो अभ्येनो भरात्यधीदघमघशंसे दधात ।
जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन ॥ ७ ॥

यः । नुः । आगः । अभि । एनः । भरति । अधि । इत् । अघम् । अघऽशंसे । दधात । जहि । चिकित्वः । अभिऽशस्तिम् । एताम् । अग्ने । यः । नुः । मर्चयति । द्वयेन ॥ ७ ॥

[v]यः मर्त्यः [v]आगः अपराधम् [v]एनः पापं च [v]नः अस्मभ्यम् [v]अभि [v]भरति अभितः करोति। तस्मिन् [v]अघशंसे[1] [v]अघं पापम् [v]अधि [v]दधात ददात्वग्निः । [v]इत् इति पूरणः । आगोऽपराधं यो मह्यमिदं करोति तस्मा एवाग्निस्तत्करोत्वित्यर्थः । अथ प्रत्यक्षेणोच्यते । हे[2] [v]अग्ने [v]एताम् [v]अभिशस्तिं[3] [v]जहि । उत्तरत्र यच्छब्दश्रवणात्तदानुगुण्येनैनमभिशंसकमिति व्याख्येयम् । [v]यः अभिशस्ता [v]नः अस्मान् [v]द्वयेन उक्तेन आगसा एनसा वा [v]मर्चयति बाधते । तमिति ॥

त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।
संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥ ८ ॥

त्वाम् । अस्याः । विऽउषि । देव । पूर्वे । दूतम् । कृण्वानाः । अयजन्त । हव्यैः । सम्ऽस्थे । यत् । अग्ने । ईयसे । रयीणाम् । देवः । मर्तैः । वसुऽभिः । इध्यमानः ॥ ८ ॥

हे[3] अग्ने [v]त्वामस्याः रात्रेः [v]व्युषि । व्युष्टायामुपसीत्यर्थः । [v]पूर्वे पुरातना यजमानाः [v]दूतं देवानां प्रेरकं [v]कृण्वानाः कुर्वाणाः [v]अयजन्त [v]हव्यैः हविर्भिः साधनैः [v]रयीणां हविर्लक्षणानां [v]संस्थे संस्थाने आसादने सति हे [v]अग्ने [v]यत् यदा [v]ईयसे गच्छसि। [v]देवः[4] द्योतमानः [v]मर्तैः मनुष्यैर्ऋत्विग्भिः [v]वसुभिः वासकैः [v]इध्यमानः समिध्यमानः[5] सन् ॥

अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे ।
कदा चिकित्वो अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे ॥ ९ ॥

अव । स्पृधि । पितरम् । योधि । विद्वान् । पुत्रः । यः । ते । सहसः । सूनो इति । ऊहे । कदा । चिकित्वः । अभि । चक्षसे । नः । अग्ने । कदा । ऋतऽचित् । यातयासे ॥ ९ ॥

हे [v]सहसः [v]सूनो बलस्य पुत्राग्ने त्वम् [v]अव [v]स्पृधि पारय । [v]योधि पृथक्कुरु[6] पापात् । [v]यः [v]पुत्रः[7] पुत्रस्थानीयः तव[8] यो यजमानः [v]ते त्वां [v]पितरं पालकं पितृभूतं [v]विद्वान् जानन् [v]ऊहे वहति

१. प– अघशंसे पापकारिणे (णि)। २. च-फ– हे अग्ने चिकित्वः चेतनावन् एतामभिशस्तिम्; प–हे चिकित्वः चेतनावन्नग्ने एतामभिशस्तिमभिशंसकम् । ३. प–हे देव । ४. प–त्वं देवः । ५. ख-ग-च-ण-फ-भ–'समिध्यमानः' नास्ति । ६. प-ल–पृथक्कुरु च । ७. ख-ग-घ-च-ण-न-प-फ-भ-ल-स–'पुत्रः' नास्ति । ८. त–पुरुत्राता वा ।

हविः । तमेवं कुरु इत्यृषिरात्मानं परोक्षेणाह । ' हव्यवाळग्निरजरः पिता नः ' (ऋ. सं. ५. ४. २) इति हि वक्ष्यति । यद्वा । पितृपुत्रभावो व्यत्यस्तः । पितरं पितृवद्रक्षकं यजमानमव स्तृधि योधि[1] च[2] यस्त्वं पुत्रः पुत्रवत्सदा रक्षणीयः । ' त्वं पुत्रो भवसि यस्तेऽविधत् ' (ऋ. सं. २. १. ९) इति हि श्रुतिः । हे [v]चिकित्वः चेतनावन् [v]अग्ने [v]कदा [v]नः अस्मान् [v]अभि [v]चक्षसे अभिपश्यसि । [v]कदा च [v]ऋतचित् यज्ञस्योदकस्य वा चेतयिता [v]यातयासे प्रेरयसि सन्मार्गेण ॥

भूरि॒ नाम॒ वन्द॑मानो दधाति पि॒ता व॑सो॒ यदि॒ तज्जो॒षया॑से ।
कु॒विद्दे॒वस्य॑ सह॒सा च॒कानः॑ सु॒म्नम॒ग्निर्व॑नते वावृधा॒नः ॥ १० ॥

भूरि॑ । नाम॑ । वन्द॑मानः । दधा॑ति । पि॒ता । व॒सो॒ इति॑ । यदि॑ । तत् । जो॒षया॑से ।
कु॒वित् । दे॒वस्य॑ । सह॑सा । च॒का॒नः । सु॒म्नम् । अ॒ग्निः । व॒न॒ते॒ । व॒वृ॒धा॒नः ॥ १० ॥

[v]भूरि प्रभूतं [v]नाम त्वदीयं नाम [v]वन्दमानः सन् [v]दधाति धारयति । सामर्थ्यादृविः । अथवा नामकं हविः प्रभूतं धारयति दातुम् । [v]पिता पालकस्त्वं हे [v]वसो वासकाग्ने [v]यदि[3] [v]तत् हविः[3] [v]जोषयासे सेवसे । [v]देवस्य व्यवहर्तुर्यजमानस्य [v]कुवित् बहु हविः [v]सहसा बलेन युक्तः सन् [v]चकानः कामयमानः । यद्वा कर्मणि षष्ठी । देवं यजमानं कामयमानः [v]अग्निः [v]ववृधानः वर्धमानो यजमानं वर्धयन् वा [v]सुम्नं[4] [v]वनते प्रयच्छति ॥

त्वम॑ङ्ग॒ ज॑रि॒तारं॑ यविष्ठ॒ विश्वा॑न्यग्ने दुरि॒तानि॑ पर्षि ।
स्ते॒ना अ॑दृश्रन्रि॒पवो॒ जना॑सोऽज्ञा॒तके॑ता वृजि॒ना अ॑भूवन् ॥ ११ ॥

त्वम् । अ॒ङ्ग॒ । ज॒रि॒तार॑म् । य॒विष्ठ॒ । विश्वा॑नि । अ॒ग्ने॒ । दुः॒ऽइ॒ता । अति॑ । पर्षि॑ ।
स्ते॒नाः । अ॒दृ॒श्र॒न् । रि॒पवः॑ । जना॑सः । अज्ञा॑तऽकेताः । वृ॒जि॒नाः । अ॒भू॒व॒न् ॥ ११ ॥

हे[5] [v]अङ्ग[6] स्वामिन् [v]यविष्ठ युवतम [v]अग्ने[6] [v]जरितारं स्तोतारम्[7] अनुग्रहीतुं [v]विश्वानि[8] [v]दुरिता दुरितानि [v]अति [v]पर्षि अतिपारयसि । [v]स्तेनाः तस्कराः [v]अदृश्रन् दृश्यन्ते । [v]रिपवो [v]जनासः शत्रुभूता मनुष्याः [v]अज्ञातकेताः अप्रज्ञातचिह्नाः [v]वृजिनाः अस्माभिर्वर्जिताः [v]अभूवन् भवन्ति ॥

इ॒मे यामा॑सस्त्वद्रि॒गभू॒वन्व॑स॒वे वा॒ तदिदागो॑ अवा॒चि ।
नाहा॑यम॒ग्निर॒भिश॑स्तये॒ नो॒ न रीष॑ते वावृधा॒नः परा॑ दात् ॥ १२ ॥

इ॒मे । यामा॑सः । त्व॒द्रिक् । अ॒भू॒व॒न् । व॒स॒वे । वा॒ । तत् । इत् । आगः॑ । अ॒वा॒चि ।
न । अह॑ । अ॒य॒म् । अ॒ग्निः । अ॒भिऽश॑स्तये । नः॒ । न । रिष॑ते । व॒वृ॒धा॒नः । परा॑ । दा॒त् ॥ १२ ॥

---

१. ख-ग-च-ण-'योधि' नास्ति । २. ल-वा; स-त्वम् । ३. ख-ग-च-ण-भ-यत्तद्धविः; न-यद्धविः । ४. ख-ग-घ-च-ण-प-फ-भ-सुम्नं धनम् । ५. त-अङ्ग हे । ६. प-अग्ने त्वम् । ७. ग-च-ण-न-स-'स्तोतारं' नास्ति । ८. प-विश्वानि सर्वाणि ।

ᵛइमे ᵛयामासः गन्तारः स्तोमाः ᵛस्वद्रिक् त्वदभिमुखाः ᵛअभूवन् भवन्ति । ᵛवा अथवा ᵛवसवे वासकाय[1] ᵛतत्[2] ᵛआगः अपराधमाशासनरूपम् ᵛअवाचि उक्तवानहमग्निम्[3] । इदं देहीति याचनमेवापराधः । ᵛइत् इति पूरणः । यद्वा । तदिदं वक्ष्यमाणं शत्रुभिः कृतमागोऽवाचि[4] । किंच ᵛअयमग्निः ᵛवर्धानः स्तुत्या वर्धमानः सन् ᵛनाह नैव ᵛअभिशस्तये निन्दकाय ᵛनः अस्मान् ᵛपरा ᵛदात् परादद्यात् । तथा ᵛरिषते हिंसकाय नैव परा दात् ॥ ॥ १७ ॥

' त्वामग्ने ' इत्येकादशर्चं चतुर्थं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रान्तं च— ' त्वामग्न एकादश ' इति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः ' अबोध्यग्निः ' इत्यत्रोक्तः ॥

त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ॥ १ ॥

त्वाम् । अग्ने । वसुऽपतिम् । वसूनाम् । अभि । प्र । मन्दे । अध्वरेषु । राजन् ।
त्वया । वाजम् । वाजऽयन्तः । जयेम । अभि । स्याम । पृत्सुतीः । मर्त्यानाम् ॥ १ ॥

हे ᵛअग्ने ᵛवसूनां ᵛवसुपतिम् । वृत्यवृत्तिभ्यां वसूनां बाहुल्यं तस्स्वामित्वं चोक्तम् । बहूनां धनानां स्वामिनं ᵛत्वाम् ᵛअध्वरेषु यागेषु ᵛअभि ᵛप्र ᵛमन्दे आभिमुख्येन स्तौमि हे ᵛराजन् । किंच ᵛत्वया अनुकूलेन ᵛवाजयन्तः अन्नमिच्छन्तो वयं ᵛवाजं ᵛजयेम । किंच ᵛमर्त्यानां मरणधर्मकाणां ᵛपृत्सुतीः सेनाः ᵛअभि ᵛष्याम अभिभवेम ॥

दर्शपूर्णमासे पत्नीसंयाजे गृहपतेर्याज्यैषा । सूत्रितं च—' हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः ' (आश्व. श्रौ. १. १०) इति । देवसुवां[5] हविःष्वस्यग्नेरेषैव याज्या' । सूत्रितं च— ' हव्यवाळग्निरजरः पिता नस्त्वं च सोम नो वशः ' (आश्व. श्रौ. ४. ११) इति ॥

हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः समिषो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि ॥ २ ॥

हव्यऽवाट् । अग्निः । अजरः । पिता । नः । विऽभुः । विभाऽवा । सुऽदृशीकः । अस्मे इति ।
सुऽगार्हपत्याः । सम् । इषः । दिदीहि । अस्मद्र्यक् । सम् । मिमीहि । श्रवांसि ॥ २ ॥

अयं ᵛहव्यवाडग्निः ᵛअजरः अजीर्णः सन् ᵛनः ᵛपिता भवत्विति शेषः । किंच ᵛविभुः व्याप्तः ᵛविभावा दीप्तिमान् ᵛसुदृशीकः शोभनदर्शनः ᵛअस्मे अस्माकं भवतु । अथ प्रत्यक्षवादः । ᵛसुगार्हपत्याः शोभनगार्हपत्ययुक्तानि ᵛइषः अन्नानि ᵛसं ᵛदिदीहि सम्यक् प्रकाशय ददस्व वा । ᵛअस्मद्र्यक् अस्मदभिमुखं ᵛश्रवांसि अन्नानि ᵛसं ᵛमिमीहि सम्यक् प्रयच्छ ॥

१. ख-ग-च-ण-फ-भ–धनार्थं वासकाः; घ-प–धनाथंम् । २. त–तदित्तत् । ३. ख-फ–उक्तवानस्मि । ४. ख-ग-घ-च-ण-न-भ-स–' कृतमागोऽवाचि ' नास्ति । ५. ख-ग-च-ण-भ–अन्यत्र ।

विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥ ३ ॥

विशाम् । कविम् । विश्पतिम् । मानुषीणाम् । शुचिम् । पावकम् । घृतऽपृष्ठम् । अग्निम् ।
नि । होतारम् । विश्वऽविदम् । दधिध्वे । सः । देवेषु । वनते । वार्याणि ॥ ३ ॥

[v]मानुषीणां [v]विशां [v]विश्पतिं सर्वासां मनुष्यरूपाणां प्रजानां पालकं स्वामिनं वा [v]कविं मेधाविनं [v]शुचिं शुद्धं[1] दीप्तं वा [v]पावकम् अन्येषां शोधकं [v]घृतपृष्ठं प्रदीप्तपृष्ठोपलक्षितशरीरम् । अथवा उपरितनभागे आज्योपेतं [v]होतारं होमनिष्पादकं [v]विश्ववेदं विश्वस्य वेत्तारम् [v]अग्निं [v]नि [v]दधिध्वे धारयथ[2] हे ऋत्विजः । [v]सः देवः [v]देवेषु मध्ये [v]वार्याणि वरणीयानि धनानि [v]वनते संभजते अस्मदर्थम् । स्वयं वा वार्याणि हवींषि वनते ॥

जुषस्वाग्न इळया समजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥ ४ ॥

जुषस्व । अग्ने । इळया । सऽजोषाः । यतमानः । रश्मिऽभिः । सूर्यस्य ।
जुषस्व । नः । सम्ऽइधम् । जातऽवेदः । आ । च । देवान् । हविःऽअद्याय । वक्षि ॥ ४ ॥

हे [v]अग्ने [v]जुषस्व सेवस्व स्तुतिम् । [v]इळया वेदिलक्षणया भूम्या वाचा वा [v]सजोषाः समानप्रीतिः । तथा [v]सूर्यस्य [v]रश्मिभिः [v]यतमानः प्रयत्नमुपःकाले कुर्वन् । किंच हे [v]जातवेदः जातस्य वेदितरग्ने [v]नः अस्मदीयां [v]समिधं [v]जुषस्व सेवस्व । [v]आ वह [v]च [v]देवान् [v]हविरद्याय हविरदनाय । आवाह्य [v]वक्षि वहसि तद्धविः ॥

अथ पवित्रेष्ट्यां[3] स्विष्टकृतोऽनुवाक्यैषा । सूत्रितं च — ' जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये ' (आश्व. श्रौ. २. १२) इति । मरुद्भ्यः[4] पुरोडाशं सप्तकपालमित्यत्रापि स्विष्टकृतोऽनुवाक्या । ' अस्यासो न ये मरुतः स्वञ्चो जुष्टो दमूनाः ' (आश्व. श्रौ. २. १८) इति ॥

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥ ५ ॥

जुष्टः । दमूनाः । अतिथिः । दुरोणे । इमम् । नः । यज्ञम् । उप । याहि । विद्वान् ।
विश्वाः । अग्ने । अभिऽयुजः । विऽहत्या । शत्रूऽयताम् । आ । भर । भोजनानि ॥ ५ ॥

१. ख-ग-च-ण-फ-भ-स-विशुद्धम् । २. ख-ग-घ-च-ण-न-प-फ-भ- धारयध्वे; त-स-धारयथे ।
३. त-पवित्रेष्टयाः । ४. ख-ग-च-ण-भ-मरुद्भ्यः क्रीडिभ्यः; न-मरुद्भ्यः क्रीळिभ्यः ।

vजुष्टः पर्यासः vदमूनाः दानमना दान्तमना वा vअतिथिः सन्त vदुरोणे[1] गृहे[1] पूज्यः सन् vइमं vनः अस्मदीयं vयज्ञम् vउप vयाहि उपागच्छ[2]। vविद्वान् जानन् हे vअग्ने vविश्वाः vअभियुजः सर्वानभियोक्तॄन् vविहाय vशत्रूयतां तेषां vभोजनानि अन्नानि धनानि vआ vभर आहर। ' अतिथिरभ्यतितो गृहान्भवति ' (निरु. ४. ५) इत्यादिनिरुक्तं द्रष्टव्यम् ॥ ॥ १८ ॥

वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे स्वायै।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥ ६ ॥

वधेन। दस्युम्। प्र। हि। चातयस्व। वयः। कृण्वानः। तन्वे। स्वायै।
पिपर्षि। यत्। सहसः। पुत्र। देवान्। सः। अग्ने। पाहि। नृतम। वाजे। अस्मान्॥६॥

हे अग्ने vवधेन आयुधेन vदस्युम् उपक्षपयितारं vप्र vहि vचातयस्व प्रणाशय। हि इति पूरणः। vवयः vकृण्वानः कुर्वाणः vतन्वे शरीराय vस्वायै स्वीयाय। अथवा स्वायै तन्वे यजमानादिरूपाय पुत्राय वयोऽन्नं कुर्वाणः। vयत् यस्मात् vसहसस्पुत्र अग्ने vदेवान् vपिपर्षि तर्पयसि[3]। हे vनृतम नेतृतम vअग्ने vसः त्वं vवाजे संग्रामे vअस्मान् vपाहि रक्ष ॥

वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥ ७ ॥

वयम्। ते। अग्ने। उक्थैः। विधेम। वयम्। हव्यैः। पावक। भद्रऽशोचे।
अस्मे इति। रयिम्। विश्वऽवारम्। सम्। इन्व।
अस्मे इति। विश्वानि। द्रविणानि। धेहि ॥ ७ ॥

हे vअग्ने vते त्वां vवयम् vउक्थैः शस्त्रैः vविधेम परिचरेम। vवयं vहव्यैः हविर्भिर्विधेम। vपावक शोधक हे vभद्रशोचे कल्याणदीप्ते vअस्मे अस्मभ्यं vविश्ववारं विश्वैर्वरणीयं vरयिं धनं vसमिन्व प्रापय। vअस्मे अस्मभ्यं vविश्वानि vद्रविणानि vधेहि स्थापय ॥

अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम्।
वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥ ८ ॥

अस्माकम्। अग्ने। अध्वरम्। जुषस्व। सहसः। सूनो इति। त्रिऽसधस्थ। हव्यम्।
वयम्। देवेषु। सुऽकृतः। स्याम। शर्मणा। नः। त्रिऽवरूथेन। पाहि ॥ ८ ॥

१. ख-ग-च-ण-न-भ-ल-स-' दुरोणे गृहे ' नास्ति। २. च-उपगच्छ; ल-उपागाः।
३. ख-ग-च-ण-त-न-भ-ल-स-तर्पयसि पाहि।

हे [v]अग्ने [v]अस्माकम् [v]अध्वरं [v]जुषस्व सेवस्व । हे [v]सहसः [v]सूनो हे बलस्य पुत्र[१] [v]त्रिषधस्थ त्रिषु क्षित्यादिषु[२] स्थानेषु[३] स्थित[४] [v]हव्यं हविः जुषस्व । यद्वा । अध्वरं हविरिति योज्यम् । अहिंसितं हविरित्यर्थः। [v]वयं यजमानाः [v]देवेषु मध्ये [v]सुकृतः शोभनापूर्वकर्तारः[५] [v]स्याम भवेम । [v]त्रिवरूथेन वाचिकादिभेदेन त्रिधा वरणीयेन [v]शर्मणा सुखेन त्रिच्छदिष्केण गृहेण वा [v]नः [v]पाहि रक्ष ॥

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिं पर्षि ।
अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ९ ॥

विश्वानि । नः । दुःऽगहा । जातऽवेदः । सिन्धुम् । न । नावा । दुःऽइता । अतिं । पर्षि ।
अग्ने । अत्रिऽवत् । नमसा । गृणानः । अस्माकम् । बोधि । अविता । तनूनाम् ॥ ९ ॥

हे [v]जातवेदः[६] [v]नः अस्माकं [v]दुर्गहा दुःखेन गाह्यानि[७] दुःखेन भोग्यानि [v]विश्वानि दुरितानि[८] [v]अति [v]पर्षि अतिपारय । [v]सिन्धुं [v]न [v]नावा नदीं नाविको यथा तद्वत् । हे [v]अग्ने [v]अत्रिवत् अत्रेर्यथा तथा अस्माकं[९] [v]नमसा स्तोत्रेण [v]गृणानः स्तूयमानः सन् [v]अस्माकं [v]तनूनाम् [v]अविता रक्षकः [v]बोधि बुध्यस्व ॥

पुत्रकामेष्ट्यां ' यस्त्वा ' इत्येषा प्रधानस्य याज्या । सूत्रितं च—' यस्त्वा हृदा कीरिणा मन्यमानोऽग्निस्तुविश्रवस्तमम् ' (आश्व. श्रौ. २. १०) इति ॥

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥ १० ॥

यः । त्वा । हृदा । कीरिणा । मन्यमानः । अमर्त्यम् । मर्त्यः । जोहवीमि ।
जातऽवेदः । यशः । अस्मासु । धेहि । प्रऽजाभिः । अग्ने । अमृतऽत्वम् । अश्याम् ॥ १० ॥

[v]यः [v]मर्त्यः मरणधर्माहम्[१०] [v]अमर्त्यम् अविनाशं[११] [v]त्वा त्वां [v]कीरिणा स्तुत्यादिषु विक्षिप्तेन [v]हृदा हृदयेन युक्तः [v]मन्यमानः स्तुवन् [v]जोहवीमि अत्यर्थमाह्वयामि । यद्वा । स्तोतृवाचकेन कीरिणाशब्देन स्तुतिरूपलक्ष्यते[१२] । स्तुतियुक्तेन मनसा त्वां[१३] मन्यमानो जोहवीमि । हे [v]जातवेदः[१४] [v]यशः धनं प्रजां वा[१५] [v]अस्मासु [v]धेहि । [v]प्रजाभिः त्वदुत्ताभिर्हे [v]अग्ने अहम् [v]अमृतत्वं संततव्यविच्छेदलक्षणम् [v]अश्यां प्राप्नुयाम् । ' प्रजामनु प्रजायसे[१६] तदु ते मर्त्यामृतम् ' (तै. ब्रा. १. ५. ५. ६) इति हि श्रुतिः ॥

---

१. प–पुत्र अग्ने । २. ख-ग-च-ण-न-भ-स–दिव्यादिषु स्थानेषु; ल–क्षित्यादिस्थानेषु । ३. ख-ग-च-ण-न-स–स्थितम्; ल–स्थितः । ४. प–शोभनकर्मकर्तारः । ५. प–जातवेदोऽग्ने । ६. ख-ग-च-ण-न-भ–प्राह्याणि; घ–प्राह्याणि; स–' गाह्यानि ' नास्ति । ७. प–दुरिता दुरितानि । ८. ख-ग-च-ण-त-न-भ-ल-स–नोऽस्माकम् । ९. ख-ग-घ-च-ण-न-भ-स–मरणधर्मा । १०. ल-स–अनाशम् । ११. त– स्तुतिरूपं लक्ष्यते । १२. त–त्वामन्नप्रदम् । १३. प–जातवेदोऽग्ने । १४. ख-ग-च-ण-त-न-ल-स– च । १५. त–प्रजायते ।

तस्यामेव पुत्रकामेष्टयां ' यस्मै त्वम् ' इत्येषाग्नेः पुत्रवतोऽनुवाक्या । ' यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः ' (आश्व. श्रौ. २. १०) इति हि सूत्रितम् ॥

यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥ ११ ॥

यस्मै । त्वम् । सुऽकृते । जातऽवेदः । ऊँ इति । लोकम् । अग्ने । कृणवः । स्योनम् ।
अश्विनम् । सः । पुत्रिणम् । वीरऽवन्तम् । गोऽमन्तम् । रयिम् । नशते । स्वस्ति ॥ ११ ॥

हे [v]जातवेदः [v]अग्ने [v]त्वं [v]यस्मै [v]सुकृते सुकर्मणे यजमानाय । [v]उ इति पूरणः । [v]लोकं [v]स्योनं सुखकरं [v]कृणवः अकरोः । यद्वा । लोकमालोकेन स्योनं कृणवः अनुग्रहेण कुर्वित्यर्थः । [v]सः यजमानः [v]अश्विनं बह्वश्वोपेतं [v]पुत्रिणं बहुपुत्रोपेतं [v]वीरवन्तं वीरैर्वीर्येण वा उपेतं [v]गोमन्तं गोभिर्युक्तं[1] [v]रयिं धनं [v]नशते प्राप्नोति । [v]स्वस्ति अविनश्वरम् ॥ ॥ १९ ॥

' सुसमिद्धाय ' इत्येकादशर्चं पञ्चमं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं गायत्रमिध्माधानोक्तदेवताकम् । आप्रमित्युक्तत्वात्तनूनपाद्वर्जितम् (अनु. म. १. सू. १३) । ' सुसमिद्धायाग्रं गायत्रम् ' इत्यनुक्रमणिका । अत्रीणामिदमाप्रीसूक्तम् । ' समिद्धो अद्येति सर्वेषां यथर्षि वा ' (आश्व. श्रौ. ३. २) इत्युक्तत्वात् ॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥ १ ॥
सुऽसमिद्धाय । शोचिषे । घृतम् । तीव्रम् । जुहोतन । अग्नये । जातऽवेदसे ॥ १ ॥

[v]सुसमिद्धाय सुष्ठु समिद्धायैतन्नामकायाग्नये [v]शोचिषे दीप्तिमते [v]घृतम् आज्यं [v]तीव्रं प्रभूतं [v]जुहोतन हे[2] ऋत्विजः[2] [v]अग्नये अङ्गनादिगुणयुक्ताय [v]जातवेदसे जातधनाय ॥

नराशंसः सुषूदतीमं यज्ञमदाभ्यः । कविर्हि मधुहस्त्यः ॥ २ ॥
नराऽशंसः । सुसूदति । इमम् । यज्ञम् । अदाभ्यः । कविः । हि । मधुऽहस्त्यः ॥ २ ॥

[v]नराशंसः नरैः शंसनीयोऽयमग्निः [v]इमं [v]यज्ञम् इदं हविः वा [v]सुषूदति सुष्ठु प्रेरयति । स देवः [v]अदाभ्यः अहिंस्यः केनापि [v]कविः मेधावी [v]मधुहस्त्यः मधुरहस्त्यः[3] ॥

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् । सुखे रथेभिरूतये ॥ ३ ॥
ईळितः । अग्ने । आ । वह । इन्द्रम् । चित्रम् । इह ।
प्रियम् । सुऽखैः । रथेभिः । ऊतये ॥ ३ ॥

---

१. न-ल-स-' गोभिर्युक्तं ' नास्ति । २. ख-ग-च-ण-न-भ-स-' हे ऋत्विजः ' नास्ति । ३. घ-मधुरहस्त्यो हि ।

हे [v]अग्ने [v]ईळितः स्तुतः सन् [v]आ [v]वहेन्द्रं [v]चित्रं चायनीयं [v]प्रियम् [v]इह अस्मिन् यज्ञे [v]सुखैः [v]रथेभिः रथैः [v]ऊतये अस्मद्रक्षणाय ॥

ऊर्णम्रदा वि प्रथस्वाभ्यर्का अनूषत । भवा नः शुभ्र सातये ॥ ४ ॥

ऊर्णऽम्रदाः । वि । प्रथस्व । अभि । अर्काः । अनूषत । भव । नः । शुभ्र । सातये ॥ ४ ॥

हे [v]ऊर्णम्रदाः ऊर्णाकम्बलवत् मृदु हे बर्हिः [v]वि [v]प्रथस्व प्रथय । [v]अर्काः स्तोतारः [v]अभि [v]अनूषत स्तुवन्ति । हे [v]शुभ्र दीप्त [v]सातये धनाय तदानाय वा [v]नः अस्माकं [v]भव ॥

देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये । प्रप्र यज्ञं पृणीतन ॥ ५ ॥

देवीः । द्वारः । वि । श्रयध्वम् । सुप्रऽअयनाः । नः । ऊतये ।

प्रऽप्र । यज्ञम् । पृणीतन ॥ ५ ॥

हे [v]द्वारः यज्ञस्य द्वाराभिमानिन्यो हे [v]देवीः देव्यः [v]वि [v]श्रयध्वं वियुक्ता भवत । [v]सुप्रायणाः शोभनगमनसाधनाः [v]नः अस्माकम् [v]ऊतये रक्षार्थं[1] [v]यज्ञं यजमानं [v]प्रप्र [v]पृणीतन पूरयत कामैर्यज्ञमेव वा फलैः ॥ ॥ २० ॥

सुप्रतीके वयोधा यह्वी ऋतस्य मातरा । दोषामुषासमीमहे ॥ ६ ॥

सुप्रतीके इति सुऽप्रतीके । वयःऽधा । यह्वी इति । ऋतस्य । मातरा ।

दोषाम् । उषसम् । ईमहे ॥ ६ ॥

हे अह्नो रात्रेश्च अभिमानिदेव्यौ[2] [v]सुप्रतीके सुरूपे शोभनाङ्गे वा [v]वयोधा अन्नस्य वर्धयित्र्यौ [v]यह्वी महत्यौ [v]ऋतस्य यज्ञस्योदकस्य वा [v]मातरा निर्मात्र्यौ तयोर्मध्ये प्रत्येकं [v]दोषां रात्रिदेवीम् [v]उषसम् अहर्देवीम् [v]ईमहे स्तुमः ॥

वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः । इमं नो यज्ञमा गतम् ॥ ७ ॥

वातस्य । पत्मन् । ईळिता । दैव्या । होतारा । मनुषः । इमम् । नः । यज्ञम् । आ । गतम् ॥ ७ ॥

[v]वातस्य [v]पत्मन् । लुप्तोपमेदं वायुगमनसदृशगमनार्थम्[3] [v]ईळिता अस्माभिः स्तुतौ । यद्वा । वातस्य पतनसाधनेऽन्तरिक्षे गच्छन्तौ [v]दैव्या देवादम्रेरादित्याच्च समुद्भूतौ [v]होतारा देवानामाह्वातारौ युवां [v]मनुषः मनुष्यस्य [v]इमं [v]नः अस्माकं [v]यज्ञमा [v]गतम् आगच्छतम् । नो मनुषो यज्ञमिति व्यधिकरणे षष्ठ्यौ । अस्माकं यजमानस्य यज्ञमित्यर्थः ॥

---

१. प–रक्षणाय । २. प-ल–अभिमानिन्यौ देव्यौ । ३. ग-च–वायुगमनार्थम्; घ-प-ल–वायुसदृशगमनार्थम् ।

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥ ८ ॥

इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः । बर्हिः । सीदन्तु । अस्रिधः ॥ ८ ॥

[v]इळा पृथिवी [v]सरस्वती । सर उदकम् । तस्मात् सरस्वान् वायुः । तस्य स्त्री सरस्वती । [v]मही महती भारती भरतस्यादित्यस्य पत्नी । अत्र यद्यप्येषा नोक्ता तथापि सर्वत्र सहदृष्टत्वात् त्रिसंख्याश्रवणाच्च सा गृह्यते । अथवैताः[१] क्षित्यन्तरिक्षद्युस्थाना वाग्देव्यः[२] । एताः [v]मयोभुवः सुखस्य भावयित्र्यः [v]अस्रिधः अहिंसिकाः सत्यः [v]बर्हिः बर्हिषि [v]सीदन्तु उपविशन्तु ॥

शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना । यज्ञेयज्ञे न उदव ॥ ९ ॥

शिवः । त्वष्टः । इह । आ । गहि । विऽभुः । पोषे । उत । त्मना ।

यज्ञेऽयज्ञे । नः । उत् । अव ॥ ९ ॥

हे [v]त्वष्टः देव [v]शिवः सुखकरः सन् [v]इहा [v]गहि अस्मद्यज्ञमागच्छ । [v]विभुः व्याप्तस्त्वं [v]पोषे पोषकरणे । [v]उत आगत्य च [v]त्मना आत्मना स्वयमेव [v]यज्ञेयज्ञे सर्वेषु यज्ञेषु [v]नः अस्मान् [v]उदव उत्कृष्टं रक्ष ॥

अग्निहोत्रे उत्तराहुतिस्कन्दने ' यत्र वेत्थ ' इत्यनया समिधमादध्यात् । सूत्रितं च—' यत्र वेत्थ वनस्पत इत्युत्तरस्या आहुत्याः स्कन्दने ' (आश्व. श्रौ. ३. ११) इति ॥

यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ १० ॥

यत्र । वेत्थ । वनस्पते । देवानाम् । गुह्या । नामानि । तत्र । हव्यानि । गमय ॥ १० ॥

हे [v]वनस्पते यूपाभिमानिदेव [v]यत्र यस्मिन् स्थाने [v]वेत्थ [v]देवानां [v]गुह्या गुह्यानि [v]नामानि नामकानि रूपाणि [v]तत्र [v]हव्यानि [v]गमय प्रापय ॥

स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ॥ ११ ॥

स्वाहा । अग्नये । वरुणाय । स्वाहा । इन्द्राय । मरुत्ऽभ्यः । स्वाहा । देवेभ्यः । हविः ॥ ११ ॥

अग्न्यादिविश्वेदेवाः[३] । तेभ्यः* [v]देवेभ्य इदं [v]हविः [v]स्वाहा करोमीति शेषः । स्वाहुतं करोमीत्यर्थः । एवं स्वाहाकृतेः स्तुतिः[३] ॥ ॥ २१ ॥

' अग्निं तं मन्ये ' इति दशर्चं षष्ठं सूक्तं वसुश्रुतस्यार्षमाग्नेयं पाङ्क्तम् । ' अग्निं तं दश पाङ्क्तम् ' इत्यनुक्रमणिका । प्रातरनुवाके आग्नेये क्रतौ पाङ्क्ते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । ' अग्निं

१. प–अथवैतास्तिस्रः । २. ख-ग-च-ण-भ– वा देव्यः । ३. प–अग्नये इदं हविः स्वाहा करोमि वरुणाय स्वाहा इन्द्राय मरुद्भ्यः देवेभ्यः स्वाहा स्वाहुतं करोमीत्यर्थः । एवं स्वाहाकृतिस्तुतिः । *ख-ग-घ-च-ण-न-भ-स–' तेभ्यः ' नास्ति ।

तं मन्य इति पाङ्क्तम् ' (आश्व. श्रौ. ४. १३) इति हि सूत्रितम् । आश्वमेधिके[1] मध्यमेऽहनीदमेव आज्यशस्त्रम् । सूत्रितं च—' अग्निं तं मन्य इत्याज्यं तस्यैकाहिकमुपरिष्टात् ' (आश्व. श्रौ. १०.१०) इति । आद्य आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्यानुरूपस्तृचः । सूत्रितं च—' अग्निं तं मन्ये यो वसुराग्ने स्थूरं रयिं भर ' (आश्व. श्रौ. ७. ८) इति[1] ॥

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ १ ॥

अग्निम् । तम् । मन्ये । यः । वसुः । अस्तम् । यम् । यन्ति । धेनवः ।
अस्तम् । अर्वन्तः । आशवः । अस्तम् । नित्यासः । वाजिनः ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ १ ॥

vतम् vअग्निं vमन्ये स्तौमि । vयः अग्निः vवसुः वासकः । vयम् vअस्तं सर्वेषां गृहवदाश्रयभूतं vधेनवः vयन्ति गच्छन्ति प्रीणयितुम् । vअस्तम् उक्तलक्षणम् vअर्वन्तः अरणवन्तोऽश्वाः । vआशवः शीघ्रगामिनो यन्ति । तथा vनित्यासः नित्यप्रवृत्तयः[2] vवाजिनः हविर्लक्षणान्नवन्तः[2] यजमाना यम् vअस्तं यन्ति तं मन्ये । vइषम् अन्नं vस्तोतृभ्यः अस्मभ्यम् vआ vभर अग्ने ॥

सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥ २ ॥

सः । अग्निः । यः । वसुः । गृणे । सम् । यम् । आऽयन्ति । धेनवः ।
सम् । अर्वन्तः । रघुऽद्रुवः । सम् । सुऽजातासः । सूरयः । इषम् । स्तोतृऽभ्यः । आ । भर ॥ २ ॥

vसः vअग्निः स खल्वग्निः vयो vवसुः वासकः vगृणे स्तूयते । vयं vधेनवः vसम् vआयन्ति होमार्थम् । vअर्वन्तः अश्वाः vरघुद्रुवः लघुगमनाः vसम् आयन्ति । vसुजातासः[3] vसूरयः मेधाविनश्च[4] vसम् आयन्ति स खल्वग्निरिति ॥

---

१. न–प्रातरनु (वाक) न्यायेनेति च । आभिप्लविकेषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य अग्निं तं मन्ये इत्यादिको वैकल्पिकोऽनुरूपस्तृचः । सूत्रितं च–अग्निं तं मन्ये यो वसुरा ते वत्सो मनो यमदिति । महापितृयज्ञे गार्हपत्योपस्थाने अग्निं तं मन्ये इति । तथा च सूत्रितं–गार्हपत्यमग्निं तं मन्य इति । आश्वमेधिके मध्यमेऽहनि इदमेवाज्यशस्त्रम् । तस्य विशेषान् वक्ष्याम इति खण्डे सूत्रितं च–अग्निं तं मन्य इदमाज्यमिति । २. ख-ग-घ-च-ण-प-फ-भ–वाजिनो नित्यप्रवृत्तहविर्लक्षणान्नवन्तः; न-ल–नित्यप्रवृत्त (ल-त्ति) हविर्लक्षणान्नवन्तः ; स–नित्याः प्रवृत्तहविर्लक्षणान्नवन्तः । ३. प–सुजातासः सत्कुलोत्पन्नाः । ४. प–मेधाविनश्च यजमानादयः ।

अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥ ३ ॥

अग्निः । हि । वाजिनम् । विशे । ददाति । विश्वऽचर्षणिः ।
अग्निः । राये । सुऽआभुवम् । सः । प्रीतः । याति । वार्यम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ३ ॥

[v]अग्निर्हि अयमग्निः[१] खलु [v]विशे यजमानाय [v]वाजिनम् अन्नवन्तं पुत्रमश्वमन्नं वा [v]ददाति । [v]विश्वचर्षणिः । विश्वे चर्षणयो मनुष्या रक्षणीया अर्चका वा यस्य स तथोक्तः । यद्वा । पश्यतिकर्मैतत । सर्वस्य द्रष्टा [v]अग्निः [v]राये धनार्थिने । अथवा द्वितीयार्थे चतुर्थी । धनं [v]स्वाभुवं सुष्ठु सर्वत्र व्याप्तं [v]वार्यं सर्ववरणीयं [v]प्रीतः सन् [v]याति यमयति । दातुं वा गच्छति । इषमित्यादि[२] गतम्[२] ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने[३] स्तोत्रियतृचस्य ' आ ते अग्न इधीमहि ' इत्यादिके प्रथमाद्वितीये । सूत्रितं च भवति–' आ ते अग्ने इधीमह्यु भे सुश्चन्द्र सर्पिष इति द्वे एका च ' (आश्व. श्रौ. ७. ८) इति ॥

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ ४ ॥

आ । ते । अग्ने । इधीमहि । द्युऽमन्तम् । देव । अजरम् ।
यत् । ह । स्या । ते । पनीयसी । सम्ऽइत् । दीदयति । द्यवि । इषम् । स्तोतृऽभ्यः । आ । भर ॥४॥

हे [v]अग्ने [v]देव [v]द्युमन्तं दीप्तिमन्तम् [v]अजरम् अजीर्णं [v]ते त्वाम् [v]आ सर्वतः [v]इधीमहि दीपयामः । [v]यद्ध खलु [v]स्या[४] सा [v]ते तव[४] [v]पनीयसी स्तुत्या [v]समित दीप्तिः [v]दीदयति दीप्यते द्यवि द्युलोके ॥

आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ ५ ॥

आ । ते । अग्ने । ऋचा । हविः । शुक्रस्य । शोचिषः । पते ।
सुऽचन्द्र । दस्म । विश्पते । हव्यऽवाट् । तुभ्यम् । हूयते । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ५ ॥

---

१. ख-ग-च-ण-फ-भ–' अयमग्निः ' नास्ति । २. प–इषमन्नं स्तोतृभ्योऽस्म (भ्यम्) आभराग्ने ।
३. न– तृतीयसवने मैत्रावरुणशस्त्रे । ४. त– ते तव स्या सा ।

हे [v]शोचिषः दीप्तेः [v]पते स्वामिन् [v]अग्ने [v]शुक्रस्य दीप्तस्य, [v]ते तुभ्यम्[1] [v]ऋचा मन्त्रेण सह[2] [v]हविः हूयते । हे [v]सुश्चन्द्र सुष्ठ्वाह्लादक शोभनहिरण्य वा हे [v]दस्म शत्रूणामुपक्षपयितः [v]विश्पते विशां प्रजानां पालक [v]हव्यवाट् हविषो वोढः । इषमिति गतम् ॥ ॥ २२ ॥

प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विरे त इषण्यन्त्यानुषगिषं स्तोतृभ्य आ भर ॥ ६ ॥

प्रो इति । त्ये । अग्नयः । अग्निषु । विश्वम् । पुष्यन्ति । वार्यम् ।
ते । हिन्विरे । ते । इन्विरे । ते । इषण्यन्ति । आनुषक् । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ६ ॥

[v]प्रो प्रैव [v]पुष्यन्ति [v]त्ये ते [v]अग्नयः धिष्ण्या [v]अग्निषु गार्हपत्यादिषु[3] । यद्वा । लौकिका अग्नयः तेजःपदार्थोऽग्निषु वैदिकेषु [v]विश्वं सर्वं [v]वार्यं वरणीयमपेक्षितं धनं पुष्यन्ति । [v]ते अग्नयः [v]हिन्विरे प्रीणयन्ति । [v]इन्विरे व्याप्नुवन्ति च । [v]ते [v]इषण्यन्ति अन्नमिच्छन्ति । [v]आनुषक् सर्वत्रानुषक्तम् । तत्राग्निसामान्याभिप्रायेणैकवचनम् ॥

तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरन्त गोनामिषं स्तोतृभ्य आ भर ॥ ७ ॥

तव । त्ये । अग्ने । अर्चयः । महि । व्राधन्त । वाजिनः ।
ये । पत्वऽभिः । शफानाम् । व्रजा । भुरन्त । गोनाम् । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ७ ॥

हे [v]अग्ने [v]तव त्वदीयाः [v]त्ये ते [v]अर्चयः रश्मयः [v]महि महदत्यधिकं [v]वाजिनः अन्नवन्तो वा [v]व्राधन्त वर्धन्ते । यद्वा लुप्तोपमा । वाजिनोऽश्वा इव । [v]ये रश्मयः [v]पत्वभिः पतनैः [v]शफानां [v]गोनां [v]व्रजा यूथानि [v]भुरन्त इच्छन्ति । आयता ज्वाला होमाय काङ्क्षन्त इत्यर्थः । ते[4] वर्धन्ते[4] ॥

नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।
ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥ ८ ॥

नवाः । नः । अग्ने । आ । भर । स्तोतृऽभ्यः । सुऽक्षितीः । इषः ।
ते । स्याम । ये । आनृचुः । त्वाऽदूतासः । दमेऽदमे । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ८ ॥

हे [v]अग्ने [v]स्तोतृभ्यः [v]नः अस्मभ्यं [v]नवाः स्तुत्या नूत्ना वा [v]सुक्षितीः सुनिवासाः सुप्रजा वा [v]इषः[5] उक्तलक्षणान्यन्नानि [v]आ [v]भर प्रयच्छ । [v]ये वयं [v]दमेदमे सर्वेषु यागगृहेषु त्वाम्

---

१. ख-ग-घ-च-ण-न-भ-तव; स-'तुभ्यं' नास्ति । २. ख-ग-घ-च-ण-भ-सह तुभ्यम । ३. ख-ग-च-ण-भ-स-'गार्हपत्यादिषु' नास्ति । ४. ख-ग-च-ण-न-भ-स-तेऽवर्धन्त । ५. ख-ग-च-ण - इषो वा ।

ᵛआनृचुः अर्चयन्ति[1] । ᵛते वयं ᵛत्वादूतासः त्वां दूतं फलसूचकं लब्धवन्तः सन्तः ᵛस्याम समृद्धा भूयास्म । दमे[2] दमे स्यामेति वा योज्यम्[3] ॥

आभिष्टविकेषूक्थ्येषु तृतीयसवने वैकल्पिकस्तोत्रियतृचे ' उभे सुश्चन्द्र ' इत्येषा तृतीया । सूत्रमुक्तम्[4] ॥

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥ ९ ॥

उभे इति । सुऽचन्द्र । सर्पिषः । दर्वी इति । श्रीणीषे । आसनि ।
उतो इति । नः । उत् । पुपूर्याः । उक्थेषु । शवसः । पते । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ९ ॥

हे ᵛसुश्चन्द्र शोभनाह्लादन शोभनहिरण्य वाग्ने ᵛउभे ᵛसर्पिषः पूर्णे ᵛदर्वी जुहूपभृतौ ᵛआसनि आस्ये ᵛश्रीणीषे श्रयसि पचसि[5] वा । ᵛउतो अपि च ᵛनः अस्मान् ᵛउक्थेषु यागेषु ᵛउत्पुपूर्याः उत्पूरय फलैः[6] । हे ᵛशवसस्पते बलस्य पालयितः ॥

एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।
दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं स्तोतृभ्य आ भर ॥ १० ॥

एव । अग्निम् । अजुर्यमुः । गीःऽभिः । यज्ञेभिः । आनुषक् ।
दधत् । अस्मे इति । सुऽवीर्यम् । उत । त्यत् । आशुऽअश्व्यम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ १० ॥

ᵛएव[7] उक्तरीत्या ᵛअग्निं ᵛगीर्भिः स्तुतिभिः ᵛयज्ञेभिः यज्ञैर्वा तत्साधनैर्हविर्भिर्वा ᵛआनुषक् अनुषक्तम्[8] ᵛअजुः[9] गच्छन्ति[10] । तथा कृत्वा ᵛयमुः[9] यमयन्ति स्थापयन्ति हविर्भिर्यजन्तीत्यर्थः । एवमात्रेयाः स्वान् परोक्षतया निर्दिशन्ति ॥ अजुर्यमुरित्यत्र[10] ' आख्यातमाख्यातेन क्रियासातत्ये ' (पा. सू. २. १. ७२ ग.) इति समासः[10] ॥ किंच ᵛअस्मे अस्मासु ᵛसुवीर्यं शोभनपुत्रादिकम् ᵛउत अपि च ᵛत्यत् तत् ᵛआश्वश्व्यम् । आशवोऽश्वा यस्य भवन्ति स आश्वश्वः । तस्य भाव आश्वश्व्यम् । तदपि ᵛदधत् धारयति ॥ ॥ २३ ॥

' सखायः सं वः ' इति दशर्चं सप्तमं सूक्तम् । आत्रेय[11] इष ऋषिः[11] । अन्त्या पङ्क्तिः शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । तथा चानुक्रान्तं—' सखाय इषः पङ्क्त्यन्तम् ' इति । प्रातरनुवाके

---

१. ख-ग-घ-च-ण-प-फ-भ- अर्चयन्तः । २. ख-ग-च-ण-प-फ-भ-' दमे...योज्यं ' नास्ति । ३. ख-ग-च-ण-फ-सूत्रितं च । ४. ख-ग-च-ण-न-फ-भ-स- सेवसि । ५. ख-ग-च-ण-भ-काले; स-फाले । ६. घ-एव एवम्; च-न-ल-स-एवम् । ७. त-अनुषक्तं संबद्धम् । ८. ख-ग-च-ण-प-फ-भ-अनुगच्छन्ति । ९. ख-ग-च-ण-प-फ-भ-अजुर्यमुः । १०. ख-ग-च-ण-न-भ-स-' अजु°...समासः ' नास्ति । ११. प-आत्रेयवसुश्रुत ऋषिः ।

आग्नेये क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चोत्तमावर्जमिदं सूक्तम् । सूत्रितं च—' सखायः सं वस्वाग्ने हविष्मन्त इति सूक्ते ' (आश्व. श्रौ. ४. १३) इति ॥

सखायः सं वः सम्यञ्चमिषं स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ १ ॥

सखायः । सम् । वः । सम्यञ्चम् । इषम् । स्तोमम् । च । अग्नये ।
वर्षिष्ठाय । क्षितीनाम् । ऊर्जः । नप्त्रे । सहस्वते ॥ १ ॥

हे [V]सखायः सखिभूता ऋत्विजः [V]वः यूयं [V]सं[1] संस्कुरुत । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच [V]सम्यञ्चम् [V]इषम् अन्नं [V]स्तोमं स्तोत्रं [V]चाग्नये [V]वर्षिष्ठाय अतिशयेन प्रवृद्धाय [V]क्षितीनां यजमानानामर्थाय वर्षिष्ठाय प्रवृद्धतमाय [V]ऊर्जो [V]नप्त्रे बलस्य न पातयित्रे तत्पुत्राय वा [V]सहस्वते बलवते संस्कुरुतेति ॥

कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने ।
अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥ २ ॥

कुत्र । चित् । यस्य । सम्ऽऋतौ । रण्वाः । नरः । नृऽसदने ।
अर्हन्तः । चित् । यम् । इन्धते । सम्ऽजनयन्ति । जन्तवः ॥ २ ॥

सोऽग्निः [V]कुत्र [V]चित् वर्तते इति शेषः । कुत्रास्ते । [V]यस्य अग्नेः [V]समृतौ संप्राप्तौ [V]रण्वाः रममाणाः [V]नरः नेतार ऋत्विजः । [V]नृषदने यागगृहे [V]अर्हन्तश्चित् । चिदिति पूजायाम् । अर्हन्तः पूज्याः पूजयन्तो वा सन्तः [V]यमिन्धते दीपयन्ति । तदर्थं [V]संजनयन्ति च अरण्यां [V]जन्तवः प्राणिनः । स कुत्रेति संबन्धः ॥

सं यदिषो वनामहे सं हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥ ३ ॥

सम् । यत् । इषः । वनामहे । सम् । हव्या । मानुषाणाम् ।
उत । द्युम्नस्य । शवसा । ऋतस्य । रश्मिम् । आ । ददे ॥ ३ ॥

[V]यत् यदा [V]इषः अन्नानि [V]सं [V]वनामहे संभजामहे । यदा च [V]मानुषाणां मनुष्याणाम्[2] अस्माकं [V]हव्या हवींषि अग्निः [V]सं सेवते [V]उत तदानीं [V]द्युम्नस्य द्योतमानस्यान्नस्य [V]शवसा बलेन

१. न-ल-स-' सं ' नास्ति । २. न-ल-स-' मनुष्याणां ' नास्ति ।

सामर्थ्येन ᵛऋतस्य उदकस्य ग्राहकं ᵛरश्मिमा ᵛदद्दे आदत्तेऽग्निः । फलजनकं[१] तेजः[१] स्वीकृतवान् इत्यर्थः । यद्वा । ᵛऋतस्य यज्ञस्य रश्मिं रश्मिवत् ग्राहकं स्तवम् आ ददे स्वीकरोति[२] ॥

स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते ।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥ ४ ॥

सः । स्म । कृणोति । केतुम् । आ । नक्तम् । चित् । दूरे । आ । सते ।
पावकः । यत् । वनस्पतीन् । प्र । स्म । मिनाति । अजरः ॥ ४ ॥

ᵛस ᵛस्म स खल्वग्निः ᵛकृणोति करोति ᵛकेतुं प्रज्ञानम् ᵛआ सर्वतः । कस्येत्युच्यते । चिदित्यर्थे । ᵛनक्तं ᵛचित् रात्रावपि ᵛदूरे ᵛआ ᵛसते । आ इति चार्थे । दूरेऽपि वर्तमानाय मनुष्याय । कदा । ᵛयत् यदा ᵛपावकः अयमग्निः ᵛअजरः अजीर्णोऽनभिभाव्यः सन् ᵛवनस्पतीन् पर्णांसि ᵛप्र ᵛस्म ᵛमिनाति प्रकर्षेण दहति । स्मेति पूरणः ॥

अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ।
अभीमह स्वर्जेन्यं भूमा पृष्ठेव रुरुहुः ॥ ५ ॥

अव । स्म । यस्य । वेषणे । स्वेदम् । पथिषु । जुह्वति ।
अभि । ईम् । अह । स्वर्जेन्यम् । भूम । पृष्ठाऽइव । रुरुहुः ॥ ५ ॥

ᵛयस्य[३] अग्नेः ᵛवेषणे परिचर्यायां ᵛपथिषु होममार्गेषु[४] रश्मिषु ᵛस्वेदं स्रवदाज्यम्[५] ᵛअव अधोमुखं ᵛजुह्वति अध्वर्यवः[६] तदानीम् ᵛईम्[७] एनमग्निम् ᵛअभि ᵛरुरुहुः ᵛअह । अभ्यारोहन्त्येवाज्यधाराः । अह इति विनिग्रहार्थीयः । ᵛस्वर्जेन्यं स्वोत्पन्नं ᵛभूम । बहु[८] भवतीति भूमापत्यम् । तत ᵛपृष्ठेव पितुः पृष्ठदेशानिव[९] । पुत्राः[१०] यथा पितुरङ्कम् आरोहन्ति[११] तद्वत ॥ ॥ २४ ॥

यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ।
प्र स्वादनं पितूनामस्तेवातिं चिदायवे ॥ ६ ॥

यम् । मर्त्यः । पुरुऽस्पृहम् । विदत् । विश्वस्य । धायसे ।
प्र । स्वादनम् । पितूनाम् । अस्तेऽवातिम् । चित् । आयवे ॥ ६ ॥

---

१. ख-ग-च-ण-फ-फलजनकत्वं न; न-फलजनकत्वम्; भ-फलजनकत्वेन । २. ग-च-त-न-भ-स-स्वीकरोमि । ३. ख-ग-ण-न-भ-स-अस्य । ४. त-होमाग्निषु । ५. ख-ग-च-ण-भ-स्रवदाज्यमीमेनम् । ६. ख-ग-च-ण-फ-भ-अध्वर्यवः । दृष्टान्तः । ७. ख-ग-च-ण-भ-ल-स-'ईम्' नास्ति । ८. ख-ग-च-ण-न-भ-'बहु' नास्ति । ९. ख-ग-च-ण-भ-पृष्ठदेशे । १०. ख-ग-च-ण-भ-पुत्रः । ११. ख-ग-च-ण-भ-आरोहति ।

vयम् अग्निं vपुरुस्पृहं बहुभिः स्पृहणीयं[१] vविदत् वेत्ति । vमर्त्यः यजमानः vविश्वस्य vधायसे सर्वस्य व्यापारार्थं[२] vपितूनाम् अन्नानां vप्र vस्वादनं प्रकर्षेण स्वादूकर्तारम् vअस्ततातिम् अस्ते गृहे निवासकर्तारम् vआयवे अन्नार्थं[३] यजमानार्थं वा । vचित्[४] पूरणः[४] ॥

स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ।
हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥ ७ ॥

सः । हि । स्म । धन्व । आऽक्षितम् । दाता । न । दाति । आ । पशुः ।
हिरिऽश्मश्रुः । शुचिऽदन् । ऋभुः । अनिभृष्टऽतविषिः ॥ ७ ॥

vस vहि vष्म[५] स खल्वग्निः vधन्व निरुदकप्रदेशम् vआक्षितं तृणकाष्ठादिभिराक्षिप्तम् vआ vदाति सर्वतः खण्डयति दहतीत्यर्थः । vदाता तृणादिखण्डयिता vपशुः vन पशुरिव । पशुर्यथा तृणजातं क्रमेण भक्षयति तद्वत् । vहिरिश्मश्रुः हिरण्यश्मश्रुः vशुचिदन् दीप्तदन्तः vऋभुः[६] उरु भवन् । महानित्यर्थः[६] । vअनिभृष्टतविषिः अपीडितबलः ॥

शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते ।
सुषूरसूत माता क्राणा यदानशे भगम् ॥ ८ ॥

शुचिः । स्म । यस्मै । अत्रिऽवत् । प्र । स्वधितिःऽइव ।
रीयते । सुऽसूः । असूत । माता । क्राणा । यत् । आनशे । भगम् ॥ ८ ॥

अयमग्निः vशुचिः vष्म दीप्तः खलु । vयस्मै अग्नये vअत्रिवत् अत्रिरिव यजमानो[७] हविर्दातुं[७] vप्र vरीयते प्रगच्छति । यद्वा । स्मेति पूरणः । शुचिर्यस्मै ॥ प्रथमार्थे चतुर्थी ॥ दीप्तो योऽत्रिवत् । अत्ति तृणमित्यत्रिः पशुः । स इव । स यथा तृणानि खादमानो गच्छति तद्वद्दहतीत्यर्थः । vस्वधितिरिव परशुरिव छिन्दन् । vसुषूः सुप्रसवा vमाता अरणिः vअसूत vक्राणा कुर्वाणं जगदुपकारकम्[८] । vयत् यस्मात् य इति वा । योऽग्निः vभगम् अन्नम् vआनशे अश्नुते ।

आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ।
एषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥ ९ ॥

आ । यः । ते । सर्पिःऽआसुते । अग्ने । शम् । अस्ति । धायसे ।
आ । एषु । द्युम्नम् । उत । श्रवः । आ । चित्तम् । मर्त्येषु । धाः ॥ ९ ॥

१. त–स्पृहणीयमग्निम् । २. न-ल-स-व्याप्त्यर्थम । ३. स–मित्रार्थम । ४. ग-ङ-स- ' चित् पूरणः ' नास्ति । ५. ख-ग-च-ण–स्म । ६. ख-ग-च-ण-प-फ-भ–ऋभुर्महान् । ७. ख-ग-च-ण-फ-भ–अत्र; प–अन्नम् । ८. त–जगदुपकारम् ।

हे [v]सर्पिरासुते घृताक्तान्न[१] [v]अग्ने [v]यः त्वम् [v]आ सर्वतो भवसि तादृशाय [v]धायसे सर्वस्य धात्रे [v]ते तुभ्यं [v]शमस्ति सुखमस्ति । स्तुतेः सकाशात् । तथा चेत् [v]एषु [v]मर्त्येषु स्तोतृष्वात्रेयेषु [v]द्युम्नं यशः [v]आ [v]धाः आधेहि । [v]उत अपि च [v]श्रवः अन्नम् आ धाः । [v]चित्तं त्वदीयामनुग्रहबुद्धिमपि [v]आ धाः ॥

इति चिन्मन्युमधिजस्त्वादातमा पशुं ददे ।
आदग्ने अपृणतोऽत्रिः सासह्यादस्यूनिषः सासह्यान्नॄन् ॥ १० ॥

इति । चित् । मन्युम् । अधिजः । त्वाऽदातम् । आ । पशुम् । ददे ।
आत् । अग्ने । अपृणतः । अत्रिः । ससह्यात् । दस्यून् । इषः । ससह्यात् । नॄन् ॥ १० ॥

[v]इति[२] [v]चित् इत्थं कृतप्रकारेण [v]मन्युं मननसाधनं स्तोत्रम् [v]अधिजः । अधृतम्[३] अन्यैरभिव्यतिरिक्तैः अधृष्यं[४] वा जनयिता ऋषिः [v]त्वादातं त्वया दातव्यं [v]पशुम् [v]आ [v]ददे आदत्ते । आददीत वा । [v]आत् अनन्तरमेव अग्नेः [v]अपृणतः अददतः[५] [v]दस्यून् [v]अत्रिः तद्नोत्रः [v]इषः [v]सासह्यात् भृशमभिभवेत् । इषः एषृन्[६] [v]नॄन् विरोधिनः [v]सासह्यात् । पुनरुक्तिरादरार्था ॥ ॥ २५ ॥

'त्वामग्ने' इति सप्तर्चमष्टमं सूक्तमात्रेयस्य इषस्य[७] आर्षं जागतमाग्नेयम् । 'त्वामग्ने सप्त जागतम्' इत्यनुक्रमणिका । प्रातरनुवाके आग्नेये क्रतौ जागते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । तथा च सूत्रं—'जनस्य गोपास्त्वामग्न ऋतायवः' (आश्व. श्रौ. ४. १३) इति ॥

त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥ १ ॥

त्वाम् । अग्ने । ऋतऽयवः । सम् । ईधिरे । प्रत्नम् । प्रत्नासः । ऊतये । सहःऽकृत ।
पुरुऽचन्द्रम् । यजतम् । विश्वऽधायसम् । दमूनसम् । गृहऽपतिम् । वरेण्यम् ॥ १ ॥

हे [v]सहस्कृत बलस्य कर्तः [v]अग्ने [v]प्रत्नं पुरातनं [v]त्वां [v]प्रत्नासः पुरातनाः [v]ऋतायवः यज्ञकामा ऋषयः [v]ऊतये स्वरक्षणाय [v]समीधिरे सम्यगदीपितवन्तः । कीदृशं त्वाम् । [v]पुरुश्चन्द्रं बहुधनम् अतिशयेनाह्लादकं वा [v]यजतं यष्टव्यं [v]विश्वधायसं बहूनां [v]दमूनसं दानमनसं [v]गृहपतिं यजमानगृहस्य पालकं [v]वरेण्यं वरणीयम् ॥

१. फ–घृताक्तान्न । २. ख-ग-च-ण-प-फ-भ–हे अग्ने इति । ३. ख-ग-च-ण-फ– न धृतम् । ४. ख-ग-च-ण-फ–अधिजः अधृष्यः; त-न-ल-स–अधिजः अधृष्यम्; भ–अधिजः अधृष्य । ५. त–अदत् । ६. ख-ग-व-ण-त-प-फ-भ–द्वेष्टॄन् । ७. ख-ग-च-ण-भ–'इषस्य' नास्ति; स–वसुश्रुतस्य ।

त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥ २ ॥

त्वाम् । अग्ने । अतिथिम् । पूर्व्यम् । विशः । शोचिःऽकेशम् । गृहऽपतिम् । नि । सेदिरे ।
बृहत्ऽकेतुम् । पुरुऽरूपम् । धनऽस्पृतम् । सुऽशर्माणम् । सुऽअवसम् । जरत्ऽविषम् ॥२॥

हे [v]अग्ने [v]त्वां [v]विशः यजमानाः [v]गृहपतिं गृहस्वामिनं [v]नि [v]षेदिरे । गार्हपत्यरूपेण स्थापितवन्त इत्यर्थः । कीदृशं त्वाम् । [v]अतिथिम् अतिथिवत्पूज्यं [v]पूर्व्यं पुरातनं [v]शोचिष्केशं दीप्तज्वालं [v]बृहत्केतुं प्रभूतप्रज्ञानं[1] [v]पुरुरूपम् आहवनीयादिरूपेण बहुरूपं [v]धनस्पृतं धनानां स्पर्तारं[2] [v]सुशर्माणं शोभनसुखं [v]स्ववसं सुरक्षणं [v]जरद्विषं जरतां वृक्षाणां[3] व्यापकं जीर्णोदकं वा ॥

अग्नीनां परस्परं[4] संसर्गे[4] विविचयेऽग्नये काचिदिष्टिः । तत्र ' त्वामग्ने मानुषीः ' इति याज्या । सूत्रितं च—' त्वामग्ने मानुषीरीळते विशोऽग्न आयाहि वीतये ' (आश्व. श्रौ. ३. १३) इति ॥

त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥ ३ ॥

त्वाम् । अग्ने । मानुषीः । ईळते । विशः । होत्राऽविदम् । विविचिम् । रत्नऽधातमम् ।
गुहा । सन्तम् । सुऽभग । विश्वऽदर्शतम् । तुविऽस्वनसम् । सुऽयजम् । घृतऽश्रियम् ॥ ३ ॥

हे [v]अग्ने [v]सुभग शोभनधन [v]त्वां [v]मानुषीः [v]विशः मानुषसंबन्धिन्यः सर्वाः प्रजाः [v]ईळते स्तुवन्ति । कीदृशं त्वाम् । [v]होत्राविदं होत्राणां[5] होमानां सप्तहोत्रकाणां वा वेत्तारं [v]विविचिं विवेचकं सदसतोः [v]रत्नधातमं रमणीयानां धनानां दातृतमं [v]गुहा गुहायामरण्यां हृदयेषु[6] वा [v]सन्तं सर्वदा वर्तमानं [v]विश्वदर्शतं सर्वैः[7] द्रष्टव्यं [v]तुविष्वणसं प्रभूतध्वनिं [v]सुयजं सुष्ठु यष्टारं [v]घृतश्रियं घृतं श्रयन्तम् ॥

त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ॥ ४ ॥

त्वाम् । अग्ने । धर्णसिम् । विश्वधा । वयम् । गीःऽभिः । गृणन्तः । नमसा । उप । सेदिम ।
सः । नः । जुषस्व । सम्ऽइधानः । अङ्गिरः । देवः । मर्तस्य । यशसा । सुदीतिऽभिः ॥ ४ ॥

हे [v]अग्ने [v]धर्णसिं सर्वस्य धारकं [v]त्वां [v]वयम् आत्रेया वा[8] [v]विश्वधा बहुप्रकारेण [v]गीर्भिर्गृणन्तः स्तुवन्तः [v]नमसा नमस्कारेण [v]उप [v]सेदिम उपसन्ना भवेम । [v]सः त्वं [v]नः अस्मान् [v]जुषस्व सेवस्व

---

१. प–प्रभूतप्रज्ञम् । २. ख-ग-च-ण-फ–संस्पर्शितारम् ; घ-प-भ–संपर्कितारम् । ३. ख-ग-च-ण-प-फ-भ–रक्षसाम् ; न-स–दक्षाणाम् ; ल-रक्षणाम् । ४. त–परस्परसंसर्गे । ५. घ-न-ल-स–' होत्राणां ' नास्ति । ६. ख-ग-च-ण-फ-भ–हृदये । ७. त–विश्वैः । ८. प–' वा ' नास्ति ।

धनादिभिः । [v]समिधानः सम्यग्दीप्तो दीप्यमानोऽस्माभिर्हं [v]अङ्गिरः सर्वत्र गन्तरङ्गिरसः पुत्र वा[१] [v]देवः दीप्यमानस्त्वं [v]मर्तस्य यजमानस्य [v]यशसा [v]सुदीतिभिः ज्वालाभिः सह जुषस्व ॥

त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत ।
पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥ ५ ॥

त्वम् । अग्ने । पुरुऽरूपः । विशेऽविशे । वयः । दधासि । प्रत्नऽथा । पुरुऽस्तुत ।
पुरूणि । अन्ना । सहसा । वि । राजसि । त्विषिः । सा । ते । तित्विषाणस्य । न । आऽधृषे ॥ ५ ॥

हे [v]अग्ने [v]त्वं [v]पुरुरूपः सन् [v]विशेविशे सर्वस्मै यजमानाय [v]प्रत्नथा पुराण इव [v]वयः अन्नं [v]दधासि धारयसि । हे [v]पुरुष्टुत बहुभिः स्तुत[२] [v]पुरूणि बहूनि [v]अन्ना अन्नानि चरुपुरोडाशादीनि [v]सहसा बलेन [v]वि [v]राजसि ईश्वरो भवसि स्वीकर्तुम् । [v]तित्विषाणस्य दीप्तस्य [v]ते तव [v]सा प्रसिद्धा [v]त्विषिः दीप्तिः [v]नाधृषे अन्यैरधृष्या भवति ॥

त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।
उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥ ६ ॥

त्वाम् । अग्ने । सम्ऽइधानम् । यविष्ठ्य । देवाः । दूतम् । चक्रिरे । हव्यऽवाहनम् ।
उरुऽज्रयसम् । घृतऽयोनिम् । आऽहुतम् । त्वेषम् । चक्षुः । दधिरे । चोदयत्ऽमति ॥ ६ ॥

हे [v]यविष्ठ्य युवतम [v]अग्ने [v]समिधानं सम्यगिध्यमानं [v]त्वां [v]हव्यवाहनं[३] हविषां वोढारं [v]दूतं [v]चक्रिरे कृतवन्तः [v]देवाः । त्रयाणामग्नीनां मध्ये हव्यवाहनः खलु पूर्वं देवैर्हविर्वहनाय दूतः कृतः । ' हव्यवाहनो[४] देवानाम् ' (तै. सं. २. ५. ८. ६) इति हि श्रुतिः । किंच [v]उरुज्रयसं प्रभूतवेगं [v]घृतयोनिम् । घृतं[५] योनिः कारणं यस्य तम् । [v]आहुतं[६] त्वां [v]चोदयन्मति । चोदयन्ती मतिर्यस्य तच्चोदयन्मति । [v]त्वेषं दीप्तं [v]चक्षुः[७] उक्तलक्षणं[७] सर्वप्रकाशकं चक्षुःस्थानीयं कृत्वा [v]दधिरे देवा मनुष्याश्च । मत्या हि चक्षुश्चोद्यते ॥

त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।
स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥ ७ ॥

त्वाम् । अग्ने । प्रऽदिवः । आऽहुतम् । घृतैः । सुम्नऽयवः । सुऽसमिधा । सम् । ईधिरे ।
सः । ववृधानः । ओषधीभिः । उक्षितः । अभि । ज्रयांसि । पार्थिवा । वि । तिष्ठसे ॥ ७ ॥

---

१. ख-ग-च-ण-न-प-फ-भ-' वा ' नास्ति । २. न-ल-स-स्तुत्य । ३. ख-ग-च-ण-फ-देवाः हव्यवाहम् ; घ-त-न-प-भ-ल-स-देवाः हव्यवाहनम् । ४. ख-ग-घ-च-ण-फ-भ-हव्यवाहः । ५. त-घृतमेव । ६. त-आहुतं सर्वतः । ७. ख-प-फ-भ-' चक्षुरुक्तलक्षणं ' नास्ति ।

हे ᵛअग्ने ᵛघृतैः ᵛआहुतं ᵛत्वां ᵛप्रदिवः पुरातनाः[1] ᵛसुम्नायवः सुखमिच्छन्तो यजमानाः ᵛसुषमिधा शोभनेन इध्मेन[2] ᵛसमीधिरे सम्यक् दीपितवन्तः । ᵛसः त्वं ᵛवावृधानः वर्धमानः ᵛओषधीभिः ᵛउक्षितः सिक्तः ᵛत्रयांसि अन्नानि ᵛपार्थिवा पार्थिवान् वृक्षान् । यद्वा । पार्थिवेति त्रयोविशेषणम् । पार्थिवानि चरुपुरोडाशादिकानि ᵛअभि ᵛवि ᵛतिष्ठसे अभिव्याप्य वर्तसे ॥ ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

---

१. ख-ग-भ-प्रातनाः; घ-प-ल-पुराणाः; च-फ-प्राक्तनाः । २. त-इन्धनेन ।

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः[१] सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्[२] ॥
यस्य[३] निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[४] ॥

पञ्चमे मण्डले प्रथमेऽनुवाके पूर्वमष्टौ सूक्तानि व्याख्यातानि । ' त्वामग्ने हविष्मन्तः ' इति सप्तर्चं नवमं सूक्तम् आत्रेयस्य[३] गयस्यार्षम्[४] । सप्तमीपञ्चम्यौ पङ्क्ती शिष्टाः[४] अनुष्टुभः । अग्निर्देवता । तथा[५] चानुक्रम्यते[६]—' त्वामग्ने गयोऽन्त्यापञ्चम्यौ पङ्क्ती ' इति । प्रातरनुवाके आश्विनशस्त्रे[६] च[६] एतदादिके द्वे सूक्ते शंसनीये । तथैव सूत्रितं—' त्वामग्ने हविष्मन्त इति सूक्ते ' (आश्व. श्रौ. ४. १३) इति[७] ॥

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥ १ ॥

त्वाम् । अग्ने । हविष्मन्तः । देवम् । मर्तासः । ईळते ।
मन्ये । त्वा । जातऽवेदसम् । सः । हव्या । वक्षि । आनुषक् ॥ १ ॥

हे [v]अग्ने [v]त्वां [v]देवं दीप्यमानं [v]हविष्मन्तः होमसाधनद्रव्यरूपेता: [१]मर्तासः मर्त्याः [v]ईळते स्तुवन्ति । अहं च[८] [v]जातवेदसम्[९] । जातमुत्पन्नं चराचरं भूतजातं वेत्तीति जातवेदाः । अथवा जातानि स्थावरजङ्गमात्मकानि एनं विदुरिति जातवेदाः । यद्वा । वेद इति धननाम । जातं सर्वं वेदो धनं यस्यासौ जातवेदाः । एवंविधं[१०] [v]त्वा त्वां [v]मन्ये स्तौमि । मनिरत्र स्तुत्यर्थे वर्तते धातूनामनेकार्थत्वात् । [v]सः त्वं[११] [v]हव्या हवनसाधनानि[१२] हवींषि [v]आनुषक् निरन्तरतया अनुषक्तं यथा तथा [v]वक्षि वहसि ॥ हविष्मन्तः । हविःशब्दः औणादिकइसूप्रत्ययान्तः । प्रत्ययस्वरेणान्तोदात्तः । ' तदस्यास्ति° ' इति मतुप् । पदसंज्ञाया अपवादत्वेन ' तसौ मत्वर्थे ' इति भसंज्ञायां रुत्वाभावः । मतुब्जसोरनुदात्तत्वात् प्रत्ययस्वर एव शिष्यते । देवम्[१३] । अच्प्रत्ययान्तत्वात् देवशब्दोऽन्तोदात्तः । मर्तासः[१४] । ' मृङ् प्राणत्यागे ' । ' असिहसिमृङ्° ' इत्यादिना तन् । गुणः । मर्तेः । जसेरसुक् । मर्तासः । निरवादाद्युदात्तः । ईळते[१५] । ' ईड स्तुतौ ' । अदादित्वाच्छपो लुक् । ' आत्मनेपदेष्वनतः ' । टेरेत्वम् ।

---

१. ख-च-ज-झ-ण-त-प-फ-ब-र-श–' वागीशाद्याः ... गजाननं ' नास्ति । २. ज-प-फ-ब-र–' यस्य ...°महेश्वरं ' नास्ति । ३. ग-घ-ज-प-फ-ब– आत्रेय ऋषिः । ४. त-न-श– शिष्टाः पङ्क्त्यन्तस्य च सूक्तस्येति परिभाषया । ५. ग-ज-प-फ-ब-र-श–' तथा चानुक्रम्यते ' नास्ति । ६. ख-च-झ-ण-भ-र–आश्विनशस्त्रे; प-फ-ब–' आश्विनशस्त्रे च ' नास्ति । ७. न–प्रातरनुवाकन्यायेनेति च । ८. प– तु । ९. ख-च-झ-ण-भ-र–जातवेदसं यम् । १०. प-फ-ब– तमेवंविधम् । ११. न-र– च । १२. ख-झ– हवनसाधनानि हव्यानि । १३. ख-च-झ-ण-न-भ-र-श–' देवं ' नास्ति । १४. ख-च-झ-ण-न-भ-र-श–' मर्तासः ' नास्ति । १५. ख-च-झ-ण-न-भ-र–' ईळते ' नास्ति ।

अत्र ङकारस्य अध्येतृसंप्रदायप्राप्तो लकारः । लसार्वधातुकानुदात्तत्वेन धातुस्वरे प्राप्ते आष्टमिको निघातः । मन्ये । श्यनो नित्त्वात् आद्युदात्तत्वम् । त्वा । ' युषि मिश्रणे ' । मदिक्प्रत्ययान्तो युष्मच्छब्दः प्रत्ययस्वरेणान्तोदात्तः । ' त्वमावेकवचने ' इति मपर्यन्तस्य त्वादेशः । ' द्वितीयायां च ' (पा. सू. ७. २. ८७) इत्याकारः । ' एकादेश उदात्तेनोदात्तः ' इत्येकादेशोऽप्युदात्त एव । ' त्वामौ द्वितीयायाः ' इति त्वादेशः । स्थानिवद्भावेनान्तोदात्तत्वे प्राप्ते ' अनुदात्तं सर्वमपादादौ ' इत्यनुदात्तत्वम् । जातवेदसम् । ' जनी प्रादुर्भावे ' । क्तः । ' श्वीदितो निष्ठायाम् ' इतीट्प्रतिषेधः । ' जनसनखनां सञ्झलोः ' इत्यात्वम् । प्रत्ययस्वरेणान्तोदात्तः । वेदस्शब्दोऽपि असुन्प्रत्ययान्तत्वात् आद्युदात्तः । कर्मधारयपक्षे समासान्तोदात्तापवादत्वेन ' तत्पुरुषे तुल्यार्थ° ' इत्यादिना पूर्वपदप्रकृतिस्वरत्वे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वम् । तदपवादत्वेन ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति पूर्वपदप्रकृतिस्वरत्वम् । बहुव्रीहिपक्षे ' बहुव्रीहौ प्रकृत्या पूर्वपदम् ' इति । हव्या । हवमर्हतीत्यस्मिन्नर्थे ' यः ' इत्यनुवर्तमाने ' छन्दसि च ' इति यः । नपुंसकत्वाच्छिरादेशः । ' शेश्छन्दसि बहुलम् ' इति लोपः । प्रत्ययलक्षणेन नुम् । दीर्घनलोपौ । प्रत्ययस्वरेणान्तोदात्तः । वक्षि । ' वह प्रापणे ' । सिप् । लुगनुवृत्तौ ' बहुलं छन्दसि ' इति शपो लुक् । ढत्वकत्वषत्वानि । सिपः पित्त्वादनुदात्तत्वेन[1] धातुस्वरेण आद्युदात्तत्वे[2] प्राप्ते निघातः । आनुषक्[3] । अनुपूर्वस्य षञ्जेः क्विप् नकारलोपः कुत्वं च । धात्वादेः सकारस्य ' उपसर्गात्सुनोति° ' इत्यादिना षत्वम् । दीर्घश्छान्दसः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥ २ ॥

अग्निः । होता । दास्वतः । क्षयस्य । वृक्तऽबर्हिषः ।
सम् । यज्ञासः । चरन्ति । यम् । सम् । वाजासः । श्रवस्यवः ॥ २ ॥

[v]यम् अग्निं [v]यज्ञासः सर्वे यज्ञाः [v]सं [v]चरन्ति सहिता गच्छन्ति । [v]श्रवस्यवः यजमानस्य प्रभूतां कीर्तिं संपादयन्तः [v]वाजासः हवींषि यमग्निं [v]सं चरन्ति प्राप्नुवन्ति । एवंविशिष्टः [v]अग्निः [v]दास्वतः हविष्प्रक्षेपणादिदानवतः [v]वृक्तबर्हिषः । वृक्तानि लूनानि बर्हींषि दर्भा येनासौ वृक्तबर्हिः[4] । तस्य [v]क्षयस्य । क्षियन्ति निवसन्त्यस्मिन् स्वर्गसाधनफलानीति क्षयः । तस्य[5] यजमानस्य यागार्थं [v]होता देवानामाह्वाता भवति ॥ दास्वतः । ' दा दाने ' । असुन्प्रत्ययान्तः । मतुपः आदुपधत्वात्[6] वत्वम् । धातुस्वरेणाद्युदात्त एव । क्षयस्य । ' क्षि निवासगत्योः ' । ' क्षयो निवासे ' इत्याद्युदात्तत्वम् । वृक्तबर्हिषः । ' वृजी वर्जने ' । वर्जनम् अग्रोपचारात्[7] छेदनम् । निष्ठा । प्रत्ययस्वरेणान्तोदात्तः । बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् । यज्ञासः । यज्ञशब्दः ' यजयाच° ' इत्यादिना नङ्प्रत्ययान्तः अन्तोदात्तः । चरन्ति । ' चर गतिभक्षणयोः ' । अदुपदेशाल्लसार्वधातुकानुदात्तत्वम् । ' यद्वृत्तान्नित्यम् ' इति निघाताभावः । वाजासः । वजेर्घञ् । वाजः । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम्[8] । छान्दसत्वात्

---

१. च-ण-पित्त्वादनुदात्तत्वम् । २. ख-च-झ-ण-न-भ-आद्युदात्ते । ३. ख-च-झ-ण-न-भ-र-श-' आनुषक् ' नास्ति । ४. ख-च-झ-ण-भ-र-वृक्तबर्हिषः । ५. ग-घ-च- यस्य । ६. ख-झ-त- आदुपधात्वात् । ७. ख-च-चोपचारात् । ८. ख-च-झ-ण-न-भ-श-इत्यन्तोदात्तः ।

'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तः । अवस्यवः । 'छन्दसि परेच्छायाम्' इति क्यच् । 'क्याच्छन्दसि' इत्युप्रत्ययः । प्रत्ययस्वरेणान्तोदात्तः ॥

उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥ ३ ॥

उत । स्म । यम् । शिशुम् । यथा । नवम् । जनिष्ट । अरणी इति ।
धर्तारम् । मानुषीणाम् । विशाम् । अग्निम् । सुऽअध्वरम् ॥ ३ ॥

vउत vस्म अपि च vमानुषीणां मनोर्जातानां vविशाम् । विशन्ति प्रविशन्ति गर्भाशयमिति विशः प्रजाः । तासां vधर्तारम् आहारादिपाकद्वारेण शरीरधातूनां पोषकं vस्वध्वरं शोभनयज्ञं vयम् vअग्निम् vअरणी द्वे अरणी vनवं नूतनं vशिशुं vयथा अपत्यमिव vजनिष्ट अजनिषाताम् । अरणी प्रजानां पोषणार्थं चैतमग्निम्[1] असृजतामित्यर्थः ॥ शिशुम् । 'शो तनूकरणे' । 'आदेचः०' इत्यादिना आत्वम् । 'शः किन् सन्वच्च' इत्युप्रत्ययः सन्वद्भावश्च । द्विर्भावोऽभ्यासस्य ह्रस्वश्च । 'सन्यतः' इतीत्वम् । 'आतो धातोः' इत्याकारलोपः[2] । नित्त्वादाद्युदात्तः । यथा । 'यथेति पादान्ते' इति सर्वानुदात्तः । जनिष्ट । 'जनी प्रादुर्भावे' । लुङ् । छान्दसत्वाद्वचनव्यत्ययः । अरणी । 'ऋ गतौ' । 'अर्तिसृभृधृधम्यश्यवितॄभ्योऽनिः' इति अनिप्रत्ययः[3] आद्युदात्तः[4]। आभ्यामिति गच्छत्यग्निरित्यरणी । कथमपादानार्थे औणादिकोऽनिः । 'ताभ्यामन्यत्रोणादयः' (पा. सू. ३. ४. ७५) इति नियमात् भीमादित्वात् सिद्धम् । vमानुषीणाम् । 'मनोर्जातावञ्यतौ पुक्च' इति अञ्प्रत्ययः पुगागमश्च । 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वम् । विशाम् । 'विश प्रवेशने' । कर्तरि क्विप् । 'सावेकाचः०' इति विभक्तेः उदात्तत्वम् । स्वध्वरम् । हिंसार्थस्य ध्वरतेः पचाद्यच् । न विद्यते ध्वरो यागहिंसा यस्मिन्नित्यध्वरः । बहुव्रीहिस्वरापवादत्वेन 'नञ्सुभ्याम्' इत्यन्तोदात्तः ॥

उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥ ४ ॥

उत । स्म । दुःऽगृभीयसे । पुत्रः । न । ह्वार्याणाम् ।
पुरु । यः । दग्धा । असि । वना । अग्ने । पशुः । न । यवसे ॥ ४ ॥

vउत vस्म अपि च vह्वार्याणां कुटिलं गच्छतां सर्पाणाम् । यद्वा । आस्कन्दितादिगतिविशेषेण वक्रगमनानामश्वानां vपुत्रो vन पुत्र इव बालसर्प इवाशिक्षितबालाश्व इव वा vदुर्गृभीयसे दुःखेन गृह्यसे । हे vअग्ने vयः त्वं vपुरु बहूनि[4] vवना वनानि vदग्धासि दाहको भवसि । कथमिव । vयवसे तृणे vपशुर्न पशुरिव । अयमर्थः । अत्यन्तक्षुधार्तः पशुस्तृणविषये विसृष्टः सन् यथा सर्वं भक्षयति

---

१. ख-च-ङ्ग-ण-त-न-भ-र-चैनमग्निम्; श-चैवमग्निम् । २. त-इत्याकारलोपः । णि धान्ये नित् । अस्मात्सूत्रान्नित्यनुवर्तते । ३. ख-च-ण-भ-प्रत्ययान्तोदात्तः; ङ्ग-त-र-अनिः प्रत्ययान्तोदात्तः; न-अनि-प्रत्ययान्तोदात्तः । ४. प-फ-ब-श-पुरूणि ।

तद्वदित्यर्थः ॥ दुर्गृभीयसे । ' ग्रह उपादाने ' । यक् । ' ध्रुव ईट् ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति ईडागमः । ग्रहिज्यादिना[1] संप्रसारणम् । ' हृग्रहोर्भश्छन्दसि ' इति भकारः । निघातः । ह्वार्याणाम् । ' ह्वृ कौटिल्ये ' । ऋहलोर्ण्यत् । आदिवृद्धिः । ' तित्स्वरितम् ' इति स्वरितत्वम् । पुरु । ' पॄ पालनपूरणयोः ' । ' पृभिदिव्यधिगृधिधृषिदृशिभ्यः ' इति कुप्रत्ययः । ' उदोष्ठ्यपूर्वस्य ' इत्युत्वम् । प्रत्ययस्वरेण अन्तोदात्तत्वम्[2] । असि । ' यद्वृत्तान्नित्यम् ' इति न निघातः ॥

अध॑ स्म॒ यस्यार्चयः॒ सम्यक्सं॒यन्ति॑ धू॒मिनः॑ ।
यदी॒मह॒ त्रितो॑ दि॒व्युप॒ ध्मातेव॒ धम॑ति॒ शिशी॑ते॒ ध्मात॑री॒ यथा ॥ ५ ॥

अध॑ । स्म॒ । यस्य॑ । अ॒र्चयः॑ । स॒म्यक् । स॒म्ऽयन्ति॑ । धू॒मिनः॑ ।
यत् । ई॒म् । अह॑ । त्रि॒तः । दि॒वि । उप॑ । ध्माताऽइव । धम॑ति । शिशी॑ते । ध्मात॑रि । यथा॑ ॥ ५ ॥

[v]अध [v]स्म अपि च [v]धूमिनः धूमवतः [v]यस्य अग्नेः [v]अर्चयः अर्चींषि [v]सम्यक् शोभनं [v]संयन्ति सर्वतः प्राप्नुवन्ति [v]त्रितः त्रिषु स्थानेषु ततो व्याप्तः त्रीणि स्थानानि वा अतीत्य [v]दिवि अन्तरिक्षे [v]यत् यदा [v]ईम् अयमात्मानम् [v]उप [v]धमति उपवर्धयति[3] तदा ज्वालाः सर्वतो निर्गच्छन्तीत्यर्थः । कथमिव । [v]ध्मातेव[4] । कर्मारो यथा भस्त्रादिभिरग्निं संवर्धयति तद्वत्स्वात्मानं वर्धयतीत्यर्थः । किंच [v]ध्मातरि [v]यथा । यथा ध्मातृसमीपे[5] विद्यमानोऽग्निस्तेन ध्मायमानः स आत्मानं [v]शिशीते तीक्ष्णीकरोति तद्वत्स्वयमेव स्वात्मानं तीक्ष्णीकरोतीत्यर्थः । [v]अह इति पादपूरणः ॥ यन्ति । ' इण् गतौ ' । यच्छब्दयोगान्निघाताभावः । धमति । ' ध्मा शब्दाग्निसंयोगयोः ' । पाघ्रादिना धमादेशः । पूर्ववत् निघाताभावः । शिशीते । ' शो तनूकरणे ' । व्यत्ययेनात्मनेपदी । ' श्लौ ' इत्यनुवर्तमाने[6] ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' आदेच उपदेशे शिति ' इति आत्वम् । ' श्लौ ' इति द्विर्वचनम् । ' बहुलं छन्दसि ' इत्यभ्यासस्य ह्रस्वम् । ' उभे अभ्यस्तम् ' इत्यभ्यस्तसंज्ञायाम् आतः ' ई हल्यघोः ' इति ईत्वम् । तिङ उत्तरत्वान्निघाताभावः ॥

तवा॒हम॑ग्न ऊ॒तिभि॑र्मि॒त्रस्य॑ च॒ प्रश॑स्तिभिः ।
द्वेषो॑युतो॒ न दु॑रि॒ता तु॒र्याम॒ मर्त्या॑नाम् ॥ ६ ॥

तव॑ । अ॒हम् । अ॒ग्ने॒ । ऊ॒तिऽभिः॑ । मि॒त्रस्य॑ । च॒ । प्रश॑स्तिऽभिः ।
द्वेषः॑ऽयुतः॑ । न । दुः॒ऽइ॒ता । तु॒र्याम॑ । मर्त्या॑नाम् ॥ ६ ॥

हे [v]अग्ने [v]अहं [v]मित्रस्य सर्वेषां मित्रभूतस्य[7] [v]तव [v]ऊतिभिः युष्मत्कर्तृकरक्षणैः[7] युष्मत्प्रशस्तिभिः[8] [v]च अस्मत्कृतैः[8] स्तोत्रैश्च[9] [v]मर्त्यानां शत्रुभूतानां मनुष्याणां [v]दुरिता दुरितानि तत्कर्तृकाणि पापसाधन-

---

१. न-र-ग्रह्यादिना; श-ग्रहिज्येत्यादिना । २. ख-च-ञ-ण-न-भ-श-अन्तोदात्तः । ३. ञ-र-उपवर्धयते । ४. न-र-श-ध्मातेव कर्मार इव । ५. त- ध्मातुः समीपे । ६. ख-च-ञ-ण-न-भ-र-अनुवर्तमाने । ७. प-फ-ब-मित्रस्य तवोतिभिः रक्षाभिः । ८. न-प-फ-ब- प्रशस्तिभिः । ९. न-स्तुतिभिश्च ।

कर्माणि [v]द्वेषोयुतो [v]न द्वेषयुक्तान् शत्रूनिव [v]तुर्याम[1] तरेयम् । अयमर्थः । त्वद्रक्षणैस्त्वत्संबन्धिस्तुतिभिश्च बाह्याभ्यन्तरशत्रून् तरेयमित्यर्थः ॥ ऊतिभिः । ' अव रक्षणे ' । क्तिन् । ' ज्वरत्वरस्रिव्यविमवामुपधायाश्च ' इति ऊठ् । ' ऊतियूतिजूतिसातिहेतिकीर्तयश्च ' इति अन्तोदात्तत्वेन[2] निपातितः । प्रशस्तिभिः । ' शंसु स्तुतौ ' । क्तिन् । कृदुत्तरपदप्रकृतिस्वरापवादत्वेन ' तादौ च निति कृत्यतौ ' इति गतेः प्रकृतिस्वरत्वम्[3] । द्वेषोयुतः । ' द्विष अप्रीतौ ' । भावेऽसुन्प्रत्ययः । ' यु मिश्रणे ' । कर्तरि क्विप् । तुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । तुर्याम । ' तॄ प्लवनतरणयोः ' । प्रार्थनायां लिङ् । यासुट् । ' लिङः सलोपोऽनन्त्यस्य ' इति सकारलोपः । ' बहुलं छन्दसि ' इति शपो लुक् । उदोष्ठ्यपूर्वस्य ' बहुलं छन्दसि ' इति उत्वम् । यासुडागमस्योदात्तत्वाच्छेषनिघातः । ' °अपादादौ ' इति प्रतिषेधान्निघाताभावः ॥

तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥ ७ ॥

तम् । नः । अग्ने । अभि । नरः । रयिम् । सहस्वः । आ । भर ।
सः । क्षेपयत् । सः । पोषयत् । भुवत् । वाजस्य । सातये ।
उत । एधि । पृत्ऽसु । नः । वृधे ॥ ७ ॥

हे [v]अग्ने [v]सहस्वः बलवन् [v]नरः हविषां नेता[4] [v]त्वम्[4] अस्माकं [v]तं [v]रयिं लोके प्रसिद्धं पश्वादिलक्षणं धनम् [v]अभि [v]आ [v]भर आभिमुख्येनाहर । पूर्वोक्तः [v]सः अग्निः [v]क्षेपयत् । अस्मदीयान् शत्रून् क्षेपयतु । [v]सः अग्निः [v]पोषयत् अस्मान् पोषयतु । [v]वाजस्य अन्नस्य [v]सातये लाभाय [v]भुवत् भवतु । [v]उत अपि च हे अग्ने [v]पृत्सु पृतनासु युद्धेषु [v]नः अस्माकं [v]वृधे समृद्धये [v]एधि भव । संग्रामे शत्रुविजयार्थं स त्वं समृद्धिं कुर्वित्यर्थः ॥ सहस्वः । ' षह मर्षणे ' । असुन् । सहस्यनेन शत्रूनिति सहो बलम् । मतुप् । ' मादुपधायाः[5] ' इति वत्वम् । ' मतुवसो रुः संबुद्धौ छन्दसि ' इति रुत्वम् । ' आमन्त्रितस्य च ' इति निघातः । क्षेपयत् । ' क्षिप प्रेरणे ' । णिजन्तात् लेट् । इतश्च लोपः । ' लेटोऽडाटौ ' इत्यडागमः । शप् गुणायादेशौ पररूपत्वं च । पोषयत् । ' पुष पुष्टौ ' । भुवत् । ' भू सत्तायाम् ' । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः । उवङ् । एधि । ' अस भुवि ' । ' ध्वसोरेद्धावभ्यासलोपश्च ' इति एत्वम् । तस्यासिद्धत्वात् ' हुझल्भ्यो हेर्धिः ' इति धिरादेशः । निघातः । पृत्सु । ' पदादिषु ' इत्यादिना पृतनाशब्दस्य पृदादेशः । सावेकाचित्वात्[5] अन्तोदात्तत्वम् ॥ ॥ १ ॥

' अग्न ओजिष्ठम् ' इति सप्तर्चं दशमं सूक्तम् । ऋष्यादि[6] विनियोगश्च पूर्ववत् । चतुर्थीसप्तम्यौ पङ्क्ती । ' अग्न ओजिष्ठमन्त्याचतुर्थ्यौ च ' इत्यनुक्रान्तम्[6] ॥

---

१. प-फ-ब-अहं तुर्याम तुरेयम् । २. र-अन्तोदात्तत्वे; श-अन्तोदात्तः । ३. श-उदात्तत्वम् । ४. ख-च-ङ्ग-ण-न-भ-र-श-नेतारः । ५. ख-च-ण-सावेकाच इति । ६. प-फ-ब-आत्रेयो गय ऋषिः । चतुर्थीसप्तम्यौ पङ्क्ती । शिष्टा अनुष्टुभः । अग्निर्देवता ।

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥ १ ॥

अग्ने । ओजिष्ठम् । आ । भर । द्युम्नम् । अस्मभ्यम् । अध्रिगो इत्यध्रिऽगो ।
प्र । नः । राया । परीणसा । रत्सि । वाजाय । पन्थाम् ॥ १ ॥

हे ᵛअग्ने ᵛओजिष्ठं बलवत्तमं ᵛद्युम्नम् । द्योतते कटकमुकुटादिरूपेण सर्वत्र प्रकाशते इति द्युम्नं धनम् । ᵛअस्मभ्यम् ᵛआ ᵛभर आहर । हे ᵛअध्रिगो अधृतगमन । अधृतमप्रतिहतं गमनं यस्येति अधृता अनिवारिता गावो रश्मयो यस्येति वा अधृतगुः अध्रिगुः । तस्य संबोधनम् । ᵛनः अस्मान् ᵛपरीणसा परितो[1] व्यापकेन[1] ᵛराया धनेन ᵛप्र प्रकर्षेण योजय । ᵛवाजाय अन्नलाभाय ᵛपन्थां पन्थानमन्नस्य मत्समीपप्राप्तिसाधनं मार्गं ᵛरत्सि विलिख । कुर्वित्यर्थः ॥ ओजिष्ठम् । ' उज्ज आर्जवे ' । ' उज्जेर्बले बलोपश्च ' इत्यसुन् बलोपश्च । गुणः । ओजः । ' तदस्यास्ति° ' इत्यर्थे ' अस्मायामेधा° ' इत्यादिना विनिः । ' अतिशायने° ' इति इष्ठन् । विन्मतोर्लुक् । ' टेः ' इति टिलोपः । नित्त्वादाद्युदात्तः । द्युम्नम् । ' द्युत दीप्तौ ' इत्यस्माद्धातोः ' सुम्नद्युम्ननिम्न° ' इत्यादिना नक्प्रत्ययो मकारश्चान्तादेशो निपात्यते । प्रत्ययस्वरेणान्तोदात्तः । अध्रिगो । अधृतशब्दस्य अध्र्यादेशः । गोशब्दस्योपसर्जनह्रस्वत्वम् । आमन्त्रितस्य[2] निघातः[3] । परीणसा । ' णस कौटिल्ये ' । अत्र व्याहृत्यर्थो धातूनामनेकार्थत्वात् । अस्मात् संपदादिलक्षणो भावे क्विप् । परि प्रान्तं नस् व्यापनं यस्य तत्तथोक्तम्[3] । ' उपसर्गादसमासेऽपि° ' इति णत्वम् । अत्र प्रापणक्रियया युक्तस्य परेर्णसति प्रत्युपसर्गसंज्ञा नास्ति ' यत्क्रियायुक्तान्तं प्रति गत्युपसर्गसंज्ञाः[4] ' (पा. सू. १. ४. ६०. ३) इति न्यायात् । अतः कथं णत्वम् । एवं तर्हि ' उपसर्गाद्बहुलम् ' इति वचनात् णसो णत्वं भविष्यति । ' निपातस्य च ' इति पूर्वपदस्य दीर्घः । ' बहुव्रीहौ प्रकृत्या° ' इति पूर्वपदप्रकृतिस्वरत्वम् । रत्सि । ' रद विलेखने ' । भौवादिकः । ' बहुलं छन्दसि ' इति शपो लुक् । पादादित्वान्निघाताभावः । पन्थाम् । द्वितीयैकवचने ' इतोऽत् सर्वनामस्थाने ' इत्यत् । नकारलोपश्छान्दसः । ' पथिमथोः सर्वनामस्थाने ' इत्याद्युदात्तत्वम् ॥

त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।
त्वे असुर्यमारुहत्क्राणा मित्रो न यज्ञियः ॥ २ ॥

त्वम् । नः । अग्ने । अद्भुत । क्रत्वा । दक्षस्य । मंहना ।
त्वे इति । असुर्यम् । आ । अरुहत् । क्राणा । मित्रः । न । यज्ञियः ॥ २ ॥

हे ᵛअग्ने ᵛअद्भुत सामर्थ्यातिशयेन सर्वेषामाश्चर्यभूत ᵛत्वं ᵛनः अस्माकं ᵛक्रत्वा कर्मणा अस्मत्कृतेन यज्ञादिव्यापारेण प्रीतः सन् ᵛदक्षस्य बलस्य धनस्य वा ᵛमंहना मंहनं नाम दानं कुर्विति शेषः ।

१. ख-च-ञ-ण-न-भ-र–परिप्राप्तव्यापत्तेन । २. ख-च-ञ-ण-त-न-भ-र–आमन्त्रितनिघातः । ३. ख-च-ञ-ण-त-न-भ-र-श–तथोक्तम् । ४. ञ-त-न-र–°संज्ञकाः ।

यतः कारणात् ᵛत्वे त्वयि ᵛअसुर्यम् असुरस्य बलम् ᵛआरुहत् आरूढं अतः ᵛमित्रो ᵛन सूर्य इव ᵛयज्ञियः यज्ञार्हस्त्वं ᵛक्राणा यज्ञघातुकराक्षसापनोदनलक्षणानि[1] कर्माणि कुर्वाणो भव ॥ अमुत । आमन्त्रितस्याद्युदात्तत्वम् । क्रत्वा । ' डुकृञ् करणे ' । ' कृञः कतुः ' इति क्रतुप्रत्ययः । ककारो गुणवृद्धिप्रतिषेधार्थः । यणादेशः । क्रतुः कर्म । तृतीयैकवचने ' जसादिषु वावचनम् ' इति वचनाज्ञाभावाभावः । दक्षस्य । ' दक्ष गतिहिंसनयोः ' । दक्ष्यन्ते हिंस्यन्तेऽनेन शत्रव इति दक्षं बलम् । ' करणाधिकरणयोश्च ' इति घञ् । ञित्त्वात् आद्युदात्तः[2] । मंहना । मंहतिर्दानकर्मा । ' सुपां सुलुक्° ' इत्याकारादेशः । त्वे । ' सुपां सुलुक् ° ' इत्यादिना ङेः शेआदेशः । सुबादेशत्वादनुदात्तः । त्वशब्दः प्रत्ययस्वरेणान्तोदात्तः । ' एकादेश उदात्तेनोदात्तः ' इत्येकादेशस्योदात्तत्वम् । आरुहत् । रुहेर्धातोर्लुङि ' कृमृदरुहिभ्यश्छन्दसि ' इति च्लेरङादेशः । ङित्त्वाद्गुणाभावः । क्राणा । ' डुकृञ् करणे ' । शानच् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । यणादेशः । ' सुपां सुलुक्° ' इत्यात्वम् । ' चितः ' इत्यन्तोदात्तः । यज्ञियः । यज्ञमर्हतीत्यस्मिन्नर्थे ' यज्ञर्त्विग्भ्यां घखञौ ' इति घः । प्रत्ययस्वरेणान्तोदात्तः ॥

त्वं नो अग्न एषां गयं पुष्टिं च वर्धय ।
ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥ ३ ॥

त्वम् । नः । अग्ने । एषाम् । गयम् । पुष्टिम् । च । वर्धय ।
ये । स्तोमेभिः । प्र । सूरयः । नरः । मघानि । आनशुः ॥ ३ ॥

हे ᵛअग्ने ᵛत्वम् ᵛएषां ᵛनः स्वस्तावकानामस्माकं ᵛगयम् । गम्यते निवासायेति गयं गृहं गीयते स्तूयत इति वा गयं धनम् । ᵛपुष्टिं ᵛच गवादिविषयां पुष्टिं च ᵛवर्धय[3] वृद्धिं प्रापय । ᵛये लोके प्रसिद्धाः ᵛसूरयः लब्धवर्णाः ᵛनरः स्तोतारो मनुष्याः ᵛस्तोमेभिः स्तोमैः स्तोत्रैः ᵛमघानि मंहनीयानि गवादिधनानि यथा ᵛप्र[4] ᵛआनशुः प्रामुवन् तद्वद्वयमपीत्यर्थः ॥ गयम् । गृहपक्षे गमेः ' अध्यादयश्च ' इति यत्प्रत्ययान्तो मकारलोपश्च निपात्यते । धनपक्षे ' गा स्तुतौ ' । अस्माद्यत्प्रत्ययः । ह्रस्वत्वम् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । पुष्टिम् । ' पुष पुष्टौ ' । स्त्रियां क्तिन् । छान्दसत्वादन्तोदात्तत्वम् । स्तोमेभिः । ' ष्टुञ् स्तुतौ ' । ' अर्तिस्तुसुहु° ' इत्यादिना मन् । गुणः । नित्त्वादाद्युदात्तः । आनशुः । ' अशू व्याप्तौ ' । लिट् । द्विर्वचनम् । हलादिशेषः । ' अत आदेः ' इत्यात्वम् । ' अभ्यासेश्च ' इति नुडागमः । निघातः ॥

ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥ ४ ॥

ये । अग्ने । चन्द्र । ते । गिरः । शुम्भन्ति । अश्वऽराधसः ।
शुष्मेभिः । शुष्मिणः । नरः । दिवः । चित् । येषाम् । बृहत् । सुऽकीर्तिः । बोधति । त्मना ॥४॥

१. ग-घ-यज्ञघातक°; ब-यज्ञान्तक° । २. ख-च-ण-र-श-आद्युदात्तत्वम । ३. ख-च-ञ-ण-भ-प्रापय; ध-श-वर्धय प्रापय । ४. ख-च-ज-ञ-ण-न-भ-र-श-' प्र ' नास्ति ।

हे [v]अग्ने [v]चन्द्र सर्वेषां प्राणिनामाह्लादकर [v]ये [v]नरः [v]ते [v]गिरः त्वत्संबन्धिस्तोत्ररूपा वाचः [v]शुम्भन्ति शोभनाः कुर्वन्ति ते [v]अश्वराधसः अश्वधना भवन्ति । एतेन सर्वसमृद्धिरूपलक्ष्यते । किंच । [v]शुष्मिणः बलवन्तः सन्तः [v]शुष्मैः स्वकीयैर्बलैः सर्त्वः शत्रुशोषका भवन्ति । [v]येषां त्वत्संबन्धिनं स्तवं कुर्वतां [v]दिवश्चित् आकाशादपि [v]बृहत् महती [v]सुकीर्तिः भवति । सर्वदिगन्तरालवर्तिनी[1] कीर्तिर्भवतीत्यर्थः । एवंविधं त्वां गयः [v]त्मना आत्मना स्वयमेव [v]बोधति बोधयति ॥ शुम्भन्ति । ' शुभ शुम्भ दीप्तौ ' । तुदादिः । पादादित्वान्निघाताभावः । लसार्वधातुकानुदात्तत्वे प्राप्ते सति शिष्टत्वाद्धिकरणस्वर एव[2] । अश्वराधसः । ' अशू व्याप्तौ ' । ' अशूप्रुषि[3] ' इत्यादिना कन् । अश्नुते व्याप्नोत्यध्वानमित्यश्वः । निस्वादाद्युदात्तः । ' राध साध संसिद्धौ ' । असुन् । राध्नुवन्ति साधयन्त्यनेन धर्मादीनीति राधो धनम् । बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् । बृहत् । ' बृह बृहि वृद्धौ ' । शतृ । ङीपो लोपश्छान्दसः । प्रत्ययस्वरः । बोधति । ' बुध अवगमने ' । ण्यन्तात् शपि कृते तस्य ' छन्दस्युभयथा ' इति सार्वधातुकसंज्ञायां णिलोपः । ' यद्वृत्तान्नित्यम् ' इति निघाताभावः । धातुस्वरेणाद्युदात्तः । त्मना । ' मन्त्रेष्वाङ्यादेरात्मनः ' इत्याकारलोपः ॥

तव॒ त्ये अ॑ग्ने अ॒र्चयो॒ भ्राज॑न्तो यन्ति धृ॒ष्णुया ।
परि॑ज्मानो॒ न वि॒द्युतः॒ स्वा॒नो रथो॒ न वा॑ज॒युः ॥ ५ ॥

तव॑ । त्ये । अ॒ग्ने॒ । अ॒र्चयः॑ । भ्राज॑न्तः । यन्ति॒ । धृ॒ष्णु॒ऽया ।
परि॑ऽज्मानः । न । वि॒ऽद्युतः॑ । स्वा॒नः । रथः॑ । न । वा॒ज॒ऽयुः ॥ ५ ॥

हे [v]अग्ने [v]धृष्णुया धृष्णवोऽत्यन्तप्रगल्भाः [v]भ्राजन्तः दीप्यमानाः [v]त्ये ते प्रसिद्धाः [v]तव [v]अर्चयः[4] त्वदीया रश्मयः [v]यन्ति सर्वतो गच्छन्ति । कथमिव । [v]परिज्मानः परितो गन्तव्याः सर्वतो व्याप्ताः [v]विद्युतः [v]न अचिरप्रभा इव । अनेन प्रकाशातिशय उक्तः । [v]स्वानः शब्दायमानः [v]रथो [v]न रथ इव । अनेनार्चिषां स्वनाधिक्यमुक्तम् । [v]वाजयुः न अन्नकाम इवान्नार्थं युद्धेषु शत्रुविजयाय यथा प्रवर्तते तद्वदित्यर्थः । अनेनाहुतिविषयोऽभिलाष उक्तः ॥ यन्ति । ' इण् गतौ ' । धृष्णुया । ' ञिधृषा प्रागल्भ्ये ' । ' ञिमिदृधिधृषि° ' इत्यादिना क्नुप्रत्ययः । ' आदितश्च ' (पा. सू. ७. २. १६) इति इट्प्रतिषेधः । बहुवचने ' सुपां सुलुक्° ' इत्यादिना याजादेशः । ' चितः ' इत्यन्तोदात्तत्वम् । परिज्मानः । ' अज व्रज गतौ ' । परिपूर्वाद्धातोः ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । अकारलोपः छान्दसः । निस्वादाद्युदात्तः । वाजयुः । वाजमात्मन इच्छति इति क्यच् । ' न छन्दस्यपुत्रस्य ' इति ईत्वदीर्घयोः प्रतिषेधः । ' क्याच्छन्दसि ' इति उप्रत्ययः ॥

नू नो॑ अग्न ऊ॒तये॑ स॒बाध॑सश्च रा॒तये॑ ।
अ॒स्माका॑सश्च सू॒रयो॒ विश्वा॒ आशा॒स्तरी॑षणि ॥ ६ ॥

नु । नः॒ । अ॒ग्ने॒ । ऊ॒तये॑ । स॒ऽबाध॑सः । च॒ । रा॒तये॑ ।
अ॒स्माका॑सः । च॒ । सू॒रयः॑ । विश्वाः॑ । आशाः॑ । तरी॑षणि ॥ ६ ॥

---

१. श–°दिगन्तरावर्तिनी । २. ख-च-ण–एव शिष्यते । ३. च-ञ-ण-भ-र-श–अशिपृषि° । ४. ख-च-ञ-ण-न-भ-र-श–अर्चिषः ।

हे vअग्ने vनः अस्माकं vनु क्षिप्रम् vऊतये रक्षायै भव। vसबाधसश्च दारिद्र्यनिमित्तबाधसहितस्य[1] च vरातये धनानां दानाय भव। किंच vअस्माकासः आस्माकाः[2] पुत्रमित्रादयः vसूरयः स्तोतारः vविश्वाः सर्वाः vआशाः दिशः vतरीषणि। तासां तरणे क्षमा भवन्तु। अथवा आशाः कामाः। अयमर्थः। स्वाभिलषितप्रशस्तसमस्तवस्तुसंपादनं कुर्वित्यर्थः॥ सबाधसः। बाधेरसुन्। बाधसा सह वर्तत इति सबाधाः। 'वोपसर्जनस्य' इति सहस्य सभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्। रातये। 'रा दाने'। क्तिन्। 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इत्यन्तोदात्तः। अस्माकासः। 'तस्मिन्नणि च युष्माकास्माकौ' इत्यणि कृतेऽस्माकादेशः। छान्दसत्वादणो लोपः। बहुवचने असुगागमः। षष्ठीबहुवचने मध्योदात्तत्वेन दृष्टत्वात्तथाविधमादेशमत्रापि कृतवानाचार्यः[3]। विश्वाः। विशेः 'अशिप्रुषि०' इत्यादिना क्वन्। निरवादाद्युदात्तः। तरीषणि। 'तॄ प्लवनतरणयोः'। 'कृतॄभ्यामीषन्' (उ. सू. ४. ४६६) इति ईषन्। बहुलवचनान्नलोपाभावः। अन्तोदात्तश्छान्दसः॥

त्वं नो अग्ने अङ्गिरः स्तुतः स्तवान आ भर।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे॥ ७॥

त्वम्। नः। अग्ने। अङ्गिरः। स्तुतः। स्तवानः। आ। भर।
होतरिति। विभ्वऽसहम्। रयिम्। स्तोतृऽभ्यः। स्तवसे। च। नः।
उत। एधि। पृत्ऽसु। नः। वृधे॥ ७॥

हे vअग्ने vअङ्गिरः। कार्यकारणयोरभेदोपचारादङ्गिरसां प्रकृतिभूतोऽप्यग्निरङ्गिरा इत्युच्यते। हे अङ्गिरः पूर्वैः महर्षिभिः vस्तुतः vस्तवानः इदानींतनैश्च स्तूयमानस्त्वं vविभ्वासहं महतामप्यभिभवितारम्। अभिभवहेतुत्वादभिभवितृ धनमुच्यते[4]। vरयिं धनं vनः अस्माकम् vआ vभर आहर। हे vहोतः देवानामाह्वातः vस्तोतृभ्यः vनः अस्मभ्यं vस्तवसे स्तोतुं सामर्थ्यं च प्रयच्छ। vउत अपि च vपृत्सु युद्धेषु vनः अस्माकं vवृधे समृद्धये vएधि भव॥ स्तवानः। 'ष्टुञ् स्तुतौ'। शानचि कर्मणि व्यत्ययेन शप्प्रत्यय आद्युदात्तश्च। विभ्वासहम्। संहितायां विभूनामिति षष्ठीबहुवचनस्य 'सुपाम्०' इत्यादिना आकारादेशः। 'तत्पुरुषे कृति बहुलम्' इति षष्ठ्या अलुक्। पदकारास्तु विपूर्वाद्भवतेः अगागमम्[5] 'अन्येषामपि दृश्यते' इति दीर्घत्वं च मत्वावग्रहं कुर्वन्ति। कृदुत्तरपदप्रकृतिस्वरत्वम्। स्तवसे। 'ष्टुञ् स्तुतौ'। तुमर्थेऽसेन्प्रत्ययः। निरवादाद्युदात्तः॥ ॥ २ ॥

'जनस्य गोपाः' इति षड्ऋचमेकादशं सूक्तमात्रेयस्य सुतंभरस्यार्षं जागतमाग्नेयम्। तथा चानुक्रान्तं—'जनस्य षट् सुतंभरो जागतम्' इति। प्रातरनुवाके आश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। 'जनस्य गोपास्त्वामग्न ऋतायवः' (आश्व. श्रौ. ४. १३) इति॥

---

१. ख-च-ण-श-दारिद्र्यनिमित्त°। २. ख-च-ञ्च-ण-भ-र-श-अस्माकाः। ३. ख-च-ण-भ-कृतवानित्यर्थः; ञ्च-र-कृतवानीचार्यः। ४. ख-च-ञ्च-ण-त-न-भ-र-धनमित्युच्यते। ५. श-अगागमे।

ऋ. २-९६

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ १ ॥

जनस्य । गोपाः । अजनिष्ट । जागृविः । अग्निः । सुऽदक्षः । सुऽविताय । नव्यसे ।
घृतऽप्रतीकः । बृहता । दिविऽस्पृशा । द्युऽमत् । वि । भाति । भरतेभ्यः । शुचिः ॥ १ ॥

vजनस्य vगोपाः गोपायिता रक्षिता vजागृविः जागरणशीलः सदा प्रबुद्धः vसुदक्षः सुबलः सर्वैः श्लाघनीयबलः[1] सः vअग्निः vनव्यसे नवतराय vसुविताय लोकानां कल्याणाय vअजनिष्ट जातः । vघृतप्रतीकः घृतेन प्रज्वलिताङ्गः vबृहता महता vदिविस्पृशा अभ्रंलिहेन तेजसा युक्तः vशुचिः शुद्धः एवंविधोऽग्निः vभरतेभ्यः ऋत्विग्भ्यस्तदर्थं vद्युमत् दीप्तिमत् यथा भवति तथा vवि vभाति प्रकाशते ॥ गोपाः । 'गुपू रक्षणे' । आयप्रत्ययः । गोपायतेः क्विप् । परत्वादतो[2] लोपः[2] । अत्र परत्वादपृक्तलोपे कृते वर्णाश्रयत्वात् प्रत्ययलक्षणाभावेन यलोपो न स्यात् । 'लोपो व्योर्वलि' इति प्रथमं लोपग्रहणात् ज्ञापकाद्यलोप एव भवति । लोपाजादेशस्य यलोपविधिं प्रति न[3] स्थानिवद्भावः । प्रत्ययस्वरः । जागृविः । 'जागृ निद्राक्षये' । 'जृशृस्तृजागृभ्यः क्विन्' इति क्विन्प्रत्ययः । 'जाग्रोऽविचिण्ल्ङित्सु' इति प्रतिषेधाद्गुणाभावः । नित्त्वादाद्युदात्तः । सुदक्षः । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । सुविताय । 'तन्वादीनां छन्दस्युपसंख्यानम्' इति सोरुवङादेशः । 'सूपमानात् क्तः' इत्युत्तरपदान्तोदात्तत्वम् । नव्यसे । नवशब्दादतिशायनेऽर्थे ईयसुन्प्रत्ययः । ईकारलोपश्छान्दसः । अतो लोपः । आद्युदात्तः । दिविस्पृशा । 'हृदयुभ्यां डेरुपसंख्यानम्' इत्यलुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । द्युमत् । 'हस्वनुड्भ्यां मतुप्' इति ह्रस्वात्परस्य मतुपोऽन्तोदात्तत्वम् ॥

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ २ ॥

यज्ञस्य । केतुम् । प्रथमम् । पुरःऽहितम् । अग्निम् । नरः । त्रिऽसधस्थे । सम् । ईधिरे ।
इन्द्रेण । देवैः । सऽरथम् । सः । बर्हिषि । सीदत् । नि । होता । यजथाय । सुऽक्रतुः ॥२॥

vनरः ऋत्विजः vयज्ञस्य यागस्य vकेतुं प्रज्ञापकं vपुरोहितं यजमानैः पुरस्कृतम् vइन्द्रेण vदेवैः च vसरथं तेषां मान्यत्वात् समानरथम् vअग्निं vत्रिषधस्थे त्रिस्थाने विहारप्रदेशे vप्रथमं vसमीधिरे समैन्धत । vसुक्रतुः शोभनकर्मा vहोता देवानामाह्वाता vसः अग्निः vबर्हिषि बर्हिर्युक्ते तस्मिन् स्थाने vयजथाय यज्ञाय vनि vसीदत् प्रतिष्ठितोऽभवदिति यावत् ॥ केतुम् । 'कित ज्ञाने' । औणादिक उप्रत्ययः । अन्तोदात्तः । पुरोहितम् । 'पुरोऽव्ययम्' इति गतिसंज्ञायां 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् । त्रिषधस्थे । आहवनीयादिलक्षणेन त्रिप्रकारेणानेन

१. ख-च-ञ-ण-न-भ-र—श्लाघनीयः । २. ख-च-ण-त-न-भ-र—परत्वादकारलोपः । ३. ख-ञ-न-भ-र—'न' नास्ति ।

सह तिष्ठतीति त्रिषधस्थः । कप्रत्ययः । 'सध मादस्थयोश्छन्दसि' इति सधादेशः । कृदुत्तरपद-प्रकृतिस्वरत्वम् । सीदत् । सदेः पाघादिना सीदादेशः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । पादादित्वान्निघाताभावः । यजथाय । यजेरौणादिकोऽथप्रत्ययः । प्रत्ययस्वरेण मध्योदात्तः ॥

असंमृष्टो जायसे मात्रोः शुचिर्मन्द्रः कविरुदतिष्ठो विवस्वतः ।
घृतेनं त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥ ३ ॥

असंम्ऽमृष्टः । जायसे । मात्रोः । शुचिः । मन्द्रः । कविः । उत् । अतिष्ठः । विवस्वतः ।
घृतेनं । त्वा । अवर्धयन् । अग्ने । आऽहुत । धूमः । ते । केतुः । अभवत् । दिवि । श्रितः ॥ ३ ॥

हे [v]अग्ने [v]मात्रोः अरण्योः । स्वजननिमित्तत्वात्[1] अरणी मातरावित्युच्येते । ताभ्याम् [v]असंमृष्टः अबाधित एव [v]जायसे प्रादुर्भूतो भवसि । [v]मन्द्रः सर्वैः स्तुत्यः [v]कविः क्रान्तः सर्वत्र व्याप्तः । अथवा मेधावी [v]शुचिः त्वं [v]विवस्वतः अग्निहोत्राद्यर्थं[2] गृहे विशेषेण वसतः[3] यजमानात् [v]उदतिष्ठः उदितोऽभवः । पूर्वे महर्षयः [v]त्वा त्वां [v]घृतेन [v]अवर्धयन् वृद्धिमनयन् । हे [v]आहुत आहुतिभिर्हुत [v]ते तव [v]दिवि अन्तरिक्षे [v]श्रितः व्याप्तः [v]धूमः [v]केतुः प्रज्ञापकः [v]अभवत् । अग्न्यनुमापकत्वात् धूमस्य ॥ मात्रोः । 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् । मन्द्रः । 'मदि स्तुतिमोदमद-स्वप्नकान्तिगतिषु' । अत्र स्तुत्यर्थादस्मात् 'स्फायितञ्चि॰' इत्यादिना रक् । अन्तोदात्तः । कविः । क्रमेः 'इन्[4] सर्वधातुभ्यः' इति इन्प्रत्ययः । बाहुलकत्वात्[5] मकारस्य वत्वं रेफलोपश्च । व्ययत्येनान्तो-दात्तत्वम् । उदतिष्ठः । उत्पूर्वादूर्ध्वकर्मवाचिनस्तिष्ठतेरात्मनेपदाभावः । विवस्वतः । विपूर्वाद्वसतेः संपदादिलक्षणो भावे क्विप् । 'तदस्यास्ति॰' इति मतुप् । 'मादुपधायाश्च॰' इति वत्वम् । मतुपोऽनुदात्तत्वाद्धातुस्वरः ॥

अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरन्ते गृहेगृहे ।
अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुम् ॥ ४ ॥

अग्निः । नः । यज्ञम् । उप । वेतु । साधुऽया । अग्निम् । नरः । वि । भरन्ते । गृहेऽगृहे ।
अग्निः । दूतः । अभवत् । हव्यऽवाहनः । अग्निम् । वृणानाः । वृणते । कविऽक्रतुम् ॥ ४ ॥

[v]साधुया सर्वपुरुषार्थानां साधकः [v]अग्निर्नो [v]यज्ञम् अस्मदीयं यागं प्रति [v]उप [v]वेतु आगच्छतु । [v]नरः मनुष्याः [v]गृहेगृहे अनुगृहम् [v]अग्निं [v]वि [v]भरन्ते विहरन्ति विहरणं कुर्वन्तीत्यर्थः । [v]हव्यवाहनः हव्यानां हविषां वोढा [v]अग्निर्दूतः देवानां दूतः [v]अभवत । [v]वृणानाः संभजमानाः सन्तः [v]कविक्रतुं क्रान्तयज्ञम् [v]अग्निं [v]वृणते संभजन्ते ॥ साधुया । 'सुपां सुलुक्॰' इत्यादिना विभक्तेर्यादेशः ॥

१. च–°निमित्तात् । २. ख-च-ञ-ण-त-न-भ-र–अग्निहोत्रार्थम् । ३. ख-च-ञ-ण-न-भ-र–वासवतः । ४. ख-च-ञ-ण-भ-र-श–विन् । ५. त–बाहुलकात् ।

तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च ॥ ५ ॥

तुभ्यं । इदम् । अग्ने । मधुमत्ऽतमम् । वचः । तुभ्यम् । मनीषा । इयम् । अस्तु । शम् । हृदे ।
त्वाम् । गिरः । सिन्धुम्ऽइव । अवनीः । महीः । आ । पृणन्ति । शवसा । वर्धयन्ति । च ॥५॥

हे [v]अग्ने [v]तुभ्य तुभ्यं त्वदर्थं [v]मधुमत्तमम् अत्यन्तं मधुरम् [v]हृदं [v]वचः क्रियते । [v]हृदे हृदि [v]शं सुखं कुर्वती [v]इयं [v]मनीषा स्तुतिः [v]तुभ्यम् [v]अस्तु । [v]गिरः स्तुतिरूपा वाचः [v]त्वाम् [v]आ [v]पृणन्ति पूरयन्ति । [v]शवसा बलेन [v]वर्धयन्ति [v]च । कथमिव । [v]महीः महत्यः [v]अवनीः अवन्यः नद्यः [v]सिन्धुमिव समुद्रमिव ॥

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ ६ ॥

त्वाम् । अग्ने । अङ्गिरसः । गुहा । हितम् । अनु । अविन्दन् । शिश्रियाणम् । वनेऽवने ।
सः । जायसे । मथ्यमानः । सहः । महत् । त्वाम् । आहुः । सहसः । पुत्रम् । अङ्गिरः ॥ ६ ॥

हे [v]अग्ने [v]अङ्गिरसः ऋषयः [v]गुहा गुहायां [v]हितं निहितं निगूढं [v]वनेवने वृक्षेवृक्षे [v]शिश्रियाणम् आश्रितं [v]त्वाम् [v]अन्वविन्दन् अलभन्त । [v]महत महता [v]सहः सहसा बलेन युक्तः [v]सः त्वं [v]मथ्यमानः [v]जायसे । हे [v]अङ्गिरः अङ्गिरसां प्रकृतिभूत [v]त्वां [v]सहसः [v]पुत्रम् [v]आहुः ॥ शिश्रियाणम् । 'श्रिञ् सेवायाम्' । लिटः कानच् । शपः श्लुः । 'श्रौ' इति द्विर्वचनम् । इयङादेशः । चित्वादन्तोदात्तः ॥ ॥ ३ ॥

'प्राग्नये बृहते' इति षड्चं द्वादशं सूक्तं सुतंभरस्यार्षं त्रैष्टुभमाग्नेयम् । 'प्राग्नये' इत्यनुक्रान्तम् । प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदं सूक्तं विनियुक्तम् । सूत्रितं च— 'प्राग्नये बृहते प्र वेधसे कवये' (आश्व. श्रौ. ४. १३) इति[१] ॥

प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्ये सुपूतं गिरं भरे वृषभाय प्रतीचीम् ॥ १ ॥

प्र । अग्नये । बृहते । यज्ञियाय । ऋतस्य । वृष्णे । असुराय । मन्म ।
घृतम् । न । यज्ञे । आस्ये । सुऽपूतम् । गिरम् । भरे । वृषभाय । प्रतीचीम् ॥ १ ॥

१. न—इति प्रातरनुवाकन्यायेनेति च ।

vबृहते सामर्थ्यातिशयेन महते vयज्ञियाय यज्ञार्हाय vऋतस्य उदकस्य vवृष्णे वर्षित्रे। ऋतमित्युदकनामसु पाठात्। vअसुराय बलवते ॥ असेरौणादिक उरन्प्रत्ययः ॥ vवृषभाय कामानां वर्षित्रे vअग्नये vमन्म ज्ञानसाधनं[१] vप्रतीचीम् अभिमुखीं vगिरं स्तुतिरूपां वाचं vप्र vभरे प्रणयामि। कथमिव। vसुपूतं सम्यक्संस्कृतम् vआस्ये प्रहुतं vयज्ञे vघृतं vन घृतमिव। आस्ये प्रहुतं घृतं यथा प्रीतिकरं भवति तथा प्रीतिकरीं स्तुतिमित्यर्थः ॥

ऋतं चिकित्व ऋतमिच्चिकिद्धृतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥ २ ॥

ऋतम्। चिकित्वः। ऋतम्। इत्। चिकिद्धि। ऋतस्य। धाराः। अनु। तृन्धि। पूर्वीः। न। अहम्। यातुम्। सहसा। न। द्वयेन। ऋतम्। सपामि। अरुषस्य। वृष्णः ॥ २ ॥

vऋतं स्तोत्रं हे vचिकित्वः जानन्नग्ने त्वं vऋतं मया क्रियमाणमिदं स्तोत्रं vचिकिद्धि जानीहि ॥ ' कित ज्ञाने '। जुहोत्यादिः। लोटि रूपम्। vइत् इति पूरणः। ऋतमिति पदस्य परस्मिन्ना मन्त्रिते विद्यमानेऽपि छान्दसत्वात्पराङ्गवद्भावाभावः ॥ किंच vपूर्वीः बह्वीः vऋतस्य उदकस्य vधाराः सस्यपोषणार्थमुत्पादयितुम् vअनु vतृन्धि मेघाननुविध्य। vसहसा बलेन युक्तः vअहं vयातुं कर्मणां नाशकरीं हिंसां vन vसपामि न स्पृशामि न करोमीति यावत्। vद्वयेन च सत्यानृताभ्यां[२] यत्किंचिदवैदिकं कृत्यं vन सपामि ॥ ' षप समवाये ' इति धातुः ॥ किंतु vअरुषस्य आरोचमानस्य[३] vवृष्णः कामानां वर्षितुस्तव vऋतं स्तोत्रमेव[४] सपामि ॥

कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥ ३ ॥

कया। नः। अग्ने। ऋतयन्। ऋतेन। भुवः। नवेदाः। उचथस्य। नव्यः।
वेद। मे। देवः। ऋतुऽपाः। ऋतूनाम्। न। अहम्। पतिम्। सनितुः। अस्य। रायः ॥३॥

हे vअग्ने vऋतयन् सर्वप्राणिनां जीवनहेतुकमुदकं कुर्वन्[५] vकया केनापि vऋतेन सत्येन क्रियमाणेन कर्मणा vनः[६] vउचथस्य अस्मदीयस्य स्तोत्रस्य vनवेदाः ज्ञाता vभुवः भवेः। vनव्यः स्तुत्यः vऋतूनां vऋतुपाः। द्वितीयः[७] ऋतुशब्दोऽनुवादकः[७]। vदेवः द्योतमानोऽग्निः vमे मां vवेद वेत्तु। vसनितुः भजमानस्य vअस्य मम vरायः पश्वादिलक्षणस्य धनस्य[८] vपतिं स्वामिनं तमग्निम् vअहं vन जानामि ॥ भुवः। ' भू सत्तायाम् '। लिङर्थे लेटयडागमः। उवङादेशः। नवेदाः। न न वेत्तीति वेत्तीत्यस्मिन्नर्थे वर्तते। कथमेतल्लभ्यते। निपातनात्। द्विनञ्पूर्वस्यासुन्प्रायया न्तस्य वेदेरेकस्य

१. प-फ-ब-ज्ञानसाधनाम्। २. त-यष्टव्यानृताभ्याम्। ३. घ-रोचमानस्य। ४. ख-च-झ-ण-भ-स्तोत्रं च। ५. त-कुर्वस्त्वम्। ६. ख-च-झ-ण-न-भ-र-'नः' नास्ति। ७. प-ग-ङ-वसन्तादीनां पालकः। ८. ग-ज-ण-श-' धनस्य ' नास्ति।

नञो लोपोऽन्यस्य प्रकृतिभावश्च स्कन्दस्वामिना निपातितः । पाणिनिना तु 'नभ्राण्नपात्' इति सूत्रे[1] न वेत्तीत्येतस्मिन्नर्थे[1] निपातितः । अस्यार्थस्यानुपपन्नत्वात् स्कन्दस्वामिपक्ष एवाश्रीयते ॥

के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥ ४ ॥

के । ते । अग्ने । रिपवे । बन्धनासः । के । पायवः । सनिषन्त । द्युमन्तः ।
के । धासिम् । अग्ने । अनृतस्य । पान्ति । के । असतः । वचसः । सन्ति । गोपाः ॥ ४ ॥

हे [v]अग्ने ये [v]रिपवे स्वकीयस्य शत्रोः [v]बन्धनासः बन्धकाः स्युः [v]ते त्वत्संबन्धिनस्ते पुरुषाः [v]के कीदृशाः । सामर्थ्यातिशयादेवंविधा इति केनापि ज्ञातुं न शक्यन्त इत्यर्थः । ये [v]पायवः जनानां रक्षितारः [v]द्युमन्तः दीप्तिमन्तः [v]सनिषन्त दीनेभ्यो धनं प्रयच्छन्ति ते[2] त्वदीयाः[3] कीदृशाः । ये [v]अनृतस्य असत्यस्य [v]धासिं धारकं जनं [v]पान्ति रक्षन्ति ते त्वदीया जनाः [v]के [v]सन्ति । न केऽपीत्यर्थः । ये [v]असतः दुष्टस्याभिशापादिलक्षणस्य [v]वचसः [v]गोपाः गोपायितारः रक्षितारस्ते त्वदीयाः [v]के सन्ति । न केऽपीत्यर्थः । अथवा ये के जना रिपोर्बन्धकाः । ये के पायवो रक्षितारः सनिषन्त धनं प्रयच्छन्ति द्युमन्तः दीप्तिमन्तः । ये[4] केऽनृतस्यासत्यस्य धासिं धारकं जनं पान्ति अनृतजनितपापात् परिहृत्य सन्मार्गप्रदानेन रक्षन्ति । ये केऽसतोऽभिशापादिलक्षणाद्वचसो गोपा गोपायितारः सन्ति ते सर्वे त्वदीयाः । त्वदुपासकाः[5] इत्यर्थः[4] ॥

सखायस्ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।
अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवन्तः ॥ ५ ॥

सखायः । ते । विषुणाः । अग्ने । एते । शिवासः । सन्तः । अशिवाः । अभूवन् ।
अधूर्षत । स्वयम् । एते । वचःऽभिः । ऋजुऽयते । वृजिनानि । ब्रुवन्तः ॥ ५ ॥

हे [v]अग्ने [v]ते तव [v]सखायः स्तोतारः [v]विषुणाः विप्रकीर्णाः सर्वत्र व्यासाः [v]एते पूर्वम् [v]अशिवाः परनिन्दादीनि[5] कुर्वाणास्त्वत्परिचर्यां त्यजन्तोऽभद्राः [v]सन्तः इदानीं त्वत्परिचर्यां कुर्वन्तः [v]शिवासः शिवा आढ्याः [v]अभूवन् । किंच ये [v]ऋजूयते ऋजु सम्यगाचरतेऽपि मह्यं [v]वचोभिः असाधूक्तिभिः [v]वृजिनानि कुटिलानि [v]ब्रुवन्तः ते [v]एते मम सपत्नाः [v]स्वयम् एव [v]अधूर्षत अहिंस्यन्त ॥ धूर्वतेर्हिंसाकर्मण इदं रूपम् ॥

---

१. ख-च-ञ-ण-भ-र-सूत्रे भवतीत्येकस्मिन्नर्थे । २. ग-घ-ज-श-त्वदीयाः के । ३. ग-ज-प-फ-ये असतः दुष्टस्य अभिशापादिलक्षणस्य वचसः गोपाः गोपायितारः रक्षितारः के ते सन्ति न केऽपि । ४. ख-घ-च-ञ-ण-न-भ-र-श-'इत्यर्थः' नास्ति । ५. ग-ज-श-परनिन्दादि ।

यस्ते अग्ने नमसा यज्ञमीट्टे ऋतं स पात्यरुषस्य वृष्णः ।
तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ॥ ६ ॥

यः । ते । अग्ने । नमसा । यज्ञम् । ईट्टे । ऋतम् । सः । पाति । अरुषस्य । वृष्णः ।
तस्य । क्षयः । पृथुः । आ । साधुः । एतु । प्रऽसर्स्राणस्य । नहुषस्य । शेषः ॥ ६ ॥

हे [v]अग्ने [v]यः मनुष्यः [v]यज्ञं यजनीयं [v]ते त्वां [v]नमसा स्तोत्रेण [v]ईट्टे स्तौति । यद्वा । ते तुभ्यं यज्ञं यागं नमसान्नरूपेण हविषा ईट्टे यजति ॥ अस्मिन् पक्षे यजेः 'बहुलं छन्दसि' इति शपः [१]लुः । 'श्लौ' इति द्विर्वचनम् । 'बहुलं छन्दसि' इति संप्रसारणम् । सवर्णदीर्घः । जकारस्य टकारः ॥ यः[२] [v]अरुषस्य रोचमानस्य [v]वृष्णः कामानां वर्षितुरग्नेः [v]ऋतं स्तोत्रं [v]पाति रक्षति [v]तस्य यजमानस्य [v]क्षयः गृहं [v]पृथुः विस्तीर्णं भवति । पश्वादिलक्षणैर्धनैः संपूर्णं भवतीत्यर्थः । [v]प्रसर्स्राणस्य प्रकर्षेण स्वपरिचर्यां[३] गच्छतः [v]नहुषस्य मनुष्यस्य [v]साधुः कामानां साधकः [v]शेषः । शिष्यत इति शेषः । पुत्रः [v]आ[४] [v]एतु आगच्छतु भवत्वित्यर्थः[५] ॥ ॥ ४ ॥

'अर्चन्तस्त्वा' इति षड्र्चं त्रयोदशं सूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयम् । अनुक्रान्तं च—'अर्चन्तो गायत्रं तु' इति । प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि आश्विनशस्त्रे[५] इदमादिके द्वे सूक्ते । सूत्रितं च—'अर्चन्तस्वेति सूक्ते' (आश्व. श्रौ. ४. १३) इति । आहवनीयोपस्थाने 'त्वमग्ने सप्रथा असि' इत्येका । सूत्रितं च—'सं नः सृज सुमत्या वाजवत्या त्वमग्ने सप्रथा असीति च' (आश्व. श्रौ. ३. १०) इति । अश्वमेधे पौष्णेष्टौ[५] 'त्वमग्ने सप्रथाः' इति प्रथमाज्यभागानुवाक्या । 'त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति सद्वन्तौ' (आश्व. श्रौ. १०. ६) इति ॥

अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि । अग्ने अर्चन्त ऊतये ॥ १ ॥

अर्चन्तः । त्वा । हवामहे । अर्चन्तः । सम् । इधीमहि । अग्ने । अर्चन्तः । ऊतये ॥ १ ॥

हे [v]अग्ने [v]त्वा त्वाम् [v]अर्चन्तः पूजयन्तो वयं [v]हवामहे आह्वयामः । [v]अर्चन्तः स्तुवन्तो वयम् [v]ऊतये रक्षणाय तर्पणाय वा त्वां [v]समिधीमहि समिद्भिः संदीपयामः । अर्चन्त इति तृतीयं पदम् आदरातिशयार्थम् ॥

अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ॥ २ ॥

अग्नेः । स्तोमम् । मनामहे । सिध्रम् । अद्य । दिविऽस्पृशः । देवस्य । द्रविणस्यवः ॥ २ ॥

[v]द्रविणस्यवः द्रविणं धनमिच्छन्तो वयं [v]दिविस्पृशः सूर्यरूपेणाकाशं व्याप्नुवतः [v]देवस्य द्योतमानस्य [v]अग्नेः [v]सिध्रं पुरुषार्थानां साधकं [v]स्तोमं स्तोत्रम् [v]अद्य अस्मिन्नहनि [v]मनामहे नूमः ॥

---

१. ख-च-ञ-ण-न-भ-र-सः । २. ग-घ-ज-श-परिचर्याम् । ३. ख-घ-च-ञ-ण-त-न-भ-र-श-ऐति आगच्छति भवतीत्यर्थः; ग-ज-ऐतु आगच्छतु भवतीत्यर्थः । ४. ञ-र-आश्विनशस्त्रे स (? च) । ५. ख-ञ-न-भ-र-श-पौष्ण्येष्टौ ।

अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद्दैव्यं जनम् ॥ ३ ॥

अग्निः । जुषत । नः । गिरः । होता । यः । मानुषेषु । आ । सः । यक्षत् । दैव्यम् । जनम् ॥३॥

[v]होता देवानामाह्वाता [v]यः [v]अग्निः [v]मानुषेष्वा वसति [v]सः अग्निः [v]नः अस्माकं [v]गिरः स्तुतीः [v]जुषत सेवताम् । सोऽग्निः [v]दैव्यं [v]जनं देवसंबन्धिनं जनं [v]यक्षत् यजतु ॥

त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते ॥ ४ ॥

त्वम् । अग्ने । सऽप्रथाः । असि । जुष्टः । होता । वरेण्यः । त्वया । यज्ञम् । वि । तन्वते ॥४॥

हे [v]अग्ने [v]जुष्टः सर्वदा प्रीतः [v]वरेण्यः सर्ववरणीयः [v]होता [v]त्वं [v]सप्रथाः सर्वतः पृथुः [v]असि भवसि । तथाह यास्कः—' सप्रथाः सर्वतः पृथुः ' (निरु. ६. ७) इति । किंच सर्वे[1] यजमानाः[1] [v]त्वया साधनेन [v]यज्ञं [v]वि [v]तन्वते ॥

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥ ५ ॥

त्वाम् । अग्ने । वाजऽसातमम् । विप्राः । वर्धन्ति । सुऽस्तुतम् । सः । नः । रास्व । सुऽवीर्यम् ॥ ५ ॥

हे [v]अग्ने [v]विप्राः मेधाविनः स्तोतारः [v]वाजसातमम् । वाजोऽन्नम् । तद्ददतं [v]सुष्टुतं पूर्वैः महर्षिभिः सम्यक् स्तुतं [v]त्वां [v]वर्धन्ति । स्तोत्रैर्वर्धयन्ति । [v]सः त्वं [v]नः अस्मभ्यं [v]सुवीर्यं सर्वैः श्लाघनीयं बलं [v]रास्व देहि ॥

अग्ने नेमिरराँइव देवांस्त्वं परिभूरसि । आ राधश्चित्रमृञ्जसे ॥ ६ ॥

अग्ने । नेमिः । अरान्ऽइव । देवान् । त्वम् । परिऽभूः । असि ।

आ । राधः । चित्रम् । ऋञ्जसे ॥ ६ ॥

हे [v]अग्ने [v]त्वं [v]देवान् [v]परिभूरसि । स्वतेजसा परिभवसि । कथमिव । [v]नेमिः प्रकाशमानः चक्रस्य बाह्यो वलयः [v]अरानिव नाभावर्पितान् सूक्ष्मान् स्त्रासकानिव । किंच त्वं[2] [v]चित्रं नानाविधं [v]राधः । राध्नुवन्ति साधयन्त्यनेन पुरुषार्थानिति राधो धनम् । [v]आ [v]ऋञ्जसे । स्तोतृभ्यः प्रसाधय । धननामसु पाठात् ' राधो धनम् ' इत्युक्तम् ॥ ॥ ५ ॥

' अग्निं स्तोमेन ' इति षड्र्चं चतुर्दशं सूक्तं सुतंभरस्य आर्षं[3] गायत्रमाग्नेयम् । ' अग्निं स्तोमेन ' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥ १ ॥

अग्निम् । स्तोमेन । बोधय । सम्ऽइधानः । अमर्त्यम् । हव्या । देवेषु । नः । दधत् ॥ १ ॥

---

१. ख-च-ञ्ज-ण-न-भ- यजमानाः सर्वे । २. ख-घ-च-ञ्ज-ण-न-भ-र-' त्वं ' नास्ति । ३. त-आर्षेयम् ।

हे स्तोतः [v]अमर्त्यम् अमरणधर्माणम्[१] [v]अग्निं [v]स्तोमेन स्तोत्रेण [v]बोधय। स्वाभिलषितार्थसिद्ध्ये प्रबोधय। योऽग्निः [v]समिधानः स्तोत्रैः सम्यक् प्रकाशमानः सः [v]नः [v]हव्या अस्मदीयानि हव्यानि हवींषि [v]देवेषु [v]दधत् निदधातु ॥

तमध्वरेष्वीळते देवं मर्ता अमर्त्यम् । यजिष्ठं मानुषे जने ॥ २ ॥

तम् । अध्वरेषु । ईळते । देवम् । मर्तीः । अमर्त्यम् । यजिष्ठम् । मानुषे । जने ॥ २ ॥

[v]मर्ताः मनुष्याः [v]देवं द्योतमानम् [v]अमर्त्यम् अमरणधर्माणं [v]मानुषे मनुष्याणां संबन्धिनि [v]जने लोके [v]यजिष्ठं यष्टृतमं [v]तम् अग्निम् [v]अध्वरेषु सप्ततन्तुषु [v]ईळते स्तुवन्ति ॥

तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुतम् । अग्निं हव्याय वोळ्हवे ॥ ३ ॥

तम् । हि । शश्वन्तः । ईळते । स्रुचा । देवम् । घृतऽश्चुतम् । अग्निम् । हव्याय । वोळ्हवे ॥ ३ ॥

[v]शश्वन्तः बहवः स्तोतारः [v]तं [v]देवम्[२] [v]अग्निम् [v]ईळते स्तुवन्ति । कीदृशास्ते । [v]घृतश्रुता घृतं क्षरन्त्या [v]स्रुचा सहिताः । किमर्थं स्तुवन्ति । [v]हव्याय हव्यवहनार्थं चरुपुरोडाशादिलक्षणं हविः [v]वोढवे वोढुम्[३] ॥

अग्निर्जातो अरोचत घ्नन्दस्यूञ्योतिषा तमः । अविन्दद्गा अपः स्वः ॥ ४ ॥

अग्निः । जातः । अरोचत । घ्नन् । दस्यून् । ज्योतिषा । तमः ।
अविन्दत् । गाः । अपः । स्वरिति स्वः ॥ ४ ॥

[v]जातः अरण्योर्मथनेन प्रादुर्भूतः [v]अग्निः [v]दस्यून् यज्ञविघ्नकारिणः शत्रून् [v]घ्नन् हिंसन् [v]ज्योतिषा स्वेन तेजसा [v]तमः घ्नन् [v]अरोचत अदीप्यत । किंच [v]गा [v]अपः उदकानि [v]स्वः सूर्यं च [v]अविन्दत् अवेदयत् ॥

अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत । वेतु मे शृणवद्धवम् ॥ ५ ॥

अग्निम् । ईळेन्यम् । कविम् । घृतऽपृष्ठम् । सपर्यत । वेतु । मे । शृणवत् । हवम् ॥ ५ ॥

हे जनाः [v]ईळेन्यं स्तुत्यं [v]कविं क्रान्तदर्शिनं [v]घृतपृष्ठं दीप्तोपरिभागम् [v]अग्निं [v]सपर्यत पूजयत। सोऽग्निः [v]मे [v]हवं मदीयमाह्वानं [v]वेतु कामयताम् । [v]शृणवत् शृणोतु च ॥

अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिम् । स्वाधीभिर्वचस्युभिः ॥ ६ ॥

अग्निम् । घृतेन । ववृधुः । स्तोमेभिः । विश्वऽचर्षणिम् । सुऽआधीभिः । वचस्युऽभिः ॥ ६ ॥

१. त–अमरणम् । २. त–एतम् । ३. प-फ-ब–वोढुम् । हि पूरणः ।

ऋत्विजः ᵛविश्वचर्षणिं विश्वस्य द्रष्टारं ᵛस्वाधीभिः शोभनाध्यानैः ᵛवचस्युभिः स्तुतिकामैर्देवैः समेतम् ᵛअग्निं ᵛघृतेन ᵛस्तोमेभिः स्तोमैः स्तोत्रैः ᵛवावृधुः अवर्धयन् ॥ ॥ ६ ॥ ॥ १ ॥

द्वितीयेऽनुवाके अष्टादश[1] सूक्तानि । तत्र ' प्र वेधसे ' इति पञ्चर्चं प्रथमं सूक्तमाङ्गिरसस्य धरुणस्यार्षं त्रैष्टुभमाग्नेयम् । अत्रानुक्रमणिका—' प्र वेधसे पञ्चाङ्गिरसो धरुणः ' इति । प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' प्र वेधसे कवये त्वं नो अग्ने वरुणस्य विद्वान् ' (आश्व. श्रौ. ४. १३) इति[2] ॥

प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥ १ ॥

प्र । वेधसे । कवये । वेद्याय । गिरम् । भरे । यशसे । पूर्व्याय ।
घृतऽप्रसत्तः । असुरः । सुऽशेवः । रायः । धर्ता । धरुणः । वस्वः । अग्निः ॥ १ ॥

यः ᵛअग्निः ᵛघृतप्रसत्तः हवीरूपेण घृतेन प्रसन्नः ᵛअसुरः बलवान् ᵛसुशेवः । शोभनं शेवं सुखं यस्यासौ सुशेवः । शेवमिति सुखनामसु पाठात् । ᵛरायः धनस्य ᵛधर्ता पोषकः ᵛधरुणः हविषां धारकः ᵛवस्वः वासकः अग्निः भवति ᵛवेधसे विधात्रे ᵛकवये क्रान्तदृशे ᵛवेद्याय स्तुत्याय ॥ विदिरयं मनिना समानार्थो मनिश्च स्तुतिकर्मा ॥ ᵛयशसे यशस्विने ᵛपूर्व्याय मुख्याय तस्मा अग्नये ᵛगिरं स्तुतिं ᵛप्र ᵛभरे प्रणयानि ॥

ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन् ।
दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः ॥ २ ॥

ऋतेन । ऋतम् । धरुणम् । धारयन्त । यज्ञस्य । शाके । परमे । विऽओमन् ।
दिवः । धर्मन् । धरुणे । सेदुषः । नॄन् । जातैः । अजातान् । अभि । ये । ननक्षुः ॥ २ ॥

ᵛये यजमानाः ᵛदिवः द्युलोकस्य ᵛधरुणे धारके ᵛधर्मन् यज्ञे ᵛसेदुषः आसीनान् ᵛनॄन् नेतॄन् ᵛअजातान् देवान् ᵛजातैः मनुष्यैर्ऋत्विग्भिः ᵛअभि ᵛननक्षुः अभिप्राप्नुवन्ति ते यजमानाः ᵛयज्ञस्य ᵛधरुणं धारकम् ᵛऋतं सत्यरूपमग्निं ᵛशाके कर्मणि निमित्ते ᵛपरमे उत्कृष्टे ᵛव्योमन् स्थाने उत्तरवेद्याम् ᵛऋतेन स्तोत्रेण ᵛधारयन्त धारयन्ति ॥

अंहोयुवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय ।
स संवतो नवजातस्तुतुर्यात्सिंहं न क्रुद्धमभितः परि ष्ठुः ॥ ३ ॥

अंहःऽयुवः । तन्वः । तन्वते । वि । वयः । महत् । दुस्तरम् । पूर्व्याय ।
सः । सम्ऽवतः । नवऽजातः । तुतुर्यात् । सिंहम् । न । क्रुद्धम् । अभितः । परि । स्थुः ॥ ३ ॥

१. ग-ज-श–दश । २. ज्ञ-त-र– इतीति ।

ये[1] यजमानाः [v]पूर्व्याय सुन्वायास्मा अग्नये [v]महत् अधिकं [v]दुष्टरं राक्षसैर्दुष्प्रापं [v]वयः हवीरूपमन्नं प्रयच्छन्ति ते यजमानाः [v]तन्वः स्वास्तनूः [v]अंहोयुवः अंहसा वियोजिकाः [v]वि [v]तन्वते विस्तारयन्ति । [v]नवजातः [v]सः अग्निः [v]संवतः संगतान् शत्रून् [v]तुतुर्यात् तरतु । किंच [v]अभितः सर्वतो वर्तमानाः शत्रवो मां [v]परि वर्जयित्वा [v]स्थुः तिष्ठेयुः । कथमिव । मृगाः [v]कृत्नुं [v]सिंहं [v]न सिंहमिव ॥

मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥ ४ ॥

माताऽइव । यत् । भरसे । पप्रथानः । जनम्ऽजनम् । धायसे । चक्षसे । च ।
वयःऽवयः । जरसे । यत् । दधानः । परि । त्मना । विषुऽरूपः । जिगासि ॥ ४ ॥

[v]पप्रथानः सर्वत्र प्रथमानः [v]यत् यस्त्वं [v]मातेव जननीव [v]जनंजनं सर्वं जनं [v]भरसे बिभर्षि । किंच [v]धायसे धारणाय [v]चक्षसे दर्शनाय [v]च सर्वैः प्रार्थ्यसे । [v]यत् यदा [v]दधानः धार्यमाणो भवसि तदा [v]वयोवयः सर्वमन्नं [v]जरसे जरयसि । अपि च [v]विषुरूपः नानारूपः सन् [v]त्मना आत्मना [v]परि [v]जिगासि सर्वभूतानि परिगच्छसि ॥

वाजो नु ते शवसस्पात्वन्तमुरुं दोघं धरुणं देव रायः ।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः ॥ ५ ॥

वाजः । नु । ते । शवसः । पातु । अन्तम् । उरुम् । दोघम् । धरुणम् । देव । रायः ।
पदम् । न । तायुः । गुहा । दधानः । महः । राये । चितयन् । अत्रिम् । अस्परित्यस्पः ॥५॥

हे [v]देव द्योतमानाग्ने[2] [v]उरुं पृथुं [v]दोघं कामानां दोग्धारं [v]रायः धनस्य [v]धरुणं धारकं [v]वाजः हविर्लक्षणमन्नं [v]ते त्वदीयस्य [v]शवसः बलस्य [v]अन्तं समाप्तिं संपूर्तिं [v]नु अद्य [v]पातु रक्षतु । [v]तायुः[3] [v]न तस्करो यथा [v]गुहा गुहायां [v]पदं द्रव्यं [v]दधानः धारयन् रक्षति तद्वत्[4] [v]महः महते [v]राये धनाय धनलाभार्थं [v]चितयन् सन्मार्गं प्रकाशयन् [v]अत्रिमस्पः । अत्रिमृषिमप्रीणयः । यद्वा[5] तमापन्नश्योऽपारयः[6] ॥ ' स्पृ प्रीणनपारणयोः ' इति धातुः ॥ ॥ ७ ॥

' बृहद्वयः ' इति पञ्चर्चं द्वितीयं सूक्तमात्रेयस्य पूरोरार्षम् । अन्त्या पङ्क्तिः शिष्टा अनुष्टुभः । अग्निर्देवता । तथा चानुक्रान्तं—' बृहत्पूरुः[7] पङ्क्त्यन्तं हि ' इति । प्रातरनुवाके आग्नेये क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चेदमादीनि दश सूक्तानि चतुर्थनवमवर्जितानि । आदितस्त्रिषु सूक्तेष्वन्त्या-

१. ख-च-झ-ण-भ-र-श– हे । २. त-द्योतमानरूपाग्ने । ३. ख-च-झ-ण-त-न-भ-र-श—तायुस्तस्करः । तायुरिति स्तेननाम । पदमिव आत्मीयं मार्गमिव गुहा गुहायां दधानः आत्मनः शत्रूणां प्रकाशं निदधानः । ४. ग-घ-ज–' यद्वा...अपारयः ' नास्ति । ५. झ-न-र–बृहत्पुरुः ।

मुद्धरेत् । तथा च सूत्रितं—' बृहद्वय इति दशानां चतुर्थनवमे उद्धरेदुत्तमामुत्तमां चादितस्त्रयाणाम् ' (आश्व. श्रौ. ४. १३) इति[1] ॥

बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥ १ ॥

बृहत् । वयः । हि । भानवे । अर्च । देवाय । अग्नये ।
यम् । मित्रम् । न । प्रशस्तिऽभिः । मर्तासः । दधिरे । पुरः ॥ १ ॥

यज्ञे [v]भानवे दीप्तिमते अग्नये [v]बृहद्वयः हवीरूपमन्नं दीयते [1]हि । अतस्त्वमपि [v]देवाय द्योतमानाय [v]अग्नये वयः [v]अर्च प्रयच्छ । [v]मर्तासः मनुष्याः [1]यम् अग्निं [1]मित्रं [v]न सखायमिव [v]प्रशस्तिभिः प्रकृष्टाभिः स्तुतिभिः [v]पुरः [v]दधिरे पुरस्कुर्वन्ति ।

स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।
वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥ २ ॥

सः । हि । द्युऽभिः । जनानाम् । होता । दक्षस्य । बाह्वोः ।
वि । हव्यम् । अग्निः । आनुषक् । भगः । न । वारम् । ऋण्वति ॥ २ ॥

यः [v]अग्निः [v]हव्यं हविः[2] [v]आनुषक् देवेष्वनुषक्तं करोति [v]बाह्वोः भुजयोः [v]दक्षस्य बलस्य [v]द्युभिः द्युतिभिर्युक्तः [v]सः अग्निः [v]जनानां यजमानानां [v]होता देवानामाह्वाता भवति । [v]भगो [v]न सूर्य इव [v]वारं वरणीयं धनं [v]वि [v]ऋण्वति विशेषेण प्रयच्छति मनुष्येषु ॥

अस्य स्तोमे मघोनः सुरूपे वृद्धशोचिषः ।
विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥ ३ ॥

अस्य । स्तोमे । मघोनः । सुरूपे । वृद्धऽशोचिषः ।
विश्वा । यस्मिन् । तुविऽस्वनि । सम् । अर्ये । शुष्मम् । आऽदधुः ॥ ३ ॥

[v]मघोनः मघवतो धनवतः [v]वृद्धशोचिषः । बृद्धानि प्रवृद्धानि[3] शोचींषि तेजांसि यस्यासौ वृद्धशोचिः । तस्यैवंविधस्याग्नेः [v]स्तोमे स्तोत्रे [v]सरूपे च स्याम[4] । [v]तुविष्वणि बहुशब्दे [v]अर्ये स्वामिनि [v]यस्मिन् अग्नौ [v]विश्वा ॥ ' सुपां सुलुक्० ' इति डादेशः ॥ विश्वे सर्वे ऋत्विजः [v]शुष्मं बलं हविर्भिः स्तोत्रैश्च [v]सम् [v]आदधुः सम्यगादधति ॥

१. न-इति प्रातरनुवाकन्यायेनेति च । २. प-फ-ब-हविः । हि पूरणः । ३. घ-श-' प्रवृद्धानि ' नास्ति । ४. त-स्याम । वयमिति शेषः ।

अधा ह्यग्न एषां सुवीर्यस्य मंहना ।
तमिद्यहुं न रोदसी परि श्रवो बभूवतुः ॥ ४ ॥

अध । हि । अग्ने । एषाम् । सुऽवीर्यस्य । मंहना ।
तम् । इत् । यह्वम् । न । रोदसी इति । परि । श्रवः । बभूवतुः ॥ ४ ॥

हे [v]अग्ने [v]अध[1] अथ [v]एषाम् अस्माकं यजमानानां [v]सुवीर्यस्य सर्वैः स्पृहणीयस्य बलस्य [v]मंहना मंहनाय दानाय भव ॥ मंहतिर्दानकर्मा ॥ [v]रोदसी द्यावापृथिव्यौ [v]यह्वं [v]न महान्तं सूर्यमिव [v]श्रवः सर्वैः श्रवणीयं[2] [v]तमित् तमग्निमेव [v]परि [v]बभूवतुः परिगृह्णीतः ॥

नू नु एहि वार्यमग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥ ५ ॥

नु । नः । आ । इहि । वार्यम् । अग्ने । गृणानः । आ । भर ।
ये । वयम् । ये । च । सूरयः । स्वस्ति । धामहे । सचा । उत । एधि । पृत्ऽसु । नः । वृधे ॥५॥

हे [v]अग्ने [v]गृणानः स्तूयमानः सन् [v]नु क्षिप्रम् [v]एहि । यज्ञं प्रत्यागच्छ । आगत्य च [v]नः अस्मभ्यं [v]वार्यं वरणीयं धनम् [v]आ [v]भर संपादय । [v]ये [v]वयं यजमानाः [v]ये [v]च [v]सूरयः स्तोतारः [v]सचा हविर्भिः सहिता उभे ये वयं [v]स्वस्ति स्तोत्रं [v]धामहे कुर्मः । [v]उत अपि च [v]पृत्सु पृतनासु [v]नः अस्माकं [v]वृधे समृद्धये [v]एधि भव ॥ ॥ ८ ॥

'आ यज्ञैः' इति पञ्चर्चं तृतीयं सूक्तमात्रेयस्य पूरोरार्षमाग्नेयम । अन्त्या पङ्क्तिः । शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । 'आ यज्ञैः' इत्यनुक्रमणिका । अन्त्यावर्जं प्रातरनुवाकाश्विनशस्त्र्योः 'बृहद्वयः' इत्यादिदशसूक्तमध्ये विनियोग उक्तः ॥

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ।
अग्निं कृते स्वध्वरे पुरुरींळीतावसे ॥ १ ॥

आ । यज्ञैः । देव । मर्त्यः । इत्था । तव्यांसम् । ऊतये ।
अग्निम् । कृते । सुऽअध्वरे । पुरुः । ईळीत । अवसे ॥ १ ॥

हे [v]देव [v]मर्त्यः मनुष्य ऋत्विक् [v]इत्था इत्थं [v]तव्यांसं स्वतेजोभिः प्रवृद्धम् [v]अग्निम् [v]ऊतये तर्पणाय [v]यज्ञैः स्तोत्रैः [v]आ ह्वयति । किंच [v]पुरुः मनुष्यः स्तोता [v]कृते [v]स्वध्वरे शोभने क्रतौ तम् अग्निम् [v]अवसे रक्षणाय [v]ईळीत स्तौति ॥

१. प-फ-ब–अध हि । २. ख-च-ज्ञ-ण-न-भ-र-श–श्रयणीयम् ।

अस्य॒ हि स्वय॑शस्तर आ॒सा वि॑धर्म॒न्मन्य॑से ।
तं नाकं॑ चि॒त्रशो॑चिषं म॒न्द्रं प॒रो म॑नी॒षया॑ ॥ २ ॥

अस्य॑ । हि । स्वय॑शःऽतरः । आ॒सा । वि॒ऽध॒र्म॒न् । मन्य॑से ।
तम् । नाक॑म् । चि॒त्रऽशो॑चिषम् । म॒न्द्रम् । प॒रः । म॒नी॒षया॑ ॥ २ ॥

हे [v]विधर्मन् । विशिष्टो धर्मो यस्यासौ विधर्मा स्तोता । तस्य संबोधनम् । हे स्तोतः [v]स्वयशस्तरः सुयशसां मध्येऽतिशयेन सुयशास्त्वं [v]मनीषया प्रकृष्टबुद्ध्या[1] साधनेन [v]तं प्रसिद्धम् [v]अस्य अमुं [v]हि अग्निम् [v]आसा आस्येन वाचा [v]मन्यसे स्तौषि । किंविशिष्टमग्निम् । [v]नाकं सुखम् । अकं दुःखम् । न विद्यतेऽकं यस्य सः । तं [v]चित्रशोचिषं चित्रतेजसं [v]मन्द्रं स्तुत्यं [v]परः परस्तात् स्थितम् ॥

अ॒स्य वा॒सा उ॑ अ॒र्चि॒षा य आयु॑क्त तु॒जा गि॒रा ।
दि॒वो न यस्य॒ रेत॑सा बृ॒हच्छोच॑न्त्य॒र्चय॑: ॥ ३ ॥

अ॒स्य । वै । अ॒सौ । ऊँ॒ इति॑ । अ॒र्चि॒षा । यः । अयु॑क्त । तु॒जा । गि॒रा ।
दि॒वः । न । यस्य॑ । रेत॑सा । बृ॒हत् । शोच॑न्ति । अ॒र्चय॑: ॥ ३ ॥

[v]यः अग्निः [v]तुजा जगद्रक्षणसमर्थेन बलेन [v]गिरा स्तुत्या [v]अयुक्त संबद्धो भवति[2] [v]दिवो [v]न द्योतमानस्यादित्यस्येव [v]यस्य अग्नेः [v]रेतसा प्रभया कृत्स्नं जगद्व्याप्तं यस्याग्नेः [v]बृहत् बृहन्तः [v]अर्चयः दीप्तयः [v]शोचन्ति प्रकाशन्ते [v]अस्य [v]वै खल्वग्नेः [v]अर्चिषा प्रभया [v]असौ आदित्यः अर्चिष्मान् भवति । [v]उ इति पूरणः ॥

अ॒स्य क्रत्वा॒ वि॑चेतसो दं॒सस्य॒ वसु॒ रथ॒ आ ।
अधा॒ विश्वा॑सु॒ हव्यो॑ऽग्निर्वि॒क्षु प्र शं॑स्यते ॥ ४ ॥

अ॒स्य । क्रत्वा॑ । वि॒ऽचे॒त॒सः । दं॒सस्य॑ । वसु॑ । रथे॑ । आ ।
अध॑ । विश्वा॑सु । हव्यः॑ । अ॒ग्निः । वि॒क्षु । प्र । शं॒स्य॒ते॒ ॥ ४ ॥

[v]विचेतसः सुमतय ऋत्विजः [v]दंसस्य[3] दर्शनीयस्य [v]अस्य[4] अग्नेः [v]क्रत्वा कर्मणा यज्ञादिना [v]वसु वसूनि धनानि [v]रथे [v]आ दधति । [v]हव्यः यज्ञार्थमाह्वातव्यः सः [v]अग्निः [v]अध अथ उत्परयनन्तरमेव [v]विश्वासु सर्वासु [v]विक्षु प्रजासु [v]प्र [v]शस्यते स्तूयते ॥

---

१. ख-च-ज्ञ-ण-न-भ-र-प्रकृष्टया । २. ख-व-ज्ञ-ण-त-न-भ-र-श-अभवत् । ३. ग-घ-ज-अस्य दंसस्य । ४. ख-ग-ध-च-ज-ज्ञ-ण-न-भ-श-'अस्य' नास्ति ।

नू न इद्धि वार्यमासा सचन्त सूरयः ।
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥ ५ ॥

नु । नः । इत् । हि । वार्यम् । आसा । सचन्त । सूरयः ।
ऊर्जः । नपात् । अभिष्टये । पाहि । शग्धि । स्वस्तये । उत । एधि । पृत्ऽसु । नः । वृधे ॥ ५ ॥

हे अग्ने ᵛनः अस्मभ्यं ᵛवार्यं वरणीयं धनं ᵛनु क्षिप्रं प्रयच्छ[१] । ᵛइद्धि इति पूरणौ । यतः ᵛसूरयः स्तोतारस्त्वत्तः सकाशात् ᵛआसा आस्येन स्तोत्रेण ᵛसचन्त धनं लभन्ते । किंच हे ᵛऊर्जो ᵛनपात् अन्नस्य न पातयितः बलस्य पुत्र वा ᵛअभिष्टये अभीच्छते मह्यमन्नं प्रयच्छेति शेषः । ᵛपाहि । अस्मानापद्भ्यो रक्ष । ᵛस्वस्तये क्षेमाय पश्चादिलक्षणस्य धनस्य क्षेमार्थं ᵛशग्धि त्वां याचे ॥ व्यत्ययेन मध्यमः ॥ शक्तो भवेति वा । हे अग्ने ᵛउत अपि च ᵛपृत्सु पृतनासु ᵛनो ᵛवृधे समृद्धये ᵛएधि भव ॥ ॥ ५ ॥

' प्रातरग्निः ' इति पञ्चर्चं चतुर्थं सूक्तम् । अत्रेयमनुक्रमणिका—' प्रातर्मृक्तवाहा[२] द्वितः ' इति । मृक्तवाहा इति विशेषणविशिष्ट आत्रेयो द्वित ऋषिः । ' पङ्क्त्यन्तं हि ' इति हिशब्दादस्यापि सूक्तस्य पञ्चमी पङ्क्तिः । पङ्क्त्यन्तपरिभाषया शिष्टा अनुष्टुभः । उक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः ॥

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥ १ ॥

प्रातः । अग्निः । पुरुऽप्रियः । विशः । स्तवेत । अतिथिः ।
विश्वानि । यः । अमर्त्यः । हव्या । मर्तेषु । रण्यति ॥ १ ॥

ᵛपुरुप्रियः बहुप्रियः ᵛविशः यजमाने धनस्य निवेशकः ᵛअतिथिः । यजमानानां गृहान्प्रति तिथिष्वभ्येतीत्यतिथिः । तथाह यास्कः—' अतिथिरभ्यतितो गृहान्भवत्यभ्येति तिथिषु परकुलानीति वा परगृहाणीति वा ' (निरु. ४. ५) इति । एवंविधः ᵛअग्निः ᵛप्रातः ᵛस्तवेन स्तूयते । ᵛअमर्त्यः अमरणधर्मा ᵛयः अग्निः ᵛमर्तेषु मनुष्येषु यजमानेषु स्थितानि ᵛविश्वानि सर्वाणि ᵛहव्या हव्यानि हवींषि ᵛरण्यति कामयते ॥

द्वितायं मृक्तवाहसे स्वस्य दक्षस्य मंहना ।
इन्दुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥ २ ॥

द्वितायं । मृक्तऽवाहसे । स्वस्य । दक्षस्य । मंहना ।
इन्दुम् । सः । धत्ते । आनुषक् । स्तोता । चित् । ते । अमर्त्य ॥ २ ॥

---

१. ग-ध-ज-यच्छ । २. ख-च-ञ-ण-त-न-भ-र-आ यज्ञैः प्रातर्मृक्तवाहा ।

हे अग्ने [v]द्विताय द्वितपुत्राय [v]मृक्तवाहसे । मृक्तं शुद्धं हविर्देवेभ्यो वहति प्रापयतीति मृक्तवाहाः । तस्मै [v]स्वस्य आत्मीयस्य [v]दक्षस्य बलस्य धनस्य वा [v]मंहना मंहनायै दानाय भव । हे [v]अमर्त्य नित्याग्ने यतः कारणात् [v]ते तुभ्यं [v]सः मृक्तवाहाः [v]आनुषक् सर्वदानुषक्तम् [v]इन्दुं सोमं [v]धत्ते धारयति [v]स्तोता [v]चित् स्तोता च भवति ॥

तं वो॑ दी॒र्घायु॑शोचिषं गि॒रा हु॑वे म॒घोना॑म् ।
अरि॑ष्टो॒ येषां॑ रथो॒ व्य॑श्वदाव॒न्नीय॑ते ॥ ३ ॥

तम् । वः । दीर्घायुऽशोचिषम् । गिरा । हुवे । मघोनाम् ।
अरिष्टः । येषाम् । रथः । वि । अश्वऽदावन् । ईयते ॥ ३ ॥

हे अग्ने [v]दीर्घायुशोचिषं दीर्घगमनदीप्तिं [v]तं [v]वः । पूजायां बहुवचनम् । त्वां [v]मघोनां धनिनां कृते [v]गिरा स्तोत्रेण [v]हुवे आह्वयामि । हे [v]अश्वदावन् अश्वानां दातः [v]येषां धनिनां[१] [v]रथः युद्धेषु [v]अरिष्टः शत्रुभिरहिंसितः [v]वि [v]ईयते विगच्छतु[२] ॥

चि॒त्रा वा॒ येषु॑ दीधि॒तिरा॑सन्नु॒क्था पान्ति॒ ये ।
स्ती॒र्णं ब॒र्हिः स्व॑र्णरे॒ श्रवां॑सि दधिरे॒ परि॑ ॥ ४ ॥

चित्रा । वा । येषु । दीधितिः । आसन् । उक्था । पान्ति । ये ।
स्तीर्णम् । बर्हिः । स्वःऽनरे । श्रवांसि । दधिरे । परि ॥ ४ ॥

[v]येषु ऋत्विक्षु [v]चित्रा नानाविधा [v]दीधितिः यज्ञविषया क्रिया भवति । [v]ये [v]आसन् आस्ये [v]उक्था उक्थानि स्तोत्राणि [v]पान्ति रक्षन्ति तैर्ऋत्विग्भिः [v]स्तीर्णं स्तीर्णस्य[३] [v]बर्हिः बर्हिषः [v]परि उपरि [v]श्रवांसि अन्नानि हवींषि [v]स्वर्णरे । स्वः स्वर्गं नरं यजमानं नयतीति स्वर्णरो यज्ञः । तस्मिन् [v]दधिरे[४] निधीयन्ते[५] ॥

ये मे॑ पञ्चा॒शतं॑ द॒दुर॒श्वानां॑ स॒धस्तु॑ति ।
द्यु॒मदग्ने॒ महि॒ श्रवो॑ बृ॒हत्कृ॑धि म॒घोना॑ नृ॒वदमृत नृ॒णाम् ॥ ५ ॥

ये । मे । पञ्चाशतम् । ददुः । अश्वानाम् । सधऽस्तुति ।
द्युऽमत् । अग्ने । महि । श्रवः । बृहत् । कृधि । मघोनाम् । नृऽवत् । अमृत । नृणाम् ॥५॥

---

१. ख-च-ञ-ण-त-न-भ-र-धनानाम् । २. ख-च-ञ-ण-न-भ-र-गच्छतु । ३. त-र-श-आस्तीर्णस्य । ४. त-निदधिरे । ५. प-फ-ब-निधीयन्ते । वा पूरणः ।

vये मघवानो दातारः vमे मह्यं vसधस्तुति स्तुत्या सहितं त्वास्तोत्रसमनन्तरम्[१] vअश्वानां vपञ्चाशतं vददुः हे vअमृत vअग्ने त्वं तेषां vमघोनां vनृणां vद्युमत् दीप्तिमत् vमहि महत् vबृहत् परिवृढं vनृवत् परिचारकमनुष्ययुक्तं vश्रवः अन्नं vकृधि कुरु देहीत्यर्थः ॥ ॥ १० ॥

' अभ्यवस्थाः ' इति पञ्चर्चं पञ्चमं सूक्तम् । अत्रेयमनुक्रमणिका—' अभ्यवस्था वत्रिर्गायत्र्यावनुष्टुभौ विराड्रूपा ' इति । आत्रेयो वत्रिर्ऋषिः । प्रथमाद्वितीये गायत्र्यौ तृतीयाचतुर्थ्यावनुष्टुभौ पञ्चमी विराड्रूपा ' एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा ' इत्युक्तलक्षणोपेतत्वात ॥

अभ्यवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत । उपस्थे मातुर्वि चष्टे ॥ १ ॥

अभि । अवऽस्थाः । प्र । जायन्ते । प्र । वव्रेः । वव्रिः । चिकेत ।

उपऽस्थे । मातुः । वि । चष्टे ॥ १ ॥

vवव्रेः ऋषेः vअभि उत्तरोत्तरम् vअवस्थाः अशोभना दशाः vप्र vजायन्ते । तादृशीः vवव्रिः हविषां संभक्ता सोऽग्निः vप्र vचिकेत प्रजानीयात् । ज्ञात्वा चापनयतीति भावः । योऽग्निः vमातुः पृथिव्याः vउपस्थे समीपे स्थितं पदार्थजातं vवि vचष्टे पश्यति ॥

जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति । आ दृळ्हां पुरं विविशुः ॥२॥

जुहुरे । वि । चितयन्तः । अनिऽमिषम् । नृम्णम् । पान्ति ।

आ । दृळ्हाम् । पुरम् । विविशुः ॥ २ ॥

ये vवि vचितयन्तः तव प्रभावं जानन्तो जनाः[२] vअनिमिषं सर्वदा vजुहुरे जुहुविरे[३] यज्ञार्थं त्वामाह्वयन्ति, आहूय च vनृम्णं तव[४] बलं हविर्भिः स्तोत्रैश्च vपान्ति रक्षन्ति ते vदृळ्हां शत्रुभिः साधयितुमशक्यां vपुरं पुरीम् vआ vविविशुः प्रविशन्ति । ' शतं पूर्भिरायसीभिर्नि पाहि ' (ऋ. सं. ७. ३. ७) इति निगमः ॥

आ श्वैत्रेयस्य जन्तवो द्युमद्धेम कृष्टयः ।

निष्कग्रीवो बृहदुक्थ एना मघ्वा न वाजयुः ॥ ३ ॥

आ । श्वैत्रेयस्य । जन्तवः । द्युऽमत् । वर्धन्त । कृष्टयः ।

निष्कऽग्रीवः । बृहत्ऽउक्थः । एना । मघ्वा । न । वाजऽयुः ॥ ३ ॥

जायन्त इति vजन्तवः । vकृष्टयः मनुष्या ऋत्विजः vमघ्वा vन मधुनेव vएना एनया स्तुत्या । यद्वा नकारश्चार्थे । मधुना च vश्वैत्रेयस्य । श्वित्रमन्तरिक्षम् । तत्र भवस्य वैद्युतस्याग्नेः

---

१. ख-च-ण-भ–स्तोत्र°; झ-ट-ततस्तोत्र° । २. ग-घ-ज-श–जनास्त्वा । ३. ग-घ-ज-श–' जुहुविरे ' नास्ति । ४. ख-च-ण–ते ।

[v]द्युमत् दीप्तिमत् बलम् [v]आ [v]वर्धन्त अभिवर्धयन्ति । किंविधाः कृष्टयः । [v]निष्कग्रीवः निष्केण सुवर्णेनालंकृतग्रीवाः ॥ व्यत्ययेनैकवचनम् ॥ [v]बृहदुक्थः बृहत्स्तोत्राः [v]वाजयुः अन्नकामाः ॥

प्रियं दुग्धं न काम्यमजामि जाम्योः सचा ।
घर्मो न वाजजठरोऽदब्धः शश्वतो दभः ॥ ४ ॥

प्रियम् । दुग्धम् । न । काम्यम् । अजामि । जाम्योः । सचा ।
घर्मः । न । वाजऽजठरः । अदब्धः । शश्वतः । दभः ॥ ४ ॥

[v]जाम्योः द्यावापृथिव्योः [v]सचा सहायभूतोऽग्निः [v]दुग्धं [v]न पय इव [v]काम्यं कमनीयम् [v]अजामि दोषरहितं [v]प्रियम् अस्मदीयं स्तोत्रं शृणोतु । किंविधोऽग्निः । [v]घर्मो [v]न प्रवर्ग्य इव [v]वाजजठरः । वाजोऽन्नं[1] जठरे यस्य सः । घर्मो यथा हव्येनाज्येन पयसाभिक्तो वाजजठरस्तद्वत् । हविर्जठर इत्यर्थः । [v]अदब्धः शत्रुभिः स्वयमहिंसितः [v]शश्वतः शाश्वतो नित्यः [v]दभः शत्रूणां हिंसकः ॥

क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः ।
ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥ ५ ॥

क्रीळन् । नः । रश्मे । आ । भुवः । सम् । भस्मना । वायुना । वेविदानः ।
ताः । अस्य । सन् । धृषजः । न । तिग्माः । सुऽसंशिताः । वक्ष्यः । वक्षणेऽस्थाः ॥ ५ ॥

हे [v]रश्मे रश्मिमन्नग्ने [v]क्रीळन् वनेषु क्रीडन् [v]भस्मना स्वकार्येण भसितेन [v]वायुना प्रेरकेण मरुता च [v]सं [v]वेविदानः सम्यक् ज्ञायमानस्त्वं [v]नः अस्माकम् [v]आ भुवः । अभिमुखो भव । [v]वक्षणेस्थाः वक्षणे वह्नौ स्थिताः [v]वक्ष्यः । हविर्वहन्तीति वक्ष्यो ज्वालाः । [v]सुसंशिताः सुतीक्ष्णाः [v]धृषजः शत्रूणां धर्षिकाः [v]ताः ज्वालाः [v]अस्य यजमानस्य मम [v]न [v]तिग्माः न तीक्ष्णाः [v]सन् सन्तु ॥ अस्तेर्लेटि रूपम् ॥ ॥ ११ ॥

'यमग्ने' इति चतुर्ऋचं षष्ठं सूक्तमत्रीणां प्रयस्वतामार्षमाग्नेयम् । अन्त्या पङ्क्तिः शिष्टा अनुष्टुभः । तथा चानुक्रान्तं—'यमग्ने चतुष्कं प्रयस्वन्तः पङ्क्त्यन्तं ह' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । अत्रेश्चतुर्वीराख्येऽहीने द्वितीयेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—'यमग्ने वाजसातमेति द्वितीयेऽहन्याज्यम्' (आश्व. श्रौ. १०. २) इति ॥

१. ख-च-ञ-ण-त-न-भ-र—वाजोऽन्नं हविः ।

यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम् ।
तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥ १ ॥

यम् । अग्ने । वाजऽसातम । त्वम् । चित् । मन्यसे । रयिम् ।
तम् । नः । गीःऽभिः । श्रवाय्यम् । देवऽत्रा । पनय । युजम् ॥ १ ॥

हे [v]अग्ने हे [v]वाजसातम अत्यन्तमन्नद [v]त्वं [v]यं [v]रयिं धनमस्माभिर्दीयमानं हवीरूपं धनं [v]मन्यसे बुध्यसे । [v]चित् इति पादपूरणः । [v]श्रवाय्यं श्रवणार्हं[1] प्रशस्यं[2] [v]गीभिः स्तुतिभिः [v]युजं युक्तं [v]नः अस्मदीयं हविर्लक्षणं धनं [v]तं[3] [v]देवत्रा देवेषु [v]पनय[4] प्रापयेत्यर्थः ॥

ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः ।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे ॥ २ ॥

ये । अग्ने । न । ईरयन्ति । ते । वृद्धाः । उग्रस्य । शवसः ।
अप । द्वेषः । अप । ह्वरः । अन्यऽव्रतस्य । सश्चिरे ॥ २ ॥

हे [v]अग्ने [v]ये जनाः [v]वृद्धाः पश्वादिलक्षणैर्धनैः समृद्धाः सन्तः [v]ते तुभ्यं [v]नेरयन्ति हवींषि न प्रयच्छन्ति ते [v]उग्रस्य अधिकेन [v]शवसः बलेन अन्नेन वा [v]अप नीताः बलान्नहीना भवन्तीत्यर्थः । किंच [v]अन्यव्रतस्य अन्यद्दैदिकाद्विभक्तं व्रतं कर्म यस्य तस्यासुरस्य [v]द्वेषः त्वत्संबन्धिनं[5] विरोधं [v]ह्वरः अतिहिंसां च [v]अप [v]सश्चिरे आत्मानं प्रापयन्ति ॥

होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनम् ।
यज्ञेषु पूर्व्यं गिरा प्रयस्वन्तो हवामहे ॥ ३ ॥

होतारम् । त्वा । वृणीमहे । अग्ने । दक्षस्य । साधनम् ।
यज्ञेषु । पूर्व्यम् । गिरा । प्रयस्वन्तः । हवामहे ॥ ३ ॥

हे [v]अग्ने [v]प्रयस्वन्तः अन्नवन्तः एतन्नामका वयं [v]दक्षस्य बलस्य [v]साधनं साधकं[6] साधयितारं त्वां [v]होतारं देवानामाह्वातारं [v]वृणीमहे । किंच [v]यज्ञेषु [v]पूर्व्यं मुख्यं त्वां [v]गिरा स्तुतिरूपया वाचा [v]हवामहे स्तुमः ॥

---

१. ख-च-ण–श्रयणीयम् । २. ग-घ-ज–शस्यम् । ३. ख-च-ञ-ण-न-भ-र–तं रयिम् । ४. ख-च-ञ-ण-न-भ-र–पनय व्यपनय । ५. ख-च-ञ-ण-न-भ-र–तत्संबन्धिनम् । ६. ख-च-ञ-ण-न-भ-र–'साधकं' नास्ति ।

इत्था यथा त ऊतये सहसावन्दिवेदिवे ।
राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥४॥

इत्था । यथा । ते । ऊतये । सहसाऽवन् । दिवेऽदिवे ।
राये । ऋताय । सुक्रतो इति सुऽक्रतो । गोभिः । स्याम । सधऽमादः ।
वीरैः । स्याम । सधऽमादः ॥ ४ ॥

हे ᵛसहसावन् बलवन्नग्ने ᵛदिवेदिवे अन्वहं वयं ᵛते तव ᵛऊतये रक्षणाय ᵛयथा स्याम तथा ᵛइत्था इत्थं कुरु । हे ᵛसुक्रतो ᵛराये धनाय ᵛऋताय यज्ञाय च यथा ᵛस्याम तथा कुरु । किंच वयं[1] ᵛगोभिः ᵛसधमादः सह माद्यन्तः ᵛस्याम । ᵛवीरैः पुत्रैश्च ᵛसधमादः सह माद्यन्तः स्याम । तथा कुरु ॥ ॥ १२ ॥

' मनुष्वत्त्वा ' इति चतुर्ऋचं सप्तमं सूक्तमात्रेयस्य सप्तस्यार्षम् । ' मनुष्वत्सप्तः ' इत्यनुक्रमणिका । ' पङ्क्तयन्तं ह ' इति पूर्वत्रोक्तत्वादिदमादीनि त्रीणि सूक्तानि पङ्क्तयन्तानि । शिष्टा अनुष्टुभः । अग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि ।
अग्ने मनुष्वदङ्गिरो देवान्देवयते यज ॥ १ ॥

मनुष्वत् । त्वा । नि । धीमहि । मनुष्वत् । सम् । इधीमहि ।
अग्ने । मनुष्वत् । अङ्गिरः । देवान् । देवऽयते । यज ॥ १ ॥

हे ᵛअग्ने ᵛत्वा त्वां ᵛमनुष्वत् मनुरिव ᵛनि ᵛधीमहि । मनुःशब्दो मनुपर्यायः ॥ ' नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ' इति भसंज्ञायां त्वाभावः ॥ ᵛमनुष्वत् मनुरिव त्वा ᵛसमिधीमहि समिद्भिः संदीपयामः । हे ᵛअङ्गिरः अङ्गारात्मकाग्ने[2] ᵛदेवयते देवकामाय यजमानाय ᵛमनुष्वत् मनवे मनोरपत्याय ᵛदेवान् ᵛयज ॥

त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे ।
सुचस्त्वा यन्त्यानुषक्सुजात सर्पिरासुते ॥ २ ॥

त्वम् । हि । मानुषे । जने । अग्ने । सुऽप्रीतः । इध्यसे ।
सुचः । त्वा । यन्ति । आनुषक् । सुऽजात । सर्पिःऽआसुते ॥ २ ॥

---

१. ख-च-ञ-ण-न-भ-र-' वयं ' नास्ति । २. त-अङ्गिरात्मकाग्ने ।

हे [v]अग्ने [v]त्वं [v]मानुषे [v]जने[1] मनुष्यलोके [v]सुप्रीतः[2] स्तोत्रैः सुष्ठु प्रीतः सन् [v]इध्यसे दीप्यसे। [v]स्रुचः हविर्भिः संपूर्णाः [v]आनुषक् अनुषक्तं यथा भवति तथा [v]त्वा त्वां [v]यन्ति प्राप्नुवन्ति। हे [v]सुजात हे [v]सर्पिरासुते घृतयुक्तान्नेति ॥

त्वां विश्वे सजोषसो देवासो दूतमक्रत ।
सपर्यन्तस्त्वा कवे यज्ञेषु देवमीळते ॥ ३ ॥

त्वाम् । विश्वे । सऽजोषसः । देवासः । दूतम् । अक्रत ।
सपर्यन्तः । त्वा । कवे । यज्ञेषु । देवम् । ईळते ॥ ३ ॥

[v]सजोषसः सह प्रीयमाणाः [v]विश्वे सर्वे [v]देवासः देवाः [v]त्वां [v]दूतम् [v]अक्रत अकुर्वन्[3]। अतः कारणात् हे [v]कवे क्रान्तदर्शिन् [v]देवं द्योतमानं [v]त्वा[4] त्वां [v]सपर्यन्तः परिचरन्तो यजमानाः [v]यज्ञेषु [v]ईळते देवानाह्वातुं याचन्ते ॥

देवं वो देवयज्ययाग्निमीळीत मर्त्यः ।
समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥ ४ ॥

देवम् । वः । देवऽयज्यया । अग्निम् । ईळीत । मर्त्यः ।
सम्ऽइद्धः । शुक्र । दीदिहि । ऋतस्य । योनिम् । आ । असदः ।
ससस्य । योनिम् । आ । असदः ॥ ४ ॥

[v]मर्त्यः मनुष्यः [v]देवं द्योतमानम् [v]अग्निम् अग्रण्यं [v]वः त्वां [v]देवयज्यया देवयज्यायै देवयागार्थम् [v]ईळीत स्तोतुमर्हति। हे [v]शुक्र शोचिष्मन्[5] [v]समिद्धः हविर्भिः प्रवृद्धः सन् [v]दीदिहि दीप्यस्व। [v]ऋतस्य सत्यभूतस्य [v]ससस्य ऋषेरस्य [v]योनिं[6] कारणं[7] स्वर्गसाधनं यज्ञस्थानम्[8] [v]आसदः। देवतारूपेणासीद। आदरातिशयद्योतनार्थं पुनर्वचनम् ॥ ॥ १३ ॥

'प्र विश्वसामन्' इति चतुर्ऋचमष्टमं सूक्तम्। आत्रेयो विश्वसामा ऋषिः। चतुर्थी पङ्क्तिः शिष्टा अनुष्टुभः। अग्निर्देवता। तथा चानुक्रान्तं–'प्र विश्वसामन्विश्वसाम' इति। उक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः ॥

१. ख-च-झ-ण-न-भ-र–'जने' नास्ति। २. प-फ-ब–सुप्रीतः हि। ३. ख-च-ण-भ–अकुर्वत। ४. ख-च-झ-ण-न-भ-र-श–'त्वा' नास्ति। ५. प-फ-ब–दीप्तामे। ६. ख-च-ण–योनिकरणम्; ग-घ-ज-त-फ–योनिः कारणम्; र–योनिकारणम्। ७. झ-भ-र–योनिं यज्ञस्थानम्।

प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे ।
यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि ॥ १ ॥

प्र । विश्वऽसामन् । अत्रिऽवत् । अर्च । पावकऽशोचिषे ।
यः । अध्वरेषु । ईड्यः । होता । मन्द्रऽतमः । विशि ॥ १ ॥

हे [v]विश्वसामन् । ऋषेः संबोधनमेतत् । त्वम् [v]अत्रिवत् अत्रिरिव [v]पावकशोचिषे शोधकदीप्तये तस्मा अग्नये [v]प्र [v]अर्च प्रगाय । [v]यः अग्निः [v]अध्वरेष्वीड्यः सर्वैर्यज्वभिः स्तुत्यः [v]होता देवानामाह्वाता [v]विशि जने [v]मन्द्रतमः स्तुत्यतमः ॥

नि त्वाग्निं जातवेदसं दधाता देवमृत्विजम् ।
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥ २ ॥

नि । अग्निम् । जातऽवेदसम् । दधात । देवम् । ऋत्विजम् ।
प्र । यज्ञः । एतु । आनुषक् । अद्य । देवव्यचःऽतमः ॥ २ ॥

हे यजमानाः [v]जातवेदसं जातप्रज्ञं जातधनं वा [v]देवं द्योतमानम् [v]ऋत्विजम् ऋतुयष्टारम् [v]अग्निं [v]नि [v]दधात निधत्त । किंच [v]देवव्यचस्तमः देवानामाप्ततमः [v]यज्ञः यज्ञसाधनमस्माभिर्दीयमानं हविः [v]आनुषक् अनुषक्तं यथा भवति तथा [v]अद्य अस्मिन्नहनि तमग्निं [v]प्र [v]एतु प्रगच्छतु[1] ॥

चिकित्विन्मनसं त्वा देवं मर्तास ऊतये ।
वरेण्यस्य तेऽवस इयानासो अमन्महि ॥ ३ ॥

चिकित्वित्ऽमनसम् । त्वा । देवम् । मर्तासः । ऊतये ।
वरेण्यस्य । ते । अवसः । इयानासः । अमन्महि ॥ ३ ॥

हे अग्ने [v]चिकित्विन्मनसम् । चिकित्वित् जानत् मनो यस्यासौ चिकित्विन्मनाः । तं [v]देवं [v]त्वा[2] त्वाम्[2] [v]इयानासः उपगच्छन्तः [v]मर्तासः मनुष्या वयम् [v]ऊतये रक्षणार्थं [v]वरेण्यस्य संभजनीयस्य [v]ते तव [v]अवसः अवसे तर्पणाय [v]अमन्महि स्तुमः ॥

अग्ने चिकिद्ध्यस्य नः इदं वचः सहस्य ।
तं त्वा सुशिप्र दम्पते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः ॥ ४ ॥

अग्ने । चिकिद्धि । अस्य । नः । इदम् । वचः । सहस्य ।
तम् । त्वा । सुऽशिप्र । दम्ऽपते । स्तोमैः । वर्धन्ति । अत्रयः । गीःऽभिः । शुम्भन्ति । अत्रयः ॥ ४ ॥

---

१. ग-घ-ज-श-गच्छतु । २. ख-च-झ-ण-न-भ- त्वा; र-श- त्वाम् ।

हे [V]अग्ने [V]सहस्य[1] सहसः बलस्य पुत्र [V]नः अस्मदीयम् [V]अस्य [V]इदं परिचरणमिदं [V]वचः स्तोत्रं च[2] [V]चिकिद्धि जानीहि । हे [V]सुशिप्र । शोभने शिप्रे हनू नासिके वा यस्यासौ सुशिप्रः । तस्य संबोधनम् । सुशिप्र सुहनो [V]दम्पते गृहपते [V]तं त्वाम्[3] [V]अत्रयः अत्रिपुत्राः [V]स्तोमैः स्तोत्रैः [V]वर्धन्ति वर्धयन्ति । [V]अत्रयः [V]गीर्भिः [V]शुम्भन्ति अलंकुर्वन्ति ॥ ॥ १४ ॥

'अग्ने सहन्तम्' इति चतुर्ऋचं नवमं सूक्तम् । अत्रानुक्रमणिका—'अग्ने शुम्नो विश्वचर्षणिः' इति । शुम्न ऋषिः । चतुर्थी पङ्क्तिः । आद्यास्तिस्रोऽनुष्टुभः । अग्निर्देवता । प्रातरनुवाकाश्विन-शस्त्रयोर्दशसूक्तान्तःपातित्वादुक्तो विनियोगः ॥

अग्ने सहन्तमा भर शुम्नस्य प्रासहा रयिम् ।
विश्वा यश्चर्षणीरभ्यासा वाजेषु सासहत् ॥ १ ॥

अग्ने । सहन्तम् । आ । भर । शुम्नस्य । प्रऽसहा । रयिम् ।
विश्वाः । यः । चर्षणीः । अभि । आसा । वाजेषु । ससहत् ॥ १ ॥

हे [V]अग्ने [V]प्रासहा प्रकृष्टेन बलेन [V]सहन्तं शत्रूनभिभवन्तं [V]रयिं पुत्रं [V]शुम्नस्य शुम्नाय मह्यं[4] ऋषये [V]आ [V]भर आहर ॥ चतुर्थ्यर्थे षष्ठी ॥ एतदेव विवृणोति । [V]यः पुत्रः [V]आसा आस्येन स्तोत्रेण युक्तः सन् [V]वाजेषु युद्धेषु [V]अभि आभिमुख्येन गतान् [V]विश्वाः सर्वान् [V]चर्षणीः मनुष्यान् शत्रून् [V]सासहत् अभिभवति ॥

तमग्ने पृतनाषहं रयिं सहस्व आ भर ।
त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥ २ ॥

तम् । अग्ने । पृतनाऽसहम् । रयिम् । सहस्वः । आ । भर ।
त्वम् । हि । सत्यः । अद्भुतः । दाता । वाजस्य । गोऽमतः ॥ २ ॥

हे [V]अग्ने [V]सहस्वः[5] बलवन् [V]पृतनासहं पृतनाः सेना अभिभवितारं [V]रयिं पुत्रं त्वम् [V]आ [V]भर आहर । [V]त्वं [V]हि [V]सत्यः सत्यभूतः [V]अद्भुतः महान् [V]गोमतः गोभिर्युक्तस्य [V]वाजस्य अन्नस्य [V]दाता ॥

विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।
होतारं सद्मसु प्रियं व्यन्ति वार्यं पुरु ॥ ३ ॥

विश्वे । हि । त्वा । सऽजोषसः । जनासः । वृक्तऽबर्हिषः ।
होतारम् । सद्मऽसु । प्रियम् । व्यन्ति । वार्यं । पुरु ॥ ३ ॥

१. ग-घ-ज-श–हे सहस्य । २. ग-घ-ज-श–'च' नास्ति । ३. प-फ-ब–त्वा त्वाम् । ४. ख-च-ण–'मह्यं' नास्ति; झ-भ-र-श–मम; न–एतन्नास्ति । ५. झ-ञ-भ-र–हे सहस्वः ।

हे अग्ने [v]सजोषसः सह प्रीयमाणाः [v]वृक्तबर्हिषः लूनबर्हिषः [v]विश्वे सर्वे [v]जनासः जना ऋत्विजः [v]सत्रासु यज्ञगृहेषु [v]होतारं देवानामाह्वातारं [v]प्रियं सर्वेषां प्रीतिकरं [v]त्वा त्वां [v]पुरु पुरूणि बहूनि [v]वार्या वरणीयानि धनानि [v]ईयन्ति याचन्ते[१] ॥

स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे ।
अग्ने एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥ ४ ॥

सः । हि । स्म । विश्वऽचर्षणिः । अभिऽमाति । सहः । दधे ।
अग्ने । एषु । क्षयेषु । आ । रेवत् । नः । शुक्र । दीदिहि । द्युऽमत् । पावक । दीदिहि ॥४॥

हे [v]अग्ने [v]सः लोकेषु प्रसिद्धः [v]विश्वचर्षणिः ऋषिः [v]अभिमाति शत्रूणां हिंसकं [v]सहः बलं [v]दधे धारयतु । [v]हि[२] [v]ष्म इति पूरणौ[२] । हे [v]शुक्र शोचिष्मन् त्वं [v]नः अस्मदीयेषु [v]एषु [v]क्षयेषु गृहेषु [v]रेवत् धनयुक्तं यथा भवति तथा [v]आ[३] [v]दीदिहि आदीप्यस्व[३] । हे [v]पावक पापानां शोधकाग्ने त्वं [v]द्युमत् दीप्तियुक्तं यशोयुक्तं[४] च [v]दीदिहि[४] दीप्यस्व ॥ ॥ १५ ॥

'अग्ने त्वं नः' इति चतुर्ऋचं दशमं सूक्तम् । अत्रानुक्रमणिका—'अग्ने त्वं गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्चैकर्चा द्विपदम्' इति । 'विंशतिका[५] द्विपदा विराजः' इत्युक्तत्वाच्चतस्रो द्विपदा विराजः । बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च क्रमेण चतसृणामृषयः । ते च गौपायना लौपायना वा[५] । अग्निर्देवता । महापितृयज्ञे आहवनीयं प्रति गच्छन्त ऋत्विज इदं सूक्तं जपेयुः । तथा च सूत्रितम्—'अथैनमभिसमायन्ति मा प्र गामाग्ने त्वं न इति जपन्तः'(आश्व. श्रौ. २. १९) इति । दशरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणस्य 'अग्ने त्वम्' इति द्वे, 'तं त्वा शोचिष्ठ' इत्येका, एवं मिलितो द्विपदस्तृचः स्तोत्रियः । तथैव सूत्रितम्—'अग्ने त्वं नो अन्तमोऽग्ने भव सुषमिधा'(आश्व. श्रौ. ८. २) इति ॥

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ १ ॥ २ ॥

अग्ने । त्वम् । नः । अन्तमः । उत । त्राता । शिवः । भव । वरूथ्यः ।
वसुः । अग्निः । वसुऽश्रवाः । अच्छ । नक्षि । द्युमत्ऽतमम् । रयिम् । दाः ॥ १ ॥ २ ॥

हे [v]अग्ने [v]वरूथ्यः वरणीयः संभजनीयः । यद्वा । वरूथैः परिधिभिर्वृतः [v]त्वं [v]नः अस्माकम् [v]अन्तमः अन्तिकतमः [v]भव । [v]उत अपि च [v]त्राता रक्षकः [v]शिवः सुखकरश्च भव ।

---

१. प-फ-ब-याचन्ते हि । २. ख-च-ञ-ण-त-न-भ-र-'हि...पूरणौ' नास्ति । ३. ख-च-ण-आदिदीहि दीप्यस्व; ग-घ-ज-श- दीदिहि दीप्यस्व । ४. ख-च-ञ-ण-न-भ-र-'यशोयुक्तं च दीदिहि' नास्ति । ५. ख-च-ण-भ-'विंशतिका...वा' नास्ति ।

[v]वसुः वासकः [v]अग्निः सर्वेषामग्रणीः [v]वसुश्रवाः व्याप्तास्तस्त्वम् [v]अच्छ आभिमुख्येन [v]नक्षि अस्मान् व्याप्नुहि [v]द्युमत्तमम् अतिशयेन दीप्तिमन्तं[1] [v]रयिं पश्वादिलक्षणं धनं [v]दाः अस्मभ्यं देहि ॥

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ३ ॥ ४ ॥

सः । नः । बोधि । श्रुधि । हवम् । उरुष्य । नः । अघऽयतः । समस्मात् ।
तम् । त्वा । शोचिष्ठ । दीदिऽवः । सुम्नाय । नूनम् । ईमहे । सखिऽभ्यः ॥ ३ ॥ ४ ॥

हे अग्ने [v]सः त्वं [v]नः अस्मान् [v]बोधि बुध्यस्व । [v]हवम् अस्मदीयमाह्वानं [v]श्रुधि शृणु । [v]अघायतः अघमिच्छतः [v]समस्मात् सर्वस्माज्जनात् [v]नः अस्मान् [v]उरुष्य रक्ष । हे [v]शोचिष्ठ अतिशयेन[2] शोचिष्मन्[2] [v]दीदिवः स्वतेजोभिर्दीप्ताग्ने [v]तं त्वां[3] [v]सुम्नाय सुखाय । सुम्नमिति सुखनाम । तदर्थं [v]सखिभ्यः समानख्यातिभ्यः पुत्रेभ्यः[4] तदर्थं च [v]नूनम् [v]ईमहे याचामहे ॥ ॥ १६ ॥

'अच्छा वो अग्निम्' इति नवर्चमेकादशं सूक्तम् । अत्रानुक्रमणिका—'अच्छा वो नव वसूयव आनुष्टुभम्' इति । आत्रेया वसूयुनामान ऋषयः । अनुष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । प्रातःसवनेऽच्छावाकवदस्वेत्युक्ते 'अच्छा वो अग्निमवसे' इत्यृचमनुब्रूयात् । तथा च सूत्रितम्—'अच्छा वो अग्निमवस इत्यृचमन्वाह' (आश्व. श्रौ. ५. ७) इति ॥

अच्छा वो अग्निमवसे देवं गासि स नो वसुः ।
रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥ १ ॥

अच्छ । वः । अग्निम् । अवसे । देवम् । गासि । सः । नः । वसुः ।
रासत् । पुत्रः । ऋषूणाम् । ऋतऽवा । पर्षति । द्विषः ॥ १ ॥

हे वसूयवः [v]वः यूयं [v]देवम् [v]अग्निम् [v]अवसे रक्षणाय [v]अच्छा [v]गासि अभिगायत[5] । [v]वसुः अग्निहोत्रार्थं यजमानानां गृहे वासयिता [v]सः अग्निः [v]नः अस्मभ्यं [v]रासत् कामान् ददातु । [v]ऋषूणाम् ऋषीणां [v]पुत्रः । ऋषिभिर्मन्थनेन जनितत्वात् पुत्र इत्युपचर्यते । [v]ऋतावा ऋतावान् सत्यवानुदकवान्वा सोऽग्निः [v]द्विषः अस्माकं शत्रून् [v]पर्षति पारयतु ॥

१. त–दीप्तिमत् । २. ग-घ-ज-र-श–अतिशोचिष्मन् । ३. ख-च-ङ-ण-न-भ-र–त्वा । ४. ख-च-ङ-ण-न-भ-र–'पुत्रेभ्यः' नास्ति । ५. ग-घ-ज-श–अभिप्रगायत ।

स हि मर्त्यो यं पूर्वे चिदेवासश्चिद्यमीधिरे ।
होतारं मन्द्रजिह्वमित्सुदीतिभिर्विभावसुम् ॥ २ ॥

सः । हि । सत्यः । यम् । पूर्वे । चित् । देवासः । चित् । यम् । ईधिरे ।
होतारम् । मन्द्रऽजिह्वम् । इत् । सुदीतिऽभिः । विभाऽवसुम् ॥ २ ॥

[v]पूर्वे [v]चित् पूर्वे महर्षयः [v]होतारं देवानामाह्वातारं [v]मन्द्रजिह्वम् । हविषां प्रदानेन देवानां मादयित्री जिह्वा यस्य सः । तम् । यद्वा मोदनजिह्वम् । तथाह यास्कः—' मन्द्रजिह्वं मन्दनजिह्वं मोदनजिह्वमिति वा ' (निरु. ६. २३) इति । [v]सुदीतिभिः शोभनदीप्तिभिर्युक्तं [v]विभावसुं प्रभाधनं [v]यम् अग्निम् ईधिरे समैन्धत[1] [v]देवासश्चित् देवा अपि [v]यम् अग्निम् [v]ईधिरे समैन्धत[2] [v]स [v]हि अग्निः [v]सत्यः भवति । सत्यप्रतिश्रवो भवति । [v]इत् इति पूरणः ॥

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ।
अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥ ३ ॥

सः । नः । धीती । वरिष्ठया । श्रेष्ठया । च । सुऽमत्या ।
अग्ने । रायः । दिदीहि । नः । सुवृक्तिऽभिः । वरेण्य ॥ ३ ॥

[v]सुवृक्तिभिः स्तुतिभिः स्तूयमान [v]वरेण्य वरणीय हे [v]अग्ने [v]सः त्वं [v]वरिष्ठया वरतमेन [v]श्रेष्ठया अतिशयेन प्रशस्येन [v]नो [v]धीती धीत्यास्मदीयेन परिचरणात्मकेन कर्मणा [v]सुमत्या [v]च । सुमतिरिति[3] शस्त्रमुच्यते । शस्त्रेण च प्रीतः सन् [v]रायः धनानि [v]नः अस्मभ्यं [v]दीदिहि देहि ॥

अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन् ।
अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥ ४ ॥

अग्निः । देवेषु । राजति । अग्निः । मर्तेषु । आऽविशन् ।
अग्निः । नः । हव्यऽवाहनः । अग्निम् । धीभिः । सपर्यत ॥ ४ ॥

यः [v]अग्निः [v]देवेषु देवानां मध्ये [v]राजति देवतारूपेण प्रकाशते । यः [v]अग्निः [v]मर्तेषु मनुष्येषु [v]आविशन् आहवनीयादिरूपेण प्रविष्टो भवति । यः [v]अग्निः [v]नः अस्माकं [v]हव्यवाहनः भवति अस्मदीयेषु यज्ञेषु देवतार्थं हव्यानां वोढा भवति । हे यजमानास्तम् [v]अग्निं [v]धीभिः स्तुतिभिः [v]सपर्यत परिचरत ॥

---

१. ख-च-र-श–समैधत; ग-घ-ज-झ–समैधन्त । २. ख-झ ण-भ-र-श–समैधत; ग–समैधन्त; न–समेन्धन्त । ३. ख-च-ण-भ–सुमतिरेव; झ–सुमतिरिव; न–सुमतिरिह ।

पुत्रकामेष्टयाम् ' अग्निस्तुविश्रवस्तमम् ' इति द्वे स्विष्टकृतो याज्यानुवाक्ये । सूत्रितं च— ' अग्निस्तुविश्रवस्तममिति द्वे संयाज्ये ' (आश्व. श्रौ. २. १०) इति ॥

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ ५ ॥

अग्निः । तुविश्रवःऽतमम् । तुविऽब्रह्माणम् । उत्ऽतमम् ।
अतूर्तम् । श्रवयत्ऽपतिम् । पुत्रम् । ददाति । दाशुषे ॥ ५ ॥

vअग्निः vतुविश्रवस्तमम् अतिशयेन बह्वन्नं vतुविब्रह्माणं बहुस्तोत्रम् vउत्तमम् उत्कृष्टम् vअतूर्तं शत्रुभिरहिंसितं vश्रावयत्पतिम् । श्रावयति विश्रुतान् करोति पतीन् पालयितॄन् पितॄनिति स्वकर्मणा पितॄणां प्रख्यापक इति श्रावयत्पतिः । तथाविधं vपुत्रं vदाशुषे हवींषि दत्तवते यजमानाय vददाति ददातु ॥ ॥ १७ ॥

अग्निर्ददाति सत्पतिं ससाह यो युधा नृभिः ।
अग्निरत्यं रघुष्यदं जेतारमपराजितम् ॥ ६ ॥

अग्निः । ददाति । सत्ऽपतिम् । ससाहं । यः । युधा । नृऽभिः ।
अग्निः । अत्यम् । रघुऽस्यदम् । जेतारम् । अपराऽजितम् ॥ ६ ॥

vयः पुत्रः vयुधा युद्धेन vनृभिः परिजनैः vससाह शत्रूनभिभवति vसत्पतिं सतां पालयितारं तथाविधं पुत्रम् vअग्निर्ददाति अस्मभ्यं ददातु । किंच vअग्निः vरघुष्यदम् । रघुर्लघुः स्यदो जवो यस्य तम् । vजेतारं शत्रून् vअपराजितं शत्रुभिः vअत्यम्[1] । अतति सततं गच्छतीत्यत्योऽश्वः । तं ददातु ॥

अश्वमेधे पौष्ण्यामिष्टौ ' यद्वाहिष्ठम्[2] ' इति[2] स्विष्टकृतो याज्या । सूत्रितं च— ' यद्वाहिष्ठं तदग्नय इति संयाज्ये ' (आश्व. श्रौ. १०. ६) इति ॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ७ ॥

यत् । वाहिष्ठम् । तत् । अग्नये । बृहत् । अर्च । विभावसो इति विभाऽवसो ।
महिषीऽइव । त्वत् । रयिः । त्वत् । वाजाः । उत् । ईरते ॥ ७ ॥

१. ख-च-ञ-ण-न-भ-र-' अत्यं ' नास्ति । २. ख-च-ञ-ण-न-भ-र-श-' यद्वाहिष्ठमिति ' नास्ति ।

[v]वाहिष्ठं वोढृतमं [v]यत् स्तोत्रं [v]तदग्नये क्रियते । अतो हे [v]विभावसो प्रभाधनाग्ने [v]बृहत् बहुलं धनं च[1] [v]अर्च अस्मभ्यं प्रयच्छ । कथमस्मान्धनप्रदातृत्वमित्यपेक्षायामाह । यतः [v]त्वत् त्वत्तः[2] सकाशात् [v]महिषी महती [v]रयिः धनम् [v]उदीरते उद्गच्छति । [v]वाजाः अन्नानि च [v]त्वत् त्वत्तः उदीरते उद्गच्छन्ति । इवेति पूरणः ॥

तवं द्युमन्तो अर्चयो ग्रावेवोच्यते बृहत् ।
उतो तें तन्यतुर्यथा स्वानो अर्त त्मना दिवः ॥ ८ ॥

तवं । द्युऽमन्तः । अर्चयः । ग्रावाऽइव । उच्यते । बृहत् ।
उतो इति । ते । तन्यतुः । यथा । स्वानः । अर्त । त्मना । दिवः ॥ ८ ॥

हे अग्ने [v]तव [v]अर्चयः रश्मयः [v]द्युमन्तः दीप्तिमन्तो भवन्ति[3] । [v]बृहत् महान् त्वं [v]ग्रावेव अभिषवग्रावेव [v]उच्यते स्तूयसे । [v]उतो अपि च [v]त्मना आत्मना [v]दिवः द्योतमानस्य [v]ते तव [v]स्वानः शब्दः [v]तन्यतुर्यथा मेघगर्जितमिव [v]अर्त उद्गच्छति ॥

एवाँ अग्निं वसूयवः सहसानं ववन्दिम ।
स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ॥ ९ ॥

एव । अग्निम् । वसुऽयवः । सहसानम् । ववन्दिम ।
सः । नः । विश्वाः । अति । द्विषः । पर्षत् । नावाऽइव । सुऽक्रतुः ॥ ९ ॥

[v]वसूयवः वसुकामा वयं [v]सहसानम् अस्माकं बलमाचरन्तम् [v]अग्निम् एवमुक्तप्रकारेण [v]ववन्दिम स्तुमः । [v]सुक्रतुः शोभनकर्मा [v]सः अग्निः [v]नः अस्मान् [v]विश्वाः सर्वान् [v]द्विषः शत्रून् [v]अति [v]पर्षत् अतिपारयतु[4] । कथमिव । [v]नावा साधनेन सिन्धुम् [v]इव ॥ ॥ १८ ॥

' अग्ने पावक ' इति नवर्चं द्वादशं सूक्तम् । वसूयव ऋषयः । गायत्री छन्दः । अग्निर्देवता । तथा चानुक्रान्तम्—' अग्ने गायत्रम् ' इति । प्रातरनुवाके आग्नेये कर्तौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' अग्ने पावक दृतं व इति सूक्ते ' (आश्व. श्रौ. ४. १३) इति । आधाने द्वितीयायामिष्टौ प्रथमस्य हविषः ' अग्ने पावक ' इत्येषा याज्या । सूत्रितं च—' स नः पावक दीदिवोऽग्ने पावक रोचिषा ' (आश्व. श्रौ. २. १) इति ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥१॥

अग्ने । पावक । रोचिषा । मन्द्रया । देव । जिह्वया । आ । देवान् । वक्षि । यक्षि । च ॥ १ ॥

---

१. घ-च-ण-भ-वा । २. ख-ग-घ-च-ज-झ-ण-न-भ-र-' त्वत्तः ' नास्ति । ३. ख-च-झ-ण-न-भ-भान्ति । ४. प-फ-ब-अतिपारयत्वेव ।

हे [v]पावक शोधक [v]रोचिषा स्वदीप्त्या [v]मन्द्रया देवानां मादयित्र्या [v]जिह्वया च हे [v]देव द्योतमान [v]अग्ने [v]देवान् [v]आ [v]वक्षि यज्ञार्थमावह। [v]यक्षि [v]च। तान् यज ॥

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम्। देवाँ आ वीतये वह ॥ २ ॥

तम्। त्वा। घृतस्नो इति घृतऽस्नो। ईमहे। चित्रभानो इति चित्रऽभानो। स्वःऽदृशम्। देवान्। आ। वीतये। वह ॥ २ ॥

हे [v]घृतस्नो घृतस्य प्रेरक। यद्वा घृतेन जनित[1]। हे [v]चित्रभानो। चित्रा नानाविधा भानवो रश्मयो यस्यासौ चित्रभानुः। तस्य संबोधनम्। [v]स्वर्दृशं सर्वद्रष्टारं [v]तं[2] [v]त्वा त्वाम् [v]ईमहे याचामहे। अतः [v]वीतये हविषां भक्षणाय [v]देवान् [v]आ [v]वह ॥

वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि। अग्ने बृहन्तमध्वरे ॥ ३ ॥

वीतिऽहोत्रम्। त्वा। कवे। द्युऽमन्तम्। सम्। इधीमहि। अग्ने। बृहन्तम्। अध्वरे ॥ ३ ॥

हे [v]कवे क्रान्तदर्शिन्[3] [v]अग्ने [v]वीतिहोत्रं कान्तयज्ञं[4] [v]द्युमन्तं दीप्तिमन्तं [v]बृहन्तं महान्तं [v]त्वा त्वाम् [v]अध्वरे यज्ञे [v]समिधीमहि समिद्भिः संदीपयामः ॥

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये। होतारं त्वा वृणीमहे ॥ ४ ॥

अग्ने। विश्वेभिः। आ। गहि। देवेभिः। हव्यऽदातये। होतारम्। त्वा। वृणीमहे ॥ ४ ॥

हे [v]अग्ने [v]विश्वेभिः सर्वैः [v]देवेभिः देवैः सह त्वं [v]हव्यदातये हविषां दात्रे यजमानाय तदर्थम् [v]आ [v]गहि यज्ञं प्रत्यागच्छ। यतः [v]होतारं देवानामाह्वातारं [v]त्वा त्वां [v]वृणीमहे प्रार्थयामहे ॥

यजमानाय सुन्वत आग्ने सुवीर्यं वह। देवैरा सत्सि बर्हिषि ॥ ५ ॥

यजमानाय। सुन्वते। आ। अग्ने। सुऽवीर्यम्। वह। देवैः। आ। सत्सि। बर्हिषि ॥ ५ ॥

हे [v]अग्ने [v]सुन्वते अभिषवं कुर्वते [v]यजमानाय [v]सुवीर्यं शोभनं बलम् [v]आ [v]वह प्रापय। किंच [v]देवैः सह [v]बर्हिषि यज्ञे [v]आ [v]सत्सि आसीदेति ॥ ॥ १९ ॥

समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि। देवानां दूत उक्थ्यः ॥ ६ ॥

सम्ऽइधानः। सहस्रऽजित्। अग्ने। धर्माणि। पुष्यसि। देवानाम्। दूतः। उक्थ्यः ॥ ६ ॥

---

१. ख-च-ण-जरित्र ; झ-ञ-भ-र-जरित। २. प-फ-ब-तं तादृशम। ३. ख-च-झ-ण-ञ-भ-हे क्रान्तदर्शिन्। ४. ख-र-क्रान्तयज्ञम्; झ-क्रान्तं यज्ञम्; त-कान्तयज्ञं यद्वा प्रिय(य)ज्ञम्।

हे [V]सहस्रजित् सहस्रस्य जेतः [V]अग्ने [V]समिधानः हविर्भिः समिध्यमानः [V]उक्थ्यः प्रशस्यस्त्वं [V]देवानां [V]दूतः सन् [V]धर्माणि नः कर्माणि यज्ञादिक्रियाः [V]पुष्यसि पोषयसि ॥

न्य१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् । दधाता देवमृत्विजम् ॥ ७ ॥

नि । अग्निम् । जातऽवेदसम् । होत्रऽवाहम् । यविष्ठ्यम् । दधात । देवम् । ऋत्विजम् ॥ ७ ॥

हे यजमानाः [V]जातवेदसम् । जातानि भूतानि वेत्तीति जातवेदाः । तं [V]होत्रवाहं होत्रस्य यज्ञस्य वोढारं [V]यविष्ठ्यं युवतमं [V]देवं द्योतमानम् [V]ऋत्विजम् ऋतौ यष्टारम् [V]अग्निं [V]नि [V]दधात निधत्त ॥

प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः । स्तृणीत बर्हिरासदे ॥ ८ ॥

प्र । यज्ञः । एतु । आनुषक् । अद्य । देवव्यचःऽतमः । स्तृणीत । बर्हिः । आऽसदे ॥ ८ ॥

[V]अद्य अस्मिन्नहनि [V]देवव्यचस्तमः देवैः प्रकाशमानैः स्तोतृभिः व्याप्ततमः[1] [V]यज्ञः यज्ञसाधनं हविः [V]आनुषक् अनुषक्तं यथा भवति तथा [V]प्र [V]एतु देवान् गच्छतु । हे ऋत्विजः [V]आसदे अग्नेरासदनार्थं [V]बर्हिः [V]स्तृणीत ॥

एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः । देवासः सर्वया विशा ॥ ९ ॥

आ । इदम् । मरुतः । अश्विना । मित्रः । सीदन्तु । वरुणः । देवासः । सर्वया । विशा ॥ ९ ॥

[V]मरुतः मरुतोनाः [V]अश्विना अश्विनौ देवानां भिषजौ [V]मित्रः सूर्यः [V]वरुणः च [V]देवासः एते सर्वे देवाः [V]सर्वया [V]विशा समस्तेन स्वीयेन परिजनेन सार्धम् [V]इदं बर्हिः [V]आ[2] [V]सीदन्तु[2] ॥ ॥२०॥

'अनस्वन्ता' इति षड्र्चं त्रयोदशं सूक्तम् । अत्रानुक्रमणिका—'अनस्वन्ता षट् त्रैवृष्णपौरुकुत्स्यौ द्वौ व्यरुणत्रसदस्यू राजानौ भारतश्चाश्वमेधोऽन्त्यास्तिस्रोऽनुष्टुभो नात्मात्मने दद्यादिति सर्वास्वत्रिं केचिदन्त्यैन्द्राग्नी' इति । त्रिवृष्णस्य पुत्रस्त्र्यरुणः पुरुकुत्सस्य पुत्रस्त्रसदस्युर्भरतस्य पुत्रोऽश्वमेध एते त्रयोऽपि राजानः संभूयास्य सूक्तस्य ऋषयः । यद्वा । अत्रिरेव ऋषिः । आद्यास्तिस्रस्त्रिष्टुभः चतुर्थ्यांत्यास्तिस्रोऽनुष्टुभः । षष्ठीन्द्राग्निदेवत्या शिष्टाः पञ्चाग्नेय्यः । विनियोगो लैङ्गिकः ॥

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥ १ ॥

अनस्वन्ता । सत्ऽपतिः । ममहे । मे । गावा । चेतिष्ठः । असुरः । मघोनः ।
त्रैवृष्णः । अग्ने । दशऽभिः । सहस्रैः । वैश्वानर । त्रिऽअरुणः । चिकेत ॥ १ ॥

१. ख-च-ण–व्यृतमः; झ-भ–व्याप्ततमः; र–व्याप्तृतमः । २. ख-च-झ-ण-त-न-भ-र-श–सीदन्तु आसीदन्तु ।

अत्री राजर्षीणां दानमग्नेः पुरतोऽनेन सूक्तेनावर्णयत् । हे [v]वैश्वानर विश्वेषां नराणां[1] नेतः [v]अग्ने [v]सप्तपतिः सतां पालयिता [v]चेतिष्ठः ज्ञातृतमः [v]असुरः बलवान् [v]मघोनः मघवा धनवान् ॥ प्रथमार्थे ङसिः ॥ [v]त्रैवृष्णः त्रिवृष्णपुत्रः [v]त्र्यरुणः[2] त्र्यरुणः इत्येतन्नामा[3] राजर्षिः [v]अनस्वन्ता अनस्वन्तौ अनसा शकटेन संयुक्तौ[3] [v]गावा गावावनड्वाहौ गवां हिरण्यानां[4] वा[4] [v]दशभिः [v]सहस्रैः सह [v]मे मह्यं [v]ममहे ददौ । ' मह दाने ' । स राजर्षिः [v]चिकेत सर्वैर्जनैरनेन दानेन ज्ञायते ॥

यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥ २ ॥

यः । मे । शता । च । विंशतिम् । च । गोनाम् । हरी इति । च । युक्ता । सुऽधुरा । ददाति ।
वैश्वानर । सुऽस्तुतः । ववृधानः । अग्ने । यच्छ । त्रिऽअरुणाय । शर्म ॥ २ ॥

[v]यः [v]त्र्यरुणः [v]शता [v]च[5] शतानि सुवर्णानां [v]गोनां गवां [v]विंशतिं [v]च [v]युक्ता रथेन युक्तौ [v]सुधुरा सुधुरौ सुष्ठु धुरं वहन्तौ [v]हरी अश्वौ [v]च [v]मे मह्यं [v]ददाति अददात् हे [v]वैश्वानर [v]अग्ने [v]सुष्टुतः अस्माभिः सम्यक्स्तुतः [v]ववृधानः हविर्भिर्वर्धमानस्त्वं तस्मै [v]त्र्यरुणाय [v]शर्म सुखं [v]यच्छ प्रयच्छ ॥

एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।
यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति ॥ ३ ॥

एव । ते । अग्ने । सुऽमतिम् । चकानः । नविष्ठाय । नवमम् । त्रसदस्युः ।
यः । मे । गिरः । तुविऽजातस्य । पूर्वीः । युक्तेन । अभि । त्रिऽअरुणः । गृणाति ॥ ३ ॥

[v]यः [v]त्र्यरुणः [v]तुविजातस्य बह्वपत्यस्य [v]मे [v]पूर्वीः बह्वीः [v]गिरः स्तुतीः श्रुत्वा प्रीतः सन् [v]युक्तेन अभियुक्तेन मनसा [v]अभि [v]गृणाति इदं गृहाणेदं गृहाणेति यथा[6] मां ब्रवीति [v]एव[7] एवं हे [v]अग्ने [v]नविष्ठाय अत्यन्तं स्तुत्याय [v]ते तुभ्यं [v]नवमं नवतमां [v]सुमतिं स्तुतिं [v]चकानः कामयमानः [v]त्रसदस्युः अपि इदं गृहाणेदं गृहाणेति मां प्रार्थितवान् ॥

यो म इतिं प्रवोचत्यश्वमेधाय सूरये ।
ददद्ऋचा सनिं यते ददन्मेधामृतायते ॥ ४ ॥

यः । मे । इतिं । प्रऽवोचति । अश्वऽमेधाय । सूरये ।
ददत् । ऋचा । सनिम् । यते । ददत् । मेधाम् । ऋतऽयते ॥ ४ ॥

---

१. ख-च-ण-ऋषीणाम् । २. ख-च-ण-त्र्यरुणनामा; ग-घ-ज-अ(त्र्य)रुण एतन्नाम; प-फ-ब-अ(त्र्य)रुण एतन्नामा; ञ-त-भ-र-त्र्यरुणः त्र्यरुण इतिनामा; न-अ(त्र्य)रुण इतिनामा । ३. ख-च-ञ-ण-न-भ-र-संपृक्तौ । ४. ग-घ-ज-प-फ-ब-हिरण्यादीनां च; श-हिरण्यादीनां वा । ५. ख-च-ञ-ण-न-भ-र-' च ' नास्ति । ६. ग-घ-ज-श-तथा । ७. ख-च-ञ-ण-त-न-भ-र-श-' एव ' नास्ति ।

vयः भिक्षमाणोऽर्थी vसूरये प्रेरकाय धनानां दात्रे वास्मै vअश्वमेधाय राजर्षये vमे मह्यं देहि vइति vप्रवोचति प्रब्रवीति । योऽश्वमेधं धनानि भिक्षते इत्यर्थः । vऋचा अग्नेः स्तोत्रेण सह vयते आत्मनः समीपं गच्छते तस्मा अर्थिनेऽश्वमेधः vसनिं धनं vददत् ददाति । हे अग्ने vऋतायते यज्ञमिच्छते तस्मा अश्वमेधाय vमेधां यज्ञविषयां प्रज्ञां vददत् देहि ॥

यस्य॑ मा पुरु॒षाः श॒तमु॑द्ध॒र्षय॑न्त्युक्ष॒णः ।
अश्व॑मेधस्य॒ दाना॒ः सोमा॑इव॒ त्र्या॑शिरः ॥ ५ ॥

यस्य॑ । मा॒ । पु॒रु॒षाः । श॒तम् । उ॒त्ऽह॒र्षय॑न्ति । उ॒क्ष॒णः ।
अश्व॑ऽमेधस्य । दाना॑ः । सोमा॑ःऽइव । त्रिऽआ॑शिरः ॥ ५ ॥

vयस्य येन vअश्वमेधस्य अश्वमेधेन vदानाः दत्ताः vपुरुषाः कामानां पूरकाः vशतम् vउक्षणः उक्षाणो बलीवर्दाः vमा माम् vउद्धर्षयन्ति उत्कर्षेण हर्षयन्ति हे अग्ने ते उक्षाणः vत्र्याशिरः । दधिसक्तुपयोरूपास्तिस्र आशिरोऽभिश्रयणसाधनभूता येषां ते त्र्याशिरः । vसोमाइव तव प्रीणनाय भवन्तु ॥

इन्द्रा॑ग्नी श॒तद॑ाव्न्यश्व॒मेधे॑ सु॒वीर्य॑म् ।
क्ष॒त्रं धा॑रयतं बृ॒हदि॒वि सूर्य॑मि॒वाज॑रम् ॥ ६ ॥

इन्द्रा॑ग्नी इति॑ । श॒त॒ऽदा॒व्नि॒ । अश्व॑ऽमेधे । सु॒ऽवीर्य॑म् ।
क्ष॒त्रम् । धा॒र॒य॒त॒म् । बृ॒हत् । दि॒वि । सूर्य॑म्ऽइव । अ॒जर॑म् ॥ ६ ॥

हे vइन्द्राग्नी vशतदाव्नि । शतमपरिमितमर्थिभ्यो धनं ददातीति शतदावा । तस्मिन् vअश्वमेधे राजर्षौ vसुवीर्यं शोभनवीर्यसहितं vबृहत् महत् vअजरं जरारहितं vक्षत्रं धनं vधारयतं निधारयतम् । कथमिव । vदिवि अन्तरिक्षे vसूर्यमिव ॥ ॥ २१ ॥

' समिद्धो अग्निः ' इति षड्चं चतुर्दशं सूक्तम् । अत्रेयमनुक्रमणिका—' समिद्धो विश्ववाराात्रेयी त्रिष्टुब्जगती त्रिष्टुबनुष्टुब्गायत्र्यौ ' इति । अत्रिगोत्रोत्पन्ना विश्ववारानामिका अस्य सूक्तस्य ऋषिः । आद्यातृतीये त्रिष्टुभौ द्वितीया जगती चतुर्थ्यनुष्टुबन्त्ये गायत्र्यौ । अग्निर्देवता । सूक्तविनियोगो लैङ्गिकः ॥

समि॑द्धो अ॒ग्निर्दि॒वि शो॒चिर॑श्रेत्प्र॒त्यङ्ङु॒षस॑मु॒र्विया॒ वि भा॑ति ।
ए॒ति॒ प्राची॑ वि॒श्ववा॑रा॒ नमो॑भि॒र्देवाँ॑ ईळा॒ना ह॒विषा॑ घृ॒ताची॑ ॥ १ ॥

सम्ऽइ॑द्धः । अ॒ग्निः । दि॒वि । शो॒चिः । अ॒श्रे॒त् । प्र॒त्यङ् । उ॒षस॑म् । उ॒र्विया॑ । वि । भा॒ति॒ ।
ए॒ति॒ । प्राची॑ । वि॒श्वऽवा॑रा । नमः॑ऽभिः । देवा॑न् । ई॒ळा॒ना । ह॒विषा॑ । घृ॒ताची॑ ॥ १ ॥

[v]समिद्धः सम्यग्दीप्तः [v]अग्निः [v]दिवि द्योतमानेऽन्तरिक्षे [v]शोचिः तेजः [v]अश्रेत् श्रयति । तथा [v]उषसं [v]प्रत्यङ् उषसमभिमुखः सन् [v]उर्विया उरु विस्तीर्णं [v]वि [v]भाति विशेषेण भ्राजते । [v]नमोभिः स्तोत्रैः [v]देवान् इन्द्रादीन् [v]ईळाना स्तुवती [v]हविषा पुरोडाशादिलक्षणेन युक्तया [v]घृताची घृताच्या स्रुचा सहिता [v]विश्ववारा सर्वमपि पापरूपं शत्रुं वारयित्र्येतन्नामिका [v]प्राची प्राङ्मुखी सती [v]एति । एवंभूतमग्निं प्रतिगच्छति ॥

समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥ २ ॥

सम्ऽइध्यमानः । अमृतस्य । राजसि । हविः । कृण्वन्तम् । सचसे । स्वस्तये ।
विश्वम् । सः । धत्ते । द्रविणम् । यम् । इन्वसि ।
आतिथ्यम् । अग्ने । नि । च । धत्ते । इत् । पुरः ॥ २ ॥

हे अग्ने [v]समिध्यमानः सम्यगिध्यमानस्त्वम् [v]अमृतस्य उदकस्य [v]राजसि ईशिषे । तथा [v]हविष्कृण्वन्तं पुरोडाशादिहविष्कर्तारं यजमानं [v]स्वस्तये अविनाशाय [v]सचसे सेवसे । किंच [v]यं यजमानम् [v]इन्वसि गच्छसि [v]सः यजमानः [v]विश्वं समस्तं [v]द्रविणं पश्वादिलक्षणं[१] धनं [v]धत्ते धारयति । अपि च हे [v]अग्ने [v]आतिथ्यम् अतिथिरूपस्य तव योग्यं हविः [v]पुरः [v]इत् तव पुरस्तादेव [v]नि [v]धत्ते [v]च स्थापयति च ॥

पवित्रेष्टयां स्विष्टकृतः 'अग्ने शर्ध' इति याज्या। सूत्र्यते[२] हि[३]—'जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये' (आश्व. श्रौ. २. १२) इति । साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालमित्यत्राप्येषैव स्विष्टकृतो याज्या। सूत्रितं च—'जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये' (आश्व. श्रौ. २. १८) इति[४] ॥

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥ ३ ॥

अग्ने । शर्ध । महते । सौभगाय । तव । द्युम्नानि । उत्ऽतमानि । सन्तु ।
सम् । जाःपत्यम् । सुऽयमम् । आ । कृणुष्व । शत्रुऽयताम् । अभि । तिष्ठ । महांसि ॥ ३ ॥

हे [v]अग्ने त्वं [v]महते प्रभूताय [v]सौभगाय अस्माकं शोभनधनत्वाय [v]शर्ध शत्रून् सहस्व । तथा [v]तव संबन्धीनि [v]द्युम्नानि धनानि तेजांसि वा [v]उत्तमानि उत्कृष्टानि [v]सन्तु भवन्तु । किंच हे अग्ने त्वं[४] [v]जास्पत्यम् । जा जाया च पतिश्च जायापती । तयोः कर्म जास्पत्यम् । तत् [v]सुयमं सुष्ठु नियमनो-

१. ख-च-ज्ञ-ण-भ—वस्वादिलक्षणम् । २. ख-च-ज्ञ-ण-न-भ—सूत्रितं च । ३. भ—इति । स्नुषाश्वशुरेष्टयां एषैव स्विष्टकृतो याज्या । तथैव सूत्रितम् । ४. श—सम् ।

पेतम् । अन्योन्यसंश्लिष्टमित्यर्थः । ᵛसम् ᵛआ ᵛकृणुध्व सम्यक् कुरुध्व । अपि च ᵛशत्रूयतां शत्रुमात्मन इच्छतां सपत्नानां ᵛमहांसि तेजांसि ᵛअभि ᵛतिष्ठ आक्रमस्व ॥

समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥ ४ ॥

सम्ऽइद्धस्य । प्रऽमहसः । अग्ने । वन्दे । तव । श्रियम् ।
वृषभः । द्युम्नऽवान् । असि । सम् । अध्वरेषु । इध्यसे ॥ ४ ॥

हे ᵛअग्ने ᵛसमिद्धस्य प्रवृद्धस्य[1] ᵛप्रमहसः प्रकृष्टतेजसः ᵛतव संबन्धिनीं ᵛश्रियं दीप्तिं ᵛवन्दे । अहं यजमानः स्तौमि । ᵛवृषभः कामानां वर्षिता त्वं ᵛद्युम्नवान् ᵛअसि धनवान् भवसि । ᵛअध्वरेषु यज्ञेषु ᵛसम् ᵛइध्यसे सम्यग्दीप्यसे ॥

दर्शपूर्णमासयोः 'समिद्धो अग्न आहुत' इति द्वे सामिधेन्यौ । सूत्रितं च-'समिद्धो अग्न आहुतेति द्वे' (आश्व. श्रौ. १. २) इति ॥

समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर । त्वं हि हव्यवाळसि ॥ ५ ॥

सम्ऽइद्धः । अग्ने । आऽहुत । देवान् । यक्षि । सुऽअध्वर । त्वम् । हि । हव्यऽवाट् । असि ॥ ५ ॥

हे ᵛआहुत यजमानैः आ समन्तात् हुत हे ᵛस्वध्वर शोभनयज्ञोपेत हे ᵛअग्ने ᵛसमिद्धः सम्यग्दीप्तः ᵛत्वं ᵛदेवान् द्योतमानानिन्द्रादीन् ᵛयक्षि यजस्व । ᵛहि यस्मात् कारणात् हे अग्ने त्वं ᵛहव्यवाट् ᵛअसि हव्यानां वोढा भवसि । अतः कारणात् देवान् यजस्वेति संबन्धः ॥

आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनम् ॥ ६ ॥

आ । जुहोत । दुवस्यत । अग्निम् । प्रऽयति । अध्वरे । वृणीध्वम् । हव्यऽवाहनम् ॥ ६ ॥

हे ऋत्विजो यूयम् ᵛअध्वरे अस्मदीययागे ᵛप्रयति प्रवृत्ते सति ᵛहव्यवाहनं हविषां वोढारम् एतन्नामकम् ᵛअग्निम् ᵛआ ᵛजुहोत आ समन्तात् जुहोत । तथा ᵛदुवस्यत परिचरत । ᵛवृणीध्वम् संभजध्वं च हव्यवाहनम् । हव्यवाहननामकस्यैवाग्नेर्देवतासंबन्धो यजमानैर्वरणीयत्वं च तैत्तिरीये स्पष्टमाम्नातं—'त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणां सहरक्षा असुराणाम् । त एतद्यांसन्ते मां वरिष्यते मामिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीते' (तै. सं. २. ५. ८. ६) इति ॥ ॥ २२ ॥

'त्र्यर्यमा' इति पञ्चदशर्चं पञ्चदशं सूक्तम् । अत्रानुक्रमणिका—'त्र्यर्यमा पञ्चोना गौरिवीतिः शाक्त्य ऐन्द्रमुशना यदौशनसो वा पादः' इति । शक्तिगोत्रोत्पन्नो गौरिवीतिर्नाम ऋषिः । अनुक्तत्वात्

१. प-फ-ब-सम्यगिद्धस्य ।

त्रिष्टुप्[1]। इन्द्रो देवता मण्डलादिपरिभाषया निवृत्तत्वात्। ' उशना यत्सहस्यैः ' इति पादः औशनस ऐन्द्रो वा। आभिप्लविके तृतीयेऽहनि मरुत्वतीये एतन्निविद्धानम्। सूत्रितं च-' तृतीयस्य त्र्यर्यमा यो जात एवेति मध्यंदिनः ' (आश्व. श्रौ. ७. ७) इति ॥

त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त।
अर्चन्ति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीरः ॥ १ ॥

त्री। अर्यमा। मनुषः। देवऽताता। त्री। रोचना। दिव्या। धारयन्त।
अर्चन्ति। त्वा। मरुतः। पूतऽदक्षाः। त्वम्। एषाम्। ऋषिः। इन्द्र। असि। धीरः ॥१॥

[v]मनुषः मनोः संबन्धिनौ [v]देवताता देवनार्थौ यज्ञे [v]त्री त्रीणि [v]अर्यमा अर्यमाणि यानि तेजांसि सन्ति। तथा[2] [v]त्री त्रीणि[3] [v]रोचना रोचमानानि वाय्वग्निसूर्यात्मकानि [v]दिव्या दिव्यान्यन्तरिक्षे भवानि तानि तेजांसि [v]धारयन्त मरुतो धारयन्ति। [v]पूतदक्षाः शुद्धबलाः [v]मरुतः [v]त्वा त्वाम् [v]अर्चन्ति स्तुवन्ति। हे [v]इन्द्र [v]धीरः धीमान् [v]त्वमेषां मरुताम् [v]ऋषिः [v]असि द्रष्टा भवसि ॥

अनु यदीं मरुतो मन्दसानमार्चन्निन्द्रं पपिवांसं सुतस्य।
आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ ॥ २ ॥

अनु। यत्। ईम्। मरुतः। मन्दसानम्। आर्चन्। इन्द्रम्। पपिऽवांसम्। सुतस्य।
आ। अदत्त। वज्रम्। अभि। यत्। अहिम्। हन्।
अपः। यह्वीः। असृजत्। सर्तवै। ऊँ इति ॥ २ ॥

[v]यत् यदा [v]मरुतो [v]मन्दसानं तृप्यन्तं [v]सुतस्य अभिषुतं सोमं [v]पपिवांसं पीतवन्तम् [v]ईम् एनम् [v]इन्द्रम् [v]अनु [v]आर्चन् अन्वस्तुवन्। तदेन्द्रः [v]वज्रम् [v]आदत्त आददौ। ततः [v]यत यदा [v]अहिं वृत्रम् [v]अभि [v]हन् अभ्यहन् अभिहतवान् तदा [v]यह्वीः महतीः [v]अपः वृत्रेण निरुद्धान्युदकानि [v]सर्तवै स्वैरत्वेन सर्तुं गन्तुम् [v]असृजत् निरोधाच्चामुञ्चत्[3] ॥

उत ब्रह्माणो मरुतो मे अस्येन्द्रः सोमस्य सुषुतस्य पेयाः।
तद्धि हव्यं मनुषे गा अविन्ददहन्नहिं पपिवाँ इन्द्रो अस्य ॥ ३ ॥

उत। ब्रह्माणः। मरुतः। मे। अस्य। इन्द्रः। सोमस्य। सुऽसुतस्य। पेयाः।
तत्। हि। हव्यम्। मनुषे। गाः। अविन्दत्। अहन्। अहिम्। पपिऽवान्। इन्द्रः। अस्य ॥३॥

---

१. त-त्रिष्टुप् छन्दः। २. ख-च-झ-ण-न-भ-र-' तथा त्री त्रीणि ' नास्ति; श-त्री त्रीणि। ३. प-फ-ब-निरोधाच्चामुञ्चत्। उ पूरणः।

vउत अपि च हे vब्रह्माणः बृहन्तो हे vमरुतः यूयम् vइन्द्रः च vसुसुतस्य[1] सुष्ठुभिषुतस्य vमे मदीयस्य vअस्य vसोमस्य इमं सोमम् ॥ द्वितीयार्थे षष्ठी ॥ vपेयाः पिबत ॥ पिबतेराशीर्लिङि मध्यमबहुवचनस्यैकवचनम् ॥ vतद्धि तत्खलु vहव्यं युष्माभिः पीतं सोमात्मकं हविः vमनुषे मनुष्याय यजमानाय vगाः धेनूर्वृष्टिलक्षणान्युदकानि वा vअविन्दत् वेदयति। यजमानं गा लम्भयतीत्यर्थः। किंच vअस्य इमं सोमं vपपिवान् पीतवान् vइन्द्रः vअहिं वृत्रम् vअहन् अवधीत् ॥

आद्रोदसी वितरं वि ष्कभायत्संविव्यानश्चिद्भियसे मृगं कः।
जिगर्तिमिन्द्रो अपजर्गुराणः प्रति श्वसन्तमव दानवं हन् ॥ ४ ॥

आत् । रोदसी इति । विऽतरम् । वि । स्कभायत् ।
सम्ऽविव्यानः । चित् । भियसे । मृगम् । करिति कः ।
जिगर्तिम् । इन्द्रः । अपऽजगुराणः । प्रति । श्वसन्तम् । अव । दानवम् । हन्निति हन् ॥ ४ ॥

vइन्द्रः परमैश्वर्ययुक्तः vआत् सोमपानानन्तरं vरोदसी द्यावापृथिव्यौ vवितरम् अतिशयेन ॥ 'अमु च छन्दसि' इति वेः तरपि कृते अमुप्रत्ययः ॥ vवि vष्कभायत् व्यस्तभ्नात् चलनरहिते अकरोत्। vसंविव्यानश्चित् संवृण्वानः[2] संगच्छमानो वेन्द्रः ॥ व्ययतेर्वा संवरणकर्मणो वेतेर्वा गतिकर्मणो रूपम्। चित् इति एवेत्यस्यार्थे वर्तते ॥ vमृगं मृगवत्पलायमानं वृत्रं vभियसे भयाय vकः अकार्षीत्। करोतेर्लुङि 'मन्त्रे घसह्वर०' इत्यादिना च्लेर्लोपः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः ॥ इन्द्रः vजिगर्तिं गिरन्तमाच्छादयन्तं vश्वसन्तं भयार्थं श्वासं कुर्वन्तं vदानवं दनोः पुत्रं वृत्रम् vअपजगुराणः आच्छादनाद्विमोचयन् vप्रति प्रतिगत्य vअव vहन् अवहतवान् ॥

अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम्।
यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरुपरा एतशे कः ॥ ५ ॥

अध । क्रत्वा । मघऽवन् । तुभ्यम् । देवाः । अनु । विश्वे । अददुः । सोमऽपेयम् ।
यत् । सूर्यस्य । हरितः । पतन्तीः । पुरः । सतीः । उपराः । एतशे । करिति कः ॥ ५ ॥

vअध अपि च हे vमघवन् धनवन्निन्द्र vक्रत्वा क्रतुना स्वदीयेन कर्मणा vविश्वे सर्वे vदेवाः ध्यायमाना वह्न्यादयः vतुभ्यं त्वदर्थं vसोमपेयं सोमपानम् vअनु vअददुः आनुपूर्व्येण[3] दत्तवन्तः। ततः प्रभृतीन्द्रो देवेभ्यः सर्वेभ्योऽधिकोऽभवदित्यर्थः। तथा च श्रूयते—'स महान्भूत्वा देवता अब्रवीदुद्धारं म उद्धरत' (ऐ. ब्रा. ३. २१) इत्यादि। हे इन्द्र vयत् यस्त्वं vपतन्तीः आगच्छन्तीः

१. ख-सुषुतस्य। २. प-फ-ब-संवृण्वान एव। ३. त-अनुपूर्वेण।

[v]पुरः [v]सतीः पुरस्ताज्जवन्तीः [v]सूर्यस्य संबन्धिनीः [v]हरितः वडवाः [v]उपराः उपरता मन्दगतीः [v]एतशे एतशाख्याय ऋषये [v]कः अकार्षीः । एतशो हि स्वश्वपुत्रेण सूर्येण सह स्पर्धामकरोदिति यावत् । तथा च निगमान्तरे—'प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः' (ऋ. सं. १. ६१. १५) इति[1] ॥ ॥ २३ ॥

नव॒ यदस्य नव॒तिं च॑ भो॒गान्त्सा॒कं व॒ज्रेण॒ म॒घवा॑ वि॒वृश्च॑त् ।
अर्च॒न्तीन्द्रं॑ म॒रुत॑: स॒धस्थे॒ त्रैष्टु॑भेन॒ वच॑सा बाधत॒ द्याम् ॥ ६ ॥

नव॑ । यत् । अ॒स्य॒ । न॒व॒तिम् । च॒ । भो॒गान् । सा॒कम् । व॒ज्रेण॑ । म॒घऽवा॑ । वि॒ऽवृश्च॑त् ।
अर्च॑न्ति । इन्द्र॑म् । म॒रुत॑: । स॒धऽस्थे॑ । त्रैस्तु॑भेन । वच॑सा । बा॒ध॒त॒ । द्याम् ॥ ६ ॥

[v]यत् यदा [v]मघवा धनवानिन्द्रः । अस्य इत्यनेन शम्बर उच्यते । [v]अस्य शम्बरस्य संबन्धीनि [v]नव नवसंख्याकानि [v]नवतिं [v]च नवतिसंख्याकानि च [v]भोगान् पुराणि । भोगान् इत्यन्तोदात्तः पुरवचनः । [v]साकं युगपदेव [v]वज्रेण [v]विवृश्चत् व्यवृश्चत् अभिनत् तदा [v]मरुतः [v]सधस्थे सहस्थाने युद्धे वा स्थितम् [v]इन्द्रं [v]त्रैष्टुभेन त्रिष्टुपुच्छन्दस्केन [v]वचसा वाग्रूपेण स्तोत्रेण [v]अर्चन्ति अस्तुवन् । इन्द्र एवं स्तुतः सन् [v]द्यां मरुद्भिः प्रयुज्यमानेन मन्त्रेण दीप्तं शम्बराख्यमसुरं [v]बाधत अबाधत पिपीडे ॥

सखा॒ सख्ये॑ अपच॒त्तूय॑मग्नि॒रस्य॑ क्रत्वा॑ महि॒षा त्री श॒तानि॑ ।
त्री सा॒कमि॑न्द्रो मनु॒षः सरां॑सि सु॒तं पि॑बद्वृत्र॒हत्या॑य॒ सोम॑म् ॥ ७ ॥

सखा॑ । सख्ये॑ । अ॒प॒च॒त् । तूय॑म् । अ॒ग्निः । अ॒स्य॒ । क्रत्वा॑ । म॒हि॒षा । त्री । श॒तानि॑ ।
त्री । सा॒कम् । इन्द्रः॑ । मनु॒षः । सरां॑सि । सु॒तम् । पि॒ब॒त् । वृ॒त्र॒ऽहत्या॑य । सोम॑म् ॥ ७ ॥

[v]सखा इन्द्रस्य मित्रभूतः [v]अग्निः [v]महिषा महिषाणां पशूनां [v]त्री त्रीणि [v]शतानि शतसंख्याकानि [v]सख्ये सख्युर्मित्रभूतस्य [v]अस्य इन्द्रस्य [v]क्रत्वा कर्मणा निमित्तभूतेन [v]तूयं क्षिप्रम् [v]अपचत् पपाच । किंच [v]इन्द्रः परमैश्वर्ययुक्तः [v]मनुषः मनोः संबन्धीनि [v]त्री त्रीणि [v]सरांसि पात्राणि । अत्र सरःशब्देन पूतभृदाधवनीयद्रोणकलशसंज्ञानि पात्राण्युच्यन्ते । तेषु स्थितं [v]सुतम् अभिषुतं [v]सोमं [v]साकं युगपदेव [v]वृत्रहत्याय वृत्रहननाय [v]पिबत् अपिबत् पपौ ॥

त्री यच्छ॒ता म॑हि॒षाणा॒मघो॒ मास्त्री सरां॑सि म॒घवा॑ सो॒म्यापा॑: ।
का॒रं न विश्वे॑ अह्वन्त दे॒वा भर॒मिन्द्रा॑य॒ यदहिं॑ ज॒घान॑ ॥ ८ ॥

त्री । यत् । श॒ता । म॒हि॒षाणा॑म् । अघः॑ । माः । त्री । सरां॑सि । म॒घऽवा॑ । सो॒म्या । अपा॑: ।
का॒रम् । न । विश्वे॑ । अह्व॑न्त । दे॒वाः॑ । भर॑म् । इन्द्रा॑य । यत् । अहि॑म् । ज॒घान॑ ॥ ८ ॥

---

१. ख-च-ङ्ग-ण-न-भ–इति लुप्तम् ।

हे इन्द्र त्वं [v]यत्[1] यदा [v]त्री त्रयाणां [v]शता शतसंख्याकानां [v]महिषाणां पशूनां [v]माः मांसानि [v]अघः भक्षितवानसि ॥ घसेरत्तेर्वा रूपम् ॥ यदा च [v]मघवा धनवांस्त्वं [v]सोम्या सोममयानि [v]त्री त्रीणि [v]सरांसि पात्राणि [v]अपाः पीतवानसि । [v]यत् यदेन्द्रः [v]अहिं वृत्रं [v]जघान हतवान् तदा [v]विश्वे सर्वे [v]देवाः [v]भरं सोमपानादिना पूर्णम् [v]इन्द्राय इन्द्रं युद्धार्थम् [v]अह्वन्त आह्वयन्त । तत्र दृष्टान्तः । [v]कारं [v]न स्वामिनः कर्मकरमिव तद्वत् ॥

उशनस्तोमे 'उशना यत्सहस्यैः' इति मरुत्वतीये सूक्तमुखीया । सूत्रितं च—'उशनस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेतोशना यत्सहस्यैरयातम्' (आश्व. श्रौ. ९. ५) इति ॥

उशना यत्सहस्यैरयातं गृहमिन्द्र जूजुवानेभिरश्वैः ।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णम् ॥ ९ ॥

उशना । यत् । सहस्यैः । अयातम् । गृहम् । इन्द्र । जूजुवानेभिः । अश्वैः ।
वन्वानः । अत्र । सऽरथम् । ययाथ । कुत्सेन । देवैः । अवनोः । ह । शुष्णम् ॥ ९ ॥

[v]यत् यदा हे [v]इन्द्र त्वम् [v]उशना काव्यश्च [v]सहस्यैः अभिभवनशीलैः [v]जूजुवानेभिः जूजुवानैर्गच्छद्भिः [v]अश्वैः कुत्सस्य [v]गृहम् [v]अयातम् अगच्छतं तदा हे इन्द्र त्वम् [v]अत्र अस्मिन् काले [v]वन्वानः शत्रून् हिंसन् [v]कुत्सेन [v]देवैः च सह [v]सरथं समानमेकं रथं [v]ययाथ जगन्थ । किंच [v]शुष्णम् एतन्नामानमसुरम् [v]अवनोर्ह अहिंसीः खलु ॥

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः ।
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः ॥ १० ॥

प्र । अन्यत् । चक्रम् । अवृहः । सूर्यस्य । कुत्साय । अन्यत् । वरिवः । यातवे । अकारित्यकः ।
अनासः । दस्यून् । अमृणः । वधेन । नि । दुर्योणे । अवृणक् । मृध्रऽवाचः ॥ १० ॥

हे इन्द्र पूर्वं द्विचक्रस्य [v]सूर्यस्य [v]अन्यत् एकं [v]चक्रं [v]प्र [v]अवृहः पृथक् चकर्थ । [v]अन्यत् एकं चक्रं [v]कुत्साय कुत्सस्य [v]वरिवः धनं [v]यातवे प्रापयितुम् [v]अकः अकार्षीः । किंच [v]अनासः आस्यरहितान् । आस्यशब्देन शब्दो लक्ष्यते । अशब्दान् मूकान् [v]दस्यून् असुरान् [v]वधेन आयुधेन वज्रेण [v]अमृणः अहिंसीः । [v]दुर्योणे संग्रामे [v]मृध्रवाचः हिंसितवागिन्द्रियानसुरान् [v]नि [v]अवृणक् नितरां छिन्नवानसि । अमृणो न्यवृणगिति द्विरुक्तिरादरार्था ॥ ॥ २४ ॥

---

१. ख-च-ञ-ण-न-भ-र-श–'यत्' नास्ति ।

स्तोमासस्त्वा गौरिवीतेरवर्धन्नरन्धयो वैदथिनाय पिप्रुम् ।
आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य ॥ ११ ॥

स्तोमासः । त्वा । गौरिऽवीतेः । अवर्धन् । अरन्धयः । वैदथिनाय । पिप्रुम् ।
आ । त्वाम् । ऋजिश्वा । सख्याय । चक्रे । पचन् । पक्तीः । अपिबः । सोमम् । अस्य ॥ ११ ॥

हे इन्द्र [v]गौरिवीतेः एतन्नामकस्य मन्त्रद्रष्टुर्मम संबन्धीनि[1] [v]स्तोमासः स्तोत्राणि [v]त्वा त्वाम् [v]अवर्धन् वर्धयन्तु । [v]वैदथिनाय विदथिनः पुत्राय ऋजिश्वनाम्ने [v]पिप्रुम् एतन्नामकमसुरम् [v]अरन्धयः वशमनयः । हे इन्द्र ऋजिश्वनामा कश्चिदपि [v]सख्याय तव सख्यित्वाय [v]पक्तीः पक्तव्यानि पुरोडाशादीनि [v]पचन् पाकं कुर्वन् [v]त्वाम्[2] [v]आ [v]चक्रे अभिमुखीचकार । किंच त्वम् [v]अस्य ऋजिश्वनः संबन्धिनं [v]सोमम् [v]अपिबः अपाः ॥

दशपेयेऽहनि मरुत्वतीये शस्त्रे 'नवग्वासः' इति सूक्तमुखीया । सूत्रितं च—'नवग्वासः सुतसोमास इन्द्रं सखा ह यत्र सखिभिर्नवग्वैरिति निविद्धानयोराग्ने' (आश्व. श्रौ. ९. ३) इति ॥

नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्यर्चन्त्यर्कैः ।
गव्यं चिदूर्वमपिधानवन्तं तं चिन्नरः शशमाना अप व्रन् ॥ १२ ॥

नवऽग्वासः । सुतऽसोमासः । इन्द्रम् । दशऽग्वासः । अभि । अर्चन्ति । अर्कैः ।
गव्यम् । चित् । ऊर्वम् । अपिधानऽवन्तम् । तम् । चित् । नरः । शशमानाः । अप । व्रन् ॥ १२ ॥

[v]नवग्वासः । सत्रयागमनुतिष्ठन्तो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः । दशभिर्मासैः[3] समाप्य ये गतास्ते दशग्वाः । एते उभयविधा अङ्गिरसः [v]सुतसोमासः अभिषुतसोमाः सन्तः [v]इन्द्रम् [v]अर्कैः अर्चनीयैः स्तोत्रैः [v]अभ्यर्चन्ति अभिष्टुवन्ति । तथा [v]शशमानाः स्तुवन्तः [v]नरः नेतारोऽङ्गिरसः [v]अपिधानवन्तं वलेनासुरेणाच्छादितवन्तं [v]तं [v]चित् बहुषु[4] प्रदेशेषु[4] प्रसिद्धमपि [v]गव्यं [v]चित् गोसंबन्धिनमपि [v]ऊर्वं समूहम् [v]अप [v]व्रन् अपावृण्वन् ॥

परिक्रीनाम्न्येकाहे मरुत्वतीयनिष्केवल्ययोः सूक्तमुखीये 'कथो नु ते' इत्याद्ये द्वे ऋचौ । सूत्रितं च—'कथो नु ते परि चराणि विद्वानिति द्वे' (आश्व. श्रौ. ९. ५) इति ॥

---

१. त–संबन्धिनः । २. ग-घ-ज-झ-त-न-भ-र-श–त्वा त्वाम् । ३. प-फ-ब–दशग्वासः दशभिर्मासैः ।
४. ख-च-ण–बहुप्रदेशेषु ।

कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ ।
या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम ॥ १३ ॥

कथो इति । नु । ते । परि । चराणि । विद्वान् । वीर्या । मघऽवन् । या । चकर्थ ।
या । चो इति । नु । नव्या । कृणवः । शविष्ठ ।
प्र । इत् । ऊँ इति । ता । ते । विदथेषु । ब्रवाम ॥ १३ ॥

हे ᵛमघवन् धनवन्निन्द्र त्वं ᵛया यानि ᵛवीर्या वीर्याणि ᵛचकर्थ चकृषे अहं तानि वीर्याणि ᵛविद्वान् जानन् ᵛते तुभ्यं ᵛकथो ᵛनु कथं नु ᵛपरि ᵛचराणि परिचर्या करवाणि । हे ᵛशविष्ठ बलवत्तमेन्द्र त्वं ᵛया ᵛचो यानि चैव ᵛनव्या नव्यानि नूतनानि वीर्याणि ᵛनु क्षिप्रं ᵛकृणवः कुर्याः ᵛते त्वदीयानि ᵛता तानि वीर्याणि ᵛविदथेषु यज्ञेषु ᵛप्रेदु ᵛब्रवाम प्रैव वदाम ॥

एता विश्वा चकृवाँ इन्द्र भूर्यपरीतो जनुषा वीर्येण ।
या चित्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः ॥१४॥

एता । विश्वा । चकृऽवान् । इन्द्र । भूरि । अपरिऽइतः । जनुषा । वीर्येण ।
या । चित् । नु । वज्रिन् । कृणवः । दधृष्वान् । न । ते । वर्ता । तविष्याः । अस्ति । तस्याः ॥१४॥

हे ᵛइन्द्र ᵛअपरीतः शत्रुभिरपरिगतस्त्वं ᵛजनुषा जननसिद्धेनात्मीयेन ᵛवीर्येण बलेन ᵛभूरि भूरीणि बहूनि ᵛएता एतानि प्रत्यक्षेणोपलभ्यमानानि ᵛविश्वा विश्वानि व्याप्तानि भुवनजातानि ᵛचकृवान् कृतवानसि[1] । हे ᵛवज्रिन् वज्रवन्निन्द्र ᵛदधृष्वान् सपत्नान् धर्षयंस्त्वं ᵛनु क्षिप्रं ᵛया ᵛचित् यानि च विश्वानि ᵛकृणवः कुर्याः ᵛते त्वदीयस्य ᵛतस्याः ᵛतविष्याः तस्य बलस्य ᵛवर्ता निवारयिता ᵛन कोऽपि ᵛअस्ति ॥

इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म ।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम् ॥ १५ ॥

इन्द्र । ब्रह्म । क्रियमाणा । जुषस्व । या । ते । शविष्ठ । नव्याः । अकर्म ।
वस्त्राऽइव । भद्रा । सुऽकृता । वसुऽयुः । रथम् । न । धीरः । सुऽअपाः । अतक्षम् ॥ १५॥

हे ᵛशविष्ठ बलवत्तम शूरतम वा ᵛइन्द्र[2] ᵛते तुभ्यं ᵛया यानि स्तोत्राणि ᵛनव्याः नूतना अद्यतना वयम् ᵛअकर्म अकुर्म हे इन्द्र त्वं ᵛक्रियमाणा अस्माभिः क्रियमाणानि ᵛब्रह्म ब्रह्माणि

१. ख-च-झ-ण-न-भ-र-कृतवान् । २. ख-च-झ-ण-त-न-भ-र-इन्द्र । हि निगमः (?); श-इन्द्र । ब्रह्मेति निगमः (?) ।

तानि स्तोत्राणि [v]जुषस्व सेवस्व । [v]धीरः धीमान् [v]स्वपाः शोभनकर्मा [v]वसूयुः धनकामोऽहं [v]वस्त्रेव वस्त्राणीव [v]भद्रा भद्राणि भजनीयानि [v]सुकृता सुष्ठु कृतानि स्तोत्राणि [v]रथं [v]न रथमिव [v]अतक्षम् अकरवम् । स्तोत्राणि उपहारवत्[१] ग्राह्याणीत्यभिप्रायेण वस्त्रनिदर्शनमुक्तम् । रथदृष्टान्तस्तु आगमनसाधनत्वप्रतिपादनाय । स्तोत्राणि स्वीकृत्य मह्यं धनं प्रयच्छेत्यर्थः ॥ ॥ २५ ॥

' क स्य वीरः ' इति पञ्चदशर्चं षोडशं सूक्तम् । अत्रानुक्रमणिका—' क स्य बभ्रुर्ऋणंचयोऽप्यत्र राजा स्तुतः' इति । बभ्रुर्ऋषिः । अनुक्तत्वात् त्रिष्टुप् । इन्द्रो देवता । ऋणंचयनामा राजापि क्वचित् स्तूयते । अतः सोऽपि देवता । तीव्रसोमाख्ये एकाहे मरुत्वतीयशस्त्रे इदं सूक्तं निविद्धानम् । सूत्रितं च—' तीव्रसोमेनान्नाद्यकामः क स्य वीरः ' (आश्व. श्रौ. ९. ७) इति ॥

क[१] स्य वीरः को अपश्यदिन्द्रं सुखरथमीयमानं हरिभ्याम् ।
यो राया वज्री सुतसोममिच्छन्तदोको गन्ता पुरुहूत ऊती ॥ १ ॥

क । स्यः । वीरः । कः । अपश्यत् । इन्द्रम् । सुखऽरथम् । ईयमानम् । हरिऽभ्याम् ।
यः । राया । वज्री । सुतऽसोमम् । इच्छन् । तत् । ओकः । गन्ता । पुरुऽहूतः । ऊती ॥ १ ॥

[v]वज्री वज्रवान् [v]पुरुहूतः बहुभिराहूतः [v]यः इन्द्रः [v]राया देयेन धनेन सह [v]सुतसोममिच्छन् अभिषुतसोमं यजमानमन्विच्छन् [v]ऊती ऊत्यै रक्षायै [v]तत तस्य यजमानस्य [v]ओकः गृहं [v]गन्ता प्राप्तो भवति [v]वीरः विक्रान्तः [v]स्यः[२] स इन्द्रः [v]क कुत्र विद्यते । [v]सुखरथं शोभनाक्षद्वारः[३] रथो यस्य स सुखरथः । सुष्ठु खनति लिखति भूमिमिति वा सुखम् । तादृग्रथम् । ' सुहितं खेभ्यः खं पुनः खनतेः ' (निरु. ३. १३) इति यास्कः । [v]हरिभ्यां स्ववाहनाभ्याम्[४] अश्वाभ्याम् [v]ईयमानं गच्छन्तम् [v]इन्द्रं [v]कोऽपश्यत् कश्चित्[५] ददर्श ॥

अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ।
अपृच्छमन्याँ उत ते म आहुरिन्द्रं नरो बुबुधाना अशेम ॥ २ ॥

अव । अचचक्षम् । पदम् । अस्य । सस्वः । उग्रम् । निऽधातुः । अनु । आयम् । इच्छन् ।
अपृच्छम् । अन्यान् । उत । ते । मे । आहुः । इन्द्रम् । नरः । बुबुधानाः । अशेम ॥ २ ॥

[v]अस्य इन्द्रस्य [v]पदं स्थानम् [v]अवाचचक्षम् अहमवाद्राक्षम् । कीदृशम् । [v]सस्वः अन्तर्हितम् [v]उग्रम् उद्गूर्णम् । किंच [v]इच्छन् इन्द्रमन्विच्छन्नहं [v]निधातुः स्वं स्थापयितुः अस्य इन्द्रस्य पदम् [v]अन्वायम् अन्वगमम् । [v]अन्यान् [v]उत अन्यान् विदुषोऽपि मार्गे[६] इन्द्रम् [v]अपृच्छं पृष्टवानस्मि । पृष्टाः [v]ते [v]मे मह्यम् [v]इन्द्रम् [v]आहुः । किमाहुरित्युच्यते । [v]नरः यज्ञानां नेतारः [v]बुबुधानाः

१. त–उपरेवत् । २. ख-च-ज्ञ-ण-न-भ-र-श–' स्यः' नास्ति । ३. त–शोभनाख्यद्वारः । ४. ख-च-ज्ञ-ण-न-भ-र–स्ववाहकाभ्याम् । ५ ख-च-ज्ञ-ण-न-भ–कश्चित् । ६. त–मार्गम् ।

बुभुत्समाना वयम् Vअशेम इन्द्रं प्राप्तवन्तः स्मः । यद्यपीन्द्रो विद्यते तथापि दुर्लभश्चेदनुपगन्तव्यः इति बुभुत्समानः स्वभावमपृच्छत् पृष्टैश्च सुलभः इत्युक्त इन्द्रप्राप्त्यर्थं सूक्तशेषमपश्यदित्यर्थः ॥

प्र नु वयं सुते या ते कृतानीन्द्र ब्रवाम यानि नो जुजोषः ।
वेददविद्वाञ्छृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः ॥ ३ ॥

प्र । नु । वयम् । सुते । या । ते । कृतानि । इन्द्र । ब्रवाम । यानि । नः । जुजोषः ।
वेदत् । अविद्वान् । शृणवत् । च । विद्वान् । वहते । अयम् । मघऽवा । सर्वऽसेनः ॥ ३ ॥

हे Vइन्द्र Vते त्वदीयानि यानि Vकृतानि कर्माणि सन्ति Vनु अद्य Vवयं स्तोतारः Vसुते सोमेऽभिषुते सति तानि कर्माणि Vप्र Vब्रवाम प्रकर्षेण वदाम । त्वमपि Vनः अस्मदर्थं Vयानि कर्माणि Vजुजोषः असेवथाः तानि कर्माणि Vअविद्वान् इतः पूर्वमजानन् जनः Vवेदत् जानातु । Vविद्वान् Vशृणवच्च शृणुयाच्च । यद्वा विद्वान् जानन् पुरुषः शृणवच्च । अजानन्तमपि जनं श्रावयेच्च । Vसर्वसेनः सर्वाभिः सेनाभिर्युक्तः Vमघवा धनवान् विद्वान् जानन् Vअयम् इन्द्रो जानतश्च शृण्वतश्च तान् जनान् प्रति Vवहते अश्वैरुह्यते ॥ व्यत्ययेन कर्तृप्रत्ययः ॥ प्रापयति ॥

स्थिरं मनश्चकृषे जात इन्द्र वेषीदेको युधये भूयसश्चित् ।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम् ॥ ४ ॥

स्थिरम् । मनः । चकृषे । जातः । इन्द्र । वेषि । इत् । एकः । युधये । भूयसः । चित् ।
अश्मानम् । चित् । शवसा । दिद्युतः । वि । विदः । गवाम् । ऊर्वम् । उस्रियाणाम् ॥ ४ ॥

हे Vइन्द्र Vजातः उत्पन्नमात्र एव त्वं Vस्थिरं चलनरहितं Vमनः चित्तं Vचकृषे चकर्थ । सर्वान् बलिष्ठान् जयेयमितीदृशम् । तथा हे इन्द्र Vएकः Vइत् असहाय एव त्वं Vयुधये युद्धाय Vभूयसश्चित् बहुतरान् राक्षसादीनपि Vवेषि अवेः[1] अगमः[1] । किंच Vअश्मानं Vचित् गवामावरकं पर्वतमपि Vशवसा बलेन Vवि Vदिद्युतः व्यभिनः । किंच Vउस्रियाणां क्षीरमुत्सारयन्तीनां Vगवां धेनूनाम् Vऊर्वं समूहं Vविदः अवेदयः अलम्भयः ॥

परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ।
अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयद्दासपत्नीः ॥ ५ ॥

परः । यत् । त्वम् । परमः । आऽजनिष्ठाः । पराऽवति । श्रुत्यम् । नाम । बिभ्रत् ।
अतः । चित् । इन्द्रात् । अभयन्त । देवाः । विश्वाः । अपः । अजयत् । दासऽपत्नीः ॥५॥

१. प-फ-ब-गच्छसि ।

[v]यत् यदा हे इन्द्र [v]परः परस्मादुपरिष्टात् स्थितः [v]परमः उत्कृष्टतमः [v]त्वं [v]परावति दूरे [v]श्रुत्यं श्रवणीयं [v]नाम नामधेयं [v]बिभ्रत् धारयन् [v]आजनिष्ठाः आ समन्तादजायथाः । शेषः परोक्षकृतः । [v]अतश्चित् अत आरभ्यैव [v]देवाः द्योतमानाः अग्न्यादयः [v]इन्द्रात् [v]अभयन्त बिभ्युः । [1]विश्वा [v]अपः सर्वाण्युदकानि इन्द्रः [v]अजयत् वशीचक्रे । कीदृशीः । [v]दासपत्नीः । दासो वृत्रः पतिः पालयिता यासामपां ता इति ॥ ॥ २६ ॥

तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः ।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः ॥ ६ ॥

तुभ्यं । इत् । एते । मरुतः । सुऽशेवाः । अर्चन्ति । अर्कम् । सुन्वन्ति । अन्धः ।
अहिम् । ओहानम् । अपः । आऽशयानम् । प्र । मायाभिः । मायिनम् । सक्षत् । इन्द्रः ॥ ६ ॥

[v]एते [v]मरुतः । महद्ववन्ति वदन्तीति[1] मरुतः स्तोतारः । [1]सुशेवाः । शेवमिति सुखनामैतत् । शोभनसुखाः सन्तः । स्तोत्रेण शोभनं सुखमुत्पादयन्त इत्यर्थः । हे इन्द्र [v]तुभ्येत तुभ्यमेव [1]अर्कम् अर्चनीयं स्तोत्रम् [v]अर्चन्ति स्तुवन्ति कुर्वन्तीत्यर्थः । [v]अन्धः सोमलक्षणमन्नं [v]सुन्वन्ति अभिषवं कुर्वन्ति । [v]इन्द्रः परमैश्वर्ययुक्तः [1]मायाभिः स्वकीयाभिः शक्तिभिः [v]अहिं वृत्रं [v]प्र [v]सक्षत् अभ्यभवत् । कीदृशम् । [v]ओहानं देवान् बाधमानम् [v]अपः उदकानि [v]आशयानम् आवृत्य शयनं कुर्वन्तं [v]मायिनं कपटवन्तमिति ॥

वि षू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्त्संचकानः ।
अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन् ॥ ७ ॥

वि । सु । मृधः । जनुषा । दानम् । इन्वन् । अहन् । गवा । मघऽवन् । सम्ऽचकानः ।
अत्र । दासस्य । नमुचेः । शिरः । यत् । अवर्तयः । मनवे । गातुम् । इच्छन् ॥ ७ ॥

हे [v]मघवन् धनवन्निन्द्र [v]संचकानः अस्माभिः स्तूयमानस्त्वम् ॥ संपूर्वः कायतिः शब्दकर्मा । तस्य लडर्थे लिटि रूपम् ॥ [v]दानं देवानां बाधकं वृत्रममुरं [v]गवा वज्रेण [v]हन्वन् प्रेरयन् हिंसन् [v]जनुषा जन्मना [v]मृधः तदनुचरान् राक्षसादीन् शत्रून् [v]सु सुष्ठु [v]वि [v]अहन् विजघन्थ । इन्द्रस्यासुरा जन्मारभ्य शत्रव इत्यर्थः । हे इन्द्र [v]त्वम् [v]अत्र अस्मिन् युद्धे [v]मनवे नमुचिनापहृतगोधनाय मह्यं [v]गातुं सुखम् [v]इच्छन् अभिलषन् [v]नमुचेः एतन्नामकस्य [v]दासस्य[2] उपक्षपयितुरसुरस्य संबन्धि [v]शिरः शीर्षं [v]यत् यदा [v]अवर्तयः अचूर्णयः[3] तदा शत्रून् विजघन्थेति पूर्वेण संबन्धः ॥

---

१. ग-घ-ज-त-प-फ-ब-श–चरन्तीति । २. र-श–'दासस्य' नास्ति । ३. ख-च-झ-ण-न-भ-र–'अचूर्णयः' नास्ति ।

युजं हि मामकृथा आदिदिन्द्र शिरो दासस्य नमुचेर्मथायन् ।
अश्मानं चित्स्वर्यं वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः ॥ ८ ॥

युजम् । हि । माम् । अकृथाः । आत् । इत् । इन्द्र । शिरः । दासस्य । नमुचेः । मथायन् ।
अश्मानम् । चित् । स्वर्यम् । वर्तमानम् । प्र । चक्रियाऽइव । रोदसी इति । मरुत्ऽभ्यः ॥ ८ ॥

हे [v]इन्द्र त्वं [v]स्वर्यं स्वरेण सहितं [v]वर्तमानं भ्रमन्तम् [1]अश्मानं [1]चित् मेघमिव स्थितं [v]दासस्य उपक्षपयितुः [v]नमुचेः असुरस्य [v]शिरः [v]मथायन् चूर्णयन्[1] [v]आदित् अनन्तरमेव [v]मां [v]युजं सख्यायम् [v]अकृथाः [v]हि चकृषे खलु । तदानीं [v]मरुद्भ्यः त्वत्सहायेभ्यः [v]रोदसी द्यावापृथिव्यौ [v]चक्रियेव चक्रे इव [v]प्र आहुः ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः ।
अन्तर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिन्द्रः ॥ ९ ॥

स्त्रियः । हि । दासः । आयुधानि । चक्रे । किम् । मा । करन् । अबलाः । अस्य । सेनाः ।
अन्तः । हि । अख्यत् । उभे इति । अस्य । धेने इति ।
अथ । उप । प्र । ऐत् । युधये । दस्युम् । इन्द्रः ॥ ९ ॥

[v]दासः उपक्षपयिता नमुचिरसुरः [v]स्त्रियः स्त्रीः[2] [v]आयुधानि युद्धसाधनानि [1]चक्रे [v]हि कृतवान् खलु । इन्द्रेण सह योद्धुं प्रहितवानित्यर्थः । [v]अस्य असुरस्य संबन्धिन्यः [v]अबलाः स्त्रीरूपाः [v]सेनाः [v]मा मां [1]किं [v]करन् । किं कुर्युरिति मन्यमान इन्द्रस्तासां मध्ये [v]अस्य असुरस्य [v]धेने प्रीणयित्र्यौ सुरूपे [v]उभे द्वे स्त्रियौ [v]अन्तः [v]अख्यत् [v]हि गृहमध्ये निदधे खलु । [v]अथ अनन्तरम् [v]इन्द्रः [v]दस्युं नमुचिं [v]युधये युद्धाय [v]उप [v]प्रैत् उपप्रागच्छत् ॥

समत्र गावोऽभितोऽनवन्तेहेह वत्सैर्वियुता यदासन् ।
सं ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन् ॥ १० ॥

सम् । अत्र । गावः । अभितः । अनवन्त । इहऽइह । वत्सैः । विऽयुताः । यत् । आसन् ।
सम् । ताः । इन्द्रः । असृजत् । अस्य । शाकैः ।
यत् । ईम् । सोमासः । सुऽसुताः । अमन्दन् ॥ १० ॥

---

१. ख-च-झ-ण-न-भ-र–‘ चूर्णयन् ’ नास्ति । २. ख-च-ण–स्त्रीरूपाणि ।

[v]यत्[1] यदा[2] [v]गावः[2] [v]वत्सैर्वियुताः [v]आसन् वियुक्ता अभवन् [v]अत्र अस्मिन् काले [v]अभितः सर्वतो नमुचिनापहता गावः [v]इहेह इह चेह च सर्वतः [v]सम् [v]अनवन्त अत्यन्तमगच्छन्। [v]यत् यदा [v]सुषुतः बभ्रुनाम्ना ऋषिणा सुष्ठुभिषुतः [v]सोमासः सोमाः [v]ईम् एनमिन्द्रम् [v]अमन्दन् अमादयन् तदा [v]इन्द्रः [v]शाकैः शक्तैर्मरुद्भिः सह [v]अस्य बभ्रोः संबन्धिनीर्नमुचिनापहृताः [v]ताः गाः [v]सम् [v]असृजत् वत्सैः सह समयोजयत्॥ ॥ २७ ॥

यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद्वृषभः सादनेषु।
पुरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम्॥ ११ ॥

यत्। ईम्। सोमाः। बभ्रुऽधूताः। अमन्दन्। अरोरवीत्। वृषभः। सदनेषु।
पुरम्ऽदरः। पपिऽवान्। इन्द्रः। अस्य। पुनः। गवाम्। अददात्। उस्रियाणाम्॥ ११॥

[v]यत् यदा [v]बभ्रुधूताः बभ्रुणाभिषुताः [v]सोमाः [v]ईम् एनमिन्द्रम् [v]अमन्दन् अमादयन् तदा [v]वृषभः कामानां वर्षिता इन्द्रः [v]सदनेषु[3] युद्धेषु [v]अरोरवीत् अत्यर्थं शब्दमकरोत्। [v]पुरंदरः पुरां दारयिता [v]अस्य इमं सोमं [v]पपिवान् पीतवान् [v]इन्द्रः [v]पुनः [v]उस्रियाणां क्षीरमुत्स्राविणीः [v]गवां गाः [v]अददात् बभ्रवे ददौ॥

भद्रमिदं रुशमा अग्ने अक्रन्गवां चत्वारि ददतः सहस्रा।
ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम्॥ १२ ॥

भद्रम्। इदम्। रुशमाः। अग्ने। अक्रन्। गवाम्। चत्वारि। ददतः। सहस्रा।
ऋणम्ऽचयस्य। प्रऽयता। मघानि। प्रति। अग्रभीष्म। नृऽतमस्य। नृणाम्॥ १२॥

रुशम इति कश्चिज्जनपदविशेषः। अत्र रुशमशब्देन तत्रत्या जना उच्यन्ते। [v]रुशमाः ऋणंचयनाम्नो राज्ञः किंकराः हे [v]अग्ने [v]भद्रं कल्याणम् [v]इदं कर्म [v]अक्रन् अकुर्वन्। कीदृशाः। [v]गवां धेनूनां [v]चत्वारि चतुःसंख्यायुक्तानि [v]सहस्रा सहस्राणि [v]ददतः मह्यं प्रयच्छन्तः। राज्ञा हि दीयमानानि धनानि राजपुरुषा एव प्रयच्छन्तीत्यर्थः। [v]नृणां[4] नेतॄणां मध्ये [v]नृतमस्य अतिशयेन नेतृतमस्य [v]ऋणंचयस्य एतन्नामकेन राज्ञा [v]प्रयता प्रयतानि दत्तानि [v]मघानि गोरूपाणि धनानि वयं [v]प्रत्यग्रभीष्म प्रतिगृहीतवन्तः स्मः। पूजार्थं बहुवचनम्॥

सुपेशसं मावं सृजन्त्यस्तं गवां सहस्रैः रुशमासो अग्ने।
तीव्रा इन्द्रममन्दुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः॥ १३ ॥

सुऽपेशसम्। मा। अवं। सृजन्ति। अस्तम्। गवाम्। सहस्रैः। रुशमासः। अग्ने।
तीव्राः। इन्द्रम्। अममन्दुः। सुतासः। अक्तोः। विऽउष्टौ। परितक्म्यायाः॥ १३॥

---

१. ख-च-ञ-ण-न-भ-र-श–'यत्' नास्ति। २. ग-घ-ज-प-फ-ब–यज्ञगावः। ३. त–सादनेषु।
४. ख-च-ञ-ण-त-न-भ-र-श–नराम्।

हे Vअग्ने Vरुशमासः रुशमा ऋणंचयस्य किंकराः Vसुपेशसं सुरूपमलंकाराच्छादनादिभिः संस्कृतं[1] Vमा माम् Vअस्तं गृहं Vगवां धेनूनां Vसहस्रैः सह Vअव Vसृजन्ति प्रापयन्ति स्म। तदनन्तरमेव Vतीव्राः रसवन्तः Vसुतासः लब्धबहुधनेन मयाभिषुताः सोमाः Vपरितक्म्यायाः। तमसा भूतानि परितस्तकति गच्छतीति परितक्म्या। तस्याः Vअक्तोः रात्रेः Vव्युष्टौ व्युच्छने सति। उषःकाले इत्यर्थः। Vइन्द्रम् Vअममन्दुः अमादयन्। बभ्रुः गवां प्राप्त्यनन्तरमविलम्बितमेव सोमेनेजे इत्यर्थः॥

औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम्।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वारि असनत्सहस्रा॥ १४॥

औच्छत्। सा। रात्री। परिऽतक्म्या। या। ऋणम्ऽचये। राजनि। रुशमानाम्।
अत्यः। न। वाजी। रघुः। अज्यमानः। बभ्रुः। चत्वारि। असनत्। सहस्रा॥ १४॥

Vरुशमानां रुशमनाम्नां जनानां Vराजनि प्रभौ Vऋणंचये एतत्संज्ञके तत्समीप एव Vया रात्रिः Vपरितक्म्या परितो गन्त्री भवति Vसा Vरात्री Vऔच्छत् व्युष्टाभवत्। Vअत्यः सततगामी Vवाजी Vन अश्व इव Vरघुः शीघ्रगामी Vअज्यमानः प्रेर्यमाणः[2] Vबभ्रुः एतन्नामक ऋषिः Vचत्वारि चतुःसंख्याकानि Vसहस्रा सहस्राणि गोरूपाणि धनानि Vअसनत् अलभत॥

चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने।
घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः॥ १५॥

चतुःऽसहस्रम्। गव्यस्य। पश्वः। प्रति। अग्रभीष्म। रुशमेषु। अग्ने।
घर्मः। चित्। तप्तः। प्रऽवृजे। यः। आसीत्।
अयस्मयः। तम्। ऊँ इति। आदाम। विप्राः॥ १५॥

हे Vअग्ने वयं Vरुशमेषु एतत्संज्ञकेषु जनेषु Vगव्यस्य गवात्मकस्य Vपश्वः पशोः पशूनाम्। जातावेकवचनम्। Vचतुःसहस्रं चत्वारि सहस्राणि Vप्रत्यग्रभीष्म प्रतिगृहीतवन्तः स्मः। Vप्रवृजे प्रवृक्तनार्थं Vतप्तः संतप्तः शोभनवर्णः Vघर्मश्चित् महावीर इव Vअयस्मयः अयोमयो हिरण्मयः Vयः कलशः Vआसीत् अभवत् Vतमु दोहनार्थं कलशं च Vविप्राः मेधाविनो वयं रुशमेषु Vआदाम आदत्तवन्तः॥ ॥ २८॥

'इन्द्रो रथाय' इति त्रयोदशर्चं सप्तदशं सूक्तम्। अवस्युर्नाम[3] आत्रेय ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। 'उग्रमयातं' 'सं ह यद्वाम्' इति पादयोः क्रमेण कुत्सोशनसौ विकल्पेन देवता। 'इन्द्राकुत्सा वहमाना' इत्यस्या इन्द्रः कुत्सश्च। तथा चानुक्रान्तम्—'इन्द्रो रथाय सप्तोनावस्युरुग्रमिति कौत्स्यौशनसौ वा पादौ पारेन्द्राकौत्सी' इति। विनियोगो लैङ्गिकः॥

---

१. ख-च-ण-त-न-भ-र-श-सत्कृतम्। २. ख-च-ञ-ण-न-भ—पूर्यमाणः। ३. ख-ग-घ-च-ज-ञ-ण-त-न-भ-श—अवस्युनामा।

इन्द्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयन्तम् ।
यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन् ॥ १ ॥

इन्द्रः । रथाय । प्रऽवतम् । कृणोति । यम् । अधिऽअस्थात् । मघऽवा । वाजऽयन्तम् ।
यूथाऽइव । पश्वः । वि । उनोति । गोपाः । अरिष्टः । याति । प्रथमः । सिसासन् ॥ १ ॥

मघवा धनवान् इन्द्रः वाजयन्तम् अन्नमिच्छन्तं यं रथम् अध्यस्थात् अधितिष्ठति तस्मै रथाय प्रवतं प्रवणमार्गे कृणोति करोति । अपि च गोपाः गोपालः पश्वः यूथेव पशोः पशूनां यूथानि यथा व्युनोति प्रेरयति तथा शत्रुसैन्यानि प्रेरयति । अरिष्टः शत्रुभिः स्वयमहिंसितः प्रथमः देवानां मुख्य इन्द्रः सिषासन् शत्रुधनानीच्छन् याति गच्छति ॥

आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व ।
नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनाँश्चिज्जनिवतश्चकर्थ ॥ २ ॥

आ । प्र । द्रव । हरिऽवः । मा । वि । वेनः । पिशङ्गऽराते । अभि । नः । सचस्व ।
नहि । त्वत् । इन्द्र । वस्यः । अन्यत् । अस्ति । अमेनान् । चित् । जनिऽवतः । चकर्थ ॥ २ ॥

हे हरिवः हरिवन्निन्द्र त्वम् आ अस्मानभिमुखं प्र द्रव प्रकर्षेण गच्छ । किंतु मा वि वेनः । वेनतिः कान्तिकर्मा । अस्मासु विगतकामो मा भूः । किंच हे पिशङ्गराते बहुरूपधनेन्द्र नः अस्मान् अभि सचस्व अभिसेवस्व । अपि च हे इन्द्र वस्यः वसीयः श्रेयस्करं त्वत् त्वत्तः अन्यत् नहि अस्ति अन्यद्वस्तुजातं नास्ति । अमेनाँश्चित् । मेनाशब्दः स्त्रीवाची । अपगतस्त्रीकाँश्चित्[2] जनिवतः जायावतः[3] चकर्थ करोषि ॥

उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा ।
प्राचोदयत्सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥ ३ ॥

उत् । यत् । सहः । सहसः । आ । अजनिष्ट । देदिष्टे । इन्द्रः । इन्द्रियाणि । विश्वा ।
प्र । अचोदयत् । सुऽदुघाः । वव्रे । अन्तः ।
वि । ज्योतिषा । सम्ऽववृत्वत् । तमः । अवरित्यवः ॥ ३ ॥

यत् यदा सहः सूर्यसंबन्धि तेजः सहसः उषःसंबन्धिनस्तेजसः उत् आजनिष्ट उपरिष्टात् प्रादुर्बभूव तदा इन्द्रः विश्वा विश्वानि सर्वाणि इन्द्रियाणि धनानि । इन्द्रियमिति

१. ख-च-ज्ञ-ण-न-भ-र–'हे इन्द्र' नास्ति । २. त– °स्त्रीकाँश्च । ३. ख-च-ज्ञ-ण-न-भ-र– जायावतश्च ।

धननामैतत् । Vदेदिष्टे । यजमानेभ्यो दिशति । Vवव्रे निवारके पर्वते Vअन्तः मध्ये बलेन निरुद्धाः Vसुदुघाः सुष्ठु दोग्ध्रीर्गाः Vप्राचोदयत् प्रैरयत् । Vज्योतिषा तेजसा Vसंवव्रुत्वत् संवरणशीलं Vतमः Vवि Vअवः निवारितवान् ॥

अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ४ ॥

अनवः । ते । रथम् । अश्वाय । तक्षन् । त्वष्टा । वज्रम् । पुरुऽहूत । द्युऽमन्तम् ।
ब्रह्माणः । इन्द्रम् । महयन्तः । अर्कैः । अवर्धयन् । अहये । हन्तवै । ऊँ इति ॥ ४ ॥

हे Vपुरुहूत बहुभिः आहूतेन्द्र[1] Vते त्वदीयं Vरथम् Vअश्वाय अश्वाभ्यां संयोगार्हम् Vअनवः । अनवो मनुष्याः । ऋभवः Vतक्षन् अतक्षन् अकुर्वन् । Vत्वष्टा च त्वदीयं Vवज्रं Vद्युमन्तं दीप्तिमन्तम् अकरोत् । Vउ अपि च Vमहयन्तः Vइन्द्रं पूजयन्तः Vब्रह्माणः अङ्गिरसः परिवृढा मरुतो वा Vअहये अहिं वृत्रं Vहन्तवै हन्तुम् Vअर्कैः स्तोत्रैः Vअवर्धयन् वर्धितवन्तः[2] ॥

वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः ।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥ ५ ॥

वृष्णे । यत् । ते । वृषणः । अर्कम् । अर्चान् । इन्द्र । ग्रावाणः । अदितिः । सऽजोषाः ।
अनश्वासः । ये । पवयः । अरथाः । इन्द्रऽइषिताः । अभि । अवर्तन्त । दस्यून् ॥ ५ ॥

हे Vइन्द्र Vयत् यदा Vवृषणः सेचनसमर्था मरुतः Vवृष्णे कामानां वर्षित्रे Vते तुभ्यम् Vअर्कं स्तोत्रम् Vअर्चान् अस्तुवन् अकुर्वन्नित्यर्थः । तदा Vअदितिः अदीनाः ॥ वचनव्यत्ययः ॥ Vग्रावाणः अभिषवपाषाणाः[3] Vसजोषाः संगता बभूवुरिति शेषः । Vअनश्वासः अश्ववर्जिताः Vअरथाः रथहीनाः Vइन्द्रेषिताः इन्द्रेण प्रेषिताः Vपवयः पवमाना गच्छन्तः Vये मरुतः Vदस्यून् शत्रून् Vअभ्यवर्तन्त अभिभूतान् कुर्वन्तो वर्तन्ते स्म ते मरुतोऽर्चानिति संबन्धः ॥ ॥ २९ ॥

प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ।
शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥ ६ ॥

प्र । ते । पूर्वाणि । करणानि । वोचम् । प्र । नूतना । मघऽवन् । या । चकर्थ ।
शक्तिऽवः । यत् । विऽभराः । रोदसी इति । उभे इति । जयन् । अपः । मनवे । दानुऽचित्राः ॥ ६ ॥

---

१. ख-ग-घ-च-ज-ण-ञ-आहूतेन्द्र । २. ग-घ-ज-प-फ-ब -वर्धितवन्तः । उ पूरणः । ३. ख-च-झ-ण-न-भ-र-अभिषवण° ।

हे इन्द्र [v]ते त्वदीयानि [v]पूर्वाणि पुरातनानि [v]करणानि कर्माणि [v]प्र [v]वोचम् अहं प्रकर्षेण ब्रवीमि । [v]नूतना नूतनानि नवानि कर्माणि [v]प्र वोचं प्रब्रवीमि । हे [v]मघवन् धनवन्निन्द्र [v]या यानि कर्माणि [v]चकर्थ कृतवानसि तानि प्र वोचमिति संबन्धः । हे [v]शक्तीवः शक्तिमन् । शक्तिर्वज्रं कर्म वा । तद्वन्निन्द्र [v]यत् यस्त्वम् [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]जयन् वशीकुर्वन् [v]अपः[१] उदकानि[१] [v]मनवे मनुष्याय [v]विभराः विविच्य बिभर्षि । कीदृशीः । [v]दानुचित्राः चित्रदानाः ॥

तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नन्नोजो अत्रामिमीथाः ।
शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥ ७ ॥

तत् । इत् । नु । ते । करणम् । दस्म । विप्र ।
अहिम् । यत् । घ्नन् । ओजः । अत्र । अमिमीथाः ।
शुष्णस्य । चित् । परि । मायाः । अगृभ्णाः । प्रऽपित्वम् । यन् । अप । दस्यून् । असेधः ॥ ७ ॥

हे [v]दस्म दर्शनीय [v]विप्र मेधाविन्निन्द्र त्वम् [v]अत्र अस्मिँल्लोके [v]अहिं वृत्रमसुरं [v]घ्नन् हिंसन् [v]यत् [v]ओजः यद्बलम् [v]अमिमीथाः प्रकाशितवानसि [v]तदिन्नु तत्खलु [v]ते त्वदीयं [v]करणं कर्म विद्यते । अपि च [v]शुष्णस्य [v]चित् एतन्नामकस्याप्यसुरस्य संबन्धिनीः [v]मायाः प्रज्ञाः [v]परि [v]अगृभ्णाः परिगृहीतवानसि । हे इन्द्र त्वं [v]प्रपित्वं संग्रामं समीपं वा [v]यन् प्राप्नुवन् [v]दस्यून् असुरान् [v]अप [v]असेधः अपाबाधथाः ॥

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रमयातमवहो ह कुत्सं मं ह यद्वामुशनारन्त देवाः ॥ ८ ॥

त्वम् । अपः । यदवे । तुर्वशाय । अरमयः । सुऽदुघाः । पारः । इन्द्र ।
उग्रम् । अयातम् । अवहः । ह । कुत्सम् । सम् । ह । यत् । वाम् । उशनाः । अरन्त । देवाः ॥८॥

हे [v]इन्द्र [v]त्वं पारे[२] नदीनां तीरे । प्रवृद्धाः[३] इति शेषः । [v]सुदुघाः ओषधिवनस्पतीन् सुष्ठु दुहतीः [v]अपः उदकानि [v]यदवे यदुनामकाय राज्ञे [v]तुर्वशाय एतन्नामकाय राज्ञे च [v]अरमयः रमितवानसि । हे इन्द्र युवाम् । त्वं कुत्सश्चेति शेषः । [v]उग्रम् उद्गूर्णं शुष्णम् [v]अयातम् अगच्छतम्[४] । तदनन्तरं त्वं शुष्णं हत्वा [v]कुत्सम् [v]अवहो [v]ह स्वगृहं प्रापितवानसि खलु । [v]यत् यदा [v]वां युवामिन्द्राकुत्सौ [v]उशना भार्गवः [v]देवाः च [v]सम् [v]अरन्त [v]ह संभेजिरे खलु ॥

---

१. ख-च-झ-ण-न-भ-र-'अप उदकानि' नास्ति । २. ग-घ-ज-प-फ-ब-पारः । ३. ग-घ-ज-श-प्रवृद्धः । ४. ग-घ-ज-आगच्छतम् ।

इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु ।
निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि ॥ ९ ॥

इन्द्राकुत्सा । वहमाना । रथेन । आ । वाम् । अत्याः । अपि । कर्णे । वहन्तु ।
निः । सीम् । अत्ऽभ्यः । धमथः । निः । सधऽस्थात् । मघोनः । हृदः । वरथः । तमांसि ॥ ९ ॥

हे [v]इन्द्राकुत्सा इन्द्राकुत्सौ [v]रथेन [v]वहमाना वहमानौ उद्यमानौ[1] [v]वां युवाम् [v]अत्याः अश्वाः [v]कर्णे [v]अपि । स्तोत्राणि कृणोति करोतीति कर्णः स्तोता यजमानो वा । तत्समीपेऽपीति यावत् । [v]आ [v]वहन्तु आ समन्तात् वाहका भवन्तु । युवामपि [v]अद्भ्यः अप्सु प्रविष्टं [v]सीम् एनं शुष्णासुरं [v]निः [v]धमथः अबाधेथाम् । सीमिति शुष्णासुरो बुद्धिस्थः परामृश्यते । [v]सधस्थात् स्वकीयात् स्थानात् [v]निः अबाधेथाम् । [v]मघोनः मघवतो हविष्मतो यजमानस्य [v]हृदः हृदयात् [v]तमांसि अज्ञानरूपाणि पापानि [v]वरथः निवारयथः ॥

वातस्य युक्तान्त्सुयुजश्चिदश्वान्कविश्चिदेषो अजगन्नवस्युः ।
विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीमवर्धन् ॥ १० ॥

वातस्य । युक्तान् । सुऽयुजः । चित् । अश्वान् । कविः । चित् । एषः । अजगन् । अवस्युः ।
विश्वे । ते । अत्र । मरुतः । सखायः । इन्द्र । ब्रह्माणि । तविषीम् । अवर्धन् ॥ १० ॥

[v]कविश्चित् प्राज्ञोऽपि [v]अवस्युः एतन्नामकः [v]एषः मन्त्रद्रष्टा [v]वातस्य वायोर्वेगेन [v]युक्तान् संयुक्तान्[2] [v]सुयुजश्चित् सुष्ठु योजनीयान् [v]अश्वान् [v]अजगन् प्राप्नोत्[3] । अवस्योः [v]सखायः [v]विश्वे सर्वे [v]मरुतः बहवः स्तोतारो हे [v]इन्द्र [v]अत्र अस्मिँल्लोके [v]ते त्वदीयां[4] [v]तविषीं बलं [v]ब्रह्माणि ब्रह्मभिः स्तोत्रैः [v]अवर्धन् अवर्धयन् ॥ ॥ ३० ॥

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम् ।
भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः ॥ ११ ॥

सूरः । चित् । रथम् । परितक्म्यायाम् । पूर्वम् । करत् । उपरम् । जूजुवांसम् ।
भरत् । चक्रम् । एतशः । सम् । रिणाति । पुरः । दधत् । सनिष्यति । क्रतुम् । नः ॥ ११ ॥

इन्द्रः [v]परितक्म्यायां संग्रामे । परितो गच्छन्त्यस्यां भटाः[5] इति परितक्म्या संग्रामः । एतशाख्येन ऋषिणा सह योद्धुः [v]सूरश्चित् सूर्यस्यापि संबन्धिनं [v]जूजुवांसं वेगेन गच्छन्तं [v]रथम्[6] [v]उपरम्[6]

१. ख-ग-च-ञ-ण-प-फ-ब-भ-र-'उद्यमानौ' नास्ति । २. ख-च-ञ-ण-न-भ-र-'संयुक्तान्' नास्ति ।
३. ख-व-ग-भ-र-प्राप्नोतरम् । ४. र-त्वदीयम् । ५. श-भये । ६ ख-व-ञ-ण-न-स-पम्; र-रथम् ।

उपरतव्यापारं Vपूर्वं Vकरत् पुराकरोत् । Vएतशः एतशाय ॥ विभक्तिव्यत्ययः ॥ इन्द्रः पूर्वं द्विचक्रस्य रथस्यैकं Vचक्रं Vभरत् अहरत् । स इन्द्रस्तेन चक्रेणासुरान् Vमं Vरिणाति हिनस्ति । अपि च Vपुरो Vदधत् अस्मान् पुरस्कुर्वन् Vनः अस्मदीयं Vक्रतुं यज्ञं Vसनिष्यति संभजतु ॥

आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोममिच्छन् ।
वदन्ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरन्ति ॥ १२ ॥

आ । अयम् । जनाः । अभिऽचक्षे । जगाम । इन्द्रः । सखायम् । सुतऽसोमम् । इच्छन् । वदन् । ग्रावा । अव । वेदिम् । भ्रियाते । यस्य । जीरम् । अध्वर्यवः । चरन्ति ॥ १२ ॥

हे Vजनाः Vअभिचक्षे युष्मानभिद्रष्टुम् Vअयम् Vइन्द्रः Vसखायं स्तोतारं Vसुतसोमम् अभिषुतसोमं यजमानम् Vइच्छन् अभिलषन् Vआ Vजगाम आगच्छति[1] । Vअध्वर्यवः Vयस्य प्राणः Vजीरं क्षेपणं प्रेरणं Vचरन्ति कुर्वन्ति[2] सः Vग्रावा सोमाभिषवपाषाणः[3] Vवदन् शब्दं कुर्वन् Vवेदिम् Vअव Vभ्रियाते अभिह्रियते ॥

ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंहु आरन् ।
ववन्धि यज्यूँरुत तेषु धेह्योजो जनेषु येषु ते स्याम ॥ १३ ॥

ये । चाकनन्त । चाकनन्त । नु । ते । मर्ताः । अमृत । मो इति । ते । अंहः । आ । अरन् ।
ववन्धि । यज्यून् । उत । तेषु । धेहि । ओजः । जनेषु । येषु । ते । स्याम ॥ १३ ॥

हे इन्द्र धनार्थिनः[4] Vये जनास्त्वां Vचाकनन्त[5] अकामयन्त पुनश्च Vते Vनु क्षिप्रमेव त्वां Vचाकनन्त हे Vअमृत अमरणशीलेन्द्र Vमर्ताः मरणधर्माणः Vते जनाः Vअंहः अनर्थं Vमो Vआरन् मा गमन् । मा उ इति निपातसमुदायो मेत्येकनिपातार्थे वर्तते । Vउत अपि च Vयज्यून् यजमानान् Vववन्धि संभजस्व । Vयेषु Vजनेषु येषां जनानां मध्ये वयं स्तोतारः Vते त्वदीयाः Vस्याम भवाम हे इन्द्र त्वं Vतेषु जनेषु Vओजः बलं Vधेहि ॥ ॥ ३१ ॥

' अदर्दरुत्सम् ' इति द्वादशर्चमष्टादशं सूक्तम् । गातुर्नामात्रेय ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । तथा चानुक्रान्तम्—' अदर्दर्द्वादश गातुः ' इति । गतो विनियोगः ॥

१. ख-च-ञ-ण-न-भ-र-आगच्छन्; श—गच्छति । २. ग-घ-ज—' कुर्वन्ति ' नास्ति । ३ ख-ञ-र—सोमाभिषवण° । ४. ग-घ-ज—धनार्थम् । ५. ख-च-ञ-ण-त-न-भ-र-श—चाकनन्त कामयन्ते ।

अर्दर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अवं दानवं हन् ॥ १ ॥

अर्दर्दः । उत्सम् । असृजः । वि । खानि । त्वम् । अर्णवान् । बद्बधानान् । अरम्णाः ।
महान्तम् । इन्द्र । पर्वतम् । वि । यत् । वरिति वः ।
सृजः । वि । धाराः । अव । दानवम् । हन्निति हन् ॥ १ ॥

हे इन्द्र [v]त्वम् [v]उत्सम् उत्स्यन्दमानं मेघम् [v]अदर्दः विदारितवानसि । तदनन्तरं [v]खानि मेघस्योदकनिर्गमनद्वाराणि[१] [v]वि [v]असृजः विशेषेण सृष्टवानसि । किंच [v]बद्बधानान् बाध्यमानान्[२] [v]अर्णवान् उदकवतो मेघान् [v]अरम्णाः विसर्जयसि क्षारयसीत्यर्थः । अत्र रम्णातिर्विसर्जनकर्मा । हे [v]इन्द्र [v]यत् यः त्वम् । यदिति लिङ्गव्यत्ययः । [v]महान्तं प्रभूतं [v]पर्वतं मेघं [v]वि [v]वः विवृतवानसि । [v]धाराः अपां [v]वि [v]सृजः विसृष्टवानसि । अपि च [v]दानवं दनोः पुत्रं वृत्रमसुरं यद्वोदकस्य दातारं मेघं वा [v]अव [v]हन् अभिहतवानसि । अत्र निरुक्तम्—'अर्दणा उत्सम् । उत्स उत्स्यदनाद्वोत्स्यन्दनाद्वा उनत्तेर्वा[३] स्यात् । व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतान् ' (निरु. १०. ९) इत्यादि ॥

त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंहऽ ऊधः पर्वतस्य वज्रिन् ।
अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इन्द्र तविषीमधत्थाः ॥ २ ॥

त्वम् । उत्सान् । ऋतुऽभिः । बद्बधानान् । अरंहः । ऊधः । पर्वतस्य । वज्रिन् ।
अहिम् । चित् । उग्र । प्रऽयुतम् । शयानम् । जघन्वान् । इन्द्र । तविषीम् । अधत्थाः ॥२॥

हे [v]वज्रिन् वज्रवन्निन्द्र [v]त्वम् [v]ऋतुभिः ऋतुषु वृष्टिकालेषु[४] [v]बद्बधानान् प्रतिबध्यमानान् [v]उत्सान् मेघान् प्रतिबन्धनादमोचयः[५] इति शेषः । अपि च [v]पर्वतस्य मेघस्य संबन्धि [v]ऊधः जलम् [v]अरंहः अगमयः[६] । हे [v]उग्र उद्गूर्णबलेन्द्र [v]प्रयुतम् उद्युक्तं [v]शयानं जले शयनं कुर्वन्तम् [v]अहिं [v]चित वृत्रं च [v]जघन्वान् हतवानसि । हे [v]इन्द्र त्वं [v]तविषीं बलम् [v]अधत्थाः अधारयः । वृत्रवधानन्तरमिन्द्रो लोके प्रख्यातो भवतीत्यर्थः ॥

त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिन्द्रः ।
य एकऽ इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥ ३ ॥

त्यस्य । चित् । महतः । निः । मृगस्य । वधः । जघान । तविषीभिः । इन्द्रः ।
यः । एकः । इत् । अप्रतिः । मन्यमानः । आत् । अस्मात् । अन्यः । अजनिष्ट । तव्यान् ॥ ३ ॥

---

१. ग-घ-ज-त-श–मेघस्योदकानि निर्गमनद्वाराणि । २. त-प-फ-ब-र–बाधमानान । ३. र–उन्नयनाद्वा । ४. ख-च-झ-ण-न-भ-र–वृष्टिकालेषु । ५. ख-प-ण–बन्धादमोचयः; झ-ण-भ-र–प्रतिबन्धनादमोचयः । ६. ग-घ-ज प-फ-ब–अरमयः ।

निर्जघानायुधं शक्रो वृत्रेण क्षिप्तमोजसा। वृत्रस्य गात्रादन्यो यः प्रादुर्भूतो महासुरः॥ वृत्रं पूर्वं निहत्येन्द्रो द्वितीयं शुष्णसंज्ञकम्। पुनर्जघानेन्द्र इति पराभिः कीर्तयत्यृषिरिति॥ ᵛइन्द्रः ᵛमहतः प्रभूतस्य[1] ᵛमृगस्य मृगवच्छीघ्रगामिनः ᵛत्यस्य ᵛचित् तस्य वृत्रस्य संबन्धि ᵛवधः आयुधं ᵛतविषीभिः स्वकीयैर्बलैः ᵛनिः ᵛजघान निःशेषेणावधीत्। ᵛएक ᵛइत् असहाय एव ᵛअप्रतिः प्रतिद्वन्द्विरहितः[2] ᵛमन्यमानः आत्मानं ᵛयः अस्तीति शेषः। ᵛआत् तदानीम् ᵛअस्मात् वृत्रात् ᵛतव्यान् प्रवृद्धतरः ᵛअन्यः असुरः शुष्णः[3] ᵛअजनिष्ट प्रादुरभूत्॥

त्यं चिदेषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम्।
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम्॥ ४॥

त्यम्। चित्। एषाम्। स्वधया। मदन्तम्। मिहः। नपातम्। सुऽवृधम्। तमःऽगाम्। वृषऽप्रभर्मा। दानवस्य। भामम्। वज्रेण। वज्री। नि। जघान। शुष्णम्॥ ४॥

ᵛएषां प्राणिनां ᵛस्वधया अन्नेन ᵛमदन्तं मोदमानं सर्वप्राणिनामन्नं स्वयमेव भुञ्जानं ᵛमिहः सेचनसमर्थस्य मेघस्य ᵛनपातं पातारं रक्षितारम्। अत्र नपाच्छब्दः पातरि वर्तते। 'प्राणो वै तनूनपात्स हि तन्वः पाति' (ऐ. ब्रा. २. ४) इति ब्राह्मणम्। ᵛसुवृधं प्रवृद्धं ᵛतमोगां तमः अन्धकारं गच्छन्तं ᵛत्यं ᵛचित् तं च वृत्रं निजघानेति शेषः। ᵛवृषप्रभर्मा वर्षणशीलस्य मेघस्य प्रहर्ता ᵛवज्री वज्रवानिन्द्रः ᵛवज्रेण स्वकीयेनायुधेन ᵛदानवस्य दनुजस्य वृत्रस्य[4] ᵛभामम्। अत्र क्रोधवाचिभामशब्देन क्रोधादुत्पन्नः शुष्णासुरो लक्ष्यते। तं शुष्णासुरं[5] ᵛनि ᵛजघान हतवान्॥

त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म।
यदीं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि ह्रर्म्ये धाः॥ ५॥

त्यम्। चित्। अस्य। क्रतुऽभिः। निऽसत्तम्। अमर्मणः। विदत्। इत्। अस्य। मर्म। यत्। ईम्। सुऽक्षत्र। प्रऽभृता। मदस्य। युयुत्सन्तम्। तमसि। ह्रर्म्ये। धाः॥ ५॥

ᵛअमर्मणः मर्महीनमात्मानं मन्यमानस्य ᵛअस्य वृत्रस्य ᵛनिषत्तं निषण्णं ᵛत्यं ᵛचित् त्यक्तमेव। लिङ्व्यत्ययः। ᵛमर्म प्राणस्थानम्। यत्र स्थाने विद्धो म्रियते तन्मर्मेत्युच्यते। ᵛअस्य वृत्रस्य ᵛक्रतुभिः प्रज्ञानैर्हे इन्द्र त्वं ᵛविददित् अज्ञासीरेव। ᵛयत् यदा हे ᵛसुक्षत्र सुबलेन्द्र त्वं ᵛमदस्य मादकस्य सोमस्य ᵛप्रभृता प्रभृतौ संभरणे सति ᵛयुयुत्सन्तं योद्धुमिच्छन्तम् ᵛईम् एनं वृत्रं ᵛह्रर्म्ये हारके ᵛतमसि ᵛधाः न्यदधाः। वृत्र इन्द्रस्य भयात् तमसि प्राविशदित्यर्थः॥

---

१. ख-च-ण-प्रवृद्धस्य। २. ख-झ-र-प्रतिद्वन्द्वरहितः; ग-घ-ज-प-फ-ब-प्रतिबन्धरहितः। ३. ख-च-झ-ण-न-भ-र-'शुष्णः' नास्ति। ४. ग-घ-ज-श-'वृत्रस्य' नास्ति। ५. ख-च-प-ण-त-न-भ-र-श-शुष्णमसुरम्।

त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम् ।
तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान ॥ ६ ॥

त्यम् । चित् । इत्था । कत्पयम् । शयानम् । असूर्ये । तमसि । ववृधानम् ।
तम् । चित् । मन्दानः । वृषभः । सुतस्य । उच्चैः । इन्द्रः । अपऽगूर्या । जघान ॥ ६ ॥

vसुतस्य अभिषुतेन सोमेन vमन्दानः मोदमानः vवृषभः कामानां वर्षिता vइन्द्रः vउच्चैः ऊर्ध्वम् vअपगूर्य वज्रमुद्यम्य vत्यं vचित् तमेव वृत्रं vजघान अवधीत् । कीदृशम् । vइत्था अमुत्रान्तरिक्षलोके vकत्पयम् । कत् सुखकरं पयो यस्य तम् । vशयानम् आसु शयनं कुर्वन्तम् vअसूर्ये सूर्यरहिते vतमसि अन्धकारे vववृधानं वर्धमानम् । vतं vचित् इति पुनर्वचनं पूरणार्थम् ॥ ॥ ३२ ॥

उद्यदिन्द्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतम् ।
यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार ॥ ७ ॥

उत् । यत् । इन्द्रः । महते । दानवाय । वधः । यमिष्ट । सहः । अप्रतिऽइतम् ।
यत् । ईम् । वज्रस्य । प्रऽभृतौ । ददाभ । विश्वस्य । जन्तोः । अधमम् । चकार ॥ ७ ॥

vयत् यदा vइन्द्रो vमहते प्रभूताय vदानवाय वृत्रासुराय vसहः शत्रूणामभिभवित्रं vअप्रतीतं केनाप्यप्रतिगतं vवधः वज्रम् vउत् vयमिष्ट उदयच्छत् । vयत् यदा vवज्रस्य vप्रभृतौ प्रहृतौ प्रहरणे सति ॥ ' हृग्रहोर्भः ' इति भत्वम् ॥ vईम् एनं वृत्रं vददाभ अहिंसीत् तदा vविश्वस्य सर्वस्य vजन्तोः प्राणिनः vअधमं नीचं vचकार अकरोत् ॥

त्यं चिदर्णं मधुपं शयानमसिन्वं वत्रं मह्यादुग्रः ।
अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचम् ॥ ८ ॥

त्यम् । चित् । अर्णम् । मधुऽपम् । शयानम् । असिन्वम् । वत्रम् । महि । आदत् । उग्रः ।
अपादम् । अत्रम् । महता । वधेन । नि । दुर्योणे । आवृणक् । मृध्रऽवाचम् ॥ ८ ॥

vउग्रः उत्कूर्णबलः इन्द्रः vमहि महान्तं vत्यं vचित् तमेव वृत्रम् vआदत् आददौ प्रत्यग्रहीत् । कीदृशम् । vअर्णं गन्तारं जलं मेघं वावृत्य vशयानं शयनं कुर्वन्तम् । स्थितवन्तमित्यर्थः । vमधुपं मधुनोऽम्भसः पातारं[1] पालयितारम् vअसिन्वं सपत्नानवक्षेमारम्[2] ॥ अस्यतेरिदं रूपम् ॥ vवत्रं वृण्वन्तं सर्वमप्याच्छादयन्तम् । ' स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम् '

---

१. ख-च-झ-ण-न-भ-र–' पातारं ' नास्ति । २. ख-च-झ-ण-न-भ-श–सपत्नानां क्षेमारम्; र–सपत्नानाक्षेमारम् ।

(तै. सं. २. ५. २. २) इति हि तैत्तिरीयकम्। तदनन्तरमिन्द्रः [v]दुर्योणे संग्रामे [१]महता प्रभूतेन [v]वधेन वज्रेण [v]अपादं पादरहितम् अमत्रम्[२] अमात्रं परिमाणरहितं [v]मृध्रवाचं हिंसितवागिन्द्रियम्। जृम्भाभिभूतमित्यर्थः[३]। वृत्रं [v]नि [v]अवृणक् नितरामहिंसीत्। 'तस्माज्जृम्भ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहिताम्[४]' (तै. सं. २. ५. २. ४) इति हि तैत्तिरीयकम्॥

को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः।
इमे चिदस्य ज्रयसो नु देवी इन्द्रस्यौजसो भियसा जिहाते॥ ९॥

कः। अस्य। शुष्मम्। तविषीम्। वराते। एकः। धना। भरते। अप्रतिऽइतः।
इमे इति। चित्। अस्य। ज्रयसः। नु। देवी इति।
इन्द्रस्य। ओजसः। भियसा। जिहाते इति॥ ९॥

[v]अस्य इन्द्रस्य संबन्धिनीं [v]शुष्मं शोषणीं[४] [v]तविषीं बलं [v]कः [v]वराते निवारयेत्॥ शुष्मशब्दस्य स्त्रीलिङ्गविशेषणत्वेऽपि नियतलिङ्गत्वात् पुंलिङ्गत्वमेव॥ [v]अप्रतीतः केनाप्यप्रतिगत इन्द्रः [v]एकः असहाय एव [v]धना धनानि शत्रूणां वसूनि [v]भरते बिभर्ति हरते वा। [v]देवी देव्यौ द्योतमाने [v]इमे [v]चित् एव[५] द्यावापृथिव्यौ [v]ज्रयसः वेगवतः [v]अस्य [v]इन्द्रस्य संबन्धिनः [v]ओजसः बलाद्धेतुना [v]भियसा भयेन [v]नु क्षिप्रं [v]जिहाते गच्छतः। चलत इत्यर्थः॥

न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमन्त॥ १०॥

नि। अस्मै। देवी। स्वऽधितिः। जिहीते। इन्द्राय। गातुः। उशतीऽइव। येमे।
सम्। यत्। ओजः। युवते। विश्वम्। आभिः। अनु। स्वधाऽव्ने। क्षितयः। नमन्त॥ १०॥

[v]स्वधितिः स्वधृतिः स्वेन धृता [v]देवी द्योतमाना द्यौः [v]अस्मै इन्द्राय [v]नि [v]जिहीते नीचत्वेन याति। [v]गातुः भूमिः [v]उशतीव कामयमाना योषिदिव [v]इन्द्राय [v]येमे आत्मानं नियच्छति। यथेष्टमात्मानं विनियोक्तुं[६] योग्या भवतीत्यर्थः। [v]यत् यदेन्द्रः [v]विश्वं समस्तम् [v]ओजः बलम् [v]आभिः प्रजाभिः [v]सं [v]युवते संयोजयति। इन्द्रः स्वकीयं बलं सर्वासु प्रजासु निहितवानित्यर्थः। [v]अनु आनुकूल्येन वर्तमानाः [v]क्षितयः मनुष्याः। क्षितय इति मनुष्यनामैतत्। [v]स्वधाव्ने[७] बलवते इन्द्राय [v]नमन्त संनमन्ति प्रह्वीभवन्ति[८]॥

---

१. ग-घ-ज-त-प-फ-ब-अत्रम। २ ख-च-झ-ण-भ-र-जम्भ्याभिभूत°। ३. झ-र-तदजिहाताम्; त-तदुज्जिहाताम्। ४. ख-च-ण-भ-शोषणम्; न-शोषिणीम्; भ-शोषणाम्। ५. ग-घ-ज-त-प-फ-ब-र-इमे; श-एते एव। ६. ख-च-ण-नियोक्तुम्; झ-न-भ-र-वियोक्तुम्। ७. ख-च-झ-ण-भ-र-स्वधात्रे स्वधाव्ने। ८. न-पुस्तकेऽस्यानन्तरमेवं पाठो दृश्यते- एकत्रिकनाम्न्येकाहे निष्केवल्यशस्त्रे एकं नु त्वेति सूक्तमुखीया। सूत्रितं च-एकस्य चिन्मे विभ्वस्त्वो न एकं नु त्वा सत्पति पाञ्चजन्यमिति।

एकं नु त्वा सत्पतिं पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥ ११ ॥

एकम् । नु । त्वा । सत्ऽपतिम् । पाञ्चऽजन्यम् । जातम् । शृणोमि । यशसम् । जनेषु ।
तम् । मे । जगृभ्रे । आऽशसः । नविष्ठम् । दोषा । वस्तोः । हवमानासः । इन्द्रम् ॥ ११ ॥

हे इन्द्र [v]त्वा त्वाम् [v]एकं [v]नु[1] मुख्यमेव [v]जनेषु सर्वेषु मनुष्येषु मध्येऽहं मन्त्रद्रष्टा [v]शृणोमि ऋषिमुख्येभ्यः । कीदृशम् । [v]सत्पतिं सतां पालकं [v]पाञ्चजन्यं पञ्चजनेभ्यो मनुष्येभ्यो हितं [v]जातम् उत्पन्नं [v]यशसं यशोयुक्तम् । [v]दोषा क्षपायां [v]वस्तोः वासरे च [v]हवमानासः स्तुवन्तः [v]आशसः कामानां शंसमानाः [v]मे मदीयाः प्रजाः[2] [v]नविष्ठम् अतिशयेन स्तुत्यं [v]तम् [v]इन्द्रं [v]जगृभ्रे गृह्णन्तु स्वीकुर्वन्तु ॥

एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं शृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र ॥ १२ ॥

एव । हि । त्वाम् । ऋतुऽथा । यातयन्तम् । मघा । विप्रेभ्यः । ददतम् । शृणोमि ।
किम् । ते । ब्रह्माणः । गृहते । सखायः । ये । त्वाऽया । निऽदधुः । कामम् । इन्द्र ॥ १२ ॥

[v]एव एवमुक्तप्रकारेण [v]हि [v]ऋतुथा कालेकाले [v]यातयन्तं जन्तून् प्रेरयन्तं हे इन्द्र [v]त्वां[3] [v]विप्रेभ्यः स्तोतृभ्यः [v]मघा मघानि धनानि [v]ददतं यच्छन्तं [v]शृणोमि निशामयामि । एतन्मृषैव प्रतिभाति । हे [v]इन्द्र [v]त्वाया त्वयि [v]ये स्तोतारः [v]कामं स्वकीयाभिलाषं [v]निदधुः न्यक्षिपन् [v]ब्रह्माणः बृहन्तः [v]ते त्वदीयाः [v]सखायः स्तोतारः [v]किं [v]गृहते त्वत्तः किं गृह्णते । ऋषिः स्वकीयाभिलाषप्राप्तिविलम्बनादेवमुक्तवानित्यर्थः ॥ ॥ ३३ ॥ ॥ २ ॥

वेदार्थस्य[4] प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः[5] ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके प्रथमोऽध्यायः समाप्तः ॥

१ श–'नु' नास्ति । २. ख-च-ण-भ-प्रजानाः; झ-र-प्रजनाः; न-जनाः । ३. ख-च-झ-ण-त-न-भ-र-श-त्वा त्वाम् । ४. ख-ग-घ-च-ज-ण-प-फ-ब-'वेदार्थस्य ... 'महेश्वरः' नास्ति ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
चतुर्थे प्रथमाध्यायं व्याख्याय व्याकृतिक्षमः ।
सुधीः श्रीसायणाचार्यो द्वितीयं व्याचिकीर्षति ॥

तत्रात्रेः पञ्चमे मण्डले तृतीयेऽनुवाके द्वादश सूक्तानि । तत्र ' महि महे ' इति दशर्चं प्रथमं सूक्तम् । प्रजापतिपुत्रः संवरणाख्यः[1] ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । तथा चानुक्रान्तं— ' महि दश प्राजापत्यः संवरणः ' । विनियोगो लैङ्गिकः ॥

महिं महे तवसे दीध्ये नृनिन्द्रायेत्था तवसे अतव्यान् ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥ १ ॥

महि । महे । तवसे । दीध्ये । नृन् । इन्द्राय । इत्था । तवसे । अतव्यान् ।
यः । अस्मै । सुऽमतिम् । वाजऽसातौ । स्तुतः । जने । सुऽमर्यः । चिकेत ॥ १ ॥

अहं संवरणः [v]अतव्यान् अत्यन्तमिव दुर्बलः सन् [v]महि महत् प्रभूतं स्तोत्रं [v]महे महते [1]तवसे बलवते [v]इन्द्राय [v]इत्था इत्थं वक्ष्यमाणप्रकारेण [v]दीध्ये दीपयामि प्रकाशयामि । किमर्थम् । [1]नृन् । षष्ठ्यर्थे द्वितीया । मनुष्याणामस्मदीयानां [1]तवसे बलाय । यद्वा । नृनस्मद्विरोधिनामभिभवायेति शेषः । तदर्थं तवसेऽस्मद्बलाय । [1]यः[2] इन्द्रः [v]अस्मै [1]जने जनाय संवरणाय [v]वाजसातौ संग्रामे वाजस्य अन्नस्य वा लाभे निमित्ते सति [1]स्तुतः सन् [1]सुमतिं [v]समर्यः मर्त्यैः स्तोतृभिः सहितो यद्वा सह म्रियमाणैर्युध्यमानैर्मरुदादिभिरथवा समराहः [v]चिकेत जानाति ॥

स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः ।
या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः ससृक्षि जनान् ॥ २ ॥

सः । त्वम् । नः । इन्द्र । धियसानः । अर्कैः । हरीणाम् । वृषन् । योक्त्रम् । अश्रेः ।
याः । इत्था । मघऽवन् । अनु । जोषम् । वक्षः । अभि । प्र । अर्यः । ससृक्षि । जनान् ॥ २ ॥

हे [v]वृषन् वर्षक [v]इन्द्र [v]सः प्रसिद्धः [v]त्वं [v]नः अस्मान् [v]धियसानः ध्यायन् [1]अर्कैः अर्चनसाधनैः स्तोत्रैर्निमित्तभूतैः [v]हरीणां रथे नियोज्यानामश्वानां [v]योक्त्रं नियोजनरज्जुम् [v]अश्रेः आश्रयसि । [v]याः ॥ लिङ्व्यत्ययः ॥ यानर्कान् हे [v]मघवन् [v]इत्था इत्थं [v]जोषं प्रीतिम् [v]अनु [v]वक्षः अवहः तैर्निमित्तैर्योक्त्रमश्रेरिति । तथा कृत्वा [v]अर्यः अस्मदरीन् [v]जनान् [1]अभि आभिमुख्येन [v]प्र प्रकृष्टं [v]ससृक्षि पराभव ॥

१. ग-घ-ज-प-फ-ब-संवरणः । २. ख-च-ण-न-भ-सः ।

न ते त इन्द्राभ्यस्मदृष्वायुक्तासो अब्रह्मता यदसन् ।
तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥ ३ ॥

न । ते । ते । इन्द्र । अभि । अस्मत् । ऋष्व । अयुक्तासः । अब्रह्मता । यत् । असन् ।
तिष्ठ । रथम् । अधि । तम् । वज्रऽहस्त । आ । रश्मिम् । देव । यमसे । सुऽअश्वः ॥ ३ ॥

हे [v]ऋष्व महन् [v]इन्द्र[2] [v]यत्[2] ये [v]अस्मत् अस्मत्तः त्वद्भक्तेभ्योऽन्ये [v]अयुक्तासः त्वया असंयुक्ताः[3] [v]असन् आसन् अभवन् [v]अब्रह्मता । ब्रह्म परिवृढं कर्म । तद्रहितत्वात् [v]ते नराः [v]ते त्वदीयाः [v]न भवन्ति । अतः अस्मद्यज्ञम्[4] [v]अभि आगन्तुं [v]तं प्रसिद्धं [v]रथमधि [v]तिष्ठ । हे [v]वज्रहस्त इन्द्र [v]देव [v]स्वश्वः त्वं यं रथमारोढुं [v]रश्मिं प्रग्रहम् [v]आ [v]यमसे नियमयसि तमधि तिष्ठ ॥

पुरू यत्ते इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन् ।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित् ॥ ४ ॥

पुरु । यत् । ते । इन्द्र । सन्ति । उक्था । गवे । चकर्थ । उर्वरासु । युध्यन् ।
ततक्षे । सूर्याय । चित् । ओकसि । स्वे । वृषा । समत्ऽसु । दासस्य । नाम । चित् ॥ ४ ॥

हे [v]इन्द्र [v]ते तव [v]यत् यदा स्वभूतानि [v]पुरू पुरूणि बहूनि । [v]उक्था उक्थानि शस्त्राणि [v]सन्ति तदा[2] [v]उर्वरासु सस्योपेतासु भूमिषु निमित्तभूतासु [v]गवे वृष्टयुदकाय [v]युध्यन् जलप्रतिबन्धकान् संहरन् [v]चकर्थ करोषि भेदनम् । कुत्रेति । [v]सूर्याय सूर्यस्य [v]स्वे स्वकीये [v]ओकसि स्थाने । [v]वृषा वर्षिता सन् [v]ततक्षे संपादयसि । [v]समत्सु संग्रामेषु [v]दासस्य वृष्टिप्रतिबन्धकर्तुरेतन्नामकस्य असुरस्य [v]नाम [v]चित् नामापि ततक्षे नाशयसीत्यर्थः[6] ॥

वयं ते त इन्द्र ये च नरः शर्धो जज्ञाना यातास्त्र रथाः ।
आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥ ५ ॥

वयम् । ते । ते । इन्द्र । ये । च । नरः । शर्धः । जज्ञानाः । याताः । च । रथाः ।
आ । अस्मान् । जगम्यात् । अहिऽशुष्म । सत्वा । भगः । न । हव्यः । प्रऽभृथेषु । चारुः ॥५॥

हे [v]इन्द्र [v]ये [v]च [v]नरः कर्मणां नेतार ऋत्विग्यजमाना [v]वयं स्मः [v]ते वयं [v]ते त्वदीयाः । कीदृशा वयम् । [v]शर्धः बलं [v]जज्ञानाः उत्पादयन्तः स्तुतिभिः [v]याताश्च होतुं त्वां प्राप्ताश्च [v]रथाः

१. ख-ज्ञ-त-न-भ-र-श–हे इन्द्र । २. श–यत् । सुपो लोपः । ३. ख-च-ण– अयुक्ताः । ४. ख-च-ज्ञ-ण-त-भ-र–यद्यज्ञम्; न–यज्ञम् । ५. ख-च-ज्ञ-ण-न-भ-र-श–'तदा' नास्ति । ६. ख-च-ज्ञ-ण-भ–वयसीत्यर्थः; न-र–वशयसीत्यर्थः; श–नाशयतीत्यर्थः ।

रंहणशीलाश्च । किंच हे ᵛअहिशुष्म । अहिरयनात् । सर्वतो व्याप्तबलेन्द्र त्वदनुग्रहात् ᵛहव्यः स्तुत्यः प्रतिभटैराह्वातव्यो वा ᵛचारुः संगन्ता[१] ᵛसत्वा भृत्यादिः ᵛप्रभृथेषु संग्रामेषु यज्ञेषु वा ᵛअस्मान् ᵛआ ᵛजगम्यात् आगच्छेत् । ᵛभगो ᵛन भग इव हव्यश्चारुः । भगदेवो यथास्मत्सहाय आगच्छति तथा भृत्यादिरागच्छेदित्यर्थः ॥ ॥ १ ॥

पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः ।
स न एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम् ॥ ६ ॥

पपृक्षेण्यम् । इन्द्र । त्वे इति । हि । ओजः । नृम्णानि । च । नृतमानः । अमर्तः ।
सः । नः । एनीम् । वसवानः । रयिम् । दाः । प्र । अर्यः । स्तुषे । तुविऽमघस्य । दानम् ॥६॥

हे ᵛइन्द्र ᵛपपृक्षेण्यं संपर्कार्हं पूज्यं वा ᵛओजः बलं ᵛत्वे ᵛहि त्वयि खलु । त्वदधीनमित्यर्थः । ᵛनृतमानः नृत्यन् ᵛअमर्तः अमरणधर्मा ᵛसः त्वं ᵛवसवानः आच्छादयन् स्वतेजसा जगत् ᵛनृम्णानि नृमणानि द्रविणानि । वक्ष्यमाणस्यापेक्षया चशब्दः । ᵛएनीम् एतवर्णां श्वेतवर्णां ᵛरयिं धनं ᵛदाः देहि । अहं च ᵛअर्यः ईश्वरस्य ᵛतुविमघस्य प्रभूतधनस्य च ᵛदानं ᵛप्र ᵛस्तुषे स्तौमि ॥

एवा न इन्द्रोतिभिरव पाहि गृणतः शूर कारून् ।
उत त्वचं ददतो वाजसातौ पिप्रीहि मघवः सुषुतस्य चारोः ॥ ७ ॥

एव । नः । इन्द्र । ऊतिऽभिः । अव । पाहि । गृणतः । शूर । कारून् ।
उत । त्वचम् । ददतः । वाजऽसातौ । पिप्रीहि । मघवः । सुऽसुतस्य । चारोः ॥ ७ ॥

हे ᵛशूर ᵛइन्द्र ᵛएव एवं ᵛनः अस्मान् ᵛगृणतः स्तुवतः ᵛकारून् कर्तृनृत्विजः ᵛऊतिभिः रक्षणैः ᵛअव[२] पालय । ᵛउत अपि च ᵛवाजसातौ संग्रामे ᵛत्वचम् आच्छादकं रूपं ᵛददतः प्रयच्छतः ᵛसुषुतस्य सुष्ठभिषुतस्य ᵛचारोः मनोहरस्य ᵛमघवः सोमस्य ᵛपिप्रीहि प्रीणयात्मानम् । द्वितीयार्थे षष्ठी । उक्तलक्षणं[३] सोमं पिबेत्यर्थः । अथवा तृतीयार्थे षष्ठी । उक्तलक्षणेन सोमपानेन प्रीणय ॥

उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरण्यो रराणाः ।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥ ८ ॥

उत । त्ये । मा । पौरुऽकुत्स्यस्य । सूरेः । त्रसदस्योः । हिरण्यनः । रराणाः ।
वहन्तु । मा । दश । श्येतासः । अस्य । गैरिऽक्षितस्य । क्रतुऽभिः । नु । सश्चे ॥ ८ ॥

---

१. ख-च-ञ-ण-न-भ-गन्ता; ग-घ-ज-संगतो; र-श-संगता । २. ग-घ-ज-प-फ-ब-अव पाहि ।
३. ख-च-ञ-ण-भ-र-सूक्त° ।

त्रसदस्युश्च विदथो ध्वन्यश्चेति त्रयो नृपाः । अश्वान्धनानि गाश्चादुर्ऋषये तद्वदस्यृषिः ॥ [v]उत अपि च [v]त्ये ते [v]मा । चतुर्थ्यर्थे द्वितीया । मह्यमित्यर्थः । [v]रराणाः ॥ रातेर्दानार्थस्य कर्मणि लिटः कानचि रूपम् ॥ दत्ता इत्यर्थः । [v]पौरुकुत्स्यस्य पुरुकुत्सापत्यस्य [v]सूरेः प्रेरकस्य [v]हिरण्यिनः हिरण्यवतः [v]अस्य [v]त्रसदस्योः एतन्नामकस्यः राजर्षेः[v]गौरिक्षितस्य गिरिक्षितगोत्रोत्पन्नस्य [v]श्येतासः शुभ्रवर्णाः [v]दश अश्वाः [v]मा मां [v]वहन्तु प्रापयन्तु । अहं च [v]क्रतुभिः कर्मभी रथनियोजनादिभिर्यज्ञादिभिर्वा [v]नु क्षिप्रं [v]सश्चे गच्छेयम् ॥

उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे चयवतानो ददान आनूकमर्यो वपुषे नार्चत् ॥ ९ ॥

उत । त्ये । मा । मारुतऽअश्वस्य । शोणाः । क्रत्वाऽमघासः । विदथस्य । रातौ ।
सहस्रा । मे । चयवतानः । ददानः । आनूकम् । अर्यः । वपुषे । न । आर्चत् ॥ ९ ॥

[v]उत अपि च [v]त्ये तेऽश्वा वक्ष्यमाणाः [v]मारुताश्वस्य । मरुत्सदृशवेगाश्ववान्मरुताश्वः । तदपत्यस्य [v]विदथस्य[1] एतन्नामकस्य[1] राज्ञः [v]शोणाः शोणवर्णाः [v]क्रत्वामघासः क्रतुना कर्मणा शीघ्रगमनादिलक्षणेन माहनीया अश्वाः[2] [v]रातौ[3] दाने विनियुक्ता मां वहन्तीति शेषः । किंच [v]सहस्रा सहस्राणि अपरिमितानि धनानि [v]अर्यः पूज्यस्य [v]मे । चतुर्थ्यर्थे षष्ठी । पूज्याय मह्यं [v]चयवतानः स्थापयन् [v]ददानः प्रयच्छन् सः [v]आनूकम् आभरणं च [v]वपुषे[4] स्वशरीरालंकाराय [v]आर्चत् प्रायच्छत् । [v]न इति चार्थे ॥

उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपिं ग्मन् ॥ १० ॥

उत । त्ये । मा । ध्वन्यस्य । जुष्टाः । लक्ष्मण्यस्य । सुऽरुचः । यतानाः ।
मह्ना । रायः । सम्ऽवरणस्य । ऋषेः । व्रजम् । न । गावः । प्रऽयताः । अपि । ग्मन् ॥ १० ॥

[v]उत अपि च [v]त्ये ते वक्ष्यमाणाः रायः [v]ध्वन्यस्य ध्वन्यनामकस्य [v]लक्ष्मण्यस्य लक्ष्मणपुत्रस्य राज्ञः संबन्धिनोऽश्वाः [v]जुष्टाः मां[5] प्राप्ताः [v]सुरुचः शोभनदीप्तयः [v]यतानाः वहनाय[6] यतमानाः । [v]रायः[7] [v]मह्ना महत्त्वेन युक्ता रायः [v]प्रयताः दत्ताः सत्यः [v]संवरणस्य [v]ऋषेः [v]अपि [v]ग्मन् अपिगताः प्राप्ताः । मद्गृहमिति शेषः । [v]व्रजं [v]न [v]गावः गोष्ठं गाव इव । यद्वा नेति चार्थे । गावश्च मम व्रजमपिग्मन् । अत्रैन्द्रे सूक्ते ' प्रायेणेन्द्रे मरुतो राज्ञां च दानस्तुतयः ' (अनु. २. २२) इत्युक्तत्वाद्राज्ञां दानस्तुतिरविरुद्धा ॥ ॥ २ ॥

१. त–' विदथस्यैतन्नामकस्य ' नास्ति । २. ग-घ-ज-त-प-फ-ब-श–अश्वाः विदथस्य वेदनसाधनस्य । ३. ख-च-झ-ण-न-भ-र–' रातौ ' नास्ति । ४. ग-घ-ज-प-फ-ब–आभूषे । ५. ग-घ-ज–मा । ६. ख-ग-घ-च-ज-ण-प-फ-ब-श–वहमाना; र–वहमानाय । ७. ग-घ-ज-प-फ-ब–रायो धनानि ।

'अजातशत्रुम्' इति नवर्चं द्वितीयं सूक्तं प्राजापत्यस्य संवरणस्यार्षमैन्द्रम्। नवमी त्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः। 'अजातशत्रुं नव त्रिष्टुबन्तम्' इत्यनुक्रमणिका। विनियोगो लैङ्गिकः॥

अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्मर्मीयते।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुतायं प्रतरं दधातन॥ १॥

अजातऽशत्रुम्। अजरा। स्वःऽवती। अनु। स्वधा। अमिता। दस्मम्। ईयते।
सुनोतन। पचत। ब्रह्मऽवाहसे। पुरुऽस्तुतायं। प्रऽतरम्। दधातन॥ १॥

vअजातशत्रुम्। अनुत्पन्नाः शातयितारो यस्य तम्। vदस्मं शत्रूणामुपक्षपयितारम् vअजरा अक्षीणा vस्वर्वती स्वरणवती vअमिता अपरिमिता vस्वधा अन्नं हविः vअनु vईयते अनुप्राप्नोति। तदर्थं हे ऋत्विजः vसुनोतन अभिषुणुत। vपचत पुरोडाशादिकम्। कर्म। vब्रह्मवाहसे ब्रह्मणः परिवृढस्य स्तोत्रस्य वाहकाय vपुरुष्टुताय बहुभिः स्तुतायेन्द्राय। vप्रतरं प्रकृष्टतरं vदधातन धारयत स्वस्वोचितकर्म॥

आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः।
यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत्॥ २॥

आ। यः। सोमेन। जठरम्। अपिप्रत। अमन्दत। मघऽवा। मध्वः। अन्धसः।
यत्। ईम्। मृगाय। हन्तवे। महाऽवधः। सहस्रऽभृष्टिम्। उशना। वधम्। यमत्॥२॥

vयः vमघवा vसोमेन vजठरं स्वकीयम् vआ सर्वतः vअपिप्रत अपूरयत् vमध्वः मधुररसस्य[1] vअन्धसः सोमस्य[2] पानेन vअमन्दत अतृप्यत। vयत् यदा vईम् अयं vमृगाय एतन्नामकाय असुराय[3] vहन्तवे तं हन्तुं vमहावधः महावज्रः vसहस्रभृष्टिः अपरिमिततेजाः vउशना कामयमानः शत्रुं यद्वोशनसा सह vवधं वज्रं vयमत् उदयच्छत् तदापिप्रत अमन्दत च॥

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अहं।
अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः॥ ३॥

यः। अस्मै। घ्रंसे। उत। वा। यः। ऊधनि। सोमम्। सुनोति। भवति। द्युऽमान्। अहं।
अपऽअप। शक्रः। ततनुष्टिम्। ऊहति। तनूऽशुभ्रम्। मघऽवा। यः। कवऽसखः॥३॥

१. ग-घ-ज-ञ-प-फ-ब-श-मधुरसस्य। २. ग-घ-ज-प-फ-ब-अन्नस्य। ३. ग-घ-ज-प-फ-ब-असुरस्य।

ᵛयः यजमानः ᵛअस्मै इन्द्राय ᵛघंसे । अहर्नामैतत् । गृह्यन्तेऽस्मिन् रसा इति घंसः । तस्मिन् । ᵛउत ᵛवा अथवा ᵛयः यजमानः ᵛऊधनि । उद्धततरं भवत्युन्नद्धमिति वोधो रात्रिः । स्नेहप्रदान-रसाभ्यामूधसि रात्रौ च समत्वाद्रात्रिरप्यूध उच्यते । अहनि रात्रौ च ᵛसोमं ᵛसुनोति सः ᵛभवति ᵛद्युमान् दीप्तिमान् । ᵛअह इनि विनिग्रहार्थीयः । किंच ᵛशक्रः शक्तोऽयमिन्द्रः ᵛततनुष्टिम् । ततं धर्मसंततिं नुदति वृष्टिं कामयते कामानिति ततनुष्टिः । तं ᵛतनूशुभ्रम् । तनूः शुभ्रा शोभनीया अलं-कारादिभिः[१] यस्य तम् । तादृशं स्वपोषकम् अयज्वानम्[२] अपᵛ ᵛऊहतिᵛ । अपरोऽपशब्दः पूरणः । ᵛमघवा धनवान्[४] ᵛयः च ᵛकवासस्वः कुत्सितपुरुषसहायस्तमपोहतीति ॥

यस्यावधीत्पितरं यस्य मातरं यस्य शुक्रो भ्रातरं नात ईषते ।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥ ४ ॥

यस्य । अवधीत् । पितरम् । यस्य । मातरम् । यस्य । शुक्रः । भ्रातरम् । न । अतः । ईषते ।
वेति । इत् । ऊँ इति । अस्य । प्रऽयता । यतम्ऽकरः ।
न । किल्बिषात् । ईषते । वस्वः । आऽकरः ॥ ४ ॥

ᵛशक्रः शक्तोऽयं ᵛयस्य अयज्वनः[५] ᵛपितरं ᵛअवधीत् हतवान् । ᵛयस्य च ᵛमातरम् अवधीत् । ᵛयस्य च ᵛभ्रातरं ᵛअतः अस्मादयज्वनः सकाशात् ᵛन ᵛईषते । न बिभेति न[६] गच्छति[६] वा । किंतु ᵛअस्य ᵛप्रयता प्रदत्तानि[७] हवींषि ᵛवेतीदु कामयत एव । अयज्वानं शिक्षयित्वा नियोजय-तीत्यर्थः । ᵛयतंकरः[८] यमनकर्ता ᵛवस्वः वसुनः धनस्य ᵛआकरः आभिमुख्यकर्ता यः ᵛकिल्बिषात् पित्रादिवधयुक्तात्[९] ᵛन ᵛईषते न चलति न बिभेति वा । इन्द्रस्य अस्मोतॄणां[१०] हतिः 'इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत् अन्तरिक्षे पौलोमान् पृथिव्यां कालकाञ्ज्यानरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छम्' इत्यादिश्रुतिषु प्रसिद्धा ॥

न पञ्चभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन ।
जिनाति वेदमुया हन्ति वा धुनिरा देवयुं भजति गोमति व्रजे ॥ ५ ॥

न । पञ्चऽभिः । दशऽभिः । वष्टि । आऽरभम् । न । असुन्वता । सचते । पुष्यता । चन ।
जिनाति । वा । इत् । अमुया । हन्ति । वा । धुनिः । आ । देवऽयुम् । भजति । गोऽमति । व्रजे ॥५॥

---

१. ख-च-ञ-ण-न-भ-अलंकरणादिभिः; ग-घ-ज-अलंकाराः । २. ख-च-ञ-ण-त-न-भ-र-यज्वानम् । ३. ख-च-ण-भ-आपोहति; ग-घ-ज-प-फ-ब-अपो आपोहति । ४. ख-च-ञ-ण-न-भ-र-'धनवान्' नास्ति । ५. ञ-त-र-यज्वनः । ६. ख-ञ-नेच्छति । ७. ग-घ-ज-श-दत्तानि । ८. त-यतंकरः यमनकरः । ९. ख-च-ञ-ण-त-न-भ-र-पित्रादिधनयुक्तात्; ग-घ-ज-प-फ-ब-पित्रादिवत्; श-पित्रादिना वधयुक्तात् । १०. ख-च-ञ-ण-न-भ-स्तोतॄणाम् ।

अयमिन्द्रः ᵛपञ्चभिर्दशभिः वा सहायैः ᵛआरभम् आरम्भं शत्रुहननायालम्बनं ᵛन ᵛवष्टि साहाय्यं नापेक्षत इत्यर्थः । यद्वा । अमुमिन्द्रं पञ्चभिर्दशभिर्वा यज्ञादन्यैरुपायैः आरभम् आरब्धुमुद्योगं कर्तुं न वष्टि न कामयते । ᵛअसुन्वता अभिषवमकुर्वता सह ᵛपुष्यता ᵛचन बन्ध्वादीनपोषयतापि ᵛन ᵛसचते न संगच्छते । असुन्वन्तम् अभिषवमकुर्वाणम् अयष्टारम् अपुष्णन्तं च न प्राप्नोतीत्यर्थः । न केवलमप्राप्तिमात्रं किंतु ᵛजिनाति ᵛवा । वाशब्दश्चार्थे । जिनाति च । बाधते । ᵛहन् इति पूरणः । ᵛहन्ति ᵛवा ᵛअमुया अमुमयष्टारं ᵛधुनिः कम्पकः शत्रूणाम् । ᵛदेवयुं देवमिन्द्रं कामयमानं यजमानं ᵛगोमति ᵛव्रजे ᵛआ ᵛभजति योजयतीत्यर्थः ॥ ॥ ३ ॥

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः ।
इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥ ६ ॥

विऽत्वक्षणः । सम्ऽऋतौ । चक्रम्ऽआसजः । असुन्वतः । विषुणः । सुन्वतः । वृधः । इन्द्रः । विश्वस्य । दमिता । विऽभीषणः । यथाऽवशम् । नयति । दासम् । आर्यः ॥ ६ ॥

ᵛसमृतौ संग्रामे ᵛवित्वक्षणः विशेषेण तनूकर्ता शत्रूणां तदर्थं ᵛचक्रमासजः रथचक्रस्यासंजयिता ᵛअसुन्वतः अयजमानस्य ᵛविषुणः पराङ्मुखः ᵛसुन्वतः यजमानस्य ᵛवृधः वर्धयिता ᵛइन्द्रः ᵛविश्वस्य ᵛदमिता शिक्षयिता ᵛविभीषणः भयजनकः ᵛआर्यः स्वामी ᵛयथावशं यथेच्छं ᵛदासं दासकर्माणं जनं[१] ᵛनयति स्ववशम् ॥

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥ ७ ॥

सम् । ईम् । पणेः । अजति । भोजनम् । मुषे । वि । दाशुषे । भजति । सूनरम् । वसु । दुःऽगे । चन । ध्रियते । विश्वः । आ । पुरु । जनः । यः । अस्य । तविषीम् । अचुक्रुधत् ॥ ७ ॥

ᵛईम् अयमिन्द्रः ᵛपणेः वणिज[२] इव[२] लुब्धकस्यादातुः ᵛभोजनं धनमन्नं वा ᵛमुषे चोरयितुं ᵛसम् ᵛअजति सम्यक् गच्छति । गत्वा चादाय ᵛदाशुषे हविर्दात्रे यजमानाय ᵛवि ᵛभजति ᵛसूनरं शोभनमनुष्यं ᵛवसु धनम् । अयष्टुर्धनमाकृष्य यष्ट्रे प्रयच्छतीत्यर्थः । न केवलं वणिग्धनप्रदानमात्रं[३] किंतु ᵛपुरु पुरुणि ᵛदुर्गे ᵛचन[४] दुःखेन[४] गन्तव्ये आपद्यपि ᵛविश्वः सर्वोऽपि दातृजनः ᵛआ ᵛध्रियते आस्थाप्यते । ᵛयः ᵛजनः[५] ᵛअस्य इन्द्रस्य ᵛतविषीं बलम् ᵛअचुक्रुधत् विहिताकरणादिना तस्य पणेरजतीति पूर्वशेषः । यद्वा । योऽस्य तविषीमचुक्रुधत् स सर्वोऽपि जनो दुर्गे चनाध्रियत इन्द्रेण ॥ चनेत्येकपदमध्येतृसंप्रदायप्राप्तम् ॥

१. ख-च-झ-ण-न-भ-र–‘ जनं ’ नास्ति । २. ख-च-झ-ण-त-भ-र–वणिजमिव । ३. ख-च-ण–वणिक्प्रदान° । ४. ख-च-झ-ण-न-भ–चन दुःखेन; र–च दुःखेन न । ५. झ-न-भ-र–‘ जनः ’ नास्ति ।

सं यज्जनौ सुधनौ विश्वशर्धसावेवेदिन्द्रो मघवा गोषु शुभ्रिषु ।
युजं ह्यन्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः ॥ ८ ॥

सम् । यत् । जनौ । सुऽधनौ । विश्वऽशर्धसौ । अवेत् । इन्द्रः । मघऽवा । गोषु । शुभ्रिषु ।
युजम् । हि । अन्यम् । अकृत । प्रऽवेपनी । उत् । ईम् । गव्यम् । सृजते । सत्वऽभिः । धुनिः ॥८॥

[v]सम् [v]अवेत् संजानाति [v]यत् यदा [v]जनौ परस्परप्रतिद्वन्द्विनौ [v]सुधनौ शोभनधनौ [v]विश्वशर्धसौ व्याप्तबलौ बहूत्साहौ वा [v]मघवा धनवान् [v]इन्द्रः [v]गोषु [v]शुभ्रिषु शोभनासु गोषु निमित्तभूतासु [v]अन्यं यष्टारं [v]युजं सहायम् [v]अकृत कृतवान् [v]प्रवेपनी शत्रूणां प्रवेपनवान् । [v]ईम् अस्मै [v]गव्यं गोसमूहम् [v]उत् [v]सृजते [v]सत्वभिः मरुद्भिः सह [v]धुनिः मेघानां कम्पयिता । इन्द्रो यजमानम् अयजमानं वा यं जानाति गोनिमित्तं[1] ज्ञात्वा यज्वने गोसमूहं प्रयच्छतीत्यर्थः ॥

सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः ।
तस्मा आपः संयतः पीपयन्त तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥ ९ ॥

सहस्रऽसाम् । आग्निऽवेशिम् । गृणीषे । शत्रिम् । अग्ने । उपऽमाम् । केतुम् । अर्यः ।
तस्मै । आपः । सम्ऽयतः । पीपयन्त । तस्मिन् । क्षत्रम् । अमऽवत् । त्वेषम् । अस्तु ॥९॥

अग्निवेशिसुतं शत्रिमसंख्यातधनप्रदम् । आशास्त ऋषिरन्वर्चा प्रजापतिसुतः सुधीः ॥ [v]अर्यः[2] अहं [v]सहस्रसाम् अपरिमितधनप्रदम् [v]आग्निवेशिम् अग्निवेशिसुतं [v]शत्रिम् एतन्नामकं राजर्षिं [v]गृणीषे गृणे स्तौमि । हे [v]अग्ने अङ्गनादिगुणविशिष्टेन्द्र । कीदृशं तम् । [v]उपमाम् उपमानभूतं [v]केतुं प्रज्ञापकं प्रख्यातमित्यर्थः । [v]तस्मा [v]आपः [v]संयतः सम्यक् गच्छन्त्यः [v]पीपयन्त प्यायन्ताम्[3] । [v]तस्मिन् राज्ञि [v]क्षत्रं धनम्[4] [v]अमवत् बलसहितं[4] [v]त्वेषं दीप्तम् [v]अस्तु इति ॥ ॥ ४ ॥

'यस्ते साधिष्ठः' इत्यष्टर्चं तृतीयं सूक्तम् । अङ्गिरोगोत्रः प्रभूवसुर्नाम ऋषिः । अन्त्या पङ्क्तिः । पङ्क्त्यन्तपरिभाषया शिष्टा अनुष्टुभः । इन्द्रो देवता । 'यस्तेऽष्टौ प्रभूवसुराङ्गिरसः पङ्क्त्यन्तम्' इत्यनुक्रान्तम् । सूक्तविनियोगो लैङ्गिकः । आभिप्लविकेषूक्थ्येषु तृतीयसवने आद्यस्तृचोऽच्छावाकस्य वैकल्पिकोऽनुरूपः । सूत्रितं च—'यस्ते साधिष्ठोऽवसे पुरां भिन्दुर्युवा कविः' (आश्व. श्रौ. ७. ८) इति । द्वितीयतृतीययोः स्वरसाम्नोश्चाद्यौ तृचावनुरूपौ । 'यस्ते साधिष्ठोऽवस इति षळनुष्टुभः' (आश्व. श्रौ. ८. ५) इति हि सूत्रितम् ॥

---

१. ख-च-झ-ण-न-भ-र—नोनिमित्तम् । २. ग-घ-ज-प-फ-ब-अर्यः स्वामी । ३. ग-घ-ज-प-फ-ब—पुष्यन्तु । ४. ग-घ-ज-प-फ-ब—बलममवत् गृहयुक्तम् ।

यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर ।
अस्मभ्यं चर्षणीसहं सास्मिन् वाजेषु दुष्टरम् ॥ १ ॥

यः । ते । साधिष्ठः । अवसे । इन्द्र । क्रतुः । तम् । आ । भर ।
अस्मभ्यम् । चर्षणिऽसहम् । सस्मिन् । वाजेषु । दुस्तरम् ॥ १ ॥

हे [v]इन्द्र [v]ते तव [v]यः [v]साधिष्ठः अतिशयेन साधकः [v]क्रतुः उत्कलक्षणं कर्म प्रज्ञा वास्ति [v]तं क्रतुं नः [v]अवसे अस्मद्रक्षणाय [v]अस्मभ्यम् [v]आ [v]भर आहर । कीदृशं तम् । [v]चर्षणीसहं सर्वेषां मनुष्याणामभिभवितारं [v]सस्मिन् संस्नातं शुद्धं [v]वाजेषु संग्रामेषु [v]दुष्टरम् अन्यैरनभिभाव्यम् ॥

यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः ।
यद्वा पञ्च क्षितीनामवस्तत्सु न आ भर ॥ २ ॥

यत् । इन्द्र । ते । चतस्रः । यत् । शूर । सन्ति । तिस्रः ।
यत् । वा । पञ्च । क्षितीनाम् । अवः । तत् । सु । नः । आ । भर ॥ २ ॥

हे [v]इन्द्र [v]ते तव [v]यत् या ऊतयः [v]चतस्रः[1] चतुर्षु[2] वर्णेषु संश्रिताः [v]सन्ति [v]यत्[3] याश्च हे [v]शूर [v]तिस्रः त्रिषु लोकेषु वर्तमानाः [v]यद्वा[4] । वाशब्दश्चार्थे । यत् याश्च [v]पञ्च [v]क्षितीनां पञ्चजनसंबन्धिन्य ऊतयः सन्ति [v]तत्[5] सर्वम्[6] [v]अवः रक्षणं[7] [v]सु सुष्ठु [v]नः अस्मभ्यम् [v]आ [v]भर आहरेति ॥

आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे ।
वृषजूतिर्हि जज्ञिष आभूभिरिन्द्र तुर्वणिः ॥ ३ ॥

आ । ते । अवः । वरेण्यम् । वृषन्ऽतमस्य । हूमहे ।
वृषऽजूतिः । हि । जज्ञिषे । आऽभूभिः । इन्द्र । तुर्वणिः ॥ ३ ॥

हे [v]इन्द्र [v]वृषन्तमस्य फलानां वर्षकतमस्य [v]ते तव [v]अवः रक्षणं गमनं वा [v]वरेण्यं वरणीयम् [v]आ [v]हूमहे आह्वयामः । हे इन्द्र [v]वृषजूतिः वर्षणगमनः [v]तुर्वणिः तूर्णवनिर्हिंसको वा त्वम् [v]आभूभिः सर्वतो भवद्भिर्व्याप्तैर्मरुद्भिः सह अवः[8] [v]हि[9] [v]जज्ञिषे उत्पादयसि खलु । तेऽव आह्वयाम इति । यद्वा । वृषगमनः सन् यस्मात्त्वमागत्य फलं जज्ञिषे तस्मात्तेऽवो हूमह इति ॥

---

१. ख-ङ्ग-चतसृषु; ग-घ-ज-प-फ-ब-रक्षाः चतस्रः चतसृषु; त-र-चतस्रः चतसृषु । २. ख-च-ङ्ग-ण-न-भ-र-'यत्' नास्ति । ३. ख-च-ङ्ग-ण-न-भ-र-श-'यद्वा' नास्ति । ४. ख-च-ङ्ग-ण-न-भ-र-अवो रक्षणं तत्सर्वम् । ५. ख-च-ङ्ग-ण-न-भ-र-याहि ।

वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः ।
स्वक्षत्रं ते धृषन्मनः सत्राहमिन्द्र पौंस्यम् ॥ ४ ॥

वृषा । हि । असि । राधसे । जज्ञिषे । वृष्णि । ते । शवः ।
स्वऽक्षत्रम् । ते । धृषत् । मनः । सत्राऽहम् । इन्द्र । पौंस्यम् ॥ ४ ॥

हे [v]इन्द्र [v]राधसे यजमानानां समृद्धये [v]वृषा [v]ह्यसि फलस्य वर्षकोऽसि खलु । यद्वा । वृषा खल्वसि । राधसे धनार्थं [v]जज्ञिषे उत्पद्यसे[1] । [v]ते [v]शवः बलं [v]वृष्णि वर्षितृ । [v]ते [v]मनः [v]स्वक्षत्रं स्वायत्तबलं [v]धृषत् धर्षकं विरोधिनाम् । हे इन्द्र ते [v]पौंस्यं पुंस्त्वं [v]सत्राहं संघहन्तृ ॥

त्वं तमिन्द्र मर्त्यमभित्रयन्तमद्रिवः ।
सुवर्यथा शतक्रतो नि याहि शवसस्पते ॥ ५ ॥

त्वम् । तम् । इन्द्र । मर्त्यम् । अभित्रऽयन्तम् । अद्रिऽवः ।
सुवऽर्यथा । शतक्रतो इति शतऽक्रतो । नि । याहि । शवसः । पते ॥ ५ ॥

हे [v]इन्द्र [v]त्वं [v]तम् [v]अभित्रयन्तं शत्रुत्वमाचरन्तं शत्रुं वेच्छन्तं [v]मर्त्यं हे [v]अद्रिवः वज्रवन्निन्द्र [v]सुवर्यथा सुवर्त्र व्याप्तेन रथेन ॥ 'सुपां सुलुक्' इत्याकारः ॥ हे [v]शतक्रतो हे [v]शवसस्पते बलस्य पालक [v]नि [v]याहि नितरां गच्छाभिभवितुम् ॥ ॥ ५ ॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः ।
उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये ॥ ६ ॥

त्वाम् । इत् । वृत्रहन्ऽतम । जनासः । वृक्तऽबर्हिषः ।
उग्रम् । पूर्वीषु । पूर्व्यम् । हवन्ते । वाजऽसातये ॥ ६ ॥

हे [v]वृत्रहन्तम अतिशयेन शत्रूणां[2] हन्तरिन्द्र [v]त्वामित् त्वामेव [v]जनासः जनाः [v]वृक्तबर्हिषः आच्छादितदर्भाः । प्रवृत्तयज्ञा इत्यर्थः । [v]उग्रम् उद्गूर्णबलं [v]पूर्वीषु बह्वीषु प्रजासु मध्ये [v]पूर्व्यं पुरातनं सन्तं [v]वाजसातये संग्रामाय [v]हवन्ते आह्वयन्ते ॥

अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु ।
सुयावानं धनेधने वाजयन्तमवा रथम् ॥ ७ ॥

अस्माकम् । इन्द्र । दुस्तरम् । पुरःऽयावानम् । आजिषु ।
सुऽयावानम् । धनेऽधने । वाजऽयन्तम् । अव । रथम् ॥ ७ ॥

---

१. ख-च-झ-ण-त-न-भ-र-वृद्ध उत्पद्यसे । २. ग-घ-ज-वृत्राणाम् ।

हे [v]इन्द्र [v]अस्माकं [v]रथं रंहणस्वभावं वा पुत्रम् [v]अव रक्ष । कीदृशं रथम् । [v]दुष्टरं दुःखेन तरणीयम् [v]आजिषु संग्रामेषु [v]पुरोयावानं पुरतो मिश्रयितारं [v]मयावानम् अनुचरैः सह गन्तारं [v]धनेधने सर्वेषु धनेषु [v]वाजयन्तं संग्रामं धनं वेच्छन्तम् ॥

अस्माकमिन्द्रेहि नो रथमवा पुरंध्या ।
वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ॥ ८ ॥

अस्माकम् । इन्द्र । आ । इहि । नः । रथम् । अव । पुरम्ऽध्या ।
वयम् । शविष्ठ । वार्यम् । दिवि । श्रवः । दधीमहि । दिवि । स्तोमम् । मनामहे ॥ ८ ॥

हे [v]इन्द्र [v]अस्माकम् अस्मदीय एव मन् [v]एहि आगच्छ । आगत्य च [v]पुरंध्या शोभनबुद्ध्या [v]नः अस्माकं [v]रथम् [v]अव रक्ष । [v]वयं च हे [v]शविष्ठ अतिशयेन बलवन् त्वदनुग्रहात [v]वार्यं वरणीयं [v]श्रवः अन्नं कीर्तिं वा [v]दिवि द्योतमाने त्वयि [v]दधीमहि स्थापयामः । तथा [v]दिवि त्वयि [v]स्तोमं स्तोत्रं [v]मनामहे करवामहे इत्यर्थः ॥ ॥ ६ ॥

'स आ गमत्' इति षड्र्चं चतुर्थं सूक्तम् । आङ्गिरसः प्रभूवसुर्ऋषिः । तृतीया जगती शिष्टा अनुक्तत्वात् त्रिष्टुभः । इन्द्रो देवता । अनुक्रान्तं च—'स आ गमत् षट् तृतीया जगती' इति ॥ विनियोगो लैङ्गिकः ॥

स आ गमदिन्द्रो यो वसूनां चिकेतदातुं दामनो रयीणाम् ।
धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम् ॥ १ ॥

सः । आ । गमत् । इन्द्रः । यः । वसूनाम् । चिकेतत् । दातुम् । दामनः । रयीणाम् ।
धन्वऽचरः । न । वंसगः । तृषाणः । चकमानः । पिबतु । दुग्धम् । अंशुम् ॥ १ ॥

[v]सः [v]इन्द्रः अस्मद्यज्ञं प्रति [v]आ [v]गमत् आगच्छतु । [v]यः देवः [v]वसूनां धनानाम् ॥ कर्मणि षष्ठी ॥ वसूनि धनानि [v]चिकेतत जानाति प्रदातुम् । स कीदृशः । [v]दामनः दाता दानमना वा [v]रयीणां धनानाम् । गमने दृष्टान्तः । [v]धन्वचरो [v]न धनुषा सह संचरन् धानुष्क इव [v]वंसगः वननीयगमनः [v]तृषाणः अत्यन्तं तृषितः [v]चकमानः कामयमानश्च सन् [v]दुग्धम अभिषुतम् [v]अंशुं सोमं [v]पिबतु ॥

आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ।
अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे ॥ २ ॥

आ । ते । हनू इति । हरिऽवः । शूर । शिप्रे इति । रुहत् । सोमः । न । पर्वतस्य । पृष्ठे ।
अनु । त्वा । राजन् । अर्वतः । न । हिन्वन् । गीःऽभिः । मदेम । पुरुऽहूत । विश्वे ॥ २ ॥

हे इन्द्र हे ᵛहरिवः हरिभ्यां तद्वन् ᵛशूर ᵛते तव ᵛहन् हननसाधने । यद्यप्ययं शिप्रावचनः तथापि पुनः शिप्राभिधानात् गौणोऽवगन्तव्यः । उक्तरूपे संहते वा ᵛशिप्रे ᵛआ ᵛरुहत् आरोहतु प्राप्नोतु ᵛसोमः अस्मदीयः । ᵛपर्वतस्य ᵛपृष्ठे ᵛन रुहत् नारोहति । तत्र न तिष्ठतीत्यर्थः । यद्वा । नशब्दः पुरस्तात्प्रयुक्तोऽप्यत्रोपमार्थः । पर्वतस्य पृष्ठे उपरिप्रदेशे सोमो न । तत्र यथा विस्रम्भेण प्रसरति तद्वत् । हे ᵛराजन् राजमानेन्द्र ᵛत्वा त्वाम् ᵛअनु त्वया सह ॥ 'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वम् ॥ ᵛविश्वे वयम् ᵛअवंतो ᵛन अश्वानिव तृणादिभिः ᵛगीर्भिः स्तुतिभिः ᵛहिन्वन् हिन्वन्तः त्वां प्रीणयन्तः सन्तः ᵛमदेम हृष्येम । हे ᵛपुरुहूत बहुप्रकारं बहुभिर्वाहूतेन्द्र ॥

चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः ।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥ ३ ॥

चक्रम् । न । वृत्तम् । पुरुऽहूत । वेपते । मनः । भिया । मे । अमतेः । इत् । अद्रिऽवः ।
रथात् । अधि । त्वा । जरिता । सदाऽवृध । कुवित् । नु । स्तोषत् । मघऽवन् । पुरुऽवसुः ॥३॥

हे ᵛपुरुहूत बहुभिराहूत हे ᵛअद्रिवः वज्रवन्निन्द्र ᵛमे ᵛमनः ᵛअमतेरिन् दारिद्र्यादस्तोतुर्वा सकाशात् ᵛभिया भीत्या ᵛवेपते कम्पते । ᵛवृत्तं ᵛचक्रं ᵛन भूमौ वर्तमानं चक्रमिव । यस्मादेवं तस्मात् ᵛरथादधि उपरि स्थितं ᵛत्वा त्वां हे ᵛसदावृध सर्वदा वर्धमान हे ᵛमघवन् इन्द्र ᵛजरिता स्तोता ᵛपुरूवसुः अहमृषिः ᵛकुवित् बहु ᵛनु क्षिप्रं ᵛस्तोषत् स्तोष्यति स्तूयात ॥ अत्र कुविच्छब्दयोगेऽपि आख्यातस्य बहुलग्रहणान्निघातः ॥

एष ग्रावेव जरिता तं इन्द्रेर्यर्ति वाचं बृहदाशुषाणः ।
प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥ ४ ॥

एषः । ग्रावाऽइव । जरिता । ते । इन्द्र । इर्यर्ति । वाचम् । बृहत् । आशुषाणः ।
प्र । सव्येन । मघऽवन् । यंसि । रायः । प्र । दक्षिणित् । हरिऽवः । मा । वि । वेनः ॥ ४ ॥

ᵛएषः ᵛजरिता गरिता स्तोता ᵛग्रावेव अभिषवाश्मेव । स यथा रसं जनयति तद्वत् हे ᵛइन्द्र ᵛते तुभ्यं ᵛवाचं स्तुतिम् ᵛइयर्ति प्रेरयतीत्यर्थः । ᵛबृहत महत् प्रभूतं[१] फलम्[१] ᵛआशुषाणः आशु संभक्ता सन् हे ᵛमघवन् ᵛसव्येन हस्तेन ᵛरायः धनानि ᵛप्र ᵛयंसि प्रयच्छसि । ᵛदक्षिणित् दक्षिणेनापि ᵛप्र यंसीति शेषः । ᵛमा ᵛवि ᵛवेनः विगतकामं मा कार्षीः ॥

१ ख-घ ङ-ण-न-भ-र--प्रभूतबलम् ।

वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् ।
स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥ ५ ॥

वृषा । त्वा । वृषणम् । वर्धतु । द्यौः । वृषा । वृषऽभ्याम् । वहसे । हरिऽभ्याम् ।
सः । नः । वृषा । वृषऽरथः । सुऽशिप्र । वृषऽक्रतो इति वृषऽक्रतो । वृषा । वज्रिन् । भरे । धाः ॥५॥

हे इन्द्र [v]त्वा त्वाम् [v]वृषा वर्षित्री [v]द्यौः द्योतयित्री स्तुतिः ॥ द्योततेर्दीप्यतेर्वा स्तुत्यर्थस्येदं रूपम् ॥ [v]वृषणं कामानां वर्षकं त्वां [v]वर्धतु वर्धयतु । [v]वृषा त्वं [v]वृषभ्यां सेक्तृभ्यां [v]हरिभ्यां [v]वहसे यज्ञं प्रत्युद्वहसे । हे [v]सुशिप्र शोभनहनो [v]वृषक्रतो वर्षणकर्मन् हे [v]वज्रिन् वज्रयुक्तेन्द्र [v]सः त्वं [v]वृषा [v]वृषरथः [1]च[1] सन् [v]नः अस्मान् [v]भरे संग्रामे भरणवति यज्ञे वा [v]धाः धारय ॥

यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥ ६ ॥

यः । रोहितौ । वाजिनौ । वाजिनीऽवान् । त्रिऽभिः । शतैः । सचमानौ । अदिष्ट ।
यूने । सम् । अस्मै । क्षितयः । नमन्ताम् । श्रुतऽरथाय । मरुतः । दुवःऽया ॥ ६ ॥

इयं श्रुतरथस्य राज्ञो दानस्तुतिः । [v]यः राजा [v]वाजिनीवान् अन्नवान् श्रुतरथः [v]रोहितौ रोहितवर्णौ [v]वाजिनौ वेजनवन्तावश्वौ [v]त्रिभिः [v]शतैः गवां धनानां वा उक्तसंख्याभिः [v]सचमानौ संगच्छमानौ [v]अदिष्ट ॥ ददातेः[2] दिशतेर्वा लुङीदं रूपम् ॥ [v]यूने सर्वत्र मिश्रयित्रे नित्यतरुणाय वा [v]अस्मै [v]श्रुतरथाय [v]क्षितयः सर्वाः प्रजाः [v]दुवोया ॥ तृतीयैकवचनस्य याजादेशः ॥ परिचर्यया [v]सं [v]नमन्तां प्रणता भवन्तु । सेवन्तामित्यर्थः । हे [v]मरुतः इति इन्द्रसहायभूतानां मरुतां संबोधनम् ॥ ॥ ७ ॥

'सं भानुना' इति पञ्चर्चं पञ्चमं सूक्तमत्रेरार्षं त्रैष्टुभमैन्द्रम् । 'सं भानुना पञ्चात्रिः' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः ।
तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ॥ १ ॥

सम् । भानुना । यतते । सूर्यस्य । आऽजुह्वानः । घृतऽपृष्ठः । सुऽअञ्चाः ।
तस्मै । अमृध्राः । उषसः । वि । उच्छान् । यः । इन्द्राय । सुनवाम । इति । आह ॥ १ ॥

१. ख-च-ज्ञ-ण-त-न-भ-र-वृषश्च । २. ख-च-ज्ञ-ण-न-भ-र-श- दातेः ।

[v]सूर्यस्य [v]भानुना तेजसा सह [v]आजुह्वानः सर्वत्र हूयमानः ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]घृतपृष्ठः प्रदीप्तज्वालो घृतयुक्तपृष्ठप्रदेशो वा [v]स्वञ्चाः स्वञ्चनोऽग्निः [v]सं [v]यतते सम्यक् प्रयत्नं करोति । उदयकाले ह्यग्नयः प्रज्वाल्यन्ते। तस्मात् कारणात् [v]यः यजमानः [v]इन्द्राय[1] [v]सुनवामेत्याह ब्रूतेऽध्वर्युं प्रति [v]तस्मै यजमानाय [v]अमृध्राः अहिंसिताः [v]उपसः [v]व्युच्छान् व्युच्छन्तु । उदयकालेऽग्निः प्रज्वालितस्तस्मात् सोमयागं कुर्म इति यो ब्रूते तस्य सुदिनानि भवन्तीत्यर्थः ॥

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते ।
ग्रावाणो यस्येषिरं वदन्त्ययंदध्वर्युर्हविषा सिन्धुम् ॥ २ ॥

समिद्धऽअग्निः । वनवत् । स्तीर्णऽबर्हिः । युक्तऽग्रावा । सुतऽसोमः । जराते ।
ग्रावाणः । यस्य । इषिरम् । वदन्ति । अयत् । अध्वर्युः । हविषा । अव । सिन्धुम् ॥ २ ॥

[v]समिद्धाग्निः प्रदीप्ताग्निः [v]स्तीर्णबर्हिः प्रस्तृतदर्भोऽयं यजमानः [v]वनवत् संभजते । [v]युक्तग्रावा नियुक्ताभिषवपाषाणः [v]सुतसोमः अभिषुतसोमः [v]जराते जरति स्तौति । [v]यस्य अध्वर्योः [v]ग्रावाणः अभिषवसाधनाः [v]इषिरम् एषणीयं गमनशीलं वा शब्दं [v]वदन्ति सः [v]अध्वर्युर्हविषा सह [v]अव [v]अयत [v]सिन्धुम् । पन्नेजनीः[2] अवगच्छति ॥

वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीमिषिराम् ।
आस्य श्रवस्याद्रथ आ च घोषात्पुरु सहस्रा परि वर्तयाते ॥ ३ ॥

वधूः । इयम् । पतिम् । इच्छन्ती । एति । यः । ईम् । वहाते । महिषीम् । इषिराम् ।
आ । अस्य । श्रवस्यात् । रथः । आ । च । घोषात् । पुरु । सहस्रा । परि । वर्तयाते ॥ ३ ॥

[v]इयं [v]वधूः इन्द्रस्य पत्नी [v]पतिमिच्छन्ती स्वप्रियं यज्ञगमनाय प्रवृत्तमिच्छन्ती [v]एति अनुगच्छति । [v]यः इन्द्रः [v]ईम् एनां [v]महिषीं [v]वहाते वहति [v]इषिरां गमनवतीम् [v]अस्य इन्द्रस्य [v]रथः [v]आ अर्वागस्मदभिमुखं [v]श्रवस्यात् अन्नमिच्छति[3] । [v]आ [v]च [v]घोषात् आघुष्यति । शब्दयति । [v]पुरु अस्यधिकं [v]सहस्रा सहस्राणि धनानि [v]परि परितः [v]वर्तयाते वर्तयति[4]। प्रापयति । श्रवस्यादा च घुष्यादिति वा ॥

न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम् ।
आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥ ४ ॥

न । सः । राजा । व्यथते । यस्मिन् । इन्द्रः । तीव्रम् । सोमम् । पिबति । गोऽसखायम् ।
आ । सत्वनैः । अजति । हन्ति । वृत्रम् । क्षेति । क्षितीः । सुऽभगः । नाम । पुष्यन् ॥ ४ ॥

---

१. ख-च-ञ-ण-त-न-भ-र-'इन्द्राय' नास्ति । २. ग-घ-ज-प-फ-ब-अवनेजनीः । ३. ख-च-ञ-र-अन्नमिच्छन्तु; न-अन्नमिच्छतु । ४. ख-च-ञ-ण-न-भ-र-वर्तयन्ति प्रापयन्ति; ग-घ-ज-प्रापयति ।

[v]स [v]राजा [v]न [v]व्यथते व्यथितो न भवति । [v]यस्मिन्[1] राजनि तदीये यज्ञे [v]इन्द्रः [v]तोत्रं मदजनकं [v]सोमं [v]पिबति [v]गोसखायम् । विकारे प्रकृतिशब्दः । क्षीरादिमिश्रणवन्तम् ॥ स राजा [v]सत्वनैः सत्वभिरनुचरैः [v]आ सर्वतः [v]अजति गच्छति । [v]हन्ति च [v]वृत्रं पापं वैरिणं वा । [v]क्षेति गच्छति [v]क्षितीः प्रजाः । अथवा क्षितीर्निवासान्निवसते । [v]सुभगः शोभनसुखः [v]नाम नामकं धनमिन्द्रस्य स्तोत्रं वा [v]पुष्यन् पोषयन् ॥

पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति ।
प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत् ॥ ५ ॥

पुष्यात् । क्षेमे । अभि । योगे । भवाति । उभे इति । वृतौ । संयती इति सम्ऽयती । सम् । जयाति । प्रियः । सूर्ये । प्रियः । अग्ना । भवाति । यः । इन्द्राय । सुतऽसोमः । ददाशत् ॥ ५ ॥

[v]पुष्यात् पोषयेत् बन्ध्वादीन् । [v]क्षेमे प्राप्तस्य धनस्य रक्षणे [v]योगे अलब्धस्य प्राप्तौ च [v]अभि [v]भवाति भवति । अभीत्यनर्थको धात्वर्थानुवादी वा । प्रभुर्भवतीत्यर्थः । तथा [v]उभे [v]वृतौ वर्तमाने [v]संयती नियते अहोरात्रे [v]सं [v]जयाति सम्यक् जयति । ते सुखकरे स्यातामित्यर्थः । किंच सः [v]प्रियः भवति [v]सूर्ये तथा [v]अग्ना अग्नौ [v]प्रियः भवति [v]य [v]इन्द्राय [v]सुतसोमो [v]ददाशत सोमं ददाति ॥ ॥ ८ ॥

'उरोष्टे' इति पञ्चर्चं षष्ठं सूक्तमत्रेरार्षमानुष्टुभमैन्द्रम् । 'उरोरानुष्टुभम्' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

उरोष्टे इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥ १ ॥

उरोः । ते । इन्द्र । राधसः । विऽभ्वी । रातिः । शतक्रतो इति शतऽक्रतो ।
अध । नः । विश्वऽचर्षणे । द्युम्ना । सुऽक्षत्र । मंहय ॥ १ ॥

हे [v]इन्द्र [v]शतक्रतो बहुकर्मन् [v]ते तव [v]उरोः प्रभूतस्य [v]राधसः धनस्य [v]रातिः दानं [v]विभ्वी महती । [v]अध अतः कारणात् [v]नः अस्मभ्यं हे [v]विश्वचर्षणे सर्वस्य द्रष्टः [v]सुक्षत्र शोभनधनेन्द्र । क्षत्रमिति धननाम । [v]द्युम्ना द्युम्नानि धनानि [v]मंहय प्रयच्छ ॥

यदीमिन्द्र श्रवाय्यमिषं शविष्ठ दधिषे ।
पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम् ॥ २ ॥

यत् । ईम् । इन्द्र । श्रवाय्यम् । इषम् । शविष्ठ । दधिषे ।
पप्रथे । दीर्घश्रुत्ऽतमम् । हिरण्यऽवर्ण । दुस्तरम् ॥ २ ॥

---

१. ख-च-ण-तस्मिन् ।

हे [v]इन्द्र [v]शविष्ठ अतिशयेन बलवन् [v]यत् [v]इषम् अन्नं [v]श्रवाय्यं श्रवणीयम् [v]ईम् सर्वतः [v]दधिषे धारयसि ददासि वा ॥ इषशब्दो नपुंसकलिङ्गोऽप्यस्ति ॥ हे [v]हिरण्यवर्ण इन्द्र तदन्नं [v]पप्रथे प्रथते । कथम् । [v]दीर्घश्रुत्तमम् अतिदूरश्रवणीयतमम् । सर्वत्र कीर्त्यमित्यर्थः । [v]दुष्टरम् अनभिभाव्यमुत्कृलक्षणं प्रथते ॥

शुष्मासो ये ते अद्रिवो मेहना केतसापः ।
उभा देवाव्भिष्टये दिवश्च ग्मश्च राजथः ॥ ३ ॥

शुष्मासः । ये । ते । अद्रिऽवः । मेहना । केतऽसापः ।
उभा । देवौ । अभिष्टये । दिवः । च । ग्मः । च । राजथः ॥ ३ ॥

हे [v]अद्रिवः वज्रवन्निन्द्र [v]ते त्वदीयाः [v]ये [v]शुष्मासः बलभूता मरुतः सन्ति । कीदृशास्ते । [v]मेहना मंहनीयाः [v]केतसापः प्रज्ञापकं कर्मान्तरिक्षं वा स्पृशन्तः । [1]उभा[2] उभौ [v]देवौ त्वं च मरुत्समूहश्च[2] इत्युभौ युवां [v]दिवश्च द्युलोकात् [v]ग्मश्च भूमेः सकाशात् [1]अभिष्टये अभितो गमनाय [v]राजथः ईशाथे ॥

उता नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन् ।
अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥ ४ ॥

उतो इति । नः । अस्य । कस्य । चित् । दक्षस्य । तव । वृत्रऽहन् ।
अस्मभ्यम् । नृम्णम् । आ । भर । अस्मभ्यम् । नृऽमनस्यसे ॥ ४ ॥

[v]उतो अपि च हे [v]वृत्रहन् इन्द्र [v]नः अस्मभ्यं [v]कस्य [v]चित् अनिर्देश्यस्य [v]दक्षस्य प्रवृद्धस्य दातुर्वा [v]अस्य [v]तव स्वभूतेभ्यः [v]अस्मभ्यम् । पुनःश्रुतिरादरार्था । [v]नृम्णं नृमणं धनम् [v]आ [v]भर आहर । हे इन्द्र यतस्त्वम् [v]अस्मभ्यं [v]नृमणस्यसे धनमिच्छसि ॥

नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो ।
इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥ ५ ॥

नु । ते । आभिः । अभिष्टिऽभिः । तव । शर्मन् । शतक्रतो इति शतऽक्रतो ।
इन्द्र । स्याम । सुऽगोपाः । शूर । स्याम । सुऽगोपाः ॥ ५ ॥

---

१. ख-च-ञ-ण-न-भ-र-'उभा' नास्ति । २. श-मरुद्गणश्च ।

हे [v]शतक्रतो इन्द्र [v]ते तव [v]आभिः [v]अभिष्टिभिः अभिगमनैः [v]नु शीघ्रं समृद्धा भवेमेति शेषः। हे [v]इन्द्र [v]तव [v]शर्मन् शर्मणि सुखे सति [v]सुगोपाः [v]स्याम भवेम। हे [v]शूर तव शर्मणि [v]सुगोपाः शोभनरक्षणाः [v]स्याम भवेम। पुनरुक्तिरादरार्था ॥ ॥ ९ ॥

' यदिन्द्र चित्र ' इति पञ्चर्चं सप्तमं सूक्तमत्रेरार्षमैन्द्रम् । अन्त्या पङ्क्तिः शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः। ' यदिन्द्र पङ्क्त्यन्तम् ' इत्यनुक्रमणिका॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने आश्वस्तृचोऽच्छावाकस्य वैकल्पिकः स्तोत्रियः । सूत्रितं च—' यदिन्द्र चित्र मेहना यस्ते साधिष्ठोऽवसे ' (आश्व. श्रौ. ७. ८) इति ॥

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।
राधस्तनो विदद्वस उभयाहस्त्या भर ॥ १ ॥

यत् । इन्द्र । चित्र । मेहना । अस्ति । त्वाऽदातम् । अद्रिऽवः ।
राधः । तत् । नः । विदद्वसो इति विदत्ऽवसो । उभयाहस्ति । आ । भर ॥ १ ॥

हे [v]चित्र चायनीय हे [v]अद्रिवः वज्रवन् [v]इन्द्र [v]यत् [v]मेहना महनीयं [v]त्वादातं त्वया दातव्यं [v]राधः धनम् [v]अस्ति [v]तत् धनं हे [v]विदद्वसो लब्धधनेन्द्र [v]नः अस्मभ्यम् [v]उभयाहस्ति उभाभ्यां हस्ताभ्याम् [v]आ [v]भर आहर । अत्र 'यदिन्द्र चित्र चायनीय महनीयं धनमस्ति ' (निरु.४.४) इत्यादिनिरुक्तं द्रष्टव्यम् ॥

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावने ॥ २ ॥

यत् । मन्यसे । वरेण्यम् । इन्द्र । द्युक्षम् । तत् । आ । भर ।
विद्याम । तस्य । ते । वयम् । अकूपारस्य । दावने ॥ २ ॥

हे [v]इन्द्र [v]यत् [v]द्युक्षम् अन्नं [v]वरेण्यं वरणीयं [v]मन्यसे [v]तत् द्युक्षम् [v]आ [v]भर अस्मभ्यम्[३] । [v]ते तव संबन्धिनः [v]वयं [v]तस्य तादृशस्योक्तलक्षणस्य [v]अकूपारस्य । अकुत्सितः पारोऽन्तो यस्य तादृशस्य अन्नस्य[४] [v]दावने दाने [v]विद्याम स्याम ॥

वाजपेये अतिरिक्तोक्थ्ये[५] ' यत्ते दिवि ' इत्येषा । सूत्रितं च—' यत्ते दिवि परोक्ष्यं त्वामिच्छवसस्पते ' (आश्व. श्रौ. ७. ९.) इति ॥

१. र–हे इन्द्र हे । २. त-श–' इन्द्र ' नास्ति । ३. ग-घ-च-ज-ण–अस्मभ्यमाभर; श–अस्मभ्यमाभर आहर । ४. ग-घ-ज-प-फ-ब–द्युम्नस्य । ५. त–अतिरिक्तोक्थ्ये ।

यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥ ३ ॥

यत् । ते । दित्सु । प्रऽराध्यम् । मनः । अस्ति । श्रुतम् । बृहत् ।
तेन । दृळ्हा । चित् । अद्रिऽवः । आ । वाजम् । दर्षि । सातये ॥ ३ ॥

हे इन्द्र [v]ते तव [v]यत् [v]दित्सु दानेच्छु [v]प्रराध्यं प्रकर्षेण स्तुत्यं [v]श्रुतं विश्रुतं [v]बृहत् महत् [1]मनः [1]अस्ति [v]तेन मनसा हे [v]अद्रिवः वज्रवन्निन्द्र [1]दृळ्हा [1]चित् दृढमपि [v]वाजम् अन्नम् [v]आ [v]दर्षि आदरयसि [v]सातये अस्मत्संभजनाय लाभाय वा ॥

मंहिष्ठं वो मघोनां राजानं चर्षणीनाम् ।
इन्द्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥ ४ ॥

मंहिष्ठम् । वः । मघोनाम् । राजानम् । चर्षणीनाम् ।
इन्द्रम् । उप । प्रऽशस्तये । पूर्वीभिः । जुजुषे । गिरः ॥ ४ ॥

[v]मघोनां हविर्लक्षणधनवतां [v]वः युष्माकं [1]मंहिष्ठम् अतिशयेन पूज्यं [v]चर्षणीनां मनुष्याणां [v]राजानम् [v]इन्द्रम् [v]उप उपेत्य [v]प्रशस्तये प्रशंसितुं [v]पूर्वीभिः पुरातनीभिर्वाग्भिः [v]गिरः स्तोतारः [v]जुजुषे सेवन्ते ॥

अस्मा इत्काव्यं वचः उक्थमिन्द्राय शंस्यम् ।
तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः ॥ ५ ॥

अस्मै । इत् । काव्यम् । वचः । उक्थम् । इन्द्राय । शंस्यम् ।
तस्मै । ऊँ इति । ब्रह्मऽवाहसे । गिरः । वर्धन्ति । अत्रयः । गिरः । शुम्भन्ति । अत्रयः ॥ ५ ॥

[v]अस्मा [v]इत् अस्मा एव [v]इन्द्राय [v]काव्यं कवेः स्तोतुः संबन्धि । यद्वा । ' कु शब्दे ' । शब्दनीयं [v]वचः वाग्रूपम् [v]उक्थं शस्त्रं [v]शंस्यं शंसनीयम् । यस्मादेवं तस्मात् [v]तस्मा [v]उ तस्मा इन्द्रायैव [v]ब्रह्मवाहसे परिवृढस्य स्तोत्रस्य वाहकाय [v]गिरः स्तुतीः [v]अत्रयः[1] अत्रिगोत्राः [v]वर्धन्ति वर्धयन्ति । [v]अत्रयः [v]गिरः [v]शुम्भन्ति दीपयन्ति । पुनरुक्तिरादरार्था ॥ ॥ १० ॥

' आ याह्यद्रिभिः ' इति नवर्चमष्टमं सूक्तम् । अत्रेयमनुक्रमणिका—' आ याहि नव त्र्युष्णिग्गायत्र्यानुष्टुम्मध्ये च सा सौरी तदादीतिहासः स्तुतिकर्मस्वादत्रिर्देवतैव ' इति । कृत्स्नस्य[2] ' ऋषि-

१. ख-च-झ-ण-न-भ-र-श—' अत्रयः ' नास्ति । २. त—कृत्स्नसूक्तस्य ।

श्रान्यस्मात् ' (अनु. १२.२) इति परिभाषया अत्रिर्ऋषिः। आद्यास्तिस्र उष्णिहः पञ्चमीनवम्यावनुष्टुभौ शिष्टाश्चतस्रस्त्रिष्टुभः। अत्रेः स्तूयमानत्वात् षष्ठ्याद्याः अत्रिदेवताकाः अध्यार्धेयाश्च पञ्चमी सूर्यदेवत्या शिष्टा ऐन्द्र्यः। दशरात्रे तृतीयेऽहनि प्रउगशस्त्रे आद्यस्तृच ऐन्द्रः पञ्चमः। सूत्रितं च—'आ याह्यद्रिभिः सुतं सजूर्विश्वेभिर्देवेभिः' (आश्व. श्रौ. ७. १०) इति। महाव्रतेऽप्यौष्णिहतृचार्शातावयं तृचः॥

आ याह्यद्रिभिः सुतं सोमं सोमपते पिब ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ १ ॥

आ। याहि। अद्रिऽभिः। सुतम्। सोमम्। सोमऽपते। पिब।
वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम ॥ १ ॥

हे ᵛइन्द्र ᵛआ ᵛयाहि अस्मद्यज्ञमागच्छ। आगत्य च हे ᵛसोमपते सोमस्य स्वामिन्निन्द्र ᵛअद्रिभिः ग्रावभिः ᵛसुतं अभिषुतं ᵛसोमं ᵛपिब। हे ᵛवृषन् फलस्य वर्षयितः ᵛवृत्रहन्तम अतिशयेन शत्रूणां हन्तृतम ᵛवृषभिः वर्षकैर्मरुद्भिः सहा याहि पिब च॥

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ २ ॥

वृषा। ग्रावा। वृषा। मदः। वृषा। सोमः। अयम्। सुतः।
वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम ॥ २ ॥

ᵛग्रावा अभिषवसाधनः पाषाणः ᵛवृषा वर्षकः सोमरसस्य फलस्य वा। ᵛमदः सोमपानेन जनितः ᵛवृषा वर्षकः। ᵛअयं ᵛसुतः अभिषुतः ᵛसोमः ᵛवृषा। ते[1] सोमं ᵛवृषभिः सह पिब॥

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ ३ ॥

वृषा। त्वा। वृषणम्। हुवे। वज्रिन्। चित्राभिः। ऊतिऽभिः।
वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम ॥ ३ ॥

हे ᵛवज्रिन् वज्रवन्[2] ᵛइन्द्र ᵛवृषा सोमरसस्य सेक्ताहं ᵛवृषणं त्वां[3] ᵛहुवे आह्वयामि। किमर्थम्। ᵛचित्राभिः चायनीयाभिः ᵛऊतिभिः रक्षाभिर्निमित्तभूताभिः। शिष्टं गतम्॥

' ऋजीषी वज्री ' इत्येषा ब्राह्मणाच्छंसिनः शस्त्रयाज्या[4]। ' ऋजीषी वज्री वृषभस्तुरापाळिति याज्या ' (आश्व. श्रौ. ५. १६) इति हि सूत्रितम्॥

---

१. ग-घ-ज-प-फ-ब—हे वृत्रहन्तम वृषन्निन्द्र तम्। २. ख-ग-घ-च-ज-झ-ण-न-भ-र—' वज्रवन् ' नास्ति। ३. ग-घ-ज-प-फ-ब—त्वा त्वाम्। ४. र-श—शस्त्रे याज्या।

ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिन्द्रः ॥ ४ ॥

ऋजीषी । वज्री । वृषभः । तुराषाट् । शुष्मी । राजा । वृत्रऽहा । सोमऽपावा ।
युक्त्वा । हरिऽभ्याम् । उप । यासत् । अर्वाङ् । माध्यंदिने । सवने । मत्सत् । इन्द्रः ॥ ४ ॥

[v]ऋजीषी । सवनद्वयेऽभिषुतस्य गतसारस्य[1] सोमस्य[1] तृतीयसवने आप्यायाभिषुतः[2] योऽस्ति स ऋजीषः सोमः । सोऽस्यास्तीत्यृजीषी । [v]वज्री वज्रवान् [v]वृषभः वर्षिता [v]तुराषाट् तुराणां त्वरमाणानां शत्रूणां सोढा [v]शुष्मी बलवान् [v]राजा ईश्वरः सर्वस्य [v]वृत्रहा वृत्रस्य हन्ता [v]सोमपावा सोमरसस्य पाता एवं महानुभाव इन्द्रः [v]हरिभ्यां [v]युक्त्वा रथं योजयित्वा [v]उप [v]यासत उप गच्छतु । [v]अर्वाङ् अस्मदभिमुखमागच्छतु । आगत्य[3] च[3] [v]माध्यंदिने [v]सवने [v]मत्सत् माद्यतु सोमेन [v]इन्द्रः ॥

यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः ।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥ ५ ॥

यत् । त्वा । सूर्य । स्वर्भानुः । तमसा । अविध्यत । आसुरः ।
अक्षेत्रऽवित् । यथा । मुग्धः । भुवनानि । अदीधयुः ॥ ५ ॥

इदमादिचतुर्भिर्मन्त्रैः अत्रीणां कर्म कीर्त्यते । हे [v]सूर्य प्रेरक देव [v]त्वा त्वां [v]यत यदा [v]आसुरः असुरस्य प्राणापहर्तुरसुर्या वा पुत्रः [v]स्वर्भानुः स्वर्भानुसंज्ञकः [v]तमसा मायानिर्मितेन [v]अविध्यत आवृणोदित्यर्थः । तदा [v]भुवनानि सर्वाणि [v]अदीधयुः दृश्यन्ते[4] । [v]यथा तत्रत्यः सर्वो जनः [v]अक्षेत्रवित् स्वस्वस्थानमजानन् [v]मुग्धः मूढो भवति तथा ॥ ॥ ११ ॥

स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन् ।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ॥ ६ ॥

स्वःऽभानोः । अध । यत् । इन्द्र । मायाः । अवः । दिवः । वर्तमानाः । अवऽअहन् ।
गूळ्हम् । सूर्यम् । तमसा । अपऽव्रतेन । तुरीयेण । ब्रह्मणा । अविन्दत् । अत्रिः ॥ ६ ॥

[v]अध अथ जगन्मोह्यानन्तरं [v]स्वर्भानोः असुरस्य [v]यत् याः [v]मायाः सन्ति । कीदृश्यस्ताः । [v]दिवः द्योतमानादादित्यात [v]अवः अवस्तात् [v]वर्तमानाः । तदुपरितिरोधानासामर्थ्यादिति[5] भावः ।

---

१. ख-च-ण–गतरसस्य सोमस्य; झ-भ–गतस्य सोमस्य; त–गतसारस्य सोमस्य रसस्य । २. न–आप्यायमानोऽभिषुतः । ३. ग-घ-ज-श–'आगत्य च' नास्ति । ४. ग-घ-ज-प-फ-ब– न दृश्यन्ते । ५. ग-घ-ज-झ-ञ-भ-र-°तिरोधानसामर्थ्यात ; प-फ-व-°तिरोधानादसामर्थ्यात् ।

हे [v]इन्द्र ताः सर्वाः [v]अवाहन् अवहंसि । अथात्रेरेव परोक्षवादः । [v]तमसा अन्धकारेण [v]अपव्रतेन अपगतकर्मणा [v]गूळ्हं [v]सूर्यम् । अन्धकारस्यावरणरूपत्वादपव्रतत्वम् । तथाविधं [v]तुरीयेण [v]ब्रह्मणा 'ब्राह्मणो ब्रह्मा' इत्यनेन [v]अत्रिः [v]अविन्दत् लब्धवान् । आवरणापगमोपायं निरावरणं शुद्धं[1] वा[2] सूर्यमिति । पूर्वमन्त्रापेक्षया[3] अस्य तुरीयत्वम् । एकैकं मायांशमेकैकेन मन्त्रेणापनोद्य चतुर्थेन मन्त्रेण निलीनं तमोऽप्यनुददित्यर्थः ॥

मा मामिमं तव मन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत् ।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥ ७ ॥

मा । माम् । इमम् । तव । सन्तम् । अत्रे । इरस्या । द्रुग्धः । भियसा । नि । गारीत् ।
त्वम् । मित्रः । असि । सत्यऽराधाः । तौ । मा । इह । अवतम् । वरुणः । च । राजा ॥७॥

इदं सूर्यवाक्यम् । हे [v]अत्रे [v]मामिमम्[4] ईदृगवस्थं मां [v]तव[5] [v]सन्तं तव[6] स्वभूतम् [v]इरस्या अन्नेच्छया [v]द्रुग्धः द्रोग्धासुरः [v]भियसा भयजनकेन तमसा [v]मा [v]नि [v]गारीत् मा गिरतु । किंच हे मित्र [v]त्वं [v]मित्रः [v]असि । प्रमीतेः सकाशात् त्राता भवसि । [v]सत्यराधाः सत्यधनश्च । [v]तौ [v]राजा [v]वरुणश्च त्वं च तौ युवां [v]मा माम् [v]इहावतं रक्षतम् । यद्वा । अत्रिरेव मित्र उच्यते । मं[7] च[8] वरुणश्च युवाम् ॥

ब्राह्मणो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन् ।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥ ८ ॥

ब्राह्मणः ब्रह्मा । युयुजानः । सपर्यन् । कीरिणा । देवान् । नमसा । उपऽशिक्षन् ।
अत्रिः । सूर्यस्य । दिवि । चक्षुः । आ । अधात् । स्वर्भानोः । अप । मायाः । अघुक्षत् ॥८॥

[v]ब्रह्मा ब्राह्मणः [v]अत्रिः[9] [v]ब्राह्मणः अभिषवसाधनानि[10] [v]युयुजानः युञ्जन् । इन्द्रार्थं सोममभिषुण्वन्नित्यर्थः । तथा [v]कीरिणा । कीर्यते विक्षिप्यते इति कीरिः स्तोत्रम् । तेन [v]देवान् [v]सपर्यन् पूजयन्[11] किंच [v]नमसा अन्नेन हविर्लक्षणेन नमस्कारेण वा [v]उपशिक्षन् । शिक्षतिर्दानार्थोऽत्र प्रसाधने वर्तते । प्रसाधयन् एवमुक्तैः[12] साधनैः [v]सूर्यस्य सर्वप्रेरकस्य [v]चक्षुः सर्वस्य व्यापकं[13] मण्डलं [v]दिवि अन्तरिक्षे [v]आधात् । निस्तमस्कं कृतवानित्यर्थः । तदेव स्पष्टयति । [v]स्वर्भानोः एतन्नामकस्यासुरस्य [v]मायाः । स्वाश्रयमव्यामोहयन्ती[14] परांस्तु[15] तथा[16] कुर्वती मायेत्युच्यते । तादृशीमायाः । यत्तुरीयेण ब्रह्मणेत्युक्तम् । तदेतदुक्तं तुरीयं ब्रह्म । तेनात्रिमहाय इन्द्रः [v]अप [v]अघुक्षत् अपजुगोप न्यवारयदित्यर्थः । अथवा तृतीयपाद एवं व्याख्येयः । सूर्यस्य दिवि पूर्वमावृते प्रकाशे तदपनोद्य[17] स्वकीयं चक्षुराधात् ।

---

१. ख-च-ण-भ–शुद्धं यत्वा; ज्ञ–शुभं वा । २. ख-च-ज्ञ-ण-भ-र–मन्त्रापेक्षया । ३. ग-घ-ज–मा मामिमं मानवम् । ४. ख-च-ज्ञ-ण-त-न-भ-र-श–'तव' नास्ति । ५. श–'स च' नास्ति । ६. ग-घ-ज–अत्रिर्मामिहावतमित्युपशिक्षन् । ७. ग-घ-ज–अभिषवसाधनान् । ८. ग-घ-ज-प-फ-ब–पूजयन्नमसा नमोक्तैः । ९. ग-घ-ज-प-फ-ब-र–व्यापकम् । १०. ख-च-ज्ञ-ण-त-न-भ-र–स्वाश्रयमव्यामोहन्ती; न–स्वाश्रयममोहयन्ती; श–स्वयमव्यामोहयन्ती । ११. ज्ञ-त-न-म-व-श–परांस्तथा । १२. ख-च-ज्ञ-ण-त-न-भ-र-श–तदपोद्य ।

निरावरणं[1] तेजःसंस्थायं दृष्टवानित्यर्थः। स्वर्भानुमायया सूर्यस्यावृतिर्हारिद्रविके समाम्नाता—'स्वर्भानुश्चासुरः सूर्यं तमसाविध्यत्तस्मै देवाः प्रायश्चित्तमैच्छन्[2] तस्य यत्प्रथमं तमोऽपाघ्नन् सा कृष्णाविरभवत् यद् द्वितीयं सा फाल्गुनी यत्तृतीयं सा वलक्षी यदध्यस्थादपाकृन्तन्' इत्यादि ॥

यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।
अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन् ॥ ९ ॥

यम्। वै। सूर्यम्। स्वर्भानुः। तमसा। अविध्यत्। आसुरः।
अत्रयः। तम्। अनु। अविन्दन्। नहि। अन्ये। अशक्नुवन् ॥ ९ ॥

अत्रिकृतं सामर्थ्यमनुवदति [v]यं [v]वै [v]सूर्यम् इति। निगदव्याख्येषा[3]। [v]अत्रयस्तं सूर्यम् [v]अन्वविन्दन् इन्द्रार्थं सोमयागदेवतास्तुतिनमस्कारैरनुक्रमेणेषदीपन् तमोऽवरुध्य[4] लब्धवन्त इत्यर्थः। [v]अन्ये[5] [v]नहि [v]अशक्नुवन् न लब्धवन्तः खलु[6] ॥ ॥ १२ ॥

'को नु वाम्' इति विंशत्यृचं नवमं सूक्तं भौमस्यात्रेरार्षम्। षोडशीमसदृशावतिजगत्यौ विंश्येकपदा विराट् शिष्टाः ससदश त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रान्तं—'को नु विंशतिर्वैश्वदेवं वै तत् षोळश्यात्यतिजगत्यावन्त्यैकपदा' इति। विनियोगो लैङ्गिकः ॥

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥ १ ॥

कः। नु। वाम्। मित्रावरुणौ। ऋतऽयन्। दिवः। वा। महः। पार्थिवस्य। वा। दे।
ऋतस्य। वा। सदसि। त्रासीथाम्। नः। यज्ञऽयते। वा। पशुऽसः। न। वाजान् ॥ १ ॥

हे [v]मित्रावरुणौ देवौ[7] [v]वां युवां[7] [v]को [v]नु कः खलु यजमानः [v]ऋतायन् यज्ञमिच्छन् शक्नुयादिति[8] शेषः। तस्मात् कृपयैव [v]दिवः सदसि द्युलोकसंबन्धिनि स्थाने[9] [v]महः महतः [v]पार्थिवस्य सदसि[10]। [v]ऋतस्य उत्पादकस्यान्तरिक्षस्य [v]सदसि[10]। तद्धेतुत्वात्तच्छब्दम्। त्रिषु स्थानेषु [v]नः अस्मान् [v]त्रासीथां रक्षतम्। वाशब्दश्चार्थे। किंच [v]यज्ञायते यज्ञमिच्छते[11] [v]दे[12] [v]वा हविर्दात्रे च[13]

१. ख-च-ण-श–निवारणम्। २. ख-च-झ-ण-त-भ-र-श–प्रायश्चित्ति°। ३. ख-च-ण–निगदितं वा व्याख्येषा; ग-घ-ज–यं सूर्यमासुरः स्वर्भानुस्तमसाविध्यदावृणोत् वै खलु; झ-भ-र–निगदितं व्याख्येषा; त–निगदितव्याख्येषा; न–निगदित वा इत्येषा। ४. ग-घ-ज–तमो विरुध्य। ५. ख-च-झ-ण-न-भ-र-श–'अन्ये... खलु' नास्ति। ६. ख-च-ण–देवानां युवाभ्यां ददातुम्; झ-न-भ-र-श–देवौ वां युवाभ्यां दे दातुम् (झ-र–ददातुं)। ७. ख-च-झ-ण-भ–शक्नुवानिति; र–शक्नुवन्निति। ८. ग-घ-ज-प-फ-ब–नास्ये च। ९. ग-घ-ज-प-फ-ब–सदसि च। १०. ग-घ-ज-प-फ-ब–'सदसि' नास्ति। ११. ख-च-झ-ण-न-भ-र–'यज्ञमिच्छते' नास्ति। १२. ख-च-झ-ण-न-भ-र-श–'दे...च' नास्ति।

मह्यं [v]पशुषो [v]न [v]वाजान् पशुषु सीदतो वाजानन्नानि क्षीरदध्यादीनीव । तानि यथा प्रयच्छथः[१] तद्वदवतमिति । यद्वा । नशब्दश्चार्थे । पशुषः पशून्वाजांश्च दत्तमित्यर्थः ॥

ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥ २ ॥

ते । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षाः । मरुतः । जुषन्त ।
नमःऽभिः । वा । ये । दधते । सुऽवृक्तिम् । स्तोमम् । रुद्राय । मीळ्हुषे । सऽजोषाः ॥ २ ॥

[v]ते मित्रादयो देवाः [v]नः अस्माकं [v]सुवृक्तिं [v]स्तोमं शोभनपापादिवर्जनवत्स्तोत्रं [v]नमोभिर्वा[२] हविर्भिश्च[२] [v]जुषन्त सेवन्ताम् । [v]ये [v]दधते धारयन्त्युक्तलक्षणं स्तोत्रम् । देवा द्विविधाः स्तोत्रभाजो हविर्भाजश्च । अत्र स्तोत्रभाज उच्यन्ते । [v]आयुः सततगतिर्वायुरुच्यते । अथ मरुत एव वियुत्य विशेष्यन्ते । [v]रुद्राय [v]मीळ्हुषे ॥ तृतीयार्थे चतुर्थी ॥ रुद्रेण[३] सह [v]सजोषाः सजोषसः सह प्रीयमाणाः । तेषां पुत्रत्वादिति भावः । केचन रुद्राय सजोषा इत्येतत्[४] मित्रादिसर्वदेवताविशेषणमिति कथयन्ति ॥

आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ ।
उत वां दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥ ३ ॥

आ । वाम् । येष्ठा । अश्विना । हुवध्यै । वातस्य । पत्मन् । रथ्यस्य । पुष्टौ ।
उत । वा । दिवः । असुराय । मन्म । प्र । अन्धांसिऽइव । यज्यवे । भरध्वम् ॥ ३ ॥

अनयाश्विनौ रुद्रश्चोच्यन्ते । हे [v]अश्विना अश्विनौ [v]येष्ठा कामानां यन्तृतमौ [v]वां युवां [v]वातस्य [v]पत्मन् । धर्मसाम्याद्धर्मिग्रहणम् । वायुसमानगतेरश्वस्य गमने प्राप्तौ [v]रथ्यस्य रथस्य [v]पुष्टौ च निमित्ते सति [v]हुवध्यै[५] हुवे आह्वयामि आह्वातुं प्रभवामि[६] । अथवा वायुवशुवयोः शीघ्रगमनसाधनरथस्य[७] पोषे च निमित्ते सति । [v]उत [v]वा किंचेत्यर्थः । [v]दिवः द्योतमानाय ॥ चतुर्थ्यर्थे षष्ठी ॥ [v]असुराय प्राणापहर्त्रे रुद्राय । यद्वा । द्युलोकसंबन्धिनेऽसुराय प्राणदात्रे सूर्याय वायवे वा [v]यज्यवे यागसाधकाय [v]मन्म मननीयं स्तोत्रं [v]प्र [v]भरध्वं संपादयत हे ऋत्विजः । [v]अन्धांसीव अन्नानि हविर्लक्षणानि[८] हवींषि स्तोत्रं[९] चेत्यर्थः ॥

---

१. प-फ-ब-प्रयच्छतम् । २. ख-च-ञ-ण-न-भ-र-श- नमोभिर्हविर्भिः । ३. ग-घ-ज-प-फ-ब-सेकेन रुद्रेण । ४. ख-च-ण-इत्यस्मिन्; ञ-त-र-इत्येतस्मिन । ५. ग-घ-ज-प-फ-ब-आहुवध्यै । ६. ख-च-ञ-त-न-भ-र-प्रभवामि वा । ७. ख-च-शीघ्रगमने तत्साधनरथस्य; ञ-त-न-भ-र-श-शीघ्रगमन-तत्साधनरथस्य । ८. ख-ग-घ-च-ज-ञ-ण-न-प-फ-ब-भ-' हविर्लक्षणानि ' नास्ति । ९. ख-व-ण-' स्तोत्रं ' नास्ति ।

प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥ ४ ॥

प्र । सक्षणः । दिव्यः । कण्वऽहोता । त्रितः । दिवः । सऽजोषाः । वातः । अग्निः ।
पूषा । भगः । प्रऽभृथे । विश्वऽभोजाः । आजिम् । न । जग्मुः । आश्वश्वऽतमाः ॥ ४ ॥

अत्र लिङ्गोक्तदेवताः[1] । प्र जग्मुरिति संबन्धः । [v]सक्षणः यज्ञं सेवमानः शत्रूणां सोढा वा [v]दिव्यः दिवि भवः [v]कण्वहोता । कण्वा ऋषयो मेधाविनो वा होतार आह्वातारो यस्य स तथोक्तः । [v]त्रितः त्रिषु क्षित्यादिस्थानेषु तायमानः[2] [v]दिवः सूर्येण सह [v]सजोषाः समानगतिः समानप्रीतिर्वा [v]वातः उक्तलक्षणकः[3] वायुः [v]अग्निः [v]पूषा पोषक एतन्नामा [v]भगः च [v]प्रभृथे प्रभरणवत्यस्मिन्यज्ञे उक्ताः सर्वदेवाः [v]विश्वभोजाः विश्वरक्षकाः कृत्स्नात्तारो वा [v]आश्वश्वतमाः प्रकृष्टगमनाश्ववतां श्रेष्ठाः सन्तः [v]आजिं [v]न संग्राममिव [v]प्र [v]जग्मुः प्रगच्छन्ति ॥

प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ।
सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ॥ ५ ॥

प्र । वः । रयिम् । युक्तऽअश्वम् । भरध्वम् । रायः । एषे । अवसे । दधीत । धीः ।
सुऽशेवः । एवैः । औशिजस्य । होता । ये । वः । एवाः । मरुतः । तुराणाम् ॥ ५ ॥

हे मरुतः [v]वः यूयं [v]रयिं धनं [v]युक्ताश्वम् अश्वसहितमश्वयोग्यं पुत्रं वा [v]प्र [v]भरध्वं संपादयत । [v]रायः धनानि गवाश्वादिलक्षणानि [v]एषे प्राप्तुम् [v]अवसे । अव इत्यन्ननाम । अन्नाय प्राप्तानां धनानां रक्षणाय वा [v]धीः स्तोता [v]दधीत धारयति स्तुतिम् । स च [v]औशिजस्य कक्षीवतः [v]होता ऋत्विः[4] [v]एवैः गन्तव्यैः कामैर्गमनसाधनैरश्वैर्वा [v]सुशेवः । शेवमिति सुखनाम । सुसुखो भवतु । हे [v]मरुतः [v]तुराणां त्वरमाणानां [v]वः युष्माकं [v]ये [v]एवाः कामा अश्वा वा सन्ति तैरिति ॥ ॥ १३ ॥

'प्र वो वायुम्' इति षष्ठी वायव्ये पशौ हविषां याज्या । 'प्र वो वायुं रथयुजं कृणुध्वमुत स्वाभदिते महि' (आश्व. श्रौ. ३. ८) इति सूत्रितम् ॥

प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।
इषुध्यवं ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ॥ ६ ॥

प्र । वः । वायुम् । रथऽयुजम् । कृणुध्वम् । प्र । देवम् । विप्रम् । पनितारम् । अर्कैः ।
इषुध्यवः । ऋतऽसापः । पुरंऽधीः । वस्वीः । नः । अत्र । पत्नीः । आ । धिये । धुरिति धुः ॥ ६ ॥

---

१. च-ज्ञ-ण-त-न-भ-र-लिङ्गोक्ता देवताः । २. ख-च-ज्ञ-ण-भ-नीयमानः । ३. ख-च-ज्ञ-ण-न-उक्तगुणकः । ४. ख-च-ज्ञ-ण-त-न-भ-र-'ऋत्विः' नास्ति ।

हे मदीया ऋत्विजः [v]वः यूयं [v]वायुं[1] देवं[2] [v]रथयुजं यज्ञगमनाय रथसंबद्धं[3] [v]कृणुध्वं कुरुध्वम् । [v]प्र [v]देवं द्योतमानं [v]विप्रं विशेषेण कामानां पूरकं विप्रवत्पूज्यं वा [v]पनितारम् ॥ कर्मणि कर्तृप्रत्ययः ॥ स्तुत्यमित्यर्थः । फलप्रदातारं वा [v]अर्कैः अर्चनसाधनैर्मन्त्रैः [v]प्र कृणुध्वं स्तुत । किंच [v]इषुध्यवः गन्तव्यः [v]ऋतसापः यज्ञस्पृशः [v]पुरंध्रीः पुरंध्र्यः स्त्रीरूपाः[3] रूपवत्यो वा [v]वस्वीः प्रशंस्याः[4] [v]पत्नीः देवपत्न्यः [v]अत्र अस्मिन् यज्ञे [v]नः अस्मदीयाय[5] [v]धिये[6] कर्मणे तन्निष्पत्तये [v]आ [v]धुः आगतवत्यः ॥

उप॑ व॒ एषे॒ वन्द्येभिः॒ शूषैः॒ प्र यह्वी दि॒वश्चि॒तय॑द्भि॒रर्कैः॑ ।
उ॒षासा॒नक्ता॑ वि॒दुषी॑व॒ विश्व॒मा ह॑ वहतो॒ मर्त्या॑य य॒ज्ञम् ॥ ७ ॥

उप॑ । वः॒ । एषे॑ । वन्द्येभिः॑ । शूषैः॑ । प्र । यह्वी इति॑ । दि॒वः । चि॒तय॑त्ऽभिः । अर्कैः॑ ।
उ॒षसा॒नक्ता॑ । वि॒दुषी॑ इ॒वेति॑ वि॒दुषी॑ऽइव । विश्व॑म् । आ । ह॒ । व॒ह॒तः॒ । मर्त्या॑य । य॒ज्ञम् ॥७॥

हे [v]उपासानक्ता अहोरात्राभिमानिदंवते [v]यह्वी महत्यौ [v]वन्द्येभिः वन्दनार्हैरितरैर्देवैः सह [v]दिवः अन्तरिक्षादविशेषेण सर्वप्रदेशात् [v]वः युष्मभ्यम् [v]उप [v]प्र [v]एषे उपप्रापयामि हविः[6] । ईषिः प्रापणकर्मा स्यादुपप्राभिः समन्वितः । [v]शूषैः सुखकरैः [v]चितयद्भिः ज्ञापयद्भिः [v]अर्कैः मन्त्रैः सहोपप्रापयामि । हे उक्तदेवते [v]विश्वं सर्वं कर्तव्यजातं [v]विदुषीइव जानत्याविव [v]मर्त्याय यजमानाय [v]यज्ञम् [v]आ [v]वहतः अभिमुखं प्रापयतः । ह इति पूरणः । यद्वा । शूषैरित्यादीनि तृतीयाबहुवचनान्तानि वन्द्येभिरित्यस्य विशेषणानीति केचिदाहुः ॥

अ॒भि वो॑ अर्चे पोष्यावतो॒ नॄन्वास्तो॒ष्पति॒ त्वष्टा॑रं र॒रा॑णः ।
धन्या॑ स॒जोषा॑ धि॒षणा॒ नमो॑भि॒र्वन॒स्पती॒रोष॑धी॒ राय॒ एषे॑ ॥ ८ ॥

अ॒भि । वः॒ । अ॒र्चे॒ । पो॒ष्याऽव॑तः । नॄन् । वास्तोः॑ । पति॑म् । त्वष्टा॑रम् । र॒रा॑णः ।
धन्या॑ । स॒ऽजोषा॑ः । धि॒षणा॑ । नमः॑ऽभिः । वन॒स्पती॑न् । ओष॑धीः । रा॒यः । एषे॑ ॥ ८ ॥

अहं [v]पोष्यावतः बहुपोष्यजनयुक्तान् [v]नॄन्[7] कर्मनेतॄन्[7] [v]वः युष्मान् [v]अभि [v]अर्चे अभिपूजयामि स्तौमीत्यर्थः । के पुनस्ते यूयम् । उच्यते । [v]वास्तोष्पतिं [v]त्वष्टारं[8] [v]रराणः स्तोत्रादिभिः क्रीडन् हविर्ददद्वा अहम् । [v]धन्या धनकरी [v]सजोषाः इतरदेवैः सह गच्छन्ती प्रीणयन्ती वा [v]धिषणा । वाङ्नामैतत् । वाग्देवता ॥ एता द्वितीयार्थे प्रथमाः ॥ उक्तलक्षणां वाणीं [v]वनस्पतीन् [v]ओषधीः च [v]नमोभिः सह अर्चे इति संबन्धः । किमर्थम् । [v]राय [v]एषे धनानि प्राप्तुम् ॥

१. ग-घ-ज-वायुदेवम् । २. ख-ग-घ-च-ज-झ-ण-श-रथसंबन्धम् । ३. ख-च-झ-ण-भ-स्त्रियाः । ४. त-प्रशस्याः । ५. ख-च-ण-भ-अस्मदीये धिये; ग-घ-ज-अस्मदीयया धिये; झ-ञ-र-श-अस्मदीयधीये । ६. ख-च-झ-ण-त-न-भ-र-श-अर्कं हविः । ७. ख-च-झ-ण-ञ-भ-र-'नॄन कर्मनेतॄन्' नास्ति । ८. झ-ञ-भ-त्वष्टारं च ।

तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्यो यजतः सदा नो वधीन्नः शंसं नर्यो अभिष्टौ ॥ ९ ॥

तुजे । नः । तने । पर्वताः । सन्तु । स्वऽएतवः । ये । वसवः । न । वीराः ।
पनितः । आप्यः । यजतः । सदा । नः । वधीत् । नः । शंसम् । नर्यः । अभिष्टौ ॥ ९ ॥

[v]पर्वताः पर्ववन्तः पूरणवन्तो वा मेघाः [v]तने विस्तृते [v]तुजे दाने । यद्वा । तनेति पुत्रनाम ॥ षष्ठ्यर्थे चतुर्थी ॥ पुत्रस्य दानं इत्यर्थः । अथवा [v]नः तुजे पुत्रे तने तत्पुत्रे च [v]स्वैतवः शोभनगमनाः [v]सन्तु भवन्तु । कीदृशास्ते । [v]ये [v]वसवः जगतो वासयितारः [v]वीराः [v]न वीरा इव । किंच [v]पनितः स्तुतः [v]आप्यः आप्तव्यः सर्वैः [v]यजतः यजनीय आदित्यः [v]सदा सर्वदा [v]नः [v]शंसम् अस्माकं स्तुतिं [v]नर्यः नरेभ्यो हितो देवः [v]अभिष्टौ अभित एषणेऽभिगमने वा सति [v]वर्धात् वर्धयेत् ॥

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥ १० ॥

वृष्णः । अस्तोषि । भूम्यस्य । गर्भम् । त्रितः । नपातम् । अपाम् । सुऽवृक्ति ।
गृणीते । अग्निः । एतरि । न । शूषैः । शोचिःऽकेशः । नि । रिणाति । वना ॥ १० ॥

[v]भूम्यस्य । भूमिः[१] अन्तरिक्षम् । तदर्हस्य । तादृशस्य [v]वृष्णः वर्षकस्य पर्जन्यस्य । अथवा भूम्यो भूमेरेवार्हः तदुचितवृष्टिप्रदानात् । तादृशस्य मेघस्य [v]गर्भं गर्भस्थानीयम् [v]अपां [v]नपातं रक्षकं वैद्युतमग्निं [v]सुवृक्ति । स्तोत्रकर्मैतत् । शोभनपापादिवर्जनवता स्तोत्रेण [v]अस्तोषि स्तुतवानहम् । सः [v]त्रितः तीर्णतमः त्रिषु स्थानेष्वन्येषु त्रिस्वापन्नेषु त्रायमाणः [v]अग्निः[२] [v]एतरि गन्तरि मयि [v]शूषैः सुखकरैः रश्मिभिः [v]न [v]गृणीते न गरणं कुरुते न क्रुध्यतीत्यर्थः । किंतु [v]शोचिष्केशः प्रदीप्तरश्मिः सन् [v]वना वनानि [v]नि [v]रिणाति हिनस्ति दहतीत्यर्थः ॥ ॥ १४ ॥

कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ॥ ११ ॥

कथा । महे । रुद्रियाय । ब्रवाम । कत् । राये । चिकितुषे । भगाय ।
आपः । ओषधीः । उत । नः । अवन्तु । द्यौः । वना । गिरयः । वृक्षऽकेशाः ॥ ११ ॥

वयमत्रयः [v]कथा केन प्रकारेण [v]महे महते [v]रुद्रियाय रुद्रपुत्राय मरुद्गणाय [v]ब्रवाम स्तुतीः । [v]कत् किं च स्तोत्रं [v]राये धनलाभाय [v]चिकितुषे सर्वं जानते [v]भगाय एतन्नामकाय देवाय ब्रवाम ।

१ ख-च-ञ-ण-त-न-भ-र-भूमम् । २. ख-च-ञ-ण-त-न-भ-र-अग्निः किंच भूमोऽग्निः ।

[v]उत अपि च [v]आपः अब्देवताः [v]ओषधीः ओषधयः [v]द्यौः द्युदेवता [v]वना वनानि [v]गिरयो [v]वृक्षकेशाः । वृक्षा एव केशस्थानीया येषां[1] ते । एता उक्ता देवताः [v]नः अस्मान् [v]अवन्तु रक्षन्तु[2] ॥

शृणोतु न ऊर्जा पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥ १२ ॥

शृणोतु । नः । ऊर्जाम् । पतिः । गिरः । सः । नभः । तरीयान् । इषिरः । परिऽज्मा ।
शृण्वन्तु । आपः । पुरः । न । शुभ्राः । परि । स्रुचः । बबृहाणस्य । अद्रेः ॥ १२ ॥

[v]नः अस्माकं [v]गिरः स्तुतीः [v]शृणोतु । कः । [v]ऊर्जा बलानां [v]पतिः वायुः । अथवा ऊर्जामन्नानां पतिः । प्राणोपाधिकस्य वायोः कूरस्थात्तृत्वं प्रसिद्धम् । श्रुतिश्च[3] भवति—'प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत्' (मनु. ५. २८) इति । [v]स [v]नभः नभसि चारी [v]तरीयान् तरितृतमः [v]इषिरः गमनशीलः [v]परिज्मा परितो गन्ता । किंच [v]आपः [v]शृण्वन्तु गिरः । कीदृश्यस्ताः[4] । [v]पुरो [v]न पुराणीव [v]शुभ्राः दीप्ताः [v]बबृहाणस्य वर्धमानस्य [v]अद्रेः मेघस्य वा पर्वतस्य[5] वा [v]परि परितः [v]स्रुचः सरणशीलाः ॥

विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश्चन सुम्वय आ व यन्ति क्षुभा मर्तमनुयतं वधस्नैः ॥ १३ ॥

विद । चित् । नु । महान्तः । ये । वः । एवाः । ब्रवाम । दस्माः । वार्यम् । दधानाः ।
वयः । चन । सुऽम्वयः । आ । अव । यन्ति । क्षुभा । मर्तम् । अनुऽयतम् । वधऽस्नैः ॥ १३ ॥

हे [v]महान्तः मरुतः [v]नु क्षिप्रं यूयं [v]विद जानीथ स्तोत्रम् । हे [v]दस्माः दर्शनीयाः [v]वः युष्मान् [v]ये [v]एवाः गन्तारो युष्मान् भजमानाः [v]वार्यं वरणीयं हविः [v]दधानाः ददाना धारयन्तो वा वयं [v]ब्रवाम स्तुतिम् । यद्वा । ये वो यूयमित्यर्थः । ये यूयमेवाः अस्मद्यज्ञमभिगन्तारस्ते विद । चिदिति पूरणः । [v]वयश्चन आगन्तारश्चैते मरुतः [v]सुम्वयः सुष्ठु भवन्तः प्रवृद्धाः [v]आ अस्मदभिमुखम् [v]अव [v]यन्ति गच्छन्ति । किं कुर्वन्तः । [v]क्षुभा क्षोभकेण सहितं [v]मर्तं मरणधर्माणं वैरिणम् [v]अनुयतम् अभिगतं [v]वधस्नैः आयुधैः परिहरन्तः[6] अव यन्ति[7] ॥

आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषातो अर्णाः ॥ १४ ॥

आ । दैव्यानि । पार्थिवानि । जन्म । अपः । च । अच्छ । सुऽमखाय । वोचम् ।
वर्धन्ताम् । द्यावः । गिरः । चन्द्रऽअग्राः । उदा । वर्धन्ताम् । अभिऽसातः । अर्णाः ॥ १४ ॥

---

१. ख-च-ण- येषु । २. ख-च-ञ-ण-न-भ-र-'रक्षन्तु' नास्ति । ३. ञ-त-भ-र-स्तुतिश्च । ४. ख-च-ण-कीदृशास्ताः; ञ-त-न-भ-र-कीदृशास्ताः । ५. ख-च-ण-पार्थिवस्य । ६. ञ-त-र-श-परिहरन्नावयन्ति; भ-परिहरन्नाभिवयन्ति ।

[v]दैव्यानि देवसंबन्धीनि [v]पार्थिवानि पृथिवीसंबन्धीनि च [v]जन्म जन्मानि [v]अपश्च अपसा [v]अच्छ अभिप्रायुं [v]सुमखाय शोभनयज्ञाय मरुद्गणाय [v]वोचं[१] ब्रवीमि । [v]गिरः स्तुतयः [v]वर्धन्ताम् । [v]द्यावः द्योतमानाः स्वप्रतिपाद्यार्थप्रकाशिन्यः [v]चन्द्राग्राः । आह्लादनं हिरण्यं वाग्रे यासां ताः । तादृश्यः सत्यो वर्धन्ताम् । [v]अर्णाः नद्यश्च [v]अभिपाताः मरुद्भिः संभक्ताः [v]उदा उदकेन [v]वर्धन्तां समृद्धा भवन्तु ॥

पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्तं ऋजुवनिः ॥ १५ ॥

पदेऽपदे । मे । जरिमा । नि । धायि । वरूत्री । वा । शक्रा । या । पायुऽभिः । च ।
सिसक्तु । माता । मही । रसा । नः । स्मत् । सूरिऽभिः । ऋजुऽहस्ता । ऋजुऽवनिः ॥ १५ ॥

[v]जरिमा स्तुतिः [v]मे मदीया [v]पदेपदे तदा तदा भूमौ [v]नि [v]धायि निधीयते स्थाप्यते क्रियत इत्यर्थः । [v]या [v]च [v]शक्रा शक्ता सती [v]पायुभिः रक्षणैः [v]वरूत्री अस्मदुपद्रववारयित्री भवति । वाशब्दश्चार्थे । [v]माता सर्वस्य निर्मात्री [v]मही महती पूज्या [v]रसा सारभूता भूमिः [v]सिषक्तु सेवतां [v]नः अस्माकं स्तुतिम् । अथवा स्तुता नः अस्मान् सिषक्तु । स्मच्छब्दः प्रशस्तवचनः । प्रशस्तैः [v]सूरिभिः । मेधाविभिः स्तोतृभिर्निमित्तैः । तेषां परिचर्यया प्रीतेत्यर्थः । [v]ऋजुहस्ता अस्मदनुकूलहस्ता [v]ऋजुवनिः कल्याणदाना भवतु ॥ ॥ १५ ॥

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ
प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥ १६ ॥

कथा । दाशेम । नमसा । सुऽदानून् । एवऽया । मरुतः ।
अच्छऽउक्तौ । प्रऽश्रवसः । मरुतः । अच्छऽउक्तौ ।
मा । नः । अहिः । बुध्न्यः । रिषे । धात् । अस्माकम् । भूत् । उपमातिऽवनिः ॥ १६ ॥

वयं [v]कथा केन प्रकारेण [v]दाशेम परिचरेम [v]नमसा स्तोत्रेणान्नेन वा [v]सुदानून् शोभनदानान् [v]मरुतः । [v]एवया एवं क्रियमाणप्रकारेण [v]अच्छोक्तौ आभिमुख्येन वचने निमित्ते सति तान् मरुतः कथं परिचरेम । तेषां दुराराध्यत्वादिति[२] भावः । कथम् । [v]प्रश्रवसः प्रकृष्टान्ना भवन्ति । [v]अच्छोक्तौ । अभिगन्तृयुक्तिः स्तुतिर्यस्य तादृशे मयि । यद्वा । प्रश्रवसः प्रकृष्टान्नस्य मम[३] अच्छोक्तौ स्तोत्रनिमित्ते

१. त–अवोचम् । २. ख-च-ञ-ण-न-भ-र–दुराराधत्वादिति; ग-घ-ज–दुराराध्यमिति । ३. ख-च-ञ-ण-त-न-भ-र–ममापि ।

सति ᵛमरुतः कथा केन प्रकारेण दाशेम । पुनरुक्तिरादरार्था । ᵛअहिर्बुध्न्यः देवः ᵛनः अस्मान् ᵛरिषे हिंसकाय ᵛमा ᵛधात् मा स्थापयतु । स देवः ᵛअस्माकं ᵛभूत् भवतु ᵛउपमातिघ्नः शत्रूणां हन्ता ॥

इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ
देवासो वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत ॥ १७ ॥

इति । चित् । नु । प्रऽजायै । पशुऽमत्यै । देवासः । वनते ।
मर्त्यः । वः । आ । देवासः । वनते । मर्त्यः । वः ।
अत्र । शिवाम् । तन्वः । धासिम् । अस्याः । जराम् । चित् । मे । निःऽऋतिः । जग्रसीत ॥ १७ ॥

हे ᵛदेवासः देवाः ᵛवः युष्मान् ᵛइति ᵛचित् इत्थमेव ᵛनु क्षिप्रं ᵛप्रजायै ᵛपशुमत्यै पशुसहितायापत्याय ᵛवनते भजते ᵛमर्त्यः मनुष्यो यजमानः । ᵛआ ᵛदेवासः इति पुनरुक्तिरादरार्था । ᵛअत्र अस्मिन् यज्ञे ᵛशिवां ᵛधासिम् अन्नं ᵛमे मम ᵛअस्याः ᵛतन्वः देवैरनुगृहीतस्य पुत्रस्य करोतु ᵛनिर्ऋतिः देवता । ᵛजरां ᵛचित जरां च ᵛजग्रसीत ग्रसतु ॥

तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥ १८ ॥

ताम् । वः । देवाः । सुऽमतिम् । ऊर्जयन्तीम् । इषम् । अश्याम । वसवः । शसा । गोः ।
सा । नः । सुऽदानुः । मृळयन्ती । देवी । प्रति । द्रवन्ती । सुविताय । गम्याः ॥ १८ ॥

हे ᵛदेवाः हे ᵛवसवः वासयितारः ᵛवः युष्माकं स्वभूतां ᵛतां प्रसिद्धां ᵛसुमतिं शोभनमननसाधनाम्[1] । अन्नेन मतिवृद्धिः 'अन्नमयं हि सोम्य मनः' (छा. उ. ६. ५. ४) इत्यादिषु प्रसिद्धा । ᵛऊर्जयन्तीं बलकरीम् ᵛइषम् एषणसाधनमन्नं क्षीरदध्यादिलक्षणं ᵛशसा स्तुत्या ᵛगोः सकाशात् ᵛअश्याम प्राप्नुयाम । ᵛसा ᵛदेवी ᵛनः अस्मान् ᵛसुविताय सुखाय ᵛप्रति ᵛगम्याः प्रतिगम्यात्[2] अभिगच्छेत् । सा इड्देवता[3] विशेष्यते । ᵛसुदानुः शोभनदाना ᵛमृळयन्ती सुखयन्ती ᵛद्रवन्ती अस्मदभिमुखं गच्छन्ती ॥

---

१. ख-च-ण-भ–शोभनसाधनाम्; ग-घ-ज-शोभनमनसाधनभूताम् । २. ग-घ-ज-श–गम्यात् । ३. न-श–देवता ।

अभि न इळा युथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभुथस्यायोः ॥ १९ ॥

अभि । नः । इळा । यूथस्य । माता । स्मत् । नदीभिः । उर्वशी । वा । गृणातु ।
उर्वशी । वा । बृहत्ऽदिवा । गृणाना । अभिऽऊर्ण्वाना । प्रऽभुथस्य । आयोः ॥ १९ ॥

अभि गृणातु नः अस्मान् इळा भूमिः यूथस्य गोसंघस्य माता निर्मात्री । यद्वा इळा गोरूपधरा मनोः पुत्रीत्याहुः । यद्वा यूथस्य मरुद्गणस्य निर्मात्रीळा माध्यमिकी वाक् । अथवा[1] उर्वशी माध्यमिकी वाक्[2] । नदीभिः गङ्गादिभिः सह गृणातु । स्मच्छब्दः प्रशस्तवचन इत्युक्तम् । प्राशस्त्यं गृणातु । वा अथवा उर्वशी बृहद्दिवा प्रभूतदीप्तिः गृणाना शब्दयन्त्यस्मदीयं कर्म प्रशंसन्ती अभ्यूर्ण्वाना आच्छादयन्ती । कम् । आयोः आयुं मनुष्यं यजमानम् । केन । प्रभुथस्य तेजसो वोदकस्य वा दानेन । ' प्रभुथस्य तेजसो वोदकस्य ' (निरु. ११. ४९) इति निरुक्तम् । अथवा प्रभुथस्य प्रभरणवत आयोर्यज्ञमभ्यूर्ण्वानाच्छादयन्ती ॥

सिषक्तु न ऊर्ज्व्यस्य पुष्टेः ॥ २० ॥

सिसक्तु । नः । ऊर्ज्व्यस्य । पुष्टेः ॥ २० ॥

ऊर्ज्व्यस्य एतन्नामकस्य राज्ञः पुष्टेः पोषकस्य संबन्धिनः नः अस्मान् सिषक्तु सेवताम् । सामर्थ्यादेवसंघ इति गम्यते । अथवोर्वशी मरुद्गणो वा गृह्यते प्रकृतत्वादिति ॥ ॥ १६ ॥

' प्र शंतमा ' इत्यष्टादशर्चं दशमं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभम् । पूर्वसूक्ते ' वै तत् ' इत्युक्तत्वात् इदमपि वैश्वदेवम् । ' तमु ष्टुहि ' इत्येकादशी रुद्रदेवत्या । सप्तदश्येकपदा ' एतयोरुपान्त्यैकपदा ' इत्यनुक्रमिष्यमाणत्वात् । अत्रानुक्रमणिका—' प्र शंतमा द्वयूनैकादशी रौद्री ' इति । विनियोगो लैङ्गिकः ॥

प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पञ्चहोता शृणोत्वतूर्तपन्था असुरो मयोभुः ॥ १ ॥

प्र । शम्ऽतमा । वरुणम् । दीधिती । गीः । मित्रम् । भगम् । अदितिम् । नूनम् । अश्याः ।
पृषत्ऽयोनिः । पञ्चऽहोता । शृणोतु । अतूर्तऽपन्थाः । असुरः । मयःऽभुः ॥ १ ॥

शंतमा[3] अत्यन्तं सुखकरी गीः स्तुतिरूपा वाक् वरुणं मित्रं भगमदितिं च दीधिती दीधित्या कर्मणा हविष्प्रक्षेपणात्मकेन सह नूनम् अवितथं प्र अश्याः प्राप्नोतु[3] । किंच पृषद्योनिः

---

१. ख-च-ञ-ण-त-न-भ-र–' अथवा...वाक् ' नास्ति । २. ग-घ-ज-न-श–प्र शंतमा । ३. ख-च-ण-त-न-भ-र–प्राश्नोतु ।

पृषद्वर्णान्तरिक्षस्थः [v]पञ्चहोता पञ्चविधस्य प्राणापानादिहोमस्य साधको वायुः । यद्वा । पञ्चहोतेति वायोर्नाम । ' वायुः पञ्चहोता स प्राणः ' इति हि श्रुतेः । स च [v]अतूर्तपन्थाः अहिंसितगतिः [v]असुरः प्राणस्य दाता [v]मयोभुः सुखस्यास्पदभूतः । एवमुक्तलक्षणो वायुः [v]शृणोतु स्तोत्रमिति ॥

प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥ २ ॥

प्रति । मे । स्तोमम् । अदितिः । जगृभ्यात् । सूनुम् । न । माता । हृद्यम् । सुऽशेवम् ।
ब्रह्म । प्रियम् । देवऽहितम् । यत् । अस्ति । अहम् । मित्रे । वरुणे । यत् । मयःऽभु ॥ २ ॥

[v]मे मदीयं [v]स्तोमं स्तोत्रम् [v]अदितिः देवता [v]प्रति [v]जगृभ्यात् प्रतिगृह्णातु । [v]सूनुं [v]न [v]माता स्वतनुजं जननीव । सा यथा प्रतिगृह्यालिङ्ग्य परितुष्यति तद्वदित्यर्थः । कीदृशं तम् । [v]हृद्यं हृदयंगमं [v]सुशेवं शोभनसुखकरम् । एतद्द्वयं साधारणम् । किंच [v]ब्रह्म मन्त्रजातं [v]प्रियं प्रियकरं [v]देवहितं देवैः प्राप्यं [v]यदस्ति यद्ब्रह्म [v]मयोभु सुखसाधनं तत् [v]अहं [v]मित्रे [v]वरुणे च प्रापयामीति शेषः । यद्वा । मित्रे वरुणे च अहोरात्राभिमानिदेवयोर्यदुक्तलक्षणं ब्रह्म परिवृढं यज्ञादिरूपं कर्मास्ति तदहं धारयामीति ॥

' उदीरय ' इत्येषैकादशिने सावित्रे पशौ वपायाज्या । सूत्रितं च— ' उदीरय कवितमं कवीनां भगं धियं वाजयन्तः पुरंधिमिति द्वे ' (आश्व. श्रौ. ३. ७) इति ॥

उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥ ३ ॥

उत् । ईरय । कविऽतमम् । कवीनाम् । उनत्त । एनम् । अभि । मध्वा । घृतेन ।
सः । नः । वसूनि । प्रऽयता । हितानि । चन्द्राणि । देवः । सविता । सुवाति ॥ ३ ॥

अनया सविता च स्तूयते । हे ऋत्विजः [v]कवीनां [v]कवितमं क्रान्तदर्शिनम्[1] अमुं पुरोवर्तिनमग्निं सवितारं वा [v]उदीरय ऊर्ध्वं प्रापयत हर्षयतेत्यर्थः । [v]एनं देवं [v]मध्वा मधुरेण सोमरसेन [v]घृतेन च [v]अभि [v]उनत्त अभिषिञ्चत । तर्पयतेत्यर्थः । [v]सः[2] [v]सविता [v]देवः [v]नः अस्मभ्यं [v]वसूनि निवासयोग्यानि गवादिधनानि [v]प्रयता प्रयतानि [v]हितानि [v]चन्द्राणि आह्लादकानि हिरण्यानि [v]सुवाति प्रयच्छत्वित्यर्थः ॥

समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥ ४ ॥

सम् । इन्द्र । नः । मनसा । नेषि । गोभिः । सम् । सूरिऽभिः । हरिऽवः । सम् । स्वस्ति ।
सम् । ब्रह्मणा । देवऽहितम् । यत् । अस्ति । सम् । देवानाम् । सुऽमत्या । यज्ञियानाम् ॥ ४ ॥

१. ख-च-ण-न-भ-र-क्रान्तदर्शिनां क्रान्तदर्शिनम् । २. ख-च-ञ-ण-न-र-' सः ' नास्ति ।

हे [v]इन्द्र [v]नः अस्मान् [v]मनसा प्रकृष्टेन चेतसा [v]गोभिः सह [v]सं[1] [v]नेषि नयसि । अस्मान्[2] गाः प्रापयसीत्यर्थः । एवं सर्वत्र । हे [v]हरिवः हरिभ्यां तद्वन् इन्द्र [v]सूरिभिः मेधाविभिः पुत्रैर्ऋत्विग्भिर्वा [v]सं नेषि । तथा [v]स्वस्ति स्वस्तिभिः[3] क्षेमैः [v]सं नेषि । [v]ब्रह्मणा प्रभूतेनान्नेन [v]सं नेषि । [v]यत् अन्नं [v]देवहितम् [v]अस्ति तेन । किंच [v]यज्ञियानां यज्ञार्हाणां [v]देवानां [v]सुमत्या अनुग्रहबुद्ध्या [v]सं नेषि ॥

देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ॥ ५ ॥

देवः । भगः । सविता । रायः । अंशः । इन्द्रः । वृत्रस्य । सम्ऽजितः । धनानाम् ।
ऋभुक्षाः । वाजः । उत । वा । पुरम्ऽधिः । अवन्तु । नः । अमृतासः । तुरासः ॥ ५ ॥

अत्र लिङ्गोक्ता देवताः । [v]भगः [v]देवः [v]सविता च [v]रायः धनस्य स्वामी [v]अंशः त्वष्टा [v]वृत्रस्य हन्ता [v]इन्द्रः च एते देवाः [v]धनानां [v]संजितः सम्यग्जेतारः । [v]ऋभुक्षाः ऋभुः [v]वाजः च [v]उत [v]वा अपि च [v]पुरंधिः बहुधीः विभ्वोच्यते । एते च [v]अमृतासः अमृता अमरणधर्माणो भगादिदेवाः [v]तुरासः अस्मद्यज्ञं प्रति त्वरमाणाः सन्तः [v]नः अस्मान् [v]अवन्तु रक्षन्तु ॥ ॥ १७ ॥

मरुत्वंतो अप्रतीतस्य जिष्णोरर्जूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन्नापरासो न वीर्यं१ नूतनः कश्चनाप ॥ ६ ॥

मरुत्वंतः । अप्रतिऽइतस्य । जिष्णोः । अर्जूर्यतः । प्र । ब्रवाम । कृतानि ।
न । ते । पूर्वे । मघऽवन् । न । अपरासः । न । वीर्यम् । नूतनः । कः । चन । आप ॥ ६ ॥

वयं यजमानाः [v]मरुत्वतः मरुद्भिस्तद्वत इन्द्रस्य [v]कृतानि कर्माणि [v]प्र [v]ब्रवाम प्रत्यापयाम । कीदृशस्य तस्य । [v]अप्रतीतस्य अप्रतिगतस्य युद्धेऽपलायमानस्य । न केवलं तावन्मात्रम् । [v]जिष्णोः जयनशीलस्य [v]अजूर्यतः अजीर्यमाणस्य[4] । सर्वदा यून इत्यर्थः । अथ प्रत्यक्षेणोच्यते । हे [v]मघवन् इन्द्र [v]ते तव वीर्यं पराक्रमं [v]पूर्वे पुरातनाः पुरुषाः [v]न आपुः । [v]नापरासः अपरेऽपि नापुः । किं बहुना । [v]नूतनः [v]कश्चन[5] आश्चर्यभूतः[6] यः कोऽपि [v]वीर्यं [v]न [v]आप न प्राप्नोति ॥

उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम् ।
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानम् ॥ ७ ॥

उप । स्तुहि । प्रथमम् । रत्नऽधेयम् । बृहस्पतिम् । सनितारम् । धनानाम् ।
यः । शंसते । स्तुवते । शम्ऽभविष्ठः । पुरुऽवसुः । आऽगमत् । जोहुवानम् ॥ ७ ॥

---

१. ख-च-ञ-ण-न-भ-र-श–'सं' नास्ति । २. ख-च-ञ-ण-त-न-भ-र-श–अस्मभ्यम् । ३. ख-ग-घ-च-ज-ञ-ण-न-भ-र–'स्वस्तिभिः' नास्ति । ४. ख-च-ग–अजूर्यमाणस्य । ५. ख-च-ञ-ण-न-भ-र–कश्च आर्यभूतः ।

हे अन्तरात्मन् त्वं [V]प्रथमं मुख्यं प्रकृष्टतममित्यर्थः। [V]रत्नधेयं रमणीयधनदातारं[1] [V]धनानां हविर्लक्षणानां [V]सनितारं संभक्तारम्। अथवा रत्नशब्देन मणिमुक्तादयो गृहीता इह धनशब्देन गवादयः। गवादिदातारं [V]बृहस्पतिं बृहतो मन्त्रस्य पतिं स्वामिनं देवम् [V]उप [V]स्तुहि। [V]यः देवः [V]शंसते शस्त्रैः [V]स्तुवते सामभिर्यजमानाय [V]शंभविष्ठः सुखस्य भावयितृतमो भवति। यश्च [V]जोहुवानम् आह्वयन्तं यजमानं [V]पुरूवसुः प्रभूतधनः सन् [V]आगमत आगच्छति तमुप स्तुहि ॥

तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥ ८ ॥

तव । ऊतिऽभिः । सचमानाः । अरिष्टाः । बृहस्पते । मघऽवानः । सुऽवीराः ।
ये । अश्वऽदाः । उत । वा । सन्ति । गोऽदाः । ये । वस्त्रऽदाः । सुऽभगाः । तेषु । रायः ॥ ८ ॥

हे [V]बृहस्पते [V]तवोतिभिः रक्षाभिः[2] [V]सचमानाः संगच्छमानाः [V]अरिष्टाः अहिंसिताः [V]मघवानः धनवन्तः [V]सुवीराः शोभनपुत्राश्च भवन्ति। [V]ये त्वदनुगृहीताः [V]अश्वदाः बहूनामश्वानां दातारः [V]सन्ति। [V]उत [V]वा अथवा [V]गोदाः सन्ति। [V]ये च [V]वस्त्रदाः [V]सुभगाः शोभनधनाः सन्ति [V]तेषु सर्वेषु [V]रायः धनानि संभवन्त्विति शेषः ॥

विसर्मार्णं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः ।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ॥ ९ ॥

विऽसर्मार्णम् । कृणुहि । वित्तम् । एषाम् । ये । भुञ्जते । अपृणन्तः । नः । उक्थैः ।
अपऽव्रतान् । प्रऽसवे । ववृधानान् । ब्रह्मऽद्विषः । सूर्यात् । यवयस्व ॥ ९ ॥

[V]एषां वक्ष्यमाणानां [V]वित्तं धनं [V]विसर्मार्णं विसरणशीलं [V]कृणुहि कुरु हे ब्रह्मणस्पते। एषामित्युक्तं केषामित्याह। [V]ये [V]भुञ्जते [V]अपृणन्तः अप्रयच्छन्तः। केभ्यः। [V]उक्थैः स्तुतिप्रतिपादकैः[3] शस्त्रैर्विशिष्टेभ्यः [V]नः अस्मभ्यम्। तान् [V]अपव्रतान् अपगतकर्मणः [V]प्रसवे उत्पत्तिमति मनुष्यलोके [V]ववृधानान् वर्धमानान् [V]ब्रह्मद्विषः ब्राह्मणद्वेष्टॄन् मन्त्रद्वेष्टॄन् वा [V]सूर्यात [V]यवयस्व पृथक्कुरु। अन्धकारे स्थापयेत्यर्थः ॥

य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमी शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ॥१०॥

यः । ओहते । रक्षसः । देवऽवीतौ । अचक्रेभिः । तम् । मरुतः । नि । यात ।
यः । वः । शमीम् । शशमानस्य । निन्दात् । तुच्छ्यान् । कामान् । करते । सिस्विदानः ॥१०॥

१. ञ-त-न-र-श-°धनदानम् । २. ञ-न-भ-र-रक्षणाभिः । ३. ख-च-ञ-ण-त-न-भ-र-श-स्वस्तुति° ।

[v]यः यजमानः [v]रक्षसः बलिनो राक्षसान् [v]ओहते प्रापयति [v]देववीतौ । देवानां वीतिः प्राप्तिर्भक्षणं वा यत्र स तथोक्तः । तस्मिन् यज्ञे । अन्यथानुष्ठानादिना आसुरं[1] करोतीत्यर्थः[1] । [v]तं यजमानम् [v]अचक्रेभिः अचक्रै रथैर्हे [v]मरुतो [v]नि [v]यात नितरां प्रापयतान्धकारम् । यद्वा । अचक्रेभिरिति पूर्वत्रान्वयः । चक्रशब्देनाङ्गान्युच्यन्ते । पुनःपुनरङ्गरहितैः केवलैरेव प्रधानैरोहते प्रापयति । साङ्गं हि कर्म देवानभ्येति । [v]यः च [v]वः युष्माकं [v]शमीं कर्म स्तुतिलक्षणं [v]शशमानस्य शंसमानस्य[2] मम संबन्धि [v]निन्दात् निन्देत् वैदिकं ज्योतिष्टोमादिरूपं कर्म निन्दति स्वयं च [v]तुच्छ्यान् नश्वरान् [v]कामान् कृष्यादिजनितभोगान् [v]करते कुरुते [v]सिष्विदानः स्विद्यन्नात्मानं क्लेशयन् । अथवा युष्मासु कमनीयान् भोगान् तुच्छयान् करोति ॥ ॥ १८ ॥

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ ११ ॥

तम् । ऊँ इति । स्तुहि । यः । सुऽइषुः । सुऽधन्वा । यः । विश्वस्य । क्षयति । भेषजस्य । यक्ष्व । महे । सौमनसाय । रुद्रम् । नमःऽभिः । देवम् । असुरम् । दुवस्य ॥ ११ ॥

हे आत्मन् [v]तमु तमेव रुद्रं [v]स्तुहि स्तुतिं कुरु । [v]यः [v]स्विषुः शोभनबाणः [v]सुधन्वा च । विरोधिहन्तृत्वात् सुष्ठुत्वम् । [v]यः च [v]विश्वस्य [v]भेषजस्य औषधस्य [v]क्षयति ईश्वरो भवति । शारीरस्य सांसारिकस्य च अरिष्टस्य शमनाय ईश्वरव्यतिरिक्तस्य[3] औषधस्य अभावाद्विपक्तमत्वाच्चास्य भेषजस्वामित्वम् । ' भिषक्तमं त्वा भिषजां शृणोमि ' (ऋ. सं. २. ३३. ४) इत्यादिश्रुतेः । किंच तमेव [v]रुद्रं दुःखात्तत्साधनाद्दुरिताद्वा मोचयितारं देवं [v]यक्ष्व यज च [v]महे महते [v]सौमनसाय सुमनस्त्वाय । ईश्वराराधनाच्चित्तशान्तिः प्रसिद्धा । किंच [v]नमोभिः हविर्भिर्नमस्कारैर्वा [v]देवं द्योतमानम् [v]असुरं प्रकृष्टासुम् । बलवन्तमित्यर्थः । यद्वा । प्राणदातारं रुद्रं [v]दुवस्य परिचरेति ॥

दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥ १२ ॥

दमूनसः । अपसः । ये । सुऽहस्ताः । वृष्णः । पत्नीः । नद्यः । विभ्वऽतष्टाः । सरस्वती । बृहत्ऽदिवा । उत । राका । दशस्यन्तीः । वरिवस्यन्तु । शुभ्राः ॥ १२ ॥

अत्र लिङ्गोक्तदेवताः । [v]दमूनसः दानमनसो दान्तमनसो वा [v]अपसः चमसाश्वरथगवादिशोभनकर्मवन्तः ॥ मत्वर्थो लुप्यते ॥ अत एव [v]सुहस्ताः कुशलहस्ताः [v]ये सन्ति ते ऋभवः [v]वृष्णः वर्षकस्येन्द्रस्य [v]पत्नीः पत्न्यः पालयित्र्यः [v]नद्यः नदनशीला गङ्गाद्याः [v]विभ्वतष्टाः ऋभूणां मध्यमेन कृताः [v]सरस्वती एतन्नामिका नदी वाग्देवी वा [v]बृहद्दिवा प्रभूतदीप्तिः [v]उत अपि च [v]राका देवी च [v]दशस्यन्तीः दशस्यन्त्यः कामान् प्रयच्छन्त्यः [v]शुभ्राः दीप्ताः ताश्च [v]वरिवस्यन्तु अस्मभ्यं धनमिच्छन्तु ॥

---

१. ख-च-ण–आसुरीकरोतीत्यर्थः ; झ-त-र-आसुकरा करोतीत्यर्थः । २. ग-घ-ज-श–' शंसमानस्य ' नास्ति । ३. झ-श–ईश्वरस्य व्यतिरिक्तस्य; त-र–ईश्वरस्य वातिरिक्तस्य ।

प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥ १३ ॥

प्र । सु । महे । सुऽशरणाय । मेधाम् । गिरम् । भरे । नव्यसीम् । जायमानाम् ।
यः । आहनाः । दुहितुः । वक्षणासु । रूपा । मिनानः । अकृणोत् । इदम् । नः ॥ १३ ॥

vसु सुष्ठु vप्र vभरे प्रकर्षेण संपादयामि vमहे महते vसुशरणाय शोभनरक्षकायेन्द्राय पर्जन्याय वा सुसुखाय वा । किम् । vमेधां मतौ धीयमानां vगिरं स्तुतिम् । कीदृशीम् । vनव्यसीं नवतरामतिशयेन स्तुत्यां वा vजायमानाम् इदानीमुत्पद्यमानाम् । नूतनामित्यर्थः । vयः इन्द्रः पर्जन्यो वा vआहनाः आहन्ता सेक्ता vदुहितुः दुहितृस्थानीयायाः पृथिव्या हिताय vवक्षणासु नदीषु vरूपा रूपाणि vमिनानः कुर्वाणः vइदम् उदकं vनः अस्मभ्यम् vअकृणोत् करोतु ॥

प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥ १४ ॥

प्र । सुऽस्तुतिः । स्तनयन्तम् । रुवन्तम् । इळः । पतिम् । जरितः । नूनम् । अश्याः ।
यः । अब्दिऽमान् । उदनिऽमान् । इयर्ति । प्र । विऽद्युता । रोदसी इति । उक्षमाणः ॥ १४ ॥

अत्र पर्जन्यः स्तूयते । vसुष्टुतिः शोभना स्तुतिः vस्तनयन्तं गर्जन्तं vरुवन्तं वर्षणजनितं शब्दं कुर्वाणम् vइळः अन्नस्योदकस्य वा vपतिं स्वामिनं हे vजरितः स्तोतस्त्वदीया स्तुतिः vनूनं vप्र vअश्याः प्रकर्षेण व्याप्नोतु । vयः च पर्जन्यः vअब्दिमान् । अब्दिः अपां दानवान् मेघः । तद्वान् । vउदनिमान् उदकवान् vविद्युता तडिता vरोदसी द्यावापृथिव्यौ vउक्षमाणः सिञ्चन् vप्र vइयर्ति गच्छति ॥

एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँयुवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥ १५ ॥

एषः । स्तोमः । मारुतम् । शर्धः । अच्छ । रुद्रस्य । सूनून् । युवन्यून् । उत् । अश्याः ।
कामः । राये । हवते । मा । स्वस्ति । उप । स्तुहि । पृषत्ऽअश्वान् । अयासः ॥ १५ ॥

vएषः मया संपादितः vस्तोमः स्तोत्रं vमारुतं vशर्धः मरुतां बलम् vअच्छ अभिमुखम् vअश्याः प्राप्नोतु । समुदायरूपेण स्तुत्वा समुदायिरूपेणाह । vरुद्रस्य vसूनून् । एषां रुद्रेण पुत्रत्वेन परिक्लृप्तिरसकृदुक्ता । vयुवन्यून् यूनो मिश्रणेच्छून्वा vउत् उन्नतमत्यधिकम् अश्याः व्याप्नुहि

हे मनः । [v]कामः संकल्पः [v]राये धनार्थं [v]मा मां [v]स्वरित अविनश्वरं [v]हवते आह्वयति[1] प्रेरयतीत्यर्थः[1] । यस्मादेवं तस्मात् [v]पृषदश्वान् पृषद्वर्णाश्वोपेतान् [v]अयासः यज्ञगन्तॄन् [v]उप उपेत्य [v]स्तुहि ॥

प्र॒ष स्तोम॑ः पृथि॒वीम॒न्तरि॑क्षं॒ वन॒स्पती॑रोष॒धी रा॒ये अ॑श्याः ।
दे॒वोदे॑वः सु॒हवो॑ भूतु॒ मह्यं॒ मा नो॑ मा॒ता पृ॑थि॒वी दु॒र्मतौ॑ धात् ॥ १६ ॥

प्र । ए॒षः । स्तोम॑ः । पृ॒थि॒वीम् । अ॒न्तरि॑क्षम् । वन॒स्पती॑न् । ओ॒ष॒धीः । रा॒ये । अ॒श्याः ।
दे॒वःऽदे॑वः । सु॒ऽहव॑ः । भू॒तु॒ । मह्य॑म् । मा । नः॒ । मा॒ता । पृ॒थि॒वी । दुः॒ऽमतौ॑ । धा॒त् ॥१६॥

[v]एष [v]स्तोमः स्तुतिः पृथिव्यादिदेवताः [v]प्र [v]अश्याः प्राप्नोतु । किमर्थम् । [v]राये धनार्थम् । [v]देवोदेवः सर्वोऽपि देवः [v]मह्यं मदर्थं [v]सुहवो [v]भूतु स्वाह्वानो भवतु । [v]नः अस्मान् [v]दुर्मतौ [v]माता सर्वस्य निर्मात्री[2] । यद्वा । अत्रेर्भौमस्वाद्विशेषेण माता । तादृशी [v]पृथिवी [v]मा [v]धात् मा स्थापयतु ॥

उ॒रौ दे॑वा अनिबा॒धे स्या॑म ॥ १७ ॥

उ॒रौ । दे॒वाः॒ । अ॒नि॒ऽबा॒धे । स्या॒म॒ ॥ १७ ॥

हे [v]देवाः युष्माकं संबन्धिनि [v]उरौ महति [v]अनिबाधे नितरां बाधरहिते सुखे [v]स्याम भवेम वयमत्रयः ॥

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती गमेम ।
आ नो॑ र॒यिं व॑हतमोत वी॒राना विश्वा॒न्यमृ॑ता सौभगा॒नि ॥ १८ ॥

सम् । अ॒श्विनोः॑ । अव॑सा । नूत॑नेन । म॒यः॒ऽभुवा॑ । सु॒ऽप्रणी॑ती । ग॒मे॒म॒ ।
आ । नः॒ । र॒यिम् । व॒ह॒त॒म् । आ । उ॒त । वी॒रान् । आ । विश्वा॑नि । अ॒मृ॒ता॒ । सौ॒भ॒गा॒नि ॥ १८ ॥

वयम्[3] [v]अश्विनोः [v]नूतनेन पूर्वमन्यैरननुभूतेन [v]मयोभुवा सुखस्य भावयित्रा [v]सुप्रणीता शोभनप्रणयनवता [v]अवसा रक्षणेन [v]सं [v]गमेम संगच्छेमहि । हे [v]अमृता अमरणावश्विनौ [v]नः अस्मभ्यं [v]रयिं धनम् [v]आ [v]वहतं प्रापयतम् । [v]और्वतः सुवीर्यवतः पुत्रानपि [v]आ वहतम् । [v]विश्वानि सौभगान्यपि [v]आ वहतम् ॥ ॥ १९ ॥

'आ धेनवः' इति सप्तदशर्चमेकादशं सूक्तमत्रेरार्षं त्रैष्टुभं वैश्वदेवम् । अत्रानुक्रमणिका—'आ धेनवस्त्र्यूनैतयोरुपान्त्यैकपदा' इति । विनियोगो लैङ्गिकः । अपोनप्त्रीये एकधनासु हविर्धानं प्रति नीयमानास्वाद्यानुवचनीया । सूत्रितं च—'आ धेनवः पयसा तूर्ण्यर्थाः समन्या यन्त्युप यन्त्यन्याः' (आश्व. श्रौ. ५. १) इति ॥

---

१. ख-च-झ-ण-न-भ-आह्वयतीत्यर्थः । २. ख-च-ण- नेत्री । ३. न-वयमत्रयः ।

आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥ १ ॥

आ । धेनवः । पयसा । तूर्णिऽअर्थाः । अमर्धन्तीः । उप । नः । यन्तु । मध्वा ।
महः । राये । बृहतीः । सप्त । विप्रः । मयःऽभुवः । जरिता । जोहवीति ॥ १ ॥

vधेनवः प्रीणयित्र्यो नद्यः vमध्वा मधुरेण vपयसा रसेन सहिताः vतूर्ण्यर्थाः त्वरमाणगमनाः । 'अर्थोऽर्तेः' (निरु. १. १८) इति यास्कः । vअमर्धन्तीः अहिंसन्त्यः सत्यः vनः अस्मान् vउप vआ vयन्तु उपागच्छन्तु । तदर्थं vमहः महते vराये धनाय vबृहतीः महतीः vसप्त सर्पणस्वभावाः सप्तसंख्याकाः[1] 'इमं मे गङ्गे' (ऋ. सं. १०. ७५. ५) इति मन्त्रोक्ता गङ्गाद्या वा । तत्र हि प्राधान्येन सप्तैवोक्ताः । vमयोभुवः सुखस्य भावयित्रीः vविप्रः विशेषेण प्रीणयिता vजरिता स्तोता vजोहवीति आह्वयति[2] ॥

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥ २ ॥

आ । सुऽस्तुती । नमसा । वर्तयध्यै । द्यावा । वाजाय । पृथिवी इति । अमृध्रे इति ।
पिता । माता । मधुऽवचाः । सुऽहस्ता । भरेऽभरे । नः । यशसौ । अविष्टाम् ॥ २ ॥

अहं vसुष्टुती सुष्टुत्या शोभनस्तोत्रेण vनमसा हविषा च vअमृध्रे[3] हिंसारहिते vद्यावा vपृथिवी[3] द्यावापृथिव्यौ vआ vवर्तयध्यै । आवर्तयितुमिच्छामि vवाजाय अन्नार्थम् । 'अन्नं वै वाजः' (तै. ब्रा. १.३.६.६) इति हि श्रुतिः । vपिता पालयित्री द्यौः vमाता निर्मात्री पृथिवी vमधुवचाः प्रियवचना vसुहस्ता अभिमतदानेन[4] शोभनहस्ता[4] । एते उभयविशेषणे । vयशसौ यशोयुक्तौ द्यावापृथिव्यौ vभरेभरे सर्वेषु संग्रामेषु यज्ञेषु वा vनः अस्मान् vअविष्टां रक्षताम् ।

अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।
होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥ ३ ॥

अध्वर्यवः । चकृऽवांसः । मधूनि । प्र । वायवे । भरत । चारु । शुक्रम् ।
होताऽइव । नः । प्रथमः । पाहि । अस्य । देव । मध्वः । ररिम । ते । मदाय ॥ ३ ॥

---

१. ख-च-ञ-ण-भ-सप्तसंख्याका वा; त-र-सप्तसंख्या वा । २. ख-ञ-भ-आजुह्वयति । ३. ख-च-ण-'अमृध्रे...पृथिवी' नास्ति; ञ-न-भ-र-द्यावा पृथिवी । ४. ख-च-ञ-ण-त-न-भ-र-'अभिमतदानेन शोभनहस्ता' नास्ति; ग-ध-ज-शोभनहस्ता ।

हे [v]अध्वर्यवः अध्वरं युज्ञानाः [v]मधूनि मधुररसानि सोमाज्यादीनि [v]चक्रवांसः कुर्वाणा यूयं [v]वायवे प्रथमं [v]प्र [v]भरत प्रकर्षेण संपादयत [v]चारु चरणीयं[1] [v]शुक्रं दीप्तं सोमम्। हे वायो त्वं च [v]होतेव होता यथा प्रथमं पिबति तद्वत् [v]नः अस्मदर्थम् [v]अस्य अमुं सोमं [v]प्रथमः इतरदेवेभ्यः पूर्वं [v]पाहि पिब। हे [v]देव वायो[2] [v]मध्वः मधुरं सोमरसं [v]ते [v]मदाय [v]ररिम ददाम। वायोः पूर्वपानमसकृत्प्रपञ्चितम् ॥

दश॒ क्षिपो॑ युञ्जते बा॒हू अद्रिं॒ सोम॑स्य॒ या श॑मि॒तारा॑ सु॒हस्ता॑।
मध्वो॒ रस॑ꣳ सु॒गभ॑स्तिर्गिरि॒ष्ठां च॑नि॒श्चद॑दुदुहे शु॒क्रम॑ꣳशुः ॥ ४ ॥

दश॑। क्षिपः॑। यु॒ञ्ज॒ते॑। बा॒हू इति॑। अद्रि॑म्। सोम॑स्य। या। श॒मि॒तारा॑। सु॒ऽहस्ता॑।
मध्वः॑। रस॑म्। सु॒ऽग॒भ॒स्तिः। गि॒रि॒ऽस्थाम्। च॒नि॒श्चद॑त्। दु॒दु॒हे॒। शु॒क्रम्। अं॒शुः॑ ॥ ४ ॥

अत्राभिषवस्य प्रतिपाद्यमानत्वात् सोमो देवता। यद्वा ऐन्द्री। [v]अद्रिम् अभिषवग्रावाणं [v]दश [v]क्षिपः दशसंख्याकाः क्षेप्त्र्योऽङ्गुलयः [v]युञ्जते गृह्णन्ति। यद्वा। परस्परं युक्ता भवन्ति। [v]बाहू अध्वर्युसंबन्धिनौ अद्रिं युञ्जाते। [v]या यौ [v]सुहस्ता शोभनहननौ[3] [v]सोमस्य शमितारौ[4] अभिषोतारौ तौ[5] बाहू युञ्जाते। [v]मध्वः मधुरस्य सोमस्य [v]रसं [v]गिरिष्ठां गिरिस्थायिनं गिरिवदुन्नतप्रदेशस्थितं वा [v]सुगभस्तिः शोभनाङ्गुलिरध्वर्युः [v]चनिश्चदत् आह्लादयन्॥ 'चदि आह्लादने' इत्यस्माद्लुकि छान्दसं रूपम्। [v]दुदुहे दोग्धि। स च [v]अंशुः [v]शुक्रं निर्मलं रसं [v]दुदुहे दुग्धे। यद्वैकं वाक्यम्। अंशुः व्याप्तः[6] सुगभस्तिः सुहस्तोऽध्वर्युः मध्वो रसं दुदुहे दोग्धि ॥

असा॑वि ते जुजुषा॒णाय॒ सोम॒ः क्रत्वे॒ दक्षा॑य बृ॒हते॒ मदा॑य।
हरी॒ रथे॑ सु॒धुरा॒ योगे॑ अ॒र्वागिन्द्र॑ प्रि॒या कृ॑णुहि हू॒यमा॑नः ॥ ५ ॥

असा॑वि। ते॒। जु॒जु॒षा॒णाय॑। सोम॑ः। क्रत्वे॑। दक्षा॑य। बृ॒हते॑। मदा॑य।
हरी॒ इति॑। रथे॑। सु॒ऽधुरा॑। योगे॑। अ॒र्वाक्। इन्द्र॑। प्रि॒या। कृ॒णु॒हि॒। हू॒यमा॑नः ॥ ५ ॥

हे इन्द्र [v]ते तुभ्यं [v]जुजुषाणाय सेवमानाय [v]सोमः [v]असावि अभिषुतः। किमर्थम्। [v]क्रत्वे क्रतवे वृत्रवधादिकर्मणे [v]दक्षाय बलाय [v]बृहते [v]मदाय च। यस्मादेवं तस्मात् हे [v]इन्द्र त्वं [v]हूयमानः सन् [v]सुधुरा शोभनायां धुरि नियुक्तौ [v]प्रिया प्रियौ [v]हरी अश्वौ [v]योगे योगार्हे युक्ते वा [v]रथे योजयित्वा तं रथम् [v]अर्वाक् अस्मदभिमुखं [v]कृणुहि कुरु ॥ ॥ २० ॥

---

१. न–रमणीयम्। २. ख-च-ञ-ण-न-भ-र–वायो देव। ३. न–शोभनहस्तौ। ४. ख-च-ञ-ण-न-भ-र–'शमितारौ' नास्ति। ५. ख-च-ञ-ण-न-भ-श–'तौ' नास्ति। ६. ख-च-ण-भ–व्याप्यः।

आ नो॑ मही॒मर॑मतिं॒ सजो॒षा॒ ग्नां दे॒वीं नम॑सा॒ रात॑हव्याम् ।
मधो॒र्मदा॑य बृह॒तीमृ॒तज्ञा॒मग्ने॑ वह॒ पथि॑भिर्देव॒यानैः॑ ॥ ६ ॥

आ । नः॒ । म॒हीम् । अर॑मतिम् । स॒ऽजोषाः॑ । ग्नाम् । दे॒वीम् । नम॑सा । रात॑ऽहव्याम् ।
मधोः॑ । मदा॑य । बृ॒ह॒तीम् । ऋ॒त॒ऽज्ञाम् । आ । अग्ने॑ । व॒ह॒ । पथि॑ऽभिः । दे॒व॒ऽयानैः॑ ॥ ६ ॥

अत्राग्निं संबोध्य ग्नादेवताया आवाह्यत्वादस्याग्निर्ग्ना वा देवता । हे [V]अग्ने [V]सजोषाः अस्माभिः सह प्रीयमाणस्त्वं [V]ग्नां [V]देवीं सर्वैर्गन्तव्यामेतन्नामिकां देवताम् । 'मेना ग्ना इति स्त्रीणाम्' (निरु. ३. २१) इति यास्कः । [V]नः अस्मदर्थं [V]देवयानैः देवैर्गन्तव्यैः [V]पथिभिः मार्गैः [V]आ अभिमुखम् [V]आ [V]वह । कीदृशीम् । [V]महीं महतीम् [V]अरमतिम्[1] आ समन्ताद्रममाणां सर्वत्र गन्त्रीं वा [V]नमसा स्तोत्रेण सह [V]रातहव्याम् । रातं दत्तं दानाय संकल्पितं हव्यं यस्यास्ताम् । दत्तहविष्कामित्यर्थः । किमर्थम् । [V]मधोः मधुरस्य सोमस्य [V]मदाय । पुनः कीदृशीम् । [V]बृहतीं प्रवृद्धाम् [V]ऋतज्ञां यज्ञमभिजानतीम् ॥

प्रवर्ग्ये महावीरेऽभ्यमाने 'अञ्जन्ति यम्' इत्येषा । सूत्रितं च—'अञ्जन्ति यं प्रथयन्तो न विप्रा इत्यभ्यमाने' (आश्व. श्रौ. ४. ६) इति ॥

अ॒ञ्ज॒न्ति॒ यं प्र॒थय॑न्तो॒ न विप्रा॑ व॒पाव॑न्तं॒ नाग्नि॒ना॒ तर्प॑न्तः ।
पि॒तुर्न पु॒त्र उ॒पसि॒ प्रेष्ठ॒ आ घ॒र्मो अ॒ग्निमृ॒तय॑न्नसादि ॥ ७ ॥

अ॒ञ्ज॒न्ति॒ । यम् । प्र॒थय॑न्तः । न । विप्राः॑ । व॒पाऽव॑न्तम् । न । अ॒ग्निना॑ । तर्प॑न्तः ।
पि॒तुः । न । पु॒त्रः । उ॒पसि॑ । प्रेष्ठः॑ । आ । घ॒र्मः । अ॒ग्निम् । ऋ॒तय॑न् । अ॒सा॒दि॒ ॥ ७ ॥

[V]यं घर्मं महावीरं [V]प्रथयन्तो [V]न । नेति संप्रत्यर्थीयः । अस्युपमार्थस्य संप्रत्यर्थे प्रयोगः[2] । इदानीं प्रथयन्तः [V]विप्राः मेधाविन ऋत्विजोऽध्वर्यवादयः [V]वपावन्तं [V]न । वपावन्तं प्रवृद्धं पशुं यथाग्नौ तपन्ति तद्वत् [V]अग्निना [V]तपन्तः [V]अञ्जन्ति । [V]पितुर्न [V]पुत्र [V]उपसि [V]प्रेष्ठः पितुरुत्सङ्गे प्रियतमः पुत्र इव [V]घर्मः महावीरः । 'यद्घ्राम् इत्यपतत्तद्घर्मस्य घर्मत्वम्' (तै. आ. ५. १. ५) इति हि श्रुतिः । सः [V]ऋतयन् यज्ञमिच्छन् [V]अग्निम् अग्नौ[3] [V]आ [V]असादि आसादितः । अत्र पितृपुत्रदृष्टान्तः स्फोटादिराहित्येन सुखवासप्रख्यापनार्थः ॥

अच्छा॑ म॒ही बृ॑ह॒ती शं॑त॒मा॒ गीर्दू॒तो न ग॑न्त्व॒श्विना॑ हु॒वध्यै॑ ।
म॒यो॒भुवा॑ सु॒रथा॑ यातम॒र्वाङ्ग॒न्तं नि॒धिं धु॒र्माणिर्न नाभि॑म् ॥ ८ ॥

अच्छ॑ । म॒ही । बृ॒ह॒ती । श॒म्ऽत॒मा । गीः । दू॒तः । न । ग॒न्तु॒ । अ॒श्विना॑ । हु॒वध्यै॑ ।
म॒यः॒ऽभुवा॑ । सु॒ऽरथा॑ । आ । या॒त॒म् । अ॒र्वाक् ।
ग॒न्त॒म् । नि॒ऽधिम् । धु॒र्म् । आ॒णिः । न । नाभि॑म् ॥ ८ ॥

१. न—अरमतिमरमणीयम् । २. ख-च-ण-भ— प्रयोग इति यास्कः । ३. ख-च-ण-त—'अग्नौ' नास्ति ।

[v]अच्छ अभिमुखम् [v]अश्विना अश्विनौ [v]हुवध्यै आह्वातुं [v]गीः अस्मदीया स्तुतिः [v]दूतो [v]न दूत इवाह्वातेव [v]गन्तु गच्छतु । गीर्विशेष्यते । [v]मही पूज्या [v]बृहती महती [v]शंतमा सुखतमा । हे अश्विनौ [v]मयोभुवा सुखस्य भावयितारौ [v]मरथा एकरथौ सन्तौ [v]निधिं निहितं सोमम् [v]अर्वाक् अभिमुखं [v]यातं गच्छतम् । [v]धुरं भारवाहिकां [v]नाभिम् [v]आणिर्न कील इव । यथा निष्कीला नाभी रथं न निर्वहति तद्वत् युवाभ्यां वियुक्तः सोमो यागं न निर्वहतीति ज्ञापयितुमेवं दृष्टान्तितम्[1] ॥

प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उतत्मन् ॥ ९ ॥

प्र । तव्यसः । नमःऽउक्तिम् । तुरस्य । अहम् । पूष्णः । उत । वायोः । अदिक्षि ।
या । राधसा । चोदितारा । मतीनाम् । या । वाजस्य । द्रविणःऽदौ । उत । त्मन् ॥ ९ ॥

[v]अहम् ऋषिः [v]तव्यसः प्रकृष्टबलस्य [v]तुरस्य त्वरमाणस्य [v]पूष्णः पोषकस्य देवस्य । उक्तगुणकाय देवाय [v]उत अपि च [v]वायोः उक्तलक्षणाय[2] च [v]नमउक्तिं नम इति वचनं स्तोत्रं [v]प्र [v]अदिक्षि प्रदिशामि । [v]या यौ पूषवायू [v]राधसा हविर्लक्षणेन निमित्तेन [v]मतीनां [v]चोदितारा प्रेरयितारौ[3] । यद्वा । राधसेति षष्ठ्यर्थे तृतीया । राधसो धनस्य मतीनां च चोदयितारौ । यौ च [v]वाजस्य अन्नस्य संग्रामस्य वा चोदयितारौ तौ देवौ [v]उत अपि च [v]त्मन् आत्मन्यनन्यप्रेरणयैव[4] [v]द्रविणोदौ भवतमिति शेषः ॥

आ नामभिर्मरुतो वक्षि विश्वान रूपेभिर्जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥ १० ॥

आ । नामऽभिः । मरुतः । वक्षि । विश्वान् । आ । रूपेभिः । जातऽवेदः । हुवानः ।
यज्ञम् । गिरः । जरितुः । सुऽस्तुतिम् । च । विश्वे । गन्त । मरुतः । विश्वे । ऊती ॥ १० ॥

हे [v]जातवेदः जातप्रज्ञाग्ने [v]हुवानः अस्माभिराह्वयमानः सन् [v]विश्वान् [v]मरुतः सर्वानपि स्तोत्रभाजो हविर्भाजश्च देवान् [v]नामभिः इन्द्रवरुणेत्यादिलक्षणैः [v]आ [v]वक्षि आवहसि । [v]रूपेभिः सहस्राक्षवज्रहस्तत्वादिलक्षणैः रूपैः [v]आ वक्षि वहसि यज्ञम्[5] । किंच हे [v]मरुतः [v]विश्वे सर्वे यूयं [v]यज्ञम् अस्मदीयं यज्ञसंबन्धि हविर्वा [v]जरितुः स्तोतुः संबन्धिनीः [v]गिरः स्तुतिवचांसि [v]सुष्टुतिं तत्साध्यां शोभनफलां स्तुतिं च । अवयविन्याः[6] स्तुतेरेकत्वादेकवचनम् । अवयवानां बहुत्वाद्बहुवचनम् ॥ उक्ते यज्ञस्तुती अभिलक्ष्य [v]गन्त आगच्छत । [v]विश्वे [v]च यूयम् [v]ऊती ऊत्या रक्षया च सह गन्त[7] ॥ ॥ २१ ॥

'आ नो दिवः' इत्येकादशी व्यूढे दशरात्रे नवमेऽहनि प्रउगशस्त्रे सारस्वततृचे द्वितीया । सूत्रितं च–'आ नो दिवो बृहतः पर्वतादा सरस्वत्यभि नो नेषि वस्यः' (आश्व. श्रौ. ८.११) इति ॥

---

१. न–दृष्टान्तितम् । तस्माद्युवामायातमागच्छतम् । २. ख-च-ञ-ण-न-भ-र–उक्तगुणाय; त–उक्तगुणकाय । ३. त–चोदितारौ । ४. ग-घ-ज-श–°प्रेरणायैव । ५. ख-च-ञ-ण-न-भ-र–'यज्ञं' नास्ति । ६. ख-च-ञ-ण-त-भ-र–अवयव्याः । ७. ख-च-ण–गन्त आगच्छत; भ–गन्त एत ।

आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥ ११ ॥

आ । नः । दिवः । बृहतः । पर्वतात् । आ । सरस्वती । यजता । गन्तु । यज्ञम् ।
हवम् । देवी । जुजुषाणा । घृताची । शग्माम् । नः । वाचम् । उशती । शृणोतु ॥ ११ ॥

ᵛनः अस्माकं ᵛयज्ञं ᵛयजता यष्टव्या देवी ᵛसरस्वती ᵛदिवः द्योतमानात् द्युलोकात् ᵛआ ᵛगन्तु आगच्छतु । तथा ᵛबृहतः महतः ᵛपर्वतात् पर्ववतः पूरणवतः प्रीणनवतो वान्तरिक्षात् मेघाद्वा सरस्वती ᵛआ गन्तु आगच्छतु । अनेन माध्यमिकी वागुच्यते । यद्वा एतत् दिव इत्यस्य विशेषणम् । सन्ति हि द्युलोकस्य त्रीणि पर्वाणि ' तिस्रो दिवः पृथिवीः ' इत्यादि श्रुतेः । अस्मिन् पक्षे द्वितीय आकारः पूरणः । तदर्थं ᵛहवम् अस्मदीयमाह्वानं ᵛदेवी सरस्वती ᵛजुजुषाणा स्तुतिं सेवमाना ᵛघृताची घृतमुदकमञ्चती ᵛनः अस्मदीयां ᵛशग्मां सुखकरीं ᵛवाचं स्तुतिम् ᵛउशती कामयमाना सती ᵛशृणोतु ॥

आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥ १२ ॥

आ । वेधसम् । नीलऽपृष्ठम् । बृहन्तम् । बृहस्पतिम् । सदने । सादयध्वम् ।
सादत्ऽयोनिम् । दमे । आ । दीदिऽवांसम् । हिरण्यऽवर्णम् । अरुषम् । सपेम ॥ १२ ॥

एषा बार्हस्पत्या । हे ऋत्विजो यूयं ᵛबृहस्पतिं बृहतो मन्त्रस्य स्वामिनं देवं ᵛसदने अस्मद्यागगृहे ᵛआ ᵛसादयध्वं स्थापयध्वम् । कीदृशं देवम् । ᵛवेधसं विविधकर्तारं ᵛनीलपृष्ठं स्निग्धाङ्गं ᵛबृहन्तं महान्तम् । तथा सन्तं वयमृत्विग्यजमानाः ᵛसपेम परिचरेम । स एव विशेष्यते । ᵛसादद्योनिं योनौ सीदन्तं ᵛदमे यागगृहे ᵛआ सर्वतः ᵛदीदिवांसं दीप्यमानं ᵛहिरण्यवर्णम् हितरमणीयवर्णम्[१] ᵛअरुषम् आरोचमानम् । अथवेयमाग्नेयी । बृहतः परिवृढस्य कर्मणः स्वामीति बृहस्पतिरग्निरुच्यते । तथा नीलवर्णधूमपृष्ठत्वसदनसादनहिरण्यवर्णत्वादिलिङ्गैरप्यग्निरेव बृहस्पतिः ॥

आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्मा वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः ॥ १३ ॥

आ । धर्णसिः । बृहत्ऽदिवः । रराणः । विश्वेभिः । गन्तु । ओमऽभिः । हुवानः ।
ग्माः । वसानः । ओषधीः । अमृध्रः । त्रिधातुऽशृङ्गः । वृषभः । वयःऽधाः ॥ १३ ॥

---

१. ख-च-ण-हितरमणीयम्; ग-घ-ज-ट-' हितरमणीयवर्ण ' नास्ति ।

ऋ. २-१-८

इदमाधुक्त्रयमाग्नेयम्। अग्निः[१] [V]आ [V]गन्तु आगच्छत्वस्मद्यज्ञं [V]धर्णसिः सर्वस्य धारकः [V]बृहद्दिवः प्रभूतदीप्तिः [V]रराणः रममाणः कामान् प्रयच्छन् वा[२] [V]विश्वेभिः सर्वैः [V]ओमभिः रक्षणैः सह [V]हुवानः आहूयमानः। [V]ग्नाः गन्त्रीर्ज्वालाः [V]ओषधीः च [V]वसानः [V]अमृध्रः अहिंसितः [V]त्रिधातुशृङ्गः त्रिप्रकारशृङ्गवदुन्नतलोहितशुक्लकृष्णवर्णज्वालः[३] [V]वृषभः वर्षिता [V]वयोधाः अन्नस्य दाता हविषो वा धारकः ॥

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन्।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ॥ १४ ॥

मातुः। पदे। परमे। शुक्रे। आयोः। विपन्यवः। रास्पिरासः। अग्मन्।
सुऽशेव्यम्। नमसा। रातऽहव्याः। शिशुम्। मृजन्ति। आयवः। न। वासे ॥ १४ ॥

[V]आयोः मनुष्यस्य यजमानस्य [V]विपन्यवः। स्तोतृनामैतत्। स्तोतारो होत्रादयः [V]रास्पिरासः ॥ रा धनं हविर्लक्षणम्। तरस्पृशन्ति रास्पा जुह्वादयः। तद्वान् रास्पी। तद्वन्तो रास्पिराः ॥ उक्तविधा ऋत्विजः [V]मातुः निर्मातुः पृथिव्याः [V]शुक्रे दीप्ते [V]परमे [V]पदे उत्तरवेद्यां स्थितम् [V]अग्मन अगमन् भजन्ते[४]। तदर्थं [V]सुशेव्यं सुखाय[५] हितं [V]शिशुम् उत्पन्नमात्रं [V]वासे वासाय [V]नमसा स्तोत्रेण [V]रातहव्याः दत्तहविष्काः[६] इत्यर्थः। तादृशास्ते [V]मृजन्ति संमार्जयन्ति। तत्र दृष्टान्तः। [V]आयवो [V]न लौकिका मनुष्या इव। ते यथा [V]शिशुं वासाय मृजन्ति तद्वत ॥

बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥ १५ ॥

बृहत्। वयः। बृहते। तुभ्यम्। अग्ने। धियाऽजुरः। मिथुनासः। सचन्त।
देवःऽदेवः। सुऽहवः। भूतु। मह्यम्। मा। नः। माता। पृथिवी। दुःऽमतौ। धात्॥१५॥

[V]बृहत् प्रभूतं [V]वयः अन्नं हे [V]अग्ने बृहते[७] [V]तुभ्यं [V]धियाजुरः कर्मणा जीर्णाः [V]मिथुनासः पत्नीभिः[८] सहिताः [V]सचन्त सेवन्ते। 'जायापती अग्निमादधीयाताम्' इत्यादिश्रुतेः। अधिकाराध्याये षष्ठे स्त्रिया अप्यधिकारः स च पत्या सह (पू. मी. ६. १. २४) इति हि प्रतिपादितम्। अवशिष्टं गतम् ॥

१. ख-ञ्च-न-भ-र-'अग्निः' नास्ति। २. ग-घ-ज-'वा' नास्ति। ३. ख-च-ञ्च-ण-न-भ-र-[V]कृष्णज्वालः श-[V]कृष्णबहुज्वालः। ४. ख-च-ण-न-'भजन्ते' नास्ति; ञ्च-त-भ-र-अजते। ५. ख-च-ञ्च-ण-भ-सुसुखा; न-र-सुसुखाय। ६. ख-च-ण-दातहव्या हविष्काः; ञ्च-भ-र-दातहव्यर्हविष्काः; श-दातव्यहविष्काः। ७. ग-घ-च-ज-ण-महते। ८. ख-च-ञ्च-ण-त-न-भ-र-दंपतीभिः।

उरौ देवा अनिबाधे स्याम ॥ १६ ॥

उरौ । देवाः । अनिऽबाधे । स्याम ॥ १६ ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ १७ ॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥ १७ ॥

व्याख्याते[1] द्वे[2] ॥ ॥ २२ ॥

'तं प्रत्नथा' इति पञ्चदशर्चं द्वादशं सूक्तम् । अवत्सारो नाम ऋषिः स च कश्यपगोत्रः। यासु ऋक्षु सदापृणबाहुवृक्तादयः श्रुतास्तासु तेऽपि समुच्चीयन्ते । चतुर्दशीपञ्चदश्यौ त्रिष्टुभौ शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । विश्वे देवा देवता । अनुक्रान्तं च —'तं प्रत्नथा पञ्चोना काश्यपोऽवत्सारोऽन्ये च ऋषयोऽत्र दृष्टलिङ्गा द्वित्रिष्टुबन्तम्' इति ॥ वाजपेये अतिरिक्तोक्थे[3] आदित्स्त्रयोदशर्चः शंसनीयाः । सूत्रितं च—'तं प्रत्नथेति त्रयोदशानामेकां शिष्ट्वाहुय दूरोहणं रोहेत्' (आश्व. श्रौ. ९. ९) इति ॥

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ॥ १ ॥

तम् । प्रत्नऽथा । पूर्वऽथा । विश्वऽथा । इमऽथा । ज्येष्ठऽतातिम् । बर्हिऽसदम् । स्वःऽविदम् ।
प्रतीचीनम् । वृजनम् । दोहसे । गिरा । आशुम् । जयन्तम् । अनु । यासु । वर्धसे ॥ १ ॥

इयमुत्तरा च द्वे ऐन्द्र्याविरयाहुः । तत्रोपपत्तिमेवमाहुः । तं प्रत्नथा इत्येषा शुक्रामन्थिग्रहणे विनियुक्ता । ऐन्द्रौ च शुक्रामन्थिनौ । 'यदैन्द्रं शंसति तेन शुक्रामन्थिना उक्थवन्तौ' (ऐ. ब्रा. ३. १) इति हि ब्राह्मणम् । अध्वर्युसंप्रैषोऽपि भवति । 'प्रातःप्रातः सवस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्य' (श. ब्रा. ४. २. १. २३) इति । प्रशास्तृप्रैषश्च भवति 'होता यक्षदिन्द्रं प्रातः प्रातःसावस्य' (आश्व. श्रौ. ५. ५) इत्यादि । 'प्रस्थिता इन्द्राय सोमाः' इति याज्या चैन्द्री 'इदं ते सोम्यं मधु' (आश्व. श्रौ. ५. ५) इति । तस्मादैन्द्र्यौ ॥ [v]तम् इन्द्रं [v]प्रत्नथा

---

१. ग-घ-च-ण–'हे देवाः युष्मत्संबन्धिनि उरौ महति अनिबाधे नितरां बाधारहिते सुखे स्याम भवेम वयमत्रयः ॥ १६ ॥ वयमश्विनोः नूतनेन पूर्वमन्यैरननुभूतेन मयोभुवा सुखस्य भावयित्रा सुप्रणीति शोभनप्रणयनवता अवसा (रक्षणेन) रक्षणेन संगमेम संगच्छेमहि । हे अमृता अमरणावश्विनौ नवः (नो) अस्मभ्यं रयिं धनमावहतं प्रापयतम् । उत वीरान् सुवीर्यवतः पुत्रान् अपि आवहतम् । विश्वानि सौभगान्यप्यावहतम् ॥ १७ ॥ २. झ-त-न-ट-अतिरिक्तोक्थ्ये; ३. झ-त-भ-र- इति च ।

पुरातना यजमाना इव [v]पूर्वथा अस्मदीयाः पूर्वे यथा [v]विश्वथा विश्वे सर्वे प्राणिनो यथा [v]इमथा इमे इदानीं वर्तमानाः यजमानाः । ते यथेन्द्रस्य स्तुत्या फलमलभन्त तद्वद्वयमपि हे अन्तरात्मन् त्वमपि [v]ज्येष्ठतातिं ज्येष्ठं [v]बर्हिषदं बर्हिषि सीदन्तं [v]स्वर्विदं सर्वज्ञं सर्वस्य लम्भयितारं वा [v]प्रतीचीनं प्रत्यस्मदभिमुखमञ्चन्तं [v]वृजनम् । बलनामैतद्बलवति वर्तते । बलवन्तम् [v]आशुं शीघ्रगामिनं व्याप्तं वा [v]जयन्तं सर्वमभिभवन्तमिन्द्रं [v]गिरा स्तुत्या साधनेन [v]दोहसे धुक्ष्व सर्वदा सर्वान् कामान् । इत्यन्तरात्मनः[1] प्रैषः[1] । [v]यासु स्तुतिषु [v]वर्धसे प्रवृद्धो भवसि वर्धयसि वेन्द्रं यया[2] स्तुत्येति । यास्विति व्यत्ययेन बहुवचनम् ॥

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ॥ २ ॥

श्रिये । सुऽदृशीः । उपरस्य । याः । स्वः । विऽरोचमानः । ककुभाम् । अचोदते ।
सुऽगोपाः । असि । न । दभाय । सुऽक्रतो इति सुऽक्रतो ।
परः । मायाभिः । ऋते । आस । नाम । ते ॥ २ ॥

हे इन्द्र [v]स्वः स्वर्गे[3] [v]विरोचमानः[4] त्वम् [v]अचोदते अप्रेरयितुः ॥ षष्ठ्यर्थे चतुर्थी ॥ [v]उपरस्य मेघस्य संबन्धिन्यः [v]सुदृशीः सुरोचमानाः [v]याः आपः सन्ति तासामपां [v]ककुभां सर्वासां दिशां मध्ये [v]श्रिये प्राणिनां श्रयणाय प्रेरको भवेति शेषः । हे [v]सुक्रतो शोभनवृष्टिप्रदानादिकर्मन्निन्द्र[5] त्वं [v]सुगोपाः प्राणिनां सुष्ठु गोपायितासि । अतः [v]न [v]दभाय न दम्भनाय वधाय प्राणिनां न [v]असि न प्रभवसि । त्वं च [v]मायाभिः आसुरीभिः [v]परः मायाभ्यः परस्माद्वर्तमानः । यस्मात् [v]ते त्वदीयं [v]नाम नामकं रूपम् [v]ऋते सत्यलोके [v]आस आस्ते ॥

अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरिः ।
प्रसर्सृाणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विसुहा हितः ॥ ३ ॥

अत्यम् । हविः । सचते । सत् । च । धातु । च । अरिष्टऽगातुः । सः । होता । सहःऽभरिः ।
प्रऽसर्सृाणः । अनु । बर्हिः । वृषा । शिशुः । मध्ये । युवा । अजरः । विऽसुहा । हितः ॥ ३ ॥

इयमाग्नेयी होतृत्वयुवत्वादिलिङ्गैः । अयमग्निः [v]अत्यं सततमतनार्हं[5] [v]हविः आज्यादिकं [v]सचते सेवते । कीदृशं हविः । [v]सत् । सत्फलसाधनत्वाद्धविरपि सत् । [v]धातु [v]च धारकं सर्वस्य । हूयमानस्य हविष आदित्यद्वारा वृष्टिसाधनत्वात् तया च वृष्ट्या प्रजोत्पत्तेर्धारकत्वम् । तथा हि–

१. ख-च-ञ-ण-न-भ-र–'इत्यन्तरात्मनः प्रैषः' नास्ति । २. ख-ञ-न-भ-र–यथा । ३. ख-च-ञ-ण–स्वर्गं प्रति रोचमानः; न–स्वर्गं प्रति विरोचमानः; भ-र–स्वर्गे विरोचमानः । ४. ख-ग-घ-च-ज-ञ-ण-भ-र-श–°कर्मेन्द्र । ५. ख-ग-घ-व-ज-ण-न-भ–सततगमनार्हम् ।

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' (मनु. ३. ७६) इति । [v]अरिष्टगातुः अहिंसितगमनः । सति तस्य गमने यज्ञनिष्पत्त्या[1] फलसिद्धेररिष्टगमनत्वम् । तदेवाह । [v]सः स खलु [v]होता होमनिष्पादकः [v]सहोभरिः बलस्य भर्ता [v]बर्हिः [v]अनु [v]प्रसर्त्राणः प्रकर्षेण सरन् [v]वृषा वर्षकः फलस्य [v]शिशुः स इव रक्षणीयोऽप्रौढो वा [v]युवा सर्वत्र मिश्रयिता [v]अजरः जरारहितः [v]विस्रुहा विस्रुहाणामोषधीनां [v]मध्ये [v]हितः निहितः स्थापितः एवंभूतः सचते ॥

प्र वः एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्यः ऋतावृधः ।
सुयन्तुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥ ४ ॥

प्र । वः । एते । सुऽयुजः । यामन् । इष्टये । नीचीः । अमुष्मै । यम्यः । ऋतऽवृधः ।
सुयन्तुऽभिः । सर्वऽशासैः । अभीशुऽभिः । क्रिविः । नामानि । प्रवणे । मुषायति ॥ ४ ॥

एषा सौरी वा । [v]एते[2] रश्मयः [v]सुयुजः सुष्ठु परस्परं संयुक्ताः [v]यामन् यज्ञगमने [v]इष्टये एषणाय [v]नीचीः । नीचं गच्छन्तीति शेषः । [v]अमुष्मै यजमानाय [v]यम्यः यम्या गमनार्हाः । अथवा यमो नियमितादित्यः । तस्य संबन्धिनः । [v]ऋतावृधः यज्ञस्य वर्धयितारश्च । अयमादित्यः [v]सुयन्तुभिः सुगमनैः [v]सर्वशासैः सर्वस्य शासकैः [v]अभीशुभिः रश्मिभिः [v]क्रिविः कर्ता [v]नामानि नामकान्युदकानि[3] [v]प्रवणे निम्ने भूप्रदेशे [v]मुषायति मुष्णाति आदत्ते इत्यर्थः । अथवाग्निनावाह्यस्याग्नेरेतेऽश्वा इष्टये यज्ञगमनाय यामनि रथे सुयुजः प्रगच्छन्ति । शिष्टं समानम् । क्रिविः क्रिविसदृशोऽग्निः प्रवणे नामानि हवींष्युक्तलक्षणाभिर्ज्वालाभिर्मुषायति आदत्ते ॥

संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥ ५ ॥

सम्ऽजर्भुराणः । तरुऽभिः । सुतेऽगृभम् । वयाकिनम् । चित्तऽगर्भासु । सुऽस्वरुः ।
धारऽवाकेषु । ऋजुऽगाथ । शोभसे । वर्धस्व । पत्नीः । अभि । जीवः । अध्वरे ॥ ५ ॥

हे [v]ऋजुगाथ शोभनस्तुतिक[4] अग्ने [v]तरुभिः तरुविकारैर्ग्रहैः [v]सुतेगृभम् अभिषुतेन रसेन गृहीतं [v]वयाकिनम् । कुत्सिता वयाः[5] शाखा वयाका लताः । तद्वन्तं सोमं [v]चित्तगर्भासु चित्तग्राहिणीषु स्तुतिषु स्तुतिभिः सह [v]संजर्भुराणः गृभ्णन् गृह्णन् [v]सुस्वरुः शोभनगमनः शोभनस्तुतिको वा त्वं [v]धारवाकेषु । धारयन्ति वाकान् स्तोत्राणीति धारवाका ऋत्विग्यजमानाः । तेषु मध्ये [v]शोभसे । किंच [v]अध्वरे [v]जीवः सर्वस्य जीवयिता [v]पत्नीः पालयित्रीरोषधीर्ज्वाला वा [v]अभि अभिमुखं [v]वर्धस्व अभिवर्धय ॥ ॥ २३ ॥

१. ख-च-ण–यज्ञनिष्पत्तौ । २. ख-च-झ-ण-भ–एते तव । ३. त–उदकानि । ४. ख-च-झ-ण-भ–शोभनस्तुतिकाम; श–शोभनस्तुतिमान् । ५. ख-च-झ-ण-त-भ-र-श–अला (अल्पाः ?) वयाः ।

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ॥ ६ ॥

यादृक् । एव । ददृशे । तादृक् । उच्यते । सम् । छायया । दधिरे । सिध्रया । अप्ऽसु । आ ।
महीम् । अस्मभ्यम् । उरुऽसाम् । उरु । ज्रयः । बृहत् । सुऽवीरम् । अनपऽच्युतम् । सहः ॥६॥

ऋषा वैश्वदेवी । यादृगेव दृदृशे यादृग्रूपमेव दृश्यते तादृगुच्यते तादृग्रूपमेवोच्यते । यथादृष्टमेव स्तूयते न तु परवचनप्रत्ययेन । यस्मात् छायया दीप्त्या सिध्रया साधिकया सह अप्सु व्यापिकासु स्तुतिषु अप्स्वेव वा आ सं दधिरे सम्यग्धारयन्ति स्वीयं रूपं स्तुतिं वा । ते देवाः महीं महतीं पूज्याम् उरुषां बहुदात्रीं रयिम् उरु प्रभूतं ज्रयः वेगं बृहत् महत् सुवीरं शोभनवीर्यमपत्यम् अनपच्युतम् अनुपक्षीणं सहः बलं चाभिभावुकम् अस्मभ्यं प्रयच्छन्त्वित्यर्थः ॥

वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥ ७ ॥

वेति । अग्रुः । जनिऽवान् । वै । अति । स्पृधः । सऽमर्यता । मनसा । सूर्यः । कविः ।
घ्रंसम् । रक्षन्तम् । परि । विश्वतः । गयम् । अस्माकम् । शर्म । वनवत् । स्वऽवसुः ॥ ७ ॥

इयं सौरी । सूर्यः देवः अग्रुः अग्रगामी जनिवान्वै जन्मवान् जायावान्वा । उषा अस्य जाया । वा इति प्रसिद्धौ । कविः क्रान्तदर्शी समर्यता समरमिच्छता मनसा स्पृधः संग्रामान् अति वेति अतिगच्छति मन्देहानसुरान् योद्धुम् । घ्रंसं दीप्तं गयं गृहमन्तरिक्षं वा विश्वतः[1] सर्वतः[1] रक्षन्तं परिचरेमेति शेषः । स देवः अस्माकं शर्म सुखं परि सम्यक् वनवत् दद्यात् । स्वावसुः स्वायत्तधनः सन् ॥

ज्यायांसमस्य यतुनस्य केतुनं ऋषिस्वरं चरति यासु नाम ते ।
यादृङिमन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥ ८ ॥

ज्यायांसम् । अस्य । यतुनस्य । केतुना । ऋषिऽस्वरम् । चरति । यासु । नाम । ते ।
यादृङिमन् । धायि । तम् । अपस्यया । विदत् ।
यः । ऊँ इति । स्वयम् । वहते । सः । अरम् । करत् ॥ ८ ॥

इयमाग्नेयी सौरी वा । हे देव ज्यायांसम् अतिशयेन प्रवृद्धम् अस्य यतुनस्य । यततिर्गतिकर्मा । गन्तुरस्य सूर्यस्य ॥ कर्मणि षष्ठयौ ॥ अमुं गन्तारं केतुना प्रज्ञापकेन कर्मणा उदयादिलक्षणेन विशिष्टम्

१. ख-च-ञ-ण-त-न-भ-र-विश्वं सर्वम् ; श-विश्वतः सर्वम् ।

vऋषिस्वरम् ऋषिभिः स्तुत्यं त्वां vचरति गच्छति । भजते यजमानः । केन साधनेन । vयासु स्तुतिषु vते त्वदीयं vनाम नमनं नामकं वा रूपं वर्तते ताभिरित्यर्थः । यद्वा । अस्य यतुनस्य गमनशीलस्य नव केतुना तमोनिर्हरणादिकर्मणा विशिष्टं त्वां चरति । vयादृङ्मिन् यादृशे कामे vधायि धत्ते ॥ कर्तरि क्विण् ॥ सामर्थ्यान्मनो गम्यते । vतम् । यथानिर्देशं प्रतिनिर्देष्टव्यत्वात्तादृशमित्यर्थो ज्ञातव्यः । तादृशं कामम् vअपस्यया कर्मणा हविःस्तुत्यादिलक्षणेन vविदत् विन्दते । vय vउ य एव स्वयम् अनन्यप्रेरितः सन् स्वमनीषयैव vवहते धारयति फलं vसः vअरम् अलमित्यर्थं vकरत् करोति । अथवा[1] य उ य एव स्वयं वहते स्वयमेवानुतिष्ठति सोऽत्यर्थं कुर्यात् । न ह्यन्येन कारितं फलवद्भवति[2] ॥

समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विधते पूतबन्धनी ॥ ९ ॥

समुद्रम् । आसाम् । अव । तस्थे । अग्रिमा । न । रिष्यति । सवनम् । यस्मिन् । आऽयता ।
अत्र । न । हार्दि । क्रवणस्य । रेजते । यत्र । मतिः । विधते । पूतऽबन्धनी ॥ ९ ॥

इयमपि सौरी । vआसां स्तुतीनां vसमुद्रं समुद्रवत्पर्यवसानभूतं सूर्यम् vअग्रिमा अत्यन्तं श्रेष्ठा अस्मदीया स्तुतिः vअव vतस्थे अवगच्छति[3] । यद्वा आसां प्रजानामृत्विजां स्तुतिरिति संबन्धः । vसवनम् । सूयते सोमोऽत्रेति सवनं यज्ञगृहम् । vन vरिष्यति न हिंस्यते । किंतु प्रवर्धते इत्यर्थः । vयस्मिन्नायता विस्तीर्णानि स्तोत्राणि तत्सवनमिति । vअत्र अस्मिन् यजमानगृहे vक्रवणस्य स्तुतिकर्तुः vहार्दि हृदयसंबन्धि हृदयगतं काम्यं फलं vन vरेजते न विचलति । न मृषा भवति । vयत्र यस्मिन् स्तोतृगृहे vमतिः स्तुतिः vपूतबन्धनी पूतं सूर्यम् अनुबध्नती[4] vविधते अत्र न रेजत इति ॥

स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्र्योः ।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥ १० ॥

सः । हि । क्षत्रस्य । मनसस्य । चित्तिऽभिः । एवऽवदस्य । यजतस्य । सध्र्योः ।
अवऽत्सारस्य । स्पृणवाम । रण्वऽभिः । शविष्ठम् । वाजम् । विदुषा । चित् । अर्ध्यम् ॥ १० ॥

इयमपि सौरी । vस vहि स खलु सविता देवः सर्वैः स्तुत्यः । सर्वकामपूरक इत्यर्थः । हिशब्दो लोकवेदयोः प्रसिद्धद्योतकः[5] । तस्मात् सकाशात् । अत्र 'अन्ये च ऋषयोऽत्र दृष्टलिङ्गाः' इत्युक्तत्वात् क्षत्रादय ऋषयः । vक्षत्रस्य vमनसस्य vएवावदस्य vयजतस्य vसध्र्योः vअवत्सारस्य वैषामृषीणामस्माकं vरण्वभिः रमणीयाभिः vचित्तिभिः vस्पृणवाम पूरयाम । किम् । vशविष्ठं

---

१. ख-ग-घ-च-ज-ण-न-भ-'अथवा...भवति' नास्ति । २. ख-अभिगच्छति तु; च-झ-ण-त-न-भ-र-अभिगच्छति । ३. ख-च-झ-ण-न-भ-र-श-अनुबध्नन्ती । ४. ख-च-झ-ण-भ-र-प्रसिद्धद्योतकः ।

[v]वाजम् अतिशयेन बलवदन्नम् । 'अन्नं वै वाजः' (तै. ब्रा १. ३. ६. ६) इति श्रुतेः । [v]विदुषा [v]चित् विपश्चिता [v]अर्धं समर्धनीयं स्तृणवाम । क्षत्रादयो वयमिति संबन्धः ॥ २४ ॥

श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ॥ ११ ॥

श्येनः । आसाम् । अदितिः । कक्ष्यः । मदः । विश्वऽवारस्य । यजतस्य । मायिनः ।
सम् । अन्यम्ऽअन्यम् । अर्थयन्ति । एतवे । विदुः । विऽसानम् । परिऽपानम् । अन्ति । ते ॥ ११ ॥

मददेवत्येयम्[1] । विश्ववारादीनां त्रयाणामृषीणां स्वभूतः [1]आसाम् अपां सोमरसलक्षणानां [v]मदः [v]श्येनः शंसनीयगमनः क्षीघ्रं पातृसकाशं[2] गन्ता[2] [v]अदितिः अदीनोऽतिसमृद्धः [v]कक्ष्यः कक्ष्यपूरकश्च भवतीति शेषः । ते विश्ववारादयः सत्रे प्रवृत्ताः [1]एतवे सोमं प्राप्तुं तत्पानाय [v]अन्यमन्यं परस्परं [1]सम्[3] [v]अर्थयन्ति याचन्तेऽनुज्ञाम् । [v]ते [v]विषाणं विशेषेण मदस्य दातारं [v]परिपानम् [v]अन्ति अन्तिके [v]विदुः जानन्ति लभन्ते वा ॥

सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तयो वः सचा ।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥ १२ ॥

सदाऽपृणः । यजतः । वि । द्विषः । वधीत् । बाहुऽवृक्तः । श्रुतऽवित् । तयोः । वः । सचा ।
उभा । सः । वरा । प्रति । एति । भाति । च ।
यत् । ईम् । गणम् । भजते । सुप्रयावऽभिः ॥ १२ ॥

[v]सदापृणः सर्वदा दानशील एतन्नामा [v]यजतः यष्टा च[4] [v]बाहुवृक्तः बाहुभ्यां वृक्तदर्भश्च [v]श्रुतवित् श्रुतस्य वेत्ता च [v]तयोः च । एतेषां पञ्चानां परस्परापेक्षया प्रत्येकमेकवचनम् । सः सः[4] ऋषिः [v]द्विषः शत्रून् [v]वि [v]वधीत् हिंस्यात् [v]वः युष्माकं [v]सचा सहितः । युष्माभिः सहित इत्यर्थः । [v]सः ऋषिः [v]वरा श्रेष्ठौ [v]उभा उभौ इहलोकपरलोकविषयौ कामौ [v]प्रत्येति अभिगच्छति । [v]भाति [v]च । [v]यत् यस्मात् [v]ईम् एनं [v]गणं देवसंघं [v]सुप्रयावभिः सुष्टु प्रकर्षेण मिश्रयद्भिः स्तोत्रैः [v]भजते तस्मादेवं भवतीति[5] ॥

१. ख-च-ञ-ण-भ-र-मददेवत्येवम् ; न-मद यज । २. च-ञ-ण-त-भ-र-मातृमकाशगां माम् ; न-मातृसकाशगामी । ३. ख-च-ञ-ण-त-न-भ-र-श-'सम्' नास्ति । ४. ख-च-ञ-ण-न-भ-'च' नास्ति । ५. च-त-भ-र-'सः' नास्ति । ६. घ-ज-श-भातीति ।

सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥ १३ ॥

सुतम्ऽभरः । यजमानस्य । सत्ऽपतिः । विश्वासाम् । ऊधः । सः । धियाम् । उत्ऽअञ्चनः । भरत् । धेनुः । रसऽवत् । शिश्रिये । पयः । अनुऽब्रुवाणः । अधि । एति । न । स्वपन् ॥ १३ ॥

यजमानस्य अवत्सारस्य मम सुतंभरः यागनिर्वाहक एतन्नामा ऋषिः सत्पतिः सतां विद्यमानानां फलानां पालयिता होता भवतीत्यर्थः । सः च विश्वासां धियां सर्वेषां कर्मणाम् ऊधः उद्ग्ततरं फलम् उदञ्चनः ऊर्ध्वमुद्गमयिता फलप्रापक इत्यर्थः । धेनुः गौः[1] रसवत् सारवत् पयः भरत् अहरत् । तत्र पयः शिश्रिये श्रयति चास्य सामर्थ्यात् । तत्सर्वम् अनुब्रुवाणः अनुक्रमेण संकीर्तयन् न स्वपन् स्वापमकुर्वन् अनवरतम् अध्येति स्मरत्यवत्सारः । सुतंभरस्तादृश इति ॥

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १४ ॥

यः । जागार । तम् । ऋचः । कामयन्ते । यः । जागार । तम् । ऊँ इति । सामानि । यन्ति । यः । जागार । तम् । अयम् । सोमः । आह । तव । अहम् । अस्मि । सख्ये । निऽओकाः ॥ १४ ॥

यः देवः जागार सर्वदा विनिद्रो जागरूको गृहे वर्तते तम् ऋचः सर्वशाखाभिकाः कामयन्ते । यः च जागार तमु तमेव सामानि स्तोत्ररूपाणि[2] यन्ति प्राप्नुवन्ति । यो जागार तमयम् अभिषुतः सोमः आह वक्ति मां स्वीकुर्विति । हे अग्ने तादृशस्य तव सख्ये समानस्थाने हितकरणे न्योकाः नियतस्थानः अहम् अस्मि भवामि ॥

अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १५ ॥

अग्निः । जागार । तम् । ऋचः । कामयन्ते । अग्निः । जागार । तम् । ऊँ इति । सामानि । यन्ति । अग्निः । जागार । तम् । अयम् । सोमः । आह । तव । अहम् । अस्मि । सख्ये । निऽओकाः ॥ १५ ॥

पूर्वयैव[3] निगदितव्याख्या । य इत्यस्य स्थानेऽग्निरिति विशेषः ॥ ॥ २५ ॥ ॥ ३ ॥

अथ चतुर्थेऽनुवाके द्वादश सूक्तानि । तत्र 'विदा दिवः' इत्येकादशर्चं प्रथमं सूक्तम् । सदापृणो नामात्रेय ऋषिः । त्रिष्टुप् छन्दः । 'वै तत्' इत्युक्तत्वादिदमपि वैश्वदेवम् । 'विदा एकादश सदापृणः' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

---

१. ख-च-ञ-ण-न-भ-र-'गौः' नास्ति । २. ख-च-ञ-ण-न-भ-स्तोत्ररूपाणि सर्वाणि । ३. ख-च-ण-त-भ-र-अग्निर्जागार इति पञ्चदशी पूर्वयैव ।

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥ १ ॥

विदाः । दिवः । विऽस्यन् । अद्रिम् । उक्थैः । आऽयत्याः । उषसः । अर्चिनः । गुः ।
अप । अवृत । व्रजिनीः । उत् । स्वः । गात् । वि । दुरः । मानुषीः । देवः । आवरित्यावः ॥१॥

अत्रेन्द्रादयो लिङ्गोक्तदेवताः । अत्राङ्गिरसां पणिभिरपहृत्य गिरेरधः स्थापितानां गवामिन्द्रेण विमोकः प्रतिपाद्यते । [v]विदाः अवेदयदिन्द्रः । किम् । गा निगूढा इति संबन्धः । किं कुर्वन् । [v]उक्थैः अङ्गिरसां स्तुतिभिर्निमित्तभूताभिः [v]अद्रिं वज्रं [v]विष्यन् प्रक्षिपन् । रक्षकाणामुपरि गिरिभेदनाय च विष्यन् । [v]आयत्याः आगामिन्याः [v]उषसः संबन्धिनः [v]अर्चिनः रश्मयः [v]गुः अगच्छन् सर्वत्र प्रसृता अभवन् । [v]अपावृत अपावृणोत् [v]व्रजिनीः तमःपुञ्जवतीर्निशाः । [v]स्वः स्वरणशीलः[1] आदित्यः [v]उत् [v]गात् उदगात् । तथा कृत्वा [v]मानुषीः मनुष्यसंबन्धिनीः [v]दुरः द्वाराणि [v]देवः सूर्यः [v]वि [v]आवः व्यवृणोत् । अन्धकारापनयनेन मनुष्यादिव्यवहारायाकरोदित्यर्थः ॥

वि सूर्यो अमतिं न श्रियं सादोर्वाद्वावृधे माता जानती गात् ।
धन्वर्णसो नद्यः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥ २ ॥

वि । सूर्यः । अमतिम् । न । श्रियम् । सात् ।
आ । ऊर्वात् । गवाम् । माता । जानती । गात् ।
धन्वऽअर्णसः । नद्यः । खादःऽअर्णाः । स्थूणाऽइव । सुऽमिता । दृंहत । द्यौः ॥ २ ॥

[v]सूर्यः देवः [v]श्रियं दीप्तिं [v]वि [v]सात् विभजते प्रकाशयतीत्यर्थः । [v]अमतिं [v]न । रूपनामैतत् । रूपमिव द्रव्यम् । यथा द्रव्याणि घटपटादीनि नीलपीतादिरूपं लभन्ते तद्वत् । तथा [v]गवां रश्मीनां [v]माता उषाः [v]जानती सूर्यं उदेष्यति मया च व्युच्छनं[2] कर्तव्यमिति जानती [v]ऊर्वात् महतोऽन्तरिक्षात् [v]आ [v]गात् आगच्छति । तथा [v]नद्यः च [v]धन्वर्णसः ॥ धन्वतिर्गतिकर्मा । धन्वन्ति गच्छन्त्यर्णांसि यासु तास्तथोक्ताः । दीर्घाभावश्छान्दसः ॥ [v]खादोअर्णाः भक्षितकूलोदकाः । कूलंकषा इत्यर्थः । नद्यश्चैवंरूपा भवन्ति । किंच [v]द्यौः च [v]सुमिता सुष्ठु गृहं[3] स्थापिता[3] [v]स्थूणेव गृहाधारस्तम्भ इव [v]दृंहत दृढाभवत्[4] । एतत्सर्वं सूर्यस्याज्ञयेति भावः ॥

अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूमं ॥ ३ ॥

अस्मै । उक्थाय । पर्वतस्य । गर्भः । महीनाम् । जनुषे । पूर्व्याय ।
वि । पर्वतः । जिहीत । साधत । द्यौः । आऽविवासन्तः । दसयन्त । भूमं ॥ ३ ॥

१. ख-च-झ-ण-त-न-भ-र–सरणशीलः । २. त-र–व्युच्छन्दनम् । ३. ख-च-ण-गृहस्थापिता ; झ-भ-र–गृहास्थापिता । ४. ख-च-ण-भ–दृढाभवत् ।

[v]अस्मै मह्यम् [v]उक्थाय स्तोत्रे [v]पर्वतस्य पर्ववतो मेघस्य [v]गर्भः गर्भस्थानीयमुदकं [v]जिहीत चलति। चालयति वेन्द्रः। कीदृशायास्मै। [v]महीनां महतीनां स्तुतीनां[२] [v]जनुषे उत्पादयित्रे [v]पूर्व्याय प्रत्नाय। तदेव पुनरुच्यते। [v]पर्वतः मेघः [v]वि जिहीत। [v]द्यौः च [v]साधत साधयति वृष्टिम्। [v]आविवासन्तः सर्वतः परिचरन्तोऽङ्गिरसः [v]भृम अत्यधिकं [v]दसयन्त उपक्षपयन्त्यात्मानं कर्मभिः ॥

सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्वग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ॥ ४ ॥

सुऽउक्तेभिः । वः । वचःऽभिः । देवऽजुष्टैः । इन्द्रा । नु । अग्नी इति । अवसे । हुवध्यै ।
उक्थेभिः । हि । स्म । कवयः । सुऽयज्ञाः । आऽविवासन्तः । मरुतः । यजन्ति ॥ ४ ॥

हे [v]इन्द्रा हे [v]अग्नी। परस्परापेक्षया प्रत्येकं द्विवचनम्। यद्यप्येकमेव पदं मध्ये व्यवधानं छान्दसम्। हे इन्द्राग्नी [v]वः युवाम् ॥ व्यत्ययेन बहुवचनम् ॥ [v]देवजुष्टैः देवैः सेवनीयैः [v]सूक्तेभिः सूक्तैः सुवचनैः शोभनगुणप्रकाशनप्रवणैः [v]वचोभिः [v]अवसे अस्मद्रक्षणाय [v]हुवध्यै आह्वयामि। [v]नु क्षिप्रं युवाम् [v]उक्थेभिः स्तोत्रैः [v]कवयः अनूचानाः पूर्वे ऋषयः [v]सुयज्ञाः शोभनयागाः [v]आविवासन्तः स्तुत्यादिना परिचरन्तः [v]मरुतः मरुत्सदृशाः कर्मसु शीघ्राः [v]यजन्ति पूजयन्ति। [v]हि [v]स्म इति पूरणौ ॥

एता न्वद्य सुध्यो३ भवाम प्र दुच्छुना इनवामा वरायः ।
आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ ॥ ५ ॥

एतो इति । नु । अद्य । सुऽध्यः । भवाम । प्र । दुच्छुनाः । मिनवाम । वरीयः ।
आरे । द्वेषांसि । सनुतः । दधाम । अयाम । प्राञ्चः । यजमानम् । अच्छ ॥ ५ ॥

अयमङ्गिरसां वादः। [v]अद्य अस्मिन् यागदिने [v]नु क्षिप्रम् [v]एतो[२] एत गच्छत। [v]सुध्यः शोभनकर्माणः [v]भवाम। [v]दुच्छुनाः द्विषः [v]प्र [v]मिनवाम प्रकर्षेण हिंसाम [v]वरीयः अत्यन्तमित्यर्थः। तदेवोच्यते। [v]सनुतः संभक्तॄन् [v]द्वेषांसि यजमानस्य द्वेष्टॄन् [v]आरे दूरे [v]दधाम स्थापयाम। यद्वा। सनुतरित्यन्तर्हितनाम । पूर्वं प्रकाशवैरिणां वध उक्त इदानीं प्रच्छन्नानामिति विवेकः। तदर्थं [v]यजमानं [v]प्राञ्चः[३] सदापूणमवत्सारं च[४] [v]अच्छ अभिमुखम्[५] [v]अयाम गच्छाम ॥ ॥ २६ ॥

---

१. ख-च-झ-ण-न-भ-र-'स्तुतीनाम्' नास्ति। २. त-'एतो' नास्ति। ३. ख-च-झ-ण-त-न-भ-र-श-'प्राञ्चः' नास्ति। ४. ख-वाभिमुखम्; च-ण-नाभिमुरं म; झ-न-भ-र-श-वाच्छाभिमुखम्।

एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वङ्कुरापा पुरीषम् ॥ ६ ॥

आ । इत । धियम् । कृणवाम । सखायः । अप । या । माता । ऋणुत । व्रजम् । गोः ।
यया । मनुः । विशिऽशिप्रम् । जिगाय । यया । वणिक् । वङ्कुः । आप । पुरीषम् ॥ ६ ॥

इदमाङ्गिरसां वाक्यम् । [v]एत आगच्छत । आगत्य च [v]धियं स्तुतिं [v]कृणवाम करवाम । हे [v]सखायः परस्परं सखिभूता अङ्गिरस इत्याङ्गिरसां वचनम् । [v]या धीः [v]माता गवां निर्मात्री [v]गोः गवां [v]व्रजं पणिभिरपहृतम् [v]अप [v]ऋणुत अपावृणोत्[1] । [v]यया च [v]मनुः [v]विशिशिप्रं विगतहनुं शत्रुं [v]जिगाय जितवान् । यद्वा । मनुः सर्वस्य मन्तेन्द्रो विशिशिप्रो वृत्रः । स तमस्माभिः कृतया स्तोमलक्षणया[2] धिया जिगाय । [v]यया च [v]वणिक् वणिगिवाल्पेन कर्मणा बहुफलाकाङ्क्षी कक्षीवान् [v]वङ्कुः जलेच्छया वनगामी [v]पुरीषं पूरकमुदकम् [v]आप । ' याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशः ' (ऋ. सं. १. ११२. ११) इति हि श्रुतम् ॥

अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद्विश्वानि सत्याङ्गिराश्चकार ॥ ७ ॥

अनूनोत् । अत्र । हस्तऽयतः । अद्रिः । आर्चन् । येन । दश । मासः । नवऽग्वाः ।
ऋतम् । यती । सरमा । गाः । अविन्दत् । विश्वानि । सत्या । अङ्गिराः । चकार ॥ ७ ॥

[v]अत्र अस्मिन् यज्ञे [v]अद्रिः अभिषवग्रावा [v]हस्तयतः हस्तेन संहतः सन् [v]अनूनोत् । नौतिरत्र शब्दमात्रे वर्तते । अशब्दयत् । [v]येन ग्राव्णा तदभिषवेण [v]दश [v]मासः मासान् दशमासपर्यन्तं [v]नवग्वाः । नवमासपर्यन्तं गवार्थमनुतिष्ठन्तोऽङ्गिरसो नवग्वाः । नवगोयुक्ता वा [v]आर्चन् अपूजयन्निन्द्रम् । यद्वा । दशसंख्याकमासोपेता दशमासानुष्ठाना अङ्गिरसः अपरे[3] नवग्वाश्चैते सर्वेऽपि येनार्चन्ति । ' नवग्वासः सुतसोमास इन्द्रम् ' (ऋ. सं. ५. २९. १२) इति हि निगमः । [v]ऋतं सत्यं यज्ञं वा [v]यती प्राप्नुवती [v]सरमा सरणशीला स्तुतिरूपा वागङ्गिरसां गवार्थमिन्द्रेण प्रहिता देवशुनी वा[4] [v]गा [v]अविन्दत् पणिभिरपहृताः । [v]विश्वानि सर्वाणि स्तुत्यादिलक्षणानि [v]सत्या सत्यानि [v]चकार [v]अङ्गिराः ॥

विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवन्त ।
उत्सं आसां परमे सधस्थ ऋतस्य पथा सरमा विदद्गाः ॥ ८ ॥

विश्वे । अस्याः । विऽउषि । माहिनायाः । सम् । यत् । गोभिः । अङ्गिरसः । नवन्त ।
उत्सः । आसाम् । परमे । सधऽस्थे । ऋतस्य । पथा । सरमा । विदत् । गाः ॥ ८ ॥

---

१. ख-च-ञ-ण-न-भ– गा व्यवृणोत्; त-र–अपाव्यवृणोत् । २. ख-च-ञ-ण-न-भ-र–सोमलक्षणया । ३. त–अवरे । ४. ख-च-ञ-ण-त-न-भ-र-श–' वा ' नास्ति ।

vविश्वे सर्वे vअङ्गिरसः vमाहिनायाः महनीयायाः vअस्याः उषसः vव्युषि व्युच्छने सति गवामावरकेऽन्धकारेऽपवृते सति vयत् यदा vगोभिः vसं vनवन्त संजग्मिरे तदा vआसां गवाम् vउत्सः क्षीराद्युत्स्रावः vपरमे उत्कृष्टे vसधस्थे सहस्थाने यज्ञे उपयुक्तोऽभवदित्यर्थः। vऋतस्य सत्यस्य vपथा मार्गेण vसरमा वाक् देवशुनी वा vगाः निगूढाः vविदत् अलभत। यद्वा। आसां गवां परमे सधस्थे सहस्थाने व्रजस्य निगूहनप्रदेश उत्स उदकस्य प्रस्रवणो वर्तते। बिलभित्यर्थः। तेन ऋतस्य उदकस्य पथा मार्गेण सरमा गा विदत्॥

आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद्गोषु गच्छन्॥ ९॥

आ। सूर्यः। यातु। सप्तऽअश्वः। क्षेत्रम्। यत्। अस्य। उर्विया। दीर्घऽयाथे।
रघुः। श्येनः। पतयत्। अन्धः। अच्छ। युवा। कविः। दीदयत्। गोषु। गच्छन्॥ ९॥

vसूर्यः सर्वस्य प्रेरको देवः vसप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा vआ vयातु अस्मदभिमुखमागच्छतु। vयत् यस्मात् vअस्य सूर्यस्य vदीर्घयाथे दीर्घगमने vक्षेत्रं गन्तव्यप्रदेशः vउर्विया उरु अतिप्रभूतायामः। स एव देवः vरघुः लघुगमनः सन् vश्येनः शंसनीयगमनः vअन्धः दीयमानं हविः vअच्छ अभिलक्ष्य vपतयत् आगच्छति। vयुवा सर्वत्र मिश्रयिता vकविः क्रान्तदर्शी सन् vगोषु[1] रश्मिषु vगच्छन्[2] मध्ये[3] वर्तयन्[4] vदीदयत् दीप्यते। यद्वा। श्येनः सुपर्णो[5]ऽन्धोऽच्छ पतयत्[6]। द्युलोकस्थं सोमलक्षणं देवानामन्नमस्मद्यागार्थमानेतुं तदभिमुखमगात्। युवेत्यादि शिष्टं समानम्॥

आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः।
उदना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन्॥ १०॥

आ। सूर्यः। अरुहत्। शुक्रम्। अर्णः। अयुक्त। यत्। हरितः। वीतऽपृष्ठाः।
उदना। न। नावम्। अनयन्त। धीराः। आऽशृण्वतीः। आपः। अर्वाक्। अतिष्ठन्॥ १०॥

vसूर्यः देवः vशुक्रं दीप्तम् vअर्णः उदकं प्रति vआ vअरुहत् सर्वतः प्रादुर्भवति। vयत् यस्मात् यदा वा vहरितः अश्वान् vवीतपृष्ठाः कान्तपृष्ठान् vअयुक्त रथे अयोजयन्[7] तदा तं सूर्यं vधीराः धीमन्तो यजमानादयः vउदना उदकेन vनावं[8] vन[9] नावमिव vअनयन्त। तदा vआशृण्वतीः सर्वतोऽनुज्ञां कुर्वाणाः vआपः vअर्वाक्[10] अवाङ्मुखाः vअतिष्ठन् अभवन्॥

१. ख-च-ञ-ण-न-न-भ-र-'गोषु रश्मिषु गच्छन्' नास्ति। २. ख-च-ण-न-भ-'मध्ये वर्तयन्' नास्ति। ३. ख-च-ण-सुष्ठु अन्धो अपतयत्; ञ-भ-न-र-सुअन्धो अपतयत्; श-अन्धो अपतयत्। ४. ख-च-ञ-ण-भ-अयोजत; र-अयोजयत। ५. ख-च-ण-नावम्; श-नावमित्; न-भ-'नावं न' नास्ति; र-नावमिव। ६. ख-च-ञ-ण-न-भ-र-'अर्वाक्' नास्ति।

धियं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः ।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥ ११ ॥

धियम् । वः । अप्ऽसु । दधिषे । स्वःऽसाम् । ययौ । अतरन् । दश । मासः । नवऽग्वाः ।
अया । धिया । स्याम । देवऽगोपाः । अया । धिया । तुतुर्याम । अति । अंहः ॥ ११ ॥

हे देवाः [v]वः[१] युष्माकं [v]धियं स्तुतिम् [v]अप्सु[२] अब्निमित्तां[३] [v]स्वर्षां सर्वस्य दात्रीं [v]दधिषे धारयामि ॥ व्यत्ययेन मध्यमः ॥ [v]यया धिया कर्मणा [v]नवग्वाः अङ्गिरसः [v]दश [v]मासः [v]अतरन् सत्रमनुतिष्ठन्तः[४] [v]अया अनया [v]धिया [v]देवगोपाः देवैर्गुप्ताः [v]स्याम भवेम । [v]अया [v]धिया [v]अंहः पापम् [v]अति[५] [v]तुतुर्याम अतितरेम[६] ॥ ॥ २७ ॥

' हयो न[७] ' इत्यष्टर्चं द्वितीयं सूक्तं प्रतिक्षत्रस्यार्षम् । अष्टमी द्वितीया च त्रिष्टुभौ शिष्टाः षड् जगत्यः । आदितः षड्भिश्चैद्येभ्यः सप्तम्यष्टम्योर्देवपत्न्यो देवता । तथा चानुक्रान्तं—' हयोऽष्टौ प्रतिक्षत्रोऽन्यो द्वृचो देवपत्नीभ्यामन्या त्रिष्टुप् द्वितीया च ' इति । सूक्तविनियोगो लैङ्गिकः ॥

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥ १ ॥

हयः । न । विद्वान् । अयुजि । स्वयम् । धुरि । ताम् । वहामि । प्रऽतरणीम् । अवस्युवम् ।
न । अस्याः । वश्मि । विऽमुचम् । न । आऽवृतम् । पुनः ।
विद्वान् । पथः । पुरःऽएता । ऋजु । नेषति ॥ १ ॥

[v]हयो [v]न अश्व इव [v]विद्वान् सर्वज्ञः प्रतिक्षत्रः [v]स्वयम् अनन्यप्रेरितः सन् [v]धुरि यज्ञात्मिकायाम् [v]अयुजि युक्तोऽभवत् । [v]तां धुरं [v]प्रतरणीं प्रकर्षेण तारयित्रीम् [v]अवस्युवं रक्षयित्रीं [v]वहामि । धारयाम्यहमध्वर्युर्होता वा । [v]अस्याः धुरः [v]विमुचं विमोचनं परित्यागं [v]न [v]वश्मि न कामये । [v]नावृतं [v]पुनः[५] पुनरावरणं धारणमपि न च वश्मि । मम को[८] भार इति[८] तदेवोच्यते । [v]विद्वान् मार्गाभिज्ञोऽन्तर्यामी देवः [v]पुरएता पुरतो गन्ता सन् [v]पथः यज्ञमार्गान् [v]ऋजु अकुटिलं [v]नेषति प्रापयति ॥

---

१. ख-च-ञ-ण-न-भ-र-' वः ' नास्ति । २. ख-च-ञ-ण-न-भ-र-' अप्सु अब्निमित्ताम् ' नास्ति । ३. ग-घ-ज-समनुतिष्टन्त; त-र-सर्वत्रमनुतिष्टन्तः । ४. ख-च-ञ-ण-न-भ-र-श-' अति ' नास्ति । ५. ख-च-ण-भ-तरेम । ६. त-न विद्वान् । ७. ख-च-ञ-ण-त-न-भ-र-' पुनः ' नास्ति । ८. ख-च-ण-को भारोच्यतेति; ञ-त-भ-र-को भारोच्येति; न-को भारो भवतीति; श-को भारो देवोच्यते ।

अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्राः पूषा भगः सरस्वती जुषन्त ॥ २ ॥

अग्ने । इन्द्र । वरुण । मित्र । देवाः । शर्धः । प्र । यन्त । मारुत । उत । विष्णो इति ।
उभा । नासत्या । रुद्रः । अध । ग्राः । पूषा । भगः । सरस्वती । जुषन्त ॥ २ ॥

हे [v]अग्ने [v]इन्द्र [v]वरुण [v]मित्र हे[1] [v]देवाः यूयं [v]शर्धः बलमस्माकं [v]प्र [v]यन्त प्रापयत ॥ अत्र सर्वत्र पूर्वस्याविद्यमानत्वेनोत्तरस्योत्तरस्य पादादित्वादनिघातः । प्रथमस्य तु स्वत एव पादादित्वम् ॥ [v]उत अपि च हे [v]मारुत मारुतानि मरुतां बलानि हे [v]विष्णो यूयं शर्धः प्र यन्त । विष्णो इत्यस्य उत इत्यनेन व्यवधानान्निघातः ॥ किंच [v]उभा उभौ [v]नासत्या सत्यभूतौ [v]रुद्रः [v]अध अथ [v]ग्राः एतेषां देवानां स्त्रियश्च [v]पूषा [v]भगः [v]सरस्वती च [v]जुषन्त सेवन्तामस्मदीयं यज्ञं स्तुतिं वा ॥

इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥ ३ ॥

इन्द्राग्नी इति । मित्रावरुणा । अदितिम् । स्वरिति स्वः ।
पृथिवीम् । द्याम् । मरुतः । पर्वतान् । अपः ।
हुवे । विष्णुम् । पूषणम् । ब्रह्मणः । पतिम् । भगम् । नु । शंसम् । सवितारम् । ऊतये ॥ ३ ॥

इन्द्रादिसवित्रन्तान् चतुर्दश देवान् [v]ऊतये अस्मद्रक्षणाय [v]हुवे आह्वयामि स्तौमि[2] वा ॥ स्वरित्यादित्य उच्यते स्वरणात्[2] ॥

उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥ ४ ॥

उत । नः । विष्णुः । उत । वातः । अस्रिधः । द्रविणःऽदाः । उत । सोमः । मयः । करत् ।
उत । ऋभवः । उत । राये । नः । अश्विना । उत । त्वष्टा । उत । विऽभ्वा । अनु । मंसते ॥४॥

[v]उत अपि च [v]नः अस्माकं [v]विष्णुः व्यापको देवः [v]मयस्करत । मय इति सुखनाम । सुखं करोतु । [v]उत अपि च [v]वातः वायुः [v]अस्रिधः अहिंसकः सन् मयस्करत् । किंच [v]द्रविणोदाः धनस्य दाता [v]सोमः अपि मयस्करत् । [v]उत अपि च [v]ऋभवः [v]नः अस्मभ्यं [v]राये धनाय [v]अनु [v]मंसते अनुमन्यन्ताम् । [v]उत [v]अश्विना[3] अश्विनौ च [v]उत [v]त्वष्टा देवः [v]उत [v]विभ्वा ऋभूणामन्यतमो देवः । एते सर्वेऽप्यनु मंसते । यद्वा । अनुमंस्त इति प्रत्येकं संबन्धनीयम् ॥

---

१. ग-घ-ज-श–'हे' नास्ति । २. ग-घ-ज–स्वः आदित्यः नु क्षिप्रं प्रशस्यं सवितृविशेषणम् ।
३. ख-च-ञ-ण-न-भ-र-श–'अश्विना' नास्ति ।

उत त्यन्नो मारुतं शर्ध आ गमदिविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ॥ ५ ॥

उत । त्यत् । नः । मारुतम् । शर्धः । आ । गमत् । दिविऽक्षयम् । यजतम् । बर्हिः । आऽसदे ।
बृहस्पतिः । शर्म । पूषा । उत । नः । यमत् । वरूथ्यम् । वरुणः । मित्रः । अर्यमा ॥ ५ ॥

vउत अपि च vत्यत् तत् vमारुतं vशर्धः मरुतां बलं संघः vनः अस्मान् vआ vगमत् आगच्छतु । कीदृशं तच्छर्धः । vदिविक्षयं द्युलोके वर्तमानं vयजतं पूज्यम् । किमर्थमागमनमिति तदुच्यते । vबर्हिः बर्हिषि vआसदे उपवेष्टुम् । उपविश्य हविःस्वीकारायेत्यर्थः । किंच vबृहस्पतिः देवः vशर्म सुखं vयमत् यच्छतु । vउत vनः अस्मभ्यं vपूषा अपि यमत् । कीदृशं शर्म । vवरूथ्यम् । वारयति शीतवातादिकमिति वरूथं गृहम् । तदर्हं वरूथ्यम् । किंच वरुणादयस्त्रयोऽपि प्रत्येकं शर्म यच्छन्तु[1] ॥

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नव्यास्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥ ६ ॥

उत । त्ये । नः । पर्वतासः । सुऽशस्तयः । सुऽदीतयः । नव्यः । त्रामणे । भुवन् ।
भगः । विऽभक्ता । शवसा । अवसा । आ । गमत् । उरुऽव्यचाः । अदितिः । श्रोतु । मे । हवम् ॥६॥

vउत अपि च vत्ये ते vपर्वतासः पर्ववन्तः अद्रयः vसुशस्तयः शोभनस्तुतयः किंच vसुदीतयः सुदानाः vनव्यः च vत्रामणे पालने vनः अस्माकं vभुवन् भवन्तु । vभगः देवः vविभक्ता धनानां विभागकर्ता दाता सन् vशवसा अन्नेन vअवसा रक्षणेन च सह vआ vगमत् आगच्छतु । vउरुव्यचाः प्रभूतव्याप्तिः vअदितिः अदीना देवमाता vमे vहवं स्तुतिमाह्वानं वा vश्रोतु शृणोतु ॥

पत्नीसंयाजेषु देवपत्नीनां 'देवानां पत्नीः' इत्यादिके द्वे याज्यानुवाक्ये । सूत्रितं च— 'देवानां पत्नीरुशतीरवन्तु न इति द्वे' (आश्व. श्रौ. १. १०) इति ॥ आग्नेमारुतशस्त्रेऽप्येते । 'देवानां पत्नीरुशतीरवन्तु न इति द्वे राकामहमिति द्वे' (आश्व. श्रौ. ५. २०) इति ॥

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥ ७ ॥

देवानाम् । पत्नीः । उशतीः । अवन्तु । नः । प्र । अवन्तु । नः । तुजये । वाजऽसातये ।
याः । पार्थिवासः । याः । अपाम् । अपि । व्रते । ताः । नः । देवीः । सुऽहवाः । शर्म । यच्छत ॥७॥

१. ख-च-ण-भ–यच्छतु; झ-ञ–यच्छ ।

[v]देवानाम् इन्द्रादीनां [v]पत्नीः पत्न्यः [v]उशतीः उशत्योऽस्मदीयां स्तुतिं कर्म वा कामयमानाः [v]नः अस्मान् [v]अवन्तु रक्षन्तु । तथा [v]नः अस्माकं [v]तुजये बलवते पुत्राय [v]वाजसातये अन्नलाभाय संग्रामाय वा [v]प्रावन्तु प्रकर्षेण रक्षन्तु गच्छन्तु वा । [v]याः [v]पार्थिवासः पृथिवीसंबन्धिन्यः [v]याः च [v]अपाम् उदकानां [v]व्रते कर्मण्यन्तरिक्षे वर्तन्ते [v]ताः हे [v]देवीः देव्यो हे [v]सुहवाः शोभनाह्वाना यूयं [v]नः अस्मभ्यं [v]शर्म [v]यच्छत[१] ॥

उत ग्मा व्यन्तु देवपत्नीरिन्द्राण्य१ग्म्याश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥ ८ ॥

उत । ग्माः । व्यन्तु । देवऽपत्नीः । इन्द्राणी । अग्म्यायी । अश्विनी । राट् ।
आ । रोदसी इति । वरुणानी । शृणोतु । व्यन्तु । देवीः । यः । ऋतुः । जनीनाम् ॥ ८ ॥

[v]उत अपि च [v]ग्माः स्त्रियः [v]देवपत्नीः देवपत्न्यो देवाः पतयो यासां ताः । ताइदयः [v]व्यन्तु हविर्भक्षयन्तु । ता विविच्योच्यन्ते । [v]इन्द्राणी इन्द्रस्य पत्नी [v]अग्म्यायी अग्नेः पत्नी [v]अश्विनी अश्विनोः पत्नी [v]राट् राजमाना । किंच [v]रोदसी । ' रुद्रस्य पत्नी ' (निरु. ११. ४९) इति यास्केनोक्तम् । एवं सति ' विषितस्तुका रोदसी ' (ऋ. सं. १. १६७. ५) इत्यत्र यथाद्युदात्तप्रगृह्यते न[२] स्तः[२] तद्वदत्रापि भाव्यम् । तथापि शाकल्येन महर्षिणैवमुक्तत्वात्तथैव द्रष्टव्यम् । [v]वरुणानी वरुणस्य पत्नी [v]आ सर्वतः प्रत्येकं [v]शृणोतु । किंच [v]देवीः पत्नीसंयाजदेव्यः [v]व्यन्तु खादन्तु[३] हविः । [v]यः [v]जनीनां देवजायानाम् [v]ऋतुः कालस्तदभिमानी देवोऽपि शृणोतु वेतु च । अत्र ' अपि च ग्मा व्यन्तु देवपत्न्यः ' (निरु. १२. ४६) इत्यादि निरुक्तं द्रष्टव्यम् ॥ ॥ २८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[४] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके द्वितीयोऽध्यायः समाप्तः ॥

१. च-च-ण-भ-यच्छतु; झ-त-न-र-यच्छन्तु । २. ख-च-झ-ण-भ-न; न-' न स्तः ' नास्ति ३. ख-च-झ-ण-त-न-भ-श-खादयन्तु; ग-घ-ज-स्वदेयम् । ४. ण-सायणाचार्येण ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ तृतीयोऽध्याय आरभ्यते । तत्र ' प्रयुञ्जती ' इति सप्तर्चं तृतीयं सूक्तं प्रतिरथस्यार्षं त्रैष्टुभम् । पूर्वत्र ' वैश्वदेवं वै तत् ' इत्युक्तत्वादिदमपि वैश्वदेवम् । ' प्रयुञ्जती सप्त प्रतिरथः ' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥ १ ॥

प्रऽयुञ्जती । दिवः । एति । ब्रुवाणा । मही । माता । दुहितुः । बोधयन्ती ।
आऽविवासन्ती । युवतिः । मनीषा । पितृऽभ्यः । आ । सदने । जोहुवाना ॥ १ ॥

एषोपस्या । [v]प्रयुञ्जती प्राणिनः प्रस्तुतेषु कर्मसु [v]दिवः द्युलोकात् [v]एति आगच्छति [v]ब्रुवाणा स्तूयमाना ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]मही महती [v]माता प्रकाशस्य देवानां वा निर्मात्री [v]दुहितुः भूम्याः [v]बोधयन्ती बोधं कुर्वाणा । तदुपजीव्यत्वात् दुहितृत्वम्[1] उपचर्यते । यद्वा दुहितुर्दिव इति संबन्धः । उषसां दिवो दुहितृत्वं ' व्युच्छा दुहितर्दिवः ' (ऋ. सं. १.४८.१) इत्यादिषु प्रसिद्धम् । अन्यत्र च ' दिवो दुहिता भुवनस्य पत्नी ' (ऋ. सं. ७. ७५. ४) इत्युषसः[2] द्युदुहितृत्वम्[3] आम्नातम् । अत इदमधिगम्यते । कदाचिद्द्यौरुषसो जायत उषाश्च दिव इति । ' प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिव-मित्यन्य आहुरुषसमित्यन्ये ' (ऐ. ब्रा. ३. ३३) इति हि श्रूयते । लिङ्गं च दृश्यते कार्यकारणभावव्यत्यये ' अदितेर्दक्षो अजायत दक्षाद्वदितिः[4] ' (ऋ. सं १०. ७२. ४) इति ॥ किंच [v]आविवासन्ती परिचरन्ती [v]युवतिः मिश्रयन्ती सर्वत्र नित्यतरुणी वा [v]मनीषा स्तुतिमती [v]पितृभ्यः ॥ तृतीयार्थे पञ्चमी ॥ पितृभिः पालकैर्देवैः सह [v]सदने यागगृहे [v]आ सर्वतः [v]जोहुवाना आह्वयमाना । यद्वा । पितृभ्यः कर्मणां पालकेभ्यो यजमानेभ्य इष्टप्रापणेन पालकेभ्यो वा तेषामर्थाय जोहुवाना ॥

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तासः उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥ २ ॥

अजिरासः । तत्ऽअपः । ईयमानाः । आतस्थिऽवांसः । अमृतस्य । नाभिम् ।
अनन्तासः । उरवः । विश्वतः । सीम् । परि । द्यावापृथिवी इति । यन्ति । पन्थाः ॥ २ ॥

१. ख-च-ञ-ण-न-भ-तदुहितृत्वम् । २. ख-च-ण-इति च उषसः; ञ-त-न-भ-र-चोषसः ।
३. ख-च-ञ-ण-त-न-भ-र-दुहितृत्वम्; श-दिवो दुहितृत्वम । ४ ख-च-ण-भ-दक्षाद्वदितिः परि ।

[v]अजिरासः गमनशीलाः । अजिः इरच्प्रत्ययान्तः ' अजिरशिशिर° ' (उ. सू. १. ५३) इत्यादिना निपातितः ॥ [v]तदपः तदेव प्रकाशनरूपं कर्म यस्य तत्तादृशमहः [v]ईयमानाः गच्छन्तः [v]अमृतस्य सूर्यस्य [v]नाभिं संनाहकं मण्डलम् अमृतस्योदकस्य वा नाभिमन्तरिक्षम् [v]आतस्थिवांसः आतिष्ठन्तः [v]अनन्तासः अपरिमिताः [v]उरवः व्याप्ताः [v]पन्थाः पतनशीला रश्मयः [v]द्यावापृथिवी [v]परि दिवं च पृथिवीं[१] चान्तरिक्षं च [v]विश्वतः परितः [v]यन्ति गच्छन्ति । [v]सीम् इति पूरणः ॥

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥ ३ ॥

उक्षा । समुद्रः । अरुषः । सुऽपर्णः । पूर्वस्य । योनिम् । पितुः । आ । विवेश ।
मध्ये । दिवः । निऽहितः । पृश्निः । अश्मा । वि । चक्रमे । रजसः । पाति । अन्तौ ॥ ३ ॥

सौर्योऽयं तृचः । [v]उक्षा उदकस्य कामानां वा सेक्ता [v]समुद्रः समुन्दनः । यद्वा । संमोदन्ते अस्मिन्[२] देवा इति समुद्रः । [v]अरुषः आरोचमानः [v]सुपर्णः सुगमनः [v]पूर्वस्य । अवयवलक्षणेयम् । पूर्वदिगवयवस्य [v]पितुः पालकस्यान्तरिक्षस्य [v]योनिम् उत्पादकमवयवम् [v]आ [v]विवेश आविष्टवान । पश्चात् [v]दिवः [v]मध्ये [v]निहितः [v]पृश्निः । प्राश्नुत एनं वर्ण इति पृश्निरादित्यः । [v]अश्मा सर्वत्र व्याप्तः । लुप्तोपमा वा । अश्मसदृशः [v]रजसः अन्तरिक्षस्य [v]अन्तौ पूर्वापरभागौ [v]वि [v]चक्रमे विक्रमते । [v]पाति च जगत् । जगद्रक्षार्थं क्रमते इत्यर्थः ॥

चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्म अन्तान् ॥ ४ ॥

चत्वारः । ईम् । बिभ्रति । क्षेमऽयन्तः । दश । गर्भम् । चरसे । धापयन्ते ।
त्रिऽधातवः । परमाः । अस्य । गावः । दिवः । चरन्ति । परि । सद्मः । अन्तान् ॥ ४ ॥

[v]चत्वारः ऋत्विजः [v]ईम् एनमादित्यं [v]क्षेमयन्तः क्षेममात्मन इच्छन्तः [v]बिभ्रति धारयन्ति हविर्भिः[३] स्तुतिभिश्च[४] । किंच [v]दश दिशः [v]गर्भं गर्भवन्मध्ये उत्पन्नमेनं [v]चरसे चरणाय उदयास्तमय-व्यवहाराय [v]धापयन्ते गमयन्ति । [v]त्रिधातवः त्रिप्रकाराः शीतोष्णवर्षभेदेन त्रिविधाः [v]अस्य आदित्यस्य [v]परमाः उत्कृष्टाः [v]गावः रश्मयः [v]दिवः अन्तरिक्षस्य [v]अन्तान् [v]परि परितः [v]सद्मः उदयानन्तरमेव [v]चरन्ति[४] गच्छन्ति ॥

---

१. ख-च-ञ-ण-न-भ-' पृथिवीम् ' नास्ति । २. ञ-न-र-तस्मिन । ३. ख-च-ञ-ण-त-न-भ-र- ' हविर्भिः स्तुतिभिश्च ' नास्ति । ४. ख-च-ञ-ण-त-न-भ-र- ' चरन्ति ' नास्ति ।

इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या सबन्धू ॥ ५ ॥

इदम् । वपुः । निऽवचनम् । जनासः । चरन्ति । यत् । नद्यः । तस्थुः । आपः ।
द्वे इति । यत् । ईम् । बिभृतः । मातुः । अन्ये इति ।
इहऽइह । जाते इति । यम्या । सबन्धू इति सऽबन्धू ॥ ५ ॥

[v]जनासः हे जना ऋत्विजः [v]इदं पुरतः दृश्यमानं [v]वपुः शरीरं मण्डलं [v]निवचनं स्तुत्यं भवतीति शेषः । यन्मण्डलमुपजीव्य [v]नद्यः [v]चरन्ति प्रवहन्ति । [v]आपः च [v]यत् मण्डलमधितस्थुः । मण्डलाधीनत्वात्तासाम् । [v]ईम् एतदुक्तलक्षणं यन्मण्डलं [v]द्वे अहोरात्रे [v]मातुः निर्मातुर्मातृस्थानीयादन्तरिक्षात् [v]अन्ये [v]इहेह [v]जाते इह चेह च सूर्ये जाते निष्पन्ने [v]यम्या यम्ये नियमनीये युग्मभूते वा [v]सबन्धू समानबले समानबन्धने उभयोरप्येक एव सूर्यो बन्धकोऽक्षो ययोस्तादृश्यौ [v]बिभृतः धारयतः ॥

वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥ ६ ॥

वि । तन्वते । धियः । अस्मै । अपांसि । वस्त्रा । पुत्राय । मातरः । वयन्ति ।
उपऽप्रक्षे । वृषणः । मोदमानाः । दिवः । पथा । वध्वः । यन्ति । अच्छ ॥ ६ ॥

[v]अस्मै सूर्याय [v]धियः स्तुतीः [v]अपांसि कर्माणि च [v]वि [v]तन्वते विस्तारयन्ति यजमानाः । [v]पुत्राय पुत्रस्थानीयाय [v]मातरः निर्माञ्य उषसो दिशो वा [v]वस्त्रा वस्त्राणि [v]वयन्ति निष्पादयन्ति । वस्त्रसदृशानि तेजांसि निबिडानि संपादयन्तीत्यर्थः । [v]वृषणः सेक्तुः सूर्यस्य [v]उपप्रक्षे उपपर्चने संपर्के सति [v]मोदमानाः हृष्यन्तः [v]वध्वः वधूस्थानीया रश्मयः [v]दिवस्पथा सूर्यसंबन्धिना मार्गेण [v]अच्छ अस्मदभिमुखं [v]यन्ति गच्छन्ति प्रसरन्ति ॥

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ ७ ॥

तत् । अस्तु । मित्रावरुणा । तत् । अग्ने । शम् । योः । अस्मभ्यम् । इदम् । अस्तु । शस्तम् ।
अशीमहि । गाधम् । उत । प्रतिऽस्थाम् । नमः । दिवे । बृहते । सदनाय ॥ ७ ॥

अत्र लिङ्गसिद्धा देवताः । हे [v]मित्रावरुणा मित्रावरुणौ [v]तत्[1] [v]इदं सूक्तं [v]शस्तं स्तुतम् [v]अस्तु भवतु । हे [v]अग्ने [v]तत् सूक्तं शस्तम् [v]अस्तु । [v]अस्मभ्यं [v]शं सुखाय [v]योः दुःखानाममिश्रणायेदं

१. ख-ञ-न-भ-र-श- ' तत् ' नास्ति ।

शस्तमस्तु । वयं च vअशीमहि प्राप्नुयाम vगाधं स्थितिम्[1] । vउत अपि च vप्रतिष्ठां स्थितेरविच्छित्तिं चाशीमहि । vनमः नमस्करोमि vदिवे द्योतमानाय सूर्याय vबृहते महते vसादनाय आश्रयाय विश्वस्य ॥ ॥ १ ॥

'कदु प्रियाय' इति पञ्चर्चं चतुर्थं सूक्तम् । प्रतिभानुर्नामात्रेय ऋषिः । जगती छन्दः । विश्वे देवा देवता । अत्रानुक्रमणिका—'कदु पञ्च प्रतिभानुर्जागतम्' इति । आभिप्लविके पञ्चमेऽहनि वैश्वदेवशस्त्रे इदं सूक्तं निविद्धानम् । सूत्रितं च—'कदु प्रियायेति वैश्वदेवम्' (आश्व. श्रौ. ७. ७) इति ॥

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥ १ ॥

कत् । ऊँ इति । प्रियाय । धाम्ने । मनामहे । स्वऽक्षत्राय । स्वऽयशसे । महे । वयम् ।
आऽमेन्यस्य । रजसः । यत् । अभ्रे । आ । अपः । वृणाना । विऽतनोति । मायिनी ॥ १ ॥

अत्र वैद्युताग्निसंस्तवः । vकदु कदा । उ इति पूरणः । vप्रियाय सर्वेषां प्रियभूताय । वृष्टिद्वारा हविरादिप्रयोजकत्वात् सर्वप्रियत्वमस्य प्रसिद्धम् । तादृशाय vधाम्ने तेजसे वैद्युताय । उत्तरवाक्ये अभ्रे अपः वितनोति इति वक्ष्यमाणत्वादिदं लभ्यते । कीदृशाय[2] । vस्वक्षत्राय स्वभूतबलाय किंच vस्वयशसे स्वभूतान्नाय । सर्वमप्यन्नं ह्यस्य स्वम् । vमहे महते पूज्याय vवयं कदा vमनामहे स्तवाम । vयत् । उत्तरत्र स्त्रीलिङ्गनिर्देशात् या इति विपरिणमयितव्यम् । या आग्नेयी शक्तिः vआमेन्यस्य समन्तान्मातव्यस्य vरजसः अन्तरिक्षस्य । अपरिमितमपि नभ इयदिति सर्वैर्मीयते । संबन्धिनि vअभ्रे मेघे vआ अधि मेघस्योपरि vअपः उदकानि वृष्टिलक्षणानि vवितनोति विस्तारयति vवृणाना आच्छादयन्ती सेच्यमाना वा vमायिनी । मायेति प्रज्ञानाम । प्रज्ञावती सती । यत् यस्य संबन्धिनी माध्यमिकी वागिति वा योज्यम् ॥

ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥ २ ॥

ताः । अत्नत । वयुनम् । वीरऽवक्षणम् । समान्या । वृतया । विश्वम् । आ । रजः ।
अपो इति । अपाचीः । अपराः । अप । ईजते । प्र । पूर्वाभिः । तिरते । देवऽयुः । जनः ॥ २ ॥

इयमुषस्या । vताः उषसः vअत्नत वितन्वन्ति । किम् । vवयुनं प्रज्ञानम् । कीदृशम् । vवीरवक्षणम् । वीरैर्ऋत्विग्भिर्वहनीयम् । यद्वा । वक्षणाः कार्यवोढारो येन प्रेर्यन्ते तत्तादृशम् । किंच vसमान्या एकरूपया vवृतया आवरकया दीप्त्या vविश्वम् vआ सर्वमपि vरजः जगत् अत्नत । एवं सति vदेवयुः देवकामः vजनः vअपाचीः अपाञ्चनाः प्रतिनिवृत्तमुखीः vअपराः अन्या आगामिनीः

१. ख-च-ञ-ण-न-भ-र–स्तुतिम् । २. ख-च-ञ-ण-त-न-भ-र–कीदृशाय बलाय ।

उषसः [v]अपेजते अपचालयति । अपरोऽपशब्दः पूरणः । [v]पूर्वाभिः ताभिः [v]प्र [v]तिरते । प्रपूर्वस्तिरतिर्वर्धनार्थः । वर्धयति स्वमनीषां वर्धते वा स्वयम् ॥

आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥ ३ ॥

आ । ग्रावऽभिः । अहन्येभिः । अक्तुऽभिः । वरिष्ठम् । वज्रम् । आ । जिघर्ति । मायिनि ।
शतम् । वा । यस्य । प्रऽचरन् । स्वे । दमे । सम्ऽवर्तयन्तः । वि । च । वर्तयन् । अहा ॥३॥

अत्र पूर्वार्धे इन्द्र उच्यते उत्तरार्धे इन्द्रात्मा सूर्यः । [v]आ हूयत इति शेषः । कैः । [v]अहन्येभिः अहनि संपादितैः [v]अक्तुभिः रात्रिभिः । तत्र निष्पन्नैरित्यर्थः । तथाविधैः [v]ग्रावभिः । साध्ये साधनशब्दः । ग्रावसाध्यैरभिषवैर्निमित्तभूतैः । आगत्यात्र सोमी[१] सन् [v]मायिनि वृत्रे निमित्ते सति [v]वरिष्ठम् उरुतरं [v]वज्रम् [v]आ सर्वतः [v]जिघर्ति दीपयति । [v]वा[२] किंच । वाशब्दश्चार्थे । [v]यस्य इन्द्रात्मकस्यादित्यस्य [v]शतं शतसंख्याका रश्मयः [v]स्वे [v]दमे स्वकीये गृहे आकाशे [v]प्रचरन् प्रचरन्ति । किं कुर्वन्तः । [v]संवर्तयन्तः प्राणिनो नाशयन्तः । यद्वा । अहा अहानि दिवसान् संवर्तयन्तः सम्यक् प्रवर्तयन्तः [v]वि [v]च [v]वर्तयन् अहा अहानि निवर्तयन्ति गतान्येव पुनः प्रापयन्ति च । तपनपरिस्पन्दाधीनत्वात्[३] प्राणिनामायुःक्षयस्याहोरात्रादित्यव्यवहारस्य ॥

तामस्य रीतिं परशोरिव प्रत्यनीकमरुषं भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ॥ ४ ॥

ताम् । अस्य । रीतिम् । परशोःऽइव । प्रति । अनीकम् । अरुषम् । भुजे । अस्य । वर्पसः ।
सचा । यदि । पितुमन्तम्ऽइव । क्षयम् । रत्नम् । दधाति । भरऽहूतये । विशे ॥ ४ ॥

इयमाग्नेयी । [v]तां प्रसिद्धाम् [v]अस्य अग्नेः [v]रीतिं स्वभावं गतिं वा [v]परशोरिव [v]प्रति परशोः प्रतिनिधिमिव पश्यामि । परशुर्यथा स्वस्वामिनोऽभिमतं[४] साधयति तद्वदित्यर्थः । [v]अस्य [v]वर्पसः रूपवतोऽस्यादित्यस्य [v]अनीकं रश्मिसमूहं [v]भुजे भोगाय [v]अरुषं कथयाम्यहम्[५] । [v]यदि[६] यस्मात् स च देवः [v]सचा अस्मत्सहायः सन् [v]पितुमन्तम् अन्नवन्तं [v]क्षयम् [v]इव निवासमिव [v]भरहूतये संग्रामे यज्ञे वा आह्वानयुक्ताय [v]विशे यजमानाय [v]रत्नं रमणीयं धनं [v]दधाति[६] धारयति[६] । उभयमपि ददातीत्यर्थः ॥

१. ख-च-झ-ण-त-न-भ-र-श–सोमः । २. ख-च-ण– ' वा ' नास्ति । ३. ग-घ-च-ज-ण-श–°परिस्यन्दा° । ४. ख-च-ण–स्वस्वामिने मतम्; झ-त-न-भ-र-श–स्वस्वामिनेऽभिमतम् । ५. ख-च-झ-ण-त-न-भ-र–कथयेयं स्तोत्रम्; श–कथयाम्यहं स्तोत्रं यदि । ६. ख-च-ण–ददाति; झ-त-न-भ-र–दधाति धारयति ददाति ।

स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥ ५ ॥

सः । जिह्वया । चतुःऽअनीकः । ऋञ्जते । चारु । वसानः । वरुणः । यतन् । अरिम् ।
न । तस्य । विद्म । पुरुषत्वता । वयम् । यतः । भगः । सविता । दाति । वार्यम् ॥ ५ ॥

[v]सः अग्निः [v]चतुरनीकः चतुर्दिक्षु प्रसृतज्वालः सन् [v]जिह्वया [v]ऋञ्जते गच्छति[1] घृतादिकम् । यद्वा । जिह्वया चतुरनीकः सन् ऋञ्जते अलंकरोति स्वात्मानम् । किं कुर्वन् । [v]चारु रमणीयं तेजः [v]वसानः आच्छादयन् [v]वरुणः तमोवारकः सन् [v]अरिम् अमित्रं [v]यतन् उद्धरन् । [v]तस्य । तमित्यर्थः । तं [v]न [v]विद्म न जानीमः [v]वयं [v]पुरुषत्वता पुरुषत्वेन कामानां[2] पूरकत्वेन वा युक्तम् ॥ अपरो भावप्रत्ययः पूरणः ॥ [v]यतः अयं [v]भगः महान् भजनीयः [v]सविता प्रेरको देवः [v]दाति यच्छति [v]वार्यं वरणीयं धनम् ॥ ॥ २ ॥

'देवं वः' इति पञ्चर्चं पञ्चमं सूक्तमात्रेयस्य प्रतिप्रभस्यार्षम् । त्रैष्टुभं वैश्वदेवम् । 'देवं वः प्रतिप्रभोऽस्या तृणपाणिः' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥ १ ॥

देवम् । वः । अद्य । सवितारम् । आ । ईषे । भगम् । च । रत्नम् । विऽभजन्तम् । आयोः ।
आ । वाम् । नरा । पुरुऽभुजा । ववृत्याम् । दिवेऽदिवे । चित् । अश्विना । सखिऽयन् ॥ १ ॥

[v]देवं द्योतमानं [v]सवितारं सर्वस्याभ्यनुज्ञातारं [v]वः । त्वामित्यर्थः । यद्वा होतुरिदं वाक्यम् । वः यजमानेभ्यो युष्मभ्यमर्थाय [v]अद्य इदानीम् [v]एषे उपगच्छामि । [v]भगं [v]च भजनीयं देवम् [v]आयोः मनुष्यस्य यजमानस्य [v]रत्नं रमणीयं हविः [v]विभजन्तम् । 'भगो वां विभजतु' इति हि भगस्य विभजनं प्रसिद्धम् । 'रायो विभक्ता संभरश्च वस्वः' (ऋ. सं. ४. १७. ११), 'भगो विभक्ता शवसा' (ऋ. सं. ५. ४६. ६) इति च श्रुतिः । यद्वा । चतुर्थ्यर्थे षष्ठी । यजमानार्थं रत्नं रमणीयं धनं विभजन्तम् । हे [v]नरा नेतारौ हे [v]पुरुभुजा । पुरु भुञ्जाते इति पुरुभुजौ । हे[3] [v]अश्विना[3] अश्विनौ [v]वां युवां [v]दिवेदिवे प्रतिदिनम् [v]आ [v]ववृत्याम् आवर्तयाम्यस्मदभिमुखम् । [v]सखीयन् युवयोः सखित्वमिच्छन् । [v]चित् इति पूरणः ॥

१. झ-न-भ-वाञ्छति । २. ख-च-ण-पूर्णत्वेन; झ-भ-पूर्णत्वेन कामानाम् । ३. ख-च-झ-ण-त-न-भ-र-श-'हे अश्विना' नास्ति ।

प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायोः ॥ २ ॥

प्रति । प्रऽयानम् । असुरस्य । विद्वान् । सुऽउक्तैः । देवम् । सवितारम् । दुवस्य ।
उप । ब्रुवीत । नमसा । विऽजानन् । ज्येष्ठम् । च । रत्नम् । विऽभजन्तम् । आयोः ॥२॥

[v]असुरस्य शत्रूणां निरसितुः सवितुः [v]प्रति [v]प्रयाणं प्रत्यागतिं[1] [v]विद्वान् जानन् [v]सूक्तैः [v]सवितारं [v]देवं [v]दुवस्य परिचर हे अन्तरात्मन् । किंच [v]आयोः मनुष्याय [v]ज्येष्ठं [v]रत्नं धनं [v]च [v]विभजन्तम् । गमयन्तमित्यर्थः । [v]नमसा नमस्कारेण हविषा वा [v]विजानन् । विशेषेण भावयन्नित्यर्थः ॥ यद्वान्तर्णीतण्यर्थोऽयम् ॥ ज्ञापयन् [v]उप [v]ब्रुवीत स्तौतु भवान् ॥

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ॥ ३ ॥

अदत्रऽया । दयते । वार्याणि । पूषा । भगः । अदितिः । वस्ते । उस्रः ।
इन्द्रः । विष्णुः । वरुणः । मित्रः । अग्निः । अहानि । भद्रा । जनयन्त । दस्माः ॥ ३ ॥

अयमग्निः [v]अदत्रया अदनीयानि ॥ अदेरौणादिकोऽत्रप्रत्ययः । 'सुपां सुलुक्' इति याजादेशः । अथवा अस्तीत्यदत्रा जिह्वा । तया [v]वार्याणि वरणीयानि काष्ठानि [v]दयते । दयतिरनेककर्मात्र दहने वर्तते । दहतीत्यर्थः । सामर्थ्यादग्निरिति गम्यते । यद्वा । अदनीयानि[2] वरणीयान्यन्नानि दयते । ददाति यजमानाय ॥ 'दय दानगतिहिंसारक्षणेषु' ॥ कीदृशोऽग्निः । [v]पूषा पोषकः [v]भगः भजनीयः [v]अदितिः अखण्डनीयः । यद्वा । पूषादयस्त्रयोऽपि प्रत्येकमदनीयानि वार्याणि चान्नानि दयते । [v]उस्रः सूर्यः [v]वस्ते आच्छादयति । सामर्थ्यात्तेजांसि । इन्द्रादयः पञ्चापि देवाः[3] [v]दस्माः दर्शनीयाः [v]अहानि सर्वाण्यागन्तृणि [v]भद्रा शोभनानि[4] [v]जनयन्त जनयन्ति । दिवसानां यागदानादिविशिष्टत्वमेव भद्रत्वम् ॥

तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।
उप यद्वोचेऽध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥ ४ ॥

तत् । नः । अनर्वा । सविता । वरूथम् । तत् । सिन्धवः । इषयन्तः । अनु । ग्मन् ।
उप । यत् । वोचे । अध्वरस्य । होता । रायः । स्याम । पतयः । वाजऽरत्नाः ॥ ४ ॥

---

१. ख-च-ण-भ–प्रत्यावर्तिम् । २. ख-च-ण-भ–वार्याणि । ३. ख-च-ण–देवताः । ४. ग-घ-ज-श–शोभनीयानि ।

[v]तत् प्रसिद्धं [v]वरूथं वरणीयमस्मदभिमतं धनं [v]नः अस्मभ्यम् [v]अनर्वा अप्रत्यृतः केनाप्यतिरस्कृतः [v]सविता देवः प्रयच्छत्विति शेषः । [v]तत् धनं [v]सिन्धवः स्यन्दनशीलाः [v]इषयन्तः गच्छन्त्यो नद्यः [v]अनु अनुसृत्य [v]मन् गच्छन्तु । धनं दातुं गच्छन्त्वित्यर्थः । [v]यत् यस्मात् [v]अध्वरस्य यागस्य [v]होता होमनिष्पादकोऽहम् [v]उप [v]वोचे उपेत्य ब्रवीमि तस्मात्तत्प्रयच्छन्त्विति शेषः । वयं चात्रयः [v]रायः धनस्य बहुविधस्य [v]पतयः स्वामिनः [v]स्याम भवेम । [v]वाजरत्नाः अन्नेन बलेन वा रमणीयाः । अथवा यद्यस्माद्वोचे स्तौमि तस्मात् सविता नो वरूथमागच्छतु । तस्मान्नद्यश्च नो वरूथं यज्ञमनु [v]मन् अनुगच्छन्त्विति वा योज्यम् ॥

प्र ये वसुभ्य इवदा नमो दुर्ये मित्रे वरुणे सुक्तवाचः ।
अवैत्वस्मै कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ॥ ५ ॥

प्र । ये । वसुऽभ्यः । ईवत् । आ । नमः । दुः । ये । मित्रे । वरुणे । सूक्तऽवाचः ।
अव । एतु । अस्मै । कृणुत । वरीयः । दिवःपृथिव्योः । अवसा । मदेम ॥ ५ ॥

[v]ये यजमानाः [v]वसुभ्यः यज्ञनिवासेभ्यो देवेभ्यः [v]ईवत् गमनवत् [v]नमः अन्नं पश्वात्मकं [v]प्र [v]दुः प्रादुः । [v]ये च [v]मित्रे देवे [v]वरुणे च [v]सूक्तवाचः सूक्तवचसो भवन्ति तानस्मान् [v]अस्मै महद्धनं तेजो वा [v]अवैतु अवगच्छतु[1] । हे[2] देवाः[2] [v]कृणुत कुरुत चैतेभ्यः [v]वरीयः उरुतरं सुखम् । [v]दिवस्पृथिव्योः द्यावापृथिव्योः [v]अवसा रक्षणेन [v]मदेम हृष्येम[3] ॥ ॥ ३ ॥

'विश्वो देवस्य' इति पञ्चर्चं षष्ठं सूक्तं स्वस्त्यात्रेयमुनेरार्षं वैश्वदेवम् । पञ्चमी पङ्क्तिः आद्याश्चतस्रोऽनुष्टुभः । तदुक्तमनुक्रमण्याम्—'विश्वः स्वस्त्यात्रेयः पङ्क्त्यन्तम्' इति । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे विश्वो[4] देवस्येति प्रतिपत्तृचस्याद्यः[4] । सूत्रितं च—'विश्वो देवस्य नेतुरित्येका' (आश्व. श्रौ. ७. ६) इति । आभिप्लविकेषु द्वितीयचतुर्थषष्ठ्यहःस्वेषैव वैश्वदेवस्य शस्त्रस्य प्रतिपत् । 'युग्मेष्वेवमभिप्लवे' (आश्व. श्रौ. ७. ६) इति सूत्रितत्वात् ॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥ १ ॥

विश्वः । देवस्य । नेतुः । मर्तः । वुरीत । सख्यम् ।
विश्वः । राये । इषुध्यति । द्युम्नम् । वृणीत । पुष्यसे ॥ १ ॥

[v]विश्वः सर्वः [v]मर्तः [v]नेतुः [v]देवस्य । सवितुरित्यर्थः । तस्य [v]सख्यं [v]वुरीत वृणीत । [v]विश्वः जनः [v]राये धनस्य [v]इषुध्यति ॥ पञ्चमलकारः ॥ ईशीत । तस्यानुग्रहात् सर्वो जनः [v]द्युम्नं धनं [v]वृणीत[5] [v]पुष्यसे पुष्टयै पर्याप्तं धनम् ॥

१. ग-घ-ज–आगच्छतु । २. ख-च-झ-ण-न-भ-र–'हे देवाः' नास्ति । ३. ख-च-झ-ण-न-भ-र-श–'हृष्येम' नास्ति । ४. झ-भ-र–आद्यस्तृचो वैश्वदेवे प्रतिपत्तृचस्याद्यः ; त–आद्यस्तृचो वैश्वदेवे । ५. ख-च-झ-ण-त-न-भ-र-श–वृणीत सवितारम् ।

ते तँ देव नेतर्ये चेमाँ अनुशसे। ते राया ते ह्या३पृचे सचेमहि सचध्यैः ॥२॥

ते। ते। देव। नेतः। ये। च। इमान्। अनुऽशसे।

ते। राया। ते। हि। आऽपृचे। सचेमहि। सचध्यैः ॥ २ ॥

हे ᵛनेतः ᵛदेव ᵛते तव स्वभूताः ᵛते वयं यजमानाः ᵛये ᵛच अन्ये ᵛइमान्। विभक्तिव्यत्ययः। इमे होत्रादयः ᵛअनुशसे शंसितुं प्रभवन्ति तेऽपि त्वदीयाः। यद्वा। इमान् अन्यान् इन्द्रादीन् अनुशसे क्रमेण शंसितुं प्रभवन्ति। ' एकैव वा महानात्मा देवता स सूर्यः स हि सर्वभूतात्मा ' इत्युक्तत्वादितरासां देवतानां तदन्तर्भावादिति भावः। न केवलं त्वच्छंसका एवेत्यर्थः। ᵛते उभये[1] वयं ᵛराया धनेन सचेमहि इति संबन्धः। ᵛते ᵛहि ते खलु ᵛआपृचे आपर्चनीयाः॥ कृत्यार्थे केन्प्रत्ययः। ' कृन्मेजन्तः ' इत्यव्ययत्वाद्विभक्तेरदर्शनम्॥ ᵛसचध्यैः सर्वैः कामैः ᵛसचेमहि संगच्छेमहि॥

अतो न आ नृनतिथीनतः पत्नीर्दशस्यत।
आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥ ३ ॥

अतः। नः। आ। नृन्। अतिथीन्। अतः। पत्नीः। दशस्यत।

आरे। विश्वम्। पथेऽस्थाम्। द्विषः। युयोतु। युयुविः ॥ ३ ॥

ᵛअतः अस्मिन् यज्ञे ॥ सार्वविभक्तिकस्तसिः ॥ ᵛनः अस्माकमृत्विजां ᵛनॄन् नेतॄन् ᵛअतिथीन् तद्वत् पूज्यान् देवान् ᵛआ ᵛदशस्यत सर्वतः परिचरत। ᵛअतः अस्मिन् यज्ञे ᵛपत्नीः देवानां पत्नीरपि दशस्यत हविष्प्रदानादिना। यद्वा। नः अस्मभ्यं नॄन् पुत्रभृत्यादीनतिथीन् पत्नीश्चैतत्त्रयमत्र दशस्यत। हे देवाः प्रयच्छत[2]। ᵛआरे दूरे ᵛविश्वं सर्वं ᵛपथेष्ठां मार्गे वर्तमानं वैरिणं ᵛद्विषः अन्यानपि द्विषो द्वेष्टॄन् ᵛयुयोतु पृथक्करोतु देवसंघः सविता वा ᵛयूयुविः[3] सर्वस्यामिश्रयिता पृथक्कर्ता[4]॥

यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥ ४ ॥

यत्र। वह्निः। अभिऽहितः। दुद्रवत्। द्रोण्यः। पशुः।

नृऽमनाः। वीरऽपस्त्यः। अर्णा। धीराऽइव। सनिता ॥ ४ ॥

ᵛयत्र यस्मिन्यज्ञे ᵛवह्निः यज्ञस्य वोढा ᵛअभिहितः यूपं प्रापितः ᵛद्रोण्यः यूपार्हः ᵛपशुः ᵛदुद्रवत् गच्छति यूपं प्रति तत्र ᵛनृमणाः यजमानमनाः सविता ᵛवीरपस्त्यः। वीरा ऋत्विग्यज-

१. ख-च-ज्ञ-ण-त-न-भ-र- ' उभये ' नास्ति। २. ख-च-ज्ञ-ण-त-न-भ-र-' प्रयच्छत ' नास्ति ३. त-युयुविः। ४. ख-च-ज्ञ-ण-त-न-भ-र-' पृथक्कर्ता ' नास्ति।

मानाः पुत्रभृत्यादयो वा तद्वत्पस्त्यं गृहं यस्य स तादृशः । प्रेरितगृहो वा[1] । पुत्राद्युपेतगृहप्रदः इत्यर्थः । [v]सनिता संभक्ता भवति । [v]अर्णा अरणकुशला [v]धीरेव[2] योषिदिव । यद्वा । अर्णांसि हवींष्यभिलक्ष्य सनिता भवति ॥

एष ते देव नेता रथस्पतिः शं रयिः ।

शं राये शं स्वस्तय इषःस्तुतो मनामहे देवस्तुतो मनामहे ॥ ५ ॥

एषः । ते । देव । नेतरितिं । रथःपतिः । शम् । रयिः ।

शम् । राये । शम् । स्वस्तये । इषःऽस्तुतः । मनामहे । देवऽस्तुतः । मनामहे ॥ ५ ॥

हे [v]नेतः [v]देव सवितः [v]ते तव [v]एषः [v]रथःपतिः सर्वस्य पालकः [v]रयिः दातव्यधनवान् ॥ मत्वर्थो लुप्यते ॥ [v]शं करोत्विति शेषः । वयं च [v]राये धनस्य [v]शं सुखाय । यद्वा । राये धनाय [v]शं[3] सुखाय च [v]स्वस्तये अविनाशाय[3] [v]इषःस्तुतः एषणीयस्य सवितुः स्तोतारो वयं [v]मनामहे स्तुमः । [v]देवस्तुतः देवानां देवस्य वा सवितुः स्तोतारः [v]मनामहे स्तुमः ॥ ॥ ४ ॥

' अग्ने सुतस्य ' इति पञ्चदशर्चं सप्तमं सूक्तम् । अत्रेयमनुक्रमणिका—' अग्ने पञ्चोना चतस्रो गायत्र्यः पञ्चुष्णिहस्तिस्रो जगत्यस्त्रिष्टुभो वान्त्ये अनुष्टुभौ ' इति । ' ऋषिश्चान्यस्मात् ' इति परिभाषया स्वस्त्यात्रेय ऋषिः । आदितश्चतस्रो गायत्र्यः पञ्चम्याद्याः षडुष्णिह एकादश्याद्यास्तिस्रो जगत्यस्त्रिष्टुभो वा चतुर्दशीपञ्चदश्यावनुष्टुभौ विश्वे देवा देवता[4] ॥

अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्हव्यदातये ॥ १ ॥

अग्ने । सुतस्य । पीतये । विश्वैः । ऊमेभिः । आ । गहि । देवेभिः । हव्यऽदातये ॥ १ ॥

हे [v]अग्ने त्वं [v]सुतस्य [v]पीतये सोमपानाय [v]विश्वैरूमेभिः ऊमैः सर्वैरपि रक्षकैः [v]देवेभिः देवैरिन्द्रादिभिः सह [v]हव्यदातये अस्माकं हविर्दानाय तदात्रे यजमानाय वा [v]आ [v]गहि आगच्छ ॥

ऋतधीतय आ गत सत्यधर्माणो अध्वरम् । अग्नेः पिबत जिह्वया ॥ २ ॥

ऋतऽधीतयः । आ । गत । सत्यऽधर्माणः । अध्वरम् । अग्नेः । पिबत । जिह्वया ॥ २ ॥

---

१. त–वा पुत्राद्युपेतगृहो वा । २. ख-च-ज्ञ-ण-त-न-भ-र–धीरा । ३. ख-च-ज्ञ-ण-न-भ-र–' शं ... अविनाशाय ' नास्ति । ४. न– देवता । स्मार्ते प्रत्यवरोहणे इदं सूक्तं जप्यम् । चतुर्थं संहाय सौर्याणि स्वस्त्ययनानि च जपित्वेति सूत्रितम् । गुरुणा प्रसक्ष्यमाणः सर्वतोभये होमे कृते स्वस्ति नो मिमीतामिति सूक्तशेषं जपेत् । तथा च सूत्रम्–स्वस्त्यात्रेयं जपति यतेन्द्रं भयामह इति सूक्तशेषमिति । स्मार्ते शान्तिकर्मण्यपि एतत्सूक्तं जप्यम् । गुरुणाभिमृता इति खण्डे उदिते आदित्ये सौर्याणि च स्वस्त्ययनानि च जपेदिति सूत्रात् ।

हे [ऋ]ऋतधीतयः सत्यस्तुतयोऽबाध्यकर्माणो वा देवाः [अ]अध्वरम् अस्मद्यज्ञम् [आ]आ [ग]गत आगच्छत । आगत्य च हे [स]सत्यधर्माणः सत्यस्य धारयितारो यूयम् [अ]अग्नेः [जि]जिह्वया [पि]पिबत आज्यसोमादिकम् ॥

विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि । देवेभिः सोमपीतये ॥ ३ ॥

विप्रेभिः । विप्र । सन्त्य । प्रातर्यावऽभिः । आ । गहि । देवेभिः । सोमऽपीतये ॥ ३ ॥

हे [वि]विप्र मेधाविन्[1] विविधकामानां वा पूरक[2] हे [स]सन्त्य संभजनीयाग्ने [वि]विप्रेभिः उक्तलक्षणैः [प्रा]प्रातर्यावभिः प्रातःकाले आगन्तृभिः [दे]देवेभिः देवैः सार्धम् [आ]आ [ग]गहि आगच्छ । किमर्थम् । [सो]सोमपीतये सोमपानाय ॥

अयं सामश्चमू सुताऽमत्रे परि षिच्यते । प्रिय इन्द्राय वायवे ॥ ४ ॥

अयम् । सोमः । चमू इति । सुतः । अमत्रे । परि । सिच्यते । प्रियः । इन्द्राय । वायवे ॥ ४ ॥

[अ]अयं पुरतो वर्तमानः [सो]सोमः [च]चमू चम्वोरस्योः[3] अधिषवणफलकयोः[4] [सु]सुतः अभिषुतः सन् [अ]अमत्रे पात्रे [प]परि [सि]सिच्यते पूर्यते । स च [इ]इन्द्राय [वा]वायवे च [प्रि]प्रियः । तं पातुं हे इन्द्रवायू आगच्छतमिति शेषः ॥

'वायवा याहि' इत्येषा पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्रे वायव्यतृचस्याद्या । सूत्रितं च— 'वायवा याहि वीतय इत्येका वायो याहि शिवा दिव इति द्वे' (आश्व. श्रौ. ७. १०) इति ॥

वायवा याहि वीतयं जुषाणो हव्यदातयं ।
पिबा सुतस्यान्धसो अभि प्रयः ॥ ५ ॥

वायो इति । आ । याहि । वीतये । जुषाणः । हव्यऽदातये ।
पिब । सुतस्य । अन्धसः । अभि । प्रयः ॥ ५ ॥

हे [वा]वायो [प्र]प्रयः अन्नं सोमाख्यम् [अ]अभि अभिलक्ष्य [आ]आ [या]याहि [वी]वीतये भक्षणाय [जु]जुषाणः प्रीयमाणः [ह]हव्यदातये हविर्दात्रे यजमानाय तदर्थम् । आगत्य च [सु]सुतस्यान्धसः अभिषुतमन्योऽन्नं सोमलक्षणं [पि]पिब ॥ ॥ ५ ॥

पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्रे ऐन्द्रवायवतृचे[4] 'इन्द्रश्च' इत्यादिके द्वे ऋचौ शंसेत् । तयोः प्रथमां द्वितीयां वावर्त्य तृचं संपादयेत् । तथा च सूत्रितम्— 'इन्द्रश्च वायवेषां सुतानामिति द्वयोरन्यतरां द्विः' (आश्व. श्रौ. ७. १०) इति ॥

---

१. ख-च-ण–विविधकामानाम; ग-घ-ज–मेधाविन; झ-ञ-भ-र–विविधकामानां पूरक; त–मेधाविन् विविधं कामाना पूरक । २. ञ–चम्वोः । ३. झ-ञ-र–अभिषवण° । ४. ख-च-झ-ण-त-न-भ-र–ऐन्द्रवायवस्तृचः ।

इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः । ताञ्जुषेथामरेपसावभि प्रयः ॥६॥

इन्द्रः । च । वायो इति । एषाम् । सुतानाम् । पीतिम् । अर्हथः ।

तान् । जुषेथाम् । अरेपसौ । अभि । प्रयः ॥६॥

हे [V]वायो त्वं च [V]इन्द्रश्च [V]एषां पुरतो गृहीतानां [V]सुतानाम् अभिषुतानां सोमानां [V]पीतिपानम् [V]अर्हथः । यस्मादेवं तस्मात् [V]तान् सोमरसान् [V]जुषेथां सेवेथाम् [V]अरेपसौ अहिंसकौ । तदर्थं [V]प्रयः सोमाख्यमन्नमभिलक्ष्यागच्छतमिति शेषः । यद्वा । प्रयः अन्नरूपान्[1] ॥

सुता इन्द्राय वायवे सोमासो दध्याशिरः ।

निम्नं न यन्ति सिन्धवोऽभि प्रयः ॥ ७ ॥

सुताः । इन्द्राय । वायवे । सोमासः । दध्याऽआशिरः ।

निम्नम् । न । यन्ति । सिन्धवः । अभि । प्रयः ॥ ७ ॥

[V]इन्द्राय [V]वायवे च [V]सोमासः सोमाः [V]दध्याशिरः दध्याश्रयणाः [V]सुताः अभिषुताः संपादिताः । ते च [V]निम्नं गतं [V]सिन्धवः [V]न नद्य इव हे इन्द्रवायू युवाम् [V]अभि [V]यन्ति [V]प्रयः अन्नरूपाः ॥

तृतीयेऽहनि[2] प्रउगशस्त्रे ' सजूर्विश्वेभिः ' इति वैश्वदेवस्तृचः । सूचितं च—' सजूर्विश्वेभिर्देवेभिरत्न नः प्रिया प्रियासु ' (आश्व. श्रौ. ७. १०) इति ॥

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः । आ याह्यग्ने अत्रिवत्सुते रण ॥८॥

सऽजूः । विश्वेभिः । देवेभिः । अश्विऽभ्याम् । उषसा । सऽजूः ।

आ । याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ ८ ॥

हे [V]अग्ने [V]विश्वेभिः सर्वैः [V]देवेभिः देवैः [V]सजूः संगतः सन् [V]अश्विभ्यामुषसा च [V]सजूः समानप्रीतिः सन् [V]आ[3] [V]याहि आगहि[3] । [V]अत्रिवत् अत्रिरिव । अत्रेर्यज्ञे यथा तथेत्यर्थः । यद्वा । अत्रिर्यथा यज्ञे रमते तद्वत् [V]सुते अभिषुते सोमे [V]रण रमस्व ॥

उत्तरे द्वे नवमीदशम्यौ स्पष्टे ॥

---

१. ख-च-ण-भ–अन्नरूपांश्च; झ-त-न-र–अन्नरूपान् वा । २. न–दशरात्रे तृतीयेऽहनि । ३ ख-झ-त-न-भ-र–' आयाहि आगहि ' नास्ति ।

सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना ।
आ याह्यग्ने अत्रिवत्सुते रण ॥ ९ ॥

सऽजूः । मित्रावरुणाभ्याम् । सऽजूः । सोमेन । विष्णुना ।
आ । याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ ९ ॥

सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना । आ याह्यग्ने अत्रिवत्सुते रण ॥ १० ॥

सऽजूः । आदित्यैः । वसुऽभिः । सऽजूः । इन्द्रेण । वायुना ।
आ । याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ १० ॥ ॥ ६ ॥

पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे 'स्वस्ति नः' इति तृचः । सूत्रितं च—'स्वस्ति नो मिमीतामश्विना भग इति तृच इति वैश्वदेवम्' (आश्व. श्रौ. ८.१) इति । तथा बृहस्पतिसवे वैश्वदेवनिविद्धानार्थोऽयं तृचः । 'स्वस्ति नो मिमीतामश्विना भग इति वैश्वदेवम्' (आश्व. श्रौ. ९. ५) इति सूत्रितत्वात्[१] ॥

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ ११ ॥

स्वस्ति । नः । मिमीताम् । अश्विना । भगः । स्वस्ति । देवी । अदितिः । अनर्वणः ।
स्वस्ति । पूषा । असुरः । दधातु । नः । स्वस्ति । द्यावापृथिवी इति । सुऽचेतुना ॥ ११ ॥

vनः अस्मभ्यम् vअश्विना अश्विनौ vस्वस्ति अविनाशं क्षेमं vमिमीतां कुरुताम् । vभगः च vस्वस्ति क्षेमं मिमीताम् । तथा vदेव्यदितिः च स्वस्ति मिमीताम् । vअनर्वणः अप्रत्यृतः vपूषा vअसुरः शत्रूणां निरसिता प्राणानां बलानां दाता वा नः[२] vस्वस्ति vदधातु । vनः अस्मभ्यं vद्यावापृथिवी द्यावापृथिव्यावपि vसुचेतुना शोभनेन प्रज्ञानेन विशिष्टे vस्वस्ति मिमीताम् ॥

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ १२ ॥

स्वस्तये । वायुम् । उप । ब्रवामहै । सोमम् । स्वस्ति । भुवनस्य । यः । पतिः ।
बृहस्पतिम् । सर्वऽगणम् । स्वस्तये । स्वस्तये । आदित्यासः । भवन्तु । नः ॥ १२ ॥

१. न-सूत्रितत्वात् । दीक्षितानामुपतापे निविद्धानार्थमयं तृचः । तथा च सूत्रितं—स्वस्त्यात्रेये निविदं दध्यात् । प्रकृत्या निगद इति । दशरात्रस्य षष्ठेऽहनि वैश्वदेवशस्त्रे स्वस्ति नो मिमीतामिति तृचः । सूत्रितं च—स्वस्ति नो मिमीतामश्विना भग इति तृच इति वैश्वदेवमिति । २. ख-च-ञ्च-ण-त-न-भ-र-भगश्च ।

vस्वस्तये क्षेमाय vवायुमुप vश्रवामहै स्तुम इत्यर्थः । vसोमं चोप श्रवामहै । vयः च सोमः vभुवनस्य vपतिः पालकः । सर्वलोकजीवनस्य सोमायत्तत्वात् । तथा vसर्वगणं सर्वदेवगणोपेतं vबृहस्पतिं बृहतः कर्मणो मन्त्रस्य पालयितारं vस्वस्तये स्तुमः[1] । vआदित्यासः आदित्या अदितेः पुत्राः सर्वे देवा अरुणादयो द्वादश वा vनः अस्माकं vस्वस्तये vभवन्तु ॥

सत्रमध्ये दीक्षिते व्याधिते सति तस्मिन्नहनि वैश्वदेवशस्त्रेऽयं तृचो निविद्धानार्थः । सूत्रितं च—' स्वस्त्यात्रेये निविदं दध्यात् ' (आश्व. श्रौ. ६. ९) इति । स्वस्त्यात्रेयशब्देनायं तृचो विवक्षित इति तत्र व्याख्यातम् । तथा भयादिके सत्ययं तृचो जप्यः ॥

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ १३ ॥

विश्वे । देवाः । नः । अद्य । स्वस्तये । वैश्वानरः । वसुः । अग्निः । स्वस्तये ।
देवाः । अवन्तु । ऋभवः । स्वस्तये । स्वस्ति । नः । रुद्रः । पातु । अंहसः ॥ १३ ॥

vविश्वे सर्वेऽपि vदेवाः vनः अस्मान् vअद्य अस्मिन् यागदिने vस्वस्तये क्षेमाय अवन्तु । vवैश्वानरः । विश्व एनं नरा नयन्तीति वैश्वानरः । vवसुः सर्वस्य वासयिता vअग्निः देवः । ' अयमेवाग्निर्वैश्वानर इति शाकपूणिः ' (निरु. ७. २३) इति यास्कः । सोऽपि vस्वस्तये अवतु । vदेवाः vऋभवः अपि vस्वस्तये vअवन्तु । vरुद्रः दुःखात् द्रावयिता देवोऽपि vअंहसः पापात् vस्वस्ति vपातु vनः अस्मान् ॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ १४ ॥

स्वस्ति । मित्रावरुणा । स्वस्ति । पथ्ये । रेवति ।
स्वस्ति । नः । इन्द्रः । च । अग्निः । च । स्वस्ति । नः । अदिते । कृधि ॥ १४ ॥

हे vमित्रावरुणा अहोरात्राभिमानिदेवौ vस्वस्ति कुरुतम् । हे vपथ्ये । पन्थाः[2] अन्तरिक्षमार्गः[2] । तत्र हिता मार्गाभिमानिनी देवी । हे तादृशि vरेवति धनवति देवि vस्वस्ति कृधि । vइन्द्रश्चाग्निश्च प्रत्येकं vनः अस्मभ्यं vस्वस्ति कृधि । हे vअदिते देवि vनः vस्वस्ति vकृधि कुरु ॥

१. ख-च-ण–स्तुम इत्यर्थः । २. ख-च-ञ-ण-त-न-भ-र–पन्थाः पथ्या स्वस्ति देवमन्तरिक्षमार्गः ; श–पथ्या स्वस्ति देवं पन्था अन्तरिक्षमार्गः ।

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥ १५ ॥

स्वस्ति । पन्थाम् । अनु । चरेम । सूर्याचन्द्रमसौऽइव ।
पुनः । ददता । अघ्नता । जानता । सम् । गमेमहि ॥ १५ ॥

vपन्थां पन्थानं vस्वस्ति क्षेमेण vअनु vचरेम vसूर्याचन्द्रमसाविव । तौ यथा निरालम्बे मार्गे राक्षसादिभिरनुपद्रुतौ संचरतस्मद्वत् । किंच वयं प्रवसन्तः vपुनर्ददता अभिमतम् vअघ्नता चिरकालविलम्बकोपेन[1] अहिंसता vजानता अविस्मरता मदीयश्चिरकालं गतः कोऽयमिति संदेहमकुर्वता । मदीयोऽयमिति बुध्यमानेनेत्यर्थः । उक्तलक्षणेन बन्धुजनेन vसं vगमेमहि संगच्छेमहि[2] । यद्वा । पूर्वार्धं प्रवसतां वाक्यमुत्तरार्धं बन्धूनाम् । वयं बन्धवो ददताभिमतमुपार्जितं यच्छताघ्नता प्रवासकोपेन[3] अहिंसता जानता सस्नेहमधिगच्छता प्रवसता सं गमेमहि ॥ ॥ ७ ॥

'प्र श्यावाश्च' इति सप्तदशर्चमष्टमं सूक्तम् । अत्रेयमनुक्रमणिका—'प्र श्यावाश्च त्र्यूना श्यावाश्वो मारुतं ह तत्पङ्क्तिः षष्ठ्यन्त्या च' इति । आत्रेयः श्यावाश्च ऋषिः । 'ह तत' इति प्रयोगात् इदमादीनि दश सूक्तानि मरुद्देवत्यानि । षष्ठी सप्तदशी च पङ्क्त्यौ शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । गतो विनियोगः ॥

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ॥ १ ॥

प्र । श्यावऽअश्व । धृष्णुऽया । अर्च । मरुत्ऽभिः । ऋक्वऽभिः ।
ये । अद्रोघम् । अनुऽस्वधम् । श्रवः । मदन्ति । यज्ञियाः ॥ १ ॥

हे vश्यावाश्व एतन्नामक ऋषे vधृष्णुया धृष्णुस्त्वम् vऋक्वभिः[4] स्तुत्यान् vमरुद्भिः मरुतः[5] vप्र vअर्च । द्वितीयार्थे तृतीया । एवं स्वयमेव संप्रेष्यति । यद्वा । यजमानो होतारं श्यावाश्वं ब्रूते । यद्वा । मरुद्भिर्मरुत्सदृशैर्ऋक्वभिः स्तोतृभिः सह स्तोत्रैर्वा अर्च स्तुहीत्यर्थः । vये मरुतः vयज्ञियाः यज्ञार्हाः vअनुष्वधं प्रत्यहम्[5] । हविर्लक्षणान्नप्रदानं[5] स्वधा । अनु पश्चाद्वा । vअद्रोघम् अहिंसकं vश्रवः अन्नं लब्ध्वा vमदन्ति हृष्यन्ति ॥

१. ख-च-ण– विलम्बात् कोपेन । २. ग-घ-ज-श–'संगच्छेमहि' नास्ति । ३. झ-त-न-भ-र–प्रयासकोपेन । ४. ख-च-झ-ण-त-न-भ-र–ऋक्वभिः मरुद्भिः स्तुत्यान् मरुतः ; श–ऋक्वभिः स्तुत्यान् मरुतः । ५. ख-झ-त-न-भ-र–प्रतिहविर्लक्षणप्रदानम् ।

ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ॥ २ ॥

ते । हि । स्थिरस्य । शवसः । सखायः । सन्ति । धृष्णुऽया ।
ते । यामन् । आ । धृषत्ऽविनः । त्मना । पान्ति । शश्वतः ॥ २ ॥

ते हि ते खलु स्थिरस्य अविचलितस्य शवसः बलस्य सखायः सन्ति भवन्ति मह्यम् । धृष्णुया धृष्णवः । ते च यामन्ना । आ[1] इति चार्थे । गमनेऽपि धृषद्विनः धर्षणवन्तः[2] त्मना आत्मना अनुग्रहेणैव अस्मदुपकारमनपेक्ष्यैव[3] शश्वतः बहूनस्मान् पुत्रभृत्यादीन् पान्ति रक्षन्ति ॥

ते स्पन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ॥ ३ ॥

ते । स्पन्द्रासः । न । उक्षणः । अति । स्कन्दन्ति । शर्वरीः ।
मरुताम् । अध । महः । दिवि । क्षमा । च । मन्महे ॥ ३ ॥

ते मरुतः स्पन्द्रासः स्पन्दनशीलाः उक्षणः जलस्य सेक्तारश्च । न इति चार्थे । यस्मात स्पन्द्रा अन्येषां तस्मात शर्वरीः । शर्वर्यो रात्रयः । कालावयवानित्यर्थः । तान् अति स्कन्दन्ति अतिक्रम्य गच्छन्ति । नित्या इत्यर्थः । यस्मादेत एवंविधास्तस्मात् मरुताम् अध अधुना महः तेजः दिवि द्युलोके क्षमा क्षमायां भूमौ च वर्तमानं मन्महे स्तुमः ॥

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥ ४ ॥

मरुत्ऽसु । वः । दधीमहि । स्तोमम् । यज्ञम् । च । धृष्णुऽया ।
विश्वे । ये । मानुषा । युगा । पान्ति । मर्त्यम् । रिषः ॥ ४ ॥

हे अध्वर्युहोत्रादयः वः यूयं मरुत्सु धृष्णुया धर्षकेषु दधीमहि ॥ व्यत्ययेनोत्तमः ॥ धत्त । किम् । स्तोमं स्तोत्रं यज्ञं च । इज्यतेऽनेनेति यज्ञं हविः । तदुभयं किमर्थं दीयत इति । ये मरुतः विश्वे सर्वेऽपि मानुषा मानुषाणि युगा युगानि । सर्वेषु कालेष्वित्यर्थः[4] । मर्त्यं मरणधर्माणं यजमानं रिषः हिंसकात् सकाशात् पान्ति रक्षन्ति ॥

१. झ-न- इह आ । २. त- धषणवर्षणवन्तः । ३. ख-च-ण- अस्मदुपकारानपेक्षया । ४. ख-च-झ-ण-न-भ- लोकेष्वित्यर्थः ।

अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥ ५ ॥

अर्हन्तः । ये । सुऽदानवः । नरः । असामिऽशवसः ।
प्र । यज्ञम् । यज्ञियेभ्यः । दिवः । अर्च । मरुत्ऽभ्यः ॥ ५ ॥

हे होतः हे आत्मन् वा ये अर्हन्तः पूज्याः सुदानवः शोभनदानाः नरः नेतारः कर्मणाम् असामिशवसः अनल्पबलाः सन्ति तेभ्यः यज्ञियेभ्यः यज्ञार्हेभ्यः दिवः द्योतमानेभ्यः मरुद्भ्यः ॥ विभक्तिवचनयोर्व्यत्ययः । यद्वा कर्मणि षष्ठी ॥ दीप्तं यज्ञं यज्ञसाधनं हविः प्र अर्च पूजय प्रयच्छेत्यर्थः । अथवा दिवोऽन्तरिक्षादागतेभ्य इति संबन्धः ॥ ॥ ८ ॥

आ रुक्मैरा युधा नरं ऋष्वा ऋष्टीरसृक्षत ।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥ ६ ॥

आ । रुक्मैः । आ । युधा । नरः । ऋष्वाः । ऋष्टीः । असृक्षत ।
अनु । एनान् । अह । विऽद्युतः । मरुतः । जज्झतीःऽइव । भानुः । अर्त । त्मना । दिवः ॥ ६ ॥

नरः वृष्टेर्नेतारः ऋष्वाः महान्तो मरुतः रुक्मैः रोचमानैराभरणविशेषैः आ रोचन्त इति शेषः ॥ उपसर्गश्रुतेः संगतक्रियाध्याहारः ॥ तथा युधा प्रहरणसाधनेनायुधेन आ रोचन्ते । एते मरुतः ऋष्टीः आयुधविशेषान् असृक्षत । प्रक्षिपन्ति मेघभेदार्थम् । एनान् मरुतः विद्युतः अपि जज्झतीरिव शब्दकारिण्य आप इव । ' जज्झतीरापो भवन्ति शब्दकारिण्यः ' (निरु. ६. १६) इति निरुक्तम् । अनु अह अनुगच्छन्त्येव । दिवः द्योतमानस्य मरुद्गणस्य भानुः दीप्तिः त्मना स्वयमेव अर्त निरगात् ॥

ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा महो दिवः ॥ ७ ॥

ये । ववृधन्त । पार्थिवाः । ये । उरौ । अन्तरिक्षे । आ ।
वृजने । वा । नदीनाम् । सधऽस्थे । वा । महः । दिवः ॥ ७ ॥

ये मरुतः पार्थिवाः पृथिवीसंबद्धाः सन्तः ववृधन्त वर्धन्ते । ये च उरौ महति अन्तरिक्षे च ववृधन्त । आ इति चार्थे । नदीनां नदनवतीनां वृजने वा बले[1] ववृधन्त । महः महतः दिवः

१. त–बले योगे ।

द्युलोकस्य [v]सधस्थे सहस्थाने[1] च ववृधन्त । उभयत्र वाशब्दश्चार्थे । एवं सर्वत्र वर्धमाना मरुतो वृष्टयर्थमृष्टीः असृक्षतेति[2] पूर्वत्र संबन्धः ॥

शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।
उत स्म ते शुभे नरः प्र स्पन्द्रा युजत त्मना ॥ ८ ॥

शर्धः । मारुतम् । उत् । शंस । सत्यऽशवसम् । ऋभ्वसम् ।
उत । स्म । ते । शुभे । नरः । प्र । स्पन्द्राः । युजत । त्मना ॥ ८ ॥

हे स्तोतः [v]मारुतं [v]शर्धः बलम् [v]उत् उत्कृष्टं [v]शंस स्तुहि । कीदृशं शर्धः । [v]सत्यशवसं सत्यवेगम् [v]ऋभ्वसं महदतिप्रवृद्धम् । [v]उत [v]स्म अपि च [v]नरः वृष्टेर्नेतारः [v]ते मरुतः [v]शुभे उदकार्थं [v]प्र [v]युजत प्रायुञ्जत समयोजयन् [v]त्मना आत्मनैव जगद्रक्षाबुद्ध्यैव [v]स्पन्द्राः चलनस्वभावाः पृषतीरित्यर्थः[3] ॥

उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः ।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा ॥ ९ ॥

उत । स्म । ते । परुष्ण्याम् । ऊर्णाः । वसत । शुन्ध्यवः ।
उत । पव्या । रथानाम् । अद्रिम् । भिन्दन्ति । ओजसा ॥ ९ ॥

[v]उत [v]स्म अपि च [v]ते[4] मरुतः[4] [v]परुष्ण्याम् एतन्नामिकायां नद्यां वर्तन्ते । ये [v]ऊर्णाः दीर्घीः [v]शुन्ध्यवः शोधिकाः [v]वसत आच्छादयन्ति ते । [v]उत अपि च [v]पव्या नेम्या [v]रथानां स्वकीयानां रथचक्रेण [v]ओजसा बलेन च [v]अद्रिं [v]भिन्दन्ति मेघं गिरिं वा विदारयन्ति ॥

आपथयो विपथयोऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥ १० ॥

आऽपथयः । विऽपथयः । अन्तःऽपथाः । अनुऽपथाः ।
एतेभिः । मह्यम् । नामऽभिः । यज्ञम् । विऽस्तारः । ओहते ॥ १० ॥

[v]आपथयः । अस्मदभिसुखा मार्गा येषां ते तादृशाः । [v]विपथयः विरुद्धमार्गाः [v]अन्तस्पथाः दरीसुषिरादिमार्गाः [v]अनुपथाः अनुकूलमार्गाश्च ये मरुतः सन्ति ते [v]एतेभिः एतैश्चतुर्विधैः [v]नामभिः

१. ख-च-ञ-ण-त-न-भ–वा सहने; र– वा महते । २. ख-च-ञ-ण-न-भ-र–असृजतेति । ३. ख-च-ञ-ण-त-न-भ-र–पृथिवीरित्यर्थः । ४. ख-च-ञ-ण-त-न-भ-र– एते ।

नामकैः स्वरूपैः ᵛमह्यं मदर्थं ᵛयज्ञं ᵛविस्तारः विस्तृताः सन्तः ᵛओहते वहन्ति । यद्वा । एतैर्नामभिरुदकैः सार्धं यज्ञमोहते ॥ ॥ ९ ॥

अधा॑ नरो॒ न्योहतेऽधा॑ नि॒युत॑ ओहते ।
अधा॒ पारा॑वता॒ इति॑ चि॒त्रा रू॒पाणि॒ दर्श्या ॥ ११ ॥

अध॑ । नर॑: । नि । ओ॒ह॒ते॒ । अध॑ । नि॒ऽयुत॑: । ओ॒ह॒ते॒ ।
अध॑ । पारा॑वता: । इति॑ । चि॒त्रा । रू॒पाणि॑ । दर्श्या॑ ॥ ११ ॥

ᵛअध अथ ᵛनरः अभिमतवृष्ट्यादिनेतारः ᵛन्योहते नितरां वहन्ति जगत् । ᵛअध ᵛनियुतः स्वयमेव मिश्रयितारः सन्तः ᵛओहते । ᵛअध अथ ᵛपारावताः । परावद्दूरदेशः[1] । तत्संबन्धिनश्चान्तरिक्षादिदूरदेशे ग्रहतारामेघादिधारकाः सन्त ओहत इत्यर्थः । ᵛइति उक्तप्रकारेण तेषां ᵛरूपाणि ᵛचित्रा नानाविधानि चायनीयानि वा ᵛदर्श्या स्वव्यापारैर्दर्शनीयानि भवन्तिति शेषः ॥

छ॒न्द॒:स्तु॒भः कु॒भ॒न्य॒व॒ उ॒त्स॒मा की॒रिणो॑ नृ॒तुः ।
ते मे॒ के चि॒न्न ता॒यव॒ ऊमा॑ आसन्दृ॒शि त्वि॒षे ॥ १२ ॥

छ॒न्द॒:ऽस्तु॒भः । कु॒भ॒न्य॒वः॑ । उ॒त्स॒म् । आ । की॒रिणः॑ । नृ॒तुः ।
ते । मे॒ । के । चि॒त् । न । ता॒यवः॑ । ऊमाः॑ । आ॒स॒न् । दृ॒शि । त्वि॒षे ॥ १२ ॥

ᵛछन्दस्तुभः छन्दोभिः स्तोतारः[2] ᵛकुभन्यवः उदकेच्छवः ᵛकीरिणः स्तोतारः ᵛउत्सं कूपमपेक्ष्य तृषिताय गोतमाय यान्मरुतः ᵛआ ᵛनृतुः सर्वतोऽकुर्वन् अनयन् वा स्तोत्रम् । यद्वा । ये छन्दःस्तुभश्छन्दोभिः स्तुत्याः । स्तोभतिः स्तुतिकर्मा । कुभन्यवः सेक्तारो वृष्टयुदकस्य । कुभिरुन्दनकर्मा । कीरिणः स्तोतुर्गोतमस्य पानार्थम् उत्सं कूपम् आ नृतुः आनीतवन्तः । 'असिञ्चन्नुत्सं गोतमाय तृष्णजे' (ऋ. सं. १. ८५. ११) इति ह्युक्तम् ॥ 'नृ नये' इत्यस्य वा नर्ततेर्वा विक्षेपमात्रार्थस्येदं रूपम् ॥ ᵛते मरुतः ᵛके ᵛचित् ᵛमे मह्यं ᵛतायवः ᵛन कदाचिदप्यदृश्यास्तस्करा इव स्थिताः ᵛऊमाः रक्षकाः ᵛदृशि दर्शने ᵛआसन् विषयभूता अभवन् । केचित् ᵛत्विषे शरीरदीप्त्यै बलाय वा आसन् । प्राणरूपेणेति भावः ॥

य ऋ॒ष्वा ऋ॒ष्टिर्वि॑द्युतः कु॒वय॒: सन्ति॑ वे॒धस॑: ।
तमृ॑षे मारु॒तं गणं॑ नम॒स्या र॒मया॑ गि॒रा ॥ १३ ॥

ये । ऋ॒ष्वाः । ऋ॒ष्टिऽवि॑द्युतः । कु॒वय॑: । सन्ति॑ । वे॒धस॑: ।
तम् । ऋ॒षे॒ । मा॒रु॒तम् । गण॑म् । न॒म॒स्य । र॒मय॑ । गि॒रा ॥ १३ ॥

---

१. त- पारवद्दूरदेशः । २. ख-च-ण-स्तुतौ विक्षिप्ताः ।

[v]ये मरुतः [v]ऋष्वाः दर्शनीयाः [1]ऋष्टिविद्युतः आयुधैर्विद्योतमानाः [v]कवयः मेधाविनः [v]वेधसः सर्वस्य[2] विधातारः[1] [v]सन्ति [v]तं तेषां [v]मारुतं [v]गणं [v]रमया रमणीयया [v]गिरा स्तुत्या हे [v]ऋषे ऋषिवाश्च [v]नमस्य परिचर स्तुहि ॥

अच्छा ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥ १४ ॥

अच्छ । ऋषे । मारुतम् । गणम् । दाना । मित्रम् । न । योषणा ।

दिवः । वा । धृष्णवः । ओजसा । स्तुताः । धीभिः । इषण्यत ॥ १४ ॥

हे [v]ऋषे [v]मारुतं [v]गणं मरुत्संघं [v]मित्रं [v]न आदित्यमिव [v]दाना हविर्दानेन [v]योषणा । यौतेरिदं रूपम् । यौतीति योषा स्तुतिः । तया च [v]अच्छ अभिगच्छेति शेषः । ऋषेरुत्तरार्धः[2] प्रत्यक्षवादः । [v]ओजसा बलेन हे [v]धृष्णवः धर्षका मरुतः [v]दिवो [v]वा द्युलोकाद्वा । वाशब्दश्रुतेः इतरलोकद्वयाद्वा । [v]धीभिः अस्मदीयाभिः स्तुतिभिः [v]स्तुताः [v]इषण्यत गच्छत[3] यज्ञम् ॥

नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः ॥ १५ ॥

नु । मन्वानः । एषाम् । देवान् । अच्छ । न । वक्षणा ।

दाना । सचेत । सूरिऽभिः । यामऽश्रुतेभिः । अञ्जिऽभिः ॥ १५ ॥

[v]नु क्षिप्रम् [1]एषां मरुताम् । एतान् मरुत इत्यर्थः । [1]मन्वानः स्तुवन् [1]देवान् मरुद्भ्यतिरिक्तान् [v]वक्षणा वहनेन निमित्तेन [v]अच्छ अभिप्रासु [v]न मनुते । स स्तोता [v]सूरिभिः मेधाविभिः [v]यामश्रुतेभिः शीघ्रगमनेन विश्रुतैः [v]अञ्जिभिः फलस्य व्यञ्जकैर्मरुद्भिः ॥ सर्वाः पञ्चम्यर्थे तृतीयाः ॥ उक्तलक्षणेभ्यो मरुद्भ्यः [v]दाना अभिमतदानानि [v]सचेत संगच्छते ॥

प्र ये मे बन्धवेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः ॥ १६ ॥

प्र । ये । मे । बन्धुऽएषे । गाम् । वोचन्त । सूरयः । पृश्निम् । वोचन्त । मातरम् ।

अध । पितरम् । इष्मिणम् । रुद्रम् । वोचन्त । शिक्वसः ॥ १६ ॥

---

१. ग-घ-च-ज-ण–सर्वविधातारः; त-न-र–सर्वत्र विधातारः । २. त-न-र–उत्तरार्धः । ३. च-ण–आगच्छत । ४. ख-च-ज्ञ-ण-त-न-भ-र–मेधाविभिः प्रेरयितृभिः ।

ᵛये मरुतः ᵛमे मह्यं ᵛबन्धवेषे स्वेषां बन्धूनामन्वेषणे सति ᵛसूरयः प्रेरकाः ᵛगां माध्यमिकां वाचं गोदेवतां वा ᵛप्र ᵛवोचन्त प्रावोचन् ॥ अविशिष्टमृषेर्वाक्यम् । ऋषिः[1] मरुद्वाक्यमनुवदति । तस्मादुत्तरयोः आख्यातयोः[2] यच्छब्दानन्वयान्निघातः ॥ ते ᵛपृश्निं शुदेवतां पृश्निवर्णां गां वा ᵛमातरं ᵛवोचन्त अब्रुवन् । ' पृश्नियै वै पयसो मरुतो जाताः ' (तै. सं. २. २. ११. ४) इति श्रुतेः । ᵛअध अथ ᵛपितरं स्वकीयम् ᵛद्यौष्पितरं गमनवन्तमब्रवन्तं वा ᵛरुद्रं ᵛवोचन्त ᵛशिक्वसः शक्तास्ते । मरुतां रुद्रेण पुत्रत्वपरिग्रहो बहुकृत्व उपपादितः ॥

सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥ १७ ॥

सप्त । मे । सप्त । शाकिनः । एकम्ऽएका । शता । ददुः ।
यमुनायाम् । अधि । श्रुतम् । उत् । राधः । गव्यम् । मृजे । नि । राधः । अश्व्यम् । मृजे ॥ १७ ॥

ᵛसप्त सप्तसंख्याकाः[3] संघाः । ' सप्तगणा वै मरुतः ' (तै. सं. २. २. ११. १) इति श्रुतेः । अदितिगर्भे वर्तमानं वायुमिन्द्रः प्रविश्य सप्तधा विदार्य पुनरेकैकं सप्तधा व्यदारयत् ते एकोनपञ्चाशन्मरुद्गणा अभवन्निति पुराणेषु प्रसिद्धम् । ते च सप्तसंख्याकाः ᵛशाकिनः सर्वमपि कर्तुं शक्ताः । ते च ᵛएकमेका एकैको गणः ᵛमे मह्यं ᵛशता शतसंख्याकानि गवाश्वयूथानि ᵛददुः दत्तवन्तः प्रयच्छन्तिवति वा आशीः । तैर्दत्तं ᵛयमुनायां नद्याम् ᵛअधि । अयं सप्तम्यर्थानुवादी[4] । तत्र ᵛश्रुतं प्रसिद्धं ᵛगव्यं गोसमूहात्मकं गोसंबन्धि वा ᵛराधः धनम् ᵛउत् ᵛमृजे उन्मार्जयामि । तथा तैर्दत्तम् ᵛअश्व्यम् अश्वसमूहात्मकं तत्संबन्धि वा ᵛराधः धनं[5] ᵛनि ᵛमृजे निमार्ज्मि ॥ ॥ १० ॥

' को वेद जानम् ' इति षोडशर्चं नवमं सूक्तम् । इयावाश्व ऋषिः । आद्यापञ्चमीदशम्येकादशी-पञ्चदश्यः ककुभः षष्ठीसप्तमीनवमीत्रयोदशीचतुर्दशीषोडश्यः सतोबृहत्योऽष्टमी द्वादशी च गायत्र्यौ द्वितीया बृहती तृतीयानुष्टुप् चतुर्थी पुरउष्णिक् । मरुतो देवता । तथा चानुक्रान्तं—' को वेद षोळश ककुब्बृहत्यनुष्टुप् पुरउष्णिक् ककुप्सतोबृहत्यौ गायत्री सतोबृहती ककुभौ गायत्री सतोबृहत्यौ ककुप्सतो-बृहती ' इति । विनियोगो लैङ्गिकः ॥

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम् ।
यद्युयुज्रे किलास्यः ॥ १ ॥

कः । वेद । जानम् । एषाम् । कः । वा । पुरा । सुम्नेषु । आस । मरुताम् ।
यत् । युयुज्रे । किल । अस्यः ॥ १ ॥

---

१. ख-च-ञ-ण-त-न-भ-र-मे ऋषिः । २. ख-च-ञ-ण-त-भ-र-निघातयोः । ३. ख-च-ञ-भ-र-सप्तसंख्याकाः एतत्संख्याकाः । ४. ख-च-ञ-ण-त-न-भ-र-पञ्चम्यर्थानुवादी । ५. ख-च-ञ-ण-त-न-भ-र-' धनं ' नास्ति ।

vएषाम् ॥ मरुतां पूर्वसूक्ते प्रस्तुतत्वादत्रान्वादेशविषयत्वादेषामित्यस्य निघातता ॥ vजानम् उत्पत्तिं vको vवेद जानाति कः पुमान् । vको vवा vपुरा पूर्वमप्येषां vमरुतां vसुम्नेषु सुखेषु vआस भवति । vयत् यदा एते vकिलास्यः किलासीः । पृषतीः[1] इत्यर्थः । ताः vयुयुध्रे रथे योजितवन्तः तदैषां स्थितिं बललक्षणानि सुखानि च को जानातीत्यर्थः । वेगविषये[2] सर्वत्र वायोरुपमास्पदत्वादिति भावः ॥

ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥ २ ॥

आ । एतान् । रथेषु । तस्थुषः । कः । शुश्राव । कथा । ययुः ।
कस्मै । सस्रुः । सुऽदासे । अनु । आपयः । इळाभिः । वृष्टयः । सह ॥ २ ॥

vएतान् मरुतः vरथेषु vतस्थुषः स्थितवतः vकः vआ vशुश्राव श्रावयेदित्यर्थः । यद्वा । एतेषां क्रोशध्वनिं रथध्वनिं च कः शृणुयात् । vकथा कथं vययुः गच्छन्ति तदपि को जानाति । यद्वा । तान् कथमन्ये देवादयोऽनुगच्छेयुः । vकस्मै vसुदासे सुदानाय vआपयः बन्धुभूता व्याप्ताः vवृष्टयः वर्षकाः ॥ अयं कर्तरि क्तिच् ॥ vइळाभिः बहुविधैरन्नैः vसह सहिताः vअनु vसस्रुः अनुक्रमेण अवतरेयुः[3] ॥

ते मे आहुर्य आययुरुप द्युभिर्विभिर्मदे ।
नरो मर्यो अरेपस इमान्पश्यन्निति ष्टुहि ॥ ३ ॥

ते । मे । आहुः । ये । आऽययुः । उप । द्युऽभिः । विऽभिः । मदे ।
नरः । मर्यः । अरेपसः । इमान् । पश्यन् । इति । स्तुहि ॥ ३ ॥

ऋषिर्ऋग्द्वयाभ्यां मरुत्प्रादुर्भावमाख्यास्यन् अनया प्रादुर्भूतान् पश्यन्नाह । vते मरुतः इत्थं लपते vमे मह्यम् vआहुः vये vउप vआययुः ये मरुतो मां प्राप्ताः । कैः साधनैः । vद्युभिः द्योतमानैः vविभिः गन्तृभिरश्वैः । किमर्थम् । vमदे मदाय सोमपानजनिताय । किमाहुरिति तदनुवृत्ते । vनरः नेतारः vमर्याः मनुष्येभ्यो हिताः vअरेपसः अलेपास्ते । हे ऋषे vइमान् अस्मान् vपश्यन् तथा[4] स्थितान् चक्षुषावलोकयन् vस्तुहि vइति आहुः । यद्वा । इति इत्थं पश्यन् स्तुहीति ॥

ये अञ्जिषु ये वाशीषु स्वभानवः सृक्षु रुक्मेषु खादिषु ।
श्राया रथेषु धन्वसु ॥ ४ ॥

ये । अञ्जिषु । ये । वाशीषु । स्वऽभानवः । सृक्षु । रुक्मेषु । खादिषु ।
श्रायाः । रथेषु । धन्वऽसु ॥ ४ ॥

---

१. ख-च-ञ-ण-न-भ-र-पृषत्यः ; श-पृषतः । २. ख-च-ञ-ण-भ-देशविषये; न-देवाविषये । ३. ख च-ञ-ण-न-भ-अवतरेयुः वृष्टयन्नानि; त-र-अवतरेयुः वृष्टयन्नादीनि । ४. ख-च-ञ-ण-त-न-भ-र-यथा ।

अनया मरुतां स्वरूपं निरूपयति । हे मरुतो युष्माकं ᵛये प्रसिद्धाः ᵛस्वभानवः स्वदीप्तयः ᵛअङ्गिषु आभरणेषु ᵛश्रायाः आश्रयभूताः सन्ति । ᵛये च ᵛवाशीषु आयुधेषु । ये च ᵛस्रक्षु माल्येषु । ये ᵛरुक्मेषु उरोभूषणेषु । ये च ᵛखादिषु हस्तपादस्थितकटकेषु । ' हस्तेषु खादिश्च कृतिश्च ' (ऋ. सं. १. १६८. ३), ' पत्सु खादयः ' (ऋ. सं. ५. ५४. ११) इति हि श्रुती भवतः । ᵛरथेषु ᵛधन्वसु च ये च स्वभानवः श्रायाः सन्ति । ' सुधन्वानः इषुमन्तः ', ' सुरथाः पृश्निमातरः ' (ऋ. सं. ५. ५७. २) इति च निगमः । तान् सर्वान् स्तुम इति शेषः । यद्वा । ये स्वभानवः स्वायत्तदीप्तयो मरुतोऽङ्गिष्वाभरणेषु निमित्तेषु श्राया आश्रया भविष्यामः । ये च वाशीषु निमित्तेषु । एवं सर्वत्र योज्यम् । तादृग्विधानिमान्पश्यन् स्तुहीति पूर्वत्र संबन्धः । तेषामेव इदं वाक्यम् ॥

युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः ।
वृष्टी द्यावो यतीरिव ॥ ५ ॥

युष्माकम् । स्म । रथान् । अनु । मुदे । दधे । मरुतः । जीरऽदानवः ।
वृष्टी । द्यावः । यतीःऽइव ॥ ५ ॥

हे ᵛजीरदानवः शीघ्रदाना हे ᵛमरुतः ᵛयुष्माकं ᵛरथान् ᵛअनु उद्दिश्य ᵛमुदे मोदाय ᵛदधे धारयामि करोमीत्यर्थः । सामर्थ्यात् स्तुतीरिति लक्ष्यते । ᵛस्म[1] इति पूरणः[2] । ᵛवृष्टी वृष्ट्या[2] ᵛयतीः सर्वत्र गच्छन्तीः ᵛद्यावः दीप्तीरिव दृश्यमानान् रथानिति संबन्धः ॥ ॥ ११ ॥

कारीर्यां तिस्रः पिण्ड्यो होतव्याः । तत्र द्वितीयायाः ' आ यं नरः ' इत्यनुवाक्या । सूत्रितं च—' आ यं नरः सुदानवो ददाशुषे विद्युन्महसो नरो अश्मदिद्यवः ' (आश्व. श्रौ. २. १३) इति ॥

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥ ६ ॥

आ । यम् । नरः । सुऽदानवः । ददाशुषे । दिवः । कोशम् । अचुच्यवुः ।
वि । पर्जन्यम् । सृजन्ति । रोदसी इति । अनु । धन्वना । यन्ति । वृष्टयः ॥ ६ ॥

ᵛनरः नेतारः ᵛसुदानवः शोभनदाना मरुतः ᵛयं ᵛकोशम् । मेघनामैतत् । अपां कोशवद्वारकं मेघं ᵛददाशुषे हविर्दत्तवते यजमानाय ᵛदिवः अन्तरिक्षात् ᵛआ ᵛअचुच्यवुः आच्यावयन्ति ᵛपर्जन्यं मेघं ᵛरोदसी ᵛअनु द्यावापृथिव्यावनुसृत्य ᵛवि ᵛसृजन्ति विमोक्षयन्ति । पश्चात् ᵛधन्वना सर्वत्र गच्छतोदकेन सह ᵛवृष्टयः वृष्टिप्रदा मरुतः ᵛयन्ति सर्वत्र व्याप्नुवन्ति ॥

१. ख-च-ञ-ण-न-भ-र-' स्मेति पूरणः ' नास्ति । २. त-वृष्टये ।

ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वाइवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ॥ ७ ॥

ततृदानाः । सिन्धवः । क्षोदसा । रजः । प्र । सस्रुः । धेनवः । यथा ।
स्यन्नाः । अश्वाःऽइव । अध्वनः । विऽमोचने । वि । यत् । वर्तन्ते । एन्यः ॥ ७ ॥

Vसिन्धवः स्यन्दमाना अपः Vततृदानाः निर्भिन्दन्तः[1] मेघान्[1] मरुतः Vक्षोदसा उदकेन सह Vरजः अन्तरिक्षं Vप्र Vसस्रुः प्रसरन्ति । Vधेनवो Vयथा पयः सिञ्चन्त्यो नवप्रसूताः[2] गाव इव । किंच दृष्टान्तान्तरम् । Vस्यन्नाः आशुगतयः Vअश्वाइव अश्वाः[3] यथा Vअध्वनः Vविमोचने मनुष्याणामध्वविमोकाय संचरन्ति तथेत्यर्थः । Vयत् यदा Vएन्यः । नदीनामैतत् । नद्यः Vवि[4] Vवर्तन्ते[4] विविधं संचरन्ति । अथवा प्रतिनिवृत्य वर्तन्ते । प्रवर्धन्त इत्यर्थः । तदेवं[5] कुर्वन्तीति पूर्वत्रान्वयः ॥

आ यात मरुतो दिव आन्तरिक्षादमादुत । माव स्थात परावतः ॥ ८ ॥

आ । यात । मरुतः । दिवः । आ । अन्तरिक्षात् । अमात् । उत ।
मा । अव । स्थात । पराऽवतः ॥ ८ ॥

हे Vमरुतः Vपरावतः अत्यन्तदूरदेशात् Vदिवः द्युलोकात् Vआ Vयात । तथा Vअन्तरिक्षात् Vआ यात । Vउत अपि च Vअमात अस्माल्लोकादा यात । परावत इत्यत्रापि[6] वा योज्यम् । परावतो दूरदेशे तत्र तत्र द्युलोकादौ Vमाव Vस्थात अवस्थितिं मा कुरुत ॥

मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्नि रीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥ ९ ॥

मा । वः । रसा । अनितभा । कुभा । क्रुमुः । मा । वः । सिन्धुः । नि । रीरमत् ।
मा । वः । परि । स्थात् । सरयुः । पुरीषिणी । अस्मे इति । इत् । सुम्नम् । अस्तु । वः ॥९॥

हे मरुतः Vवः युष्मान् Vरसा । नदीनामैतत् । ' रसा नदी भवति ' (निरु. ११. २५) इति निरुक्तम् । रसनवती शब्दवती । Vअनितभा । इता प्राप्ता भा यस्याः सा इतभा । न तादृश्यनितभा । Vकुभा कुत्सितदीप्तिश्च Vमा Vनि Vरीरमत् मा[7] निकृष्टं[7] रमतु । Vक्रुमुः सर्वत्रक्रमणः Vसिन्धुः समुद्रश्च Vमा नि रीरमत् । तथा Vपुरीषिणी । पुरीषमुदकम् । तद्वती Vसरयुः अपि Vमा Vपरि Vष्ठात्

१. ख-च-ण-भ–तरन्तः; झ–तितरन्तः; त-न-र–वितरन्तः । २. ख-च-झ-ण-त-न-भ-र–नवप्रसूतिकाः । ३. ग-घ-ज-र-श–' अश्वाः ' नास्ति । ४. ख-च-ण-त-भ-विमोकाय वर्तन्ते; न–विमोकाय विवर्तन्ते । ५. ख-च-झ-ण-न-भ-र-श–तदेवम् । ६. ख-च-ण-त-न-भ-र–इत्यत्र । ७. ख-च-ण-त-न-भ-र–निकृष्टम्; श–निकृष्टं मा ।

परितस्तिष्ठतु मा निरुणद्धु । vअस्मे vइत् अस्मास्वेव vअस्तु vसुम्नं स्वदागमनजनितं सुखं vवः युष्माकं संबन्धि युष्मास्वभूतम् ।

तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टयः ॥ १० ॥

तम् । वः । शर्धम् । रथानाम् । त्वेषम् । गणम् । मारुतम् । नव्यसीनाम् ।
अनु । प्र । यन्ति । वृष्टयः ॥ १० ॥

vतं मारुतमित्यनेन संबध्यते । vवः युष्माकं प्रेरकं vनव्यसीनां नूतनानां vरथानां vशर्धं बलं vत्वेषं दीप्तं तं vमारुतं vगणं च स्तौमीत्यर्थः । यद्वा । रथानां रंहणशीलानां वो युष्माकं शर्धं परेषामभिभावुकं गणं स्तौमीत्येकमेव वाक्यम् । अथ परोक्षकृतः । vवृष्टयः युष्मान् vअनु vप्र vयन्ति प्रकर्षेण गच्छन्ति[1] । यद्वा । वर्षका मरुतोऽनु अनुकूलं प्रकृष्टं यन्ति गच्छन्ति ॥ ॥ १२ ॥

शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः ।
अनु क्रामेम धीतिभिः ॥ ११ ॥

शर्धंम्ऽशर्धम् । वः । एषाम् । व्रातम्ऽव्रातम् । गणम्ऽगणम् । सुशस्तिऽभिः ।
अनु । क्रामेम । धीतिऽभिः ॥ ११ ॥

हे मरुतः vएषां vवः युष्माकं vशर्धंशर्धं तत्तद्बलं vव्रातंव्रातम् । अविवक्षितगणः[2] व्रातः । तं तं व्रातं वः vगणंगणं तं तं सप्तसप्तमुदायात्मकं गणंगणं च vसुशस्तिभिः शोभनस्तुतिभिः vधीतिभिः कर्मभिर्हविष्प्रदानादिलक्षणैः vअनु vक्रामेम अनुगच्छेम ॥

कस्मा अद्य सुजाताय रातहव्याय प्र ययुः । एना यामेन मरुतः ॥१२॥

कस्मै । अद्य । सुऽजाताय । रातऽहव्याय । प्र । ययुः । एना । यामेन । मरुतः ॥ १२ ॥

vअद्य अस्मिन् दिने vकस्मै vसुजाताय vरातहव्याय दत्तहविष्काय vप्र vययुः प्रकर्षेण गच्छेयुः vएना अनेन vयामेन रथेन vमरुतः ॥

येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ॥ १३ ॥

येन । तोकाय । तनयाय । धान्यम् । बीजम् । वहध्वे । अक्षितम् ।
अस्मभ्यम् । तत् । धत्तन । यत् । वः । ईमहे । राधः । विश्वऽआयु । सौभगम् ॥ १३ ॥

१. ख-च-ण-वाञ्छति; भ-वाञ्छयन्ति । २. त-न-र-विवक्षितगणः ।

हे मरुतः [v]येन सदयेन मनसा [v]तोकाय पुत्राय [v]तनयाय तत्पुत्राय धनाय वा [v]धान्यं [v]बीजम् [v]अक्षितम् अक्षीणं [v]वहध्वे धारयध्वे तेन चित्तेन [v]अस्मभ्यं [v]तत् धान्यं बीजं [v]धत्तन । [v]यत् च [v]वः युष्मान् [v]ईमहे याचामहे [v]राधः धनं [v]विश्वायु सर्वान्नोपेतं कृत्स्नायुष्योपेतं वा [v]सौभगं सौभाग्यं च तद्धत्तनेति समन्वयः ॥

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्टी शं योरापं उस्रि भेषजं स्याम मरुतः सह ॥ १४ ॥

अति । इयाम । निदः । तिरः । स्वस्तिऽभिः । हित्वा । अवद्यम् । अरातीः ।
वृष्टी । शम् । योः । आपः । उस्रि । भेषजम् । स्याम । मरुतः । सह ॥ १४ ॥

हे मरुतो वयं[1] [v]स्वस्तिभिः क्षेमैः [v]अवद्यं पापं [v]हित्वा परित्यज्य [v]निदः निन्दकान् [v]अरातीः शत्रून् [v]तिरः प्रासान् । यद्वा तिरः अन्तर्हितम् । [v]अतीयाम अतिक्रम्य गच्छेम तिरस्कुर्म इत्यर्थः । अनेनानिष्टपरिहारः प्रार्थित उत्तरेणेष्टप्राप्तिरुच्यते । [v]वृष्टी वृष्टिषु युष्मत्प्रेरितासु सतीषु [v]शं सुखं [v]योः पापानां गावनं[2] च [v]आपः उदकानि ॥ शसः स्थाने जस् ॥ [v]उस्रि गोयुक्तं [v]भेषजम् । यद्यप्येतदुदकनाम तथापि पृथगपामभिधानादत्र तद्धेतुकार्यमन्नमुच्यते । तत सर्वं [v]सह [v]स्याम लभेमहि हे [v]मरुतः वयम् । यद्वा । आपो युष्मत्प्रेरिता उक्तं सर्वं कुर्वन्तु । वयं सर्वे सहैव स्याम भवेम युष्मत्स्वभूताः ॥

सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः ।
यं त्रायध्वे स्याम ते ॥ १५ ॥

सुऽदेवः । समह । असति । सुऽवीरः । नरः । मरुतः । सः । मर्त्यः ।
यम् । त्रायध्वे । स्याम । ते ॥ १५ ॥

हे [v]समह । प्रशस्तवचनः समहशब्दः । हे पूजित मरुतां गण [v]सः[3] [v]मर्त्यः च[3] [v]सुदेवः कल्याण-मरुत्संज्ञकदेवोपेतः [v]असति भवति । हे [v]नरः नेतारो हे [v]मरुतः सः[4] [v]सुवीरः शोभनपुत्राद्युपेतश्च असति भवति । [v]यं मर्त्यं [v]त्रायध्वे पालयध्वे । एवं[5] भवति [v]ते वयं [v]स्याम युष्मदीयाः ॥

स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँइव सखीरनु ह्वय गिरा गृणीहि कामिनः ॥ १६ ॥

स्तुहि । भोजान् । स्तुवतः । अस्य । यामनि । रणन् । गावः । न । यवसे ।
यतः । पूर्वान्ऽइव । सखीन् । अनु । ह्वय । गिरा । गृणीहि । कामिनः ॥ १६ ॥

---

१. ख-च-झ-ण-न-भ-र- यम् । २. ख-च-झ-ण-त-न-भ-र- यवनम् । ३. ग-घ-ज-र-श- 'स मर्त्यश्च' नास्ति । ४. ग-घ-ज- स मर्त्यः । ५. त-य एवम् ।

हे ऋषे ᵛस्तुवतः स्तुतिं कुर्वतः ᵛअस्य यजमानस्य ᵛयामनि यज्ञे ᵛभोजान् दातॄन् मरुतः ᵛस्तुहि । ᵛगावो ᵛन ᵛयवसे । तृणादिभक्षणाय गच्छन्त्यः[१] गावो यथा रमन्ते तद्वन्मरुतोऽपि ᵛरणन् रमन्ताम् । ᵛयतः गच्छतो मरुतः ᵛपूर्वान् पुरातनान् ᵛसर्वान् ᵛइव ᵛअनु ᵛह्वय आह्वय । ᵛकामिनः स्तुतीच्छावतो मरुतः ᵛगिरा स्तुत्या ᵛगृणीहि स्तुहि ॥ ॥ १३ ॥

' प्र शर्धाय ' इति पञ्चदशर्चं दशमं सूक्तं श्यावाश्वस्यार्षं मरुद्देवताकम्[२] । चतुर्दशी त्रिष्टुप् शिष्टा जगत्यः । ' प्र शर्धाय पञ्चोना जागतमुपान्त्या त्रिष्टुप् ' इत्यनुक्रान्तम् । सूक्तविनियोगो लैङ्गिकः । आद्यैन्द्रामारुत्यां प्रधानस्य याज्या । सूत्रितं च—' प्र शर्धाय मारुताय स्वभानव इत्यैन्द्रीमनूच्य मारुत्या यजेत् ' (आश्व. श्रौ. २. ११) इति ॥

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युतें ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥ १ ॥

प्र । शर्धाय । मारुताय । स्वऽभानवे । इमाम् । वाचम् । अनज । पर्वतऽच्युते ।
घर्मऽस्तुभे । दिवः । आ । पृष्ठऽयज्वने । द्युम्नऽश्रवसे । महि । नृम्णम् । अर्चत ॥ १ ॥

प्र अनजेति संबन्धः । ᵛमारुताय मरुत्संबन्धिने ᵛशर्धाय बलाय ᵛइमां क्रियमाणां ᵛवाचं[३] स्तुतिं ᵛप्र ᵛअनज प्रापय । ᵛस्वभानवे स्वायत्ततेजसे ᵛपर्वतच्युते पर्वतस्य च्यावयित्रे ᵛघर्मस्तुभे घर्मस्य स्तोभयित्रे ᵛदिव ᵛआ द्युलोकादागच्छते ᵛपृष्ठयज्वने[४] षट् पृष्ठैः स्थन्तरबृहदादिभिरीजानाय ᵛद्युम्नश्रवसे द्योतमानान्नाय ᵛमहि महत् प्रभूतं ᵛनृम्णं[५] धनं हविर्लक्षणम् ᵛअर्चत ददतेत्यर्थः ॥

कारीर्यां प्रथमस्याः[६] पिण्ड्याः[७] ' प्र वो मरुतः ' इति याज्या । सूत्रितं च—' प्र वो मरुतस्तविषा आ यं नरः ' (आश्व. श्रौ. २. १२) इति ॥

प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥ २ ॥

प्र । वः । मरुतः । तविषाः । उदन्यवः । वयःऽवृधः । अश्वऽयुजः । परिऽज्रयः ।
सम् । विऽद्युता । दधति । वाशति । त्रितः । स्वरन्ति । आपः । अवना । परिऽज्रयः ॥ २ ॥

हे ᵛमरुतः ᵛवः युष्माकं गणाः ᵛप्र प्रादुर्भवन्ति । कीदृशा गणाः । ᵛतविषाः दीप्ता महान्तो वा ᵛउदन्यवः उदकेच्छवो जगद्रक्षणार्थं[८] ᵛवयोवृधः अन्नस्य वर्धयितारः ᵛअश्वयुजः गमनाय रथेऽश्वानां योक्तारः ᵛपरिज्रयः परितो गन्तारः ᵛविद्युता ᵛसं ᵛदधति संगच्छन्ते । तदानीं ᵛत्रितः त्रिषु स्थानेषु

१. ख-च-ञ-ण-भ–वाच्छन्त्यः । २. ख-च-ण-भ–मरुद्देवताकं च । ३. ख-च-ञ-ण-न-भ-र-श–' वाचं ' नास्ति । ४. ख-च-ञ-ण-त-न-भ-र– यद्वा पृष्ठयज्वने । ५. त–द्युम्नम् । ६. ख-च-ञ-ण-भ–प्रथमायाः पिण्ड्याः; न–प्रथमायां पिण्ड्याम् । ७. ख-च-ञ-ण-न-भ-र–जगद्रक्षार्थम् ।

तायमानो मेघो मरुद्गणो वा [v]वाशति शब्दयति । अस्मिन् पक्षे संघवादः[१] अयम् । तदा [v]आपः [v]परिज्रयः परितो गन्त्र्य आपः [v]अवना अवनौ भूमौ [v]स्वरन्ति अधः पतन्ति ॥

'विद्युन्महसः' इति तृतीया कारीर्यामेव द्वितीयस्याः पिण्ड्या याज्या । सूत्रितं च–[२]'विद्युन्महसो नरोऽश्मदिद्यवः कृण्वं नियानं हरयः सुपर्णाः' (आश्व. श्रौ. २. १३) इति ॥

विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन्मुहुरा ह्वादुनीवृतः स्तनयदमा रभसा उदोजसः ॥ ३ ॥

विद्युत्ऽमहसः । नरः । अश्मऽदिद्यवः । वातऽत्विषः । मरुतः । पर्वतऽच्युतः ।
अब्दऽया । चित् । मुहुः । आ । ह्वादुनिऽवृतः । स्तनयत्ऽअमाः । रभसाः । उत्ऽओजसः ॥३॥

[v]विद्युन्महसः विद्योतमानतेजसः [v]नरः वृष्ट्यादेर्नेतारः [v]अश्मदिद्यवः व्याप्तायुधा अश्मसारमयायुधा वा [v]वातत्विषः प्राप्तदीप्तयः [v]पर्वतच्युतः पर्वतानां मेघानां वा च्यावयितारः [v]अब्दया [v]मुहुः उदकानां दातारः ॥ जग्मः[३] याजादेशः । चिदिति पूरणः ॥ [v]ह्वादुनीवृतः ह्वादुन्याः अशनेः[४] प्रवर्तकाः [v]स्तनयदमाः । अमाशब्दः साहित्यवाची । शब्दोपेतगणा इत्यर्थः । [v]रभसाः वृष्ट्यर्थमुद्युञ्जानाः [v]उदोजसः उद्भूतबलाः[५] [v]मरुतः वृष्ट्यर्थं प्रादुर्भवन्तीत्यर्थः ॥

व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः ।
वि यदजाँ अजथ नावं ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥ ४ ॥

वि । अक्तून् । रुद्राः । वि । अहानि । शिक्वसः । वि । अन्तरिक्षम् । वि । रजांसि । धूतयः ।
वि । यत् । अजान् । अजथ । नावः । ईम् । यथा ।
वि । दुःऽगानि । मरुतः । न । अह । रिष्यथ ॥ ४ ॥

हे [v]रुद्राः रुद्रपुत्रा मरुतः [v]अक्तून् रात्रीः [v]वि अजथ इत्युत्तरार्धगतेन संबध्यते । एवं सर्वत्रेति । क्षिपथेति तस्यार्थः । [v]अहानि अपि [v]वि अजथ । हे [v]शिक्वसः शक्ताः सर्वमपि कर्तुम् [v]अन्तरिक्षं [v]वि अजथ । तथा [v]रजांसि [v]वि अजथ । हे [v]धूतयः कम्पकाः [v]यत् यदा [v]अजान् मेघान् [v]वि[६] [v]अजथ[६] गमयथ [v]नाव [v]ईं ताः [v]यथा समुद्रं तद्वत् [v]दुर्गाणि शत्रुनगराणि [v]वि अजथ हे [v]मरुतो [v]नाह [v]रिष्यथ नैव हिंसथ ॥

१. ख-च-ण–सर्वदः; झ-त-भ–संवादः; न–संप्रवादः; श–संविद्युता । २. र-श– शमः । ३. ख-च-झ-ण-न-भ-र–'अशनेः' नास्ति । ४. ख-च-ण–बहुलाः; झ-न-र–उद्भूतबलाः; भ–हुतबलाः । ५. झ-त-भ-र-विव्यथ ।

तद्वीर्यं वो मरुतो महित्वनं दीर्घं तंतान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषोऽनश्वदां यत्ययातना गिरिम् ॥ ५ ॥

तत् । वीर्यम् । वः । मरुतः । महिऽत्वनम् । दीर्घम् । ततान । सूर्यः । न । योजनम् ।
एताः । न । यामे । अगृभीतऽशोचिषः । अनश्वऽदाम् । यत् । नि । अयातन । गिरिम् ॥ ५ ॥

हे [v]मरुतः [v]वः युष्माकं [v]तद्वीर्यं प्रसिद्धं सामर्थ्यं [v]महित्वनं महत्त्वं [v]दीर्घम् अत्यन्तमायतं [v]ततान तनोति । लोके [v]सूर्यो [v]न [v]योजनं सूर्यस्तेज इव । [v]एता [v]न[1] एतवर्णा देवानामश्वा इव । ते यथा [v]यामे[2] गमने योजनं[2] दीर्घं तन्वन्ति तद्वदित्यपरो दृष्टान्तः । ते च [v]अगृभीतशोचिषः अगृहीततेजस्काः । यद्वैतन्मरुतां विशेषणम् । हे मरुतो यूयमगृभीतशोचिषः सन्तः [v]यत् यदा [v]अनश्वदां व्यापकोदकादातारं पणिभिरपहृतानामश्वानामप्रदातारं वा [v]गिरिं मेघं पर्वतं वा [v]न्ययातन निहतवन्तः[3] स्थ[3] ॥ ॥ १४ ॥

अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम् ॥ ६ ॥

अभ्राजि । शर्धः । मरुतः । यत् । अर्णसम् । मोषथ । वृक्षम् । कपनाऽइव । वेधसः ।
अध । स्म । नः । अरमतिम् । सऽजोषसः ।
चक्षुःऽइव । यन्तम् । अनु । नेषथ । सुऽगम् ॥ ६ ॥

हे [v]वेधसः वृष्टेर्विधातारो हे [v]मरुतः [v]शर्धः भवतां गणम् [v]अभ्राजि भ्राजते । [v]यत् यस्मात् [v]अर्णसम् उदकवन्तं [v]वृक्षम् । वृश्च्यते विदार्यत इति वृक्षो मेघः । तं [v]मोषथ ताडयथेत्यर्थः । [v]कपनेव[4] । इवेत्यनर्थकः । कम्पनाः सन्तः । यद्वा । कपनाः कृमयो वृक्षं घुणादयः । ते यथा मुष्णन्ति तद्वत् । [v]अध अपि च । [v]स्म इति पूरणः । [v]नः अस्मान् । मामित्यर्थः । हे [v]सजोषसः युष्मासु परस्परं समानप्रीतयो यूयम् [v]अरमतिम् आरमणं धनादिकं प्रति [v]यन्तं गच्छन्तम् [v]अनु [v]नेषथ अनुक्रमेण नयथ [v]सुगं सुगमनं मार्गम् । तत्र दृष्टान्तः । [v]चक्षुरिव । तद्यथा मार्गप्रदर्शनेन[5] नायकं[5] भवति तद्वत् ॥

---

१. ख-च-झ-ण-त-न-भ-र-श-'न' नास्ति । २. ख-च-ण-ते यजनम्; झ-न-भ-मे यजनम्; र-यामे यजनम्; श-यामे गमनाय योजनम् । ३. ख-च-ण-निहतवन्तः स्थाः; ग-घ-ज-श-निहतवन्तः । ४. त-कपना इव । ५. ख-ग-घ-च-ज-ण-मार्गप्रदर्शने नायकम्; श-मार्गप्रदर्शननायकम् ।

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥ ७ ॥

न । सः । जीयते । मरुतः । न । हन्यते । न । स्रेधति । न । व्यथते । न । रिष्यति ।
न । अस्य । रायः । उप । दस्यन्ति । न । ऊतयः ।
ऋषिम् । वा । यम् । राजानम् । वा । सुसूदथ ॥ ७ ॥

हे [v]मरुतः यूयं [v]यम् [v]ऋषिं मन्त्रद्रष्टारं ब्राह्मणं [v]राजानं [v]वा [v]सुषूदथ[1] क्षारयथ प्रेरयथ सत्कर्मसु [v]सः ऋषी राजा वा [v]न [v]जीयते । अन्यैर्न पराभाव्यते ॥ 'जि जये' 'ज्या वयोहानौ' इत्यस्य वा रूपम् ॥ हे मरुतः [v]न [v]हन्यते । न हिंस्यते अत्यर्थं प्राणैर्न वियुज्यते । [v]न [v]स्रेधति न क्षीयते । [v]न [v]व्यथते न पीड्यते । [v]न [v]रिष्यति न हिंस्यते । अत्र हिंसा बाधमात्रम् । [v]अस्य [v]रायः धनानि [v]न [v]उप[2] [v]दस्यन्ति नोपक्षीयन्ते । तथा [v]नोतयः रक्षा अप्युप दस्यन्ति ॥

कारीर्यामेव तृतीयस्याः पिण्डया याज्या 'नियुत्वन्तः' इत्येषा । सूत्रितं च—'नियुत्वन्तो ग्रामजितो यथा नरोऽग्ने बाधस्व वि मृधो वि दुर्गहा' (आश्व. श्रौ. २. १३) इति ॥

नियुत्वन्तो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कवन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवीं मध्वो अन्धसा ॥ ८ ॥

नियुत्वन्तः । ग्रामऽजितः । यथा । नरः । अर्यमणः । न । मरुतः । कवन्धिनः ।
पिन्वन्ति । उत्सम् । यत् । इनासः । अस्वरन् ।
वि । उन्दन्ति । पृथिवीम् । मध्वः । अन्धसा ॥ ८ ॥

[v]नियुत्वन्तः नियुत्संज्ञकैरश्वैस्तद्वन्तो मरुतः [v]ग्रामजितः संघात्मकस्य पदार्थस्य विश्लेषयितारः [v]नरः नराकारा नेतारो वा । मरुतो नियुत्वन्तः । अयं शब्दोऽश्वसामान्ये वर्तते । नितरां यवन-वन्तोऽश्ववन्तो ग्रामजितो ग्रामस्य जेतारो नर इव मनुष्या इव तथा भवन्ति । [v]अर्यमणो [v]न अर्यमप्रभृतय आदित्या इव । दीक्षा इति शेषः । तादृशाः [v]मरुतः [v]कवन्धिनः उदकवन्तो भवन्ति । [v]यत् यदा [v]इनासः ईश्वराः [v]उत्सं कूपादिनिम्नप्रदेशं मेघं वा [v]पिन्वन्ति प्याययन्त्युदकेन । यदा [v]अस्वरन् शब्दयन्ति यदा [v]व्युन्दन्ति [v]पृथिवीं [v]मध्वः मधुरस्योदकस्य [v]अन्धसा सारेण[3] तदैवं भवति। यद्वा । यदास्वरन् तदा पिन्वन्त्युत्समिनासः तदान्धसः पृथिवीं व्युन्दन्तीति ॥

१. ख-च-झ-ण-न-भ-र-यं सुषूदथ । २. त-तु उप । ३. ख-अन्नेन ।

प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥ ९ ॥

प्रवत्वती । इयम् । पृथिवी । मरुत्ऽभ्यः । प्रवत्वती । द्यौः । भवति । प्रयत्ऽभ्यः ।
प्रवत्वतीः । पथ्याः । अन्तरिक्ष्याः । प्रवत्वन्तः । पर्वताः । जीरऽदानवः ॥ ९ ॥

[v]इयं [v]पृथिवी [v]मरुद्भ्यः मरुतामर्थाय [v]प्रवत्वती । प्रवन्तः प्रकर्षवन्तो विस्तीर्णाः प्रदेशा यस्यां सा प्रवत्वती । तादृशी [v]भवति । कृत्स्नापि भूमिः मरुत्परा[1] भवतीत्यर्थः । तां सर्वामपि व्याप्नुवन्तीति यावत् । तथा [v]द्यौः अपि [v]प्रयद्भ्यः प्रकर्षेण गच्छद्भ्यस्तेभ्यः [v]प्रवत्वती भवति । सापि मरुतां संचाराय । तथा [v]अन्तरिक्ष्याः अन्तरिक्षे भवाः [v]पथ्याः स्वगतयोऽपि [v]प्रवत्वतीः प्रवत्वत्यो मरुद्भ्यो भवन्ति । [v]पर्वताः[2] अद्रयो मेघा वा [v]प्रवत्वन्तः भवन्ति [v]जीरदानवः क्षिप्रदाना मरुद्भ्यः ॥

यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ॥ १० ॥

यत् । मरुतः । सऽभरसः । स्वःऽनरः । सूर्ये । उत्ऽइते । मदथ । दिवः । नरः ।
न । वः । अश्वाः । श्रथयन्त । अह । सिस्रतः । सद्यः । अस्य । अध्वनः । पारम् । अश्नुथ ॥ १० ॥

हे [v]मरुतः [v]सभरसः सहबलाः [v]स्वर्णरः सर्वस्य नेतारो यूयं [v]यत् यदा [v]सूर्ये [v]उदिते उद्गते मध्याह्ने [v]मदथ सोमेन हे [v]दिवः द्युलोकस्य [v]नरः नेतारः । यदा सोमं पातुमिच्छथेत्यर्थः । तदा [v]वोऽश्वाः [v]सिस्रतः सरन्तः [v]न [v]अह [v]श्रथयन्त नैव श्लथयन्ति । [v]सद्यः तदानीमेव [v]अस्याध्वनः देवयजनमार्गस्य [v]पारमश्नुथ व्याप्नुथ । यद्वा । यदा सोमेन मदथ तदा स्वदीया अश्वा न शिथिला भवन्ति । यूयं च कृत्स्नस्य लोकत्रयमार्गस्य पारमश्नुथ ॥ ॥ १५ ॥

अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु विततता हिरण्ययीः ॥ ११ ॥

अंसेषु । वः । ऋष्टयः । पत्ऽसु । खादयः । वक्षःऽसु । रुक्माः । मरुतः । रथे । शुभः ।
अग्निऽभ्राजसः । विऽद्युतः । गभस्त्योः ।
शिप्राः । शीर्षऽसु । विऽततताः । हिरण्ययीः ॥ ११ ॥

१. ख-च-ण-मरुच्चारा; झ-भ-मरुच्चाराय; त-र-मरुत्साराय; न-मरुतामर्थाय; श-मरुदर्थाय।
२. झ-न-भ-र-तं पर्वताः।

हे vमरुतः vवः युष्माकम् vअंसेषु vऋष्टयः आयुधानि भासन्त इति शेषः । vपस्सु vखादयः कटकाः । vवक्षःसु vरुक्माः हाराः । vरथे vशुभः मधुरामृषा आपः । vअग्निभ्राजसः अग्निदीप्ताः vविद्युतो vगभस्त्योः हस्तयोर्भासन्त इत्यर्थः । vशीर्षसु शिरःसु vहिरण्ययीः[1] हिरण्मयाः[2] vशिप्राः उष्णीषमयाः vविततः विस्तृताः । प्रतिवाक्यं विततता इति वा संबन्धनीयम् ॥

तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातितिष्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ॥ १२ ॥

तम् । नाकम् । अर्यः । अगृभीतऽशोचिषम् । रुशत् । पिप्पलम् । मरुतः । वि । धूनुथ ।
सम् । अच्यन्त । वृजना । अतितिष्विषन्त । यत् ।
स्वरन्ति । घोषम् । विऽततम् । ऋतऽयवः ॥ १२ ॥

हे vमरुतः vअर्यः गन्तारो यूयं vतं प्रसिद्धं vनाकम् आदित्यम् । नास्मिन्नकमस्तीति नाकः । vअगृभीतशोचिषम् असुरैरनपहततेजस्कं तं vरुशत् शुभ्रवर्णं vपिप्पलम् उदकं vवि vधूनुथ विविधं चालयथ ॥ अयं द्विकर्मकः ॥ vयत् यदा vवृजना बलानि vसमच्यन्त संगता बलिनो भवथ । हविर्भिः अस्मदृत्तैरिति भावः । पश्चात् vअतितिष्विषन्त दीप्ता भवथ ॥ उभयत्र पुरुषव्यत्ययः ॥ यद्वा । यदासुरा वृजना बलैः समच्यन्त अतितिष्विषन्त तदा vघोषं भयजनकं शब्दं vविततं विस्तृतं vस्वरन्ति कुरुतेत्यर्थः । vऋतायवः उदकमिच्छन्तो यूयम् । यद्वा । उत्तरार्धं ऋत्विग्यजमानपरतया व्याख्येयः । यत् यदा ऋतायवः यज्ञकामा यजमानादयो यदा समच्यन्त संगताः वृजना बलान्यतितिष्विषन्त च स्वरन्ति घोषं स्तोत्रं विततं तदानीं पिप्पलं वि धूनुथेति संबन्धः ॥

युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवोऽस्मे रारन्त मरुतः सहस्रिणम् ॥ १३ ॥

युष्माऽदत्तस्य । मरुतः । विऽचेतसः । रायः । स्याम । रथ्यः । वयस्वतः ।
न । यः । युच्छति । तिष्यः । यथा । दिवः । अस्मे इति । ररन्त । मरुतः । सहस्रिणम् ॥ १३ ॥

हे vविचेतसः विविधप्रज्ञा हे vमरुतः vयुष्मादत्तस्य युष्माभिर्दत्तस्य vवयस्वतः अन्नवतः vरायः धनस्य vस्याम भवेम स्वामिनः । के । vरथ्यः रथस्वामिनो वयम् । vयः युष्माभिर्दत्तो रायः vन vयुच्छति न च्यवते । vयथा vदिवः सकाशात् vतिष्यः आदित्यो न युच्छति । तथा vअस्मे अस्मासु vसहस्रिणम् अपरिमितं vरारन्त रमयत हे vमरुतः ॥

---

१. त–हिरण्मयीर्हिरण्यमयीः ।

यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ॥ १४ ॥

यूयम् । रयिम् । मरुतः । स्पार्हऽवीरम् । यूयम् । ऋषिम् । अवथ । सामऽविप्रम् ।
यूयम् । अर्वन्तम् । भरताय । वाजम् । यूयम् । धत्थ । राजानम् । श्रुष्टिऽमन्तम् ॥ १४ ॥

हे ᵛमरुतः ᵛयूयं ᵛरयिं धनं ᵛस्पार्हवीरं स्पृहणीयैर्वीरैः पुत्रभृत्यादिभिरुपेतं ᵛधत्थ दत्थ । हे मरुतः ᵛयूयं ᵛसामविप्रं साम्नां विविधं प्रेरयितारं यद्वा सामसहिता विप्रा यस्य तादृशम् ᵛऋषिमवथ रक्षथ । हे ᵛयूयम् ᵛअर्वन्तम् अश्वं ᵛवाजम् अन्नं च ᵛभरताय देवान् बिभ्रते इयावाश्वाय धत्थ । हे मरुतः ᵛयूयं ᵛराजानं दीप्तं स्वामिनं वा ᵛश्रुष्टिमन्तं सुखवन्तम् । पुत्रमित्यर्थः । धत्थ ॥

तद्वो यामि द्रविणं सद्यऊतयो येना स्वर्णं ततनाम नृँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥ १५ ॥

तत् । वः । यामि । द्रविणम् । सद्यःऽऊतयः । येन । स्वः । न । ततनाम । नृन् । अभि ।
इदम् । सु । मे । मरुतः । हर्यत । वचः । यस्य । तरेम । तरसा । शतम् । हिमाः ॥ १५ ॥

हे ᵛसद्यऊतयः । तदानीमेव रक्षा येषां ते तादृशाः । सद्योगमना वा ᵛवः युष्मान् ᵛतत् ᵛद्रविणं धनं ᵛयामि याचामहे[1] । ᵛयेन धनेन ᵛनॄन् अस्मत्पुत्रभृत्यादीन् ᵛअभि ᵛततनाम ᵛस्वर्ण आदित्य इव रश्मीन् । हे ᵛमरुतः ᵛमे मम स्वभूतम् ᵛइदम् इदानीं क्रियमाणं ᵛवचः स्तोत्रं ᵛसु सुष्ठु ᵛहर्यत कामयध्वम्[2] । ᵛयस्य स्तोत्रवचसः ᵛतरसा बलेन ᵛशतं शतसंख्याकान् ᵛहिमाः हेमन्तान् ᵛतरेम शतसंवत्सरं जीवेमेत्यर्थः ॥ ॥ १६ ॥

' प्रयज्यवः ' इति दशर्चमेकादशं सूक्तं इयावाश्वस्यार्षं मारुतम् । दशमी त्रिष्टुप् शिष्टा जगत्यः । ' प्रयज्यवो दशान्त्या त्रिष्टुप् ' इत्यनुक्रमणिका । आभिप्लविके षष्ठेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानीयम् । सूत्रितं च—' प्रयज्यव इमं स्तोममित्याग्निमारुतम् ' (आश्व. श्रौ. ७. ७) इति ॥

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥ १ ॥

प्रऽयज्यवः । मरुतः । भ्राजत्ऽऋष्टयः । बृहत् । वयः । दधिरे । रुक्मऽवक्षसः ।
ईयन्ते । अश्वैः । सुऽयमेभिः । आशुऽभिः । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ १ ॥

१. ख-च-ण-याचामि । २. झ-त-न-र-कामयत ।

vप्रयज्यवः प्रकर्षेण यष्टारः vभ्राजदृष्टयः दीप्तायुधाः vमरुतः vबृहत् प्रभूतं vवयः यौवनलक्षणं प्रभूतमन्नं वा vदधिरे धारयन्ति । vरुक्मवक्षसः हारायतवक्षस्काः । ते मरुतः vसुयमेभिः सुखेन नियमितुं शक्यैः vआशुभिः शीघ्रगैः vअश्वैः vईयन्ते प्राप्यन्ते । vशुभं शोभनं यथा भवति तथा । यद्वा । उदकमभिलक्ष्य vयातां गच्छतां मरुतां vरथाः अपि vअनु vअवृत्सत अनुवर्तन्ते ॥

स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ॥ २ ॥

स्वयम् । दधिध्वे । तविषीम् । यथा । विद । बृहत् । महान्तः । उर्विया । वि । राजथ ।
उत । अन्तरिक्षम् । ममिरे । वि । ओजसा । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ २ ॥

हे मरुतो यूयं vस्वयम् असहायेनैव vदधिध्वे धारयध्वे कुरुध्व इत्यर्थः । किम् । vतविषीं बलं सामर्थ्यम् । vयथा vविद जानीथ । अप्रतिबद्धसामर्थ्या इत्यर्थः । हे vमहान्तः यूयम् vउर्विया उरवः सन्तः vवि vराजथ । vउत अपि च vअन्तरिक्षम् vओजसा बलेन vवि vममिरे व्यामुथ । शुभमित्यादि गतम् ॥

साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥ ३ ॥

साकम् । जाताः । सुऽभ्वः । साकम् । उक्षिताः । श्रिये । चित् । आ । प्रऽतरम् । ववृधुः । नरः ।
विऽरोकिणः । सूर्यस्यऽइव । रश्मयः । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ३ ॥

vसाकं सहैव vजाताः उत्पन्नाः vसुभ्वः सुष्ठु भवन्तः । महान्त इत्यर्थः । तथैव vसाकं सहैव vउक्षिताः सेक्तारो वर्षकाः vश्रिये vचित् शोभाया एव vप्रतरं प्रकृष्टतरम् vआ सर्वतः vववृधुः अवर्धयन् । vनरः कर्मणां नेतारः vविरोकिणः विरोचमानाः vसूर्यस्येव vरश्मयः सूर्यरश्मय इव । शुभमित्यादि गतम् ॥

आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ॥ ४ ॥

आऽभूषेण्यम् । वः । मरुतः । महिऽत्वनम् । दिदृक्षेण्यम् । सूर्यस्यऽइव । चक्षणम् ।
उतो इति । अस्मान् । अमृतऽत्वे । दधातन । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ४ ॥

हे vमरुतः vवः युष्माकं vमहित्वनं महत्त्वम् vआभूषेण्यं स्तुत्यम् । किंच vसूर्यस्येव vचक्षणं रूपमिव vदिदृक्षेण्यं दर्शनीयम् । vउतो अपि च vअस्मान् vअमृतत्वे मोक्षे स्वर्गे इत्यर्थः । तत्र vदधातन धारयत । शिष्टं गतम् ॥

कारीर्यां प्रथमस्याः पिण्डयाः ' उदीरयथा ' इत्यनुवाक्या । सूत्रितं च—' उदीरयथा मरुतः समुद्रतः प्र वो मरुतस्तविषा उदन्यवः ' (आश्व. श्रौ. २. १३) इति ॥

उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥ ५ ॥

उत् । ईरयथ । मरुतः । समुद्रतः । यूयम् । वृष्टिम् । वर्षयथ । पुरीषिणः ।
न । वः । दस्राः । उप । दस्यन्ति । धेनवः । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥५॥

हे ᵛमरुतः ᵛयूयं ᵛसमुद्रतः समुद्द्रवणसाधनादन्तरिक्षात् ᵛउदीरयथ प्रेरयथ ᵛवृष्टिम् । अयमेवार्थः पुनरुच्यते । हे ᵛपुरीषिणः । पृणतेः प्रीणातेर्वा पुरीषमुदकम् । हे तद्वन्तो यूयं वृष्टिं ᵛवर्षयथ । हे ᵛदस्राः दर्शनीयाः शत्रूणामुपक्षपयितारो वा ᵛवः युष्माकं ᵛधेनवः प्रीणयितारो मेघाः ᵛन ᵛउप ᵛदस्यन्ति न क्षुभ्यन्ति ॥ ॥ १७ ॥

यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम् ।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥ ६ ॥

यत् । अश्वान् । धूःऽसु । पृषतीः । अयुग्ध्वम् । हिरण्ययान् । प्रति । अत्कान् । अमुग्ध्वम् ।
विश्वाः । इत् । स्पृधः । मरुतः । वि । अस्यथ ।
शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ६ ॥

हे मरुतो यूयं ᵛयत् यदा ᵛअश्वान् ᵛधूर्षु रथसंबन्धिनीषु ᵛअयुग्ध्वं योजितवन्तः स्थ । कीदृशानश्वान् । ᵛपृषतीः । पृषत्यो मरुतामित्युक्तत्वात् पृषद्वर्णा वडवाः । सारङ्गी वात्राश्वशब्दवाच्या । ᵛहिरण्ययान् हिरण्यवर्णान् ᵛअत्कान् कवचान्[1] ᵛप्रति ᵛअमुग्ध्वं प्रत्यमुञ्चत । एवं कृत्वा ᵛविश्वा ᵛइत् ᵛस्पृधः सर्वानपि संग्रामान् हे ᵛमरुतः ᵛव्यस्यथ विक्षिपथ । शुभमित्यादि गतम् ॥

न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥ ७ ॥

न । पर्वताः । न । नद्यः । वरन्त । वः ।
यत्र । अचिध्वम् । मरुतः । गच्छथ । इत् । ऊँ इति । तत् ।
उत । द्यावापृथिवी इति । याथन । परि । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥७॥

१. ख-च-ण-भ-शरान् ।

हे [v]मरुतः [v]वः युष्मान् [v]पर्वताः शिलोच्चयाः [v]न [v]वरन्त न वारयन्तु तथा [v]नद्यः च [v]न वारयन्तु। किंतु [v]यत्र यस्मिन् यज्ञादिस्थाने [v]अचिध्वं जानीथ[१] संकल्पयथ [v]तत् स्थानं [v]गच्छथेदु गच्छथैव। [v]उत अपि च [v]द्यावापृथिवी च [v]परि परितः [v]याथन याथ वृष्ट्यर्थमिति ॥

यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभे यातामनु रथा अवृत्सत ॥ ८ ॥

यत्। पूर्व्यम्। मरुतः। यत्। च। नूतनम्। यत्। उद्यते। वसवः। यत्। च। शस्यते।
विश्वस्य। तस्य। भवथ। नवेदसः। शुभे। याताम्। अनु। रथाः। अवृत्सत ॥ ८ ॥

हे [v]मरुतः यूयं [v]यत् [v]पूर्व्यं पूर्वतनं पूर्वमनुष्ठितं [v]यत कर्मास्ति तदित्यर्थः। [v]यच्च [v]नूतनं कर्मास्ति। [v]यत्[२] च [v]उद्यते ऊर्ध्वं[३] प्राप्यते स्तूयते[४] इत्यर्थः। हे[५] [v]वसवः वासकाः[४] [v]यच्च [v]शस्यते शंसनं क्रियते [v]तस्य [v]विश्वस्य उत्कृष्टस्य[५] [v]नवेदसः जानन्तः [v]भवथ ॥

मृळता नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभे यातामनु रथा अवृत्सत ॥ ९ ॥

मृळत। नः। मरुतः। मा। वधिष्टन। अस्मभ्यम्। शर्म। बहुलम्। वि। यन्तन।
अधि। स्तोत्रस्य। सख्यस्य। गातन। शुभे। याताम्। अनु। रथाः। अवृत्सत ॥ ९ ॥

हे [v]मरुतः [v]नः अस्मान् [v]मृळत सुखयत। [v]मा [v]वधिष्टन। असम्यक्करणादिजनितेन कोपेन मा वधिष्वम्[६]। किंतु [v]अस्मभ्यं [v]शर्म सुखं [v]बहुलम् अत्यधिकं [v]वि [v]यन्तन कुरुत। किंच [v]स्तोत्रस्य स्तोत्रं [v]सख्यस्य सख्यम् [v]अधि [v]गातन अधिगच्छत। स्तुतिमनुभूयास्मासु सख्यं कुरुतेत्यर्थः ॥

यूयमस्मान्नयत वस्यो अच्छा निर्रृतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥ १० ॥

यूयम्। अस्मान्। नयत। वस्यः। अच्छ। निः। अंहतिऽभ्यः। मरुतः। गृणानाः।
जुषध्वम्। नः। हव्यऽदातिम्। यजत्राः। वयम्। स्याम। पतयः। रयीणाम् ॥ १० ॥

१. ख-च-ण–गमनाय। २. ख-च-ञ-ण-न-भ–हे वसवः निवासयितारः यत्; र–हे वसवः वासयितारः यत्। ३. श–उद्धार्यते उच्चार्यते स्वर्यते। ४. ख-च-ञ-ण-न-भ-र–'हे वसवो वासकाः' नास्ति। ५. ग-घ-ज-श–उत्कृष्टस्य। ६. ख-च-ञ-ण-न-भ-र–वधिष्वम्।

हे vमरुतः vयूयमस्मान् vवस्यः वसीयो धनं स्वर्गादिलक्षणं स्थानं वा vअच्छ अभिलक्ष्य vनयत प्रापयत । किंच vअंहतिभ्यः पापेभ्यः vनिः नयत निर्गमयत vगृणानाः स्तूयमानाः ॥ कर्मणि कर्तृप्रत्ययः ॥ vजुषध्वं सेवध्वं vनः अस्माकं[1] vहव्यदातिं हविर्दानवन्तं यज्ञं हे vयजत्राः यष्टव्या यूयम् । vवयं च vरयीणां बहुविधानां धनानां vपतयः vस्याम भवेम ॥ ॥ १८ ॥

vअग्ने शर्धन्तम् ' इति नवर्चं द्वादशं सूक्तं श्यावाश्वस्यार्षं मारुतम् । तृतीयासप्तम्यौ सतोबृहत्यौ शिष्टा बृहत्यः । ' अग्ने नव बार्हतं तृतीयासप्तम्यौ सतोबृहत्यौ ' इत्यनुक्रमणिका ॥

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।
विशो अद्य मरुतामवो ह्वये दिवश्चिद्रोचनादधि ॥ १ ॥

अग्ने । शर्धन्तम् । आ । गणम् । पिष्टम् । रुक्मेभिः । अञ्जिभिः ।
विशः । अद्य । मरुताम् । अवः । ह्वये । दिवः । चित् । रोचनात् । अधि ॥ १ ॥

हे vअग्ने vशर्धन्तं शत्रूनभिभवन्तं यज्ञायोत्सहमानं वा vगणं मरुतां गणम् vआ ह्वयेति शेषः । कीदृशं गणम् । vरुक्मेभिः रुक्मैः[2] रोचमानैः vअञ्जिभिः आभरणैश्च vपिष्टम् अवयवितं युक्तमित्यर्थः । vअद्य अस्मिन् यागदिने vमरुतां vविशः प्रजाः । गणानित्यर्थः । तान् vरोचनात् रोचमानात् vदिवः द्युलोकात् । vअधि इति पञ्चम्यर्थानुवादी । vचित पूरणः[3] । vअव अवस्तादस्मदभिमुखं vह्वये आह्वयामि ॥

यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥ २ ॥

यथा । चित् । मन्यसे । हृदा । तत् । इत् । मे । जग्मुः । आऽशसः ।
ये । ते । नेदिष्ठम् । हवनानि । आऽगमन् । तान् । वर्ध । भीमऽसंदृशः ॥ २ ॥

हे अग्ने त्वं vहृदा हृदयेन मरुतः vयथा vचिन्मन्यसे । चिदिति पूजायाम् । येन प्रकारेण अतिपूजितं जानासि । तेष्वादरं करोषीत्यर्थः । vतदित् तथैव vमे मदर्थं vजग्मुः गच्छन्तु vआशसः आशंसितार इच्छन्तः शत्रून् हिंसन्तो वा । अनन्तरं vये मरुतः vनेदिष्ठम् अत्यन्तान्तिकं संनिधावेव vते तव vहवनानि आह्वानानि श्रुत्वा vआगमन् आगच्छन्ति vतान् vभीमसंदृशः कालविलम्बासहनेन भयंकरदर्शनान् vवर्ध वर्धय हविष्प्रापणेन ॥

---

१. ख-च-झ-ण-त-न-भ-र-अस्मद्दत्तम् । २. ख-च-झ-ण-न-भ-र-श-' रुक्मैः ' नास्ति । ३. ख-च-झ-ण-न-भ-र- ' चित् पूरणः ' नास्ति; श-चिदिति पूरणः ।

मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ॥ ३ ॥

मीळ्हुष्मतीऽइव । पृथिवी । पराऽहता । मदन्ती । एति । अस्मत् । आ ।
ऋक्षः । न । वः । मरुतः । शिमीऽवान् । अमः । दुध्रः । गौःऽइव । भीमऽयुः ॥ ३ ॥

[v]मीळ्हुष्मती प्रबलस्वामिका [v]पराहता अन्यैरभिभूता [v]पृथिवी [v]इव । अत्र पृथिवीशब्दः तदधिष्ठितां प्रजां लक्षयति । सा यथा स्वस्वामिनमुपद्रुताभिगच्छति तद्वदिति । मरुतां साकल्येन सर्वथा प्राप्तेर्दृष्टान्तः । एवं [v]मदन्ती हृष्यन्ती शत्रुसेना [v]अस्मत् अस्मानित्यर्थः । [v]आ [v]एति आगच्छति । हे [v]मरुतः [v]वः युष्माकम् [v]अमः बलं गणः [v]ऋक्षो [v]न अग्निरिव[१] [v]शिमीवान् कर्मवान् [v]दुध्रः दुर्धरः [v]गौरिव [v]भीमयुः भीमैर्वृषभैः युक्तः[२] गौरिव । स यथा शिमीवान् कर्मवान् ॥

नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित्स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः ॥ ४ ॥

नि । ये । रिणन्ति । ओजसा । वृथा । गावः । न । दुःऽधुरः ।
अश्मानम् । चित् । स्वर्यम् । पर्वतम् । गिरिम् । प्र । च्यवयन्ति । यामऽभिः ॥ ४ ॥

[v]ये मरुतः [v]ओजसा स्वीयेन बलेन [v]नि [v]रिणन्ति हिंसन्ति शत्रून् [v]वृथा अनायासेन स्वयंचारमात्रेण [v]गावो [v]न [v]दुर्धुरः दुःखेन हिंस्या अश्वा इव । ते मरुतः [v]स्वर्यं शब्दयन्तम् [v]अश्मानं व्याप्तं [v]पर्वतं जगत्पूरकोदकवन्तम् । ' पर्वतान्पर्यतः पर्व पुनः पृणातेः प्रीणातेर्वा ' (निरु. १. २०) इति निरुक्तम् । तादृशं [v]गिरिं मेघम् । यद्वा । पर्वतमिति विशेष्यं गिरिमिति विशेषणम् निगिरत्युदकमिति गिरिः । ते [v]यामभिः गमनैः [v]प्र [v]च्यावयन्ति उदकनिर्गमनार्थम् ॥

उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥ ५ ॥

उत् । तिष्ठ । नूनम् । एषाम् । स्तोमैः । सम्ऽउक्षितानाम् ।
मरुताम् । पुरुऽतमम् । अपूर्व्यम् । गवाम् । सर्गम्ऽइव । ह्वये ॥ ५ ॥

हे मरुतो यूयम् [v]उत्तिष्ठ उत्तिष्ठत ॥ व्यत्ययेनैकवचनम् ॥ [v]नूनं निश्चयम् [v]एषां [v]स्तोमैः स्तोत्रैः [v]समुक्षितानां वर्धितानां [v]मरुताम् । यद्वा । स्तोमैरुपह्वय इति संबन्धः । तादृशां मरुतां [v]पुरुतमं प्रभूततमम् [v]अपूर्व्यम् । न विद्यते पूर्वः[३] येभ्यस्तमपूर्व्यं [v]सर्गं संघं [v]गवाम् उदकानां प्रसिद्धानां गवां वा सर्गं संघम् [v]इव [v]ह्वये आह्वये ॥ ॥ १९ ॥

---

१. ख-झ-न-भ-र-अग्नीव । २. त-युक्ता । ३. ख-च-झ-ण-त-न-भ-र-पूर्वाहः ।

युङ्ग्ध्वं ह्यरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।
युङ्ग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥ ६ ॥

युङ्ग्ध्वम् । हि । अरुषीः । रथे । युङ्ग्ध्वम् । रथेषु । रोहितः ।
युङ्ग्ध्वम् । हरी इति । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे ॥ ६ ॥

हे मरुतो यूयं [1]रथे युष्मदीये सर्वेषां साधारणभूते [v]अरुषीः आरोचमाना वडवाः [v]युङ्ग्ध्वं योजयध्वम् । तथा [v]रथेषु युष्मदीयेषु [v]रोहितः रोहितवर्णाः [v]युङ्ग्ध्वं । [v]हरी अश्वौ [v]अजिरा अजिरावाशुगमनौ [v]धुरि [v]वोळ्हवे वहनाय [v]युङ्ग्ध्वम् । आदरार्थं पुनर्वचनम्[2] । [v]वहिष्ठा वोढृतमौ अश्वौ [v]धुरि [v]वोळ्हवे ॥

उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।
मा वो यामेषु मरुताश्चिरं करत्प्र तं रथेषु चोदत ॥ ७ ॥

उत । स्यः । वाजी । अरुषः । तुविऽस्वनिः । इह । स्म । धायि । दर्शतः ।
मा । वः । यामेषु । मरुतः । चिरम् । करत् । प्र । तम् । रथेषु । चोदत ॥ ७ ॥

[v]उत अपि च [v]स्यः सः [v]वाजी वेजनवान्[3] [v]अरुषः आरोचमानः [v]तुविष्वणिः प्रभूतध्वनिरश्वः । अरुष इत्यनेन रोहित इत्युक्तं भवति । 'प्रष्टिर्वहति रोहितः' (ऋ. सं. १. ३९. ६) इति ह्युक्तम् । [v]इह इदानीं [v]दर्शतः दर्शनीयः सन् [v]धायि रथे नियोजितः । [v]स्म इति पूरणः । हे [v]मरुतः [v]वो [v]यामेषु गमनेषु सोऽश्वः [v]चिरं विलम्बं [v]मा [v]करत् मा करोतु । [v]तं [v]रथेषु । रथे युक्तमिति शेषः । [v]प्र [v]चोदत प्रेरयत । यथा विलम्बं न कुर्यात्तथा प्रेरयत ॥

रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ ८ ॥

रथम् । नु । मारुतम् । वयम् । श्रवस्युम् । आ । हुवामहे ।
आ । यस्मिन् । तस्थौ । सुऽरणानि । बिभ्रती । सचा । मरुत्ऽसु । रोदसी ॥ ८ ॥

[v]वयम् आत्रेयाः [v]रथं रंहणस्वभावं [v]मारुतं मरुतां संबन्धिनं रथं [v]श्रवस्युम् अन्नेच्छुं [v]नु अद्य [v]आ [v]हुवामहे आह्वयामः । [v]यस्मिन् रथे [v]सुरणानि जलानि [v]बिभ्रती धारयन्ती [v]रोदसी रुद्रस्य पत्नी मरुतां माता । यद्वा रुद्रो वायुः । तत्पत्नी माध्यमिका देवी [v]मरुत्सु [v]सचा सहिता [v]आ [v]तस्थौ आस्थितवती तं रथमाहुवे[4] ॥

---

१. ख-च-झ-ण-त-न-र-पुनरुच्यते । २. ख-च-ण- स वेगवान्; झ-न-भ-र-वेगवान् । ३. ख-ग-घ-च-ज-ण-रथमाहुवेम ।

तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥ ९ ॥

तम् । वः । शर्धम् । रथेऽशुभम् । त्वेषम् । पनस्युम् । आ । हुवे ।
यस्मिन् । सुऽजाता । सुऽभगा । महीयते । सचा । मरुत्ऽसु । मीळ्हुषी ॥ ९ ॥

हे मरुतः [v]वः [v]शर्धं युष्मदीयं बलं गणं [v]रथेशुभं रथे शोभनं [v]त्वेषं दीप्तं [v]पनस्युं स्तुत्यम् [v]आ [v]हुवे आह्वये। [v]यस्मिन् शर्धे [v]सुजाता सुष्ठु प्रवृद्धा[1] [v]सुभगा शोभनभाग्यातिमहती [v]मीळ्हुषी । 'मीळ्हुष्टम शिवतम' इत्यादौ दर्शनात् मीढ्वान् रुद्रः। तत्पत्नी मीळ्हुषी। [v]मरुत्सु [v]सचा सह [v]महीयते पूज्यते [v]तं शर्धमा हुवे । आपस्तम्बोऽपि रुद्रपत्नीं[2] मीळ्हुषीसंज्ञया व्यवजहार—'उत्तरया दक्षिणस्यामीशानमावाहयति लौकिक्या वाचोत्तरस्यां मीळ्हुषीं मध्ये जयन्तम्' (आप. गृ. २०. १-३) इति ॥ ॥ २० ॥ ॥ ४ ॥

पञ्चमेऽनुवाके षोडश सूक्तानि । तत्र 'आ रुद्रासः' इत्यष्टर्चं प्रथमं सूक्तं इयावाश्वस्यार्षं मारुतम् । सप्तम्यष्टम्यौ त्रिष्टुभौ शिष्टाः षट् जगत्यः । 'आरुद्रासोऽष्टौ द्वित्रिष्टुबन्तम्' इत्यनुक्रमणिका। विनियोगो लैङ्गिकः ॥

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥ १ ॥

आ । रुद्रासः । इन्द्रऽवन्तः । सऽजोषसः । हिरण्यऽरथाः । सुविताय । गन्तन ।
इयम् । वः । अस्मत् । प्रति । हर्यते । मतिः ।
तृष्णऽजे । न । दिवः । उत्साः । उदन्यवे ॥ १ ॥

हे [v]रुद्रासः रुद्रपुत्राः [v]इन्द्रवन्तः इन्द्रेण युष्मत्स्वामिना तद्वन्तः [v]सजोषसः परस्परं समानप्रीतयः [v]हिरण्यरथाः हिरण्मयरथाः सन्तः [v]सुविताय सुगमनाय तत्साधनाय सुष्ठु सर्वैर्गन्तव्याय यज्ञाय तदर्थम् [v]आ [v]गन्तन आगच्छत । किमत्र विद्यते इति तदुच्यते । [v]इयम् [v]अस्मत् अस्मदीया [v]मतिः स्तुतिः [v]वः युष्मान् [v]प्रति [v]हर्यते कामयते । तस्मादागच्छत । [v]उदन्यवे उदकेच्छवे [v]तृष्णजे गोतमाय [v]दिवः द्युलोकसकाशात् [v]उत्साः उदकनिष्यन्दा यथा युष्माभिः प्रेरितास्तद्वदस्मदर्थमपि आगत्याभिमतं ददतेत्यर्थः ॥

---

१. ख-च-ज्ञ-ण-न-भ—प्रसिद्धा । २. ख-च-ज्ञ-ण-न-भ—सपत्नीम् ।

वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥ २ ॥

वाशीऽमन्तः । ऋष्टिऽमन्तः । मनीषिणः । सुऽधन्वानः । इषुऽमन्तः । निषङ्गिणः ।
सुऽअश्वाः । स्थ । सुऽरथाः । पृश्निऽमातरः । सुऽआयुधाः । मरुतः । याथन । शुभम् ॥२॥

हे [1]मरुतः यूयं [2]वाशीमन्तः । वाशीति तक्षणसाधनमायुधम् । तद्वन्तः स्थ । [3]ऋष्टिमन्तः । ऋष्टिर्नाम छुरिका । तद्वन्तः स्थ । एवं सर्वत्र योज्यम् । [4]मनीषिणः मनसः ईश्वरा मनस्विनः [5]सुधन्वानः शोभनधनुष्काः [6]इषुमन्तः बाणवन्तः [7]निषङ्गिणः निषङ्गवन्तः [8]स्वश्वाः [9]स्थ शोभनाश्वाः भवथ । [10]सुरथाः शोभनरथाः [11]पृश्निमातरः पृश्नेः पुत्राः [12]स्वायुधाः खड्गपरश्वादिसकलायुधोपेताः । एवं महात्मानः सन्तः [13]शुभं शोभनं यथा भवति तथा शुभमुदकाय वा रथेन[14] [15]याथन[16] गच्छथ[17] ॥

धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ॥ ३ ॥

धूनुथ । द्याम् । पर्वतान् । दाशुषे । वसु । नि । वः । वना । जिहते । यामनः । भिया ।
कोपयथ । पृथिवीम् । पृश्निऽमातरः । शुभे । यत् । उग्राः । पृषतीः । अयुग्ध्वम् ॥ ३ ॥

हे मरुतः [1]द्याम्[2] । दिवमित्यर्थः । [3]पर्वतान् मेघान् [4]दाशुषे हविर्दात्रे यजमानाय [5]वसु धनानि[6] च [7]धूनुथ प्रापयथ[8] । [9]वः युष्माकं [10]यामनः गमनस्य [11]भिया भीत्या [12]वना वनानि वृक्षादिसमूहाः [13]नि [14]जिहते नितरां कम्पन्ते । अवनता भृशं शब्दन्तीत्यर्थः । हे [15]पृश्निमातरः पृश्नेः पुत्राः । ' पृश्नयो वै पयसो मरुतो जाताः ' (तै. सं. २. २.११.४) इति हि श्रुतिः । हे[16] मरुतः [17]पृथिवीं [18]कोपयथ अभिवृष्ट्या[19] क्षोभयथ[20] । हे [21]उग्राः उद्गूर्णबला यूयं [22]यत् यदा [23]शुभे उदकार्थं [24]पृषतीः युष्मदीयाः अश्वाः [25]अयुग्ध्वं योजयथ तदा कोपयथ पृथिवीम् ॥

वातत्विषो मरुतो वर्षनिर्णिजो यमाइव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥ ४ ॥

वातऽत्विषः । मरुतः । वर्षऽनिर्निजः । यमाःऽइव । सुऽसदृशः । सुऽपेशसः ।
पिशङ्गऽअश्वाः । अरुणऽअश्वाः । अरेपसः । प्रऽत्वक्षसः । महिना । द्यौःऽइव । उरवः ॥४॥

---

१. ग-ग-घ-च-ज-ण-त-न-भ-याथन; झ-योथन; र-यथेन । २. ख-च-ण-न-भ-गच्छत; झ-गन्छ ।
३. ख-च-झ-ण-त-न-भ-र-यदा द्याम् । ४. ग-च-झ-ण-न-भ-र-धनार्थम; त-धनानि चाथ च ।
५. ख-च-ण-न-भ-क्षारयथ; झ-धक्षारयथ; र-धक्षार; श-चाथव । ६. ख-ग-घ-च-ज-ण-न-भ-श-'हे मरुतः' नास्ति; र-हे । ७. ख-झ-अभीतिवृष्ट्या; न-भ-अतिवृष्ट्या । ८. ख-झ-त-न-भ-र-क्षुभ्यथ ।

[v]वातत्विषः सर्वदा संप्राप्तदीप्तयः[१] [v]वर्षनिर्णिजः वृष्टेः शोधयितारः । अथवा निर्णिगिति रूपनाम । वर्षमेव रूपं येषां ते तादृशाः । वृष्टिप्रदा इत्यर्थः । [१]यमाइव युगलोत्पन्ना इव [१]सुसदृशः परस्परं बलरूपादिभिरत्यन्तं सरूपाः [v]सुपेशसः शोभनरूपाः [v]पिशङ्गाश्वाः पिशङ्गवर्णाश्चोपेतास्तथा [v]अरुणाश्वाः [v]अरेपसः अपापाः [v]प्रत्नवक्षसः प्रकृष्टं तनूकर्तारो द्वेष्टृणां [v]महिना महत्त्वेन [v]द्यौरिव अन्तरिक्षमिव [v]उरवः विस्तीर्णाः । उक्तलक्षणा नाम भेजिर इत्युत्तरेण संबन्धः ॥

पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥ ५ ॥

पुरुऽद्रप्साः । अञ्जिऽमन्तः । सुऽदानवः । त्वेषऽसंदृशः । अनवभ्रऽराधसः ।
सुऽजातासः । जनुषा । रुक्मऽवक्षसः । दिवः । अर्काः । अमृतम् । नाम । भेजिरे ॥५॥

[v]पुरुद्रप्साः प्रभूतोदकाः [v]अञ्जिमन्तः आभरणवन्तः [१]सुदानवः शोभनदानाः [v]त्वेषसंदृशः दीप्तरूपाः [v]अनवभ्रराधसः अनवभ्रधनाः [v]सुजातासः शोभनजननाः[२] [v]जनुषा जन्मनैवोक्तरूपाः [v]रुक्मवक्षसः हारवक्षस्काः [v]अर्काः पूज्या मरुतः [१]दिवः द्युलोकादागत्य [v]अमृतम् अमरणसाधनं [v]नाम उदकं नमनहेतुकमुक्तलक्षणं हविर्वा [v]भेजिरे लब्धवन्तः ॥ ॥ २१ ॥

ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥ ६ ॥

ऋष्टयः । वः । मरुतः । अंसयोः । अधि । सहः । ओजः । बाह्वोः । वः । बलम् । हितम् ।
नृम्णा । शीर्षऽसु । आयुधा । रथेषु । वः । विश्वा । वः । श्रीः । अधि । तनूषु । पिपिशे ॥६॥

हे [v]मरुतः [v]वः युष्माकम् [१]अंसयोरधि [v]ऋष्टयः आयुधविशेषा हिताः आश्रिताः । वक्ष्माण-हितशब्दो विपरिणन्तव्यः । अधीति सप्तम्यर्थानुवादी । तथा [v]वः [१]बाह्वोः अधि [v]सहः शत्रूणा-मभिभावुकम् [v]ओजः । ओजो नामाष्टमो धातुः[३] । तद्रूपं [१]बलं [१]हितं निहितम् । [v]शीर्षसु शिरःसु [v]नृम्णा नृम्णानि हिरण्मयानि[४] पट्टाद्यर्णापादीनि निहितानि । [v]रथेषु [v]आयुधा आयुधानि युद्धसाधनानि निहितानि । [v]वः [१]श्रीः युष्माकं कान्तिः [v]तनूषु युष्मदीयेषु [v]अधि [v]पिपिशे अधिष्ठिता आश्रिता ॥

---

१. ख-च-ण–सर्वत्रप्रदीप्तयः; ग-घ-ज–सर्वदीप्तयः; श–सर्वदेशे प्राप्तदीप्तयः । २. ख-च-ण-श–शोभन-जाताः । ३. न– धातुः । रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः इति सप्तधातूनां सारोऽष्टमस्तु ओजसोऽपि मुखे यो (या) कान्तिर्भाति स ओजो बलं च लक्ष्यते । ४. ख-च-ण-भ-श–हिरण्मयानि ।

गोमदश्वावद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥ ७ ॥

गोऽमत् । अश्वऽवत् । रथऽवत् । सुऽवीरम् । चन्द्रऽवत् । राधः । मरुतः । ददा । नः ।
प्रऽशस्तिम् । नः । कृणुत । रुद्रियासः । भक्षीय । वः । अवसः । दैव्यस्य ॥ ७ ॥

हे [v]मरुतः [v]नः अस्मभ्यं [v]गोमत बहुभिर्गोभिरुपेतम् [v]अश्वावत बहुभिरश्वैरुपेतं [v]रथवत[1] रथोपेतं [v]सुवीरं सुष्ठु पुत्रोपेतं[2] [v]चन्द्रवत हिरण्योपेतं [v]राधः अन्नं [v]ददा ददत ॥ व्यत्ययेन एकवचनम्[3] । अथवा लोडर्थस्य लिटो मध्यमबहुवचनम् ॥ हे [v]रुद्रियासः रुद्रपुत्रा मरुतः [v]नः अस्मदीयां [v]प्रशस्तिम् । समृद्धिमित्यर्थः । तां [v]कृणुत कुरुत । [v]वः युष्माकं स्वभूतम् [v]अवसः अवः रक्षणं [v]दैव्यस्य दैव्यं देवार्हं [v]भक्षीय भजेय ॥

हये नरो मरुतो मृळता नस्तुविमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥ ८ ॥

हये । नरः । मरुतः । मृळत । नः । तुविऽमघासः । अमृताः । ऋतऽज्ञाः ।
सत्यऽश्रुतः । कवयः । युवानः । बृहत्ऽगिरयः । बृहत् । उक्षमाणाः ॥ ८ ॥

[v]हये हे [v]नरः नेतारः [v]मरुतः [v]नः अस्मान् [v]मृळत सुखयत अस्मभ्यं हिताय वा सुखिनो भवत । हे [v]तुविमघासः[4] प्रभूतधनाः [v]अमृताः अमरणस्वभावाः [v]ऋतज्ञाः उदकस्य यज्ञस्य वा ज्ञातारः । कर्तार इत्यर्थः । [v]सत्यश्रुतः सत्येन सत्यफलत्वेन प्रसिद्धाः [v]कवयः मेधाविनः [v]युवानः नित्यतरुणाः [v]बृहद्गिरयः प्रभूतस्तुतयः [v]बृहत अत्यधिकम् [v]उक्षमाणाः हविर्भिः सेविताः[4] उदकं वा सिञ्चन्तो यूयं मृळत ॥ ॥ २२ ॥

' तमु नूनम् ' इत्यष्टर्चं द्वितीयं सूक्तं स्यावाश्वस्यार्षं त्रैष्टुभं मारुतम् । ' तमु ' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम् ।
य आशुश्वा अमवद्वहन्त उतेशिरे अमृतस्य स्वराजः ॥ १ ॥

तम् । ऊँ इति । नूनम् । तविषीऽमन्तम् । एषाम् । स्तुषे । गणम् । मारुतम् । नव्यसीनाम् ।
ये । आशुऽअश्वाः । अमऽवत् । वहन्ते । उत । ईशिरे । अमृतस्य । स्वऽराजः ॥ १ ॥

१. ख च-ञ-ण-न-भ-र–' रथवत्... पुत्रोपेतं ' नास्ति । २. ख-च-ण-भ–बहुवचनेन; ञ-त-न-र–बहुवचनम् । ३. त–तुविमघासः । ४. ख-च-ञ-ण-त-भ-र–सेकिताः; श–सेचिताः ।

[v]तमु तमेव पूर्वं स्तुतमेव [v]मारुतं मरुतां संबन्धिनं तं [v]गणं [v]तविषीमन्तं दीप्तिमन्तं [v]नूनम् अद्य [v]स्तुषे । कीदृशां मरुताम् । [v]नव्यसीनाम् ॥ लिङ्व्यत्ययः ॥ नवतराणां स्तुत्यानां वा । [v]एषां[1] मारुतं गणम् । गणावयवभूता मरुतः । कीदृशा इत्युच्यते । [v]ये मरुतः [v]आशवाशाः शीघ्रगाम्यश्वोपेताः [v]अमवत् बलवन्तो यथा भवन्ति तथा [v]वहन्ते[2] गच्छन्ति[3] । [v]उत अपि च [v]ईशिरे ईश्वरा भवन्ति [v]अमृतस्य उदकस्य [v]स्वराजः स्वायत्तदीप्तयः स्वयमेव राजमानाः तेषां गणं स्तुषे ॥

त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।
मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् ॥ २ ॥

त्वेषम् । गणम् । तवसम् । खादिऽहस्तम् । धुनिऽव्रतम् । मायिनम । दातिऽवारम् ।
मयःऽभुवः । ये । अमिताः । महिऽत्वा । वन्दस्व । विप्र । तुविऽराधसः । नॄन् ॥ २ ॥

[v]त्वेषं दीप्तं [v]गणं मारुतं [v]नवसं बलवन्तं [v]खादिहस्तं कटकहस्तं [v]धुनिव्रतं कम्पयितृकर्माणं [v]मायिनं प्रज्ञावन्तं [v]दातिवारं दत्तधनं हे [v]विप्र होतः [v]वन्दस्व स्तुहीति संबन्धः । [v]ये मरुतः [v]मयोभुवः सुखस्य भावयितारः [v]महित्वा महत्त्वेन [v]अमिताः अपरिच्छिन्नाः । तान् [v]तुविराधसः प्रभूतधनान [v]नॄन नेतॄन् वन्दस्व ॥

आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥ ३ ॥

आ । वः । यन्तु । उदऽवाहासः । अद्य । वृष्टिम् । ये । विश्वे । मरुतः । जुनन्ति ।
अयम् । यः । अग्निः । मरुतः । सम्ऽइद्धः । एतम् । जुषध्वम् । कवयः । युवानः ॥ ३ ॥

[v]ये [v]विश्वे व्याप्ताः [v]मरुतः [v]वृष्टिं [v]जुनन्ति प्रेरयन्ति ते [v]उदवाहासः उदकस्य वोढारो मरुतः [v]अद्य इदानीं [v]वः युष्मान [v]आ [v]यन्तु आगच्छन्तु हे ऋत्विग्यजमानाः । अथ प्रत्यक्षवादः । हे [v]मरुतः[4] [v]यः[4] प्रसिद्धः [v]अयम्[4] [v]अग्निः [v]समिद्धः सम्यक् दीपितः [v]एतम् अग्निं [v]जुषध्वं सेवध्वं हे [v]कवयः मेधाविनः [v]युवानः नित्यतरुणाः सर्वत्र व्याप्ता वा ॥

यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥ ४ ॥

यूयम् । राजानम् । इर्यम् । जनाय । विभ्वऽतष्टम् । जनयथ । यजत्राः ।
युष्मत् । एति । मुष्टिऽहा । बाहुऽजूतः । युष्मत् । सत्ऽअश्वः । मरुतः । सुऽवीरः ॥ ४ ॥

---

१. ख-च-झ-ण-त-न-भ-र–'एषां' नास्ति । २. ख-च-ण-भ–वहन्तो गच्छन्ति; झ-त-न-र–वहन्तो गच्छन्तः; श–वहन्ति गच्छन्तः । ३. झ-न-भ–मरुतः यूयम् । ४. ख-ग-घ-च-ज-ण–अयं प्रसिद्धो यः ।

हे मरुतः[1] vयूयं vजनाय यजमानाय vराजानं स्वामिनं राजमानं वा vहूर्यं शत्रूणां प्रेरकं च्यावयितारं vविभ्वतष्टम् । विभ्वा नाम ऋभूणां मध्यमः । स कुशली । तेन निर्मितम् । अत्यन्तरूपवन्तमित्यर्थः । तादृशं पुत्रं vजनयथ उत्पादयथ हे vयजत्राः यष्टव्याः । हे vमरुतः vयुष्मत् युष्मत्तः vएति गच्छति पुत्रः । कीदृशः । vमुष्टिहा । मुष्टिशब्दो बाहूपलक्षकः । स्वभुजबलेनैव हन्ता शत्रूणाम् । तदेवोच्यते । vबाहुजूतः । बाहुः प्रेरकः शत्रूणां यस्य तादृशः पुत्र एति । तथा vयुष्मत् युष्मत्तः vमदश्वः विद्यमानाश्वः । बह्वश्वः इत्यर्थः । vसुवीरः शोभनवीर्यः पुत्र एति । जायते इत्यर्थः ॥

वरुणप्रघासे मारुत्या आमिक्षायाः ' अराइव ' इति याज्या । सूत्रितं च— ' अराइवेदचरमा अहेवेमं मे वरुण श्रुधि ' (आश्व. श्रौ. २. १७) इति । एकादशिने मारुते पशावेषैव पशुपुरोडाशस्य याज्या । सूत्रितं च—' अराइवेदचरमा अहेव या वः शर्म शशमानाय सन्ति ' (आश्व. श्रौ. ३. ७) इति ॥

अराइवेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥ ५ ॥

अराःऽइव । इत् । अचरमाः । अहाःऽइव । प्रऽप्र । जायन्ते । अकवाः । महःऽभिः ।
पृश्नेः । पुत्राः । उपऽमासः । रभिष्ठाः । स्वया । मत्या । मरुतः । सम् । मिमिक्षुः ॥ ५ ॥

vअराइवेत् रथशङ्कव इव vअचरमाः अनिकृष्टाः । सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः । vअहेव अहानीव । दिवसा यथा सर्वेऽपि षष्टिघटिकात्मकान्तद्वत्सप्तसंख्योपेतसप्तगणरूपेण समा इत्यर्थः । अनेन दृष्टान्तद्वयेन वैसादृश्याभावः[2] प्रतिपादितः । एवमुक्तलक्षणाः vमहोभिः तेजोभिः vप्रप्र vजायन्ते प्रकर्षेण प्रादुर्भवन्ति ॥ एकः ' प्रसमुपोदः पादपूरणे ' (पा. सू. ८. १. ६) इत्युपसर्गाभ्यासः स च पूरणः ॥ ते च vअकवाः अनल्पाः । यद्वा महोभिरित्यस्य विशेषणम् । vपृश्नेः माध्यमिकाया वाचो गोरूपाया अन्तरिक्षस्य वा पुत्रस्थानीयाः vउपमासः प्रत्येकं समानाः vरभिष्ठाः प्रकृष्टवेगाः । एवं महानुभावाः vमरुतः vस्वया vमत्या स्वकीययैवानुग्रहबुद्धया vसं vमिमिक्षुः वृष्ट्या सम्यक् सिञ्चन्ति ॥

यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः ।
क्षोदन्त आपो रिणते वनान्यत्रोस्रियो वृषभः क्रन्दतु द्यौः ॥ ६ ॥

यत् । प्र । अयासिष्ट । पृषतीभिः । अश्वैः । वीळुपविऽभिः । मरुतः । रथेभिः ।
क्षोदन्ते । आपः । रिणते । वनानि । अव । उस्रियः । वृषभः । क्रन्दतु । द्यौः ॥ ६ ॥

१. ज्ञ-त-र-राजानः । २. ख-च-ण-एव सादृश्यभावः ; ज्ञ-न-भ-एव सादृश्याभावः; श-वैसादृश्यभावः ।

हे [V]मरुतः [V]यत् यदा [V]प्रायासिष्ट प्रगच्छथ [V]पृषतीभिः पृषत्संज्ञकैः [V]अश्वैः वाहनसाधनैरश्वैः । अश्वशब्दोऽत्र वाहनसामान्यवचनः । अतः पुँल्लिङ्गता[1] । तथान्यत्र—' यदश्वान्धूर्षु पृषतीरयुग्ध्वम् ' (ऋ. सं. ५. ५५. ६) । रोहिदश्वोऽजाश्व इति सामानाधिकरण्यप्रयोगः । एवंभूताश्वयुक्तैः [V]वीळुपविभिः दृढरथनेमिभिः [V]रथेभिः[2] प्रायासिष्ट । यद्वा । अश्वै रथैश्च सह मरुतो यदा प्रायासिष्ट तदा [V]आपः [V]क्षोदन्ते क्षरन्ति । [V]वनानि वृक्षसमूहाः [V]रिणते हिंस्यन्ते वेगेन भज्यन्ते । [V]उस्रियः उस्राः सूर्यरश्मयः । तत्संबन्धी पर्जन्यः [V]वृषभः अपां वर्षिता [V]द्यौः द्योतमानः [V]अव [V]क्रन्दतु अवाङ्मुखं शब्दयतु वृष्टयर्थम् ॥

प्रर्थिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥ ७ ॥

प्रर्थिष्ट । यामन् । पृथिवी । चित् । एषाम् । भर्तेऽइव । गर्भम् । स्वम् । इत् । शवः । धुः ।
वातान् । हि । अश्वान् । धुरि । आऽयुयुज्रे । वर्षम् । स्वेदम् । चक्रिरे । रुद्रियासः ॥ ७ ॥

[V]एषां मरुतां [V]यामन् यामनि गमने [V]पृथिवी [V]चित् भूमिः । चिदिति पूरणः । [V]प्रर्थिष्ट प्रख्याताभवत् । गर्भोऽग्याभवदित्यर्थः । ते च मरुतः [V]भर्ता लौकिकः पतिः [V]गर्भम् [V]इव भार्यायाः तथा भूम्याः [V]स्वमिति स्वभूतं गर्भं गर्भस्थानीयं [V]शवः उदकं [V]धुः स्थापितवन्तः । [V]हि यस्मात [V]वातान् गन्तॄन् [V]अश्वान् [V]धुरि रथसंबन्धिन्यास् [V]आयुयुज्रे आयोजितवन्तः तस्मात [V]वर्षं [V]स्वेदं स्वेदस्थानीयं वृष्टिसंस्त्यायं [V]चक्रिरे कुर्वन्ति [V]रुद्रियासः रुद्रपुत्राः ॥

हुये नरो मरुतो मृळता नस्तुविंमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥ ८ ॥

हुये । नरः । मरुतः । मृळत । नः । तुविंऽमघासः । अमृताः । ऋतऽज्ञाः ।
सत्यऽश्रुतः । कवयः । युवानः । बृहत्ऽगिरयः । बृहत् । उक्षमाणाः ॥ ८ ॥

' हुये नरः ' इत्यष्टमी गता[3] ॥ ॥ २३ ॥

' प्र वः स्पट् ' इत्यष्टर्चं तृतीयं सूक्तं श्यावाश्वस्यार्षं मारुतम् । अष्टमी त्रिष्टुप् शिष्टाः सप्त जगत्यः । ' प्र वः स्पट् त्रिष्टुबन्तम् ' इत्यनुक्रमणिका । विनियोगो लौकिकः ॥

१. ख-च-झ-ण-त-न-भ-र-पुंलिंगनाम । २. न-रथेभिः रथैः । ३. ख-च-ण-पुस्तकेष्वस्य मन्त्रस्य संपूर्णं भाष्यं विद्यते ।

प्र वः स्पळक्रन्त्सुवितायं दावनेऽर्चां दिवे प्र पृथिव्या ऋतं भरे ।
उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ॥ १ ॥

प्र । वः । स्पट् । अक्रन् । सुवितायं । दावनें । अर्चें । दिवे । प्र । पृथिव्यै । ऋतम् । भरे ।
उक्षन्तें । अश्वान् । तरुषन्ते । आ । रजः । अनु । स्वम् । भानुम् । श्रथयन्ते । अर्णवैः ॥१॥

हे मरुतः ᵛवः युष्मभ्यं ᵛसुविताय सुष्ठु प्राप्तव्याय ᵛदावने हविष्प्रदानाय ᵛस्पट् स्प्रष्टा होता ᵛप्र प्रकर्षेण ᵛअक्रन् क्रन्दति स्तौति । वः युष्मान् वा सुष्ठु प्राप्तव्याय दानायाक्रन् ॥ क्रन्दतेः शब्दकर्मणो लडर्थे लङि तिपि रूपम् ॥ हे होतः ᵛदिवे द्योतमानाय द्युदेवाय ᵛप्र ᵛअर्च प्रकर्षेण स्तुहि हे आत्मन् । तथा ᵛपृथिव्यै[1] पृथिव्याश्च ᵛऋतं स्तोत्रं ᵛभरे संपादयामि । द्यावापृथिव्यावपि मरुतामाधारत्वादत्र निपातभाजौ भवतः । किंच ते मरुतः ᵛअश्वान् व्यापकानुदकसंघान् ᵛउक्षन्ते सिञ्चन्ति । ᵛरजः ᵛआ अन्तरिक्षमा[2] सर्वतः ᵛतरुषन्ते तरन्ति संचरन्ति । ᵛस्वं ᵛभानुं स्वकीयं तेजः ᵛअर्णवैः मेघैः सह ᵛअनु ᵛश्रथयन्ते अनुश्लेषयन्ति अनुकूलं प्रापयन्तीत्यर्थः ॥

अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ॥ २ ॥

अमात् । एषाम् । भियसा । भूमिः । एजति । नौः । न । पूर्णा । क्षरति । व्यथिः । यती ।
दूरेऽदृशः । ये । चितयन्ते । एमऽभिः । अन्तः । महे । विदथे । येतिरे । नरः ॥ २ ॥

ᵛएषाम् ॥ अन्वादेशविषयत्वादनुदात्तः ॥ एषां मरुतां ᵛभियसा भयेन ᵛभूमिः ᵛएजति कम्पते ᵛनौर्न ᵛपूर्णा प्राणिभिः । सा यथोदकमध्ये ᵛक्षरति चलति ᵛव्यथिः व्यथिता ᵛयती गच्छन्ती । एतदुभयं नौविशेषणम् । ᵛदूरेदृशः दूरे दृश्यमाना अपि ᵛये मरुतः ᵛएमभिः गमनैः ᵛचितयन्ते ज्ञायन्ते ते महान्तो मरुतः ᵛविदथे यज्ञे ᵛमहे महते हविषे हविर्भक्षणाय[3] ᵛअन्तः द्यावापृथिव्योर्मध्ये ᵛयेतिरे यतन्ते । ᵛनरः नेतारो मरुतः ॥

गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्याइव सुभ्वश्चारवः स्थन मर्याइव श्रियसे चेतथा नरः ॥ ३ ॥

गवाम्ऽइव । श्रियसे । शृङ्गम् । उत्ऽउत्तमम् । सूर्यः । न । चक्षुः । रजसः । विऽसर्जने ।
अत्याःऽइव । सुऽभ्वः । चारवः । स्थन । मर्याःऽइव । श्रियसे । चेतथ । नरः ॥ ३ ॥

---

१. ख-च-ज्ञ-ण-न-भ-र- 'पृथिव्यै' नास्ति । २. ख-च-ज्ञ-ण-त-न-भ-र-तदर्थमन्तरिक्षस्य; श-तदर्थमन्तरिक्षम् । ३. च-ण-हविर्भक्षणायास्मा(मा?)त् स्वस्थानात् ।

हे मरुतो यूयं [v]गवां [v]शृङ्गम् [v]इव [v]उत्तमम् उत्कृष्टमुष्णीषपट्टादिकं [v]श्रियसे श्रिये धारयथेति शेषः । [v]सूर्यो [v]न सूर्य इव । स यथा [v]रजसः तेजसः [v]विसर्जने [v]चक्षुः दर्शनसाधनं मण्डलं धत्ते तद्वद्रजसो वृष्टेर्विसर्जने विसर्जनाय चक्षुः सर्वस्य प्रकाशकं तेजो धारयथ । [v]अत्याइव अश्वाइव [v]सुभ्वः सुष्ठु सर्वत्र भवन्तो वेगवन्तः [v]चारवः दर्शनीयाः [v]स्थन भवथ । [v]मर्याः मर्त्याः यजमानाः [v]इव । ते यथा [v]श्रियसे जानन्ति यज्ञादिकं तद्वच्छ्रिये [v]चेतथ हे [v]नरः नेतारो मरुतः ॥

को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।
युयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ॥ ४ ॥

कः । वः । महान्ति । महताम् । उत् । अश्नवत् ।

कः । काव्या । मरुतः । कः । ह । पौंस्या ।

युयम् । ह । भूमिम् । किरणम् । न । रेजथ । प्र । यत् । भरध्वे । सुविताय । दावने ॥ ४ ॥

हे [v]मरुतः [v]वः युष्माकं [v]महतां पूज्यानां [v]कः यजमानः [v]महान्ति श्रेयांसि [v]उदश्नवत उत्कृष्टं प्राप्नुयात् । [v]कः च तदर्थं [v]काव्या काव्यानि कवीनां युष्माकं संबन्धीनि स्तोत्राणि उदश्नवत[1] । [v]को [v]ह कश्च [v]पौंस्या पौंस्यानि पराक्रमान्[2] उदश्नवत् । आदरार्थं पुनर्वचनम् । [v]यूयं [v]ह यूयं खलु [v]भूमिं [v]किरणं [v]न किरणमिव [v]रेजथ[3] । किरणं यथा वृष्ट्यर्थं चालयथ तद्वद्भूमिं रेजथ । [v]यत यस्मात् [v]सुविताय सुष्ठु प्राप्तव्याय । प्राप्तव्यमित्यर्थः । तादृशस्य धनस्य वृष्टयुदकस्य[4] वा [v]दावने दानाय [v]प्र [v]भरध्वे प्रकर्षेण संपादयथ वृष्टिम् । यस्माद्यूयमेवं कुरुथ तस्मात्क एवं करोतीत्यर्थः ॥

अश्वाइवेदरुषासः सबन्धवः शूराइव प्रयुधः प्रोत युयुधुः ।
मर्याइव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥ ५ ॥

अश्वाःऽइव । इत् । अरुषासः । सऽबन्धवः । शूराःऽइव । प्रऽयुधः । प्र । उत । युयुधुः ।

मर्याःऽइव । सुऽवृधः । ववृधुः । नरः । सूर्यस्य । चक्षुः । प्र । मिनन्ति । वृष्टिऽभिः ॥ ५ ॥

मरुत एते [v]अश्वाइव शीघ्रगन्तारः [v]अरुषासः आरोचमानाः [v]सबन्धवः । समान एक एव बन्धुर्बन्धको रुद्रो येषां ते तादृशाः । परस्परं बन्धवः स्नेहयुक्ता वा [v]शूराः भटाः [v]इव [v]प्रयुधः प्रयोद्धारो वैरिभिः सह तादृशाः [v]उत अपि च [v]प्र [v]युयुधुः प्रकर्षेण युध्यन्ते । [v]मर्याइव मनुष्या यथा वर्धन्ते तथा [v]सुवृधः सुष्ठु वर्धयितारो वर्धमाना वा [v]नरः नेतारः [v]ववृधुः वर्धन्ते । एवं महात्मानः[5] [v]सूर्यस्य [v]चक्षुः तेजःसमूहं मण्डलं वा [v]वृष्टिभिः [v]प्र [v]मिनन्ति प्रकर्षेण हिंसन्ति आवृण्वन्तीत्यर्थः ॥

---

१. ख-ग-घ-च-ज-ण-त-न-भ-र-श– कः उदश्नवत् । २. ख-च-झ-ण-त-न-भ-र– पराक्रमाणि ।
३. ख-च-झ-ण-न-भ–रेजयथ । ४. ख-च-झ-ण-त-न-भ-र–वृष्टयुदकाय । ५. ख-झ-न-भ–महात्मनः ।

ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥ ६ ॥

ते । अज्येष्ठाः । अकनिष्ठासः । उत्ऽभिदः । अमध्यमासः । महसा । वि । ववृधुः ।
सुऽजातासः । जनुषा । पृश्निऽमातरः । दिवः । मर्याः । आ । नः । अच्छ । जिगातन ॥ ६ ॥

ते मरुतः अज्येष्ठाः अकनिष्ठासः अकनिष्ठाः उद्भिदः उद्भेदयितारः शत्रूणाम् अमध्यमासः अमध्यमाः सर्वप्रकारैः समाः महसा तेजसा वि ववृधुः विवर्धन्ते । सुजातासः सुष्ठु संभृताः जनुषा जन्मना पृश्निमातरः पृश्नेः पुत्राः मर्याः मनुष्येभ्यो हिता यूयं दिवः सकाशात् नः अस्मान् अच्छ अभिमुखम् आ जिगातन सर्वतः प्रशंसत साध्वनुष्ठितमिति । उत्तरार्धः प्रत्यक्षकृतः । यद्वा । ये सुजाता जनुषा पृश्निमातरश्च तान् दिव आगतान् हे ऋत्विजो मर्या यूयमा जिगातन आगच्छत ते नोऽच्छ आगच्छतास्मदभिमुखम् ॥

वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥ ७ ॥

वयः । न । ये । श्रेणीः । पप्तुः । ओजसा । अन्तान् । दिवः । बृहतः । सानुनः । परि ।
अश्वासः । एषाम् । उभये । यथा । विदुः । प्र । पर्वतस्य । नभनून् । अचुच्यवुः ॥ ७ ॥

ये मरुतः वयो न पक्षिण इव श्रेणीः पङ्क्तयः[1] सन्तः[1] ओजसा बलेन दिवः अन्तरिक्षस्यादित्यस्य वा अन्तान् पर्यन्तान् बृहतः महतः सानुनः समुन्नतस्याकाशवलयस्य परि परितः पप्तुः पतन्ति एषाम् अश्वासः अश्वाः पर्वतस्य मेघस्य नभनून् ॥ भनतेः[2] शब्दकर्मणो नभ्राडितिवत् नभनवः ॥ उदकानि प्र अचुच्यवुः च्यावयन्ति । उभये देवा मनुष्याश्च यथा विदुः जानन्ति तथा । मनुष्याणां ज्ञानं प्रसिद्धम् । देवाश्च वृष्टौ सत्यामाग्रयणाद्यौ हविष्प्रदानेन जानन्ति । देवानां वृष्टिसंपूर्तिपरिज्ञानमाश्वलायनेनोक्तम्—' यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत ' इत्युपक्रम्य ' अपि हि देवा आहुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजते ' (आश्व. श्रौ. २. ९) इति ॥

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥ ८ ॥

मिमातु । द्यौः । अदितिः । वीतये । नः । सम् । दानुऽचित्राः । उषसः । यतन्ताम् ।
आ । अचुच्यवुः । दिव्यम् । कोशम् । एते । ऋषे । रुद्रस्य । मरुतः । गृणानाः ॥ ८ ॥

१. ख-च-झ-ण-त-न-भ-र-पङ्क्तीः । २. त-न-र-नभतेः ।

[v]नः अस्मदर्थं [v]द्यौः अन्तरिक्षं [v]मिमातु निर्मिमातु वृष्टिम् । तदनुकूलं करोत्वित्यर्थः । कीदृशी। [v]अदितिः अदीना । यद्वा । द्यौर्मिमात्वदितिर्भूमिश्च मिमातु सुखम् । किमर्थम् । [v]वीतये उत्पत्तये प्रजननाय वा । [v]दानुचित्राः विचित्रप्रकाशादिदानाः [v]उपसः [v]सं [v]यतन्ताम् । हे [v]ऋषे त्वया [v]गृणानाः स्तूयमानाः [v]मरुतः [v]रुद्रस्य। पुत्रा इति[१] शेषः[२] । [v]ऋते[२] [v]दिव्यं [v]कोशं मेघमुदकम् [v]आचुच्यवुः आच्यावयन्ति ॥ द्विकर्मकोऽयम् ॥ ॥ २४ ॥

'ईळे अग्निं स्ववसम्' इत्यष्टर्चं चतुर्थं सूक्तं इयावाश्वस्यार्षम् । सप्तम्यष्टम्यौ जगत्यौ शिष्टाः षट् त्रिष्टुभः । मरुद्देवताकमग्निमरुद्देवताकं वा । 'ईळे द्विजगत्यन्तमाग्नेयं च वा' इति । सूक्तविनियोगो लैङ्गिकः । आद्या कारीर्यां सामिधेनीषु याज्या । सूत्रितं च—'ईळेऽग्निं स्ववसं नमोभिरिति धाय्ये' (आश्व. श्रौ. २. १३) इति ॥

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ॥ १ ॥

ईळे । अग्निम् । सुऽअवसम् । नमःऽभिः । इह । प्रऽसत्तः । वि । चयत् । कृतम् । नः ।
रथैःऽइव । प्र । भरे । वाजयत्ऽभिः । प्रऽदक्षिणित् । मरुताम् । स्तोमम् । ऋध्याम् ॥ १ ॥

अहं इयावाश्वः [v]अग्निं [v]स्ववसं स्वायत्तरक्षणं [v]नमोभिः स्तोत्रैः [v]ईळे स्तौमि । तत्स्तोत्रं [v]कृतम् [v]इह इदानीं [v]प्रसत्तः प्रसन्नः प्रकर्षेण यज्ञं प्राप्तो वा सन् [v]नः अस्मदर्थं [v]वि [v]चयत विजानातु । [v]वाजयद्भिः अन्नमिच्छद्भिः स्तोत्रैः [v]रथैरिव रथैर्यथाभिमतं प्राप्नुवन्ति तद्वद्ग्रहणसाधनैः [v]प्र [v]भरे प्रकर्षेण संपादयाम्यभिमतम। [v]प्रदक्षिणित् प्रादक्षिण्येन गच्छन् [v]मरुतां [v]स्तोमं स्तोत्रम् [v]ऋध्यां वर्धयेयम् ॥

आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वताश्चित् ॥ २ ॥

आ । ये । तस्थुः । पृषतीषु । श्रुतासु । सुऽखेषु । रुद्राः । मरुतः । रथेषु ।
वना । चित् । उग्राः । जिहते । नि । वः । भिया ।
पृथिवी । चित् । रेजते । पर्वतः । चित् ॥ २ ॥

[v]ये [v]मरुतः [v]रुद्राः रुद्रपुत्राः [v]आ [v]तस्थुः आतिष्ठन्ति [v]पृषतीषु मरुतां वाहनेषु [v]श्रुतासु श्रान्तासु प्रसिद्धासु वा [v]सुखेषु । खमाकाशं छिद्रम् । शोभनरथाक्षद्वारेषु [v]रथेषु रथान् आ तस्थुः आतिष्ठन्ति । हे [v]उग्राः उद्गूर्णबला मरुतो यूयं यदा रथमारूढाः स्थ तदानीं [v]वना [v]चित् वनान्यपि [v]नि [v]जिहते न्यग्गच्छन्ति [v]वः युष्माकं [v]भिया

१. ग-घ-ज-र-ञ-इत्यर्थः । २. झ-त-न-भ-र-ते ।

भीत्या । [v]पृथिवी [v]चित् पृथिव्यपि [v]रेजते । [v]पर्वतश्चित् पर्वतोऽपि रेजते कम्पते । उत्तरार्धः प्रत्यक्षकृतः । पूर्वार्धे य एवमकुर्वन् तेषां स्तोममृध्यामिति पूर्वत्रान्वयः[1] ॥

कारीर्यां मारुतस्य सप्तकपालस्य ' पर्वतश्चित् ' इत्येषा याज्या । सूत्रितं च— ' पर्वतश्चिन्महि वृद्धो बिभाय सृजन्ति रश्मिमोजसा ' (आश्व. श्रौ. २. १३) इति ॥

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमन्त आपइव समुद्रियश्चो धवध्वे ॥ ३ ॥

पर्वतः । चित् । महि । वृद्धः । बिभाय । दिवः । चित् । सानु । रेजत । स्वने । वः ।
यत् । क्रीळथ । मरुतः । ऋष्टिऽमन्तः । आपःऽइव । समुद्रियः । चः । धवध्वे ॥ ३ ॥

हे मरुतः [v]वः युष्माकं [v]स्वने भयंकरशब्दे सति [v]पर्वतश्चित् पर्वतोऽपि [v]महि महान् [v]वृद्धः सन्नपि [v]बिभाय बिभेति । [v]दिवश्चित् अन्तरिक्षस्यापि [v]सानु समुच्छ्रितः[2] प्रदेशः[2] [v]रेजत[3] कम्पते[3] । [v]यत् यदा [v]क्रीळथ हे [v]मरुतः यूयम् [v]ऋष्टिमन्तः आयुधवन्तः सन्तस्तदा [v]आपइव उदकार्णव [v]समुद्रियः समुद्राज्जाताः [v]धवध्वे धावध्वे गच्छथ ॥

वराइवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥ ४ ॥

वराःऽइव । इत् । रैवतासः । हिरण्यैः । अभि । स्वधाभिः । तन्वः । पिपिश्रे ।
श्रिये । श्रेयांसः । तवसः । रथेषु । सत्रा । महांसि । चक्रिरे । तनूषु ॥ ४ ॥

[v]वरा इव विवाहयोग्या युवान इव । ते यथा [v]रैवतासः धनवन्तः [v]हिरण्यैः हिरण्यमयैराभरणविशेषैः [v]स्वधाभिः उदकैश्च [v]तन्वः स्वीयानि शरीराणि [v]अभि [v]पिपिश्रे संयोजयन्ति अलंकुर्वन्ति तद्वदेते मरुतोऽपि रैवतासः धनवन्तः हिरण्यैः हिरण्यस्थानीयैर्विद्युदाख्यैराभरणैः स्वधाभिश्च तन्वः स्वीयानि शरीराणि पिपिश्रे । [v]श्रिये शोभायै [v]श्रेयांसः श्रेष्ठाः [v]तवसः बलवन्तो मरुतः [v]रथेषु [v]सत्रा सत्यं सह वा [v]तनूषु [v]महांसि [v]चक्रिरे कृतवन्तः । सर्वाभरणैरुदकैश्चोपेताः रथानधिष्ठाय[4] शरीरेषु तेजांस्यधारयन्नित्यर्थः[5] ॥

---

१. ख-च-ञ-ण-भ-र–पूर्वत्र; न–पूर्वत्र संबन्धः । २. ख-च-ञ-ण-त-न-भ-र–समुच्छ्रितप्रदेशम् । ३. ख-च-ञ-ण-त-न-भ-र-रेजथ (रेजत-न) कम्पयथ (कम्पयथे-ञ) । ४. ख-च-ण-न–रथेऽधिष्ठाय; ञ-भ-र–रथाधिष्ठाय । ५ ग-घ-ज–°धारयन्नित्यर्थः । इत्पूरणः ।

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥ ५ ॥

अज्येष्ठासः । अकनिष्ठासः । एते । सम् । भ्रातरः । ववृधुः । सौभगाय ।
युवा । पिता । सुऽअपाः । रुद्रः । एषाम् । सुऽदुघा । पृश्निः । सुऽदिना । मरुत्ऽभ्यः ॥५॥

[v]अज्येष्ठासः [v]अकनिष्ठासः परस्परं ज्येष्ठकनिष्ठभावरहिताः सहैवोत्पन्नाः समानबलाः [v]एते मरुतः [v]भ्रातरः परस्परं भ्रातृभूताः सन्तः [v]सौभगाय सुभगत्वाय [v]सं [v]ववृधुः वर्धन्ते । [v]युवा नित्यतरुणः [1]स्वपाः शोभनकर्मा [v]एषां मरुतां [v]रुद्रः [v]पिता [1]सुदुघा सुष्ठु दोग्ध्री [v]पृश्निः गोदेवता मातृभूता [v]मरुद्भ्यः मरुदर्थं [1]सुदिना शोभनदिनानि । अकुरुतामिति शेषः ॥

यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धविषो यद्यजाम ॥ ६ ॥

यत् । उत्ऽतमे । मरुतः । मध्यमे । वा । यत । वा । अवमे । सुऽभगासः । दिवि । स्थ ।
अतः । नः । रुद्राः । उत । वा । नु । अस्य । अग्ने । वित्तात् । हविषः । यत । यजाम ॥६॥

हे [v]मरुतः यूयं [v]यदुत्तमे[1] उत्कृष्टे उत्तमे चरमे वा [1]दिवि द्युलोके [1]मध्यमे [v]वा दिवि [v]यद्वावमे दिवि हे [v]सुभगासः [v]स्थ भवथ । 'त्रयो वा इमे त्रिवृतो लोकास्तिस्रो दिवः पृथिवी' इत्यादिश्रुतेर्द्युलोकस्य त्रैविध्यम् । [v]अतः अस्मात् स्थानत्रयात् [1]नः अस्मदर्थं हे [v]रुद्राः आगच्छतेति शेषः । [v]उत [v]वा अथवा [v]नु अद्य [1]यद्यजाम यद्धविः प्रक्षिपाम हे [v]अग्ने त्वम् [v]अस्य [v]हविषः एतद्धविः [1]वित्तात् विद्धि[2] ॥

अग्निश्च यन्मरुतो विश्ववेदसो दिवो बर्हध्व उत्तरादधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥ ७ ॥

अग्निः । च । यत् । मरुतः । विश्वऽवेदसः । दिवः । बर्हध्वे । उत्ऽतरात् । अधि । स्नुऽभिः ।
ते । मन्दसानाः । धुनयः । रिशादसः । वामम् । धत्त । यजमानाय । सुन्वते ॥ ७ ॥

हे [v]विश्ववेदसः सर्वस्य ज्ञातारो विश्वधना वा हे [v]मरुतः [v]यत्[3] यूयं [v]अग्निश्च [v]दिवः द्युलोकात् [v]उत्तरात् उत्कृष्टतरात् [v]अधि उपरि [v]स्नुभिः सानुभिरुपरिप्रदेशै [v]बर्हध्वे उह्यध्वे । तत्र निवसथेत्यर्थः । यद्वा स्नुशब्देन तत्सदृशा अश्वा उच्यन्ते । तैर्वोह्यध्वे । [v]ते यूयं [v]मन्दसानाः मोद-

१. त–उत् । २. ग-घ-ज-श–वेत्थ । ३. ख-च-झ-ण-त-न-भ-र– 'यत्' नास्ति ।

माना अस्मदीयैः स्तोत्रैर्हविर्भिश्च [v]धुनयः शत्रूणां कम्पयितारः [v]रिशादसः अस्मद्भिसकानामत्तारः सन्तः [v]वामं वनर्नीयं धनं [v]धत्त दत्त [1]यजमानाय [v]सुन्वते अभिषवं कुर्वते ॥

'अग्ने मरुद्भिः' इत्यष्टम्याग्निमारुतस्य याज्या । 'अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः' (आश्व. श्रौ. ५. २०) इति[2] सूत्रितत्वात् ॥

अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।
पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ॥ ८ ॥

अग्ने । मरुत्ऽभिः । शुभयत्ऽभिः । ऋक्वऽभिः । सोमम् । पिब । मन्दसानः । गणश्रिऽभिः । पावकेभिः । विश्वम्ऽइन्वेभिः । आयुऽभिः । वैश्वानर । प्रऽदिवा । केतुना । सऽजूः ॥ ८ ॥

हे [v]अग्ने [v]मरुद्भिः सह [v]मन्दसानः सन् [v]सोमं [1]पिब । कीदृशैः मरुद्भिः[3] । [v]शुभयद्भिः शोभमानैरन्यान् शोभयद्भिर्वा [v]ऋक्वभिः स्तुत्यैः [v]गणश्रिभिः गणभावमाश्रयद्भिः [v]पावकेभिः शोधकैः [v]विश्वमिन्वेभिः विश्वं वृष्ट्या प्रीणयद्भिः [v]आयुभिः आयुष्मद्भिः[3] । हे [1]वैश्वानर विश्वनरहिताग्ने [v]प्रदिवा पुराणेन [v]केतुना ज्वालापुञ्जेन [v]सजूः सहितः ॥ ॥ २५ ॥

'के ष्ठा नरः' इत्येकोनविंशत्यृचं पञ्चमं सूक्तम् । अत्रानुक्रमणिका—'के ष्ठैकोना गायत्रं श्यावाश्वोऽत्र वैददश्वी तरन्तपुरुमीळ्हौ दाभ्यौ[4] रथवीति मरुतश्च दानस्तुतः प्रशशंस वृद्ध्वा च तरन्तमहिषीं शशीयसीं[5] पञ्चम्यनुष्टुप् नवमी सतोबृहती' इति । श्यावाश्व ऋषिः । पञ्चम्यनुष्टुप् नवमी सतोबृहती शिष्टा गायत्र्यः । आद्याश्चतस्रो मरुद्देवताकाः । 'मनस्मा' इत्यादीनां चतसृणां शशीयसी[6] नाम तरन्तस्य राज्ञो भार्या देवता । 'उत मेऽरपत' इत्यस्या वैददश्विः पुरुमीळ्हो देवता । 'यो मे धेनूनाम्' इत्यस्या वैददश्विस्तरन्तो राजा देवता । 'य इं वहन्ते' इत्याद्याः षण्मारुत्यः । 'एतं मे' इत्यस्य तृचस्य दाभ्यौ[7] रथवीतिर्नाम राजा देवता । विनियोगो लैङ्गिकः ॥

अत्राश्चर्यं पुराकृत्तमाहुरागमपारगाः । अर्चनानाः पुरात्रेयो दाभ्र्येण[8] रथवीतिना ॥ आत्विज्याय वृतो यज्ञे वितते हौत्र आस्थितः । रथवीतिसुतां कन्यां ददर्श पितुरन्तिके ॥ ययाचे स्वकुमाराय श्यावाश्वाय च तां सुताम् । स प्रदानमना भार्यामपृच्छत्तिक प्रयच्छसि ॥ इति पृष्टा पुनः प्राह कथमस्मै प्रदास्यसि । इतः पूर्वं सुता दत्ता नामीदनृपये क्वचित् ॥ तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसम् । श्यावाश्वः संस्थिते यज्ञे तेन राज्ञा निराकृतः ॥ तत्प्रत्याशान्वितो विप्रस्तपस्तेपे सुदारुणम् । ब्रह्मचर्यरतः शान्तो भिक्षार्थं पर्यटन् द्विजः ॥ तरन्तमहिषीं साध्वीं बिभिक्षेऽसौ शशीयसीम्[9] । सा संप्राप्यान्तिकं पत्युः प्रोवाचागतवानृषिः ॥ इत्युक्तो नृपतिर्भार्यां प्रत्याहैनं प्रपूजय । सानुज्ञाता गवां यूथं प्रादादाभरणानि च ॥ तरन्तोऽपि पुनस्तस्मै प्रादाद्धनमपेक्षितम् । दत्वा च

---

१. न–इति याज्येति । २. ख-च-झ-ण-न-भ-र-श–मरुद्भिः सह । ३. ख-च-झ-ण-त-भ-र–'आयुर्भाद्भिः' नास्ति ; न– गन्तृभिः । ४. त– दाल्भ्यम् । ५. ख-च-झ-ण-त-न-भ-र–शसीयसीम् । ६. ख-च-झ-ण-त-न-भ-र–शसीयसी । ७. ख-च-झ-ण-त-न-भ-र–दाल्भ्यः । ८. ख-च-झ-ण-त-न-भ-र--श–दाल्भ्येन; ग-घ-ञ–दाभ्येन । ९. झ-त-न-भ-र-श–शसीयसीम् ।

पुरुमीळहस्य स्वानुजस्यान्तिकं प्रति ॥ प्रेरयामास तमृषिं सोऽपि त्वां मानयिष्यति ॥ तथेति राज्ञो वचनं निशम्य तद्भार्यया दर्शितमर्गमार्गः । गच्छन् शनैरर्धपथे मरुद्गणान् समानरूपान् स्वदिदृक्षयागतान् ॥ विलोक्य विप्रः सभयः प्रणम्य कृताञ्जलिः कण्टकिताङ्गसंघः । तुष्टाव हृष्टान्मरुतो विशिष्टैरर्थैर्वचोभिः परितुष्टचित्तः ॥ संप्राप्य सर्वं स्वमनीषितं तदा मरुद्गणेभ्यो मुदितात्मवद्भ्यः[1] ॥ तदाभवदृषिः सूक्तदृष्टा श्यावाश्वनामकः । पश्चात्पुनर्गृहं गत्वा भूयो लब्ध्वा गवां शतम् ॥ दाभ्यों[2] मन्त्रदृशे राज्ञ्या चोदितः स्वसुतां ददौ । पुरुमीळहस्तस्तन्तश्च तद्भार्या च शशीयसी[3] ॥ दाभ्यों[4] यो रथवीत्याख्यः सप्त ये मरुतां गणाः । ते[5] तस्मै यतः[6] ददुस्तुष्टास्तत्के ष्टेत्यत्र वर्ण्यते ॥

के ष्ठा नरः श्रेष्ठतमा य एकैक आयय । परमस्याः परावतः ॥ १ ॥

के । स्थ । नरः । श्रेष्ठऽतमाः । ये । एकैःऽएकः । आऽअयय । परमस्याः । पराऽवतः ॥ १ ॥

हे [v]नरः नेतारो मरुतः [v]श्रेष्ठतमाः अत्यन्तं श्रेष्ठा यूयं [v]के [v]ष्ठ के स्थ के भवथ । एवं स्वरूपानिश्चयात् संदिह्य ब्रवीति । [v]ये यूयम् [v]एकैकः प्रत्येकम् [v]आयय आगच्छथ । कस्मादित्युच्यते । [v]परमस्याः [v]परावतः अत्यन्तदूरदेशात् । अन्तरिक्षादित्यर्थः ॥

कꣳ वोऽश्वाः कꣳ अभीशवः कथं शेक कथा यय । पृष्ठे सदो नसोर्यमः ॥२॥

कꣳ । वः । अश्वाः । कꣳ । अभीशवः । कथम् । शेक । कथा । यय ।

पृष्ठे । सदः । नसोः । यमः ॥ २ ॥

हे मरुतः [v]वः युष्माकम् [v]अश्वाः [v]कꣳ कुत्रत्याः । [v]कꣳ च [v]अभीशवः बन्धनरज्जवः । [v]कथं च [v]शेक शीघ्रं गन्तुं शक्ता भवथ । [v]कथा कथं [v]यय यानाः स्थ । [v]पृष्ठे अश्वानां पृष्ठदेशे [v]सदः । सीदति तिष्ठत्यत्रेति सदः पर्याणम् । तच्च दृश्यते । तथा [v]नसोः नासिकयोः [v]यमः नियमिता पलायनप्रतिबन्धकारी पशोर्नासिकयोर्दृश्यते । तस्मादश्वादिभिः कुत्रापि त्वरितगमना इव प्रतिभान्ति के यूयमिति देवत्वमनवधार्याह ॥

जघने चोद एषां वि सक्थानि नरो यमुः । पुत्रकृथे न जनयः ॥ ३ ॥

जघने । चोदः । एषाम् । वि । सक्थानि । नरः । यमुः । पुत्रऽकृथे । न । जनयः ॥ ३ ॥

[v]एषाम् अश्वानां [v]जघने हन्तव्यप्रदेशे [v]चोदः प्रेरिका कशा अराग्रकाष्ठविशेषो वा वर्तते । शीघ्रगमनाय ताडयन् वर्तत इत्यर्थः । [v]सक्थानि ऊरुप्रदेशान् [v]नरः नेतारो मरुतः [v]वि विविच्य [v]यमुः नियच्छन्ति । आशुभावनेन विवृता भवन्तीत्यर्थः । विवृतौ दृष्टान्तः । [v]पुत्रकृथे

---

१. त–मुदितात्मविद्भ्यः । २. झ-त-न-भ-र– ततः ; श–दाल्भ्यः । ३ त– शशीयसी । ४. त–दाल्भ्यः । ५. श–ततस्तस्मै । ६. ग-घ-ज-श–तत्र ।

पुत्रकरणे उत्पादने ᵛजनयः ᵛन अपत्योत्पादयित्र्यो योषित इव । ता यथा पुत्रोत्पादनकामाः[१] संगमसमये[२] ऊरू विवृतौ कुर्वन्ति तद्वदित्यर्थः ॥

परा वीरास एतन मर्यासो भद्रजानयः । अग्नितपो यथासथ ॥ ४ ॥

परा । वीरासः । इतन । मर्यासः । भद्रऽजानयः । अग्निऽतपः । यथा । असथ ॥ ४ ॥

कशाताडनादिलिङ्गेन जिगमिषून् मत्वा ब्रूते । हे ᵛवीरासः वीराः अमित्राणामीरयितारो हे ᵛमर्यासः मर्त्येभ्यो हिता हे ᵛभद्रजानयः । भद्रः स्तुत्यो जानिर्जन्म येषां ते तथोक्ताः । रुद्रपुत्राः इत्यर्थः । ᵛअग्नितपः अग्निना तप्तास्ताग्रादयः ᵛयथा दीप्तास्तद्वत् प्रदीप्ताः ᵛअसथ भवथ । अथवाग्नितप्ता दग्धदेहा यथा पलायन्ते तथा भवथेति ॥

सनत्साभ्यं पशुमुत गव्यं शतावयम् ।

श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥ ५ ॥

सनत् । सा । अश्व्यम् । पशुम् । उत । गव्यम् । शतऽअवयम् ।

श्यावाश्वऽस्तुताय । या । दोः । वीराय । उपऽबर्बृहत् ॥ ५ ॥

ᵛसा तरन्तमहिषी मह्यं ᵛसनत् प्रादात्। किम्। ᵛअश्व्यम् अश्वात्मकं तत्समूहात्मकं वा ᵛपशुम्। जातावेकवचनम्। ᵛउत अपि च ᵛगव्यं गोसमूहात्मकं पशुं ᵛशतावयम् अनेकैरविभिर्युक्तं सनदिति। सेत्युक्तं केत्याह । ᵛया ᵛश्यावाश्वस्तुताय श्यावाश्वेन मया स्तुताय ᵛवीराय तरन्ताय ᵛदोः स्वकीयं भुजम् ᵛउपबर्बृहत् उपोदयच्छदालिङ्गनाय सा सनदिति । यतः[३] भर्तृप्रेमास्पदा तस्मादेव बहु धनं दातुं शक्तेत्यर्थः ॥ ॥ २६ ॥

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी । अदेवत्रादराधसः ॥ ६ ॥

उत । त्वा । स्त्री । शशीयसी । पुंसः । भवति । वस्यसी । अदेवऽत्रात् । अराधसः ॥ ६ ॥

ᵛउत अपि च ᵛत्वा एका[४] ᵛशशीयसी[५]। शशीयसी[६] इत्येतन्महिष्या नाम। सैव ᵛस्त्री[७]। यद्वा। उतेत्ययमेवकारार्थे। स्त्रीषु सैव प्रशस्येत्यर्थः ॥ ' त्वसमसिमनेमेत्यनुज्ञानि ' इति वचनात् त्वेति निघातः ॥ सैव ᵛपुंसः पुरुषात् ᵛवस्यसी वसीयसी ᵛभवति। कस्मात्पुंस इत्युच्यते। ᵛअदेवत्रात्। देवाः[८] अनेन[८] त्रायन्ते स्तुत्यादिना सः[९] देवत्रः। न देवत्रः अदेवत्रः[९]। तस्मात् ᵛअराधसः। राधो धनम्। दानार्हधनरहितात्। लुब्धकादित्यर्थः ॥

---

१ ग-घ-ज-श-पुत्रोत्पादनकाले। २. ख-च-झ-ण-भ-संगमाय ; न-संगमने। ३. ख-च-झ-ण-त-भ-र-अनया ; न-अतो या। ४. ख-झ-न-भ-र-'एका' नास्ति। ५. झ-न-भ-र-शसीयसी। ६. झ-न-भ-र-शसीयसी। ७. त-स्त्रीनाम। ८. त-श-देवत्रान्ययेन। ९. ग-घ-ज-यं स अत्र देवत्रः ; श-स देवत्रः।

वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् । देवत्रा कृणुते मनः ॥७॥

वि । या । जानाति । जसुरिम् । वि । तृष्यन्तम् । वि । कामिनम् ।

देवऽत्रा । कृणुते । मनः ॥ ७ ॥

[v]या शशीयसी [v]जसुरिं व्यथितम् । जसिस्ताडनकर्मा उपक्षपणकर्मा[1] वा । तं [v]वि [v]जानाति । तथा [v]तृष्यन्तं [v]वि जानाति । [v]कामिनं धनाद्यभिलाषवन्तं [v]वि जानाति । अनुकम्पया[2] अभिमतं दत्तवतीत्यर्थः । [v]देवत्रा देवेषु [v]मनः [v]कृणुते कुरुते देवप्रीत्यर्थं प्रदानबुद्धिं करोति या सैव स्तौति पूर्वत्र संबन्धः ॥

उत घा नेमो अस्तुतः पुमाँ इतिं ब्रुवे पणिः । स वैरदेय इत्समः ॥ ८ ॥

उत । घ । नेमः । अस्तुतः । पुमान् । इतिं । ब्रुवे । पणिः ।

सः । वैरऽदेये । इत् । समः ॥ ८ ॥

[v]उत [v]घ अपि च । घेति पूरणः । [v]नेमः । 'स्वो नेम इत्यर्धस्य' (निरु. ३. २०) इति निरुक्तम् । नेमोऽर्धः । जायापत्योर्मिलितावेककार्यकर्तृत्वादेक एव पदार्थः । 'अर्धं शरीरस्य भार्या[3]' इत्यादिस्मृतेः । शशीयस्या अर्धभूतस्तस्याः [v]पुमान् [v]अस्तुतः [v]इति [v]ब्रुवे । बहुधा स्तुतोऽपि गुणस्यातिबाहुल्यादस्तुत एवेति ब्रुवे [v]पणिः स्तोताहम् । [v]सः च तस्याः [v]वैरदेये । वीरा धनानां प्रेरयितारो दानशीलाः । तैर्दातव्यं धनं देयम् । तस्मिन् धने [v]समः । सर्वेभ्यो दातेत्यर्थः । [v]इत् इति पूरणः ॥

उत मेऽरपद्युवतिर्ममन्दुषी प्रतिं श्यावायं वर्तनिम् ।

वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥ ९ ॥

उत । मे । अरपत् । युवतिः । ममन्दुषी । प्रतिं । श्यावायं । वर्तनिम् ।

वि । रोहिता । पुरुऽमीळ्हाय । येमतुः । विप्राय । दीर्घऽयशसे ॥ ९ ॥

[v]उत अपि च [v]श्यावाय श्यावाश्वाय [v]मे मह्यम् [v]अरपत अलपत । स्पष्टमाचष्ट । किम् । [v]वर्तनिं मार्गम् । कीदृशी सा । [v]युवतिः प्रवृत्तयौवना [v]प्रति [v]ममन्दुषी प्रतिमोदमाना । कस्मै[4] । [v]दीर्घयशसे प्रभूतान्नाय प्रभूतकीर्तये वा [v]पुरुमीळ्हाय पुरुनामकाय प्रभूतगृहाय [v]विप्राय[5] ॥ 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा. सू. २. ३. १४) इति चतुर्थी ॥ पुरुमीळ्हं प्राप्तुमित्यर्थः । तदर्थं [v]रोहिता रोहितवर्णावश्वौ शशीयस्या दत्तौ [v]वि [v]येमतुः[6] । प्रतवन्तावित्यर्थः । या अश्वाभ्यां युक्ते रथे स्थापयित्वा पुरुमीळ्हगृहस्य मार्गं प्रदर्शयन्ती पुरतो गता सैव पुंसो भवति वन्यसीति पूर्वत्र संबन्धः ॥

---

१. श–उपक्षेपणकर्मा । २. त–कार्मिन । ३. ख-च-झ-ण-त-न-भ-र–यस्य भार्या । ४. ख-च-झ-ण-न-भ-र– कस्मै विप्राय मेधाविने । ५. त–'विप्राय' नास्ति । ६. ख-त-न-भ-र– येमतुः विशेषेण यमयतुः ; च-ण–येमतुः विशेषेण यमतुः ।

यो मे धेनूनां शतं वैददश्विर्यथा ददत् । तरन्तइव मंहना ॥ १० ॥

यः । मे । धेनूनाम् । शतम् । वैदत्ऽअश्विः । यथा । ददत् । तरन्तःऽइव । मंहना ॥१०॥

इयं पुरुमीळहस्तुतिः । [1]वैदश्विः पुरुमीळहोऽपि [v]यो [1]मे मह्यं [v]धेनूनां [v]शतं [v]यथा येन प्रकारेण [v]ददत् दत्तवान्[2] । तथा [v]मंहना मंहनीयानि धनान्यपि ददत [v]तरन्तइव । स यथा धेनुशतं बहुविधं धनं च दत्तवान् तद्वद्वैदश्विः पुरुमीळहोऽपि ददत् । ते स्तुवे[3] इति शेषः ॥ ॥ २७ ॥

य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु । अत्र श्रवांसि दधिरे ॥ ११ ॥

ये । ईम् । वहन्ते । आशुऽभिः । पिबन्तः । मदिरम् । मधु । अत्र । श्रवांसि । दधिरे ॥११॥

इदानीं मरुत एवैत इति निश्चित्य[3] जनप्रसिद्धैः[3] माहात्म्यैः स्तौति । [1]ये मरुतः [v]ईम् इदानीम् [v]आशुभिः शीघ्रगामिभिरश्वैः [v]वहन्ते उह्यन्ते । किं कुर्वन्तः । [1]मदिरं मदकरं [v]मधु सोमरसं [v]पिबन्तः । पाथेयत्वेन धृतं सोममित्यर्थः । ते मरुतः [v]अत्र अस्मिन देशे [v]श्रवांसि स्तुतिजनितानि यशांसि [v]दधिरे धारयन्ति ॥

येषाँ श्रियाधि रोदसी विभ्राजन्ते रथेष्वा । दिवि रुक्मइवोपरि ॥ १२ ॥

येषाम् । श्रिया । अधि । रोदसी इति । विऽभ्राजन्ते । रथेषु । आ ।

दिवि । रुक्मःऽइव । उपरि ॥ १२ ॥

[v]येषां मरुतां [v]श्रिया कान्त्या [v]रोदसी द्यावापृथिव्यो [v]अधि अधिष्ठिते भवत इति शेषः । यस्मादेते मरुतः [v]रथेषु [v]विभ्राजन्ते विशेषेण दीप्यन्ते । [v]आ इति चार्थे । तत्र दृष्टान्तः । [v]उपरि उपरिभूते [v]दिवि द्युलोके [v]रुक्मः रोचमानः आदित्यः [v]इव । यद्वा । उपरि रथस्योपरीति वा योज्यम् ॥

युवा स मारुतो गणस्त्वेषरथो अनेद्यः । शुभंयावाप्रतिष्कुतः ॥ १३ ॥

युवा । सः । मारुतः । गणः । त्वेषऽरथः । अनेद्यः । शुभम्ऽयावा । अप्रतिऽस्कुतः ॥ १३ ॥

[v]स [v]मारुतो [v]गणः [v]युवा सर्वत्र मिश्रयिता नित्यतरुणो वा [v]त्वेषरथः दीप्तरथः [v]अनेद्यः अनिन्द्यः [v]शुभंयावा शोभनं गन्ता [v]अप्रतिष्कुतः अप्रतिगतोऽप्रतिशब्दितो वा । एवं महानुभावो गणो दीप्यत इति ॥

को वेद नूनमेषां यत्रा मदन्ति धूतयः । ऋतजाता अरेपसः ॥ १४ ॥

कः । वेद । नूनम् । एषाम् । यत्र । मदन्ति । धूतयः । ऋतऽजाताः । अरेपसः ॥ १४ ॥

---

१. ज्ञ-र-ददतु । २. ख-च-ज्ञ-ण-त-न-भ-र-स्तुवते । ३. ज्ञ-भ-र-निश्चित्येजनाप्रसिद्धैः ; त-निश्चित्य प्रसिद्धैः ; न-निश्चित्य इदानीं प्रसिद्धैः ।

[v]एषां मरुतां स्थानं [v]को [v]वेद को जानाति । [v]नूनम्[४] इदानीं[१] [v]यत्र स्थाने [v]धूतयः शत्रूणां कम्पकाः [v]मदन्ति हृष्यन्ति [v]ऋतजाताः जलार्थमुत्पन्ना यज्ञे वा प्रादुर्भूताः [v]अरेपसः अपापाः॥

यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया । श्रोतारो यामहूतिषु ॥ १५ ॥

यूयम् । मर्तम् । विपन्यवः । प्रऽनेतारः । इत्था । धिया । श्रोतारः । यामऽहूतिषु ॥ १५ ॥

हे [v]विपन्यवः स्तुतिकामा मरुतः [v]यूयं [v]मर्तं मरणस्वभावं यजमानम् [v]इत्था अनया [v]धिया इदानीं कृतप्रकारयानुग्रहबुद्धया ईदृशेन स्तुतिकर्मणा वा निमित्तेन [v]प्रणेतारः प्रकर्षेण प्रापयितारोऽभिमतं स्वर्गादिकम् । [v]यामहूतिषु । यामो गमनम् । तदर्था हूतयो यस्मिन्निति यामहूतयो यज्ञाः । तेषु [v]श्रोतारः आह्वानानाम् ॥ ॥ २८ ॥

ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः । आ यज्ञियासो ववृत्तन ॥१६॥

ते । नः । वसूनि । काम्या । पुरुऽचन्द्राः । रिशादसः । आ । यज्ञियासः । ववृत्तन ॥ १६ ॥

हे [v]रिशादसः हिंसकानां शत्रूणामत्तारो हे [v]यज्ञियासः यज्ञार्हाः [v]पुरुश्चन्द्राः प्रभूताह्लादकधनाः [v]ते यूयं [v]नः अस्मभ्यं [v]वसूनि निवासयोग्यानि धनानि [v]काम्या स्पृहणीयानि [v]आ [v]ववृत्तन आवर्तयथेत्यर्थः । मरुतां दानप्रशंसाया अपेक्षितत्वान्न प्रार्थनोचिता ॥

एतं मे स्तोममूर्म्ये दाभ्र्याय परा वह । गिरो देवि रथीरिव ॥ १७ ॥

एतम् । मे । स्तोमम् । ऊर्म्ये । दाभ्र्याय । परा । वह । गिरः । देवि । रथीःऽइव ॥ १७ ॥

संपन्नऋषिभावस्य इयावाश्वस्यार्चनानसः । रथवीतिसुतायाश्च विवाहं शौनकोऽब्रवीत् ॥ कथम् । मरुत्सु तु प्रयातेषु इयावाश्वः सुमहायशाः । प्रादुर्भूतार्षमात्मानं ज्ञात्वात्रिकुलनन्दनः ॥ रथवीतेर्दुहितरमगच्छन्मनसा तदा । स सत्यमृषिमात्मानं प्रवक्ष्यन्नथवीतये ॥ एतं मे स्तोममित्याभ्यां दौत्ये रात्रिं न्यवेदयत् । ऋषेर्नियोगमाज्ञाय देव्या राज्ञ्या प्रचोदितः ॥ आदाय कन्यकां दानुमुपेयायार्चनानसम् । पादौ तस्योपसंगृह्य स्थित्वा प्रह्वः कृताञ्जलिः । रथवीतिरहं दाभ्र्य[२] इति नाम शशंस सः । मया संयोगमिच्छन्तं त्वां प्रत्याचक्षि[३] यत् पुरा ॥ तत्क्षमस्व नमस्तेऽस्तु मे मा स्म भगवन् क्रुधः[४] ॥ ऋषेः पुत्रः स्वयमृषिः पितासि भगवन्नृषेः[५] । इन्त प्रतिगृहाणेमां स्नुषामित्येनमब्रवीत् ॥ तस्मै ददावश्वशतं स राजा स्वलंकृतां चापि सुतां स्नुषार्थम् । विवाहकालेऽपि ददौ नरेन्द्रः शतं हयानां दुहितुः सहस्रम् ॥ गवां सहस्रं वसु च प्रभूतं तसुं तपोऽन्तेऽथ वनं जगामेति ॥ हे [v]ऊर्म्ये रात्रि देवि । ऊर्म्येति रात्रिनाम । [v]मे मदीयम् [v]एतं [v]स्तोमं मरुद्भ्यः कृतं स्तोत्रमहं मन्त्रदृग्भूत्वा मरुतः स्तुतवानित्येवं [v]दाभ्र्याय इयावाश्वाय [v]परा पराङ्मुखी दाभ्र्याभिमुखी सती [v]वह प्रापयेत्यर्थः । तदेवादरार्थमुच्यते । हे रात्रि [v]देवि [v]गिरः स्तुतीर्मरुद्विषयाः परा वह [v]रथीरिव । रथी यथा रथेऽभिप्रेतं वसु स्थापयित्वा अभिमतं[६] देशं[६] प्रापयति तद्वत् ॥

१ ख-च-ज्ञ-ण-त-न-भ-र-श– 'नूनमिदानीं' नास्ति । २. ख-च-ण-भ-श–दाल्भ्य । ३. ख-च-ण–प्रत्याचिक्षिपम । ४. ज्ञ-त-न-भ-र क्रुधीः । ५. र–भगवान्नृषेः । ६. त–अभिमतप्रदेशम् ।

उत मे वोचतादितिं मृतमोमे रथवीतौ । न कामो अप वेति मे ॥ १८ ॥

उत । मे । वोचतात् । इति । मृतऽसोमे । रथऽवीतौ । न । कामः । अप । वेति । मे ॥ १८ ॥

ह[1] ऊर्म्ये[2] [3]उत अपि च [4]मे मां [5]वोचतात ब्रूहि । किमित्युच्यते । [6]इति इत्थम । कथमिति । [7]मृतसोमे कृतसोमयागे [8]रथवीतौ राज्ञि [9]मे [9]कामः तत्पुत्रीविषयः [9]न [9]अप [9]वेति नापगच्छति न विरमति इतीत्थं वोचतात ॥

एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥ १९ ॥

एषः । क्षेति । रथऽवीतिः । मघऽवा । गोऽमतीः । अनु । पर्वतेषु । अपऽश्रितः ॥ १९ ॥

कन्यां दत्त्वा कृतार्थं तं श्यावाश्वोऽथ वनं गतम् । रथवीतं तपस्यन्तं संप्रेक्ष्यार्षेण चक्षुषा । रम्ये हिमवतः पृष्ठ एष क्षेतीति सोऽब्रवीत् ॥ [1]एषः [2]रथवीतिः [3]मघवा धनवान् [4]गोमतीरनु उदकवतीर्नदीरनु अनुसृत्य नदीनां तीरे [5]क्षेति निवसति [6]पर्वतेषु हिमवत्पर्वतप्रान्तेषु [7]अपश्रितः आश्रितः ॥ ॥ २९ ॥

'ऋतेन ऋतम्' इति नवर्चं षष्ठं सूक्तमात्रेयस्य श्रुतविद आर्षं त्रैष्टुभं मैत्रावरुणम् । तथा चानुक्रम्यते—'ऋतेन नव श्रुतविन्मैत्रावरुणं वै तत' इति । 'वै तत' इत्युभयोः प्रयोगात्तूष्णादिपरिभाषयैतदादीन्येकादश सूक्तानि मित्रावरुणदेवत्यानि । विनियोगो लैङ्गिकः ॥

ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥ १ ॥

ऋतेन । ऋतम् । अपिऽहितम् । ध्रुवम् । वाम् । सूर्यस्य । यत्र । विऽमुचन्ति । अश्वान् ।
दश । शता । सह । तस्थुः । तत् । एकम् । देवानाम् । श्रेष्ठम् । वपुषाम् । अपश्यम् ॥ १ ॥

[1]सूर्यस्य [2]ऋतं सत्यभूतं मण्डलम् [3]ऋतेन उदकेन [4]अपिहितम् आच्छादितं [5]ध्रुवं शाश्वतमपश्यमिति संबन्धः । यत्र [6]वां युवाभ्यां स्थितिस्तत्र इत्यर्थः । सूर्यमण्डले मित्रावरुणयोः स्थितिः 'चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः' (ऋ. सं. १. ११५. १), 'उद्वां चक्षुर्वरुण सुप्रतीकं देवयोः' (ऋ. सं. ७. ६१. १) इति 'चक्षुर्मित्रस्य वरुणस्य' (ऋ. सं. ७.६३. १) इत्यादिषु प्रसिद्धा । [7]यत्र यस्मिन् मण्डले स्थितान् [8]अश्वान् [9]विमुचन्ति विमोचयन्ति स्तोतारः । मन्देहादिभिर्निरूढ्यानिरित्यर्थः । अथवा शीघ्रधावनाय स्तुत्या प्रेरयन्ति । यस्मिंश्च मण्डले [9]दश [9]शता शतानि सहस्रसंख्याका रश्मयः [9]तस्थुः तिष्ठन्ति तादृशं [9]देवानां [9]वपुषां वपुष्मतां तेजोवतामग्न्यादीनां [9]श्रेष्ठं प्रशस्यम् ॥ मत्वर्थलक्षणा अथवा व्यधिकरणषष्ठी ॥ देवानां वपुषां शरीराणां श्रेष्ठम । मण्डलं

१. ख-त-झ-ण-न-भ-र—'हे ऊर्म्ये' नास्ति; ग-घ-ज—हे ऊर्म्ये रात्रिदेवि । २. ख-च-ण-न—स्थितम्; ग-घ-ज—स्थितिः; झ-भ-र—स्थितः तम्; त-स्थितः; श—स्थितिस्तम । ३. ग—'इति...तरणस्य' नास्ति ।

हि सूर्यस्य वपुःस्थानीयम् । ᵛतत मण्डलम् ᵛअपश्यम् । अथवा वां युवयोर्मध्ये सूर्यस्य मण्डलमपश्यमिति व्याख्येयं 'मैत्रं वा अहः' (तै. ब्रा. १. ७. १०. १) इति श्रुतेर्मित्रस्यैव सूर्यस्यादित्याशयेन ॥

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥ २ ॥

तत् । सु । वाम् । मित्रावरुणा । महिऽत्वम् । ईर्मा । तस्थुषीः । अहऽभिः । दुदुह्रे ।
विश्वाः । पिन्वथः । स्वसरस्य । धेनाः । अनु । वाम् । एकः । पविः । आ । ववर्त ॥ २ ॥

हे ᵛमित्रावरुणा ᵛवां युवयोः ᵛतत् ᵛमहित्वं महत्त्वं ᵛसु सुष्ठु अतिप्रशस्तमित्यर्थः । किं तदित्युच्यते । ᵛईर्मा सततगन्ता सर्वस्य प्रेरको वादित्यः ᵛअहभिः अहोभिर्वर्षर्तुसंबन्धिभिः ᵛतस्थुषीः स्थावरभूता अपः ᵛदुदुह्रे दुग्धे । किंच ᵛस्वसरस्य स्वयं सर्तुरादित्यस्य ᵛविश्वाः सर्वाः ᵛधेनाः लोकानां प्रीणयित्रीर्द्युतीः ᵛपिन्वथः वर्धयथः । ᵛवां युवयोः ᵛएकः अप्रतियोगी ᵛपविः । पविरिति रथस्य नेमिः 'पवी रथनेमिर्भवति' (निरु ५. ५) इति यास्कवचनात् । तथाप्यत्र लक्षितलक्षणया रथे वर्तते केवलचक्रस्यावर्तनायोगात् । युवयोरेको रथः ᵛअनु ᵛआ ᵛववर्त अनुक्रमेण परिभ्रमति ॥

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥ ३ ॥

अधारयतम् । पृथिवीम् । उत । द्याम् । मित्रराजाना । वरुणा । महःऽभिः ।
वर्धयतम् । ओषधीः । पिन्वतम् । गाः ।
अव । वृष्टिम् । सृजतम् । जीरदानू इति जीरऽदानू ॥ ३ ॥

हे ᵛमित्रराजाना । मित्रभूताः स्तोतारो राजानः स्वामिन ईश्वरा भवन्ति ययोः[1] सकाशात्[2] तौ मित्रराजानौ । हे ᵛवरुणा ॥ प्रतियोग्यपेक्षया द्विवचनम् । अत्र पादादित्वादाद्यं पदं न निहन्यते । वरुणेत्येतस्य तु 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्याविद्यमानवत्त्वेनास्यैव पादादित्वादनिघातत्वं युक्तम् । नैवं भवति । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति वरुणेत्येतस्यामन्त्रितसमानाधिकरणत्वादस्य च सामान्यवचनत्वादविद्यमानवत्त्वाभावेन पादादित्वाभावादुत्तरस्य निघातत्वं युक्तम् ॥ हे देवौ ᵛमहोभिः तेजोभिः स्वसामर्थ्यैः ᵛपृथिवीमुत अपि च ᵛद्याम् ᵛअधारयतम् । हे देवौ युवाम् ᵛओषधीः ᵛवर्धयतं वृष्टिप्रेरणेन । ᵛगाः ᵛपिन्वतं गवाश्वादीन् वर्धयतम् । तदर्थं ᵛवृष्टिम् ᵛअव ᵛसृजतम् अवाङ्मुखं प्रेरयतं हे ᵛजीरदानू क्षिप्रदानौ ॥

१. त–यत । २. ख–च–ण–उपासकत्वात्; झ–भ–र–उपासकावशात्तौ; ञ–उपासका ययोः ।

आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्ववर्वाक् ।
घृतस्य निर्णिगनु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति ॥ ४ ॥

आ । वाम् । अश्वासः । सुऽयुजः । वहन्तु । यतऽरश्मयः । उप । यन्तु । अर्वाक् ।
घृतस्य । निःऽनिक् । अनु । वर्तते । वाम् । उप । सिन्धवः । प्रऽदिवि । क्षरन्ति ॥ ४ ॥

हे मित्रावरुणौ ᵛवां युवाम् ᵛअश्वासः अश्वाः ᵛसुयुजः सुष्ठु रथे युक्ताः सन्तः ᵛआ ᵛवहन्तु । ᵛयतरश्मयः सारथिनियतप्रग्रहास्ते ᵛअर्वाक् ᵛउप ᵛयन्तु । ᵛघृतस्य उदकस्य ᵛनिर्णिक् रूपं ᵛवाम् ᵛअनु ᵛवर्तते अनुगच्छति । किंच ᵛप्रदिवि । पुराणनामैतत् । पुराणाः ᵛसिन्धवः ᵛउप ᵛक्षरन्ति उपगच्छन्ति युवयोरनुग्रहात् ॥

अनु श्रुतामतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा ।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ॥ ५ ॥

अनु । श्रुताम् । अमतिम् । वर्धत् । उर्वीम् । बर्हिःऽइव । यजुषा । रक्षमाणा ।
नमस्वन्ता । धृतऽदक्षा । अधि । गर्ते । मित्र । आसाथे इति । वरुण । इळासु । अन्तरिति ॥५॥

ᵛश्रुतां विश्रुताम् ᵛअमतिम् । रूपनामैतत् । शरीरदीप्तिमित्यर्थः । ताम् ᵛअनु ᵛवर्धत अनुवर्धयन्तौ । ᵛबर्हिः यज्ञः । सः ᵛइव स यथा ᵛयजुषा मन्त्रेण रक्ष्यते तद्वत् ᵛउर्वी ᵛरक्षमाणा पालयन्तौ ᵛनमस्वन्ता अन्नवन्तौ हे ᵛघृतदक्षा आत्तबलौ हे ᵛमित्र हे ᵛवरुण हे मित्रावरुणौ युवामुक्तलक्षणौ सन्तौ ᵛइळासु यागभूमिषु ᵛअन्तः मध्ये ᵛगर्ते ᵛअधि रथे ᵛआसाथे उपविशथः । ' रथोऽपि गर्त उच्यते ' (निरु. ३. ५) इति यास्कः । ' आ रोहथो वरुण मित्र गर्तम् ' (ऋ. सं. ५. ६२. ८) इति ॥ ॥ ३० ॥

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः ।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥ ६ ॥

अक्रविऽहस्ता । सुऽकृते । परःऽपा । यम् । त्रासाथे इति । वरुण । इळासु । अन्तरिति ।
राजाना । क्षत्रम् । अहृणीयमाना । सहस्रऽस्थूणम् । बिभृथः । सह । द्वौ ॥ ६ ॥

ᵛअक्रविहस्ता अकृपणहस्तौ । दानशूरावित्यर्थः । कस्मै । ᵛसुकृते शोभनस्तुतिकर्त्रे ᵛपरस्पा परस्तात् पातारौ रक्षितारौ हे ᵛवरुणा मित्रावरुणौ युवां ᵛयं यजमानम् ᵛइळासु यागभूमिषु ᵛअन्तः मध्ये ᵛत्रासाथे रक्षथः तस्मै सुकृते अक्रविहस्ता परस्पा च भवथ इति संबन्धः । किंच युवां ᵛराजाना राजमानौ ᵛअहृणीयमाना अक्रुध्यन्तौ ᵛद्वौ परस्परं ᵛसह साहित्येन ᵛक्षत्रं धनं ᵛसहस्रस्थूणम् अने-

कावष्टम्भकस्तम्भोपेतं सौधादिरूपं गृहं च [v]बिभृथः धारयथः सुकृते यजमानाय । अथवा । क्षत्रं बलम-परिमिताभिः स्थूणाभिरुपेतं रथं चागमनार्थं[1] सह धारयथः ॥

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्यश्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥ ७ ॥

हिरण्यऽनिर्निक् । अयः । अस्य । स्थूणा । वि । भ्राजते । दिवि । अश्वाजनीऽइव ।
भद्रे । क्षेत्रे । निऽमिता । तिल्विले । वा । सनेम । मध्वः । अधिऽगर्त्यस्य ॥ ७ ॥

अनयो रथः [v]हिरण्यनिर्णिक् हिरण्यरूपः । निर्णिगिति रूपनाम । [v]अस्य रथस्य [v]स्थूणा कीलकादयः [v]अयः । हिरण्यनामैतत् । अयोविकारा इत्यर्थः । अयोमया वा । तादृशो रथः [v]दिवि अन्तरिक्षे [v]वि [v]भ्राजते । किमिव । [v]अश्वाजनीव । अश्वा व्यापनशीला मेघाः । तानजति गच्छतीत्यश्वाजनी विद्युत् । सेव[2] दिवि भ्राजते । किंच [v]भद्रे कल्याणे स्तुत्ये वा [v]क्षेत्रे देवयजने [v]तिल्विले [v]वा ॥ ' तिल स्नेहने ' । तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रं तिल्विलं देवयजनम् । घृतसोमादिना स्निग्धे भद्रे च क्षेत्रे [v]निमिता स्थूणा यूपयष्टिरवस्थितः । [v]मध्वः मधुपूर्णं गर्तस्य[3] गर्तं रथं[3] [v]सनेम संभजेम ॥ कर्मणि षष्ठ्यौ । अधीति पूरणः ॥ अथवा गर्तस्याधि रथस्योपरि मध्वो मधु सोमरसं सनेम स्थापयेमेत्यर्थः[4] ॥

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥ ८ ॥

हिरण्यऽरूपम् । उषसः । विऽउष्टौ । अयःऽस्थूणम् । उत्ऽइता । सूर्यस्य ।
आ । रोहथः । वरुण । मित्र । गर्तम् । अतः । चक्षाथे इति । अदितिम् । दितिम् । च ॥ ८ ॥

[v]उषसो [v]व्युष्टौ । प्रातःकाल इत्यर्थः । [v]सूर्यस्य [v]उदिता उदितावुदये । स एव कालः प्रकारान्तरेणोक्तः । तस्मिन् काले [v]हिरण्यरूपम् [v]अयःस्थूणम् अयोमयशङ्कुं [v]गर्तं[5] रथं हे [v]वरुण हे [v]मित्र युवां गर्तम् [v]आ [v]रोहथः यज्ञं प्रासुम्[6] । [v]अतः अस्माद्धेतोः [v]अदितिम् अखण्डनीयां भूमिं [v]दितिं खण्डितां प्रजादिकां [v]च [v]चक्षाथे पश्यथः ॥

दाक्षायणयज्ञे ' यद्वंहिष्ठम् ' इति नवर्चो द्वितीयस्यामावास्यायां मैत्रावरुणस्य हविषो याज्या । सूत्रितं च—' आ नो मित्रावरुणा यद्वंहिष्ठं नातिविधे सुदानू ' (आश्व. श्रौ. २. १४)

---

१. ख-च-ण-श—वागमनार्थम् । २. ख-च-ज्ञ-ण-त-न-भ-र—सा च; श—सा । ३. ख-च-ण—गर्त्यस्य रथम् ; ज्ञ-भ—गर्तस्य वा रथम् ; त—गर्तस्य गर्तं रथम् ; न—गर्तस्य वा रथस्य । ४. ख-च-ज्ञ-ण-त-भ-र-श— स्थापयामेत्यर्थः ; न—स्थापयमित्यर्थः । ५. न—अयोमयस्तम्भकम् । ६ ख-च-ज्ञ-ण-त-भ-र—प्राप्तः ; न— प्राप्तैः ; श— प्राप्नुतः ।

इति । मैत्रावरुणे पशौ हविष एषैव याज्या । सूत्रितं च—' यद्बंहिष्ठं नातिविधे सुदानू द्विरण्यगर्भः समवर्तताग्रे ' (आश्व. श्रौ. ३. ८) इति ॥

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम ॥ ९ ॥

यत् । बंहिष्ठम् । न । अतिऽविधे । सुदानू इति सुऽदानू ।
अच्छिद्रम् । शर्म । भुवनस्य । गोपा ।
तेन । नः । मित्रावरुणौ । अविष्टम् । सिसासन्तः । जिगीवांसः । स्याम ॥ ९ ॥

हे [v]सुदानू शोभनदानौ हे [v]भुवनस्य [v]गोपा युवां [v]बंहिष्ठं बहुतमं [v]यत् [v]अच्छिद्रम् अनवच्छिन्नं [v]शर्म सुखं गृहं वा [v]नातिविधे अतिवेद्धुमशक्यं शर्मेति शर्मविशेषणम् ॥ ' व्यध ताडने ' इत्यस्मादस्युपपदे कृत्यार्थे केन संप्रसारणं च ॥ तादृशं शर्म धारयथः[1] [v]तेन शर्मणा [v]नः अस्मान् [v]अविष्टं रक्षतम् । हे [v]मित्रावरुणौ [v]सिषासन्तः धनानि संभक्तुमिच्छन्तो वयं [v]जिगीवांसः शत्रूणां धनानि जेतुमिच्छन्तः [v]स्याम भवेम[2] ॥ ॥ ३१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाभिधेयेन[3] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके तृतीयोऽध्यायः समाप्तः ॥

१. ख-ज्ञ-न-भ-र—धारयतः । २. ख-च-ज्ञ-ण-न-भ—भवाम । ३ ज्ञ—सायणाचार्येण ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अष्टकस्य चतुर्थस्य तृतीयो व्याकृतः स्फुटम् ।
अध्यायः सायणार्येण चतुर्थो व्याकरिष्यते ॥

' ऋतस्य गोपौ ' इति सप्तर्चं सप्तमं सूक्तम् । अत्रेयमनुक्रमणिका—' ऋतस्य सप्तार्चनाना जागतम् ' इति । आत्रेयोऽर्चनाना नाम ऋषिः । जगती छन्दः । तुह्यादिपरिभाषया मित्रावरुणौ देवता । विनियोगो लैङ्गिकः ॥

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥ १ ॥

ऋतस्य । गोपौ । अधि । तिष्ठथः । रथम् । सत्यऽधर्माणा । परमे । विऽओमनि ।
यम् । अत्र । मित्रावरुणा । अवथः । युवम् । तस्मै । वृष्टिः । मधुऽमत् । पिन्वते । दिवः ॥१॥

हे [v]ऋतस्य उदकस्य[1] [v]गोपौ रक्षितारौ [v]सत्यधर्माणा सत्यधर्माणौ[2] युवां [v]रथम् [v]अधि [v]तिष्ठथः । आरोहथोऽस्मद्यज्ञमागमनार्थम् । कुत्र । [v]परमे [v]व्योमनि निरतिशये आकाशे । हे मित्रावरुणौ [v]युवं युवाम् [v]अत्र अस्मिन् यज्ञे [v]यं यजमानम् [v]अवथः रक्षथः [v]तस्मै यजमानाय [v]वृष्टिः पर्जन्यः [v]मधुमत् उदकं [v]दिवः द्युलोकात [v]पिन्वते सिञ्चति वर्धयति ॥

सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा ।
वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरन्ति तन्यवः ॥ २ ॥

सम्ऽराजौ । अस्य । भुवनस्य । राजथः । मित्रावरुणा । विदथे । स्वःऽदृशा ।
वृष्टिम् । वाम् । राधः । अमृतऽत्वम् । ईमहे । द्यावापृथिवी इति । वि । चरन्ति । तन्यवः ॥२॥

हे [v]मित्रावरुणा[3] मित्रावरुणौ [v]सम्राजौ सम्यक् राजमानौ युवाम् [v]अस्य [v]भुवनस्य [v]राजथः ईशाथे । [v]स्वर्दृशा स्वर्गस्य द्रष्टारौ युवां [v]विदथे अस्मद्यज्ञे सम्राजाविति संबन्धः । [v]वां युवां [v]वृष्टिं [v]राधः धनं वृष्ट्याख्यं धनम् [v]अमृतत्वं स्वर्गं च [v]ईमहे प्रार्थयामहे[4] । युवयोः [v]तन्यवः विस्तृता रश्मयः [v]द्यावापृथिवी [v]वि [v]चरन्ति विविधं[5] प्राप्नुवन्ति । अथवा वृष्टिं धनममृतत्वं चेमहे ॥

---

१. ख-ञ-भ-उदकस्य वा; त-यज्ञस्योदकस्य वा ; न-उदकस्य यज्ञस्य वा । २. ख-च-ञ-ण-त-न-भ-र-सत्यकर्माणौ । ३. च-ञ-न-भ-र-श-' मित्रावरुणा ' नास्ति । ४. ख-च-ञ-ण-त-न-भ-र-प्रार्थयामि । ५. ख-च-ञ-ण-न-भ-' विविधं ' नास्ति ।

सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ ३ ॥

सम्ऽराजौ । उग्रा । वृषभा । दिवः । पती इति ।
पृथिव्याः । मित्रावरुणा । विचर्षणी इति विऽचर्षणी ।
चित्रेभिः । अभ्रैः । उप । तिष्ठथः । रवम् । द्याम । वर्षयथः । असुरस्य । मायया ॥ ३ ॥

[v]सम्राजौ[1] सम्यक् राजमानौ [v]उग्रा उद्गूर्णबलौ [v]वृषभा वर्षितारौ [v]दिवः द्युलोकस्य [v]पती स्वामिनौ [v]पृथिव्याः च पती [v]विचर्षणी सर्वस्य द्रष्टारौ मित्रावरुणौ । एवं महानुभावौ [v]चित्रेभिः चायनीयैः [v]अभ्रैः मेघैः सह [v]रवं स्तोत्रम् [v]उप [v]तिष्ठथः । पश्चात [v]द्यां च [v]वर्षयथः [v]असुरस्य उदकनिरसितुः पर्जन्यस्य [v]मायया प्रज्ञया सामर्थ्येन ॥

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम् ।
तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमन्त ईरते ॥ ४ ॥

माया । वाम् । मित्रावरुणा । दिवि । श्रिता । सूर्यः । ज्योतिः । चरति । चित्रम् । आयुधम् ।
तम् । अभ्रेण । वृष्ट्या । गूहथः । दिवि । पर्जन्य । द्रप्साः । मधुऽमन्तः । ईरते ॥ ४ ॥

हे [v]मित्रावरुणा [v]वां युवयोः [v]माया [v]दिवि [v]श्रिता आश्रिता । कैषा युवयोर्मायोच्यते । [v]सूर्यः सर्वस्य प्रेरकः [v]ज्योतिः दीप्यमानः [v]चित्रं चायनीयम् [v]आयुधम् उक्तलक्षणायुधरूपः [v]चरति परिभ्रमत्यन्तरिक्षे । शत्रुमारकत्वादायुधमुच्यते । [v]तं सूर्यम् [v]अभ्रेण मेघेन [v]वृष्ट्या [v]दिवि [v]गूहथः गोपायथः । हे [v]पर्जन्य देव[2] मित्रावरुणाभ्यां वृष्ट्यर्थं प्रेरितेन त्वया [v]मधुमन्तः [v]द्रप्साः [v]ईरते ईर्यन्ते । त्वत्सृष्टा वा गच्छन्ति ॥

रथं युञ्जते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु ।
रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम् ॥५॥

रथम् । युञ्जते । मरुतः । शुभे । सुऽखम् । शूरः । न । मित्रावरुणा । गोऽइष्टिषु ।
रजांसि । चित्रा । वि । चरन्ति । तन्यवः । दिवः । सम्ऽराजा । पयसा । नः । उक्षतम् ॥५॥

हे मित्रावरुणौ युवयोरनुग्रहात् [v]मरुतः [v]शुभे उदकार्थं [v]सुखं शोभनाक्षद्वारं [v]रथं [v]युञ्जते अश्वैर्योजयन्ति । [v]शूरो [v]न शूर इव । स यथा युद्धार्थं रथं युनक्ति तद्वत् । [v]गविष्टिषु गवामुदकानाम्

१. ख-च-झ-ण-न-भ-र-श-सम्राजा । २. ख-च-झ-ण-न-भ-र-देव त्वया ।

एषणेषु निमित्तेषु ᵛचित्रा चायनीयानि ᵛरजांसि लोकान् ᵛतन्यवः ततास्ते मरुतः ᵛवि ᵛचरन्ति विविधं चरन्ति । तस्मात् तैः सहितौ हे ᵛसम्राजा युवां ᵛदिवः द्युलोकात ᵛपयसा उदकेन ᵛनः अस्मान् ᵛउक्षतं सिञ्चतम् ॥

वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां ववदति त्विषीमतीम् ।
अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम् ॥ ६ ॥

वाचम् । सु । मित्रावरुणौ । इरावतीम् । पर्जन्यः । चित्राम् । ववदति । त्विषिमतीम् ।
अभ्रा । वसत । मरुतः । सु । मायया । द्याम् । वर्षयतम् । अरुणाम् । अरेपसम् ॥ ६ ॥

हे ᵛमित्रावरुणौ युवयोरनुग्रहात् ᵛपर्जन्यः मेघः ᵛसु सुष्ठु ᵛइरावतीम् अन्नवतीं अन्नसाधिकां ᵛचित्रां चायनीयां ᵛत्विषीमतीं दीप्तिमतीं ᵛवाचं गर्जनशब्दं ᵛवदति । शब्दयति वृष्ट्यर्थम् । ᵛमरुतः च ᵛअभ्रा अभ्राणि मेघान ᵛसु सुष्ठु ᵛवसत आच्छादयन्ति ᵛमायया स्वप्रज्ञया । युवां च पर्जन्येन मरुद्भिश्च सह ᵛअरुणाम् अरुणवर्णाम् ᵛअरेपसम् अपापां वृष्ट्यविघातिनीं ᵛद्यां ᵛवर्षयतम् ॥

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ॥ ७ ॥

धर्मणा । मित्रावरुणा । विपःऽचिता । व्रता । रक्षेथे इति । असुरस्य । मायया ।
ऋतेन । विश्वम् । भुवनम् । वि । राजथः ।
सूर्यम् । आ । धत्थः । दिवि । चित्र्यम् । रथम् ॥ ७ ॥

हे ᵛमित्रावरुणा[1] ᵛविपश्चिता[2] प्राज्ञौ युवां ᵛधर्मणा जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा ᵛव्रता यज्ञादिकर्माणि ᵛरक्षेथे पालयथः[3] । ᵛअसुरस्य मेघानां निरसितुः पर्जन्यस्य ᵛमायया प्रज्ञया च ᵛऋतेन उदकेन यज्ञेन वा निमित्तेन ᵛविश्वं ᵛभुवनं सर्वं भूतजातं ᵛवि ᵛराजथः विदीपयथः[4] इत्यर्थः । ᵛसूर्यमा सूर्यं च ᵛचित्र्यं पूज्यं ᵛरथं रंहणस्वभावं ᵛदिवि द्युलोके ᵛधत्थः धारयथो जगदुपकारार्थम् ॥ ॥ १ ॥

'वरुणं वः' इति सप्तचमष्टमं सूक्तमर्चनानम आर्षं मैत्रावरुणम् । पङ्क्त्यन्तपरिभाषयानुष्टुभम् । अन्त्या पङ्क्तिः । 'वरुणं पङ्क्त्यन्तं तु' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

---

१. ख-च-ञ-ण-न-भ-मित्रावरुणौ । २. ख-च-ञ-ण-त-न-भ-र-युवां धर्मणा जगद्धारकेण विपश्चिता स्तुत्येनेत्यर्थः । व्रता व्रतेन कर्मणा । अथवा विपश्चिता । स्तोतृनामैतत् । यजमानेन वृष्ट्या जगद्रक्षणस्य यजमानोऽपि कारणम् । तत्कृतयाहुत्या (तत्कृतया स्तुत्या-ख-च-ण) वृष्टयुत्पत्तेः व्रता व्रतेन युवयोः कर्मणा । ३. ख-च-ञ-ण-न-भ-र-रक्षेथे ।

वरुणं वो रिशादसमृचा मित्रं हवामहे ।
परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरम् ॥ १ ॥

वरुणम् । वः । रिशादसम् । ऋचा । मित्रम् । हवामहे ।
परि । व्रजाऽइव । बाह्वोः । जगन्वांसा । स्वःऽनरम् ॥ १ ॥

[v]वः युवयोर्मध्ये ॥ व्यत्ययेन बहुवचनम् ॥ [१]रिशादसम् । रिशन्ति हिंसन्तीति रिशाः शत्रवः । तेषां प्रेरकं [v]स्वर्णरं स्वर्गस्य नेतारम् । एतदव्यवहितमप्युभयत्र संबध्यते । एवंविधं [v]वरुणम् उक्तलक्षणं [v]मित्रं च [v]ऋचा मन्त्रेण [v]हवामहे आह्वयामः । अथ अवयुत्योच्यते । [१]व्रजेव गोयूथानीव [v]बाह्वोः बलेन [v]परि [v]जगन्वांसा परिगच्छन्तौ ॥

ता बाहवा सुचेतुना प्र यन्तमस्मा अर्चते ।
शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे ॥ २ ॥

ता । बाहवा । सुऽचेतुना । प्र । यन्तम् । अस्मै । अर्चते ।
शेवम् । हि । जार्यम् । वाम् । विश्वासु । क्षासु । जोगुवे ॥ २ ॥

[v]ता तौ युवां [v]बाहवा बाहुना [१]सुचेतुना सुष्ठु प्रज्ञात्रा । प्रयासमभ्यस्यं जानता इत्यर्थः । यद्यपि आत्मैव ज्ञाता न हस्तः तथापि तद्धर्ममात्रारोप्य स्तूयते । यद्वा एतत् तौ इत्यस्य विशेषणम् । सुज्ञानावित्यर्थः । शोभनहस्तेन [१]अस्मै [v]अर्चते स्तुवते मह्यं [v]प्र [१]यन्तम् अभिमतं सुखं प्रगमयन्तम्[१] ॥ अन्तर्भावितण्यर्थो द्रष्टव्यः । यमिदानीकर्मा वा द्रष्टव्यः ॥ प्रयच्छन्तमित्यर्थः । [v]जार्यं स्तुत्यं [v]शेवं सुखं [v]वां युवयोः संबन्धि युवाभ्यां कृतं वा [१]विश्वासु सर्वासु [v]क्षासु भूमिषु [v]जोगुवे गच्छति व्याप्नोति । ' अवते गवते ' (नि. २ १४ २८) इति गतिकर्मसु पाठात् अयमपि गतिकर्मा । अथवा जोगुवे सर्वत्र शब्दयामीत्यर्थः ॥

यन्नूनमश्यां गतिं मित्रस्य यायां पथा ।
अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे ॥ ३ ॥

यत् । नूनम् । अश्याम् । गतिम् । मित्रस्य । यायाम् । पथा ।
अस्य । प्रियस्य । शर्मणि । अहिंसानस्य । सश्चिरे ॥ ३ ॥

[v]यत् यदा [v]नूनम् इदानीं [v]गतिं गमनम् [v]अश्यां प्राप्नुयाम् ॥ यद्योगादनिघातः ॥ तदा [v]मित्रस्य मित्रभूतस्य [v]पथा मार्गेण मित्रप्रापकेण मार्गेण [v]यायां गच्छेयम् । ' मित्रो नयतु विद्वान् '

१. ख-च-झ-ण-न-भ-प्रगमयति तम् ; र-गमयति तम् ।

(ऋ. सं. १. ९०. १) इत्यादिषु मित्रस्येष्टदेशगमयितृत्वं प्रसिद्धम् । न केवलमहमेक एव गन्ता किंतु सर्वेऽपि तथागमन्नित्याह । [v]अस्य [v]प्रियस्य । मित्रस्येत्यर्थः । [१]अहिंसानस्य अहिंसनः । यतोऽयमहन्ता अतः प्रिय इत्यर्थः । तस्य [v]शर्मणि सुखे गृहे स्थाने वा [v]सश्चिरे संगताः ॥

युवाभ्यां मित्रावरुणोपमं धेयामृचा ।
यद्ध क्षये मघोनां स्तोतॄणां च स्पृधमहे ॥ ४ ॥

युवाभ्याम् । मित्रावरुणा । उपऽमम् । धेयाम् । ऋचा ।
यत् । ह । क्षये । मघोनाम् । स्तोतॄणाम् । च । स्पृधसे ॥ ४ ॥

हे [v]मित्रावरुणा [v]युवाभ्यां दातव्यम् [v]उपमम् उप समीपे मीयमानं धनम् [१]ऋचा स्तुत्या साधनेन [v]धेयां धारयामि । [v]यद्ध यत खलु युवाभ्यां सकाशादासं धनं [१]मघोनां धनवतामदातॄणां [v]स्तोतॄणां [v]च [v]क्षये गृहे [१]स्पृधसे स्पर्धनाय भवति । धनिकानां स्तोतॄणां च धनाधिक्यविषये स्पर्धा भवतीत्यर्थः । अपरिमितं धनं भवतीति भावः ॥

आ नो मित्र सुदीतिभिर्वरुणश्च सुधस्थ आ ।
स्वे क्षये मघोनां सखीनां च वृधसे ॥ ५ ॥

आ । नः । मित्र । सुदीतिऽभिः । वरुणः । च । सुधऽस्थे । आ ।
स्वे । क्षये । मघोनाम् । सखीनाम् । च । वृधसे ॥ ५ ॥

हे [v]मित्र त्वं च [१]वरुणश्च [१]सुदीतिभिः सुदीप्तियुक्तौ युवां [v]नः अस्माकं [१]सधस्थे सहस्थाने यज्ञे [v]आ गच्छतम् । द्वितीय आकारोऽनर्थक आदरार्थो वा । किमर्थमित्युच्यते । [v]मघोनां धनवतां हविष्मतां [v]सखीनां [v]च युवयोः सख्युरस्माकं [v]क्षये गृहे [v]स्वे स्वकीये [v]वृधसे वर्धनाय ।

युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः ।
उरु णो वाजसातये कृतं राये स्वस्तये ॥ ६ ॥

युवम् । नः । येषु । वरुणा । क्षत्रम् । बृहत् । च । बिभृथः ।
उरु । नः । वाजऽसातये । कृतम् । राये । स्वस्तये ॥ ६ ॥

हे [v]वरुणा मित्रावरुणौ [१]युवं युवां [v]नः अस्माकं [v]क्षत्रं बलं [v]बृहत बह्व परिवृढमन्नं [v]च [v]येषु स्तोत्रेषु निमित्तेषु [v]बिभृथः धारयथः युवाभ्यां धृतम् अन्नं[२] च [v]नः अस्मभ्यं [v]वाजसातये अन्नस्य लाभाय यज्ञाय वा [v]राये धनाय [v]स्वस्तये क्षेमाय च [v]उरु विस्तीर्णं [v]कृतं कुरुतम ॥

१. श–अस्मभ्यम । २. ख-च-ञ-ण-न-भ–धनमन्नम् ।

उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि ।
सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम् ॥ ७ ॥

उच्छन्त्याम् । मे । यजता । देवऽक्षत्रे । रुशत्ऽगवि ।
सुतम् । सोमम् । न । हस्तिऽभिः । आ । पट्ऽभिः । धावतम् । नरा ।
बिभ्रतौ । अर्चनानसम् ॥ ७ ॥

[v]उच्छन्त्याम् उषसि । मे सोममिति संबन्धः । [v]यजता यष्टव्यौ [v]रुशद्गवि रोचमानरश्मौ प्रातःसवने [v]देवक्षत्रे देवानां क्षत्रं बलं यस्मिन् यज्ञे[1] तद्देवक्षत्रम् । तस्मिन् [v]मे मदीयं [v]सुतम् अभिषुतं [v]सोमं [v]न । नेति संप्रत्यर्थे । इदानीं [v]हस्तिभिः हस्तवद्भिः ॥ हन्तेर्गतिकर्मणो हस्तशब्दः ॥ गमनसाधनपादवद्भिरित्यर्थः । [v]पड्भिः[2] पादवद्भिश्च पादचतुष्टयोपेतैरश्वैः [v]आ[3] [v]धावतम् आगच्छतं [v]नरा हे नेतारौ मित्रावरुणौ ॥ [v]अर्चनानसं[4] [v]बिभ्रतौ अर्चनानसमृषिं धारयन्तौ युवाम्[4] ॥ ॥ २ ॥

' यश्चिकेत ' इति षड्र्चं नवमं सूक्तं गतहव्यस्यात्रेयस्यार्षं मैत्रावरुणम् । ' यश्चिकेत षड्गातहव्यः ' इत्यनुक्रमणिका । ' षड्क्त्यन्तं तु ' इत्युक्तत्वात षड्क्त्यन्तपरिभाषयानुष्टुभम् । अन्त्या पङ्क्तिः । विनियोगो लैङ्गिकः ॥

यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः ।
वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ॥ १ ॥

यः । चिकेत । सः । सुऽक्रतुः । देवऽत्रा । सः । ब्रवीतु । नः ।
वरुणः । यस्य । दर्शतः । मित्रः । वा । वनते । गिरः ॥ १ ॥

[v]यः स्तोता [v]चिकेत जानाति स्तुतिं युवयोः [v]स [v]सुक्रतुः स एव शोभनकर्मा [v]देवत्रा देवेषु स्तोतृमध्ये । यद्वा[5] देवेषु मध्ये[5] । युवयोरेव स्तुतिं यश्चिकेत स सुक्रतुरिति । [v]सः सुकर्मा [v]नः अस्माकं [v]ब्रवीतु स्तुतिं[6] परम्[6] उपदिशतु । यश्च [v]दर्शतः दर्शनीयः [v]वरुणः दर्शनीयः [v]मित्रो [v]वा मित्रश्च । वाशब्दश्चार्थे । [v]गिरः अस्मदीयाः स्तुतीः [v]वनते संभजते ॥

ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा ।
ता सत्पती ऋताबृधा ऋतावाना जनेजने ॥ २ ॥

ता । हि । श्रेष्ठऽवर्चसा । राजाना । दीर्घश्रुत्ऽतमा ।
ता । सत्पती इति सत्ऽपती । ऋतऽबृधा । ऋतऽवाना । जनेऽजने ॥ २ ॥

१. ख-च-ज्ञ-ण-त-न-भ-र- गृहे । २. ख-च-ज्ञ-ण-त-न-भ-र—पाड्भिरा । ३. ख-च-ज्ञ-ण-त-न-भ-र—धावतं गच्छतम् । ४. ख-च-ज्ञ-ण-न-भ-र- ' अर्चनानसं...युवां ' नास्ति । ५. ख-ग-घ-च-ज-ण-त-न-भ-श- ' यद्वा...मध्ये ' नास्ति । ६. ख-च-ज्ञ-ण-न-भ-र—स्तुतिपरम् ।

[v]ता [v]हि तौ खलु मित्रावरुणौ [v]अष्टवर्चसा प्रशस्ततेजस्कौ [v]राजाना ईश्वरौ [v]दीर्घश्रुत्तमा दूरदेशादाह्वानश्रोतृतमौ[८] । [v]ता तौ [v]सप्तती सतां यजमानानां स्वामिनौ [v]ऋतावृधा यज्ञस्योदकस्य वा वर्धयितारौ [v]जनेजने सर्वेषु स्तोतृषु निमित्तेषु [v]ऋतावाना गमनवन्तौ ॥

ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा ।
स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ॥ ३ ॥

ता । वाम् । इयानः । अवसे । पूर्वौ । उप । ब्रुवे । सचा ।
सुऽअश्वासः । सु । चेतुना । वाजान् । अभि । प्र । दावने ॥ ३ ॥

[v]ता तौ [v]पूर्वौ पुरातनौ [१]वां युवाम् [v]इयानः गच्छन् [v]अवसे रक्षणाय [v]सचा सह [v]उप [v]ब्रुवे उपेत्य स्तौमि । [v]स्वश्वासः स्वश्वा वयमात्रेयाः । [v]सुचेतुना शोभनप्रज्ञानौ युवां [v]वाजानभि अन्नान्यभिलक्ष्य [v]प्र प्रकर्षेण [v]दावने दानाय स्तुम इति शेषः । यद्वा । स्वश्वासः स्वश्वौ ॥ द्वितीया-द्विवचनस्य जसादेशः ॥ उप ब्रुव इति संबन्धः ॥

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते ।
मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥ ४ ॥

मित्रः । अंहोः । चित् । आत् । उरु । क्षयाय । गातुम् । वनते ।
मित्रस्य । हि । प्रऽतूर्वतः । सुऽमतिः । अस्ति । विधतः ॥ ४ ॥

[v]मित्रः देवः [v]अंहोश्चित् अंहस्वतोऽपि स्तोतुः [१]आत् अनन्तरमेव [v]उरु उरवे [v]क्षयाय गृहाय निवासाय वा [१]गातुम् उपायं [v]वनते प्रयच्छति । [v]मित्रस्य [v]हि मित्रस्य खलु देवस्य [v]सुमतिः शोभनबुद्धिः [v]प्रतूर्वतः प्रकर्षेण हिंसतोऽपि [v]विधतः परिचरतः शुश्रूषकस्य [१]अस्ति हि भवति खलु ॥

वयं मित्रस्यावसि स्याम सप्रथस्तमे ।
अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥ ५ ॥

वयम् । मित्रस्य । अवसि । स्याम । सप्रथःऽतमे ।
अनेहसः । त्वाऽऊतयः । सत्रा । वरुणऽशेषसः ॥ ५ ॥

[v]वयं यजमानाः [v]मित्रस्य दुःखनिवारकस्य देवस्य [v]सप्रथस्तमे सर्वतः पृथुतमे [v]अवसि रक्षणे वयं [v]स्याम भवेम । किंच [v]अनेहसः अपापाः [v]त्वोतयः त्वया रक्षिताः [v]वरुणशेषसः । शेष इत्य-पत्यनाम । वारकाः पुत्रा येषां ते । तादृशाः [v]सत्रा वयं सर्वे सहैव भवेम ॥

८. ख-च-झ-ण-त-भ-र–दूरदेशाह्वान°; न–दूरदेशायाह्वान° ।

युवं मित्रेमं जनं यतथः सं च नयथः ।
मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम् ॥ ६ ॥

युवम् । मित्रा । इमम् । जनम् । यतथः । सम् । च । नयथः ।
मा । मघोनः । परि । ख्यतम् । मो इति । अस्माकम् । ऋषीणाम् ।
गोऽपीथे । नः । उरुष्यतम् ॥ ६ ॥

हे [v]मित्रा मित्रावरुणौ [v]युवं युवाम् [v]इमं [v]जनं स्तोतारं मां प्रति [v]यतथः गच्छथः । आगत्य च [v]सं [v]च [v]नयथः संनयथश्च । कामान् प्रापयथः । यद्वा । यतथ इत्यन्तर्णीतण्यर्थोऽयम् । अहनि यतथः व्यापारेषु गमयथः । रात्रौ च सं नयथः । निर्व्यापारं कारयथः । [v]मघोनः हविर्लक्षणान्नवतोऽस्मान् [v]मा [v]परि [v]ख्यतं मा परित्यजतम् । [v]मो मैव [v]ऋषीणाम् [v]अस्माकं पुत्रानपि परि ख्यतम् । किंतु [v]गोपीथे । गौः सोमरसः । तस्य पानं यस्मिन् स गोपीथो यज्ञः । तस्मिन् [v]नः [v]उरुष्यतं रक्षतम् ॥ ॥ ३ ॥

' आ चिकितान ' इति षड्र्चं दशमं सूक्तं रातहव्यस्यार्षम्[1] आनुष्टुभं मैत्रावरुणम् । अत्रानुक्रमणिका—' आ चिकितानानुष्टुभं तु ' इति । आद्यस्तृचो दशरात्रे चतुर्थेऽहनि प्रउगशस्त्रे मैत्रावरुणस्य । सूत्रितं च—' आ चिकितान सुक्रतू स्यमु वो अप्रहणम् ' (आश्व. श्रौ. ७. ११) इति ॥

आ चिकितान सुक्रतू देवौ मर्त रिशादसा ।
वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥ १ ॥

आ । चिकितान । सुक्रतू इति सुऽक्रतू । देवौ । मर्त । रिशादसा ।
वरुणाय । ऋतऽपेशसे । दधीत । प्रयसे । महे ॥ १ ॥

हे [v]चिकितान जानन् स्तुतिं[2] हे[3] [v]मर्त मनुष्य[3] रातहव्य त्वमिति तस्यैव संबोधनम् । [v]सुक्रतू शोभनकर्माणौ [v]रिशादसा हिंसकानां हिंसकौ [v]देवौ [v]आ आकारयेति शेषः । आहूय च [v]ऋतपेशसे । पेश इति रूपनाम । ऋतमुदकम् । उदकमेव[4] रूपं[4] यस्य तादृशाय [v]वरुणाय[5] [v]प्रयसे ॥ मत्वर्थो लुप्यते ॥ हविर्लक्षणान्नवते [v]महे महते पूज्याय [v]दधीत दद्याः । हविरिति शेषः । द्वितीयार्थे वा चतुर्थी । महद्धविर्दधीत । महतोऽन्नस्य लाभायेति वा योज्यम् ॥

---

१ ख-च-ञ-ण-त-भ-र-दयावाश्वस्यार्षम् । २ ञ-त-न-र-स्तुतिज्ञ । ३ ञ-न-र-' मनुष्य ' नास्ति । ४ न-मेघरूपम् । ५. ख-च-ञ-ण-त-न-भ-र-श- ' वरुणाय ' नास्ति ।

ता हि क्षत्रमविंहुतं सम्यगंसुर्यंमाशाते ।
अधा व्रतेव मानुषं स्वर्णं धायि दर्शतम् ॥ २ ॥

ता । हि । क्षत्रम् । अविंऽहुतम् । सम्यक् । असुर्यम् । आशाते इति ।
अधा । व्रताऽइव । मानुषम् । स्वः । न । धायि । दर्शतम् ॥ २ ॥

[v]ता [v]हि । हीति हेतौ । यस्मात् ता तौ [1]क्षत्रं बलम् [v]अविहुतम् अहिंस्यम् [v]असुर्यम् असुरविघाति[7] महद्बलं [v]सम्यक् [v]आशाते व्याप्नुतः [1]अधा अतो हेतोः [v]मानुषं मनुष्येषु प्रवृत्तं [v]व्रतेव कर्मेव तद्यथा मनुष्येषु नियतं [v]स्वर्ण सूर्य इव स यथा दिवि दृश्यते तद्वत [v]दर्शतं दर्शनीयं बलं [1]धायि यज्ञे[2] निहितम् ॥

ता वामेषे रथानामुर्वीं गव्यूतिमेषाम् ।
रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥ ३ ॥

ता । वाम् । एषे । रथानाम् । उर्वीम् । गव्यूतिम् । एषाम् ।
रातऽहव्यस्य । सुऽस्तुतिम् । दधृक् । स्तोमैः । मनामहे ॥ ३ ॥

हे मित्रावरुणौ [v]ता तौ प्रसिद्धौ [v]वां युवां [v]रथानाम् अस्मदीयानाम् [1]एषां पुरतो वर्तमानानाम् [v]उर्वीं प्रभूतां [v]गव्यूतिम् अनिविस्तृतं मार्गम् [1]एषे गन्तुम् । मार्गरक्षणायेत्यर्थः ॥ तुमर्थेऽसेन्प्रत्ययः ॥ तदर्थं वां [v]मनामहे स्तुमः [v]रातहव्यस्य ऋषेः रातहव्यसंबन्धिभिः[3] [v]सुष्टुतिं सुष्टुतिभिः शोभनस्तुति-साधनैः [v]स्तोमैः [v]दधृक् धर्षकौ[4] युवाम् ॥

अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता ।
नि केतुना जनानां चिकेथे पूतदक्षसा ॥ ४ ॥

अधा । हि । काव्या । युवम् । दक्षस्य । पूःऽभिः । अद्भुता ।
नि । केतुना । जनानाम् । चिकेथे इति । पूतऽदक्षसा ॥ ४ ॥

[v]अध अपि च । [v]हि[5] प्रसिद्धौ । [v]काव्या स्तुत्यौ [v]युवं युवां [v]दक्षस्य प्रवृद्धस्य मम [v]पूर्भिः पूरकैः स्तवैः हे [v]अद्भुता महान्तावाश्चर्यभूतौ सन्तौ [v]केतुना प्रज्ञानेनानुकूलेन मनसा [v]जनानां यजमानानामित्यर्थः । स्तोत्रं [v]नि [v]चिकेथे नितरां[6] जानीथः । हे [v]पूतदक्षसा शुद्धबलौ युवाम् ॥

१. ख-च-झ-ण-त-न-भ-र-असुरविघाति मत् (महत्-न) हन्तुमित्यर्थः; ग-घ-ज- 'असुरविघाति' नास्ति ; श-अनुधातिमहन् हे । २. ख-च-झ-ण-न-भ-र- 'यज्ञे' नास्ति । ३. ख-च-झ-ण-त-न-भ-र-श- रातहव्यसंबन्धिनः । ४. ख-च-ण-धारकौ ; झ-न-भ- धर्मकौ ; श-वर्षकौ । ५. ख-च-झ-ण-न-भ-र- 'हि प्रसिद्धौ' नास्ति । ६. ख-च-झ-ण-त-न-भ-र- 'नितरां' नास्ति ।

तदृतं पृथिवि बृहच्छ्रवएष ऋषीणाम् ।
ज्रयसानावरं पृथ्वतिं क्षरन्ति यामभिः ॥ ५ ॥

तत् । ऋतम् । पृथिवि । बृहत् । श्रवःऽएषे । ऋषीणाम् ।
ज्रयसानौ । अरम् । पृथु । अति । क्षरन्ति । यामऽभिः ॥ ५ ॥

हे [v]पृथिवि देवि त्वयि [v]तत् सर्वैरर्थ्यमानत्वेन प्रसिद्धं [1]बृहत् प्रभूतम् [v]ऋतम् उदकम् [v]ऋषीणां स्तोतृणामस्माकं [1]श्रवणेषे अन्नस्येषणे सति [v]ज्रयसानौ गच्छन्तौ ॥ ' छन्दस्यसानच् शुजृभ्याम् ' (उ. सू. २. २४३) इत्यसानच् ज्रयतेरपि[1] भवति[1] । ' चितः ' इत्यन्तोदात्तः ॥ [v]अरम् अलमत्यर्थं [1]पृथु यथा भवति तथा [1]यामभिः गमनैः [1]अति [1]क्षरन्ति अत्यर्थं वर्षतः ॥ व्यत्ययेन बहुवचनम् ॥

आ यद्वामीयचक्षसा मित्रा वयं च सूरयः ।
व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥ ६ ॥

आ । यत् । वाम् । ईयऽचक्षसा । मित्रा । वयम् । च । सूरयः ।
व्यचिष्ठे । बहुऽपाय्ये । यतेमहि । स्वऽराज्ये ॥ ६ ॥

हे [v]ईयचक्षसा व्याप्तदर्शनौ हे [1]मित्रा मित्रावरुणौ [v]वां युवां [1]यत्[2] ये[2] [v]वयं [v]च [v]सूरयः स्तोतारः [v]आ आह्वयामः । [v]व्यचिष्ठे अत्यन्तविस्तृते [v]बहुपाय्ये बहुभिर्गन्तव्ये बहुभी रक्षितव्ये वा [1]स्वराज्ये स्वराट्त्वाय एवंविधराज्यार्थं [v]यतेमहि गच्छेम ॥ ॥ ४ ॥

' बलित्था देव ' इति पञ्चर्चमेकादशं सूक्तम् । अत्रेयमनुक्रमणिका—' बलित्था पञ्च यजतः ' इति । यजतो नामार्षेय ऋषिः । ' आनुष्टुभं तु ' इत्युक्तत्वादिदमप्यानुष्टुभम् । मित्रावरुणौ देवता । विनियोगो लैङ्गिकः ॥

बळित्था देव निष्कृतमादित्या यजतं बृहत् ।
वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥ १ ॥

बट । इत्था । देवा । निःऽकृतम् । आदित्या । यजतम् । बृहत् ।
वरुण । मित्र । अर्यमन् । वर्षिष्ठम् । क्षत्रम् । आशाथे इति ॥ १ ॥

---

१. ख-च-ज्ञ-ण-न-भ-र- ' ज्रयतेरपि भवति ' नास्ति । २. ख-च-ज्ञ-ण-त-न-भ-र- ' यत् ये ' नास्ति ; ग-घ-ज-तत ये ; श- पतये ।

हे [1]देवा[2] द्योतमानौ हे [1]आदित्या अदितेः पुत्रौ हे [1]वरुण हे [1]अर्यमन अरीणां नियमितः [1]मित्र देव युवां [1]बट् सत्यं [1]निष्कृतम्[3] अवाच्यम् [1]इत्था इत्थम् इदानीं वर्तमानप्रकारेण [1]यजतं यष्टव्यं [1]बृहत् अतिप्रवृद्धं [1]वांपेष्टं प्रवृद्धतमं [1]क्षत्रं बलम् [1]आशाथे अश्नुवाथे[4] । यद्वा अर्यमा पृथगेव निर्देष्टव्यः । द्विवचनं बहुवचनीकर्तव्यम्[5] ॥

आ यद्योनिं हिरण्ययं वरुण मित्र सदथः ।
धर्तारा चर्षणीनां यन्तं सुम्नं रिशादसा ॥ २ ॥

आ । यत् । योनिम् । हिरण्ययम् । वरुण । मित्र । सदथः ।
धर्तारा । चर्षणीनाम् । यन्तम् । सुम्नम । रिशादसा ॥ २ ॥

[1]यत यस्मात् [1]हिरण्ययं हितरमणीयं [1]योनिं यज्ञभूमिं हे [1]वरुण हे [1]मित्र [1]आ [1]सदथः आगच्छथः तस्मात् [1]चर्षणीनां मनुष्याणां [1]धर्तारा धारकौ च हे [1]रिशादसा हिंसकानां क्षपयितारौ युवाम् अस्मभ्यं [1]सुम्नं सुखं [1]यन्तं कुरुतमित्यर्थः ॥

विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा ।
व्रता पदेव मश्चिरे पान्ति मर्त्यं रिषः ॥ ३ ॥

विश्वे । हि । विश्वऽवेदसः । वरुणः । मित्रः । अर्यमा ।
व्रता । पदाऽइव । मश्चिरे । पान्ति । मर्त्यम् । रिषः ॥ ३ ॥

[1]विश्वे [1]हि सर्वेऽपि । हीति चार्थे । [1]विश्ववेदसः सर्ववित्तः सर्वधना वा [1]वरुणो [1]मित्रो [1]अर्यमा चैते त्रयः सर्वे [1]व्रता अस्मदीयानि कर्माणि [1]पदेव पदानीव[5] स्थानानीव [1]मश्चिरे मगता भवन्ति । आगत्य च मां [1]मर्त्यं [1]रिषः हिंसकात [1]पान्ति रक्षन्ति ॥

ते हि सत्या ऋतस्पृश ऋतावानो जनेजने ।
सुनीथासः सुदानवोऽहोश्चिदुरुचक्रयः ॥ ४ ॥

ते । हि । सत्याः । ऋतऽस्पृशः । ऋतऽवानः । जनेऽजने ।
सुऽनीथासः । सुऽदानवः । अहोः । चित । उरुऽचक्रयः ॥ ४ ॥

---

१. ख-च-ण-देवे ; झ-न-भ-र-श- देवौ । २. ख-च-झ-ण-त-न-भ र-श- 'निष्कृतं' नास्ति । ३. न-र-आशुवाथे । ४. ख-च-ण-न-भ-श- बहुवचनं कर्तव्यम् । ५. ख-च-झ-ण-न-भ-र- 'पदानीव' नास्ति ।

[v]ते [v]हि खलु[1] [v]सत्याः सत्यभूताः सत्यफला वा [1]ऋतस्पृशः उदकस्पर्शस्य[2] कर्तारः [1]ऋतावानः यज्ञवन्तः [v]जनेजने सर्वेषु यजमानेषु [v]सुनीथासः सुनयनाः [v]सुदानवः सुदानाः। हीति प्रसिद्धवाची सर्वत्र संबन्धनीयः। एवं महानुभावा वरुणादयः [v]अंहोश्चित। चिदप्यर्थे। पापिनोऽपि स्वस्तोतुः [v]उरुचक्रयः प्रभूतधनादिकर्तारः॥

को नु वां मित्रास्तुतो वरुणो वा तनूनाम्।
तत्सु वामेषते मतिरत्रिभ्य एषते मतिः॥ ५॥

कः। नु। वाम्। मित्र। अस्तुतः। वरुणः। वा। तनूनाम।
तत। सु। वाम्। आ। ईषते। मतिः। अत्रिऽभ्य। आ। ईषते। मतिः॥ ५॥

हे [v]मित्र [1]वां युवयोर्मध्ये त्वं च [1]वरुणो [1]वा [v]को [1]नु [1]अस्तुतः। सर्वैरस्तूयमानः कोऽस्ति। उभावपि स्तुत्याविषयौ। [1]तनूनाम् इति तृतीयार्थे षष्ठी। तनूभिः स्तुतिभिः[3] अस्तुत इति संबन्धः॥ अत्र मित्रशब्देन मित्रस्यैकस्यैव संबोधनं 'वरुणेळास्वन्तः' (ऋ. सं. ५. ६२. ६) इत्यत्रेवात्र द्विवचनसूचकस्याकारस्य अनाम्नानात[4]। लोकेषु बहुषु संनिहितेषु एकमेव संबोध्य युवयोरिदं युष्माकमिदमिति प्रयुञ्जते॥ [v]तत तस्मात यस्मात्सर्वे स्तुवन्ति तस्मात्। तनूनामित्येतत व्यवहितमप्युत्तरत्र वा योज्यम्। तनूनाम् अल्पमतीनामस्माकं [v]मतिः स्तुतिः [v]वां युवां सुष्ठु[5] [v]एषते अभिगच्छति। [v]अत्रिभ्यः अत्रिगोत्रेभ्योऽस्मभ्यम् अस्मदीयमतिः [v]एषते। आदरार्थं पुनर्वचनम्॥ ५॥

'प्र वो मित्राय' इति पञ्चर्चं द्वादशं सूक्तमात्रेयस्य यजतस्यार्षं गायत्रं मैत्रावरुणम्। तथा चानुक्रम्यते— 'प्र वो गायत्रम्' इति। अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे एतत्सूक्तम्। सूत्रितं च—'प्र वो मित्राय प्र मित्रयोर्वरुणयोः' (आश्व. श्रौ. ५. १०) इति। अभिप्लवषडहे पृष्ठ्यषडहे च स्तोमनिमित्तावापार्थमिदमादीनि द्वितीयवर्जितानि चत्वारि सूक्तानि। तथैव सूत्रितं— 'प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेत्' (आश्व. श्रौ. ७. ५) इति॥

प्र वो मित्राय गायत वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत॥ १॥

प्र। वः। मित्राय। गायत। वरुणाय। विपा। गिरा। महिऽक्षत्रौ। ऋतम्। बृहत्॥ १॥

हे मदीया ऋत्विजः [v]वः। यूयमित्यर्थः। [1]मित्राय [1]वरुणाय च [v]विपा व्यामया [v]गिरा स्तुत्या [v]प्र [1]गायत स्तुतिं कुरुत। स्तुत्या स्तुवतेत्येतत पाकं पचतीतिवत। हे [1]महिक्षत्रौ प्रभूतबलौ युवाम् [v]ऋतं यज्ञं [1]बृहत महत अतिप्रशस्तम्। स्तुत्यर्थमागच्छतमिति शेषः। अथवा महत प्रभूतम् ऋतं स्तोत्रं शृणुतमिति शेषः॥

१. झ-ञ-भ-र-ते खलु। २ ख-च-ण-उदकस्पृशः तस्य; ग-घ-ज-श-उदकस्य; झ-ञ-भ-र-उदकस्पृशत्वस्य। ३. ख-च-ण-अल्पस्तुतिभिः; झ-र-अस्तुतिभिः। ४ ख-च-ण-भ-अभावात्; झ-अनास्तोमात; ञ-र-श-आम्नानात। ५ ख-च-झ-ण-ञ-न-भ-र-'सुष्ठु' नास्ति।

सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥ २ ॥

सम्ऽराजा । या । घृतयोनी इति घृतऽयोनी । मित्रः । च । उभा । वरुणः । च । देवा । देवेषु । प्रऽशस्ता ॥ २ ॥

[1]या यौ [2]मित्रश्च [3]वरुणश्च । परस्परापेक्षया चशब्दः । [4]उभा उभौ [5]सम्राजा सर्वस्य स्वामिनौ [6]घृतयोनी उदकस्योत्पादकौ [7]देवा[8] द्योतमानौ [9]देवेषु मध्ये [10]प्रशस्ता प्रकर्षेण स्तुत्यौ[11] । तौ गायतेति पूर्वत्रान्वयः ॥

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥ ३ ॥

ता । नः । शक्तम् । पार्थिवस्य । महः । रायः । दिव्यस्य । महि । वाम् । क्षत्रम् । देवेषु ॥ ३ ॥

[1]ता तौ देवौ [2]नः अस्मदर्थं [3]पार्थिवस्य पृथिवीसंबन्धस्य [4]दिव्यस्य दिवि भवस्य च [5]महः महतः [6]रायः धनस्य [7]शक्तं समर्थौ भवतम् । दातुमिति शेषः । हे देवौ [8]वां युवयोः [9]महि महत् पूज्यं [10]क्षत्रं बलं [11]देवेषु प्रसिद्धं स्तुम इति शेषः ॥

ऋतमृतेन सपन्तेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धेते ॥ ४ ॥

ऋतम् । ऋतेन । सपन्ता । इषिरम् । दक्षम् । आशाते इति । अद्रुहा । देवौ । वर्धेते इति ॥ ४ ॥

[1]ऋतेन उदकेन निमित्तेन [2]ऋतं यज्ञं [3]सपन्ता स्पृशन्तौ [4]इषिरम् एषणवन्तं [5]दक्षं प्रवृद्धं यजमानं हविर्वा[6] [7]आशाते व्याप्नुतः । [8]अद्रुहा अद्रोग्धारौ [9]देवौ मित्रावरुणौ युवां [10]वर्धेते प्रवृद्धौ भवतः ॥

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः । बृहन्तं गर्तमाशाते ॥ ५ ॥

वृष्टिऽद्यावा । रीतिऽआपा । इषः । पती इति । दानुऽमत्याः । बृहन्तम् । गर्तम् । आशाते इति ॥ ५ ॥

[1]वृष्टिद्यावा । वृष्ट्यर्था द्यौः स्तुतिर्ययोस्तौ वृष्टिद्यावा । अथवा वृष्टिर्वर्षिका द्यौरन्तरिक्षं याभ्यां तौ तादृशौ । [2]रीत्यापा ॥ ' री गतिरेषणयोः ' ॥ रीतिः प्राप्तिः । सैव[3] आपा आप्तिः[4] अभिमतप्राप्तिर्ययोस्तौ तादृशौ । [5]इषः अन्नस्य [6]पती स्वामिनौ । वृष्टिप्रदत्वात स्वामित्वम् । [7]दानुमत्याः दानवत्याः । दातुमुचितायाः[8] इत्यर्थः । एतदिडिशेषणम् । एवं महानुभावौ [9]बृहन्तं महान्तं [10]गर्तं रथम् [11]आशाते व्याप्नुतः । अधितिष्ठतो यागार्थम् ॥ ॥ ६ ॥

१. ख-च-झ-ण-न-भ-र-श–देवौ । २. ख-च-ण–स्तुतौ; त–स्तुत्या । ३. ख-च-झ-ण-न-भ-र–बर्हिर्वा । ४. ख-च-झ-ण-त-न-भ-र– सैव आप्तिः ; ग-घ-ज–सैव अपा । ५. ख-च-झ-ण-न-भ-र–दानमुचितायाः ; ग-घ-ज-श– दातृमूचितायाः ।

' त्री रोचना ' इति चतुर्ऋचं त्रयोदशं सूक्तम्। उरुचक्रिर्नामात्रेय ऋषिः। त्रिष्टुप् छन्दः[1]। मित्रावरुणौ देवता। अनुक्रम्यते च—' त्री रोचना चतुष्कमुरुचक्रिः' इति। विनियोगो लैङ्गिकः॥

त्री रोचना वरुण त्रींरुत द्यून्त्रीणि मित्र धारयथो रजांसि।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम्॥ १॥

त्री। रोचना। वरुण। त्रीन्। उत। द्यून्। त्रीणि। मित्र। धारयथः। रजांसि।
ववृधानौ। अमतिम्। क्षत्रियस्य। अनु। व्रतम्। रक्षमाणौ। अजुर्यम्॥ १॥

हे [v]वरुण हे [v]मित्र युवां [v]त्री त्रीणि [v]रोचना रोचनानि[2] द्युलोकान् धारयथ इति संबन्धः। [v]उत अपि च [v]त्रीन् [v]द्यून् द्योतमानानन्तरिक्षलोकान् [v]धारयथः। तथा [v]त्रीणि [v]रजांसि भूलोकान्। कीदृशौ युवाम्। [v]वावृधानौ[3] वर्धमानौ[3] [v]क्षत्रियस्य। क्षत्रं बलम्। तद्वत इन्द्रस्य। यद्वा। क्षत्रियजातीयस्य यजमानस्य [v]अमतिम्। रूपनामैतत्। रूपं [v]व्रतं कर्म च [v]अजुर्यम् अजीर्णमविरतं वा [v]रक्षमाणौ॥

इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुहे।
त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमन्तः॥ २॥

इराऽवतीः। वरुण। धेनवः। वाम्। मधुऽमत्। वाम्। सिन्धवः। मित्र। दुहे।
त्रयः। तस्थुः। वृषभासः। तिसृणाम्। धिषणानाम्। रेतःऽधाः। वि। द्युऽमन्तः॥ २॥

हे [v]वरुण हे [v]मित्र [v]वां युवयोराज्ञया [v]धेनवः गावः [v]इरावतीः। इरा क्षीरलक्षणा। तद्वत्यो भवन्ति। तथा [v]सिन्धवः स्यन्दनशीला गोघा नद्यो वा [v]मधुमत मधुररसमुदकं [v]दुहे दुहन्ति। तथा [v]त्रयः त्रिसंख्याकाः [v]वृषभासः वर्षितारः [v]रेतोधाः उदकस्य धारकाः [v]द्युमन्तः दीप्तिमन्तोऽग्निवायवादित्याः [v]तिसृणां त्रिसंख्याकानां [v]धिषणानां स्थानानां[4] पृथिव्यन्तरिक्षद्युलोकानां[4] स्वामिनः सन्तः [v]वि विविधं प्रत्येकं [v]तस्थुः तिष्ठन्ति। युवयोरनुग्रहात त्रयोऽपि देवास्त्रिषु स्थानेषु वर्तन्ते इत्यर्थः॥

प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य।
राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः॥ ३॥

प्रातः। देवीम्। अदितिम्। जोहवीमि। मध्यंदिने। उतऽइता। सूर्यस्य।
राये। मित्रावरुणा। सर्वऽतातेति। ईळे। तोकाय। तनयाय। शम्। योः॥ ३॥

---

१. ख-च-ञ-ण-ा-न-भ-र-श-' छन्दः ' नास्ति। २. ख-व-ञ-ण-भ-र-श- रोचमानानि; न- रोचनानि रोचमानानि। ३. ख-व-ण-भ- ' वावृधानौ वर्धमानौ ' नास्ति। ४. ख-च-ण- ' स्थानानां... °लोकानां ' नास्ति; ञ-न-न-भ-र-श- स्थानानाम्।

अहमृषिः [V]प्रातः प्रातःकाले [1]अदितिम् अखण्डनीयां देवानां जननीं [V]देवीं द्योतमानां [V]जोहवीमि आह्वयामि[1]। तथा [V]मध्यंदिने [V]सूर्यस्य [V]उदिता उदितौ तत्समृद्धिकाले माध्यंदिने सवने जोहवीमि । हे [V]मित्रावरुणा युवां [V]राये धनप्राप्तये सर्वतातौ यज्ञे [V]हूमहे स्तौमि । पुनः किमर्थम् । [V]तोकाय पुत्राय [V]तनयाय तत्पुत्राय च [V]शम् अरिष्टशमनाय [V]योः सुखस्य मिश्रणाय चेळे इति ॥

या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।
न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ॥ ४ ॥

या । धर्तारौ । रजसः । रोचनस्य । उत । आदित्या । दिव्या । पार्थिवस्य ।
न । वाम् । देवाः । अमृताः । आ । मिनन्ति । व्रतानि । मित्रावरुणा । ध्रुवाणि ॥ ४ ॥

[V]या यौ [V]रोचनस्य रोचमानस्य [V]रजसः लोकस्य । स्वर्गाख्यस्येत्यर्थः । [V]उत अपि च [V]पार्थिवस्य रजसः या यौ धर्तारौ[2] [V]आदित्या अदितेः पुत्रौ [V]दिव्या दिवि भवौ तौ युवामीळे इति पूर्वत्र संबन्धः । हे [V]मित्रावरुणा [V]वां युवयोः [V]ध्रुवाणि [V]व्रतानि कर्माणि [V]देवाः अन्ये इन्द्रादयः [V]अमृताः अमरणधर्माणोऽपि [V]न [V]आ [V]मिनन्ति न हिंसन्ति । यतो ध्रुवाण्यत इत्यभिप्रायः ॥ ॥ ७ ॥

' पुरूरुणा ' इति चतुर्ऋचं चतुर्दशं सूक्तमुरुचक्रेरार्षं गायत्रं मैत्रावरुणम् । ' पुरूरुणा गायत्रं तु ' इत्यनुक्रमणिका । पृष्ठ्याभिप्लवषडहयोः प्रातःसवने आवापार्थत्वेन इदमपि सूक्तं पूर्वसूक्तेन सह । ' प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेत ' इति ह्युक्तम् । चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणशस्त्रे आद्यस्तृचः षडहस्तोत्रियसंज्ञकः । सूत्रितं च— ' पुरूरुणा चिद्ध्यस्मि प्रनि वां सूर उदिते ' (आश्व. श्रौ. ७. २) इति ॥

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण । मित्र वंसि वां सुमतिम् ॥ १ ॥

पुरुऽउरुणा । चित् । हि । अस्ति । अवः । नूनम् । वाम् । वरुण ।
मित्र । वंसि । वाम् । सुऽमतिम् ॥ १ ॥

हे मित्रावरुणौ [V]वां युवयोः [V]पुरूरुणा [V]चित् ॥ अत्र सोः ' सुपां सुलुक् ' इत्याकारः ॥ पुरोरपि बहु उरु बहुतरम् । अथवा पुरु च तदुरु च पुरूरु । अत्यन्तमुरुतरमित्यर्थः । तादृक् [V]अवः रक्षणं [V]नूनं निश्चयेन [V]अस्ति । [V]हि प्रसिद्धौ । चिदिति पूरणः । हे [V]वरुण हे [V]मित्र [V]वां युवयोः [V]सुमतिम् अनुग्रहबुद्धिं [V]वंसि संभजेय । यस्मादवोऽस्ति तस्माद्वंसीति भावः ॥

---

१. त–आह्वयामीति । २. ज्ञ-त-न-र–धर्तारौ तौ ।

ता वां सम्यगद्रुह्वाणेषमश्याम धायसे । वयं ते रुद्रा स्याम ॥ २ ॥

ता । वाम् । सम्यक् । अद्रुह्वाणा । इषम् । अश्याम । धायसे । वयम् । ते । रुद्रा । स्याम ॥२॥

हे [v]अद्रुह्वाणा हे अद्रोग्धारौ [v]ता तौ प्रसिद्धौ [v]वां युवां [v]सम्यक् । स्तुम इति शेषः । स्तोतारो वयम् [v]इषम् अन्नं [v]धायसे पानाय भोजनाय [v]अश्याम प्राप्नुयाम । हे [v]रुद्रा दुःखात् द्रावयितारौ रुद्रद्भिः[1] द्रवणीयौ वा [v]ते स्तोतारः [v]वयं [v]स्याम भवेम । समृद्धा इति शेषः । युवाभ्यां स्वभूता वा स्याम ॥

पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा । तुर्याम दस्यून्तनूभिः ॥ ३ ॥

पातम् । नः । रुद्रा । पायुऽभिः । उत । त्रायेथाम् । सुऽत्रात्रा । तुर्याम । दस्यून् । तनूभिः ॥३॥

हे [v]रुद्रा उक्तरूपौ देवौ युवां [v]नः अस्मान् [v]पायुभिः रक्षणैः [v]पातं रक्षतम् । [v]उत अपि च [v]सुत्रात्रा शोभनेन त्राणेन[2] [v]त्रायेथां पालयेथाम्[3] । इष्टप्राप्त्यनिष्टपरिहारभेदेन भेदः । स्तोत्रादिवैकल्यात् शत्रोर्वा त्रायेथाम् अभिमतप्रापणेन रक्षनमित्यर्थः । वयं च [v]तनूभिः पुत्रादिभिः सहिताः स्वीयैरन्यैर्वा [v]दस्यून् शत्रून् [v]तुर्याम हिंस्याम तरेम वा ॥

मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः । मा शेषसा मा तनसा ॥ ४ ॥

मा । कस्य । अद्भुतक्रत इत्यद्भुतऽक्रतू । यक्षम् । भुजेम । तनूभिः ।

मा । शेषसा । मा । तनसा ॥ ४ ॥

हे [v]अद्भुतक्रतू आश्चर्यकर्माणौ वयं [v]कस्य अन्यस्य कस्यचन [v]यक्षं पूजितं धनं [v]मा [v]भुजेम मा भुञ्जीमहि [v]तनूभिः अस्मदीयैः[4] अवयवैः । युवयोरनुग्रहात समृद्धा वयम् अन्ययाचितधनेन शरीरपोषं न कुर्म इत्यर्थः । तथा [v]शेषसा अपत्येन सहिताः [v]मा भुजेम । [v]तनसा पौत्रादिना सहिताः [v]मा भुजेम । अस्मत्कुले न केऽपि भुञ्जीमहीत्यर्थः ॥ ॥ ८ ॥

'आ नो गन्तम्' इति तृचात्मकं पञ्चदशं सूक्तं बाहुवृक्तस्यात्रेयस्यार्षं गायत्रं मैत्रावरुणम् । 'आ नस्तृचं बाहुवृक्तः' इत्यनुक्रमणिका । उक्तः सूक्तविनियोगः । अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे अयमनुरूपस्तृचः । सूत्रितं च—'आ नो मित्रावरुणा नो गन्तं रिशादसा' (आश्व. श्रौ. ५. १०) इति ॥

आ नो गन्तं रिशादसा वरुण मित्र बर्हणा । उपेमं चारुमध्वरम् ॥ १ ॥

आ । नः । गन्तम् । रिशादसा । वरुण । मित्र । बर्हणा । उप । इमम् । चारुम् । अध्वरम् ॥१॥

---

१. ख-च-ज्ञ-ण-न-भ-र– रुद्भिः । २. ख-च-ज्ञ-ण-र–त्राणेन ; ग-घ-ज-श–'त्राणेन' नास्ति । ३. ग-घ-ज– 'पालयेथां' नास्ति ; त–पालयेताम् ; र–पालयतम् ; श–पालनम् । ४. ख-च-ज्ञ-ण-त-न-भ-र-श–मदीयैः ।

हे ᵛवरुण हे ᵛमित्र हे ᵛरिशादसा शत्रूणां प्रेरकौ युवां ᵛनः अस्माकम् ᵛइमं ᵛचारुं चरणीयम्[1] ᵛअध्वरम् अहिंसकं यज्ञम् ᵛउप ᵛआ ᵛगन्तम् उपागच्छतम्। कीदृशौ। ᵛबर्हणा परिबर्हणौ निबर्हणौ[2] हन्तारौ शत्रूणाम्[2] ॥

विश्वस्य हि प्रचेतसा वरुण मित्र राजथः। ईशाना पिप्यतं धियः ॥ २ ॥

विश्वस्य। हि। प्रऽचेतसा। वरुण। मित्र। राजथः। ईशाना। पिप्यतम्। धियः ॥ २ ॥

हे[3] ᵛमित्र हे ᵛवरुण[3] ᵛप्रचेतसा प्रकृष्टज्ञानौ युवां ᵛविश्वस्य ᵛराजथः सर्वस्य स्वामिनौ भवथः। ᵛहि इति प्रसिद्धौ। हे ᵛईशाना अस्माकमीश्वरौ युवां ᵛधियः अस्मदीयानि कर्माणि ᵛपिप्यतं प्याययतं फलैः[4] ॥

उप नः सुतमा गतं वरुण मित्र दाशुषः। अस्य सोमस्य पीतये ॥ ३ ॥

उप। नः। सुतम्। आ। गतम्। वरुण। मित्र। दाशुषः। अस्य। सोमस्य। पीतये ॥३॥

ᵛनः अस्माकं ᵛसुतम् अभिषुतं सोमं प्रति हे[5] ᵛवरुण हे ᵛमित्र[5] युवाम् ᵛउप ᵛआ ᵛगतम उपागच्छतम्। ᵛदाशुषः हविर्दातुर्मम ᵛअस्य ᵛसोमस्य ᵛपीतये पानाय ॥ ॥ ९ ॥

'आ मित्रे वरुणे' इति तृचात्मकं षोडशं सूक्तं बाहुवृक्तस्यार्षमौणिहं मैत्रावरुणम्। 'आ मित्र औणिहम्' इत्यनुक्रमणिका। दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽयं मैत्रावरुणस्य तृचः। सूत्रितं च—'आ मित्रे वरुणे वयमश्विनावेह गच्छतम् (आश्व. श्रौ. ७. १०) इति ॥

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत्। नि बर्हिषि सदतं सोमपीतये ॥ १ ॥

आ। मित्रे। वरुणे। वयम्। गीःऽभिः। जुहुमः। अत्रिऽवत्।

नि। बर्हिषि। सदतम्। सोमऽपीतये ॥ १ ॥

ᵛवयम् आत्रेयाः ᵛमित्रे ᵛवरुणे मित्रावरुणयोः[6] अर्थाय ᵛगीर्भिः मन्त्रैः ᵛआ ᵛजुहुमः ᵛअत्रिवत् अस्मद्गोत्रप्रवर्तकोऽत्रिरिव। तस्मात् हे[7] मित्रावरुणौ[7] ᵛसोमपीतये ᵛबर्हिषि ᵛनि ᵛसदतं निषीदतम् ॥

---

१. त-न-रमणीयम्। २. ख-च-ज्ञ-ण-न-भ-र-'निबर्हणौ...शत्रूणा' नास्ति। ३. ख-च-ज्ञ-ण-त-न-भ-र-श-'हे ... वरुण' नास्ति। ४. ख-च-ज्ञ-ण-त-न-भ-र-'फलैः' नास्ति। ५. ख-च-ण-हे मित्र हे वरुण। ६. ख-च-ज्ञ-ण-न-भ-मित्रावरुणयोरागतयोः; त-र-मित्रावरुणयोर्गतयोः। ७. ख-च-ज्ञ-ण-त-भ-र-तत्; न-'हे मित्रावरुणौ' नास्ति।

व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना ।
नि बर्हिषि सदतं सोमपीतये ॥ २ ॥

व्रतेन । स्थः । ध्रुवऽक्षेमा । धर्मणा । यातयत्ऽजना ।
नि । बर्हिषि । सदतम् । सोमऽपीतये ॥ २ ॥

हे मित्रावरुणौ युवां [v]धर्मणा जगद्धारकेण [v]व्रतेन कर्मणा योगेन [v]ध्रुवक्षेमा [v]स्थः अविचलितस्थानौ भवथः । [v]यातयज्जना । यातयन्तः कर्मसु प्रवर्तयन्तो जना ऋत्विजो ययोस्तौ यातयज्जनौ । अथवा यातयन्तः शत्रून् हिंसन्तो जना भृत्या ययोस्तौ । शिष्टं गतम् ॥

मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये ।
नि बर्हिषि सदतां सोमपीतये ॥ ३ ॥

मित्रः । च । नः । वरुणः । च । जुषेताम् । यज्ञम् । इष्टये ।
नि । बर्हिषि । सदताम् । सोमऽपीतये ॥ ३ ॥

[v]मित्रश्च [v]वरुणश्च उभौ [v]नः अस्माकं [v]यज्ञम् [1]इष्टये अभीष्टाय[1] [v]जुषेतां सेवेताम् । आगत्य च [v]बर्हिषि [v]नि [v]सदतां निषीदतां सोमपानाय ॥ ॥ १० ॥ ॥ ५ ॥

षष्ठेऽनुवाके पञ्चदश सूक्तानि । तत्र ' यदद्य स्थः ' इति दशर्चं प्रथमं सूक्तमात्रेयस्य पौरनाह्नेः आर्षमानुष्टुभमाश्विनम् । अनुक्रान्तं च—' यदद्य दश पौर आश्विनं तदानुष्टुभं तु ' इति । ' तत् ' इत्युक्तत्वादिदमादीनि षट् सूक्तान्याश्विनानि । ' आनुष्टुभं तु ' इति तुशब्दादिदमुत्तरं च द्वे आनुष्टुभे । प्रातरनुवाक आश्विने क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते । ' यदद्य स्थ इति सूक्ते ' (आश्व. श्रौ. ४. १५) इति सूत्रितम् ॥

यदद्य स्थः परावति यदर्वावत्यश्विना ।
यद्वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् ॥ १ ॥

यत् । अद्य । स्थः । पराऽवति । यत् । अर्वाऽवति । अश्विना ।
यत् । वा । पुरु । पुरुऽभुजा । यत् । अन्तरिक्षे । आ । गतम् ॥ १ ॥

हे [v]पुरुभुजा बहुषु यज्ञेषु भोक्तारौ अधिकं रक्षितारौ वा हे [v]अश्विना [v]यत् यदि [v]अद्य अस्मिन् काले [v]परावति अत्यन्तं दूरदेशे द्युलोके [v]स्थः भवथः । [v]यत् वा [v]अर्वावति अरणवति गन्तुं शक्ये प्रदेशे अन्तिके स्थः । [v]यत् यदि [v]वा अथवा [v]पुरु बहुप्रदेशेषु स्थः । [v]यत् यदि [v]अन्तरिक्षे स्थः तस्मात्सर्वस्मात् अद्य [v]आ [v]गतम् आगच्छतम् ॥

---

१. ख-ग-घ-च-ज-झ-ण-भ-श—अभीष्टये ।

इ॒ह त्या पु॑रुभूत॒मा पु॒रू दं॒सां॒सि॒ बिभ्र॑ता ।
व॒र॒स्या या॒म्यध्रि॑गू हु॒वे तु॒वि॒ष्ट॒मा भु॒जे ॥ २ ॥

इ॒ह । त्या । पु॒रु॒ऽभू॒त॒मा । पु॒रु । दं॒सां॒सि । बिभ्र॑ता ।
व॒र॒स्या । या॒मि॒ । अध्रि॑गू॒ इत्यध्रि॑ऽगू । हु॒वे । तु॒विः॒ऽत॒मा । भु॒जे ॥ २ ॥

[v]इह अस्मिन् यज्ञे [v]त्या तौ [v]पुरुभूतमा पुरूणां बहूनां यजमानानां भावयितृतमौ [v]पुरु पुरूणि [v]दंसांसि कर्माणि [v]बिभ्रता धारयन्तौ [v]वरस्या वरणीयौ [v]अध्रिगू अन्यैः अधृतगमनकर्माणौ [v]यामि उपागच्छामि । [v]तुविष्टमा प्रभूततमौ [v]भुजे भोगाय पालनाय वा [v]हुवे आह्वयामि ॥

ई॒र्मा॒न्यद्व॑पु॒षे व॑पु॒श्चक्रं॒ रथ॑स्य येमथुः ।
पर्य॒न्या ना॑हु॒षा यु॒गा म॒ह्ना रजां॑सि दीयथः ॥ ३ ॥

ई॒र्मा । अ॒न्यत् । व॒पु॒षे । व॒पुः । चक्र॑म् । रथ॑स्य । ये॒म॒थुः ।
परि॑ । अ॒न्या । ना॒हु॒षा । यु॒गा । म॒ह्ना । रजां॑सि । दी॒य॒थः ॥ ३ ॥

हे अश्विनौ युवां [v]रथस्य युष्मदीयस्य [v]अन्यत् [v]चक्रम् [v]ईर्मा ॥ अर्तेः ईर्मा इति रूपम् । गन्तर्यादित्ये [v]वपुषे तस्य शोभार्थं [v]वपुः वपुष्मत् तेजोवत् चक्रं [v]येमथुः नियमितवन्तौ स्थः । [v]अन्या अन्येन चक्रेण [v]मह्ना महत्त्वेन स्वसामर्थ्येन [v]नाहुषा [v]युगा । नहुषा मनुष्याः । तेषां युगा युगोपलक्षितान् कालान् प्रातरादिसवनान् अहोरात्रादिकालान् वा [v]रजांसि लोकांश्च [v]परि [v]दीयथः परिगच्छथः । 'न्य१द्यस्य मूर्धनि चक्रं रथस्य येमथुः' (ऋ. सं १. ३०. १९) इत्युक्तम् ॥

तदू॒ षु वा॑मे॒ना कृ॒तं विश्वा॒ यद्वा॑मनु॒ष्टवे॑ ।
नाना॑ जा॒तावरे॑पसा॒ समस्मे ब॒न्धुमेय॑थुः ॥ ४ ॥

तत् । ऊँ॒ इति॑ । सु । वा॒म् । ए॒ना । कृ॒तम् । विश्वा॑ । यत् । वा॒म् । अनु॑ । स्तवे॑ ।
नाना॑ । जा॒तौ । अरे॑पसा । सम् । अ॒स्मे इति॑ । ब॒न्धु॑म् । आ । ई॒य॒थुः ॥ ४ ॥

हे [v]विश्वा व्याप्तौ [v]यत् येन स्तोत्रेण [v]वां युवाम् [v]अनु [v]ष्टवे अनुस्तुवे [v]तदु । उ इति पूरणः । [v]एना अनेन पौरेण[1] [v]सु[2] सुष्ठु [v]वां युवाभ्यां [v]कृतं संपादितं भवतु । [v]नाना पृथगेव [v]जातौ समृद्धौ [v]अरेपसा अपापौ [v]अस्मे अस्मभ्यं [v]बन्धुम् अन्नं धनं वा [v]सम् [v]आ [v]ईयथुः सम्यक् गमयथः । सम्यक् प्रयच्छतमित्यर्थः ॥

---

१. न– पौरेण मया । २. ख-च-ज्ञ-ण-भ-र– मा ; श– 'सु' नास्ति ।

आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा ।
परि वामरुषा वयो घृणा वरन्त आतपः ॥ ५ ॥

आ । यत् । वाम् । सूर्या । रथम् । तिष्ठत् । रघुऽस्यदम् । सदा ।
परि । वाम् । अरुषाः । वयः । घृणा । वरन्ते । आऽतपः ॥ ५ ॥

हे अश्विनौ [v]वां युवयोः [v]सदा[1] सर्वदा[1] [v]रघुष्यदं शीघ्रग [v]रथं [v]सूर्या युवयोः पत्नी [v]यत यदा [v]आ [v]तिष्ठत् आस्थितवती तदा [v]वां[2] [v]परि [v]वरन्ते परितो वृण्वन्ति । के । [v]अरुषाः आरोचमानाः [v]घृणा दीप्ताः [v]आतपः आतापनाः[3] शत्रूणां [v]वयः अश्वाः । अथवा आतपः इति विशेष्यम् । वयो गन्तार उत्कलक्षणा आतपः सर्वतस्तापयित्र्यो दीप्तयः परि वरन्ते ॥ ॥ ११ ॥

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ।
घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति ॥ ६ ॥

युवोः । अत्रिः । चिकेतति । नरा । सुम्नेन । चेतसा ।
घर्मम् । यत् । वाम् । अरेपसम् । नासत्या । आस्ना । भुरण्यति ॥ ६ ॥

हे [v]नरा नेतारावश्विनौ [v]युवोः युवयोः । युवामित्यर्थः । [v]अत्रिः अस्मत्पिता ऋषिः [v]सुम्नेन सुखेन अग्निदाहोपशमरूपेण हेतुना [v]चेतसा आदरयुक्तेन मनसा [v]चिकेतति जानाति । स्तुतवानित्यर्थः । सति दुःखे सुखमपेक्षते[4] । दुःखस्य कः प्रसङ्ग इत्यत आह । [v]यत यस्मात् हे[5] नासत्यौ[5] [v]वां युवयोः [v]आस्ना आस्येन तन्निष्पन्नेन[6] स्तोत्रेण [v]घर्मं दीप्तं दहन्तमग्निमसुरः स्वदाहाय प्रक्षिप्तम् [v]अरेपसम् अपापं सुखकरं [v]भुरण्यति प्राप्तवान् ॥ भुरण्यतिर्गतिकर्मा ॥ अत्रेरग्नेः सकाशात रक्षणं ' हिमेनाग्निं घंसम् ' (ऋ. सं १. ११६. ८), ' युवमृबीसमुत तप्तमत्रये ' (ऋ. सं. १०. ३९. ९) इत्यादिभिः स्पष्टं प्रदर्शितम् ॥

उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
यद्वां दंसोभिरश्विनात्रिर्नरावर्तति ॥ ७ ॥

उग्रः । वाम् । ककुहः । ययिः । शृण्वे । यामेषु । सम्ऽतनिः ।
यत् । वाम् । दंसःऽभिः । अश्विना । अत्रिः । नरा । आऽववर्तति ॥ ७ ॥

१. ख-च-ञ-ण-न-भ-र- ' सदा सर्वदा ' नास्ति । २. ख-च-ण-भ—वां सदा । ३. ख-च-ञ-ण-श—आतपनाः । ४. ञ—सुखपेक्षते ; त—सुमुक्षते ; र—सुखमुपेक्षते ; श—सुखमुक्षत । ५. ख-च-ञ-ण-त-न-भ-र- ' हे नासत्यौ ' नास्ति । ६ ञ-र—तज्जनिष्पन्नेन ; न—तज्जन्येन ।

[v]उग्रः उद्गूर्णबलः [v]वां युवयोः[1] [v]ककुहः उच्छ्रितो महान् [v]ययिः गन्ता [v]संतनिः सततं गच्छन् रथः [v]यामेषु गमनेषु यज्ञेषु वा [v]श्रुष्वे श्रूयते । हे[2] [v]अश्विना हे [v]नरा[3] [v]यत यस्मात [v]वां युवां [v]दंसोभिः कर्मभिः [v]अत्रिः अस्मत्पिता [v]आववर्तति आवर्तयति ॥

मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।
यत्समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥ ८ ॥

मध्वः । ऊँ इति । सु । मधुऽयुवा । रुद्रा । सिसक्ति । पिप्युषी ।
यत् । समुद्रा । अति । पर्षथः । पक्वाः । पृक्षः । भरन्त । वाम ॥ ८ ॥

हे [v]मधूयुवा मधुरस्य सोमादेर्मिश्रयितारौ हे [v]रुद्रा । रुत स्तुतिः । तया द्रवणीयौ[4] रुद्रपुत्रौ वा[5] वां[4] [v]मध्वः मधुररसेन [v]सु [v]पिप्युषी सुष्ठु प्याययन्ती स्तुतिरस्माकृता [v]सिषक्ति सेवते । [v]यत यदा [v]समुद्रा समुद्द्रवणसाधनानि अन्तरिक्षाणि [v]अति [v]पर्षथः अतिपारयथः । यज्ञं प्रापयथः[6] इत्यर्थः । [v]पक्वाः [v]पृक्षः अन्नानि हविर्लक्षणानि [v]वां [v]भरन्त भ्रियन्ते यजमानैः ॥

सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा ।
ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥ ९ ॥

सत्यम् । इत् । वै । ऊँ इति । अश्विना । युवाम् । आहुः । मयःऽभुवा ।
ता । यामन् । यामऽहूतमा । यामन् । आ । मृळयत्ऽतमा ॥ ९ ॥

हे [v]अश्विना [v]युवां [v]सत्यमित् सत्यमेव । [v]वै इति पादपूरणः । [v]मयोभुवा सुखस्य भावयितारौ [v]आहुः पुराविदः । [v]ता तौ सुखकरत्वेन प्रसिद्धौ युवां [v]यामन् यज्ञे [v]यामहूतमा गमनार्थं भृशमाह्वातव्यौ भवतमिति शेषः । [v]यामन् अस्मद्यज्ञे अस्मदर्थागमने वा [v]मृळयत्तमा चातिशयेन सुखयितारौ भवतम् । आकारश्चार्थे ॥

इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा ।
या तक्षाम रथाँइवावोचाम बृहन्नमः ॥ १० ॥

इमा । ब्रह्माणि । वर्धना । अश्विऽभ्याम् । सन्तु । शमऽतमा ।
या । तक्षाम । रथान्ऽइव । अवोचाम । बृहत् । नमः ॥ १० ॥

१. ख-ङ-त-न-भ-र–युवाम् । २ ख-च-ण–हे अश्विना अश्विनौ हे नरा नेतारौ । ३. त–द्रावणीयौ । ४. त–वां युवाम् । ५. ख-च-ङ-ण-न-भ-र–प्राप्नुयुः । ६. ख-च-ङ-ण-त-न-भ-र– 'आकारश्चार्थे' नास्ति ।

अथ स्तुतिं निगमयति । [v]इमा इमानि इदानीं कृतानि [v]ब्रह्माणि परिबृढानि स्तोत्राणि [v]अश्विभ्यां [v]वर्धना वर्धनानि समर्धकानि [v]शंतमा सुखतमानि [v]सन्तु । [v]या यानि [v]तक्षाम संपादयाम [v]रथानिव शिल्पी तद्वत्तक्षाम तानि सन्तु । वयं [v]बृहत् प्रभूतं प्रभूतफलप्रदं [v]नमः नमस्कारोक्तिम् [v]अवोचाम ॥ ॥ १२ ॥

' कूष्टः ' इति दशर्चं द्वितीयं सूक्तं पौरस्यार्षम् । ' कृष्टः ' इत्यनुक्रमणिका । पूर्वत्र तुशब्दात् इदमप्यानुष्टुभम् । ' आश्विनं तत ' इति पूर्वोक्तत्वात् । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

कूष्ठौ देवावश्विनाद्या दिवो मनावसू ।
तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति ॥ १ ॥

कूऽस्थः । देवौ । अश्विना । अद्य । दिवः । मनावसू इति ।
तत् । श्रवथः । वृषण्वसू इति वृषण्ऽवसू । अत्रिः । वाम् । आ । विवासति ॥ १ ॥

हे [v]देवौ हे [v]मनावसू स्तुतिधनौ [v]अश्विना [v]अद्य अस्मिन् यागदिने [v]दिवः द्युलोकात आगत्य [v]कृष्टः । व्यत्ययेनैकवचनम् । कौ[१] भूमौ[१] तिष्ठन्तौ सन्तौ [v]तत् स्तोत्रं [v]श्रवथः शृणुथः । हे [v]वृषण्वसू वर्षकधनौ [v]वाम् [v]अत्रिः अत्रेः पुत्रः [v]आ [v]विवासति सर्वतः परिचरति ॥ अथवा कृ इत्यस्य निपातस्य स्थ इत्याख्यातेन ' सह ' इति योगविभागात् समासः । प्रेक्स्वर्यं चाध्येतृसमयप्राप्तम् । ' अराइव ' (ऋ. सं. ५. ५८. ५) इत्यत्र यथेवशब्दः, ' कृचिज्जायते ' (ऋ. सं. १०. ४. ५), ' कूचित्सन्तम् ' (ऋ. सं. १०. ९३. ११) इत्यादिवदत्रापि द्रष्टव्यम् ॥ क्व स्थितौ भवथः । अत्रिर्युवां स्तौति तं[२] शृणुथ इत्यर्थः ॥

कुह त्या कुह नु श्रुता दिवि देवा नासत्या ।
कस्मिन्ना यतथो जने को वां नदीनां सचा ॥ २ ॥

कुह । त्या । कुह । नु । श्रुता । दिवि । देवा । नासत्या ।
कस्मिन् । आ । यतथः । जने । कः । वाम् । नदीनाम् । सचा ॥ २ ॥

[v]त्या तौ [v]देवा देवौ [v]नासत्या अश्विनौ [v]कुह कुत्र तिष्ठतः । [v]नु अद्य [v]कुह [v]श्रुता कुत्र श्रुतौ [v]दिवि द्युलोके निवसत इति शेषः । अथ प्रत्यक्षकृतः । हे देवौ युवां [v]कस्मिन् [v]जने यजमाने [v]आ [v]यतथः आगच्छथः । [v]कः स्तोता [v]वां युवयोः [v]नदीनां स्तुतीनां [v]सचा सहायः स्यात् ॥

---

१. ख-च-झ-ण-त-न-भ-र–' कौ भूमौ ' नास्ति । २. त-न-र-श– ताम् ।

कं याथः कं ह गच्छथः कमच्छा युञ्जाथे रथम् ।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥ ३ ॥

कम् । याथः । कम । ह । गच्छथः । कम् । अच्छ । युञ्जाथे इति । रथम् ।
कस्य । ब्रह्माणि । रण्यथः । वयम् । वाम् । उश्मसि । इष्टये ॥ ३ ॥

हे अश्विनौ युवां [v]कं यजमानं यज्ञं वा प्रति [1]याथः । अध्वानमुल्लङ्घ्य[2] याथः[3] । [1]कं [v]ह कं च प्रति [v]गच्छथः । गत्वा च केन सह संगतौ भवथः । [v]कं च [v]अच्छ अभिप्राप्तुं [v]युञ्जाथे योजयथः [v]रथम् अश्वैः । [v]कस्य [v]ब्रह्माणि परिवृढानि स्तोत्राणि [1]रण्यथः रमेथे । [v]वयं च [v]वां युवाम् [1]इष्टये गमनायैषणाय वा [v]उश्मसि कामयामहे तस्मात कस्य चन[4] यागं प्रति न गन्तव्यमित्यर्थः ॥

पौरं चिद्धर्युदप्रुतं पौरं पौराय जिन्वथः ।
यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥ ४ ॥

पौरम् । चित् । हि । उदऽप्रुतम् । पौरं । पौराय । जिन्वथः ।
यत् । ईम् । गृभीतऽतातये । सिंहम्ऽइव । द्रुहः । पदे ॥ ४ ॥

हे [v]पौर । इदमश्विनोः संबोधनम् । पौरेण स्तुत्यत्वेन संबन्धात अश्विनावपि पौरौ । उभयोः छान्दसमेकवचनम् । हे पौरसंबन्धिनावश्विनौ युवां [v]पौरम्[5] । [v]चित् इति पूरणः । पौरेण वृष्टयर्थं प्रार्थ्यमानत्वेन संबन्धात् मेघोऽपि पौरः । तम् [v]उदप्रुतम्[5] उदकप्लावकं मेघं पौराय ऋषये मह्यं [v]जिन्वथः प्रेरयथः[5] । [v]यत् यौ युवां [v]गृभीततातये गृहीतयज्ञसंतानाय पौराय [v]ईम् एनं मेघं प्रति गच्छथः [v]द्रुहः द्रोहस्य [v]पदे स्थानेऽरण्यदेशे [v]सिंहमिव गर्जन्तं प्रबलं सिंहं यथा बलात् व्यावयन्ति व्याघ्रास्तद्वत जिन्वथ इति ॥

प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुञ्चथः ।
युवा यदीं कृथः पुनरा कामंमृण्वे वध्वः ॥ ५ ॥

प्र । च्यवानात् । जुजुरुषः । वव्रिम् । अत्कम् । न । मुञ्चथः ।
युवा । यदि । कृथः । पुनः । आ । कामम् । ऋण्वे । वध्वः ॥ ५ ॥

१. ख-च-ञ-ण-त-न-भ-र–उल्लङ्घयथः । २. ख–न ; ञ–वचन । ३. ख-ञ-ण-न-भ– पौरं चित् । ४. ख-च-ण-भ– उदप्रुतं उदप्लुतम । ५. ख-च-ञ-ण-न-भ-र– 'प्रेरयथः' नास्ति ।

[v]च्यवानात् ऋषेः [v]जुजुरुषः जरसा जीर्णात् सकाशात् [v]वव्रिं हेयं पुराणं रूपम् [v]अक्तं [v]न कवचमिव [v]प्र [v]मुञ्चथः प्रमुञ्चतम्। 'प्रामुञ्चतं द्रापिमिव च्यवानात्' (ऋ. सं. १. ११६. १०) इत्यादि मन्त्रान्तरम्। [v]यदि यदा [v]पुनः[२] [v]युवा [v]कृथः। युवानं कुरुथ इत्यर्थः। तदा [v]वध्वः सुरूपायाः स्त्रियः [v]कामं कमनीयं[२] रूपम् [v]आ[२] [v]ऋण्वे प्राप्तवान् ॥ ॥ १३ ॥

अस्ति॒ हि वां॒मि॒ह स्तो॒ता स्मसि॑ वां सं॒दृशि॒ श्रिये।
नू श्रु॒तं म॒ आ ग॑तमवो॒भिर्वा॑जिनीवसू ॥ ६ ॥

अस्ति। हि। वाम्। इह। स्तोता। स्मसि। वाम्। सम्ऽदृशि। श्रिये।
नु। श्रुतम्। मे। आ। गतम। अवःऽभिः। वाजिनीवसू इति वाजिनीऽवसू ॥ ६ ॥

हे अश्विनौ [v]वां [v]स्तोता पौरः [v]अस्ति [v]हि वर्तते खलु। हे देवौ [v]वां [v]संदृशि संदर्शने संनिधाने [v]स्मसि स्मः भवेम। किमर्थम्। [v]श्रिये। [v]नु अद्य [v]मे मदीयमाह्वानं [v]श्रुतं शृणुतम्। श्रुत्वा [v]आ [v]गतम आगच्छतम्। किं तूष्णीं नेत्याह। [v]अवोभिः रक्षणैः सह [v]वाजिनीवसू अन्नवसू[३] ॥

को वा॑म॒द्य पु॑रू॒णामा व॑वृ॒ते मर्त्या॑नाम्।
को विप्रो॑ विप्रवाहसा॒ को य॒ज्ञैर्वा॑जिनीवसू ॥ ७ ॥

कः। वाम्। अद्य। पुरूणाम्। आ। ववृते। मर्त्यानाम्।
कः। विप्रः। विप्रऽवाहसा। कः। यज्ञैः। वाजिनीवसू इति वाजिनीऽवसू ॥ ७ ॥

हे [v]वाजिनीवसू अन्नवसू [v]वां युवाम् [v]अद्य अस्मिन् दिने [v]पुरूणां [v]मर्त्यानां मध्ये [v]कः [v]आ [v]ववृते सर्वतो भजति। हे [v]विप्रवाहसा विप्रैर्मेधाविभिर्वहनीयौ [v]को [v]विप्रः मेधावी ववृते। [v]कः यजमानः [v]यज्ञैः ववृते। अत्यन्तविलम्बमसहमानः[४] पुनःपुनर्ब्रूते ॥

आ वां॒ रथो॒ रथा॑नां॒ येष्ठो॑ यात्वश्विना।
पु॒रू चि॑दस्म॒युस्ति॒र आ॑ङ्गू॒षो मर्त्ये॑ष्वा ॥ ८ ॥

आ। वाम्। रथः। रथानाम्। येष्ठः। यातु। अश्विना।
पुरु। चित्। अस्मऽयुः। तिरः। आङ्गूषः। मर्त्येषु। आ ॥ ८ ॥

१. ख-च-ज्ञ-ण-न-भ-र- 'पुनः' नास्ति। २. ख-च-ज्ञ-ण-त-न-भ-र- आ कमनीयं रूपम्।
३. ख-च-ज्ञ-ण-त-न-भ-र- 'अन्नवसू' नास्ति। ४. त-°सहमानः सन्।

हे [v]अश्विना अश्विनौ [v]वां युवयोः [v]रथः एको रथः [v]रथानां [v]श्रेष्ठः इतरदेवरथानां[1] मध्ये अतिशयेन गन्ता सन् [v]आ [v]यातु । कीदृशः सन् । [v]पुरू [v]चित् बहूनपि[2] अस्मद्विरोधिनः [v]तिरः हिंसकः तिरस्कर्ता वा [v]अस्मयुः अस्मान् कामयमानः [v]मर्त्येषु सर्वेषु यजमानेषु मध्ये [v]आङ्गूषः स्तुत्यः । आकारः पूरणः । अथवा आङ्गूषः[3] स्तोमः । स्तवोऽस्मयुरस्मान् बलैर्योक्तुं कामयमानो मर्त्येषु मर्त्यैरस्मदीयैर्ऋत्विग्भिः प्रेरितः सन् । उक्तलक्षणाश्विनौ रथस्य वा स्तुतिः आ सर्वतः पुरू चित पुरूण्यपि शत्रुबलानि तिरः तिरस्करोति ॥

शमु षु वां मधूयुवास्माकमस्तु चर्कृतिः ।
अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥ ९ ॥

शम् । ऊँ इति । सु । वाम् । मधुऽयुवा । अस्माकम् । अस्तु । चर्कृतिः ।
अर्वाचीना । विऽचेतसा । विऽभिः । श्येनाऽइव । दीयतम् ॥ ९ ॥

हे [v]मधूयुवा मधुमन्तौ [v]वां युवाभ्यां [v]चर्कृतिः पुनःपुनः करणं युवाभ्यामर्थाय पुनःपुनः क्रियमाणं स्तोत्रं युवयोरागमनस्याभ्यासो वा [v]अस्माकं [v]सु सुष्ठु [v]शमु सुखकरमेव [v]अस्तु भवतु । हे [v]अर्वाचीना अर्वागस्मदभिमुखावञ्चनौ हे [v]विचेतसा विशिष्टप्रज्ञौ [v]श्येनेव श्येनाविव [v]विभिः गन्तृभिरश्वैः [v]दीयतं गच्छतम् ॥

अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम् ।
वस्वीरू षु वां भुजः पृञ्चन्ति सु वां पृचः ॥ १० ॥

अश्विना । यत् । ह । कर्हि । चित् । शुश्रूयातम् । इमम् । हवम् ।
वस्वीः । ऊँ इति । सु । वाम् । भुजः । पृञ्चन्ति । सु । वाम् । पृचः ॥ १० ॥

हे [v]अश्विना युवां [v]यद्ध यत्र [v]कर्हि [v]चित स्थितवन्तौ भवथः तत्र [v]इमं मे [v]हवम् आह्वानं [v]शुश्रूयातं शृणुतम् । श्रुत्वागच्छतमित्यर्थः । किमर्थमित्युच्यते । [v]वस्वीः प्रशस्याः [v]भुजः धनानि हविर्लक्षणानि [v]सु सुष्ठु [v]वां युवां [v]पृञ्चन्ति मिश्रयन्ति प्रापयन्ति । [v]उ इति पूरणः । कीदृश्यो भुजः । [v]वां युवां [v]सु सुष्ठु [v]पृचः संपर्चनाः । युवां प्राप्तुं कामयमाना इत्यर्थः । अथवा सु पृचः सुसंपर्चनाः स्तोतारो वस्वीर्भुजो वां सुष्ठु पृञ्चन्ति संपर्चयन्ति ॥ ॥ १४ ॥

' प्रति प्रियतमम् ' इति नवर्चं तृतीयं सूक्तम् । अवस्युर्नामात्रेय ऋषिः । पङ्क्तिश्छन्दः । अश्विनौ देवता । अनुक्रान्तं च—' प्रति नवावस्युः पाङ्क्तम् ' इति । प्रातरनुवाके आश्विने क्रतौ पाङ्क्ते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । ' प्रति प्रियतममिति पाङ्क्तम् ' (आश्व. श्रौ. ४. १५) इति हि सूत्रितम्[4] ॥

१. ख-च-ज्ञ-ण-न-भ-र-इतरदेशरथानाम् । २. ख-च-ज्ञ-ण-त-न-भ-र-श-बहून्यपि । ३. ख-च-ज्ञ-ण-न-भ-र-' आङ्गूषः ' नास्ति । ४. न-सूत्रितम । प्रातरनुवाकन्यायेनेति च प्रतिप्रियतममित्युपसंतनुयादिति च ।

प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम् ॥ १ ॥

प्रति । प्रियऽतमम् । रथम् । वृषणम् । वसुऽवाहनम् ।
स्तोता । वाम् । अश्विनौ । ऋषिः । स्तोमेन । प्रति । भूषति ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ १ ॥

हे [v]अश्विनौ । एकः प्रतिशब्दोऽनुवादः । [v]वां युवयोः [v]प्रियतमं [v]रथं [v]स्तोता [v]ऋषिः अवस्युः [1]स्तोमेन [v]प्रति [1]भूषति अलंकरोति । कीदृशं रथम् । [v]वृषणं वर्षितारं फलानां [v]वसुवाहनं धनानां वाहकम् । ईदृशं रथमागमनाय स्तौतीत्यर्थः । तस्मात हे [1]माध्वी मधुविद्यावेदितारौ [v]मम [v]हवम् आह्वानं [v]श्रुतं शृणुतम् ॥

अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥ २ ॥

अतिऽआयातम् । अश्विना । तिरः । विश्वाः । अहम् । सना ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । सुऽसुम्ना । सिन्धुऽवाहसा ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ २ ॥

हे [v]अश्विना [v]अत्यायातम् । सर्वान् यजमानान् अतिक्रम्यागच्छतम् । यथा [v]अहम् ऋषिः [v]विश्वाः सर्वा अस्मद्विरोधिप्रजाः[1] [v]सना सदा तिरस्करोमि । अथवाहं तिरः । ' तिरः सत इति प्राप्तस्य ' (निरु. ३. २०) इति निरुक्तम् । प्राप्ता विश्वाः सर्वाः क्रिया युष्मदीयाः अनुतिष्ठेयमित्यर्थः । सना सनातनौ [1]दस्रा शत्रूणामुपक्षपयितारौ [v]हिरण्यवर्तनी हिरण्मयरथौ [v]सुषुम्ना सुधनौ [v]सिन्धुवाहसा नदीनां प्रवाहयितारौ वृष्टिप्रेरणेन । तादृशौ युवामत्यायातम् ॥

आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥ ३ ॥

आ । नः । रत्नानि । बिभ्रतौ । अश्विना । गच्छतम् । युवम् ।
रुद्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । जुषाणा । वाजिनीवसू इति वाजिनीऽवसू ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ३ ॥

१. ख-च-ण-भ– °प्रज्ञाः ।

हे [v]अश्विना [v]नः अस्मभ्यं [१]रत्नानि रमणीयानि धनानि [v]बिभ्रतौ धारयन्तौ [v]युवं युवां नोऽस्मान् वा [v]आ [v]गच्छतम्। हे [१]रुद्रा रुद्रपुत्रौ स्तुत्यौ वा हे [v]वाजिनीवसू वाजिनधनौ युवां [v]हिरण्यवर्तनी हिरण्यरथौ [v]जुषाणा यज्ञं सेवमानौ सन्तौ आ गच्छतमिति। माध्वी इत्यादि गतम्॥

सुष्टुभो॑ वां वृषण्वसू॒ रथे॒ वाणी॑रिषि॒ता।
उ॒त वां॑ ककु॒हो मृ॒गः पृक्षः॑ कृणोति वापु॒षो माध्वी॒ मम॑ श्रु॒तं हव॑म्॥ ४॥

सु॒ऽस्तु॒भः। वा॒म्। वृ॒ष॒ण्व॒सू॒ इति॑ वृषणऽवसू। रथे॑। वाणी॑। ई॒षि॒ता।
उ॒त। वा॒म्। क॒कु॒हः। मृ॒गः। पृक्षः॑। कृ॒णो॒ति॒। वा॒पु॒षः।
माध्वी॒ इति॑। मम॑। श्रु॒तम्। हव॑म्॥ ४॥

हे[१] [१]वृषण्वसू वर्षधनौ वर्षितारौ वा वसूनां[१] हे अश्विनौ [v]सुष्टुभः सुस्तोतुर्मम [v]वाणीचा वाग्रूपा स्तुतिः [v]वां युवयोः [१]रथे [१]आहिता स्थापिता। अस्माभिः कृतेत्यर्थः। [v]उत अपि च [v]वां युवाभ्यां [१]ककुहः महान् [१]मृगः[२] मृगयिता[२] [v]वापुषः वपुष्मान् यजमानः [v]पृक्षः अन्नं हविः [v]कृणोति करोति। तस्मात् [१]मम [१]हवं [v]श्रुतम् इति॥

बो॒धि॒न्म॒नसा॒ र॒थ्ये॑षि॒रा ह॑वन॒श्रुता॑।
वि॒भि॒श्च्यवा॑नमश्विना॒ नि या॑थो अद्व॒याविन॑ं॒ माध्वी॒ मम॑ श्रु॒तं हव॑म्॥ ५॥

बो॒धि॒त्ऽम॑नसा। र॒थ्या॑। इ॒षि॒रा। ह॒व॒न॒ऽश्रुता॑।
वि॒ऽभिः॑। च्यवा॑नम्। अ॒श्वि॒ना॒। नि। या॒थः॒। अ॒द्व॒याविन॑म्।
माध्वी॒ इति॑। मम॑। श्रु॒तम्। हव॑म्॥ ५॥

हे [v]अश्विना [v]बोधिन्मनसा बुध्यमानमनस्कौ [v]रथ्या रथस्वामिनौ [१]इषिरा शीघ्रगन्तारौ सर्वैर्गन्तव्यौ वा [v]हवनश्रुता हवनस्य स्तुतेः श्रोतारौ युवां [v]विभिः[३] अश्वैः[३] [१]च्यवानम् ऋषिम् [v]अद्वयाविनं मायारहितं[४] [v]नि [v]याथः। यथा तमृषिं प्राप्तवन्तौ तद्वत मां प्रति पथि[५] नि याथः नितरामागच्छतम्[६]। 'प्र च्यवानाज्जुजुरुषो वन्निम्' (ऋ. सं. ५. ७४. ५) इति ह्युक्तम्॥ ॥ १५॥

१. ख-च-ज्ञ-ण-न-भ-र- 'हे...वसूनां' नास्ति ; त-हे वर्षितारौ वा वसूनाम्। २. ख-च ज्ञ-ण त-भ-र- र्यायर्गन्ता ; ग-घ-ज-श-मृगो मृगयिता र्यायर्गन्ता ; न- मृगो र्यायर्गन्ता। ३. ख-च-ज्ञ-ण-त-न-भ-र-'विभिरश्वैः' नास्ति। ४. ख-च-ज्ञ-ण-त-न-भ-र-'मायारहितं' नास्ति। ५. त-मयि। ६. ख-च-ज्ञ-ण-त-न-भ-श- °गच्छतम्। माध्वी इत्यादि गतम।

आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः ।
वयो वहन्तु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम् ॥ ६ ॥

आ । वाम् । नरा । मनःऽयुजः । अश्वासः । प्रुषितऽप्सवः ।
वयः । वहन्तु । पीतये । सह । सुम्नेभिः । अश्विना ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ६ ॥

हे [1]नरा कर्मणां नेतारौ हे [1]अश्विना अश्विनौ [2]वां युवां [2]मनोयुजः मनोमात्रेण युज्यमानाः । सुशिक्षिता इत्यर्थः । [2]प्रुषितप्सवः विचित्ररूपाः [2]वयः शीघ्रगन्तारः [2]अश्वासः अश्वाः [2]आ [2]वहन्तु [2]पीतये सोमपानाय । [1]सुम्नेभिः [2]सह अस्मभ्यं देयैः सुखैस्तत्साधनैर्धनादिभिर्वा सह वहन्तु ॥

अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।
तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवम् ॥ ७ ॥

अश्विनौ । आ । इह । गच्छतम् । नासत्या । मा । वि । वेनतम् ।
तिरः । चित् । अर्यऽया । परि । वर्तिः । यातम् । अदाभ्या ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ७ ॥

हे [2]अश्विनौ [2]इह अस्मिन् यज्ञे [1]आ [1]गच्छतम् । हे [2]नासत्या [1]मा [2]वि [1]वेनतं विगतकामौ मा भवतम् । ' वेनतिः कान्तिकर्मा ' (नि. १०. ३८) । हे [2]अदाभ्या अहिंस्यौ पूज्यौ [2]अर्यया अर्यौ स्वामिनौ युवाम् ॥ ' सुपां सुलुक् ' इत्यादिना सुपो याजादेशः ॥ [2]तिरश्चित् अन्तर्हितात् दूरदेशादपि युवां [2]वर्तिः अस्मद्यज्ञगृहं [2]परि [1]यातम् आगच्छतम् ॥

अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती ।
अवस्युमश्विना युवं गृणन्तमुप भूषथो माध्वी मम श्रुतं हवम् ॥ ८ ॥

अस्मिन् । यज्ञे । अदाभ्या । जरितारम् । शुभः । पती इति ।
अवस्युम् । अश्विना । युवम् । गृणन्तम् । उप । भूषथः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ८ ॥

१. ख-च-झ-ण-न-भ-र-श–' अश्विनौ ' नास्ति ।

हे [v]अदाभ्या अहिंस्यौ हे [v]शुभस्पती उदकस्य स्वामिनौ [v]अश्विना अश्विनौ[1] [v]युवं युवाम् [v]अस्मिन्[2] [v]यज्ञे[3] [v]जरितारं स्तोतारम् [v]अवस्युं [v]गृणन्तं स्तुवन्तं माम् [v]उप [v]भूषथः उपप्रापयतम् ॥

अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।
अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम् ॥ ९ ॥

अभूत् । उषाः । रुशत्ऽपशुः । आ । अग्निः । अधायि । ऋत्वियः ।
अयोजि । वाम् । वृषण्वसू इति वृषण्ऽवसू । रथः । दस्रौ । अमर्त्यः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ९ ॥

[v]उषाः व्युष्टिः [v]अभूत् । अग्निः च [v]रुशत्पशुः दीप्तपशुमान् । प्रकाशितहविरित्यर्थः । अथवा पशवः किरणाः । रुशद्दृश्मिः सन् [v]अधायि वेद्यामधीयत[3] अग्निः आहवनीयः [v]ऋत्वियः ऋतौ काले भवः । हे [v]वृषण्वसू प्रदत्तधनौ हे [v]दस्रौ [v]वां युवयोः [v]अमर्त्यः अमरणधर्मा ध्रुवः [v]रथः [v]अयोजि । अश्वैर्युक्तो भवत्वित्यर्थः ॥ ' छन्दसि लुङ्लङ्लिटः ' इत्यनेकेष्वर्थेषु लुङ् भवति । इह प्रार्थनायाम् । माध्वी इत्यादि गतम् ॥ ॥ १६ ॥

' आ भात्यग्निः ' इति पञ्चर्चं चतुर्थं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभमाश्विनम् । अत्रानुक्रमणिका— ' आ भाति पञ्चात्रिः ' इति । प्रवर्ग्येऽभिष्टवार्थमिदं सूक्तम् । सूत्रितं च—' आ भात्यग्निर्प्रावाणेव ' (आश्व. श्रौ. ४. ६) इति । प्रातरनुवाके आश्विने क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे वेदमादिके द्वे सूक्ते । सूच्यते हि—' आ भात्यग्निरिति सूक्ते ' (आश्व. श्रौ. ४. १५) इति । असोर्यामे होतुरतिरिक्तोक्थ्ये इदं सूक्तम् । सूत्रितं च—' आ भात्यग्निः क्षेत्रस्य पतिना वयमिति परिधानीया ' (आश्व. श्रौ. ९. ११) इति ॥

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥ १ ॥

आ । भाति । अग्निः । उषसाम् । अनीकम् । उत । विप्राणाम् । देवऽयाः । वाचः । अस्थुः ।
अर्वाञ्चा । नूनम् । रथ्या । इह । यातम् । पीपिऽवांसम् । अश्विना । घर्मम् । अच्छ ॥ १ ॥

[v]उषसामनीकम् अनीकभूतः । अनीकं मुखम् । उषसि प्रबुध्यमान इत्यर्थः । तादृशः [v]अग्निः [v]आ [v]भाति दीप्यते । यद्वा । उषसां मुखम् आ भाति दीपयति । उषःकाले ह्यग्नयः प्रतिबोध्यन्ते । किंच [v]विप्राणां मेधाविनां स्तोतॄणां [v]देवयाः देवकामाः [v]वाचः स्तोत्राणि [v]उत् [v]अस्थुः उत्तिष्ठन्ति[4] ।

१. ग-घ-ज-श- ' अश्विनौ ' नास्ति । २. ख-च-झ-ण-त-न-भ-र- ' अस्मिन् यज्ञे ' नास्ति । ३. ख-च-ण-न-वेद्यामाधीयते ; ग-घ-ज-झ-भ-र-वेद्यामधीयते । ४. ख-च-झ-ण-न-भ-र – ' उत्तिष्ठन्ति ' नास्ति ।

यस्मादेवं तस्मात् हे [v]रथ्या रथस्वामिनावश्विनौ [v]अर्वाञ्चा अस्मदभिमुखाञ्चौ [v]नूनम् अद्यास्मिन् यागदिने [v]इह आ [v]यातम्। कं प्रति। [v]पीपिवांसं स्वाङ्गैः[1] परिवृढं [v]घर्मं प्रदीप्तं यज्ञम्। यद्वा। पीपिवांसमाप्यायितं वसतीवरीभिः क्षरद्रूपं[2] सोमरसम्। अथवा घृतादिना पीपिवांसं घर्मं प्रवर्ग्यम् [v]अच्छ अभिलक्ष्य इह यातम्[3]। प्रवर्ग्येऽस्य सूक्तस्य विनियोगः ॥

न सꣳस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा ॥ २ ॥

न । सꣳस्कृतम् । प्र । मिमीतः । गमिष्ठा । अन्ति । नूनम् । अश्विना । उपऽस्तुता । इह ।
दिवा । अभिऽपित्वे । अवसा । आऽगमिष्ठा । प्रतिं । अवर्तिम् । दाशुषे । शम्ऽभविष्ठा ॥२॥

अश्विनौ [v]संस्कृतं घर्मं [v]न [v]प्र [v]मिमीतः न हिंस्ताम्[4]। किंतु [v]अन्ति अन्तिके घर्मसमीपे [v]नूनम् इदानीम् [v]इह यज्ञे [v]गमिष्ठा गन्तृतमौ[5] [v]अश्विना अश्विनौ [v]उपस्तुता उपस्तुतौ भवतः[6]। [v]दिवाभिपित्वे दिवसस्याभिपतने प्रातःकाले [v]अवसा रक्षणेन[7] सह [v]आगमिष्ठा आगन्तृतमौ[8]। [v]अवर्तिं [v]प्रतिं[9] द्वन्द्वभूतौ। वर्तिर्जीवनम्। तदभावोऽवर्तिः। तद्रहितमन्नं यथा भवति तथागन्तृतमौ। आगत्य च[10] [v]दाशुषे हविर्दत्तवते यजमानाय [v]शंभविष्ठा सुखस्य भावयितारौ भवताम् ॥

उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥ ३ ॥

उत । आ । यातम् । सम्ऽगवे । प्रातः । अह्नः । मध्यंदिने । उत्ऽइता । सूर्यस्य ।
दिवा । नक्तम् । अवसा । शम्ऽतमेन । न । इदानीम् । पीतिः । अश्विना । आ । ततान ॥३॥

अह्नो द्वेधा त्रेधा पञ्चधा पञ्चदशधा[10] समानाः[10] विभागाः सन्ति। इह पञ्चधा विभाग आत्तः। [v]उत अपि च [v]आ [v]यातम् आगच्छतम्। कदा [v]संगवे संगवकाले। संगच्छन्ते गावो दोहभूमिं[11] यस्मिन् काले स संगवः। राज्यपरकाले हि गावो वनं हिमतृणानि भक्षयित्वा[12] पुनर्दोहाय संगवे प्रतिनिवर्तन्ते। तथा [v]प्रातः प्रातःकालेऽपि। तथा [v]मध्यंदिने [v]अह्नः मध्यकाले [v]सूर्यस्य [v]उदिता उदितौ अभ्युदये अत्यन्तप्रवृद्धसमये अपराह्णे इत्यर्थः। एतत् सायाह्नस्याप्युपलक्षणम्। न केवलम्

१. ख-च-ञ-ण-न-भ-र-आप्यायितं घर्मं क्षरद्रूपम्। २. त- यागे आयातम्। ३. ख-च-ञ-ण-न-न-भ-र-हिंस्तम्। ४. ख-च-ञ-ण-त-न-भ-र-गन्तृतमौ युवाम्। ५. ख-च-ञ-ण-त-न-भ-र-भवतम्। ६. त-रक्षणेनान्नेन च। ७. त-आगन्तृतमौ। नाशयन्ताविति शेषः। अथवा। ८. ख-ञ-भ-र -'प्रति...च' नास्ति; न-दारिद्र्यं नाशयन्तौ। ९. ख-च-ञ-ण-न-भ-र -भवतां' नास्ति; ग-घ-ज-त-भवतम्। १०. त-पञ्चदशधेतिमाना; भ-पञ्चदशधात्मना। ११. ग-घ-ज- 'दोहभूमिं' नास्ति। १२. त-भक्षयन्ति भक्षयित्वा च।

उक्तेष्वेव कालेषु किं[1] तर्हि[2] vदिवा vनक्तं सर्वदा vशंतमेन सुखतमेन vअवसा रक्षणेन हविषा वा निमित्तेन आ[3] यातम्। किमर्थमागम्यते[4] पूर्वमेवान्यैर्देवैः स्वीकृतत्वात् नेत्याह। vइदानीम् अपि vप्रीतिः इतरदेवानां पानं vन vआ vततान न तनोति vअश्विना अश्विनौ विहायेति शेषः॥

इदं हि वां प्रदिवि स्थानमोकं इमे गृहा अश्विनेदं दुरोणम्।
आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्जं वहन्ता॥ ४॥

इदम्। हि। वाम्। प्रऽदिवि। स्थानम्। ओकः। इमे। गृहाः। अश्विना। इदम्। दुरोणम्।
आ। नः। दिवः। बृहतः। पर्वतात्। आ। अत्ऽभ्यः।
यातम्। इषम्। ऊर्जम्। वहन्ता॥ ४॥

हे vअश्विना vवां युवयोः vप्रदिवि पुराणम् vइदं[2] vहि[2] vओकः निवासयोग्यं vस्थानम् उत्तरवेद्याख्यम्। अथ सौमिकवेद्यभिप्रायेणाह। vइमे vगृहाः प्राचीनवंशादयः। vइदं vदुरोणं देवयजनगृहम्। vनः अस्मदर्थं vदिवः द्युलोकात् vबृहतः vपर्वतात् पर्वतो मेघात् vअद्भ्यः अपां कारणादन्तरिक्षात् vआ vयातम् आगच्छतम्। किं तूष्णीम्। न। vइषमूर्जं च अन्नं बलं च। बलसाधनमन्नं सारभूतमित्यर्थः। तादृशं vवहन्ता वहन्तौ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥ ५॥

सम्। अश्विनोः। अवसा। नूतनेन। मयःऽभुवा। सुऽप्रनीती। गमेम।
आ। नः। रयिम्। वहतम्। आ। उत। वीरान्। आ। विश्वानि। अमृता। सौभगानि॥५॥

वयं vसं vगमेम संगच्छेम vअश्विनोः vनूतनेन vअवसा अनन्यकृतेन रक्षणेन vमयोभुवा सुखस्य भावयित्र्या vसुप्रणीता सुप्रणीत्या सुष्ठ्वागमनेन च। अपि वैते उभे अवसो विशेषणे। उक्तलक्षणेन सं गमेम। vनः अस्मभ्यं vरयिम् vआ vवहतम्। vउत vवीरान् पुत्रादीन् vआ वहतम्। हे vअमृता अमरणधर्माणौ vविश्वानि[5] vसौभगानि सुभगत्वानि vआ वहतम्॥ ॥ १७॥

'प्रातर्यावाणा' इति पञ्चर्चं पञ्चमं सूक्तमात्रेयं त्रैष्टुभमाश्विनम्। 'प्रातर्यावाणा' इति वानुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः। अक्षोर्यामे मैत्रावरुणातिरिक्तोक्थ्ये इदमेव शस्यम्। तथा च सूत्रितं—'प्रातर्यावाणा क्षेत्रस्य पते मधुमन्तमूर्मिम्' (आश्व. श्रौ. ९. ११) इति॥

---

१. ख-च-ण–नेत्याह; झ-भ-र–तेन्याहावा; न –'किं तर्हि' नास्ति। २. ख-च-झ-ण-न-भ-र –'आ' नास्ति। ३. ख-च-झ-ण-न-भ-र–किमर्थं गम्यते। ४. ख-च-झ-ण-त-न-भ-र-श –'इदं हि' नास्ति। ५. त-विश्वा विश्वानि।

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।
प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः ॥ १ ॥

प्रातःऽयावाना । प्रथमा । यजध्वम् । पुरा । गृध्रात् । अररुषः । पिबातः ।
प्रातः । हि । यज्ञम् । अश्विना । दधाते इति । प्र । शंसन्ति । कवयः । पूर्वऽभाजः ॥ १ ॥

हे मदीया ऋत्विजः [V]प्रातर्यावाणा प्रातरेव यज्ञं[1] गन्तारौ[1] [V]प्रथमा अत एवेतरेभ्यो देवेभ्यः पूर्वभाविनौ प्रकृष्टतमौ वा अश्विनौ [V]यजध्वम् । किमर्थं प्रथमयागनियोगः[2] । उच्यते । [V]गृध्रात् अभिकाङ्क्षतः [V]अररुषः अदातृ रक्षःप्रभृतेः [V]पुरा पूर्वं [V]पिबातः पिबताम् । अनागतं कथं यष्टुं शक्याविरित्यत आह । [V]अश्विना अश्विनौ [V]प्रातर्हि [V]यज्ञं [V]दधाते धारयतः संभजतः । [V]पूर्वभाजः पूर्वकालीनाः [V]कवयः अनूचाना ऋषयः प्रातरेवैनौ [V]प्र [V]शंसन्ति । ' ये वा अनूचानास्ते कवैयः ' (पे. ब्रा. २. ३८) इति हि निगमः ॥

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।
उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान् ॥ २ ॥

प्रातः । यजध्वम् । अश्विना । हिनोत । न । सायम् । अस्ति । देवऽयाः । अजुष्टम् ।
उत । अन्यः । अस्मत् । यजते । वि । च । आवः । पूर्वःऽपूर्वः । यजमानः । वनीयान् ॥२॥

हे मदीयाः पुरुषाः [V]अश्विना अश्विनौ [V]प्रातः प्रातरेव [V]यजध्वं पूजयध्वं स्तुध्वम् । [V]हिनोत प्रहिणुत हवींषि । [V]सायं सायंकाले हविः [V]देवयाः देवगामि [V]न [V]अस्ति न विद्यते । देवा न स्वीकुर्वन्तीत्यर्थः । [V]अजुष्टम् असेव्यं तद्भवति । ' पूर्वाह्णो वै देवानाम् ' इति हि श्रुतिः । [V]उत[3] [V]अस्मत् अस्मत्तः [V]अन्यः कोऽपि [V]यजते यजेत सोमेन [V]वि [V]चावः वितर्पयेच्च हविषा । अतोऽस्मास्वन्येषु च मध्ये [V]पूर्वःपूर्वो [V]यजमानः यः पूर्वःपूर्वो यष्टा भवति सः [V]वनीयान् देवानां संभजनीयः संभाव्यो भवति ॥

' हिरण्यत्वक् ' इत्येषाश्विने पशौ हविषो याज्या । ' हिरण्यत्वङ्मधुवर्णो घृतस्नुरभि क्रत्वेन्द्र भूरध उग्रम् ' (आश्व. श्रौ. ३. ८) इति हि सूत्रितम् ॥

हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वाम् ।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥ ३ ॥

हिरण्यऽत्वक् । मधुऽवर्णः । घृतऽस्नुः । पृक्षः । वहन् । आ । रथः । वर्तते । वाम् ।
मनःऽजवाः । अश्विना । वातऽरंहाः । येन । अतिऽयाथः । दुःऽइतानि । विश्वा ॥ ३ ॥

---

१. ञ-भ-र-यज्ञगन्तारौ । २. ख-च-ण-भ-प्रथमं यागविनियोगः ; ञ-न-प्रथमयागविनियोगः ।
३. ख-च-ञ-ण-न-भ-र -' उत ' नास्ति ।

vवां युवयोः vरथः vपृक्षः अन्नममृतं vवहन् vआ vवर्तते अस्मदभिमुखमागच्छति । कीदृशो रथः । vहिरण्यत्वक् हिरण्याच्छादितरूपः[1] हिरण्यावृतः vमधुवर्णः मनोहरवर्णः vघृतस्नुः उदकस्य प्रस्रवनः vमनोजवाः मनोवेगः vवातरंहाः वातसदृशवेगः । हे vअश्विना vयेन रथेन vविश्वा सर्वाणि vदुरितानि दुर्गमनान् मार्गान् vअतियाथः अतिक्रम्य गच्छथः ॥

यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे ।
स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात् ॥ ४ ॥

यः । भूयिष्ठम् । नासत्याभ्याम् । विवेष । चनिष्ठम् । पित्वः । ररते । विऽभागे ।
सः । तोकम् । अस्य । पीपरत । शमीभिः । अनूर्ध्वऽभासः । सदम । इत् । तुतुर्यात् ॥४॥

vयः यजमानः vविभागे हविर्विभागवति[2] यागे vनासत्याभ्याम् अश्विभ्यां vभूयिष्ठं vचनिष्ठम् । ' चन इत्यन्ननाम ' (निरु. ६. १६) । बह्वन्नं कर्म vविवेष करोति । vपित्वः ॥ कर्मणि षष्ठी ॥ अन्नं च vररते ददाति । vसः यजमानः vअस्य आत्मन एव vतोकं पुत्रं vपीपरत् पालयेत[3] vशमीभिः कर्मभिः । vअनूर्ध्वभासः अनुन्नतेजस्कान् । यद्वा । ऊर्ध्वभासोऽग्नयः । अग्निरहितानयष्टॄन् vसदमित् सदैव vतुतुर्यात् हिंस्यात् ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ ५ ॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥५॥

' समश्विनोः ' इति पञ्चमी गता[*] ॥ ॥ १८ ॥

' अश्विनावेह ' इति नवर्चं षष्ठं सूक्तम् । अत्रानुक्रमणिका—' अश्विनौ नव सप्तवध्रिरुष्णिगादि चतुर्थी त्रिष्टुप्पञ्चानुष्टुभः ' इति । सप्तवध्रिर्नामात्रेय ऋषिः । आदितस्तिस्र उष्णिहश्चतुर्थी त्रिष्टुप् शिष्टाः पञ्चानुष्टुभः । प्रातरनुवाक आश्विने क्रतौ औष्णिहे छन्दसि आश्विने शस्त्रे चाद्यस्तृचो विनियुक्तः । सूत्रितं च—' अश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ ' (आश्व. श्रौ. ४. १५) इति । दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽयमाश्विनस्तृचः । सूत्रितं च— ' अश्विनावेह गच्छतमा याह्यद्रिभिः सुतम् ' (आश्व. श्रौ. ७. १०) इति ॥

१. ख-च-ण-भ-हिरण्यवद्धितरूपः । २. त-र्हविर्भागवति । ३. ख-च-ण-पालयत ; झ-त-न-भ-र-पालयत । * ख-च-ण-पुस्तकेऽस्य मन्त्रस्य संपूर्ण भाष्यं विद्यते (पर्वसङ्क्रान्ते द्रष्टव्यम) ।

अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।
हंसाविव पततमा सुताँ उप ॥ १ ॥

अश्विनौ । आ । इह । गच्छतम् । नासत्या । मा । वि । वेनतम् ।
हंसौऽइव । पततम । आ । सुतान् । उप ॥ १ ॥

हे ¹अश्विनौ ²इह अस्मिन् यागे ³आ ⁴गच्छतम् । हे ¹नासत्या ²मा ³वि ⁴वेनतम् । वेनतिः कान्तिकर्मा । मा विकामौ भवतम् । निःस्पृहावकामौ वा न भवतमित्यर्थः । ¹हंसाविव नौ यथा निर्मलोदकमागच्छतस्तद्वत ²सुतान अभिषुतान सोमान ³उप ⁴आ ⁵पततम् उपागच्छतम् ॥

अश्विना हरिणाविव गौराविवानु यवसम् । हंसाविव पततमा सुताँ उप ॥२॥

अश्विना । हरिणौऽइव । गौरौऽइव । अनु । यवसम् ।
हंसौऽइव । पततम । आ । सुतान् । उप ॥ २ ॥

हे अश्विनौ ¹हरिणाविव ²गौराविव गौरमृगाविव च । नौ यथा ³यवसं¹ घासम्¹ ⁴अनु धावतः नाविव ⁵हंसाविव च सोममागच्छतम् ॥

अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये । हंसाविव पततमा सुताँ उप ॥३॥

अश्विना । वाजिनीवसू इति वाजिनीऽवसू । जुषेथाम् । यज्ञम् । इष्टये ।
हंसौऽइव । पततम् । आ । सुतान् । उप ॥ ३ ॥

हे ¹वाजिनीवसू अन्नार्थं वासयितारौ ²अश्विना ³यज्ञम् अस्मदीयम् ⁴इष्टये अभीष्टायैषणाय वा ⁵जुषेथां सेवेथाम् ॥

अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा ।
श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन ॥ ४ ॥

अत्रिः । यत् । वाम् । अवऽरोहन् । ऋबीसम् । अजोहवीत् । नाधमानाऽइव । योषा ।
श्येनस्य । चित् । जवसा । नूतनेन । आ । अगच्छतम् । अश्विना । शम्ऽतमेन ॥ ४ ॥

१. ख-च-ञ-ण-त-न-भ-र—यवसे घासाय ।

[v]अत्रिः अस्मत्पिता [v]यत् यदा [v]वां युवाम् [v]अजोहवीत् अस्तौषीत् [v]नाधमाना याचमाना [v]योषा योषितिव। सा यथा पतिं प्रीणयति तद्वत् कुर्वन् [v]ऋबीसं तृणाग्निमग्निकुण्डे क्षिप्तः सन् [v]अवरोहन् विमुञ्चन् अजोहवीत। [v]इयेनस्य [v]चिज्जवसा इयेनस्य गरुत्मत इव वेगेन। चिदित्युपमार्थे। अथवा इयेनस्य जवसा वेगेन [v]नूतनेन प्रथमोत्पन्नेन सततं गच्छतः इयेनस्य प्रथमजवेन [v]शंतमेन अस्माकं सुखतमेन च रथेन तं रक्षितुम् [1]आगच्छतं हे [v]अश्विना ॥ ॥ १९ ॥

अत्र ब्रुवन्तीतिहासं सप्तवध्रेः पुराविदः। भ्रातृव्याः पेटिकायां तमृषिं प्रक्षिप्य[2] यत्नतः ॥ मुद्रां कृत्वा गृहे स्वीये रक्षयित्वा न्यवेशयन्। न संगच्छेत भार्यां स्वां यथा रात्रौ तथा कृतम् ॥ प्रातःप्रातः समुद्घाट्य निर्मथिष्यन्ति तं मुनिम्। एवं स्थित्वा चिरं कालं पेटायां दुःखितः कृशः[3] ॥ उपायं चिन्तयामास निर्गमस्य चिरं मुनिः। हृदि निश्चित्य नासत्यावस्तौषीद्दृष्टमानसः ॥ तमश्विनौ समागत्य समुद्घाट्य च पेटिकाम्। उद्धृत्य तमृषिं शीघ्रं तावदष्टौ[4] बभूवतुः ॥ स ऋषिर्भार्यया सार्धं रमित्वाथ[5] पुनर्भयात्। प्रातरेत्य पुनः पेटां प्रविश्य प्रागिव स्थितः। पेटानिवासमसमये दृष्टवान् गृहं तदा[6] ॥

वि जिहीष्व वनस्पते योनिः सूष्यन्त्याइव।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् ॥ ५ ॥

वि। जिहीष्व। वनस्पते। योनिः। सूष्यन्त्याःऽइव।
श्रुतम्। मे। अश्विना। हवम्। सप्तऽवध्रिम्। च। मुञ्चतम् ॥ ५ ॥

हे [v]वनस्पते वनस्पतिविकाररूपे पेटिके [v]वि [v]जिहीष्व विगच्छ। विवृता भव। [v]सूष्यन्त्याइव प्रसवोन्मुख्याः स्त्रियाः [v]योनिः इव भगो यथा विवियते तथा त्वमपि विवृता भव। तदर्थं हे [v]अश्विना अश्विनौ [v]मे [1]हवम् आह्वानं [1]श्रुतं शृणुतम्। श्रुत्वा च [1]सप्तवध्रिं [1]च मामृषिं [v]मुञ्चतं मोचयतम् ॥

भीताय नाधमानाय ऋष्टये सप्तवध्रये।
मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥ ६ ॥

भीताय। नाधमानाय। ऋष्टये। सप्तऽवध्रये।
मायाभिः। अश्विना। युवम्। वृक्षम्। सम्। च। वि। च। अचथः ॥ ६ ॥

१. त–प्रक्षेप्य। २. ख-च-ज्ञ-ण-त-न-भ-र–शिशुः। ३. न–तावदर्थौ। ४. त–रमयित्वा। ५. ख-च-ज्ञ-ण-त-न-भ-र–तथा।

vभीताय निर्गमात् बिभ्युषे vनाधमानाय विमोक्षं याचमानाय vसप्तवध्रये vऋषये हे vअश्विना अश्विनौ vयुवं युवां vमायाभिः vवृक्षं वृक्षविकारां पेटिकां vमं[1] vचाचथः मम निर्गमार्थं संगच्छथः । vवि अचथः vच विभक्तं कुरुथः[2] ॥

यथा वातः पुष्करिणीं समिङ्गयति सर्वतः ।
एवा ते गर्भ एजतु निरैतु दशमास्यः ॥ ७ ॥

यथा । वातः । पुष्करिणीम् । सम्ऽइङ्गयति । सर्वतः ।
एव । ते । गर्भः । एजतु । निःऽऐतु । दशऽमास्यः ॥ ७ ॥

एतदादि ऋक्त्रयं गर्भस्राविण्युपनिषत् । एतदाद्यृक्त्रयेणासौ सप्तवध्रिः स्वयोषितः । गर्भिण्याः प्रसवायाशु स्तुतवानश्विनावृषिः ॥ vयथा vवातः vपुष्करिणीं सरआदिकं vसर्वतः vसमिङ्गयति सम्यक् चालयति vएव एवं तव vगर्भः vएजतु कम्पताम्[2] इतस्ततः संचरतु । vदशमास्यः दश मासान् गर्भे स्थितः vनिरैतु निर्गच्छतु ॥

यथा वातो यथा वनं यथा समुद्र एजति ।
एवा त्वं दशमास्य सहावेहि जरायुणा ॥ ८ ॥

यथा । वातः । यथा । वनम् । यथा । समुद्रः । एजति ।
एव । त्वम् । दशऽमास्य । सह । अव । इहि । जरायुणा ॥ ८ ॥

वातो यथा कम्पमानो वनं कम्पयति स्वयम् । यथा समुद्रश्चलति चाल्यते वाथ वायुना ॥
स्थित्वा दशैव मासांस्त्वं गर्भोल्बेन सुवेष्टितः । निर्गच्छ जठरान्मातुर्जरया सहितः पतेन ॥

दश मासाञ्छशयानः कुमारो अधि मातरि ।
निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ॥ ९ ॥

दश । मासान् । शशयानः । कुमारः । अधि । मातरि ।
निःऽऐतु । जीवः । अक्षतः । जीवः । जीवन्त्याः । अधि ॥ ९ ॥

दश मासानुषित्वासौ जननीजठरे सुखम् । निर्गच्छतु सुखं जीवो जननी चापि जीवतु ॥ ॥ २० ॥

१. ख-च-ञ-ण-न-भ-र-सं चाचथः संगच्छथः वि चाचथः विभक्तं कुरुथः ; त-श- मं चाचथः । प्रविष्टे मयि निर्गते वा प्रविष्टशंकापनोदार्थं व्यचथश्च विगमयतम् । मम निर्गमार्थं संगच्छथः व्यचथश्च विभक्तं कुरुथः । २. ख-च-ञ-ण-न-भ-र-कम्पयताम् ।

' महे नो अद्य ' इति दशर्चं सप्तमं सूक्तमात्रेयस्य सत्यश्रवस आर्षं पाङ्क्तमुपस्यम् । अनुक्रम्यते च — ' महे दश सत्यश्रवा उपस्यं तु पाङ्क्तम् ' इति । प्रातरनुवाके उपस्ये क्रतौ पाङ्क्ते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूच्यते हि—' महे नो अद्येति पाङ्क्तम् ' (आश्व. श्रौ. ४. १४) इति ॥

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ १ ॥

महे । नः । अद्य । बोधय । उषः । राये । दिवित्मती ।
यथा । चित् । नः । अबोधयः । सत्यऽश्रवसि । वाय्ये । सुऽजाते । अश्वऽसूनृते ॥ १ ॥

[v]अद्य अस्मिन् यागदिने हे [1]उषः उषोदेवि [v]दिवित्मती दीप्तिमती त्वं [1]नः अस्मान् [1]महे महते [v]राये धनप्राप्तये [v]बोधय प्रज्ञापय । प्रकाशयेत्यर्थः । सति प्रकाशे क्रतुद्वारा द्रव्यस्योपार्जयितुं शक्यत्वात् । [v]यथा [v]चित् यथैव पूर्वं [v]नः अस्मान् [1]अबोधयः अतीतेषु दिवसेषु यथा बोधितवती तद्वदद्यापि इत्यर्थः । हे [v]सुजाते शोभनप्रादुर्भूते[2] [1]अश्वसूनृते । अश्वार्था प्रियसत्यात्मिका स्तुतिवाक् यस्याः सा । हे तादृशि देवि [v]वाय्ये वय्यपुत्रे [v]सत्यश्रवसि मय्यनुगृहाणेत्यर्थः ॥

या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।
सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ २ ॥

या । सुऽनीथे । शौचत्ऽरथे । वि । औच्छः । दुहितः । दिवः ।
सा । वि । उच्छ । सहीयसि । सत्यऽश्रवसि । वाय्ये । सुऽजाते । अश्वऽसूनृते ॥ २ ॥

हे [v]दिवः [v]दुहितः दिवः सूर्यस्य पुत्र्युषः [v]या त्वं [v]सुनीथे एतन्नामके[2] [1]शौचद्रथे शुचद्रथस्यापत्ये पूर्वं [v]व्यौच्छः व्यवामयस्तमांसि [v]सा त्वं [v]सहीयसि अतिशयेन बलवति [v]वाय्ये वय्यपुत्रे [v]सत्यश्रवसि मयि [v]व्युच्छ तमो विवासय । ' उच्छी विवासे ' । विवासो वर्जनम् । शिष्टमुक्तम् ॥

सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
यो व्यौच्छः महीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ३ ॥

सा । नः । अद्य । आभरत्ऽवसुः । वि । उच्छ । दुहितः । दिवः ।
यो इति । वि । औच्छः । सहीयसि । सत्यऽश्रवसि । वाय्ये । सुऽजाते । अश्वऽसूनृते ॥३॥

१. ख-च-ञ-ण-न-भ-र –' शोभनप्रादुर्भूते ' नास्ति । २. ख-च-ञ-ण-न-भ-र–एतन्नामिके ।

हे [v]दुहितर्दिवः उषः [v]आभरद्वसुः आहृतधना [v]सा प्रसिद्धा त्वं [v]नः अस्माकम् [v]अद्य अस्मिन् दिने [v]व्युच्छ तमो विवासय । हे [v]महीयमि [v]यो या । उकारोऽनर्थकः । या त्वं पूर्वं [v]व्यौच्छः साद्यापीति ॥

अभि ये त्वा विभावरि स्तोमैर्गृणन्ति वह्नयः ।
मघैर्मघोनि सुश्रियो दामन्वन्तः सुरातयः सुजाते अश्वसूनृते ॥ ४ ॥

[1]अभि । ये । त्वा । विभाऽवरि । स्तोमैः । गृणन्ति । वह्नयः ।
मघैः । मघोनि । सुऽश्रियः । दामन्ऽवन्तः । सुऽरातयः । सुऽजाते । अश्वऽसूनृते ॥ ४ ॥

हे [v]विभावरि प्रकाशोपेते ॥ विभाशब्दात् ' छन्दसीवनिपौ ' इति वनिप् । भानेर्वा कर्तरि वनिप् ॥ उषः [v]त्वा त्वाम् [v]अभि प्रति [v]ये [1]वह्नयः वोढारः ऋत्विजः स्तोतारः [v]स्तोमैः स्तोत्रैः [v]गृणन्ति स्तुवन्ति ते स्तोतारः [v]मघैः हे [v]मघोनि धनैर्धनवति त्वदनुग्रहात [v]सुश्रियः भवन्ति । सुष्ठ्वर्थिभिराश्रयणीया भवन्ति । [1]दामन्वन्तः दानवन्तो भवन्ति । [v]सुरातयः । रातिर्दानम् । सुदानाश्च भवन्ति ॥

यच्चिद्धि ते गणा इमे छदयन्ति मघत्तये ।
परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥ ५ ॥

यत् । चित् । हि । ते । गणाः । इमे । छदयन्ति । मघत्तये ।
परि । चित् । वष्टयः । दधुः । ददतः । राधः । अह्रयम् । सुऽजाते । अश्वऽसूनृते ॥ ५ ॥

हे उषः [v]यच्चिद्धि । हीति पूरणः । यत् ये केचन [v]ते तव स्वभूताः [v]इमे पुरतो वर्तमानाः [v]गणाः संघभूताः [1]मघत्तये धनदातये धनदानाय[2] धनवत्त्वाय वा [v]छदयन्ति उपच्छन्दयन्ति ते सर्वेऽप्यस्मान् [v]परि [v]दधुः परितो धारयन्ति [v]वष्टयः अस्मानेव कामयमानाः । किं कुर्वन्तः । [v]अह्रयम् अह्रियमाणमक्षीणमलज्जावहं वा [v]राधः धनं हविर्लक्षणं [v]ददतः यजन्त इत्यर्थः । अर्थिभ्योऽक्षीणं ददतो वा । ये त्वां हविर्ददतः स्तुवन्ति ते सर्वेऽप्यस्मदर्थमेव फलं धारयन्ति । स्तुवन्तीत्यर्थः । अथवा यच्चिद्धीत्यत्र[2] यद्यपीति व्याख्येयम् । तस्मिन् पक्षे उत्तरवाक्ये तथार्थोऽध्याहार्यम् । अवशिष्टं समानम् ॥ ॥ २१ ॥

ऐषु धा वीरवद्यश उषो मघोनि सूरिषु ।
ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥ ६ ॥

आ । एषु । धाः । वीरऽवत् । यशः । उषः । मघोनि । सूरिषु ।
ये । नः । राधांसि । अह्रया । मघऽवानः । अरासत । सुऽजाते । अश्वऽसूनृते ॥ ६ ॥

१. ख-च-झ-ण-भ-धनदत्ताय ; न-र-धनदत्त्वाय ; श- धनवत्तये । २ झ-भ- यद्यद्धीत्यत्र ; न- यच्चिदित्यत्र ; र-यद्यद्धीत्यत्र ।

हे [V]उषः देवि [V]मघोनि मघवति त्वम् [V]एषु [1]सूरिषु स्तोतृषु वा [V]वीरवद्यशः वीरैः पुत्रादिभिरुपेतमन्नं यशो वा [V]आ [V]धाः आधेहि । आदेहि आनय [V]ये [V]मघवानः धनवन्तः सूरयः [V]नः अस्मभ्यं तव स्तोतृभ्यः [V]राधांसि धनानि [V]अक्षया अक्षीणानि [V]अरासत ददुः तेभ्यित्यर्थः ॥

तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह ।
ये नो राधांस्यश्व्या गव्या भजन्त सूरयः सुजाते अश्वसूनृते ॥ ७ ॥

तेभ्यः । द्युम्नम् । बृहत् । यशः । उषः । मघोनि । आ । वह ।
ये । नः । राधांसि । अश्व्या । गव्या । भजन्त । सूरयः । सुऽजाते । अश्वऽसूनृते ॥ ७ ॥

हे [V]उषो [V]मघोनि त्वं [V]तेभ्यो [V]द्युम्नं द्योतमानं हिरण्यादिरूपं धनं [V]बृहद्यशः महदन्नं महतीं कीर्तिं वा तेभ्यो यजमानेभ्यः [V]आ [V]वह । [V]ये आढ्याः [V]नः अस्मभ्यं [V]राधांसि धनानि [V]अश्व्या अश्वैर्युक्तानि [V]गव्या गोभिर्युक्तानि गोसमूहानश्वसमूहान् च [V]भजन्त [2]भजेरन् ददुः [V]सूरयः दातारः॥

उत नो गोमतीरिष आ वहा दुहितर्दिवः ।
साकं सूर्यस्य रश्मिभिः शुक्रैः शोचद्भिरर्चिभिः सुजाते अश्वसूनृते ॥ ८ ॥

उत । नः । गोऽमतीः । इषः । आ । वह । दुहितः । दिवः ।
साकम् । सूर्यस्य । रश्मिऽभिः । शुक्रैः । शोचत्ऽभिः । अर्चिऽभिः ।
सुऽजाते । अश्वऽसूनृते ॥ ८ ॥

[V]उत अपि च [V]नः अस्मभ्यं [V]गोमतीः गोभिरुपेतानि [V]इषः अन्नानि [V]आ [V]वह आनय हे [V]दिवः [V]दुहितः उषः । कदा । [V]सूर्यस्य [V]रश्मिभिः [V]साकं [V]शोचद्भिः दीप्यद्भिः [V]शुक्रैः निर्मलैः [V]अर्चिभिः अग्नेस्तेजोभिश्च साकम् । सूर्योदयकालेऽग्नीन्धनकाले चेत्यर्थः ॥

व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः ।
नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते ॥ ९ ॥

वि । उच्छ । दुहितः । दिवः । मा । चिरम् । तनुथाः । अपः ।
न । इत् । त्वा । स्तेनम् । यथा । रिपुम् । तपाति । सूरः । अर्चिषा ।
सुऽजाते । अश्वऽसूनृते ॥ ९ ॥

१. ख-च-झ-ण-त-न-भ-र-श- 'एषु' नास्ति । २. ख-च-ण-न-भ-र-चेति विभजन्त ; ग-घ-ज-श- भजन्त ; झ- चेति भजन्त ।

हे [v]दिवः [v]दुहितः उषः त्वं [v]व्युच्छ विभातं कुरु । [v]अपः अस्मदीयं कर्म प्रति [v]चिरं विलम्बं [v]मा [v]तनुथाः मा[1] कृथाः[2] । [v]त्वा त्वां [v]रिपुं [v]स्तेनं [v]यथा संतापयति राजादिः तद्वत् [v]सूरः सूर्यः [v]अर्चिषा तेजसा [v]नेत् नैव [v]तपाति तप्यात । शीघ्रं नोदेष्यित्यर्थः ॥

एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि ।
या स्तोतृभ्यो विभावर्युच्छन्ती न प्रमीयसे सुजाते अश्वसूनृते ॥ १० ॥

एतावत् । वा । इत् । उषः । त्वम् । भूयः । वा । दातुम् । अर्हसि ।
या । स्तोतृऽभ्यः । विभाऽवरि । उच्छन्ती । न । प्रऽमीयसे । सुऽजाते । अश्वऽसूनृते ॥ १० ॥

हे [v]उषः त्वमस्मभ्यं [v]वा अथवा दित्सितं किम्[3] [v]एतावत एव[4] । इच्छब्द एवकारार्थः । अस्मिन् सूक्ते प्रार्थितमेवेत्यर्थः । अथवा [v]भूयः [v]दातुमर्हसि । अप्रार्थितमपि । यदातव्यमस्ति तत्सर्वं देहि इत्यर्थः । हे [v]विभावरि उषः [v]या त्वं [v]स्तोतृभ्यः तेषां लौकिकवैदिकव्यवहारार्थं व्युच्छन्ती तमो विवासयन्ती [v]न [v]प्रमीयसे न हंसि । न क्रुध्यसीत्यर्थः । मा त्वं दातुमर्हसीति ॥ 'मीञ् हिंसायाम्' इत्यस्मात् आम्थाने व्यत्ययेन इयन् ॥ ॥ २२ ॥

'द्युतद्यामानम्' इति षड्ऋचमष्टमं सूक्तम् । अत्रानुक्रमणिका—'द्युतद्यामानं षट्' इति । सत्यश्रवा ऋषिः । अनुक्तत्वात् त्रिष्टुप् । 'उषस्यं तु' इत्युक्तत्वात् उषाः[5] देवता[6] । प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—'द्युतद्यामानमुषो वाजेन' (आश्व. श्रौ. ४. १४) इति ॥

द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीम् ।
देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते ॥ १ ॥

द्युतत्ऽयामानम् । बृहतीम् । ऋतेन । ऋतऽवरीम् । अरुणऽप्सुम् । विऽभातीम् ।
देवीम् । उषसम् । स्वः । आऽवहन्तीम् ।
प्रति । विप्रासः । मतिऽभिः । जरन्ते ॥ १ ॥

[v]द्युतद्यामानं दीप्तरथां [v]बृहतीं महतीम् [v]ऋतेन सत्येन यज्ञेन वा [v]ऋतावरीम् ऋतवतीम् [v]अरुणप्सुम् अरुणरूपां [v]विभातीं व्युच्छन्तीं [v]देवीं द्योतमानाम् [v]उषसं [v]स्वरावहन्तीं सूर्यं गच्छन्तीम् । एवं महानुभावाम् उषसं[7] [v]विप्रासः मेधाविन ऋत्विजः [v]मतिभिः स्तुतिभिः [v]प्रति[8] [v]जरन्ते स्तुवन्ति ॥

१. ग-घ-ज-झ-त-र-श–'मा कृथाः' नास्ति । २. ख-च-ण-न–किमेतावदित् किमेतावदेव ; झ-त-भ-र–किमेतावत् हे यदित् । ३. ग-घ-ज-झ-न-भ-र-श– उषोदेवता । ४. त–उषसं प्रति । ५. ख-च-ण-न– 'प्रति' नास्ति ।

एषा जनं दर्शता बोधयन्ती सुगान्पथः कृण्वती यात्यग्रे ।
बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम् ॥ २ ॥

एषा । जनम् । दर्शता । बोधयन्ती । सुऽगान् । पथः । कृण्वती । याति । अग्रे ।
बृहत्ऽरथा । बृहती । विश्वम्ऽइन्वा । उषाः । ज्योतिः । यच्छति । अग्रे । अह्नाम् ॥ २ ॥

vदर्शता दर्शनीया vएषा उषाः vबोधयन्ती । कम् । vजनम् । प्रसुप्तमित्यर्थः । vपथः vसुगान् सुगमनान् vकृण्वती vअग्रे सूर्यस्य पुरस्तात् vयाति गच्छति । कीदृश्युषाः vबृहद्रथा प्रभूतरथा vबृहती महती vविश्वमिन्वा विश्वं व्याप्नुवाना विश्वतर्पणा वा । ईदृशी vउषाः vअह्नाम् vअग्रे vज्योतिः तेजः vयच्छति ॥

एषा गोभिररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे ।
पथो रदन्ती सुवितायं देवी पुरुष्टुता विश्ववारा वि भाति ॥ ३ ॥

एषा । गोभिः । अरुणेभिः । युजाना । अस्रेधन्ती । रयिम् । अप्रऽआयु । चक्रे ।
पथः । रदन्ती । सुवितायं । देवी । पुरुऽस्तुता । विश्वऽवारा । वि । भाति ॥ ३ ॥

vएषा उषाः vअरुणेभिः अरुणवर्णैः vगोभिः बलीवर्दैः रथं vयुजाना योजयन्ती vअस्रेधन्ती अशुष्यन्त्यक्षीणा वा । किम् । vरयिं धनम् vअप्रायु अप्रगन्तृ अविचलितं vचक्रे करोति । किं कुर्वती । vपथः मार्गान् vरदन्ती प्रकाशयन्ती । किमर्थम् । vसुविताय सुष्ठु गमनाय vदेवी द्योतमाना vपुरुष्टुता बहुभिः स्तुता vविश्ववारा सर्वैर्वरणीया vवि vभाति प्रकाशं करोति ॥

एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ४ ॥

एषा । विऽएनी । भवति । द्विऽबर्हाः । आविःऽकृण्वाना । तन्वम् । पुरस्तात् ।
ऋतस्य । पन्थाम् । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः । मिनाति ॥ ४ ॥

vएषा उषाः vव्येनी vभवति विशेषेण श्वेता भवति vद्विबर्हाः द्वयोः प्रथममध्यमयोः स्थानयोः[१] परिवृढोषाः पश्चात् vतन्वं स्वीयां तनूम् vआविष्कृण्वाना प्रकटीकुर्वती । कुत्र । vपुरस्तात् पूर्वस्यां दिशि । किंच vऋतस्य आदित्यस्य vपन्थां पन्थानं vसाधु सम्यक् vअन्वेति । किंच vप्रजानतीव विश्वं प्रज्ञापयन्ती । इवेति संप्रत्यर्थे । vन vदिशो vमिनाति न हिनस्ति । प्रत्युत दिशः प्रकाशयति । अथवा प्रजानतीव अनुगन्तव्यमिति प्रकर्षेण अवगच्छन्ती[२] च[२] ऋतस्य पन्थामन्वेति ॥

१. ग-घ-ज-श– 'स्थानयोः' नास्ति । २. ख-च-झ-ण-न-भ–अवगच्छन्तीव ।

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥ ५ ॥

एषा । शुभ्रा । न । तन्वः । विदाना । ऊर्ध्वाऽइव । स्नाती । दृशये । नः । अस्थात् ।
अप । द्वेषः । बाधमाना । तमांसि ।
उषाः । दिवः । दुहिता । ज्योतिषा । आ । अगात् ॥ ५ ॥

vएषा उषाः vशुभ्रा vन शुभ्रवर्णा निर्मला स्वलंकृता योषिदिव vतन्वः अङ्गानि vविदाना प्रज्ञापयन्ती vस्नाती स्नानं कुर्वाणा vऊर्ध्वेव उन्नतेव स्नानादुत्तिष्ठन्तीव vनः अस्मदर्थम् अस्माकं पुरतो वा vदृशये सर्वेषां दर्शनाय उत vअस्थात् पूर्वस्यां दिशि उत्तिष्ठति[1]। किं कुर्वती । vद्वेषः द्वेष्याणि vतमांसि vअप vबाधमाना vदिवो vदुहिता vउषाः vज्योतिषा तेजसा सह vआगात आगच्छति ॥

एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः ।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥ ६ ॥

एषा । प्रतीची । दुहिता । दिवः । नॄन् । योषाऽइव । भद्रा । नि । रिणीते । अप्सः ।
विऽऊर्ण्वती । दाशुषे । वार्याणि । पुनः । ज्योतिः । युवतिः । पूर्वऽथा । अकरित्यकः ॥ ६ ॥

vएषा उषाः vप्रतीची अभिमुखा सती vदिवः vदुहिता vनॄन् सर्वान् प्राणिनः प्रति vभद्रा vयोषेव कल्याणवेषा योषिदिव vअप्सः रूपं vनि vरिणीते प्रेरयति । किंच vदाशुषे हविर्दात्रे यजमानाय vवार्याणि[2] वरणीयानि धनानि vव्यूर्ण्वती प्रयच्छन्ती vयुवतिः नित्ययौवना सर्वत्र मिश्रयन्ती वा vपुनः अद्यापि vपूर्वथा पूर्वमिव vज्योतिः तेजः vअकः करोति ॥ ॥ २३ ॥

' युञ्जते मनः ' इति पञ्चर्चं नवमं सूक्तम् । अत्रेयमनुक्रमणिका—' युञ्जते पञ्च इयावाश्वः सावित्रं तु जागतम् ' इति । इयावाश्वो नामात्रेय ऋषिः । जगती छन्दः । सविता देवता । पृष्ठ्याभिप्लव-षडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदम् । सूत्रितं च—' युञ्जते मन इहेह व इति चतस्रः ' (आश्व. श्रौ. ७. ५) इति । आद्या प्रावस्तोत्रेऽपि । सूत्रितं च— ' युञ्जते मन उत युञ्जते धिय आ तू न इन्द्र शुमन्तम् ' (आश्व. श्रौ. ५. १२) इति ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ १ ॥

युञ्जते । मनः । उत । युञ्जते । धियः । विप्राः । विप्रस्य । बृहतः । विपःऽचितः ।
वि । होत्राः । दधे । वयुनऽअवित् । एकः । इत् । मही । देवस्य । सवितुः । परिऽस्तुतिः ॥ १ ॥

१. ख-च-ञ-ण-भ- उत्तिष्ठती ; ग-घ-ज-र-श–उत्तिष्ठन्ती । २. ख-च-ञ-ण-न-भ-र-किच वार्याणि ।

[v]विप्राः मेधाविन ऋत्विग्यजमानाः[१] [v]मनः स्वीयं सर्वेषु कर्मसु [v]युञ्जते योजयन्ति । सवित्रनुग्रहाय संकल्पं कुर्वन्तीत्यर्थः । [v]उत अपि च [v]धियः कर्माण्यपि [v]युञ्जते प्राप्नुवन्ति । कस्यानुज्ञयेत्युच्यते । [v]विप्रस्य मेधाविनः [v]बृहतः महतः [v]विपश्चितः स्तुत्यस्य ज्ञानवतो वा सवितुः अनुज्ञयेति । ' सविता वै प्रसवानामीशे ' (ऐ. ब्रा. ७. १६) इति हि श्रुतिः । स एव सविता [v]होत्राः सप्तहोत्रकाणामुचिताः क्रियाः [v]वयुनावित् । वयुनमिति प्रज्ञानाम । तत्तदनुष्ठानविषयप्रज्ञावेत्ता [v]एक [v]इत् एक एव [v]वि [v]दधे करोति । पृथक्पृथगवधारयति[२] । किंच तस्य [v]सवितुः [v]देवस्य [v]परिष्टुतिः स्तुतिः [v]मही महती अतिप्रभूता । स्तुत्यगोचरेत्यर्थः ॥

हविर्धानप्रवर्तने रराटयामवनद्धायां ' विश्वा रूपाणि ' इत्येषानुवचनीया । सूत्रितं च— ' विश्वा रूपाणि प्रति मुञ्चते कविरिति व्यवस्तायाम् ' (आश्व. श्रौ. ४. ९) इति ॥

विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ २ ॥

विश्वा । रूपाणि । प्रति । मुञ्चते । कविः । प्र । असावीत् । भद्रम् । द्विऽपदे । चतुःऽपदे ।
वि । नाकम् । अख्यत् । सविता । वरेण्यः । अनु । प्रऽयाणम् । उषसः । वि । राजति ॥२॥

[v]कविः मेधावी सविता [v]विश्वा सर्वाणि [v]रूपाणि आत्मनि [v]प्रति [v]मुञ्चते बध्नाति धारयति । किंच [v]भद्रं कल्याणं गमनादिविषयं [v]प्रासावीत् अनुजानाति । कस्मै । [v]द्विपदे मनुष्यायः[३] [v]चतुष्पदे गवाश्वादिकाय । किंच [v]सविता सर्वस्य प्रेरको देवः [v]वरेण्यः वरणीयः सन् [v]वि [v]अख्यत् ख्यापयति प्रकाशयति । किम् । [v]नाकम् । नास्मिन्नकं दुःखमस्तीति नाकः स्वर्गः । यजमानार्थं स्वर्गं प्रकाशयतीत्यर्थः । स देवः [v]उषसः [v]प्रयाणम् उदयम् [v]अनु [v]वि [v]राजति प्रकाशते । सवितुरुदयात् पूर्वं ह्युषा उदेति ॥

यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥ ३ ॥

यस्य । प्रऽयाणम् । अनु । अन्ये । इत् । ययुः । देवाः । देवस्य । महिमानम् । ओजसा ।
यः । पार्थिवानि । विऽममे । सः । एतशः । रजांसि । देवः । सविता । महिऽत्वना ॥ ३ ॥

[v]अन्य [v]इत् [v]देवाः अन्येऽप्यग्न्यादयः [v]यस्य [v]देवस्य द्योतमानस्य सवितुः [v]प्रयाणमनु [v]ययुः गच्छन्ति प्राप्नुवन्ति । किम् । [v]महिमानं महत्त्वम् । सवितुरुदयाभावे अग्निहोत्राद्यनिष्पत्तेस्तेषां हविःस्तुत्याद्यभावात् । [v]ओजसा बलेन च युक्ता भवन्ति । [v]यः [v]सविता [v]पार्थिवानि [v]रजांसि

१. ख-च-ण–ऋत्विजः यजमानाः । २. ख-च-ण–पृथक्पृथगधारयति ; ज्ञ-त-न-भ-र– पृथक्पृथग्वा धारयति । ३. त-न-भ-र– मनुष्यादये ।

पृथिव्यादिलोकान् [v]महित्वना स्वमहत्त्वेन [v]विममे परिच्छिनत्ति [v]सः [v]देवः [v]एतशः एतवर्णः शुभ्रः शोभमानः सन् । राजते इति शेषः । ' युवशा ताकृणोतन ' (ऋ. सं. १. १६१. ७) इत्यादिवत् एतश इत्यादिशकारोपजनश्छान्दसः ॥

उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि ।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥ ४ ॥

उत । यासि । सवितरिति । त्रीणि । रोचना । उत । सूर्यस्य । रश्मिऽभिः । सम् । उच्यसि ।
उत । रात्रीम् । उभयतः । परि । ईयसे । उत । मित्रः । भवसि । देव । धर्मऽभिः ॥ ४ ॥

हे [v]सवितः देव [v]उत अपि च [v]त्रीणि [v]रोचना रोचमानान् द्युलोकान् [v]यासि गच्छसि । ' तिस्रो दिवः पृथिवीः ' (ऋ. सं. ४. ५३. ५) इत्युक्तम् । [v]उत अपि च [v]सूर्यस्य [v]रश्मिभिः [v]समुच्यसि संगच्छसि ॥ ' उच समवाये ' इत्यस्येदं रूपम् ॥ उदयात् पूर्वभावी सविता उदयास्तमयवर्ती सूर्य इति । [v]उत अपि च [v]रात्रीमुभयतः उभयपार्श्वे [v]परीयसे परिगच्छसि । [v]उत अपि च हे [v]देव सवितस्त्वं [v]धर्मभिः जगद्धारकैः कर्मभिः [v]मित्रो [v]भवसि मित्राख्यो देवो भवसि । अथवा प्रकाशादिप्रदानेन सखा भवसि सर्वजगताम् ॥

उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥ ५ ॥

उत । ईशिषे । प्रऽसवस्य । त्वम् । एकः । इत् । उत । पूषा । भवसि । देव । यामऽभिः ।
उत । इदम् । विश्वम् । भुवनम् । वि । राजसि ।
श्यावऽअश्वः । ते । सवितरिति । स्तोमम् । आनशे ॥ ५ ॥

हे सवितः [v]त्वमेक [v]इत् एक एव [v]प्रसवस्य सर्वकर्मानुज्ञाकरणस्य [v]ईशिषे समर्थो भवसि । ये लौकिकं गमनादिरूपं वैदिकमग्निहोत्रादिरूपं कर्मानुतिष्ठन्ते तेषां सर्वेषामनुज्ञातुमेक एव प्रभवसि । [v]उत अपि च [v]पूषा पोषकः [v]भवसि हे [v]देव [v]यामभिः गमनैः । [v]उत अपि च [v]इदं [v]विश्वं [v]भुवनं भूतजातं [v]वि [v]राजसि ईशिषे धारयितुम् । यस्मादेवं महानुभावस्तस्मात् हे [v]सवितः [v]ते तुभ्यं [v]श्यावाश्वः ऋषिः [v]स्तोमं स्तोत्रम् [v]आनशे व्याप्नोति करोति । इत्येवमात्मानं परोक्षतया निर्दिशन्नाह ॥ ॥ २४ ॥

' तत्सवितुः ' इति नवर्चं दशमं सूक्तं श्यावाश्वस्यार्षम् । अत्रेयमनुक्रमणिका—' तत्सवितुर्नव गायत्रमाद्यानुष्टुप् ' इति । प्रथमानुष्टुप् शिष्टा गायत्र्यः । ' सावित्रं तु ' इत्युक्तत्वात् सावित्रम् ।

अग्निष्टोमे वैश्वदेवशस्त्रस्याद्यस्तृचः प्रतिपत् ' अद्या नो देव ' इत्यनुचरः । सूत्रितं च—' तत्स-वितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ५.१८) इति[1] ॥

तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥ १ ॥

तत् । सवितुः । वृणीमहे । वयम् । देवस्य । भोजनम् ।

श्रेष्ठम् । सर्वऽधातमम् । तुरम् । भगस्य । धीमहि ॥ १ ॥

vतत् प्राप्यत्वेन प्रसिद्धं vभोजनं भोग्यं धनं vवयं स्तोतारः vवृणीमहे प्रार्थयामः । कस्य धनम् । vसवितुः प्रेरकस्य vदेवस्य स्वभूतम् । लब्ध्वा च vश्रेष्ठं प्रशस्यं vसर्वधातमं सर्वधातृतमम् । सर्वभोगप्रदमित्यर्थः । vतुरं शत्रूणां हिंसकम् । धनेन शत्रून् हन्तुं शक्यत्वात् । तादृशं धनं vभगस्य भजनीयस्य सवितुरनुग्रहात् vधीमहि धारयाम । उपभोगं करवामेत्यर्थः । अथवा धनं वृणीमहे अर्थित्वाच्च लभेमहीति ॥

अस्य हि स्वयंशस्तरं सवितुः कच्चन प्रियम् । न मिनन्ति स्वराज्यम् ॥ २ ॥

अस्य । हि । स्वयंशःऽतरम् । सवितुः । कत् । चन । प्रियम् ।

न । मिनन्ति । स्वऽराज्यम् ॥ २ ॥

vअस्य vसवितुः vस्वयशस्तरं स्वयमसाधारणं यशो यस्यातिशयेन भवति तत्तादृशं vप्रियं सर्वेषां प्रियभूतं vस्वराज्यं स्वयमेव राजमानत्वमैश्वर्यं vकच्चन केचिदप्यसुरादयः vन vमिनन्ति न हिंसन्ति ॥

स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्रमीमहे ॥ ३ ॥

सः । हि । रत्नानि । दाशुषे । सुवाति । सविता । भगः ।

तम् । भागम् । चित्रम् । ईमहे ॥ ३ ॥

vस vहि स खलु vसविता vभगः भजनीयो देवः vदाशुषे हविर्दात्रे मह्यं vरत्नानि रमणीयानि धनानि vसुवाति प्रेरयति प्रयच्छति । vतं देवं vभागं भजनीयं vचित्रं चायनीयं धनम् vईमहे याचामहे ॥

' अद्या नः ' इति चतुर्थीपञ्चमीभ्याममनोज्ञस्वप्नदर्शने प्रत्यृचं जुहुयात् । ' अद्या नो देव सवितरिति द्वाभ्याम् ' (आश्व. गृ. ३. ६. ६) इति हि सूत्रितम् ॥

१. न– इति । उपनयने अञ्जल्यवक्षारणे तत्सवितुरित्येषा । सूत्रितं च– तत्सवितुर्वृणीमहे इति पूर्णेनास्य पूर्णमवक्षारयतीति । तथा पुनरुपनयने गायत्र्या स्थानेऽप्येषा । सूत्रितं च–परिदानकालश्च तत्स-वितुर्वृणीमहे इति सावित्रीमिति ।

अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यं सुव ॥ ४ ॥

अद्य । नः । देव । सवितरिति । प्रजाऽवत् । सावीः । सौभगम् ।

परा । दुःऽस्वप्न्यम् । सुव ॥ ४ ॥

हे ᵛसवितः ᵛदेव ᵛनः अस्मभ्यम् ᵛअद्य अस्मिन् यागदिने ᵛप्रजावत् पुत्राद्युपेतं ᵛसौभगं धनं ᵛसावीः प्रेरय । ᵛदुःष्वप्न्यं दुःस्वप्नं दुःस्वप्नवद्दुःखकरं दारिद्र्यं ᵛपरा ᵛसुव दूरे प्रेरय ॥

विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥ ५ ॥

विश्वानि । देव । सवितः । दुःऽइतानि । परा । सुव ।

यत् । भद्रम् । तत् । नः । आ । सुव ॥ ५ ॥

हे ᵛसवितः ᵛदेव त्वं ᵛविश्वानि ᵛदुरितानि ᵛपरा ᵛसुव । ᵛयद्भद्रं प्रजापशुगृहादिकं ᵛतत् ᵛनः अस्मभ्यम् ᵛआ ᵛसुव अस्मदभिमुखं प्रेरय[1] । 'प्रजा वै भद्रं पशवो भद्रं गृहं भद्रम्' इति हि श्रुतिः ॥ ॥ २५ ॥

अनागसो अदितये देवस्य सवितुः सवे । विश्वा वामानि धीमहि ॥ ६ ॥

अनागसः । अदितये । देवस्य । सवितुः । सवे ।

विश्वा । वामानि । धीमहि ॥ ६ ॥

वयमनुष्ठातारः ᵛसवितुः प्रेरकस्य ᵛदेवस्य ᵛसवे अनुज्ञायां सत्याम् ᵛअदितये अखण्डनीयायै देव्यै भूम्यै ᵛअनागसः स्याम अनपराधिनो भवेम । भूम्यां हि पापाः संभवन्ति । अपगतेष्वागःसु ᵛविश्वा सर्वाणि ᵛवामानि वननीयानि धनानि ᵛधीमहि धारयाम ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि सावित्रस्य द्वादशकपालस्य 'आ विश्वदेवम्' इत्यनुवाक्या । सूत्रितं च—'आ विश्वदेवं सत्पतिं वाममद्य सवितः' (आश्व. श्रौ. २.१६) इति । प्रायणीये एषैव सवितुरनुवाक्या । सूत्रितं च—'आ विश्वदेवं सत्पतिं य इमा विश्वा जातानि' (आश्व. श्रौ. ४. ३) इति । देवसुवां हविःषु एषैव सवितुरनुवाक्या । सूत्रितं च—'आ विश्वदेवं सत्पतिं न प्रमिये सवितुर्दैव्यस्य तत्' (आश्व. श्रौ. ४. ११) इति ॥

आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ॥ ७ ॥

आ । विश्वऽदेवम् । सत्ऽपतिम् । सुऽउक्तैः । अद्य । वृणीमहे ।

सत्यऽसवम् । सवितारम् ॥ ७ ॥

---

१. ख-च-ञ-ण-भ-र-प्रेरय प्रजापशुगृहादिकं प्रेरय ; त-प्रेरय प्रजापशुगृहादिकम् ।

[v]विश्वदेवम् । विश्वे देवा यस्य वशे भवन्ति तं तादृशम् । स हि सर्वात्मा, 'इन्द्रं मित्रं वरुणमग्निमाहुः' (ऋ. सं. १. १६४. ४६) इत्यादिश्रुतेः इतरेषां तद्विभूतित्वात् । [v]सत्पतिं सतामनुष्ठातृणां पालकं [v]सत्यसवं सत्यानुज्ञं [v]सवितारं देवम् [v]अद्य अस्मिन् यागदिने [v]सूक्तैः [v]आ [v]वृणीमहे संभजामहे ॥

य इमे उभे अहनी पुर एत्यप्रयुच्छन् । स्वाधीर्देवः सविता ॥ ८ ॥

यः । इमे इति । उभे इति । अहनी इति । पुरः । एति । अप्रऽयुच्छन् ।

सुऽआधीः । देवः । सविता ॥ ८ ॥

[v]यः [v]सविता [v]देवः [v]स्वाधीः शोभनाध्यानः सुकर्मा वा सन् [v]इमे [v]अहनी राज्यहनी तयोः [v]पुरः पुरस्तात् [v]अप्रयुच्छन् अप्रमाद्यन् [v]एति गच्छति तम् आ वृणीमहे इति संबन्धः ॥

प्रायणीये 'य इमा विश्वा' इति सवितुर्याज्या । सूत्रितं च— 'य इमा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसम्' (आश्व. श्रौ. ४. ३) इति । अश्वमेधेऽश्वमुत्सृज्यानुसवनं सावित्रीष्टिः कार्या । तस्यामेषा माध्यंदिने सवनेऽनुवाक्या । सूत्रितं च—'य इमा विश्वा जातान्या देवो यातु सविता सुरत्नः' (आश्व. श्रौ. १०.६) इति ॥

य इमा विश्वा जातान्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥ ९ ॥

यः । इमा । विश्वा । जातानि । आऽश्रवयति । श्लोकेन । प्र । च । सुवाति । सविता ॥९॥

[v]यः देवः [v]इमा इमानि [v]विश्वा सर्वाणि [v]जातानि उत्पन्नान् प्राणिनः । जङ्गमानित्यर्थः । तान् [v]श्लोकेन यशसा [v]आश्रावयति । सर्वेऽप्यस्य स्तुतिं शृण्वन्तीत्यर्थः । अथवा गर्जनशब्देन सर्वाणि इमान्युत्पन्नान्याश्रावयति वृष्ट्युन्मुखः सन् । किंच [v]सविता [v]प्र [v]सुवाति [v]च[1] प्रेरयति तं वृणीमहे इति[2] ॥ ॥ २६ ॥

'अच्छा वद' इति दशर्चमेकादशं सूक्तं भौमस्यात्रेरार्षम् । अत्रेयमनुक्रमणिका—'अच्छ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपान्त्यानुष्टुप्' इति । 'यत्पर्जन्य' इत्येषा नवम्यनुष्टुप् 'वि वृक्षान्' इत्याद्यास्तिस्रो जगत्यः शिष्टाः षट् त्रिष्टुभः । पर्जन्यो देवता । अनेन सूक्तेन प्रत्यृचं वा दिशः उपस्थेयाः । सूत्रितं च—'संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन[3] वा' (आश्व. श्रौ. २. १३) इति ॥

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ॥ १ ॥

अच्छ । वद । तवसम् । गीःऽभिः । आभिः । स्तुहि । पर्जन्यम् । नमसा । आ । विवास ।

कनिक्रदत् । वृषभः । जीरऽदानुः । रेतः । दधाति । ओषधीषु । गर्भम् ॥ १ ॥

---

१. ग-घ-ज– 'च' नास्ति । २. ग-घ-ज–इति । च पूरणः । ३. त–सूक्तेन सूक्तेन ।

हे स्तोतः vतवसं बलवन्तं vपर्जन्यम् vअच्छ अभिप्राप्य vवद प्रार्थय । पर्जन्यशब्दो यास्केन बहुधा निरुक्तः—'पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्रार्जयिता वा रसानाम्' (निरु. १०. १०) इति । vआभिः vगीर्भिः स्तुतिवाग्भिः vस्तुहि । vनमसा अन्नेन[1] हविर्लक्षणेन vआ[1] vविवास सर्वतः परिचर । यः पर्जन्यः vवृषभः अपां वर्षिता vजीरदानुः क्षिप्रदानः vकनिक्रदत् गर्जनशब्दं कुर्वन् vओषधीषु vगर्भं गर्भस्थानीयं vरेतः उदकं vदधाति स्थापयति तं स्तुहि ॥

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ॥ २ ॥

वि । वृक्षान् । हन्ति । उत । हन्ति । रक्षसः । विश्वम् । बिभाय । भुवनम् । महाऽवधात् ।
उत । अनागाः । ईषते । वृष्ण्यऽवतः । यत् । पर्जन्यः । स्तनयन् । हन्ति । दुःऽकृतः ॥२॥

अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः । तदेवात्र लिख्यते—'पर्जन्यो[2] विहन्ति वृक्षान्विहन्ति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधात् महान् ह्यस्य वधः । अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृतः' (निरु. १० · ११) इति ॥

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ॥ ३ ॥

रथीऽइव । कशया । अश्वान् । अभिऽक्षिपन् । आविः । दूतान् । कृणुते । वर्ष्यान् । अह ।
दूरात् । सिंहस्य । स्तनथाः । उत् । ईरते । यत् । पर्जन्यः । कृणुते । वर्ष्यम् । नभः ॥३॥

vरथीव रथस्वामीव । स यथा कशया अश्वान् अभिक्षिपन् दूतान् भटान् आविष्करोति तद्वदसौ पर्जन्योऽपि vकशया vअश्वान् मेघान् vअभिक्षिपन् अभिप्रेरयन् vवर्ष्यान् वर्षकान् vदूतान् दूतवत् वृष्टिप्रेरकान् मेघान् मरुतो वा vआविः vकृणुते प्रकटयति । vअह इति पूरणः । एवं सति vसिंहस्य । सहतेर्हिंसतेर्वा शब्दकर्मणः सिंहशब्दः । अवर्षणेनाभिभवितुः शब्दयितुर्वा मेघस्य vस्तनथाः गर्जनशब्दाः vदूरात् vउदीरते उद्गच्छन्ति । कदा । vयत् यदा vपर्जन्यः vनभः अन्तरिक्षं vवर्ष्यं वर्षोपेतं vकृणुते करोति तदा ॥

'प्र वाताः' इति[3] चतुर्थी पर्जन्यस्य[4] चरोर्याज्या । सूत्रितं च—'प्र वाता वान्ति पतयन्ति विद्युत इत्यग्न्याधेयप्रभृति' (आश्व. श्रौ. २ · १५) इति ॥

---

१. ख-च-ण– हविर्लक्षणेनान्नेन । २. त–पर्जन्यस्तृपेराद्यन्तविपरीतस्य । ३. त–वान्तीति । ४. ख-च-ण–पार्जन्यस्य ।

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥ ४ ॥

प्र । वाताः । वान्ति । पतयन्ति । विऽद्युतः ।
उत् । ओषधीः । जिहते । पिन्वते । स्वः । स्वरिति स्वः ।
इरा । विश्वस्मै । भुवनाय । जायते । यत् । पर्जन्यः । पृथिवीम् । रेतसा । अवति ॥ ४ ॥

[v]प्र[1] [v]वान्ति [v]वाताः[2] वृष्ट्यर्थम् । [v]पतयन्ति गच्छन्ति समन्तात् संचरन्ति [v]विद्युतः । [v]ओषधीः ओषधयः [v]उत् [v]जिहते उद्गच्छन्ति प्रवर्धन्ते । [v]स्वः अन्तरिक्षं [v]पिन्वते क्षरति । [v]इरा भूमिः [v]विश्वस्मै सर्वस्मै [v]भुवनाय सर्वजगद्धिताय [v]जायते समर्था भवति । कदैवमिति । [v]यत् यदा [v]पर्जन्यः देवः [v]पृथिवीं [v]रेतसा उदकेन [v]अवति रक्षति[2] अभिगच्छति वा तदैवं भवति ॥

यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥ ५ ॥

यस्य । व्रते । पृथिवी । नन्नमीति । यस्य । व्रते । शफऽवत् । जर्भुरीति ।
यस्य । व्रते । ओषधीः । विश्वऽरूपाः । सः । नः । पर्जन्य । महि । शर्म । यच्छ ॥ ५ ॥

[v]यस्य पर्जन्यस्य [v]व्रते कर्मणि [v]पृथिवी [v]नन्नमीति अत्यर्थं नमति सर्वेषामधो भवति । [v]यस्य [v]व्रते [v]शफवत् पादोपेतं गवादिकं [v]जर्भुरीति भ्रियते पूर्यते गच्छतीति वा । [v]यस्य [v]व्रते कर्मणि [v]ओषधीः ओषध्यः [v]विश्वरूपाः नानारूपा भवन्ति हे [v]पर्जन्य [v]सः महांस्त्व [v]नः अस्मभ्यं [v]महि [v]शर्म महत् सुखं [v]यच्छ प्रयच्छ ॥ ॥ २७ ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥ ६ ॥

दिवः । नः । वृष्टिम् । मरुतः । ररीध्वम् । प्र । पिन्वत । वृष्णः । अश्वस्य । धाराः ।
अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि । अपः । निऽसिञ्चन् । असुरः । पिता । नः ॥ ६ ॥

हे [v]मरुतः यूयं [v]दिवः अन्तरिक्षसकाशात् [v]नः अस्मदर्थं [v]वृष्टिं [v]ररीध्वं दत्त । [v]वृष्णः वर्षकस्य [v]अश्वस्य व्यापकस्य मेघस्य संबन्धिन्यः [v]धाराः उदकधाराः [v]प्र [v]पिन्वत प्रक्षरत । हे

१. त–प्रवाता वाती(न्ती)ति वाताः । २. त-न-र– क्षरति ।

पर्जन्य त्वम् एतेन स्तनयित्नुना गर्जता मेघेन सह अर्वाङ् अस्मदभिमुखम् एहि आगच्छ। किं कुर्वन्। अपः अम्भांसि निषिञ्चन् स देवः असुरः उदकानां निरसितापि सन् नः अस्माकं पिता पालकश्च ॥

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ॥ ७ ॥

अभि । क्रन्द । स्तनय । गर्भम् । आ । धाः । उदन्ऽवता । परि । दीय । रथेन ।
दृतिम् । सु । कर्ष । विऽसितम् । न्यञ्चम् । समाः । भवन्तु । उत्ऽवतः । निऽपादाः ॥७॥

अभि भूम्यभिमुखं क्रन्द शब्दय। तदेव पुनरुच्यते दार्ढ्याय। स्तनय गर्ज। गर्भं गर्भस्थानीयमुदकम् ओषधीषु आ धाः आधेहि। तदर्थम् उदन्वता उदकवता रथेन परि दीय परितो गच्छ। दृतिं दृतिवदुदकधारकं मेघं विषितं विशेषेण सितं बद्धं न्यञ्चं न्यक् अधोमुखं सु सुष्ठु कर्ष आकर्ष वृष्ट्यर्थम् । यद्वा । विषितं विमुक्तबन्धनमेवं कर्ष । एवं कृते उद्वतः ऊर्ध्ववन्तः उन्नतप्रदेशाः निपादाः न्यग्भूतपादा निकृष्टपादा वा निम्नोन्नतप्रदेशाः समाः एकरथाः भवन्तु उदकपूर्णा भवन्त्वित्यर्थः ॥

महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥ ८ ॥

महान्तम् । कोशम् । उत् । अच । नि । सिञ्च ।
स्यन्दन्ताम् । कुल्याः । विऽसिताः । पुरस्तात् ।
घृतेन । द्यावापृथिवी इति । वि । उन्धि । सुऽप्रपानम् । भवतु । अघ्न्याभ्यः ॥ ८ ॥

हे पर्जन्य त्वं महान्तं प्रवृद्धं कोशं कोशस्थानीयं मेघम् उदच उद्गच्छ। उद्गमय वा। तथा कृत्वा नि षिञ्च नीचैः क्षारय । कुल्याः नद्यः विषिताः विष्यूताः सत्यः स्यन्दन्तां प्रवहन्तु पुरस्तात् पूर्वाभिमुखम्। प्रायेण नद्यः प्राच्यः स्यन्दन्ते। घृतेन उदकेन द्यावापृथिवी दिवं च पृथिवीं च व्युन्धि क्लेदय अत्यधिकम्। अघ्न्याभ्यः गोभ्यः सुप्रपाणं सुष्ठु प्रकर्षेण पातव्यमुदकं भवतु ॥

१. त–कुरु । २. ख-च-ण–पाषाणादिनिम्नोन्नताः ; झ-न-र–निम्नोन्नताः प्रदेशाः ; भ–पाषाणादिनिम्नोन्नताः प्रदेशाः । ३. ख-च-झ-ण-त-न-भ-र-श–उत्कृष्टमुदच । ४. त–प्राच्याः ।

यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥ ९ ॥

यत् । पर्जन्य । कनिक्रदत् । स्तनयन् । हंसि । दुःऽकृतः ।
प्रति । इदम् । विश्वम् । मोदते । यत् । किम् । च । पृथिव्याम् । अधि ॥ ९ ॥

हे [v]पर्जन्य [v]यत् यदा त्वं [v]कनिक्रदत् अत्यर्थं शब्दयन् [v]स्तनयन् [v]दुष्कृतः पापकृतो मेघान् [v]हंसि विदारयसि तदानीम् [v]इदं [v]विश्वं जगत् [v]प्रति [v]मोदते । विश्वं विशेष्यते । [v]यत्किं [v]च [v]पृथिव्यामधि भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं विश्वं मोदते हृष्यति । वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धम् ॥

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ॥ १० ॥

अवर्षीः । वर्षम् । उत् । ऊँ इति । सु । गृभाय । अकः । धन्वानि । अतिऽएतवै । ऊँ इति ।
अजीजनः । ओषधीः । भोजनाय । कम् । उत । प्रऽजाभ्यः । अविदः । मनीषाम् ॥ १० ॥

इयमतिवृष्टिविमोचनी । हे पर्जन्य त्वम् [v]अवर्षीः वृष्टवानसि । [v]वर्षमुदु [v]षू [v]गृभाय उत्कृष्टं[1] सु सुष्ठु गृभाय गृहाण । परिहरेत्यर्थः । [v]धन्वानि[2] निरुदकप्रदेशान् [v]अकः[2] जलवतः कृतवानसि । किमर्थम् । [v]अत्येतवा [v]उ अतिक्रम्य गन्तुम् । [v]ओषधीः [v]अजीजनः उदपादयः । किमर्थम् । [v]भोजनाय धनाय भोगाय वा । [v]कम् इत्ययं ' शिशिरं जीवनाय कम् ' इतिवत्पादपूरणः (निरु १. १०) । [v]उत अपि च [v]प्रजाभ्यः सकाशात् [v]मनीषां स्तुतिम् [v]अविदः प्राप्तवानसि ॥ ॥ २८ ॥

' बळित्था ' इति तृचात्मकं द्वादशं सूक्तं भौमस्यात्रेरार्षं पृथिवीदेवताकमानुष्टुभम् । अनुक्रान्तं च—' बळित्था तृचं पार्थिवमानुष्टुभम् ' इति । सूक्तविनियोगो लैङ्गिकः । आद्या देवानां हविःषु पृथिव्या अनुवाक्या । ' बळित्था पर्वतानां द्रळ्हा चिद्या वनस्पतीन् ' (आश्व. श्रौ. ६. १४) इति हि सूत्रितम् । भूमिस्तोमे चैषा मरुत्वतीयशस्त्रे सूक्तमुखीया (आश्व. श्रौ.९. ५) ॥

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।
प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ १ ॥

बट् । इत्था । पर्वतानाम् । खिद्रम् । बिभर्षि । पृथिवि ।
प्र । या । भूमिम् । प्रवत्वति । मह्ना । जिनोषि । महिनि ॥ १ ॥

१. झ-त-भ-र-उदुत्कृष्टम् । २. ख-च-झ-ण-त-न-भ-र-जलवतः (त-जलप्रदेशान्) धन्वानि निरुदकप्रदेशानकः ।

द्विरूपा पृथिवी चैषा प्रत्यक्षा[1] देवतापि[1] च । मध्यस्थाना देवतोक्ता सात्र संबोध्य[2] वर्ण्यते[2] ॥ हे ᵛपृथिवि प्रथनवति मध्यस्थानदेवते । त्वम् ᵛइत्था इत्थम् अमुत्र अन्तरिक्षे वा ᵛबट् सत्यं ᵛपर्वतानां मेघानां वा ᵛखिद् खेदनं भेदनं ᵛबिभर्षि धारयसि । हे ᵛमहिनि महति हे ᵛप्रवत्वति प्रकर्षवति प्रवणोदकवति वा ᵛया त्वं ᵛभूमिं प्रत्यक्षां पृथिवीं ᵛमह्ना महत्त्वेन महतोदकेन वा ᵛप्र ᵛजिनोषि प्रकर्षेण प्रीणयसि ॥

स्तोमासस्त्वा विचारिणि प्रतिं ष्टोभन्त्यक्तुभिः ।
प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥ २ ॥

स्तोमासः । त्वा । विऽचारिणि । प्रति । स्तोभन्ति । अक्तुऽभिः ।
प्र । या । वाजम् । न । हेषन्तम् । पेरुम् । अस्यसि । अर्जुनि ॥ २ ॥

हे ᵛविचारिणि विविधं चरणशीले पृथिवि[3] देवि[3] ᵛत्वा त्वां ᵛस्तोमासः स्तोतारः ᵛअक्तुभिः गमनशीलैः स्तोत्रैः ᵛप्रति ᵛष्टोभन्ति अभिष्टुवन्ति[4] । किंच ᵛया त्वं ᵛहेषन्तं शब्दयन्तं ᵛवाजं ᵛन अश्वमिव उद्वृत्तं ᵛपेरुं पूरकं मेघं ᵛप्र ᵛअस्यसि प्रक्षिपसि हे ᵛअर्जुनि शुभ्रवर्णे गमनशीले वा ॥

देवानां हविःषु 'दृळ्हा चित्' इति पृथिव्या याज्या । एषैव भूमिस्तोमे निष्केवल्ये सूक्तमुखीया । सूत्रं तु पूर्वमेवोदाहृतम् ॥

दृळ्हा चिद्या वनस्पतींन्क्ष्मया दर्धर्ष्योजसा ।
यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥ ३ ॥

दृळ्हा । चित् । या । वनस्पतीन् । क्ष्मया । दर्धर्षि । ओजसा ।
यत् । ते । अभ्रस्य । विऽद्युतः । दिवः । वर्षन्ति । वृष्टयः ॥ ३ ॥

हे पृथिवि[5] ᵛया त्वं ᵛदृळ्हा ᵛचित् ॥ 'सुपां सुलुक्०' इति तृतीयाया आकारः ॥ दृढया ᵛक्ष्मया भूम्या सह ᵛवनस्पतीन् वृक्षान् ᵛओजसा बलेन ᵛदर्धर्षि धारयसि । अथवा दृढेति[6] विधेयविशेषणम् । वनस्पतीन् दृढान् कृत्वा धारयसि इत्यर्थः । ᵛयत् यस्याः[7] ᵛते तव संबन्धिनः ᵛवृष्टयः वर्षका मेघाः ᵛविद्युतः[8] विद्योतमानात्[8] ᵛअभ्रस्य ॥ पञ्चम्यर्थे षष्ठी ॥ अभ्रात् अपां हर्तुः ᵛदिवः[9] अन्तरिक्षात् आदित्याद्वा ᵛवर्षन्ति । अथवा[10] यत् यस्यास्ते तवाभ्रस्य मेघस्य वृष्टय उदकसंघाता विद्युतो विद्योतमानाया दिवः सकाशात् वर्षन्ति पतन्ति[10] ॥ ॥ २९ ॥

---

१. र–प्रत्यक्षदेवतापि । २. त–संबोध्यते । ३. त–पृथिवीदेवि । ४. ख-ग-घ-च-ज-झ-ण-न-भ-श–अभिस्तुवन्ति । ५. त–पृथिवि देवि । ६. त–दृळ्हेति । ७. त– अस्याः । ८. ख-च-झ-ण-न-भ-र–दिवो द्योतमानात् । ९. ख-च-झ-ण-त-न-भ-र– दिवः नीचैः । १०. ख-ग-घ-च-ज-झ-ण-न-भ– 'अथवा... पतन्ति' नास्ति ।

'प्र सम्राजे' इत्यष्टर्चं त्रयोदशं सूक्तमात्रेयं त्रैष्टुभं वारुणम्। अनुक्रम्यते च—'प्र सम्राजेऽष्टौ वारुणम्' इति। विनियोगो लैङ्गिकः॥

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुतायं।
वि यो जघानं शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय॥ १॥

प्र। सम्ऽराजे। बृहत्। अर्च। गभीरम्। ब्रह्म। प्रियम्। वरुणाय। श्रुताय।
वि। यः। जघान। शमिताऽइव। चर्म। उपऽस्तिरे। पृथिवीम्। सूर्याय॥ १॥

अत्रिः[1] स्वात्मानं संबोध्य ब्रवीति। हे अत्रे[2] त्वं [v]सम्राजे सम्यक् राजमानायेश्वराय [v]श्रुताय सर्वत्र श्रूयमाणाय [v]वरुणाय उपद्रवस्य निवारकाय जनानामावरकाय चेतनात्मकाय देवाय [v]बृहत् प्रभूतं [v]गभीरं दुरवगाहं बह्वर्थोपेतं [v]प्रियं प्रियभूतं[3] [v]ब्रह्म स्तोत्ररूपं कर्म [v]प्र [v]अर्च प्रार्चय। प्रोच्चारयेत्यर्थः। [v]यः वरुणः [v]शमितेव [v]चर्म शमिता पशुविशसनकर्ता[4] यथोपस्तरणाय चर्म हन्ति तद्वत् [v]पृथिवीं विस्तीर्णमन्तरिक्षम्॥ 'तृतीयस्यां[5] पृथिव्याम्' (तै. सं. १. २. १२. १) इति श्रुतेः अन्तरिक्षस्यापि पृथिवीशब्दवाच्यत्वम्॥ [v]सूर्याय सूर्यस्य [v]उपस्तिरे आस्तरणाय [v]वि [v]जघान विस्तारयामास। विस्तृतं हि व्यवहारयोग्यं भवति तस्मात् व्यवहाराय अन्तरिक्षं विस्तारितवान्। 'उरुं हि राजा वरुणश्चकार' (ऋ. सं. १. २४. ८) इति ह्युक्तम्[6]॥

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयं उस्रियासु।
हृत्सु क्रतुं वरुणो अप्स्वग्निं दिवि सूर्यमदधात्सोममद्रौ॥ २॥

वनेषु। वि। अन्तरिक्षम्। ततान। वाजम्। अर्वत्ऽसु। पयः। उस्रियासु।
हृत्ऽसु। क्रतुम्। वरुणः। अप्ऽसु। अग्निम्।
दिवि। सूर्यम्। अदधात्। सोमम्। अद्रौ॥ २॥

अयं [v]वरुणः [v]वनेषु वृक्षाग्रेषु [v]अन्तरिक्षं [v]वि [v]ततान विस्तारितवान्। तथा वाजसनेयकं—'वनेषु हीदमेषु वृक्षाग्रेष्वन्तरिक्षं विततं तस्मादाह वनेषु व्यन्तरिक्षं ततान' इति। [v]वाजं बलम् [v]अर्वत्सु अश्वेषु वि ततान। [v]पयः क्षीरम् [v]उस्रियासु गोषु। उस्रियेति गोनाम उस्राविणोऽस्यां भोगा इति तद्व्युत्पत्तिः। [v]हृत्सु हृदयेषु [v]क्रतुं कर्मसंकल्पम्। यद्धि मनसा ध्यायति[7] तत्कर्मणा करोति। [v]अप्सु उदकेषु [v]अग्निं वैद्युतमौर्वं वा। सर्वत्र वि ततानेति संबन्धः। किंच [v]दिवि द्युलोके [v]सूर्यम् [v]अदधात् स्थापितवान्। [v]सोमं च [v]अद्रौ पर्वतेऽदधात्॥

---

१. ख-च-झ-ण-भ-र- अत्र। २. ख-च-ण-र- क्षत्रज्ञ; झ-न-भ-क्षेत्रज्ञ। ३. ख-च-ण-प्रियरूपम्। ४. ख-च-ण-पशुविवासनकर्ता; ग-घ-ज-पशुवियांसनकर्ता; श-पशुवपां समानकर्ता। ५. त-द्वितीयस्यां तृतीयस्याम्। ६. झ-त-न-भ-र- ह्यत्र निरुक्तम्। ७. ख-च-ण-भ-ध्यायति तद्वाचा वदति।

नीचीनबारं वरुणः कवन्धं प्र ससर्ज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूमं ॥ ३ ॥

नीचीनऽबारम् । वरुणः । कवन्धम् । प्र । ससर्ज । रोदसी इति । अन्तरिक्षम् ।
तेन । विश्वस्य । भुवनस्य । राजा । यवम् । न । वृष्टिः । वि । उनत्ति । भूमं ॥ ३ ॥

[v]नीचीनबारम् अधोमुखबिलं [v]प्र ससर्ज कृतवान् । कम् । [v]कवन्धम् । कवनमुदकम् । [v]तत् धीयतेऽत्रेति कवन्धो मेघः । तं तथाकरोत् । अथवा कवन्धमुदकम् । तदुदकं नीचीनबारं नीचीननिर्गमनबिलं चकार । मेघं विदार्य उदकमधोमुखं चकारेत्यर्थः । किं प्रतीत्युच्यते । [v]रोदसी द्यावापृथिव्यौ [v]अन्तरिक्षं च प्रति । लोकत्रयहितायेत्यर्थः । [v]तेन उदकेन [v]विश्वस्य सर्वस्य [v]भुवनस्य भूतजातस्य [v]राजा स्वामी [v]वरुणः [v]भूमं भूमिं [v]व्युनत्ति क्लेदयति । [v]वृष्टिः सेक्ता पुमान् [v]यवं [v]न यवमिव यवान् यथा प्ररोहाय सर्वत्र प्रसारयति तद्वत् भूमिं सर्वत्रोनत्ति । अथवा वृष्टिर्वरुण इति संबन्धः । वर्षकः पर्जन्य इत्यर्थः । अस्मिन् पक्षे यवं पुरुष इवेति पुरुषशब्दोऽध्याहार्यः । अत्र 'नीचीनबारं वरुणः कवन्धम्' (निरु. १०. ४) इत्यादिनिरुक्तं द्रष्टव्यम् ॥

उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।
समभ्रेण वसत पर्वतासस्तविषीयन्तः श्रथयन्त वीराः ॥ ४ ॥

उनत्ति । भूमिम् । पृथिवीम् । उत । द्याम् । यदा । दुग्धम् । वरुणः । वष्टि । आत् । इत् ।
सम् । अभ्रेण । वसत । पर्वतासः । तविषीऽयन्तः । श्रथयन्त । वीराः ॥ ४ ॥

[v]वरुणः [v]भूमिं [v]पृथिवीं प्रथितमन्तरिक्षम् । अन्तरिक्षस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुक्तम् । [v]उत अपि च [v]द्यां द्युलोकम् [v]उनत्ति क्लेदयति । [v]यदा अयं [v]दुग्धम् उदकपूरणं [v]वष्टि कामयते । अथवा दुग्धमुदकम् । तेन तत्कार्यमोषध्यादिकं लक्ष्यते । ओषध्यादयः प्रवर्धन्तामिति यदा कामयते [v]आदित् अनन्तरमेव [v]सं [v]वसत समाच्छादयन्ति । के । [v]पर्वतासः पर्ववन्तः[1] अद्रयः । केन । [v]अभ्रेण मेघेन । किंच [v]तविषीयन्तः बलमिच्छन्तः [v]वीराः विशेषेण वृष्टेः प्रेरयितारो मरुतः [v]श्रथयन्त श्रथयन्ति मेघान् ॥

इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम् ।
मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ॥ ५ ॥

इमाम् । ऊँ इति । सु । आसुरस्य । श्रुतस्य । महीम् । मायाम् । वरुणस्य । प्र । वोचम् ।
मानेनऽइव । तस्थिऽवान् । अन्तरिक्षे ।
वि । यः । ममे । पृथिवीम् । सूर्येण ॥ ५ ॥

---

१. ख-च-ण–पर्वताः ; झ-भ–पर्वतः ।

vआसुरस्य असुरसंबन्धिनः । असुराणामस्य च वध्यघातकभावः संबन्धः । असुरहन्तुरित्यर्थः । अथवा असुरो मेघः । प्राणदानात् तत्संबन्धिनः vश्रुतस्य विश्रुतस्य vमहीं महतीम् vइमां[1] vमायां प्रज्ञां vप्र vवोचं प्रब्रवीमि । कैषा मायेति सोच्यते । vयः वरुणः vअन्तरिक्षे vतस्थिवान् तिष्ठन् vमानेनेव दण्डेनेव vसूर्येण vपृथिवीम् अन्तरिक्षं vवि vममे परिच्छिनत्ति तस्यैषा माया ॥ ॥ ३० ॥

इमामु नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष ।
एकं यदुद्ना न पृणन्त्येनीरासिञ्चन्तीरवनयः समुद्रम् ॥ ६ ॥

इमाम् । ऊँ इति । नु । कविऽतमस्य । मायाम् । महीम् । देवस्य । नकिः । आ । दधर्ष ।
एकम् । यत् । उद्ना । न । पृणन्ति । एनीः । आऽसिञ्चन्तीः । अवनयः । समुद्रम् ॥ ६ ॥

vकवितमस्य प्रकृष्टप्रज्ञस्य vदेवस्य द्योतमानस्य स्तुत्यस्य वा वरुणस्य vइमां सर्वप्रसिद्धां vमहीं महतीं vमायां प्रज्ञां vनकिः नैव vआ vदधर्ष न हिनस्ति कश्चिदपि । vऊ vनु इति पूरणौ । vयत् यस्मात् vएकं vसमुद्रम् vउद्ना उदकेन vन vपृणन्ति न पूरयन्ति । कारः । vएनीः एन्यः शुभ्रा गमनशीला वा vआसिञ्चन्तीः उदकमासेचयन्त्यः[2] vअवनयः नद्यः । बह्व्यो नद्यः सर्वदोदकेन पूरयन्त्योऽपि नैकमपि समुद्रं पूरयन्तीति । इदं वरुणस्य[3] महत् कर्म[4] इति । अत्र अन्तरिक्षविस्तारादि-समुद्रापूरणपर्यन्तं कर्म परमेश्वरस्यैवोचितं न वरुणस्येति न वाच्यं तस्य वरुणादिरूपावस्थानात् । एष ब्रह्मेत्यादिश्रुतेः ॥

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा ।
वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥ ७ ॥

अर्यम्यम् । वरुण । मित्र्यम् । वा । सखायम् । वा । सदम् । इत् । भ्रातरम् । वा ।
वेशम् । वा । नित्यम् । वरुण । अरणम् । वा ।
यत् । सीम् । आगः । चकृम । शिश्रथः । तत् ॥ ७ ॥

हे vवरुण vअर्यम्यम् । अर्यमैवार्यम्यः ॥ स्वार्थिको यत् । अर्तेरिदं रूपम् ॥ प्रदातारमित्यर्थः । अथवा ईरणात् मननात् च शास्तीत्यर्यमा गुरुः । तम् । vवा अथवा vमित्र्यम् ॥ ' ञिमिदा स्नेहने ' इत्यस्मात् मित्रम्[5] । स्वार्थिको यत् ॥ अनुरक्तमित्यर्थः । vवा अथवा vसखायं समानख्यानं vसदमित् सर्वदैव vभ्रातरं vवा । vनित्यं[6] निरन्तरं[7] vवेशं निकटनिकेतनवर्तिनं vवा । vअरणं vवा अशब्दमित्यर्थः[8] । अथवा अरणमदातारं वा नित्यं निरन्तरम् । एतान् प्रति vयत्सीं यदेतत् vआगः अपराधं vचकृम vतत् vशिश्रथः अस्मत्तो विनाशय ॥

१. ख-च-ञ-ण-न-भ-र–' इमां ' नास्ति । २. ख-च-ञ-ण-न-भ-र-उदकमासिञ्चयन्त्यः । ३. ख-च-ण-भ–वरुणमहत्त्वमिति ; ञ–वरुणमहत्त्वामेति ; न-र–वरुणमहत्कर्मेति । ४. ख-च-ञ-ण-त-न-भ-र–' मित्रं ' नास्ति । ५. ख-च-ञ-ण-त-न-भ-र– ' नित्यं निरन्तरं ' नास्ति । ६. त–अशब्द्यमित्यर्थः।

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥ ८ ॥

कितवासः । यत् । रिरिपुः । न । दीवि । यत् । वा । घ । सत्यम् । उत । यत् । न । विद्म ।
सर्वा । ता । वि । स्य । शिथिराऽइव । देव । अध । ते । स्याम । वरुण । प्रियासः ॥ ८ ॥

[v]कितवासः कितवा द्यूतकृतः । किं तवास्ति सर्वं मया जितमिति वदतीति[१] कितवः[१] । ते[२] [v]दीवि [v]न देवने द्यूते यथा [v]यद्रिरिपुः लेपयन्ति पापमारोपयन्ति तथास्मासु द्वेष्टारो मयि त्वमेतत् पापमकरोः इत्याक्षिपन्ति । अत्र पुरस्तादुपचारोऽपि नकार उपमार्थीयः । [v]वा अथवा । [v]घ इति पूरणः । [v]यत् पापं [v]सत्यम् आरोपमन्तरेण कृतवन्तः स्मः । [v]उत अपि च [v]यत् कृतं पापं [v]न [v]विद्म न जानीमः [v]ता तानि [v]सर्वा सर्वाणि [v]शिथिरेव शिथिलानीव शिथिलबन्धनानि फलानीव [v]वि [v]ष्य विमोचय ॥ स्यतिरस्मसृष्टो विमोचने ॥ हे [v]देव [v]अध अनन्तरं [v]ते तव [v]प्रियासः प्रियाः [v]स्याम भवेम ॥ ॥ ३१ ॥

' इन्द्राग्नी यम् ' इति षड्चं चतुर्दशं सूक्तमत्रेरार्षमानुष्टुभमैन्द्राग्नम् । षष्ठी विराट्पूर्वा । ' आद्यौ दशकावष्टकाख्यः ' (अनु. ९. ११) इति परिभाषितत्वात् । तथा चानुक्रान्तम्— ' इन्द्राग्नी षळैन्द्राग्नमानुष्टुभं विराट्पूर्वान्तम् ' इति । विनियोगो लैङ्गिकः ॥

इन्द्राग्नी यमवथ उभा वाजेषु मर्त्यम् ।
दृळ्हा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः ॥ १ ॥

इन्द्राग्नी इति । यम् । अवथः । उभा । वाजेषु । मर्त्यम् ।
दृळ्हा । चित् । सः । प्र । भेदति । द्युम्ना । वाणीःऽइव । त्रितः ॥ १ ॥

हे [v]इन्द्राग्नी [v]उभा उभौ परस्पराविमुक्तौ युवां [v]यं [v]मर्त्यम् [v]अवथः रक्षथः [v]वाजेषु संग्रामेषु [v]सः मर्त्यः [v]दृळ्हा [v]चित् दृढान्यपि [v]द्युम्ना द्योतमानानि धनानि शत्रुसंबन्धीनि [v]भेदति[३] भिनत्ति । [v]त्रितः ऋषिः [v]वाणीरिव प्रतिवादिवाक्यानीव । अथवा त्रिषु स्थानेषु वर्तमानोऽग्निः शत्रूणां वाक्यानीव ॥

या पृतनासु दुष्टरा या वाजेषु श्रवाय्या ।
या पञ्च चर्षणीरभीन्द्राग्नी ता हवामहे ॥ २ ॥

या । पृतनासु । दुस्तरा । या । वाजेषु । श्रवाय्या ।
या । पञ्च । चर्षणीः । अभि । इन्द्राग्नी इति । ता । हवामहे ॥ २ ॥

---

१. ख-च-ण-भ- वदन्तीति कितवाः । २. न-र-न । ३. ख-ग-घ-च-ज-ण-भ-श-प्रभेदति ।

[v]या यौ [v]इन्द्राग्नी [v]पृतनासु [v]दुष्टरा दुष्टरौ अनभिभाव्यौ । [v]या यौ च [v]वाजेषु संग्रामेषु अन्नेषु वा [v]श्रवाय्या श्रवाय्यौ स्तुत्यौ । [v]या यौ [v]पञ्च [v]चर्षणीः । चर्षणयो मनुष्याः । तान् [v]अभि । रक्षतः इति शेषः । [v]ता तौ महानुभावौ [v]हवामहे स्तुमः ॥

तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः ।
प्रति द्रुणा गभस्त्योर्गवां वृत्रघ्न एषते ॥ ३ ॥

तयोः । इत् । अमऽवत् । शवः । तिग्मा । दिद्युत् । मघोनोः ।
प्रति । द्रुणा । गभस्त्योः । गवाम् । वृत्रऽघ्ने । आ । ईषते ॥ ३ ॥

[v]अमवत् अभिभावुकं [v]शवः बलं [v]तयोरित् तयोरेव । [v]मघोनोः मघवतोः अन्नवतोर्धनवतोर्वा तयोः [v]दिद्युत् वज्रं [v]तिग्मा[1] तीक्ष्णं वर्तते [v]गभस्त्योः हस्तयोः । एवंभूतौ देवौ [v]गवाम् उदकानां पणिभिरपहृतानां वा गवां लाभाय [v]द्रुणा द्रुमविकारेण गमनशीलेन वा एकेन रथेन [v]वृत्रघ्ने आवरकमेघहननाय तथाविधवृत्रासुरवधाय वा [v]प्रति [v]ईषते प्रतिगच्छतः ॥

ता वामेषे रथानामिन्द्राग्नी हवामहे ।
पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥ ४ ॥

ता । वाम् । एषे । रथानाम् । इन्द्राग्नी इति । हवामहे ।
पती इति । तुरस्य । राधसः । विद्वांसा । गिर्वणःऽतमा ॥ ४ ॥

हे देवौ [v]ता तौ वक्ष्यमाणगुणौ [v]वां युवां [v]हवामहे स्तुमः । किमर्थम् । [v]रथानाम् [v]एषे युद्धे रथानां प्रेरणाय । कीदृशौ युवाम् । [v]इन्द्राग्नी इन्द्रमग्निं च परस्परयुग्मभूतौ [v]तुरस्य जङ्गमरूपस्य [v]राधसः धनादिलक्षणस्य [v]पती स्वामिनौ [v]विद्वांसा सर्वज्ञौ [v]गिर्वणस्तमा गीर्भिर्वननीयतमौ । ईदृशौ युवां हवामहे ॥

ता वृधन्तावनु द्यून्मर्तीय देवावदभा ।
अहिन्ता चित्पुरो दधेऽशेव देवावर्वते ॥ ५ ॥

ता । वृधन्तौ । अनु । द्यून् । मर्तीय । देवौ । अदभा ।
अहिन्ता । चित् । पुरः । दधे । अंशाऽइव । देवौ । अर्वते ॥ ५ ॥

[v]ता तौ [v]अनु [v]द्यून् प्रतिदिनं [v]वृधन्तौ वर्धमानौ । सर्वदा प्रवृद्धाविस्यर्थः । वर्धने दृष्टान्तः । मर्तेव मनुष्याविव । तौ यथा प्रतिदिनं वर्धेते । [v]देवौ द्योतमानौ [v]अदभा अहिंस्यौ [v]अहन्ता

१. ख-च-ज्ञ-ण-न-भ-र– तिग्मम् ।

vचित् प्रकर्षेण पूज्यौ । चिदिति पूजायाम् । तादृशौ महानुभावौ vदेवौ vअर्वते अश्वलाभाय vपुरो vदधे पुरस्कुर्वे । vअंशोव । अंशो नाम द्वादशादित्यमध्यवर्ती देवः । स भगस्याप्युपलक्षकः । अंशाविव आदित्याविव । दीप्तावित्यर्थः ॥

एवेन्द्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।
ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतम् ॥ ६ ॥

एव । इन्द्राग्निऽभ्याम् । अहावि । हव्यम् । शूष्यम् । घृतम् । न । पूतम् । अद्रिऽभिः ।
ता । सूरिषु । श्रवः । बृहत् । रयिम् । गृणत्ऽसु । दिधृतम् ।
इषम् । गृणत्ऽसु । दिधृतम् ॥ ६ ॥

vएव एवमिदानीं क्रियमाणप्रकारेण । स्तुतिसाहित्येनेत्यर्थः । vइन्द्राग्निभ्यां vहव्यं हविः vअहावि परित्यक्तमासीत् । कीदृशं तत् । vशूष्यं बलकरम् । किमिव । vअद्रिभिः ग्रावभिः vपूतम् अभिषुतं vघृतं vन सोमरसमिव । तद्यथा युवाभ्यां प्रदीयते तद्वच्चरुपुरोडाशादिकमपि । vता तौ देवौ vसूरिषु मेधाविष्वस्मासु vबृहत् प्रभूतं vश्रवः अन्नं यशो वा vरयिं[1] धनं च[1] vदिधृतं धारयतम् vइषम् अन्नं vगृणत्सु स्तुवत्सु vदिधृतम् । पुनरुक्तिरादरार्था ॥ ॥ ३२ ॥

' प्र वो महे ' इति नवर्चं पञ्चदशं सूक्तम् एवयामरुदाख्यस्य आत्रेयस्य मुनेरार्षं मरुद्देवताकमतिजगतीच्छन्दस्कम् । तथा चानुक्रमणिका—' प्र वो नवैवयामरुन्मारुतमतिजागतम् ' इति । दशरात्रे षष्ठेऽहनि तृतीयसवनेऽच्छावाकशस्त्रे इदं सूक्तम् । सूत्रितं च—' एवयामरुदुक्तो वृषाकपिना ' (आश्व. श्रौ. ८. ४) इति ॥

प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥ १ ॥

प्र । वः । महे । मतयः । यन्तु । विष्णवे । मरुत्वते । गिरिऽजाः । एवयामरुत् ।
प्र । शर्धाय । प्रऽयज्यवे । सुऽखादये । तवसे । भन्दत्ऽइष्टये । धुनिऽव्रताय । शवसे ॥ १ ॥

vप्र vयन्तु प्रगच्छन्तु vगिरिजाः वाचि निष्पन्नाः vमतयः स्तुतयः । कस्मै । vवः तुभ्यम् । वचनव्यत्ययः । vविष्णवे व्यापायेन्द्राय विष्णवे वा vमरुत्वते मरुद्भिस्तद्वते । कस्य स्तुतय इत्युच्यते । vएवयामरुत् एतन्नामकस्य ऋषेः ॥ षष्ठ्या लुक् ॥ अथवा अयमृषिर्गिरिजाः स्तुतेर्जनयिता भवति । उत्तरार्धे मरुत्स्तुतिः । किंच vप्र यन्तु स्तुतयः । कस्मै । vशर्धाय बलाय मारुताय । इतरत् सर्वं बलविशेषणम् । vप्रयज्यवे प्रकर्षेण यष्टव्याय vसुखादये शोभनाभरणाय । खादिः आभरणविशेषः । ' हस्तेषु खादिश्च ' (ऋ. सं. १. १६८. ३) ; ' पत्सु खादयः ' (ऋ. सं. ५. ५४. ११) इति च श्रुतेः । vतवसे

१. ख-च-ञ्ञ-ण-त-न-भ-र— ' रयिं धनं च ' नास्ति ।

बलवते ᵛभन्ददिष्टये। स्तुतिरूपा इष्टिर्यस्य तद्भन्ददिष्टि। तस्मै ᵛधुनिव्रताय मेघानां चालनं कर्म यस्य तादृशाय ᵛशवसे गमनवते ॥

प्र ये जाता महिना ये च नु स्वयं प्र विघ्नना ब्रुवते एवयामरुत् ।
कृत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ॥ २ ॥

प्र । ये । जाताः । महिना । ये । च । नु । स्वयम् । प्र । विघ्नना । ब्रुवते । एवयामरुत् ।
कृत्वा । तत् । वः । मरुतः । न । आऽधृषे । शवः ।
दाना । मह्ना । तत् । एषाम् । अधृष्टासः । न । अद्रयः ॥ २ ॥

ᵛये ᵛमहिना महता विष्णुना इन्द्रेण वा सह ᵛप्र ᵛजाताः प्रादुर्भूतास्तान् ब्रुवते। ᵛये ᵛच ᵛनु क्षिप्रं ᵛस्वयम् एव ᵛविघ्नना यज्ञगमनविषयज्ञानेन सह ᵛप्र जाताः प्रादुर्भूतास्तान् मरुतः ᵛएवया-मरुत् ᵛब्रुवते स्तौति[1] ॥ प्रेत्ययमाख्यातेन वा संबन्धनीयः। ब्रुवते इति व्यत्ययेन बहुवचनम्। एकवचने वा छान्दसः शः। निघाताभावश्छान्दसः ॥ अथ प्रत्यक्षवादः। हे ᵛमरुतः ᵛवः युष्माकं ᵛतत् प्रसिद्धं ᵛशवः बलं ᵛकृत्वा चालनादिरूपेण कर्मणा युक्तं ᵛन ᵛआधृषे कैश्चिदपि आधर्षणीयं न भवति। अन्येषामसुरादीनां कृत्वा कर्मणा वा अनभिभाव्यं भवति ॥ कृत्यार्थे केन् ॥ किंच ᵛएषां वः ᵛतत्[2] बलं ᵛदाना अभिमतदानेन ᵛमह्ना महत्त्वेन च उपेतम्। यूयं प्रबलाः। ᵛअधृष्टासः अधर्षणीयाः। तत्र दृष्टान्तः। ᵛअद्रयः ᵛन। ते यथा अधृष्यास्तद्वत् यूयमपि ॥

प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्वः एवयामरुत् ।
न येषामिरी सधस्थ ईष्टे आँ अग्नयो न स्वविद्युतः प्र स्पन्द्रासो धुनीनाम् ॥३॥

प्र । ये । दिवः । बृहतः । शृण्विरे । गिरा । सुऽशुक्वानः । सुऽभ्वः । एवयामरुत् ।
न । येषाम् । इरी । सधऽस्थे । ईष्टे । आ ।
अग्नयः । न । स्वऽविद्युतः । प्र । स्पन्द्रासः । धुनीनाम् ॥ ३ ॥

ᵛये मरुतः ᵛबृहतः महतः[3] ᵛदिवः द्युलोकादागच्छन्तः ᵛप्र[4] ᵛशृण्विरे शृण्वन्ति तान् मरुतः ᵛगिरा ᵛएवयामरुत् स्तुतवान्[5]। कीदृशास्ते। ᵛसुशुक्वानः दीप्ताः ᵛसुभ्वः सुष्ठु भवन्तः। ᵛयेषां मरुतां ᵛसधस्थे सहस्थाने स्वकीये निवासे तिष्ठताम्[6] ᵛइरी ईरिता प्रेरिता[6] ᵛन ᵛईष्टे ᵛआ न ईशते च चालयितुम्। आ इति चार्थे। ᵛअग्नयो ᵛन अग्नय इव ᵛस्वविद्युतः स्वयमेव विद्योतमानाः ᵛधुनीनां नदीनां ᵛस्पन्द्रासः वर्षणेन चालयितारश्च ॥

१. ख-च-ञ-ण-त-न-भ-र- 'स्तौति' नास्ति। २. ख-च-ञ-ण-त-न-भ-र- 'तत्' नास्ति। ३. ग-घ-ज-न-र-श- 'महतः' नास्ति। ४. ख-च-ञ-ण-त-न-भ-र- 'प्र' नास्ति। ५. त-र-श- स्तुतवान्। तान् शृण्विरे। ६. ख-च-ञ-ण-न-भ-र- 'तिष्ठताम्... प्रेरिता' नास्ति।

स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥४॥

सः । चक्रमे । महतः । निः । उरुऽक्रमः । समानस्मात् । सदसः । एवयामरुत् ।
यदा । अयुक्त । त्मना । स्वात् । अधि । स्नुऽभिः ।
विऽस्पर्धसः । विऽमहसः । जिगाति । शेऽवृधः । नृऽभिः ॥ ४ ॥

ᵛसः मरुद्गणः ᵛमहतः प्रवृद्धात् ᵛसमानस्मात् सर्वेषां साधारणात् ᵛसदसः स्थानात् अन्तरिक्षात् ᵛउरुक्रमः विस्तीर्णक्रमणः सन् ᵛनिः ᵛचक्रमे निरगच्छत् । ᵛएवयामरुत् ऋषिः ᵛयदा ᵛस्वात् स्वकीयस्थानात् । ᵛअधि इति पञ्चम्यर्थानुवादी । ᵛत्मना आत्मनैव ᵛस्नुभिः गन्तृभिः ᵛनृभिः स्वनेतृभिरृत्विग्भिः ᵛअयुक्त युक्तोऽभवत् आगमनप्रार्थनाय । अथ बहुवदुच्यते । तदानीं ᵛविस्पर्धसः विविधस्पर्धाः । अहं पुरतो गच्छाम्यहं पुरतो गच्छामीति तेषां स्पर्धा । अथवा विगतस्पर्धाः । न ह्येषां सार्धं स्पर्धकाः सन्ति । ᵛविमहसः विशिष्टबलाः ᵛशेवृधः शेवस्य सुखस्य वर्धयितारः ᵛजिगाति निर्गच्छन्ति । व्यत्ययेन एकवचनम्[१] ॥

स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।
येना सहन्त ऋञ्जत स्वरोचिषः स्थारश्मानो हिरण्ययाः
स्वायुधास इष्मिणः ॥ ५ ॥

स्वनः । न । वः । अमऽवान् । रेजयत् । वृषा । त्वेषः । ययिः । तविषः । एवयामरुत् ।
येन । सहन्तः । ऋञ्जत । स्वऽरोचिषः ।
स्थाःऽरश्मानः । हिरण्ययाः । सुऽआयुधासः । इष्मिणः ॥ ५ ॥

हे मरुतः ᵛवः युष्माकं ᵛस्वनः वेगजनितः शब्दः ᵛन ᵛरेजयत् न कम्पयत्वेवयामरुतं माम् ॥ 'सुपां सुलुक्०' इति द्वितीयायाः[२] लुक्[२] ॥ स्वनो विशेष्यते । ᵛअमवान् बलवान् ᵛवृषा वर्षिता वृष्टेः ᵛत्वेषः दीप्तः ᵛययिः[३] गन्ता ᵛतविषः प्रवृद्धः[३] । ᵛयेन स्वनेन ᵛसहन्तः शत्रूनभिभवन्तो यूयम् ᵛऋञ्जत प्रसाधयथ ॥ लडर्थे लोट् ॥ कीदृशा यूयम् । ᵛस्वरोचिषः स्वायत्तरश्मयः ᵛस्थारश्मानः स्थिररश्मयः ᵛहिरण्ययाः हिरण्याभरणाः ᵛस्वायुधासः स्वायत्तायुधाः ᵛइष्मिणः अन्नवन्तो गमनवन्तो वा ॥ ॥३३॥

---

१. ख-च-ञ-ण-त-न-भ-र- बहुवचनम् । २. न-श- द्वितीयालुक् । ३. ख-च-ञ-ण-न-भ-र- तविषो गन्ता ।

अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः
शुशुक्वांसो नाग्नयः ॥ ६ ॥

अपारः । वः । महिमा । वृद्धऽशवसः । त्वेषम् । शवः । अवतु । एवयामरुत् ।
स्थातारः । हि । प्रऽसितौ । सम्ऽदृशि । स्थन ।
ते । नः । उरुष्यत । निदः । शुशुक्वांसः । न । अग्नयः ॥ ६ ॥

हे मरुतः ᵛवः युष्माकं ᵛमहिमा ᵛअपारः अनवधिकः । हे ᵛवृद्धशवसः प्रवृद्धबलाः ᵛत्वेषं दीप्तं ᵛशवः युष्माकं बलम् ᵛअवतु रक्षतु एवयामरुतं[1] माम् ॥ द्वितीयैकवचनस्य लुक् ॥ यूयं ᵛप्रसितौ प्रबलबन्धने नियमनवति यज्ञे ᵛसंदृशि संदर्शने निमित्ते ᵛस्थातारो ᵛहि स्थाननियमेन तिष्ठन्तो भवथ खलु । ᵛते ᵛनः अस्मान् ᵛनिदः निन्दकात् शत्रोः सकाशात् ᵛउरुष्यत रक्षत । ᵛअग्नयः इव ᵛशुशुक्वांसः यूयमिति ॥

ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सध्र पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसाम् ॥ ७ ॥

ते । रुद्रासः । सुऽमखाः । अग्नयः । यथा । तुविऽद्युम्नाः । अवन्तु । एवयामरुत् ।
दीर्घम् । पृथु । पप्रथे । सध्र । पार्थिवम् ।
येषाम् । अज्मेषु । आ । महः । शर्धांसि । अद्भुतऽएनसाम् ॥ ७ ॥

ᵛते मरुतः ᵛरुद्रासः रुद्रपुत्राः ᵛसुमखाः शोभनयज्ञाः ᵛअग्नयो ᵛयथा अग्नय इव ᵛतुविद्युम्नाः प्रभूतदीप्तयः । अथवा अग्निसदृशास्तुविद्युम्नाः प्रभूतधनाः ᵛअवन्तु रक्षन्तु ᵛएवयामरुत् एतन्नामानमृषिं माम् । ᵛपार्थिवम् । पृथिव्यन्तरिक्षम् । तत्संबन्धि ᵛदीर्घम् आयतं ᵛपृथु विस्तीर्णं ᵛसध्र सदनं ᵛपप्रथे मरुद्भिः प्रथितमभूत् । ᵛअद्भुतैनसाम् अपापानां ᵛयेषाम् ᵛअज्मेषु गमनेषु ᵛमहः महान्ति ᵛशर्धांसि च ᵛआ गच्छन्तीति शेषः ॥

अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो न दंसनाप द्वेषांसि सनुतः ॥ ८ ॥

अद्वेषः । नः । मरुतः । गातुम् । आ । इतन । श्रोत । हवम् । जरितुः । एवयामरुत् ।
विष्णोः । महः । सऽमन्यवः । युयोतन ।
स्मत् । रथ्यः । न । दंसना । अप । द्वेषांसि । सनुतरिति ॥ ८ ॥

---

१. ख-च-ञ-न-भ- एवयामरुदेवयामरुतम् ।

हे [v]मरुतः [v]अद्रेपः अद्वेषसो यूयं [v]नः अस्माकं [v]गातुं गमनस्वभावं स्तोत्रं प्रति [v]एतन आगच्छत। तदर्थं [v]जरितुः स्तोतुः [v]एवयामरुत् एवयामरुतो मम [v]हवं [v]श्रोत शृणुत। [v]विष्णोः व्यापकस्येन्द्रस्य [v]महः महतः हे [v]समन्यवः समानयज्ञा यूयं [v]स्मत्। अयं प्रशस्तनाम। प्रशस्ताः [v]रथ्यो [v]न रथिनो योद्धार इव। ते यथा शत्रूनपाकुर्वन्ति तद्वदस्माकं [v]दंसना कर्मणा [v]सनुतः। अन्तर्हितनामैतत्। अन्तर्हितान् [v]द्वेषांसि द्वेष्टॄन् [v]अप [v]युयोतन दूरे वियोजयत पृथक्कुरुत॥

अध्यायोपाकरणोत्सर्गयोः विनियुक्ता[1] (आश्व. गृ. ३. ५)॥

गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत्।
ज्येष्ठासो न पर्वतासो व्योमनि युयं तस्य प्रचेतसः
स्यात दुर्धर्तवो निदः॥ ९॥

पदपाठः

गन्त। नः। यज्ञम्। यज्ञियाः। सुऽशमि। श्रोत। हवम्। अरक्षः। एवयामरुत्।

ज्येष्ठासः। न। पर्वतासः। विऽओमनि।

युयम्। तस्य। प्रऽचेतसः। स्यात। दुःऽधर्तवः। निदः॥ ९॥

हे [v]यज्ञियाः मरुतः यूयं [v]नः अस्माकं [v]यज्ञं [v]गन्त आगच्छत। [v]सुशमि शोभनकर्म यथा भवति तथा। सुकर्मत्वायेत्यर्थः। तदर्थं नः [v]हवम् अस्मदीयमाह्वानं [v]श्रोत शृणुत। [v]अरक्षः रक्षोवर्जिता यूयम्॥ लिङ्गवचनयोर्व्यत्ययः॥ [v]ज्येष्ठासो [v]न ज्येष्ठा इव [v]पर्वतासः विन्ध्यादय इवातिप्रवृद्धाः [v]व्योमनि अन्तरिक्षे वर्तमानाः [v]प्रचेतसः [v]यूयं [v]तस्य [v]निदः निन्दकस्य [v]दुर्धर्तवः दुर्धराः [v]स्यात भवत॥ ॥ ३४॥

॥ इति पञ्चमे मण्डले षष्ठोऽनुवाकः समाप्तं चात्रेयं पञ्चमं मण्डलम्॥

---

१. न– विनियुक्ता। गन्ता नो यज्ञमिति चोत्तरा च। अथातोऽध्यायोपाकरणमिति खण्डे गन्ता नो यज्ञं यज्ञियाः सुषमित्युपक्रम्य इति द्वृचा इति तथोत्सर्ग इति च सूत्रात्।

शुद्धिपत्रम्

पृष्ठ	पङ्क्ति	अशुद्धम्	शुद्धम्
९	२४	प्रवधर्यत	प्रवर्ध्यत
११	२१	संबन्धींनि	संबन्धीनि
१२	१२	इध्यमानोः	इध्यमानो
४१	२२	सहितस्वम्	सहितस्त्वम्
१०८	११	पुराडाशस्य	पुरोडाशस्य
१५३	१२	वद्विषयं	त्वद्विषयं
१७१	१०	ᵛजेता।	ᵛजेता
१७३	१८	वयसाममनोज्ञां	वयसाममनोज्ञा
१९४	३	पोषयितु	पोषयितुः
२०७	५	प्रय	प्र य
२०९	पृष्ठादारभ्य २२३ पृष्ठपर्यन्तं 'द्वितीयोऽष्टकः' इत्यस्य स्थाने 'तृतीयोऽष्टकः' इति पठनीयम्।		
२०९	६	समिरोहत्सुयमा	सीमरोहत्सुयमा
२३१	३१	बोरकादेशः	वोरकादेशः
२३९	१९	असूर्यं	असूर्यं
२४२	१	हविष्प्रदातृभ्य	हविष्प्रदातृभ्यः[१]
२४५	१७	मार्गः	मार्गैः
२५९	१६	ह्रवसंज्ञायाम्	ह्रसंज्ञायाम्
२६०	७	भस्मसात्कुरु	भस्मसात्कुरु
२७६	२२	वयौहानौ	वयोहानौ
३००	१४	°र्गीभिः	°र्गीभिः
३२०	१२	उद्वह	उद्वह
३२४	२८	ब्रते	ब्रूते
३२५	१६	द्विर्वचनस्य	द्विवचनस्य
३२७	४	उतृदिः[२]	उतृदिर्[२]
३२८	२१	सतसतः	सतःसतः
३३१	१	प्रभूत	प्रभूतं
३४१	२५	°नाम्न्यकाहे	°नाम्न्येकाहे
३४२	२६	आङि '	' आङि
३४५	७	कलशः	कलशः।
३४९	१६	पञ्चम्यर्थ	पञ्चम्यर्थे
३५०	२०	थाथघञ्क्ता°	थाथघञ्क्त°
३५२	६	विप्रकृष्टाद्देशात्	विप्रकृष्टादेशात्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३९९	२६	त्वां	त्वा
४०७	८	इषुयुधी°	इषियुधी°
४०९	२९	महामते	महाव्रते
४३०	२४	याहीती	याहीति
४४०	२९	अनैकैः	अनेकैः
४४६	९	ध्रियत	द्रियत
४४७	२३	उमे	उभे
५०९	२३	धातोर्वेधः	धातोर्वेध
५६२	२५	ख-ग-ण-न-भ-मनुष्या	ख-ग-ण-भ-न मनुष्या
५७८	२६	°द्रुक्तृभेद	°दुक्तृभेद
५८१	१३	आपः	अपः
६२०	२२	मन्दयध्य	मन्दयध्यै
६२३	१८	चकर्थ	चकर्थ
६५९	५	कष्टिऽप्रः	कृष्टिऽप्रः
,,	,,	अभिऽभंतिम्	अभिऽभूतिम्
६६५	२	जानः	जातः
६६९	४	ओजः	आजेः
६९३	२४	द्विपाच्च°	द्विपाच्च°
७२१	८	निषण्णो	निषण्णो
७५६	१८	उपदेशे शिति	उपदेशेऽशिति
८२०	४	एतन्नामकस्यः	एतन्नामकस्य
९०७	२४	शु म्	शुभम्
९३६	१२	शत्रणाम्	शत्रूणाम्
९४७	९	यज्ञभमिम्	यज्ञभूमिम्
९५१	२१	नूनम्	नूनम्
९५२	१४	अद्भुतक्रत	अद्भुतक्रतू
९५२	१५	नंसा	तनंसा
९६९	१३	सदव	सदैव

द्वितीयभागे

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
११	२५	वृधि	वृधि
१५	१९	वसवः	वसवः
३१	२५	°मप्रयच्छ°	°मप्रयुच्छ°
३६	२	मधुपृचं	मधुपृचं
४६	२४	जिगीवां लक्ष°	जिगीवाँ लक्ष°
५१	२१	पीयुषम्	पीयूषम्
५५	९	दधिरे	दधिरे
५७	२२	अपः	अपः
५९	१९	वीराव्यावृण°	वीराव्याावृण°
५९	२०	भूम्यां	भूम्याः
६०	२२	यजत°	यजत°
६६	२१	यदाशुभिः	यदाशुभिः
७५	८	अशीत्या	अशीत्या
७७	२४	अतसाय्यः	अतसाय्यः
८९	१३	बृहस्पते	बृहस्पते
९६	१७		विश्वं
१०२	२४	शृण्वन्ति	शृण्वन्ति
१५०	१९	ᵛच	ᵛचः
१५४	२५	चाशन्होतर्नि	चोशन्होतर्नि
१६२	७	रयीणाम्	रयीणाम्
१६४	१०	तनूनाम्	तनूनाम्
१६४	१९	°त्यक्षी ईव	°त्यक्षीऽईव
१७५	४	सामगाऽईव	सामगाःऽईव
१७८	४	अपऽसु	अप्ऽसु
१९८	२४	प्रति	प्रति
२०३	२१	अमृक्ते	अमृक्ते
२०५	१३	याह्यर्वाङ	याह्यर्वाङ्
२०८	१२	वर्तनिम्	वर्तनिम्
२१३	२२	अश्नोते	अश्नोते[४]
२१७	२०	वृद्धिः	वृद्धिः
२२९	१२	जातवेदसे	जातऽवेदसे
२३५	२५	देवासः	देवासः
२४१	२८	अप्सु	अप्ऽसु
२५९	२८	पितराऽइव	पितराऽइव
२६८	२६	नयतु	नयतु[६]
२७१	६	सुम्नयुः	सुम्नऽयुः
२७४	२७	दीदिवांस°	दीदिवांस°
३०५	५	यद्वृत्त°	यद्वृत्त°
३३२	१२	सख्यं	सख्यं
३६२	३	अच्छ	अच्छ
३७१	२०	सर्मा	सर्मा
३८२	१७	यवम्	युवम्
३८६	६	अपऽसु	अप्ऽसु
३८९	१०	°र्देवेभि	°र्देवेभिः
४१९	८	मुग्रमूतये	°मुग्रमूतये
४४७	२३	उमे	उमे
५०२	१	°र्यज्ञियानां	°र्यज्ञियानां
५१४	१६	मित्राय	मित्रार्य
५२४	२१	त्वा	त्वा
५३०	२६	अरुपितम्	अरुपितम्
५४८	११	रथीऋतस्य	रथीऋतस्य
५५७	८	न्यङ्क्ता°	न्यङ्क्ता°
५६२	१०	स्य	स्य

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
५६३	७	अर्कैः	अर्कैः
५७६	२१	वयोऽधाः	वयःऽधाः
५७८	१	मघवा	मघवा
५८६	१६	दृळ्हा°	दृळ्हा°
५८७	६	सुतरणाँ	सुतरणाँ
६०७	१३	°विंवेनं तमि°	°विंवेनन्तमि°
६०७	१५	अविंऽवेनम्	अविंऽवेनन्
६१७	२	भुरण्यन्	भुरण्यन्
६१७	१३	प्रसितस्य	प्रसितस्य
६२०	२२	मन्दयध्य	मन्दयध्यै
६२०	२३	सुतीर्थाभयं	सुतीर्थाभयं
६३०	२०	कधि	कृधि
६४६	२०	चमसम्	चमसम्
६४७	२	गणं	गणं
६४७	४	गणम्	गणम्
६५०	१९	आनश	आनश
६५८	११	यतीषु	यतीषु
६६२	१२	अपामग्ने°	अपामग्ने°
६६४	४	२.१३	२.२४०
६६६	२	सुप्रयसा	सुप्रयसा
६६८	२०	नव्यसीभिः	नव्यसीभिः
६६९	१८	उपमस्य	उपऽमस्य
६७०	१	राजा	राजा
६७०	२	क्रतं	क्रतुं
६७०	४	उपमस्य	उपऽमस्य
६७१	१४	वरते	वरते
६७९	१५	रथम्	रथम्
६८०	२०	स्वधया	स्वधया
६८०	२०	पथः	पथः
६८३	९	अग्रं	अग्रं
६९७	१७	देवानां	देवीनां
७०८	७	अर्कैः	अर्कैः
७२७	५	शुनःऽशेपम्	शुनःशेपम्
७४६	२०	पितृनाम°	पितृनाम°
८३०	१५	घोषात्पुरु	घोषात्पुरू
८४१	९	एषे	आ । ईषे
८६२	२२	यादस्मिन्	यादस्मिन्
८९०	१०	जज्झतीरिव	जइझतीरिव
८९०	१२	जज्झतीःऽइव	जइझतीःऽइव
९०७	२३	दिदृक्षेण्यम्	दिदृक्षेण्यम्
९०९	१९	°मस्मान्नयत	°मस्मान्नयत
९१०	९	अज्जिभिः	अज्जिऽभिः
९२३	१२	सुऽअवसम्	सुऽअवसम्
९२३	२१	सुऽखेषु	सुऽखेषु
९३०	१९	स	सः
९४९	२	घृतयोनी	घृतयोनी
९५०	१४	इराऽवतीः	इराऽवतीः
९५६	१६	°मसुरः	°मसुरैः
९६९	१३	सदव	सदैव
९७०	१६	पततम्	पततम्
९७०	१७	वाजि वसू	वाजिनीवसू
९८५	११		°विश्वरूपाः
९८७	१८	देवानां	देवीनां
९८९	१९	सयैम्	सूयैम्